SRI PRATAP COLLEGE

LIBRARY

Class No. 891.233

Book No. Bh57J. V.I.

Accession No. 3537.

SHRIMAD-BHAGVAD-GEETA

CONTAINING EIGHT COMMENTARIES OF

KESHAVA KASHMIRI BHATTACHARYA called *Tattva-Prakashika*, MADHU-SOODAN SARASVATI called *Goodhartha-Deepika*, SHANKARANAND called *Tatparya-Bodhini*, SHREEDHARA SWAMI called *Subodhini*, SADANAND called *Bhawa-Prakasha*, DHANAPATI SOORI called *Bhashyotkarsh-Deepika*, DAIVADNYA PANDIT SURYA called *Para-martha-Prapa*, AND RAGHAVENDRA called *Artha-Samgraha*

First Part of the Second Series

Containing the First Six Adhyayas

EDITED BY

SHASTRI JEEVARAMA LALLURAMA

Bombay:

THE GUJARATI PRINTING PRESS

SHAKA 1834 A. D. 1912

Price Rs. 3-12-0

(*All Rights Reserved*)

PRINTED AND PUBLISHED
BY I. S. DESAI
GUJARATI PRINTING PRESS
SASSOON BUILDINGS—FORT,
BOMBAY.

श्रीमद्भगवद्गीता ।

केशवकाश्मीरिभट्टाचार्यकृत–तत्त्वप्रकाशिका–मधुसूदनसरस्वतीकृत–गूढार्थदीपिका–
शंकरानन्दकृत–तात्पर्यबोधिनी–श्रीधरस्वामिकृत–सुबोधिनी–सदानन्दकृत–
भावप्रकाश–धनपतिसूरिकृत–भाष्योत्कर्षदीपिका–दैवज्ञपण्डितसूर्यकृत–
परमार्थप्रपा–राघवेन्द्रकृता–ऽर्थसंग्रहे–त्यष्टटीकोपेता ।

द्वितीयगुच्छस्य प्रथमो भागः ।

प्रथमादिषडध्यायात्मकः ।

(रैक) जीवरामशास्त्रिभिः संशोधितः ।

मुम्बय्यां
'गुजराती' मुद्रणालयाधिपतिना स्वीये मुद्रणागारे मुद्रयित्वा प्रकाशितः ।

शकः १८३४, खिस्ताब्दः १९१२.

मूल्यं द्वादशाणकाधिकं रूपकत्रयम् ।

371.233
3R57 B J.
V. 1.
acc. no: 3537

विज्ञापनम् ।

पूर्वमस्माभिः सटीकैः श्रीभगवत्पादीयानन्दतीर्थीयरामानुजीयभाष्यैः पुष्टिमार्गीयरसतरङ्गिण्याख्यव्याख्यया च सहिता श्रीमद्भगवद्गीता संमुद्र्य प्रकाशिता । तस्यां च विदुषामादरातिशयं दृष्ट्वा पुनस्तादृश एवानेकेषां व्याख्यानानामेकत्र समावेशनरूपे व्यापारे—एकमेव वाक्यं परस्परविरुद्धसिद्धान्तवादिभिः कथं स्वस्वसिद्धान्तसमर्थकतया स्वाविरोधितया वोपवर्ण्यते, एकसिद्धान्तानुसारिभिरपि परस्परप्रदर्शितयुक्त्युपमर्दे च कथं संनह्यते इत्यादिदर्शनकुतूहलजुषां, माध्यस्थ्यमवलम्ब्य तत्त्वं बुभुत्सूनां च विपश्चितां तत्तदभिलषितकर्मणि सौकर्यातिशयं संपादयितुं—वयं प्रावर्तिष्महि ।

अयं च श्रीमद्भगवद्गीताया द्वितीयो गुच्छस्त्रिभिः खण्डैः प्रकाशितः स्यात् । अस्मिन् निम्बार्कमतानुसारिणी तत्त्वप्रकाशिका, अद्वैतसिद्धान्तानुसारिण्यः मधुसूदनी शंकरानन्दी श्रीधरी सदानन्दी भाष्योत्कर्षदीपिका परमार्थप्रपेति षट्, मध्वमतानुसारी राघवेन्द्रयतिकृतोऽर्थसंग्रहश्चेत्यष्टौ व्याख्याः समावेशिताः । अस्य द्वितीयगुच्छस्य पत्राणि षोडश शतानि भवेयुरित्यनुमिमीमहे। तत्र षडध्यायात्मकं प्रथमं खण्डमधुना प्रकाश्यते । अत्र चतुर्णामध्यायानां परिशुद्धिरस्मत्प्रार्थनामनुरुध्य श्रीयुतपण्डित (रैक) जीवरामशास्त्रिभिः कृता । ततस्तेषु वाराणसींगतेषु पञ्चमाध्यायादिपरिशोधनमस्मन्मुद्रणालयस्थैरेव शास्त्रिभिः कारितम् । अस्य द्वितीयमपि खण्डमचिरेणैव प्रकाशयिष्यामः ।

प्रकाशकः ।

ॐ

तत्सद्ब्रह्मणे नमः

श्रीवेदव्यासप्रणीतमहाभारतान्तर्गता

श्रीमद्भगवद्गीता

तत्त्वप्रकाशिका (निम्बार्क)-मधुसूदनी-शङ्करानन्दी-श्रीधरी-सदानन्दी
(भावप्रकाश)-भाष्योत्कर्षदीपिका-परमार्थप्रपा-मध्वसम्प्र-
दायिनी राघवेन्द्रविवृत्याद्यष्टटीकोपेता।

प्रथमषट्कं (कर्मकाण्डम्)

प्रथमोऽध्यायः ॥ १ ॥

धृतराष्ट्र उवाच—धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

श्रीकेशवाचार्यविरचिता—तत्त्वप्रकाशिकाटीका

यो मायागुणदोषलेशरहितः स्वाभाविकैः सद्गुणैः
स्वातन्त्र्याखिलविज्ञताद्यगणितैर्युक्तोऽब्जजादिस्तुतः ॥
भक्ताभीष्टप्रदो रमैकरमणो वेदैकगम्यो हि यः
तं वन्दे मनसा गिरा च शिरसा गोपीप्रियं श्रीहरिम् ॥ १ ॥
यस्य श्रीकरुणार्णवस्य करुणालेशेन बालो ध्रुवः
स्वेष्टं प्राप्य समार्यधाम समगाद्रङ्कोऽप्यविन्दच्छ्रियम् ॥
याता मुक्तिमजामिलादिपतिताः शैलोऽपि पूज्योऽभवत्
तं श्रीमाधवमाश्रितेष्टदमहं नित्यं शरण्यं भजे ॥ २ ॥
श्रुतीनां सूत्राणां स्मृतिनिखिलवेदानुवचसां
परं हार्दं युक्तं ह्यखिलचिदचिद्भिन्नमपि च ॥
अभिन्नं स्वाभाव्याद्गुणि च परमं ब्रह्मकमिदं
समादिष्टं यैस्तानपि सततमीडे गुरुवरान् ॥ ३ ॥

संसाररोगशमने खलु निम्बवद्यो हार्दान्धकारहरणेऽर्कवदेव यश्च ॥
श्रीकृष्णपादपरिचारणतुष्टचेता निम्बार्कदेशिकवरः स हि मे गतिः स्यात् ॥ ४ ॥
श्रीश्रीनिवासमाचार्यं गुरुं श्रीगङ्गलाभिधम् ॥
प्रणम्य क्रियते गीताव्याख्या तत्त्वप्रकाशिका ॥ ५ ॥

अथ स्वभावतोऽपास्ताखिलाविद्याक्लेशकर्मजन्मादिषड्भावसत्त्वादिगुणकार्यसम्बन्धः सत्यज्ञानानन्तस्वरूपो ज्ञानशक्तिबलैश्वर्यतेजोवीर्यवात्सल्यौदार्यकारुण्यक्षमादयामाधुर्यलावण्यमार्दवाद्यनन्तकल्याणगुणमहोदधिः समस्तक्षेत्रज्ञप्रकृतिकालकर्मनियन्ता अतिशयसाम्यवर्जितो विष्वक्सेनगरुडादिनित्यमुक्तैर्निषेवितो ब्रह्मरुद्रेन्द्राद्यचिन्त्यमहिमा तद्वन्द्यो वेदान्तैकवेद्यो जगज्जन्मादिहेतुः प्रणतार्त्तिक्षपणस्वभावः उभयविभूतिर्भगवाञ्छ्रीपुरुषोत्तमो देवासुरसंग्रामनिहतावनितलावतीर्णराजन्यरूपदैत्यदानवचमूवृन्दाक्रान्तभूभूरिभारोत्तरणाय ब्रह्मरुद्रादिदेवतावृन्दैः स्तोत्राराधनप्रार्थितो भूभारोत्तारणाय यादवकुल आविर्बभूवेति सर्वजनप्रसिद्धं भगवदवतारप्रयोजनं । नैतद्भगवतो मुख्यं तात्पर्य्यं यतस्तस्य वराहपृथुपरशुरामादिवदंशकलामात्रेणापि भूभारमपहर्तुं समर्थत्वात् 'पृथिवीं चान्तरिक्षं च दिवं च पुरुषोत्तमः । विचेष्टयति भूतानि क्रीडन्निव सनातनः ॥ कालचक्रं जगच्चक्रं युगचक्रं च केशवः । आत्मयोगेन भगवान्परिवर्तयतेऽनिशम् ॥ कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च । ईशते भगवानेकः सत्यमेतद्ब्रवीमि ते ' इति महाभारतोक्तात्यद्भुतप्रभावस्य भगवतोऽचिन्त्यशक्तेर्न केवलं भूभारहरणायैवाविर्भावः । किन्तु अक्षपादकणादसाङ्ख्यजैमिन्यादिभिः शास्त्रकृद्भिर्हैरण्यगर्भपाशुपतसौरगाणपतमतवादिभिश्च प्रणीतैः, परतत्त्वापह्नवपरैरन्यविषयैः शास्त्रैः स्वभक्तिज्ञानहीनान्संकीर्णमतीन् जीवान्वीक्ष्य कृष्णद्वैपायनरूपेण परतत्त्वप्रकाशकशारीरकमीमांसादिसच्छास्त्रनिरूपणेनोक्तमतानि निरस्तानि । तथापि भागवतधर्मविरोध्यसुरराजन्यप्राये लोके भागवतधर्मप्रवृत्त्यभावमेवान्वीक्ष्य भवाब्धिपतितजनता तत्तरणासाधारणोपायस्वज्ञानभक्तिप्रवृत्त्यर्थं कालिमलापहराण्यतिमानुषाणि कर्माणि कर्त्तुं स्वदर्शने चातकवदत्युत्कण्ठितचेतसां स्वाश्रितानन्यरासिकभक्तानां नन्दयशोदागोपीगोपाक्रूरोद्धवादीनामतिकमनीयमाधुर्यलावण्यादिगुणनिधिमूर्त्तिदर्शनमधुरालापमनोहरलीलाभिर्मनोऽभिलाषपूर्त्त्यर्थं च भूभारोद्धरणव्याजेन वसुदेवदेवकीभक्तिवशीभूतोऽजहद्गुणशक्तिः पूर्णानन्दरूपेणैव तयोः पुत्रभावेनाविर्बभूव । तथोक्तं श्रीभागवते कुन्तीस्तुतौ पक्षान्तराण्युपन्यस्य 'भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि करिष्यन्निति केचन' इत्युक्त्वा तच्छ्रवणादिफलकथनेनास्यैव पक्षस्य सिद्धान्तितत्वात् । तत्र स्वस्वरूपज्ञानोपदेशेन तावभिनन्द्य नन्दव्रजं गत्वा नन्दयशोदादीन्सुखयित्वा पूतनादिकेश्यन्तासुरसंहरणवत्सपालनकालियदमनगोवर्द्धनोद्धरणरासलीलादिव्याजेन चतुर्मुखसहस्राक्षपुष्पधन्वादिगर्वापहरणरूपां निरङ्कुशां पारमेश्वरीं लीलां विधाय लीलयैव कंसादीन्निहत्य पितृविमोचनं गुरोर्विद्याग्रहणं तत्सुतप्रदानेनानृण्यरूपस्वधर्मं च प्रदर्श्य यवनान्निहत्य द्वारकामेत्य तत्र रुक्मिणीहरणमहोक्षदमननरकासुरसंहारणादिनानाश्चर्यविवाहान्कृत्वा यादवकुन्तीसुतादिस्वभक्तोत्कर्षं दर्शयितुं भक्तिकण्टकान् पौण्ड्रकजरासन्धचैद्यशाल्वादीन्भूभाररूपान्हतवान् । अवशिष्टं भूभारमपाकर्तुं दुर्योधनार्जुनभीमादीन्निमित्तीकृत्य महाभारतयुद्धारम्भं कारयामास । तत्र स्वप्रियभक्तकुन्तीसुतानुकम्पयाऽर्जुनसारथ्यमङ्गीकृतवान् तदोभयसैन्यमध्ये स्वजनबन्धुगुरुवधपातकभयेन युद्धान्निवृत्य रथोपाविष्टं युद्धकरणे कुलघ्नतारूपो महान्दोषो, युद्धत्यागे स्वधर्महानिः स्यादित्युभयथाऽप्यनिष्टमेव कथं मे श्रेयः स्यादिति शोकमोहसागरे निमग्नमर्जुनमुपलक्ष्य सर्वमुमुक्षुभक्तानुकम्पया ज्ञानकर्मोपासनात्मकत्रिकाण्डविषयकसकलवेदसारभूतगीताशास्त्रोपदेशैस्तत उज्जहार । तच्च स्वयमेवार्जुनो वक्ष्यति 'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादा-

न्मयाऽच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ' इति । तच्च गीताशास्त्रं पञ्चचत्वारिंशदधिकसप्तशतश्लोकैर्महाभारते भगवता व्यासेन निबद्धं । तदुक्तं भीष्मपर्वणि ' षट्शतानि सविंशानि श्लोकानां प्राह केशवः । अर्जुनः सप्तपञ्चाशत्सप्तषष्टिं तु सञ्जयः ॥ धृतराष्ट्रः श्लोकमेकं गीताया मानमुच्यते' । तत्र शोकनिवृत्तिकारणमात्मस्वरूपगुणादियाथात्म्यज्ञानमेव " तरति शोकमात्मवित् " इति श्रुतेः । आत्मा द्विविधः जीवात्मपरमात्मभेदात् । तत्र जीवक्षेत्रज्ञपुरुषादिशब्दाभिधेयो ज्ञानस्वरूपो ज्ञातृत्वादिधर्माश्रयः सर्वदा परमेश्वरायत्तस्वरूपस्थितिप्रवृत्तिकोऽणुपरिमाणकः प्रतिशरीरं भिन्नो बन्धमोक्षार्हं आद्यः । तद्बन्धहेतुः सत्त्वादिगुणमयप्रधानप्रकृतिमायादिशब्दवाच्यं देहेन्द्रियादिरूपेण परिणतमचेतनद्रव्यम् । सर्वज्ञः सर्वशक्तिः सत्यज्ञानानन्तस्वरूपः सर्वात्मा प्रकृतिपुरुषकर्मकालनियन्ताऽतिशयसाम्यवर्जितः सर्वाऽऽराध्यः स्वतन्त्रसत्ताश्रयः सर्वत्रैकस्वरूपो हरिनारायणादिशब्दाभिधेयः परब्रह्मभूतो भगवान् वासुदेवो द्वितीयः । तत्प्राप्त्यसाधारणहेतुस्तदनन्यभक्तियोग इति साक्षाद्भगवतोपदिष्टं तदेतदध्यायषट्कत्रयात्मकं गीताशास्त्रमप्रामाण्यकारणबुद्धिमान्द्यदुराग्रहादिदोषचतुष्टयशून्यत्वात्सर्वविदुषां प्रमाणतममत एव तस्य सर्वशास्त्रश्रैष्ठ्यमुक्तं वाराहे ' सारथ्यमर्जुनस्यादौ कुर्वन्गीतामृतं ददौ । लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥ संसारसागरं घोरं तर्त्तुमिच्छति यो नरः । गीतानावं समारुह्य पारं याति सुखेन सः ॥ गीताज्ञानं श्रुतं नैव सदैवाभ्यासयोगतः । मोक्षमिच्छति मूढात्मा याति बालस्य हास्यताम् ॥ ये शृण्वन्ति पठन्ति च गीताशास्त्रमहर्निशम् । न ते वै मानुषा ज्ञेया देवरूपा न संशयः ॥ धिक्तस्य मानुषं देहं धिग्ज्ञानं धिकुलीनताम् । गीतार्थं यो न जानाति नाधमस्तत्परो जनः ॥ गीतागीतं न यज्ज्ञानं तद्विद्ध्यसुरसंमतम् । तन्मोघं धर्मरहितं वेदवेदान्तगर्हितम् ॥ तस्माद्धर्ममयी गीता सर्वज्ञानप्रयोजिका । सर्वशास्त्रमयी यस्मात्तस्माद्गीता विशिष्यते ॥' इत्यादिना । अत एव बहुभिराचार्यैः स्वस्वमतानुसारेण व्याख्यातमिदं शास्त्रं परन्तु तेषां सर्वज्ञत्वाभावात्तद्व्याख्यानानां शास्त्रविरुद्धांशेनापि युक्तत्वान्न सर्वमुमुक्षूपादेयत्वं, किन्तु ' उदयव्यापिनी ग्राह्या कुले तिथिरुपोषणे । निम्बार्को भगवान्येषां वाञ्छितार्थप्रदायकः ' इति भविष्यपुराणे श्रीव्यासवचनाच्छ्रीनिम्बार्काचार्यस्यैव भगवच्छब्दाभिहितत्वेन सर्वज्ञत्वात्सर्वेभ्यः प्राचीनाचार्यत्वाच्च तद्व्याख्यानस्यैव सर्वश्रुतिसूत्राविरुद्धत्वेन परमश्रेयोऽर्थिभिरुपादेयत्वं । तस्य त्वतिगम्भीरार्थतया शारीरकमीमांसादिसर्ववेदान्तोक्तसाधनसम्पन्नसूक्ष्मबुद्ध्यधिकारिकत्वेन मन्दमतीनां तत्र प्रवेशानर्हत्वात्तेषां तदर्थजिज्ञासूनामल्पप्रयत्नानां मुमुक्षूणामुपकारायाञ्जसा तदुक्तार्थोपलब्धये तच्चरणस्मरणैकबलेन तत्कृपालब्धतदुक्तसिद्धान्तेन मया श्रीभगवद्गीताटीका सुगमा तत्त्वप्रकाशिकाभिधा यथामति विधीयते । तया श्रीवासुदेवो भगवान्प्रसीदतु । तत्र तावद् ' अशोच्यानन्वशोचस्त्वम् ' इत्यारभ्यार्जुनस्य शोकमोहापनोदनाय भगवदुपदेशं वर्णयितुमर्जुनस्य सहेतुकशोकदर्शनाय प्रथमाध्यायारम्भः । तत्र च स्वपुत्रजयाभिलाषी नष्टदृष्टिरर्जुनस्य गिरीशतोषणदिव्यास्त्रलाभो घोषयात्रायां दुर्योधनस्य गन्धर्वेभ्यो मोचनं विराटनगर उत्तरगोग्रहे कौरवोष्णीषादिहरणमित्यादिबहुशः श्रुताद्भुतपौरुषशङ्कितात्मा धृतराष्ट्रस्तदनुकम्पया श्रीवेदव्यासदत्तमहाभारतसर्ववृत्तान्तविषयकज्ञानदृष्टिं सञ्जयं पृच्छति स्मेत्याह वैशम्पायनो जनमेजयं प्रति–धृतराष्ट्र उवाचेति । प्रश्नमेवाह–धर्मक्षेत्र इति । युयुत्सवो योद्धुमिच्छवो मामका मम पुत्रा दुर्योधनादयः पाण्डवाश्च युधिष्ठिरादयः धर्मक्षेत्रे धर्मोत्पत्तिभूमौ " कुरुक्षेत्रं वै देवयजनम् " इति श्रुतेः ' ब्रह्मवेदी कुरुक्षेत्रं पुण्यं ब्रह्मर्षिसेवितम् । तस्मिन्न् वसन्ति ये राजन्न ते शोच्याः कथञ्चन ' इत्यादिमहाभारतादिप्रसिद्धमाहात्म्ये समवेताः किमकुर्वत । उभयसैन्यमध्ये दिव्यास्त्रविदो महाप्रबलवीरान्भीष्मार्जुनादीन्दृष्ट्वा

युद्धव्यवसायं त्यक्त्वा शममास्थिता वा युद्धोद्योगमेव कुर्वन्तः स्थिता इति प्रश्नार्थः । धर्मक्षेत्र इत्यस्य अधार्मिका अपि मत्पुत्राः कपटापहृतं पाण्डवराज्यं पितृवधजन्यकोपाविष्टपरशुरामकृतपितृनिष्कृतिहेतुक्षत्रियवधतद्रुधिरापूरितकुण्डपञ्चकतर्पितभृग्वादिपितृसन्तुष्टिदत्ततत्प्रार्थितकुण्डतत्क्षेत्रपावनत्ववरयोगाद्देवयजनभूमित्वात्कुरुराज्ञस्तपसा च जातधर्मोत्पादकत्वतद्वृद्धिहेतुत्वरूपकुरुक्षेत्रप्रभावाद्धर्मबुद्ध्युत्पत्त्या यदि तेभ्य एव दद्युस्तर्हि युद्धं विनैव नष्टप्रायाः स्युः । अथवा पूर्वमेव धार्मिकाः पाण्डवाः धर्मक्षेत्रसंगत्या धर्मवृद्ध्या स्वजनबन्धुजनवधनिमित्तं राज्यं यदि नेच्छेयुश्चेत्तर्हि सपुत्रः सुखी स्यामित्यभिप्रायः ॥ १ ॥

मधुसूदनसरस्वतीविरचिता–मधुसूदनी टीका

श्रीगणेशायनमः ॥ ॐनमः परमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीमद्रामचन्द्राय ॥ भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः ॥ प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ॥ १ ॥ सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् ॥ परं निश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥ २ ॥ सच्चिदानन्दरूपं तत्पूर्णं विष्णोः परं पदम् ॥ यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥ ३ ॥ कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात् ॥ तद्रूपाष्टादशाध्यायैर्गीता काण्डत्रयात्मिका ॥ ४ ॥ एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् ॥ कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः ॥ ५ ॥ यतः समुच्चयो नास्ति तयोरतिविरोधतः ॥ भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्तिता ॥ ६ ॥ उभयानुगता सा हि सर्वविघ्नापनोदिनी ॥ कर्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥ ७ ॥ तत्र तु प्रथमे काण्डे कर्म तत्त्यागवर्त्मना ॥ त्वंपदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते ॥ ८ ॥ द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ॥ भगवान् परमानन्दस्तत्पदार्थोवधार्यते ॥९॥ तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् ॥ एवमप्यत्र काण्डानां सम्बन्धोस्ति परस्परम् ॥१०॥ प्रत्यध्यायं विशेषस्तु तत्र तत्रैव वक्ष्यते ॥ मुक्तिसन्धानपर्वेदं शास्त्रार्थत्वेन कथ्यते ॥ ११ ॥ निष्कामकर्मानुष्ठानं त्यागात्काम्यानिषिद्धयोः ॥ तत्रापि परमो धर्मो जपस्तुत्यादिकं हरेः ॥ १२ ॥ क्षीणपापस्य चित्तस्य विवेके योग्यता यदा ॥ नित्यानित्यविवेकस्तु जायते सुदृढस्तदा ॥ १३ ॥ इहामुत्रार्थवैराग्यं वशीकाराभिधं क्रमात् ॥ ततः शमादिसम्पत्त्या संन्यासोनिष्ठितोभवेत् ॥ १४ ॥ एवं सर्वपरित्यागान्मुमुक्षा जायते दृढा ॥ ततोगुरूपसदनमुपदेशग्रहस्ततः ॥ १५ ॥ ततः सन्देहहानाय वेदान्तश्रवणादिकम् ॥ सर्वमुत्तरमीमांसाशास्त्रमत्रोपयुज्यते ॥१६॥ ततस्तत्परिपाकेण निदिध्यासननिष्ठता ॥ योगशास्त्रं तु सम्पूर्णमुपक्षीणं भवेदिह ॥१७॥ क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत् ॥ साक्षात्कारो निर्विकल्पः शब्दादेवोपजायते ॥ १८ ॥ अविद्याविनिवृत्तिस्तु तत्त्वज्ञानोदये भवेत् ॥ ततआवरणे क्षीणे क्षीयेते भ्रमसंशयौ ॥ १९ ॥ अनारब्धानि कर्माणि नश्यन्त्येव समन्ततः ॥ नत्वागामीनि जायन्ते तत्त्वज्ञानप्रभावतः ॥ २० ॥ प्रारब्धकर्मविक्षेपाद्वासना तु न नश्यति ॥ सा सर्वतो बलवता संयमेनोपशाम्यति ॥ २१ ॥ संयमो धारणा ध्यानं समाधिरिति यत्त्रिकम् ॥ यमादिपञ्चकं पूर्वं तदर्थमुपयुज्यते ॥ २२ ॥ ईश्वरप्रणिधानात्तु समाधिः सिध्यति द्रुतम् ॥ ततो भवेन्मनोनाशो वासनाक्षयएव च ॥२३॥ तत्त्वज्ञानं मनोनाशो वासनाक्षयइत्यपि ॥ युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढा भवेत् ॥ २४ ॥ विद्वत्संन्यासकथनमेतदर्थं श्रुतौ कृतम् ॥ प्रागसिद्धोयएवांशो यत्नः स्यात्तस्य साधने ॥ २५ ॥ निरुद्धे चेतसि पुरा सविकल्पसमाधिना ॥ निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥ २६ ॥ व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः ॥ अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः ॥ २७ ॥ एवंभूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनाम् ॥ गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च कथ्यते ॥ २८ ॥ अतिवर्णाश्रमी जीवन्मुक्तआत्मरतिस्तथा ॥ एतस्य कृतकृत्यत्वाच्छास्त्रमस्मान्निवर्तते ॥ २९ ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ३० ॥ इत्यादिश्रुतिमानेन कायेन मनसा

गिरा ॥ सर्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते ॥ ३१ ॥ पूर्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत् ॥ अन्यथा विघ्नबाहुल्यात्फलसिद्धिः सुदुर्लभा ॥ ३२ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः ॥ अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः ॥ ३३ ॥ यदि प्राग्भवसंस्कारस्याचिन्त्यत्वात्तु कश्चन ॥ प्रागेव कृतकृत्यः स्यादाकाशफलपातवत् ॥ ३४ ॥ न तंप्रति कृतार्थत्वाच्छास्त्रमारब्धुमिष्यते ॥ प्राक्सिद्धसाधनाभ्यासा दुर्ज्ञेया भगवत्कृपा ॥ ३५ ॥ एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये ॥ विधेया भगवद्भक्तिस्तां विना सा न सिध्यति ॥ ३६ ॥ जीवन्मुक्तिदशायां तु न भक्तेः फलकल्पना ॥ अद्वेष्टृत्वादिवत्तेषां स्वभावो भजनं हरेः ॥ ३७ ॥ आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ॥ कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥ ३८ ॥ तेषां ज्ञानी नित्ययुक्तएकभक्तिर्विशिष्यते ॥ इत्यादिवचनात्प्रेमभक्तोयं मुख्य उच्यते ॥ ३९ ॥ एतत्सर्वं भगवता गीताशास्त्रे प्रकाशितम् ॥ अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम् ॥ ४० ॥ निष्कामकर्मानुष्ठानं मूलं मोक्षस्य कीर्तितम् ॥ शोकादिरासुरः पाप्मा तस्य च प्रतिबन्धकः ॥ ४१ ॥ यतः स्वधर्मविभ्रंशः प्रतिषिद्धस्य सेवनम् ॥ फलाभिसन्धिपूर्वा वा साहंकारा क्रिया भवेत् ॥ ४२ ॥ आविष्टः पुरुषो नित्यमेवमासुरपाप्मभिः ॥ पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम् ॥ ४३ ॥ दुःखं स्वभावतो द्वेष्यं सर्वेषा प्राणिनामिह ॥ अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥ ४४ ॥ अनादिभवसन्तानानि (रू) गूढं दुःखकारणम् ॥ दुस्त्यजं शोकमोहादि केनोपायेन हीयताम् ॥ ४५ ॥ एवमाकाङ्क्ष्याविष्टं पुरुषार्थोन्मुखं नरम् ॥ बुबोधयिपुराहेदं भगवान् शास्त्रमुत्तमम् ॥ ४६ ॥ तत्राशोच्यानन्वशोचस्त्वमित्यादिना शोकमोहादिसर्वासुरपाप्मनिवृत्त्युपायोपदेशेन स्वधर्मानुष्ठानात्पुरुषार्थः प्राप्यतामिति भगवदुपदेशः सर्वसाधारणः । भगवदर्जुनसंवादरूपा चाख्यायिका विद्यास्तुत्यर्था जनकयाज्ञवल्क्यसंवादादिवदुपनिषत्सु कथं प्रसिद्धमहानुभावोप्यर्जुनो राज्यगुरुपुत्रमित्रादिष्वहमेषां ममैत इत्येवम्प्रत्ययनिमित्तस्नेहनिमित्ताभ्यां शोकमोहाभ्यामभिभूतविवेकविज्ञानः स्वतएव क्षत्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम । परधर्मं च भिक्षाजीवनादि क्षत्रियंप्रति प्रतिषिद्धं कर्तुं प्रववृते । तथा च महत्यनर्थे मग्नोऽभूत् भगवदुपदेशाच्चेमां विद्यां लब्ध्वा शोकमोहावपनीय पुनः स्वधर्मे प्रवृत्तः कृतकृत्यो बभूवेति प्रशस्ततरेयं महाप्रयोजना विद्येति स्तूयते । अर्जुनोपदेशेन चोपदेशाधिकारी दर्शितः । तथा च व्याख्यास्यते स्वधर्मप्रवृत्तौ जातायामपि तत्प्रच्युतिहेतुभूतौ शोकमोहौ 'कथं भीष्ममहं संख्ये' इत्यादिनार्जुनेन दर्शितौ अर्जुनस्य युद्धाख्ये स्वधर्मे विनापि विवेकं किन्निमित्ता प्रवृत्तिरिति 'दृष्ट्वा तु पाण्डवानीकम्' इत्यादिना परसैन्यचेष्टितं तन्निमित्तमुक्तम् । तदुपोद्घातत्वेन धृतराष्ट्रप्रश्नः संजयंप्रति धर्मक्षेत्रइत्यादिना श्लोकेन। तत्र धृतराष्ट्रउवाचेति वैशम्पायनवाक्यं जनमेजयंप्रति । पाण्डवानां जयकारणं बहुविधं पूर्वमाकर्ण्य स्वपुत्रराज्यभ्रंशाद्भीतो धृतराष्ट्रः पप्रच्छ स्वपुत्रजयकारणमाशंसन् पूर्वे युयुत्सवो योद्धुमिच्छवोपि सन्तः कुरुक्षेत्रे समवेताः सङ्गताः मामकाः मदीयाः दुर्योधनादयः पाण्डवाश्च युधिष्ठिरादयः किमकुर्वत किं कृतवन्तः किं पूर्वोद्भूतयुयुत्सानुसारेण युद्धमेव कृतवन्तः उत केनचिन्निमित्तेन युयुत्सानिवृत्त्यान्यदेव किञ्चित्कृतवन्तः भीष्मार्जुनादिवीरपुरुषनिमित्तं दृष्टभयं युयुत्सानिवृत्तिकारणं प्रसिद्धमेव । अदृष्टभयमपि दर्शयितुमाह—धर्मक्षेत्रइति । धर्मस्य पूर्वमविद्यमानस्योत्पत्तेर्विद्यमानस्य च वृद्धेर्निमित्तं सत्यस्येव क्षेत्रं सर्वश्रुतिस्मृतिप्रसिद्धं बृहस्पतिरुवाच याज्ञवल्क्यं "यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्" इति जाबालश्रुतेः "कुरुक्षेत्रं वै देवयजनम्" इति शतपथश्रुतेश्च। तस्मिन् गताः पाण्डवाः पूर्वमेव धार्मिकाः यदि पक्षद्वयहिंसानिमित्तादधर्माद्भीता निवर्तेरंस्ततः प्राप्तराज्या एव मत्पुत्राः। अथवा धर्मक्षेत्रमाहात्म्येन पापानामपि मत्पुत्राणां कदाचिच्चित्तप्रसादः स्यात्तदा च तेऽनुतप्ताः प्राक्कपटोपात्तं राज्यं पाण्डवेभ्यो यदि दद्युस्तर्हि विनापि युद्धं हताएवेति स्वपुत्रराज्यलाभे पाण्डवराज्यालाभे च दृढतरमुपायमपश्यतोमहानुद्वेगएव

प्रश्नबीजम् । संजयेति च सम्बोधनं रागद्वेषादिदोषान् सम्यग्जितवानसीतिकृत्वा निर्व्याजमेव कथनीयं त्वयेति सूचनार्थम् । मामकाः किमकुर्वतेत्येतावतैव प्रश्ननिर्वाहे पाण्डवाश्चेति पृथङ्निर्दिशन्पाण्डवेषु ममकाराभावप्रदर्शनेन तद्द्रोहमभिव्यनक्ति ॥ १ ॥

श्रीशङ्करानन्दसरस्वतीविरचिता–शङ्करानन्दी (तात्पर्यबोधिनी) टीका

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीदक्षिणामूर्तिगुरवेनमः ॥ ॐसत्यं ज्ञानमनन्तं यन्निष्कलं निष्क्रियं परम् ॥ अद्वितीयं निर्विशेषं ब्रह्म तत्समुपास्महे ॥ १ ॥ अधस्तान्मानवं दिव्यमुपरिष्टाद्गजाकृति ॥ परस्तात्तमसस्तेजः पुरस्तादस्तु नः सदा ॥ २ ॥ पञ्चाशद्वर्णरूपेण यया व्याप्तमिदं जगत् ॥ शब्दब्रह्ममयीं वाणीं भजेतां परदेवताम् ॥ ३ ॥ असंस्पृश्यैव प्रकृतिं विकृतिं च गुणैः सह ॥ यः सदा भाति मेन्तस्थस्तं सेवे कृष्णमीश्वरम् ॥ ४ ॥ सनन्दनं श्रीसनकं सनातनं सन्तं कुमारं च सनत्सुजातम् ॥ श्रीवामदेवं च शुकं महान्तं नमामि भक्त्या निजबोधसिद्धयै ॥ ५ ॥ भक्त्या श्रीशङ्कराचार्यं तच्छास्त्रं सद्गुरुं मुहुः ॥ नमामि शिरसा नित्यं सम्यग्ज्ञानोपपत्तये ॥ ६ ॥ भक्त्या प्रणम्य स्वगुरुमानन्दात्मसरस्वतीम् ॥ क्रियते श्रीमद्भगवद्गीतातात्पर्यबोधिनी ॥ ७ ॥ इह खलु भगवानमिततपोबलतेजःशक्तिसंपन्नः सर्वविद्यानिधिः सर्वज्ञचूडामणिः साक्षादपरः श्रीमन्नारायणः श्रीकृष्णद्वैपायनः परमकारुणिकाग्रगण्यः स्वयमतिकृपया भविष्यद्विद्वज्जनानामनतिप्रज्ञामाज्ञाय वर्णाश्रमिणां सकलपुरुषार्थसिद्धये तत्सिद्धिसाधनप्रकाशकमनन्तवेदराशिं ऋगादिभेदेन चतुर्धा विभज्य एकैकां शाखां पैलवैशम्पायनादिशिष्यप्रशिष्योपशिष्यपरम्पराद्वारासंवर्धयामास। तत्रापि वेदार्थस्य परमसूक्ष्मत्वादतिगूढत्वाद्दुर्विज्ञेयत्वाच्च तदर्थाधिगमाशक्तानां सत्पुरुषाणां धर्मादिसर्वपुरुषार्थसिद्धये 'भारतं पञ्चमो वेद' इति पञ्चमवेदत्वेन प्रसिद्धां धर्मादिसर्वपुरुषार्थतत्साधनप्रकाशनपरां भारतीं शतसाहस्रीं संहितां प्रवर्तयाञ्चकार। तस्या एतस्या एव संहितायामध्ये केवलं मुमुक्षूणामनाद्यविद्यातत्कार्यनिवृत्तिद्वारा विदेहकैवल्यफलसिद्धये ब्रह्मात्मैकत्वप्रतिपादनपरां कृष्णार्जुनसंवादरूपामद्वैतामृतवर्षिणीं गीतोपनिषन्नाम्नीं ब्रह्मविद्यां श्लोकानां सप्तशत्या अन्तरे च नक्षत्रमालायाश्चन्द्रमण्डलमिव स्थापयामास। तस्या एतस्यास्त्वध्ययने तदर्थग्रहणे तच्छ्रुतिजन्यज्ञाने तत्फलावाप्तौ चाधिकारी सदसद्विवेक्यधर्मभीरुश्चैहिकामुष्मिकसुखविमुखः शमादिषसम्पन्नो मुमुक्षुरेवेति निर्धारयितुं ब्रह्मविद्याश्रोतर्यर्जुने सदसद्विवेचनमधर्मभीरुत्वमैहिकामुष्मिकसुखवैमुख्यं शमदमादिसम्पत्तिं च प्रदर्शयितुं प्रथमाध्याय आरभ्यते। तत्रादौ पाण्डवानां धार्तराष्ट्राणां च युद्धाय सन्नद्धानां प्रवृत्तिं श्रोतुकामो धृतराष्ट्र उवाच—धर्मक्षेत्रइति । धर्मप्रधानत्वाद्धर्मप्रदत्वाद्वा धर्मक्षयाभावयतइति वा धर्मक्षेत्रं तस्मिन्धर्मक्षेत्रे वासमात्रेण धर्मतत्फलप्रदे कुरुक्षेत्रे युयुत्सवो युद्धं चिकीर्षवोऽतएव समवेताः समवायं प्राप्ताः सन्नद्धाः मामकाः दुर्योधनादयः पाण्डवाश्च किमकुर्वत किं कार्यं कृतवन्तः सञ्जय ! तद्ब्रूहीत्यर्थः । नन्वत्र युयुत्सवइति विशेषणबलेन समवेतानां तेषां कर्तव्यं कार्यं युद्धमेवेति युद्धस्यैव कर्तव्यत्वे प्रतीयमाने कथं युद्धं प्रवृत्तमिति प्रश्नमुत्सृज्य किमकुर्वत संजयेति धृतराष्ट्रप्रश्नोऽनुपपन्नइति न शङ्कनीयं । धर्मक्षेत्रइत्युक्तत्वात्तत्क्षेत्रमहिम्ना स्वयमेव धर्मपरो भूत्वा दुर्योधनस्तत्पित्र्यं धर्म्यमर्धराज्यं तेषां दत्तवान् वा उत तस्यैव महिम्ना प्रवृद्धधर्मा सन् धर्मपुत्रः स्वजनवधो नरकायेति नरकभयाद्युद्धादुपरतो वा सर्वे युद्धमेव कृतवन्तो वा यत्तत्र प्रवृत्तं तद्वदेत्युपपन्नतरः प्रश्नइत्यर्थः ॥ १ ॥

श्रीधरस्वामिविरचिता–श्रीधरी (सुबोधिनी) टीका

श्रीगणेशाय नमः ॥ श्रीमज्जगद्गुरवे नमः ॥ श्रीकृष्णाय नमः ॥'शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ॥ दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥ १ ॥ श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ॥ तद्भक्तियन्त्रितः कुर्वे

गीताव्याख्यां सुबोधिनीम् ॥ २ ॥ भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ॥ यथामति समालोच्य गीताव्याख्यां समारभे ॥ ३ ॥ गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः । सेयं सुबोधिनीटीका सदा ध्येया मनीषिभिः ॥ ४ ॥' इह खलु सकललोकहितावतारः सकलवन्दितचरणः परमकारुणिको भगवान् देवकीनन्दनस्तत्त्वज्ञानविजृम्भितशोकमोहविभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसन्धिपरमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबन्ध । तत्र च प्रायशः श्रीकृष्णमुखान्निःसृतानेव श्लोकानालिखन् कांश्चित्तत्संगतये स्वयं व्यरचयत् यथोक्तं गीतामाहात्म्ये—'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ॥ या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता' इति तत्र तावत् 'धर्मक्षेत्रे' इत्यादिना 'विषीदन्निदमब्रवीत्' इत्यन्तेन ग्रन्थेन श्रीकृष्णार्जुनसंवादप्रस्तावाय कथा निरूप्यते—**धर्मक्षेत्र इति** । भो सञ्जय ! धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तः समवेताः मिलिताः सन्तः किं कृतवन्तः ॥ १ ॥

सदानन्दविरचिता—सदानन्दी (भावप्रकाशः) टीका

ॐ श्रीगणेशायनमः ॥ ॐ नमः सच्चिदानन्दाय ॥ ॐ नमः सरस्वत्यै ॥ ॐ नमः शिवाय सपरिवाराय ॥ ॐ नमोब्रह्मणे ॥ ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमो वंशर्षिभ्यो नमो गुरुभ्य आचार्येभ्यः ॥ ॐसत्यं ज्ञानं विशुद्धं परमसुखवपुर्नित्यमुक्तस्वभावं स्वाध्यस्ताज्ञानशक्तिं प्रविशति कलया ब्रह्म यद्वेदवेद्यम् ॥ अन्तर्यामीतिगीतं शतपथवचनैस्तन्महोऽनन्तमीड्यं श्रीमत्कृष्णाभिधानं निखिलभयहरं संश्रयेऽहं हृदिस्थम् ॥ १ ॥ कृष्णाकृष्टा सभायां सपदि कुरुपतेर्यं शरण्यं श्रितासीन्मुक्ता दुःखाद्गजेन्द्रो जलचरविवशो यं स्मरन्पाशमुक्तः ॥ कारागारे निरुद्धाः शरणमुपगता यं नृपा मुक्तबन्धा आसंस्तं श्रीमुकुन्दं सततमहमजं नौमि मुक्तेर्निधानम् ॥ २ ॥ अद्वैतबोधाब्जसहस्ररश्मिः शान्तेर्लतायाः किल कल्पवृक्षः ॥ संसारसन्तापविनाशचन्द्रः कृष्णः सदाह्लादकरो ममास्तु ॥ ३ ॥ नत्वा श्रीभाष्यकारं श्रुतिकमलरविं तन्मते संप्रविष्टान्ब्रह्माद्वैतात्मनिष्ठान्सकलशुभगुणान् श्रीगुरूंश्च प्रणम्य ॥ व्यासं कृष्णावतारं विमलगुणयुतं भूरिभावेन नत्वा गीताभावप्रकाशं स्फुटविमलपदं कृष्णमाराध्य कुर्वे ॥ ४ ॥ सृष्टेः पूर्वं परं ब्रह्म नारायणपदाभिधम् ॥ आसीत्तदीक्षणाज्जातं जगत्सर्वं चराचरम् ॥ ५ ॥ अप एव ससर्जादौ तास्ववात्सीद्यतः स्वयम् ॥ तेन नारायणः प्रोक्तः परब्रह्माख्य ईश्वरः ॥ ६ ॥ ससृष्ट्वेदं जगत्सर्वं चिकीर्षुस्तस्य च स्थितिम् ॥ ससर्ज ब्रह्मरूपेण मरीच्यादिप्रजापतीन् ॥ ७ ॥ प्रवृत्तिलक्षणं धर्मं ग्राहयामास तान्मुनीन् ॥ ससंसारस्थितेर्हेतुर्धर्मः स्वर्गादिसाधनम् ॥ ८ ॥ निवृत्तिलक्षणं धर्मं सनकादीनकल्मषान् ॥ सृष्ट्वा तान् ग्राहयामास मोक्षहेतुं सवैदिकम् ॥ ९ ॥ गृहीतो द्विविधो धर्मो मुनिभिस्तत्त्वदर्शिभिः ॥ प्रवर्तितो यथा शास्त्रं लोकेऽस्मिन्नधिकारिषु ॥ १० ॥ कृतादिषु युगेष्वेष धर्मः सद्भिः प्रवर्तितः ॥ क्षीणप्रायोऽभवल्लोके कालेनाचिन्त्यवर्त्मना ॥ ११ ॥ कामादीनां च बाहुल्याद्वैचित्र्यात्कर्मणां तथा ॥ ह्रीयमाने क्षितौ धर्मे वर्धमाने ह्यधर्मके ॥ १२ ॥ धर्मगोप्ता महाविष्णुरादिकर्ता महेश्वरः ॥ स पिपालयिषुर्धर्मं क्षिताववततार ह ॥ १३ ॥ स्वां मायां वैष्णवीं शक्तिं वशीकृत्य गुणात्मिकाम् ॥ अजोऽव्ययोऽक्रियो नित्यः शुद्धो बुद्धः सचेश्वरः ॥ १४ ॥ अनन्तकल्याणगुणो मङ्गलानां परोऽवधिः ॥ स्वेच्छया संबभूवाथो देवक्यां वसुदेवतः ॥ १५ ॥ निहत्यासुरपक्षीयान्धर्मशत्रूननेकधा ॥ धर्मः प्रवर्तितो लोके स्वमूर्त्यामुखरूपया ॥ १६ ॥ स धर्मो द्विविधोऽपीह वर्धमानो यथा भवेत् ॥ संप्रदायमुखेनैव तथा कार्यं मयाधुना ॥ १७ ॥ इति संचिन्त्य गोविन्दो निमित्तीकृत्य चार्जुनम् ॥ सङ्ग्रामेऽवसरं लब्ध्वा द्विविधं धर्ममीश्वरः ॥ १८ ॥ तस्मादुपदिदेशेड्य उत्तमायाधिकारिणे ॥ धर्मोऽनुष्ठीयमानश्च गृहीतः सन् गुणाधिकैः ॥ १९ ॥ स्वयमेव हि कालेन प्रचयं प्रगमिष्यति ॥ इत्यतोऽर्जुनमुद्दिश्य धर्मं संप्रोक्तवान्हरिः ॥ २० ॥ जन्तूनां शोक-

मोहौ द्वौ संसारानर्थकारणम् ।। ताभ्यामनर्थहेतुभ्यामर्जुनः पाण्डुनन्दनः ।। २१ ।। अभिभूतविवेकः सन्क्षत्रधर्मरणे स्वतः ।। प्रवृत्तोऽपि ततो धर्म्याद्युद्धादुपरराम ह ।। २२ ।। परधर्मं तथा भिक्षाजीवनादिकमाकुलः ।। कर्तुं प्रववृते मोहान्निषिद्धः क्षत्रियस्य यः ।। २३ ।। तथा च सर्वजन्तूनां शोकाद्याविष्टचेतसाम् ।। स्वधर्मत्यागो निन्द्यस्य सेवा च स्वात्स्वभावतः ।। २४ ।। स्वधर्मेऽपि प्रवृत्तानां प्रवृत्तिर्मूढचेतसाम् ।। फलाभिसन्धिपूर्वैव साहङ्कारा च जायते ।। २५ ।। तत्रैवं सति संसारो जन्ममृत्यादिलक्षणः ।। सदानुपरतो नृणां धर्माधर्मनिबन्धनः ।। २६ ।। पुण्यपुञ्जोदयात्कश्चित्तितीर्षुर्दुस्तरं तमः ।। विवेकादियुतो भूत्वा श्रेयोऽभिमुखमाश्रितः ।। २७ ।। दुस्त्यजः शोकमोहादिसंसारोऽयमनर्थकः ।। केनोपायेन हीयेत तापत्रितयसंकुलः ।।२८।। कथं बद्धोऽस्म्यहं केन संसारे विनिपातितः।। केनोपायेन मुक्तः स्यामिति मोक्षोन्मुखं नरम् ।। २९ ।। बुबोधयिषुराहेदं गीताशास्त्रं हरिर्विभुः ।। सर्वलोकहितार्थाय निमित्तीकृत्य पाण्डवम् ।। ३० ।। तमर्थं भगवान्व्यासः सर्वज्ञः सप्तभिः शतैः ।। श्लोकानां भगवद्गीताभिधैर्वेदार्थगोचरैः ।। ३१ ।। निबबन्ध स्वयं साक्षाद्गोविन्दमुखनिःसृतैः ।। प्रसङ्गार्थं स्वयं कांश्चिच्छ्लोकान्व्यरचयन्मुनिः ।। ३२ ।। गीताख्यं तदिदं शास्त्रं कैवल्यैकप्रयोजनम् ।। सर्ववेदार्थसारांशसंमहात्मकमुत्तमम् ।। ३३ ।। तत्त्वं श्रीवासुदेवाख्यं ब्रह्मास्य विषयः परः ।। विशिष्टफलसंबन्धाभिधेयान्वितमद्भुतम् ।। ३४ ।। दुर्ज्ञेयार्थमिदं शास्त्रं व्याख्यातं भगवत्पदैः ।। पदशो यस्य विज्ञानात्सर्वसिद्धिर्महात्मनाम् ।। ३५ ।। तन्मतं सम्यगालोच्य तथा तदनुयायिनाम् ।। भृशमुत्सहते चेतो व्याख्यातुं तन्ममाधुना ।। ३६ ।। गद्यैरेव पुराचार्यैर्व्याख्यातं गूढभावतः ।। स्पष्टपद्यैरहं कुर्वे तद्व्याख्यानं यथामति ।। ३७ ।। समस्तं कुमतं यद्यत्कल्पितं मूढबुद्धिभिः ।। श्रुतिस्मृतिनयैस्तत्तन्निरस्तं भगवत्पदैः ।। ३८ ।। तन्निरासाय मे नास्ति प्रवृत्तिरधुना किल ।। भाष्यकारीयसारांशं समादायैव केवलम् ।। ३९ ।। ग्रन्थस्यार्जवभावेन व्याख्यानार्थमहं यते ।। स्वबुद्धिशुद्धये कृष्णपादप्रेमैकयन्त्रितः ।।४०।। एतद्भावप्रकाशाख्यं व्याख्यानं सुगमं परम् ।। मुमुक्षूणामुपादेयं स्वयमेव भविष्यति ।। ४१ ।। तत्र वेदान्तसिद्धान्ताखण्डवाक्यार्थ उत्तमः ।। गीताशास्त्रे विनिर्णीतो व्याख्येयः क्रमशः परः ।। ४२ ।। काण्डत्रयात्मकं गीताशास्त्रं भागवतं मतम् ।। तत्राद्यकाण्डे हरिणा त्वंपदार्थस्य शोधनम् ।। ४३ ।। महामोहसमुच्छेदसिद्धये कृतमादरात् ।। तत्रापि प्रथमेऽध्याये शोकमोहादिकारणम् ।। ४४ ।। ममाहमित्यविद्याख्यं मिथ्याज्ञानं न चेतरत् ।। वैराग्याद्यर्थसंसिद्ध्यै मुनिर्व्यासो जगाविति ।। ४५ ।। तदुच्छेदाय भगवान् द्वितीये स्वात्मबोधनम् ।। कृत्वा तत्रैव जीवानां मोहाधिक्यं विचार्य च ।। ४६ ।। स्वधर्मं बोधयामास निष्कामं कामनिन्दया ।। ईश्वराराधनं धर्ममुपदिश्यातिसाम्यतः ।। ४७ ।। तत्फलं मनसः शुद्धिस्तथा रागादिमार्जनम् ।। ततो ज्ञानसमुत्पत्तिस्तया स्थैर्यं निजात्मनि ।। ४८ ।। द्विप्रकारमिमं धर्मं निःश्रेयसप्रयोजनम् ।। पुरस्कृत्य प्रवृत्तं तद्गीताशास्त्रमशेषतः ।।४९।। उपोद्घाततया प्रोक्तः शास्त्रार्थः प्रथमे खलु ।। द्वितीये सूत्रितः सम्यक्तथैवात्र निदर्श्यते ।। ५० ।। निष्कामकर्मनिष्ठादौ सत्वशुद्धिस्ततः परम् ।। ततश्च कर्मसंन्यासो वैराग्यादिपुरःसरः ।। ५१ ।। ततो वेदान्तवाक्यानां विचारसहिता परा ।। भगवद्भक्तिनिष्ठा स्यात्पुरुषार्थैकजन्मभूः ।। ५२ ।। ततस्तत्त्वैक्यविज्ञाननिष्ठा तस्याः परं फलम् ।। अविद्यादिनिवृत्त्या स्याज्जीवन्मुक्तिर्निरङ्कुशा ।। ५३ ।। प्रारब्धभोगपर्यन्ता समतायैरलङ्कृता ।। तदन्ते स्याद्विदेहाख्या मुक्तिर्वाचामगोचरा ।। ५४ ।। जीवन्मुक्तिदशायां च पुरुषार्थावलम्बनात् ।। परवैराग्यप्राप्तिः स्याद्वैतृष्ण्यात्स्यपराभिधा ।। ५५ ।। दैवी संपदुपादेया वैराग्याद्युपकारिणी ।। आसुरी संपदाहेया सर्वश्रेयोविरोधिनी ।। ५६ ।। कारणं सात्विकी श्रद्धा प्रधानं दैवसम्पदः ।। राजसी तामसी श्रद्धा हेयासुर्याश्च कारणम् ।। ५७ ।। हेयादेयविभागेन शास्त्रार्थस्याखिलस्य च ।। सूत्ररूपे द्वितीये हि समाप्तिः समुदाहृता ।। ५८ ।। निदर्श्यते तदेवात्र सुखबोधाय सन्नृणाम् ।। योगस्थः कुरु कर्माणीत्यादिना तत्र

सूत्रिता ॥ ५९ ॥ निष्कामकर्मनिष्ठा या सत्वशुद्धयेककारणम् ॥ सा सामान्येन रूपेण तृतीये संप्रपञ्चिता ॥ ६० ॥ पुनर्विशेषरूपेण चतुर्थे संप्रपञ्चिता ॥ ततो विशुद्धसत्वस्य वैराग्यादिपुरःसरा ॥ ६१ ॥ विहाय कामान्यः सर्वानित्यादौ या च सूत्रिता ॥ कर्मसंन्यासनिष्ठा सा षष्ठे प्रोक्ता च पञ्चमे ॥ ६२ ॥ सङ्क्षेपात्पञ्चमे प्रोक्ता षष्ठे विस्तरशः पुनः ॥ एतावता भगवता त्वंपदार्थो निरूपितः ॥ ६३ ॥ यज्ज्ञानात्तत्पदार्थेऽस्य भक्तिरुत्पद्यते परा ॥ ततो वेदान्तवाक्यानां विचारेण युता पुरा ॥ ६४ ॥ सूत्रिता युक्त आसीत मत्परश्चेति या रतिः ॥ भगवद्भक्तिनिष्ठा सानेकधा प्रतिपादिता ॥ ६५ ॥ मध्यमाध्यायषट्केन पुरुषार्थैकजन्मभूः ॥ तावता तत्पदार्थोऽपि ध्येयो ज्ञेयोऽर्च्य आदरात् ॥ ६६ ॥ मुमुक्षोरुपकाराय हरिणा सन्निरूपितः ॥ अवान्तरफलं तद्वत्सङ्गतिश्चाप्यवान्तरा ॥ ६७ ॥ आदरात्तत्रतत्रैव प्रत्यध्यायं प्रवक्ष्यते ॥ ततस्तत्त्वंपदार्थैक्यरूपाविद्याविरोधिनी ॥ ६८ ॥ वेदाविनाशिनं नित्यमित्यादौ सूत्रिता च या ॥ अद्वैततत्त्वविज्ञाननिष्ठा साऽसौ त्रयोदशे ॥ ६९ ॥ क्षेत्रक्षेत्रज्ञयोः सम्यग्विवेकेन प्रपञ्चिता ॥ फलं च ज्ञाननिष्ठायाः सूत्रिता हरिणा परा ॥ ७० ॥ निस्त्रैगुण्यो भवेत्यादौ निवृत्तिस्त्रिगुणस्य या ॥ सा वै चतुर्दशेऽध्याये जीवन्मुक्तिरितीरिता ॥ ७१ ॥ गुणातीतस्य चिह्नानां कथनेन प्रपञ्चिता ॥ परवैराग्यनिष्ठाया जीवन्मुक्तेरलङ्कृतिः ॥ ७२ ॥ तदा गन्तासि निर्वेदमित्यादौ सूत्रिता च सा ॥ संसारवृक्षविध्वंसद्वारा पञ्चदशे स्मृता ॥ ७३ ॥ दुःखेष्वनुद्विग्नमना इत्यादौ सूत्रिता च या ॥ दैवी संपदुपादेया स्थितधीलक्षणेन हि ॥ ७४ ॥ वशीकाराभिधेयस्य वैराग्यस्योपकारिणी ॥ यामिमां पुष्पितां वाचमित्यादौ सूत्रिता च या ॥ ७५ ॥ आसुरी संपदाहेया वैराग्यादिविरोधिनी ॥ एते उभे भगवता षोडशे संप्रपञ्चिते ॥ ७६ ॥ कारणं सात्विकी श्रद्धा प्रधानं दैवसम्पदः ॥ निर्द्वन्द्वो नित्यसत्त्वस्थ इत्यादौ सूत्रिता परा ॥ ७७ ॥ तद्विरोधिनिरासेन प्रोक्ता सप्तदशे च सा ॥ सफलाज्ञाननिष्ठैवं पञ्चकेन प्रपञ्चिता ॥ ७८ ॥ अष्टादशेन पूर्वोक्तसर्वस्याप्युपसंहृतिः ॥ इत्थं समस्तगीताख्यशास्त्रस्येहार्थसंगतिः ॥ ७९ ॥ द्वितीये सूत्रिता सर्वशास्त्रेऽस्मिन्संप्रपञ्चिता ॥ अशोच्यानन्वशोचस्त्वमित्यारभ्योपदेशनम् ॥ ८० ॥ शोकमोहापनुत्त्यर्थं कृतं भगवता स्फुटम् ॥ सर्वसाधारणो विष्णोरुपदेशो महानयम् ॥ ८१ ॥ संवादः कृष्णयोर्ब्रह्मविद्यास्तुत्यर्थमुच्यते ॥ वैदेहयाज्ञवल्क्यादिसंवादोऽस्ति यथा श्रुतौ ॥ ८२ ॥ शोकोपलक्षितो बन्धस्तन्निवृत्तिकरी त्वियम् ॥ ब्रह्मविद्या पुरा जिष्णोः प्राप्ता मुक्तस्तयेति सः ॥ ८३ ॥ महाप्रयोजना विद्येत्येवं संस्तूयते ततः ॥ अर्जुनस्योपदेशेनाधिकारी दर्शितोऽत्र च ॥ ८४ ॥ उपोद्घाततया तस्य धृतराष्ट्रनृपस्य च ॥ प्रश्नो व्यासप्रसादाप्तविज्ञानं सञ्जयं प्रति ॥ ८५ ॥ धृतराष्ट्रउवाचेति वैशम्पायनगीरियम् ॥ युद्धवृत्तान्तबोधार्थं नृपं जन्मेजयं प्रति ॥ ८६ ॥ श्रुत्वा बहुविधं पूर्वं पाण्डवानां जयं नृपः ॥ स्वपुत्रराज्यविभ्रंशाद्भीतः पप्रच्छ सञ्जयम् ॥ ८७ ॥ ॥ धर्मस्योत्पादके क्षेत्रे धर्मवृद्ध्यैककारणे ॥ श्रुतिस्मृतिप्रसिद्धेऽस्मिन्कुरुक्षेत्रे रणेप्सवः ॥ १ ॥ दुर्योधनादयोऽन्धस्य मम पुत्रास्तथापरे ॥ युधिष्ठिरादयः पाण्डोः पुत्रा राज्यफलेप्सवः ॥ २ ॥ कृतवन्तः किमित्येते संधीभूता हि सञ्जय ॥ धर्मक्षेत्रपदेनोक्तं पाण्डवा धार्मिकाः स्वतः ॥ ३ ॥ हिंसाभिया निवर्तेरन्यदि बन्धुपरिक्षयात् ॥ प्राप्तराज्यास्ततः पुत्रा मदीया इति भूभुजा ॥ ४ ॥ यद्वा वेदे कुरुक्षेत्रं कर्मकाण्डे प्रसिद्धिमत् ॥ अन्यद्देवयजनाख्यं धर्मक्षेत्रमुदाहृतम् ॥ ५ ॥ अविमुक्तं कुरुक्षेत्रं देवानामिति वाक्यतः ॥ अन्यद्ब्रह्मसदनाख्यं मुक्तिक्षेत्रमुदाहृतम् ॥ ६ ॥ यत्र प्राणपरित्यागाज्जन्तुमात्रस्य मोक्षणम् ॥ संसारबन्धतः प्रोक्तं श्रुतौ तत्काशिकाभिधम् ॥ ७ ॥ प्राणप्रयाणसमये श्रीरुद्रस्तारकं पदम् ॥ व्याचष्टे ब्रह्म तेनासौ मोक्षं प्राप्नोति बोधतः ॥ ८ ॥ इत्येवं वाक्यशेषेण कुरुक्षेत्रं विलक्षणम् ॥ अविमुक्तं यतः प्रोक्तमेतच्छ्रावृत्तिसिद्धये ॥ ९ ॥ धर्मक्षेत्रइति प्रोक्तं कुरुक्षेत्रं प्रसिद्धिमत् ॥ भारते सर्ववेदार्थो भारतार्थश्च कृत्स्नशः ॥ १० ॥ गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता ॥ अतो व्याख्यापराप्यत्र

भाति सा हि निदर्श्यते ॥ ११ ॥ आरम्भे भारतस्यापि रूपकद्वयमीरितम् ॥ छान्दोग्यश्रुतिसंसिद्धमथाध्यात्ममितिस्थले ॥ १२ ॥ युधिष्ठिरो धर्ममयो वृक्षस्तस्य प्रकल्पितः ॥ अर्जुनः स्कन्धरूपेण शाखात्वेन वृकोदरः ॥ १३ ॥ माद्रीसुतौ पुष्पफले मूलं कृष्णो द्विजाः श्रुतिः ॥ दैवी संपत्समग्रात्र धर्माद्या मुनिनेरिता ॥१४॥ दुर्योधनो मन्युमयो वृक्षस्तत्र प्रकल्पितः ॥ कर्णश्च स्कन्धरूपेण शाखा शकुनिरीरितः ॥ १५ ॥ दुःशासनः पुष्पफले मूलं स्यात्तत्पितान्धदृक् ॥ आसुरी संपदत्रासौ क्रोधाद्या निखिलेरिता ॥ १६ ॥ इत्थं सम्पद्द्वयं न्यस्य तयोरन्योन्यमाग्रहात् ॥ युद्धं प्रदर्शितं सम्यग्विस्तरान्मुनिना खलु ॥ १७ ॥ प्रतिपाद्यं परं ब्रह्म भारते वेदसंग्रहे ॥ तज्ज्ञानसाधनं धर्मः प्रतिपाद्यो मुनेर्मतः ॥ १८ ॥ दैवी संपदुपादेया पाण्डवानां जयाज्जनैः ॥ आसुरी संपदाहेया धार्तराष्ट्रपराजयात् ॥ १९ ॥ यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ इत्येवं रूपकेणार्थौ भारते मुनिनेरितः ॥ २० ॥ अत्रापि प्रथमे श्लोके तद्रूपकप्रदर्शनम् ॥ गीताशास्त्रसमारम्भे कृतं व्यासेन वेधसा ॥ २१ ॥ कुरूणां करणानां यत्क्षेत्रं देहोऽधिकारिणः ॥ अनुग्राहकभावेन क्षेत्रवत्क्षेत्रमुच्यते ॥ २२ ॥ सर्वेषां चैव धर्माणामुत्पादकतया तथा ॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥ २३ ॥ आत्मज्ञानमयो धर्मः साध्यतेऽत्र मुमुक्षुभिः ॥ क्षयात्समस्तधर्माणामपवर्गैकलाभतः ॥ २४ ॥ त्राणभूतं मुमुक्षोस्तद्धर्मक्षेत्रं शरीरकम् ॥ क्षेत्राणां परमं क्षेत्रं शरीरं क्षेत्रमुच्यते ॥ २५ ॥ वध्यघातकभावेन तस्मिन्क्षेत्रे परस्परम् ॥ रागवैराग्यसंतोषतृष्णादीनां समागमः ॥ २६ ॥ ये स्थिता मामकास्तत्र ह्यविद्यापुरुषोचिताः ॥ अविद्यामयसंकल्पा आसुराः प्रतिबोधिताः ॥ २७ ॥ ममेतिकार्यमित्युक्ता मामका भ्रान्तिशालिनः ॥ कामक्रोधादयः सर्वे महामोहात्मजाः शठाः ॥ २८ ॥ शुद्धिः पाण्डुरिति प्रोक्ता तत्पुत्राः पाण्डवाः स्मृताः ॥ क्षमावैराग्यसंतोषमुखा विद्यामयाः शुभाः ॥ २९ ॥ के कैर्जिता इति प्रोक्तं किमकुर्वत शब्दतः ॥ मुमुक्षोरेष प्रश्नोऽस्ति सञ्जयं ज्ञानिनं प्रति ॥ ३० ॥ यद्वा मोहस्य प्रश्नोऽयं स्वयन्त्रात्ममनः प्रति ॥ इतिरूपकमादाय बोधिता मुनिना जनाः ॥ ३१ ॥ अतएवोपसंहारे सञ्जयोक्तिर्नृपं प्रति ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ ३२ ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ तथाछान्दोग्यवेदान्तगिरामप्यत्रसम्मतिः ॥ ३३ ॥ इन्द्रियवृत्तयो देवा असुराश्च श्रुतौ श्रुताः ॥ शास्त्रानुगाः सुराः प्रोक्ता स्वाभाविक्यस्तथाऽसुराः ॥ ३४ ॥ स्वाभाविक्यस्तमोरूपा इन्द्रियाणां प्रवृत्तयः ॥ प्रवृत्ताः शास्त्रसिद्धार्थप्रकाशाभिभवा यताः ॥ ३५ ॥ शास्त्रानुगाः सुरास्तत्र शान्तिदान्तिपुरःसराः ॥ भ्रान्तिसिद्धप्रवृत्तीनामासुरीणां क्षयावहाः ॥ ३६ ॥ अनादिकालमारभ्य देवासुरसमागमः ॥ प्रतिदेहं प्रवृत्तोऽसौ सर्वप्राणिषु सङ्गरः ॥ ३७ ॥ एवमेव मुनेर्भावो दर्शितोऽयमथाधुना ॥ आर्जवेन प्रसङ्गं तं व्याख्यास्यामो यथाक्षरम् ॥ ३८ ॥ १ ॥

धनपतिविरचिता–भाष्योत्कर्षदीपिका टीका

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीमच्छङ्करभगवत्पूज्यपादचरणनलिनाभ्यां नमः ॥ सप्तद्वीपाधरेयं सगिरिवनजला लोकपालाः सलोका ब्रह्माण्डे सन्ति यस्मिन्सलिलहुतभुगाद्यावृते तत्प्रधानात् ॥ यस्मादव्यक्तसंज्ञाद्भवति गुणमयाद्भेदवेद्यः परो यस्तस्मान्नारायणं तं सुविमलमभयं शङ्करं नौमि सत्यम् ॥ १ ॥ सृष्ट्वेदं श्रुतिगं प्रवृत्तिजनकं धर्मं मरीच्यादिकान्विश्वस्थापनहेतवेऽब्जजतनुः संग्राहयामास यः ॥ सर्वानर्थनिबर्हणं च सनकाद्यान्पूर्वसृष्टानृषीन्वैराग्यादिकलक्षणं शिवमहं तं वासुदेवं भजे ॥ २ ॥ अजन्मा सर्वेषामधिपतिरमेयोपि जगतामधिष्ठाय स्वीयां प्रकृतिमिव देही स्फुरति यः ॥ विनष्टं कालेन द्विविधममृतं धर्ममनघं पुनः प्राहेशं तं विमलशुभदं नौमि परमम् ॥ ३ ॥ ईशावेकात्मकौ लोके सम्प्रदायप्रवर्तकौ ॥ गीताभाष्यप्रकाशेन वन्दे श्रीकृष्णशङ्करौ ॥ ४ ॥ बालस्वामिनमाचार्यं नुमो व्यासमुखान्मुनीन् ॥ विघ्नहर्तॄन्गणेशादीन्पण्डितांश्च विमत्सरान् ॥ ५ ॥ कुमतस्य निरासाय गीताभाष्यकृता स्वयम् ॥ कृष्णात्मना शिवेनादौ व्या-

ख्याता पदशः स्फुटम् ॥ ६ ॥ ततो भाष्यार्थमादाय व्याख्याता बहुभिस्तु सा ॥ यत्तु कैश्चित्क्वचित्प्रोक्तं विरुद्धं भाष्यतोऽखिलम् ॥ ७ ॥ साक्षेपं युक्तिहीनं च तन्निरासाय लेखकम् ॥ अन्तर्यामिस्वरूपोऽसौ मां करोति महेश्वरः ॥ ८ ॥ यद्यपि प्राणिजातस्य प्रेरको जगदीश्वरः ॥ स एवास्ति तथाप्येवं श्रुत्यर्थेन व्यवस्थितिः ॥ ९ ॥ यमधो नेतुमिच्छास्य जायते परमात्मनः ॥ असाधुकर्मनिर्वृत्तौ संप्रेरयति तं तु सः ॥ १० ॥ कारयत्यमलं कर्म यस्येच्छत्यूर्ध्वमास्पदम् ॥ तस्मान्मदात्मना तेन स्वभाष्योत्कर्षदीपिका ॥ ११ ॥ तन्यते स्वस्य भक्तानां सुखदा सुहृदां सताम् ॥ भक्ताभासस्य हीनस्य भक्त्या चोद्वेगदाऽसतः ॥ १२ ॥ इह खलु परमकारुणिकः परिपूर्णानन्दस्वभावः सकलैश्वर्यसम्पन्नस्त्रिगुणात्मिकया स्ववशीकृतया निजमाययोपात्तकायो भगवान्वासुदेवः शोकमोहाभिभूतं जीवनिकायमुद्दिधीर्षुर्यद्गीताशास्त्रं सर्ववेदसारभूतं काण्डत्रयात्मकं तत्त्वंपदाखण्डार्थप्रतिपादकं निजाविग्रहायार्जुनाय ग्राहयामास । तदेव क्रमप्राप्तं दयानिधिर्वेदव्यासो महाभारते निबध्नाति धृतराष्ट्र उवाचेत्यादि । तत्र धृतराष्ट्र उवाच । 'केषां प्रहृष्टास्तत्राग्रे योधा युध्यन्ति सञ्जय । उदग्रमनसः केत्र के वा दीना विचेतसः ॥ के यूयं प्राहरंस्तत्र युद्धे हृदयकम्पिनि । मामकाः पाण्डवानां वा तन्ममाचक्ष्व सञ्जय' इत्यादिना कृतं प्रश्नं वैशम्पायनो जनमेजयं प्रति सङ्क्षिप्योपोद्घाततयानुवदति—धृतराष्ट्र उवाचेति । मामकाः मदीयाः दुर्योधनादयः पाण्डवाः पाण्डुपुत्राः युधिष्ठिरादयः युयुत्सवः योद्धुमिच्छवः । धर्मस्योपचयस्थानत्वात् धर्मक्षेत्रे कुरुक्षेत्रे श्रुतिस्मृतिलोकप्रसिद्धे समवेता मिलिताः सन्तः किमकुर्वत किं कृतवन्तः । स्वधर्मभूतं धर्मयुद्धं कृतवन्तः उताधर्मयुद्धमिति धर्मक्षेत्रपदेन बोधितम् । युयुत्सया समवेता इति मया विस्तरेण श्रुतं तदनन्तरं यथा यत्कृतवन्तः तथा तद्विस्तरेण वदेत्याशयः । भीष्मपतनेन कलहस्यानर्थताबोधकानां भवदादिवाक्यानां सम्यग्जयो जात इति ध्वनयन् सम्बोधयति—सञ्जयेति । रागद्वेषादिदोषान् सम्यग्जितवानसीति कृत्वा निर्व्याजेन त्वया कथनीयमिति सूचनार्थं सञ्जयेति सम्बोधनमिति केचित् । किमा आक्षेपोऽपि ध्वनितः । अयोग्यं कृतवन्तइत्यर्थः । धर्मक्षेत्रे हिंसाप्रधानस्य युद्धस्यानुचितत्वात् । मामका नाम धार्मिकत्वेन तत्सम्भवेऽपि परमधार्मिकत्वेन प्रसिद्धाः पाण्डवाः युधिष्ठिरादयो भीष्मादिपातनं किं कृतवन्त इति द्योतयन्नाह—पाण्डवाश्चेति । पाण्डवेषु ममकाराभावप्रदर्शनेन तेषु द्रोहमभिव्यनक्तीति केचित् । यत्तु पणडवानां जयकारणं बहुविधं पूर्वमाकर्ण्य स्वपुत्रराज्यभ्रंशाद्भीतो धृतराष्ट्रः पप्रच्छ स्वपुत्रजयकारणमाशंसन् धृतराष्ट्र इत्यादिना । किं कृतवन्तः किं पूर्वोद्भूतयुयुत्सानुसारेण युद्धमेव कृतवन्तः उत केनचिन्निमित्तेन युयुत्सानिवृत्त्या अन्यदेव किंचित्कृतवन्तः । भीमार्जुनादिवीरपुरुषनिमित्तं दृष्टभयं युयुत्सानिवृत्तिकारणं प्रसिद्धमेव । अदृष्टभयमपि दर्शयितुमाह—धर्मक्षेत्रइति । तस्मिन्गताः पाण्डवाः पूर्वमेव धार्मिकाः । यदि पक्षद्वयहिंसा निमित्तादधर्माद्भीता निवर्तेरन्ततः प्राप्तराज्या एव मत्पुत्राः । अथवा धर्मक्षेत्रमाहात्म्येन पापिनामपि मत्पुत्राणां कदाचिच्चित्तप्रसादः स्यात्तदा च तेऽनुतप्ताः कपटोपात्तं राज्यं पाण्डवेभ्यो यदि दद्युः तर्हि विनापि युद्धं हता वेति स्वपुत्रराज्यलाभे पाण्डवराज्यालाभे च दृढतरमुपायमपश्यतो महानुद्वेगएव प्रश्नबीजमिति केचिद्वर्णयन्ति तदुपेक्ष्यम् । 'अथ गावल्गणिर्धीमान्समरादेत्य सञ्जयः । प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यतः ॥ ध्यायतो धृतराष्ट्रस्य सहसोपेत्य दुःखितः । आचष्ट निहतं भीष्मं भारतानां पितामहम् ॥ सञ्जयोऽहं महाराज नमस्ते भरतर्षभ । हतो भीष्मः शान्तनवो भारतानां पितामहः ॥ यो ररक्ष समेतानां दशरात्रमनीकहा । जगामास्तमिवादित्यः कृत्वा कर्म सुदुष्करम् ॥ यः स शक्र इवाक्षोभ्यो वर्षन्बाणान्सहस्रशः । जघान युधि योधानामर्बुदं दशभिर्दिनैः ॥ स शेते निहतो भूमौ वातरुग्ण इव द्रुमः ' इत्यादिसंक्षेपोक्तिपरपूर्वग्रन्थविरोधात् । ननु संक्षेपेण श्रुतमपि मोहाद्विस्मृत्य धृतराष्ट्रेण प्रश्नः कृत इतिचेन्न प्रश्नस्य पूर्वग्रन्थानुरोधेनास्मदीयोक्तरीत्या सम्यगुपपत्तेः । पूर्वोक्तविरुद्धप्रश्नव्याख्यानकर्तृणामेव मोहादिति दिक् । यत्त्वन्ये । धर्मक्षेत्रपदं कुरुक्षेत्रपदादविमुक्तक्षेत्रप्रतिपत्तिर्मा

भूदित्येतदर्थमिति तन्न। कुरुक्षेत्रादागतं सञ्जयं किमविमुक्तक्षेत्रे समवेता इति संशयरहितं प्रति विशेषणानर्थक्यात्। अन्येषामपि लोकप्रसिद्ध्या पूर्वग्रन्थेन च निर्णयस्य सत्त्वात्॥ १॥

श्रीमद्दैवज्ञपण्डितवर्यसूर्यविरचिता—परमार्थप्रपा टीका

श्रीविश्वनाथो जयति॥ संविदानन्दसंदोहसान्द्रमिन्दीवरेक्षणम्॥ इन्दिरामन्दिरं देवं वन्दे तं नन्दनन्दनम्॥ १॥ अज्ञः सुज्ञत्वसीमामनुभवति भवान्नैति रङ्कोऽपि शङ्कां स्यान्मूको वावदूको व्रजति शिखरिणां पङ्गुरुल्लङ्घ्य सङ्घम्॥ दुःखाब्धेर्नोपलब्धिः स खलु विजयते यत्कृपापाङ्गसङ्गादन्तर्यामी समीपे मम परमगुरुः श्रीयशोदाकिशोरः॥ २॥ अम्भोधिं कुम्भडिम्भश्चुलकितमकरोन्मूर्ध्नि धत्तेऽतिगुर्वीमुर्वीं दर्वीकरोऽपि प्रदहति दहनो वर्षति प्रावृषेण्यः॥ मेघौघो वाति वातः प्रतपति तपनो रत्नसूर्भूमिरेभिर्लोकातीतोऽभिनीतो यदुकुलतिलकानुग्रहो निग्रहो वा॥३॥ वार्ष्णेयब्रह्मशैलाद्दनुजशतपथगा ज्ञानविज्ञानकूला पार्थस्य प्रार्थनातश्चिरममृतवहा प्रत्यगानन्दसिन्धुम्॥ संप्राप्तार्थप्रवाहप्रपतितविततश्वत्थमुन्मूलयन्ती गीता स्फीता निमङ्क्तुः सकलकलिमलं स्वर्धुनीयं धुनीते॥ ४॥ निश्वासो वैश्वरूपो निगम इति जने दुर्गमो भूत्ततोऽसावाविर्भूता विभूतिर्जगदुपकृतये भारती भारताग्रे॥ सेयं गीताभिनीता स्वयमुपनिषदामर्थमोदाय हार्दं सौहार्दं केवलं नः प्रियविषयमदः किं तु विष्वग्जनस्य॥ ५॥ आचार्याः सन्ति कुत्राप्यतिविमलधियो वेदशास्त्रागमानां दुष्प्रापस्तावदास्ते त्रिजगति नितरामात्मतत्त्वोपदेष्टा॥ एवं सत्यर्जुनस्याद्भुतविकलवतो वर्ण्यते किन्तु भाग्यं यस्याचार्यस्य हेतोः स्वयमुपनिषदामर्थ आविर्बभूव॥६॥ चतुर्वेदाचार्याधिगतभगवद्भावभवनं निदानं विश्रान्तेर्यदनुमतमृक्सामयजुषाम्॥ अहं गीताभाष्यं तदिह रचये सूर्यविधिविद्यतोऽल्पज्ञप्रज्ञानुभवरसिकानन्दजननम्॥ ७॥ साक्षाद्वैकुण्ठवाचो निजभजनवतां मुक्तिहेतोः प्रवृत्ताः सर्वाम्नायाश्च गीताः सततमथ मिथो या वियुक्ता बभूवुः॥ ता एकत्रानुयोक्तुं सुरसरित इवान्तर्नियुक्तो विनेत्रा देवेनान्तः प्रवृत्तोस्म्यहमिह भविता तावताहं कृतार्थः॥ ८॥ एतस्मिन् भगवच्छास्त्रे न यौक्तिकमताग्रहः॥ सर्वोपनिषदध्यात्ममेतदात्मानुभूतिकृत्॥ ९॥

इह खलु सदनुग्रहखलनिग्रहगृहीतविग्रहः परमकारुणिकः परमात्मा दावदहनदन्दशूकशिलावर्षणवस्त्रहरणलाक्षागृहगरदानाद्यनर्थेभ्यः स्वचरणशरणानुद्दधार। ततो दनुजकुलभराकुलमवनीतलमाकलय्य प्रथमतः पूतनादीनसुरान्निरवधीनवधीत्। अनन्तरं कंसचाणूरकालयवनजरासन्धादींश्च। संप्रत्यर्जुनं निमित्तमात्रं कृत्वा कुरुक्षेत्रे क्रूरतमं कौरवकुलं संजिहीर्षुरास्ते। तत्र श्रुतयः "जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभिपौंस्यं रणम्॥ अवृश्चिदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुम्॥" अत्र चतुर्वेदस्वामिकृतभाष्यम्—यः परमेश्वरो जज्ञानः प्रादुर्भूतमात्रो मायया बालदशां स्वीकुर्वाणोऽपि सन् स्पृधः स्पर्धां कृतवतः शत्रून्पूतनादीन् कंसान्तान् व्यबाधत बाधितवान्। न केवलं दैत्यानपि तु शक्रादीनां गर्वमपीत्याह। योऽद्रिं पर्वतं गोवर्धनमवृश्चिदुद्दधार। किमुद्दिश्य। सस्यदो धान्यदातॄन्मेघाननवरतं वर्षमाणानवसृजत् विसर्जितवान्। तेन पृथुं सामर्थ्यवन्तं नाकमिन्द्रलोकं स्वपस्यया मायया अस्तभ्नात् स्तम्भितवान् स्तम्भितशक्तिमकरोत्। अथ यौवनदशायामप्यभिपौंस्यं सर्वपुरुषार्थसाधकं रणं कुरुपाण्डवसंग्रामं वीरोऽपि सन्नपश्यत् ताटस्थ्येन दृष्टवान्न तु स्वयं युयुधे। अत्र वीरपदेन भीष्मपराभूतस्वभक्तपक्षपातादशस्त्रोपि शस्त्रमग्रहीदिति सूचितम्। अथ कंसादिवधार्थं गोकुलान्मथुरामागच्छतोः कृष्णरामयोश्चरितशंसनी श्रुतिस्तैत्तिरीयकब्राह्मणे। ऋग्द्वयम्—"द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुपधापयेते॥ हरिरन्यस्यां भवति स्वभावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः॥१॥ पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्॥ विश्वान्यन्यो भुवनानि चष्ट ऋतूनन्यो विदधज्जायते पुनः॥ २॥" भाष्यम्—धनुर्यागोत्सवव्याजेन कृष्णरामयोरानयनार्थं कंसेन प्रेषितः सुष्ठु वर्चो यस्यासौ सुवर्चा अक्रूरश्चरतो विचरतो द्वे विसदृशे रूपे विरूपे ददृशे दृष्टवान्। किंभूते स्वर्थे सुष्ठु अर्थः

प्रयोजनं ययोस्ते । न हि नृसिंहवदेकस्यां मूर्तौ किं तु अन्या अन्या पृथगवस्थिते । पुन: किंभूते वत्सम् उपधापयेते । वत्समिति जात्यभिप्रायेणैकवचनम् । तेन गोसंदोहनावसरे स्वसमीपे वर्तमानैर्गोपैः कृत्वा वत्सान् धापयेते पाययेते अथ विसदृशरूपत्वमेवाह—हरिरिति । अन्यस्यामन्यतमस्यां मूर्तौ हरिद्वर्णत्वाद्धरिः मेघश्यामः कृष्णोऽस्ति तथा अन्यस्यां शुक्लो गौरवर्णो बलदेवोऽस्ति । किंभूतो हरिः स्वभावान् स्वस्य भा स्वभा तद्वान् अलुप्तनिजैश्वर्यवानित्यर्थः । किंभूते रूपे पूर्वापरं चरतः प्रागपरं परिसरणं कुरुतः । परं तु न प्राकृतावित्याह । एतौ कृष्णरामौ मायया कृत्वा शिशू बाल्यदशां प्राप्तौ परमार्थतो विचार्यमाणे वयोऽवस्थारहितौ एवं माययैव रजकवधादिभिः क्रीडन्तौ सन्तौ अध्वरं धनुर्यागस्थानं प्रति परिपततः समन्ततः कुवलयापीडकंसचाणूरादिस्थानानि यातः जग्मतुः । अथ पूर्वं विरूप इत्यनेनाकारतो विसदृशत्वं द्योतितमिदानीं सामर्थ्यतोऽप्याह—अन्य इति । अन्यः कृष्णः विश्वानि सर्वाणि भुवनानि भूर्भुवःस्वरादीनि विचष्टे संकल्पेनैव ज्ञातवान् तथान्यो बलदेवः ऋतून् गर्भान्मत्स्याद्यवतारान् विदधद्वहन् सन् पुनः पुनर्जायते आविर्भवतीति । एवमुभयसेनासंनाहसंनिवेशे आचार्यगोत्रि सुहृद्वधाशङ्कया 'कुलक्षयकृतं दोषं' तथा 'आचार्यान्मातुलान् भ्रातॄन्' इत्यादिवाक्यैर्निर्विण्णं, तथा नित्यानित्यवस्तुविवेकेनैव स्वचरणशरणं, तथा 'अपि त्रैलोक्यराज्यस्य' इत्यादिनेहामुत्रार्थफलभोगविरागवन्तं, तथा 'शिष्यस्तेऽहं शाधि माम्' इति गुरुदैवतवाक्यविश्वासेनैव मुमुक्षाजुषमर्जुनं प्रति वर्णधर्मोचितकर्मोपदेशावसरे 'न काङ्क्षे विजयं कृष्ण' इति, तथा 'एतान्न हन्तुमिच्छामि घ्नतोऽपि' इति, 'श्रेयो भोक्तुं भैक्ष्यमपि' इत्यादिपार्थवाक्यश्रवणात्तमुत्पन्नवैराग्यतया ज्ञानाधिकारिणमवेक्ष्य स्वरूपमप्युपदिष्टवान् । तत्र द्वया ह प्राजापत्यादिबृहदारण्यकोपक्रान्तदैवासुरप्रज्ञानानुसारं व्यासदेवोपि धृतराष्ट्रसञ्जययोः प्रश्नोत्तरपूर्वकं गीताशास्त्रोपक्रममप्यकार्षीत्—**धर्मक्षेत्रइत्यादितः** । अत्र पूर्वप्रसंगस्तु युद्धोपक्रमे कृष्णार्जुनसंवादावसरे व्यासानुग्रहलब्धदिव्यश्रवणप्रज्ञोत्कर्षः सञ्जयः साक्षात्कृष्णमुखोद्गतानि पद्यानि शृण्वन् हृदि संगृहीतसकलवाक्यसंदर्भः केनचित्कार्येण हास्तिनपुरं प्रत्यागतस्तं धृतराष्ट्रः पृच्छति स्म । तदुक्तं भीष्मपर्वणि—'अथ गावल्गणिर्धीमान् संगरादेत्य सञ्जयः । प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यतः ।। ध्यायते धृतराष्ट्राय समुपेत्यैवमब्रवीद्' इति । धर्मक्षेत्रे तत्र त्यक्तजीवितानां सद्गतिप्रदे कुरुक्षेत्रे युयुत्सवो योद्धुमिच्छन्तः समवेता मिलिता मामका मत्पुत्राः पाण्डवाश्च किमकुर्वत किं कृतवन्तस्तदाचक्ष्वेति पृष्टः ।। १ ।।

राघवेन्द्रविवृतिः (अर्थसंग्रहः–मध्वसंप्रदायिनी) टीका

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः । 'लक्ष्मीनारायणं नत्वा पूर्णबोधान्गुरूनपि । कुर्मः श्रीकृष्णगीताया भाष्याद्युक्तार्थसंग्रहम् ।। स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा । इतिभारतमाख्यानं कृपया मुनिना कृतम्' इति भागवतोक्त्या वेदार्थज्ञानानधिकारिणां स्त्रीशूद्रादीनां धर्मज्ञानद्वारा मोक्षोभवेदिति भगवान्वेदव्यासः संभवसभारण्यविराटोद्योगभीष्मद्रोणकर्णशल्यसौप्तिकस्त्रीशान्त्यानुशासनिकाश्वमेधिकाश्रमवासिमौसलमहाप्रस्थानस्वर्गारोहणभविष्यत्पर्वभेदेनाष्टादशपर्वात्मकं भारतं कृत्वा तत्र भीष्मपर्वणि भारतपारिजातमधुभूतां सर्वभारतार्थसंग्रहभूतां श्रीकृष्णार्जुनसंवादरूपां भगवद्गीतां निबबन्ध । तत्र पूर्वषट्के ज्ञानोपायोक्तिः । द्वितीयषट्के साधनोक्तिः । तृतीयषट्के प्रागुक्तस्य प्रपञ्चनं क्रियत इति विवेकः । तत्राद्याध्यायो द्वितीये कतिपयश्लोकाश्च कृष्णेनार्जुनबोधने प्रसक्तिसंपादनाय प्रवृत्ताः । तत्रायमर्थः धृतराष्ट्र उवाच । किमित्याह—धर्मेति । धर्मसाधनभूमौ कुरुक्षेत्रे युयुत्सवः युद्धमिच्छन्त एव समवेता मिलिताः सन्तो मामकाः मदीयाः दुर्योधनादयः पाण्डवाश्च हे संजय ! किमकुर्वतेति इतिशब्दो योज्यः । पाण्डवानां भगवत्प्रियत्वं सर्वसाक्षिकमप्यजानन्धृतराष्ट्रः स्वपुत्राणां विजयविविदिषया सञ्जयं पप्रच्छेत्यर्थः ।। १ ।।

सञ्जय उवाच—दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ॥
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

त० टी०—एवं पुत्रस्नेहनिबद्धहृदयस्य भगवन्मायाभिभूतस्यान्धमात्रस्य धृतराष्ट्रस्य प्रश्ने विदिताभिप्रायस्य सञ्जयस्योत्तरमवतारयति वैशम्पायनः । सञ्जय उवाच—दृष्ट्वेति । पाण्डुपुत्राणामनीकं सैन्यं व्यूढं धृष्टद्युम्नादिभिर्व्यूहरचनया स्थापितं राजा दुर्योधनो दृष्ट्वा आचार्यं धनुर्विद्योपदेष्टारमुपसंगम्य तत्समीपं गत्वा वचनमब्रवीत् । एतेन पाण्डवसैन्यदर्शनजन्यं भयं सूचितम् ॥ २ ॥

म० टी०—एवं कृपालोकव्यवहारनेत्राभ्यामपि हीनतया महतोन्धस्य पुत्रस्नेहमात्राभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने विदिताभिप्रायस्य सञ्जयस्यातिधार्मिकस्य प्रतिवचनमवतारयति वैशम्पायनः तत्र पाण्डवानां दृष्टभयसंभावनापि नास्ति अदृष्टभयं तु भ्रान्त्यार्जुनस्योत्पन्नं भगवतोपशमितमिति पाण्डवानामुत्कर्षस्तुशब्देन द्योत्यते स्वपुत्रकृतराज्यप्रत्यर्पणशङ्कया तु मा ग्लासीरिति राजानं तोषयितुं दुर्योधनदौष्ट्यमेव प्रथमतो वर्णयति—**दृष्ट्वेति** । पाण्डवसुतानामनीकं सैन्यं व्यूढं व्यूहरचनया धृष्टद्युम्नादिभिः स्थापितं दृष्ट्वा चाक्षुषज्ञानेन विषयीकृत्य तदा संग्रामोद्यमकाले आचार्यं द्रोणनामानं धनुर्विद्यासम्प्रदायप्रवर्तयितारं उपसंगम्य स्वयमेव तत्समीपं गत्वा नतु स्वसमीपमाहूय । एतेन पाण्डवसैन्यदर्शनजनितं भयं सूच्यते । भयेन स्वरक्षार्थं तत्समीपगमनेपि आचार्यगौरवव्याजेन भयसंगोपनं राजनीतिकुशलत्वादित्याह—राजेति । आचार्यं दुर्योधनोऽब्रवीदित्येतावतैव निर्वाहे वचनपदं संक्षिप्तबह्वर्थत्वादिबहुगुणविशिष्टे वाक्यविशेषे संक्रमितं वचनमात्रमेवाब्रवीन्नतु कञ्चिदर्थमिति वा ॥ २ ॥

शं० टी०—पक्षस्तृतीय एव सिद्ध इति सञ्जय उवाच—**दृष्ट्वा तु पाण्डवानीकमिति** । राजा दुर्योधनस्तदा युद्धसन्नाहकाले व्यूढं व्यूहाकारतामापन्नं पाडवानामनीकं बलं दृष्ट्वा धनुर्विद्याचार्यं द्रोणमुपसङ्गम्य पाण्डवबलोत्कर्षवर्णनेन स्वबलस्य शौर्यबलपौरुषोत्साहोद्रेकं संपादयितुमिच्छयेदं वचनमब्रवीत् ॥ २ ॥

श्री० टी०—**दृष्ट्वेति** । पाण्डवानामनीकं सैन्यं व्यूढं व्यूहरचनया व्यवस्थितं दृष्ट्वा द्रोणाचार्यसमीपं गत्वा राजा दुर्योधनो वक्ष्यमाणं वाक्यमुवाच ॥ २ ॥

स० टी०—ममत्वाभिनिविष्टस्य प्रश्नं श्रुत्वा नृपस्य सः ॥ उवाच सञ्जयो वाक्यं दिव्यदृष्ट्या समन्वितः ॥ १ ॥ पाण्डवानां च निर्दौष्ट्यं दौष्ट्यं दुर्योधनस्य च ॥ पाण्डवोत्कर्षता चैव द्योत्यतेऽत्र तु शब्दतः ॥ २ ॥ सैन्यं पाण्डुसुतानां तु दृष्ट्वा दुर्योधनो नृपः ॥ व्यूढं च कृतविन्यासविशेषं शास्त्रदृष्टितः ॥ ३ ॥ संग्रामावसरे द्रोणमाचार्यं भीतमानसः ॥ गत्वा तदन्तिके वाक्यमवदद्राजनीतिवित् ॥ ४ ॥ पाण्डवेषु स्वशिष्येषु प्रियेष्वत्यन्तरागतः ॥ न करिष्यति संग्राममिति बुद्धौ निधाय च ॥ ५ ॥ २ ॥

भा० टी०—एवं पृष्टः सञ्जयोऽर्जुनो वीरशिरोमणिरतिकारुणिको युद्धाद्धिंसाप्रधानान्निवृत्तः पुनर्भूभारसञ्जिहीर्षुणा श्रीकृष्णेनोपदिष्टो युद्धं कृतवान् । युधिष्ठिरादयस्तु 'आततायिनमायान्तं हन्यादेवाविचारयन्' इत्यादिक्षत्रधर्मविदस्तत्कृतवन्तः । त्वदीयास्तु क्रूरस्वभावादेवेत्याशयेनाक्षेपं प्रतिक्षिपन् प्रश्नस्योत्तरमाह—**दृष्ट्वेत्यादि** । तु शब्दः आक्षेपनिरासार्थः । पाण्डवानां सैन्यं व्यूहरचया व्यवस्थितमवलोक्य दुर्योधनो द्रोणाचार्यसमीपं प्रणिपातादिपुरःसरं गत्वा राजनीतिगर्भं वाक्यमब्रवीत् नन्वाचार्यं स्वसमीप आहूय कुतो नोक्तवानित्यत आह—राजेति । वीरपुरुषा अत्यादरेण युद्धे प्रवर्त्या इति राजनीतिकुशल इत्यर्थः । आचार्यमुपसंगम्येत्यनेन दुर्योधनस्य भयोद्विग्नता सूचिता भयोद्विग्नहृदयत्वेपि वचनमर्थसहितं वाक्यमुक्तवानिति सूचनार्थं राजेत्येके यत्तु तत्र पाण्डवानां दृष्टभयसंभावना नास्ति । अदृष्टभयं तु भ्रान्त्या अर्जुनस्योत्पन्नं भगवतोपशमितमिति पाण्डवानामुत्कर्षः तुशब्देन द्योत्यते । स्वपुत्रकृतराज्यसमर्पणशङ्कया तु मा ग्लासीरिति राजानं तोषयितुं दुर्योधनदौष्ट्यमेव प्रथमतो वर्णयति दृष्ट्वेतीति केचित् । तत्तु पूर्वोक्तग्रन्थविरोधादुपेक्ष्यम् ॥ २ ॥

प० टी०-राजा दुर्योधनः पाण्डवानीकं तत्सैन्यं व्यूढं व्यूहरचनया स्थितं दृष्ट्वाचार्यं द्रोणमुपसंगम्य वचनमब्रवीत् ॥ २ ॥

रा० टी०-धृतराष्ट्रप्रश्नस्य सञ्जय उत्तरमुक्तवानित्याह वैशम्पायनो जनमेजयं प्रति संजयउवाचे-त्यादिनवभिः श्लोकैः दुर्योधनकृतव्यापारमाह-दृष्ट्वेत्यादिना । दुर्योधनस्तु राजा तदा युद्धार्थं मिलितसमये व्यूढं व्यूहात्मना रचितं पाण्डवसैन्यं दृष्ट्वा तु दृष्ट्वेति वा तोरन्वयः । द्रोणाचार्यसमीपमागत्य वचनमुवाच ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ॥
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

त० टी०-आचार्यस्यामर्षं जनयितुं तावत्पाण्डवसैन्योत्कर्षमाह-पश्यैतामिति । भो आचार्य ! एतां पाण्डुपुत्राणां महतीं चमूं व्यूढां पश्य । युद्धार्थमागतानां युक्तमेव चमूव्यूहरचनमिति चेत्तत्रोक्तमा-चार्येति । त्वदाश्रितास्मदुद्योगमप्रतीक्ष्यादावेवोद्युक्ता इति तद्धाष्ट्र्यं पश्येति भावः । ननु तेषामपि मच्छिष्यत्वाज्ज्येष्ठत्वादिगुणवत्त्वाच्च युक्तः प्रथमं तदुद्योग इति चेत्तत्राह-द्रुपदपुत्रेणेति । द्रुपदस्य तव शत्रोः पुत्रेण व्यूढां व्यूहरचनया स्थापितां अतस्त्वया न क्षम्यतामिति भावः । प्रबलेन शत्रुपुत्रेण सेनापतिना सह न सहसा योद्धव्यमिति चेत्तत्राह-तव शिष्येणेति । नहि गुरोरधिकः शिष्यो भवति । एवं चेत्ततः का शङ्का तत्राह-धीमतेति । तव मारणे कृतमतिनेरयतोनोपेक्षणीय इत्यभिप्रायः । एतेन धर्मक्षेत्रगतस्यापि तव पुत्रस्य धर्मबुद्धिर्नोत्पन्ना । सर्पस्य पयःपानेऽपि न क्रोधहानिः प्रत्युत विषवृद्धिरेव भवति तद्वत् । तस्मात्तद्राज्यप्रत्यर्पणशङ्का त्वया न कार्येति भावः ॥ ३ ॥

म० टी०-तदेव वाक्यविशेषरूपं वचनमुदाहरति-पश्यैतामित्यादिना । तस्य संजनयन्हर्षमित्यतः प्राक्तनेन पाण्डवेषु प्रियशिष्येष्वतिस्निग्धहृदयत्वादाचार्यो युद्धं न करिष्यतीति सम्भाव्य तास्मिन्परेषामवज्ञां विज्ञापयन् तस्य क्रोधातिशयमुत्पादयितुमाह-एतामत्यासन्नत्वेन भवद्विधानपि महानुभावानवगणय्य भयशू-न्यत्वेन स्थितां पाण्डुपुत्राणां चमूं महतीमनेकाक्षौहिणीसहितत्वेन दुर्निवारां पश्यापरोक्षीकुरु । प्रार्थनायां लोट् । अहं शिष्यत्वात्त्वामाचार्यं प्रार्थयामीत्याह-आचार्येति । दृष्ट्वा च तत्कृतामवज्ञां स्वयमेव ज्ञास्यसीतिभावः । ननु तदीयावज्ञा सोढव्यास्माभिः प्रतिकर्तुमशक्यत्वादित्याशङ्क्य तन्निरसनं तव सुकरमेवेत्याह-व्यूढां तवशिष्येणेति । शिष्यापेक्षया गुरोराधिक्यं सर्वसिद्धमेव । व्यूढां तु धृष्टद्युम्नेनेत्यनुक्त्वा द्रुपदपुत्रेणेति क-थनं द्रुपदपूर्ववैरसूचनेन क्रोधोद्दीपनार्थम् । धीमतेति पदमनुपेक्षणीयत्वसूचनार्थं । व्यासंगान्तरनिराकरणेन त्वरातिशयार्थं पश्येति प्रार्थनम् । अन्यच्च हे पाण्डुपुत्राणामाचार्य ! नतु मम तेषु स्नेहातिशयात् । द्रुपदपुत्रेण तव शिष्येणेति त्वद्वधार्थमुत्पन्नोऽपि त्वयाध्यापित इति तव मौढ्यमेव ममानर्थकारणमिति सूचयति । शत्रोरपि सका-शात्तद्वधोपायभूता विद्या गृहीतेति तस्य धीमत्त्वम् । अतएव तच्चमूदर्शनेनानन्दस्तवैव भविष्यति भ्रान्तत्वात् नान्यस्य कस्यचिदपि यं प्रतीयं प्रदर्शनीयेति त्वमेवैतां पश्येत्याचार्यप्रति तत्सैन्यं प्रदर्शयन्निगूढं द्वेषं द्योतयति एवंच यस्य धर्मक्षेत्रं प्राप्यापीदृशी दुष्टबुद्धिस्तस्य कानुतापशङ्का सर्वाभिशङ्कित्वेनातिदुष्टाश-यत्वादितिभावः ॥ ३ ॥

शं० टी०-उवाच मधुसूदन इत्यत्र श्रीभगवानुवाचेति यथा तथाऽत्रापि दुर्योधनउवाचेति निवे-शनीयं परं तथा पाठो न दृश्यते तत्प्रामादिकम् । पश्यैतामिति । हे आचार्य ! धीमता सूक्ष्मबुद्धिना तव शिष्येणेति गूढाभिसन्धीदं वचनं द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां शकटपद्माद्याकारेण संभावितामतएव महतीं

द्रष्टॄणां स्तोत्रार्हां पाण्डुपुत्राणां चमूं सेनामेतामदूरवर्तिनीं पश्य योद्धृतेजोबलपौरुषसन्नाहसमुज्जृम्भित विलोकयेत्यर्थः ॥ ३ ॥

श्री० टी०—तदेव वाक्यमाह—**पश्यैता**मित्यादिनवभिः श्लोकैः । भो आचार्य ! पाण्डवानां वितता चमूं सेनां पश्य । द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां व्यूहरचनया अधिष्ठिताम् ॥ ३ ॥

स० टी०—तस्य तेषु यथावज्ञा क्रोधाधिक्यं भवेद्यथा ॥ तथोवाच स पश्येत्यारभ्य श्लोकैस्त्रिभिस्त्रिकैः ॥ १ ॥ अत्यासन्नामिमां सेनामनेकाक्षौहिणीयुताम् ॥ पश्य पाण्डुसुतानां त्वमाचार्यपरमास्त्रवित् ॥ २ ॥ त्वद्वधार्थं प्रजातेन धृष्टद्युम्नेन धीमता ॥ व्यूहनिर्माणतः सम्यक् स्थापिता वैरिणा तव ॥ ३ ॥ अथवा पाण्डुपुत्राणां गुरो पश्यातिरागवान् ॥ यतस्तेषु त्वामित्येवं हार्दं दुर्योधनस्य च ॥ ४ ॥ यस्य प्राप्य कुरुक्षेत्रमाचार्येऽपीदृशी मतिः ॥ किमुवाच्य भवेत्तस्य दौष्ट्यमाहात्म्यमद्भुतम् ॥ ५ ॥ ३ ॥

भा० टी०—तदेवोदाहरति—**पश्ये**त्यादिना । एतां भवदादीनतिरथानपरिगणय्य सम्मुखे स्थितां पाण्डुपुत्राणां युधिष्ठिरादीनां चमूं सेनां महतीमनेकाऽक्षौहिणीयुक्तामक्षोभ्यां द्रुपदस्य पुत्रेण धृष्टद्युम्नेन तव शिष्येण बुद्धिमता व्यूढां व्यूहरचनया स्थापितां पश्य । हे आचार्य ! उभयेषामाचार्यस्यापि तव पाण्डवेषु प्रीतिर्न युक्ता यतस्त्वामपरिगणय्य तव संमुखे महती सेना तैः स्थापितेत्याशयः । द्रुपदपुत्रेण तव शिष्येणेति पदद्वयेन द्रुपदपुत्रस्य स्वमृत्योरपि त्वया शिक्षणं कृतमिति मृत्योरपि तव भयं नास्तीति सूचितम् । एतेन स्वमृत्युना सह मया कथं योद्धव्यमिति शङ्कापि परिहृता । शिक्षितमपि मूर्खेण विस्मर्यते इति शङ्कानिरासाय धीमतेत्युक्तं । परपक्षेपि त्वदीयमेव बलमिति सूचयन्नाचार्यस्य तन्निरसनमतिसुकरमिति मन्वानः सन्नाह—व्यूढामित्यादिनेत्येके । द्रुपदपुत्रेणेति कथनं द्रुपदपूर्ववैरसूचनेन क्रोधोद्दीपनार्थं । धीमतेत्यनुपेक्षणीयत्वसूचनार्थम् । पश्येति व्यासंगान्तरनिराकरणेन त्वरातिशयार्थम् । अन्यच्च राजा अवचनमब्रवीत् । हे पाण्डुपुत्राणामाचार्य ! न तु मम । तेषु स्नेहाधिक्यात् । द्रुपदपुत्रेण तव शिष्येणेति त्वद्वधार्थमुत्पन्नोपि त्वयाऽध्यापित इति तव मौढ्यमेव ममानर्थकारणमिति सूचयति । शत्रोरपि सकाशात्तद्वधोपायभूता विद्या-गृहीतेति तस्य धीमत्त्वमत एव तच्चमूदर्शनेनानन्दस्तवैव भविष्यति भ्रान्तत्वान्नान्यस्य कस्यचिदपि यं प्रति प्रदर्शनीयेति त्वमेवैतां पश्येत्याचार्यं प्रति निगूढं द्वेषं द्योतयति । एवं च यस्य धर्मक्षेत्रेऽपीदृग्दुष्टबुद्धिस्तस्य कानुतापशङ्केति भाव इति केचित् । अन्यच्चेत्यारभ्य युद्धार्थं प्रार्थनां कुर्वतो दुर्योधनस्य प्रणिपातादि-पुरःसरं आचार्यसमीपं गतस्यात्मनः शिक्षितारं रक्षितारं च प्रत्येवमभिप्रायवर्णनं प्रकृतासंगतं नवेति विद्वद्भिर्निर्मत्सरैः पक्षपातवर्जितैर्विचार्यम् । अनुतापशङ्का तु मूलविरुद्धेति तु पूर्वमुक्तमेव । नन्वनेन कृतं प्रतारणं बुद्ध्वैवाचार्येणोत्तरं न दत्तमिति चेन्न । आचार्याभाषणस्य प्रकृतविरुद्धार्थकल्पनां विनैव वक्ष्यमाणरीत्योपपत्तौ तत्कल्पनाया अन्याय्यत्वात् ॥ ३ ॥

प० टी०—आचार्य ! महतीं पर्याप्तवेलां पाण्डुपुत्राणां चमूं सेनां पश्य न केवलं सैन्यबाहुल्यमुपयुज्यत इत्याह—व्युढामिति । द्रुपदपुत्रेण धृष्टद्युम्नेन धीमता संनिवेशचतुरेण तत्रापि तव शिष्येण व्यूहरचनया संनिविष्टाम् ॥ ३ ॥

रा० टी०—तद्वचनमेवानुवदति सञ्जयः—**पश्यैता**मित्यादिना । हे आचार्य ! तव शिष्येण धीमता धृष्टद्युम्नेन व्यूढां पाण्डुपुत्राणां एतां महतीं चमूं सेनां पश्य ॥ ३ ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ॥
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

त० टी०—स्यादेतत्तथाप्येकेन द्रुपदपुत्रेणाधिष्ठितां तेषां चमूमस्मन्मध्ये कश्चिदेकोऽपि जेष्यति, न त्वया तदजेयत्वशङ्का कार्येति चेन्नैक इत्याह—**अत्र शूरा** इत्यादित्रिभिः। अत्रास्यां पाण्डवचम्वामन्येऽपि शूराः सन्ति अतो नैकेन जेतुं शक्या तेषां चमूः। शूरान्विशिष्याह—**महेष्वासा** इति। महान्त इष्वासा धनूंषि येषां ते तथा। किञ्च नाल्पयुद्धकौशलाः किन्तु युधि भीमार्जुनसमाः। तान्निर्दिशति—**युयुधान** इत्यादिना। युयुधानः सात्यकिः। महारथ इति त्रयाणां विशेषणम् ॥ ४ ॥

म० टी०—नन्वेकेन द्रुपदपुत्रेणाप्रसिद्धेनाधिष्ठितां चमूमेतां मदीयो यः कश्चिदपि जेष्यति किमिति त्वमुत्ताम्यसीत्यत आह—**अत्र शूरा** इत्यादिभिस्त्रिभिः। न केवलमत्र धृष्टद्युम्न एव शूरः येनोपेक्षणीयता स्यात्। किन्तु अस्यां चम्वां अन्येपि बहवः शूराः सन्तीत्यवश्यमेव तज्जये यतनीयमित्यभिप्रायः। शूरानेव विशिनष्टि **महेष्वासा** इति। महान्तोऽन्यैरप्रधृष्या इष्वासा धनूंषि येषां ते तथा दूरत एव परसैन्यविद्रावणकुशला इति भावः। महाधनुरादिमत्त्वेपि युद्धकौशलाभावमाशङ्क्याह—**युधि** युद्धे भीमार्जुनाभ्यां सर्वसम्प्रतिपन्नपराक्रमाभ्यां समास्तुल्याः। तानेवाह—**युयुधान** इत्यादिना। महारथ इत्यन्तेन युयुधानः सात्यकिः द्रुपदश्च महारथ इत्येकः अथवा युयुधानविराटद्रुपदानां विशेषणं महारथ इति ॥ ४ ॥

शं० टी०—योद्धृतेजोबलपौरुषसन्नाहमेव प्रकटयति त्रिभिः—**अत्रेति**। अत्र पाण्डवसेनायां ये योद्धारस्ते सर्वे शूराः। विक्रान्तानपि शृणन्तीति शूराः। महेष्वासाः इषवोस्यन्ते क्षिप्यन्ते एभिरितीष्वासाः कोदण्डाः महान्तो येषां ते महेष्वासाः। युधि भीमार्जुनसमाः बलेन पराक्रमेण च भीमार्जुनाभ्यां समाः सर्वे तुल्या इत्यर्थः। के ते इत्याकाङ्क्षायां तानेव नाम्ना निर्दिशति—**युयुधानइत्यादिना**। अतिशयेन युद्धयतीति युयुधानः सात्यकिः। शत्रून् विशेषेण रटयतीति विराटः। द्रुर्वृक्षः पदं ध्वजे चिह्नं यस्य स द्रुपदो महारथः। 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः' इति वचनाद्द्रुपदो महारथः ॥ ४ ॥

श्री० टी०—अत्र शूरा इति। अत्रास्यां चम्वामिषवो बाणा अस्यन्ते क्षिप्यन्ते एभिरिति इष्वासाः धनूंषि, महान्त इष्वासा येषां ते तथा। भीमार्जुनौ तावदत्रातिप्रसिद्धौ योद्धारौ ताभ्यां समाः शूराः शौर्येण क्षात्रधर्मेण उपेताः सन्ति तानेव नामभिर्निर्दिशति। युयुधानः सात्यकिः ॥ ४ ॥

स० टी०—एकेन धृष्टद्युम्नेनाप्रसिद्धेनाश्रितां चमूम् ॥ अस्मदीयोऽपि यः कश्चिज्जेष्यतीति न तर्क्यताम् ॥ १ ॥ यतोऽस्यां शत्रुसेनायां शूरा दृढधनुर्धराः। युद्धे भीमार्जुनाभ्यां ये तुल्याः सङ्ग्रामदुःसहाः ॥ २ ॥ सात्यक्यादित्रयोऽप्येते भीष्म प्रोक्ता महारथाः ॥ ३ ॥ ४ ॥

मा० टी०—शत्रुसैन्ये प्रसिद्धान् शूरान्दर्शयन्नुपेक्षणीयत्वं वारयति—**अत्रेति**। महान्त इष्वासा धनूंषि येषां ते। तेषां युद्धाकुशलतां निरस्यति—युधीति। युद्धे भीमार्जुनसमा इति भीमार्जुनाभ्यां तुल्याः। युयुधानः सात्यकिः। महारथ इति सन्निहितस्य द्रुपदस्यैव विशेषणमेकवचनस्वारस्यात् एवमग्रेपि बोध्यं। एतेन युयुधानादीनां महारथ इति विशेषणम् ॥ ४ ॥

प० टी०—अत्रास्यां चम्वां शूराः पराक्रमवन्तः महेष्वासाः महान्त इषवो बाणा अस्यन्ते क्षिप्यन्ते यैस्ते तथाविधाः सन्तो युधि सङ्ग्रामे भीमार्जुनसमास्तत्सदृशबलाः सन्ति। अथ तानेवाह—**युयुधान इति**। युयुधानः सात्यकिः विराटस्तथा द्रुपदो द्रौपदीपिता ॥ ४ ॥

रा० टी०—अत्र सेनायां महेष्वासाः महाधनुष्काः युधि भीमार्जुनसमाः शूराः सन्ति ते क इत्यत आह—**युयुधान** इत्यादिना। महारथइति प्रत्येकमन्वेति ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ॥
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥

त० टी०—धृष्टकेतुः शिशुपालपुत्रः। चेकितानोऽन्यो राजा। काशिराजः प्रसिद्धः। तेषां त्रयाणां विशेषणं वीर्यवानिति। कुन्तिभोजस्य पुरुजिदिति विशेषणम्। शैब्यस्य नरपुङ्गव इति ॥ ५ ॥

म० टी०—धृष्टकेतुचेकितानकाशिराजानां विशेषणं वीर्यवानिति। पुरुजित्कुन्तिभोजशैब्यानां विशेषणं नरपुङ्गव इति ॥ ५ ॥

शं० टी०—धृष्टकेतुरिति। धृष्टः परभयङ्करः केतुरस्येति धृष्टकेतुः राजविशेषः। चिकितानस्यापत्यं चेकितानो वीर्यवान् राजविशेषः। युद्धे पूरून् बहून् जयतीति पुरुजित् कुन्तिभोजः कुन्तीपिता। शिबेर्गोत्रापत्यं शैब्यो राजविशेषः स एव नरपुङ्गवः ॥ ५ ॥

श्री० टी०—किञ्च—धृष्टकेतुरिति। चेकितानो नाम एको राजा। नरपुङ्गवः नरश्रेष्ठः शैब्यः ॥ ५ ॥

स०टी०—वीर्यवन्तस्त्रयश्चान्ये धृष्टकेतुमुखा नृपाः॥ पुरुजित्प्रमुखाश्चान्ये त्रयोऽपि नरपुङ्गवाः ॥ १ ॥ ५ ॥

भा० टी०—धृष्टकेत्वादीनां वीर्यवानिति पुरुजिदादीनां नरपुङ्गव इति पक्षान्तरं प्रत्युक्तम्। आवृत्तेश्च प्रयोजनशून्यगौरवग्रस्तत्वेनाङ्गीकारायोगात्। यदपि अथवा सर्वाणि विशेषणानि समुच्चित्य सर्वत्र योजनीयानीति। तदपि न। महारथ इत्यस्य वीर्यवानित्यस्य च पौनरुक्त्यापत्तेः ॥ ५ ॥

प० टी०—चेकितानो राजा कश्चित् स नरपुङ्गवो नरश्रेष्ठः ॥ ५ ॥

रा० टी०—वीर्यवानिति विशेषणम्। नरपुङ्गवो नरश्रेष्ठ इत्यपि त्रयाणाम् ॥ ५ ॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ॥
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

त० टी०—युधामन्योर्विक्रान्त इति। उत्तमौजसो वीर्यवानिति। सौभद्रोऽभिमन्युः। द्रौपदेयाः प्रतिविन्ध्यादयः पञ्च। चकारादन्येऽपि घटोत्कचादयः सर्वे एव महारथाः। अर्जुनादयः प्रसिद्धत्वादतिरथित्वाद्वा महारथेषु न गणिताः। रथार्धरथा अपि न गणिताः। महारथादिलक्षणं च 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः। रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः' इति ॥ ६ ॥

म० टी०—विक्रान्तो युधामन्युः वीर्यवांश्चोत्तमौजा इति द्वौ। अथवा सर्वाणि विशेषणानि समुच्चित्य सर्वत्र योजनीयानि। सौभद्रोऽभिमन्युः द्रौपदेयाश्च द्रौपदीपुत्राः प्रतिविन्ध्यादयः पञ्च। चकारादन्येपि पाण्ड्यराजघटोत्कचप्रभृतयः। पञ्च पाण्डवास्त्वतिप्रसिद्धा एवेति न गणिताः। येगणिताः सप्तदश अन्येपि तदीयाः सर्व-एव महारथाः सर्वेपि महारथाएव नैकोपि रथोर्द्धरथो वा। महारथा इत्यतिरथत्वस्याप्युपलक्षणं। तल्लक्षणं च 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः। रथस्त्वेकेन यो योद्धा तन्न्यूनोर्धरथः स्मृतः' इति ॥ ६ ॥

शं० टी०—युधामन्युरिति। युधायां युद्धे मन्युः कोपवेगो यस्य स युधामन्युः पाञ्चालः। उत्तममोजो बलं यस्य स उत्तमौजाः पाञ्चालः वीर्यवान्। सौभद्रः सुभद्रापुत्रः। तेजोबलविक्रान्तानपि शत्रून्विविधमीरयति पलाययतीति वीरस्तस्य कर्म वीर्यं तदस्यातीति वीर्यवान्। द्रौपद्याः पुत्रा द्रौपदेयाः प्रतिविन्ध्यादयश्चोक्ताः

सर्वे महारथाः । 'आत्मानं सारथिं चाश्वान् रक्षन्नक्षतमायुधैः । यो युध्यत्ययुतैर्वीरः स महारथ उच्यते ' इत्युक्तलक्षणलक्षितत्वात्सर्वेषां महारथत्वं सिद्धम् ॥ ६ ॥

श्री० टी०—युधामन्युश्चेति । विक्रान्तो युधामन्युर्नामैकः सौभद्रोऽभिमन्युः द्रौपदेया द्रौपद्यां पञ्चभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविन्ध्यादयः पञ्च । महारथादीनां लक्षणम्—' एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः । रथी त्वेकेन यो युद्ध्येत्तन्न्यूनोऽर्धरथी मतः ' इति ॥ ६ ॥

स० टी०—विक्रान्तोऽस्ति युधामन्युरुत्तमौजाश्च वीर्यवान् ॥ अभिमन्युस्तथा पञ्चप्रतिविन्ध्यादयस्तथा ॥ १ ॥ एते सप्तदश प्रोक्ता घटोत्कचमुखास्तथा ॥ सर्वे महारथा एव नैकोऽप्यर्धरथो रथः ॥ २ ॥ अत्यन्तसुप्रसिद्धा ये पाण्डवास्ते महारथाः ॥ एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् ॥ ३ ॥ अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः ॥ ४ ॥ रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः ॥ ५ ॥ ६ ॥

भा० टी०—सौभद्रः सुभद्रापुत्रोऽभिमन्युः । द्रौपदेयाः द्रुपदीपुत्राः प्रतिविन्ध्यादयः पञ्च । द्रुपदश्च महारथ इत्युक्तमयुक्तं यतोऽन्येऽपि महारथा भीष्मप्रोक्ताः सन्तीत्याशङ्क्य तदङ्गीकरोति सर्व एवेति निर्दिष्टाश्चकारपरिगृहीताश्च महारथाः । एतल्लक्षणं तु ' एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स वै प्रोक्तो महारथः ॥ अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः । रथस्त्वेकेन यो युध्येत्तन्न्यूनोर्धरथः स्मृतः ' इति । यद्यपि परपक्षेऽतिरथादयोपि सन्ति तथापि तत्तिरोधानं तवाऽतिरथस्य महारथानां निवारणे सामर्थ्यं नत्वन्येषां अतिरथादीनामित्याचार्यस्योत्साहजननार्थं सर्वेपि महारथा एव न त्वेकोपि रथोर्धरथो वा महारथा इत्यतिरथस्याप्युपलक्षणमिति केचित् ॥ ६ ॥

प० टी०—विक्रान्तः पराक्रमी युधामन्युनामकः चपरमुत्तमौजा वीर्यवानेतावर्जुनस्य चक्ररक्षकौ । उक्तंच भीष्मपर्वणि—' पृष्ठगो योऽर्जुनस्यापि युयुधानो महारथः ॥ चक्ररक्षौ च पाञ्चाल्यौ युधामन्यूत्तमौजसौ ॥ ' सौभद्रोऽभिमन्युः । द्रौपदेयाः द्रौपद्यां पञ्चभिर्जाताः पञ्च पुत्राः प्रतिविन्ध्यादयः । एवमुक्ताः सर्वे महारथाः । उक्तं च ' एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते ॥ अमितान्योधयेद्यस्तु स प्रोक्तोतिरथाभिधः । एकस्त्वेकेन यो योद्धा स चार्धरथ उच्यते ' इति ॥ ६ ॥

रा० टी०—महारथत्वंनाम 'एको दशसहस्राणां योधयेद्यः सधन्विनाम् । शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ' इत्युक्तरूपम् । विक्रान्तः पराक्रमवान् । सौभद्रः अभिमन्युः । द्रौपदेयाः द्रौपदीपुत्राः ॥ ६ ॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥

त० टी०—नन्वेवं परसैन्यमजेयं मन्यसे चेत्तर्हि तैः सह सन्धिरेव क्रियतां किं युद्धाग्रहेणेत्याशङ्क्याह—अस्माकं त्विति । तुशब्देन सर्वविद्याश्रयसर्वधनुष्मदाचार्यभूतभवद्विधाश्रयाणामस्माकं नास्ति तदजेयत्वशङ्केत्यात्मनस्तेभ्यो वैशिष्ट्यं द्योतयति । अस्माकं ये विशिष्टा विद्यापौरुषादिनोत्कर्षवन्तस्तान्निबोध यद्विश्वासविषयान् जानीहि । ये च मम सैन्यस्य नायकाः स्वाज्ञया योधयितारस्तान्संज्ञार्थमेते विशिष्टा इति नामभिस्ते तुभ्यं सम्यग्बोधनार्थं ब्रवीमि । द्विजोत्तमेतिशब्दस्य स्तुतिबोधकत्वेऽपि न योत्स्यसे चेत्तर्हि केवलं भोजनार्थं ब्राह्मणोत्तम इति गूढार्थः ॥ ७ ॥

म० टी०—यद्येवं परबलमतिप्रभूतं दृष्ट्वा भीतोसि हन्त तर्हि सन्धिरेव परैरिष्यतां किं विग्रहाग्रहेणे-त्याचार्याभिप्रायमाशङ्क्याह—अस्माकमिति । तुशब्देनान्तरुत्पन्नमपि भयं तिरोदधानो धृष्टतामात्मनो द्योत-याति । अस्माकं सर्वेषां मध्ये ये विशिष्टाः सर्वेभ्यः समुत्कर्षजुषस्तान्मयोच्यमानान्निबोध निश्चयेन मद्वचनादव-धारयेति भौवादिकस्य परस्मैपदिनो बुधेरूपं । ये च मम सैन्यस्य नायका मुख्या नेतारस्तान्संज्ञार्थं असंख्येषु तेषु मध्ये कतिचिन्नामभिर्गृहीत्वा परिशिष्टानुपलक्षयितुं ते तुभ्यं ब्रवीमि नत्वज्ञातं किञ्चिदपि तव ज्ञापयामीति द्विजोत्तमेति विशेषणेनाचार्यं स्तुवन्स्वकार्ये तदाभिमुख्यं संपादयति । दौष्ट्यपक्षे द्विजोत्तमेति ब्राह्मणत्वात्तावद्यु-द्धाकुशलस्त्वं तेन त्वयि विमुखेपि भीष्मप्रभृतीनां क्षत्रियप्रवराणां सत्त्वान्नास्माकं महती क्षतिरित्यर्थः । संज्ञार्थ-मिति प्रियशिष्याणां पाण्डवानां चमूं दृष्ट्वा हर्षेण व्याकुलमनसस्तव स्वीयवीरविस्मृतिर्माभूदिति ममेयमुक्ति-रितिभावः ॥ ७ ॥

शं० टी०—एवं पाण्डवसेनानेतॄन्निर्दिश्याथ स्वसेनानेतॄन्निर्देष्टुमिदमाह—अस्माकंत्विति । अस्माकं ये तु विशिष्टा विद्याबलपौरुषपराक्रमकुलशीलादिभिः प्रसिद्धाः सैन्यस्य नायका नेतारस्तान् ते संज्ञार्थं मम परमाप्तत्वेन परिज्ञानार्थं ब्रवीमि त्वं निबोध बुद्ध्यस्व द्विजोत्तम ॥ ७ ॥

श्री० टी०—अस्माकमिति । निबोध बुद्ध्यस्व नायकाः नेतारः सञ्ज्ञार्थं सम्यग्ज्ञानार्थमित्यर्थः ॥७॥

स० टी०—दृष्ट्वारिसेनां भीतश्चेत्तर्हि संधिर्विधीयताम् ॥ इत्याशङ्कां स आलक्ष्य गुरोराह वचो नृपः ॥१॥ तुशब्देनान्तरुत्पन्नां भीतिमाच्छादयन्नृपः ॥ द्योतयत्यात्मनो धार्ष्ट्यं गुरोरग्रे महत्तरम् ॥ २ ॥ मध्येऽस्माकं समस्तानां ये विशिष्टगुणान्विताः ॥ तन्मया प्रोच्यमानांस्त्वं मद्वाक्यादवधारय ॥ ३ ॥ मम सैन्यस्य नेतारो ये च तांस्ते ब्रवीम्यहम् ॥ गृहीत्वा नामभिः कांश्चिच्छिष्टाञ्ज्ञापयितुं स्फुटम् ॥ ४ ॥ द्विजोत्तमेति शब्देन ब्राह्मणानामदक्षताम् ॥ सङ्ग्रामे सूचयत्येष दुष्टभावेन भूपतिः ॥ ५ ॥ संज्ञार्थमिति शब्देन प्रियशिष्यचमूं तव ॥ दृष्ट्वा हर्षवशान्मास्तु स्वीयवीरप्रविस्मृतिः ॥ ६ ॥ ७ ॥

भा० टी०—ननु ते बहवो महारथा मयैकेनातिरथेनापि कथं निवार्या इत्याशङ्क्यान्येपि तव सहकारिणो-स्मत्सैन्ये महाशूराः सन्तीत्याह—अस्माकमिति । यद्येवं परकीयबलमतिप्रभूतं प्रतीत्य भीतोसि तर्हि सन्धि-रेव तैरिष्यतामलं विग्रहाग्रहेणेत्याशङ्क्याह अस्माकमित्येके अस्माकं सर्वेषां मध्ये विशिष्टा उत्कृष्टा मम सैन्यस्य च मुख्यास्तान्निबोध जानीहि । असङ्ख्येषु मध्ये कतिचिन्नामभिरुक्त्वाऽवशिष्टानुपलक्षयितुं ते तुभ्यं ब्रवीमि विज्ञापनं करोमि न तु किञ्चिदज्ञातं ज्ञापयामि । अत्युत्तमत्वात्तवेत्याशयेनाह—द्विजोत्तमेति । द्विजोत्तमेति ब्राह्म-णत्वाद्युद्धाकुशलस्त्वं तेन त्वयि विमुखेऽपि भीष्मप्रमुखाणां क्षत्रियप्रवराणां सत्वान्नास्माकं महती क्षतिरिति दुर्योधनदौष्ट्यमिति केचित् ॥ ७ ॥

प० टी०—अथ स्वकीयां सेनामाह—अस्माकमिति । अस्माकं सैन्ये ये विशिष्टा विवक्षिताः सन्ति तान्निबोध बुध्यस्व । मम सैन्यस्य नायका नियन्तारः ॥ ७ ॥

रा० टी०—अस्माकं त्विति । पाण्डवव्यावर्तकस्तुशब्दः । अस्माकं संबन्धिनो विशिष्टाः बलिष्ठाः मम सैन्यस्य नायकाः नेतारो ये तान्निबोध बुद्धिस्थान् जानीहि । ते तव सम्यग्ज्ञानार्थं तान्ब्रवीमि । द्विजोत्तमे-त्याचार्यसंबोधनम् ॥ ७ ॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ॥
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

त० टी०—तानेव निर्दिशति—भवानिति । समितिञ्जय इति द्रोणादिकृपान्तानां चतुर्णां विशेषणम् । समितिं संग्रामं जयति तथा सः । उक्तेभ्यश्चतुर्भ्यः किञ्चिन्न्यूनान् दर्शयति—अश्वत्थामे-

त्यादि। अश्वत्थामा गुरुपुत्रः विकर्णः स्वकनिष्ठभ्राता सौमदत्तिर्भीष्मपितृव्यस्य वाह्लीकस्य पुत्रः सोमदत्तस्तस्य पुत्रः सौमदत्तिर्भूरिश्रवाः ॥ ८ ॥

म० टी०—तत्र विशिष्टान् गणयति भवान् द्रोणः भीष्मः कर्णः कृपश्च समितिं संग्रामं जयतीति समितिंजयइति कृपविशेषणं कर्णादनन्तरं गण्यमानत्वेन तस्य कोपमाशङ्क्य तन्निरासार्थं एते चत्वारः सर्वतोविशिष्टाः । नायकान् गणयति अश्वत्थामा द्रोणपुत्रः भीष्मापेक्षयाचार्यस्य प्रथमगणनवद्विकर्णाद्यपेक्षया तत्पुत्रस्य प्रथमगणनमाचार्यपरितोषार्थं । विकर्णः स्वभ्राता कनीयान् । सोमदत्तस्य पुत्रः श्रेष्ठत्वाद्भूरिश्रवाः । सिन्धुराजस्तथैव चेति क्वचित्पाठः ॥ ८ ॥

शं० टी०—के ते इत्यतआह द्वाभ्यां—**भवानिति** । भवान् भीष्मः कर्णः कृपः कृपाचार्यः समितिं वीराणामपि युद्धक्रियां जयतीति समितिंजयो युद्धे दुर्जयोऽश्वत्थामा विकर्णश्च सौमदत्तिः सोमदत्तस्यापत्यं भूरिश्रवाः ॥ ८ ॥

श्री० टी०—तानेवाह—**भवानिति** द्वाभ्याम् । भवान्द्रोणः । समितिं सङ्ग्रामं जयतीति तथा । सौमदत्तिः सोमदत्तस्य पुत्रो भूरिश्रवाः ॥ ८ ॥

स० टी०—के ते स्युरित्यपेक्षायां प्राह चत्वार आदरात् ॥ भवत्प्रभृतयः शूराः सर्वे सङ्ग्रामकोविदाः॥ १॥ अश्वत्थामादयो ये च तेऽपि शूरा महत्तमाः ॥ २ ॥ ८ ॥

भा० टी०—तानेव विशिष्टान् स्वसेनानायकान् परिगणयति—**भवानित्यादिना** । समितिं संग्रामं जयतीति तथा समितिञ्जयपदं मध्यमणिन्यायेनोभयत्र संबध्यते कर्णात्पश्चात्परिगणनेन कृपाश्वत्थाम्नोः कोपो मा भूदिति तयोर्विशेषणत्वेन समितिञ्जयपदोपादानं । विकर्णः स्वभ्राता । सौमदत्तिर्भूरिश्रवाः ॥ ८ ॥

प० टी०—तानाह—**भवानिति** । भवान्द्रोणो भीष्मः कृपः कृपाचार्यः समितिं संग्रामं जयतीति तथा सौमदत्तिः सोमदत्तस्य पुत्रो भूरिश्रवाः ॥ ८ ॥

रा० टी०—तानाह द्वाभ्यां—**भवानित्यादिना** । समितिंजयः युद्धे जयशीलः सौमदत्तिः सोमदत्तसुतो भूरिश्रवाः ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

त० टी०—किमेत एव तव विशिष्टा योद्धारो नेत्याह—अन्ये चेति । अन्ये च जयद्रथशल्यप्रभृतयः मदर्थे मत्प्रयोजनाय त्यक्तजीविता जीवितं त्यक्तुं कृतनिश्चयाः । ननु त्वदर्थे त्यक्तजीविता अप्यसमर्थाश्चेत्किं कुर्युरिति चेन्नेत्याह विशेषणाभ्यां द्वाभ्याम्—नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदा इति । नानाशस्त्राणि प्रहरणानि येषां ते तथा युद्धविशारदाः विविधयुद्धमार्गेषु सर्वे निपुणा इत्यर्थः ॥ ९ ॥

म० टी०—सिन्धुराजः जयद्रथः किमेतावन्तएव नायका नेत्याह—अन्ये च शल्यकृतवर्मप्रभृतयः मदर्थे मत्प्रयोजनाय जीवितमपि त्यक्तुमध्यवसिता इत्यर्थेन त्यक्तजीविताइत्यनेन स्वास्मिन्ननुरागातिशयस्तेषां कथ्यते। एवं स्वसैन्यबाहुल्यं तस्य स्वस्मिन् भक्तिं शौर्यं युद्धोद्योगं युद्धकौशलं च दर्शितं शूराइत्यादिविशेषणैः ॥ ९ ॥

शं० टी०—**अन्यइति** । अन्ये अवशिष्टा बाह्लीकभगदत्तादयश्च बहवः शूराः शौर्यशालिनः नानाशस्त्रप्रहरणाः नानाविधानि शस्त्राणि शूलचक्रगदाखड्गपरिघादीनि प्रहरणसाधनानि येषां ते नानाशस्त्रप्रहरणास्ततएव युद्धविशारदाः सकलयुद्धेषु निपुणाश्चेति सर्वे मदर्थे मद्विजयसिद्ध्यै त्यक्तजीविताः प्राणत्यागेनापि जयं सम्पादयिष्याम इति निश्चयेन तिष्ठन्तीत्यर्थः ॥ ९ ॥

श्री० टी०—**अन्ये चेति** । मदर्थे मत्प्रयोजनार्थं जीवितं त्यक्तुमध्यवसिता इत्यर्थः । नाना अनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदाः निपुणा इत्यर्थः ॥ ९ ॥

स० टी०—अन्ये शल्यादयोऽनेके शूरा मत्प्रीतिसाधकाः ॥ मत्प्रयोजनसिद्ध्यर्थं जीवितं त्यक्तुमुद्यताः॥१॥ एवं स्वसैन्यबाहुल्यं स्वस्मिंस्तस्य रतिः परा ॥ युद्धोद्योगो रणे दाक्ष्यं चतुर्भिर्दर्शितं पदैः ॥ २ ॥ ९ ॥

भा० टी०—गणितुमसंख्यान् सर्वानपि संगृह्णाति—**अन्येचेति** । बहवोऽपरिमिताः स्वजीवितादप्यधिका मयि सर्वेषां भवदादीनां प्रीतिरस्तीत्याह—मदर्थ इति । त्यक्तं जीवितं यैस्ते जीवितमपि गच्छति चेत्तर्हि सर्वेस्त्यज्यतइति भावः । परे महेष्वासा अस्मदीयास्तु नानाशस्त्रप्रहरणा इति स्वकीयानामुत्कर्षं द्योतयन्नाह-नानाविधानि शस्त्राणि खड्गादीनि प्रहरणानि गदादीनि च येषां ते । युद्धाकुशलतानिरासार्थमाह—सर्वे इति । युद्धे विशारदाः विचक्षणाः ॥ ९ ॥

प० टी०—अन्ये एतदतिरिक्ता बहवः शूराः सन्ति मदर्थे मत्प्रयोजनाय त्यक्तजीविताः संकल्पितप्राणाः नानाशस्त्रैः प्रहरन्ति युद्ध्यन्ति ते तथा अत एव विशारदाः ॥ ९ ॥

रा० टी०—शूरा एवेति वा मदर्थएवेति वाऽवधारणान्वयः । त्यक्तजीविताः प्राणत्यागे कृतनिश्चया इत्यर्थः । प्रह्रियन्ते एभिरिति प्रहरणानि अस्त्राणि । नानाविधानि शस्त्राणि येषां ते नानाशस्त्रप्रहरणाः । युद्धविशारदाः युद्धकुशलाः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ॥
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

त० टी०—एवं चेत्तर्हि भयाभावात्किमितस्ततो धावसीत्यत आह—अपर्याप्तमिति । तत् यथोक्तयोद्धृविशिष्टं भीष्माभिरक्षितमस्माकं बलं सैन्यमपर्याप्तमपूर्णं मे भाति । एतेषां पाण्डवानां तु बलं भीमेनाभिरक्षितं पर्याप्तं पूर्णं समर्थं मे प्रतिभातीत्यर्थः ॥ १० ॥

म० टी०—राजा पुनरपि सैन्यद्वयसाम्यमाशङ्क्य स्वसैन्याधिक्यमावेदयति—**अपर्याप्तमिति** । अपर्याप्तमनन्तमेकादशाक्षौहिणीपरिमितं भीष्मेण च प्रथितमहिम्ना सूक्ष्मबुद्धिनाभितः सर्वतो रक्षितं तत्तादृशगुणवत्पुरुषाधिष्ठितमस्माकं बलं । एतेषां पाण्डवानां बलं तु पर्याप्तं परिमितं सप्ताक्षोहिणीमात्रात्मकत्वान्न्यूनं भीमेन चातिचपलबुद्धिना रक्षितं तस्मादस्माकमेव विजयो भविष्यतीत्यभिप्रायः । अथवा तत्पाण्डवानां बलमपर्याप्तं नालं अस्माकमस्मभ्यं । कीदृशं तद्भीष्मोभिरक्षितोस्माभिर्यस्मै यन्निवृत्त्यर्थमित्यर्थः । तत्पाण्डवबलं भीष्माभिरक्षितं । इदं पुनरस्मदीयं बलं एतेषां पाण्डवानां पर्याप्तं परिभवे समर्थं । भीमोतिदुर्बलहृदयो रक्षितो यस्मै तदस्माकं बलं भीमाभिरक्षितं । यस्माद्भीमोऽत्ययोग्यएवैतन्निवृत्त्यर्थं तैरक्षितस्तस्मादस्माकं न किञ्चिदपि भयकारणमस्तीत्यभिप्रायः । एवं चेन्निर्भयोसि तर्हि किमिति बहु जल्पसीत्यतआह । कर्त्तव्यविशेषद्योती तुशब्दः ॥ १० ॥

शं० टी०—किंच-**अपर्याप्तमिति** । अपर्याप्तं युद्धाय यदनलमस्माकं निरुक्तेभ्यो भिन्नं तद्भीष्माभिरक्षितं भीष्मेणाभितः शरीरवाक्शस्त्रास्त्रबलेन रक्षितं सत् मम जयसम्पादनाय पर्याप्तमेव भवति महापुरुषाश्रयबलात्। तेषां पाण्डवानां तु इदं पुरो दृश्यमानं बलं पर्याप्तमपि भीमेनाभिरक्षितं सदपर्याप्तमेव भवति हीनपुरुषाश्रयादितिभावः । इतोन्यथाव्याख्याने सन्धिः प्रसज्यते तददर्शनादेवमेवयुक्तमिति भाति ॥ १० ॥

श्री० टी०—ततः किमित्यत आह—**अपर्याप्तमिति** । तत् तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुमसमर्थं भाति । इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षितं सत् पर्याप्तं समर्थं भाति । भीष्मस्योभयपक्षपातित्वात् । अस्मद्बलं पाण्डवसैन्यं प्रत्यसमर्थम् । भीमस्यैकपक्षपातित्वात् ॥ १० ॥

स० टी०—स्वसैन्याधिक्यमेवाह राजा दुर्योधनोऽधुना ॥ अनन्तं सैन्यमस्माकं संख्यया शूरवत्तया ॥ १ ॥ सर्वतो रक्षितं यस्माद्भीष्मेणोदारबुद्धिना ॥ पाण्डवानां बलं स्वल्पं यत्सप्ताक्षौहिणीयुतम् ॥ २ ॥ रक्षितं सर्वतो यस्माद्भीमेनात्यल्पबुद्धिना ॥ यद्वा पाण्डवसैन्यं तन्निवर्त्यं सूक्ष्मबुद्धिना ॥ ३ ॥ अस्मदीयं तु तत्सैन्यं निवर्त्यं चलबुद्धिना ॥ असमर्थमिदं तेषां बलमस्मत्पराभवे ॥ ४ ॥ समर्थं तु तदस्माकं बलमेतत्पराभवे ॥ इति वान्यत्समानं तत्सर्वमत्रापि योज्यताम् ॥ ५ ॥ निश्चयेन ततोऽस्माकं जय एव भविष्यति ॥ ६ ॥ १० ॥

भा० टी०—स्वोत्कर्षे हेत्वन्तरमाह—**अपर्याप्तमिति**। तत्परेषां बलमस्माकं बलं सैन्यमभिभवितुमपर्याप्तमसमर्थं यतोऽस्माकं बलं भीष्मेण प्रथितमहिम्नाऽतिशूरेण रक्षितम् । इदमस्मदीयं तु बलमेतेषां सैन्यमभिभवितुं पर्याप्तं समर्थं। यतः परेषां बलं भीमेन बालेनाभिरक्षितमित्यर्थः। यद्वा तत्परोक्षं सर्वं विषयीकर्तुं अशक्यमस्माकं बलं भीष्मेण चाभिरक्षितमतोऽपर्याप्तं पर्याप्तुमभिभवितुं क्षोभयितुमशक्यं । एतेषां त्विदं परिदृश्यमानं परिमितमिति यावत् । भीमेन चाभिरक्षितमतः पर्याप्तं पर्याप्तुमभिभवितुं क्षोभयितुं सोढुं च शक्यमित्यर्थः । यद्वा तत्तस्मात् अस्माकमिदं बलमपर्याप्तं परिसमन्तादितस्ततः सर्वं प्राप्तं न भवति किन्तु स्वकीयमेव बहु । एतेषां तु बलं परिसमन्तादितस्ततः प्राप्तं पर्याप्तमतोस्मत्सैन्यं मनो दत्त्वा युद्धं करिष्यतीति कृत्वाऽस्माकं प्राबल्यमिति भावः । अस्माकं किलेदं एकादशाक्षौहिणीपरिमितं बलं भीष्मेण चाभिरक्षितं पर्याप्तं परेषा परिभवे समर्थं। एतेषां पुनस्तदल्पं सप्ताक्षौहिणीपरिमितं बलं भीमेन चपलबुद्धिना कुशलताविकलेन परिपालितमपर्याप्तं अस्मानभिभवितुमसमर्थमित्यर्थः । अथवा तदिदमस्माकं बलमपर्याप्तमनल्पं भीष्मेण चाधिष्ठितं तेषां तु बलं पर्याप्तमल्पं भीमेन चाधिष्ठितमतोऽस्माकमेव जयो भविष्यतीति भावः । अथवा तत्पाण्डवानां बलमस्माकमस्मभ्यं अपर्याप्तं नालं यत एतेषां बलं भीष्माभिरक्षितं भीष्मोभिरक्षितो निवृत्त्यर्थमस्मै ततः इदं पुनरस्मदीयं बलं तेषां परिभवे पर्याप्तं समर्थं यतो भीमोभिरक्षितोस्मैतत् अस्मत्सैन्यनिवृत्त्यर्थं दुर्बलहृदयो भीमः परैरभिरक्षित इत्यर्थ इत्येके । यत्तु तथाभूतैर्युक्तमपि भीष्मेणाभिरक्षितमपि अस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुमसमर्थं भाति । इदं त्वेतेषां पांडवानां बलं भीमाभिरक्षितं सत् पर्याप्तं समर्थं भाति। भीष्मस्योभयपक्षपातित्वादितिभावः इति तदुपेक्ष्यं । प्रकरणविरोधात्तदेवं बहुमानयुक्तं राजवाक्यं श्रुत्वा भीष्मः किं कृतवानिति स्वग्रन्थविरोधाच्च ॥ १० ॥

प० टी०—अथ सैन्यद्वयोपन्यासकरणमाह—**अपर्याप्तमिति** । तदुद्दिष्टमस्माकं बलं सैन्यं भीष्माभिरक्षितमपि अपर्याप्तमसंपूर्णं तैः सह योद्धुमसमर्थम् । तथैतेषां पाण्डवानां बलं भीमाभिरक्षितं सत् पर्याप्तं संपूर्णं योद्धुं समर्थम् ॥ १० ॥

रा० टी०—बलद्वये बलिष्ठपरिगणने पाण्डवविजये मम सन्देहोस्ति । ततो भवदादयः सर्वे बहुसन्नद्धा भवन्त्वितिभावेनाह । **अपर्याप्तमिति** । सेनापतिभूतभीष्माभिरक्षितं अस्माकं तत्प्रागुक्तबलिष्ठोपेतं बलमपर्याप्तं पाण्डवजये न समर्थं प्रतीयते। भीमाभिरक्षितमिदं पाण्डवानां बलं तु पर्याप्तमस्मद्विजये शक्तं प्रतीयते ॥१०॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः ॥
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

त० टी०—तर्हि किं कर्त्तव्यमित्यत आह—**अयनेष्विति** । अयनेषु व्यूहप्रवेशनिर्गमस्थानेषु सर्वे यथाभागं विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिताः सन्तो भवन्तः सर्वे एव हि भीष्मं सेनापतिमेवाभिरक्षन्तु । सेनापतौ रक्षिते सर्वं सैन्यं रक्षितं भवतीति भावः ॥ ११ ॥

म० टी०—समरसमारम्भसमये योधानां यथाप्रधानं युद्धभूमौ पूर्वापरादिदिग्विभागेनावस्थितिस्थानानि यानि नियम्यन्ते तान्यत्रायनान्युच्यन्ते । सेनापतिश्च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति । तत्रैवंसति यथाभागं

विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिताः सन्तो भवन्तः सर्वेऽपि युद्धाभिनिवेशात्पुरतः पृष्ठतः पार्श्वत-श्चानिरीक्षमाणं भीष्मं सेनापतिमेव रक्षन्तु भीष्मे हि सेनापतौ रक्षिते तत्प्रसादादेव सर्वं सुरक्षितं भविष्य-तीत्यभिप्रायः ॥ ११ ॥

शं० टी०—तथैवास्तुनाम किमिदानीं कर्तव्यमित्यत आह—**अयनेष्विति** । हि यस्माद्भीष्माधीनो मम जय-स्तस्माद्भवन्तो योद्धार एव निरुक्ताः सर्वे अयनेषु चक्रादिव्यूहमार्गेषु यथाभागं विभक्तं स्वं स्वं स्थानं यथातथा-स्थिताः सन्तो भीष्ममेवाभिरक्षन्तु सेनामुखे युद्धयन्तु भीष्ममभितो रक्षन्तु भीष्मस्य परेभ्य उपद्रवो यथा न स्यात्तथा परिवेष्ट्य रक्षणं कुर्वन्तः सन्तएव यूयं युद्धं कुरुतेत्यर्थः ॥ ११ ॥

श्री० टी०—तस्मात् भवद्भिरेवं वर्तितव्यमित्याह—**अयनेष्विति** । अयनेषु व्यूहप्रवेशमार्गेषु यथाभागं विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिताः सन्तः सर्वे भीष्ममेवाभितो रक्षन्तु तथाऽन्यैर्युध्यमानः पृष्ठतः कैश्चिन्न हन्येत तथा रक्षन्तु । भीष्मबलेनैवास्माकं जीवितमिति भावः ॥ ११ ॥

स० टी०—एवं चेन्निर्भयोऽसि त्वं किं वृथा बहु जल्पसि ॥ इत्यत्राह तुशब्देन कर्तव्यं द्योतयन्नृपः ॥ १ ॥ सङ्ग्रामारम्भसमये युद्धभूमौ यथायथम् ॥ पूर्वादिदिग्विभागेन वीराणां स्थितिभूमयः ॥ २ ॥ नियम्यन्ते हिताः प्रोक्ता अयनानीति तत्र च ॥ सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति सैन्यपः ॥ ३ ॥ यथाभागं विभक्तां स्वां स्वामत्यक्त्वा रणक्षितिम् ॥ भवन्तोऽवस्थिताः सन्तः पुरतः पृष्ठतोऽन्यतः ॥ ४ ॥ निरीक्षय-माणं भीष्मं ते सर्वे रक्षन्तु सैन्यपम् ॥ भीष्मे सेनापतौ सर्वं रक्षिते स्यात्सुरक्षितम् ॥ ५ ॥ ११ ॥

भा० टी०—तस्माद्भीष्ममेव सेनापतिं गुणभूता भवन्तो रक्षन्त्विति प्रार्थयते—**अयनेष्विति** । सङ्ग्रामप्रा-रम्भे योधानां यथाप्रधानं सङ्घ्ये पूर्वपरादिविभागेन नियतेष्ववस्थितिस्थानेष्वयनेषु तु नाकर्तव्यविशेषो द्योत्यते । यथाभागं विभागेन प्राप्तं स्वस्थानमवस्थिताः सावधानतया स्थिताः सर्व एव भवन्तः सर्वसैन्यमधिष्ठाय मध्ये स्थितं युद्धे व्यग्रं सेनापतिं भीष्ममेवाभिसमन्ताद्रक्षन्तु परबलनिवृत्त्यर्थमस्माभिस्तस्मिन् रक्षिते सर्वमस्मदीयं रक्षितं स्यादित्यर्थः ॥ ११ ॥

प० टी०—तस्माद्भवद्भिरेवं कर्तव्यमित्याह—**अयनेष्विति** । अयनेषु व्यूहप्रवेशमार्गेषु यथाभागं रणभूमिं विभज्य स्थिताः सन्तः सर्वेऽपि भवन्तो भीष्ममेवाभितः समन्ततो रक्षन्तु तस्य व्यूहं प्रविष्टस्य पृष्ठिं रक्षन्तु ॥ ११ ॥

रा० टी०—हि यस्मादेवमतो भवन्तः सर्वएव सर्वेष्वयनेषु व्यूहप्रवेशमार्गेषु यथाभागमवस्थिताः स्वस्वरण-भूमिस्थानेषु दृढमवस्थिताः सन्तः भीष्ममेवाभिरक्षन्तु । अन्यैर्युध्यमानो भीष्मः पृष्ठतोऽरिभिर्यथा न हन्यते त-त्तथा रक्षन्त्विति द्रोणाचार्यमुक्त्वा विषसाद ॥ ११ ॥

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः ॥
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

त० टी०—एवं शत्रुसैन्यादन्तर्भीतोऽपि शठत्वेनैवाचार्यमुपसृत्य स्वोत्कर्षद्योतकवचनैरतुष्टेनाचा-र्येणोपेक्षितं राजानं ज्ञात्वा अयनेष्वित्यादिनाऽऽत्माश्रितं ज्ञात्वा राजत्वान्नोपेक्षणीय इति तं भीष्मो हर्षयामासेत्याह—तस्येति । तस्य दुर्योधनस्य हर्षं सम्यग्जनयन् प्रतापवान् कुरुवृद्धः पितामहः उच्चैः सिंहनादं विनद्य शङ्खं दध्मौ ॥ १२ ॥

म० टी०–स्तौतु वा निन्दतु वा एतदर्थं देहः पतिष्यत्येवेत्याशयेन तं हर्षयन्नेव सिंहनादं शङ्खवाद्यं च कारितवानित्याह । एवं पाण्डवसैन्यदर्शनादतिभीतस्य भयनिवृत्त्यर्थमाचार्यं कपटेन शरणं गतस्य इदानीमप्ययं मां प्रतारयतीत्यसंतोषवशादाचार्येण वाङ्मात्रेणाप्यनादृतस्याचार्योपेक्षां बुद्ध्वायनेष्वित्यादिना । भीष्ममेव स्तुवतस्तस्य राज्ञो भयनिवर्तकं हर्षं बुद्धिगतमुल्लासविशेषं स्वविजयसूचकं जनयन् उच्चैर्महान्तं सिंहनादं विनद्य कृत्वा । सिंहनादमिति णमुलन्तं । अतोरेपोपि पुष्यतीतिवत्तस्यैव धातोः पुनः प्रयोगः । शङ्खं दध्मौ वादितवान् । कुरुवृद्धत्वादाचार्यदुर्योधनयोरभिप्रायपरिज्ञानं पितामहत्वादनुपेक्षणं नत्वाचार्यवदुपेक्षणं प्रतापवत्त्वादुच्चैः सिंहनादपूर्वकशङ्खवादनं परेषां भयोत्पादनाय । अत्र सिंहनादशङ्खवाद्ययोर्हर्षजनकत्वेन पूर्वापरकालत्वेपि "अभिचरन्यजेत" इतिवज्जनयन्निति शताऽवश्यंभावित्वरूपवर्तमानत्वे व्याख्यातव्यः ॥ १२ ॥

शं० टी०–एवमुक्तवति राज्ञि किमभवदिति धृतराष्ट्रप्रश्ने सञ्जय आह–**तस्येति** । प्रतापवान् कुरुवृद्धः पितामहो भीष्मः तथैव जयं सम्पादयिष्यामीति सूचयन्निव तस्य दुर्योधनस्य हर्षं सम्पादयन् सिंहनादं विनद्य कृत्वा स्वमुच्चैरुदात्तं शङ्खं दध्मौ पूरयामास ॥ १२ ॥

श्री० टी०–तदेवं बहुमानयुक्तं राज्ञो दुर्योधनस्य वाक्यं श्रुत्वा भीष्मः किं कृतवांस्तदाह–**तस्येति** । तस्य राज्ञः हर्षं सञ्जनयन् कुर्वन् पितामहो भीष्म उच्चैः महान्तं सिंहनादं कृत्वा शङ्खं दध्मौ वादितवान् ॥ १२ ॥

स० टी०–एवं संस्तुवतो भीष्मं राज्ञो विजयसूचकम् ॥ उल्लासं जनयन्नुच्चैः सिंहनादं महारवम् ॥ १ ॥ कृत्वा प्रतापयुक्तत्वाच्छङ्खं वादितवांस्ततः ॥ कुरुवृद्धतयाचार्यभूपयोराशयज्ञता ॥ २ ॥ राज्ञोऽनुपेक्षणं तस्य पितामहतयोच्यते ॥ ३ ॥ १२ ॥

भा० टी०–एवं स्वस्याप्राधान्यं श्रुत्वा तूष्णीं स्थितमाचार्यं तं दृष्ट्वा खिन्नं स्वस्मिन्नतिभक्तिमन्तं दुर्योधनं चालक्ष्य भीष्मस्तस्य हर्षोत्पादने प्रवृत्त इत्याह–**तस्येति** । दुर्योधनस्य हर्षं बुद्धिगतमुल्लासविशेषं सिंहनादशङ्खशब्दकरणद्वारकं सम्यगुत्पादयंस्तदीयखेदापनयार्थमुच्चैः सिंहनादं विनद्य कृत्वा शङ्खं दध्मौ आपूरितवान् कुरुवृद्धः पितामहः । कुरुवृद्धत्वात् पितामहत्वात् तदुपजीवितया तद्वशत्वाच्च भीष्मस्योक्तार्थे प्रवृत्तिरुचितैवेति भावः । असामर्थ्यं वारयति–प्रतापवानिति । कुरुवृद्धत्वादाचार्यदुर्योधनयोरभिप्रायपरिज्ञानं पितामहत्वादनुपेक्षणं नत्वाचार्यवदुपेक्षणमिति केचित् ॥ १२ ॥

प० टी०–**तस्येति** । एवमित्यादिभिरुत्तेजनवाक्यैः स्ववीरांस्तीक्ष्णीकृतवतो दुर्योधनस्य हर्षमुत्साहं जनयन् कुरुषु कौरवसैन्येषु वृद्धः पितामहो भीष्मः प्रतापवान् स्वयमुत्साहवान् सिंहवदट्टहासं कृत्वा शङ्खं दध्मौ वादितवान् ॥ १२ ॥

रा० टी०–एवं विषादिनस्तस्य दुर्योधनस्य हर्षं संजनयन् जनयितुं । "लक्षणहेत्वोः क्रियायाः" इति हेतौ शत्रन्तं । प्रतापवान्कुरुवृद्धः पितामहो भीष्मः सिंहनादं उच्चैर्विनद्य शङ्खं दध्मौ । ध्मा शब्दे ॥ १२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ॥
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

त० टी०–ततो भीष्मस्य सेनापतेः शङ्खशब्दानन्तरं शङ्खभेर्यादयः सहसैव तत्क्षणमेवाभ्यहन्यन्त । कर्त्रविवक्षया कर्मकर्तरिप्रयोगः । शङ्खादीनां स शब्दस्तुमुलो वीरहृदयकम्पनोऽभवत् । पाण्डवास्तु नाकम्पन्तेति भावः ॥ १३ ॥

म० टी०–ततो भीष्मस्य सेनापतेः प्रवृत्त्यनन्तरं पणवाश्चानका गोमुखाश्च वाद्यविशेषाः सहसा तत्क्षणमेव

अभ्यहन्यन्त वादिताः । कर्मकर्तरिप्रयोगः । स शब्दस्तुमुलो महानासीत्तथापि न पाण्डवानां क्षोभो जातइत्य-भिप्रायः ॥ १३ ॥

शं० टी०—ततइति। ततः भीष्मशङ्खनिनादेनोत्पन्नरणोत्साहैर्द्रोणादिसर्वसैनिकैः स्वस्वशङ्खाश्च सेनाचरैर्भेर्यश्च पणवानकगोमुखाः पणवाद्या वाद्यविशेषाश्च सहसातित्वरयैव अभ्यहन्यन्त । शङ्खभेर्यादिहननसमुत्पन्नो यः शब्दो ध्वनिः स तुमुलः संकीर्णः सन्महानभूदित्यर्थः ॥ १३ ॥

श्री० टी०—तदेवं सेनापतेः भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवः प्रवृत्त इत्याह—**तत इति।** पणवाः आनकाः गोमुखाश्च वाद्यविशेषाः सहसैव तत्क्षणमेवाभ्यहन्यन्त वादिताः । स च शङ्खादिशब्दस्तुमुलो महानभवत् ॥ १३ ॥

स० टी०—ततः सेनापतेः शङ्खवादनानन्तरक्षणे ॥ सहसा शङ्खभेर्याद्या वाद्यभेदाश्च वादिताः ॥ १ ॥ स शब्दोऽपि महानासीत् क्षोभकर्तृतया क्षितौ ॥ २ ॥ १३ ॥

भा० टी०—तत इति। दुर्योधनाभिप्रायानुरोधिभीष्मप्रवृत्त्यनन्तरं शङ्खादयो वाद्यविशेषा भीष्मानुसारिभिः सहसैव झटित्यभ्यहन्यन्ताभिहताः वादिताः । स शब्दस्तुमुलो महान्जातः ॥ १३ ॥

प० टी०—तत इत्यादितः श्लोकषट्कं सुगमम् ॥ १३—१८ ॥

रा० टी०—ततस्तच्छङ्खध्वानानन्तरं पणवानकगोमुखाः वाद्यविशेषाः सहसैव युगपदेव । तुमुलः सर्वत्र परिपूर्णोऽभवत् ॥ १३ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ॥
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

न० टी०—ततः पाण्डवसैन्यस्य हर्षं द्योतयितुं माधवादीनां शङ्खध्मानमाह—**तत इति ।** ततो दुर्योधनसैन्ये शङ्खशब्दप्रवृत्त्यनन्तरं श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवश्च दिव्यौ शङ्खौ प्रदध्मतुरित्यादिभिः शब्दैस्तज्जयः सूचितः ॥ १४ ॥

म० टी०—अन्येषामपि रथस्थत्वे स्थितएव असाधारण्येन रथोत्कर्षकथनार्थं ततः श्वेतैर्हयैर्युक्तइत्यादिना रथस्थत्वकथनं । तेनाग्निदत्ते दुष्प्रधृष्ये रथे स्थितौ सर्वथा जेतुमशक्यावित्यर्थः ॥ १४ ॥

शं० टी०—एवं दुर्योधनसेनाप्रवृत्तिमुक्त्वा पाण्डवसेनाप्रवृत्तिमाह-**ततइति।** ततो भीष्मादिशङ्खोद्घोषानन्तरमेव श्वेतैर्हयैर्युक्ते महति पूज्ये स्यन्दने रथे स्थितौ माधवः पाण्डवोऽर्जुनश्च दिवि भवौ दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

श्री० टी०—ततः पाण्डवसैन्ये प्रवृत्तं युद्धोत्सवमाह—**ततइति** पञ्चभिः । ततः कौरवसैन्यवाद्यकोलाहला-नन्तरम् स्यन्दने रथे स्थितौ सन्तौ कृष्णार्जुनौ दिव्यौ शङ्खौ प्रकर्षेण दध्मतुः वादयामासतुः ॥ १४ ॥

स० टी०—ततः श्वेतैरिति श्लोके रथस्थत्वस्य कीर्तनात् ॥ माधवार्जुनयोः प्रोक्तमजेयत्वमसह्यता ॥ १ ॥ १४ ॥

भा० टी०—स शब्दः परेषां वीररसोद्भावको जातो न तु भयजनक इत्याशयेन तेषां शङ्खपूरणे प्रवृत्तिमाह-**तत इति ।** तुमुलशब्दानन्तरं श्वेतैर्हयैः शुक्लवर्णैरश्वैरतिबलपराक्रमैर्युक्तेऽग्निना दत्ते महत्युत्तमे रथे स्थितौ न भयप्रचलितौ माधवो लक्ष्मीपतिः पाण्डवोऽर्जुनश्चैव दिव्यावप्राकृतौ शङ्खौ प्रदध्मतुः पूरितवन्तौ । माधव इति शङ्खशब्देनैव तव पुत्रेभ्यो राज्यलक्ष्मीमात्तवानिति सूचनार्थं । पाण्डव इति तदीयराज्यं तस्यैव भविष्यतीति १४

रा० टी०—ततः तेषां घोषानन्तरं श्वेतहयैः शुक्लवर्णाश्वैः युक्ते स्यन्दने रथे पाण्डवस्त्वर्जुनः । स्थितावेवे-त्यन्वयः ॥ १४ ॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ॥
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

त० टी०—पाण्डवोत्कर्षमेव द्योतयितुं तच्छङ्खनामानि वर्णयति—**पाञ्चजन्यमिति** द्वाभ्याम् । पाञ्चजन्यदेवदत्तादिनामभिस्तेषां शङ्खा विदितास्तव पुत्रसैन्ये तु कस्यापि नाम्ना प्रसिद्धः शङ्खो नास्ति । किञ्च हृषीकाणामिन्द्रियाणामीशः हृषीकेशो येषां सहायस्तेषामेव जयो भविष्यतीत्यभिप्रायः॥१५॥१६

म० टी०—पाञ्चजन्यो देवदत्तः पौड्रोऽनन्तविजयः सुघोषो मणिपुष्पकश्चेति शङ्खनामकथनं परसैन्ये स्वनामभिः प्रसिद्धा एव तावन्तः शङ्खाः । भवत्सैन्ये तु नैकोपि स्वनामप्रसिद्धः शङ्खोस्तीति परेषामुत्कर्षातिशयकथनार्थं । सर्वेन्द्रियप्रेरकत्वेन सर्वान्तर्यामी सहायः पाण्डवानामिति कथयितुं हृषीकेशपदं । दिग्विजये सर्वान् राज्ञो जित्वा धनमाहृतवानिति सर्वथैवायमजेयइति कथयितुं धनञ्जयपदं । भीमं हिडिम्बवधादिरूपं कर्म यस्य तादृशः । वृकोदरत्वेन बह्वन्नपाकादतिबलिष्ठो भीमसेनइति कथितम् ॥ १५ ॥ कुन्तीपुत्रइति कुन्त्या महता तपसा धर्ममाराध्य लब्धः स्वयं च राजसूययाजित्वेन मुख्यो राजा युधि चायमेव जयभागित्वेन स्थिरो नत्वेतद्विपक्षाः स्थिरा भविष्यन्तीति युधिष्ठिरपदेन सूचितं । नकुलः सुघोषं सहदेवो मणिपुष्पकं दध्मावित्यनुषज्यते ॥ १६ ॥

शं० टी०—उक्तमेव विस्पष्टयति—**पाञ्चजन्यमिति** । पञ्चजनादुत्पन्नं पाञ्चजन्यं हृषीकेशो दध्मौ । देवैर्दत्तं देवदत्तं शङ्खं धनञ्जयो दध्मौ । लोकभयङ्कराणि कर्माण्यस्येति भीमकर्मा वृकवदुदरं यस्य स वृकोदरो भीमः पौण्ड्रं नाम महाशङ्खं दध्मौ ॥ १५ ॥ **अनन्तविजयमिति** । राजा युधि स्थिरत्वाद्युधिष्ठिरो धर्मपुत्रः अनन्तविजयं अनन्तो नाशरहितो विजयो यस्मात्तमनन्तविजयं नाम शङ्खं दध्मौ सुघोषमणिपुष्पकनामानौ शङ्खौ नकुलः सहदेवश्च दध्मतुरिति शेषः ॥ १६ ॥

श्री० टी०—तदेव विभागेन दर्शयन्नाह—**पाञ्चजन्यमिति** । पाञ्चजन्यादीनि श्रीकृष्णादिशङ्खानां नामानि । भीमं घोरं कर्म यस्य सः । वृकवदुदरं यस्य स वृकोदरो महाशङ्खं पौण्ड्रं दध्माविति ॥ १५ ॥ **अनन्तविजयमिति** । नकुलः सुघोषं नाम शङ्खं दध्मौ । सहदेवो मणिपुष्पकं नाम ॥ १६ ॥

स० टी०—पाण्डवानां सहायोऽस्ति सर्वेन्द्रियनियामकः ॥ राज्ञो जित्वाखिलान्युद्धे धनमाहृतवाञ्जयः ॥ १ ॥ दिव्यप्रभावौ तावुक्तौ हृषीकेशधनञ्जयौ ॥ केशवार्जुनयोर्युद्धाभिमुख्यं वीक्ष्य हर्षतः ॥ २ ॥ स्वारस्याद्भीमसेनोऽपि युद्धेऽतिरसिको बली ॥ समराभिमुखो ह्यासीदित्याह वचनं वरम् ॥ ३ ॥ रक्षोवधादिकं कर्म यस्य शत्रुभयावहम् ॥ वृकोदरत्वाद्बह्वन्नपाकाद्भीमो महाबलः ॥ ४ ॥ १५ ॥ महता तपसा कुन्त्या लब्धो धर्मात्सुतोषितात् ॥ राजा च राजसूयस्य याजित्वेन स्वयं महान् ॥ १ ॥ जयभागितया युद्धे स्थिरश्चेति युधिष्ठिरः ॥ पाञ्चजन्यादिशङ्खास्ते प्रसिद्धाः स्वस्वनामभिः ॥ २ ॥ उक्ताः पाण्डवसेनायां भवत्सैन्ये न कोऽपि हि ॥ ३ ॥ १६ ॥

भा० टी०—हृषीकेश इन्द्रियेश इति पदं पाण्डवानां पाण्यादीन्द्रियेभ्यो बलप्रदः । परेषां तु तेभ्यस्तदप्रदः प्रत्युत हारक इति सूचनार्थं । दिग्विजये गोग्रहे च राज्ञो भीष्मादींश्च जित्वा धनं गोधनं चाहृतवानतः सर्वैरप्ययमजेय इति कथयितुं धनञ्जयपदं । माधवार्जुनयोः शङ्खशब्दं श्रुत्वा संहृष्टो युद्धरसिको भीमसेनोपि शङ्खं वादितवानित्याह—**पौण्ड्रमिति** । अतिरौद्रे दुःशासनरक्तपानादिकर्मणि समर्थस्तेन पीतं च रक्तमपि तदुदरस्थवृकाग्निना जीर्णं भविष्यतीति भीमकर्मा वृकोदर इति पदाभ्यां सूचितं । भीमं हिडिम्बवधादिरूपं कर्म यस्य

तादृशो वृकोदरत्वेन बह्वन्नपाकादतिबलिष्ठ इति कथितमिति केचित् ॥ १५ ॥ एतेषां प्रवृत्तिमनुमोदयन् युधिष्ठिरोपि शङ्खपूरणे प्रवृत्त इत्याह—अनन्तविजयमिति । शत्रून् जित्वा निष्कण्टकराज्यलाभस्तस्यैव भविष्यतीति द्योतनार्थं राजेति पदं । कुन्त्या दुःखं राज्यलाभेनापाकरिष्यतीति कुन्तीपुत्रत्वेन ध्वनितम् । युद्धे सर्वाञ्जित्वाऽयमेव स्थिरो भविष्यतीति सूचनाय युधिष्ठिर इति । कुन्तीपुत्रः कुन्त्या महता तपसा धर्ममाराध्य लब्धः । स्वयं राजसूययाजित्वेन मुख्यो राजेति भाव इति केचित् । ज्येष्ठभ्रातॄणां मार्गं नकुलसहदेवावनुसृतवन्तावित्याह—नकुल इति । नकुलः सुघोषं सहदेवो मणिपुष्पकं दध्मावित्यनुपज्यते । शङ्खतच्छब्दकर्तृनामकीर्तनेन परेषामुत्कर्षः सूचितः ॥ १६ ॥

रा० टी०—तद्विवृणोति—**पाञ्चजन्यमिति** । हृषीकेशशब्दार्थ उक्तो भाष्ये एकादशे । हृषीकाणामिन्द्रियाणामीशत्वाच्च हृषीकेशइत्यादि । दध्मावित्यन्वयः ॥ १५ ॥ अनन्तविजयं अनन्तविजयाख्यं । नकुलः सुघोषाख्यं शङ्खं सहदेवो मणिपुष्पकाख्यं दध्मुरित्यन्वयः ॥ १६ ॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ॥
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ॥
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक् पृथक् ॥ १८ ॥

त० टी०—अन्येऽपि तत्सैन्ये शङ्खान्दध्मुरित्याह—काश्यश्चेति । काश्यः काशिराजः । शिखण्डी द्रुपदपुत्रः भीष्मवधाय तपसोत्पन्नो वाऽपूर्वजन्मा । धृष्टद्युम्नो द्रोणाचार्यवधायाग्निकुण्डादुत्पन्नः । अपराजितः सात्यकिरर्जुनसमः । एतेन भीष्मद्रोणादिसहायेन मत्पुत्रो जेष्यतीति नाऽऽशासनीयमिति ध्वनितम् । स्पष्टार्थमन्यत् ॥ १७ ॥ १८ ॥

म० टी०—परमेष्वासः काश्यः महाधनुर्धरः काशीराजः । न पराजितः पारिजातहरणबाणयुद्धादिमहासंग्रामेषु एतादृशः सात्यकिः ॥ १७ ॥ हे पृथिवीपते धृतराष्ट्र ! स्थिरो भूत्वा शृण्वित्यभिप्रायः । सुगममन्यत् ॥ १८ ॥

शं० टी०—किञ्च—**काश्यइति** । परमो महानिष्वासो यस्य स काश्यः काशीपतिश्च । 'शिखण्डं श्मश्रुशून्यता' इत्यभिधानात्तदस्यास्तीति शिखण्डी पाञ्चालः । महारथो धृष्टद्युम्नः धृष्टं परधर्षकं द्युम्नं बलं यस्य स धृष्टद्युम्नः सेनापतिः विराटश्च । न पराजितो रिपुभिरपराजितः सत्यकस्यापत्यं पुमान् सात्यकिः ॥ १७ ॥ **द्रुपदइति** । द्रुपदो द्रौपदेयाश्च महाबाहुराजानुबाहुः सौभद्रश्च निरुक्ता योधाः । सर्वशः पृथक्पृथक् शङ्खान्दध्मुः । प्रत्येकं पूरयामासुरित्यर्थः ॥ १८ ॥

श्री० टी०—काश्यश्चेति । काश्यः काशीराजः । कथम्भूतः । परमःश्रेष्ठः इष्वासो धनुर्यस्य सः ॥ १७ ॥ **द्रुपइति** । हे पृथिवीपते ! हे धृतराष्ट्र ! ॥ १८ ॥

स० टी०—महाधनुर्धरः काशिराजश्चान्ये महारथाः ॥ शिखण्डी धृष्टद्युम्नाद्या जयशीलश्च सात्यकिः॥१॥ दध्मुः शङ्खान्द्रुपदाद्याः शृणु राजन् समाहितः ॥ २ ॥ १७ ॥ १८ ॥

भा० टी०—अन्येषामपि तत्पक्षीयाणां सर्वेषामैकमत्यं बोधयंस्तेषां प्रवृत्तिमाह--**काश्यश्चेत्यादिना** । काश्यः काशिराजः परमेष्वासः परमधनुर्धरः सात्यकिश्चापराजितः पराजयमप्राप्तः शिखण्डी च महारथः ॥ १७ ॥ सौभद्रोऽभिमन्युश्च महाबाहुः । परमेष्वासादिविशेषणचतुष्टयं प्रत्येकं सम्बध्यतइत्येके । पृथिवीपतित्वेन पृथिवीवद्दुःखं सोढुं योग्योसीति सूचितं । पृथिवीपते धृतराष्ट्र ! स्थिरो भूत्वा शृण्वित्यभिप्राय इति केचित् ॥ १८ ॥

रा० टी०—परमेष्वासो महाधनुष्कः काश्यः । महारथः शिखण्डी च अपराजितः सात्यकिश्च ॥ १७ ॥ पृथिवीपते हे धृतराष्ट्र ! महाबाहुः सौभद्रोऽभिमन्युश्च । शङ्खमिति समुदायाभिप्रायः । स्वस्वशङ्खान्दध्मुरित्यर्थः ॥ १८ ॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत ॥
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

त० टी०—धार्तराष्ट्राणामन्यद्भयं सूचयति—स घोष इति । स पाण्डवसैन्ये वीरकृतशङ्खघोषो धार्तराष्ट्राणां तव ये वीरास्तेषां सर्वेषां हृदयानि व्यदारयत् हृदयविदारणतुल्यां पीडामजनयत् । किं कुर्वन् नभश्च पृथिवीं च व्यनुनादयन् प्रतिध्वनिनाऽऽपूरयन् । यतस्तुमुलोऽतितीव्रः ॥ १९ ॥

म० टी०—धार्तराष्ट्राणां सैन्ये शङ्खादिध्वनिरतितुमुलोऽपि न पाण्डवानां क्षोभकोऽभूत् । पाण्डवानां सैन्ये जातस्तु स शङ्खघोषो धार्तराष्ट्राणां धृतराष्ट्रस्य तव सम्बन्धिनां सर्वेषां भीष्मद्रोणादीनामपि हृदयानि व्यदारयत् । हृदयविदारणतुल्यां व्यथां जनितवानित्यर्थः । यतस्तुमुलस्तीव्रः नभश्च पृथिवीं च प्रतिध्वनिभिरापूरयन् ॥ १९ ॥

शं० टी०—किंच—**सइति** । पाञ्चजन्यदेवदत्तपौण्ड्रादिमहाशङ्खेभ्यः समुत्पन्नो यो घोषो महाध्वनिः स सर्वशङ्खनिनादैस्तुमुलः संकीर्णो भूत्वा नभ आकाशं चकाराद्दिशः सर्वाः पृथिवीं चकारात्पर्वतबिलानि व्यनुनादयन् स्वस्वनादानुरूपं प्रतिध्वनयन् तद्ध्वनिना संभूय स्वयं धार्तराष्ट्राणां । अत्र संबन्धार्थेऽण्प्रत्ययः । धृतराष्ट्रस्य पुत्राः पौत्राः सैनिकाश्च सर्वे धार्तराष्ट्राः तेषां हृदयानि हृदयस्थकालखण्डान् व्यदारयद्विदलितवान् । तेन नादेन भग्नहृदया जाता इत्यर्थः ॥ १९ ॥

श्री० टी०—स च शङ्खानां नादस्त्वदीयानां महाभयं जनयामासेत्याह—**स घोष इति** । धार्तराष्ट्राणां त्वदीयानां हृदयानि विदारितवान् । किं कुर्वन् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

स० टी०—यः सैन्ये धार्तराष्ट्राणां शङ्खादीनां ध्वनिर्महान् ॥ पाण्डवानां स नैवाभूत्क्षोभको बलिनां सताम् ॥ १ ॥ पाण्डवानां स जातस्तु शङ्खघोषो महत्तरः । तव संबन्धिनां भीष्मद्रोणादीनामपि व्यथाम् ॥ २ ॥ हृदयाणामजनयद्विदारणसमां पराम् ॥ अति तीव्रो नभो भूमिं पूरयन्प्रतिशब्दतः ॥ ३ ॥ १९ ॥

भा० टी०—दुर्योधनादीनां त्वदीयानां शङ्खादिशब्दैः परेषां भयं नोत्पन्नं तेषां तु तैस्त्वदीयानां अत्यन्तं तदुत्पन्नमित्याशयेनाह—**सघोष इति** । तुमुलः तीव्रः शब्दः धार्तराष्ट्राणां हृदयानि व्यदारयत् विदारणतुल्यां व्यथामजनयत् युक्तं चैतदित्याशयेनाह—**नभ इति**।नभश्च पृथिवीं चैव व्यनुनादयन् प्रतिशब्देनापूरयन्॥१९॥

प० टी०—**सघोषइति** । स पाण्डवसैन्यसंभूतो घोषो धार्तराष्ट्राणां त्वदीयानां हृदयानि व्यदारयत् व्याकुलीकृतवान् । किंभूतस्तुमुलो भयानकः । किं कुर्वन् नभश्च पृथिवीं च व्यनुनादयन् प्रतिशब्देनापूरयन् ॥ १९ ॥

रा० टी०—सघोषस्तुमुलो व्याप्तो भूत्वा नभश्च पृथिवीं च व्यनुनादयंस्तत्र तत्र प्रतिध्वनिं जनयन्नेष धार्तराष्ट्राणां हृदयानि व्यदारयत् । अद्यैव नष्टं कुरुकुलमिति त्वत्पुत्रा मेनिरइत्यर्थः ॥ १९ ॥

अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः ॥
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ २० ॥

त० टी०—यथा त्वदीयानां भयं प्राप्तं पाण्डवानां न तथा भयं जातं, प्रत्युत शूरत्वं वृद्धमित्याह—अथेति । तुमुलघोषानन्तरं कपिध्वजो गर्जनेन वैरिधैर्यापहारकः कपिर्हनुमान् ध्वजे यस्य सोऽर्जुनः

धार्त्तराष्ट्रान् व्यवस्थितान्दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते प्रवर्त्तमाने सति दिग्विजयिनः पाण्डोः पुत्रो गाण्डिवमग्निदत्तं धनुरुद्यम्य ॥ २० ॥

म० टी०—धार्तराष्ट्राणां भयप्राप्तिं प्रदर्श्य पाण्डवानां तद्वैपरीत्यमुदाहरति—**अथेत्यादिना** । भीतिप्रत्युपस्थितेरनन्तरं पलायने प्राप्तेऽपि तद्विरुद्धतया युद्धोद्योगेनावस्थितानेव परान् प्रत्यक्षेणोपलभ्य तदा शस्त्रसम्पाते प्रवर्तमाने सति वर्त्तमाने क्तः । कपिध्वजः पाण्डवः हनूमता महावीरेण ध्वजरूपतयानुगृहीतोऽर्जुनः ॥२०॥

शं० टी०—"तद्यथेह कर्मचितो लोकः क्षीयते सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः । अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति । श्वोभावामर्त्यस्य यदन्तकैतत् पराचः कामाननुयन्ति बाला इति । कर्मणा पितृलोको विद्यया देवलोक इति । अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततोभूयइव ते तमोय उ विद्यायाश्रताः" इत्यादिश्रुतिभिः । 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। मोघाशा मोघकर्माणः । क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यादिस्मृतिभिश्च जन्यत्वदृश्यत्वादियुक्तिभिश्चापि पण्डितस्य मोक्षैककामिनः स्वेन यष्टव्यदेवानां तदुद्देशेन क्रियमाणकर्मणां तत्फलानां च विचारः सम्यक्कर्तव्य इति सूचयितुमर्जुनस्य परमार्थिनः कर्तव्यं योद्धव्यं योद्धॄणां युद्धक्रियायास्तत्फलस्य च विचारं तदुदितवैराग्यं च प्रतिपादयितुमिदं प्रकरणमारभ्यते—**अथेति** । अथोभयसेनयोः युद्धसन्नाहसमनन्तरं पाण्डोरपत्यं पाण्डवः कपिध्वजोऽर्जुनः व्यवस्थितान् युद्धाय समुपस्थितान् धार्तराष्ट्रान् दृष्ट्वा स्वयमपि धनुरुद्यम्य शस्त्राणां सम्पाते प्रयोगकाले प्राप्ते ॥ २० ॥

श्री० टी०—तस्मिन् समये श्रीकृष्णमर्जुनो विज्ञापयामासेत्याह—**अथेति** चतुर्भिः । व्यवस्थितान् युद्धोद्योगेन स्थितान् । कपिध्वजः अर्जुनः ॥ २० ॥

स० टी०—इत्येवं धार्तराष्ट्राणां भयप्राप्तिं प्रदर्श्य सः ॥ सञ्जयः पाण्डवानां तु महत्त्वं दर्शयत्यथ॥१॥ धार्तराष्ट्रान् रणोद्योगे दृष्ट्वैवावस्थितान् रिपून् ॥ प्रवर्तमाने सत्येष शस्त्रसम्पात उद्यतः ॥ २ ॥ ध्वजरूपतयात्यन्तवीरेणास्ति हनूमता ॥ अर्जुनोऽनुगृहीतश्च गाण्डीवं धनुरुत्तमम् ॥ ३ ॥ उद्यम्याह हृषीकेशं सर्वधीवृत्तिसाक्षिणम् ॥ २० ॥

भा० टी०—अथ तुमुलशब्देन व्यथाप्राप्त्यनन्तरमपि व्यवस्थितान्न तु पलायितान् धृतराष्ट्रसंबन्धिनो दृष्ट्वा प्रत्यक्षेणोपलभ्य प्रवृत्ते शस्त्रसम्पाते शस्त्राणां सम्पातः समुदायः तस्मिन्प्रवृत्ते प्रयोगाभिमुखे सति पाण्डवः धनुरुद्यम्य गाण्डीवं धनुरुद्यतं कृत्वा हृषीकेशमुवाचेत्यन्वयः । पाण्डोरतिवीरस्य महीपतेः पुत्रत्वात् स्वयमतिशूरः । कपिर्वानरो हनूमान् सीतात्मिकां लक्ष्मीं भगवते रामचन्द्राय प्रापयिता । शत्रुपराजयं सम्पाद्य पाण्डवेभ्यो राज्यलक्ष्मीप्रदानाय यस्य ध्वजे स्थित इति भावः ॥ ४ ॥ २० ॥

प० टी०—ततः किं वृत्तमित्याह—**अथेति** । कपिध्वजोऽर्जुनश्चतुर्भिः श्लोकैः कृष्णं विज्ञापयति ॥२०॥

रा० टी०—तत्त्वोपदेशप्रसंजकमर्जुनविषादं वक्तुमेतावानुपोद्घातः प्रवृत्तः । एवं दुर्योधनव्यापारं दलद्वयगतव्यापारं चोक्त्वाऽधुनार्जुनव्यापारमाह—**अथेत्यादिचतुर्भिः** श्लोकैः । अथानन्तरं कपिध्वजोऽर्जुनः व्यवस्थितान् युद्धे कृतनिश्चयान् दृष्ट्वा शस्त्रसंपाते शस्त्रप्रहरणे प्रवृत्ते । वर्तमानसामीप्ये वर्तमानवद्वा । प्रवर्तितुमुद्युक्ते सति तदा शस्त्रसंपातप्राक्काले इदं वक्ष्यमाणं वाक्यमाहेत्यन्वयः ॥ २० ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ॥
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥

त० टी०—तदा हृषीकेशं सर्वेन्द्रियनियन्तारं स्वसारथीभूतं भगवन्तमिदं वक्ष्यमाणं वाक्यमाह—महीपते इति सम्बोधनेन एवम्भूतेऽर्जुने युद्धायोपस्थिते नीत्यभावान्नश्यमानं तव महीपतित्वमित्युपहासो ध्वनितः। अर्जुनवाक्यमनुवदति—हे अच्युत ! यथा तव कुतोऽपि च्युतिर्नास्ति तथा मे रथमुभयोः सेनयोर्मध्ये स्थापय ॥ २१ ॥

म० टी०—सर्वथा भयशून्यत्वेन युद्धाय गाण्डीवं धनुरुद्यम्य हृषीकेशमिन्द्रियप्रवर्तकत्वेन सर्वान्तःकरणवृत्तिज्ञं श्रीकृष्णमिदं वक्ष्यमाणं वाक्यमाहोक्तवान् नत्वविमृश्यकारितया स्वयमेव यत्किंचित्कृतवानिति। परेषां विमृश्यकारित्वेन नीतिधर्मयोः कौशलं वदन्नविमृश्यकारितया परेषां राज्यं गृहीतवानसीति नीतिधर्मयोरभावात्तव जयो नास्तीति महीपते इति सम्बोधनेन सूचयति। तदेवार्जुनवाक्यमवतारयति सेनयोरुभयोः स्वपक्षप्रतिपक्षभूतयोः सन्निहितयोर्मध्ये मम रथं स्थापय स्थिरीकुर्विति सर्वेश्वरो नियुज्यतेऽर्जुनेन। किं हि भक्तानामशक्यं यद्भगवानपि तन्नियोगमनुतिष्ठतीति ध्रुवो जयः पाण्डवानामिति। नन्वेवं रथं स्थापयन्तं मामेते शत्रवो रथात् च्यावयिष्यन्तीति भगवदाशङ्कामाशङ्क्याह—अच्युतेति। देशकालवस्तुष्वच्युतं त्वां को वा च्यावयितुमर्हतीति भावः। एतेन सर्वदा निर्विकारत्वेन नियोगनिमित्तकोपोऽपि परिहृतः ॥ २१ ॥

शं० टी०—**हृषीकेशमिति**। तदा हृषीकेशमिदं वक्ष्यमाणं वाक्यमाह—**सेनयोरिति**। योद्धुकामान् युयुत्सून् अतएवावस्थितान्सेनां सन्नह्य युद्धायोद्युक्तानेतान् योधान् सर्वान् यावत् यावति देशे स्थित्वाऽहं निरीक्षे सम्यक्पश्यामि हे अच्युत ! तावन्तं देशं मे रथं नीत्वा सेनयोरुभयोर्मध्ये स्थापय। किमिह सेनां द्रष्टुमागतोसि वा त्वमित्यतआह—**कैरिति**। अस्मिन् रणसमुद्यमे युद्धव्यापारे कैः सह मया योद्धव्यं युद्धं कर्तव्यं भवतीति द्वयोरर्थः ॥ २१ ॥ २२ ॥

श्री० टी०—**हृषीकेशमिति**। तदेव वाक्यमाह—**सेनयोरिति** ॥ २१ ॥

स० टी०—वक्ष्यमाणमिदं वाक्यं नीतियुक्तं महीपते ॥ स्वपक्षप्रतिपक्षात्मसेनयोरुभयो रथम् ॥ १ ॥ मध्ये संस्थापयेत्येवं सर्वेशोऽपि नियुज्यते ॥ किमशक्यं हि भक्तानां कृष्णपादानुरागिणाम् ॥ २ ॥ यदीश्वरोऽपि भक्तानां नियोगमनुतिष्ठति ॥ पाण्डवानां जयोऽवश्यमित्येवं तेन सूच्यते ॥ ३ ॥ मां रथं स्थापयन्तं ते च्यावयिष्यन्ति शत्रवः ॥ रथादित्येवमाशङ्क्य सम्बोध्याहाच्युतेति च ॥ ४ ॥ देशकालाद्यनुस्यूतं कश्च्यावयितुमर्हति ॥ सर्वथा निर्विकारत्वान्न नियोगेऽपि कोपवान् ॥ ५ ॥ २१ ॥

भा० टी०—वाचः प्रवर्तकेन तेनैव प्रेरित आहेति हृषीकेशपदेन सूचितं हृषीकेशं इन्द्रियप्रवर्तकत्वेन सर्वान्तःकरणवृत्तिज्ञमिति केचित् तथा च निर्बलैर्बुद्धिहीनैर्भवद्भिः कपटेन गृहीतं महीपतित्वं पाण्डवानामतिशूराणां भगवता हनूमता चानुगृहीतानां बुद्धिमतामेव भविष्यतीति भवता तत्प्राप्तिदुराशा त्याज्येति ध्वनयन् सम्बोधयति महीपतइति। वाक्यमेवोदाहरति **सेनयोरिति**। उभयोः सेनयोर्मध्ये मे मम रथं स्थापय। ननु मत्स्थापितं रथं ते चालयिष्यन्तीत्यतआह अच्युतेति। रथमप्यचलं कर्तुं समर्थोसीत्यभिप्रायः। तथा च परमेश्वरोपि यस्य सारथ्ये स्थितः प्राकृतसारथिवन्नियुज्यते तस्य विजये को विस्मय इति भावः। युक्तं च भगवतो भक्तपारवश्यं कोपश्च न युक्तः यतः भगवतः स्वरूपं न कदाचिदपि प्रच्युतिं प्राप्नोतीत्यच्युतेति सम्बोधनाशय इत्येके। नन्वेवं रथं स्थापयन्तमामेते शत्रवो रथाच्च्यावयिष्यन्तीति भगवदाशङ्कामाशङ्क्याह—**अच्युतेति**। देशकालवस्तुष्वच्युतं त्वां को वा च्यावयितुमर्हतीति भाव इति केचित् ॥ २१ ॥

रा० टी०— सार्धश्लोकद्वयेन तद्वाक्यमाह—**सेनयोरिति**। अस्मिन्रणोद्योगे कैः सह मया योद्धव्यं। दुर्बुद्धेर्धार्तराष्ट्रस्य प्रियं कर्तुमिच्छन्तो येऽत्र समागतास्तान्योद्धुकामानवस्थितान्योत्स्यमानान्यावद्द्रक्ष्यामि तावदुभयोः सेनयोर्मध्ये रथं स्थापयेत्याहेत्यर्थः ॥ २१–२३ ॥

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥

त० टी०—न ह्येकत्रैव स्थिरीभूय योद्धुं नियमोऽस्ति, किमर्थमुभयोः सेनयोर्मध्ये रथः स्थापनीय इत्यपेक्षायामाह—यावदिति । योद्धुकामानवस्थितानेतान्यावदहं निरीक्ष्ये तावत्कालं स्थापय, न तु सर्वदेत्यर्थः । ननु त्वं प्रेक्षको भूत्वा द्रष्टुमागतोऽसि योद्धुं वेत्यत आह—कैरिति । अस्मिन् रणसमुद्यमे प्रायो बन्धवएव समागता अतः कैर्मया सह योद्धव्यं केषां मया सह । मम वा कैः सह योद्धुं योग्यमित्यर्थः ॥ २२ ॥

म० टी०—मध्ये रथस्थापनप्रयोजनमाह—योद्धुकामान् नत्वस्माभिः सह सन्धिकामानवस्थितान् नतु भयात्प्रचलितानेतान्भीष्मद्रोणादीन् यावद्गत्वाहं निरीक्षितुं क्षमः स्यां तावत्प्रदेशे रथं स्थापयेत्यर्थः । यावदिति कालपरं वा । ननु त्वं योद्धा नतु युद्धप्रेक्षकः अतस्तत्र किमेषां दर्शनेनेत्यत्राह—कैरिति । अस्मिन् रणसमुद्यमे बन्धूनामेव परस्परं युद्धोद्योगे मया कैःसह योद्धव्यं मत्कर्तृकयुद्धप्रतियोगिनः के । कैर्मयासह योद्धव्यं किंकर्तृकयुद्धप्रतियोग्यहमिति च महदिदं कौतुकमेतज्ज्ञानमेव मध्ये रथस्थापनप्रयोजनमित्यर्थः ॥ २२ ॥

श्री० टी०—यावदेतानिति । ननु त्वं योद्धा न तु युद्धप्रेक्षकस्तत्राह । कैः सह मया योद्धव्यम् ॥ २२ ॥

स० टी०—मध्ये किं स्थापनस्यास्ति फलमत्राह पाण्डवः ॥ योद्धुकामान्न चास्माभिः सन्धिकामानवस्थितान् ॥ १ ॥ भीष्मद्रोणादिकानेतान् यावद्गत्वा निरीक्षितुम् ॥ क्षमोऽहं स्यां रथं तावत्प्रदेशे स्थापयाच्युत ॥ २ ॥ योद्धा त्वमसि नो युद्धप्रेक्षकः किं दिदृक्षया ॥ तवैषामिति शङ्कायामर्जुनः प्राह सद्वचः ॥ ३ ॥ अन्योन्यमेव बन्धूनां युद्धोद्योगे मया सह ॥ कैर्योद्धव्यं मयाप्यत्र योद्धव्यं कैः सहेति वा ॥ ४ ॥ २२ ॥

भा० टी०—सेनयोरुभयोर्मध्येपि क स्थापनीय इत्यपेक्षायामाह—यावदिति । एतान् योद्धुकामानवस्थितान् यावद्यस्मिन्स्थाने स्थित्वाऽहं निरीक्षे द्रष्टुं समर्थः स्यां तस्मिन्स्थाने रथं स्थापयेत्यर्थः । यावदिति कालपरं वा निरीक्षणप्रयोजनमाह—कैरिति । अस्मिन् रणसमुद्यमे युद्धोद्योगे बहूनां शूराणां मध्ये कैः सह मया योद्धव्यं मया सह च कैर्योद्धव्यमित्यालोचनार्थमित्यर्थः ॥ २२ ॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

त० टी०—ननु बन्धवः सर्वे त्वया दृष्टपूर्वा एव योग्यतामयोग्यतां च जानास्येव किं पुनरत्र तन्निरीक्षणेनेति चेत्तत्राह—योत्स्यमानानिति । य एतेऽत्र समागतास्तान्योत्स्यमानानहमवेक्ष्ये द्रक्ष्यामि । ननु भीष्मादयः कुलवृद्धत्वात्समा द्रोणादयस्त्वाचार्यत्वात्सुहृद एवोभयोः समार्थमागताश्चेद्येऽत्र समागतास्तान्योत्स्यमानानिति कथमुक्तमिति चेत्तत्राह । दुर्बुद्धेर्धार्तराष्ट्रस्य युद्धे प्रियचिकीर्षवः अतस्तदवेक्षणमुचितमेवेति भावः ॥ २३ ॥

म० टी०—ननु बन्धवएव एते परस्परं सन्धिं कारयिष्यन्तीति कुतो युद्धमित्याशङ्क्याह । यएते भीष्मद्रोणादयः धार्तराष्ट्रस्य दुर्बुद्धेः दुर्योधनस्य स्वरक्षणोपायमजानतः प्रियचिकीर्षवो युद्धे नतु दुर्बुद्ध्यपनयनादेतान् योत्स्यमानानहमवेक्षे उपलभे नतु सन्धिकामान् अतो युद्धाय तत्प्रतियोग्यवलोकनमुचितमेवेति भावः ॥ २३ ॥

शं० टी०—योत्स्यमानानिति । दुर्बुद्धेरधर्मनिष्ठस्य धार्तराष्ट्रस्य धृतराष्ट्रापत्यस्य दुर्योधनस्य युद्धे प्रिय-

१ निरीक्ष्ये इतिपाठः । २ अवेक्ष्ये इतिपाठः ।

चिकीर्षवः युद्धेनेष्टमर्थं संपादयितुकामाः सन्तोऽत्र कुरुक्षेत्रे ये वा एते समागतास्तान् योत्स्यमानान्सर्वानहमवेक्षे नाम रूपं कुलं च संबन्धं यथा ज्ञास्ये तथा रथं स्थापयेत्यर्थः ॥ २३ ॥

श्री० टी०—योत्स्यमानानिति । धार्तराष्ट्रस्य दुर्योधनस्य प्रियं कर्तुमिच्छन्तो य इह समागताः तान् यावद्द्रक्ष्यामि तावदुभयोः सेनयोर्मध्ये मे रथं स्थापयेत्यन्वयः ॥ २३ ॥

स० टी०—सन्धिं ते कारयिष्यन्ति बन्धवोऽन्योन्यमेव चेत् ॥ कुतो युद्धं भवेदेवमाशङ्क्याहार्जुनो वचः ॥ १ ॥ य एते द्रोणभीष्माद्या धार्तराष्ट्रस्य दुर्मतेः ॥ प्रियं चिकीर्षवो युद्धे न तु दुर्मतिनाशने ॥ २ ॥ योत्स्यमानानहं तानुपलभे न तु सन्धिकान् ॥ अतः कौतुकसिद्ध्यर्थं प्रतियोग्यवलोकनम् ॥ ३ ॥ युक्तमित्याशयो भाति पार्थस्यात्र विपश्चितः ॥ ४ ॥ २३ ॥

भा० टी०—योद्धुकामानवस्थितानित्युक्तं विवृणोति—**योत्स्यमानानिति ।** योत्स्यमानानहमवेक्षे उपलभे न तु सान्धिकामान् नापि धार्तराष्ट्रस्य दुर्बुद्धेर्बुद्धिनिवृत्त्यर्थमवस्थितान् प्रत्युत तस्य प्रियचिकीर्षूनित्याह । य एते योधा अत्र समरभूमौ समागताः दुर्योधनस्य दुष्टबुद्धेः प्रियं कर्तुमिच्छवो न तु समर्था इत्यर्थः । धार्तराष्ट्रस्येत्यनेन धृतराष्ट्रस्यापि दुर्बुद्धित्वं सूचयति ॥ २३ ॥

प० टी०—धार्तराष्ट्रस्य दुर्बुद्धेः कूटकारिणो युद्धे प्रियं कर्तुमिच्छन्तो य एतेत्र समागताः सन्ति तान्यावन्निरीक्षे तावदुभयोः सेनयोर्मध्ये रथं स्थापयेति ॥ २३ ॥

सञ्जय उवाच—एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ॥
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

त० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जयो धृतराष्ट्रं प्रत्युक्तवानित्याह वैशम्पायनः—सञ्जय उवाचेति । सञ्जयवचनमवतारयति—**एवमिति द्वाभ्याम् ।** हे भारत ! अतिधार्मिकस्य भरतस्यान्वये जातस्य तवापि ज्ञातिद्रोहचिन्तनमनुचितमिति भावः । गुडाका निद्रा तस्या ईशेनार्जुनेन एवं पूर्वोक्तप्रकारेणोक्तो हृषीकेश उभयोः सेनयोर्मध्ये भीष्मद्रोणयोः प्रमुखतः प्रमुखे, सर्वेषां च महीक्षितां मह्यां क्षीयन्ते महीक्षितो राजानस्तेषां च प्रमुखे, रथोत्तमं स्थापयित्वा हे पार्थ ! समवेतान्युद्धाय मिलितानेतान् कुरून् पश्येत्युवाच ॥ २४ ॥ २५ ॥

म० टी०—एवमर्जुनेन प्रेरितो भगवानहिंसारूपं धर्ममाश्रित्य प्रायशो युद्धात्तं व्यावर्तयिष्यतीति धृतराष्ट्राभिप्रायमाशङ्क्य तन्निराचिकीर्षुः सञ्जयो धृतराष्ट्रं प्रत्युक्तवानित्याह वैशम्पायनः—**एवमिति ।** हे भारत धृतराष्ट्र! भरतवंशमर्यादामनुसन्धायापि द्रोहं परित्यज ज्ञातीनामिति सम्बोधनाभिप्रायः । गुडाकाया निद्राया ईशेन जितनिद्रतया सर्वत्र सावधानेन अर्जुनेनैवमुक्तो भगवानयं मद्भृत्योऽपि सारथ्ये मां नियोजयतीति दोषमासज्य नाकुप्यत्र वा तं युद्धान्न्यवर्तयत् । किन्तु सेनयोरुभयोर्मध्ये भीष्मद्रोणप्रमुखतः प्रमुखे सम्मुखे सर्वेषां महीक्षितां च सम्मुखे । आद्यादित्वात्सार्वविभक्तिकस्तसिः । चकारेण समासनिविष्टोपि प्रमुखतः शब्द आकृष्यते । भीष्मद्रोणयोः पृथक्कीर्तनमतिप्राधान्यसूचनाय । रथोत्तममग्निना दत्तं दिव्यं रथं भगवता स्वयमेव सारथ्येनाधिष्ठिततया च सर्वोत्तमं स्थापयित्वा हृषीकेशः सर्वेषां निगूढाभिप्रायज्ञो भगवानर्जुनस्य शोकमोहावुपस्थिताविति विज्ञाय सोपहासमर्जुनमुवाच हे पार्थ ! पृथाया स्त्रीस्वभावेन शोकमोहग्रस्ततया तत्सम्बन्धिनस्तवापि तद्वत्ता

समुपस्थितेति सूचयन् हृषीकेशत्वमात्मनो दर्शयति । पृथा मम पितुः स्वसा तस्याः पुत्रोऽसीति सम्बन्धोल्लेखेन चाश्वासयति मम सारथ्ये निश्चितो भूत्वा सर्वानपि समवेतान्कुरून्युयुत्सून्पश्य निःशङ्कतयेति दर्शनविषयाभिप्रायः । अहं सारथ्येऽतिसावधानः त्वं तु साम्प्रतमेव रथित्वं त्यक्ष्यसीति किं तव परसेनादर्शनेनेत्यर्जुनस्य धैर्यमापादयितुं पश्येत्येतावत्पर्यन्तं भगवतो वाक्यं । अन्यथा रथं सेनयोर्मध्ये स्थापयामासेत्येतावन्मात्रं ब्रूयात् ॥ २४ ॥ २५ ॥

शं० टी०—एवमिति । गुडाकेशः 'अङ्गुष्ठतर्जनीयोगो गुडानाम्नी तु मुद्रिका' इतिवचनादङ्गुष्ठतर्जनीयोगो गुडेत्युच्यते । तत्परिमाणा अग्रकेशा यस्य स गुडाकेशः । यद्वा । 'गुडो गोलेक्षुपाकयोः' इत्यभिधानाद्गुडो गोलः ब्रह्माण्डगोलस्तं तप्तायःपिण्डमग्निरिवान्तर्बहिश्चाकति व्याप्नोतीति गुडाकः शिवः "विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवम्" इतिश्रुतेः । यद्वा गुडवन्मधुरः सन् भक्तानकति प्राप्नोतीति गुडाकः शिवः । "स्वादुष्किलायं मधुमानुतायम्" इतिश्रुतेः । स शिव ईशो यस्य स गुडाकेशोऽर्जुनस्तेन हृषीकेशः हृषीकाणामिन्द्रियाणामीशो हृषीकेशः श्रीकृष्ण एवमुक्तः सन् रथोत्तमं रथिकसारथिभ्यामश्वविशेषैर्ध्वजप्रभावेन चोत्कृष्टत्वेन तद्रथस्योत्तमत्वं । तं रथोत्तमं सेनयोरुभयोर्मध्ये स्थापयित्वा ॥ २४ ॥ **भीष्मेति** । भीष्मद्रोणप्रमुखतः षष्ठीबहुवचनान्तस्तसिः । भीष्मद्रोणौ प्रमुखमादिर्येषां ते भीष्मद्रोणप्रमुखाः महीक्षितः छत्रिन्यायेनात्र भीष्मस्यैव महीक्षित्त्वं तेषां भीष्मद्रोणप्रमुखानां महीक्षितां भूभुजां सर्वेषां शृण्वतामिति शेषः । हे पार्थ ! समवेतान्समवायं प्राप्तानेतान्कुरून्पश्येत्युवाच ॥ २५ ॥

श्री० टी०—ततः किं प्रवृत्तमित्यपेक्षायां सञ्जय उवाच—**एवमिति** । गुडाका निद्रा तस्या ईशेन जितनिद्रेणार्जुनेनैवमुक्तः सन् हे भारत धृतराष्ट्र ! सेनयोर्मध्ये रथानामुत्तमं रथं हृषीकेशः स्थापितवान् ॥ २४ ॥ **भीष्मद्रोणइति** । महीक्षितां पितामहद्रोणराज्ञां च प्रमुखतः सम्मुखे रथं स्थापयित्वा हे पार्थ ! एतान्कुरून्पश्येत्युवाच ॥ २५ ॥

म० टी०—भगवान्प्रेरितो ह्येनं युद्धाद्व्यावर्तयिष्यति ॥ अहिंसाधर्ममाश्रित्येत्येवमाशङ्क्य सञ्जयः ॥ १ ॥ प्राह हे भारतेत्येवं स्ववंशोचितमाचर ॥ सर्वत्र सावधानेन जितनिद्रेण केशवः ॥ २ ॥ एवमुक्तोऽप्ययं भृत्यो मां नियोजयतीति च ॥ दोषमासज्य नाकुप्यन्न तं युद्धान्न्यवर्तयत् ॥ ३ ॥ यथोक्तं सेनयोर्मध्ये भीष्मद्रोणादिसंमुखे ॥ अग्निदत्तं रथं दिव्यं स्वयं भगवताश्रितम् ॥ ४ ॥ स्थापयित्वा समस्तानां गूढभावज्ञ ईश्वरः ॥ अर्जुनस्यापि विज्ञाय शोकमोहावुपस्थितौ ॥ ५ ॥ सोपहासमुवाचेदं स्वभक्तं प्रियमर्जुनम् ॥ पृथायाः स्त्रीस्वभावेन शोकमोहनिमग्नता ॥ ६ ॥ तवापि तत्सुतत्वेन तद्वत्तास्तीति सूचयन् ॥ युयुत्सूंस्त्वं कुरून्पश्य निःशङ्कत्वेन तानिति ॥ ७ ॥ २४ ॥ २५ ॥

भा० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जय उवाच—**एवमित्यादि** । यत्तु एवमर्जुनेन प्रेरितो भगवान् अहिंसारूपं धर्ममाश्रित्य प्रायशस्तं युद्धात् व्यावर्तयिष्यतीति धृतराष्ट्राभिप्रायमालक्ष्य सञ्जय उवाचेति तदुपेक्ष्यं । युद्धमेव जातमिति श्रुतवत एवमभिप्रायवर्णनस्यानुचितत्वात् । एवं पूर्वोक्तेन प्रकारेण गुडाकेशेनार्जुनेनोक्तो हृषीकेशो भगवान् वासुदेवः सेनयोरुभयोर्मध्ये भीष्मद्रोणयोः सर्वोत्तमयोः सर्वेषां च महीक्षितां महीपतीनां प्रमुखतः संमुखे रथोत्तमं दिव्यं रथं स्थापयित्वोवाचोक्तवान् । हे पार्थ! एतान्कुरून् भीष्मादीन्समवेतान् युद्धार्थं मिलितान्पश्येति द्वयोरर्थः । तथा च यस्याज्ञामीश्वरोप्यङ्गीकरोति तस्यार्जुनस्य माहात्म्यं किं वक्तव्यमिति भावः । हे भारत! भरतवंशोद्भवत्वात् शोकं मा कुर्वित्याशयः । भरतवंशमर्यादामनुसन्धायापि द्रोहं परित्यज ज्ञातीनामिति सम्बोधनाशय इति केचित् । गुडाकेशेन जिताज्ञाननिद्रेणैवमुक्तो हृषीकेशः सर्वेन्द्रियनियन्ता लोकोद्धाराय स्वस्वरूपभूतस्यार्जुनस्यान्तःकरणे शोकमोहयोराविर्भावयिता सेनयोरुभयोर्मध्ये भीष्मद्रोणयोः सर्वेषां

च राज्ञां प्रमुखतः रथोत्तमं स्थापयित्वोवाच—हे पार्थ ! लोकोद्धाराय स्त्रीस्वभावौ शोकमोहावङ्गीकुरु कथमित्यपेक्षायामाह—एतान्मिलितान्कुरून्सर्वान् स्वबान्धवान् पश्य दृष्ट्वा चैते मदीया एतानहं न हन्मीति निर्विण्णो भवेति हृषीकेशादिपदैस्तात्पर्यार्थः सूचितः। हृषीकेशः सर्वेषां निगूढाभिप्रायज्ञो भगवान् अर्जुनस्य शोकमोहावुपस्थिताविति विज्ञाय सोपहासमर्जुनमुवाच—हे पार्थ ! पृथायाः स्त्रीस्वभावत्वेन शोकमोहग्रस्ततया तत्सम्बन्धिनस्तवापि तद्वत्तोपस्थितेति सूचयन् हृषीकेशत्वमात्मनो दर्शयति। पृथा मम पितुः स्वसा तस्याः पुत्रोऽसीति तत्सम्बन्धोल्लेखेन वाऽऽश्वासयति मम सारथ्ये निश्चितो भूत्वा सर्वानपि समवेतान्कुरून् युयुत्सून् पश्य निःशङ्कतयेति दर्शनविध्यभिप्रायः। अहं सारथ्येऽतिसावधानस्त्वं तु सांप्रतमेव रथित्वं त्यक्ष्यसीति किं तव परसेनादर्शनेनेत्यर्जुनस्य धैर्यमापादयितुं पश्येत्येतावत्पर्यन्तं भगवतो वाक्यं। अन्यथा रथं सेनयोर्मध्ये स्थापयामासेत्येतावदेव ब्रूयादिति केचित् ॥ २४ ॥ २५ ॥

प० टी०। अथ श्रीकृष्णोपि सेनयोर्मध्ये भीष्मद्रोणप्रमुखानां सर्वेषां महीक्षितां राज्ञां च संमुखं रथं नीत्वा उवाच। किमुवाचेत्याह—एवमिति। भो पार्थ ! एतान् समवेतान कुरून् पश्येति ॥ २४ ॥ २५ ॥

रा० टी०—एवं गुडाकेशेन गुडाकाया निद्रायाः ईशेन जितनिद्रेणार्जुनेनोक्तो हृषीकेशः सर्वेन्द्रियप्रेरकः श्रीकृष्णः बलद्वयमध्ये भीष्मद्रोणप्रमुखतः तदाभिमुख्येन तथा सर्वेषां च महीक्षितां राज्ञां प्रमुखत इति बुद्धया विविक्तेनान्वयः। रथं स्थापयित्वा हे पार्थ ! समवेतान्युद्धार्थं मिलितानेतान्कुरून्पश्येत्युवाचेति ॥ २४॥२५ ॥

तत्राऽपश्यत् स्थितान्पार्थः पितॄनथ पितामहान् ॥
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ॥
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत् ॥
अर्जुन उवाच—दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥
गाण्डीवं स्रंसेत हस्तात्त्वक्चैव परिदह्यते ॥
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥

त० टी०—ततः किं वृत्तमित्यत आह—तत्रेति सार्धेन। समवेतान् कुरून् पश्येत्येवं भगवतोक्ते सति पार्थ उभयोः सेनयोरपि स्थितान् पितॄन् भूरिश्रवादीन्, तदनन्तरं पितामहान्भीष्मादीन्, आचार्यान् द्रोणकृपादीन्, मातुलान शल्यशकुन्यादीन्, भ्रातॄन्भीमदुर्योधनादीन्, पुत्रानभिमन्युलक्ष्मणादीन्, पौत्रान् लक्ष्मणादिपुत्रान्, सखीन्वयस्यानश्वत्थामादीन्, श्वशुरान् भार्याणां पितॄन्, सुहृदः कृतोपकारा ये तान्सर्वानपश्यत् ॥ ततः किं कृतवानिति पुत्रराज्यहानिशङ्काव्याकुलचित्तं धृतराष्ट्रमाश्वासयन्निवाह—तानिति। पितृहीनानां वने क्लिष्टानां राज्यभागो देय इति तव कृपा नोत्पन्ना। तथाऽर्जुनस्तु महादेवादिन्द्रादेश्च लब्धदिव्यायुधोऽपि अग्निदत्तगाण्डीवधनुषा वासुदेवेन सारथिना च सर्वक्षत्रियजयनसमर्थोऽपि तान् सर्वान् बन्धूनवस्थितान्समीक्ष्य परया स्वाभाविक्या कृपयाऽऽविष्टो व्याप्तोऽभूत्।

तत्कुतः। यतः कौन्तेयः महापराधिन्यपि कंसे क्षमाशीलस्य ज्ञानिनो भक्तस्य वसुदेवस्य तत्समशीलाया भगिन्याः कुन्त्याः सुतस्तत एवं विषीदन् विषादं कुर्वन्निदं वक्ष्यमाणं वचनग्राममब्रवीत् ॥ तदेवाह—अर्जुन उवाचेति। तच्च दृष्ट्वेत्यारभ्य धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेदित्यन्तम्। हे कृष्ण! सच्चिदानन्दस्वरूप! इमं स्वजनं स्वकीयं भ्रातृपुत्रादिबन्धुवर्गं युयुत्सुं योद्धुमिच्छुं समुपस्थितं सम्यक् शस्त्रकवचादि सन्नह्य समीपे स्थितं दृष्ट्वा मम गात्राण्यङ्गानि सीदन्ति व्यथन्ते। मुखं च परिशुष्यति सर्वतः शुष्यति ॥ किञ्च मे शरीरे वेपथुः कम्पः रोमहर्षश्च जायते। गाण्डीवस्रंसनं त्वग्दाहश्चे-त्यनिष्टसूचकं लक्षणं प्रतीयते ॥ किञ्च अवस्थातुं च न शक्नोमि च पुनर्मे मनो भ्रमतीव भ्रमसदृशं विकारं मनसि भावयामि ॥ २६–३० ॥

म० टी०—तत्र समरसमारम्भार्थं सैन्यदर्शने भगवताभ्यनुज्ञाते सति सेनयोरुभयोरपि स्थितान्पार्थोऽपश्य-दित्यन्वयः। अथशब्दस्तथाशब्दपर्यायः परसेनायां पितॄन्पितृव्यान्भूरिश्रवःप्रभृतीन्पितामहान्भीष्मसोमदत्तप्र-भृतीनाचार्यान्द्रोणकृपप्रभृतीन्मातुलान् शल्यशकुनिप्रभृतीन्भ्रातॄन्दुर्योधनप्रभृतीन्पुत्राँल्लक्ष्मणप्रभृतीन्पौत्राँल्ल-क्ष्मणादिपुत्रान्सखीनश्वत्थामजयद्रथप्रभृतीन् सुहृदो मित्राणि कृतवर्मभगदत्तप्रभृतीन्। सुहृदइत्यनेन यावन्तः कृतोपकारा मातामहादयश्च ते द्रष्टव्याः। एवं स्वसेनायामप्युपलक्षणीयम्। एवं स्थिते महानधर्मो हिंसेति विपरीतबुद्ध्या मोहाख्यया शास्त्रविहितत्वेन धर्मत्वमिति ज्ञानप्रतिबन्धकेन च ममकारनिबन्धनेन चित्तवैक्लव्येन शोकमोहाख्येनाभिभूतविवेकस्यार्जुनस्य पूर्वमारब्धाद्युद्धाख्यात्स्वधर्मादुपरिरंसा महानर्थ-पर्यवसायिनी प्रवृत्तेति दर्शयति—कौन्तेयइति। स्त्रीप्रभवत्वकीर्तनं पार्थवत्तात्विकमूढतामपेक्ष्य कृपया कर्त्र्या स्वव्यापारेणैवाविष्टो व्याप्तः नतु कृपां केनचिद्व्यापारेणाविष्टइति स्वतः सिद्धैवास्य कृपेति सूच्यते। एतत्प्रकटीकरणाय परयेति विशेषणम्। अपरयेति वा छेदः। स्वसैन्ये पुरापि कृपाभूदेव। तस्मिन् सैन्येतु कौरवसैन्येप्यपरा कृपाभूदित्यर्थः। विषीदन् विषादमुपतापं प्राप्नुवन्नब्रवीदित्युक्तिविषादयोः समकालतां वदन् सगद्गदकण्ठताश्रुपातादि विषादकार्यमुक्तिकाले द्योतयति तदेव भगवन्तं प्रत्यर्जुनवाक्यमवतारयति संजयः—अर्जुनउवाचेत्यादिना। एवमुक्त्वाऽर्जुनः सङ्ख्यइत्यतः प्राक्तनेन ग्रन्थेन तत्र स्वधर्मप्रवृत्तिकारणी-भूततत्त्वज्ञानप्रतिबन्धकः स्वपरदेहे आत्मात्मीयाभिमानवतोऽनात्मविदोर्जुनस्य युद्धेन स्वपरदेहविनाशप्रस-ङ्गदर्शिनः शोको महानासीदिति तल्लिङ्गकथनेन दर्शयति त्रिभिः श्लोकैः। इमं स्वजनमात्मीयं बन्धुवर्गं युद्धेच्छुं युद्धभूमौ चोपस्थितं दृष्ट्वा स्थितस्य मम पश्यतो ममेत्यर्थः। अङ्गानि व्यथन्ते मुखं च परिशुष्यतीति श्रमादिनिमित्तशोषापेक्षयाऽतिशयकथनाय सर्वतोऽभाववाचिपरिशब्दप्रयोगः। वेपथुः कम्पः रोमहर्षः पुलकितत्वं गाण्डीवभ्रंशेनाधैर्यलक्षणं दौर्बल्यं त्वक्परिदाहेन चान्तःसन्तापो दर्शितः। अवस्थातुं शरीरं धारयितुं च न शक्नोमीत्यनेन मूर्च्छा सूच्यते। तत्र हेतुः मम मनो भ्रमतीवेति भ्रमणकर्तृ सादृश्यं नाम मनसः कश्चिद्वि-कारविशेषो मूर्छायाः पूर्वावस्था। च हेतौ। यतएव मनो नावस्थातुं शक्नोमीत्यर्थः ॥ २६–३० ॥

श्रीं० टी०—मुमुक्षोर्विदुषो यष्टव्यदेवतापरिशीलनमेव कर्तव्यमिति सूचयितुमर्जुनस्य सैनिकपरिशीलन-प्रकारमाह द्वाभ्याम्—तत्रेति। अथ भगवदुक्तेरनन्तरं पार्थः पृथा कुन्ती तदपत्यं पार्थोऽर्जुनो यत्र रथः स्थापितस्तत्र स्थित्वा सेनयोरुभयोरपि स्थितान्पितॄन्पितृव्यान्सखीन्सवयस्काः सखायस्तान् श्वशुरान् सुहृदो मित्राणि चैवं सर्वानपि स्वीयानेवापश्यत्। नतु तदतिरिक्तानित्यर्थः। एवं तान्दृष्टवतोर्जुनस्य तद्दर्शनकार्यमाह—तानिति। स द-र्शनकर्मणि प्रवृत्तः कौन्तेयः कुन्त्या अपत्यं कौन्तेयोऽर्जुनः बन्धून्बन्धुत्वधर्मविशिष्टानेव तानवस्थितान्युद्धसन्न-द्धान्सर्वान्समीक्ष्य ग्रीवामुन्नम्य सम्यग्दृष्ट्वेति द्वयोरर्थः ॥ २६ ॥ २७ ॥ कृपयेति। तेषु परया कृपयाविष्टो भूत्वा विषीदन्निदं वक्ष्यमाणलक्षणं वचनमब्रवीत् "तस्माच्च देवा बहुधा संप्रसूताइति, मुखादिन्द्रश्चाग्निश्च"

इत्यादिश्रुतिभ्यो देवतानां जनिश्रवणाज्ज्ञानिमतां तेषामनित्यत्वमागन्तुकैश्वर्यत्वं संसारित्वं फलदानेन बन्धकत्वं च विज्ञाय मुमुक्षुणा नित्यसुखार्थिना तद्यजने किमनेन दुःखान्तेन कर्मणेतिपरितापः कर्तव्यइति सूचयितुमर्जुनस्य स्वकर्तृकबन्धुजनवधनिमित्तकपरितापप्रकारमाहाध्यायसमाप्तेः । **दृष्ट्वेति** । युयुत्सुं सेनां सन्नह्य युयुत्सया समुपस्थितमिमं पुरःस्थं स्वजनं पितृपुत्रादिकं दृष्ट्वा मदीया इति ज्ञात्वा ॥ २८ ॥ **सीदन्तीति** । हन्तुं मम गात्राणि करचरणादयः सीदन्ति शिथिलायन्ते मुखं च परिशुष्यति शुष्कीभवति शरीरे वेपथुः कम्पो रोमहर्षो भयसन्तापाभ्यां रोमोद्गमश्च जायते ॥ २९ ॥ **गाण्डीवमिति** । हस्ताद्गाण्डीवं धनुः स्रंसते गलति त्वक्चर्म च परितापेन दह्यते मे मनोपि च भ्रमति परवशं गच्छति । अतएव रथे स्थातु च न शक्नोमि ॥ ३० ॥

श्री० टी०—ततः किं प्रवृत्तमित्यतआह—**तत्रेति** । पितॄन्पितृव्यादीनित्यर्थः । पुत्रान्पौत्रानिति दुर्योधनादीनां ये पुत्राः पौत्राश्च तानित्यर्थः । सखीन्मित्राणि सुहृदः कृतोपकारांश्चापश्यत् ॥ ततः किं कृतवानित्यत आह—**तानिति** । आविष्टो व्याप्तः युक्तः । विषीदन्विशेषेण सीदन् अवसादं ग्लानिं लभमानः ॥ किमब्रवीदित्यपेक्षायामाह—दृष्ट्वेममित्यादि यावदध्यायसमाप्ति । हे कृष्ण ! योद्धुमिच्छन्तं पुरतः सम्यगवस्थितं इमं बन्धुजनं दृष्ट्वा मदीयानि गात्राणि करचरणादीनि सीदन्ति विशीर्यन्ते । किञ्च मुखं परि समन्तात् शुष्यति निर्द्रवीभवति ॥ किञ्च **वेपथुश्चेति** । वेपथुः कंपः । रोमहर्षः रोमाञ्चः । स्रंसते निपतति । परिदह्यते सर्वतः सन्तप्यते ॥ २६-३० ॥

स० टी०—एवं भगवता प्रोक्ते सेनयोरुभयोपि ॥ पार्थोऽपश्यत्स्थितान्भूरिश्रवआदीन्पितॄंस्तथा ॥ १ ॥ पितामहान्भीष्ममुख्यान्कृपद्रोणमुखान् गुरून् ॥ शल्यादीन्मातुलान्भ्रातॄन्दुर्योधनमुखान्बहून् ॥ २ ॥ लक्ष्मणप्रभृतीन्पुत्रानश्वत्थाममुखान्सखीन् ॥ पौत्राँल्लक्ष्मणपुत्रादीन् श्वशुरान्बहुधा स्थितान् ॥ ३ ॥ सुहृदः कृतवर्मादीनेवमेव स्वसैन्यके ॥ एवं स्थितेऽन्यथाबुद्ध्या स्वधर्मे धर्मरूपया ॥ ४ ॥ ममत्वाविष्टयाऽत्यन्तमोहग्राहगृहीतया ॥ अभिभूतविवेकस्य स्वधर्मादर्जुनस्य च ॥ ५ ॥ धर्म्याद्युद्धात्पुरारब्धान्महानर्थावसानिका ॥ सञ्जातोपरिरंसेति दर्शयत्यधुना स्फुटम् ॥ ६ ॥ कृपया कर्तृरूपिण्या कर्मभूतोऽर्जुनोऽवशः ॥ व्याप्तोऽनादिमहामोहजन्ययाऽध्यासरूपया ॥ ७ ॥ स्वकीयानुपलभ्यैते ममेत्याक्रान्तमानसः ॥ सन्तापं प्राप्नुवन्नाह वक्ष्यमाणमिदं वचः ॥ ८ ॥ स्वधर्मकरणे हेतुभूतज्ञाननिरोधकृत् ॥ महाशोकोऽर्जुनस्यासीन्ममाहमिति चेतसा ॥ ९ ॥ इति तल्लिङ्गतो वक्ति पार्थोक्तिं सञ्जयस्त्रिभिः ॥ बन्धुवर्गमिमं स्वीयं युद्धेप्सुं युद्धभूगतम् ॥ १० ॥ पश्यतो मे श्लथन्तेऽङ्गान्याननं परिशुष्यति ॥ कम्पः पुलकितत्वं च गाण्डीवभ्रंशनं तथा ॥ ११ ॥ त्वग्दाहो धैर्यदौर्बल्यमन्तःसन्तापहेतुकाः । स्वशरीरं न शक्नोमि मनो धारयितुं तथा ॥ १२ ॥ २६-३० ॥

भा० टी०—एवं स्वसारथ्ये दृढतया स्थितेन स्वोक्तकारिणा भगवतोक्तोऽर्जुनस्तथैव कृतवानित्याह—**तत्रेति** । तत्र समवेतान्कुरून्पश्येति भगवदभ्यनुज्ञाने संवृत्ते सति तत्र सेनयोरुभयोरपिऽस्थितान्पार्थोऽपश्यदिति वा तत्रपदान्वयः । एतान्समवेतान्कुरून्दृष्ट्वा स्त्रीस्वभावौ शोकमोहावङ्गीकुर्विति भगवदभिप्रायमर्जुनो ज्ञात्वा तानपश्यदिति सूचयितुं पार्थ इत्युक्तं । पितॄन् पितृव्यान् भूरिश्रवआदीन् । अथशब्दस्तथाशब्दार्थे तथा पितामहान् भीष्मप्रमुखान् आचार्यान् द्रोणादीन् मातुलान् शल्यप्रभृतीन् भ्रातॄन् भीष्मदुर्योधनाद्यान् पुत्रानभिमन्युलक्ष्मणप्रभृतीन् पौत्रान् लक्ष्मणादिपुत्रान् सखीनश्वत्थामादिकान् ॥ २६ ॥ श्वशुरान् द्रुपदादीन् सात्यकिकृतवर्मप्रभृतीन् । ततः किं कृतवानित्यपेक्षायामाह—**तानिति** । तान् पितृपितामहादीन्बन्धून्सेनयोरुभयोर्मध्ये युयुत्सूनवस्थितान् समीक्ष्य सम्यग्दृष्ट्वेदमब्रवीदित्यन्वयः । भगवदाज्ञया बन्धून्दृष्ट्वा शोकमोहावर्जुनेन गृहीताविति कौन्तेयपदेन सूचितम् ॥ २७ ॥ परया कृपया स्नेहजन्यकरुणयाऽऽविष्टो व्याप्तः सन्नहो एते पित्रादयो

बन्धवो मरिष्यतीति विषादमुपतापं कुर्वन्निदं वक्ष्यमाणमब्रवीदुक्तवानित्यर्थः । तदेवेदंशब्दवाच्यं वचनमुदाहरति—दृष्ट्वेति । इमं प्रत्यक्षेणोपलभ्यमानं स्वजनं स्वसम्बन्धिवर्गं युयुत्सुं युद्धेच्छुं समुपस्थितं सम्यग्युद्धभूमावुपस्थितं न तु साधारणयुयुत्सया साधारणमागतं दृष्ट्वोपलभ्य सीदन्तीति परेणान्वयः । हे कृष्णेति सम्बोधयन् यद्लोकोपकाराय मदीयज्ञानापकर्षणं त्वया कृतं तन्मया बुद्धमिति गूढाभिसन्धिं सूचयति ॥२८॥ आत्मतत्त्वापरिज्ञानकृताहङ्कारममकारोत्थयोः शोकमोहयोर्लिङ्गानि स्वस्मिन्दर्शयति—सीदन्तीत्यादिना । मम युयुत्सुं स्वजनं दृष्ट्वा एते मरिष्यन्तीति शोकेनाविष्टस्य व्याकुलचित्तस्य गात्राण्यङ्गानि सीदन्ति शिथिलानि भवन्ति वेपथुः कम्पः रोमहर्षो रोमाञ्चः ॥ २९ ॥ हस्ताद्गाण्डीवं स्रंसते पतति । त्वक् चैव परि समन्ताद्दह्यते । धैर्याभावादवस्थातुं च न शक्नोमि । मे मनो भ्रमतीव च मम मनो मोहं प्राप्नोतीवेत्यर्थः ॥ ३० ॥

प० टी०—ततः किं वृत्तमित्याह—तत्रापश्यदिति । पितॄन्पितृव्यान् पितामहान् वृद्धानाचार्यांस्तथा मातृवत्पूज्यान्मातुलानिति पूज्यत्वकोटिः । अथ प्रेमास्पदमाह—भ्रातॄनिति । भ्रातॄन् दुर्योधनादीन् एकोत्तरशतमितान् । अथ कृपापात्राण्याह—पुत्रान् पौत्रानिति । दुर्योधनादीनां पुत्रान् पौत्रांश्चेत्यर्थः । अथापयशोहेतूनाह—सखीनित्यादि ॥ २६ ॥ २७ ॥ अथार्जुनः स्वनिर्वेदं कथयति—दृष्ट्वेममित्यादि । गात्राण्यङ्गानि करचरणादीनि सीदन्ति शिथिलानि भवन्ति । मुखं च शुष्यति शुष्कं भवति ॥ २८ ॥ अथ करुणारसाविर्भावे सात्त्विकानाह । सर्वशरीरे वेपथुः कम्पो भवति रोमहर्षो रोमाञ्चः । अथाङ्गवैकल्यं दर्शयति । गाण्डीवं धनुः हस्तात्स्रंसते निपतति । त्वक्परिदह्यते संतप्यते ॥ २९ ॥ इतः परं कथं योद्धव्यमित्याह—नचेति । न केवलमवस्थातुं न शक्नोमि किं पुनर्योद्धुम् । मनसि धैर्यमवलम्ब्य योद्धव्यमिति चेत्तदपि नेत्याह—भ्रमतीति । मनः कान्दिशीकतया प्रकृतिस्थं न भवति ॥ ३० ॥

रा० टी०—तत्रेत्यस्य विवरणं सेनयोरुभयोरपीति । तथेति समुच्चये ॥ २६ ॥ तानवस्थितान्सर्वान्बन्धून्समीक्ष्यैवेत्येवकारेणान्वयः । विषीदन्विषादं कुर्वन् । विषादो नाम मोहनिमित्तकाच्छोकाद्यन्मनोदौर्बल्यं । यस्मिन्सति सर्वव्यापारोपरमो भवति स इति ज्ञेयम् ॥ २७ ॥ इदमब्रवीदित्युक्तमर्जुनवाक्यमाह—दृष्ट्वेत्यादिना यावदध्यायसमाप्ति । हे कृष्ण सकललोककर्षक ! तदुक्तं गीताभाष्ये पञ्चमेऽध्याये । नियमनादिना सकललोककर्षणात्कृष्णः । तत्रोक्तं । 'यतः कर्षसि देवेश नियम्य सकलं जगत् । अतो वदन्ति मुनयः कृष्णं त्वां ब्रह्मवादिनः' इति महाकौर्मोक्तेः । युयुत्सुं योद्धुमिच्छन्तं सम्यगवस्थितमिमं बन्धुजनं दृष्ट्वा मम गात्राणि हस्ताद्यवयवाः सीदन्ति विशीर्यन्ते । षद्लृ विशरणगत्यवसादनेष्वितिधातोः । मुखे म्लानता च जायते ॥ २८ ॥ शरीरे कम्पो रोमाञ्चश्च जायते । धनुर्हस्तात्पतति । त्वक्च परितस्तप्यतएव ॥ २९ ॥ अवस्थातुं च न शक्नोमि । मनश्च मे भ्रमतीव च ॥ ३० ॥

निमित्तानि च पश्यामि विपरीतानि केशव ॥
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥

त०टी०—हे केशव ! विपरीतानि निमित्तानि वामाङ्गस्फुरणादीनि पश्यामि । अत एवाऽऽहवे युद्धे स्वजनं हत्वा श्रेय ऐहलौकिकं पारलौकिकं वा नाऽनुपश्यामि मनसि विचारणादनु पश्चान्न पश्यामि । यद्यपि 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः' इति श्रेयोऽभिधानमस्ति तथापि हतस्यैव तदभिधानान्न हन्तुः किञ्चित्पुण्यमुक्तम् ॥ ३१ ॥

प० टी०—पुनरप्यवस्थानासामर्थ्ये कारणमाह—निमित्तानीति । निमित्तानि सूचकतयाऽऽसन्नदुःखस्य विपरीतानि वामनेत्रस्फुरणादीनि पश्यामि अनुभवामि अतोपि नावस्थातुं शक्नोमीत्यर्थः । अहमनात्मवित्त्वेन

दुःखित्वाच्छोकनिबन्धनंक्लेशमनुभवामि । त्वं तु सदानन्दरूपत्वाच्छोकासंसर्गीति कृष्णपदेन सूचितं । अतः स्वजनदर्शने तुल्येपि शोकासंसर्गित्वलक्षणाद्विशेषात्त्वं मामशोकं कुर्विति भावः । केशवपदेन च तत्करणसामर्थ्यं । को ब्रह्मा सृष्टिकर्ता ईशो रुद्रः संहर्ता तौ वात्यनुकम्प्यतयागच्छतीति तव्युत्पत्तेः । भक्तदुःखकर्षितत्वं वा कृष्णपदेनोक्तं । केशवपदेन च केश्यादिदुष्टदैत्यनिवर्हणेन सर्वदा भक्तान्पालयसीत्यतो मामपि शोकनिवारणेन पालयिष्यसीति सूचितम् । एवं लिङ्गद्वारेण समीचीनप्रवृत्तिहेतुभूततत्त्वज्ञानप्रतिबन्धकीभूतं शोकमुक्त्वा सम्प्रति तत्कारितां विपरीतप्रवृत्तिहेतुभूतां विपरीतबुद्धिं दर्शयति—श्रेयः पुरुषार्थं दृष्टमदृष्टं वा बहुविचारणादनु पश्चादपि न पश्यामि अस्वजनमपि युद्धे हत्वा श्रेयो न पश्यामि । ' द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ' इत्यादिना हतस्यैव श्रेयोविशेषाभिधानाद्धन्तुस्तु न किंचित्सुकृतं । एवमस्वजनवधेऽपि श्रेयसोऽभावे स्वजनवधे सुतरां तदभावइति ज्ञापयितुं स्वजनमित्युक्तम् ॥ ३१ ॥

शं० टी०—निमित्तानीति । युद्धप्रवृत्तेरनर्थत्वसूचकानि विपरीतान्येव निमित्तानि च पश्यामि न त्वनुकूलानि । हे केशव! इदानीमेवमस्तु तथापि पश्चात्तु श्रेयो भविष्यतीत्यतआह—**नचेति** । इमं पितृपितामहादिकं स्वजनमाहवे युद्धे हत्वा अनु पश्चाद्युद्धानन्तरभावि न किमपि श्रेयश्च पश्यामि । एतेषां वधेन न कमपि पुरुषार्थमेष्यन्तं विजानइत्यर्थः ॥ ३१ ॥

श्री० टी०—निमित्तानीति । विपरीतानि निमित्तानि अनिष्टसूचकानि शकुनानि पश्यामि । किञ्च **नचेति** । स्वजनं आहवे युद्धे हत्वा श्रेयः फलं न पश्यामि ॥ ३१ ॥

स० टी०—वामाक्षिस्फुरणादीनि निमित्तान्यन्यथान्यथा ॥ विपरीततया दुःखदायीन्यनुभवाम्यहम् ॥ १ ॥ अहं चानात्मवित्त्वेन दुःखित्वाच्छोकहेतुकम् ॥ क्लेशं ह्यनुभवामीति सदानन्दतया भवान् ॥ २ ॥ शोकक्लेशाद्यसंसर्गीत्येवं कृष्णेति सूचितम् ॥ मामशोकमतः कृष्ण कुरु त्वमिति चाशयः ॥ ३ ॥ को ब्रह्मा सृष्टिकर्ता स्यादीशः संहारको हरः ॥ अनुकम्प्यतया तौ द्वौ वाति याति स केशवः ॥ ४ ॥ एवं लिङ्गमुखेनैव शोकं ज्ञाननिरोधकम् ॥ प्रोक्त्वेदानीं स्वधर्मेऽपि युद्धेऽधर्ममतिं गतः ॥ ५ ॥ प्राह पार्थो महामोहजन्याध्यासावृतो वचः ॥ विचारेणाप्यदृष्टं वा दृष्टं श्रेयः कथंचन ॥ ६ ॥ पश्चादपि न पश्यामि हत्वा स्वजनमाहवे ॥ द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ॥ ७ ॥ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥ इत्यत्रोक्तं हतस्यैव श्रेयो हन्तुर्न किंचन ॥ ८ ॥ ३१ ॥

भा० टी०—विपरीतनिमित्तप्रवृत्तेरपि मोहो भवतीत्याह—**निमित्तानीति** । निमित्तानि च विपरीतानि वामनेत्रस्फुरणादीनि पश्यामि तथा चास्मन्निमित्तः स्वजननाशो भविष्यति न तु केश्यादिमारणेन भवता यथा स्वजनः पालितः तथा स्वजनरक्षणमिति सूचयन्सम्बोधयति हे केशवेति । अहमनात्मवित्त्वेन दुःखित्वाच्छोकनिबन्धनं क्लेशमनुभवामि त्वं तु सदानन्दरूपत्वात् शोकासंसर्गीति कृष्णपदेन सूचितं । अतः स्वजनदर्शने तुल्येऽपि शोकासंसर्गित्वलक्षणाद्विशेषात्त्वं मामशोकं कुर्विति भावः । केशवपदेन च तत्करणसामर्थ्यं । केशौ ब्रह्मरुद्रौ वाति अनुकम्प्यतया गच्छतीति तद्व्युत्पत्तेः भक्तदुःखकर्षित्वं वा कृष्णपदेनोक्तं । केशवपदेन च केश्यादिदुष्टनिवर्हणेन सर्वदा भक्तान्पालयसीत्यतो मामपि शोकनिवारणेन पालयिष्यसीति सूचितमिति केचित् । इदानीं शोकमोहाविष्टचित्तः स्वधर्मेऽधर्मतां निष्प्रयोजनतां चारोपयन्नाह—**न चेति** । आहवे युद्धभूमौ स्वजनं स्वबन्धुवर्गं हत्वाऽनु पश्चाच्छ्रेयो न पश्याम्यतो निष्फलाया बन्धुहिंसाया अधर्मनिमित्ताया निवृत्तिरेव युक्तेति भावः ॥ ३१ ॥

प० टी०—किंच भो केशव ! मानसानि निमित्तानि भाव्यर्थसूचकानीहलोकसाधनानि विपरीतान्यनिष्टहेतून् पश्यामि । किंच श्रेयः परलोकसाधनं न पश्यामि ॥ ३१ ॥

रा० टी०-विपरीतानि निमित्तानि दुर्निमित्तानि च पश्यामि । केशव ब्रह्मरुद्रप्रवर्तक ! कश्च ईशश्च केशौ तौ सृष्ट्यादिना वर्तयतीति व्युत्पत्तेः । केशपदोपपदाद्वृतु वर्तनइत्यतोन्तर्णीतण्यर्थाड्डप्रत्यये रूपसिद्धेः । उक्तं हि स्थितप्रज्ञस्य का भाषेत्येतद्भाष्ये । 'हिरण्यगर्भः कः प्रोक्तईशः शङ्कर एव च । सृष्ट्यादिना वर्तयति तौ यतः केशवो भवान्' इति युद्धे न श्रेयो लभ्यतइत्यतआह—नचेति । श्रेयश्च न पश्यामि । आहवे युद्धे विजयादिकं फलं नेच्छामि ॥ ३१ ॥

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः ॥
मातुलाः श्वशुराः पौत्राः स्यालाः सम्बन्धिनस्तथा ॥ ३४ ॥

त० टी०-ननु मास्त्वामुष्मिकं श्रेय ऐहिकं राज्यभोगसुखादिकं तु स्यादेवेत्यत आह—न काङ्क्ष इति । हे कृष्णेति सम्बोधनेन सच्चिदानन्दस्वरूपस्त्वं मामपि स्वरूपानन्दतुष्टं कुर्विति सूचितम् । राज्यसाधनभूतविजयमहं न काङ्क्षे नेच्छामि । विजयसाध्यं राज्यं न च काङ्क्षे । राज्याधीनानि सुखानि च न काङ्क्षे नेच्छामि । ननु लोके शत्रुविजयराज्यसुखार्थमेव सर्वजनप्रवृत्तिस्तव कुतस्तदनाकाङ्क्षोत्पन्नेत्यत आह—किन्न इति । गावः समनस्कानीन्द्रियाणि स्वनियम्यतया विन्दते यः स ममेन्द्रियमनःप्रवृत्तिं सदा त्वं जानासीति भावेन सम्बोधयति—गोविन्देति । बहुहिंसावद्युद्धसाध्यराज्येन नोऽस्माकं किं प्रयोजनं, राज्यसाध्यविशिष्टभोगैः किं, जीवितेन भोगकरणकजीवितेनोपक्रोशमलीमसेन प्राणधारणपोषणेन वा किं प्रयोजनं, न किमपीत्यर्थः ॥ ३२ ॥ ननु पाण्डुपृथापुत्रस्य तव राज्यसुखादिनैराकाङ्क्ष्यं भवतु । तथाऽपि स्वजनवर्गार्थं तदाकाङ्क्षोचितैवेति चेत्तत्राह—येषामिति । येषां स्वजनबन्धूनामर्थे नो राज्याद्यपेक्षितं, त इमे प्राणान्प्राणसाधनानि धनाशां च त्यक्त्वा युद्धेऽवस्थितास्तस्मान्न योद्धुमिच्छामि ॥ ३३ ॥ ननु युद्धे वो हन्तुं शत्रव एव स्थिता न बन्धव इति चेत्तत्राह—आचार्या इति । स्पष्टार्थः । न ह्येतेभ्योऽन्ये स्वजनबन्धवो भवन्तीति भावः ॥ ३४ ॥

म० टी०-ननु माभूददृष्टं प्रयोजनं दृष्टप्रयोजनानि तु विजयो राज्यं सुखानि च निर्विवादानीत्यतआह—नेति । पूर्वत्र सुखं परतः फलाकाङ्क्षा ह्युपायप्रवृत्तौ कारणं अतस्तदाकाङ्क्षाया अभावात्तदुपाये युद्धे भोजनेच्छाविरहिणइव पाकादौ मम प्रवृत्तिरनुपपन्नेत्यर्थः । कुतः पुनरितरपुरुषैरिष्यमाणेषु तवानिच्छेत्यत आह—किन्नइति । भोगैः सुखैर्जीवितेन जीवितसाधनेन विजयेनेत्यर्थः । विना राज्यं भोगान् कौरवविजयं च वने निवसतामस्माकं तेनैव जगति श्लाघनीयजीवितानां किमेभिराकाङ्क्षितैरितिभावः । गोशब्दवाच्यानीन्द्रियाण्यधिष्ठानतया नित्यं प्राप्तस्त्वमेव ममैहिकफलविरागं जानासीति सूचयन्सम्बोधयति—गोविन्देति ॥ ३२ ॥ राज्यादीनामाक्षेपे हेतुमाह—येषामिति । एतेन स्वस्य वैराग्येपि स्वीयानामर्थे यतनीयमित्यपास्तं । एकाकिनोहि राज्याद्यनपेक्षितमेव । येषां तु बन्धूनामर्थे तदपेक्षितं तएते प्राणान्प्राणाशां धनानि धनाशां च त्यक्त्वा युद्धेऽवस्थिताइति न स्वार्थः स्वीयार्थो वायं प्रयत्नइति भावः । भोगशब्दः पूर्वत्र सुखपरतया निर्दिष्टोप्यत्र पृथक्सुखग्रहणात्सुखसाधनविषयपरः । प्राणधनशब्दौ तु तदाशालक्षकौ । स्वप्राणत्यागेपि स्वबन्धूनामुपभोगाय धनाशा सम्भवेदिति तद्वारणाय पृथग्धनग्रहणम् ॥ ३३ ॥ येषामर्थे राज्याद्यपेक्षितं तेत्र नागताइत्याशङ्क्य तान्विशिनष्टि स्पष्टम् ॥ ३४ ॥

शं० टी०–अस्त्येवैतेषां वधेन जयादिलक्षणं श्रेयइत्यतआह–**नकाङ्क्षइति**। स्वजनहिंसया प्राप्तो यो जयस्तमहं न काङ्क्षे तेन प्राप्तं राज्यं च तन्मूलकानि विषयसुखान्यपि नाहं काङ्क्षइत्यर्थः। एतेनाधर्मप्राप्तमैहिकसुखमस्माकं मास्त्वित्युक्तं भवति। एतैर्यथा राज्याद्यपेक्षया युध्यते तथा भवद्भिरपि युध्यतामित्यतआह–**किमिति**। धर्माधर्मविवेकवतां नोऽस्माकं स्वजनहिंसया प्राप्तेन राज्येन किं फलं तन्मूलकैर्भोगैर्वा किं तदर्थकेन जीवितेन वा किं। अधर्ममूलकं दोषावहमेतत्सर्वं सतां नाशास्यमित्यर्थः॥ ३२॥ 'अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इतिवचनात्पित्रादिभरणार्थं कृतोऽप्यधर्मो न दोषायेत्यतआह–**येषामिति**। अकार्यशतेनापि पोषणीयानां येषां पितृपुत्रादीनामर्थे निमित्ते राज्यं भोगाः सुखानि च काङ्क्षितं नोऽस्माभिः काङ्क्षितानि भवन्ति। नइति तृतीयार्थे षष्ठी। तएव पित्रादय इमे प्राणान्धनानि च त्यक्त्वा युद्धे युद्धनिमित्तमवस्थिताः जीविताशां त्यक्त्वा युद्धे मर्तुमागत्य तिष्ठन्तीत्यर्थः॥३३॥ के ते इत्याकाङ्क्षायामाह–**आचार्याइति**। अत्रास्माकं केचिदाचार्याः केचित्पितरः केचित्पुत्रास्तथैव केचित्पितामहाश्चकारात्केचिन्मातामहाः केचिन्मातुलाः केचिच्छ्वशुराः केचित्पौत्राः केचित्स्यालाः केचित्संबन्धिन एवं सर्वे स्वजना एव नान्य इत्यर्थः॥ ३४॥

श्री० टी०–विजयादिकं फलं किं न पश्यसीति चेत्तत्राह–न काङ्क्ष इति। एतदेव प्रपञ्चयति–**किं न इति** सार्धाभ्याम्। यदर्थमस्माकं राज्यादिकमपेक्षितं त एते प्राणधनानि त्यक्त्वा त्यागमङ्गीकृत्य युद्धार्थमवस्थिताः। अतः किमस्माकं राज्यादिभिः कृत्यमित्यर्थः॥ ३२–३४॥

स० टी०–मास्त्वदृष्टफलं किंचिद्दृष्टं त्वस्ति जयादिकम्॥ इत्यत्राह न मे वाञ्छा जयादौ क्षुद्रगोचरे॥ १॥ राज्यादिभिर्न चास्माकमीषदस्ति प्रयोजनम्॥ त्वमिन्द्रियाण्यधिष्ठानतया प्राप्नोषि सर्वदा॥ २॥ फले रागं विरागं च जानासीत्येव सूचयन्॥ गोविन्देत्याह राज्यादेराक्षेपे हेतुमाह च॥ ३॥ एकाकिनो न राज्याद्यपेक्षितं तदपेक्षितम्॥ येषामर्थे तएतेऽद्य प्राणाशां च धनैषणाम्॥ ४॥ त्यक्त्वाचार्यादयो युद्धे मृत्युवक्त्रे स्वयं स्थिताः॥ ते सर्वे सङ्गरे यर्हि हता आचार्यकादयः॥ ५॥ किं न स्यात्तर्हि राज्यादिभोगैः पापकरैर्वृथा॥ ६॥ ३२–३४॥

भा० टी०–ननु युद्धेन शत्रून् जित्वा विजयराज्यादिश्रेयसो लाभस्यावश्यम्भावात्किमिति न च श्रेयोनुपश्यामीत्युच्यते त्वयेति तत्राह–**न काङ्क्ष इति**। हे कृष्णेति सम्बोधयन्। 'वासुदेवे मनो यस्य जपहोमार्चनादिषु। तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम्' इति वचनात् स्वभक्त्यन्तरायात्मकस्य विजयराज्यादेः कार्पित्वमेव। भक्तस्योपरि तवानुग्रहः 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम्' इति भगवद्वचनात्। तस्माद्विजयादेर्भवद्भक्त्यन्तरायत्वमालोच्यापि तत्र काङ्क्षइति ध्वनयति। ननु भवतां भागवतानां स्वार्थे विषये विरक्तानां मास्तु स्वार्थे विजयाद्याकाङ्क्षा। स्वसम्बन्धिनामर्थे तु तदाकाङ्क्षा युक्तेत्याशङ्क्य येषामर्थे विजयादिकमपेक्षितं ते स्वत्र मरिष्यन्तीति किमस्माकं पाण्डवानां तेनेत्याह–**किमित्यादिसार्धद्वयेन**। नोऽस्माकं राज्येन किं तज्जन्यभोगैर्जीवितेन वा किं न किमपीत्यर्थः। राज्याद्यपेक्षया वने निवसतामस्माकं कन्दमूलादिना जीवनं स्वजनरक्षकं वरं। यतः सर्वप्रकारेण स्वबन्धुरक्षणं कर्तव्यमिति स्वजनरक्षणेन लब्धगोविन्दनामा जगद्गुरुस्त्वमेव गोविन्दनाम्ना शंससीति ध्वनयन्सम्बोधयति हे गोविन्देति। गोशब्दवाच्यानीन्द्रियाण्यधिष्ठानतया नित्यं प्राप्तस्त्वमेव ममैहिकफलविरागं जानासीति सम्बोधनाशय इति केचित्॥ ३२॥ येषां स्वीयानामर्थे नो राज्यं भोगसाधनमाकाङ्क्षितमभिलषितं भोगाः सुखसाधनानि सुखानि च येषामर्थे आकाङ्क्षितानि तइमे प्रत्यक्षेणोपलभ्यमानाः प्राणान्धनानि च त्यक्त्वा युद्धेऽवस्थिताः। त्यक्तुमिति वक्तव्ये त्यक्त्वेति क्त्वाप्रत्ययेन प्राणादित्यागसाधने समरे प्रवृत्ते तत्त्यक्तुमवस्थिता अपि तत्प्रेमातिशयात्पलाय्य गमिष्यन्तीति शङ्का न कर्तव्येति सूचयति॥ ३३॥ तान्विशिनष्टि–**आचार्या इति**। मातुला जननीभ्रातरः। भार्याभ्रातरः स्यालाः। स्पष्टमन्यत्॥ ३४॥

प० टी०—किंच यदर्थमेतावान् युद्धप्रसंगस्तदपि न रोचत इत्याह—**किंन इति** । सुगमम् ॥ ३२ ॥ अत्र युक्तिमाह—**येषामिति** । येषामर्थे यन्निमित्तं यत्पोषणाय राज्यं काङ्क्षितमभीप्सितं, च परं भोगाः सुखानि काङ्क्षितानि त इमेऽत्र युद्धे धनानि विषयभोगोपकरणानि स्त्रीपुत्रादीनि प्राणांश्च त्यक्त्वाऽत्रस्थिताः सन्ति । तेषु हतेषु राज्यं केन भोक्तव्यं केवलं स्वपिण्डपोषणैकफलमित्यर्थः ॥ ३३ ॥ ३४ ॥

रा० टी०—येषामर्थे प्रयोजननिमित्तं राज्याद्यपेक्षितं नः अस्माकं तइमे बान्धवाः प्राणान् धनानि च त्यक्त्वा युद्धे व्यवस्थिताः । ते कइत्यतआह—**आचार्याइति** ॥ ३२-३४ ॥

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥
अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते ॥ ३५ ॥

त० टी०—ननु यद्येतान्स्वकीयबन्धुबुद्धया त्वं न हनिष्यसि तर्हि त्वामेवैते राज्यलोभेन हनिष्यन्ति । तस्मात्त्वमेवैतान्हत्वा सकलपृथ्वीराज्यं कुर्विति चेत्तत्राह—**एतानिति** । अस्मान् घ्नतोऽप्येतान् त्रैलोक्यराज्यस्यापि हेतोरहं हन्तुं नेच्छामि, महीकृते महीमात्रराज्यप्राप्त्यर्थं न हन्यामिति किमुत वक्तव्यमित्यर्थः । मधुसूदनेति सम्बोधनेन त्वमपि दैत्यमेव हतवान्न स्वबन्धूनिति सूचितम् ॥ ३५ ॥

म० टी०—ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यन्त्येव अतस्त्वमेवैतान्हत्वा राज्यं भुङ्क्ष्वेत्यतआह—त्रैलोक्यराज्यस्यापि हेतोः तत्प्राप्त्यर्थमपि अस्मान् घ्नतोप्येतान्न हन्तुमिच्छामि इच्छामपि न कुर्यामहं किं पुनर्हन्यां । महीमात्रप्राप्तये तु न हन्यामिति किमुवक्तव्यमित्यर्थः । मधुसूदनेति सम्बोधयन् वैदिकमार्गप्रवर्तकत्वं भगवतः सूचयति ॥ ३५ ॥

शं० टी०—स्वजना एव सर्वे ते भवन्तु त्वमिदानीं किं कर्तुमिच्छसीत्यत आह—**एतानिति** । खड्गैर्मां घ्नतोऽपि हिंसतोऽप्येतानाचार्यादीन्हन्तुं नेच्छामि त्रैलोक्यराज्यस्य हेतोरपि निमित्ताय वा । एतेषां हननेनेन्द्रत्वं वाप्यागच्छतु तथाप्येतान्हन्तुं नेच्छामि किं नु महीकृते किं वक्तव्यं राज्यार्थमेतान्हन्तुं नेच्छामीति । अनेन स्वर्गसुखमपि मास्त्वित्युक्तं भवति ॥ ३५ ॥

श्री० टी०—ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यन्त्येव अतस्त्वमेवैतान्हत्वा राज्यं भुङ्क्ष्व तत्राह—**एतानिति** सार्धेन । घ्नतोऽप्यस्मान्घातयतोऽपि एतान्त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमप्यहं हन्तुं नेच्छामि किं पुनर्महीमात्रप्राप्त्यर्थमित्यर्थः ॥ ३५ ॥

स० टी०—ननु त्वं कृपयाविष्टो यदि तान्न हनिष्यसि ॥ राज्यलोभाद्धनिष्यन्ति त्वामेतइति चेच्छृणु ॥ १ ॥ त्रैलोक्यराज्यसंसिद्ध्यै नैतान् हन्तुं घ्नतोऽप्यहम् ॥ कुर्यामिच्छामपि स्वीयान्किं नु हन्यां महीकृते ॥ २ ॥ मधुसूदन वेदाध्वसम्प्रदायप्रवर्तक ॥ मामपि प्रेरय श्रौतमार्गे मोक्षप्रदे शुभे ॥ ३ ॥ विनिवर्त्याशुभान्मार्गादिति भावोऽर्जुनस्य च ॥ ४ ॥ ३५ ॥

भा० टी०—ननु स्वराज्यपरिपन्थिनामाततायिनां हननमेव युक्तं 'जिघांसन्तं जिघांसीयात्' इति न्यायेनैतेषां हनने दोषाभावादित्याशङ्क्याह—**एतानिति** । अपि त्रैलोक्यराज्यस्य हेतोर्घ्नतोप्येतानित्यन्वयः । पृथिवीप्राप्त्यर्थं हि हननमेतेषामिष्यते न च तत्प्राप्तिः समीहितेति कैमुत्यन्यायेन दर्शयति—**अपीति** । नहि महदपि त्रैलोक्यराज्यं लब्धुं स्वजनहिंसायै मनो मदीयं स्पृहयति पृथिवीप्राप्त्यर्थं पुनर्बन्धुवधं न श्रद्दध्यामिति किं वक्तव्यमित्यर्थ इति प्राञ्चः । मधोः सूदनेन त्वयापि स्वपुत्ररक्षणं कृतमिति कथमस्माभिः सम्बन्धिनाशः कर्तव्य इति ध्वनयन्सम्बोधयति मधुसूदनेति । यद्वा मधुरित्युपलक्षणं कैटभस्यापि । मधुकैटभयोरजस्तमसोः सूदनस्त्वं स्वभक्तं मां

तदुभयात्मकेऽस्मिन्घोरे कर्मणि नियोजयितुं नार्हसीति सूचयन्नाह—मधुसूदनेति । मधुसूदनेति सम्बोधयन्वैदिकमार्गप्रवर्तकत्वं भगवतः सूचयतीति केचित् ॥ ३९ ॥

प० टी०—ननु गोत्रवात्सल्येन यद्यपि युद्धादुपरतस्तथापि तेऽस्मान् हनिष्यन्त्येवेत्याशङ्क्याह--**एतानिति** । **अपीति** । त्रैलोक्यराज्यस्यापि हेतोरेतान् हन्तुं नेच्छामि किं पुनर्महीकृते। किंभूतानेतान् घ्नतोपि मारयतोऽपि । स्वात्मानं हन्तुं प्रवृत्ता अपि ते न हन्तव्या इत्यर्थः । यथा दैववशात्प्राणघातायोपस्थितस्य तिर्यग्भावं प्राप्तस्य गर्भकस्य हनने माता न यतते तद्वदस्मद्दैवेन नोदितास्ते यत्किंचित्कुर्वन्तु, तथापि वयं तान् हन्तुं नार्हाः । तदुक्तम्—'उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे' इति ॥ ३९ ॥

रा० टी०—नैवेच्छामीत्येवकारान्वयः ।यदि मां युद्धान्निवृत्तं एते हन्युस्तर्हि घ्नतोपि नैव हन्तुमिच्छामीत्यर्थः । हे मधुनामकदैत्यमर्दन ! कैमुत्यन्यायेनाप्याह—**अपीति** । त्रैलोक्यराज्यस्यापि हेतोरेतान्हन्तुं नेच्छामि । किमुत महीमात्रनिमित्तमिति ॥ ३९ ॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥

त० टी०—भवतु तथाऽप्यन्यान्विहाय युष्मद्वधे सदा कृतप्रयत्नानातिनिर्घृणान्धृतराष्ट्रपुत्रांस्त्वं जहि । तद्धनने युष्माकं महती प्रीतिर्भविष्यतीत्यत आह—निहत्येति। धार्तराष्ट्रान्निहत्य नोऽस्माकं का प्रीतिः स्यान्न काऽपीत्यर्थः। ननु गराग्निदानादिभिरेते आततायिनः। आततायिवधस्तद्वधे दोषाभावश्च शास्त्रविहितः। तथा हि—' अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ ' इति स्मृतेः । तस्माच्छास्त्रानुवर्तिना त्वया आततायिलक्षणसम्पन्ना दुर्योधनादयो हन्तव्या इति चेत् " यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः, मृत्युर्यस्योपसेचनं " ' ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । प्रसह्य हरते यस्मात्तस्माद्धरिरितीर्यते ॥ ' " अत्ता चराचरग्रहणात्, न कर्मणा लिप्यते पापकेन " इत्यादिशास्त्राच्चराचरसंहारकोऽपि निर्दोषस्त्वमित्यभिप्रायेण सम्बोधयति—जनार्दन इति। वयं तु न तथेत्याह—एतानाततायिनो हत्वाऽस्मान् पापमेवाश्रयेत् बन्धुत्वात् । मातृपितृबन्धुवधस्य शास्त्रे महापातकत्वेनोक्तत्वात् ॥ ३६ ॥

म० टी०—नन्वन्यान्विहाय धार्तराष्ट्रा एव हन्तव्यास्तेषामत्यन्तक्रूरतरतत्तद्दुःखदातॄणां वधे प्रीतिसम्भवादित्यतआह—**धार्तराष्ट्रान्दुर्योधनादीन्** भ्रातॄन्निहत्य स्थितानामस्माकं का प्रीतिः स्यात् न कापीत्यर्थः । नहि मूढजनोचितक्षणमात्रवर्तिसुखाभासलोभेन चिरतरनरकयातनाहेतुर्बन्धुवधोऽस्माकं युक्तइति भावः । जनार्दनेतिसम्बोधनेन यदि वध्या एते तर्हि त्वमेवैतान् जहि । प्रलये सर्वजनहिंसकत्वेपि सर्वपापाऽसंसर्गित्वादिति सूचयति।ननु 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः' इतिस्मृतेरेतेषां च सर्वप्रकारैराततायित्वात् ।' आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ' इति वचनेन दोषाभावप्रतीतेर्हन्तव्या एव दुर्योधनादय आततायिन इत्याशङ्क्याह—**पापमेवेति**। एतानाततायिनोपि हत्वा स्थितानस्मान पापमाश्रयेदेवेति सम्बन्धः । अथवा पापमेवाश्रयेत् । न किंचिदन्यत् दृष्टमदृष्टं वा प्रयोजनमित्यर्थः । न हिंस्यादिति धर्मशास्त्रादाततायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलत्वात् । तदुक्तं याज्ञवल्क्येन 'स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः । अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः' । अपरा व्याख्या। ननु धार्तराष्ट्रान् घ्नतां भवतां प्रीत्यभावेपि युष्मान् घ्नतां धार्तराष्ट्राणां प्रीतिरस्त्येवातस्ते युष्मान्हन्युरित्यतआह—**पापमेवेति** अस्मान्हत्वा स्थितानेतानाततायिनो धार्तराष्ट्रान् पूर्वमपि पापिनः साम्प्रतमपि पापमे-

वाश्रयेत् नान्यत् किंचित्सुखमित्यर्थः । तथा चायुध्यतोस्मान्हत्वैतएव पापिनो भविष्यन्ति नास्माकं कापि क्षतिः । पापासम्बन्धादित्यभिप्रायः ॥ ३६ ॥

शं० टी०—एतैर्युष्माकं लाक्षागृहदाहादिभिर्बह्वपकृतमपकारिणां हननं सन्तोषाय धर्माय च भवतीत्यतआह—**निहत्येति** । धार्तराष्ट्रान् दुर्योधनादीनस्मद्भ्रातॄन् सबान्धवान् हत्वा तद्धननेनास्माकं का प्रीतिः स्यात् । अपराधिनः पुत्रस्य शिशोर्हननेन पितुः प्रीतिश्चेदस्माकमेतेषां वधेन प्रीतिः संभवेत् । यथा पुत्रहननेन पितुः शिशुहत्या तथास्माकमपि भ्रातृहत्या स्यात् । ननु 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते ह्याततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन' इतिवचनादुक्तसर्वदोषविशिष्टानामेतेषां वधे न कश्चिद्दोषइत्यत आह—**पापमेवेति** । आततायाः उक्ताः षड्विधा दोषा एषां सन्ति ते आततायिनस्तानुक्तदोषवतोप्येतान् हत्वा। तद्धननेन कर्मणाऽस्मान् पापमेवाश्रयेत् । अन्याभावव्यवच्छेदएवकारार्थः । यद्यप्यस्त्याततायिवधो न दोषाय तथापि ' स एव पापिष्ठतमो यः कुर्यात्कुलनाशनम्' इति 'अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ' इतिन्यायेन अर्थशास्त्राद्बलवत्त्वाद्धर्मशास्त्रस्य । अतआततायित्वदोषादपि कुलनाशकत्वदोषोऽनर्हः । सोयमस्माकं स्यादितिभावः ॥ ३६ ॥

श्री० टी०—ननु च ' अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते ह्याततायिनः' इति स्मरणात् अग्निद इत्यादिभिः षड्भिरपि हेतुभिरेते तावदाततायिनः । आततायिनां च वधो युक्त एव ' आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ' इति वचनात्तत्राह सार्धेन—**पापमिति** । आततायिनमायान्तमित्यादिकमर्थशास्त्रं धर्मशास्त्राद्दुर्बलम् । यथोक्तं याज्ञवल्क्येन 'स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः । अर्थशास्त्राच्च बलवद्धर्मशास्त्रमिति स्थितिः ' तस्मादाततायिनामप्येतेषामार्यादीनां वधेऽस्माकं पापमेव भवेत् । अन्याय्यत्वादधर्मत्वाच्चैतद्वधस्य ॥ ३६ ॥

स० टी०—नन्वन्यान्संपरित्यज्य दुर्योधनमुखाः खलाः ॥ हन्तव्याः क्रूरनाशे स्यात्प्रीतिरित्यतआह सः ॥ १ ॥ दुर्योधनमुखान् भ्रातॄन्निहत्यास्माकमीदृशान् ॥ न कापि प्रीतिराभाति हिंसा कुत्रापि नो वरा ॥ २ ॥ क्षणिकानन्दलोभेन नैतेषामुचितो वधः ॥ यदि वध्यास्त्वया तर्हि हन्तव्याः खलनाशिना ॥ ३ ॥ प्रलये सर्वसंहारकर्तृत्वेनाप्यसङ्गिना ॥ जनार्दनपदेनेति सूचितं सूक्ष्मबुद्धिना ॥ ४ ॥ नन्वाततायिनां हिंसा न च पापकरी स्मृता ॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ॥ ५ ॥ क्षेत्रदारापहारी च षडेते ह्याततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन ॥ ६ ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ इति शास्त्रेण हन्तव्याः शत्रवश्चेति चेच्छृणु ॥ ७ ॥ पापमेवाश्रयेदस्मान्न श्रेयोऽपि कथञ्चन ॥ पापिनां न सुखं किंचिदृष्टं नादृष्टमण्वपि ॥ ८ ॥ न हिंस्यात्सर्वभूतानीत्येवं धर्मानुशासनात् ॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृतिः ॥९॥ अस्मानयुद्ध्यतो हत्वैतानत्यन्ताततायिनः ॥ पापमेवाश्रयेन्नान्यच्छ्रेय इत्यर्थ एव वा ॥ १० ॥ ३६ ॥

भा० टी०—ननु बह्वपकर्तुर्धृतराष्ट्रस्य पुत्रान्दुःखदातॄन्निहत्य स्थितानां युष्माकं प्रीतिर्भविष्यतीति चेत्तत्राह—**निहत्येति** । धार्तराष्ट्रान्निहत्य नोस्माकं का प्रीतिः स्यान्न कापीत्यर्थः । अपकर्तर्यपि वृद्धेऽपकारो न कार्य इति धृतराष्ट्रसम्बन्धप्रदर्शनाशयः । तव तु दुष्टजनघातेन स्वसम्बन्धिप्रसन्नता सम्पद्यते । अस्माकं तु सापि नास्ति । अस्मत्सम्बन्धिनामवश्यम्भाविनाशदर्शनादिति सूचयन्नाह—**जनार्दनेति** । जनार्दनेति सम्बोधनेन यद्येते वध्यास्तर्हि त्वमेवैतान् जहि । प्रलये सर्वजनहिंसकत्वेऽपि सर्वपापासंसर्गित्वादिति सूचयतीति केचित् । ननु " अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः " इति वचनादाततायिन एतान् हत्वा ' नाततायिवधे दोषः ' इति वचनाद्युष्मान्पापं नाश्रयिष्यति अपित्वाततायिन एतानेवेत्यत आह—**पापमिति** । एतानाततायिनो हत्वाऽस्मानेव पापमाश्रयेत् ' द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।

परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः' इत्यादिना हतस्य पापापगमात् श्रेयो विशेषाभिधानात् हननकर्तृभूतानस्मानेव हिंसानिबन्धनं पापमाश्रयेदिति । 'आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन' इति वचनं त्वर्थशास्त्रत्वेन दुर्बलत्वात् । 'न हिंस्यात्सर्वभूतानि' इति प्रबलेन धर्मशास्त्रेण बाध्यते । तदुक्तं याज्ञवल्क्येन 'स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः । अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः' इत्यभिप्रायः । 'युद्धायानुद्यतानस्मान्हत्वैतानाततायिनः। पापमेवाश्रयेत्' इति वा एतान्हत्वाऽऽततायिनोऽस्मानेवेति वेति पक्षत्रयेऽपि एतदादेर्हननक्रियां प्रति कर्तृत्वे क्त्वाप्रत्ययः स्थित्यादिक्रियामध्याहृत्योपपद्यते ॥ ३६ ॥

प० टी०—अस्मासु तत्कृपया त्यक्तयुद्धेषु सत्सु ते कथं हनिष्यन्तीत्याह—आततायिन इति । अपराधराहित्येऽपि परहन्तॄन् । अत्र स्मृतिः—'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ॥ क्षेत्रदारहरश्चैव षडेते ह्याततायिनः' इति । अथ 'आततायिनमायान्तं हन्यादेवाविचारयन्' इत्याद्यपि स्मृत्युक्तमस्ति, इति चेन्न । इदं चोरादिषु दण्ड्येषु राजनीतौ प्रोक्तं न पुत्रपौत्रादिषु ॥ ३६ ॥

रा० टी०—किंच धार्तराष्ट्रान्निहत्य नोऽस्माकं का प्रीतिः किमैहिकसुखं । न किमपि । नापि पारत्रिकं । प्रत्युत पारत्रिकदुःखहेतु पापमेवास्मानाश्रयेत् । न जायतइति जनः अर्दयति संसारमिति अर्दनः जनश्चासावर्दनश्चेति जनार्दनः तस्य संबुद्धिः । उक्तं ह्येवं गीताभाष्ये दशमे । आततायिनः 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते ह्याततायिनः' इत्युक्तलक्षणात् ॥ ३६ ॥

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ॥
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥

त० टी०—यस्माद्बन्धुवधे ऐहिकं पारलौकिकं च न किमपि फलं, प्रत्युत बन्धुवधजन्यपापफलं नरकपातः स्यात्तस्मात्स्वबान्धवान्धार्त्तराष्ट्रान्वयं हन्तुं नार्हाः । यद्यपि विषाग्निदानादुष्कर्माण एते इति सत्यं, तथाऽपि स्वजनं हत्वा वयं कथं सुखिनः स्याम । हीति निश्चये । नैव स्यामेत्यर्थः । माधवेति त्वमपि वंशवर्द्धको नतु वंशनाशक इति भावः ॥ ३७ ॥

म० टी०—फलाभावादनर्थसम्भवाच्च परहिंसा न कर्तव्येति 'नच श्रेयोनुपश्यामि' इत्यारभ्योक्तं तदुपसंहरति अदृष्टफलाभावोऽनर्थसम्भवश्च तच्छब्देन परामृश्यते दृष्टसुखाभावमाह—**स्वजनंहीति** । माधवेति लक्ष्मीपतित्वान्नालक्ष्मीके कर्मणि प्रवर्तयितुमर्हसीति भावः ॥ ३७ ॥

शं० टी०—तर्हि त्वया किं निश्चितमित्यत आह—**तस्मादिति** । यस्माद्धार्तराष्ट्राणां वधेन कुलनाशनदोषएव प्रसज्यते तस्मात्स्वबान्धवान्धार्तराष्ट्रान् हन्तुं वयं नार्हा न योग्या नेच्छामइत्यर्थः । स्वसुखार्थमेतेषां वधः कर्तव्यएवेत्यतआह—**स्वजनमिति** । स्वजनसुखार्थं खलु पुंसः प्रवृत्तिः। वयं तु स्वजनं हत्वा कथं नु सुखिनः स्याम॥ ३७॥

श्री० टी०—न चेह सुखं स्यादित्याह—**स्वजनंहीति** ॥ ३७ ॥

स० टी०—परहिंसा न कर्तव्या सर्वश्रेयोऽभिघातिनी ॥ ततो नैतान्वयं हन्तुं योग्याः स्वीयानघानपि ॥ १ ॥ नैव तेषां वधे दृष्टं सुखं नो भाति माधव ॥ नास्मिन्कर्मण्यलक्ष्मीके प्रवर्तयितुमर्हसि ॥२॥ ३७॥

भा० टी०—एवं युद्धस्य निष्फलतामनर्थहेतुतां चोपपाद्योपसंहरति—**तस्मादिति** । ब्रह्मविद्यापतित्वात्तत्साधने प्रवर्तयितुमर्हसि नत्वस्मिन्क्लेशदे कर्मणि इति सूचयन्नाह—**माधवेति** । स्वजनसुखेन सुखार्थस्य राज्यलक्ष्मीपतित्वस्य स्वजननाशेन सुखाजनकत्वात् स्वजनं हत्वा कथं सुखिनः स्याम । यतस्त्वापि लक्ष्मीपतित्वं स्वज-

नार्थमेवेति वा माधवेति सम्बोधनेन सूचयति । लक्ष्मीपतित्वान्नालक्ष्मीके कर्मणि प्रवर्तयितुमर्हसीति भाव इति केचित् ॥ ३७ ॥

रा० टी०—तस्मात् ‘ सीदन्ति मम गात्राणि ’ इत्यादिनोक्तोपपत्तिबलात्सबान्धवान्धार्तराष्ट्रान्हन्तुं वयं नार्हाः । ‘आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन’ इत्युक्तेस्तेषामाततायित्वेन हन्तव्यतया प्राप्तत्वेपि तद्धननप्रसक्त्या बन्धूनामपि हननप्राप्तेर्न हन्तुं वयं योग्या इति भावः । बन्धुत्वेप्याततायिसंबन्धित्वात्तेपि बन्धुजना हन्तव्या एवेत्यत आह—**स्वजनं हीति** । स्याम भवेम । तद्दर्शनस्पर्शनसंभाषणादेरभावप्राप्तेरिति भावः ॥ ३७ ॥

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ॥
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥

त० टी०—ननु यूयमपि तेषां स्वजना एव ते कथं युष्मद्वधे प्रवृत्ता इति चेत्तत्राह—यद्यपीति । यद्यप्येते दुर्योधनादयो लोभोपहतचेतसः लोभेनोपहतं नष्टं धर्मविषयं चेतो येषां ते । तथा नष्टधर्मज्ञानत्वात्कुलघ्नतादिदोषं पश्यन्तोऽपि न पश्यन्तीत्यतोऽस्मद्वधे प्रवृत्ता इत्यर्थः ॥ ३८ ॥

म० टी०—कथं तर्हि परेषां कुलक्षये स्वजनहिंसायां च प्रवृत्तिस्तत्राह लोभोपहतबुद्धित्वात्तेषां कुलक्षयादिनिमित्तदोषप्रतिसन्धानाभावात्प्रवृत्तिः सम्भवतीत्यर्थः । अतएव भीष्मादीनां शिष्टानां बन्धुवधे प्रवृत्तत्वाच्छिष्टाचारत्वेन वेदमूलत्वादितरेषामपि तत्प्रवृत्तिरुचितेत्यपास्तं । हेतुदर्शनाच्चेतिन्यायात् । तत्र हि लोभादिहेतुदर्शने वेदमूलत्वं न कल्प्यत इति स्थापितम् । यद्यप्येते न पश्यन्ति तथापि कथमस्माभिर्न ज्ञेयमित्युत्तरश्लोकेन सम्बन्धः ॥ ३८ ॥

शं० टी०—उभयसाधारणः खल्वयं विचारः कथं त्वयैव क्रियत इत्यत आह—**यद्यपीति** । एते दुर्योधनादयो लोभोपहतचेतसः स्थितद्रव्यत्यागासहिष्णुत्वं लोभस्तेन हतं ग्रस्तं चेतो येषां ते लोभोपहतचेतसः सन्तः कुलक्षयकरणेन प्राप्तं कुलक्षयकृतं दोषं मित्रद्रोहे विश्वासघातं तज्जन्यं पातकं च यद्यपि न पश्यन्ति न विचारयन्ति ॥ ३८ ॥

श्री० टी०—ननु तवैतेषामपि बन्धुवधदोषे समाने सति यथैवैते बन्धुवधदोषमङ्गीकृत्य युद्धे प्रवर्तन्ते तथैव भवानपि प्रवर्ततां किमनेन विषादेनेत्यत आह—**यद्यपीतिद्वाभ्याम्** । राज्यलोभेनोपहतं भ्रष्टविवेकं चेतो येषां ते एते दुर्योधनादयो यद्यपि दोषं न पश्यन्ति ॥ ३८ ॥

स० टी०—कथं तर्हि परेषां हि धर्मशास्त्रविदामपि ॥ कुलक्षये प्रवृत्तिश्चेत्यतआहार्जुनो वचः ॥ १ ॥ लोभाच्छादितबुद्धित्वाद्दोषेऽपि बलवत्तरे ॥ भवत्वेषां प्रवृत्तिश्च नास्माकं सोचिता भवेत् ॥ २ ॥ न देवमूलिका सास्ति प्रवृत्तिर्लोभमूलिका ॥ शिष्टानामपि न ग्राह्या भीष्मादीनां विवेकिभिः ॥ ३ ॥ ३८ ॥

भा० टी०—ननु स्वजनहिंसाकृतस्य दोषस्योभयेषां समानत्वात् यथा ते पापं न पश्यन्ति तथा भवद्भिरपि न ज्ञेयमिति चेत्तत्राह—**यद्यपीति** । लोभेनोपहतं चेतो येषां ते लोभोपहतचेतस्त्वादेते कुलक्षयकृतं दोषं मित्राणां द्रोहे च पातकं यद्यपि न पश्यन्ति तथाप्यस्माभिः कथं न ज्ञेयमिति परेणान्वयः ॥ ३८ ॥

प० टी०—अथ तेऽपि कथं पुत्रपौत्रोचितं व्यवहारं न रक्षन्तीत्याह—**लोभोपहतचेतस इति** । राज्यभोगेच्छयोपहतं त्यक्तस्मृति चेतो येषां ते । तथा ‘पुत्रादपि धनभाजां भीतिः ’ इत्युक्तत्वात् ॥ ३८ ॥

रा० टी०—कुत एवं बुद्ध्या तेन निवृत्ता इत्यतआह—**यद्यपीति** । एते दुर्योधनादयः राज्यलोभेनोपहतचेतसः नष्टधर्मज्ञानाः दोषं पातकं न च पश्यन्ति । यद्यपि तथापि ॥ ३८ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्त्तितुम् ॥
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

त० टी०—वयं तु न तथेत्याह—**कथमिति**। कुलक्षयकृतं दोषं प्रकर्षेण पश्यद्भिरस्माभिरस्मात्पापान्निवर्त्तितुं कथं न ज्ञेयं। धर्मप्रवर्त्तकभवदाश्रयाणामस्माकं नाधर्मे प्रवृत्तिः स्यादित्यस्माभिर्भवान्नर्द्यते याच्यते इति जनार्दनेति सम्बोधनाभिप्रायः। "कृत्यल्युटोवहुलम्" इति कर्मणि ल्युट् ॥ ३९ ॥

म० टी०—ननु यद्यप्येते लोभात्प्रवृत्तास्तथापि 'आहूतो न निवर्तेत द्यूतादपि रणादपि' इति 'विजितं क्षत्रियस्य' इत्यादिभिः क्षत्रियस्य युद्धं धर्मो युद्धार्जितं च धर्म्यं धनमिति शास्त्रे निश्चयाद्भवतां च तैराहूतत्वाद्युद्धे प्रवृत्तिरुचितैवेत्याशङ्क्याह—अस्मात्पापाद्बन्धुवधफलकयुद्धरूपात्। अयमर्थः। श्रेयःसाधनताज्ञानं हि प्रवर्तकम्। श्रेयश्च तद्यदश्रेयोननुवन्धि। अन्यथा श्येनादीनामपि धर्मत्वापत्तेः। तथा चोक्तम् 'फलतोपि च यत्कर्म नानर्थेनानुवध्यते। केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यते' इति। ततश्चाश्रेयोनुवन्धितया शास्त्रप्रतिपादितेऽपि श्येमादाविवास्मिन्युद्धेऽपि नास्माकं प्रवृत्तिरुचितेति ॥ ३९ ॥

शं० टी०—**कथमिति**। तथापि धर्मस्वरूपज्ञैः कुलक्षयकृतं दोषं प्रपश्यद्भिर्विजानद्भिः पण्डितैरस्माभिरस्मात्कुलक्षयकृतात्पापान्निवर्तितुं कथं न ज्ञेयमिति काकुः। कथं न विचारितव्यं विचारितव्यमेव 'किमकार्यं दुरात्मनाम्' इति न्यायेनैते राज्यलोभेन कुलक्षयं मित्रद्रोहं च कुर्वन्ति यथा तथा वयं कर्तुं न शक्नुम इत्यर्थः॥ ३९॥

श्री० टी०—तथाप्यस्माभिर्दोषं प्रपश्यद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयम्। निवृत्तावेव बुद्धिः कर्तव्येत्यर्थः ॥ ३९ ॥

स० टी०—यद्यप्येते प्रवृत्ताः स्युर्लोभात्तदपि शास्त्रतः ॥ तव प्रवृत्तिरुचिता युद्धे चाह्वानतः परैः ॥१॥ आहूतो न निवर्तेत द्यूतादपि रणादपि ॥ क्षत्रियस्यास्ति धर्मोऽयमित्यत्राहार्जुनो वचः ॥ २ ॥ श्रेयःसाधनताज्ञानं पुरुषस्य प्रवर्तकम्॥ अश्रेयोऽननुवन्धि स्याच्छ्रेयो नो दृष्टमात्रकम् ॥ ३ ॥ अन्यथा धर्मतापत्तिः श्येनादीनामपीष्यताम् ॥ फलतोऽपि च यत्कर्म नानर्थेनानुवद्ध्यते ॥ ४ ॥ केवलं प्रीतिहेतुत्वात्तद्धर्मत्वेन कीर्त्यते ॥ यदि येनेष्टसिद्धिः स्यादनिष्टाननुवन्धिना ॥ ५ ॥ तस्य धर्मत्वमिष्येत ततः श्येनादिवर्जनम् ॥ यदा तु चोदनागम्यः कार्याकार्यानपेक्षया ॥ ६ ॥ धर्मः प्रीतिनिमित्तं स्यात्तदा श्येनेऽपि धर्मता ॥ अतोऽश्रेयोनुवन्धित्वाच्छास्त्रतोऽपि रणेन नः ॥ ७ ॥ प्रवृत्तिरुचिता बन्धुवधरूपे कुलक्षये ॥ ८ ॥ ३९ ॥

भा० टी०—अस्मात्पापान्निवर्तितुं निवृत्त्यर्थं कुलक्षयकृतं दोषं प्रकर्षेण पश्यद्भिरस्माभिस्तद्दोषशब्दितं पापं कथं न ज्ञातव्यं तस्मात्पापपरिज्ञानं विना तत्र प्रवृत्तिपरिहारासंभवात्तज्ज्ञानमेवोचितं पापान्निवर्तितुं न तु पापसाधके युद्धे प्रवर्तितुं तदज्ञानमिति भावः। सदैव निर्लिप्तस्य तवैव परमेश्वरस्य प्रलयादौ जनानामर्दनेन पापासंश्लेषो न त्वन्यस्येति सूचयन् सम्बोधयति हे जनार्दनेति ॥ ३९ ॥

प० टी०—अस्माभिः स्मरणवद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयम्। किं तत्पापमित्याह—**कुलेति**। किंभूतैरस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिः। भो जनार्दन संजिहीर्षो वदेति शेषः ॥ ३९ ॥

रा० टी०—हे जनार्दन जननरहित संसारार्दन! कुलक्षयकृतं दोषं प्रपश्यद्भिरस्माभिः अस्माद्दोषान्निवर्तितुं कथं न ज्ञेयम् ॥ ३९ ॥

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ॥
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

त० टी०—कुलक्षयकृतं दोषं प्रपश्यद्भिरित्युक्तमिदानीं तमेव दोषं प्रपञ्चयति—**कुलक्षय इति** । सनातनाः परम्परागताः कुलोचिता धर्माः कुलक्षये धर्मानुष्ठातृपुरुषवर्गे नष्टे सति प्रणश्यन्ति । नैतावानेव दोषः किन्तु उत अन्योऽपीत्यर्थः । अनुष्ठात्रभावाद्धर्मे धर्ममात्रे नष्टे सति कृत्स्नं कुलं यत्किञ्चिदवशिष्टं स्त्रीबालादिरूपम् अधर्मोऽभिभवति व्याप्नोति ॥ ४० ॥

म० टी०—एवंच विजयादीनामश्रेयस्त्वेनानाकाङ्क्षितत्वान्न तदर्थं प्रवर्तितव्यमिति द्रढयितुमनर्थानुबन्धित्वेनाश्रेयस्त्वमेव प्रपञ्चयन्नाह । सनातनाः परम्पराप्राप्ताः कुलधर्माः कुलोचिताः धर्माः कुलक्षये प्रणश्यन्ति कर्तुरभावात् । उत अपि अग्निहोत्राद्यनुष्ठातृरूपनाशेन धर्मे नष्टे । जात्यभिप्रायमेकवचनम् । अवशिष्टं बालादिरूपं कृत्स्नमपि कुलमधर्मोऽभिभवति स्वाधीनतया व्याप्नोति । उतशब्दः कृत्स्नपदेन सम्बध्यते ॥ ४० ॥

शं० टी०—कुलक्षये कृते को वाऽनर्थ इत्युक्ते नैक एवानर्थः किंतु कुलतद्धर्मक्षयाद्यनर्थपरम्परैवापतति तदागमप्रकारमेवाह—**कुलक्षय इत्यादिपञ्चभिः** । अत्र कुलपदेन कुलसम्बन्धिनः पुरुषा लक्ष्यन्ते कुलक्षये कुलधर्मप्रवर्तकपुरुषक्षये सति सनातना वंशपारम्पर्येणागताः कुलधर्माः कुलानुरूपेण जात्यनुरूपेण च कर्तव्या आचारविशेषाः प्रणश्यन्ति प्रवर्तकाभावात्प्रकर्षेण नश्यन्ति । धर्मे कुलाचारे जात्याचारे च नष्टे स्वरूपेणादर्शनं गते सति कृत्स्नं कुलमधर्मस्त्वनाचारोऽप्यभिभवति।शिक्षकाभावादभितः कुले त्वनाचार एवाभिवर्धते४०

श्री० टी०—तमेव दोषं दर्शयति—**कुलक्षयइति** । सनातनाः परम्पराप्राप्ताः उत अपि । अवशिष्टं कुलमधर्मोऽभिभवति व्याप्नोति ॥ ४० ॥

स० टी०—महापापादिहेतुत्वाद्गुरुपित्रादिर्हिंसनात् ॥ सिद्ध्यै सुपरिरंसायाः प्राह वाक्यानि शास्त्रवित् ॥ १ ॥ धर्माः परम्पराप्राप्ताः प्रणश्यन्ति कुलोचिताः ॥ कुलक्षये यतः कर्तुरभावो दृश्यते क्षितौ ॥ २ ॥ धर्मक्षये कुलं सर्वमाबालमपि सर्वथा ॥ अधर्मः स्ववशे कृत्वा व्याप्नोति भ्रंशयत्यतः ॥ ३ ॥ ४० ॥

भा० टी०—कोऽसौ कुलक्षयकृतो दोष इत्यपेक्षायामाह—**कुलक्षय इति** । कुलस्य हि क्षये कुलकर्तृकाः कुलोचिताः धर्माः सनातनाः चिरन्तनास्तत्कर्तृणामभावात् प्रकर्षेण नश्यन्ति धर्मे नष्टे च यत्स्यात्तदाह—**धर्मे इति** । धर्मे नष्टे तत्कर्तृकुलनाशाद्धर्मे नष्टे सति कुलक्षयकर्तुरवशिष्टं कृत्स्नं सर्वमपि कुलमधर्मोऽभिभवति अधर्मभूयिष्ठं तस्य कुलं भवतीत्यर्थः ॥ ४० ॥

प० टी०—अथ कुलक्षये प्रणश्यन्तीत्यादिवाक्यैर्यावदध्यायान्तं पापपर्यवसितमर्थमुक्तवान् । सनातनाः परम्पराप्राप्ताः ॥ ४० ॥

रा० टी०—कः कुलक्षयकृतो दोष इत्यतआह—**कुलक्षयइति** । सनातनाः परम्पराप्राप्ताः कुलधर्माः क्षत्रियादिकुलधर्माः उतशब्दोऽप्यर्थे । अवशिष्टं कृत्स्नमपि कुलमधर्मोभिभवति अधर्माक्रान्तं भवति ॥ ४० ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ॥
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥

त० टी०—ततश्च महान्दोषो भवतीत्याह—**अधर्मेति** । अधर्मव्यापनात्कुलस्त्रियः प्रदुष्यन्ति यथेष्टाचारेण वर्त्तन्ते । भक्तानां पापकर्षकस्त्वं नतु पापे नियोजक इत्यभिप्रायेण कृष्णेति सम्बोधनं । वार्ष्णेयेति हे धर्मज्ञ ! कुलप्रसूतस्त्रीषु दुष्टासु सतीषु वर्णसंकरो जायते ॥ ४१ ॥

म० टी०—अस्मदीयैः पतिभिर्धर्ममतिक्रम्य कुलक्षयः कृतश्चेदस्माभिरपि व्यभिचारे कृते को दोषः स्यादित्येवं कुतर्कहताः कुलस्त्रियः प्रदुष्येयुरित्यर्थः । अथवा कुलक्षयकारिपतितपतिसम्बन्धादेव स्त्रीणां दुष्टत्वम् । ‘ आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः ’ इत्यादिस्मृतेः ॥ ४१ ॥

शं० टी०—अधर्माभिभवादिति । अधर्माभिभवादनाचारवृद्धेः कुलस्त्रियः प्रकर्षेण दुष्यन्ति कुवृत्त्या दूषिता भवन्ति । स्त्रीषु सतीषु दुष्टासु वर्णसङ्करः आनुलोम्येन प्रातिलोम्येन च ब्राह्मणादिवर्णानां सङ्कीर्णता जायते । व्यवस्थां त्यक्त्वा वर्णाः सङ्कीर्णा भवन्तीत्यर्थः ॥ ४१ ॥

श्री० टी०—ततश्च—अधर्माभिभवादिति ॥ ४१ ॥

स० टी०—अस्मदीयैश्च पतिभिरतिक्रम्य स्वधर्मतः ॥ कुलक्षयः कृतो यर्हि तर्ह्यस्माभिरिहाधुना ॥ १ ॥ व्यभिचारे कृते कः स्याद्दोष इत्थं कुतर्कतः ॥ कुलस्त्रियः प्रदुष्येयुरधर्माधिक्यहेतुना ॥ २ ॥ तासु दुष्टासु नीचाभिगमनात्सङ्करो भवेत् ॥ वृष्णिवंशेऽवतीर्णत्वाद्रक्षास्मान् घोरदोषतः ॥ ३ ॥ ४१ ॥

भा० टी०—ततश्च किं स्यादत आह—अधर्मेति । अधर्मेणाभिभवादधर्मबाहुल्यात् कुलस्त्रियः प्रकर्षेण दुष्यन्ति दुष्टाः व्यभिचारिण्यो भवन्ति । कुलक्षयकारिपतितपतिसंबन्धादेव स्त्रीणां दुष्टत्वं । 'आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः' इत्यादिस्मृतेरित्यपि केचित् । तासु च दुष्टासु यत्स्यात्तदाह—स्त्रीष्विति । स्त्रीषु दुष्टासु वर्णसङ्करो जायते सर्वानर्थमूलभूताधर्मसाधनाद्युद्धादस्मदपकर्षणमेव कर्तुमर्हसि न तु तत्र प्रवर्तनमिति सूचयन्नाह—कृष्णेति । वृष्णिकुलोद्भवकुलमर्यादाभिज्ञस्त्वमेतत्कथं जानासि ज्ञात्वा च किमर्थमुपेक्षसइति ध्वनयन्सम्बोधयति—वार्ष्णेयेति ॥ ४१ ॥

प० टी०—वर्णसङ्करः सर्ववर्णानामेकीभावः ॥ ४१ ॥

रा० टी०—वार्ष्णेय वृष्णिकुलोद्भव ॥ ४१ ॥

संकरो नरकायैव कुलघ्नानां कुलस्य च ॥
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

त० टी०—संकरोत्पत्तिफलमाह—संकर इति । जात्यन्तरपुरुषादन्यस्त्रियां जातः संकरः । स कुलघ्नानां कुलस्य च नरकायैव भवति । न केवलं कुलघ्नानामेव नरकपातः किन्तु तत्पितृणामपीत्याह—पतन्तीति । हि यतः सन्तत्यभावाल्लुप्ताः पिण्डोदकक्रिया येषां ते । एषां कुलघ्नानां पितरः पतन्ति । नरके इति शेषः ॥ ४२ ॥

म० टी०—कुलस्य सङ्करश्च कुलघ्नानां नरकायैव भवतीत्यन्वयः । न केवलं कुलघ्नानामेव नरकपातः किन्तु तत्पितृणामपीत्याह—पतन्तीति । हिशब्दोऽप्यर्थे हेतौ वा । पुत्रादीनां कर्तॄणामभावाल्लुप्ता पिण्डस्योदकस्य च क्रिया येषां ते । तथा कुलघ्नानां पितरः पतन्ति । नरकायैवेत्यनुषङ्गः ॥ ४२ ॥

शं० टी०—नैतावानेवानर्थः किन्तु विशेषोऽस्तीत्याह—सङ्करइति । कुलधर्मव्यवस्थापकपुरुषनाशकाः कुलघ्नास्तेषां च कुलस्य च सङ्करो नरकायैव भवति । कुलहन्तारः साङ्कर्यसम्पादकाः सङ्कीर्णाः साङ्कर्यसमुत्पन्नाश्च सर्वे नरके पतन्तीत्यर्थः । आस्तामेषोऽनर्थ इतोप्यधिकतरोऽस्तीत्याह—पतन्तीति । हिश्चार्थे प्रसिद्ध्यर्थे वा । एषां कुलघ्नानां कुलस्य च सङ्कीर्णकानां च ये पितरः स्वर्गस्थास्तेऽपि लुप्तपिण्डोदकक्रियाः सन्तस्तेषामेव दोषेण स्वयं च नरके पतन्ति सङ्कीर्णकानां पितरश्च्यवन्ते । नात्र संशय इति प्रसिद्धेः ॥ ४२ ॥

श्री० टी०—एवं सति—सङ्कर इति । एषां कुलघ्नानां पितरः पतन्ति । हि यस्मात् लुप्ताः पिण्डोदकक्रियाः येषां ते ॥ ४२ ॥

स० टी०—कुलस्य सङ्करो यस्मात्कुलघ्नानामवीचिदः ॥ न केवलं कुलघ्नानां पितॄणामपि नस्तथा ॥१॥ पुत्रादीनां हि कर्तॄणामभावादेव सर्वथा ॥ लुप्ता येषां क्रियाः सर्वाः पिण्डस्याप्युदकस्य च ॥ २ ॥ कुलघ्नानां पतन्त्येव पितरो नरके चिरम् ॥ ३ ॥ ४२ ॥

भा० टी०–वर्णसङ्करस्य दोषपर्यवसायितां दर्शयति–सङ्कर इति। वर्णसङ्करः कुलघ्नानां कुलहननकर्तृणां कुलस्य चाधर्माभिभूतस्य नरकायैव नरकप्रदानायैव जायत इत्यनुषङ्गः। कुलस्य सङ्करश्च कुलघ्नानां नरकायैव भवतीत्यन्वयः इति केचित्। न केवलं तेषामेव नरकाय अपितु तत्पितृणामपीत्याह–पतन्तीति। एषां कुलघ्नानां कुलस्य च पितरः पतन्ति निरयगामिनो भवन्ति। हि यस्मात् लुप्ता पिण्डोदकयोः क्रिया येषां ते। तत्कर्तृणां पुत्रपौत्रादीनामभावात्। ततश्च प्रेतत्वादिनिवृत्तिकारणाभावात्। तेषां निरयपतनमेवावश्यमायातमित्यर्थः॥४२॥

प० टी०–लुप्ताः लोपं प्राप्ताः पिण्डक्रियाः श्राद्धाद्या उदकक्रियास्तर्पणाद्याः ॥ ४२ ॥

रा० टी०–कुलस्य चेति पुत्रपौत्रादिसन्तानस्य चेत्यर्थः। एषां कुलघ्नानां पितरः लुप्तपिण्डाः लुप्तोदकक्रियाश्च सन्तः नरके पतन्ति ॥ ४२ ॥

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ॥
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

त० टी०–संकरस्य कुलतत्पितृणामनर्थकारित्वमुक्तमिदानीं तद्धेतुभूतपुरुषाणामजस्रदुःखानुभूतिरूपं फलमाह—दोषैरिति द्वाभ्याम्। जातिधर्माः ब्राह्मणत्वक्षत्रियत्वादिजात्यसाधारणा वेदविहिताः कुलधर्माश्च शाश्वताः परमश्रेयःसाधनभूताः सदाचार्योपदिष्टा वेदवेदान्तनिर्णीता भगवदुपासनादिप्रधानाः कुलघ्नानां वर्णसंकरकारकैरेतैर्दोषैरुत्साद्यन्ते विनाश्यन्ते ॥ ४३ ॥

म० टी०–जातिधर्माः क्षत्रियत्वादिनिबन्धनाः कुलधर्माः असाधारणाश्च एतैर्दोषैरुत्साद्यन्ते उत्सन्नाः क्रियन्ते। विनाश्यन्त इत्यर्थः ॥ ४३ ॥

शं० टी०–इतोपि कुलघ्नानामेवानर्थं प्रतिपादयति–दोषैरिति। कृत्याकृत्यविचारमुत्सृज्य कामक्रोधलोभादिभिः कुलधर्मप्रवर्तकान् ये तु घ्नन्ति ते कुलघ्नास्तेषामेव वर्णसङ्करकारकैरेतैरुक्तैरेव दोषैः शाश्वताः श्रुतिमूलकाः स्वर्गापवर्गप्रदाः कुलधर्मा जातिधर्माः। चकारादाश्रमधर्माश्च उत्साद्यन्ते उत्सारिता भवन्ति ॥ ४३ ॥

श्री० टी०–उक्तं दोषमुपसंहरति–दोषैरिति द्वाभ्याम्। उत्साद्यन्ते लुप्यन्ते जातिधर्माः वर्णधर्माः कुलधर्माश्च। चकारादाश्रमधर्मादयोऽपि गृह्यन्ते ॥ ४३ ॥

स० टी०–ये त्वसाधारणा धर्माः स्वकुलस्य चिरन्तनाः॥ उत्साद्यन्ते जातिधर्माः क्षत्रियत्वादिहेतुकाः१–४३

भा० टी०–कुलघ्नानामेतैरुक्तैर्दोषैर्वर्णसङ्करस्य कारकैर्हेतुभिः जातिप्रयुक्ता धर्माः कुलप्रयुक्ताश्च धर्माः सर्वे शाश्वताश्चिरन्तनाः समुत्साद्यन्ते उत्सन्ना विनष्टाः क्रियन्ते ॥ ४३ ॥

प० टी०–उत्साद्यन्ते लुप्यन्ते ॥ ४३ ॥

रा० टी०–उक्तदोषमुपसंहरति–दोषैरितिद्वाभ्याम्। जातिधर्माः क्षत्रियत्वादिजातिप्रयुक्ता धर्माः कुलधर्माश्च शाश्वताः परम्पराप्राप्ताः ॥ ४३ ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ॥
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

त० टी०–धर्मोच्छेदात्तेषां नरके नियतं निवृत्तिवर्जितमजस्रमित्यर्थः। यथा स्यात्तथा वासो भवतीत्यतो महानर्थकारणं बन्धुवधकरं युद्धम् ॥ ४४ ॥

म० टी०–ततश्च प्रेतत्वपरावृत्तिकारणाभावान्नरकएव केवलं नितरां वासो भवति ध्रुवमित्यनुशुश्रुमेत्याचार्याणां मुखाद्वयं श्रुतवन्तो न स्वाभ्यूहेन कल्पयामइति पूर्वोक्तस्यैव दृढीकरणम् ॥ ४४ ॥

शं० टी०—यतः—**उत्सन्नेति**। तत उत्सन्ना विध्वंसिताः कुलजात्यादिधर्मा यैस्ते उत्सन्नकुलधर्मास्तेषामुत्सन्नकुलधर्माणां मनुष्याणां नरके रौरवादावनियतं युगमन्वन्तराद्यवधिराहित्यं यथा तथा वासः स्थितिर्भवतीत्यनुशुश्रुम। महर्षीणां वचनेभ्यः श्रुतवन्तो वयमित्यर्थः ॥ ४४ ॥

श्री० टी०—**उत्सन्नेति**। उत्सन्नाः कुलधर्मा येषामिति। उत्सन्नजातिधर्मादीनामप्युपलक्षणम्। अनुशुश्रुम श्रुतवन्तो वयम्। 'प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः कष्टान्निरयान् यान्ति दारुणान्' इत्यादिवचनेभ्यः ॥ ४४ ॥

स० टी०—ततः प्रेतत्वमुक्त्यर्थं कारणाभावतश्चिरम् ॥ नरके चैव वासः स्याद्ध्रुवं नातः सुनिष्कृतिः ॥ १ ॥ आचार्याणां मुखादित्थं श्रुतवन्तो वयं पुरा ॥ जनानां देवशत्रूणां प्राणादीनां वियोगतः ॥ २ ॥ यातनागमयितृत्वाद्यतस्त्वं श्रीजनार्दनः ॥ अतो मां प्रेरयस्येवं किं त्वां शरणमागतम् ॥ ३ ॥ ४४ ॥

भा० टी०—ततो यद्भवति तदाह—**उत्सन्नेति**। उत्सन्ना विनष्टाः कुलधर्मा जातिधर्माश्च येषां तेषां मनुष्याणां नरके नियतं नियमेन वासो भवतीत्यनुशुश्रुम शास्त्रादाचार्याच्च श्रुतवन्तः। कुलक्षयहेतुभूतयुद्धकर्तृणामस्माकं नरकपतनध्रौव्यात्तस्मान्निवृत्तिरेव श्रेयसीति नरकात्त्राणार्थिभिर्जनैः प्रार्थ्यमानं त्वामहमपि तत्त्राणाय प्रार्थयामीति ध्वनयन्नाह—हे जनार्दनेति ॥ ४४ ॥

प० टी०—अनुशुश्रुम श्रुतवन्तः ॥ ४४ ॥

रा० टी०—उत्सन्नकुलधर्माणां उत्सन्नजातिधर्माणां चेत्यपि ज्ञेयम्। अनुशुश्रुम 'प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपश्चात्तापिनः कष्टान्निरयान्यान्ति दारुणान्' इत्यादि वदद्भिर्वृद्धैः श्रुतवन्तः स्मः ॥ ४४ ॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ॥
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

त० टी०—यस्मादेवं तस्मादनर्थेऽर्थबुद्ध्या तदध्यवसायिनो वयं महामूढा इति पश्चात्तापं कुर्वन्नाह—अहो बत इति। बत इति खेदे। वयं महत्पापं कर्तुं व्यवसिताः निश्चयं कुर्वन्तः। यद्यस्माद्राज्यसुखलोभेन स्वजनं हन्तुमुद्यता इति ॥ ४५ ॥

म० टी०—बन्धुवधपर्यवसायी युद्धाध्यवसायोपि सर्वथा पापिष्ठतरः किं पुनर्युद्धमिति वक्तुं तदध्यवसायेनात्मानं शोचन्नाह—**अहो इति**। यदीदृशी ते बुद्धिः कुतस्तर्हि युद्धाभिनिवेशेनागतोसीति। न वक्तव्यं अविमृश्यकारितया मयैतद्व्यवसितस्य कृतत्वादिति भावः ॥ ४५ ॥

शं० टी०—"पश्यति पुत्रं पश्यति पौत्रम्। अपाम सोमममृता अभूम। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। दक्षिणावन्तो अमृतं भजन्ते" इत्यादिप्ररोचनश्रुतिभिर्विषयसुखाशावशो भूत्वा श्रौतादिकर्मणि प्रवृत्तो यस्तस्य जननमरणप्रवाहसम्पातएव निरन्तरो भवतीति मुमुक्षुणा सन्तप्तव्यमिति सूचयितुमर्जुनस्य कुलक्षयकृतदोषप्राप्तोऽनर्थ एवंलक्षणः कुलघ्नानां महत्तर इति निश्चित्य तज्जन्यसन्तापेनोच्यमानमार्तवचनप्रकारमाह—**अहो बतेति द्वाभ्याम्**। अहो इत्याश्चर्ये बतेति खेदे। महत् महत्तरं वाचा वक्तुमशक्यं पापं कर्तुं विवेकिनोऽपि वयं व्यवसिताः प्रयतामहे। अहो महदाश्चर्ये। बत हन्त। किं तन्महत्पापमित्यत आह—**यदिति**। राज्यसुखलोभेन राज्यलब्ध्या प्राप्तं यत्सुखं राजार्हं तत्र यो लोभो लाम्पट्यं तेन दोषेण स्वजनं पितृभ्रातृपुत्रादिकं शस्त्रैर्हन्तुमुद्यता उद्युक्ता वयमिति यदेतदेव महत्पापमित्यर्थः ॥ ४५ ॥

श्री० टी०—बन्धुवधाध्यवसायेन सन्तप्यमान आह—**अहो इति**। स्वजनं हन्तुमुद्यता इति। यत एतन्महत् पातकं कर्तुमध्यवसायं कृतवन्तो वयम्। अहो बत कष्टमित्यर्थः ॥ ४५ ॥

स० टी०—स्वकुलक्षयकारित्वात्पापिष्ठो युद्धनिश्चयः ॥ किं युद्धस्य पुनर्वाच्यं दुष्टत्वमितिभावनात् ॥ १ ॥ शोकमोहैकपाथोधौ निमग्नः प्राह दुःखितः ॥ अहो बतेति धर्मेऽपि पापबुद्धिमतो वचः ॥२ ॥ ४९ ॥

भा० टी०—राज्यप्राप्तिसुखोपभोगलोभेन युद्धार्थमत्रागमनमपि शोचनीयमित्याह—**अहो इति**।अहो बतेत्यत्यन्तखेदे । वयं महत्पापं कर्तुं व्यवसिता निश्चिताः यद्राज्यसुखलोभेन स्वजनं हन्तुमुद्यताः युद्धोद्योगेनात्रागताः ४९

प० टी०—**अहो बतेति** । बन्धुवधसंतापकथनम् ॥ ४९ ॥

रा० टी०—एवं बन्धुवधस्य दोषहेतुत्वाध्यवसायेन संतप्यमानोऽर्जुनआह—**अहो बतेति** । राज्यसुखलोभेन स्वजनं हन्तुं वयमुद्यता इति यत्तदेतन्महत्पापं कर्तुं व्यवसिता निश्चयवन्तो वयं । अहो बत महाकष्टमिति ॥ ४९ ॥

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

त० टी०—ननु बन्धुकृपामोहेन त्वयि निर्विण्णेऽपि परेषां भीमादीनां च निर्वेदाभावाद्राज्यहेतोस्ते परस्परं योत्स्यन्त एव। ततो युद्धाऽऽवेशेन धार्तराष्ट्रास्त्वामपि हनिष्यन्ति चेत्तदा त्वया किं कर्त्तव्यमिति चेत्तत्राह—यदीति । अप्रतीकारं प्राणत्राणाय प्रतीकारमकुर्वन्तमत एवाशस्त्रं मां यदि शस्त्रपाणयः धार्तराष्ट्राः लोभाऽऽविष्टचेतस्त्वेन नष्टज्ञाना रणे हन्युश्चेत्तर्हि अजस्रनरकफलाद्बन्धुवधात्तन्मरणं मे क्षेमतरं भवेदत्यर्थं हितं भवेत्। एतच्छरीरनाशेऽपि "किमहं पापमकरवं। किमहं साधु नाकरवम्" इत्येवं पश्चात्तापाभावादिति भावः ॥ ४६ ॥

म० टी०—ननु तव वैराग्येपि भीमसेनादीनां युद्धोत्सुकत्वाद्बन्धुवधो भविष्यत्येव त्वया पुनः किं विधेयमित्यतआह—**यदीति** । प्राणादपि प्रकृष्टो धर्मः प्राणभृतामहिंसा पापानिष्पत्तेः तस्माज्जीवनापेक्षया मरणमेव मम क्षेमतरं अत्यन्तं हितं भवेत् । प्रियतरमिति पाठेऽपि स एवार्थः । अप्रतीकारं स्वप्राणत्राणाय व्यापारमकुर्वाणं बन्धुवधाध्यवसायमात्रेणापि प्रायश्चितान्तररहितं वा । तथाच प्राणान्तप्रायश्चित्तेनैव शुद्धिर्भविष्यतीत्यर्थः ॥ ४६ ॥

शं० टी०—पापभीत्या युद्धादुपरतं त्वां तएव बलाद्धनिष्यन्तीत्यतआह—**यदि मामिति** । अप्रतीकारं कृतस्य प्रतिक्रिया प्रतीकारस्ताडयन्तं प्रतिताडनं पापभीत्या दययाचानुरक्त्या च तमकुर्वन्तमतएवाशस्त्रं परित्यक्तायुधं मां धार्तराष्ट्राः स्वयं शस्त्रपाणयः सन्तो रणे यदि हन्युर्निर्दाक्षिण्येन धर्मं त्यक्त्वा मां हिंस्युश्चेत्तद्धननं मम स्वधर्मनिष्ठस्य क्षेमतरमेव भवेत् क्षेमायैव भवति । अप्राप्तप्रापणं योगः । क्षेमस्तु स्थितरक्षणमितिन्यायेन स्थितस्य परिपालनं क्षेमस्तस्मादधिकः क्षेमतरः । कुलनाशनदोषतद्धेतुकनरकपातदुष्कीर्त्याद्यनर्थराहित्येन प्राक्तनपुण्यपुञ्जस्य क्षत्यभावएव क्षेमतरशब्दार्थस्तस्मादेव भवतीत्यर्थः ॥ ४६ ॥

श्री० टी०—एवं तप्तः सन्मृत्युमेवाशासान आह—**यदीति** । अकृतप्रतीकारं तूष्णीमुपविष्टं मां यदि हनिष्यन्ति तर्हि तद्धननं मम क्षेमतरमत्यन्तं हितं भवेत् । पापानिष्पत्तेः ॥ ४६ ॥

स० टी०—यदीदृशी मतिस्तेऽभूत्कुतस्तर्हि रणक्षितौ ॥ त्वं युद्धाभिनिवेशेनेहागतोऽसीति चेच्छृणु ॥ १॥ अविचार्य मयौद्धत्यं कृतं मौढ्यं ममेत्यहो ॥ नन्वेवं तव वैराग्ये भीमादीनां रणोत्सुका ॥ २ ॥ अस्ति तैरेव बन्धूनां वधः स्याद्यदि पापदः ॥ किं विधेयं त्वया तर्हीत्याशङ्क्याह यदीति च ॥३॥ अहिंसा प्राणिनां धर्मः प्रकृष्टः प्राणरक्षणात् । जीवनापेक्ष्यात्यन्तं हितं मे मरणं मतम् ॥ ४ ॥ स्वप्राणरक्षणे हेतुं व्यापारं मां मनागपि ॥ अकुर्वाणं रणे हन्युस्तदाऽहं स्यामकल्मषः ॥ ५ ॥ ४६ ॥

भा० टी०—ननु स्वरक्षणाय व्यापारमकुर्वाणं शस्त्रपरिग्रहरहितं त्वां धार्तराष्ट्रा रणे हन्युरिति चेत्तत्राह—**यदीति**। यत्तु 'ननु तव वैराग्येपि भीमसेनादीनां युद्धोत्सुकत्वात् तत्कृतो बन्धुवधो भविष्यत्येव त्वया पुनः किं कार्यमित्यत आह—यदीति' मधुसूदनसरस्वतिभिरुक्तं तदुपेक्ष्यं। मूले शङ्कानुगुणस्योत्तरस्याभावात्। क्षेमतरं हिततरं पापानिष्पत्तेः ॥ ४६ ॥

प० टी०—अथ रणोद्यमं त्यक्त्वा तूष्णीं स्थितं मां ते शस्त्रपाणयो हन्युस्तन्मे क्षेमतरं भवेत्। पापजनकं न भवतीत्यर्थः ॥ ४६ ॥

रा० टी०—एवं सन्तप्तः सन्मृतिमेवार्थयमानआह—**यदीति**। अकृतप्रतीकारमशस्त्रं तूष्णीमासीनं मां यदि शस्त्रपाणयो धार्तराष्ट्रा रणे हन्युस्तर्हि तद्धननं मे क्षेमतरम् अत्यन्तहितमेव भवेत्। बन्धुवधदोषाभावाद्रणे हननेन गतिसंभवश्चेति भावः ॥ ४६ ॥

सञ्जय उवाच—एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

त० टी०—ततः किं वृत्तमिति धृतराष्ट्रापेक्षायां सञ्जय उवाच—**एवमिति**। शोकेन संविग्नं व्यथितं मानसं यस्य सोऽर्जुनः सङ्ख्ये संग्रामे एवं पूर्वोक्तप्रकारेणोक्त्वा सशरं चापं विसृज्य रथोपस्थे रथोपर्युपवेशनस्थाने उपाविशत् ॥ ४७ ॥

इति श्रीमद्भगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवकाश्मीरिभट्टाचार्यविरचितायामर्जुनशोकवर्णनउपाद्घाताख्यः प्रथमोऽध्यायः ॥ १ ॥

म० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जय आह—**एवमिति**। सङ्ख्ये संग्रामे रथोपस्थे रथस्योपर्युपविवेश। पूर्वं युद्धार्थमवलोकनार्थं चोत्थितः सन् शोकेन संविग्नं पीडितं मानसं यस्य सः ॥ ४७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतीयपादशिष्यसूनुमधुसूदनसरस्वतीविरचितायां श्रीमद्भगवद्गीतागूढार्थदीपिकायां प्रथमोऽध्यायः ॥ १ ॥

शं० टी०—"परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादिश्रुत्युक्तरीत्या मुमुक्षुर्ब्राह्मणो विद्वान् कर्मणां कर्मफलानां तद्दातॄणां च क्लेशकरत्वानित्यत्वसंसारित्वादिदोषवत्त्वं कर्मकर्तॄणां च जननमरणप्रवाहपातानपायित्वं निरन्तरसंसारदुःखभाक्त्वाद्यनर्थपरम्परां च श्रुतिस्मृतियुक्तिभिर्निश्चित्य मोक्षैककामनया स्वयमसतो विरज्य सहसाधनं कर्म संन्यस्य मुक्त्यै सद्गुरुमुपसीदेदितीममर्थं सूचयितुमर्जुनस्य सदसद्विचारमसत्प्रवृत्तौ परितापमधर्मप्राप्ते राज्ये तत्सुखादौ दोषदर्शनं वैराग्यं च प्रतिपाद्येदानीं हिंसासाधनभूतशस्त्रसंन्यासं युद्धक्रियानिवृत्तिं च प्रतिपादयन्नध्यायमुपसंहरति—**एवमिति**। अर्जुनः सङ्ख्ये सत्येवं 'धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्' इत्येवंप्रकारकं वचनमुक्त्वा शोकसंविग्नमानसः स्वजनविनाशं निमित्तीकृत्य समुत्पन्नेन शोकेन संविग्नं मानसं यस्य स तथोक्तः सन्सशरं चापं विसृज्य नाहं योद्धुं शक्ष्यामीति रथोपस्थे रथस्योपर्युपाविशदुपविष्टवानित्यर्थः। एतेन सदसद्विवेकवतः परमार्थापेक्षिणो मुमुक्षोरनित्यात्स्वर्गादिसुखादसतः सकाशाद्विरज्य तत्साधनं

सर्वं संन्यस्तव्यमिति सूचितं भवति। तथाच श्रुतिः " परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात " इति " यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति ॥ ४७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशङ्करानन्द-सरस्वतीकृतौ गीतातात्पर्यबोधिन्यां प्रथमोऽध्यायः ॥ १ ॥

श्री० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जय उवाच—**एवमिति**। सङ्ख्ये सङ्ग्रामे रथोपस्थे रथस्योपरि उपाविशत् उपविवेश। शोकेन संविग्नं प्रकम्पितं मानसं चित्तं यस्य सः ॥ ४७ ॥

इति श्रीमद्भगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामिविरचितायां प्रथमोऽध्यायः ॥ १ ॥

स० टी०—ततः किं वृत्तमित्यत्राकाङ्क्षायामाह सञ्जयः ॥ सङ्ग्रामे पूर्वमेवासौ युद्धार्थं दर्शनाय च ॥१॥ भीष्मादीनां रथस्योर्ध्वभागे पार्थः समुत्थितः ॥ शोकेनाविष्टभावत्वात्पीडितं यस्य मानसम् ॥ २ ॥ सबाणं धनुरुत्सृज्य रथोपस्थ उपाविशत् ॥ ३ ॥ ४७ ॥ श्लोकानामादितः समष्ट्यङ्काः ॥ २७२ ॥

मेघश्यामोऽवदातः स्मितमधुरमुखस्तोत्रवेत्रैकपाणिर्बीभत्सोः सम्मुखेऽजः श्रुतिसुरभिपयोदोहनार्थं प्रवृत्तः। लोकानुद्धर्तुकामः श्रुतिविशदयशा भक्तिवश्योऽमलात्मा स्वामी सर्वस्य कृष्णो वसतु मम मतौ ब्रह्मविद्याश्रितोऽसौ ॥

इति भावप्रकाशे श्रीसदानन्दविदा कृते ॥ शास्त्रोपोद्घातनामाऽयं प्रथमः पूर्णतां गतः ॥ १ ॥

भा० टी०—एतद्वृत्तान्तं सञ्जयो धृतराष्ट्रं प्रत्यावेदितवानित्याह—**एवमिति**। एवमुक्त्वा उक्तेन प्रकारेण श्रीकृष्णं प्रति विज्ञापनं कृत्वा पूर्वं शूराणामवलोकनायोत्थितोऽर्जुनः परया कृपयाऽऽविष्टः। शोकग्रहणं मोहस्याप्युपलक्षणार्थम्। शोकमोहाभ्यां सम्यगुद्विग्नं मनो यस्य स एतादृशः सन् संख्ये संग्रामभूमिमध्ये शरेण सहितं चापं कार्मुकं विसृज्य त्यक्त्वा रथोपस्थे रथस्योपरि उपाविशत् उपविष्टवानित्यर्थः ॥ ४७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यबालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपति-विदुषा विरचितायां गीताभाष्योत्कर्षदीपिकायां प्रथमोऽध्यायः ॥ १ ॥

प० टी०—ततः किं वृत्तमित्याह सञ्जयः—**एवमुक्त्वेति**। सङ्ख्ये रथोपस्थे रथोपरि उपाविशत् उपविवेश। शोकेन संविग्नं कम्पितं मानसं यस्य सः ॥ ४७ ॥

अथाध्यायतात्पर्यम्।

सद्योमोक्षाधिकारी स भवति खलु यः पापभीरुर्वितृष्णस्तादृक्पार्थोऽस्ति तस्मान्निजकुलदमनाद्राज्यभोगान्निवृत्तः। मत्वेवं यादवेशोऽप्यनुपदमकरोद् ब्रह्मविद्योपदेशं भूभृद्धर्मानुरूपं तदिदमभिहितं त्वादिमाध्यायकृत्यम् ॥ १ ॥

इति श्रीमद्दैवज्ञपण्डितवर्यसूर्यविरचितायां श्रीमद्भगवद्गीताटीकायां परमार्थ-प्रपायामर्जुनविषादो नाम प्रथमोऽध्यायः ॥ १ ॥

रा० टी०—ततः किं जातमिति धृतराष्ट्रहार्दं परिहरति सञ्जयः—**एवमिति**। सङ्ख्ये रणे रथोपस्थे रथमध्ये उपाविशत्। कथं शोकेन कम्पितचित्तः सन् सशरं चापं विसृज्येति ॥ ४७ ॥

इति श्रीमद्गीतार्थसंग्रहे श्रीराघवेन्द्रयतिकृते प्रथमोध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ॥ २ ॥

**सञ्जय उवाच—तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् ॥
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥**

त० टी०—एवं बन्धुवधपापभयेन युद्धादुपरतमर्जुनं श्रुत्वा निवृत्तपुत्रराज्यापायभयं तदुत्तरवृत्तान्तं जिज्ञासुं धृतराष्ट्रं प्रति सत्यवादी सञ्जय उक्तवानित्याह वैशम्पायनः—सञ्जय उवाचेति । उक्तप्रकारेण यथा मयोक्तं तथा स्वाभाविक्या कृपयाऽऽविष्टमतएव विषीदन्तं विषादं कुर्वन्तमतएवाश्रुपूर्णाकुलेक्षणम् अश्रुभिः पूर्णेऽतएवाकुले ईक्षणे यस्य तमर्जुनं मधुसूदन इदं वक्ष्यमाणं वाक्यमुवाच । दैत्यराजस्य मधोरपि सूदनो निहन्ता वासुदेवो क्षत्रियरूपेणावतीर्णो दुष्टदैत्यान् पृथ्वीभारभूतान् सर्वान्हनिष्यतीति मधुसूदनशब्दाभिप्रायः ॥ १ ॥

म० टी०—अहिंसा परमो धर्मो भिक्षाशनं चेत्येवंलक्षणया बुद्ध्या युद्धवैमुख्यमर्जुनस्य श्रुत्वा स्वपुत्राणां राज्यमप्रचलितमवधार्य स्वस्थहृदयस्य धृतराष्ट्रस्य हर्षनिमित्तां ततः किंवृत्तमित्याकाङ्क्षामपनिनीषुः सञ्जयः तं प्रत्युक्तवानित्याह वैशम्पायनः—**तमिति।**कृपा ममैत इति व्यामोहनिमित्तः स्नेहविशेषः तया आविष्टं स्वभावसिद्धया व्याप्तं । अर्जुनस्य कर्मत्वं कृपायाश्च कर्तृत्वं वदता तस्याः आगन्तुकत्वं व्युदस्तं । अतएव विषीदन्तं स्नेहविषयीभूतस्वजनविच्छेदाशङ्कानिमित्तः शोकापरपर्यायश्चित्तव्याकुलीभावो विषादस्तं प्राप्नुवन्तं। अत्र विषादस्य कर्मत्वेनार्जुनस्य कर्तृत्वेन तस्यागन्तुकत्वं सूचितं । अतएव कृपाविषादवशादश्रुभिः पूर्णे आकुले दर्शनाक्षमे चेक्षणे यस्य तं । एवमश्रुपातव्याकुलीभावाख्यकार्यद्वयजनकतया परिपोषं गताभ्यां कृपाविषादाभ्यामुद्विग्नं तमर्जुनमिदं सोपपत्तिकं वक्ष्यमाणं वाक्यमुवाच मधुसूदनः नतूपेक्षितवान् । मधुसूदनइति स्वयं दुष्टनिग्रहकर्तार्जुनं प्रत्यपि तथैव वक्ष्यतीति भावः ॥ १ ॥

शं० टी०—सदसद्विवेकेन तज्जनिततीव्रवैराग्येण मुमुक्षया च संन्यस्तसर्वकर्मणो मोक्षैककामस्य ब्राह्मणस्य सदसद्विवेकवैराग्यादिसाधनसंपत्तिसिद्धेर्ब्राह्मणत्वसिद्धेश्च साफल्याय " अथातो ब्रह्मजिज्ञासा " इति " आत्मा वा अरे द्रष्टव्यः श्रोतव्यः " इति " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् " इत्यादिश्रुत्युक्तप्रकारेण सद्गुरुं श्रोत्रियं ब्रह्मनिष्ठमुपसद्य ब्रह्मविचारः कर्तव्यइतीममर्थं सूचयितुं सदसद्विवेकिनोऽर्जुनस्य परमार्थापेक्षिणः 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इतीश्वरप्रतिपत्तिं तस्मै ईश्वरेण कृतमात्मानात्मज्ञानोपदेशप्रकारं च प्रतिपादयितुं द्वितीयोऽध्याय आरभ्यते । तत्रादौ "सोहं भगवः शोचामि तं मा भगवाञ्शोकस्य पारं तारयतु" इतिश्रवणात्संसारदुःखेन शोचन्तं स्वशरणं गतं मुमुक्षुमभयवचनपूर्वकमभिमुखीकृत्य गुरुस्तत्त्वं बोधयेदिति सूचयितुं तथा शोचन्तमर्जुनं विवेकवचनैर्भगवान् बोधयामासेति वक्तुं धृतराष्ट्रं प्रति सञ्जयउवाच—**तमिति।** तथोक्तरीत्या मदीया एते भ्रातृपुत्रादयो युधि म्रियन्तइति मरिष्यमाणस्वजनेषु कृपयाविष्टमतएव विषीदन्तमतएवाश्रुपूर्णाकुलेक्षणं तमर्जुनं दृष्ट्वा मधुसूदनः मध्वाख्यमसुरं सूदयतीति मधुसूदनः । यद्वा सर्वेषां देहे मधुवदिष्टत्वान्मधुरहङ्कारस्तमात्मप्रकाशनेन सूदयतीति मधुसूदनः । यद्वा "इयं पृथिवी सर्वेषां भूतानां मधु" इति श्रवणान्मधुः स्वरूपानन्दस्तं स्वापरोक्षवतां सूदयति स्फोरयतीति मधुसूदनः श्रीकृष्ण इदं वक्ष्यमाणलक्षणं वाक्यमुवाच । अत्र कृपयाविष्टमित्युक्तिर्मुमुक्षोः कृपादिभिरष्टभिरात्मगुणैर्भावितव्यमिति सूचनार्थं कृपापदं क्षान्त्यादीनामुपलक्षणार्थं । ' दया सर्वभूतेषु क्षान्तिरनसूया शुचिरनायासो माङ्गल्यमकार्पण्यमस्पृहा चेत्यष्टावात्मगुणाः ' इति गौतमोक्तैरष्टभिरात्मगुणैर्विशिष्टस्यैव सम्यक् ज्ञानं जायते " सोहं भगवः शोचामि " इति

श्रवणात्कथं संसारसागरं तरिष्यामीति शोचतः परितपतएव गुरुरीश्वरश्च प्रसीदतीति सूचयितुं विषीदन्तमश्रुपूर्णाकुलेक्षणमित्युक्तं मुमुक्षोर्गुरुमुपसिषीदिषोरेतैरुक्तगुणैर्भवितव्यमित्यनेन ज्ञापितं भवति ॥ १ ॥

श्री० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जय उवाच—**तं तथेति** । अश्रुभिः पूर्णे आकुले ईक्षणे यस्य तम् । तथोक्तप्रकारेण विषीदन्तमर्जुनं प्रति मधुसूदन इदं वाक्यमुवाच ॥ १ ॥

स० टी०—पीतं वासो दधानं विजयरथगतं ब्रह्मरुद्रादिवन्द्यं भूमेर्भारं जिहीर्षुं नवजलदरुचं शङ्खचक्राब्जहस्तम् ॥ पार्थव्याजेन लोकं निगममतसृतौ योजयन्तं महेशं ध्यायेन्नित्यं सुसेव्यं सुजनमतिगृहं कृष्णमानन्दकन्दम् ॥ १ ॥ लक्ष्मीपतिः कृष्णसखो नियन्ता ब्रह्मादिलोकस्य च नन्दसूनुः ॥ गोपीप्रियो गोपवयस्य आत्माऽखिलस्य कृष्णो मतिदो ममास्तु ॥ २ ॥ अहिंसा परमो धर्मो महान्दोषः कुलक्षये ॥ आकाङ्क्षा मे न राज्यादावर्जुनस्येति यन्मतम् ॥ ३ ॥ धृतराष्ट्रस्तदाकर्ण्य ममत्वाभिनिवेशतः ॥ राज्यदार्ढ्यं स्वपुत्राणामवधार्यातिहर्षतः ॥ ४ ॥ अभूत्स्वस्थमना इत्थमवलोक्याह सञ्जयः ॥ शृणु राजन्यथावृत्तं समाधानेन चेतसा ॥ ५ ॥ व्यामोहो यो ममैतेऽहमेतेषामिति दुःखदः ॥ स्नेहभेदः कृपा सोक्ता तयाऽभ्यासस्वरूपया ॥ ६ ॥ स्वभावसिद्धया व्याप्तं शोचन्तं तं तथाविधम् ॥ तद्वशादश्रुभिः पूर्ण आकुले दर्शनाक्षमे ॥ ७ ॥ ईक्षणे यस्य तं मोहादुद्विग्नं चार्जुनं प्रति ॥ इदं सयुक्तिकं वाक्यं वक्ष्यमाणमुवाच ह ॥ ८ ॥ नतूपेक्षितवानीशो यतोऽसौ मधुसूदनः ॥ स्वयं दुष्टनिहन्ताऽजस्तथा वक्ष्यति तं प्रति ॥ ९ ॥ १ ॥

भा० टी०—एवं रथोपस्थ उपविष्टमर्जुनं भगवान्किमुक्तवानित्याकाङ्क्षायां सञ्जय उवाच—**तमिति** । यत्तु 'अहिंसा परमो धर्मो भिक्षाशनं चेत्येवं लक्षणया बुद्ध्या युद्धवैमुख्यमर्जुनस्य श्रुत्वा स्वपुत्राणां राज्यमप्रचलितमित्यवधार्य स्वस्थहृदयस्य धृतराष्ट्रस्य हर्षनिमित्तां ततः किं वृत्तमित्याकाङ्क्षामपनिनीषुः सञ्जय उवाचेति' तत्तु पूर्वग्रन्थविरोधादुपेक्ष्यं। तमर्जुनं तथा पूर्वोक्तेन प्रकारेण कृपया स्नेहजन्यया ऽऽविष्टं व्याप्तं अश्रुभिः पूर्णे आकुले दर्शनाक्षमे ईक्षणे नेत्रे यस्य तं । विषादं बन्धुवियोगाशङ्कानिमित्तं शोकं प्राप्नुवन्तमिदं वक्ष्यमाणं वाक्यं वक्तुं योग्यं वचनमुवाच नतूपेक्षितवानित्यर्थः । मध्वादिदुष्टसूदनो भीमादिद्वारा दुर्योधनादिदुष्टसूदनार्थोवाचेति सूचयन्नाह—मधुसूदन इति ॥ १ ॥

प० टी०—ततः किं वृत्तमित्यपेक्षायां सञ्जय उवाच—**तं तथेति** । कृपयाविष्टं स्वजनकृपया व्याप्तं विषीदन्तं विषादं प्राप्तमतएवाश्रुपूर्णे अक्षिणी यस्य तं प्रति मधुसूदनः स्वयं दैत्यहन्ता कृष्ण उवाच ॥ १ ॥

श० टी०—ततः किं जातमिति धृतराष्ट्रस्यापेक्षायां सञ्जय उवाच—**तं तथेति** ॥ १ ॥

श्रीभगवानुवाच—कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ॥
अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन ॥ २ ॥

त० टी०—भगवद्वाक्यमवतारयति—श्रीभगवानुवाचेति। स्वाभाविकैश्वर्यादिषड्गुणानां नित्याश्रयभूतो भगवच्छब्दवाच्यो वासुदेवः स्वभक्तहितं चिकीर्षुः—कुतस्त्वामिति द्वाभ्यामुक्तवानित्यर्थः । हे अर्जुन ! बन्धुकृपाव्यामोहकृताश्रुपातपुरःसरं स्वधर्मवैमुख्यकरं युद्धात्पराङ्मुखत्वमिदं कश्मलं मानसं कथमनार्यैरधर्मवद्भिर्जुष्टं सेवितमतएवास्वर्ग्यं स्वर्गविरोधि अकीर्तिकरं च विषमे शोकानर्हस्थाने सङ्ग्रामे त्वा त्वां सर्वक्षत्रियप्रवरस्य पाण्डोः पुत्रं कुतो हेतोरुपस्थितं प्राप्तम् ॥ २ ॥

म० टी०—तदेव भगवतो वाक्यमवतारयति—श्रीभगवानुवाचेति। 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भगइतीङ्गना ' समग्रस्येति प्रत्येकं संबन्धः । मोक्षस्येति तत्साधनस्य ज्ञानस्य इङ्गना संज्ञा । एतादृशं समग्रमैश्वर्यादिकं नित्यमप्रतिबन्धेन यत्र वर्तते स भगवान्। नित्ययोगे मतुप्।

तथा ' उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति । ' तत्र भूतानामिति प्रत्येकं संबध्यते। उत्पत्तिविनाशशब्दौ तत्कारणस्याप्युपलक्षकौ । आगतिगती आगामिन्यौ सम्पदापदौ । एतादृशो भगवच्छब्दार्थः श्रीवासुदेवएव पर्यवसितइति । तथोच्यते । इदं स्वधर्मात्पराङ्मुखत्वं कृपान्व्यामोहाश्रुपातादिपुरःसरं कश्मलं शिष्टगर्हितत्वेन मलिनं विषमे सभये स्थाने त्वा त्वां सर्वक्षत्रियप्रवरं कुतो हेतोः समुपस्थितं प्राप्तं । किं मोक्षेच्छातः किंवा स्वर्गेच्छातः अथवा कीर्तीच्छातः इति किंशब्देनाक्षिप्यते । हेतुत्रयमपि निषेधति त्रिभिर्विशेषणैरुत्तरार्धेन। आर्यैर्मुमुक्षुभिर्न जुष्टमसेवितं । स्वधर्मैराशयशुद्धिद्वारा मोक्षमिच्छद्भिरपक्वकषायैर्मुमुक्षुभिः कथं स्वधर्मस्त्याज्यइत्यर्थः । संन्यासाधिकारी तु पक्वकषायोग्रे वक्ष्यते । अस्वर्ग्यं स्वर्गहेतुधर्मविरोधित्वात् न स्वर्गेच्छया सेव्यं । अकीर्तिकरं कीर्त्यभावकरमपकीर्तिकरं वा । न कीर्तीच्छया सेव्यं । तथाच मोक्षकामैः स्वर्गकामैः कीर्तिकामैश्च वर्जनीयं । तत्कामएव त्वं सेवसइत्यहोऽनुचितचेष्टितं तवेति भावः ॥ २॥

शं० टी०—श्रीभगवानुवाच—कुतइति द्वाभ्याम् । हे अर्जुन शुद्धस्वभाव ! विषमे सङ्कटे शत्रुभिः शस्त्रैर्हन्तुं प्रवृत्तसमये इदं कश्मलं 'एतान्न हन्तुमिच्छामि । यदि मामप्रतीकारम्' इत्याद्युक्तलक्षणश्चित्तव्यामोहः कुतः कस्माद्धेतोस्त्वा त्वां समुपस्थितं प्राप्तं । कालदोषात्कर्मदोषाद्वा कस्मादयं भ्रमः शुद्धस्वभावस्य विवेकिनस्तव प्राप्तइत्यर्थः । हे पार्थ ! अनार्यजुष्टमनार्यैरार्यशिक्षावर्जितैः पामरैर्जुष्टं सेवितमस्वर्ग्यं स्वर्गाप्रापकं दुर्गतिकारणमिह लोकेप्यकीर्तिकरम् ॥ २ ॥

श्री० टी०—तदेव वाक्यमाह—श्रीभगवानुवाच—कुतइति । कुतो हेतोः त्वा इति त्वाम् विषमे सङ्कटे इदं कश्मलं समुपस्थितं अयं मोहः प्राप्तः । यत आर्यैरसेवितमस्वर्ग्यमधर्म्यमयशस्करं च ॥ २ ॥

स० टी०—तदेव सञ्जयो वाक्यमवतारयति स्फुटम् ॥ समग्रैश्वर्यसम्पन्न उवाच भगवानिति ॥ १ ॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥ २ ॥ नित्यमप्रतिबन्धेन वर्तते यत्र षड्विधम् ॥ समग्रैश्वर्यमुख्यं तद्भगाख्यं भगवानिति ॥ ३ ॥ शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते ॥ श्रीकृष्णे भगवच्छब्दः सर्वकारणकारणे ॥ ४ ॥ अन्यत्र भगवच्छब्द उपचारेण वर्तते ॥ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥ ५ ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ ६ ॥ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ इदं स्वधर्माद्वैमुख्यं व्यामोहैकनिबन्धनम् ॥ ७ ॥ शिष्टैर्विगर्हितत्वाच्च मलिनं कुत आगतम् ॥ सङ्ग्रामे क्षत्रियश्रेष्ठं त्वा विमृश्यैव कारणम् ॥ ८ ॥ मोक्षेच्छातोऽथवा स्वर्गकामतो वा किमागतम् ॥ किं कीर्तिकामतो वा त्वां किंशब्देनेति सूचितम् ॥ ९ ॥ त्रिभिर्विशेषणैर्हेतुंस्त्रीनेवेशो निरस्यति । आर्यैर्मुमुक्षुभिर्नैतत्सेवितं शुद्धिमिच्छुभिः ॥ १० ॥ यतः स्वधर्मत्यागेन चित्तशुद्धिर्न जायते ॥ न वा स्वर्गेच्छया सेव्यं स्वर्गहेतुविरोधतः ॥ ११ ॥ स्वधर्मत्यागिनां स्वर्गः स्वप्नेऽप्यत्यन्तदुर्लभः ॥ न वा कीर्तीच्छया सेव्यं कीर्तिनाशकरं यतः ॥ १२ ॥ तस्मात्स्वधर्मवैमुख्यं वर्जनीयं शुभेप्सुभिः ॥ मोक्षकीर्तिफलेप्सुस्त्वं किमहो सेवसे मलम् ॥ १३ ॥ २ ॥

भा० टी०—किं तद्वाक्यमित्यत आह श्रीभगवान्—कुतइति । कुतो हेतोः त्वा त्वां शूरशिरोमणिमिदं स्वधर्मभूताद्युद्धात्पराङ्मुखत्वं कश्मलं मलिनं विषमेऽसमये समुपस्थितं संप्राप्तं यतोऽनार्यैर्दुष्टैर्जुष्टं सेवितम् । अतएव दृष्टादृष्टफलरहितमित्याह—अस्वर्ग्यमकीर्तिकरमिति विशेषणद्वयेन स्वर्गानर्हं प्रत्यवायजनकत्वात् । अकीर्तिकरमयशस्यं किं मोक्षेच्छातः किंवा स्वर्गेच्छातः अथवा कीर्तीच्छातः इति किंशब्देनाक्षिप्यते । हेतुत्रयमपि निषेधयति त्रिभिर्विशेषणैरुत्तरार्धेन । आर्यैर्मुमुक्षुभिर्न जुष्टमसेवितामिति केचित् । न आर्यैर्जुष्टं यत्त्वार्यैरजुष्टमिति विग्रहो दर्शितस्तत्त्वर्थैक्येपि पदव्युत्क्रमदोषादुपेक्ष्यमित्यन्ये । स्वधर्मयुद्धं कुर्वन्मलात्मकं पापं न प्राप्स्यसीति द्योतय-

न्नाह–अर्जुनेति । अर्जुननाम्ना प्रख्यातस्य तव नैतद्युक्तमित्येके । हे अर्जुन स्वच्छस्वभाव ! तव नैतद्युक्तमिति भाव इत्यन्ये ॥ २ ॥

प० टी०–कुत इति । विषमे संग्रामसङ्कटे त्वा त्वामिदं कश्मलमज्ञानं कुतो हेतोः समुपस्थितं प्राप्तम् । अथ तत्स्वरूपमाह–अनार्यजुष्टमिति । अनार्यजुष्टं न आर्या अनार्यास्तैर्जुष्टं सेवितं आर्यैरसेवितम् । एतद्विषयमज्ञानं कश्मलमिति ज्ञात्वा शिष्टैस्त्यक्तमित्यर्थः । यत इहामुत्र च गर्हितम् । तत्कथमित्याह–अकीर्तिकरमस्वर्ग्यं चेति ॥ २ ॥

रा० टी०–उक्तदिशा कृपयाविष्टमेवं विषण्णमर्जुनं भगवानुवाच–कुत इत्यादिद्वाभ्यां श्लोकाभ्यां । हे अर्जुन ! कुतो हेतोस्त्वा त्वां विषमे सङ्कटे इदं कश्मलं उपस्थितम् अयं मोहः प्राप्तः । यतः आर्यैरसेवितं । अस्वर्ग्यं स्वर्गविरोधि अयशस्करं च ॥ २ ॥

क्लैव्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ॥
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

न० टी०–हे पार्थ ! पृथया आराधितदेवराजप्रसादाल्लब्धस्तद्वीर्यातिशयसम्पन्नः पुत्रस्त्वं क्लैव्यं क्लीबभावं तेजोवीर्यादिनाशकं मा गमः । एतत्कश्मलं क्लैव्यं च त्वयि साक्षान्महादेवतोषकार्यद्भुतयुद्धकारिणि नोपपद्यते । यच्च त्वयोक्तं ' नच शक्नोम्यवस्थातुं भ्रमतीव च मे मनः' इति तत् क्षुद्रमतितुच्छं । यतो हृदयदौर्बल्यं हृदयस्य दौर्बल्यं कृपामोहजन्यं कातर्यं त्यक्त्वा कुलोचितधैर्यावलम्बनेनापनीयोत्तिष्ठ । तत्र हेतुगर्भितसम्बोधनमाह–हे परन्तप ! परान् शत्रूंस्तापयतीति तथा । सर्वान् शत्रून् जेष्यतीति जन्मसमये देववाण्याऽप्युक्तत्वादिति भावः ॥ ३ ॥

म० टी०–ननु वन्धुसेनावेक्षणजातेनाधैर्येण धनुरपि धारयितुमशक्नुवता मया किं कर्तुं शक्यमतआह–क्लैव्यमिति । क्लैव्यं क्लीबभावमधैर्यमोजस्तेजादिभङ्गरूपं मास्मगमः मागाः । हे पार्थ पृथातनय ! पृथया देवप्रसादलब्धे तत्तनयमात्रे वीर्यातिशयस्य प्रसिद्धत्वात् । पृथातनयत्वेन क्लैव्यायोग्यइत्यर्थः । अर्जुनत्वेनापि तदयोग्यत्वमाह–नैतदिति । त्वयि अर्जुने साक्षान्महेश्वरेणापि सह कृताहवे प्रख्यातमहाप्रभावे नोपपद्यते न युज्यते । एतत् क्लैव्यमित्यसाधारण्येन तदयोग्यत्वानिर्देशः । ननु 'न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः' इति पूर्वमेव मयोक्तमित्याशङ्क्याह–क्षुद्रमिति । हृदयदौर्बल्यं मनसो भ्रमणादिरूपमधैर्यं क्षुद्रत्वकारणत्वात् क्षुद्रं सुनिरसनं वा त्यक्त्वा विवेकेनापनीय उत्तिष्ठ युद्धाय सज्जो भव । हे परंतप ! परं शत्रुं तापयतीति तथा संबोध्यते । हेतुगर्भम् ॥ ३ ॥

शं० टी०– क्लैव्यं क्लीबभावं कातर्यं शूराणामनर्हं त्वं मास्मगमः मा भजस्व । राजधर्मज्ञे रणपण्डिते त्वयि नैतदुपपद्यते । वीरतमस्तुत्यस्य तव नैतद्युक्तमित्यर्थः । हे परन्तप शत्रुकर्शन ! क्षुद्रं क्षुद्रत्वकारणं निकृष्टत्वापादकं हृदयदौर्बल्यमधैर्यं मनःकालुष्यमेतत्त्यक्त्वोत्तिष्ठ । युद्धाय सन्नद्धो भवेत्यर्थः ॥ ३ ॥

श्री० टी०–तस्मात्–क्लैव्यमिति । हे पार्थ ! क्लैब्यं कातर्यं मास्मगमः न प्राप्नुहि । यतस्त्वय्येतन्नोपपद्यते योग्यं न भवति क्षुद्रं तुच्छं हृदयदौर्बल्यं कातर्यं त्यक्त्वा युद्धायोत्तिष्ठ । हे परन्तप शत्रुतापन ॥ ३ ॥

स० टी०–नन्वहं त्यक्तधैर्योऽस्मि न धनुर्धारणे क्षमः ॥ स्वजनावेक्षणेनैव क युद्धं चातिदुःसहम् ॥ १ ॥ इत्याशङ्क्याह मागच्छाऽधैर्यं तेजःसुखापहम् ॥ देवप्रसादात्पृथया लब्धस्त्वं वीर्यवत्तरः ॥ २ ॥ साक्षान्महेश्वरेणापि कृतयुद्धेऽर्जुने त्वयि ॥ महाप्रभावे कातर्यं न चैतद्युज्यते मलम् ॥ ३ ॥ क्षुद्रताहेतुकं बुद्धेरधैर्यं स्वविवेकतः ॥ त्यक्त्वा युद्धाय शीघ्रं त्वं सज्जीभव रणक्षितौ ॥ ४ ॥ यतस्त्वं शत्रुसन्तापकारी शूरतमो मतः ॥ ५ ॥ ३ ॥

भा० टी०—एवं श्रुत्वाऽपि क्लैब्यमत्यजन्तमर्जुनं पुनराह—**क्लैब्यमिति** । क्लैब्यं 'दृष्ट्वेमं स्वजनं कृष्ण' इत्यादिना प्रदर्शितमधैर्यं मास्म गमः मागाः। नैवाङ्गीकुर्वित्यर्थः। यत एतन् क्लैब्यं त्वयि प्रथितप्रभावेऽर्जुने नोपपद्यते उपपन्नं न भवति तस्मात्क्षुद्रं क्षुद्रताया लघुतायाः सम्पादकं हृदयस्य दौर्बल्यं दुर्बलभावं निर्वीर्यत्वं त्यक्त्वोत्तिष्ठ युद्धायोद्युक्तो भव। मत्पितृष्वसृपृथातनये त्वयि मत्स्वभाव उचित इति ध्वनयन्नाह—हे पार्थेति ! पृथया देवप्रसदालब्धे तत्तनयमात्रे त्वयि वीर्यातिशयस्य प्रसिद्धत्त्वात्। पृथातनयत्वेन त्वं क्लैब्यायोग्य इति केचित्। शत्रूंस्तापय न स्वजनान् स्वाहितकर्तॄनिति कथयितुं परन्तपेति ॥ ३ ॥

प० टी०—तस्मात्किं कर्तव्यमिति भगवानाह—**क्लैब्यमिति** । भो पार्थ ! त्वं क्लैब्यं पुमर्थविधुरत्वम् 'यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः' इत्यादिवाक्यप्रकाशितं मा स्म गमः न प्राप्नुहि । यत एतत्त्वयि गाण्डीवधन्वानि न युज्यते । तर्हि किं कर्तव्यमिति चेत्तत्राह—**क्षुद्रमिति** । भो परन्तप शत्रुतापन ! क्षुद्रमल्पविचाररूपं हृदयदौर्बल्यं कल्पितममतोत्पन्नशोकरूपं त्यक्त्वा युद्धायोत्तिष्ठ ॥ ३ ॥

रा० टी०—तस्मात्क्लैव्यं कातर्यं मास्म गमः नैव प्राप्नुहि । हे पार्थ ! एतत्क्लैव्यं त्वयि नोपपद्यते योग्यं न भवति । क्षुद्रं लाघवकरं हृदयदौर्बल्यं कातर्यं त्यक्त्वोत्तिष्ठ उत्थाय सन्नद्धो भव । हे परन्तप परं शत्रुं तापयतीति शत्रुतापन ! " द्विषत्परयोस्तापेः " इति खचि " खित्यनव्यस्य " इति मुमागमः ॥ ३ ॥

अर्जुन उवाच—कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ॥
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

त० टी०—ननु भगवदुक्तं सर्वं सत्यं तथापि सत्कुलीनेन परम्पराप्राप्तस्वधर्माविरोध्येव युद्धं कर्त्तव्यं, नतु धर्मनाशकमित्यभिप्रायवानर्जुनः श्रीकृष्णं प्रत्युक्तवानित्याह सञ्जयः—अर्जुन उवाचेति । तदेव वाक्यमाह—कथमिति । भीष्मं पितामहं द्रोणं चाचार्यं सङ्ख्ये सङ्ग्रामेऽहं कथं प्रतियोत्स्यामि । न कथमपीत्यर्थः । तत्रापीषुभिः । याभ्यां सह वाचापि युद्धमनुचितं किं पुनः प्राणहारिभिः शरैरित्यर्थः । कुतो यतस्तौ पूजार्हौ दुर्योधनादिभिरस्मद्धर्मनाशाय पुरस्कृतौ 'गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः ॥ अरण्ये निर्जले स्थाने स भवेद्ब्रह्मराक्षसः' इत्यादिशास्त्रोक्तं गुरोर्वचनावज्ञाचरणमपि महादोषं जानद्भिरस्माभिः कथं तन्निधननिमित्ते युद्धे वर्तितव्यमिति भावः ॥ ४ ॥

म० टी०—ननु नायं स्वधर्मस्य त्यागः शोकमोहादिवशात् किन्तु धर्मत्वाभावादधर्मत्वाच्चास्य युद्धस्य त्यागो मया क्रियतइति भगवदभिप्रायमप्रतिपद्यमानस्यार्जुनस्याभिप्रायमवतारयति—**कथमिति** । भीष्मं पितामहं द्रोणं चाचार्यं सङ्ख्ये रणे इषुभिः सायकैः प्रतियोत्स्यामि प्रहरिष्यामि कथं । न कथंचिदपीत्यर्थः। यतस्तौ पूजार्हौ कुसुमादिभिरर्चनयोग्यौ । पूजार्हाभ्यां सह क्रीडास्थानेऽपि वाचापि हर्षफलकमपि लीलायुद्धमनुचितं किं पुनर्युद्धभूमौ शरैः प्राणत्यागफलकं प्रहरणमित्यर्थः । मधुसूदनारिसूदनेति संबोधनद्वयं शोकव्याकुलत्वेन पूर्वापरपरामर्शवैकल्यात्। अतो न मधुसूदनारिसूदनेत्यस्यार्थस्य पुनरुक्तत्वदोषः। युद्धमात्रमपि यत्र नोचितं दूरे तत्र वधइति प्रतियोत्स्यामीत्यनेन सूचितं । अथवा पूजार्हौ कथं प्रतियोत्स्यामि। पूजार्हयोरेव विवरणं भीष्मं द्रोणं चेति। द्वौ ब्राह्मणौ भोजय देवदत्तं यज्ञदत्तं चेतिवत्संबन्धः। अयं भावः दुर्योधनादयो नापुरस्कृत्य भीष्मद्रोणौ युद्धाय सज्जीभवन्ति। तत्र ताभ्यां सह युद्धं न तावद्धर्मः पूजादिवदविहितत्वात्। नचायमनिषिद्धत्वादधर्मोपि न भवतीति वाच्यं 'गुरुं हुंकृत्य त्वंकृत्य' इत्यादिना शब्दमात्रेणापि गुरुद्रोहो यदानिष्टफलप्रदर्शनेन निषिद्धः तदा किं वाच्यं ताभ्यां सह संग्रामस्याधर्मत्वे निषिद्धत्वे चेति । ननु भीष्मद्रोणयोः पूजार्हत्वं गुरुत्वेनैव। एवमन्येषामपि कृपादीनां। नच तेषां गुरुत्वेन स्वीकारः साम्प्रतमुचितः 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते ' इति स्मृतेः ॥ ४ ॥

शं० टी०—भगवद्वचनमेतच्छ्रुत्वापि गुर्वादिस्वजनहिंसादोषदुःखमसहमानः सन् उक्तमेवार्थं विशेषयितुमर्जुनउवाच—**कथमिति**। कुलवृद्धं गुणवृद्धं च भीष्मं विद्यागुरुं द्रोणं च सङ्ख्ये युद्धे इषुभिः कथं प्रतियोत्स्यामि प्रतिपक्षीभूय युद्धं करिष्यामि। किं तौ शौर्याधिकाविति भीत्या ताभ्यां योद्धुं न शक्नोषीत्यतआह—**पूजेति**। अरीन्कामादीन् भक्तानां सूदयतीत्यरिसूदनः हे अरिसूदन! भीष्मद्रोणौ गृहे पितृवत्पुष्पादिभिः पूजार्हौ न तु वाचापि युद्धार्हौ किमुत बाणैर्मर्मघातिभिर्न युद्धार्हाविति। शरैस्तयोर्मर्मच्छेदं कथं करिष्यामीत्यर्थः ॥ ४ ॥

श्री० टी०—नाहं कातर्येण युद्धादुपरतोऽस्मि किंतु युद्धस्यान्याय्यत्वादित्यर्जुन उवाच—**कथमिति**। भीष्मद्रोणौ पूजायामर्हौ योग्यौ तौ प्रति कथमहं योत्स्यामि। तत्रापि इषुभिः। यत्र वाचापि योत्स्यामीति वक्तुमनुचितं तत्र बाणैः कथं योत्स्यामीत्यर्थः। हे अरिसूदन शत्रुसूदन! ॥ ४ ॥

स० टी०—ननु स्वधर्मसन्त्यागो नायं शोकवशात्कृतः ॥ किन्तु युद्धस्य धर्मत्वाभावाद्बाधर्मरूपिणः ॥ १ ॥ मयाऽस्य क्रियते त्याग इत्याहार्जुन आन्तरम् ॥ भीष्मं पितामहं द्रोणमाचार्यं सायकै रणे ॥ २ ॥ न जातु प्रहरिष्यामि पूजार्हौ कुसुमादिभिः ॥ पूजार्हाभ्यां सह क्रीडास्थाने वाचापि लीलया ॥ ३ ॥ हर्षार्थमपि सङ्ग्रामो नोचितः किं शरै रणे ॥ प्राणत्यागकरो युद्धभूमौ वाच्यमिति स्फुटम् ॥ ४ ॥ सम्बोधनद्वयं मोहादेकार्थकमुदाहृतम् ॥ ५ ॥ ४ ॥

भा० टी०—ननु शत्रवस्तापनीया नतु गुरव इत्याशयेनाह—**कथमिति**। भीष्मं पितामहं द्रोणं च धनुर्विद्याचार्यं गुरुं सङ्ख्ये संग्रामभूमौ इषुभिः सह कथं प्रतियोत्स्यामि प्रतीपो भूत्वा युद्धं कथं करिष्यामि। यतः पूजार्हौ पूजायोग्यौ भीष्मद्रोणौ। पुष्पादिभिः पूजार्हयोस्तयोरिषुभिर्हननं मया कथं कर्तव्यमित्यर्थः। मधुसूदनारिसूदनेति संबोधयन्त्वमपि दुष्टानेव तापयसीत्यतो गुरू अदुष्टौ च भीष्मद्रोणौ जहीति प्रेरयितुं नार्हसीति सूचयति। मधुसूदनारिसूदनेति संबोधनद्वयं शोकव्याकुलत्वेन पूर्वापरपरामर्शवैकल्यात्। अतो न मधुसूदनेत्यस्यार्थस्य पुनरुक्तत्वदोष इति केचित् ॥ ४ ॥

प० टी०—अथास्तां भ्रातृपुत्रादिवधशङ्कावकाशः श्रुतिगर्हितस्य ब्रह्मवधस्य का गतिरित्याशयेनार्जुनः प्राह—**कथमिति**। भो मधुसूदन केवलदैत्यनिवर्हण! अहं सङ्ख्ये संग्रामे भीष्मं द्रोणं चेषुभिर्बाणैः कथं प्रतियोत्स्यामि प्रतिपक्षत्वेन कथं युद्धं करिष्यामि। यतस्तौ पूजार्हावाचार्यत्वेन पूज्यौ न तु ब्राह्मणमात्रत्वेनावस्थितौ। अत्रार्थे शातपथी श्रुतिरपि "तस्मात् यद्यपि राजा परमतां गच्छति। ब्रह्मैवान्तत उपनिश्रयति। स्वां योनिं य उ एनं हिनस्ति। स्वाᳪ स योनिमृच्छति। स पापीयान् भवति। यथा श्रेयाᳪसᳪ हिंसित्वा" इति। भाष्यम् "तस्मादिति पूर्वश्रुतौ "क्षत्र एव तद्यशो दधाति" इत्यादिना। राजा क्षत्रियः यद्यपि परमतां गच्छति राजसूयादिनोत्कृष्टो भवति। तथा स्वधर्माचरणेनान्ततोऽवसाने ब्रह्मैव ब्राह्मणत्वमेव उपनिश्रयति आश्रयते प्राप्नोति। एवं सति उ इति विचार्य यः क्षत्रियः स्वां योनिं प्राप्तव्यस्थानमेनं ब्राह्मणं हिनस्ति घातयति स स्वां योनिं पितरमृच्छति हिनस्ति। अत एव स पापीयान् भवति। किंवत्। यथा श्रेयांसं महानुभावं हिंसित्वा।" अथ तैत्तिरीयकेऽपि—"यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति। तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेत्" इति। भाष्यम् "दिवे दिवे प्रतिदिवसं नमस्कुर्यात् परन्तु कदापि नाश्लीलं विरुद्धं कीर्तयेत् उन्मर्यादं न वदेत्" शेषं स्पष्टम्। एवं सति भीष्मद्रोणादीनां वधः कथं कर्तुं शक्यत इति भावः ॥ ४ ॥

रा० टी०—पुनः स्नेहकारुण्यतया व्याकुलो भगवदुक्तं हितमजानन्नर्जुन उवाच—**कथमित्यादिपञ्चभिः** श्लोकैः। हे मधुदैत्यघातक शत्रुनिबर्हण! संख्ये युद्धे भीष्मं द्रोणं कथमहमिषुभिर्बाणैः प्रतियोत्स्यामि। कुतः यतस्तौ पूजार्हौ पूजनीयौ तत इति ॥ ४ ॥

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ॥
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥

त० टी०—ननु पूजार्हाविति सत्यमुक्तं तथापि भीष्मद्रोणकृपाणां पौत्रत्वेन शिष्यत्वेन च धार्तराष्ट्रा यूयं च समा एव योगक्षेमेण रक्षणीयाः। कथं ते धार्तराष्ट्रानुवर्तिनो भूत्वाऽनपकारिणां शिष्याणां शत्रव इव राज्यप्राप्तिविरोधिनो युद्धाय प्रवृत्ताः अतः कार्याकार्यविवेकरहिता उत्पथगामिनस्त्वत्तो वधार्हाः। उक्तं च भीष्मेणैव 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते' इति चेत्तत्राह—गुरूनिति। महाननुभावः सर्वसामर्थ्यरूपः प्रभावो येषां तान् गुरून् हत्वा इहास्मिँल्लोके भैक्ष्यं भिक्षितान्नाद्यपि भोक्तुं श्रेयः। परलोकश्रेयोविरोधिपापस्पर्शाभावादित्यर्थः। महानुभावत्वादेव तेषां नावलिप्तत्वादिदोषयोगः तत्त्यागवचनमपि कालकामादिजयनशीलानां तेषामेवोपपद्यते, नेतरेषाम्। 'नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः। विनश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजं विषम्'इति वचनात्। ननु 'अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः' इति तद्वाक्येनैव तेषामर्थकामपरत्वान्न तद्धननं दोषावहमित्याशङ्क्याह—हत्वेति। अर्थकामान्गुरून् हत्वा इहैव भोगान्भुञ्जीय अश्नीयां। गुरुवधजनितमहापातकेन तन्नाशादित्यर्थः। इहापि न शुद्धान् किन्तु रुधिरप्रदिग्धान् रुधिरेण प्रकर्षेणोपचितान् ॥ ५ ॥

म० टी०—तस्मादेषां युद्धगर्वेणावलिप्तानामन्यायराज्यग्रहणेन शिष्यद्रोहेण च कार्याकार्यविवेकशून्यानामुत्पथनिष्ठानां वध एव श्रेयानित्याशङ्क्याह—गुरूनिति। गुरूनहत्वा परलोकस्तावदस्त्येव। अस्मिंस्तु लोके तैर्हृतराज्यानां नो नृपादीनां निषिद्धं भैक्ष्यमपि भोक्तुं श्रेयः प्रशस्यतरमुचितं। नतु तद्वधेन राज्यमपि श्रेयइति। धर्म्येपि युद्धे वृत्तिमात्रफलत्वं गृहीत्वा पापमारोप्य ब्रूते। नत्ववलिप्तत्वादिना तेषां गुरुत्वाभावउक्तइत्याशङ्क्याह—महानुभावानिति। महाननुभावः श्रुताध्ययनतपआचारादिनिबन्धनः प्रभावो येषां तान्। तथा च कालकामादयोपि यैर्वशीकृतास्तेषां पुण्यातिशयशालिनां नावलिप्तत्वादिक्षुद्रपाप्मसंश्लेपइत्यर्थः। हिमहानुभावानित्येकं वा पदं। हिमं जाड्यमपहन्तीति हिमहः आदित्योग्निर्वा तस्येवानुभावः सामर्थ्यं येषां तान्। तथा चातितेजस्वित्वात्तेषामवलिप्तत्वादिदोषो नास्त्येव। 'धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा' इत्युक्तेः। ननु यदार्थलुब्धाः सन्तो युद्धे प्रवृत्तास्तदैषां विक्रीतात्मनां कुतस्त्यं पूर्वोक्तं माहात्म्यं। तथा चोक्तं भीष्मेण युधिष्ठिरं प्रति 'अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः' इत्याशङ्क्याह—हत्वेति। अर्थलुब्धा अपि ते मदपेक्षया गुरवो भवन्त्येवेति पुनर्गुरुग्रहणेनोक्तं। तुशब्दोप्यर्थे। ईदृशानपि गुरून् हत्वा भोगानेव भुञ्जीय नतु मोक्षं लभेय। भुज्यन्तइति भोगा विषयाः। कर्मणि घञ्। ते च भोगा इहैव न परलोके। इहापि च रुधिरप्रदिग्धा इव। अयशोव्याप्तत्वेनात्यन्तजुगुप्सिता इत्यर्थः। यदेहाप्येवं तदा परलोकदुःखं कियद्वर्णनीयमितिभावः। अथवा गुरून् हत्वार्थकामात्मकान् भोगानेव भुञ्जीय नतु धर्ममोक्षावित्यर्थकामपदस्य भोगविशेषणतया व्याख्यानान्तरं द्रष्टव्यम् ॥ ५ ॥

शं० टी०—क्षत्रियाणां युद्धं श्रेयस्करं कथं त्यक्तुं शक्यत इत्यतआह—गुरूनिति। महाननर्गलोऽनुभावो धर्मब्रह्मविषयको बोधो येषां तान् महानुभावान् गुरून् भीष्मद्रोणकृपादीनहत्वा इह लोके भैक्ष्यं भिक्षान्नं नः श्रेयः युद्धवच्छ्रेयस्करं भवति तदेव भोक्तुं युक्तं। गुर्वादिस्वजनहिंसारहितं भिक्षाशनमस्माकं श्रेयस्करमित्यर्थः। 'अकृत्वा परसंतापमगत्वा खलमदिरम्। अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु' इत्यादिशास्त्रप्रसिद्धिद्योतनार्थो हिशब्दः। किमनाथवद्भिक्षाशनं शूराणां। शत्रून् जित्वा राज्यभोगः कर्तव्यइत्यतआह—हत्वेति। कामि-

ज्ञानार्थः । अर्थान्धर्मादिपुरुषार्थान् शिष्येभ्यः कामयन्ति बोधयन्तीत्यर्थकामास्तान्धर्मोपदेष्टॄन् गुरून् हत्वाऽहमिहैव लोके रुधिरप्रदिग्धान् रक्तधाराप्रसिक्तान् रुधिरमयान् भोगान् भुज्यन्तइति भोगाः विषयास्तान्नारकीयान् भुञ्जीयाऽनुभवेयं नतु नारकीया एव । किंतु गुर्वादिवधेन जुगुप्स्यो नरकभोगोऽत्रैव भविष्यत्यतोगुर्वादिहिंसाशून्यं भिक्षाशनं श्रेयस्करं मन्यइत्यर्थः ॥ ५ ॥

श्री० टी०—तर्हि तव देहयात्रापि न स्यादितिचेत्तत्राह—**गुरूनिति**। गुरून्द्रोणादीनहत्वा परलोकविरुद्धो गुरुवधस्तमकृत्वा इह लोके भिक्षान्नमपि भोक्तुं श्रेयः उचितम्। विपक्षे तु न केवलं परत्र दुःखम्। इहैव तु नरकदुःखमनुभवेयमित्याह—**हत्वेति** । गुरून्हत्वा तु रुधिरेण प्रदिग्धान्प्रकर्षेण लिप्तान् अर्थकामात्मकान्भोगानहं भुञ्जीय अश्नीयाम्। यद्वा अर्थकामानिति गुरूणां विशेषणम्। अर्थतृष्णाकुलत्वादेते तावद्युद्धान्न निवर्तेरन्। तस्मादेतद्वधः प्रसज्येतैवेत्यर्थः । तथाच युधिष्ठिरंप्रति भीष्मेणोक्तम् 'अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् । इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः' इति ॥ ५ ॥

स० टी०—नन्वेषां भीष्ममुख्यानां पूज्यत्वं सांप्रतं कथम्॥ युद्धगर्वेण दृप्तानां कार्याकार्यमजानताम् ॥१॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ २ ॥ इति स्मृतेर्वधः श्रेयाञ्छिष्यद्रोहवतामिति ॥ एवमाशङ्क्य सद्युक्त्या वाक्यमाह गुरूनिति ॥ ३ ॥ अहत्वा तावदस्त्येव परलोकसुखं हि नः ॥ अस्मिँल्लोके नृपादीनां निषिद्धं भैक्ष्यमप्युत ॥ ४ ॥ उचितं भोक्तुमस्माकं न गुरूणां वधो वरः ॥ उत्कृष्टोऽध्ययनाचारतपआदिनिबन्धनः ॥ ५ ॥ येषां प्रभावस्तेषां तु महापुण्यवतां सताम् ॥ न क्षुद्रैरवलिप्तत्वादिभिर्दोषैः क्षतिर्मनाक् ॥ ६ ॥ अपहन्ति हिमं योऽग्निरादित्यो वास्ति तत्समम् ॥ येषां सामर्थ्यमेतेषां क्षुद्रैर्दोषैर्न वा क्षतिः ॥ ७ ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ८ ॥ नन्वर्थलोभिनः सन्तः प्रवृत्ता ये रणेऽधुना ॥ तेषां विक्रीतदेहानां कुतोऽयं महिमाद्भुतः ॥ ९ ॥ तथैवोक्तं रणोद्योगे भीष्मेणापि युधिष्ठिरम् ॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ १० ॥ इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः॥ इत्याशङ्क्याह सद्वाक्यं गुरुभक्तिसमान्वितः ॥ ११ ॥ अर्थलुब्धानपि गुरून्हत्वा भुञ्जीय केवलम् ॥ विषयानेव नो मोक्षं तेऽपीह न परत्र च ॥ १२ ॥ इहाप्यपयशोव्याप्ता निन्द्या रक्तयुता इव ॥ १३ ॥ ५ ॥

भा० टी०—एवं तर्हि राज्यालाभेन भोगाभावे भिक्षाटनं कर्तव्यं भविष्यतीत्याशङ्कामिष्टापत्त्या परिहरति—**गुरूनिति** । गुरून् भीष्मद्रोणादीन् महानुभावानहत्वाऽहिंसित्वा इहास्मिँल्लोके भैक्षमपि भिक्षया लब्धमन्नं क्षत्रियस्य निषिद्धमपि भोक्तुमशितुं श्रेयः प्रशस्यं। गुरुहिंसावर्जनार्थस्य भिक्षाशनस्य प्रत्यवायाजनकत्वात्। गुर्वहननेन नरकाभावं, महानतिप्रसिद्धोऽनुभावः प्रभावो येषामिति विशेषणेनापकीर्त्यभावं च गुणमुक्त्वा हनने दोषमाह—**हत्वेति** । महानुभावानित्यस्यात्रापि संबन्धः । गुरून् महानुभावान् हत्वा भोगानर्थकामानिहैव भुञ्जीय नतु परलोके। इहापि रुधिरप्रदिग्धानपकीर्तिव्याप्तत्वेनात्यन्तजुगुप्सितानित्यर्थः। अर्थकामानिति गुरुविशेषणं तथा चार्थतृष्णाकुलत्वेनैते तावद्युद्धान्न निवर्तेरन् । तस्मादेतद्वधः प्रसज्येतैव इत्यर्थः । तथाचोक्तं भीष्मेण—'अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः' इति। अपरे केचित्तु ननु 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते' इति स्मृतेः । तेषां युद्धगर्वेणावलिप्तानामन्यायराज्यग्रहणेन शिष्यद्रोहेण च कार्याकार्यविवेकशून्यानामुत्पथनिष्ठानां च वध एव श्रेयानित्याशङ्क्याह—**गुरूनिति** । महान् श्रुत्यध्ययनादिनिबन्धनः प्रभावो येषां तान् । तथाच कालकामादयोपि यैर्वशीकृताः तेषां पुण्यातिशायिनां नावलिप्तत्वादिक्षुद्रपाप्मसंश्लेष इत्यर्थः । हिमहानुभावानित्येकं वा पदम् । हिमं जाड्यं अपहन्तीति हिमहा आदित्योऽग्निर्वा तस्यैवानुभावः सामर्थ्यं येषां तान् ।

तथाचातितेजस्वित्वात् तेषामवलिप्तत्वादिदोषो नास्त्येव 'धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा' इत्युक्तेरिति वर्णयन्ति। तत्रैतदीयेतथापनोक्तस्मृतौ अवलिप्तत्वादिदोषप्रयुक्तत्यागविधानेन वधानुक्त्या तच्छ्रेयस्त्वस्य दूरापास्तत्वमस्ति न वेति विद्वद्भिर्विचार्यं। किञ्च यत्तु 'ननु यदार्थलुब्धाः सन्तो युद्धे प्रवृत्तास्तदैषां विक्रीतात्मनां कुतस्त्यं पूर्वोक्तं माहात्म्यम्। तथाचोक्तं भीष्मेण युधिष्ठिरंप्रति ' अर्थस्य पुरुषो दासः ' इत्यादित्याशङ्क्याह—हत्वेति' इत्युत्तरार्धं तैरवतारितं तत्राप्येतन्मूलकावलिप्तत्वादिदोषाणां तैरेव तदीयातिप्रसिद्धमहानुभावत्वातितेजस्वित्ववर्णनेन समाहितत्वात्। पुनरीदृक्शङ्काया उत्थानमस्ति न वेति विचारणीयम् ॥ ५ ॥

प० टी०—अथोक्तमेव विविच्याह—**गुरूनिति**। महानुभावान् गुरून् द्रोणादीनहत्वा लोकशास्त्रविरुद्धं गुरुवधमकृत्वेह लोके भैक्ष्यं भिक्षया प्राप्तमन्नं भोक्तुं श्रेय उचितम्। परन्तु गुरून् हत्वा रुधिरप्रदिग्धान् तद्रुधिराक्तान् अर्थकामांस्तदात्मकान् भोगान् इहैव लोके कथं भुञ्जीय गुरुवधशङ्काकलङ्कितः कथमश्नीयाम्। परलोककथा तु दूरतोऽपास्तेत्यर्थः। श्रुतिरप्यापस्तम्बसंहितासु। " तस्माद्ब्राह्मणाय नापगुरेत न निहन्यान्न लोहितं कुर्यादेतावता ह्येनसा भवति " इति। भाष्यम्। " तस्मात् " योनिहनत् " इति पूर्वश्रुतौ निषिद्धमस्ति तस्माद्। ब्राह्मणायेति चतुर्थ्या द्वितीयार्थोऽवगम्यते। ब्राह्मणं नापगुरेत सक्रोधाविर्भावेन नोद्गिरेत्। तथा न निहन्याद्धस्तपादाद्यभिघातं न कुर्यात् तथा न लोहितं शस्त्रादिना रुधिराक्तं न कुर्यात्। हि यतः कारणादेतावता दुष्कर्मणा एनसा भवति पातकेन सम्पद्यते " ॥ ५ ॥

रा० टी०—ननु चैतदहनने राज्याप्राप्तेः देहनिर्वाहो न स्यादित्यत आह—**गुरूनिति**। इह महानुभावान्भगवद्भक्त्यादिगुणसम्पन्नान्द्रोणादिगुरूनहत्वा इह लोके भैक्षं भिक्षयोपलब्धमन्नं भोक्तुं श्रेयः वरम्। पारत्रिकदुःखाभादिति भावः। हि यतोऽतो न योत्स्यामीत्यन्वयः। न केवलं तेषां हनने पारत्रिकदुःखं इहाप्यतिदुःखमित्याह—हत्वेति। अर्थं कामयन्त इत्यर्थकामास्तान् गुरून्हत्वा तैर्भुज्यमानांस्तानेव भोगांस्तद्रुधिरेण प्रदिग्धान्प्रकर्षेण लिप्तांस्तदीयासनेष्वेवोपविश्य इह भुञ्जीय अनुभवेयम्। तदेतत्परलोकदुःखादतिशयितं दुःखमिति भावः ५

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ॥
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

त० टी०—ननु शास्त्रविहितं क्षत्रियस्य श्रेयो युद्धरूपं स्वधर्मं विहाय परधर्मं भैक्ष्यं कथं श्रेयो मन्यसे इत्यत आह—न चैतदिति। भैक्ष्यं वा युद्धं वा नोऽस्माकं कतरत् गरीयः श्रेष्ठमेतद्द्वयं न विद्मः। यद्वा युद्धाङ्गीकारेऽपि वयं तान् जयेम यदि वा नोऽस्मान् ते जयेयुरेतच्च न विद्मः। किञ्च जयोऽप्यस्माकं पराजय इत्याह—यानेवेति। यान्बन्धूनेव हत्वा वयं न जिजीविषामो जीवितुं नेच्छामस्ते धार्तराष्ट्राः प्रमुखेऽवस्थिताः ॥ ६ ॥

म० टी०—ननु भिक्षाशनस्य क्षत्रियंप्रति निषिद्धत्वाद्युद्धस्य च विहितत्वात् स्वधर्मत्वेन युद्धमेव तव श्रेयस्करमित्याशङ्क्याह—**नचैतदिति**। एतदपि न जानीमो भैक्ष्ययुद्धयोर्मध्ये कतरत् नोस्माकं गरीयः श्रेष्ठं किं भैक्ष्यं हिंसाशून्यत्वादुत युद्धं स्वधर्मत्वादिति इदं च न विद्मः। यद्वा आरब्धेपि युद्धे वयं जयेमातिशयीमहि यदि वा नोस्मान् जयेयुर्धार्तराष्ट्राः। उभयोः साम्यपक्षोप्यर्थाद्बोद्धव्यः। किंच जातोपि जयो नः फलतः पराय एव। यतो यान् बन्धून् हत्वा जीवितुमपि वयं नेच्छामः किं पुनर्विषयानुपभोक्तुं। तएवावस्थिताः संमुखे धार्तराष्ट्राः धृतराष्ट्रसम्बन्धिनो भीष्मद्रोणादयः सर्वेपि तस्माद्भैक्ष्याद्युद्धस्य श्रेष्ठत्वमसिद्धमित्यर्थः। तदेवं प्राक्तनेन ग्रन्थेन संसारदोषनिरूपणादधिकारिविशेषणान्युक्तानि। तत्र ' नच श्रेयोनुपश्यामि हत्वा स्वजनमाहवे '

इत्यत्र रणे हतस्य परिव्राट्समानयोगक्षेमत्वोक्तेः "अन्यत् श्रेयोन्यदुतैव प्रेयः" इत्यादिश्रुतिसिद्धं श्रेयोमोक्षाख्यमुपन्यस्तं। अर्थाच्च तदितरदश्रेयइति नित्यानित्यवस्तुविवेको दर्शितः। 'न काङ्क्षे विजयं कृष्ण' इत्यत्रैहिकफलविरागः। 'अपि त्रैलोक्यराज्यस्य हेतोः' इत्यत्र पारलौकिकफलविरागः। 'नरके नियतं वासः' इत्यत्र स्थूलदेहातिरिक्त आत्मा। 'किन्नो राज्येन' इति व्याख्यातवर्त्मना शमः। 'किं भोगैः' इति दमः। 'यद्यप्येते न पश्यन्ति' इत्यत्र निर्लोभता। 'तन्मे क्षेमतरं भवेत्' इत्यत्र तितिक्षा। इति प्रथमाध्यायस्यार्थः। ससंन्याससाधनसूचनं अस्मिंस्त्वध्याये 'श्रेयो भोक्तुं भैक्ष्यमपि' इत्यत्र भिक्षाचर्योपलक्षितः संन्यासः प्रतिपादितः॥ ६ ॥

शं० टी०—"ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः" इति श्रवणात् क्षत्रियाणां युद्धमेव श्रेयस्करं न तु भिक्षाशनमित्यत आह—**नचैतदिति**। भिक्षाशनयुद्धयोर्मध्ये नोऽस्माकं धर्मपराणां गरीयः श्रेष्ठं कतरत् किन्नु वा। गुरुहिंसादुष्कीर्त्यादिदोषशून्यत्वात् किं भैक्ष्याशनमेव श्रेष्ठं उत स्वधर्मत्वाद्युद्धमेव श्रेष्ठमाहोस्विदुभयमपि समं वा। चस्त्वर्थः। तदेतद्वयं तु न विद्मो न विजानीमः। जये राज्यसुखहेतुत्वादपजये स्वर्गप्रापकत्वात्स्वधर्मत्वाच्चेति तत्र संशयो न कर्तव्य इति चेत्तथापि सम्प्राप्तो विजयोऽस्माकं दुःखायैव भवति न तु किञ्चिदपि भवति सुखायेत्याह—**यानेवेति**। प्राणेभ्योपि प्रेयसो यानेव भ्रातृपुत्रादीन् युधि हत्वा न जिजीविषामो जीवितुं न शक्नुमस्त एव धार्तराष्ट्राः प्रमुखे रणमुखे अवस्थिता म्रियामह इति तिष्ठन्ति। अतोऽनर्थहेतोर्युद्धाद्भैक्ष्याशनमेव नः श्रेयस्करमित्यर्थः॥ ६ ॥

श्री० टी०—किंच यद्यपि अधर्ममङ्गीकरिष्यामस्तथापि किमस्माकं जयः पराजयो वा भवेदिति न ज्ञायत इत्याह—**नचेतिं**। एतद्वयोर्मध्ये नोऽस्माकं कतरत् किंनाम गरीयोऽधिकतरं भविष्यतीति न विद्मः। तदेव द्वयं दर्शयति। यद्वा एतान् वयं जयेम जेष्यामः यदि वा नोऽस्मानेते जयेयुः जेष्यन्तीति। किंचास्माकं वा जयोऽपि फलतः पराजय एवेत्याह—**यानिति**। याने[व] हत्वा जीवितुं नेच्छामस्तएवैते संमुखे अवस्थिताः॥६॥

स० टी०—ननु भिक्षाशनं निन्द्यं क्षत्रियंप्रति शास्त्रतः॥ धर्म्यं युद्धं च विहितं श्रेयो नेत्याह नेति च॥ १ ॥ एतन्नापि वयं विद्मो मध्ये सङ्ग्रामभैक्ष्ययोः॥ कतरच्छ्रेष्ठमस्माकं भैक्ष्यं सङ्ग्राम एव वा॥२॥ इदं चापि न जानीमः प्रारब्धेऽस्मिन्रणे वयम्॥ जयेम यदि वाऽस्मांस्ते जयेयुः शत्रवो रणे॥ ३ ॥ सिद्धोऽपि चेज्जयोऽस्माकं फलतः स्यात्पराजयः॥ स्वजनान्यान्वयं हत्वा नेच्छामश्चापि जीवितुम्॥ ४ ॥ किं पुनर्विषयान्भोक्तुं त एतेऽवस्थिता रणे॥ भीष्मद्रोणादयः सर्वे तथा दुर्योधनादयः॥ ५ ॥ धृतराष्ट्रनृपस्यैते सम्बन्धिन इहापरे॥ तस्माद्भैक्ष्याद्रणस्यापि श्रेष्ठत्वं नैव सिद्ध्यति॥ ६ ॥ ६ ॥

भा० टी०—नन्वहननस्य श्रेयस्त्वे निश्चिते किमर्थं शोचसीति चेत्तत्राह—**नेति**। नोऽस्माकं किं भैक्षं गरीयः श्रेष्ठं हिंसाशून्यत्वात्। उत युद्धं स्वधर्मत्वादित्येतन्न विद्मः इदमेव श्रेय इति न जानीमः। ननु पक्षयोर्द्वयोरपि समबलत्वे युद्धमेव कुतो नाङ्गीकरोपीत्याशङ्क्य स्वबुद्ध्या तु तत्र दोषं पश्यामीत्याह—**यद्वेति**। यद्वा वयं जयेम यदि वा नोस्मांस्ते जयेयुः। इति न विद्मः। जये सत्यपि दोष इत्याह—**यानिति**। यानेव हत्वा हिंसित्वा न जिजीविषामः जीवितुं नेच्छामः ते धार्तराष्ट्राः धृतराष्ट्रसंबन्धिनः प्रमुखे संमुखे अवस्थिताः॥ ६ ॥

प० टी०—अथ तेभ्योऽस्माकं जये पराजये वा मरणमेवावशिष्यत इत्याह—**नचैतदिति**। जयपराजयव्यवस्था तु दैवाधीना। तथापि यद्वा वयं जयेम यदि वा तेऽस्मान् जयेयुः। अनयोः पक्षयोर्मध्ये कतरद्गरीयः किं श्रेष्ठं तन्न विद्मो न जानीमः। यतोऽस्माकं पराजये मरणमेवावशिष्टं न पलायनमित्यसन्दिग्धं। तथाऽस्माकं जयपक्षे सर्वेषामाचार्याणां गोत्रिणां च वधो भविता। अनन्तरमस्माभिः किं जीवितव्यं। परिशेषाल्लोकशास्त्रगर्हाभयान्मर्तव्यमेवेत्याह—**यानेवेति**। यान् हत्वा वयं न जिजीविषामः न जीवितुमिच्छामस्ते धार्तराष्ट्राः प्रमुखे रणमुखेऽवस्थिताः सन्ति॥ ६ ॥

रा० टी०—पापमङ्गीकृत्य युद्धकरणेऽपि जयः संदिग्ध एवेत्याह—नचैतदिति । द्वयोर्मध्ये नोऽस्माकं कतरत्किन्नाम गरीयः अधिकतरं भविष्यतीति न विद्मः । तदेव द्वयमाह—यद्वेति । एतान्वयं जयेम जेष्यामः । यदि वा नोऽस्मानेते जयेयुः जेष्यन्तीति । किंचास्माकं जयोऽपि पराजय एव बुध्यत इत्याह—यानेवेति । यानेव हत्वा जीवितुं नेच्छामः तएव धार्तराष्ट्राः संमुखेऽवस्थिताः तस्मात्कार्पण्यदोषेणैतान्हत्वा कथं जीविष्याम इति॥६॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ॥
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७॥

त०टी०—एवं चेत्किं त्वया स्वश्रेयो निश्चितमित्यपेक्षायां " यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये । यो ब्रह्माणं विदधाति पूर्वं यो विद्यां च तस्मै गोपायति स्म कृष्णः । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणं व्रजेत्" 'ये तु कृष्णं प्रपद्यन्ते न ते मुह्यन्ति मानवाः । भये महति मग्नानां त्राता नित्यं जनार्दनः' इत्यादिश्रुतिस्मृतिप्रतिपादितां भगवदुपसत्तिमेव सर्वसाधनेषु गरीयसीं मनसि निधाय स्वहिताहितज्ञानकौशलं विहाय ब्रह्मरुद्रादिभिरनवगतमहिमानमचिन्त्यगुणशक्तिकं कारुण्यवात्सल्यादिगुणार्णवं स्वभक्तहिताय वसुदेवगृहेऽवतीर्णं साक्षात्परमात्मभूतं भगवन्तं त्वामेव शरणं व्रजामीत्याह—कार्पण्येति । " यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः । पूर्वप्रतिपादिताक्षरशब्दवाच्यसूर्यचन्द्रवायुवह्नीन्द्रादिसर्वजगन्नियन्तृपरमात्मस्वरूपगुणादिज्ञानहीनः कृपण इत्युच्यते शास्त्रे । लोके तु स्वल्पमपि द्रव्यव्ययं कर्तुमक्षमः कृपणस्तस्य भावः कार्पण्यं तन्निमित्ते एतत्स्वजनवधेऽस्मज्जीवनं निरर्थकमिति मोहरूपो दोषस्तेनोपहतो विवेकात्मकः स्वभावो यस्य । अत एव धर्मे सम्मूढं चेतो यस्य सोऽहं त्वां स्वभावतोऽपास्तसमस्तदोषं सर्वज्ञं पृच्छामि । किं यत् निश्चितमसन्दिग्धं श्रेयः परमपुरुषार्थभूतं हितं स्यात्तन्मे मह्यं ब्रूहि । हितोपदेशस्यात्मनो योग्यतामाह—शिष्यस्तेऽहमिति । तव शासनयोग्योऽहमतः सखित्वान्मम तुल्योऽयं नोपदेशार्ह इति न शङ्कनीयं त्वया। तस्मात्त्वां प्रपन्नं शरणागतं मां त्वं शाधि । स्वकरुणावशेन शिक्षयेत्यर्थः॥७॥

म० टी०—गुरूपसदनमिदानीं प्रतिपाद्यते समधिगतसंसारदोषस्यातितरां निर्विण्णस्य विधिवद्गुरुमुपसन्नस्यैव विद्याग्रहणेऽधिकारात् तदेवं भीष्मादिसङ्कटवशात् "व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति श्रुतिसिद्धभिक्षाचर्येऽर्जुनस्याभिलाषं प्रदर्श्य विधिवदुपसत्तिमपि तत्सङ्कटव्याजेनैव दर्शयति—कार्पण्येति । यः स्वल्पामपि वित्तक्षतिं न क्षमते स कृपण इति लोके प्रसिद्धस्तद्विधत्वादखिलोऽनात्मविदप्राप्तपुरुषार्थतया कृपणो भवति "यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः । तस्य भावः कार्पण्यमनात्माध्यासवत्त्वं तन्निमित्तोऽस्मिन् जन्मन्येत एव मदीयास्तेषु हतेषु किं जीवितेनेत्याभिनिवेशरूपो ममतालक्षणो दोषस्तेनोपहतस्तिरस्कृतः स्वभावः क्षात्रो युद्धोद्योगलक्षणो यस्य सः । तथा धर्मविषये निर्णायकप्रमाणादर्शनात्सम्मूढं किमेतेषां वधो धर्मः, किमेतत्परिपालनं धर्मः, तथा किं पृथ्वीपरिपालनं धर्मः, किंवा यथावस्थितोऽरण्यनिवास एव धर्म इत्यादिसंशयैर्व्याप्तं चेतो यस्य स तथा ' न चैतद्विद्मः कतरन्नोगरीयः ' इत्यत्र व्याख्यातमेतत् । एवंविधः सन्नहं त्वा त्वामिदानीं पृच्छामि । श्रेय इत्यनुषङ्गः । अतो यन्निश्चितमैकान्तिकमात्यन्तिकं च श्रेयः परमपुमर्थभूतं फलं स्यात्तन्मे मह्यं ब्रूहि । साधनान्तरमवश्यम्भावित्वमैकान्तिकत्वम् । जातस्याविनाश आत्यन्तिकत्वम् । यथा ह्यौषधे कृते कदाचिद्रोगनिवृत्तिर्न भवेदपि। जातापि च रोगनिवृत्तिः पुनरपि रोगोत्पत्त्या विनाश्यते । एवं कृतेपि यागे प्रतिबन्धवशात्स्वर्गो न भवेदपि । जातोपि स्वर्गो दुःखाक्रान्तो नश्यति चेति नैकान्तिकत्वमात्यन्तिकत्वं वा तयोः। तदुक्तम्—'दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ । दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्' इति। 'दृष्टवदा-

नुश्राविकः सत्त्वविशुद्धिक्षयातिशययुक्तः । तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्' इति च। ननु त्वं मम सखा न तु शिष्योऽत आह—शिष्यस्तेऽहमिति। त्वदनुशासनयोग्यत्वादहं तव शिष्य एव भवामि न सखा न्यूनज्ञानत्वात्। अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय करुणया नत्वशिष्यत्वशङ्कयोपेक्षणीयोऽहमित्यर्थः। एतेन "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥ भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति" इत्यादिगुरूपसत्तिप्रतिपादकः श्रुत्यर्थो दर्शितः॥ ७॥

शं० टी०—कथं भवान् पण्डितः सन्नधर्मं धर्ममिवाधर्ममिव धर्मं च मन्यते मूढवदित्याकाङ्क्षायामहमेतद्द्वयं सूक्ष्मार्थं निर्णेतुं न शक्नोमि यत्कर्तव्यं तत्त्वमेवोपदिशेत्याह—**कार्पण्येति**। अविद्याकृतदेहेन्द्रियाद्यनात्मनः स्वरूपमिदमेवाहमिति व्यवहरतीति कृपणस्तत्तत्त्वज्ञः "यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः" इति 'कृपणो योऽजितेन्द्रियः' इति श्रुतिस्मृतिप्रसिद्धेः। तस्य भावः कार्पण्यमज्ञत्वमज्ञानं तमःप्रधानत्वाद्वस्तुस्वरूपं दूषयतीति तदेव दोषस्तेनोपहतस्तिरोहितः स्वस्याविक्रियस्य प्रत्यगात्मनो भावः सत्ता यस्य स कार्पण्यदोषोपहतस्वभावोऽविद्यातिरस्कृतात्मस्वरूपो यस्माद्धर्मसम्मूढचेताः अविद्यया संसारे पात्यमानः पुमान् धार्यतेऽनेनेति धर्मस्तस्मिन् स्वरूपप्रकाशके ज्ञानात्मके धर्मे सम्मूढमप्रविष्टं चेतो यस्य तथोक्तः। एवंलक्षणसंपन्नोऽहं त्वां परमेश्वरं पृच्छामि। श्रुतिस्मृतिभिर्महर्षिभिश्च यन्निश्चितं निर्णीतं नियतफलं श्रेयःसाधनं शोकविध्वंसकं तन्मे ब्रूहि। ननु "नापुत्रायाशिष्याय वै पुनः" इति श्रवणात्पुत्रशिष्यव्यतिरिक्तायातिरहस्यं न वक्तव्यमित्यत आह—शिष्यइति। धर्मज्ञानार्थितयाऽहं ते शिष्यः शिष्यभावं गतोऽस्मि। त्वां जगद्गुरुं परमेश्वरं प्रपन्नं शरणं गतं मुमुक्षुं मां शाध्यनुगृहाण। शोकस्य निःशेषनिवृत्तिर्यथा भवेत्तथा मां बोधयेत्यर्थः॥ ७॥

श्री० टी०—कार्पण्येति। तस्मात्कार्पण्यदोषोपहतस्वभाव एतान् हत्वा कथं जीविष्याम इति कार्पण्यं दोषश्च स्वकुलक्षयकृतः ताभ्यामुपहतोऽभिभूतः स्वभावः शौर्यादिलक्षणो यस्य सोऽहं त्वां पृच्छामि। तथा धर्मे संमूढं चेतो यस्य सः। युद्धं त्यक्त्वा भिक्षाटनमपि क्षत्रियस्य धर्मो वाऽधर्मोवेति संदिग्धचित्तः सन्नित्यर्थः। अतो मे यन्निश्चितं श्रेयो युक्तं स्यात्तद्ब्रूहि। किञ्च तेऽहं शिष्यः शासनार्हः अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय॥ ७॥

स० टी०—तदेवं पूर्वसन्दर्भे संसारो दोषवारिधिः॥ उक्तस्तेन विवेकादिसाधनान्यधिकारिणः॥ १॥ प्रोक्तानि मोक्षशास्त्रस्योपोद्घातत्वेन कृत्स्नशः॥ नच श्रेयोऽनुपश्यामीत्यत्र श्रेयोपवर्गकम्॥ २॥ उपन्यस्तं ततोऽन्यत्र श्रेय इत्यर्थतः स्फुटम्॥ नित्यानित्यविवेकोऽसौ दर्शितः शुद्धिहेतुकः॥ ३॥ न काङ्क्षे विजयं कृष्णेत्यत्रैहिकफले रतिः॥ अपि त्रैलोक्यराज्यस्येत्यत्रामुत्र फले रतिः॥ ४॥ किं नो राज्येन चेत्यत्र शमः प्रोक्तस्तथा दमः॥ यद्यप्येते न पश्यन्तीत्यत्र निर्लोभतात्मनः॥ ५॥ तन्मे क्षेमतरं त्वत्र तितिक्षासाधनान्तरम्॥ भोक्तुं भैक्ष्यमपीत्यत्र भिक्षाचर्योपलक्षितः॥ ६॥ सन्न्यासो दर्शितोऽत्राथ गुरूपसदनं स्फुटम्॥ ज्ञातसंसारदोषस्य निर्विण्णस्याधुनोच्यते॥ ७॥ तदेवं द्रोणभीष्मादिवधसङ्कटहेतुकाम्॥ भिक्षाचर्येऽर्जुनस्येच्छां प्रदर्श्याथ यथाविधि॥ ८॥ तत्सङ्कटच्छलेनैवमुपसत्तिः प्रदर्श्यते॥ कृपणोऽनात्मवित्तस्य भावः कार्पण्यमुच्यते॥ ९॥ तन्निमित्तो ममैतेऽहमेतेषामिति निश्चयः॥ दोषस्तेनावृतः क्षात्रः स्वभावो यस्य शूरता॥ १०॥ निर्णायकप्रमाणस्यादर्शनाद्धर्मगोचरे॥ किमेतेषां वधो धर्मः किमेतत्परिपालनम्॥ ११॥ इत्यादिसंशयग्रस्तं चेतो यस्याहमीदृशः॥ त्वां पृच्छाम्यधुना श्रेय आत्यन्तिकमसंशयम्॥ १२॥ यन्निश्चितं स्यात्तन्मह्यं ब्रूहि श्रेयोऽर्थिने परम्॥ ननु त्वं मे सखा चासि न शिष्योऽसीति चेच्छृणु॥ १३॥ तवानुशासनार्हत्वाच्छिष्य एव भवाम्यहम्॥ न सखा न्यूनबोधत्वादतस्त्वां शरणं गतम्॥ १४॥ कृपया शिक्षय त्वं मां नोपेक्ष्योऽशिष्यशङ्कया॥ १५॥ ७॥

भा० टी०—संसारासारतां ज्ञातवत इहामुत्रार्थे भोगेऽत्यन्तविरक्तस्य मुमुक्षोर्गुरूपसत्तिं सूचयन्नाह—**कार्पण्येति** । अनात्मवित्त्वात्संबन्धिनां वियोगासहनं कार्पण्यम् " यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः । तेन कार्पण्येन दैन्यरूपेण दोषेणोपहतो दूपितः स्वभावोऽन्तःकरणं यस्य सः । कार्पण्य दोषेणोपहतोऽभिभूतः स्वभावः शौर्यादिलक्षणो यस्य स इत्यपरे । स्वभावः क्षात्रो युद्धोद्योगलक्षण इति केचित् । यतो धर्मसंमूढचेताः धारयतीति धर्मः सर्वाधिष्ठानं परमात्मा तस्मिन्सम्यक् मूढमविवेकितां प्राप्तं चेतो यस्य सोऽहं त्वा त्वां पृच्छामि । किमित्यत आह—**यदिति** । यच्छ्रेयः स्यान्निश्चितं श्रुतिस्मृतीतिहासपुराणैर्यत् श्रेयस्त्वेन नित्यनिरतिशयानन्दत्वेन निश्चितं स्यात्तन्मे ब्रूहि निश्चितमैकान्तिकमनपेक्षिकं श्रेयः स्यात् न रोगनिवृत्तिवदनैकान्तिकमनात्यन्तिकं स्वर्गवदापेक्षिकं चेत्येके । मे मह्यं ब्रूहि कथय । ननु नापुत्रायाशिष्यायेति निषेधान्न वक्तव्यमिति चेन्नाहमशिष्यः किंतु शिष्यस्तेहमतो मां शिष्यं शासनार्हं त्वां प्रपन्नं शरणागतं च शाधि शिक्षय । स्वबुद्ध्या भिक्षाशनं प्रशस्यं मन्यमानोऽपि कार्पण्यदोपोपहतस्वभावः भिक्षाशनं धर्म उत युद्धमिति संशयापगमाभावाद्धर्मसंमूढचेता अहं त्वां पृच्छामि । यद्भैक्ष्यं युद्धं वा निश्चितमव्यभिचारि श्रेयःसाधनं तन्मे ब्रूहीति धर्मतत्त्वविषयकोऽपि प्रश्नो बोध्यः । यत्तु केचित् धर्मविषये संमूढं किमेतेषां वधो धर्मः किमेतत्परिपालनं धर्मः तथा किं पृथ्वीपरिपालनं धर्मः किंवा यथाऽवस्थितोऽरण्यनिवास एव धर्म इत्यादिसंशयैर्व्याप्तं चेतो यस्य स एवंविधोऽहं त्वामिदानीं पृच्छामि । श्रेय इत्यनुषङ्गः । अतो यन्निश्चितमैकान्तिकमात्यन्तिकं च श्रेयः परमपुरुषार्थभूतं फलं स्यात्तन्मे ब्रूहि । साधनानन्तरमवश्यंभावित्वमैकान्तिकत्वं जातस्याविनाशित्वमात्यन्तिकत्वमिति वर्णयन्ति । तत्र धर्मविषयकसंदेहवान् परमपुमर्थभूतं फलं पृच्छाम्यतः तन्मे ब्रूहीत्यस्यान्यद्भुक्तमन्यद्वान्तमिति न्यायतुल्यस्य सामञ्जस्यमस्ति नवेति विद्वद्भिराकलनीयम् ॥ ७ ॥

प० टी०—अथ व्याकुलचित्तः सन् श्रीकृष्णमेव पृच्छति—**कार्पण्येति** । स्नेहानुबन्धिनां गोत्रिणां जीवरक्षणमेव कार्पण्यं तथा तद्वधे दोषस्ताभ्यामुपहतः स्वभावश्चित्तं यस्य स तथा । कार्पण्ये क्षात्रधर्मपरित्यागो हिंसायां च श्रौतधर्मपरित्यागः । एवमुभयथा धर्मसंमूढचेताः धर्मविषये विमूढं चेतो यस्येत्यर्थः । इतः परमुभयधर्मसंरक्षणेन यच्छ्रेय उचितं स्यात्तन्मे निश्चितमसंदिग्धं यथा स्यात्तथा ब्रूहि । यतोऽहं ते शिष्यः अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय " आचार्यवान् पुरुषो वेद " इति श्रुतेः ॥ ७ ॥

रा० टी०—कृपणतादोषेणाभिभूतशौर्यलक्षणस्वभावः धर्मसंमूढचेताः धर्मे संमूढं संदिग्धं चेतो यस्य स तथोक्तस्तादृशोऽहं त्वां पृच्छामि । यच्छ्रेयः स्याद्भिक्षाटनयुद्धयोर्मध्ये यच्छ्रेयः स्यान्निश्चितं तन्मे ब्रूहि । किंचाहं ते शिष्यः शासनार्हः अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय ॥ ७ ॥

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ॥
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

त० टी०—ननु लोके देवताऽऽराधनजन्यसम्पत्पुत्रराज्यादीनि यथाकामं श्रेयांसि बहूनि सन्ति । क्षत्रियाणां तु प्रायो निष्कण्टकराज्यमेव श्रेय इति त्वमेव स्वबुद्ध्या निश्चित्य तदुपाये प्रयतस्वेति चेत्तत्र " सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु श्रुतं ह्येव भगवद्दृशेभ्यस्तरति शोकमात्मवित् " इति श्रुत्यर्थं हृदि निधाय नैतानि शोकतरणोपायानीत्याह—**न हीति** । यच्छब्दः श्रेयःपरामर्शपरः । यच्छ्रेयः इन्द्रियाणां शोषणं मम शोकमपनुद्यान्नाशयेत्तद्भूमौ असपत्नं निष्कण्टकं राज्यमवाप्य सुराणां च आधिपत्यं देवेन्द्रतां च प्राप्यापि न पश्यामि । हीत्यवधारणे । प्रकर्षेण नैव पश्यामीत्यर्थः । अतस्त्वमेव तद्वक्तुमर्हसीति भावः ॥ ८ ॥

म० टी०—ननु स्वयमेव त्वं श्रेयो विचारय श्रुतसंपन्नोऽसि किं परशिष्यत्वेनेत्यत आह—**नहीति**। यच्छ्रेयः प्राप्तं सन् कर्तृ। मम शोकमपनुद्यादपनुदेन्निवारयेत्तन्न पश्यामि हि यस्मात्तस्मान्मां शाधीति "सोहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु" इति श्रुत्यर्थो दर्शितः। शोकानपनोदे को दोष इत्याशङ्क्य तद्विशेषणमाह—इन्द्रियाणामुच्छोषणमिति। सर्वदा संतापकरमित्यर्थः। ननु युद्धे प्रयतमानस्य तव शोकनिवृत्तिर्भविष्यति जेष्यति चेत्तदा राज्यप्राप्त्या इतरथा च स्वर्गप्राप्त्या। 'द्वावेतौ पुरुषो लोके' इत्यादिधर्मशास्त्रादित्याशङ्क्याह—**अवाप्येत्यादिना**। शत्रुवर्जितं सस्यादिसम्पन्नं च राज्यं तथा सुराणामाधिपत्यं हिरण्यगर्भपर्यन्तमैश्वर्यमवाप्य स्थितस्यापि मम यच्छोकमपनुद्यात्तन्न पश्यामीत्यन्वयः। "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इतिश्रुतेः। यत्कृतकं तदनित्यमित्यनुमानात् प्रत्यक्षेणाप्यैहिकानां विनाशदर्शनाच्च। नैहिक आमुत्रिको वा भोगः शोकनिवर्तकः किन्तु स्वसत्ताकालेपि भोगपारतन्त्र्यादिना विनाशकालेपि विच्छेदाच्छोकजनक एवेति न युद्धं शोकनिवृत्तयेऽनुष्ठेयमित्यर्थः। एतेनेहामुत्रभोगविरागोऽधिकारिविशेषणत्वेन दर्शितः ॥ ८ ॥

शं० टी०—मया ते किं वक्तव्यं भवान् पण्डितः खलु सूक्ष्मबुद्ध्या युक्त्या च यच्छ्रेयःसाधनं तत्त्वयैव ज्ञातव्यमित्यत आह—**नहीति**। इन्द्रियाणां देहेन्द्रियमनोबुद्धीनामुच्छोषणमत्यन्तसन्तापकं मम शोकं यदपनुद्याद्द्रव्यगुणकर्मणां मध्ये विशिष्टं यत्प्राप्तं सन्मामकं दुःखं निवर्तयेत्तदहं न प्रपश्यामि तादृशं न किंचिज्जानामि ज्ञातं चेत्कुतोयं शोक इति। हिस्तदज्ञानप्रसिद्धिद्योतनार्थः। शत्रून् जित्वा राज्यं प्राप्य शोकस्त्यक्तुं शक्यते विशिष्टपदार्थभोगेनेत्यतआह—**अवाप्येति**। भूमावसपत्नं निःशात्रवं समृद्धं समग्रं राज्यं सार्वभौमत्वमवाप्य प्राप्य वा सुराणामाधिपत्यमिन्द्रत्व ब्रह्मत्वं वाथ प्राप्याहं शोकं त्यक्तुं न शक्नुयाम्। सार्वभौमत्वेन्द्रत्वब्रह्मत्वादीनां जन्यत्वेन ध्वंसप्रतियोगित्वात्तद्वतः शोकनिवृत्तिर्न संभवति। प्रकृतेपि स्वजनध्वंसहेतुकत्वाच्छोकस्याऽतो विवेकवतो विषयप्राप्तिस्तद्भोगश्च न शोकनिवर्तको भवति। यतः शोकं निःशेषं त्यक्ष्यामि तं धर्मं ममोपदिशेति सर्वभोगविरक्तया तीव्रमुमुक्षया च भगवन्तं प्रार्थितवानर्जुनः शाधि मामिति। एतेनात्यन्तिकसंसारदुःखनिवृत्तिकारणं न भवति ब्रह्मविष्ण्वादिपदलाभः। किंतु दुःखायैव विनैव ब्रह्मज्ञानम्। तच्च गुरूपदेशं विना न सिध्यति "आचार्यवान् पुरुषो वेद" इति श्रवणादतस्तदर्थिना गुरूपसत्तिः कर्तव्येति सूचितम् 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति। एवमर्जुनस्य वृत्तं धृतराष्ट्रं प्रति ॥ ८ ॥

श्री० टी०—त्वमेव विचार्य यद्युक्तं तत्कुर्विति चेत्तत्राह—**नहीति**। इन्द्रियाणामुच्छोषणमतिशोषणकरं मदीयं शोकं यत्कर्मापनुद्यादपनयेत्तदहं न प्रपश्यामि। यद्यपि भूमौ निष्कण्टकं समृद्धं राज्यं प्राप्स्यामि तथा सुरेन्द्रत्वमपि यदि प्राप्स्यामि। एवमभीष्टं तत्सर्वमवाप्यापि शोकापनोदनोपायं न पश्यामीत्यन्वयः ॥ ८ ॥

स० टी०—ननु त्वं श्रुतिसंपन्नः स्वयं श्रेयो विचारय। परशिष्यतया किं ते इत्याशङ्क्याह सद्वचः ॥ १ ॥ यच्छ्रेयः कर्तृप्राप्तं सन्मम शोकं निवारयेत् ॥ तन्न पश्याम्यहं यस्मात्तस्मान्मां शाधि शोकिनम् ॥ ॥ २ ॥ शोकं संतापकं नित्यमिन्द्रियाणामपाकुरु ॥ नन्वाजौ यतमानस्य शोकस्ते लयमेष्यति ॥ ३ ॥ जेष्यसि त्वं तदा राज्यप्राप्त्या वा स्वर्गतोऽन्यथा ॥ इत्यत्राहारिभिर्हीनं राज्यं सस्यादिसंयुतम् ॥ ४ ॥ हिरण्यगर्भपर्यन्तमैश्वर्यं प्राप्य सर्वतः ॥ यत्स्थितस्यापि मे शोकमपनुद्यान्न तल्लभे ॥ ५ ॥ तद्यथेहेति वेदेन कृतकेनास्ति नित्यता ॥ कृतकं यत्न तन्नित्यं युक्त्यापीति विनिश्चितम् ॥ ६ ॥ नैहिकामुष्मिकौ भोगौ मम शोकनिवर्तकौ ॥ इहामुत्रफले तेन विरागो दर्शितः पुनः ॥ ७ ॥ ८ ॥

भा० टी०—ननु विजयिनो लब्धभूमिराज्यस्य हतस्य स्वधर्मबलादिन्द्रपुत्रत्वाद्वा प्राप्तदेवाधिपत्यस्य वा

तवाज्ञाननिवन्धनशोकापनोदकोपि यः कश्चित्सुलभो भविष्यतीति चेत्तत्राह—नहीति। यदित्यव्ययम्। भूमौ राज्यमसपत्नं न विद्यते सपत्नः शत्रुर्यस्य तन्निष्कण्टकमित्यर्थः। ऋद्धं सस्यादिसंपन्नं सुराणामाधिपत्यं वा प्राप्यापि तन्नहि प्रपश्यामि यः शोकमिन्द्रियाणामुच्छोषणमत्यन्तशोषकरं ममापनुद्यादपनयेदित्यन्वयः। अतस्त्वमेवेदानीमेव शोकमपाकुर्वित्यभिप्रायः। कुतो निःश्रेयसमेवेच्छसीति तत्राह—नहीति। यस्मान्ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां तन्न पश्यामि। ननु शत्रून्निहत्य राज्ये प्राप्ते शोकनिवृत्तिस्ते भविष्यति नेत्याह—अवाप्येति। अविद्यमानः सपत्नः शत्रुर्यस्य तदृद्धं राज्यं राज्ञः कर्म प्रजारक्षणशासनादि तदिदमस्यां भूमाववाप्यापि शोकापनयनकारणं न पश्यामीत्यर्थः। तर्हि देवेन्द्रत्वादिप्राप्त्या शोकापनयस्ते भविष्यति नेत्याह—सुराणामपीति। तेषामाधिपत्यमधिपतित्वं स्वाम्यमिन्द्रत्वं ब्रह्मत्वं वा तदवाप्यापि मम शोको नापगच्छतीत्यर्थ इत्येके ॥ ८ ॥

प० टी०—इदानीं त्वमेव विचार्य यद्युक्तं तत्कुरुष्वेति चेत्तत्रोर्वरिते प्रमेये पुनर्वदति—नहीति। अस्मिन् संग्रामे कार्यद्वयं दृश्यते। तत्किम् अस्माकं जये भूलोकराज्यं तथाऽस्माकं मरणे स्वर्लोकराज्यम्। अनयोरुभयोर्मध्ये एकमपि तथा न दृश्यते यदस्माकं शोकमपनुद्यान्नाशयेत्। किंभूतं शोकम्। इन्द्रियाणामुच्छोषणं सकलेन्द्रियघातकम्। अथ भूलोकराज्यं वर्णयति। असपत्नं निष्कण्टकमृद्धं समृद्धं स्वर्लोकराज्यं च सुराणां त्रयस्त्रिंशत्कोटिप्रमितानां देवानामाधिपत्यम्। तत्र भूलोकराज्ये ये भोगास्ते रुधिराक्ताः। स्वर्लोकभोगा अपि पुनश्च्यवनात् क्षणभङ्गुरा अतः शोकप्रदाः। न तु शोकशामका इत्यर्थः ॥ ८ ॥

रा० टी०—त्वमेव विचार्य यद्युक्तं तत्कुर्वित्याहार्जुनः—नहीति। इन्द्रियाणामुच्छोषणमतिशोषकरं मदीयं शोकं यत्कर्मापनुद्यादपनयेत्तदहं न पश्यामि। राज्यलाभहेतुयुद्धकर्मैव तादृशमित्यत आह—अवाप्येति। यद्यपि भूमौ निष्कण्टकं राज्यं प्राप्स्यामि तथा सुराणां देवानामाधिपत्यं च प्राप्स्यामि। एवमभीष्टं सर्वमवाप्यापि शोकापनोदनोपायं न प्रपश्यामीत्यर्थः। हत्वार्थकामानिति उक्तदिशा सर्वस्यापि दुःखहेतुत्वादिति भावः॥ ८॥

सञ्जय उवाच—एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप ॥
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

त० टी०—ततः किं वृत्तमिति धृतराष्ट्राकाङ्क्षायां सञ्जय उवाच-एवमिति। गुडाकाया निद्राया ईशः जितनिद्रोऽर्जुनः हृषीकेशमिन्द्रियनियन्तारमेवमुक्तप्रकारेणोक्त्वा गोविन्दं गां वेदलक्षणां वाणीं वेदयते इति गोविन्दः। यथोक्तमुद्योगपर्वणि 'गोविन्दो वेदनाद्गवाम्' इति। हरिवंशेऽपि 'गौरेषा तु यतो वाणी तां च वेदयते भवान्। गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवान्' इति तं सर्ववेदोपदेष्टारं सर्वज्ञं भगवन्तं न योत्स्य इत्युक्त्वा तूष्णीं बभूव। हेति स्फुटम् ॥ ९ ॥

म० टी०—तदनन्तरमर्जुनः किं कृतवानिति धृतराष्ट्राकाङ्क्षायां गुडाकेशो जितालस्यः परन्तपः शत्रुतापनोऽर्जुनः हृषीकेशं सर्वेन्द्रियप्रवर्तकत्वेनान्तर्यामिणं गोविन्दं गां वेदलक्षणां वाणीं विन्दतीति व्युत्पत्त्या सर्ववेदोपादानत्वेन सर्वज्ञमादौ एवं 'कथं भीष्ममहं सङ्ख्ये' इत्यादिना युद्धस्वरूपाऽयोग्यतामुक्त्वा तदनन्तरं न योत्स्य इति युद्धफलाभावं चोक्त्वा तूष्णीं बभूव बाह्येन्द्रियव्यापारस्य युद्धार्थं पूर्वं कृतस्य निवृत्त्या निर्व्यापारो जात इत्यर्थः। स्वभावतो जितालस्ये सर्वशत्रुतापने च तस्मिन्नागन्तुकमालस्यमतापकत्वं च नास्पदमादधातीति द्योतयितुं हशब्दः। गोविन्दहृषीकेशपदाभ्यां सर्वज्ञत्वसर्वशक्तित्वसूचकाभ्यां भगवतस्तन्मोहापनोदनमनायाससाध्यमिति सूचितम् ॥ ९ ॥

शं० टी०—सञ्जय उवाच—एवमिति। परन्तपः शत्रुतापनोपि गुडाकेशः नामैकदेशे नामग्रहणम्। गुडो लगुडो दण्डस्तद्वद्दीर्घा आसमन्तात्समाश्च केशाः शिरोजा यस्य स गुडाकेशोऽर्जुनः। गोविन्दं गोभिर्वेदान्तवाक्यैरेव

विद्यते लभ्यतइति गोविन्दस्तं हृषीकेशं स्वजनहिंसाया अत्यन्तशोकहेतुत्वान्नाहं योत्स्ये इत्येवमुक्त्वा तूष्णीं बभूव ह । पुनर्न किंचिद्बभाष इत्यर्थः ॥ ९ ॥

श्री० टी०—एवमुक्त्वाऽर्जुनः किं कृतवानित्यपेक्षायां सञ्जय उवाच—**एवमिति** । स्पष्टार्थः ॥ ९ ॥

स० टी०—ततः किं कृतवान्पार्थ इत्यत्रोवाच सञ्जयः ॥ जितालस्योऽर्जुनः शत्रुतापनश्चेन्द्रियेश्वरम् ॥ १॥ सर्वज्ञं भगवन्तं तमेवमुक्त्वा वचोत्रजम् ॥ कथं भीष्ममहं चेति स्वरूपायोग्यतां रणे ॥ २ ॥ न योत्स्यइति युद्धस्य फलाभावं ततःपरम् ॥ उक्त्वा तूष्णीं बभूवेत्थं निर्व्यापारतया स्थितः ॥ ३ ॥ स्वभावतो जितालस्ये सर्वशत्रुप्रतापने ॥ अतापकत्वमालस्यं तदा धास्यति नास्पदम् ॥ ४ ॥ इति द्योतयितुं हेति तथानायासतो हरेः । बोधाच्छोकापनेतृत्वं गोविन्देति पदध्वनिः ॥ ५ ॥ ९ ॥

भा० टी०—जिताज्ञाननिद्रोऽपि शत्रुतापनोऽपि हृषीकेशनियमितसर्वेन्द्रियोऽज्ञानं युद्धोपरतिं चाङ्गीकृत्य लोकोद्धारार्थं वेदार्थप्रकाशनाय वेदज्ञं परमात्मानं गोविन्दमेवमुक्त्वा तूष्णीं बभूवेति सूचयन्नाह—**एवमिति** । एवं पूर्वोक्तप्रकारेण हृषीकेशं सर्वेन्द्रियनियन्तारमुक्त्वा गुडाकेशः अर्जुनः परन्तपः शत्रुतापनः न योत्स्ये युद्धं न करिष्यामीति गोविन्दमुक्त्वा तूष्णीं वाग्व्यापारविनिर्मुक्तो बभूवेत्यर्थः। हेति वाक्यालङ्कारे । स्वभावतो जितालस्ये सर्वशत्रुतापने च तस्मिन्नागन्तुकमालस्यमतापकत्वं च नास्पदमध्यास्यतीति द्योतयितुं हशब्दः । गोविन्दहृषीकेशपदाभ्यां सर्वज्ञत्वसर्वशक्तित्वसूचकाभ्यां भगवतस्तन्मोहापनोदनमनायाससाध्यमिति सूचितमिति केचित् ॥ ९ ॥

प० टी०—अथाग्रे किं वृत्तमिति सञ्जय आह—**एवमुक्त्वेति** । स्पष्टम् ॥ ९ ॥

रा० टी०—ततः किमकरोदर्जुन इति धृतराष्ट्राकाङ्क्षां निरासयन्नाह सञ्जयः—**एवमुक्त्वेति** । हृषीकेशं सर्वेन्द्रियप्रेरकं गुडाकेशो जितनिद्रः परन्तपः शत्रुतापनः गोविन्दं गाः वेदवाचः प्रतिपादकत्वेन विन्दते लभत इति गोविन्दः तम् । हेत्याश्चर्ये । महाधैर्यादिगुणवतोप्येवं बुद्धिर्जातेति ॥ ९ ॥

तमुवाच हृषीकेशः प्रहसन्निव भारत ॥
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

त० टी०—एवं युद्धत्यागाय कृतव्यवसायेऽर्जुने मम पुत्राणां सुखं जीवनं सिद्धमिति चेतनाचेतननियन्तरि दुर्जनविनाशायावतीर्णे भगवत्यधिष्ठातरि सति नाशासनीयमिति धृतराष्ट्राय सूचयितुं सञ्जय आह—तमिति । हे भारत ! महावीरस्य भरतस्य वंशे जातस्य तव युद्धोपरतौ पुत्रस्नेहेन हर्षो नोचित इति भावः । हृषीकेशः सर्वेन्द्रियनियन्ता तमुभयोः सेनयोर्मध्ये युद्धार्थं विषीदन्तं विषादं कुर्वन्तमर्जुनं प्रहसन्निव इदं वक्ष्यमाणं वच उवाचेत्यन्वयः । पाण्डुपुत्रस्य क्षत्रियसम्मतस्य नैतद्युक्तमिति लज्जानिमित्तं कोपमुत्पादयितुं प्रहसन्निवेत्युक्तम् । अर्जुनं निमित्तीकृत्य सर्वसेनासंहारार्थं प्रवृत्तस्य गुरुत्वेनाङ्गीकृतस्य हितोपदेष्टुर्भगवतः स्वधर्मे प्रवर्त्तयितुमुद्यतस्य प्रहासो नोचितः, किन्तु (तद्विद्या-) तद्विधाबुद्धिकौशल्यगर्वापनयनेन तत्त्वज्ञानाधिकारितासम्पादनाय तथा वचनमितीवशब्दाभिप्रायः॥ १० ॥

म० टी०—एवं युद्धमुपेक्षितवत्यप्यर्जुने भगवान्नोपेक्षितवानिति धृतराष्ट्रदुराशानिरासायाह—**तमिति** । सेनयोरुभयोर्मध्ये युद्धोद्यमेनागत्य तद्विरोधिनं विषादं मोहं प्राप्नुवन्तं तमर्जुनं प्रहसन्निव अनुचिताचरणप्रकाशनेन लज्जाम्बुधौ मज्जयन्निव हृषीकेशः सर्वान्तर्यामी भगवानिदं वक्ष्यमाणमशोच्यानित्यादि वचः परमगम्भीरार्थमनुचिताचरणप्रकाशकमुक्तवान् । नतूपेक्षितवानित्यर्थः। अनुचिताचरणप्रकाशनेन लज्जोत्पादनं प्रहासः । लज्जा च दुःखात्मिकेति द्वेषविषय एव मुख्यः । अर्जुनस्य तु भगवत्कृपाविषयत्वादनुचिताचरणप्रकाशनस्य च विवेकोत्पत्तिहे-

तुत्वादेकदलाभावेन गौण एवायं प्रहास इति कथयितुमिवशब्दः। लज्जामुत्पादयितुमिव विवेकमुत्पादयितुमर्जुनस्यानुचिताचरणं भगवता प्रकाश्यते। लज्जोत्पत्तिस्तु नान्तरीयकतयास्तु मास्तु वेति न विवक्षितेति भावः ॥ १० ॥

शं० टी०—यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्म इति पृष्टः श्रीभगवान् शोचन्तं तं दृष्ट्वा किमुक्तवानित्याकाङ्क्षायामाह—**तमिति**। हे भारत! सेनयोरुभयोर्मध्ये विषीदन्तं मदीया एते म्रियन्त इति शोचन्तमेतान् हत्वा तद्दोषेणाहं निरयं यास्यामीत्यात्मनि निष्क्रिये निर्विकारे कर्तृत्वादिधर्मशून्य एवानाद्यविद्ययाऽनात्मतद्धर्मानध्यस्याहं कर्ता भोक्तेति विपरीतभावेन मुह्यन्तं तमर्जुनं दृष्ट्वा परमकृपालुः श्रीभगवान् "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यादिश्रुतिप्रसिद्धब्रह्मात्मैकत्वज्ञानेन विना नायं द्वैतभ्रमप्रवर्तकेन भेदशास्त्रेण बोध्यमानः शोकसागरं भ्रममूलकं तर्तुं शक्नोतीति मत्वा पदार्थद्वयशोधनपूर्वकं तज्ज्ञानमुपदिदिक्षुः सन्नादौ त्वंपदार्थशोधनमवतारयितुं तदीयवृत्तं भवान् पण्डितइति मम बुद्धिरेवं वा तव पाण्डित्यमिति प्रहसन्निव वचनमिदमुवाच १०

श्री० टी०—ततः किं वृत्तमित्यपेक्षायामाह—**तमुवाचेति**। प्रहसन्निव प्रसन्नमुखः सन्नित्यर्थः ॥ १० ॥

स० टी०—एवमप्यर्जुने युद्धमुपेक्षितवतीश्वरः। नैवोपेक्षितवानित्थमन्वं प्रत्याह सञ्जयः ॥ १ ॥ आगत्य सेनयोर्मध्ये युद्धोद्योगेन चार्जुनम् ॥ प्राप्नुवन्तं विषादं च संमोहं युद्धरोधकम् ॥ २ ॥ तच्चेष्टाया ह्यनौचित्यं हसनेन प्रकाशयन् ॥ अन्तर्यामी तमाहेशो लज्जाब्धौ मज्जयन्निव ॥ ३ ॥ वक्ष्यमाणमिदं चातिगम्भीरं सारवद्वचः ॥ ४ ॥ १० ॥

भा० टी०—एतदनन्तरं भगवान् किं कृतवानित्यत आह—**तमिति**। तं सेनयोरुभयोर्मध्ये विषीदन्तं शोकमोहावङ्गीकुर्वन्तमर्जुनं हृषीकेशो भगवान् वासुदेवः प्रहसन्निव मदाज्ञावशवर्तिनि त्वय्यहं प्रसन्नोस्मीति प्रकटयन्निवेदं वक्ष्यमाणं वचो वचनमुवाच। अनुचिताचरणप्रकाशनेन लज्जाम्बुधौ मज्जयन्निवेति केचित्। मूढोऽप्ययममूढवद्वदतीति प्रहसन्निवेत्यन्ये। त्वमपि भरतवंशोद्भवत्वाद्भगवद्वाक्यं सावधानतया श्रोतुमर्हसीति द्योतयन् सञ्जयः प्रज्ञाचक्षुषं धृतराष्ट्रं संबोधयति—भारतेति। तदाश्वासार्थं भारतान्वयेत्येवं संबोध्य भगवांस्तमुवाचेत्येके ॥ १० ॥

प० टी०—अथार्जुनं विषादेन न योत्स्य इति निश्चित्य तूष्णींभूतं प्रति भगवानाह—**तमुवाचेति**। हृषीकेश आशयज्ञः कृष्णस्तमर्जुनं प्रति प्रहसन्निव प्रहासगर्भमिव वचनमुवाच। ननु विषादावसरे हासानुपक्रमेऽपि कथमुक्तं प्रहसन्निवेति, तत्रोच्यते। विषादोत्पत्तेरकारणत्वाद् यतो दीनानाथवधे एव विषादोत्पत्तेर्दर्शनात्। प्रकृते तु भीष्मद्रोणकर्णदुर्योधनाद्याः शौर्येण शक्रमप्यगणयन्तः क्षात्रधर्ममनुस्मृत्य प्रवृत्ता न तु मूर्खत्वेन तेषु कथं कृपापात्रत्वम्। तथा ते मद्वध्या एवेति कुतो ज्ञातं स्वभुजप्रतापविश्वासादुत सहायीभूतास्मत्प्रभावात्। नाद्यः। अस्मान् प्रति स्वभुजप्रतापाख्यापनस्यानौचित्यात्। किंच अस्मत्सहायानुपयोगात्। कौतुकदर्शनार्थं चेत्तर्हीतरलोकवदकिंचित्करत्वेनागमनस्य वैयर्थ्यात्। न द्वितीयः। वधस्यास्मन्निमित्तकत्वेन विषादानुत्पत्तेः। अतो यद्विषादकारणमुक्तं तत्प्रतारणमात्रं कर्म नैष्कर्म्यमार्गवहिर्भूतमित्याशयेन ईषद्धास्यमुखो भूत्वा प्रोवाचेत्यर्थः ॥ १० ॥

रा० टी०—ततः किं जातमित्यत आह—**तमुवाचेति**। हे भारतेति धृतराष्ट्रसंबोधनम्। प्रहसन्निवेति परिहासकरवाक्योक्तिद्योतकहासस्य सूचनायेवशब्दः ॥ १० ॥

श्रीभगवानुवाच—अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

न० टी०–तत्र " तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय समन्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् " इति श्रुतेरुक्तलक्षणाधिकारिणे गुरुणा ब्रह्मविद्योपदेष्टव्या अतस्तथाभूतार्जुनाय " एतस्याक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः । भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चमः । यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । नारायणः परं ब्रह्म तत्त्वं नारायणः परः । नारायणः परो ध्याता ध्यानं नारायणः परः । सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत " 'ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् । जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् ॥ यदाह वसुधा सर्वं सत्यमेतद्दिवौकसः । अहं भवो भवन्तश्च सर्वे नारायणात्मकाः ॥ किमनेन जगन्नाथ सर्वं त्वद्वशगं जगत् ' " एकः समस्तं यदिहास्ति किञ्चित् तदच्युतो नास्ति परं ततोऽन्यत् । सकलमिदमहं च वासुदेवः परमः पुमान्परमेश्वरः स एकः को मोहः कः शोक एकत्वमनुपश्यतः " इत्यादिश्रुतिस्मृतिनिर्णीता सूर्यचन्द्रवाय्वग्नीन्द्रमृत्युद्यावादिसर्वचेतनाचेतननियन्तृजगज्जन्मस्थितिलयाभिन्ननिमित्तोपादानकारणसर्वव्यापकसर्वात्मभूतसर्वभिन्नाभिन्नस्वरूपाक्षरनारायणहरिवासुदेवादिशब्दाभिधेयपरब्रह्मस्वरूपगुणादिविषयिणी विद्या निःशेषशोकमोहविनाशिनी तामेवोपदेष्टुं तावन्नियम्यभूतचिदचिद्वर्गयाथात्म्यज्ञानाभावेन शोचते देहात्मविवेकमुत्पादयितुं तस्य पाण्डित्याभिमानं निरासयन् श्रीभगवानुवाच–अशोच्यानिति । अशोच्यान् शोचितुमयोग्यान् पुण्यलोकजयोद्यतान्भीष्मद्रोणादीन् त्वमन्वशोचः शोकमकार्षीः ' नच श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे । किन्नो राज्येन गोविन्द किम्भोगैर्जीवितेन वा ' इत्यादिना एतैर्विना राज्यादिना जीवितेन वाऽस्माकं किं प्रयोजनमित्येवं शोकं कृतवानसीति ते मूर्खत्वम् । किञ्च प्रज्ञावादांश्च भाषसे प्रज्ञावतां वादाः प्रज्ञावादाः स्वपाण्डित्यद्योतकास्तान् 'पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः । उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवति । गुरूनहत्वा हि महानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके ' इत्यादिना भाषसे कथयसि । एवं मूर्खत्वं पाण्डित्यं चैकस्मिन्विरुद्धमतो मुधा ते पाण्डित्यमित्यर्थः । यतो गतासून् गतप्राणान् मृतान् अगतासून्प्राणवतो जीवितान् पण्डिता नानुशोचन्ति । तत्त्वविवेचिनी बुद्धिः पण्डा सा जाता येषां ते पण्डितास्ते देहेन्द्रियादिविच्छेदे सत्त्वे वा तद्व्यतिरिक्तात्मनां शोकं न कुर्वन्तीत्यर्थः ॥ ११ ॥

म० टी०–यदि युद्धारम्भात्प्रागेव गृहे स्थितो युद्धमुपेक्षेत तदा नानुचितं कुर्यात् । महता संरम्भेण तु युद्धभूमावागत्य तदुपेक्षणमतीवानुचितमिति कथयितुं सेनयोरित्यादिविशेषणम् । एतच्चाशोच्यानित्यादौ स्पष्टं भविष्यति । तत्रार्जुनस्य युद्धाख्ये स्वधर्मे स्वतो जातापि प्रवृत्तिर्द्विविधेन मोहेन तन्निमित्तेन च शोकेन प्रतिबद्धेति द्विविधो मोहस्तस्य निराकरणीयः । तत्रात्मनि स्वप्रकाशपरमानन्दरूपे सर्वसंसारधर्माऽसंसर्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूप एकः सर्वप्राणिसाधारणः । अपरस्तु युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्मत्वप्रतिभासरूपोऽर्जुनस्यैव करुणादिदोषनिबन्धनोऽसाधारणः । एवमुपाधित्रयविवेकेन शुद्धात्मस्वरूपबोधः प्रथमस्य निवर्तकः । द्वितीयस्य तु हिंसादिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाभावबोधोसाधारणः । शोकस्य तु कारणनिवृत्त्यैव निवृत्तेर्न पृथक् साधनान्तरापेक्षेत्यभिप्रेत्य क्रमेण भ्रमद्वयमनुवदन् श्रीभगवानुवाच–अशोच्यानिति । अशोच्यान् शोचितुमयोग्यानेव भीष्मद्रोणादीनात्मसहितान् त्वं पण्डितोपि सन् अन्वशोचः अनुशोचितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेत्येवमर्थकेन ' दृष्ट्वेमं स्वजनम् ' इत्यादिना । तथा चाशोच्ये शोच्यभ्रमः पश्वादिसाधारणस्तवात्यन्तपण्डितस्यानुचित इत्यर्थः । तथा 'कुतस्त्वाकश्मलम्' इत्यादिना

मद्वचनेनानुचितमिदमाचरितं मयेति विमर्शे प्राप्तेऽपि त्वं स्वयं प्रज्ञोपि सन् प्रज्ञानां अवादान् प्रज्ञैर्वक्तुमनुचितान् शब्दांश्च कथं भीष्ममहं सङ्ख्यइत्यादीन् भाषसे वदसि नतु लज्जया तूष्णीं भवसि । अतःपरं किमनुचितमस्तीति सूचयितुं चकारः । तथाचाधर्मे धर्मत्वभ्रान्तिर्धर्मे चाधर्मत्वभ्रान्तिरसाधारणी तवातिपण्डितस्य नोचितेति भावः । प्रज्ञावतां पण्डितानां वादान् भाषसे परं न तु बुध्यसइति वा । भाषणापेक्षयानुशोचनस्य प्राक्कालत्वादतीतत्वनिर्देशः । भाषणस्य तु तदुत्तरकालत्वे नाव्यवहितत्वाद्वर्तमानत्वनिर्देशः । छान्दसेन तिङ्व्यत्यये नानुशोचसीति वर्तमानत्वं व्याख्येयम् । ननु बन्धुविच्छेदे शोको नानुचितः वसिष्ठादिभिर्महाभागैरपि कृतत्वादित्याशङ्क्याह—**गतासूनिति** । ये पण्डिताः विचारजन्यात्मतत्वज्ञानवन्तः ते गतप्राणानगतप्राणांश्च बन्धुत्वेन कल्पितान्देहान्नानुशोचन्ति एते मृताः सर्वोपकरणपरित्यागेन गताः किं कुर्वन्ति क तिष्ठन्ति एते च जीवन्तो बन्धुविच्छेदेन कथं जीविष्यन्तीति न व्यामुह्यन्ति । समाधिसमये तत्प्रतिभासाभावात् । व्युत्थानसमये तत्प्रतिभासेपि मृषात्वेन निश्चयात् । न हि रज्जुतत्वसाक्षात्कारेण सर्पभ्रमेऽपनीते तन्निमित्तभयकम्पादि संभवति न वा पित्तोपहतेन्द्रियस्य कदाचिद् गुडे तिक्तताप्रतिभासेपि तिक्तार्थितया तत्र प्रवृत्तिः संभवति मधुरत्वनिश्चयस्य बलवत्त्वात् । एवमात्मस्वरूपाज्ञाननिबन्धनत्वाच्छोच्यभ्रमस्य तत्स्वरूपज्ञानेन तदज्ञानेपनीते तत्कार्यभूतः शोच्यभ्रमः कथमवतिष्ठेतेति भावः । वसिष्ठादीनां प्रारब्धकर्मप्राबल्यात्तथा तथानुकरणं न शिष्टाचारतयाऽन्येषामनुष्ठेयतामापादयति। शिष्टैर्धर्मबुद्ध्यानुष्ठीयमानस्यालौकिकव्यवहारस्यैव तदाचारत्वात्।अन्यथा निष्ठीवनादेरप्यनुष्ठानप्रसङ्गादिति द्रष्टव्यम् । यस्मादेवं तस्मात्त्वमपि पण्डितो भूत्वा शोकं माकार्षीरित्यभिप्रायः ११

शं० टी०—अशोच्यानिति । न शोच्या अशोच्याः शोचितुमनर्हा भीष्मद्रोणादयस्तानेतानशोच्यानेव त्वमन्वशोच एतानुद्दिश्य शोकं कृतवानसि । ननु स्वजनमरणे सर्वेषां शोको जायत एव कथमुच्यत एतानन्वशोचस्त्वमिति कुतो वा म्रियमाणानामेतेषामशोच्यत्वमिति चेत्त्वमत्र प्रष्टव्यः । किं भीष्मद्रोणादिशब्दवाच्यार्थमुद्दिश्य शोच्यते उत लक्ष्यार्थमिति । आद्ये भीष्मादिशब्दवाच्यार्थस्यासद्वृत्तत्वमवेक्ष्य शोच्यते किंवा तन्नाशमुद्दिश्य शोच्यते इति । नाद्यः महानुभावा इति त्वयैव तन्महत्त्वप्रतिपादनात् । न द्वितीयः तदसंभवात् । "मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना" इति शरीरस्य मृत्युग्रस्तत्वश्रवणात् । 'दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः' इति देहस्य नश्वरत्वश्रवणात् सर्वदाम्रियमाणप्राणिसंदर्शनाच्च । प्रत्यक्षादिप्रमाणैरेव ध्रुवमृत्युकस्य देहादेः शोच्यत्वं न संभवति । न प्रथमे द्वितीयः । आत्माऽजत्वान्न जायते जननाभावान्न म्रियते मरणाभावान्नित्यः अजो नित्यः शाश्वत इति,नित्यो नित्यानामिति, लक्ष्यार्थस्यात्मनो नित्यत्वश्रवणान्नित्यस्य सदाप्तस्यात्मनः शोच्यत्वानुपपत्तेः। नहि बुद्धिमतां नित्यः पदार्थः शोच्यो भवति नाप्यनित्यश्च । यतएवं वाच्यार्थस्य लक्ष्यार्थस्य चोभयोरशोच्यत्वे सिद्धे त्वमशोच्यानेव शोच्यत्वबुद्ध्या मूढवदनुशोचसि नैतावन्मात्रमेव करोषि अपि तु प्रज्ञावादांश्च भाषसे सदसत्पदार्थस्वरूपं विविच्य ये प्रकर्षेण जानन्ति ते प्रज्ञाः पण्डितास्तेषां शास्त्रमभिव्याप्ताः वादा आवादास्तान् प्रज्ञावादान् । 'कुलक्षये प्रणश्यन्ति कुलधर्माः' इति 'उत्सन्नकुलधर्माणाम् ' इति ' कथं भीष्ममहं संख्ये ' इत्यादीनि प्रौढवचनान्यपि भाषसे । यदशोच्यशोचनं यच्च शास्त्रार्थप्रकटनपाण्डित्यं तदेतद्द्वयं तेजस्तिमिरवत्परस्परविरुद्धं नैकत्र स्थातुमर्हत्यतो भवान् मूढ एव भवति न तु पण्डितः । तर्ह्येवं समये पण्डिताः कथं वर्तन्त इत्याह—**गतासूनिति** । केवलं मूढा ममैते पुत्रादयो मृता इति गतासूनेवानुशोचन्ति न त्वगतासून् । शास्त्रज्ञास्तु ममैते पुत्रादयो मूढा दुर्भगा दुर्वृत्ता जाता इत्यगतासूनेवानुशोचन्ति न तु गतासून् । पण्डितास्तु गतासूनगतासूंश्च पुत्रादीन्नानुशोचन्ति । गतासूनामगतासूनामप्युभयेषामविद्याकार्यत्वेन स्वप्नार्थवदसत्वादुभयत्र ब्रह्मैव पश्यन्ति तएव हि पण्डिताः । ये त्वसत्त्यक्त्वा सदेव गृह्णन्ति सदा सर्वत्र ब्रह्मदर्शनं हि पाण्डित्यं"ब्राह्मणः पाण्डित्यं निर्विद्य"इति श्रुतेः । अत उक्तलक्षणाभावात्त्वं मूढ एव न तु पण्डित इत्यर्थः ।। ११ ।।

श्री० टी०—देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच—**अशोच्यानिति।** शोकस्य विषयभूतानेव बन्धूंस्त्वमन्वशोचः अनुशोचितवानसि 'दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्'इत्यादिना। तत्र 'कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्'इत्यादिना मया बोधितोऽपि पुनश्च प्रज्ञावतां पण्डितानां वादान् शब्दान् ' कथं भीष्ममहं संख्ये ' इत्यादीन्केवलं भाषसे नतु पण्डितोऽसि । यतः गतासून्गतप्राणान्बन्धूनगतासूंश्च जीवतोऽपि बन्धुहीना एते कथं जीविष्यन्तीति नानुशोचन्ति ॥ ११ ॥

स० टी०—तत्रार्जुनस्य संग्रामे प्रवृत्तिरभवत्स्वतः । मोहेन द्विविधेनैषा प्रतिबद्धा स च द्विधा ॥ १ ॥ मोह आदौ निराकार्यस्तत्स्वरूपं प्रदर्श्यते । स्वप्रकाशे परानन्दे शुद्धेऽसंसारिणि स्वतः ॥ २ ॥ शरीरत्रितयाध्यासात्संसारे सत्यता मतिः । अनात्मनि शरीरादावात्मताधीभ्रमात्मिका ॥ ३ ॥ सर्वसाधारणो मोह एकोऽसाधारणोऽपरः । स्वधर्मेऽधर्मताबुद्धिर्युद्धे पार्थस्य याऽभवत् ॥ ४ ॥ मोहोऽयमपरोऽप्यत्रासाधारणपदाभिधः । देहत्रयाद्विविच्यात्मतत्त्वं प्रत्यञ्चमागमैः ॥ ५ ॥ यो बोधः स्यात्स आद्यस्य मोहस्य विनिवर्तकः । स्वधर्मत्वेन युद्धस्य हिंसादीनां न दोषता ॥ ६ ॥ एवं बोधो द्वितीयस्य संमोहस्य निवर्तकः । हेतुनाशे न शोकस्य विनिवृत्तिः स्वतो भवेत् ॥ ७ ॥ इत्यभिप्रेत्य भगवांस्तद्द्वयं क्रमशो वदन् । उवाच सर्वशोकाद्यध्यासमूलं निवर्तयन् ॥ ८ ॥ भीष्मादीनात्मसहितानयोग्यानेव शोचितुम् । पण्डितः सन्नहो तांस्त्वमनुशोचितवानसि ॥९॥ म्रियन्ते मन्निमित्तं ते किं करिष्यामि तैर्विना । किं नो राज्यादिनेत्यादिवचोभिर्बहुधा भ्रमात् ॥ १० ॥ शोच्यभ्रमस्तवाशोच्ये स मान्यस्तिर्यगादिभिः । अत्यन्तपण्डितस्यायं नोचितः सर्वथा भवेत् ॥ ११ ॥ प्राज्ञैर्वक्तुमयोग्यांश्च शब्दान्वदसि नैकधा । कथं भीष्ममहं संख्ये इत्यादींस्त्वं न लज्जया ॥ १२ ॥ तूष्णीं भवसि किं ते स्यादनौचित्यमतःपरम् । यद्वा प्रज्ञावतांवादान्भाषसे न तु बुद्ध्यसे ॥ १३ ॥ मौढ्यं पाण्डित्यमेकत्र त्वयि दृष्टं तदद्भुतम् । ननु बन्धुवियोगेन शोकः स्याद्धीमतामपि ॥ १४ ॥ मैवं धीमत्त्वमेतद्धि प्रहासायैव कल्पते । ये पण्डिता गुरोः श्रुत्वा वेदान्तविषयं पदम् ॥ १५ ॥ ब्रह्मैक्यं युक्तिभिर्मत्वा निदिध्यास्य निरन्तरम् । साक्षात्कृतात्मतत्त्वास्ते नष्टाविद्यामला बुधाः ॥ १६ ॥ मृतान्वा जीवतो बन्धून्नानुशोचन्ति कल्पितान् । एते सर्वे परित्यज्य गतास्तिष्ठन्ति कुत्र ते ॥ १७ ॥ जीविष्यन्ति कथं चैते जीवन्तो बन्धवो मम। बन्धुविच्छेदतश्चैवं न व्यामुह्यन्ति पण्डिताः ॥ १८ ॥ यथा स्वप्ने मृतो बन्धुर्जीवन्वा शोच्यतां गतः । न तन्निमित्तको मोहो जागरेऽप्यनुवर्तते ॥१९॥ एवमज्ञानजभ्रान्त्या कल्पिता बन्धवो मृताः । जीवन्तो वा न ते बोधे शोकमोहप्रदाः सताम् ॥ २० ॥ देहादेर्नश्वरात्मत्वान्नित्यत्वात्प्रत्यगात्मनः । न शोच्याः प्राणिनः सर्वे स्वात्मतत्त्वविदां सताम् ॥ २१ ॥ एवं त्वं पण्डितो भूत्वा माकार्षीः शोकमान्ध्यजम् । स्वात्मतत्त्वे सदा स्थैर्यं प्राप्नुहीत्याशयो हरेः ॥ २२ ॥ ११ ॥

भा० टी०—तदेवमर्जुनः 'कथं भीष्ममहम्' इत्यादिना प्रदर्शिताभ्यां गुर्वादिष्वहमेतेषां ममैतइति भ्रान्तिप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्ताभ्यां शोकमोहाभ्यां स्वतएव क्षत्रधर्मे युद्धे प्रवृत्तोप्यभिभूतविवेकविज्ञानस्तस्माद्युद्धादुपरराम परधर्मं च भिक्षाशनादिकं कर्तुं प्रववृते । तथा च सर्वप्राणिनां शोकमोहाविष्टचेतसां स्वभावत एव स्वधर्मपरित्यागः प्रतिषिद्धाश्रयणं च स्यात् स्वधर्मे प्रवृत्तानामपि तेषां कायिकादित्रिविधं कर्म फलाभिसंधिपूर्वकमेव साहंकारं भवति तत्रैवं सति धर्माधर्मोपचयादिष्टानिष्टजन्ममरणादि संप्राप्तलक्षणः संसारो नोपशाम्यत्यतो धर्मसंमूढचेतसं महति शोकसागरे निमग्नं लोकमुद्दिधीर्षुः संसारबीजभूतयोस्तयोश्चित्तशुद्धिजनकनिष्कामकर्मणः लब्धात्तत्त्वज्ञानात्केवलादन्यतो निवृत्तिमपश्यन् उपायोपेयभूतं निष्ठाद्वयमुपादिदिक्षुरर्जुनं निमित्तीकृत्य भगवान् वासुदेव आह—**अशोच्यानित्यादिना।** एतेन तत्रार्जुनस्य द्विविधो मोहो निराकरणीयः तत्रात्मन्युपाधित्रयाधिविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपः सर्व-

प्राणिसाधारण एकः । अपरस्तु स्वधर्मेऽधर्मत्वप्रतिभासरूपोऽर्जुनस्यैवासाधारण इति प्रत्युक्तं सर्वप्राणिसाधारणयोर्मोहयोर्लोक उपलभ्यमानत्वात् । तथा च सर्वप्राणिनामिति भाष्यकारैस्तथैवोक्तत्वात् । अर्जुनं निमित्तीकृत्य लोकार्थमेव भगवतोपदेशः कृत इति भाष्यकृद्भिः स्वेन च स्थापितत्वात्।अशुद्धान्तःकरणानां तु योगनिष्ठोक्तान्तःकरणशुद्धिद्वारा ज्ञानभूमिकारोहणार्थं 'धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते' इत्यादिनेति । लोकेऽस्मिन्निति श्लोकस्थस्वग्रन्थविरोधाच्चेति दिक् । अशोच्यान् शोकानर्हान् सद्वृत्तत्वात्परमार्थरूपेण नित्यत्वाच्च शोचितवानसि।प्रज्ञावतां बुद्धिमतां वादान् 'किं नो राज्येन । कथं भीष्ममहम्' इत्यादीनि वचनानि च भाषसे । तदेतदुभयमुन्मत्तचेष्टितमित्यभिप्रायः । यतः पण्डिताः आत्मज्ञाः गतासून्मृतानगतासूनमृतांश्च नानुशोचन्ति । अहो कष्टमेते मृता एते मरिष्यन्तीति चिन्तां न कुर्वन्तीत्यर्थः । यत्तु प्रज्ञानां पण्डितानामवादान् वक्तुमयोग्यान् भाषस इति तदुपेक्ष्यम् । अर्हार्थे घञो दुर्लभत्वात् विशेष्याध्याहारसापेक्षत्वाच्चेति ॥ ११ ॥

प० टी०—अथार्जुनस्य ज्ञानकर्मोपदेशान् विषादं परिहरन् त्रिचत्वारिंशच्छ्लोकैर्भगवानाह—**अशोच्यानिति।** अशोच्यान् शोकानर्हानेव बन्धून् अनु अनुलक्ष्मीकृत्य अशोचः शोचितवानसि 'दृष्ट्वेमं स्वजनं कृष्ण' इत्यादिना । अनन्तरं 'कुतस्त्वा कश्मलमिदम्' इत्यादिनास्माभिर्बोधितोऽपि प्रज्ञावादान् प्रज्ञया वचनचातुर्यमात्रेण शब्दान् भाषसे अज्ञानप्रलपितवद्वदसि । नह्येतादृशं भाषणं त्वयि युक्तमित्यर्थः । यतः पण्डिता ज्ञातारो गतासून् गतप्राणान् तथागतासून् जीवतो बन्ध्वादीन् कथं जीविष्यन्तीति अनु न शोचन्ति ॥ ११ ॥

रा० टी०—भगवन्माहात्म्यज्ञानतद्भक्तिपूर्वकभगवदाराधनरूपतया स्वविहितवृत्तित्वेन वाऽनुष्ठीयमानो नारायणद्विट्तदनुबन्धिनिग्रहः क्षत्रियाणां परमो धर्मः । तं धर्मं बन्धुस्नेहादधर्मत्वेनोक्तदिशा शङ्कमानमर्जुनं प्रत्युक्तरूपो निग्रह एव परमधर्मः तद्विरुद्धः सर्वोपि अधर्म इति कृत्स्नगीताशास्त्रेण बोधयिष्यन्नादौ तावदविवेकेन तव शोक इत्याह—**अशोच्यानिति** । अशोच्यान् शोकानर्हान् हे पार्थ! त्वं अन्वशाचेः।यांस्त्वं शोचितवानभूस्ते न शोकार्हा इति यावत् । प्रज्ञावादांश्च भाषसे । प्रज्ञयोत्था वादाः प्रज्ञावादाः स्वबुद्धिमात्रपरिकल्पिता वादाः तान्भाषसे यान्प्रभाषसे ते स्वबुद्धिमात्रपरिकल्पिता वादाः न वृद्धसंमता इति यावत् । यद्वा प्रकर्षेण जानन्तीति प्रज्ञाः । "इगुपधज्ञाप्रीकिरः कः" तेषामवादाः प्रज्ञावादाः प्राज्ञविरुद्धवादास्तान्प्रभाषस इत्यर्थः । नहि दृष्ट्वेमं स्वजनं कृष्णेत्याद्यर्जुनवाक्येषु कश्चित्प्राज्ञसंमतवादोस्ति । नहि प्राज्ञा नारायणद्विट्तदनुबन्धिनिग्रहमधर्मं वदन्तीतिभावः । ननु आसन्नविनाशास्ते कथमशोच्या इत्यतआह—**गतासूनिति** । पण्डिताः ज्ञानिनः गतासूनासन्नविनाशान् अगतासूनिवेत्युपमार्थश्चकारः । जीवतइव तान्नानुशोचन्ति यतोऽतो न शोच्यास्त इति तानन्वशोचस्त्वमित्यर्थः ॥ ११ ॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ॥
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

त० टी०—ननु कुतस्तेऽशोच्याः यतस्तान् पण्डिता न शोचन्तीत्यपेक्षायां देहातिरिक्तात्मनां नित्यत्वादित्याह—न त्विति । तत्रात्मत्वेन स्वस्य जीवात्मसाम्यापात्तिं तुशब्देन निराकरोति । सर्वात्मनां मध्ये यथा अहं सर्वेश्वर इतः पूर्वस्मिन्काले जातु कदाचिन्नासं नाभवमिति न अपि त्वासमेव । तथा त्वं नासीरिति न किन्त्वासीरेव । तथेमे जनाधिपा नाऽऽसन्निति न किन्त्वासन्नेव । एतेनात्मनां भूतकाले सत्त्वादुत्पत्तिर्निराकृता—नचेति । पुनः सर्वे वयं पूर्वोक्ता अतः वर्त्तमानकालात् परमन्ते (परमग्रिमे) काले न भविष्याम इति न अपि तु भविष्याम एव । एतेन नाशाभावो निरूपितः उत्पत्तिनाशाभावादेव मध्येऽपि तेषां सत्त्वं सिद्ध्यति । एवं कालत्रयेऽपि सत्त्वप्रतिपादनात्सर्वे एवात्मानो नित्या अतोऽशोच्या इति भावः ॥ १२ ॥

म० टी०—नत्वेवेत्याद्येकविंशतिश्लोकैरशोच्यानन्वशोचस्त्वमित्यस्य विवरणं क्रियते । 'स्वधर्ममपि चावेक्ष्य' इत्याद्यष्टभिः श्लोकैः 'प्रज्ञावादांश्च भाषसे' इत्यस्य मोहद्वयस्य पृथक्प्रयत्ननिराकर्तव्यत्वात् । तत्र स्थूलशरीरादात्मानं विवेक्तुं नित्यत्वं साधयति । तुशब्दो देहादिभ्यो व्यतिरेकं सूचयति । यथा अहमितः पूर्वं जातु कदाचिदपि नासमिति नैव अपितु आसमेव । तथा त्वमप्यासीः इमे जनाधिपाश्चासन्नेव । एतेन प्रागभावाप्रतियोगित्वं दर्शितम् । तथा सर्वे वयमहं त्वमिमे जनाधिपाश्च अतःपरं न भविष्याम इति न अपि तु भविष्याम एवेति ध्वंसाप्रतियोगित्वमुक्तम् । अतः कालत्रयेपि सत्तायोगित्वादात्मनो नित्यत्वेनानित्याद्देहाद्वैलक्षण्यं सिद्धमित्यर्थः ॥ १२ ॥

शं० टी०—अशोच्यानन्वशोचस्त्वमिति भीष्मादीनामशोच्यत्वे प्रतिपादिते भीष्मादिपदलक्ष्यार्थस्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचितं भवति । तमिममर्थमजानन्तमर्जुनमालक्ष्य श्रीभगवान् लक्ष्यार्थस्यात्मनो नित्यत्वे त्वजत्वं हेतुरित्यजत्वहेतुना शशविषाणस्यापि नित्यत्वे प्राप्ते भावत्वे सत्यजत्वं नित्यत्वप्रयोजकम् । यस्य कालत्रये सत्ता न व्यभिचरति स भावो नित्यश्च । यस्य व्यभिचरति नासौ भावोऽनित्यश्चेत्यात्मनः कालत्रयेपि सत्ताप्रतिपादनद्वारा देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचयितुं पुनस्तत्त्वंपदार्थयोः शोधनं शोधितयोरेकत्वं च प्रतिपादयति । त्वंपदार्थस्य निःशेषसंसारदुःखनिवृत्त्या नित्यनिरतिशयाखण्डानन्दावाप्तये तत्पदार्थस्यापि परोक्षत्वपरिच्छिन्नत्वानर्थनिवृत्त्याऽद्वितीयत्वाखण्डैकरसत्वसिद्धये च—**नत्वेवाहमिति** । अहं तत्पदार्थः परमात्मा सर्वज्ञः सर्वशक्तिः सर्वतन्त्रः स्वतन्त्रः परमेश्वरः जातु कदाचिन्नासमिति न किंतु सर्वदा आसमेव । मदसम्भवे जगत्सृष्ट्याद्यसंभवात् । तथाहि "जन्माद्यस्य यतः" "यतो वा इमानि भूतानि जायन्ते । यतो जातानि भुवनानि विश्वा । स ईक्षत लोकान्नुसृजा इति । सइमाँल्लोकानसृजत " इत्यादिश्रुतिभिर्मत्त एव जगदुत्पत्तिः श्राव्यते । मत्त एव जगतः स्थितिश्च "येन जातानि जीवन्ति । व्यक्ताव्यक्तं भरते विश्वमीशः । स दाधार पृथिवीं द्यामुतेमाम् । भीषास्माद्वातः पवते । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ । तस्मिँल्लोकाः श्रिताः सर्वे" इत्यादिश्रुतिभिः प्रतिपाद्यते । " यत्प्रयन्त्यभिसंविशन्ति । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति । यस्मिन् क्षेत्रे संहरत्येष देवः " इत्यादिश्रुतिभिर्मत्त एव जगल्लयोपि श्राव्यते । यतो मदेककर्तृकत्वं जगत्सृष्ट्यादिक्रियायास्ततो जगदुत्पत्तिस्थितिलयादिष्वागच्छत्सु सत्सु तदधिष्ठातृतया सदाहमासमेवेति निरुक्तश्रुतिबलात्रिष्वपि कालेषु मत्सद्भावो निश्चेतव्य इत्यर्थः । एतेन मेघतदागमस्थित्यादीनामाधारतया स्थितस्याऽऽकाशस्येव प्रपञ्चतदुत्पत्त्यादीनामधिष्ठानतया स्थितस्य तत्पदार्थस्य स्वस्वरूपतो निष्फलत्वेन निष्क्रियत्वेन च प्रपञ्चतद्धर्मतत्कर्मलेशसंबन्धरहितत्वं तद्भिन्नत्वं नित्यत्वं च सूचितं भवति । ननु परमेश्वरस्य स्वतन्त्रस्य कालत्रयेपि तव सद्भावोस्तु मम कथं मर्त्यस्य नित्यत्वं सिध्यतीत्यत आह—नत्वमिति । त्वं त्वंपदलक्ष्यार्थश्च जातु कदाचिन्नासीरिति न किंत्वासीरेव अतीतानागतदेहोत्पत्त्यादिषु जाग्रदादिष्विव त्वमस्येव । यथा जाग्रति तिष्ठत एव तव स्वप्नसंबन्धः स्वप्ने तिष्ठत एव सुषुप्तिसंबन्धः सुषुप्तौ तिष्ठत एव जाग्रत्संबन्धस्तथागतदेहे तिष्ठत एवैतद्देहसंबन्ध एतद्देहे तिष्ठत एव भाविदेहसंबन्धोऽङ्गीकर्तव्यस्त्वन्यथा सुखदुःखादिवैचित्र्यासंभवात्कर्मवैचित्र्यादेव तव सुखादिवैचित्र्यम् । ततस्तादृग्विधकर्मकर्तुस्तवास्त्येव देहान्तरेषु सद्भावस्त्वन्यथाकृतहानाऽकृताभ्यागमप्रसङ्गात् " यत्कर्म कुरुते तदभिसंपद्यते " इति ' जन्मान्तरकृतं कर्म भुञ्जते जन्तवोऽधुना ' इत्यादिश्रुतिस्मृतिविरोधप्रसंगाच्च । पूर्वकृतस्याधुना अधुना कृतस्य कर्मणः फलं भाविजन्मन्यनुभुज्यते । तथैव श्रूयते " प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे" इति यतस्ततो जाग्रदाद्यवस्थास्विव गतदेहेषु भाविदेहेष्वपि इदानीमिव तव त्रिष्वपि कालेषु सद्भावोस्त्येवेत्यर्थः । एतेन त्वंपदार्थस्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचितं भवति । इमे जनाधिपाश्च नासन्निति न किंतु त्वंपदार्थत्वाऽविशेषा-

त्रिषु काले [illegible]ऽेव । यथाहं तथैवैतेऽपि नित्यसिद्धसत्स्वभावा इत्यर्थः । जनाधिपा इत्यविद्यावृत्तिभेदेन बहुवचनं न त्वै[illegible]न्ये न तद्भेदे प्रमाणाभावात्। नन्वात्मभेदे प्रमाणाभाव इति यदुक्तं तदतिसाहसम्। आत्मतत्त्वे वि-[illegible]नित्यैकत्वं न घटते प्रत्यक्षादिप्रमाणविरोधात् । तथाहि यत्रयत्र अहंप्रत्ययभेदस्तत्रतत्रात्मभेद इति [illegible]विष्णोर्भेदस्य प्रत्यक्षेणोपलभ्यमानत्वात्। एकत्वे तु त्वमहमयमित्यादिव्यवहारलोपप्रसंगात्तत आत्मभेदे प्रत्यक्षं त्याहुर्मिम् । आत्मभेदाभावे व्यवहारो न सिध्यतीति व्यवहारसिद्धेरन्यथानुपपत्त्याऽर्थापत्तिश्च प्रमाणम्। आत्मा प्रति न किभिन्नो भवति व्यक्तीनां भिन्नत्वाद्द्रवादिवदात्मा भिन्न एव भवति प्रतिव्यक्त्यहंप्रत्ययभेदात् व्यक्तिप्रत्ययभेदात् घटादिवदित्याद्यनुमानं च प्रमाणम् । " अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुराः " इति देवादिभेदप्रतिपादकश्रुतिश्च प्रमाणम्। ' देवदानवगन्धर्वायक्षराक्षसकिन्नराः ' इत्यादिपुराणवचनं च प्रमाणम् । यद्यात्मैकत्वमेवाभ्युपगम्यते तर्हि तव सुखदुःखादिव्यवस्था च न सिद्ध्येत् । एकस्मिन् दुःखिनि सुखिनि च सर्वेऽपि दुःखिनः सुखिनश्च स्युः । देवादिसर्वदेहेष्वात्मैकत्वे सर्वे सर्वज्ञाश्च भवेयुः । तेन विधिनिषेधशास्त्राणामानर्थक्यं च स्यात् । एकस्मिन् बद्धे बन्धो मुक्ते मोक्षश्च सर्वेषां प्रसज्येत। तस्मात् प्रमाणसिद्धमात्मनोऽनेकत्वं त्वयाप्यङ्गीकर्तव्यमिति चेन्न व्याप्तिव्यभिचारात् प्रत्यक्षासिद्धेः । यत्रयत्राहंप्रत्ययभेदस्तत्रतत्रात्मभेद इति व्याप्तिर्व्यभिचरति । शिशुः कुमारो युवा वृद्धोऽहमिति शैशवादिदशाभेदेनाहंप्रत्ययो भिद्यते तत्तदवस्थानां भेदात् । नहि कौमारे शिशुरहमिति प्रत्ययोऽस्ति तदुत्पादकशैशवाभावात् । एवं युवत्वे वृद्धत्वे च अहंप्रत्ययो भिद्यते तथापि शैशवाद्यवस्थावतोऽहंप्रत्ययार्थस्यात्मनो भेदादर्शनान्न प्रत्यक्षं प्रमाणम् । ननु विशेषणभेदाद्विशिष्टस्यापि भेद इति न्यायेनावस्थाभेदादवस्थावतोऽपि भेदः स्यादिति चेत्तस्य शिशुत्वाद्यभिमानिन्यहङ्कार एव चरितार्थत्वान्नित्यात्मविषयत्वानुपपत्तेः । अन्यथा बाल्यमारभ्य देहेन्द्रियकृतकार्यस्मरणासंभवात् । स्मर्यते च मया बाल्ये कृतं कन्दुकखेलनमिति । न ह्यात्मानेकत्वे एतत्स्मरणं घटते। अन्यकृते कर्मण्यन्यस्य स्मृत्यदर्शनाद्यतो बाल्यमारभ्य वृद्धत्वावसानकं कृतं कार्यं स्मर्यते। ततः प्रत्ययभेदेन प्रत्ययार्थस्य भेद इति प्रत्यक्षमसिद्धम्। व्यक्तिभेदादात्मनोऽपि भेद इत्यनुमानं च न सिध्यति । स्थूलसूक्ष्मकारणदेहानां जाग्रत्स्वप्नदेहयोश्च भेदे सत्यपि अहंप्रत्ययार्थस्यात्मनो भेदाभावान्नानुमानसिद्धिः। श्रुतिस्तु—"अदितिर्देवा गन्धर्वाः"इत्यात्मोपाधिभेदान्वदति नत्वात्मभेदं सर्वत्र चैतन्यस्यैकरूपत्वान्नात्मभेदोपपत्तिस्ततो देवगन्धर्वमनुष्यादिदेहाः सर्वे जाग्रत्स्वप्नादिदेहवदात्मनो भोगायतनान्येव नत्वात्मभेदद्योतकाः। यथा स्थूलादिदेहैरेकस्यैवात्मनो भोगो भिद्यते तथैव देवादिदेहैरप्यतो देवादिदेहा भोगायतनान्येव भवन्ति । यतस्तेषु रूपतेजःस्वभावादीनामेव भेदो दृश्यते नतु चेतनस्य। तत एवात्मविषयकोऽहमस्मीत्यहंप्रत्ययः सदैकरूपो भवति । तेन व्यक्तिभेदप्रतिपादनपरैव श्रुतिर्नत्वात्मभेदप्रतिपादनपरेति सिद्धम्। तथैव पुराणवचनं च यथैकस्मिन्नेव देहेऽवयवभेदमुपाश्रित्य शिरः करः पाद इत्यादिव्यवहारस्तथाऽऽत्मैकत्वेऽपि व्यक्तिभेदमुपाश्रित्य त्वमहमयमित्यादिव्यवहारः सिध्यति नात्मभेदस्त्वपेक्ष्यते। एवं व्यवहारसिद्धावन्यथानुपपत्त्यसंभवान्नार्थापत्तिश्च प्रमाणम्। यत्त्वसत्यात्मभेदे सुखदुःखादिव्यवस्था न सिध्यतीति तन्न। तस्याः कर्मैकनिबन्धनत्वादेकस्मिन्नेव देहे कर्मभेदेन सुखदुःखादिवैचित्र्यदर्शनात्सुखदुःखयोः पुण्यपापकार्यत्वेन तद्भेदाद्भोक्तृभेदाच्च सुखदुःखादिव्यवस्थोपपत्तेः "यत्कर्म कुरुते तदभिसंपद्यते" इति यथाकारी यथाचारी तथा भवतीति श्रवणात्ततो नात्मैकत्वे सुखादिसाङ्कर्यसिद्धिः । "नान्योऽतोऽस्ति विज्ञाता" इति श्रवणात्फलभोक्तॄणामनेकत्वाच्च सत्यप्यात्मैकत्वे तदाभासानामनेकत्वोपपत्तेः । यद्यप्यात्मैव सदा सर्वत्र जानाति तथापि तत्तद्देहे तत्तद्बुद्धिमुपादाय स्वयं जानाति । देहभेदाद्बुद्धिभेदस्य नियतत्वात्प्रतिदेहं ज्ञानं तु भिद्यते । ज्ञायते वस्त्वनेनेति ज्ञानम् । ज्ञानं नाम बुद्धिवृत्तिः । सा च परिच्छिन्ना चक्षुरिव स्वसंपृक्तवस्तुमात्रप्रकाशिनी । वृत्तेः परिच्छिन्नत्वात्पदार्थैः सर्वैः संबन्धो न घटते । यदि सर्वपदार्थैः संबन्धः स्यात्तदा सर्वे सर्वज्ञा भवेयुस्तदभावान्न सर्वेषां सार्वज्ञं सिध्यति।

यथा विभोरपि महाकाशस्य शब्दसंभूतिहेतोः सर्वत्र भेरीपणवादिभिः संयोगे सत्यपि यत्र भेर्या ... च्यते तत्रैव शब्दोत्पत्तिर्नतु सर्वत्र । तथैवैकस्यात्मनः परिपूर्णस्यापि यत्र बुद्धिवृत्तेरर्थसंबन्धस्तत्रैव ज्ञानोदयो ... । ततो बुद्धिवृत्तीनामनेकत्वादव्यापकत्वाच्च सर्वेषां सार्वज्ञं नोपपद्यत इति सिद्धम् । ततः किंचिज्ज्ञानप्रा ... नेनिवृत्तिहेतुत्वाद्विधिनिषेधशास्त्राणां सार्थक्यमेवोपपन्नं भवति । प्राणिनां सर्वज्ञत्वाभावस्य प्रतिपादि ... त ... श्रवणजन्यज्ञानेन प्रत्यगभिन्नं परब्रह्म स्वात्मना यो विजानाति तस्यैव मुक्तिर्नेतरस्य । तथा च ... : " त- द्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम् " इति तत आत्मैकत्वेऽ ... मुक्तिरात्मज्ञानादेव सिध्यति । ज्ञानादेव तु कैवल्यमिति नियमश्रवणात्तत आत्मैकत्वेनैवोक्तदोषाणामवकाशः । आत्मनामनेकत्वं पूर्णत्वं चाभ्युपगतवतस्तव पक्ष एवामी दोषाः संप्रसज्यन्ते । तदुच्यते आत्मनामनेक[त्वे] विभुत्वे चाभ्युपगते सत्यन्योन्येषामन्योन्यमनोबुद्ध्यादिभिः संयोगः संभवति तेनोक्तरीत्या सुखदुःख[ब]न्धमोक्षादीनां साङ्कर्यं च प्रसज्यते । नैक एष एत्राऽनर्थः अपितु विभुत्वाद्यसिद्धिश्च । तथाहि यद्यद्वस्तुस्वेतर[भे]दवत्तत्तत्परिच्छिन्नमित्यात्मनामनेकत्वे सत्यन्योन्यसत्ताभिरन्योन्यभेदवत्त्वेन परिच्छिन्नत्वात्पूर्णत्वं न सिध्यति पूर्णत्वेऽङ्गीक्रियमाणे त्वनेकत्वं च न सिध्यति पूर्णत्वानेकत्वयोः परस्परविरोधादात्मनां पूर्णत्वमनेकत्वं च ब्रह्मणापि निर्वोढुं न शक्यते ततो भवताप्यात्मैकत्वमेवाभ्युपगन्तव्यम् । किंच परिच्छिन्नाश्चिद्रूपाश्चानेके चाऽऽत्मानइति यः पक्षः सोऽपि न सिध्यति बहुश्रुतिस्मृतियुक्तिविरोधात् । "आकाशवत्सर्वगतश्च नित्यः । एकस्तथा सर्वभूतान्तरात्मा । एको देवः सर्वभूतेषु गूढः । एकः सन् बहुधा विचचार । एक एव हि भूतात्मा । निरपेक्ष एक एव । साक्षी एकस्तेनेदं पूर्णं पुरुषेण सर्वम् । अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानम् " इत्यादिश्रुतिभिः । ' नित्यः सर्वगतः स्थाणुः । नित्यः सर्वगतोऽप्यात्मा कूटस्थो दोषवर्जितः । एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ' इत्यादिस्मृतिभिः । आत्मा सर्वशरीरेष्वेकएव भवितुमर्हति पूर्णत्वाद्घटादिष्वाकाशवदात्मा एक एव भवति । निष्कलत्वात्सर्वप्रकाशकत्वात्सर्वसाक्षित्वात्सर्वत्राहंप्रत्ययार्थत्वाच्चेत्येवमादियुक्तिभिश्चात्मनः पूर्णतैवावध्रियते । निरुक्तश्रुतिस्मृतियुक्तिप्रामाण्यादेक एवात्मेति सिद्धान्तः । यतोऽहं त्वं चेमे जनाधिपाश्च पूर्वोक्तरीत्या भूतभविष्यद्वर्तमानकालेषु क्वचिदपि न भविष्याम इति न किंतु भविष्याम एव । त्रिष्वपि कालेषु सत्तावन्त एव स्मस्ततोऽहं त्वं चेमे च सर्वे वयं परं ब्रह्मैव प्रपञ्चतदभिमान्यादिसर्वदृश्यकल्पनाधिष्ठानभूतं निष्कलं निष्क्रियं शान्तमनन्तं नित्यशुद्धबुद्धमुक्तसत्यज्ञानानन्दाद्वयं ब्रह्मैव स्मः " भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् । ब्रह्मैवेदं सर्वम्" इति च श्रवणात्त्वां च मां चैतांश्च सर्वान् परं ब्रह्मैवेति जानीहीत्यर्थः॥ १२॥

श्री॰ टी॰—अशोच्यत्वेहेतुमाह—**नत्वेवेति** । यथाऽहं परमेश्वरो जातु कदाचित् लीलाविग्रहस्याविर्भावे तिरोभावेऽपि नासमिति नैव अपि तु आसमेव । अनादित्वात् । नच त्वं नासीः नाभूः अपि त्वासीरेव । इमे च जनाधिपाः नृपाः नासन्निति न अपितु आसन्नेव । मदंशत्वात् । तथाऽतःपरमित उपर्यपि न भविष्यामो न स्थास्याम इति च नैव अपितु स्थास्याम एव । जन्ममरणशून्यत्वादशोच्या इत्यर्थः ॥ १२ ॥

स॰ टी॰—अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥ इति पादद्वयस्यैव विवृतिः क्रियतेऽधुना ॥१॥ नेत्याद्येकोनविंशत्या पादस्याद्यस्य विस्तरः ॥ स्वधर्ममित्याद्यष्टाभिर्द्वितीयस्योच्यते तथा ॥ २ ॥ मोहद्वयं निराकार्यं पृथग्यत्नेन दुःखदम् ॥ स्थूलदेहात्पृथक्कर्तुमात्मानं साक्षिणं परम् ॥ ३ ॥ वक्त्यादौ तस्य नित्यत्वं त्वमः शुद्ध्यर्थमीश्वरः ॥ देहादिभ्यस्तु शब्देन व्यतिरेकोऽस्य सूच्यते ॥ ४ ॥ नैवाहं जात्वितः पूर्वं नासं किं त्वासमेव हि ॥ तथैव त्वं पुराप्यासीरासन्नेते जनाधिपाः ॥ ५ ॥ एतेन प्रागभावस्याप्रतियोगित्वमीरितम् ॥ तथाहं त्वमिमे भूपा न भविष्याम एव किम् ॥ ६ ॥ अत ऊर्ध्वं तनोः पातादवश्यंभाविनो न च ॥ किंतु सर्वे भविष्यामो वयं नित्यतयात्मनः ॥ ७ ॥ एतेनैवात्मनः प्रोक्ता ध्वंसस्याप्रतियोगिता ॥ अतः कालत्रये सत्ता-

योगित्वात्प्रत्यगात्मनः ॥ ८ ॥ नित्यत्वेनाऽस्य संसिद्धं वैलक्षण्यं शरीरतः ॥ देहाद्युपाधिभेदेन भेदोऽहं त्वमिमे त्विति ॥९॥ नात्र स्वाभाविको भेदोऽप्यात्मनो हरिणेरितः॥ त्वंपदार्थविशुद्ध्यर्थं भेदमुद्दिश्य लौकिकम् ॥१०॥ आत्मनो नित्यताद्वारा वैलक्षण्यं शरीरतः ॥ शास्त्रस्योपक्रमे यस्मात्सिसाधयिषितं हरेः ॥ ११ ॥ यत्त्वत्राभिमतो विष्णोर्भेदः स्वाभाविकः किल ॥ अन्यथेहोपदेशस्यावसरे कथमीरयेत् ॥ १२ ॥ अहं त्वं वयमित्यादिभेदमित्याहुरित्यसत् ॥ उपदेश्योपदेशादिव्यवहारेऽस्ति कल्पितः ॥ १३ ॥ भेदस्तेनैव तात्सिद्धिर्नवास्तव इहेष्यते ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ॥१४॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ इत्यादिश्रुतिनिर्णीता द्वैततत्त्वाविमर्शनात् ॥१५॥ भेदवादोऽसतामिष्टो न स तत्र विमर्शिनाम् ॥ १६॥१२॥

भा० टी०—तेषां नित्यत्वाच्छोकानर्हतामाह—**नेति** । जातु कदाचिदहं नासमिति न किंत्वासमेव । तथा त्वं नासीरिति नापित्वासीरेव । तथेमे जनाधिपाः नासन्निति न किंत्वासन्नेव । तथा नच भविष्याम इति न किंतु भविष्याम एव । अतोऽस्माद्देहविनाशादुत्तरकालेऽपि त्रिष्वपि कालेषु नित्याः आत्मस्वरूपेणेत्यर्थः । स्वस्य मध्ये गणनमात्मैक्याभिप्रायम् । बहुवचनं तु जीवभेदाभिप्रायेण देहभेदानुवृत्त्या तत्तद्देहाभिमानिनां जीवानामपि भेदात् । नतु परमार्थत आत्मभेदाभिप्रायेणेति । तथा च शारीरकभाष्यम् " भेदस्तूपाधिनिमित्तकः मिथ्याज्ञानकल्पितो न पारमार्थिकः " इति बोध्यम् ॥ १२ ॥

प० टी०—ननु शोकः किं जीवनिमित्तको देहनिमित्तको वा । नाद्यः तेषां नित्यत्वात् । नापरस्तेषां पुरो निद्रितवद्वर्तमानत्वादित्याशङ्क्याशोच्यत्वे हेतुमाह—**नत्वेवाहमिति** । यथाहमीश्वरो जातु कदाचित्स्वेच्छाधृतविग्रहोऽस्याविर्भावे तिरोभावे वा पूर्वं नासमिति न किंत्वासमेवानादित्वात् । नच त्वं नासीः किंत्वासीरेव । इमे जनाधिपा राजानो नासन्निति न किंत्वासन्नेव मदंशत्वात् । तथेतः परमग्रे वयं सर्वे प्राङ्निरूपिता नैव भविष्याम इति न किंतु भविष्याम एव । ननु जीवनिरूपणेऽहमितिपदेन गमनागमनरहितस्येश्वरस्य कथं प्रसङ्ग इति चेन्न । परमार्थतो विचारे जीवोऽपि मदंशत्वान्नित्योऽनादिश्चेति ज्ञात्वा पण्डिता नानुशोचन्तीत्यर्थः ॥ १२ ॥

रा० टी०—ननु कुतो न शोचन्ति कुतश्च मदीया वादाः प्राज्ञमतविरुद्धा इति । दृष्ट्वेमं स्वजनं कृष्णेत्यादिनोपपत्तेरुक्तत्वादिति चेत् । तत्किं तेषां जीवनाशात्तव शोक उत देहनाशात् । अथ देहान्यात्मनोऽभावात्तद्देहनाश एव तन्नाश इति । नाद्यः । जीवानामनादिनित्यत्वादित्याह—**नत्वेवेति** । जातु कदापि अहं नासमिति न किं त्वासमेव । त्वं नासीरिति न । विपरिणामेन क्रियान्वयः । अपित्वासीरेव । इमे जनाधिपाश्च नासन्निति न अपि तु आसन्नेव । अहं यूयं च वयं सर्वे एव अतःपरमअनन्तरकाले न भविष्याम इति न किन्तु भविष्याम एव । अत्र पूर्वोत्तरार्धाभ्यां कालद्वयसंबन्धोक्त्याऽनादित्वं नित्यत्वं चोक्तम् । वर्तमानकालसम्बन्धस्तु स्फुटत्वान्नोक्तः । द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायेन नञ्द्वयप्रयोगादेवावधारणसिद्धौ पुनस्तवुक्तिः " नित्योनित्यानाम् " । 'स्वदेहयोगविगमौ नाम जन्ममृती पुरा । इष्येते ह्येव जीवस्य मुक्तेर्नतु हरेः क्वचित् ' इतिश्रुतिस्मृतिप्रसिद्धिद्योतनार्था । चशब्दोऽनादित्वेन सह नित्यत्वस्य समुच्चयार्थः । तुशब्दस्तु स्मृत्युक्तदिशा ईश्वरस्येतरेषामिव देहतोप्युत्पत्तिनाशौ नेति विशेषार्थः । तदाह । "असंभवस्तु सतोऽनुपपत्तेः । नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः " इतिसूत्राभ्याम् । तत्राणुभाष्यमपि । सोऽनुत्पत्तिलय इति । ये तु कृष्णस्येश्वरत्वमनादित्वं च न जानन्ति तान्प्रति यथाश्रुतैवोक्तयोजना । ये तु तज्ज्ञात्वा जीवानादिनित्यतामेव न जानन्ति तान्प्रति तु यथैवंपदयोरध्याहारेण दृष्टान्तदार्ष्टान्तिकभावेन यथाहं न नासमनादितो वर्ते । एवं त्वमेते च सर्वे यूयं न नासुः । अनादितो वर्तध्वमिति योजना । अत्रैतौ प्रयोगावभिमतौ कृष्णत्वदादिचेतना न नाशवन्तः भावत्वे सत्यनादित्वात् । नासत इति श्लोके वक्ष्यमाणप्रकृत्यादिवदिति । द्वितीययोजनायां तु

त्वदादयो जनाधिपा न नाशवन्तः चेतनत्वे सत्यनादित्वात् कृष्णवदिति स्वरूपासिद्धिस्तु देहिन इत्यत्र निरासिष्यते । नच साधनवैकल्यम् । " नित्योनित्यानाम् " इतिश्रुतेः । तत्रानादित्वस्याप्युपलक्षणात् । एवं चैवमनादिनित्या जीवाः कथं नाम शोच्याः अनादिनित्यजीवानां नाशभीतया न योत्स्य इत्यादि त्वदीया वादाः कथं नाम प्राज्ञविरुद्धा न भवेयुरिति भावः ॥ १२ ॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ॥
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

त० टी०—ननु देवदत्तस्य पुत्रो जातः यज्ञदत्तो मृत इति परम्परागतप्रतीतेर्जन्ममरणयोर्दशाहानि ब्राह्मणस्याशौचप्रतिपादकधर्मशास्त्रस्य च प्रामाण्यात्कथमात्मनां जन्मनाशाभावः कथं वाऽशोच्यत्वमन्यथा प्रमाणबाधः स्यादित्याशङ्क्याह—देहिन इति । देहः कर्मफलभोगायतनभूतो विद्यते यस्य स देही तस्यैकस्मिन्नेव देहे यथा कौमारं यौवनं जरा परस्परविरुद्धावस्थाः कालभेदेन प्राप्नोति न त्ववस्थाभेदेनात्मभेदः ' योऽहं पित्राद्यङ्केऽक्रीडं स एवाहं यौवने विषयमनुभूयेदानीं वार्द्धके पुत्रपौत्रादीननुभवामि ' इत्यबाधितप्रत्यभिज्ञानात् अनुभवस्मृत्योरेकाधिकरण्यनियमाच्च । तथा पूर्वदेहादन्यो देहो देहान्तरं तस्य प्राप्तिस्तस्यैवात्मनः, नतु देहभेदेनात्मभेदः । तत्र देहान्तरप्राप्तौ धीरो धारणावतीबुद्धिमान्न मुह्यति । पितृपुत्रादौ मृते नष्टोऽयमिति मोहं न प्राप्नोतीत्यर्थः । 'देहिन' इत्यारभ्य 'देही नित्यमवध्योऽयम् ' इत्यन्तेषु श्लोकेष्वेकवचनं जात्यभिप्रायकमेव । नतु जीवात्मस्वरूपैकत्वविषयम् । 'आचार्यप्रोक्ता या जातिः सा नित्या साऽजराऽमरा ' इति सनत्सुजातवचनात् 'न त्वं नेमे जनाधिपाः ' इति निरन्तरश्लोके बहुत्वानित्यत्वप्रतिपादनाच्च । नैतावदेव प्रमाणमपि तु 'कामात्मानः स्वर्गपराः । ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः । बहवो ज्ञानतपसा पूता मद्भावमागताः । ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः । कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये । तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । न मां दुष्कृतिनोऽमूढाः प्रपद्यन्ते नराधमाः । चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् । ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः । यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः । महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते । मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् । सर्वे नमस्यन्ति च सिद्धसङ्घाः । मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्वेऽपि नोपजायन्ते प्रलये न व्यथन्ति च । निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः । द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ' इत्यादि सर्वेष्वध्यायेषु प्रत्यगात्मबहुत्वप्रतिपादकानि वाक्यानि विद्यन्ते, एकात्मत्वाङ्गीकारे तानि बाध्येरन् । न चोपाधिकृतभेदप्रतिपादनेन न तद्बाध इति वाच्यम् । तेषामुपाधिपरत्वकल्पने मानाभावात् । प्रत्युत 'लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः । छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः । कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् ' इति निवृत्ताशेषाऽविद्यानामपि बहुत्वप्रतिपादनात् । अन्यथा सर्वदेहेषु चेतनैकत्वाङ्गीकारे एकस्मिन्सुप्ते मूर्छिते मृते वा सर्वेषां तत्साम्यापत्तिः स्यात्, सर्वान्तर्यामिसुखदुःखादिज्ञानं सर्वेषां समानं स्यात् । किञ्च अहं त्वमयमिति प्रत्ययानां निगमनाविरहेण विभागाभावः

स्यात्सर्वत्राहमेव प्रतीतिः स्यात् । नतु तथाऽस्ति । किं तर्हि भगवदुक्तात्मभेदः स्वस्वरूपनिरूपित इति श्रुतिरपि निश्चाययति " नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् " इति । तस्मादात्मैकत्ववादिनो भ्रान्ता इति निश्चीयते । अतः स्वधर्मे युद्धे मरणेऽपि विवेकिनो न शोकमोहौ स्यातामिति भावः ॥ १३ ॥

म० टी०—ननु देहमात्रं चैतन्यविशिष्टमात्मेति लोकायतिकाः । तथा च स्थूलोहं गौरोहं गच्छामि चेत्यादिप्रत्यक्षप्रतीतानां प्रामाण्यमनपोहितं भविष्यति । अतः कथं देहादात्मनो व्यतिरेकः । व्यतिरेकेपि कथं वा जन्मविनाशशून्यत्वम् । जातो देवदत्तो मृतो देवदत्त इति प्रतीतेर्देहजन्मनाशाभ्यां सहात्मनोपि जन्मविनाशोपपत्तेरित्याशङ्क्याह—**देहिन इति** । देहाः सर्वे भूतभविष्यवर्तमाना जगन्मण्डलवर्तिनोऽस्य सन्तीति देही एकस्यैव विभुत्वेन सर्वदेहयोगित्वात्सर्वत्र चेष्टोपपत्तेर्न प्रतिदेहमात्मभेदे प्रमाणमस्तीति सूचयितुमेकवचनम् । सर्वे वयमिति बहुवचनं तु पूर्वदेहभेदानुवृत्त्या नत्वात्मभेदाभिप्रायेणेति न दोषः । तस्य देहिन एकस्यैव सतोस्मिन् वर्तमाने देहे यथा कौमारं यौवनं जरेत्यवस्थात्रयं परस्परविरुद्धं भवति नतु तद्भेदेनात्मभेदः । य एवाहं बाल्ये पितरावन्वभूवं सएवाहं वार्द्धके प्रणप्तॄननुभवामीति दृढतरप्रत्यभिज्ञानात् । अन्यनिष्ठसंस्कारस्य चान्यत्रानुसन्धानाजनकत्वात् । तथा तेनैव प्रकारेणाविकृतस्यैव सत आत्मनो देहान्तरप्राप्तिः एतस्माद्देहादत्यन्तविलक्षणदेहप्राप्तिः । स्वप्ने योगैश्वर्ये च तद्देहभेदानुसन्धानेपि स एवाहमिति प्रत्यभिज्ञानात् । तथा च यदि देह एवात्मा भवेत्तदा कौमारादिभेदेन देहे भिद्यमाने प्रतिसन्धानं न स्यात् । अथ तु कौमाराद्यवस्थानामत्यन्तवैलक्षण्येप्यवस्थावतो देहस्य यावत्प्रत्यभिज्ञं वस्तुस्थितिरिति न्यायेनैक्यं ब्रूयात्तदापि स्वप्नयोगैश्वर्ययोर्देहधर्मभेदे प्रतिसन्धानं न स्यादित्युभयोदाहरणम् । अतो मरुमरीचिकादावुदकादिबुद्धेरिव स्थूलोहमित्यादिबुद्धेरपि भ्रमत्वमवश्यमभ्युपेयं बाधस्योभयत्रापि तुल्यत्वात् । एतच्च न जायत इत्यादौ प्रपञ्चयिष्यते । एतेन देहाद्व्यतिरिक्तो देहेन सहोत्पद्यते विनश्यति चेति पक्षोपि प्रत्युक्तः । तत्रावस्थाभेदे प्रत्यभिज्ञोपपत्तावपि धर्मिणो देहस्य भेदे प्रत्यभिज्ञानुपपत्तेः । अथवा यथा कौमाराद्यवस्थाप्राप्तिरविकृतस्यात्मन एकस्यैव तथा देहान्तरप्राप्तिरेतस्माद्देहादुत्क्रान्तौ तत्र स एवाहमिति प्रत्यभिज्ञानाभावेपि जातमात्रस्य हर्षशोकभयादिसंप्रतिपत्तेः पूर्वसंस्कारजन्याया दर्शनात् । अन्यथा स्तनपानादौ प्रवृत्तिर्न स्यात् । तस्या इष्टसाधनताद्विज्ञानजन्यत्वस्यादृष्टमात्रजन्यत्वस्य चाभ्युपगमात् । तथा च पूर्वापरदेहयोरात्मैक्यसिद्धिः । अन्यथा कृतनाशाकृताभ्यागमप्रसङ्गादित्यन्यत्र विस्तरः । कृतयोः पुण्यपापयोर्भोगमन्तरेण नाशः कृतनाशः । अकृतयोः पुण्यपापयोरकस्मात्फलदातृत्वमकृताभ्यागमः । अथवा देहिन एकस्यैव तव यथाक्रमेण देहावस्थोत्पत्तिविनाशयोर्न भेदः । नित्यत्वात् । तथा युगपत्सर्वदेहान्तरप्राप्तिरपि तवैकस्यैव विभुत्वात् । मध्यमपरिमाणत्वे सावयवत्वेन नित्यत्वायोगात् । अणुत्वे सकलदेहव्यापिसुखाद्यनुपलब्धिप्रसङ्गात् । विभुत्वे निश्चिते सर्वत्र दृष्टकार्यत्वात्सर्वशरीरेष्वेकएवात्मा त्वमिति निश्चितोऽर्थः । तत्रैवं सति वध्यघातकभेदकल्पनया त्वमधीरत्वान्मुह्यसि । धीरस्तु विद्वान्न मुह्यति । अहमेषां हन्ता एते मम वध्या इति भेददर्शनाभावात् । तथा च विवादगोचरापन्नाः सर्वे देहाः एकभोक्तृकाः देहत्वात्त्वद्देहवत् इति । श्रुतिरपि " एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा " इत्यादि । एतेन यदाहुर्देहमात्रमात्मेति चार्वाकाः । इन्द्रियाणि मनः प्राणश्चेति तदेकदेशिनः । क्षणिकं विज्ञानमिति सौगताः । देहातिरिक्तः स्थिरो देहपरिमाण इति दिगम्बराः । मध्यमपरिमाणस्य नित्यत्वानुपपत्तेः । नित्योणुरित्येकदेशिनः । तत्सर्वमपाकृतं भवति नित्यत्वविभुत्वस्थापनात् ॥ १३ ॥

शं० टी०—एवं तत्त्वंपदार्थयोः श्रुतियुक्तिभिः शोधितयोर्द्वयोरेकत्वे प्रतिपादिते सत्यपि त्वंपदार्थस्यात्मनोऽविद्यातत्कार्यकोटिभिस्तिरोहितत्वादतिसूक्ष्मत्वाद्दुर्विज्ञेयत्वाच्च श्रोतुर्मुमुक्षोर्मन्दप्रज्ञस्य यावदप्रतिबद्धाऽपरोक्ष

तावत् " वृत्तिरसकृदुपदेशात् " इति न्यायेन पुनःपुनस्त्वंपदार्थशोधनमेव सम्यक्कर्तव्यमिति सूचयितुमुत्तरग्रन्थमारभते। तत्र पूर्वं त्वंपदार्थस्यात्मनः कालत्रयेपि सद्भावे प्रतिपादिते सत्यप्येतद्देहनाशानन्तरं सत्ता न दृश्यते कथं तत्र सद्भाव इति शङ्कावन्तमर्जुनमालक्ष्यात्मनो देहान्तरेऽपि सत्तां सदृष्टान्तं प्रत्यक्षानुमानाभ्यामवगमयितुमाह—**देहिन इति**। अस्मिन् देहे त्वविक्रियात्मनैवैकरूपेणाहमहमिति सर्वदा तिष्ठत एव देहिनः देह एवात्मोपलम्भादात्मा देहीत्युच्यते। तस्य देहिनो देहोपाधिमत आत्मनः कौमारं कुमारस्येदं कौमारं वपुरिति शेषः। यून इदं यौवनं वपुः जरा जरोपलक्षितं जीर्णवपुश्च यथा येन प्रकारेणायाति। कौमारं जहतः सत एव यौवनं यौवनं जहतः सत एव जरठं वपुरन्वागच्छति तथैव एतत्स्थूलं जहतः सतएव देहान्तरमन्यो देहश्चायात्यविनश्यत एवात्मनः। " जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" इति श्रवणात्। किंच जाग्रत्स्वप्नदेहयोः सुषुप्तौ नाशे सत्यात्मसद्भावो न ज्ञायते तथापि सुषुप्तोत्थितः स्वयं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहमिदानीं जागर्मीति स्वप्रत्यभिज्ञाबलेन जाग्रत्स्वप्नसुषुप्तिष्वात्मनः सत्त्वं नित्यत्वं च यथा जानाति तथा एतद्देहनाशानन्तरमप्यात्मनः सत्त्वं नित्यत्वं च विज्ञाय धीरो विद्वान् आत्मतत्त्वज्ञः अतस्तत्रात्मनो नित्यत्वविषये न मुह्यति गतजन्मन्यन्नाद्याहारवान् भवितुमर्हति। इदानीं स्वयमुपदेशमन्तरेणैव स्तन्याहारप्रवृत्तत्वात्। यन्नैवं तन्नैवं यथा प्रतिमादिः। आत्मा देहान्तरेष्वागच्छत्सु सत्सु तिष्ठति नित्यत्वात्। यथात्र कौमारादिदेहेषु प्राप्तेषु सत्सु तिष्ठति तथेत्युक्तप्रत्यक्षश्रुत्यनुमानैरात्मनो जन्मान्तरेषु सद्भावं विज्ञाय तेन नित्यत्वमेव निश्चित्यात्मास्ति वा न वेति पण्डितो न भ्रमतीत्यर्थः॥ १३॥

श्री० टी०—नन्वीश्वरस्य तव जन्मादिशून्यत्वं सत्यमेव। जीवानां तु जन्ममरणे प्रसिद्धे तत्राह—**देहिन इति**। देहिनो देहाभिमानिनो जीवस्य यथाऽस्मिन्स्थूलदेहे कौमाराद्यवस्थादेहनिबन्धना एव नतु स्वतः पूर्वावस्थानाशेऽवस्थान्तरोत्पत्तावपि स एवाहमिति प्रत्यभिज्ञानात्तथैवैतद्देहनाशे देहान्तरप्राप्तिरपि लिङ्गदेहनिबन्धना। नतु तावतात्मनो नाशः जातमात्रस्य पूर्वसंस्कारिणः स्तन्यपानादौ प्रवृत्तिदर्शनात्। अतो धीरः धीमांस्तत्र तयोर्देहनाशोत्पत्त्योर्न मुह्यति आत्मैव मृतो जातश्चेति न मन्यते॥ १३॥

स० टी०—ननु स्थूलोऽहमित्यादिप्रत्यक्षं मार्जितं भवेत्॥ आत्मनो देहभिन्नत्वे स्वीकृते तच्च नोचितम्॥१॥ विष्णुशर्मा मृतो जात इति प्रत्यक्षमानतः॥ शरीरजन्मनाशाभ्यां सहैवास्यात्मनोऽपि तौ॥ २॥ जन्मनाशौ प्रसिद्धौ स्त इत्याशङ्क्याह माधवः॥ देहाः सर्वे त्रिकालस्था जगन्मण्डलवर्तिनः॥ ३॥ अस्य सन्तीति देही स्यात्तस्यैकस्यात्मनो विभोः॥ ब्रह्मादिस्थावरान्तेषु शरीरेष्वखिलेष्वपि॥ ४॥ व्यापिनो नास्ति भेदस्य गन्ध इत्यपि दर्शितम्॥ हरिणैकत्वनिर्देशाद्देहिनोऽस्मिन्निति स्फुटम्॥ ५॥ देहभेदानुवृत्त्योक्तं वयं सर्वे पुराविति॥ तस्यैकस्यात्मनो देहे वर्तमाने सतो यथा॥ ६॥ कौमारं यौवनं जीर्णा चेत्यवस्थात्रयं यतः॥ परस्परविरुद्धं तत्तद्भेदान्नात्मनो भिदा॥ ७॥ बाल्ये य एव पितरावन्वभूवं स एव हि॥ वार्धकेऽहं प्रणप्त्रादीनेताननुभवाम्यसौ॥ ८॥ प्रत्यभिज्ञा भवत्येषा प्रत्यगात्मैक्यगोचरा॥ येषु व्यावर्त्यमानेषु नैव व्यावर्तते तु यः॥ ९॥ स तेभ्यो भिद्यते सूत्रं कुसुमेभ्य इव स्वतः॥ निर्विकारस्य बाल्याद्या यथा सन्त्यत्र देहिनः॥ १०॥ तद्वद्देहान्तरप्राप्तिर्निर्विकारस्य वस्तुतः॥ एतस्माद्देहतोऽत्यन्तभिन्नदेहाप्तिरात्मनः॥ ११॥ योगैश्वर्ये तथा स्वप्ने नास्ति तेन भिदात्मनः॥ सोऽहमित्येव विज्ञानं प्रत्यभिज्ञात्मकं यतः॥ १२॥ प्रत्यगात्मनि तेनायं देहादतिविलक्षणः॥ आत्मैकः केवलः शुद्धो देहाध्यासादयं भ्रमः॥ १३॥ स्थूलोऽहममुको जातो मृत इत्यादिको नृणाम्॥ बाल्याद्या जाग्रदाद्याश्च व्यावृत्तास्ताः परस्परम्॥ १४॥ अवस्थाः कल्पिता भ्रान्त्या प्रत्यगात्मनि केवले॥ जातमात्रस्य हर्षादिः पूर्वसंस्कारजो भवेत्॥ १५॥ अन्यथा स्तन्यपानादौ प्रवृत्तिः स्यान्न देहिनाम्॥ अदृष्टाद्वा प्रवृत्तिः स्यादिष्टसाधनताधिया॥ १६॥ तथा चात्मैक्यसंसिद्धिः

पूर्वापरशरीरयोः ॥ अन्यथा कृतनाशादिदोषोऽपि स्याद्दुरुद्धरः ॥ १७ ॥ एवं देहाद्विभिन्नात्मज्ञानाद्धीमान्न मुह्यति ॥ शोकमोहाद्यसंस्पृष्टो धीरधीस्त्वमतो भव ॥ १८ ॥ १३ ॥

भा० टी०—तत्रदृष्टान्तमाह—**देहिन इति**। देहोऽस्यास्तीति देही आत्मा तस्य यथास्मिन्देहेऽवस्थात्रयमेकस्यैव तथा देहान्तरप्राप्तिः। तत्रैवं सति धीमानात्मनित्यत्वज्ञानवान्न मुह्यति न मोहं प्राप्नोति। नन्वेतेषां श्लोकानां वादिमतान्याशङ्क्यानवतारणं भाष्यकाराणां न्यूनतेति चेन्न। 'नानुशोचन्ति पण्डिताः। धीरस्तत्र न मुह्यति। तांस्तितिक्षस्व भारत। यं हि न व्यथयन्त्येते' इति वाक्यशेषाणां सत्वात्। शोकनिवारणायात्मनित्यत्वव्याख्यानस्य शब्दार्थत्वादात्मानित्यत्ववादी मूर्ख इत्येवमादीनां तेषामश्रवणात्। आत्मनो नित्यत्वादिवर्णनेन वादिमतनिराकरणस्यार्थसिद्धत्वात्। शारीरकभाष्ये कुमतानां स्वेनैव खण्डितत्वाच्च। तथाऽनवतारणे न्यूनताया अभावात्॥ १३ ॥

प० टी०—एवं शोकस्य जीवनिमित्तकत्वं निवार्य देहनिमित्तकत्वं निवारयति—**देहिन इति**। देहिनो देहाभिमानिनो जीवस्य कौमारयौवनजरारूपावस्थात्रयस्यानुभवो दृष्टः। यथाहं कौमारदशायां नग्नो बालिशेषु क्रीडितवान् स एवाहं यौवने सभ्यत्वमुपागतोऽस्मि। पुनः स एवाहं सम्प्रति दन्ताद्युपप्लवेन स्थविरत्वं प्राप्तोऽस्मीति प्रत्ययोस्ति। तदुक्तम्—'कस्तवायं जडो मूको देहो भवति राघव' इति। तथाच पुत्रस्य पूर्वावस्थातिक्रमे उत्तरावस्थाप्राप्तौ किं पित्रादीनां शोको भवति। तथैव देहान्तरप्राप्तावशिक्षितोऽपि बालः पूर्वसंस्कारवशात् स्तनग्रहणरोदनादिषु प्रवर्तते। एवमनुभूय धीरस्तत्र विषये न मुह्यतीत्यर्थः॥ १३ ॥

रा० टी०—देहनाशभयादिति द्वितीयपक्षं निरासयन्नाह—**देहिन इति**। देहिनो देहवतो जीवस्यास्मिन्निदानीं वर्तमाने स्थूलदेहे कौमारं यौवनं जरा च यथा प्राप्नोति तथा देहान्तरप्राप्तिः। अयं भावः। कौमारावस्थाविशिष्टदेहहाने यौवनावस्थाविशिष्टदेहहाने च शोकस्तावन्नास्तीति प्रसिद्धम्। तत्कृत इति न वाच्यम्। जरादिविशिष्टदेहान्तरलाभात्। समानलाभेन हानिर्हि समाधीयत इति चेन्मृतावपि शोको न कार्यः। देहान्तरलाभादेव। यदा तु जीर्णदेहलाभेन समीचीनयौवनदेहहानेः प्रतिनिधिस्तदा सुतरां समीचीनदेहान्तरलाभेन जीर्णदेहहानेरिति। अतो धीरो बुद्धिमांस्तत्र देहनाशविषये न मुह्यति न मोहं प्राप्नोति। एतेषां देहाः नश्यन्तीति शोकं न प्राप्नोतीत्यर्थः। तत्रावस्थामात्रहानिः। अत्रावस्थावतोऽपीति वैषम्यमनुपयुक्तम्। निष्कदानेन पटग्रहणदृष्टेरिति। अत्र देहिन इत्युक्त्या देहवतो जीवस्यैव। ननु देहदेहिभेदहीनस्य हरेर्जराद्यवस्था देहान्तरावाप्तिर्वेनेति सूचितम्। देहान्यजीव एव नास्ति। एवं च त्वदादयो जनाधिपा नित्या अनादिनित्यत्वादिति प्रागुक्तप्रयोगे देहपक्षीकारे असिद्धिवाधौ जीवपक्षीकारे चाश्रयासिद्धिरिति तृतीयपक्षमाशङ्क्य परिहरति—**देहिन इति**। अत्र कौमारादिविषयेण तदनुभवो विषयी लक्ष्यते। देहिन इत्यस्य देहादन्यस्येत्यर्थः। देहोऽस्यास्तीत्यर्थे मतुबर्थेनिप्रत्ययविधानात्। एकवचनादेकस्येत्यपि लभ्यते। देहान्तरशब्दोऽत्रानेकदेहपरः। तथाचायमर्थः। अस्मिन्देहे कौमारं कौमारानुसन्धानं यौवनं यौवनानुसंधानं जरा जरानुसंधानम्। योहं कौमारशरीरवानभूवं स इदानीं युवशरीरवान्वर्ते। योऽहं युवशरीरवानभूवं स इदानीं जीर्णशरीरवान्वर्ते इत्येवंरूपेण तावदस्ति। तच्च देहिनो देहवतो देहान्यस्येतियावत्। देहशब्दोऽत्र देहेंद्रियान्तःकरणसङ्घातपरः। देहेन्द्रियान्तःकरणेभ्योऽन्यस्य चेतनस्य भवति देहादेर्जडत्वेनानुसंधानकर्तृत्वायोगात्। एवं च देहेन्द्रियादितोतिरिक्तजीवसिद्धिः। तथाचैकवचनबलादेकस्यैव देहादन्यस्य कौमाराद्यनेकदेहानुसन्धानं यथा तथा देहान्तरप्राप्तिरनेकदेहप्राप्तिर्देहिनो देहादन्यस्यैकस्यैव भवतीति पूर्वार्धेन देहादन्यसिद्धिः। त्रिपाद्या चोक्तविधयाऽनेकदेहप्रातिमान्सिद्ध इति। देहादन्यजीवपक्षीकारे नाश्रयासिद्धिः। प्रत्यग्रजातस्य शिशोराहाराद्यभिलाषेण पूर्वपूर्वतरदेहानुसन्धानेन सिद्धानेकदेहानुगत्याऽनादित्वसिद्धेर्न हेतोः स्वरूपासिद्धिरिति भावः। ननु देहादन्यत-

मन्यैवास्त्वनुसंधानम् । चार्वाकाद्युक्ततर्कबलादित्यत आह—धीर इति । बुद्धिमांस्तत्र देहादन्यात्मविषये न मुह्यति । देहादीनां जडत्वकरणत्वादिना कर्तृत्वायोग इत्यादिरूपेण ते तर्का निरस्या इति भावः ॥ १३ ॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ॥
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

न० टी०—ननु भवत्वात्मनां स्वरूपेण नित्यत्वे बहुत्वे च तन्नाशनिमित्तं मोहानौचित्यमिति । तथाऽपि युद्धे शस्त्रपातादिना आचार्यपितृबन्धूनां प्रियदेहवियोगे सुखहानिर्दुःखावाप्तिश्च भवेदेव, तन्निमित्तो मोहः सम्भवतीत्याशङ्क्याह—**मात्रास्पर्शा** इति । मात्राः शब्दादितन्मात्राणि तत्कार्यत्वाच्छब्दस्पर्शादयो विषया मात्राशब्दवाच्यास्तेषां श्रोत्रादीन्द्रियैः स्पर्शाः शीतोष्णसुखदुःखदा भवन्ति, मृदुमधुराः सुखदाः कटुपरुषा दुःखदाः । तथाऽपि नात्मवन्नित्याः किन्त्वागमापायिनः आगमापायशीलाः अतएवानित्यास्ततस्तान्विवेकधैर्यसम्पत्त्या तितिक्षस्व सहस्व । कालान्तरे स्वयमेव नंक्ष्यन्ति । तन्निमित्तो मोहस्तव नोचित इति । कौन्तेय भारतेति सम्बोधनाभ्यां सूचितम् ॥ १४ ॥

म० टी०—नन्वात्मनो नित्यत्वे विभुत्वे च न विवदामः । प्रतिदेहसमत्वं तु न सहामहे । तथाहि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यनवविशेषगुणवन्तः प्रतिदेहं भिन्नाः । एवं नित्या विभवश्चात्मान इति वैशेषिका मन्यन्ते । इममेव च पक्षं तार्किकमीमांसकादयोऽपि प्रतिपन्नाः । साङ्ख्यास्तु विप्रतिपद्यमाना अप्यात्मनो गुणवत्त्वे प्रतिदेहं भेदेन विप्रतिपद्यन्ते अन्यथा सुखदुःखादिसङ्करप्रसङ्गात् । तथा च भीष्मादिभिन्नस्य मम नित्यत्वे विभुत्वेपि सुखदुःखादियोगित्वात् भीष्मादिबन्धुदेहविच्छेदे सुखवियोगो दुःखसंयोगश्च स्यादिति कथं शोकमोहौ नानुचिताविति अर्जुनाभिप्रायमाशङ्क्य लिङ्गशरीरविवेकायाह—**मात्रास्पर्शास्त्विति** । मीयन्ते आभिर्विषया इति मात्रा इन्द्रियाणि तासां स्पर्शा विषयैः संबन्धास्तत्तद्विषयाकारान्तःकरणपरिणामा वा । ते आगमापायिन उत्पत्तिविनाशवंतोऽन्तःकरणस्यैव शीतोष्णादिद्वारा सुखदुःखदाः नतु नित्यस्य विभोरात्मनः । तस्य निर्गुणत्वान्निर्विकारत्वाच्च । न हि नित्यस्यानित्यधर्माश्रयत्वं संभवति । धर्मधर्मिणोरभेदात्संबन्धान्तरानुपपत्तेः । साक्ष्यस्य साक्षिधर्मत्वानुपपत्तेश्च । तदुक्तं 'नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः' इति । तथा च सुखदुःखाद्याश्रयीभूतान्तःकरणभेदादेव सर्वव्यवस्थोपपत्तेर्न निर्विकारस्य सर्वभासकस्यात्मनो भेदे मानमस्ति सद्रूपेण स्फुरणरूपेण च सर्वत्रानुगमात् । अन्तःकरणस्य तावत्सुखदुःखादौ जनकत्वमुभयवादिसिद्धम् । तत्र समवायिकारणत्वस्यैवाभ्यर्हितत्वात्तदेव कल्पयितुमुचितम् । न तु समवायिकारणान्तरानुपस्थितौ निमित्तमात्रम् । तथा च "कामः संकल्पः" इत्यादिश्रुतिरेतत्सर्वं मन एवेति कामादिसर्वविकारोपादानत्वमभेदनिर्देशान्मनस आह । आत्मनश्च स्वप्रकाशज्ञानानन्दरूपत्वस्य श्रुतिभिर्बोधनान्न कामाद्याश्रयत्वम् । अतो वैशेषिकादयो भ्रान्त्यैवात्मनो विकारित्वं भेदं चाङ्गीकृतवन्त इत्यर्थः । अन्तःकरणस्यागमापायित्वात् दृश्यत्वाच्च । नित्यदृग्रूपात्त्वत्तो भिन्नस्य सुखादिजनका ये मात्रास्पर्शास्तेप्यनित्याः अनियतरूपाः एकदा सुखजनकस्यैव शीतोष्णादेरन्यदा दुःखजनकत्वदर्शनात् । एवं कदाचिद्दुःखजनकस्याप्यन्यदा सुखजनकत्वदर्शनात् । शीतोष्णग्रहणमाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखोपलक्षणार्थं शीतमुष्णं च कदाचित्सुखं कदाचित् दुःखम् । सुखदुःखे तु न कदापि विपर्ययेते इति पृथङ्निर्देशः । तथा चात्यन्तास्थिरात् त्वद्भिन्नस्य विकारिणः सुखदुःखादिप्रदान्भीष्मादिसंयोगवियोगरूपान्मात्रास्पर्शान् त्वं तितिक्षस्व । नैते मम किंचित्करा इति विवेकेनोपेक्षस्व । दुःखितादात्म्याध्यासेनात्मानं दुःखिनं माज्ञासीरित्यर्थः । कौन्तेय भारतेति सम्बोधनद्वयेनोभयकुलविशुद्धस्य तवाज्ञानमनुचितमिति सूचयति ॥ १४ ॥

शं० टी०—यद्यपि प्रत्यक्षानुमानश्रुतिस्मृतिभिस्त्वंपदलक्ष्यार्थ आत्मा नित्य एवेति विजानामि तथापि भीष्मादिशब्दवाच्यार्थानां म्रियमाणानां वियोगजं दुःखं सोढुं न शक्यत इत्याशयवन्तमर्जुनमालक्ष्य ब्रह्मविद्भिरनात्मविषयकसुखदुःखानुसंधानं न कर्तव्यं किंतु शरीरान्तरानुसत्तया प्रारब्धवशात्प्राप्तमप्याध्यात्मिकादित्रिविधदुःखं यत्तत्सोढ्वा तीव्रमुमुक्षया सदा ब्रह्मानुसन्धानमेव कर्तव्यमिति सूचयितुमाह—**मात्रास्पर्शा इति ।** चक्षुरादिज्ञानेन्द्रियैः सामान्येन मीयन्त इति मात्राः। वागाद्युभयेन्द्रियैः स्पृश्यन्ते गृह्यन्ते इति स्पर्शाः शब्दादयो भोग्यपदार्थाः । स्वयं शीतोष्णसुखदुःखदाः शीतोष्णवत्सुखदुःखदाः शीतोष्णावनुकूलौ प्रतिकूलौ च सन्तौ यथा सुखं दुःखं च ददाते तथैव शब्दादयोऽप्यनुकूलाः प्रतिकूलाश्च सन्तः सुखं दुःखं च ददत इत्यर्थः । यद्वा शब्दादयः प्रतिकूलमनुकूलं वा शीतमुष्णं वाप्यध्यात्ममुत्पाद्य तद्द्वारा साक्षाद्वा सुखं दुःखं च ददतीति शीतोष्णसुखदुःखदाः । ननु विषयेन्द्रियसंयोगस्य नित्यत्वात्तन्निमित्तकसुखदुःखयोरपि नित्यत्वे सत्यात्मविदस्तदनुसन्धानं विना ब्रह्मानुसन्धिः कथं सिध्यतीत्यत आह—**आगमेति**। आगम उत्पत्तिरपायो विनाशस्तद्वन्तो विषयास्तज्जन्यसुखदुःखादयश्च तडिद्वदनित्यास्तान् क्षणकालावस्थायिनो विषयान् तत्संयोगांश्च तितिक्षस्व । भारत भा ब्रह्मविद्या तस्यामेव रमत इति भारत हे कौंतेय ! मुमुक्षोर्नित्यसुखार्थिनः प्रारब्धादागतानां सुखदुःखादीनां सहनमवश्यं कर्तव्यम् । तत्सहनं कुर्वत एव श्रवणादि तज्जन्यं ज्ञानं तत्फलं चापि सिध्यत्यतस्त्वमेतेषां समागमसुखवद्वियोगदुःखं च सहस्व । प्रतिक्रियाचिन्ताविषादराहित्येन प्राप्तदुःखसहनं मुमुक्षोरुत्तमो धर्मः । तथा च श्रुतिः "वृक्ष इव तिष्ठासे च्छिद्यमानो न कुप्येत कम्प्येत । उपल इव तिष्ठासे च्छिद्यमानो न कुप्येत न कम्प्येत" इति। देहेन्द्रियादयः शब्दादयश्चानित्याः आगमापायित्वाद्यन्नैवं तन्नैवं यथात्मेति । आत्मा नित्यः तदागमापायसाक्षित्वात् । यन्नैवं तन्नैवं यथा देह इत्याद्यनुमानेन देहेन्द्रियादीनामनित्यत्वं तत्साक्षिण आत्मनो नित्यत्वं चात्रापि सूचितं भवति ॥ १४ ॥

श्री० टी०—ननु गतानागतानहं न शोचामि किन्तु तद्वियोगादिदुःखभाजमात्मानमेवेति चेत्तत्राह—**मात्रास्पर्शा इति ।** मीयन्ते ज्ञायन्ते विषया आभिरिति मात्रा इन्द्रियवृत्तयस्तासां स्पर्शाः विषयैः सम्बन्धाः ते शीतोष्णादिप्रदा भवन्ति । ते त्वागमापायित्वादनित्या अस्थिराः । अतस्तांस्तितिक्षस्व सहस्व । यथा जलातपादिसम्पर्कास्तत्तत्कालकृताः स्वभावतः शीतोष्णादि प्रयच्छन्ति एवमिष्टसंयोगवियोगा अपि सुखदुःखादि प्रयच्छन्ति । तेषां चास्थिरत्वात्सहनं तव धीरस्योचितम् । नतु तन्निमित्तहर्षविषादपारवश्यमित्यर्थः ॥ १४ ॥

स० टी०—नन्वात्मनो न नित्यत्वे विभुत्वे वा विकल्पना ॥ एकत्वं तु कथं सिद्ध्येज्जीवत्सु द्वैतवादिषु ॥ १ ॥ वैशेषिकादयः सर्वे तार्किकाः कापिलास्तथा ॥ देहभेदेन भिन्नत्वमात्मनस्ते प्रपेदिरे ॥ २ ॥ अन्यथा सुखदुःखादिसङ्करः सर्वदेहिनाम् ॥ एवं भीष्मादिभिन्नस्य नित्यत्वे मम सत्यपि ॥ ३ ॥ सुखदुःखादियोगित्वात्तत्संयोगवियोगजौ ॥ शोकंमोहौ कथं न स्तामित्याशङ्क्याह मापतिः ॥ ४ ॥ मीयन्ते विषया आभिर्मात्राः स्युरिन्द्रियाणि ताः ॥ तासां स्पर्शास्तु विषयैः सम्बन्धाः क्षणभङ्गुराः ॥ ५ ॥ परिणामा धियः सर्वे तत्तदाकारवृत्तयः ॥ बुद्धेराद्यन्तवन्तस्ते सुखदुःखप्रदाः शठाः ॥ ६ ॥ शीतोष्णादिमुखेनैते नतु नित्यस्य देहिनः ॥ कौटस्थ्यान्निर्गुणत्वाच्च साक्षिणः स्युः कथं त्विमे ॥ ७ ॥ नित्यस्यानित्यधर्माणामाश्रयत्वं न संभवेत् ॥ साक्ष्यस्य साक्षिधर्मत्वानुपपत्तेश्च सर्वथा ॥ ८ ॥ नर्ते स्याद्विक्रियां दुःखी साक्षिता क्व विकारिणः ॥ धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ॥ ९ ॥ इत्युक्तं वार्तिके तस्मात्साक्षिणो नैव विक्रियाः ॥ अन्तःकरणधर्मास्ते सुखदुःखादयोऽखिलाः ॥ १० ॥ नात्मनो निर्विकारस्य तेन भेदविकल्पना ॥ एकस्मिन्नद्वितीयेऽस्मिन्भेदो नास्ति मनागपि ॥ ११ ॥ वैशेषिकादयो भ्रान्त्या मन्यन्ते विक्रियां भिदाम् ॥ आद्यन्तवत्त्वादृश्यत्वात्सुखाद्याः क्षणभङ्गुराः ॥ १२ ॥ परिणामा धियः सर्वे भिन्नायाः साक्षिणो दृशः ॥ वैलक्षण्यमतः सिद्धमात्मनो लिङ्गदेहतः ॥ १३ ॥ सर्वं सुखादिवैचित्र्यं लिङ्गधर्मो न चात्मनः ॥ प्रतिदेहमसौ बुद्धिर्भिन्ना

दुःखादिधर्मिणी ॥ १४ ॥ तत्र कूटस्थ आत्मैको भानुवत्प्रतिबिम्बितः ॥ प्रमातृत्वं गतो नानारूपेण प्रतिभासितः ॥ १५ ॥ पात्रस्थसलिलेष्वर्को यथैव प्रतिबिम्बितः ॥ स्वच्छेषु स्वच्छवद्भाति मलिनेषु तथाऽऽविलः ॥ १६ ॥ चलेषु चलवद्भाति स्थिरेषु स्थिरवत्तथा ॥ चञ्चलत्वादयो धर्माः सूर्ये सन्ति न तावता ॥ १७ ॥ तथा सुखादयो बुद्धेर्नानात्वात्स्युरनेकधा ॥ आत्मनो नैव ते सन्ति सूर्यस्येवाविकारिणः ॥ १८ ॥ एतेन स्वर्गनरकौ बन्धमोक्षौ भवाभवौ ॥ व्याख्यातौ मातृनिष्ठत्वान्मातॄणां बुद्धिभेदतः ॥ १९ ॥ भिन्नत्वान्नैव तैरात्मा लिप्यते व्योमसूर्यवत् ॥ एकस्मिन्नपि देहेऽस्मिन्मातुर्दुःखसुखे यथा ॥ २० ॥ पादाद्यङ्गेषु भिन्नेषु भिन्ने तद्वज्जगत्सु च ॥ पादे मे सुखमस्त्यद्य वेदना शिरसीति च ॥ २१ ॥ अनुभूतिस्तया नासौ भिद्यते जीव एकलः ॥ तथात्माऽस्त्येक एवासौ सर्वदेहेषु भासकः ॥२२॥ उपाधेरेव भिन्नत्वान्न भेदः प्रत्यगात्मनि॥ श्रुतिसिद्धात्मनो भेदे मानमन्यन्न दृश्यते ॥ २३ ॥ येन भेदप्रसिद्धिः स्यात्तस्माद्भेदो न वास्तवः ॥ अध्यक्षादेः प्रमाणस्य विषयत्वं न चात्मनः ॥ २४ ॥ तद्भेदस्य कथं युक्त्या तस्य गोचरता भवेत् ॥ प्रतियोग्यात्मविज्ञानाधीनज्ञानभिदा यतः ॥ २५ ॥ अत आत्मैक एवास्ति सिद्धमित्युपपत्तिभिः ॥ शीतं जातु सुखे हेतुः कदाचिद्दुःखकारणम् ॥ २६ ॥ एवमुष्णमतो भिन्नतया स्वीकार एतयोः॥ अतोऽत्यन्तास्थिरांस्त्वत्तो भिन्नस्यैव विकारिणः ॥ २७ ॥ धर्मांश्चित्तस्य दुःखादिदायिनः क्षणभङ्गुरान् ॥ मात्रास्पर्शांस्तितिक्षस्व नैते किंचित्करा मम ॥ २८ ॥ एवं तांस्त्वमुपेक्षस्व विवेकेन चिदात्मनः ॥ देहाद्यध्यासतो मा त्वं जानीहि स्वं च दुःखिनम् ॥ २९ ॥ कुलद्वयविशुद्धस्य तवाज्ञानं न चोचितम् ॥ कौन्तेय भारतेत्येवं संबोधनयुगध्वनिः ॥ ३० ॥ १४ ॥

भा० टी०—नन्वात्मनो नित्यत्त्वात्तन्नाशनिमित्तशोकमोहाभावेऽपि सुखवियोगदुःखसंयोगशीतादिप्राप्तिनिमित्तौ तौ दुर्वाराविति चेत्तत्राह—**मात्रास्पर्शा इति** । मीयन्ते आभिर्विषया इति मात्राः इन्द्रियाणि। तेषां विषयैः स्पर्शाः संयोगाः। यद्वा स्पृश्यन्त इति स्पर्शाः विषया मात्राश्च स्पर्शाश्च ते। शीतोष्णसुखदुःखदाः त्वगिन्द्रियतद्विषयसम्बन्धस्य तयोर्वाऽनियतसुखदुःखशीतोष्णदातृत्वमप्यस्तीत्यभिप्रेत्य नियतरूपाभ्यां सुखदुःखाभ्यामनियतसुखदुःखप्रदयोः शीतोष्णयोः पृथग्ग्रहणम् । यत उत्पत्तिविनाशशीला अत एवानित्याः। अत एव तान् सहस्व। तेषु हर्षं विषादं च मा कार्षीरित्यर्थः । स्त्रीस्वभाववतः सुखादिदानेतान् भरतादिपुरुषधौरेयस्वभावमाश्रित्य सोढुं योग्योऽसीति सम्बोधनाशयः । अत्र संबोधनद्वयेनोभयकुलशुद्धस्यैव विद्याधिकारित्वं सूचयतीत्येके । उत्तमवंश्यत्वेन धीरत्वमस्येत्यन्ये । उभयकुलविशुद्धस्य तवात्माज्ञानमनुचितमिति केचित् । अयं पक्षउभयकुलशुद्धिमात्रादेवात्मज्ञानं यदि स्यात्तर्हि सम्यक् । अथवा प्रथमपक्षानुरोधेन व्याख्येयः । भाष्यकृद्भिस्तु सुगमत्वात्संबोधनाभिप्रायवर्णनं न सर्वत्र क्रियत इति बोध्यम् ॥ १४ ॥

प० टी०—ननु न तानहं शोचामि किंतु तद्वियोगदुःखभाग्भवामीति चेत्तत्राह—**मात्रास्पर्शा इति** । मीयन्ते ज्ञायन्ते विषया आभिरिति मात्रा इन्द्रियवृत्तयस्तासां स्पर्शा विषयैः सह संबन्धास्ते शीतोष्णादिसुखदुःखदा भवन्ति। ते चागमापायित्वादनित्या अतस्तांस्तितिक्षस्व सहस्व । यतस्त्वं भारतो भरतवंशोत्पन्नोऽसि वीरोऽसि। अत्रैतदुक्तं भवति । पुत्रपौत्रादिविषया देहार्थं मृग्यन्तेऽतः सर्वोत्कृष्टो विषयो देहः । एवंविधमपि देहं रणे वीरास्तृणीकुर्वन्ति पुनः किं सुहृद्वियोगं क्षणभङ्गुरं शीतोष्णादितुल्यमित्यर्थः ॥ १४ ॥

रा० टी०—सत्यमेव तत्सर्वं भवदुक्तम् । उक्तविधया देहहानेरभावात् । देहहानावपि समीचीनदेहान्तररूपप्रतिनिधिलाभात् । बान्धवानां हानिर्भविष्यतीति धिया शोको न युक्त इति । तथापि तन्मृतौ ममैव सुखहानिर्दुःखप्राप्तिश्च स्यात् । तद्देहदर्शनस्पर्शनसम्भाषणादेः सुखहेतोरभावात् । छेदभेदादिना विकृततद्देहदर्शनस्य दुःखहेतोर्भावादित्यत आह—**मात्रेति** । मीयन्त इति मात्राः। माङ्मान इत्यतः कर्मणि त्रप्रत्ययः । स्त्रीत्वं शब्दस्वाभाव्यात् । ज्ञानविषयाः गन्धरसरूपस्पर्शशब्दाः तेषां स्पर्शाः सम्बन्धाः । शीतोष्णशब्दौ शीतस्पर्शो-

ष्णस्पर्शवाचकौ । लक्षणया गन्धरसरूपस्पर्शशब्दाख्यसर्वविषयपरौ भूत्वा तदनुभवलक्षकौ । लाक्षणिकोक्तिकृत्यमग्रे व्यक्तम् । गन्धरसरूपस्पर्शशब्दाख्यविषयाणां घ्राणरसनचक्षुस्त्वक्श्रोत्ररूपेन्द्रियैर्यथाक्रमं ये सन्निकर्षास्ते मात्रास्पर्शाः । शीतोष्णसुखदुःखदाः सुगन्धसुरससुरूपसुस्पर्शसुशब्दविषयकसाक्षात्काररूपानुभवजननद्वाराऽऽत्मनः सुखप्रदाः । अनिष्टगन्धरसादिविषयकसाक्षात्कारजननद्वारा दुःखप्रदाः । तेषां मृतौ च तन्निमित्तसुखदुःखहानिप्राप्ती भवत इति किल कौन्तेय तवाशय इति पार्थहार्दमनूद्य भगवान्कृष्णः काकुस्वराशिरस्कं तुशब्देनावधारणार्थकेन निराचष्टे । हे कौन्तेय मात्रास्पर्शा एव । गन्धादिविषयेन्द्रियसन्निकर्षा एव इष्टानिष्टस्वविषयसाक्षात्कारद्वारा सुखदुःखदाः । किमिति काकुस्वरेणाक्षेपः । केवलं तन्मात्रा एव न भवन्ति । किंतु विषयेषु शोभनाध्यासनिमित्तस्नेहरूपेण वा अरित्वादिभ्रमहेतुकद्वेषरूपेण वा देहेन्द्रियान्तःकरणेषु ममतातिशयहेतुकाविवेकरूपेण वाऽभिमानसहिता एव तथेत्यर्थः । कुत एवं तन्मात्रा एव स्वस्वविषयानुभवद्वारा सुखदुःखहेतवो भवन्त्वित्यत आह—**आगमेति** । यत इति शेषो वा हेतुगर्भविशेषणं वा । एतच्चागमापायित्वं शीतोष्णसुखदुःखदाः मात्रास्पर्शाः । आगमापायिन इत्येवं स्वस्वविषयकधीद्वारा सुखदुःखदत्वविशिष्टमात्रास्पर्शानां विशेषणम् । सविशेषणे हि विधिनिषेधौ विशेष्ये बाधाद्विशेषणमुपसङ्क्रामतइति न्यायात् । मात्रास्पर्शानां स्वस्वविषयकधीद्वारा यत्सुखदुःखदत्वं तस्यागमापायित्वादिति सुखादिदत्वरूपविशेषणमुपसंक्रामति । सुप्त्यादौ श्रीचन्दनाग्निकणादिशीतोष्णस्पर्शसम्बन्धे अविनाभूतमनस्सन्बन्धात्मसन्निकृष्टत्वगिन्द्रियस्य सत्त्वेपि स्वविषयानुभवद्वारा सुखदुःखादिदत्वस्यादर्शनात् । जाग्रद्दशायामभिमानसत्त्वे एव तद्दर्शनात् । अन्वयव्यतिरेकाभ्यामभिमानसहिता एव मात्रास्पर्शाः स्वस्वविषयधीद्वारा सुखदुःखादिदाः । न तु केवला इति भावः । सुप्तावन्येन्द्रियाणामुपरमेऽपि त्वगिन्द्रियस्य नोपरमः । तस्य तदापि विषयसन्निकर्षोस्तीति ज्ञापनायैवेतरविषयलाक्षणिकशीतोष्णपदप्रयोगः । आगमापायित्वं चात्र गङ्गोदकस्येव प्रवाहतो नित्यत्वे व्यक्तिरूपेणानित्यत्वं न विवक्षितम् । मात्रास्पर्शानां सुखादिदत्वेन तदयोगात् । तथात्वे सुप्त्यादौ सत्त्वेनाभिमानस्य प्रकृतान्वयव्यतिरेकोक्त्ययोगात् । अर्जुनस्याभिमाननिवर्तनबोधानुपयोगाच्च । किन्तु किंशुककुसुमानामिव प्रवाहतोऽपि विच्छिद्यमानत्वम् । सुप्तिमूर्छासम्प्रज्ञातसमाधिषु च्छेदेन प्रवाहविच्छेदसम्भवात् । तस्य प्रकृतोपयोगाच्चेति भावेन आगमापायित्वं व्यनक्ति—**अनित्या इति** । शीतोष्णसुखदुःखदाः मात्रास्पर्शा अनित्याः प्रवाहतोऽप्यनित्याः तेषां सुखादिदत्वं प्रवाहतोऽप्यनित्यं यतोऽतोन्वयव्यतिरेकाभ्यामभिमानयुता एव सुखादिदा इत्यर्थः । अत इति शेषः । अभिमानहीनमात्रास्पर्शानां सुखादिदत्वाभावात् । अभिमानत्यागेन तन्मात्रास्पर्शांस्तितिक्षस्व विफलीकुरु । सुखदुःखादिदा यथा न भवन्ति तथा कुरु । नह्यभिमानं विना कुतो मात्रास्पर्शरूपः सामर्थ्येकदेशः सुखादिदाने शक्तो भवतीति भावः ॥ १४ ॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ॥
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

त० टी०—मात्रास्पर्शतितिक्षायां किं फलं स्यादित्यपेक्षायामाह—**यं हीति** । हे पुरुषर्षभ ! यं पुरुषं स्वधर्मानुवर्तिनं शास्त्रविहितं फलसङ्कल्पशून्यं युद्धादिकं स्वधर्मं कुर्वाणं समदुःखसुखं समे दुःखसुखे यस्य स तमत एव धीरं धैर्यवन्तमेते शस्त्रपातादिजन्यमृदुपरुषाः स्पर्शा न व्यथयन्ति स्वधर्मान्न चालयन्ति । सोऽमृतत्वाय परमपुरुषार्थभूतजरामरणादिधर्मवर्जितस्वरूपप्राप्तये कल्पते योग्यो भवति॥१५॥

म० टी०—नन्वन्तःकरणस्य सुखदुःखाद्याश्रयत्वे तस्यैव कर्तृत्वेन भोक्तृत्वेन च चेतनत्वमभ्युपेयम् । तथा च तद्व्यतिरिक्ते तद्भासके भोक्तरि मानाभावान्नाममात्रे विवादः स्यात् । तदभ्युपगमे च बन्धमोक्षयोर्वैयधि-

करण्यापत्तिः । अन्तःकरणस्य सुखदुःखाश्रयत्वेन बद्धत्वात् । आत्मनश्च तद्व्यतिरिक्तस्य मुक्तत्वादित्याशङ्का-मर्जुनस्यापनेतुमाह भगवान्—यमिति । यं स्वप्रकाशत्वेन स्वत एव प्रसिद्धम् "अत्रायं पुरुषः स्वयंज्योतिर्भवति" इति श्रुतेः । पुरुषं पूर्णत्वेन पुरि शयानम् । "स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैतेन किंचनानावृतं नैतेन किंचनासंवृतम्" इति श्रुतेः । समदुःखसुखं समे दुःखसुखे अनात्मधर्मतया भास्यतया च यस्य नि-र्विकारस्य स्वयंज्योतिषस्तम् । सुखदुःखग्रहणमशेषान्तःकरणपरिणामोपलक्षणार्थम् "एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्" इति श्रुत्या वृद्धिकनीयस्तारूपयोः सुखदुःखयोः प्रतिषेधात् । धीरं धिय-मीरयतीति व्युत्पत्त्या चिदाभासद्वारा धीतादात्म्याध्यासेन धीप्रेरकम् । धीसाक्षिणमित्यर्थः । "स धीरः स्वप्नो भूत्वेमं लोकमतिक्रामति" इति श्रुतेः । एतेन बन्धप्रसक्तिर्दर्शिता । तदुक्तम् 'यतो मानानि सिध्यन्ति जा-ग्रदादित्रयं तथा । भावाभावविभागश्च स ब्रह्मास्मीति बोध्यते' इति । एते सुखदुःखदा मात्रास्पर्शाः हि यस्मात् न व्यथयन्ति परमार्थतो न विकुर्वन्ति । सर्वविकारभासकत्वेन विकारायोग्यत्वात् । "सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः" इति श्रुतेः । अतः स पुरुषः स्वस्वरूपभूतब्रह्मात्मैक्यज्ञानेन सर्वदुःखोपादानतदज्ञाननिवृत्त्युपलक्षिताय निखिलद्वैतानुपरक्त-स्वप्रकाशपरमानन्दरूपाय अमृतत्वाय मोक्षाय कल्पते।योग्यो भवतीत्यर्थः। यदि ह्यात्मा स्वाभाविकबन्धाश्रयः स्या-त्तदा स्वाभाविकधर्माणां धर्मिनिवृत्तिमन्तरेणानिवृत्तेर्न कदापि मुच्यते । तथा चोक्तम् 'आत्मा कर्त्रादिरूपश्चेन्माका-ङ्क्षीस्तर्हि मुक्तताम् । न हि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः' इति प्रागभावासहवृत्तेर्युपगत्सर्वविशेषगुणनिवृ-त्तेर्द्धर्मिनिवृत्तिर्नान्तरीयकत्वदर्शनात् । अथात्मनि बन्धो न स्वाभाविकः । किन्तु बुद्ध्याद्युपाधिकृतः "आ-त्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति श्रुतेः । तथा च धर्मिसद्भावेऽपि तन्निवृत्त्या मुक्त्युपपत्तिरिति चेत् हन्त तर्हि यः स्वधर्ममन्यनिष्ठतया भासयति स उपाधिरित्यभ्युपगमाद्बुद्ध्यादिरुपाधिः स्वधर्ममात्मनिष्ठ-तया भासयतीत्यायातम् । तथा चायातं मार्गे बन्धस्यासत्यत्वाभ्युपगमात् । न हि स्फटिकमणौ जपाकुसुमोपधान-निमित्तो लोहितिमा सत्यः ।अतः सर्वसंसारधर्मासंसर्गिणोऽप्यात्मन उपाधिवशात्तत्संसर्गित्वप्रतिभमो बन्धः । स्वस्वरूपज्ञानेन तु स्वरूपाज्ञानतत्कार्यबुद्ध्याद्युपाधिनिवृत्त्या तन्निमित्तानिखिलभ्रमनिवृत्तौ निर्मृष्टनिखिलभा-स्योपरागतया शुद्धस्य स्वप्रकाशपरमानन्दतया पूर्णस्यात्मनः स्वत एव कैवल्यं मोक्ष इति न बन्धमोक्षयोर्वैयधिक-रण्यापत्तिः। अत एव नाममात्रे विवाद इत्यपास्तम् । भास्यभासकयोरेकत्वानुपपत्तेः । दुःखी स्वव्यतिरिक्तभास्यः भास्यत्वात् घटवदित्यनुमानात् भास्यस्य भासकत्वादर्शनात् । एकस्यैव भास्यत्वे भासकत्वे च कर्तृकर्मविरोधात् । आत्मनः कथमिति चेन्न । तस्य भासकत्वमात्राभ्युपगमात् । अहं दुःखीत्यादिवृत्तिसहिताहङ्कारभासकत्वेन तस्य कदापि भास्यकोटावप्रवेशात् । अत एव दुःखी न स्वातिरिक्तभासकापेक्षः भासकत्वात् दीपवदित्यनुमानमपि न भास्यत्वेन स्वातिरिक्तभासकसाधकेन प्रतिरोधात् । भासकत्वं च भानकरणत्वं स्वप्रकाशनरूपत्वं वा । आद्ये दी-पस्येव करणान्तरानपेक्षत्वेऽपि स्वातिरिक्तभानसापेक्षत्वं दुःखिनो न व्याहन्यते । अन्यथा दृष्टान्तस्य साध्यवै-कल्यापत्तेः । द्वितीये त्वसिद्धो हेतुरित्यधिकबलतया भास्यत्वहेतुरेव विजयते । बुद्धिवृत्त्यातिरिक्तभानानभ्यु-पगमाद्बुद्धिरेव भानरूपेति चेन्न । भानस्य सर्वदेशकालानुस्यूततया भेदकधर्मशून्यतया च विभोर्नित्यस्यैकस्य चानित्यपरिच्छिन्नानेकरूपबुद्धिपरिणामात्मकत्वानुपपत्तेः । उत्पत्तिविनाशादिप्रतीतिश्चावश्यकल्प्याविषयसम्बन्ध-विषयतयाऽप्युपपत्तेः । अन्यथा तत्तज्ज्ञानोत्पत्तिविनाशभेदादिकल्पनायामतिगौरवापत्तेरित्याद्यन्यत्र विस्तरः । तथा च श्रुतिः "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । आकाशवत्सर्वगतश्च नित्यः। महद्भूतमनन्त-मपारं विज्ञानघन एव। तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूतिः" इत्याद्या विभुनित्य-स्वप्रकाशज्ञानरूपतामात्मनो दर्शयन्ति । एतेनाविद्यालक्षणादप्युपाधेर्व्यतिरेकः सिद्धः । अतोऽसत्योपाधि-

निबन्धनबन्धभ्रमस्य सत्यात्मज्ञानान्निवृत्तौ मुक्तिरिति सर्वमवदातम् । पुरुषर्षभेति सम्बोधयन् स्वप्रकाशचैतन्यरूपत्वेन पुरुषत्वे परमानन्दरूपत्वेन चात्मन ऋषभत्वं सर्वद्वैतापेक्षया श्रेष्ठत्वमजानन्नेव शोचसि अतः स्वरूपज्ञानादेव तव शोकानिवृत्तिः सुकरा । " तरति शोकमात्मवित् " इति श्रुतेरिति सूचयति । अत्र पुरुषमित्येकवचनेन साङ्ख्यपक्षो निराकृतस्तैः पुरुषबहुत्वाभ्युपगमात् ।। १५ ।।

शं० टी०—तितिक्षुत्वमेव विवेकवैराग्यशमदमसंन्याससहितं श्रवणादिसाधनं सत्तज्जन्यज्ञानद्वारा मोक्षफलदं भवतीत्याह—**यं हीति** । सर्वदुःखसहनपूर्वकं निरन्तरब्रह्मनिष्ठो यः कैवल्यं संपादयति स एव पुरुषोत्तम इति सूचयितुमिदं संबोधनं हे पुरुषर्षभार्जुन ! धीरं विषयग्रहणेभ्यो धियं राति निगृह्णातीति धीरः सदात्मनिष्ठस्तमत एव समदुःखसुखं समे दुःखसुखे यस्य तं सुखदुःखयोः प्राप्तयोरविकारात्मना तिष्ठन्तम् । यद्वा समे समभावं ब्रह्मभावं गमिते दुःखसुखे यस्य तम् । यं पुरुषं ब्रह्मविदमेते शीतोष्णादयो न व्यथयन्ति न बाधन्ते निष्ठातो न चालयन्ति स एवामृतत्वाय यदज्ञानान्मृतं मरणं जन्म च पुंसस्तदमृतं ब्रह्म एतदमृतमभयमेतद्ब्रह्मेति श्रवणात्तद्भावायामृतत्वाय कल्पते मुक्तो भवतीत्यर्थः । "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति अभयं वै ब्रह्म अभयं हि वै ब्रह्म भवति " इत्येतत् श्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ।। १५ ।।

श्री० टी०—तत्प्रतीकारप्रयत्नादपि तत्सहनमेवोचितं महाफलत्वादित्याह—**यमिति** । एते मात्रास्पर्शाः यं पुरुषं न व्यथयन्ति नाभिभवन्ति । समे सुखदुःखे यस्य तम् । स तैरविक्षिप्यमाणो धर्मज्ञानद्वारा अमृतत्वाय मोक्षाय कल्पते योग्यो भवति ।। १५ ।।

स० टी०—नन्वन्तःकरणस्यैव भोक्तृत्वे सुखदुःखयोः ।। तस्यैव चेतनत्वात्स्यादात्मत्वं न ततः परे ।।१।। भोक्तुरन्यस्य चात्मत्वे मानं नैवेह दृश्यते ।। स्याद्वैयधिकरण्यं च ह्यन्यथा बन्धमोक्षयोः ।। २ ।। बद्धं मनो विमुक्तोऽन्य आत्मेत्यत्राह माधवः ।। यं स्वतः स्वप्रकाशत्वात्प्रसिद्धं पूर्णमद्वयम् ।। ३ ।। मात्रास्पर्शा न कुर्वन्ति विक्रियां वस्तुतोऽण्वपि ।। दृश्यधर्मतया यस्य सुखदुःखे समे दृशः ।। ४ ।। धीरं धीप्रेरकं स्वात्मतादात्म्याध्यासतो विभुम् ।। चिच्छायाद्वारतो बुद्धिसाक्षिणं वस्तुतः परम् ।। ५ ।। अध्यस्तबन्धाधिष्ठानतदुक्तं साम्प्रदायिकैः ।। यतो मानानि सिद्धयन्ति जाग्रदादित्रयं तथा ।। ६ ।। भावाभावविभागश्च सब्रह्मास्मीति बोध्यते ।। अतः स पुरुषः साक्षी ब्रह्मात्मैक्यधियाखिलम् ।। ७ ।। सविलासमहामोहं ध्वस्त्वा मोक्षाय कल्पते ।। अनात्मन्यात्मताध्यासाद्बन्धस्तत्रैव कल्पितः ।। ८ ।। तन्निवृत्त्यैक्यविज्ञानान्मुक्त इत्युपचर्यते ।। वस्तुतो बन्धमोक्षादि नास्त्येवाद्वैतवस्तुनि ।।९।। स्वाभाविकत्वे बन्धस्य मुक्तिर्न स्यात्ततो विभोः ।। न स्वभावविपर्यासः प्रमाणानां शतैरपि ।। १० ।। तस्माद्बन्धस्य मिथ्यात्वं तदुक्तं वार्तिके स्फुटम् ।। आत्मा कर्त्रादिरूपश्चेन्माकाङ्क्षीस्तर्हि मुक्तताम् ।। ११ ।। नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः ।। मिथ्याज्ञानप्रयुक्तोऽयं बन्धोऽध्यस्तश्चिदात्मनि ।। १२ ।। सम्यगद्वैतबोधेन तन्निवृत्त्यास्य मुक्तता ।। स्वप्रकाशपरानन्दरूपत्वेनैव पूरुषः।। १३।। ऋषभः सर्वतः श्रेष्ठो द्वैतास्पष्टश्चिदद्वयः ।। इत्याह्वानेन हरिणा बोधितः पुरुषर्षभः ।। १४ ।। अज्ञात्वैतादृशं वस्तु रूपं तं पुरुषर्षभम् ।। शोचसीत्येव तात्पर्यं गम्यते श्रीहरेर्विभोः ।। १५ ।। १५ ।।

भा० टी०—तितिक्षायाः फलमाह—**यमिति** । समे सुखदुःखे यस्य तं धीरं धीमन्तं नित्यात्मज्ञानवन्तं नित्यात्मज्ञानादेते शीतोष्णादयः न चालयन्ति । यद्यपि एते मात्रास्पर्शा इति वक्तुमुचितं तथापि शीतादिकमुक्त्वा न व्यथयन्ति इत्यतो भाष्यकृद्भिरेतच्छब्देन शीतादीनामेव परामर्शः कृतः । स साधनचतुष्टयसंपन्नो नित्यात्मदर्शननिष्ठोऽमृतत्वाय मोक्षाय समर्थो भवति । पुरुषं न व्यथयन्ति त्वं तु पुरुषर्षभइति सूचयन्नाह—पुरुषर्षभेति । अत्र केचिद्वर्णयन्ति । नन्वात्मनो नित्यत्वे विभुत्वे च न विवदामः । प्रतिदेहमेकत्वं तु न

सहामहे । तथाहि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यनवविशेषगुणवन्तः प्रतिदेहं भिन्ना एव । नित्या विभवश्चात्मान इति वैशेषिका मन्यन्ते । इममेव पक्षं तार्किकमीमांसकादयोऽपि प्रतिपन्नाः । साङ्ख्यास्तु विप्रतिपद्यमाना अपि आत्मनो गुणवत्त्वे प्रतिदेहं भेदेन विप्रतिपद्यन्ते अन्यथा सुखदुःखादिसङ्करप्रसङ्गात् । तथा च भीष्मादिभिन्नस्य मम नित्यत्वे विभुत्वे च सुखदुःखादियोगित्वात् । भीष्मादिबन्धुदेहविच्छेदे सुखवियोगो दुःखसंयोगश्च स्यादिति शोकमोहौ नानुचिताविति अर्जुनाभिप्रायमाशङ्क्य लिङ्गशरीरविवेकमाह—मात्रेति । मात्रास्पर्शा उत्पत्तिविनाशवतोऽन्तःकरणस्यैव शीतादिद्वारा सुखदुःखदा न तु नित्यस्य विभोरात्मनः । तथाचान्तःकरणभेदान्न साङ्ख्योक्तः सङ्करप्रसङ्गः । वैशेषिकादयश्च भ्रान्त्यैवात्मनो विकारित्वं भेदं चाङ्गीकृतवन्त इत्यर्थः । अन्तःकरणस्यानित्यत्वादृश्यत्वाच्च नित्यदृग्रूपत्वात्त्वत्तो भिन्नश्च सुखादिजनका ये मात्रास्पर्शास्तेऽप्यानित्यास्तांस्तितिक्षस्व नैते मम किंचित्करा इति विवेकेनोपेक्षस्व । दुःखितादात्म्येनात्मानं दुःखिनं मा ज्ञासीरित्यर्थः । नन्वन्तःकरणस्य सुखाद्याश्रयत्वे तस्यैव कर्तृत्वादिना चेतनत्वमभ्युपेयम् । तथाच तद्व्यतिरिक्ते तद्भासके भोक्तरि मानाभावान्नाममात्रे विवादः स्यात्तदभ्युपगमे च बन्धमोक्षयोर्वैयधिकरण्यापत्तिः अन्तःकरणस्य सुखाद्याश्रयत्वेन बद्धत्वात् । आत्मनश्च तव्द्यतिरिक्तस्य मुक्तत्वादित्याशङ्कामर्जुनस्यापनेतुमाह—यमिति । यं स्वप्रकाशत्वेन स्वत एव प्रसिद्धं पुरुषं पूर्णत्वेन पुरि शयानं समे सुखदुःखे अनात्मधर्मतया भास्यतया च यस्य तं धीरं धियं प्रेरयतीति व्युत्पत्त्या चिदाभासद्वारा धीतादात्म्याध्यासेन धीप्रेरकं धीसाक्षिणमित्यर्थः । एतेन बन्धप्रसक्तिर्दर्शिता । एते सुखदुःखदा मात्रास्पर्शा यस्मान्न व्यथयन्ति परमार्थतो न विकुर्वन्ति स पुरुषः अमृतत्वाय मोक्षाय योग्यो भवतीत्यर्थः । अतः सर्वधर्मासंसर्गिणोऽप्यात्मन उपाधिवशात्तत्संसर्गित्वप्रतिभासो बन्धः स्वरूपज्ञानेन स्वरूपाज्ञानतत्कार्यबुद्ध्याद्युपाधिनिवृत्त्या तन्निमित्तनिखिलभ्रमनिवृत्तौ निर्मृष्टनिखिलभास्योपरागतया शुद्धस्य स्वप्रकाशपरमानन्दतया पूर्णस्यात्मनः स्वत एव कैवल्यं मोक्ष इति न बन्धमोक्षयोर्वैयधिकरण्यापत्तिः । अत एव नाममात्रे विवाद इत्यपास्तम् । भास्यभासकयोरेकत्वानुपपत्तेः । पुरुषर्षभेति संबोधयन् स्वप्रकाशचैतन्यरूपत्वेन पुरुषत्वं परमानन्दरूपत्वेनात्मन ऋषभत्वं सर्वद्वैतापेक्षया श्रेष्ठत्वमजानन्नेव शोचसि । अतः स्वस्वरूपज्ञानादेव तव शोकनिवृत्तिः सुकरा । "तरति शोकमात्मवित्" इति श्रुतेरिति सूचयतीति । अत्रेदमवधेयं शीतोष्णद्वारा सुखदुःखदा इत्यसङ्गतम् । सर्वेषां मात्रास्पर्शानां सुखादिदातृत्वे शीतोष्णयोर्द्वारत्वाभावात् । शीतोष्णग्रहणं त्रिविधसुखदुःखोपलक्षणार्थम् । शीतमुष्णं च कदाचित्सुखं कदाचिद्दुःखम् । सुखदुःखे तु न कदाचिद्विपरीते इति तयोः पृथङ्निर्देश इति स्वपरग्रन्थविरोधाच्च । शीतोष्णद्वारा सुखदुःखदा इत्यस्य शीतोष्णद्वारा साक्षाच्च सुखदुःखदा इत्यर्थ इति यदि कश्चित् ब्रूयात्तर्हि भाष्ये एवास्यार्थस्यान्तर्भावः । तस्मात् शीतं चोष्णं च सुखं च दुःखं च प्रयच्छन्तीति भाष्यकृद्व्याख्यानमेवर्जु । एतेनागमापायिनोन्तःकरणस्येत्यपास्तम् । वाक्यार्थस्य सत्यपि सम्यक्सम्भवे विशेषाध्याहारानौचित्यात् । तितिक्षस्वेति वाक्यशेषस्य मुख्यार्थत्यागापत्तेश्च । एतेनोत्तरश्लोकव्याख्यानमप्यपास्तं यं पुरुषमित्येतावतैव निर्वाहे समेत्यादिविशेषणद्वयस्यानर्थक्यापत्तेश्च । बन्धप्रसक्तिरपि पुरिषु तादात्म्याध्यासं कृत्वा शेते इत्यर्थकेन पुरुषशब्देनैव लभ्यते । एतेन सुखादेः क्षेत्रधर्मत्वस्य वक्ष्यमाणत्वान्नास्य व्याख्यानस्याकरणे भाष्यकृतां न्यूनता न शङ्कनीया । एवमन्येषामपि मूलतद्भाष्यबहिर्भूताः कल्पनाः सम्यग्विचार्य निराकर्तव्याः । अस्माभिस्तु विस्तरभयान्नोद्घाट्य निराक्रियन्ते १५

प० टी०—अथ दुःखसहने तावदुपायद्वयमस्ति धैर्यं विवेकश्च तत्र प्रथममाह—**यं हीति** । एते मात्रास्पर्शा यं पुरुषं पुरुषार्थाधिष्ठानभूतं न व्यथयन्ति नाभिभवन्ति । भो पुरुषर्षभ पुरुषश्रेष्ठ ! तं धीरमविक्रियं सहनशीलं समदुःखसुखं सुखेऽस्पृहं दुःखे निर्विषादमिति पुरुषविशेषणानि । स पुरुषोऽमृतत्वाय जीवन्मुक्तत्वाय कल्पते ॥ १५ ॥

रा० टी०—ननु दुःखाभावस्य युद्धाकरणे सम्भवात्किं तत्कृत्वा दुःखाभावायाभिमानत्यागेनेत्याशङ्क्य देहाद्यभिमानत्यागेन भवन् दुःखाभावः स्वयं फलरूपोऽपि परमपुमर्थहेतुश्च भवतीत्याह—यं हीति । हे पुरुषर्षभ पुरुषश्रेष्ठ पार्थ ! एते मात्रास्पर्शाः विषयेन्द्रियसन्निकर्षाः पुरुषं पुरं देहं सरति गच्छति। सृ गतौ प्रत्यक्षतो जानाति । उपपदान्तस्योकारः सरतेर्डप्रत्ययः । षत्वम् । शरीरदर्शनवन्तम् । यद्वा पुरु पूर्णं ब्रह्म । तत्सरत्यवगच्छतीति ब्रह्मज्ञानी तम् । धीरं सुखे दुःखे च प्राप्ते सति तत्कार्ययोरुत्सेकविषादयोः स्तम्भकप्रयत्नवन्तम् अतएव समदुःखसुखम् । अनुपादेयत्वेन धर्मेण दुःखेन समं सुखं यस्य स तथा तम् । दुःखं यथाऽपुमर्थत्वहेतुनाऽनुपादेयं तथा वैषयिकं सुखमपि अमृतत्वविरोधित्वादनुपादेयं यस्य स समदुःखसुखः दुःखसमसुखमिति यावत् । अत एव यमभिमानहीनं जीवं स्त्रीजनं पुंजनं वा न व्यथयन्ति न चालयन्ति सुखदुःखकृतोच्चत्वनीचत्वलक्षणविकारं न प्रापयन्ति । सोऽधिकारी अमृतत्वाय मुक्तये कल्पते समर्थो भवति । अत्र धीरमिति समदुःखसुखत्वे हेतुः । तच्चाभिमानत्यागे हेतुः समदुःखसुखो जीवः कथं सुखहेतुषु शोभनाध्यासलक्षणाभिमानवांस्तद्विरोधिषु द्वेषरूपाभिमानवांश्च कथं भवेदिति सुप्त्यादौ पामराणामपि अभिमानाभावेन व्यथाभावादमृतत्वप्रसक्तिरिति शङ्काव्यावृत्तये पुरुषं शरीरदर्शनवन्तमित्युक्तम् । तथा व्यथाभावमात्रेण कथममृतत्वम् "तमेवं विद्वान्" इत्यादिश्रुतिविरोधादित्यपि शङ्कापनुत्तये पुरुषं ब्रह्मज्ञानिनमित्युक्तम्। 'पुरु ब्रह्मगुणाधिक्यात्तज्ज्ञानात्पुरुषः स्मृतः' इत्युक्तेः । अत्र नरहरितीर्थीये 'ब्रह्मानिरभिमानित्वात्' इति स्मृतिमुदाहृत्य चतुर्मुखादन्येषामतिव्यथाराहित्यमेव लिङ्गभङ्गात्प्राग्देहाद्यभिमानाभावादित्युक्तम् ॥ १५ ॥

नासतो विद्यते भावो नाभावो विद्यते सतः ॥
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

नन्वातिप्रभूतशीतोष्णादिप्राप्तावात्माऽप्यतिदुःख्यनुभूयते, अमुकोऽतिदुःखेन मृत इत्यात्मनोऽप्यभावप्रतीतेः कथं शीतोष्णादेरेवागमापायित्वं कथं वाऽऽत्मनोऽमृतत्वकल्पनमित्याङ्क्षां निरासयति—नेति । असतोऽनात्मधर्मस्य विकारस्य शीतोष्णादेरात्मनि भावः सत्ता न विद्यते, सतोऽविकार्यस्यात्मनोऽभावो विनाशो न विद्यते । अनयोर्भावाभावौ नाङ्गप्रतीत्यवसेयावित्याह—उभयोरिति । उभयोरप्यनयोः सदसतोर्विचारे जाते अन्तः सिद्धान्तपक्षः निर्णय इत्यर्थः तत्त्वदर्शिभिर्दृष्टः । "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। ऐतदात्म्यमिदं सर्वम्। तत्सत्यं स आत्मा। तत्त्वमसि श्वेतकेतो" इत्यादिश्रुतिप्रतिपादितं तत्त्वं जीवात्मपरमात्मनोः स्वरूपम् । तद्दर्शनशीलैर्दृष्टो ज्ञात इत्यर्थः ॥ १६ ॥

म० टी०—ननु भवतु पुरुषैकत्वं तथापि तस्य सत्यस्य जडद्रष्टृत्वरूपः सत्य एव संसारः । तथाच शीतोष्णादिसुखदुःखकारणे सति तद्भोगस्यावश्यकत्वात्सत्यस्य च ज्ञानाद्विनाशानुपपत्तेः कथं तितिक्षा कथं वा सोमृतत्वाय कल्पत इतिचेत् न ' कृत्स्नस्यापि द्वैतप्रपञ्चस्यात्मनि कल्पितत्वेन तज्ज्ञानाद्विनाशोपपत्तेः । शुक्तौ कल्पितस्य रजतस्य शुक्तिज्ञानेन विनाशवत् । कथं पुनरात्मानात्मनोः प्रतीत्यविशेषे आत्मवदनात्मापि सत्यो न भवेत् अनात्मवदात्मापि मिथ्या न भवेत् उभयोस्तुल्ययोगक्षेमत्वादित्याशङ्क्य विशेषमाह भगवान्—नासतइति । यत्कालतो देशतो वस्तुतो वा परिच्छिन्नं तदसत् यथा घटादि जन्मविनाशशीलं प्राक्कालेन च परकालेन परिच्छिद्यते ध्वंसप्रागभावप्रतियोगित्वात् । कदाचित्कालपरिच्छिन्नमित्युच्यते। एवं देशपरिच्छिन्नमपि तदेव मूर्तत्वेन सर्वदेशावृत्तित्वात् । कालपरिच्छिन्नस्य देशपरिच्छेदनियमेऽपि देशपरिच्छिन्नत्वेनाभ्युपगमस्य परमाण्वादेस्तार्किकैः कालपरिच्छेदानभ्युपगमाद्देशपरिच्छेदोऽपि पृथगुक्तः । स च किञ्चिद्देशवृत्तिरत्यन्ताभावः। एवं सजातीयभेदो विजातीयभेदः स्वगतभेदश्चेति त्रिविधो भेदो वस्तुपरिच्छेदः । यथा वृक्षस्य

वृक्षान्तरात् शिलादेः पत्रपुष्पादेश्च भेदः । अथवा जीवेश्वरभेदो जीवजगद्भेदो जीवपरस्परभेद ईश्वरजगद्भेदो जगत्परभेद इति पञ्चविधो वस्तुपरिच्छेदः । कालदेशापरिच्छिन्नस्याप्याकाशादेस्तार्किकैर्वस्तुपरिच्छेदाभ्युपगमात्पृथङ्निर्देशः । एवं साङ्ख्यमतेपि योजनीयम् । एतादृशस्य असतः शीतोष्णादेः कृत्स्नस्यापि प्रपञ्चस्य भावः सत्ता पारमार्थिकत्वं स्वान्यूनसत्ताकं तादृशपरिच्छेदशून्यत्वं न विद्यते न सम्भवति घटत्वाघटत्वयोरिव परिच्छिन्नत्वापरिच्छिन्नत्वयोरेकत्र विरोधात् । नहि दृश्यं किञ्चित्कचित्काले देशे वस्तुनि वा निषिध्यते अननुगमात् । नवा सद्वस्तु कचिद्देशे काले वस्तुनि वा निषिध्यते सर्वत्रानुगमात् । तथाच सर्वत्रानुगते सद्वस्तुनि अननुगतं व्यभिचारि वस्तु कल्पितं रज्जुखण्ड इवानुगते व्यभिचारि सर्पधारादिकमिति भावः । ननु व्यभिचारिणः कल्पितत्वं सद्वस्त्वपि कल्पितं स्यात्तस्यापि तुच्छव्यावृत्तत्वेन व्यभिचारित्वादित्यत आह— नाभावोविद्यते सत इति । सदधिकरणकभेदप्रतियोगित्वं हि वस्तुपरिच्छिन्नत्वम् । तच्च न तुच्छव्यावृत्तत्वेन तुच्छे शशविषाणादौ सत्वायोगात् सङ्ग्रामभावो निरूप्यत इति न्यायात् । एकस्यैव स्वप्रकाशस्य नित्यस्य विभोः सतः सर्वानुस्यूतत्वेन सद्व्यक्तिभेदानभ्युपगमात् । घटः सन्नित्यादिप्रतीतेः सर्वलौकिकत्वेन सतोघटादधिकरणकभेदप्रतियोगित्वायोगात् । अभावः परिच्छिन्नत्वं देशतः कालतो वस्तुतो वा सतः सर्वानुस्यूतसन्मात्रस्य न विद्यते न संभवति पूर्ववद्विरोधादित्यर्थः । ननु सन्नाम किमपि वस्तु नास्त्येव यस्य देशकालवस्तुपरिच्छेदः प्रतिषिध्यते । किन्तर्हि सत्त्वं नाम परं सामान्यं तदाश्रयत्वेन द्रव्यगुणकर्मसु सद्व्यवहारः तदेकाश्रयसम्बन्धेन सामान्यविशेषसमवायेषु तथाचासतः प्रागभावप्रतियोगिनो घटादेः सत्त्वं कारणव्यापारात् सतोऽपि तस्याभावः । कारणनाशाद्ध्वंसेवेति कथमुक्तम् 'नासतो विद्यते भावो नाभावो विद्यते सतः ' इति । एवं प्राप्ते परिहरति—**उभयोरपीत्यर्धेन** । उभयोरपि सदसतोः सतश्चासतश्चान्तो मर्यादा नियतरूपत्वं यत्सत्तत्सदेव यदसत्तदसदेवेति दृष्टो निश्चितः श्रुतिस्मृतियुक्तिभिर्विचारपूर्वकं कैःतत्त्वदर्शिभिः वस्तुयाथात्म्यदर्शनशीलैर्ब्रह्मविद्भिः नतु कुतार्किकैः । अतः कुतार्किकाणां न विपर्ययानुपपत्तिः । तुशब्दोऽवधारणे । एकान्तरूपो नियम एव दृष्टो नत्वनेकान्तरूपोन्यथाभाव इति तत्त्वदर्शिभिरेव दृष्टो नातत्त्वदर्शिभिरिति वा। तथाच श्रुतिः"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"इत्युपक्रम्य"ऐतदात्म्यमिदं सर्वं तत्सत्यम्। स आत्मा। तत्त्वमसि श्वेतकेतो" इत्युपसंहरन्ती सदेकं सजातीयविजातीयस्वगतभेदशून्यं सत्यं दर्शयति । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्यादिश्रुतिस्तु विकारमात्रस्य व्यभिचारिणो वाचारम्भणत्वेनानृतत्वं दर्शयति । " अन्नेन सोम्य शुङ्गेनापोमूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" इतिश्रुतिः सर्वेषामपि विकाराणां सति कल्पितत्वं दर्शयति । सत्त्वं च न सामान्यं तत्र मानाभावात् पदार्थमात्रसाधारण्यात् सत्सदिति प्रतीत्या द्रव्यगुणकर्ममात्रवृत्तिसत्त्वस्य स्वानुपपादकस्याकल्पनात् । वैपरीत्यस्यापि सुवचत्वात् । एकरूपप्रतीतेरेकरूपनिर्वाह्यत्वेन सम्बन्धभेदस्य स्वरूपस्य च कल्पयितुमनुचितत्वात् । विषयस्याननुगमेऽपि प्रतीत्यनुगमे जातिमात्रोच्छेदप्रसङ्गात् । तस्मादेकमेव सद्वस्तु स्वतः स्फुरणरूपं ज्ञाताज्ञातावस्थाभासकं स्वतादात्म्याध्यासेन सर्वत्र सद्व्यवहारोपपादकं सन्घट इति प्रतीत्या तावत्सद्व्यक्तिमात्राभिन्नत्वं घटे विषयीकृतम् । ननु सत्तासमवायित्वमभेदप्रतीतेर्भेदघटितसम्बन्धानिर्वाह्यत्वात् । एवं द्रव्यं सद्गुणः सन्नित्यादिप्रतीत्या सर्वाभिन्नत्वं सतः सिद्धं द्रव्यगुणभेदासिद्धथा च न तेषु धार्मेषु सत्त्वं नाम धर्मः कल्प्यते किन्तु सति धर्मिणि द्रव्याद्यभिन्नत्वं लाघवात्। तच्च वास्तवं न सम्भवतीत्याध्यासिकमित्यन्यत् । तदुक्तं वार्तिककारैः ' सत्तातोऽपि न भेदःस्याद्रव्यत्वादेः कुतोऽन्यतः । एकाकारा हि संवित्तिः सद्रव्यं सद्गुणस्तथा ' इत्यादि सत्तापि नासतो भेदिका तस्याप्रसिद्धेः । द्रव्यत्वादिकं तु सद्धर्मत्वान्न सतो भेदकमित्यर्थः । अत एव घटाद्भिन्नः पट इत्यादिप्र-

तीतिरपि न भेदसाधिका घटपटतद्भेदानां सदभेदेनैक्यात् । एवं यत्रैव न भेदग्रहस्तत्रैव लब्धपदा सती सदभेदप्रतीतिर्विजयते । तार्किकैः कालपदार्थस्य सर्वात्मकस्याभ्युपगमात्तेनैव सर्वव्यवहारोपपत्तौ तदतिरिक्तपदार्थकल्पने मानाभावात्तस्यैव सर्वानुस्यूतस्य सद्रूपेण स्फुरणरूपेण च सर्वतादात्म्येन प्रतीत्युपपत्तेः । स्फुरणस्यापि सर्वानुस्यूतत्वेनैकत्वान्नित्यत्वं विस्तरेणाग्रिमश्लोके वक्ष्यते । तथाच यथा कस्मिंश्चिद्देशे काले वा घटस्य पटादेर्न देशान्तरे कालान्तरे वा घटत्वम् । एवं कस्मिंश्चिद्देशे काले वा घटस्यान्यत्राघटत्वं शक्रेणापि न शक्यते सम्पादयितुं पदार्थस्वभावभङ्गायोगात् । एवं कस्मिंश्चिद्देशे काले वा सतो देशान्तरे कालान्तरे वा सत्त्वं कस्मिंश्चिद्देशे काले वा सतोऽन्यत्रासत्त्वं न शक्यते सम्पादयितुं युक्तिसामान्यात् । अत उभयोर्नियतरूपत्वमेव द्रष्टव्यमित्यद्वैतसिद्धौ विस्तरः । अतः सदेव वस्तु मायाकल्पिताऽसन्निवृत्त्याऽमृतत्वाय कल्पते सन्मात्रदृष्ट्या च तितिक्षाप्युपपद्यत इति भावः ॥ १६ ॥

शं० टी०—ननु सर्वत्र विद्यमानानां शब्दादीनामनुसन्धिं सुतरां त्यक्त्वा सदा ब्रह्मैवानुसन्धातुं न शक्यत इत्याकाङ्क्षायां ब्रह्मातिरिक्तस्य वस्तुनोऽभावाद्ब्रह्मण एव पूर्णत्वान्नित्यत्वान्निरन्तरत्वाच्च मुमुक्षोः सदा तदेवानुसन्धातव्यमिति सूचयितुं ब्रह्मण एव सत्तां तदन्यस्य त्वसत्तां च प्रतिपादयति—**नासत इति** । सदित्यस्तितामात्रं वस्तु सर्वगतं सूक्ष्ममेकमेकरसं नित्यं निरवयवं निरञ्जनं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः एतद्विलक्षणमसच्छब्दादिलक्षणं जगत्तस्यैतस्य भावः सत्ता न विद्यते नास्ति सति स्वरूपेण वस्तुनि सत्ता सम्पद्येत तदभावात्सत्ताभावः । असदात्मनो जगतः सत्त्वे प्रमाणाभावात् । नन्वस्त्येव प्रत्यक्षादिप्रमाणमिति चेत्त्वमत्र प्रष्टव्यः । तत्सत्त्वे प्रमाणं किं प्रत्यक्षमनुमानं वा किमुपमानं वा उतशब्दो वा । नाद्यः इदं रजतम् प्रादेशमात्रश्चन्द्र इत्यादौ व्यभिचारदर्शनात् । तत्र प्रमाणप्रमेययोः सम्यक् संसर्गाभावाद्व्यभिचारस्तदन्यत्र प्रमाणमेवेति चेन्न दारुणि गज इति मृदि घट इति विपरीतग्रहदर्शनाद्व्यभिचारानुच्छित्तेः । न द्वितीयः त्वत्पक्षे प्रपञ्चस्य प्रत्यक्षत्वात्तत्रानुमानानुपयुक्तेः । नापि तृतीयः गोसदृशो गवय इतिवत्तत्सदृशं जगदिति सादृश्यासम्भवादस्त्येव सादृश्यं स्वप्न इति चेत्तथात्वे मिथ्यात्वेऽपि तत्सादृश्यापत्तेः । नैव चतुर्थः विकल्पो नहि वस्तु नह्यस्ति द्वैतसिद्धिः । असत्त्वादन्यस्येति जगतोऽसत्त्वश्रुतिं विना श्रुतिभ्यस्तत्सद्भावाश्रवणात् । ननु "आत्मन आकाशः सम्भूतः" इति "यतो वा इमानि भूतानि जायन्ते" इति ब्रह्मणः सकाशाज्जगदुत्पत्तिः श्रूयते ब्रह्मकार्यत्वेन जगतोऽस्तित्वे श्रुतिरस्त्येव प्रमाणमिति चेत्त्वमत्र प्रष्टव्यः । ब्रह्मकार्यं यज्जगदस्ति तद्ब्रह्मणो भिन्नं किमभिन्नं वा उत भिन्नाभिन्नं वा । भिन्नत्वपक्षे कार्यं सद्वा किमसद्वा उत सदसद्वा । आद्ये कार्यस्य कारणसत्ता वा किमु कार्यसत्ता वा । नाद्यः कार्यकारणयोः सत्तैकत्वे स्वतः सत्ताभावात्कार्यस्यासत्त्वापत्तेः । द्वितीये कार्यसत्ता सद्रूपा वा किमसद्रूपेति । आद्ये सद्रूपकार्यसत्ता कारणसत्तायाः भिन्ना वा किमभिन्ना वा । नाद्यः ब्रह्मणः पूर्णत्वेन निरन्तरत्वात्कार्यस्य तत्सत्ताव्यतिरिक्तसत्तासम्भवादसत्त्वमेव स्यात् । न द्वितीयः सत्तयोरुभयोः सद्रूपेणैकत्वावगमात्कार्यस्य कारणभिन्नत्वाऽसम्भवादसत्त्वाऽव्याहतेः । असद्रूपेण भिन्नायाः कार्यसत्तायाः स्वतः स्वरूपाभावात्कार्यस्य शून्यत्वापत्तेः । कार्यस्यासत्त्वपक्षे जगतः शशविषाणवत्स्वरूपशून्यत्वाद्ब्रह्मकार्यत्वानुपपत्तेः । नन्वसतोऽपि जगतः प्रध्वंसाभाववत्कार्यत्वमुपपद्यत एवेति चेन्न । प्रध्वंसाभावस्यापि कारणसम्बन्धासम्भवात्कार्यत्वानुपपत्तेः । कर्तृकरणादिकारकसम्बन्धे सति खलु जनिक्रियायां घटादेः कार्यत्वं दृष्टं तथैव कारकसम्बन्धवत्त्वे प्रध्वंसस्य भावत्वापत्तावभाव इति निर्देशायोगात्कारकसम्बन्धः सत एव सावयवस्य घटते नेतरस्य । नहि घटनाशनसामग्रीसम्बन्धः प्रध्वंसस्यात्यन्ताऽसत उपयुज्यते । तदभावादेव प्रध्वंसाभावस्य न कार्यत्वं तथैव जगतोऽप्यसतो न कार्यत्वं सिध्यति सदसत्त्वपक्षेपि सत्त्वासत्त्वयोर्भावाभावधर्मत्वेनान्योन्यविरुद्धत्वादेकाधिकरणत्वासम्भवात्तादृग्धर्मवैशिष्ट्यानुपपत्तौ सुतरां जगतो ब्रह्मकार्यत्वानुपपत्तेः । तर्हि कार्यं

कारणाभिन्नमेवेति चेन्न बह्वनर्थागमप्रसङ्गात्कार्यस्य जगतो जडात्मनो ब्रह्माभिन्नत्वे ब्रह्मणोऽपि दृश्यत्वानित्यत्वाप्रकाशत्वदुःखरूपत्वसावयवत्वादिदोषपरम्पराप्रसङ्गात्तादिष्टापत्तिरेवेति चेत्तव जगदान्ध्यप्रसक्त्याऽहंममेदमित्यादिव्यवहाराऽसिद्धेः भवतोऽपि जडत्वेन ज्ञानानुत्पत्तौ मोक्षाभावप्रसङ्गात्। "तरति शोकमात्मवित्" इत्यादिश्रुतिवैयर्थ्यापत्तेः । ब्रह्मानन्दप्राप्तिकामानां सतां मुक्तौ प्रवृत्तिविच्छेदप्रसङ्गात्। "यत्तदद्रश्यमग्राह्यम्" । "अजोनित्यः शाश्वतः" इत्यादिश्रुतिविरोधप्रसङ्गाच्च । तर्हि तृतीय एव पक्षोऽस्त्विति चेन्न। भिन्नाभिन्नत्वयोरन्योन्यविरुद्धत्वेनैकाश्रयत्वासम्भवात् । एवं जगतो ब्रह्मकार्यत्वानुपपत्तौ श्रुतिप्रमाणकत्वं च न सिध्यति । नन्वेवं सति "यतो वा" इत्यादिश्रुतेर्मृषावादित्वेनाप्रामाण्यापात इति चेन्न। तस्याब्रह्मणोऽद्वितीयत्वप्रतिपादनपरतया प्रामाण्याभ्युपगमात्केचिज्जगत्कारणं परमाणव इति वदन्ति । प्रकृतिरित्यपरे । तदुररीकृत्य कार्यकारणाभ्यां सर्वश्रुतिप्रसिद्धमद्वितीयत्वं ब्रह्मणो व्येति तदऽसहमानयाऽनया श्रुत्या जगदुपादानत्वं ब्रह्मणः प्रतिपाद्यते । ननूक्तरीत्या जगद्ब्रह्मणोः कार्यकारणभावानुपपत्तौ कथमुपादानं ब्रह्मेति चेद्विवर्तोपादानं ब्रह्मेति ब्रूमः । विवर्तत्वं नामाधिष्ठानस्यान्यथाभानमात्रं तच्च ग्रहीतुर्ग्रहणदोषकृतं शुक्तेर्यथा रजताकारेण प्रतीतिः शुक्तियाथात्म्यसन्दर्शनेन रजताभासस्य शुक्तिमात्रत्ववदधिष्ठानब्रह्मस्वरूपसाक्षात्कारेण जगतोऽपि प्रतीतिमात्रस्य "तदनन्यत्वमारम्भणशब्दादिभ्य इति । वाचारम्भणं विकारो नामधेयम्" इत्यादिश्रुतिप्रामाण्याद्ब्रह्ममात्रत्वसिद्धौ ब्रह्मणोऽद्वितीयत्वेऽव्याहते सत्यत्रैवं पूर्वोक्तदोषानवकाशः।कार्यस्य नाममात्रत्वावशेषाद्यत एवं ततोऽर्थतः शब्दादिप्रपञ्चसद्भावेन श्रुतिः प्रमाणं नापि प्रत्यक्षमनुमानं च तस्मादप्रामाणिकत्वाज्जगतः स्वतःसत्ता नास्तीति सिद्धम् । एवमसतः शब्दादेः सत्ताभावं प्रतिपाद्य इदानीं ब्रह्मणः स्वस्वरूपस्य सद्भावं प्रतिपादयति—नाभावो विद्यते सत इति। सामान्यविशेषभावशून्यमखण्डचिदेकरसं सर्वविक्रियारहितं सदेवेत्यादिश्रुतिप्रसिद्धमपूर्वमनपरमनन्तरमबाह्यं यत्सत्तस्य सतस्त्वभावो नास्तिता कचित्कदाचिन्न विद्यते जाग्रत्स्वप्नसुषुप्त्यादिषु सद्भावदर्शनादात्मनः सदासत्त्वे प्रत्यक्षं प्रमाणम् । आत्मा नित्यसत्ताको भवति अवस्थात्रयसाक्षित्वात् यन्नैवं तन्नैवं यथा देहादिरित्याद्यनुमानं च। अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्ध इति अजो नित्यः शाश्वत इति । "तथाऽरसं नित्यमगन्धवच्च" इत्यादिश्रुतिश्च प्रमाणम् । एवं सर्वप्रमाणैर्निर्धारितनित्यसत्ताकस्य सतः प्रत्यगभिन्नस्य ब्रह्मणस्त्वभावः कदाचिन्नास्तीति तत्त्वदर्शिभिस्तत्त्वं सर्वाधिष्ठानभूतस्य ब्रह्मणो याथात्म्यमबाधितस्वरूपं सत्यज्ञानानन्दात्मकं यत्तदेव सदा सर्वत्र द्रष्टुं शीलं येषां ते तत्त्वदर्शिनस्तैर्ब्रह्मविद्भिरेवमुभयोः सदसतोरन्तो निश्चयः सदा सर्वत्र ब्रह्मैकमेवास्ति न ततोऽन्यादिति निष्कर्षो दृष्टः कृत इत्यर्थः। एतेन त्वमप्यात्मनस्त्वनित्यत्वभ्रममुत्सृज्य निःशोको भूत्वा "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुत्यर्थमवष्टभ्य सर्वत्र ब्रह्मदर्शनपरो भवेति सूचितं भवति ॥ १६ ॥

श्री० टी०—ननु तथाऽपि शीतोष्णादिकमतिदुःसहं कथं सोढव्यम्। अत्यन्तं तत्सहने च कदाचिद्देहनाशस्यापि सम्भवादित्याशङ्क्य तत्त्वविचारतः सर्वं सोढुं शक्यमित्याशयेनाह—नेति । असतः अनात्मधर्मत्वादविद्यमानस्य शीतोष्णादेरात्मनि भावः सत्ता न विद्यते तथा सतः सत्स्वभावस्यात्मनो भावो विनाशो न विद्यते एवमुभयोः सदसतोरन्तो निर्णयो दृष्टः । कैस्तत्त्वदर्शिभिर्वस्तुयाथात्म्यविद्भिः । एवम्भूतविवेकेन सहस्वेत्यर्थः ॥ १६ ॥

स० टी०—नन्वस्तु पुरुषैकत्वं तथाप्यस्य न मुक्तता ॥ शीतोष्णादेश्च बन्धस्य सहेतोर्वस्तुतावशात् ॥ १ ॥ एवं कथं तितिक्षा स्यात्कथं वा बन्धनाशनम् ॥ सत्यामपि तितिक्षायां जातु स्यादात्मनः क्षयः ॥ २ ॥ इत्याशङ्क्याह भगवान् मङ्गलायतनो हरिः ॥ समस्तस्य प्रपञ्चस्य सहेतोर्बन्धरूपिणः ॥ ३ ॥ स्वाज्ञानात्कल्पितत्वेन स्वात्मबोधोदयात्क्षयः ॥ कल्पितस्य भुजङ्गस्य रज्जौ तज्ज्ञानतः क्षयः ॥ ४ ॥

दृष्टो यथा तथैतस्य शीतोष्णादेः क्षयो धिया ॥ अन्योन्याध्यासतो यस्मात्सदात्मानात्मनोर्द्वयोः ॥ ५ ॥ शीतोष्णादि जगत्सर्वं भाति तस्मान्मृषा जगत् ॥ अन्योन्याध्यासतुल्यत्वे कथमेकस्य सत्यता ॥ ६ ॥ इतरस्यैव मिथ्यात्वमिति चेच्छृणु युक्तितः ॥ परिच्छिन्नं हि यद्वस्तु देशतः कालतोऽर्थतः ॥ ७ ॥ तज्जन्मनाशशीलत्वादसद्रज्जुभुजङ्गवत् ॥ यथा स्वाप्नं मृषा सर्वं मृत्कुम्भादिकमीक्ष्यते ॥ ८ ॥ तथेदं बन्धशब्देन प्रोक्तं विश्वं मृषाऽखिलम् ॥ नाध्यस्तं सत्कदाचित्स्यात्स्वाप्नं कुम्भादिकं यथा ॥ ९ ॥ असतो विद्यमानस्य शीतोष्णादेर्न चास्तिता ॥ सहेतोर्निष्प्रमाणत्वाद्विकारत्वाच्चलत्वतः ॥ १० ॥ घटाङ्कुरादि यत्कार्यं दृष्टं सत्कारणं हि तत् ॥ आकाशादि च नः कार्यं तदप्येवं प्रतीयताम् ॥ ११ ॥ असतश्चेदिदं कार्यं सर्वं स्यादसदन्वितम् ॥ असतः कारणत्वं च निरात्मत्वान्न सिद्ध्यति ॥ १२ ॥ ध्रुवः सत्कुरुते कार्यमयस्कान्तो मणिर्यथा ॥ कारणत्वं भवेदेवं कुर्वतोऽतिशयः कुतः ॥ १३ ॥ इत्येवंवार्तिकेऽध्यस्तकार्यस्य गतिरीरिता ॥ अधिष्ठानस्य सत्यत्वसिद्ध्यै न त्वन्यासिद्धये ॥ १४ ॥ यथा घटादिसंस्थानं मृदो भिन्नं न चक्षुषा ॥ गृह्यते सकलं तद्वत्सतो भिन्नं जगन्नहि ॥ १५ ॥ शीतोष्णादेः प्रपञ्चस्य सहेतोर्नास्ति सत्यता ॥ अन्योन्यव्यभिचारित्वात्कल्पितत्वाच्चिदद्वये ॥ १६ ॥ अज्ञातज्ञापकत्वं हि प्रामाण्यं शास्त्रविन्मतम् ॥ नाज्ञातत्वं प्रपञ्चस्याज्ञानकार्यस्य जाड्यतः ॥ १७ ॥ सर्वत्रानुगते सत्ये कल्पितं व्यभिचारि यत् ॥ विश्वं रज्जौ यथा सर्पदण्डादि सन्न तत्तथा ॥ १८ ॥ सन्घटः सन्पटो हीत्थमनुस्यूते सदद्वये ॥ न घटः पट इत्येवं व्यभिचारि प्रकल्पितम् ॥ १९ ॥ सामानाधिकरण्यं तु मिथ्यासद्वस्तुनोरपि ॥ दृष्टं नीलं नभो वारि मरीच्यादाविदं यथा ॥ २० ॥ तस्माद्बन्धस्य देहादेः सहेतोर्नास्ति सत्यता ॥ तथासतश्चिदानन्दापरिच्छिन्नस्य वस्तुनः ॥ २१ ॥ अभावोऽसत्यता नास्ति परिच्छिन्नत्वलक्षणः ॥ सर्वत्राव्यभिचारित्वादनुस्यूतस्य चित्सतः ॥ २२ ॥ एवं सदसतोरात्मानात्मनोरनयोर्द्वयोः ॥ निर्णयः सत्सदेवासदसदेवेति नान्यथा ॥ २३ ॥ दृष्टस्तद्ब्रह्मतद्भावो याथात्म्यं ब्रह्मणः सतः ॥ तत्त्वं द्रष्टुं सदा शीलं येषां तैस्तत्त्वदर्शिभिः ॥ २४ ॥ त्वमप्येवं समाश्रित्य दृष्टिं तां तत्त्वदर्शिनाम् ॥ शोकमोहौ परित्यज्य तितिक्षस्व गतागतम् ॥ २५ ॥ दृश्यं स्वरूपतोऽध्यस्तं चिद्घनेऽतोऽनृतात्मकम् ॥ संसर्गमात्रमध्यस्तमात्मनोऽस्मिन्ननात्मनि ॥ २६ ॥ प्रातीतिकशरीरत्वाद्दृश्यं मिथ्या जडं क्षरम् ॥ अबाध्यत्वाच्चिदात्मत्वादात्मा सत्यः स्वयम्प्रभः ॥ २७ ॥ १६ ॥

भा० टी०—शीतोष्णादेः प्रतीयमानत्वेऽपि बाध्यत्वेन मिथ्यात्वात् । तद्विपर्ययेणात्मनः सत्यत्वाच्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तमित्याह—नेति । असतो विचारेण बाध्यत्वात्पूर्वमप्यविद्यमानस्य शीतादेः सकारणस्य प्रत्यक्षादिप्रमाणैर्निरूप्यमाणस्यापि भावः परमार्थसत्ता न विद्यते । एतेनासतः शून्यस्य नरविषाणतुल्यस्यास्तित्वप्रसङ्गाभावादप्रसक्तप्रतिषेध इति प्रत्युक्तम् । विमतं शीतादि अतात्विकमप्रामाणिकत्वात् शुक्तिरूप्यवत् । धर्मिग्राहकस्य प्रत्यक्षादेस्तात्त्विकप्रामाण्याबोधकत्वदर्शनात् । तद्विषयस्य शीतादेरनिर्वाच्यस्यासतो भ्रान्तैर्लोकैः प्रत्यक्षादिभिरुपलभ्यमानत्वात् । सत्त्वेन गृहीतस्य भावस्तात्त्विकत्वं नास्तीत्यर्थः । ननु क्वचित्प्रत्यक्षादेस्तात्त्विकप्रामाण्यावेदकत्वदर्शनात्तद्विषयस्य शीतादिद्वैतस्य दुर्निरूपत्वेनानिर्वचनीयत्वं न शक्यते वक्तुम् । वेदैकदेशस्य क्रियार्थत्वे ब्रह्मबोधकवेदस्यापि क्रियार्थत्वम् । यथा—'यथा वा श्रोत्रादीन्द्रियैरूपानुपलब्ध्या चक्षुषापि तन्नोपलभ्यते' इतिचेन्न । शीतादिद्वैतस्य विकारस्यागमापायित्वेनासत्वनिर्धारणात् । तथाचायं प्रयोगः 'विमतमसत् आगमापायित्वाद्रज्जूरगवत्' इति । तथा च "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुत्यापि विकारस्य मिथ्यात्वं बोधितम् । किञ्च कार्यं कारणान्न भिद्यते कुण्डलादिसंस्थानस्य चक्षुरादिनिरूप्यमाणस्य कनकादिव्यतिरेकेणानुपलब्धेः । ततश्चायं प्रयोगः 'विमतं न कारणाद्वस्तुतो भिन्नं का-

र्यत्वात् कुण्डलादिवत्' इति । 'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा' इतिन्यायात् । कार्यस्य जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः । कारणादव्यतिरेकाच्च सर्वः शीतादिविकारोऽसत् कारणव्यतिरेकेणानुपलब्धेः कुण्डलादिवादिति । सर्वस्यापि कारणस्य स्वस्वकारणाद्व्यतिरेकेणानुपलभमानस्य कार्यकारणपरम्पराभ्रमाधिष्ठाने कल्पितत्वं सिध्यति । ननु कार्यकारणविभागविहीनस्य वस्तुनोऽभावात् कार्यकारणपरम्पराया असत्वे सर्वाभावप्रसङ्ग इति चेन्न । सर्वत्रानुवृत्तव्यावृत्तसदसद्बुद्धिद्वयोपलब्ध्याऽनुवृत्ते च व्यावृत्तानाकल्पितत्वात् । अकल्पितस्य सर्वभेदविकल्पाधिष्ठानस्याकार्यकारणस्य वस्तुनः सिद्धेः । तथा च यद्व्यावृत्तेष्वनुवृत्तं तत्तत्परमार्थं सत् यथा रजतादिधारास्वनुगतः शुक्त्यादेरिदमंशः विमतं सत् अव्यभिचारित्वादिदमंशवत् । यद्व्यावृत्तं तन्मिथ्या यथा रजतादिधाराविमतं मिथ्या व्यभिचारित्वात् रजतादिधारावदित्यनुमानद्वयेन सतोऽकल्पितत्वमसतः कल्पितत्त्वं च सिद्धम् । ननु नेदमनुमानद्वयमुपपद्यते । सर्वमिथ्यात्ववादिनो विभागाभावात् । अनुमानादिव्यवहारानुपपत्तेरिति चेन्न । सदसद्विभागस्य बुद्ध्यायत्तत्वात् । बुद्धिद्वयाधीने विभागे स्थिते सत्यनुमानादिव्यवहारोपपत्तेः । ननु अद्वैतवादिनस्तव बुद्धिद्वयाभावात् । तदधीनः सदसद्विभागः कथं सेत्स्यतीति चेत् सर्वत्र व्यवहारदशायां कल्पितस्य सदसद्विभागस्य हेतुभूतबुद्धिद्वयस्य सर्वैरुपलभ्यमानत्वात्। नन्वेवमपि सतः सामान्यरूपतया विशेषाकाङ्क्षायां सामान्यविशेषरूपे द्वे वस्तुनी स्यातामिति चेन्न । सोयमित्यादिसामानाधिकरण्यवत् । घटः सन्नित्यादिसामानाधिकरण्यस्यैकवस्तुनिष्ठत्वात् । वस्तुभेदे घटपटयोरिव तदयोगात् । ननूक्तसामानाधिकरण्यस्यैकवस्तुनिष्ठत्वं न वाच्यं नीलमुत्पलमितिवद्धर्मधर्मिविषयतया तस्य सुवचत्वात् । इति चेन्न । नीलोत्पलमिति सामानाधिकरण्यस्य धर्मधर्मिविषयस्य गौणत्वात् । तदपेक्षयानुवृत्ते व्यावृत्तं कल्पितमिति ऐक्यनिष्ठस्यैवंमुख्यस्यौचित्यात् । तथा च सन्घटः सन्पटः सन्हस्ती सन्नश्वः सन्गौरित्येवं बुद्धिद्वयमुपलभ्यते । तयोश्च बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति घटादेर्विकारस्य व्यभिचारित्वं पूर्वं दर्शितम् । न तु सद्बुद्धिर्व्यभिचरति घटे नष्टेऽपि पटादौ तद्दर्शनात् । एतेन घटे नष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति प्रत्युक्तम् । तस्मात् घटादिबुद्धिविषयोऽसद्व्यभिचारात् । रज्जुरगवत् । सद्बुद्धिविषयस्तु नासत् अव्यभिचारादिदमंशवत् । ननु यथा घटे विनष्टे सद्बुद्धिः पटादौ दृश्यते तथा घटबुद्धिरपि घटान्तर इति चेन्न । घटबुद्धेः पटादावदर्शनात् । ननु नष्टे घटे सद्बुद्धिरपि तत्र न दृश्यते इतिचेन्न । यतो घटादिनाशे व्यक्तिनाशे जातेरिव विशेष्यस्य विशेषणीभूतसत्ताभिव्यञ्जकस्याभावात् सद्बुद्धेरप्यदर्शनं नतु तस्याविषयस्य सत्ताया अभावाददर्शनम् । ननु द्वयोः सतोरेव नीलोत्पलयोः विशेषणविशेष्यत्वदर्शनात् । सद्घटयोरपि विशेषणविशेष्ययत्वाभ्युपगमे द्वयोः सत्वावश्यंभावाद्घटादिकल्पितस्वानुमानं सामानाधिकरण्यबुद्धिबाधितं घटादेः कल्पितत्वाभ्युपगमे तस्याभावेन समानाधिकरणत्वस्यायुक्तत्वादितिचेन्न । यतः सामानाधिकरण्यबुद्धिः पदार्थद्वयभानमपेक्षते न द्वयोः सत्वम् । मरीच्यादावन्यतरस्याभावेऽपि सदिदमुदकमिति सामानाधिकरण्यदर्शनात् । तस्माद्देहादेः शीतोष्णादेर्द्वन्द्वस्य च सकारणस्य सत्वेन कल्पितस्य वस्तुतोऽसतोभावः । परमार्थसत्ता न विद्यते जन्मध्वंसाभ्यां प्रागूर्ध्वं च वस्त्वन्तरे देशान्तरे चानुपलब्धेः । तथा परमार्थसतः अविनाशिनोऽबाध्यस्यात्मनोऽतत्त्वविद्भिरज्ञातत्वादविद्यमानकल्पस्याभावोऽविद्यमानत्वं परमार्थतो सत्ता न सम्भवति सर्वत्राव्यभिचारात्। त्रिविधपरिच्छेदशून्यत्वात् । इत्थं भाष्यकृद्भिः सदसतोः साध्यत्वं परिच्छिन्नापरिच्छिन्नत्वयोर्हेतुत्वं च बोधितम् । कैश्चित्तु ' परिच्छिन्नस्यासतः शीतोष्णादेः कृत्स्नस्यापि प्रपञ्चस्य भावः सत्ता पारमार्थिकत्वं स्वान्यूनसत्ताकतादृशपरिच्छेदशून्यत्वं न विद्यते सतः सर्वत्रानुस्यूतसन्मात्रस्याभावः परिच्छिन्नत्वं न विद्यते ' इति व्याख्यातम् । परिच्छिन्नत्वं च त्रिविधम् । तत्रात्यन्ताभावप्रतियोगित्वलक्षणं देशतः परिच्छिन्नत्वम् । ध्वंसप्रतियोगित्वलक्षणं कालतः परिच्छिन्नत्वम् ।

अन्योन्याभावप्रतियोगित्वलक्षणं वस्तुतः परिच्छिन्नत्वम् । नन्वात्मनोऽप्याकाशवत् क्वाप्यसमवेतत्वात् । समवायसंबन्धेनात्यन्ताभावप्रतियोगित्वं तस्मिन्नतिव्याप्तम् आकाशादेश्च यावन्मूर्तसंयोगित्वनियमात् । संयोगसम्बन्धेन तस्मिन्नव्याप्तं च अमूर्तनिष्ठेपि विशेषणदाने त्वात्मन्यातिव्याप्तिस्तदवस्था सर्वसम्बन्धित्वाभावविवक्षायां सर्वसम्बन्धशून्ये परमात्मन्यतिव्याप्तिः । सर्वसम्बन्धिन्यज्ञानेऽव्याप्तिश्च ध्वंसप्रतियोगित्वमप्याकाशादावव्याप्तं तेषां परैर्नित्यत्वाभ्युपगमात् । अन्योन्याभावप्रतियोगित्वं चात्मनि व्यभिचारितस्य जडनिष्ठान्योन्याभावप्रतियोगित्वादन्यथाऽस्य जडत्वापत्तेरिति चेन्न । अत्यन्ताभावेऽन्योन्याभावे च प्रतियोगिसमसत्ताकत्वविशेषणेनात्मन्यतिव्याप्तिवारणात् । अज्ञानाकाशादौ स्वस्वसमानसत्ताकान्योन्याभावात्यन्ताभावप्रतियोगित्वसत्वेनाव्याप्त्यभावात् । अविद्याकाशादेर्व्यावहारिकस्य पारमार्थिकाभावपक्षे स्वान्यूनसत्ताकेति विशेषणं देयमत एव प्रातिभासिकरजतादेर्व्यावहारिकाभावप्रतियोगित्वेऽपि न साधनवैकल्यं ध्वंसप्रतियोगित्वं च नाकाशादावव्याप्तम् । "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इतिश्रुतिसिद्धत्वेन तस्यानुमतत्वात् । "आकाशवत्सर्वगतश्च नित्यः" इत्यत्रात्मनि दर्शनत्वं तु स्वसमानकालीनसर्वगतत्वेनाभूतसम्प्लवस्थायित्वेन चेति द्रष्टव्यमिति तत्रोदाहृतव्याख्या । "सत्यं ज्ञानमनन्तं ब्रह्म" इतिश्रुतौ ब्रह्मणोऽपरिच्छिन्नत्वबोधकस्यानन्तपदस्य पृथङ्निर्देशात् ब्रह्म सत्यमपरिच्छिन्नत्वात् । जगदसत्यं परिच्छिन्नत्वादित्यनुमानद्वये हेतुत्वेनोभयोर्निर्देशादप्रसिद्धार्थकल्पनात्मकेन हेतुसाध्ययोरैक्यापत्तिरूपेण च दोषेण ग्रस्ता यदि भाष्यानुरोधेन योजयितुं शक्या तर्हि निर्दुष्टेति दिक् । ननु सर्वेषामेव कुतो न निर्णय इत्याशङ्क्य सर्वेषां तत्त्वदर्शित्वाभावात् । तत्त्वदर्शिनां त्वस्त्येव निर्णय इत्याह—**उभयोरिति**। उभयोरात्मानात्मनोः सदसतोरपि दृष्टोन्तः सत्सदेवासदसदेवेति निर्णयः तत्त्वदर्शिभिर्ब्रह्मविद्भिः । तस्मात्त्वमपि तेषां दृष्टिमवलम्ब्य शोकमोहौ हित्वा शीतादींस्तितिक्षस्वेत्याशयः ॥ १६ ॥

प० टी०—अथ द्वितीयोपायमाह—**नासत इति** । असतः शुक्तिकारजतवदसद्रूपस्य दृश्यमात्रस्य भावो वर्तमानत्वं वक्तुं न शक्यते । तथा सतः सच्छब्दव्यपदेश्यस्यात्मनोऽभावोऽवर्तमानत्वं च वक्तुं न शक्यते। एवमसत्सतोरन्तो निर्णयस्तत्त्वदर्शिभिः स्वस्वरूपाभिज्ञैर्दृष्टः । अत्रैतदुक्तं भवति यत्रोत्तरक्षणे बाधो दृश्यते तदसच्छब्दव्यपदेश्यम् । तथा यत्सर्वदाप्यबाधितं तत् सच्छब्दव्यपदेश्यम् "अतोन्यदार्तम्" इतिश्रुतेः । तदुक्तमध्यात्मसारे ' यद्वत्क्षणार्थमवभाति मरीचिकाम्भश्चासन्निधानमपि रज्जुमुजङ्गमुख्यम् । स्वप्नः क्षणावधि सुषुप्त्यवधीह तद्वद्विश्वं विभाति तदपि प्रवदन्ति सत्यम् ॥ सर्वप्रपञ्चविलयावसरे सुषुप्तौ यत्प्राणवाय्वनुचरं चिदिहास्ति नूनम् । अर्थप्रतीतिवशतोऽपि च जागरादौ तस्मात्सदित्यभिहितं खलु चित्स्वरूपम्' इति । एवमवस्थात्रयेऽप्यबाधिते सत्ये ब्रह्मणि निविष्टचित्तानां तत्त्वदर्शिनामसद्रूपशीतोष्णादिद्वन्द्वदुःखसहने कियानायासः । यथा स्वप्ने सर्पव्याघ्रदष्टस्य जागरे तत्प्रतिकारासम्भवादित्यर्थः ॥ १६ ॥

रा० टी०—ननु 'पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः' इत्यादिना बन्धुहननादिरूपयुद्धात्परलोकदुःखहेतुतयोक्तम् । अतः शोक इत्यत आह—**नासत इति** । अत्र सदसच्छब्दौ साध्वसाधुकर्मपरौ । भावाभावशब्दौ सुखदुःखवाचकौ 'सद्भावे साधुभावे च सादित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा' इत्यादेः । 'सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचिनः' इत्यादेः । असतो दुष्कर्मणः सकाशात् भावः सुखं नास्ति । यथेति दृष्टान्ततयाऽस्योपयोगः । सतः साधुकर्मणः सकाशादभावो दुःखं नास्ति । एतच्च युद्धं नारायणद्विट्तदनुबन्धिनिग्रहरूपत्वेन सत्कर्मत्वान्न परलोकदुःखहेतुः । प्रत्युत सुखहेतुरेवेति भावः। किमत्र प्रमाणमित्यत आह—**उभयोरपीति** । अन्तो निर्णयः पूर्वार्धोक्तार्थस्यावधारणम् । अन्यदर्शनस्यान्यान्प्रत्यप्रत्यायकत्वाद्दर्शनमूलः सम्प्रदायोत्र लक्ष्यते । उभयोरप्यनयोः सदसत्कर्मणोः दुःखसुखे यथाक्रमं न विद्येते इत्यर्थयोरपि तत्वदर्शिभिरन्तस्तु

सम्प्रदायस्तु प्रमाणतया दृष्ट इति वा । दृष्टस्तु दृष्ट एवेति वा तुशब्दान्वयः । सत्कर्मणो दुःखं नास्ति असत्कर्मणः सुखं वा नास्तीत्यनयोरर्थयोर्निर्णायकोपदेशपरम्परारूपसम्प्रदायो महात्मभिर्दृष्ट एवेत्यर्थः । नन्वनादित्वहेतुनाहमपि पक्षे निक्षिप्य नित्यत्वेनानुमातव्य इति यदुक्तं त्वया स त्वयुक्तः पक्षः । दृष्टान्ताभावेन व्याप्तिग्रहासम्भवात् । अन्यस्यानादिनित्यस्य मानाभावेनाभावादित्यतोन्यदप्यनादिनित्यमित्येतदप्यनेनोच्यते—**नासत इति।** असतः करणस्य प्रकृतेरभावः प्रागभावः प्रध्वंसश्च न विद्यते नास्ति । तथा सतो ब्रह्मणश्चाभावो द्विरूपो भावः न विद्यते। अत्रासतः सतश्चाभावो न विद्यत इत्येकवाक्ये सम्भवति वाक्यद्वयग्रहणं प्रागुक्तानादित्वानुमाने व्याप्तिसद्भावे आदरसूचनार्थम्। अत एवाग्रेऽविनाशि त्वित्यादिना व्याप्तिग्रहणस्थलमनेकं दर्शयति । अत्र व्याप्तिस्थलप्रदर्शनार्थं नासतो विद्यते भाव इत्येतावदेव वाच्यम् । तथापि प्रागुक्तद्वितीयप्रयोगे कृष्णो दृष्टान्तितः । तत्र साध्यसाधनानुगतिसूचनाय 'नाभावो विद्यते सतः' इत्यप्युक्तिः । तथा च द्वितीयप्रयोगेपि व्याप्तिः सुदृढा । नन्वन्यस्यानादिनित्यत्वे माना (भावात्) भाव इत्युक्तमित्यत आह—**उभयोरपीति** । सदसतोरनादिनित्ययोरन्तस्तु निर्णयभूतपरम्परोपदेशलक्षणसम्प्रदायस्त्वित्यर्थः । तत्त्वदर्शिभिर्दृष्ट इत्यर्थः । नरहरितीर्थास्तु तत्त्वदर्शिभिरपीत्यपिपदं भिन्नक्रममुपेत्य " प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम " इत्यागमोऽत्रार्थे मानत्वेन समुच्चीयत इत्याहुः ॥ १६ ॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ॥
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

त० टी०—निर्णीतार्थमाह—अविनाशि त्विति । तत्त्वं त्वविनाशि विनाशाभावशीलं विद्धि । किं तत् । येनात्मवर्गेण सर्वमिदमचेतनं ततं व्याप्तं, व्यापकं सूक्ष्मं व्याप्यं स्थूलं, व्यापकत्वेन सूक्ष्मत्वादव्ययस्यात्मतत्त्वस्य विनाशं कश्चिदनात्मपदार्थः कर्तुं नार्हति न योग्यो भवति ॥ १७ ॥

म० टी०—नन्वेतादृशस्य सतोऽज्ञानाद्भेदे परिच्छिन्नत्वापत्तेर्ज्ञानात्मकत्वमभ्युपेयं तच्चानाध्यासिकम्।अन्यथा जडत्वापत्तेः । तथा चानाध्यासिकज्ञानरूपत्वस्य सतो धात्वर्थत्वादुत्पत्तिविनाशवत्त्वं घटज्ञानमुत्पन्नं घटज्ञानं नष्टमिति प्रतीतेश्च। एवं चाहं घटं जानामीति प्रतीतेस्तस्य साश्रयत्वं सविषयत्वं चेति देशकालवस्तुपरिच्छिन्नत्वात्स्फुरणस्य कथं तद्रूपस्य सतो देशकालवस्तुपरिच्छेदशून्यत्वमित्याशङ्क्याह—**अविनाशीति** । विनाशो देशतः कालतो वस्तुतो वा परिच्छेदः सोऽस्यास्तीति विनाशि परिच्छिन्नं तद्विलक्षणमविनाशि सर्वप्रकारपरिच्छेदशून्यं तु एव तत् सद्रूपं स्फुरणं त्वं विद्धि जानीहि । किं तत् येन सद्रूपेण स्फुरणेनैकेन नित्येन विभुना सर्वमिदं दृश्यजातं स्वतः सत्तास्फूर्तिशून्यं ततं व्याप्तं स्वसत्तास्फूर्त्यध्यासेन रज्जुशकलेनेव सर्पधारादि स्वस्मिन्समावेशितं तदविनाश्येव विद्धीत्यर्थः। कस्मात् यस्मात् विनाशं परिच्छेदमव्ययस्यापरिच्छिन्नस्य अस्य अपरोक्षस्य सर्वानुस्यूतस्य स्फुरणरूपस्य सतः कश्चित् कोऽपि आश्रयो वा विषयो वा इन्द्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुमर्हति समर्थो न भवति कल्पितस्याकल्पितपरिच्छेदकतायोगात् । आरोपमात्रे चेष्टापत्तेः । अहं घटं जानामीत्यत्र हि अहङ्कार आश्रयतया भासते घटस्तु विषयतया उत्पत्तिविनाशवती काचिदहङ्कारवृत्तिस्तु सर्वतो विप्रसृतस्य सतः स्फुरणस्य व्यञ्जकतया आत्ममनोयोगस्य परैरपि ज्ञानहेतुत्वाभ्युपगमात् तदुत्पत्तिविनाशेनैव च तदुपहिते स्फुरणरूपे सत्युत्पत्तिविनाशप्रतीत्युपपत्तेर्नैकस्य स्फुरणस्य स्वत उत्पत्तिविनाशकल्पनाप्रसङ्गः ध्वन्यवच्छेदेन शब्दवद्घटाद्यवच्छेदेनाकाशवच्च । अहङ्कारस्तु तस्मिन्नध्यस्तोपि तदाश्रयतया भासते तद्वृत्तितादात्म्याध्यासात् । सुषुप्तौ अहङ्काराभावेपि तद्वासनावासिताज्ञानभासकस्य चैतन्यस्य स्वतः स्फुरणात् । अन्यथैतावन्तं कालमहं किमपि नाज्ञासिषमिति सुषुप्तोत्थितस्य स्मरणं न स्यात् । न चोत्थितस्य ज्ञानाभावानुमितिरियमिति वाच्यम् । सुषुप्तिकालरूपपक्षाज्ञाना-

लिङ्गासम्भवाच्च अस्मरणादेर्व्यभिचारित्वात् स्मरणाजनकनिर्विकल्पकाद्यभावासाधकत्त्वाच्च ज्ञानसामग्र्यभावस्य चान्योन्याश्रयग्रस्तत्वात् । तथा च श्रुतिः "यद्वैतन्न पश्यति पश्यन्वैतद्द्रष्टव्यं न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात्" इत्यादिः । सुषुप्तौ स्वप्रकाशस्फुरणसद्भावं तन्नित्यतया दर्शयति । एवं घटादिर्विषयोपि तदज्ञानावस्थाभासके स्फुरणे कल्पितः य एव प्रागज्ञातः स एवेदानीं मया ज्ञात इति प्रत्यभिज्ञानात् । अज्ञातज्ञापकत्वं हि प्रामाण्यं सर्वतन्त्रसिद्धान्तः । यथार्थानुभवः प्रमेति वदद्भिस्तार्किकैरपि ज्ञातज्ञापिकायाः स्मृतेर्व्यावर्तकमनुभवपदं प्रयुञ्जानैरेतदभ्युपगमात् । अज्ञातत्वं च घटादेर्न चक्षुरादिना परिच्छिद्यते तत्रासामर्थ्यात् । तज्ज्ञानोत्तरकालमज्ञानस्यानुवृत्तिप्रसङ्गाच्च नाप्यनुमानेन लिङ्गाभावात् । नहीदानीं ज्ञातत्वेन प्रागज्ञातत्वमनुमातुं शक्यं धारावाहिकानेकज्ञानविषये व्यभिचारात् । इदानीमेव ज्ञातत्वं तु प्रागज्ञातत्वे सतीदानीं ज्ञातत्वरूपं साध्याविशिष्टत्वादसिद्धम् । नचाज्ञातावस्थाज्ञानमन्तरेण ज्ञानं प्रति घटादेर्हेतुता ग्रहीतुं शक्यते पूर्ववर्तित्वाग्रहात् । घटं न जानामीति सार्वलौकिकानुभवविरोधश्च तस्मादज्ञातं स्फुरणं भासमानं स्वाध्यस्तं घटादिकं भासयति घटादीनामज्ञाने कल्पितत्वसिद्धिः । अन्यथा घटादेर्जडत्वेनाज्ञातत्वतज्ज्ञानयोरनुपपत्तेः । स्फुरणं चाज्ञातं स्वाध्यस्तेनैवाज्ञानेनेति स्वयमेव भगवान् वक्ष्यति 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इत्यत्र । एतेन विभुत्वं सिद्धम् । तथाच श्रुतिः "महद्भूतमनन्तमपारं विज्ञानघन एव" इति । "सत्यं ज्ञानमनन्तम्" इति च ज्ञानस्य महत्त्वमनन्तत्वं च दर्शयति।महत्त्वं स्वाध्यस्तसर्वसम्बन्धित्वम् अनन्तत्वं त्रिविधपरिच्छेदशून्यत्वमिति विवेकः । एतेन शून्यवादोपि प्रत्युक्तः । निरधिष्ठानभ्रमायोगान्निरवधिबाधायोगाच्च । तथाच श्रुतिः "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति सर्वबाधावधिं पुरुषं परिशिनष्टि । उक्तंच भाष्यकारैः "सर्वं विनश्यद्वस्तुजातं पुरुषान्तं विनश्यति । पुरुषो विनाशहेत्वभावान्न विनश्यति" इति । एतेन क्षणिकवादोपि परास्तः । अबाधितप्रत्यभिज्ञानादन्यदृष्टान्तस्मरणाद्यनुपपत्तेश्च । तस्मादेकस्य सर्वानुस्यूतस्य स्वप्रकाशस्फुरणरूपस्य सतः सर्वप्रकारपरिच्छेदशून्यत्वादुपपन्नं—नाभावो विद्यते सत इति॥ १७॥

शं० टी०—ननु सदिति सामान्यं वा उत स्वरूपं वा । सामान्यत्वे तस्य विशेषापेक्षत्वेन प्रलयदशायामशेषविशेषविनाशे विनाशः स्याद्विशेषाणामपि कार्यत्वेन तत्र विनाशः स्यात् सामान्यस्यापि तद्धर्मत्वेन विनाशोपपत्तेः । स्वरूपत्वे तस्य व्यावृत्तत्वे कल्पितत्वाद्विनाशित्वमुपात्तमनुवृत्तत्वे तस्यैव सामान्यत्वेनोक्तदोषप्रसक्तिरित्याशङ्कायां न तस्य सामान्यविशेषभावशून्यत्वात्सतो न कथञ्चिदपि विनाश उपपद्यत इत्याह—**अविनाशि त्विति** । इदं परिदृश्यमानमविद्याकार्यमसज्जगत्सर्वं येनातिसूक्ष्मेण विभुना सदात्मकेन मरीच्या जलप्रवाहवत्ततमन्तर्बहिश्च व्याप्तं भवति तत्सच्छब्दितं वस्तु अविनाशि यथा असत्तथा विनष्टुं विनाशनविक्रियाया विषयतां प्राप्तुमनर्हं शीलं स्वभावः सत्ता यस्य तदविनाशि अतिसूक्ष्मत्वादतिमहत्त्वाच्च स्वयं विनाशनक्रियातिगं सान्नित्यमेव भवतीत्यर्थः । आत्मा नित्यः परिपूर्णत्वाद्गगनवदिति नित्यत्वे अनुमानं प्रमाणं नष्टेप्येकस्मिन् देहे पदार्थाः सर्वत्र सर्वेषामुपलभ्यन्ते सत्येवात्मनि रविवत्सर्वप्रकाशके पदार्थोपलब्धिरन्यथानुपपत्तिरिति तत्प्रसूतार्थापत्तिश्च प्रमाणम् । अत्रात्मनो नाशं वदन् वादी प्रष्टव्यः किमात्मनो नाशः स्वतो वा किं परतो वा किमाश्रयनाशाद्वा किं सम्बन्धिनाशाद्वा उत कारणनाशाद्वा अथ कार्यनाशाद्वेति । नाद्यः निरवयवत्वाद्यथा सावयवस्य स्वावयवापचयान्नाशस्तथा निरवयवस्यात्मनः स्वतो नाशानुपपत्तेः । न द्वितीयः तस्याप्यात्मत्वेन स्वंप्रति स्वस्य कर्तृकर्मत्वायोगात्ततोपि नाशासम्भवात् । न तृतीयः "कस्मिन् भगवः प्रतिष्ठित इति स्वे महिम्नि" इत्यात्मनः स्वातिरिक्ताश्रयाभावश्रवणादाश्रयनाशनिमित्तकनाशानुपपत्तेः । नापि चतुर्थः आत्मनो निरवयवत्वेन द्रव्यगुणक्रियादिभिः संयोगादिसम्बन्धस्य निरूपयितुमशक्यत्वात्तद्विश्लेषप्रयुक्तनाशासम्भूतेः । नापि च पञ्चमः नचास्य कश्चिज्जनितेति ब्रह्मणः कारणाभावश्रवणात्तन्निमित्तकनाशायोगात् । नैव च षष्ठः "न तस्य कार्यं करणं च विद्-

ते'' इति कार्याभावश्रवणात्कार्यनाशनिमित्तकनाशासम्भवान्न केनापि प्रकारेणेदं सद्ब्रह्म व्येतीत्यव्ययं तस्यैतस्याव्ययस्य नित्यसिद्धसत्ताकस्य ब्रह्मणो विनाशमभावं कर्तुं वक्तुं च कोपि वादिविशेषो नार्हति । तथात्वे स्वस्यैव नाहमस्मीत्यभावप्रसङ्गः बहुश्रुतिविरोधः प्रत्यक्षादिविरोधश्च प्रसज्यत इति भावः ॥ १७ ॥

श्री० टी०—तत्र सत्स्वभावमविनाशि वस्तु सामान्येनोक्तं विशेषतो दर्शयति—**अविनाशीति** । येन सर्वमिदमागमापायधर्मकं देहादिकं ततं तत्साक्षित्वेन व्याप्तं तत्तु आत्मस्वरूपमविनाशि विनाशशून्यं विद्धि जानीहि । तत्र हेतुमाह—**विनाशमिति** ॥ १७ ॥

स० टी०—ननु ज्ञानात्मकं सत्स्याज्ज्ञानमाद्यन्तवत्किल ॥ घटज्ञानं समुत्पन्नं नष्टं चेति प्रतीतितः ॥ १ ॥ घटं वेद्मीत्यतो भानात्साश्रयं च सकर्मकम् ॥ दिक्कालवस्तुविच्छिन्नं ज्ञानं स्याद्व्यापकं कथम् ॥ २ ॥ इत्यत्राहाविनाशीत्यपरिच्छिन्नं चिदद्वयम् ॥ जानीहि स्फुरणं सत्तयैवैकेन चिदात्मना ॥ ३ ॥ नित्येन विभुना सर्वमिदं व्याप्तं जडानृतम् ॥ स्वसत्तास्फूर्तिदानेन सर्वं स्वस्मिन्निवेशितम् ॥ ४ ॥ परिच्छेदं न कोऽप्यस्यापरोक्षस्याव्ययस्य च ॥ सर्वानुस्यूतरूपस्य सतः कर्तुमिहार्हति ॥ ५ ॥ नाश्रयो विषयो नो न सन्निकर्षादिकारणम् ॥ परिच्छेत्तुं समर्थोऽस्त्यपरिच्छिन्नस्य कर्हिचित् ॥ ६ ॥ तुनाऽसतो विभिन्नत्वं सूच्यते सच्चिदात्मनः ॥ सत्यं ज्ञानमनन्तं चापरिच्छिन्नमबाधितम् ॥ ७ ॥ श्रुत्या ज्ञानं विनिर्णीतं संविद्रूपं सदद्वयम् ॥ या त्वाद्यन्तवती काचिद्बुद्धिवृत्तिर्मता हि सा ॥ ८ ॥ स्फुरणस्यास्य नित्यस्याभिव्यञ्जकतयाखिले ॥ घटादौ जन्मनाशादिप्रतीतिविपर्येरिता ॥ ९ ॥ तदुत्पत्तिविनाशाभ्यामनाशिस्फुरणे परे ॥ जन्मनाशप्रतीतेश्चोपपत्तेर्न स्वतः सतः ॥ १० ॥ साश्रयादिपरिच्छेदवतो भवतु तेन हि ॥ न क्षतिः स्फुरणस्यास्यापरिच्छिन्नस्य वस्तुनः ॥ ११ ॥ यथा घटाद्यविच्छेदादाकाशे भेदकल्पना ॥ तथाधीवृत्त्यविच्छेदात्स्फुरणे भेदकल्पना ॥ १२ ॥ सुप्तौ धीवृत्त्यभावेऽपि सतः स्फूर्तिः स्वतो यतः ॥ अत औपाधिकस्तस्य परिच्छेदो न वास्तवः ॥ १३ ॥ तदुक्तं वार्तिके सम्यक् सत्यादिपदनिर्णये ॥ ननु सत्यमनन्तं च कथं सम्यक् प्रतीयते ॥ १४ ॥ देशकालादिहेतुत्वात्तदिदानीं विभाव्यते ॥ वस्तुतो देशतश्चैव कालतश्च त्रिधोच्यते ॥ १५ ॥ आनन्त्यं ब्रह्मणश्चातः सत्याद्यपि च सिद्ध्यति ॥ नानन्तं देशतो व्योम देशवत्प्रकृतित्वतः॥ १६॥ कारणेनैकदेशं हि कार्यं नान्यत्र वर्तते ॥ कार्यत्वात्कालतो नास्य वस्तुतश्च विहायसः ॥ १७ ॥ वस्त्वन्तरस्य सद्भावादानन्त्यं वस्तुतोऽपि न ॥ कालाकाशादियोनित्वात्सर्वात्मत्वात्तथात्मनः ॥ १८ ॥ वस्त्वन्तरस्य चासत्वान्मुख्यानन्त्यं परात्मनः ॥ कल्पितेन परिच्छेदो न ह्यकल्पितवस्तुनः ॥ १७ ॥ कल्पितश्चेह कालादि वाचारम्भणशास्त्रतः ॥ कल्पितानामधिष्ठानतया सत्यमबाधितम् ॥ २० ॥ देहादिसर्वविश्वस्यासत्यत्वं सिद्धमित्यलम् ॥ २१ ॥ १७ ॥

भा० टी०—किं तत्सदित्याकाङ्क्षायामाह—**अविनाशि त्विति** । न विनष्टुं शीलमस्येति तत् जानीहि । तुशब्दोऽसतो व्यावृत्त्यर्थः । किं येनेदं सर्वं व्याप्तं निरवयवत्वात् स्वरूपेण देहादिवत् आत्मीयाभावात् धनादिहान्या देवदत्तवच्च न व्येतीत्यव्ययम् तस्यास्याव्ययस्य ब्रह्मणः स्वस्वरूपस्य विनाशमभावं बाधं न कश्चित् ईश्वरोऽपि कर्तुमर्हति शक्नोति स्वात्मनि क्रियाविरोधात् । नन्वेतादृशस्य सतोज्ञानाभेदे परिच्छिन्नत्वापत्तेर्ज्ञानात्मकत्वमभ्युपेयम् । तच्चानाध्यासिकम् अन्यथा जडत्वापत्तेः । तथा चानाध्यासिकज्ञानरूपस्य सतो धात्वर्थत्वात् उत्पत्तिविनाशवत्त्वं घटज्ञानमुत्पन्नं घटज्ञानं नष्टमिति प्रतीतेश्च । एवं चाहं घटं जानामि इति प्रतीतेस्तस्य साश्रयत्वं सविषयत्वं चेति देशकालतस्तु परिच्छिन्नत्वात् । स्फुरणस्य कथं तद्रूपस्य सतो देशकालवस्तुपरिच्छिन्नशून्यत्वमित्याशङ्क्याह—अविनाशि त्रिविधपरिच्छेदशून्यं तु एव तत्सद्रूपं स्फुरणं विद्धि किं तत् येनेदं सर्वं ततं रज्जुशकलेनेव सर्पधारादि स्वास्मिन् समावेशितं यस्माद्विनाशं परिच्छेदमव्ययस्यास्य

रिच्छिन्नस्यास्य कोऽप्याश्रयो वा विषयो वा इन्द्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुमर्हतीति भाष्यकृद्भिः कुतो न व्याख्यातमिति चेन्मूलाक्षरैरुक्तशङ्कोत्तरस्य घटादिज्ञानस्य वृत्त्यात्मकस्यात्मन्यध्यस्तत्वेऽपि तस्य स्वप्रकाशत्वान्न जडत्वं वृत्त्यादेरुत्पत्त्यादिमत्त्वेऽपि तस्य न तत्त्वमित्येवमादिरूपस्याप्रतीतेः । उत्तरत्रान्तवन्त इमे देहा इत्यस्य स्थानेन्तवत्य इमा वृत्तय इति वक्तव्यत्त्वापत्तेः । एतेषां नाशो भाविष्यतीत्यर्जुनस्य भ्रमनिराकरणायात्मसंसृष्टदेहाद्यसत्यत्वप्रतिपादनस्यावश्यकत्वेनाश्रयत्वेत्यादेरार्थित्वाच्चेति गृहाण । किञ्च शुक्त्यध्यस्तरजतज्ञानस्य कल्पितत्ववत्सदध्यस्तघटादिज्ञानस्याप्यध्यस्तत्वेन कल्पितत्वस्यसद्बुद्धिरसद्बुद्धिरित्यादिभाष्येण प्रदर्शितत्वादुक्तशङ्कानुत्थानमित्यभिप्रेत्याचार्यैरेवं न व्याख्यातमिति दिक् ॥ १७ ॥

प० टी०—अथोक्तयुक्तिपरिनिष्ठितमर्थमाह—**अविनाशीति** । तद्वस्तु सत्यमविनाशीति विद्धि न विद्यते विनाशो यस्य तदविनाशीति जानीहि । तत्किम् । येनाध्यासाश्रयीभूतेनाधिकरणरूपेण सर्वमिदं दृश्यजातं ततं विस्तारं प्राप्तम् । न हि सत्याश्रयव्यतिरेकेणासत्यं भासते । शुक्तिकाया असत्त्वे रजतमिवेत्यर्थः । अतोऽव्ययस्यास्य विनाशं कः कर्तुमर्हति न कोऽपीत्यर्थः ॥ १७ ॥

रा० टी०—ननु 'प्रकृतिः पुरुषः कालः' इत्यादिवाक्यानामुपासनार्थत्वात्सम्प्रदायस्य च मूलानिश्चयात्प्रकृतिपुरुषयोः स्वरूपस्यैवासिद्धेः पुनरनुमानस्य व्याप्त्यसिद्धिरित्याशङ्क्य भगवान् किमिदानीं प्रकृत्यादिस्वरूपसाधनेन किञ्चेदं नित्यम् इदम् (अ) नित्यमिति प्रत्यैकमुक्तेन च । यद्देशतो अनन्तं सत्सर्वं नित्यमेवेत्येवं सङ्ग्राहकसङ्गृहीतं वर्णादिजीवादन्यदप्यस्ति तद्व्याप्तिग्रहणस्थलं भविष्यतीत्याह—**अविनाशि त्विति** । येनेदं सर्वं ततं व्याप्तं तदकारादिवर्णजातम् अव्याकृताकाशश्चेत्येवमादि सर्वमविनाशि तु नित्यमेवेति तुरेवेत्यर्थः । अनादिचेत्यपि ग्राह्यम् । ननु " सुप्यजातौ णिनिस्ताच्छील्ये " इति सूत्रेण सोपसर्गस्यापि च्छान्दसत्वात्ताच्छील्किणिनिप्रत्ययान्ताविनाशिशब्देन स्वाभाविकविनाशाभावोक्तावपि शापेन वा बलवत्प्रयत्नादिना वा विनाशः किं न स्यादित्यत आह—**विनाशमिति** । अस्य व्याप्तस्य वस्तुनो विनाशं ध्वंसं कश्चिदपि कर्तुं नार्हति । कुत इत्यत उक्तम्—अव्ययस्येति ह्रासहीनस्येत्यर्थः । ह्रास एव नास्ति तादृशस्य नाशं न कोपि कर्तुमीष्ट इति किमु वाच्यमित्यर्थः ॥ १७ ॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ॥
अनाशिनोऽप्रमेयस्य तस्माद्युद्धयस्व भारत ॥ १८ ॥

त० टी०—नन्वात्मनां विनाशानर्हत्वेन नित्यत्वमुक्तं तर्हि सर्वेषां मातृपित्राद्यो नष्टा इत्यबाधितप्रतीतेः के विषया इत्याशङ्क्याह—**अन्तवन्त इति** । नित्यस्य शरीरिण इमे कर्मफलभोगायतनभूताः पञ्चमहाभूतावयवोपचिता देहा अन्तवन्तो विनाशिन उक्ता व्यासादिभिः । तथाहि—' मातापितृसहस्राणि पुत्रदारशतानि च । संसारेष्वनुभूतानि याता यास्यन्ति यान्ति च ॥ हर्षस्थानसहस्राणि शोकस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्याप्यनित्यः' इति । हेतुः स्थूलसूक्ष्मशरीरम् । शरीरिणो नित्यत्वे हेतुगर्भितविशेषणमाह—**अनाशिन इति** । नाशाभाववतः अत एव नित्यस्य अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते । 'तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम्' इति वैष्णवे जडभरतवाक्यात् । ननु नित्योऽविनाशी चेदात्मा तर्हि देहे नष्टेऽपि तदुपलब्धिः किन्न स्यादित्याशङ्कानिरासाय हेतुगर्भितविशेषणमाह—**अप्रमेयस्येति** । भगवत्कृपां शास्त्रमन्तरेण प्रत्यक्षादिप्रमाणैरिदमित्थमिति प्रमातुमशक्यत्वात् । ' एनं विदुर्वै भगवत्प्रसादात् ' इत्याद्याचार्यपादोक्तेश्च । यद्देहादि इदमित्थमित्युपलभ्यते तन्नाशित्वेनाप्युपलभ्यते, आत्मा न तथा । किन्त्वहं जानाम्य-

नुभवामीति प्रतीत्या प्रमातृतयैवोपलभ्यते, यस्मादनाशित्वादात्मानो न शोच्याः, नाशित्वादन्तवन्तो देहा अपि न शोच्याः । तस्मान्मोहं विहाय हे भारत ! त्वं युद्धयस्व ॥ १८ ॥

म० टी०—ननु स्फुरणरूपस्य सतः कथमविनाशित्वं तस्य देहधर्मत्वात् देहस्य चानुक्षणविनाशादिति भूतचैतन्यवादिनस्तान्निराकुर्वन् 'नासतो विद्यते भावः' इत्येतद्विवृणोति । अन्तवन्तो विनाशिनः इमे परोक्षाः देहाः उपचितापचितरूपत्वाच्छरीराणि बहुवचनात् स्थूलसूक्ष्मकारणरूपाः विराट्सूत्राव्याकृताख्याः समष्टिव्यष्ट्यात्मानः सर्वे नित्यस्य अविनाशिन एव शरीरिणः आध्यासिकसम्बन्धेन शरीरवत एकस्य आत्मनः स्वप्रकाशस्फुरणरूपस्य सम्बन्धिनः दृश्यत्वेन भोग्यत्वेन चोक्ताः श्रुतिभिर्ब्रह्मवादिभिश्च। तथाच तैत्तिरीयके अन्नमयाद्यानन्दमयान्तान्पञ्च कोशान् कल्पयित्वा तदधिष्ठानमकल्पितं "ब्रह्मपुच्छं प्रतिष्ठा" इति दर्शितम् तत्र पञ्चीकृतपञ्चमहाभूततत्कार्यात्मको विराट् मूर्तराशिरन्नमयकोशः स्थूलसमष्टिः तत्कारणीभूतोऽपञ्चीकृतपञ्चमहाभूततत्कार्यात्मको हिरण्यगर्भः सूत्रममूर्तराशिः सूक्ष्मसमष्टिः । "त्रयं वा इदं नाम रूपं कर्म" इति बृहदारण्यकोक्तत्र्यन्नात्मकः सकर्मात्मकत्वेन क्रियाशक्तिमात्रमादाय प्राणमयकोश उक्तः । नामात्मकत्वेन ज्ञानशक्तिमात्रमादाय मनोमयकोश उक्तः । रूपात्मकत्वेन तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयकोशउक्तः । ततः प्राणमयमनोमयविज्ञानमयात्मैक एव हिरण्यगर्भाख्यो लिङ्गशरीरकोशः । तत्कारणीभूतस्तु मायोपहितचैतन्यात्मा सर्वसंस्कारशेषोऽव्याकृताख्य आनन्दमयकोशः । ते च सर्वे एकस्यैवात्मनः शरीराणीत्युक्तम् । "तस्यैष एव शारीर आत्मा यः पूर्वस्य" इति तस्य प्राणमयस्यैष एव शरीरे भवः शारीर आत्मा यः सत्यज्ञानादिलक्षणो गुहानिहितत्वेनोक्तः पूर्वस्यान्नमयस्य । एवं प्राणमयमनोमयविज्ञानमयानन्दमयेषु योज्यम् ।अथवा इमे सर्वे देहास्त्रैलोक्यवर्तिसर्वप्राणिसम्बन्धिन एकस्यैवात्मन उक्ता इति योजना । तथा च श्रुतिः "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" इति सर्वशरीरसम्बन्धिनमेकमात्मानं नित्यं विभुं दर्शयति । ननु नित्यत्वं यावत्कालस्थायित्वं तथाचाविद्यादिवत्कालेन सह नाशेपि तदुपपन्नमित्यत आह—**अनाशिन इति** । देशतः कालतो वस्तुतश्च परिच्छिन्नस्याविद्यादेः कल्पितत्वेनानित्यत्वेऽपि यावत्कालस्थायित्वरूपमौपचारिकं नित्यत्वं व्यवह्रियते । "यावद्विकारं तु विभागो लोकवत् " इतिन्यायात् । आत्मनस्तु परिच्छेदत्रयशून्यस्याकल्पितस्य विनाशहेत्वभावान्मुख्यमेव कूटस्थनित्यत्वं नतु परिणामि नित्यत्वं यावत्कालस्थायित्वं चेत्यभिप्रायः । नन्वेतादृशे देहिनि किञ्चित्प्रमाणमवश्यं वाच्यम् ।अन्यथा निष्प्रमाणस्य तस्यालीकत्वापत्तेः शास्त्रारम्भवैयर्थ्यापत्तेश्च । तथाच वस्तुपरिच्छेदो दुष्परिहरः "शास्त्रयोनित्वात्" इति न्यायाच्च । अत आह—अप्रमेयस्येति । 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्' अप्रमयमप्रमेयम् "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः । तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति च श्रुतेः । स्वप्रकाशचैतन्यरूप एवात्मा अतस्तस्य सर्वभासकस्य स्वभानार्थं न स्वभास्यापेक्षा । किन्तु कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थं कल्पितवृत्तिविशेषापेक्षा । कल्पितस्यैव कल्पितविरोधित्वात् 'यक्षानुरूपोबलिः' इति न्यायात् । तथाच । सर्वकल्पितनिवर्तकवृत्तिविशेषोत्पत्त्यर्थं शास्त्रारम्भः । तस्य तत्त्वमस्यादिवाक्यमात्राधीनत्वात् । स्वतः सर्वदा भासमानत्वात्सर्वकल्पनाधिष्ठानत्वाद्दृश्यमात्रभासकत्वाच्च । न तस्य तुच्छत्वापत्तिः । तथा च "एकमेवाद्वितीयं सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिशास्त्रमेव स्वप्रमेयानुरोधेन स्वस्यापि कल्पितत्वमापादयति । अन्यथा स्वप्रामाण्यानुपपत्तेः । कल्पितस्य चाकल्पितपरिच्छेदकत्वं नास्तीति प्राक् प्रतिपादितम् । आत्मनः स्वप्रकाशत्वं च युक्तितोपि भगवत्पूज्यपादैरुपपादितम् । तथाहि यत्र जिज्ञासोः संशयविपर्ययव्यतिरेकप्रमाणानामन्यतममपि नास्ति तत्र तद्विरोधि ज्ञानमिति सर्वत्र दृष्टम् । अन्यथा त्रितयान्यतरापत्तेः। आत्मनि चाहं नाहं वेति न कस्यचित् संशयः। नापि नाहमिति विपर्ययः व्यतिरेकः प्रमा वेति तत्स्वरूपप्रमा सर्वदास्तीति वाच्यम् । तस्य सर्वसंशयविपर्ययध-

मित्वात् । 'धर्म्यंशे सर्वमभ्रान्तं प्रकारे तु विपर्ययः' इति न्यायात् । अत एवोक्तम् ' प्रमाणमप्रमाणं च प्रमाभासस्तथैव च । कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः ' इति प्रमाभासः संशयः स्वप्रकाशे सद्रूपे धर्मिणि प्रमाणाप्रमाणयोर्विशेषो नास्तीत्यर्थः । आत्मनो भासमानत्वे च घटज्ञानं मयि जातं नवेत्यादिसंशयः स्यात् । नचान्तरपदार्थे विषयस्यैव संशयादिप्रतिबन्धकत्वस्वभावः कल्प्यः । बाह्यपदार्थे क्लृप्तेन विरोधिज्ञानेनैव संशयादिप्रतिबन्धसम्भवे आन्तरपदार्थे स्वभावभेदकल्पनाया अनौचित्यात् । अन्यथा सर्वविप्लवोपपत्तेः । आत्ममनोयोगमात्रं चात्मसाक्षात्कारे हेतुः । तस्य च ज्ञानमात्रे हेतुत्वाद्घटादिभानेप्यात्मभानं समूहालम्बनन्यायेन तार्किकाणां प्रवरेणापि दुर्निवारम् । न च चाक्षुषत्वमानसत्वादिसङ्करः लौकिकत्वालौकिकत्ववदंशभेदेनोपपत्तेः । सङ्करस्यादोषत्वाच्चाक्षुषत्वादेर्जातित्वानभ्युपगमाद्वा । व्यवसायमात्र एवात्मभानसामग्र्या विद्यमानत्वादनुव्यवसायोप्यपास्तः । न च व्यवसायभानार्थं सः तस्य दीपवत्स्वव्यवहारे सजातीयानपेक्षत्वात् । न हि घटतज्ज्ञानयोरिव व्यवसायानुव्यवसाययोरपि विषयत्वविषयित्वव्यवस्थापकं वैजात्यमस्ति व्यक्तिभेदातिरिक्तवैधर्म्यानभ्युपगमात् । विषयत्वावच्छेदकरूपेणैव विषयित्वाभ्युपगमे घटयोरपि तद्भावापत्तिरविशेषात् । ननु यथा घटव्यवहारार्थं घटज्ञानमभ्युपेयते तथा घटज्ञानव्यवहारार्थं घटज्ञानविषयं ज्ञानमभ्युपेयं व्यवहारस्य व्यवहर्तव्यज्ञानसाध्यत्वादिति चेत् कानुपपत्तिरुद्भाविता देवानां प्रियेण स्वप्रकाशवादिनः । न हि व्यवहर्तव्यभिन्नत्वमपि ज्ञानविशेषणं व्यवहारहेतुतावच्छेदकं गौरवात् । तथाचेश्वरज्ञानवत् योगिज्ञानवत्प्रमेयमिति ज्ञानवच्च स्वेनैव व्यवहारोपपत्तौ न ज्ञानान्तरकल्पनावकाशः । अनुव्यवसायस्यापि घटज्ञानव्यवहारहेतुत्वं किं घटज्ञानत्वेन किंवाघटज्ञानत्वेनैवेति विवेचनीयम् । उभयस्यापि तत्र सत्त्वात् । तत्र घटव्यवहारे घटज्ञानत्वेनैव हेतुतायाः क्लृप्तत्वात्तेनैव रूपेण घटज्ञानव्यवहारेपि हेतुतोपपत्तौ न घटज्ञानज्ञानत्वं हेतुतावच्छेदकं गौरवान्मानाभावाच्च । तथा च नानुव्यवसायसिद्धिः । एकस्यैव व्यवसायस्य व्यवसेये व्यवसाये च व्यवहारजनकत्वोपपत्तेरिति त्रिपुटीप्रत्यक्षवादिनः प्राभाकराः । औपनिषदास्तु मन्यन्ते स्वप्रकाशज्ञानरूप एवात्मा न स्वप्रकाशज्ञानाश्रयः । कर्तृकर्मविरोधेन तद्भानानुपपत्तेः । ज्ञानभिन्नत्वे घटादिवज्जडत्वेन कल्पितत्वापत्तेश्च । स्वप्रकाशज्ञानमात्रस्वरूपोप्यात्मा विद्योपाहितः सन् साक्षीत्युच्यते । वृत्तिमदन्तःकरणोपहितः प्रमातेत्युच्यते । तस्य चक्षुरादीनि करणानि । स चक्षुरादिद्वारान्तःकरणपरिणामेन घटादीन्व्याप्य तदाकारो भवति एकस्मिंश्चान्तःकरणपरिणामे घटावच्छिन्नचैतन्यमन्तःकरणावच्छिन्नचैतन्यं चैकलोलीभावापन्नं भवति ततोघटावच्छिन्नचैतन्यं प्रमात्रभेदात्स्वाज्ञानं नाशयदपरोक्षं भवति । घटं च स्वावच्छेदकं स्वतादात्म्याध्यासाद्भासयाति अन्तःकरणपरिणामश्च वृत्त्याख्योतिस्वच्छः स्वावच्छिन्नेनैव चैतन्येन भास्यत इति अन्तःकरणतद्वृत्तिघटानामपरोक्षता तदेतदाकारत्रयमहं जानामि घटमिति भासकचैतन्यस्यैकरूपत्वेपि घटं प्रति वृत्त्यपेक्षत्वात्प्रमातृता अन्तःकरणतद्वृत्तीः प्रति तु वृत्त्यनपेक्षत्वात्साक्षितेति विवेकः । अद्वैतसिद्धौ सिद्धान्तबिन्दौ च विस्तरः । यस्मादेवं प्रागुक्तन्यायेन नित्यो विभुरसंसारी सर्वदैकरूपश्चात्मा तस्मात्तन्नाशशङ्कया स्वधर्मे युद्धे प्राक्प्रवृत्तस्य तव तस्मादुपरतिर्न युक्तेति युद्धाभ्यनुज्ञया भगवानाह—तस्माद्युध्यस्व भारतेति । अर्जुनस्य स्वधर्मे युद्धे प्रवृत्तस्य तत उपरतिकारणं शोकमोहौ तौ च विचारजनितेन विज्ञानेन बाधितावित्यपवादापवादे उत्सर्गस्य स्थितिरिति न्यायेन युध्यस्वेत्यनुवादो न विधिः । यथा " कर्तृकर्मणोः कृति " इत्युत्सर्गः । " उभयप्राप्तौ कर्मणि " इत्यपवादः । ' अकाकारयोः स्त्रीप्रत्यययोः प्रयोगेनेति वक्तव्यम् ' इति तदपवादः । तथाच मुमुक्षोर्ब्रह्मणो जिज्ञासेत्यत्र अपवादापवादे पुनरुत्सर्गस्थितेः " कर्तृकर्मणोः कृति " इत्यनेनैव षष्ठी । तथा च "कर्मणि च" इति निषेधाप्रसराद्ब्रह्मजिज्ञासेति कर्मषष्ठीसमासः सिद्धो भवति । कश्चित्त्वेतस्मादेव विधेर्मोक्षे ज्ञानकर्मणोः समुच्चय इति प्रलपति तन्न । युध्यस्वेत्यतो मोक्षस्य ज्ञानकर्मसमुच्चयसाध्यत्वाप्रतीतेः । विस्तरेण चैतदग्रे भगवद्गीतावचनविरोधेनैव निराकरिष्यामः ॥ १८ ॥

शं० टी०—'अशोच्यानन्वशोचस्त्वम्' इत्यत्र त्वम्पदवाच्यार्थो देहादिर्जन्मादिमत्त्वेनानित्यत्वादशोच्य एव त्वम्पदलक्ष्यार्थोऽप्यात्मा स्वयमजत्वेन जन्मादिशून्यतया नित्यत्वादशोच्य एवेत्युभयोरप्यशोच्यत्वे यत्कारणत्वेन सूचितं तयोरनित्यत्वनित्यत्वाज्ञानं तदिदानीं मुखतो विस्पष्टयन् तेन निवृत्तशोकमर्जुनमालक्ष्य स यस्मिन्नर्थे स्वयमेव पूर्वं प्रवृत्तस्तत्रैव तं प्रोत्साहयति श्रीभगवान्—**अन्तवन्त इति**। अप्रमेयस्य प्रत्यक्षादि-प्रमाणैः प्रमापयितुमशक्यस्य नह्यस्तिप्रत्यक्षादेर्विषयतात्मनः प्रमापयितुम्। तथाहि नात्मा प्रत्यक्षाविषयः शब्दा-दिरहितत्वात्। "अशब्दमस्पर्शम्"इति श्रुतेः। नानुमानविषयः लिङ्गाभावात् "नैव च तस्य लिङ्गम्" इति श्रुतेः। नाप्युपमानविषयः सादृश्याभावात्। "हेतुदृष्टान्तवर्जितम्" इति श्रुतेः। न शब्दस्यापि विषयः नाम-रूपजात्याद्यभावात् "यत्तदद्रेश्यमग्राह्यमगोत्रम्" इति श्रुतेः। ननु "तं त्वौपनिषदम्" इति श्रूयते। कथं शब्दागम्यत्वमिति चेत्सत्यम्। यद्यपि श्रूयते तथापि शब्दप्रवृत्तिनिमित्ताभावान्न तत्र शब्दः प्रवर्तते। "य-तो वाचो निवर्तन्ते" इति श्रुतेः। तर्हि श्रुतेरप्रामाण्यमिति चेन्न। निर्विशेषाधिगमकत्वात्प्रामाण्योपपत्तेः। श्रुतिरात्मन्यध्यस्ताशेषविशेषं निरस्याऽधिष्ठानभूतं सन्मात्रं निर्विशेषमात्मानमधिगमयति तेन प्रामाण्यमुपप-द्यते।आत्मनः सविशेषत्वेन ज्ञातत्वेपि निर्विशेषत्वस्याऽज्ञातत्वादज्ञातज्ञापकत्वेन श्रुतेः प्रमाणलक्षणसम्भवात्। तथापीदन्तया साक्षान्निर्देष्टुमशक्यत्वादात्मा श्रुतेरविषय एव। किञ्च आत्मनि विषये त्वन्यथानुपपत्तेरभा-वान्नाप्यर्थापत्तेर्विषयः। भावत्वादनुपलब्धेरप्यविषयः वागविषयत्वादैतिह्यस्याप्यविषयः इत्यात्मनस्त्वप्रमेयत्वं सिद्धम्। सर्वेषां प्रमाणानां प्रमेयानां च यतः प्रामाण्यसिद्धिस्तं किं प्रमापयेत्। "विज्ञातारमरे केन विजानीयात्" इति श्रुतेः। स्वस्मिन्नध्यस्तसर्वप्रमाणप्रमेयसद्भावासद्भावप्रकाशकत्वात्स्वप्रकाशत्वाच्च आत्मनः स्वत एव प्रामाण्यं नतु कचिच्च परतस्तत एवाप्रमेयस्तस्याविनाशिनो विनाशः सत्ताऽदर्शनं परिच्छित्तिस्तदभावोऽस्या-स्तीत्यविनाशी अनन्तः। "सत्यं ज्ञानमनन्तम्" इति श्रुतेस्तस्याविनाशिनोऽपरिच्छिन्नस्य परिपूर्णस्याऽत-एव नित्यस्य। ननु परिच्छिन्नस्यापि परमाणोरस्ति नित्यत्वमिति चेन्न तन्नित्यत्वे प्रमाणाभावात् "सर्वगतश्च नित्यः" इति "यो वै भूमा तदमृतम्" इति श्रवणादपरिच्छिन्नस्यैव भूम्नो नित्यत्वं न तु परिच्छिन्नस्य। "यदल्पं तन्मर्त्यम्" इति श्रुतेः। शरीरिणः ब्रह्मादिस्तम्बपर्यन्तानि शरीराण्युपलब्धिस्थानत्वेनास्य सन्तीति शरीरी सर्वप्राणिशरीरोपाधिकस्तस्य आत्मा त्वेक एवेत्यात्मैकत्वे इदं भगवद्वचनं प्रमाणं यतः शरीरिण इ-त्यात्मैकत्वमिमे देहा इतीदमा निर्दिश्यमानानां देहानामनेकत्वं च वक्ति शरीरिणः सर्वशरीरेष्वहमित्युपल-भ्यमानस्य नित्यस्यात्मनः। इमे उभयत्र सेनयोर्दृश्यमाना भीष्मादिशब्दवाच्या उक्ताः 'आचार्याः पितरः पुत्राः' इत्यादिना त्वयोक्ता देहाः सर्वे अन्तवन्तः अन्तोऽवसानमदर्शनं तद्वन्तः जन्मादिमत्त्वेन प्रतीतिमात्र-त्वेन चानियतसत्ताका इति यावत्। नहि शुक्तिरजतवदधिष्ठानभ्रमकल्पितानां देहादीनां सत्ता सम्भवति प्र-माणतो गृह्यमाणे यतोऽसतः सत्ताभावः प्रदर्शितः। 'नासतो विद्यते भावः' इति ततस्त्वमेवं देहादीनाम-न्तवत्त्वं देहिनस्त्वात्मनो नित्यत्वं च सम्यक् अविज्ञाय पूर्वं मदीया एते म्रियन्त इति शोचितवानसि। इ-दानीं श्रुतियुक्त्यनुभवैर्विचार्यमाणे आत्मनो देहानां चाऽशोच्यत्वं सिद्धमनुभूतं च त्वया यस्मात् तस्मात् हे भारत विवेकविज्ञानसम्पन्न! युध्यस्व युद्धाय यतस्वेति पूर्वमेव युद्धाय प्रवृत्तमर्जुनं भ्रान्त्या शोचन्तं तच्छो-कमूलमपनीय स्वकार्यं कुर्वित्यनुजानीते भगवान् बुभुक्षुं शङ्कितं शङ्कामपास्य भुङ्क्ष्वेतिवत् ननु युद्धं कुर्विति नियुक्ते ज्ञानकाण्डे कर्मविधेरनुपयुक्तत्वान्नहि कर्मणि कर्मारम्भ इति कर्मणि कर्मान्तरस्यैवानुपयुक्तत्वे किं वक्त-व्यं स्वप्रतिपक्षे ज्ञानप्रकरणे कर्मविधेरनुपयुक्तत्वं प्रयास्यन्तं प्रयाहीतिवत् योत्स्यन्तं युध्यस्वेत्यनुमतिमात्रं भ-गवतो वचनस्य तात्पर्यम्। यद्वा "एतं वैतमात्मानं विदित्वा ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति ब्रह्मविदां ब्राह्मणानां सर्वेषणाभ्यो व्युत्थितवतां शरीरयात्रार्थं भिक्षाविधिः श्रूयते। ज्ञानिनामप्यवश्यं शरीर-

यात्रायां वर्तितव्यमिति तद्वदत्रापि ब्रह्मविदां प्राणत्राणमवश्यं कर्तव्यमिति सूचयितुं ज्ञानप्रकरणे आत्मज्ञानिनोऽर्जुनस्य क्षत्रियत्वेन युवत्वेन च संन्यासवनस्थत्वयोरनुपपत्तौ राज्ञोऽस्य राज्येनैव शरीरयात्रा भवितव्या राज्यस्य पराक्रान्तत्वेन तज्जयाय यतस्वेति शरीरयात्रात्र भगवता विधीयते 'शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः' इत्यग्रे उच्यते च यतस्ततो न कश्चिदत्र कर्मविधिरिति मन्तव्यम् ॥ १८ ॥

श्री० टी०—आगमापायधर्मकं सन्दर्शयति—**अन्तवन्त इति**। अन्तो विनाशो विद्यते येषां ते अन्तवन्तः। नित्यस्य सर्वदैकरूपस्य शरीरिणः शरीरवतः। अत एव अनाशिनः विनाशरहितस्याप्रमेयस्यापरिच्छिन्नस्यात्मन इमे सुखदुःखादिधर्मका देहा उक्तास्तत्त्वदर्शिभिः। यस्मादेवमात्मनो न विनाशो नच सुखदुःखादिसम्बन्धस्तस्मान्मोहजं शोकं त्यक्त्वा युद्ध्यस्व। स्वधर्मं मात्याक्षीरित्यर्थः ॥ १८ ॥

स० टी०—नासतो विद्यते भाव इत्येतद्विवृणोत्यजः ॥ स्वप्नमायाशरीरादिवदेते कल्पिता जडाः ॥ १ ॥ देहा विनाशिनः सर्वे देवतिर्यङ्नरादयः ॥ नित्यस्यानाशिनोऽध्यस्तदेहयुक्तस्य चात्मनः ॥ २ ॥ दृश्यत्वेन दृशः प्रोक्ताः श्रुतिभिर्ब्रह्मवादिभिः ॥ नित्यत्वस्य च नाशस्य द्विविधत्वात्तयोर्यथा ॥ ३ ॥ भस्मीभूतो मृतो देहो नष्टश्चादर्शनं गतः ॥ तद्व्यावृत्त्यर्थमत्रोक्तं नित्यस्येति शरीरिणः ॥ ४ ॥ यथाव्याध्यादिभिर्युक्तो देहो नष्ट इतीर्यते ॥ तन्निवृत्त्यर्थमत्रोक्तमनाशिन इति स्फुटम् ॥ ५ ॥ अन्यथा परिणाम्येव नित्यः क्षित्यादिवद्भवेत् ॥ नित्यः कूटस्थ आत्मेति सिद्धमित्याशयो हरेः ॥ ६ ॥ नन्वेतादृशचिद्रूपे मानमस्ति न वास्ति चेत् ॥ भास्यत्वेन जडत्वं स्यात्तर्ह्यस्यापि घटादिवत् ॥ ७ ॥ नास्ति चेत्तर्ह्यलीकत्वं खपुष्पादेरिवास्य च ॥ इत्यत्राहाप्रमेयस्यापरिच्छेद्यस्य वस्तुनः ॥ ८ ॥ स्वप्रकाशस्य चिद्धातोर्मानापेक्षा स्वभासने ॥ नास्ति सर्वावभासस्य मानं तेनावभास्यते ॥ ९ ॥ स्वभानार्थं स्वभास्यस्यापेक्षा नैवोपपद्यते ॥ स्वप्रकाशस्वभावस्य मानाभावेपि न क्षतिः ॥ १० ॥ मानाभावे ह्यलीकत्वनियमोऽस्ति जडे क्षरे ॥ अन्यथा स्यादलीकत्वं मानस्याप्यवभासिनः ॥ ११ ॥ मातृमानप्रमेयाणां यौगपद्येन भासकः ॥ साक्षी तत्र प्रमाणस्याकाङ्क्षा स्यादित्यहो भ्रमः ॥ १२ ॥ प्रमाणमप्रमाणं वा प्रमाभासस्तथैव च ॥ कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः ॥ १३ ॥ इत्युक्तं सम्प्रदायज्ञैर्वार्तिके श्रीसुरेश्वरैः ॥ ननु व्यर्थस्तदा शास्त्रारम्भो मानानपेक्षणे ॥ १४ ॥ शास्त्रयोनित्वसूत्रस्य वैयर्थ्यं चेति चेन्नहि ॥ कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थमपेक्ष्यते ॥ १५ ॥ कल्पितं मानमेतेन स्वप्रकाशस्य का क्षतिः ॥ कल्पितस्यैव साजात्या कल्पितस्य विरोधिता ॥ १६ ॥ विरुद्धयोरधिष्ठानभूतस्य न विरोधिता ॥ तथा च कल्पितस्यैवाज्ञानादेर्विनिवर्तकः ॥ १७ ॥ वृत्तिभेदस्तदुत्पत्त्यै शास्त्रारम्भोऽपि सार्थकः ॥ तस्य तत्त्वमसीत्यादिवाक्याधीनतयैव च ॥ १८ ॥ शास्त्रयोनित्वसार्थक्यं तस्मात्संवित्सुखात्मनः ॥ सर्वदा भासमानत्वात्स्वतः सिद्धस्य भास्वतः ॥ १९ ॥ सर्वाधिष्ठानभावेन तुच्छत्वं च निराकृतम् ॥ यस्मात्पूर्वोक्तरीत्यास्ति चिदात्मा व्यापकोऽच्युतः ॥ २० ॥ सर्वदैकरसो नित्यस्ततस्तन्नाशशङ्कया ॥ स्वधर्मे प्राक्प्रवृत्तस्य युद्धे तस्मात्तवाधुना ॥ २१ ॥ न युक्तोपरतिस्त्वेवमाह युद्धाभ्यनुज्ञया ॥ युद्ध्यस्वेति विधिर्नायं पूर्वप्राप्तानुवादतः ॥ २२ ॥ १८ ॥

भा० टी०—किं पुनस्तदसदित्याकाङ्क्षायामाह—**अन्तवन्त इति**। ननु स्फुरणरूपस्य सतः कथमविनाशित्वं तस्य देहधर्मत्वाद्देहस्य चानुक्षणविनाशित्वादिति भूतचैतन्यवादिनः। तान्निराकुर्वन्नासतो विद्यते भाव इत्येतद्विवृणोति इति तु नत्वेत्यादिना देहात्मविवेकस्योक्तत्वमभिप्रेत्याचार्यैर्नावतारितम्। अन्तस्तत्त्वज्ञानेन बाधो येषां विद्यते ते अन्तवन्तः यथाशुक्त्यादिज्ञानेन शुक्तिरूप्यादयो बाध्याः। तथा इमे भ्रान्त्या प्रतीयमाना देहाः स्थूलादयो नित्यस्याबाध्यस्याध्यासिकसम्बन्धेन कारणादिशरीरवतः। देहा इति सकारणस्य शी-

तादेरप्युपलक्षणम्। देहानेकत्वाद्बहुवचनम्। पृथिव्यादिवत् व्यावहारिकनित्यत्वमाशङ्क्याह—**अनाशिन इति**। परमार्थनित्यस्य विद्वद्भिरुक्ताः अप्रमेयस्य रूपादिरहितत्वात् व्याप्तिग्रहाभावात्। सदृशस्यान्यस्यानिरूपणात् प्रवृत्तिनिमित्ताभावात्। तेन विनानुपपद्यमानस्याभावात् अभावत्वाभावात् प्रत्यक्षादिभिरपरिच्छेद्यस्य। अथवाऽज्ञाते हि वस्तुनि प्रमाणान्वेषणा भवति ज्ञातश्चात्मा देहाद्भिन्नः सर्वैः प्राणिभिः योऽहं बाल्ये पितरावन्वभूवं स एव नप्तॄननुभवामीत्यनुसन्धानदर्शनात्। स्वप्ने देवादिशरीरमास्थाय तदुचितान् भोगान् भुक्त्वा प्रबुद्धो मनुष्यदेहं प्राप्य मनुष्य एवाहं न तु देव इति देवशरीरे बाध्यमानेऽपि अहमास्पदस्यात्मनोऽबाध्यमानत्वाच्च योगमाहात्म्येन सिंहादिशरीरभेदेऽप्यात्मनो भेदेन ज्ञातत्वाच्च तथा इन्द्रियेभ्योपि भिन्न आत्मा सर्वैर्ज्ञायते। योहमद्राक्षं स एवेदानीं शृणोमीत्यहमालम्बनस्य प्रत्यभिज्ञानात्। बुद्धिमनोभ्यामपि भिन्नः तयोः करणत्वेन कर्तृत्वाश्रयत्वायोगात्। अहं कृश इत्यादिप्रत्ययस्तु प्रेमास्पदे पुत्रादौ विकलेऽहमेव विकल इत्यादिप्रत्ययवदुपपद्यते। तस्मादात्मनो ज्ञातत्वान्न प्रमाणपरिच्छेद्यता। ननु कथं शास्त्रस्य प्रत्यगात्मनि प्रामाण्यम् तस्य स्वतः सिद्धस्य ज्ञातत्वेनाविषयत्वादिति चेत् सत्यम्। तथापि शास्त्रस्यात्माध्यस्तसमूलकर्तृत्वाद्यनात्मधर्मनिरासकत्वेन प्रामाण्यमुपपद्यते। तथा च भाष्यम्—"नहि पूर्वमित्थमहमित्यात्मानं प्रमाय पश्चात्प्रमेयपरिच्छेदाय प्रवर्तते। नह्यात्मा नाम कस्यचिदप्रसिद्धो भवति। शास्त्रं त्वन्त्यं प्रमाणम्। अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते न त्वज्ञातार्थज्ञापकत्वेन" तथा च श्रुतिः "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा" इति यस्मादात्मा नित्यः केनापि क्वचिदपि कदापि न नश्यति देहाश्चानित्यत्वान्नश्यन्त्येव तस्माद्धे भारत भरतवंशोद्भव! त्वं युध्यस्व स्वधर्मं युद्धं मा त्याक्षीरित्यर्थः ॥ १८ ॥

प० टी०—अथ यदर्थमिहोपक्रमस्तदाह—**अन्तवन्त इति**। नित्यस्य सर्वदैकस्वभावस्यात एवानाशिनोऽप्रमेयस्यापरिच्छिन्नस्य शरीरिणः शरीरावच्छिन्नस्य परमात्मनः सुखदुःखयोनयो देहास्तत्त्वदर्शिभिरन्तवन्तः क्षणभङ्गुरा उक्ता घटान्तर्गताकाशस्य घटा इव। एकस्यैव बहुभिः स्वरूपैर्नटतो नटस्येवेत्यर्थः। यस्मादेवं तस्माद्भीष्मद्रोणादिवधविषये विगतज्वरो भूत्वा युद्धयस्व युद्धं कुरुष्व। यद्वा इमे स्वप्नावस्थायामनुभूयमाना उच्चावचदेहा अन्तवन्तो जागृदवस्थायां नश्वरा उक्ता वेदेन प्रतिपादिताः सन्ति। कस्याशरीरिणस्तत्तच्छरीरावस्थेन तत्तद्भोगान् भुञ्जानस्यात्मनो नित्यस्यावस्थात्रयेऽप्यनुस्यूतस्य। शेषं पूर्ववत्। तदुक्तम्—'सुखं तल्पगतो येन स्वप्नदेहेन दिक्तटान॥ परिभ्रमसि हे राम स देहस्ते क्व सम्प्रति॥' श्रुतिरपि शातपथी—"अथैतत्स्वप्नया चरति ते हास्य लोकास्तदुतेव महाराजा भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति" इति। भाष्यम्—"स्वप्नया स्वप्नावस्थया चरति व्यवहरति तस्यात्मनो लोका भोगस्थानानि।" शेषं स्पष्टम्। तदुक्तम्—'स्वप्ने यथा पश्यति देहमीदृशम्' इत्यादि ॥ १८ ॥

रा० टी०—ननु "रूपंरूपं प्रतिरूपो बभूव" इति श्रुतेः जीवः प्रतिबिम्बः। प्रतिबिम्बश्चोपाधिकृतः प्रतिमुखमिव दर्पणोपाधिकृतम्। देह एवात्र जीवोपाधिर्नान्योस्ति। तथाच जीवचेतना न नित्याः। नाशवद्देहोपाधिकत्वात्। दर्पणोपाधिकप्रतिमुखवत्। नश्वरबिम्बोपाधिसन्निधिकत्वात्। नश्वरमुखदर्पणसान्निधिकप्रतिमुखवदिति प्रतिपक्षप्रस्तमनादिनित्यत्वानुमानमित्यत आह—**अन्तवन्त इति**। एकवचनं बहुवचनार्थे। शरीरिणां नित्यानामिमे परिदृश्यमानाः भौतिकाः देहाः अन्तवन्तः विनाशिन इति योजना। इम इति विशेषणादन्येन्तहीना अपि देहाः सन्तीति सूच्यते। तत एवोपाधयो जीवानां नान्तवद्भौतिकदेहा इत्याद्यप्रतिपक्षे हेतुरसिद्धः। अत एव नित्यस्येति साध्योक्तिः। जीवाः नित्याः नित्योपाधिकत्वात्। व्यतिरेकेण प्रतिमुखवदित्युक्तं भवति। नित्यस्येत्येवोक्तावीश्वरस्यापि देहोन्तवानिति प्राप्नोतीत्यतः शरीरिण इति विशेषणम्। द्वितीयहेतुरप्यसिद्ध इत्याह—**अनाशिन इति**। बिम्बोपाधिसन्निधिनाशकृतनाशहीनस्य शरीरिण इत्यन्वयः। जीवाः नित्याः

नित्यबिम्बोपाधिसन्निधिकत्वात् । व्यतिरेकेण प्रतिमुखवदित्युक्तं भवति । ननूपाधेर्नित्यत्वेपि परिच्छिन्नपरिमाणस्यैव वस्तुनो बिम्बत्वयोग्यत्वात्परिच्छिन्नयोश्च बिम्बोपाध्योः सन्निधेः दर्पणमुखसन्निधेरिव कादाचित्कत्वनियमात्कथं तस्य नित्यतेत्यत आह—अप्रमेयस्येति । प्रमा परिमितिः अपरिच्छिन्नस्येत्यर्थः । सर्वगतस्येति यावत् । जीवे सर्वगतत्वस्याभावादतद्भावे सामानाधिकरण्यं सारूप्यं गमयतीति सिंहश्चैत्र इत्यादौ प्रसिद्धेः सर्वगतेश्वरसरूपस्येत्यर्थः । तत्प्रतिबिम्बस्येतियावत् । सर्वगतेश्वरप्रतिबिम्बस्य कथं बिम्बसन्निधिनाशेन नाशः स्यादिति भावः । नच सर्वगतस्य प्रतिबिम्बत्वायोगः । तत्सारूप्यस्यैव प्रतिबिम्बताशब्दार्थत्वात् । तदाह सूत्रकारः । "यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" इति । उपसंहरति—तस्मादिति । बिम्बोपाधितत्सन्निधीनां नाशाभावेन तन्नाशप्रत्युक्तनाशस्य जीवचेतने अनाशङ्क्यत्वेन प्रतिपक्षानुत्थानात् । नत्वेवाहमित्यत्रोक्तानादिनित्यत्वानुमानेन जीवस्य नित्यत्वात् । जीर्णदेहहानेपि समीचीनदेहान्तरलाभरूपप्रतिनिधिना समाधानसम्भवात् । बन्धुदेहस्पर्शनदर्शनाद्यभावनिमित्तशोकस्य च परमपुमर्थहेत्वभिमानत्यागेन निवर्तितुं शक्यत्वात् । भगवत्पूजार्थं हे भारत ! युध्यस्वेति । नन्वेतदयुक्तम् । जीवेश्वरयोर्नित्यत्वाविशेषात् कुत ईश्वरस्य पूज्यतेत्यतो वा जीवाद्धरेर्विशेषं वक्तुं अविनाशि तित्यादि श्लोकद्वयं प्रवृत्तम् । तथाहि । येन भगवता इदं जगत् कालः गुणजातं ततं व्याप्तम् । कालतो गुणतो देशतश्च यद्विष्ण्वाख्यं ब्रह्म ततिमत्तद्विष्ण्वाख्यं ब्रह्माविनाशि । तुर्विशेषे । 'अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता । नाशश्चतुर्विधः प्रोक्तस्तदभावो हरेः सदा' इत्युक्तादिशा चतुर्विधनाशहीनमिति विद्धि जानीहीत्यर्थः । विनाशमित्यादिप्राग्वद्व्याख्येयम् । वर्णावकाशादेर्देशकालाभ्यां व्याप्तत्वेपि न गुणतः सास्ति । जीवस्य कालतस्ततत्वेपि न देशगुणाभ्यां ततिरस्तीति हरेस्ततत्वे विशेषः । अस्त्वेवं हरेः सर्वप्रकारेण विनाशाभावः । तावता जीवाद्विनाशविषये को हरेर्विशेष इत्यत आह—अन्तवन्त इति । शरीरिणां शीर्यमाणदेहवतां संसारिणामिति यावत् । स्वरूपतो नित्यानां जीवानामिमे देहाः अन्तवन्तो विनाशवन्तो जनिमन्तश्चेत्यपि ग्राह्यम् । संसारिदेहाः आद्यन्तवन्त इत्युक्त्या मुक्तदेहो नैवमिति लाभान्मुक्तेश्वरस्य हरेः कैमुत्यसिद्धो नित्यदेहः । एवं चोत्पत्तिविनाशवद्देहवतां च दुःखप्राप्तिः अवर्जनीयैव । गुणतोऽपूर्णता व्यक्तैवेति । स्वरूपतो नित्यत्वेपि त्रिविधनाशवत्त्वाज्जीवस्य ततो हरेश्चतुर्विधनाशहीनस्यास्ति महान्विशेष इति तत्पूजा कार्येत्युपसंहरति—अनाशिन इति । तस्माज्जीवेभ्योतिशयवत्त्वात् । अनाशिनश्चतुर्विधनाशहीनस्याप्रमेयस्य देशकालगुणापरिच्छिन्नस्य हरेः पूजार्थं युध्यस्वेति । किञ्च न केवलं सर्वप्रकारेणाविनाशित्वात्तत्पूजा कार्येति किंतु सर्वथैवाविनाशित्वात्स एव स्वतन्त्रः । ततश्च तदधीनत्वान्मुक्तेः युद्धादिस्वकर्मणाराधितश्च मोक्षं ददातीत्यतस्तत्पूजा कार्येति भावेन चोक्तमनाशिनोऽप्रमेयस्येति ॥ १८ ॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ॥
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

त०टी०—एवमात्मनोऽविनाशित्वे सिद्धे गुरून् हत्वेत्यादिना आत्मनो गुर्वादिहन्तृत्वकल्पनं तेऽज्ञानमेवेत्याह—यइति । यः पुरुष एनमुक्तविधं शरीरिणं हन्तारं हननक्रियायाः कर्तारमयं मम हन्तेति वेत्ति जानाति यश्चान्य एनं हतं हननक्रियायाः कर्मभूतं हतोऽयं मयेति मन्यते तावुभौ न विजानीतः आत्मस्वरूपानभिज्ञावित्यर्थः । यतो नायं हन्ति न हन्यते हननक्रियायाः कर्ता कर्म वा न भवतीत्यर्थः ॥ १९ ॥

म० टी०—नन्वेवमशोच्यानन्वशोचस्त्वमित्यादिना भीष्मादिबन्धुविच्छेदनिबन्धने शोकेऽपनीतेपि तद्वधकर्तृत्वनिबन्धनस्य पापस्य नास्ति प्रतीकारः । नहि यत्र शोको नास्ति तत्र पापं नास्तीति नियमः । द्वे-

ष्यत्राह्मणवधे शोकाविषये पापाभावप्रसङ्गात् । अतोहं कर्ता त्वं प्रेरक इति द्वयोरपि हिंसानिमित्तपातकापत्तेरयुक्तमिदं वचनं तस्माद्युध्यस्व भारतेत्याशङ्क्य काठकपठितया ऋचा परिहरति भगवान्—**य एनमिति ।** एनं प्रकृतं देहिनमदृश्यत्वादिगुणकं यो हन्तारं हननक्रियायाः कर्तारं वेत्ति अहमस्य हन्तेति विजानाति यश्चान्य एनं मन्यते हतं हननक्रियायाः कर्मभूतं देहहननेन हतोहमिति विजानाति तावुभौ देहाभिमानित्वादेनमविकारिणमकारकस्वभावमात्मानं न विजानीतो न विवेकेन जानीतः शास्त्रात् कस्मात् यस्मात् 'नायं हन्ति न हन्यते' कर्ता कर्म च न भवतीत्यर्थः । अत्र य एनं वेत्ति हन्तारं हतं चेत्येतावति वक्तव्ये पदानामावृत्तिर्वाक्यालङ्कारार्था । अथवा य एनं वेत्ति हन्तारं तार्किकादिरात्मनः कर्तृत्वाभ्युपगमात् तथा 'यश्चैनं मन्यते हतम्' चार्वाकादिरात्मनो विनाशित्वाभ्युपगमात् तावुभौ न विजानीत इति योज्यम् । वादिभेदख्यापनाय पृथगुपन्यासः । अतिशूरातिकातरविषयतया वा पृथगुपदेशः । " हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ' इति पूर्वार्धे श्रौतः पाठः ॥ १९ ॥

शं० टी०—यत्तु 'पापमेवाश्रयेदस्मान्' इति 'सङ्करो नरकायैव कुलघ्नानाम्' इति 'कथं भीष्ममहं संख्ये' इत्यात्मनः पापक्रियाविषयत्वं तत्फलभोक्तृत्वं तत्क्रियाकर्तृत्वं च मन्यसे तदात्मस्वरूपाज्ञानकृतमेव भवति सत्यात्मतत्त्वे परिज्ञातेन कस्यापि विकल्पस्यावकाशोस्तीत्यात्मयाथात्म्यमवगमयितुं तत्प्रकाशनपरौ मन्त्रावर्थतः पठति । तत्राद्येनात्मनः क्रियाश्रयत्वं तद्विषयत्वं च यो मन्यते स श्रुतवेदान्तोपि मूढ एवेत्याह—**य एनमिति ।** यस्त्वहमिमं हन्मीत्यहंप्रत्ययार्थमेनं प्रकृतमात्मानं हन्तारं हननक्रियायाः कर्तारं मन्यते योऽहमनेन हतोस्मीत्येनमात्मानं परेण हतं तद्धननक्रियाया विषयभूतं च मन्यते एवमात्मानं हननक्रियाया आश्रयं विषयं च मन्यमानौ तौ उभौ पुरुषावात्मानं न विजानीतः यथाभूतमात्मतत्त्वं साक्षान्न विदितवन्तौ यतोऽयमात्मा न स्वयं यं च कंचन हन्ति येन केनापि न हन्यते देहेन्द्रियादिषु व्याप्रृतेषु सत्स्वयमात्मा चलितेपि च वृक्षे तदन्तस्थ आकाश इव कूटस्थासङ्गचिद्रूपेण सर्वत्रोदासीनतया तूष्णीमास्त इत्यर्थः । " न तदश्नाति किंचन न तदश्नाति कश्चन" इति श्रुतेः । आत्मा निष्क्रिय एव भवति निरवयवत्वादाकाशवदित्यादियुक्तिभिः "निष्कलं निष्क्रियं शान्तम्" इति " साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रुतिभिश्चात्मा निष्क्रिय एवेति श्रुत्वा मत्वा च स्वं कर्तारं भोक्तारं सुखिनं च दुःखिनं च यो मनुते नासावात्मतत्त्वं विजानाति अपि तु तस्य श्रवणादिक्रिया मृतप्रस्वाः प्रसवक्रियावच्छ्रमैकफलैवेति सूचितं भवति ॥ १९ ॥

श्री० टी०—तदेवं भीष्मादिमृत्युनिमित्तः शोको निवारितः । यच्चात्मनो हन्तृत्वनिमित्तं दुःखमुक्तम् एतान्न हन्तुमिच्छामीत्यादिना तदपि तद्वदेव निर्निमित्तमित्याह—**य एनमिति ।** एनमात्मानम् । आत्मनो हननक्रियायां कर्मत्वं कर्तृत्वमपि नास्तीत्यर्थः । तत्र हेतुः—नायमिति ॥ १९ ॥

स० टी०—ननु त्वदुक्तरीत्येत्थं मास्तु शोकस्तथापि मे ॥ भीष्मादिवधकर्तृत्वनिमित्तैनो दुरुद्धरम् ॥ १ ॥ कर्ताहं प्रेरकस्त्वं च हिंसायां पातकं द्वयोः ॥ युद्ध्यस्वेति वचस्तस्मादयुक्तमिति चेच्छृणु ॥ २ ॥ य एनं देहिनं शुद्धमक्रियं निष्कलं परम् ॥ हननाख्यक्रियायाश्च कर्तारं वेत्ति मूढधीः ॥ ३ ॥ अस्य हन्ताहमित्येवं यश्चैनं मन्यते हतम् ॥ हतोऽहं तत्क्रियायाश्च कर्मेत्येवं हि तावुभौ ॥ ४ ॥ देहाभिमानिनावेनं न जानीतो विवेकतः ॥ यतोऽयं तत्क्रियाया नो कर्ता नैवास्ति कर्म वा ॥ ५ ॥ कर्मैनं वेत्ति चार्वाको देहमात्रात्मविज्जडः ॥ बुद्ध्यादिगुणमात्मानं कर्तारं वेत्ति तार्किकः ॥ ६ ॥ इत्थं वादिभिदा सम्यक्ख्यापनाय पृथक्पुनः ॥ उपन्यासः पदानां वा शूरादिख्यापनाय वा ॥ ७ ॥ अतश्चार्वाककाणादपक्षं त्यक्त्वातिदूरतः ॥ वेदान्तमतमाश्रित्य युद्ध्यस्वेत्याशयो हरेः ॥ ८ ॥ १९ ॥

भा० टी०—अहमेतेषां हन्ता मयैते हन्यन्तइत्यर्जुनबुद्धेर्मृषात्वबोधनाय ऋचावुदाहरति—**य इति** । यत्तु 'नन्वेवमशोच्यानित्यादिना बन्धुविच्छेदनिबन्धने शोकेऽपनीतेऽपि तद्वधकर्तृत्वनिबन्धनपापस्य नास्ति प्रतीकारः शोकाविषयेऽपि द्वेष्यब्राह्मणवधे पापस्य सत्वात् । अतः कर्तुर्मम प्रेरकस्य तव च हिंसानिमित्तपापापत्तेरयुक्तमिदं वचनं तस्मादित्यादीत्याशङ्कां काठकपठितया ऋचा परिहरति—यइति' तद्विचार्यम् । ऋचि हन्त्रादेः पापं न जायते इति परिहारस्यानुक्तेः । वधनिबन्धनबन्धुविच्छेदस्यात्मनित्यत्वप्रतिपादकपूर्वग्रन्थेन नाशाभावोक्त्या प्रतिषिद्धत्वेन तन्निबन्धनपापस्यापि निवारितत्वात् शङ्काया अनुत्थानात् । यस्मादेवं प्रागुक्तन्यायेन नित्यो विभुरसंसारी सर्वदैकरूपश्चात्मा तस्मात्तन्नाशशङ्कया स्वधर्मे युद्धे प्राक्प्रवृत्तस्य तव तस्मादुपरतिर्न युक्तेति स्वपूर्वोक्तिविरोधात् । द्वेष्यब्राह्मणवधे शोकाभावे द्वेष्यत्वस्य हेतोः पापासाधकत्वेन दृष्टान्तस्य वैषम्यात् । सङ्घातवधनिबन्धनपापाभावस्याग्रिमग्रन्थेन क्षत्रधर्मबोधकेन वक्ष्यमाणत्वाच्च । नत्वेवाद्येकोनविंशतिश्लोकैरशोच्यानन्वशोचस्त्वमित्येतस्य विवरणं क्रियते स्वधर्ममपि चावेक्ष्येत्यष्टभिः श्लोकैः । प्रज्ञावादांश्च भाषस इत्यस्य मोहद्वयस्य पृथक्प्रयत्ननिराकर्तव्यत्वादिति स्वपूर्वग्रन्थविरोधाच्चेत्यास्तां तावत् । य एनमात्मानं हननक्रियायाः कर्तारं यश्च तस्याः कर्म जानाति तौ द्वौ देहात्मबुद्धिमत्त्वेन भ्रान्तौ न विजानीतः । यतोऽयमात्मा देहभिन्नोऽविक्रियत्वात् । हननक्रियायाः कर्ता तत एव कर्म च न भवतीत्यर्थः ॥ १९ ॥

प० टी०—अथ एतान्न हन्तुमिच्छामीत्यादिना यच्चात्मनो हन्तृत्वनिमित्तं दुःखमुक्तं तदपि निर्निमित्तमित्याह—**य एनमिति** । एवमात्मनो हननक्रियायां कर्मत्वं कर्तृत्वमपि नास्ति । यद्वद्धटेनैव घटस्फोटने तदन्तर्गताकाशस्य कर्मकर्तृभावो नास्ति । तत्र हेतुमाह—**नायमिति** ॥ १९ ॥

रा० टी०—ननु यदुक्तं जीवचैतन्यस्य नित्यत्वं यच्चोक्तं सर्वथैकप्रकारेणाविनाशित्वादीश्वरः स्वतन्त्रः अनिच्छया देहनाशात्तन्निमित्तदुःखवत्त्वाच्च जीवः परतन्त्र इति । तज्जीवनित्यत्वपारतन्त्र्ये न युक्ते । हन्तायमस्य हतश्चायमिति हननादिक्रियायाः जीवे तत्र स्वातन्त्र्यस्य च प्रतीतेरित्यत आह—**य इति** । यः पुमानेनं जीवं हन्तारं जीवान्तरस्य स्वातन्त्र्येण घातकं वेत्ति यश्चैनं केनचित्स्वातन्त्र्येण हतं मन्यते तावुभौ जीवस्याऽनित्यत्वज्ञानी हननादिक्रियायां जीवस्वातन्त्र्यज्ञानी चेत्युभौ न विजानीतः । जीवनित्यत्वभगवत्स्वातन्त्र्याज्ञानिनौ भ्रान्ताविति यावत् । कुतो बाधकाद्भ्रान्तित्वकल्पनेत्यत आह—**नायमिति** । बिम्बनित्यत्वोपाधिनित्यत्वबिम्बसन्निधिनित्यत्वानादित्वरूपोक्तहेतुभ्यो नायं हन्ति जीवम् । न हन्यते च जीवः । प्रतिबिम्बत्वादेव हेतोर्न स्वतन्त्रः कश्चन हन्तीत्यर्थः । अतो बाधकाद्भ्रान्तित्वमिति भावः । अत्र हननक्रिया जीवक्रियान्तरोपलक्षणम् । सर्वत्र तस्यास्वातन्त्र्यादिति । एनमीश्वरं जीवचेतनस्य हन्तारं यो मन्यते सोपि भ्रान्त एव । चेतनहननस्येश्वरेणाकरणादित्यपि योजना तात्पर्योक्ता ॥ १९ ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ॥
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥

त० टी०—हननक्रियायाः कर्ता कर्म वाऽयं कुतो न भवतीत्यपेक्षायां जन्मादिषड्विक्रियारहितत्वादित्याह—**नेति** । अयं पुरुषो न जायते नोत्पद्यते । वाशब्दश्चार्थे । न चायं कदाचिन्म्रियते । तत्कुतो यस्मान्नायं भूत्वा भविता वा न भूयः । अयमात्मा पूर्वं भूत्वा पश्चान्न भवितेति । न यो हि अभूत्वा भविता स उत्पद्यते यश्च प्राग्भूत्वा भूयो न भविता स म्रियते इत्युच्यते अयं तु प्रागपि सत्त्वान्नोत्पद्यते उत्तरकालेऽपि सत्त्वान्न म्रियते । यतो न जायतेऽतोऽजो, न म्रियतेऽतो नित्यः, इति द्वाभ्यां पदाभ्यां जन्ममरणलक्षणे विक्रिये निरस्ते । अस्तित्वलक्षणविकारवारणायाह । शाश्वत इति । सनातनः प्राकृतवत्सदसत्परि-

णामशून्य इत्यर्थः। वृद्धिलक्षणविक्रियावारणाय पुराण इति। पुरापि नव एव। यो हि सावयवः सोऽवयवोपचयाद्वर्द्धते अयं तु निरवयवो ज्ञानैकस्वरूपत्वान्न वर्द्धते इत्यर्थः। परिशिष्टौ परिणामापक्षयौ जन्ममरणास्तित्ववृद्ध्यभावादेव निरस्तौ। एवं षड्विकारशून्य आत्मा शरीरे हन्यमाने सति न हन्यते। शरीरमेव हननक्रियायाः कर्मभूतमित्यर्थः॥ २०॥

म० टी०—कस्मादयमात्मा हननक्रियायाः कर्ता कर्म च न भवति अविक्रियत्वादित्याह द्वितीयेन मन्त्रेण—**न जायत इति**। "जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते विनश्यतीति षट् भावविकारा इति वार्ष्यायणिः" इति नैरुक्ताः। तत्राद्यन्तयोर्निषेधः क्रियते न जायते म्रियते वेति। वाशब्दः समुच्चयार्थः। न जायते न म्रियते चेत्यर्थः। कस्मादयमात्मा नोत्पद्यते यस्मादयमात्मा कदाचित् कस्मिन्नपि काले न भूत्वा अभूत्वा प्राक् भूयः पुनरपि भविता न योह्यभूत्वा भवति स उत्पत्तिलक्षणां विक्रियामनुभवति। अयं तु प्रागपि सत्त्वाद्यतो नोत्पद्यतेऽतोऽजः तथायमात्मा भूत्वा प्राक् कदाचित् भूयः पुनः न भविता न वा शब्दाद्वाक्यविपरिवृत्तिः। यो हि प्राग्भूत्वा उत्तरकाले न भवति स मृतिलक्षणां विक्रियामनुभवति अयं तु उत्तरकालेपि सत्त्वाद्यतो न म्रियतेऽतो नित्यः विनाशायोग्य इत्यर्थः। अत्र न भूत्वेत्यत्र समासाभावेऽपि नानुपपत्तिः नानुयाजेष्वितिवत्। भगवता पाणिनिना महाविभाषाधिकारे नञ्समासपाठात्। यत्तु कात्यायनेनोक्तं समासनित्यताभिप्रायेण 'वावचनानर्थक्यं तु स्वभावसिद्धत्वात्' इति तद्भगवत्पाणिनिवचनविरोधादनादेयम्। तदुक्तमाचार्यशबरस्वामिना 'असद्वादी हि कात्यायनः' इति। अत्र न जायते म्रियते वेति प्रतिज्ञा कदाचिन्नायं भूत्वा भविता वा न भूय इति तदुपपादनम्—**अजो नित्यइति**। तदुपसंहार इति विभागः। आद्यन्तयोर्विकारयोर्निषेधेन मध्यवर्तिविकाराणां तद्व्याप्यानां निषेधे जातेपि गमनादिविकाराणामनुक्तानामप्युपलक्षणायापक्षयश्च वृद्धिश्च स्वशब्देनैव निराक्रियते। तत्र कूटस्थनित्यत्वादात्मनो निर्गुणत्वाच्च न स्वरूपतो गुणतो वाऽपक्षयः सम्भवतीत्युक्तम्—**शाश्वत इति**। शश्वत्सर्वदा भवति नापक्षीयते नापचीयत इत्यर्थः। यदि नापक्षीयते तर्हि वर्धतामिति नेत्याह—**पुराण इति**। पुरापि न (भ) व एकरूपो नत्वधुना नूतनां काञ्चिदवस्थामनुभवति। यो हि नूतनां काञ्चिदुपचयावस्थामनुभवति स वर्धत इत्युच्यते लोके। अयं तु सर्वदैकरूपत्वान्नापचीयते एवेत्यर्थः। अस्तित्वविपरिणामौ तु जन्मविनाशान्तर्भूतत्वात्पृथङ्न निषिद्धौ। यस्मादेवं सर्वविकारशून्य आत्मा तस्माच्छरीरे हन्यमाने तत्सम्बन्धोऽपि केनाप्युपायेन न हन्यते न हन्तुं शक्यत इत्युपसंहारः॥ २०

शं० टी०—तर्ह्यात्मतत्त्वं कथम्भूतमित्याकाङ्क्षायां यास्कपठितजन्मादिषड्भावविकाररहिततया कूटस्थासङ्गचिद्रूपत्वमेवात्मनः स्वाभाविकं तत्त्वमित्यात्मतत्त्वनिर्धारणाय द्वितीयं मन्त्रं पठति—**न जायत इति**। अत्र कदाचिच्छब्दः कदाचिन्न जायते कदाचिन्न म्रियत इति सर्वत्र सम्बध्यते। वाशब्दौ चार्थौ भवतः। अत्राज इत्यजत्वेनैव सर्वविकारासम्भवे प्राप्तेपि स्वयं श्रुतिः कण्ठरवेण प्रत्येकं तान्निषेधति आत्मनो निर्विकारत्वज्ञानस्य निर्विचिकित्सत्वाय अजः यत्साक्षात्काराद्विद्वान् पुनर्न जायते सोजः स्वयं जननरहितो वाऽजोऽयमात्मा कदाचिन्न जायते निरवयवत्वान्नोत्पद्यते "निष्कलं निष्क्रियम्" इति "न चास्य कश्चिज्जनिता न चाधिपः" इति निरवयवत्वनिष्कारणत्वश्रवणादात्मनो जनिक्रिया नोपपद्यत इति भावविकारः प्रथमो निरस्तः। न म्रियते च तेनैव हेतुनाऽयमात्मा नाशक्रियां न प्राप्नोतीति षष्ठो विकारो निरस्तः। अयमात्मा भूत्वा जनिक्रियां प्राप्य भूयः पुनर्भविता चास्तित्वमात्र भवति घटवज्जन्मानन्तरभाव्यस्तित्वं न प्राप्नोति किंतु मृदिव जन्यनपेक्षितप्राक्तनसत्तावानेव भवतीति द्वितीयो विकारो निरस्तः। निरवयवत्वादात्मा नित्य एकरूप इति विपरिणामलक्षणश्चतुर्थो विकारो निरस्तः। एकरूपयैव सत्तया शश्वद्भवतीति शाश्वत इत्यपक्षयलक्षणः पञ्चमो विकारो निरस्तः। निरवयवत्वेनायं पुराप्यधुना च सर्वदा नवत्वात् पुराण इति वृद्धिलक्षणस्तृतीयो विकारो निरस्तः।

एवं षड्भिर्भावविकारैर्वर्जितत्वे प्रतिपादिते सत्यात्मनो नित्यकूटस्थासङ्गचिद्रूपत्वमाद्यन्तशून्यत्वमद्वितीयत्वं च सूचितं भवति। तथाप्यस्य श्रोतुर्देहनाशादात्मनाशभ्रमो न नष्ट इति मत्वा यत्र भ्रमस्तत्रैव पुमान् सम्यग्बोधनीय इति तस्य भ्रमं छेत्तुमाह—न हन्यत इति। अस्मिन् शरीरे खड्गादिना हन्यमाने छिद्यमाने सत्यप्यात्मा निर्विकारत्वात् स्वयं घटे भिद्यमाने घटाकाशवन्न हन्यते हननक्रियाया विषयो न भवति घटे नष्टे घटाकाशवद्देहे नष्टे सत्यात्मा स्वयं स्वरूपेणैव तिष्ठति। तथा च श्रुतिः "अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा" इति ॥ २० ॥

श्री० टी०—न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेन द्रढयति—नेति। न जायत इति जन्मप्रतिषेधः। न म्रियते चेति विनाशप्रतिषेधः। वाशब्दौ चार्थे। नचायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते। किंतु प्रागेव स्वतः सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वितीयविकारप्रतिषेधः। तत्र हेतुः यस्मादजः यो हि जायते स जन्मान्तरमस्तित्वं भजते नतु यः स्वयमेवास्ति स भूयोऽप्यन्यदस्तित्वं भजत इत्यर्थः। नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः। शाश्वतः शश्वद्भव इत्यपक्षयप्रतिषेधः। पुराण इति विपरिणामप्रतिषेधः। पुराऽपि नव एव नतु परिणामतो रूपान्तरं प्राप्य नवो भवतीत्यर्थः। यद्वा न भवितेत्यस्यानुषङ्गं कृत्वा भूयोऽधिकं यथा भवति तथा न भवतीति वृद्धिप्रतिषेधः। अजो नित्य इति चोभयवृद्ध्यभावे हेतुरित्यपौनरुक्त्यम्। तदेव जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीत्येवं यास्कादिभिर्वेदवादिभिरुक्ताः षड्भावविकारा निरस्ताः। यदर्थमेते विकारा निरस्तास्तं प्रस्तुतं विनाशाभावमुपसंहरति—न हन्यते हन्यमाने शरीर इति ॥ २० ॥

स० टी०—हननाख्यक्रियाया नो कर्तात्मा नैव कर्म वा ॥ कुत एव मुपेक्षायामाविकारितयोच्यते॥ १॥ न जायते यतो नायमभूत्वा भविता पुनः ॥ यो ह्यभूत्वा भवत्येनामुत्पत्तिं भजते स च ॥ २ ॥ यतोऽयं सत्य एवास्ति ततो नोत्पद्यते ह्यजः ॥ कालत्रयेऽपि सत्यत्वाज्जनिर्नैवास्य युज्यते ॥ ३ ॥ तथात्माप्येष भूत्वा प्राक्पुनर्न भावितेति न ॥ यो हि भूत्वा पुरा पश्चान्न भवत्येष मृत्युभाक् ॥ ४ ॥ अयं तूत्तरकालेऽपि सत्वान्न म्रियते यतः ॥ अतो नित्यो न नाशार्हः कदाचिदपि चिद्धनः ॥ ५ ॥ न जायते म्रियते वा प्रतिज्ञावाक्यमिष्यते ॥ कदाचिदिति तस्यैवोपपादनमिहोच्यते ॥ ६ ॥ अजो नित्य इतीहोपसंहार इति भागशः ॥ आद्यन्तयोर्निषेधेन निषेधो मध्यवर्तिनाम् ॥ ७ ॥ विकाराणां स्वतः सिद्धस्तथापि वृद्ध्यपक्षयौ ॥ स्वशब्देन निषिद्ध्येते शाश्वतश्चेत्यपक्षयः ॥ ८ ॥ पुरापि नव एवासौ ततो नायं विवर्धते ॥ अवस्थां नूतनां यस्तु यावि वर्धत एव सः ॥ ९ ॥ अयं सदैकरूपत्वान्नोपचीयत आन्तरः ॥ अस्तित्वविपरीणामौ जन्यतान्तर्गतो यतः ॥ १० ॥ निषिद्धौ न पृथक् तस्मात्षड्विकारविवर्जितः ॥ आत्मा न शक्यते हन्तुं हन्यमाने शरीरके ॥ ११ ॥ २० ॥

भा० टी०—"जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यति"इतियास्कोक्तान् षड्भावविकारान् आत्मनि निराकुर्वंस्तस्याविक्रियत्वं साधयति—नेति। कदाचित्पदं सर्वविक्रियाप्रतिषेधैः पदैः सम्बन्धनीयं न कदाचिज्जायते। यतोऽयमात्मा न भूत्वा भूयः पुनर्भविता न यस्माच्च भूत्वा भवनक्रियामनुभूय भूयोऽभविताऽभावं गन्ता वा न तस्मान्न कदाचिन्म्रियते च। वाशब्दश्चार्थे। यद्वा अयं ना पुरुषो भूत्वा पुनर्भविता न। अस्तिविक्रियायोग्यो न च भवतीत्यर्थः। अस्मिन्पक्षे द्वितीयोपि वाशब्दश्चार्थे। उक्तरीत्या ना अयमिति च्छेदे पूर्वनकारस्य म्रियतइत्यनेन सम्बन्धः। न अयमिति च्छेदे त्वस्येति बोध्यम्। भाष्यकृद्भिस्तु सुगमत्वादयमर्थस्त्यक्तः। यतो न जायतेऽतोऽजः यतो न म्रियतेऽतो नित्यः। येत्वन्ये अस्तु तर्हि क्षणिकविज्ञानधारारूपः। तस्य विज्ञानवादिभिरजत्वनित्यत्वाभ्युपगमात् इत्याशङ्क्याह—भूत्वा भविता वा न भूय इति। अयमित्यनुवर्तते। अयं भूत्वा भूयो भविता न भूयो सकृद्भूत्वा भवितेति भवनक्रियाद्वयस्य क्त्वाप्रत्ययोक्तसमानक-

र्तृत्वधारैव साभिप्रायेण भूत्वैव भविता न तु भूत्वा स्थित्वा विनश्यति तार्किकाणां हि विज्ञानम् । उत्पत्तिस्थितिनाशलक्षणव्यापित्वात् । त्रिक्षणावस्थायिविज्ञानवादिनां तु पूर्वस्य नाशक्षण एवोत्तरस्योत्पत्तिक्षणः । स एव तस्य स्थितिक्षणश्चेति क्षणिकत्वाद्विज्ञानानां भवनक्रियाद्वयस्याव्यवधानाद्भूत्वा भवितेत्युक्तम् । तादृशोऽप्ययं नेत्यादि वर्णयन्ति । तैर्विकारनिषेधोपक्रमादिविरोधस्य परिहारः प्रदर्शनीयः । एतेनाजत्वान्न जायते नित्यत्वान्न म्रियत इत्यपि प्रत्युक्तम् । नायं भूत्वेत्यादेर्हेतुत्वस्य भाष्यकारैः प्रदर्शितत्वेन न जायत इत्यादेरेव हतुत्वौचित्यात् । एवं जन्मनाशास्तित्वरूपविकारत्रयं निराकृत्यावशिष्टान् विकारान् निराकरोति—शाश्वत इत्यादिना । शश्वद्भवः शाश्वत इत्यनेनापक्षयस्य निरवयवत्वान्निर्गुणत्वात् । पुराप्यभिनवः पुराण इत्यनेन वृद्धिरूपस्य हन्यमाने विपरिणम्यमाने शरीरे न हन्यते न विपरिणम्यत इत्यनेन विपरिणामस्य विकारस्य प्रतिषेधः । तथाच भाष्यम् "हन्तिरत्र विपरिणामार्थो द्रष्टव्योऽपुनरुक्ततायै" अस्मिन् श्लोके षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः । यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मन्त्रेणास्य सम्बन्धः इति । एतेनास्तित्वपरिणामौ जन्माविनाशान्तर्भूतत्वात् पृथङ् न निषिद्धौ यस्मादेतत्सर्वविकारशून्य आत्मा तस्माच्छरीरे हन्यमानेतत्सम्बद्धोपि केनाप्युपायेन न हन्यते न हन्तुं शक्यते इत्युपसंहार इति प्रत्युक्तम् । आद्यन्तविकारयोर्निषेधे मध्यतनानां निषेधे सिद्धेऽपि तेषामुपादानमवस्थान्तरक्रियान्तरोपलक्षणार्थम् ॥ २० ॥

प० टी०—अथ न हन्यत इत्यनेनात्मनः षड्भावविकारशून्यत्वं यदुक्तं तदेव प्रकटयन्नाह—**न जायत इति।** तत्र षड्विकारास्तु । जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीति एतान् क्रमेण निषेधयाति—**न जायत इति** । न जायते इति जन्मनिषेधः । वाशब्दश्चार्थे । न चायं भूत्वोत्पद्य भविता भवति अस्तित्वं भजते । किन्तु प्रागेव स्वतः सद्रूप इति जन्मान्तरास्तित्वलक्षणद्वितीयविकारनिषेधः । अत्र हेतुः यस्मादजः यो हि जायते स एव जन्मानन्तरमस्तित्वं भजते । नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः । शाश्वत इति अपक्षयनिषेधः । निरवयवत्वान्निर्गुणत्वाच्च पुराण इति विपरिणामप्रतिषेधः । पुरापि नव एव न तु परिणामतो रूपान्तरं प्राप्य नवो भवतीत्यर्थः । यद्वा न भवितेत्यस्यानुषङ्गं कृत्वा भूयोऽधिकं यथा भवति तथा न भवितेति वृद्धिप्रतिषेधः । अजो नित्य इति चोभयं वृद्ध्याद्यभावहेतुरिति न पौनरुक्त्यम् । एवं यदर्थे वेदवादिभिरुक्ताः षड्विकारा निरस्तास्तं प्रस्तुतं विनाशाद्यभावमुपसंहरति—**न हन्यते हन्यमाने शरीर इति** । अत्रार्थे कठशाखीया श्रुतिश्च "न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ॥ उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् ॥ महान्तं विभुमात्मानं मत्वा धीरो न शोचति" इति गतार्थेयम् ॥ २० ॥

रा० टी०—यदुक्तं जीवेश्वरयोरुत्पत्तिविनाशराहित्यम् । ईश्वरस्य देहतोप्युत्पत्त्यभावेन स्वातन्त्र्यम् । जीवस्य स्वरूपतो जन्मादिशून्यस्यापि देहोपत्त्यादिनाऽस्वातन्त्र्यं तेष्वर्थेषु प्रमाणत्वेन मन्त्रवर्णमुदाहरति—**न जायत इति** । तथाहि जीवविषये तावदियं योजना । अयं जीवः स्वरूपेण न जायते न म्रियते न नश्यति च । वाशब्दश्चशब्दार्थः । अग्रेतननञोऽनुकर्षः । जीवो न जायते चेत्तर्हि यथेश्वरज्ञानं वृद्धिह्रासविवर्जितं भूत्वैव कदाचिदचिन्त्यशक्त्या भूतमिव व्यवहारावलम्बनं भवति । "तदैक्षत" इत्यादिश्रुतेः । तथा जीवेऽपि किं जननव्यवहारस्तान्निमित्त इत्यतो नेत्युच्यते । अयं जीवः स्वरूपेण भूत्वा कयाचिद्विवक्षया ईश्वरज्ञानवद्भविता न भवति । कुतो न जायते न म्रियते वेति स्वरूपोत्पत्तिविनाशाभावो जीवस्येत्यत उक्तम्—**अजो नित्यः शाश्वत इति** । स्वरूपोत्पत्तिविनाशशून्यसदैकरूपभगवत्स्वरूपत्वादित्यर्थः । अतद्भावे सामाना-

धिकरण्यस्य सारूप्यगमकत्वात् । अजानित्यपदाभ्यां बिम्बोत्पत्तिविनाशाभावः । शाश्वतपदेन बिम्बोपाधिसन्निधिजन्मनाशाभावश्च हेतुरुक्तो भवति । ईश्वरज्ञानवद्भूत्वा भवितापि चेन्न जीवस्तर्हि किन्निमित्तो जननव्यवहारो जीव इत्यत उक्तम्—पुराण इति । पुराणि देहानणति अणपण गतौ गच्छति देहाद्देहान्तरं प्राप्नोतीति देहयोगनिमित्त इत्यर्थः । एवं तर्ह्युपाधिभूतदेहनाशः स्यादित्यत आह—न हन्यत इति । अन्तवन्त इमे देहा इत्यत्रोक्तदिशा नित्योपाधेरन्यस्य भावात् एतच्छरीरनाशेपि न जीवनाश इति भावः । ईश्वरविषये तु पूर्वोत्तरार्धे ईश्वरजीवरूपविषयभेदेन योज्ये । तथाहि वाशब्दादेव पूर्वनञो म्रियते वेत्यत्रानुकर्षस्य सिद्धेः नञन्तरवैयर्थ्यात् । नायं भूत्वेत्यत्र श्रुतो नाशब्दो न नञ् किन्तु नृशब्दः । तथा चायं ना परमपुरुषः न जायते न म्रियते देहयोगवियोगवान्न भवति नित्यदेह एवेत्यर्थः। अत एव स्वरूपानाशः कैमुत्यसिद्धः । देहोत्पत्तिविनाशयोरप्यभावेन स्वातन्त्र्यमपि सिद्धमेवेति भावः । एवं चेत्कथं तर्हि रामकृष्णादिरूपेण जननव्यवहार इत्यतो भूत्वा रामकृष्णादिरूपेण सर्वदा भूत्वैव कदाचिज्जनदृग्विषयत्वादिरूपेण भूयः पुनर्भविता नतु देहयोगेनापि भविता । 'किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् । प्रदर्शयाति लोकस्य जनिरित्युच्यते हरेः' इति तत्त्वनिर्णयोक्तेः अयं जीवोप्यजो नित्यश्च । ईश्वरस्येव जीवस्याप्यनादिनित्यत्वे स्वातन्त्र्यस्यापि प्राप्तेः ईश्वरादविशेषः स्यादित्यत उक्तम्—शाश्वत इति । सदैकरूपः अनाद्यनन्तकालमत्यक्तपारतन्त्र्यादिस्वभाव इत्यर्थः । कुत एतदित्यत उक्तम्—पुराण इति । अनिच्छयापि देहाद्देहान्तरप्राप्तिमत्त्वादिति हेतुगर्भविशेषणमिदम् । नहि तादृशस्य स्वातन्त्र्यसम्भावनापीति भावः । एतावान्गुण इत्याह—न हन्यते हन्यमाने शरीर इति ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ॥
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

त० टी०—कथं तर्हि "ब्राह्मणो न हन्तव्यः" इत्यादि निषेधशास्त्रस्य गोघ्नब्रह्मघ्नादेर्नरकादिप्राप्तिविधायकशास्त्रस्य च सार्थक्यमित्याशङ्कापरिहारार्थमाह—वेदेति । अविनाशिनं विनाशाभाववन्तमत एव नित्यं यतोऽजमव्ययं जन्मपरिणामादिरहितमेनं प्रतिशरीरभिन्नमात्मानं यः पुरुषो वेद जानाति हे पार्थ ! स कथं हन्ति कं घातयति । बहुष्वेव किंशब्दप्रयोगो लोके शास्त्रे च दृष्टः । तथा च ब्राह्मणादिश्वपचपशुकृम्यन्तशरीरेषु विनाशानर्हस्वभावतया वर्तमानेष्वात्मसु कं कतमं हन्ति हननक्रियायाः कर्ता भवति कं वा घातयति तां क्रियां प्रति प्रयोजको भवति न कञ्चिदपीत्यर्थः । एतेन त्वं प्रयोजको भूत्वा घातयसि अहं त्वन्नियुक्तो हन्मीत्यत उभयोः पापं स्यादिति न शङ्कितव्यमिति ध्वनितम् । एवञ्च ब्राह्मणादिहनननिषेधशास्त्रस्य हननजन्यपापफलाभिधायकस्य च उक्तात्मस्वरूपस्वभावयाथात्म्यज्ञानाभाववद्विषयकत्वेन सार्थक्यम् ॥ २१ ॥

म० टी०—नायं हन्ति न हन्यत इति प्रतिज्ञाय न हन्यत इत्युपपादितम्। इदानीं न हन्तीत्युपपादयन्नुपसंहरति—वेदाविनाशिनमिति । न विनष्टुं शीलं यस्य तमविनाशिनमन्त्यविकाररहितं तत्र हेतुः अव्ययं न विद्यते व्ययोऽवयवापचयो गुणापचयो वा यस्य तमव्ययमवयवापचयेन गुणापचयेन वा विनाशदर्शनात्तदुभयरहितस्य न विनाशः सम्भवतीत्यर्थः । ननु जन्यत्वेन विनाशित्वमनुमास्यामहे नेत्याह—अजमिति । न जायत इत्यजमाद्यविकाररहितं तत्र हेतुः नित्यं सर्वदा विद्यमानं प्रागविद्यमानस्य हि जन्म दृष्टं नतु सर्वदा सत इत्यभिप्रायः । अथवा अविनाशिनमबाध्यं सत्यमितियावत् । नित्यं सर्वव्यापकं तत्र हेतुः अजमव्ययं जन्मविनाशशून्यं जायमानस्य विनश्यतश्च सर्वव्यापकत्वसत्यत्वयोरयोगात् । एवं सर्वविक्रियाशून्यं प्रकृतमेनं

देहिनं स्वमात्मानं यो वेद विजानाति शास्त्राचार्योपदेशाभ्यां साक्षात्करोति अहं सर्वविक्रियाशून्यः सर्वभासकः सर्वद्वैतरहितः परमानन्दबोधरूप इति स एवं विद्वान्पुरुषः पूर्णरूपः कं हन्ति कथं हन्ति । किंशब्द आक्षेपे न कमपि हन्ति न कथमपि हन्तीत्यर्थः । तथा कं घातयति कमपि न घातयतीत्यर्थः । न हि सर्वविकारशून्यस्याकर्तुर्हननक्रियायां कर्तृत्वं सम्भवति । तथा च श्रुतिः "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसञ्ज्वरेत्" इति शुद्धमात्मानं विदुषस्तदज्ञाननिबन्धनाध्यासनिवृत्तौ तन्मूलरागद्वेषाद्यभावात्कर्तृत्वभोक्तृत्वाद्यभावं दर्शयति अयमभिप्रायो भगवतः वस्तुगत्या कोपि न करोति न कारयति च किञ्चित् सर्वविक्रियाशून्यस्वभावत्वात्परन्तु स्वप्न इवाविद्यया कर्तृत्वादिकमात्मन्यभिमन्यते । तदुक्तमुभौ तौ न विजानीत इति । श्रुतिश्च "ध्यायतीव लेलायतीव" इत्यादि अत एव सर्वाणि शास्त्राण्यविद्वदधिकारिकाणि । विद्वांस्तु समूलाध्यासबाधान्नात्मनि कर्तृत्वादिकमभिमन्यते । स्थाणुस्वरूपे विद्वानिव चोरत्वम् । अतो विक्रियारहितत्वादद्वितीयत्वाच्च विद्वान्न करोति कारयति चेत्युच्यते । तथा च श्रुतिः "विद्वान्न बिभेति कुतश्चनेति" अर्जुनो हि स्वस्मिन्कर्तृत्वं भगवति च कारयितृत्वमध्यस्य हिंसानिमित्तं दोषमुभयत्राप्याशशङ्के । भगवानपि विदिताभिप्रायो हन्ति घातयतीति तदुभयमाचिक्षेप आत्मनि कर्तृत्वम् । मयि च कारयितृत्वमारोप्य प्रत्यवायशङ्कां मा कार्षीरित्यभिप्रायः । अविक्रियत्वप्रदर्शनेनात्मनः कर्तृत्वप्रतिषेधात्सर्वकर्माक्षेपे भगवदभिप्रेते हन्तिरुपलक्षणार्थः । पुरः स्फूर्तिकत्वात् प्रतिषेधहेतोस्तुल्यत्वात्कर्मान्तराभ्यनुज्ञानुपपत्तेः । तथा च वक्ष्यति 'तस्य कार्यं न विद्यते' इति । अतोऽत्र हननमात्राक्षेपेण कर्मान्तरं भगवताभ्यनुज्ञायत इति मूढजनजल्पितमपास्तम् । तस्माद्युध्यस्वेत्यत्र हननस्य भगवताभ्यनुज्ञानात् वास्तवकर्तृत्वाद्यभावस्य कर्ममात्रे समत्वादिति दिक् ॥ २१ ॥

शं० टी०—एवमात्मनोऽहमर्थस्य निर्विकारत्वं नित्यकूटस्थासङ्गचिद्रूपता तदेतत्पारमार्थिकं तत्त्वमिति प्रतिपाद्य ईदृशमात्मतत्त्वं विदितवतो विदुषः सर्वकर्मसंन्यास एवाधिकारो नान्यत्रेति सूचयितुमाह—वेदेति । ब्रह्मचर्याहिंसादिविवेकवैराग्यशमदमादिश्रुत्याचार्येश्वरप्रसादादिलक्षणया नियतया श्रुत्यादिसाधनसम्पत्त्या युक्तो मोक्षैकप्रयोजनोक्तमुमुक्षुरधिकारी ब्रह्मविद्गुरुसन्निधौ श्रद्धाभक्तिभ्यामजस्रं कृतश्रवणादिजन्यज्ञानेनानुभूयमानमेनं प्रत्यग्रूपमात्मानमहमर्थमजं जन्मादिसर्वविकारशून्यमत एवाव्ययं येन केनापि प्रकारेण न व्येतीत्यव्ययम् अविनाशिनं विनाशः प्रमाणेन रज्जुसर्पादेरिव सत्ताबाधः द्रव्यगुणादिभिः परिच्छेदः तदभावोस्यास्तीत्यविनाशी परिपूर्णस्तमत एव नित्यमेकरसमद्वितीयमात्मतत्त्वमिदमेवाहमस्मीति साक्षाद्यो वेद स पुरुषः सर्वात्मभावं गतो विद्वान् कथं केन प्रकारेण कं हन्ति कं विषयीकृत्य हननक्रियां करोति कं घातयति कं हननक्रियायां प्रवर्तयति सर्वत्र किंशब्द आक्षेपार्थक एव भवति न तु प्रश्नार्थकः प्रत्युत्तरादर्शनात्। कथमिति साधनमाक्षिप्य कमिति विषयाक्षेपः कं घातयतीति प्रयोज्याक्षेपः । एवं क्रियातत्साधनाद्यसम्भवे निर्विकारब्रह्मात्मदर्शिनः सर्वकर्मसंन्यास एवाधिकार इति सिद्धम् । ननु निर्विकारब्रह्मदर्शिनः कथं हन्ति कं हन्ति कं घातयतीति साधनाद्याक्षेपेण हननक्रियाया एव निवृत्तिरत्र सूच्यते न तु सर्वेषां कर्मणामिति चेन्न क्रियामात्रहेतोस्तुल्यत्वाद्यत्रयत्र त्वविक्रियात्मज्ञानं तत्रतत्र न प्रवृत्तिरिति । निर्विकारात्मज्ञानस्य प्रवृत्तिमात्रं प्रति निवृत्तिहेतुत्वान्न हननक्रियामात्रं प्रति हेतुत्वं नियन्तुं शक्यमतो निर्विकाराद्वितीयब्रह्मात्मज्ञानिनो न कर्तव्यं न कारयितव्यं च किञ्चिदस्तीति सिद्धम् । ननु न जायते म्रियते इति जन्मादिसर्वविक्रियाशून्यत्वं ब्रह्मण उक्तमतो निर्विकारं ज्ञेयं ब्रह्म ज्ञाता तु विद्वान् विकारीत्युभयोर्निर्विकारत्वसविकारत्वधर्माभ्यां परस्परभिन्नत्वाद्विकारिणो विदुषस्त्वविक्रियत्वज्ञानाऽसम्भवात्संन्यासो नोपपद्यते अविक्रियं ब्रह्मेति ज्ञानमस्त्येव संन्यासकारणमिति चेन्न 'तस्य ज्ञेयविषयत्वनासाधनत्वात् । नह्यचलः पर्वत इति ज्ञानं क्रियानिवृत्तिकारणं

भवति तद्वत्स्वस्य विकारित्वेन विदुषस्त्वक्रियोऽहमित्यविक्रियात्मत्वज्ञानासम्भवात्कर्मसंन्यासोऽनुपपन्न एवेति चेद्भवानत्र प्रष्टव्यः । इदमहं जानामीतीदमर्थस्य ज्ञाताहं प्रत्ययार्थो देहो वा प्राणो वा इन्द्रियाणि वा मनो वाऽहङ्कारो वा विश्वो वा तैजसो वा प्राज्ञो वा उत आत्मा वेति । आद्ये स्वप्नदेहो वा जाग्रद्देहो वा उतोभयं वा । नाद्यः जागरे अहम्प्रत्ययानुदयः स्यात्स्वप्नदेहनाशाज्ज्ञातुरहमर्थस्यापि नाशप्रसङ्गात्तदिष्टापत्तिरेवेति चेन्न जाग्रति नाहमस्मीति तवाभावप्रसङ्गात्प्रत्यक्षविरोधाच्च । न द्वितीयः न यस्य कस्यापि स्वप्ने अहमस्मीत्यहम्प्रत्ययोदयः स्यात् अहं व्रजामीत्युक्त्वा देह एव व्रजत्यतो देह एवाहंशब्दार्थ इति चेन्न देवानिष्ट्वाहं स्वर्गं व्रजामीत्यादौ व्यभिचारान्मृते देहे विद्यमानेऽप्यहम्प्रत्ययादर्शनाच्च । न तृतीयः द्वयोः सामानाधिकरण्यासम्भवान्नादिमो द्वितीयः पक्षः । स्वभावजडत्वान्नहि जाग्रति स्वप्ने वा स्वं वान्यं वा प्राणो जानाति तदभावान्नाहमर्थत्वसिद्धिः । तृतीये एकस्य वा इन्द्रियस्य सर्वेषां वाहमर्थत्वं नाद्यः शब्दादिष्वेकस्यैवार्थस्योपलब्धिप्रसङ्गाच्छब्दादेः सर्वस्य सर्वत्रोपलब्धिप्रदर्शनात्प्रत्यक्षविरोधश्च स्यात् । न द्वितीयः अहं ब्राह्मण इत्यत्र श्रोत्रादीनां प्रत्येकं ब्राह्मणशब्दार्थत्वे ब्राह्मणानेकत्वसिद्धावयमेको ब्राह्मण इति प्रत्यक्षसिद्धब्राह्मणैकत्वव्यवहारविरोधप्रसङ्गात् । योऽहं चक्षुषा घटमद्राक्षं सोऽहं पाणिना स्पृशामीति दृगादिभ्यो भिन्नस्याहमर्थत्वसिद्धाविन्द्रियाणां तदनुपपत्तेः । नापि चतुर्थः चक्षुरादिवत्करणत्वाऽविशेषात् "मनसा ह्येव पश्यति" इतिश्रुतेः । नापि च पञ्चमः विकारित्वाज्ज्ञातृत्वानुपपत्तावहमर्थत्वानुपपत्तेः । नन्वहं जानामीत्यहङ्कारस्यापि ज्ञातृत्वं प्रतीयत इति चेन्न स्वतो जडत्वाज्ज्ञातृत्वानुपपत्तेः यथाऽहं मनुष्य इत्यन्यधर्माध्यासस्तथा ज्ञाताहमित्यन्यधर्माध्यास एव स्वतो जडत्वेन ज्ञातृत्वमस्य न सम्भवति ज्ञातृत्वस्य चेतनधर्मत्वाद्वृद्धेर्दग्धृत्ववच्छैशवे मया द्राक्षा भुक्तेति तेन तेन सहैव विकारेण विनश्यतोऽहङ्कारस्य विकारिणः शैशवभुक्तद्राक्षानुभूतिश्चिरकालिका वृद्धत्वे नोपपद्यते । तदनुपपत्तावहमर्थत्वं न सम्भवति ममायमहङ्कारो दुष्ट इति स्वातिरिक्तस्य ज्ञेयत्वेन ज्ञातृत्वानुपपत्तावहमर्थत्वासिद्धेः । नापि षष्ठो नापि च सप्तमो नाप्यष्टमश्च विश्वादीनां ज्ञातृव्यतिरिक्तत्वेनाऽहमर्थत्वाऽयोगात्तेषामेकैकावस्थाभिमानित्वेन व्यवस्था तद्धर्मविज्ञानाऽसम्भवात् यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं जागर्मीत्यवस्थात्रितयज्ञातुर्विश्वादिभ्यो भिन्नत्वमेवावगम्यते । नित्यत्वमविकारित्वं चातः पारिशेष्यादात्मैव ज्ञाता "नान्योऽतोस्ति विज्ञाता" इतिश्रुतेः । ननु निरवयवस्यात्मनो बुद्धितद्वृत्तीन्द्रियैरिन्द्रियार्थैः सम्बन्धासम्भवात्कथं ज्ञातृत्वमिति चेद्बुद्ध्यादिभिराध्यासिकसम्बन्धस्य सम्भवादविक्रियस्याप्यात्मनो ज्ञातृत्वं सिध्यति यत एवं ततो विज्ञातुरात्मन एवाहमर्थत्वम् "अहं विजानामि विविक्तरूपः" इतिश्रुतेः । तत आत्मैव विद्वान् निरुक्तविज्ञानस्य विदुषः सम्भवादेवं विद्वदात्मनोरभिन्नत्वे "अयमात्मा ब्रह्म" इत्यात्मनो ब्रह्माभिन्नत्वश्रवणादविक्रियोऽहमिति विदुषः स्वस्याविक्रियत्वाद्द्वितीयत्वज्ञानसिद्धेर्निरङ्कुशत्वादविक्रियब्रह्मात्मत्वज्ञानबलेन सर्वकर्मसंन्यास उपपद्यत एवेति सिद्धम् ॥ २१ ॥

श्री० टी०—अत एव हन्तृत्वाभावोऽपि पूर्वोक्तः प्रसिद्ध इत्याह—वेदेति । नित्यं वृद्धिशून्यमव्ययमपक्षयशून्यमजमविनाशिनं च यो वेद स पुरुषः कं हन्ति कथं वा हन्ति एवंभूतस्य वधे साधनाभावात् । तथा स्वयं प्रयोजको भूत्वान्येन कं घातयति न कञ्चिदपि कथञ्चिदपीत्यर्थः । अनेन मय्यपि प्रयोजकत्वाद्दोषदृष्टिं मा कार्षीः इत्युक्तं भवति ॥ २१ ॥

स० टी०—इत्थं निषिद्धं कर्मत्वमात्मनोऽत्राविकारिणः॥ इदानीं तु क्रियामात्रे कर्तृत्वं प्रतिषिद्ध्यते ॥१॥ न विनष्टस्वभावोऽस्य न व्ययोपचयात्मकः ॥ गुणाद्यपचयादेव विनाशो दृश्यते यतः ॥ २ ॥ यथा कस्तूरिकादीनां गुणनाशे व्ययो भवेत् ॥ नाशोऽवयवतो यद्वत्तन्तुनाशे पटव्ययः ॥ ३ ॥ नाशः स्याद्धर्मतो यद्वत्कटकादिविनाशतः ॥ हेमनाशो भवेत्तद्वन्निर्धर्मक इहात्मनि ॥ ४ ॥ निर्गुणे निष्कले नाशस्तदभावान्न

युज्यते ॥ न जायते यतो नित्यो विद्यमानतया सदा ॥ ५ ॥ तं सर्वविक्रियाशून्यं स्वात्मानं यस्तु साक्षिणम् ॥ शास्त्राचार्योपदेशाभ्यामहमस्मीति चाक्रियम् ॥ ६ ॥ साक्षात्करोति स ज्ञानी पूर्णोऽसौ हन्ति कं कथम् ॥ आक्षेपेऽस्त्यत्र किंशब्दो न कथं न किमप्यसौ ॥ ७ ॥ हन्ति वा न कथं कञ्चिन्नैव घातयतीह सः॥ शुद्धमक्रियमात्मानं विदुषोऽध्यासहानतः ॥ ८ ॥ कर्तृत्वप्रेरकत्वादेरभावं दर्शयत्यजः ॥ अयमत्राशयो विष्णोर्वासुदेवस्य मापतेः ॥ ९ ॥ निर्विकारतयात्यन्तशुद्धत्वाच्चिद्घनोऽव्ययः ॥ न कर्ता प्रेरको नायं कुत्रापि परमार्थतः ॥ १० ॥ देहाद्यध्यासतः पुंसो भ्रान्त्याकर्तृत्वभोक्तृते ॥ अतः सर्वाणि शास्त्राणि ह्यविद्वद्विषयाणि च ॥ ११ ॥ समूलाध्यासबाधान्न विद्वानात्मनि विक्रियाम् ॥ कर्तृत्वाद्यात्मिकां काञ्चिदभिमन्यत उत्तमः ॥ १२ ॥ अर्जुनः कर्तृतां स्वस्मिन्विष्णौ प्रेरकतां तथा ॥ आरोप्य चोभयत्रापि दोषं हिंसानिमित्तकम् ॥ १३ ॥ आशशङ्केऽथ भगवाञ्ज्ञाताभिप्राय ईश्वरः ॥ हन्ति घातयतीत्येवमाचिक्षेप द्वयं हि तत्॥ १४॥ आत्मन्यारोप्य कर्तृत्वं प्रेरकत्वं मयीश्वरे ॥ मा कार्षीर्दोषशङ्कां त्वमित्यभिप्राय ईशितुः ॥ १५ ॥ २१ ॥

भा० टी०—नायं हन्ति न हन्यत इति मन्त्रकृतां प्रतिज्ञां न जायत इति मन्त्रेणात्मनोऽविक्रियत्वकथनपरेणोपपाद्य स्वयमुपसंहरति—वेदेति। एतेन न हन्ति न हन्यत इति प्रतिज्ञाय न हन्यत इत्युपपादितम् इदानीं न हन्तीत्युपपादयतीति परास्तम्। कस्मादयमात्मा हननक्रियायाः कर्ता कर्म च न भवति अविक्रियत्वादित्याह—द्वितीयेन मन्त्रेणेति। स्वपूर्वग्रन्थविरोधादन्यथा मन्त्रे न्यूनतापत्तेश्च। एतेन नायं हन्ति न हन्यत इत्युक्तम्। तत्र न हन्यत इत्येतदुपपादयति—न जायत इति। न हन्तीत्येतदुपपादयति वेदेतीत्यपि परास्तम्। एनं पूर्वमन्त्रेणोक्तस्वरूपमविनाशिनमन्त्यविकाररहितं नित्यमविपरिणामिनमव्ययमपक्षयरहितं तत्र हेतुरजं जन्मरहितत्वात्सर्वविकारशून्यं यो वेद जानाति सोऽविक्रियः स्वात्मदर्शी विद्वान् कं कथं घातयति हन्तारं प्रयोजयति तथा कं हन्ति न कथञ्चित्कञ्चिदपीत्यर्थः। तथा त्वमपि विद्वान् भूत्वा स्वयं हननकर्ता शिखण्ड्यादिप्रयोजकश्चेति कर्तृत्वकारयितृत्वे स्वस्मिन्माऽध्यारोपयेत्याशयः। ननु न विनष्टुं शीलमस्य तमविनाशिनमन्त्यविकाररहितम्। तत्र हेतुरव्ययम्। न विद्यते व्ययोऽवयवापचयो गुणापचयो वा यस्य तमव्ययम्। अवयवापचयेन गुणापचयेन वा विनाशदर्शनात्। तदुभयरहितस्य न विनाशः सम्भवतीत्यर्थः। ननु जन्यत्वे विनाशित्वमनुमास्यामहे नेत्याह—अजमिति। न जायत इत्यजमाद्यविकाररहितम्। तत्र हेतुर्नित्यं सर्वदाविद्यमानम्। प्रागविद्यमानस्य हि जन्म दृष्टं नतु सर्वदा सत इत्याभिप्रायः। अथवाऽविनाशिनमबाध्यं सत्यमिति यावत्। नित्यं सर्वव्यापकम्। तत्र हेतुरजमव्ययं जन्मविनाशशून्यं जायमानस्य विनश्यतश्च सर्वव्यापकत्वसत्यत्वयोरयोगात्। यद्वा विनष्टुमदर्शनं गन्तुं शीलमस्येति विनाशी रज्जूरगतुल्यमुपाधित्रयं स्थूलसूक्ष्मकारणशरीराख्यं ततोन्यमविनाशिनमत एव नित्यं नाशहीनम्। तत्र हेतुरजं जन्मवान्हि अनित्यः। अयं त्वजत्वान्नित्यश्चेत्यर्थः। ननु विनाशिनः स्वकार्यापेक्षयान्यत्वमजत्वं नित्यत्वं च साङ्ख्याभिमते प्रधाने तार्किकाभिमते नभसि चास्त्यत उक्तमव्ययमिति न व्येति पूर्वावस्थां न त्यजतीत्यव्ययम्। परिणामिप्रधानं तु चलं गुणवृत्तमितिन्यायेन गुणसाम्यावस्थायामपि परिणममानमेव सर्वदास्तीति तेषामभ्युपगमात्। आकाशस्यापि "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्युत्पत्तिश्रवणादन्तवत्त्वभावादेव नाव्ययत्वमित्येवमाचार्यैः कुतो न व्याख्यातमिति चेत् सर्वविक्रियाशून्यमेनं यो वेदेति प्रकृतानुसारिवाक्यार्थस्य ऋजुमार्गेण सम्यक्सम्भवे क्लिष्टकल्पनाया अन्याय्यत्वमभिप्रेत्येति गृहाण। तथाच एनं नित्यमविनाशिनं सदैव नाशरहितं न त्वाकाशादिवत् व्यवहारदशायां नाशरहितम्। अत एवाजं जन्मरहितं नित्यमविनाशिनो जन्यत्वायोगात्। अत एवाव्ययं सदैकरसं यो वेदेत्यर्थः। यद्वा एनं नित्यं तत्र हेतुरविनाशिनम्। अविनाशित्वे हेतुरजमव्ययमपक्षयरहितम्। यद्वा एनमविनाशिनमजमव्ययं यो नित्यं सदैव वेदेत्यर्थः। अथवा वेद अविनाशिनमिति छेदः। अज्ञाने-

नावृतत्वादासमन्ताददर्शनं गतमेनं यो नित्यं सच्चिदानन्दात्मना सदैव सन्तमज्ञानावृतत्वाद्रज्जुशकलवत्तस्यासत्त्वाभावात् । तथाऽज्ञानेन जातः क्षीण इति प्रतीयमानमप्यजमव्ययं यो वेदेत्यादि यत्किञ्चित्कल्पनस्य वालैरप्यस्मदादिभिः सुकरत्वेन मार्गप्रदर्शकानां सर्वज्ञानां भाष्यकृतामुक्तकल्पनाकरणप्रयुक्ता न्यूनता न प्रदर्शनीयेति ध्येयम् । यत्तु 'अर्जुनो हि स्वास्मिन्कर्तृत्वं भगवति च कारयितृत्वमध्यस्य हिंसानिमित्तं दोषमुभयत्राप्याशङ्के भगवानपि विदिताभिप्रायो हन्ति घातयतीति तदुभयमाचिक्षेप। आत्मनि कर्तृत्वं मयि च कारयितृत्वमारोप्य प्रत्यवायशङ्कां मा कार्षीरित्यभिप्राय इति कैश्चिदुक्तम्' तन्न आत्मज्ञानरहितस्य हिंसानिबन्धनपापभयात् । स्वधर्माद्युद्धान्निवृत्तस्यार्जुनस्याऽऽत्मस्वरूपतदुपायभूतधर्मबोधनपरेण गीताशास्त्रेण सर्वेणापि बोधनं भगवता क्रियते इति स्पष्टप्रातिपत्त्या आ शशङ्के शङ्कां मा कार्षीरित्यस्य निरर्थकत्वात् । य इतिमन्त्रोत्थापकाया अस्याः शङ्कायाः असम्भवस्य तत्रैवोक्तत्वाच्च हननक्रियानिषेधः क्रियामात्रनिषेधस्योपलक्षणार्थः । असंहतस्यात्मस्वरूपस्य विदुषः कर्मासम्भवात् प्रबलप्रारब्धवशात् बाधितानुवृत्त्या कर्मसम्भवेऽपि तस्य कर्तृत्वाभिमानाभावेन कर्मणां फलाजनकत्वात् । वस्तुगत्या तेषामसम्भवस्य सुवचत्वात् । तस्मात्फलाभिसन्धिकर्तृत्वाभिमानपूर्वकोऽज्ञस्य कर्माणि मुख्योऽधिकारः । ननु विद्यायामप्यविदुष एवाधिकारः । तथा च भाष्यम् "तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति । उच्यते देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः" इत्यादि । अयमर्थः प्रमातृत्वं हि प्रमां प्रति कर्तृत्वं तच्च स्वातन्त्र्यमस्वातन्त्र्यं च इतरकारकाप्रयोज्यस्य प्रमातुः समस्तकारकप्रयोक्तृत्वम् । तदनेन प्रमाणं प्रयोजनीयम् । नच स्वव्यापारमन्तरेण करणं प्रयोक्तुं शक्यते इति । नहि कूटस्थनित्याश्चिदात्माऽपरिणामी स्वतोव्यापारवान् भवितुमर्हति। तस्मात् व्यापारवद्बुध्यादितादात्म्याध्यासाद्व्यापारवत्तया प्रमाणमधिष्ठातुमर्हतीति । भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति चेत्सत्यम् । तथापि कर्मनियोगार्थबोधानन्तरमहं कर्ता ममेदं कर्तव्यमित्येवंप्रकारज्ञानवतोऽनेकसाधनोपसंहारपूर्वकं यथा कर्मानुष्ठेयं न तथा न जायत इत्यादावात्मस्वरूपविध्यर्थज्ञानानन्तरं किञ्चिदनुष्ठेयं भवति । किन्तु नाहं कर्ता न भोक्तेत्यादिज्ञानद्वयात्मैकत्वात्कर्तृत्वाभोक्तृत्वज्ञानादन्यत्किञ्चिदनुष्ठेयं भवतीत्येष विशेष इति स्पष्टं चेदं भाष्ये ॥ २१ ॥

प० टी०—अत एव हन्तृत्वमपि न युज्यत इत्याह—वेदाविनाशिनमिति । नित्यं वृद्धिशून्यम् अव्ययमपक्षयशून्यम् । अजं जन्मशून्यमेभिस्त्रिभिर्विकारैरेनमात्मानमविनाशिनं यो वेद ज्ञातवान् स कं पुरुषं घातयति च स्वयं हननक्रियाऽयोग्यत्वात् किञ्च प्रयोजकेऽपि तथैव । अनेन मय्यपि प्रयोजकत्वदृष्टिमाप्नुहीत्युक्तम् । तदुक्तम्—' शुद्धो निरञ्जनोऽनन्तो बोधोऽहं प्रकृतेः परः ॥ चेष्टमानमिदं देहं पश्याम्यन्यशरीरवत्' इति ॥ २१ ॥

रा० टी०—य एनमिति । श्लोके जीवचैतन्यस्य हननं वा हननक्रियास्वातन्त्र्यं वा मन्यमानो न जानातीत्यत्र जीवचितोबिम्बोपाधिसान्निध्यनाशहेतुनित्यत्वप्रतिबिम्बत्वहेतुकास्वातन्त्र्यरूपहेतू उक्तौ । यस्तु जीवचितो नित्यत्वं हरेः स्वातन्त्र्यं च जानाति स ज्ञानी। स्वातन्त्र्याभिमानाभावात् । हन्ताहमिति वा । अस्यायं हन्तेति वा न जानातीत्यज्ञानेऽभिमानाभावोऽपरो हेतुरुच्यते—वेदेति । अविनाशिनं बिम्बनाशादिनिमित्तकनाशहीनम् । मात्रास्पर्शा इत्यत्रोक्तदिशाभिमानकृता एव रागद्वेषसुखादिदोषाः नतु स्वत इति स्वतो दोषहीनमिति वा । दुष्टेषु नष्टशब्दप्रयोगान्नाशोऽत्र दोषो ध्येयः । नित्यं स्वाभाविकनाशहीनम् अजमुत्पत्तिहीनम् अव्ययं स्वरूपविकारशून्यमेनं जीवम् । यद्वा अविनाशिनं नित्यं स्वरूपतो नाशहीनम् । अजं जन्महीनम् अव्ययं निर्विकारम् । अत एव सर्वस्वतन्त्रमेनमीश्वरं यो वेद जानाति स पुरुषो ज्ञानी कथं केन प्रकारेण कं घातयति कं वा हन्ति । घातयाम्येनमिति वा हन्म्येनमिति वा भावं न करोतीत्यर्थः ॥ २१ ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ॥
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥

त० टी०—नन्वात्मनामविनाशित्वेन शोकानर्हत्वेऽपि देहानां विनाशित्वात्तद्विनाशनिमित्ते युद्धे प्रियभोगसाधनभूतेषु भीष्मादिप्रियदेहेषु नश्यत्सु तद्वियोगनिमित्तः शोकः स्यादेवेत्याशङ्कायामाह—**वासांसीति**। यथा नरो जीर्णानि वासांसि विहायाऽपराणि नवानि गृह्णाति न तत्त्यागे शोको भवति प्रत्युत हर्ष एव जायते। तथा देही जीर्णानि शरीराणि विहायाऽन्यानि नवानि शरीराणि संयाति प्राप्नोति। न तस्य पूर्वदेहत्यागे शोको भवति प्रत्युत हर्ष एवोपजायते। तस्मात्स्वधर्मे युद्धे पूर्वशरीरं त्यक्त्वाऽन्यत्कल्याणतरं शरीरं गृह्णतां भीष्मादीनां हर्षविशेष एवोत्पत्स्यते। अतस्त्वया तदुपकार एव कृतः स्यान्न द्रोहसम्भावना कर्तव्येति भावः ॥ २२ ॥

म० टी०—नन्वेवमात्मनो विनाशित्वाभावेपि देहानां विनाशित्वाद्युद्धस्य च तन्नाशकत्वात्कथं भीष्मादिदेहानामनेकसुकृतसाधनानां मया युद्धेन विनाशः कार्य इत्याशङ्काया उत्तरम्—**वासांसीति**। जीर्णानि विहाय वस्त्राणि नवानि गृह्णाति विक्रियाशून्य एव नरो यथेत्येतावतैव निर्वाहे अपराणीति विशेषणमुत्कर्षातिशयख्यापनार्थं तेन यथा निकृष्टानि वस्त्राणि विहायोत्कृष्टानि जनो गृह्णातीत्यौचित्यायातम्। तथा जीर्णानि वयसा तपसा च कृशानि भीष्मादिशरीराणि विहाय अन्यानि देवादिशरीराणि सर्वोत्कृष्टानि चिरोपार्जितधर्मफलभोगाय संयाति सम्यक् गर्भवासादिक्लेशव्यतिरेकेण प्राप्नोति देही प्रकृष्टधर्मानुष्ठातृदेहवान् भीष्मादिरित्यर्थः। "अन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं दैवं वा प्राजापत्यं वा ब्राह्मं वा" इत्यादिश्रुतेः। एतदुक्तं भवति भीष्मादयो हि यावज्जीवं हि धर्मानुष्ठानक्लेशेनैव जर्जरशरीरा वर्तमानशरीरपातमन्तरेण तत्फलभोगायासमर्था यदि धर्मयुद्धेन स्वर्गप्रतिबन्धकानि जर्जरशरीराणि पातयित्वा दिव्यदेहसम्पादनेन स्वर्गभोगयोग्याः क्रियन्ते त्वया तदात्यन्तमुपकृता एव ते। दुर्योधनादीनामपि स्वर्गभोग्यदेहसंपादनान्महानुपकार एव। तथा चात्यन्तमुपकारके युद्धेऽपकारकत्वभ्रमं मा कार्षीरिति अपराणि अन्यानि संयातीति पदत्रयवशाद्भगवदभिप्राय एवमभ्यूहितः। अनेन दृष्टान्तेनाविकृतत्वप्रतिपादनमात्मनः क्रियत इति तु प्राचां व्याख्यानमतिस्पष्टम् ॥ २२ ॥

शं० टी०—नन्वात्मनः स्वतो विक्रियावत्त्वाभावेपि पूर्वापरदेहपरिग्रहपरित्यागयोर्विक्रियावत्त्वमौपाधिकं सम्भवति पूर्वापरगिरियोगाद्भानोरिव तेनाविक्रियत्वमसिद्धमित्याशङ्क्य वासांसि गृह्णतो जहतश्च पुरुषस्य यथाऽविक्रियत्वं तथैवात्मनोऽपि देहोपादानविसर्गयोरित्यात्मनस्त्वविक्रियत्वं देहादिभिन्नत्वं तद्धर्मतत्कर्मतदवस्थाराहित्यं च सूचयितुमाह—**वासांसीति**। नरः पुरुषो जीर्णानि वासांसि विहायापराणि नामरूपलक्षणैः पूर्वविपरीतानि नवानि वासांसि स्वयमविक्रियः सन्नेव यथा गृह्णाति तथा देही देहेहमित्युपलभ्यमान आत्मा स्वयमविकारात्मना स्थितः सन्नेव जीर्णानि कालकर्मवशात्त्याज्यतां प्राप्तानि शरीराणि विहाय अन्यानि नामरूपजातिगुणविशेषैः पूर्वविलक्षणानि संयाति प्राप्नोति न तु स्वयं विक्रियते यथा वस्त्राणामेवागमनिर्गमो नामरूपवैचित्र्यं शैथिल्यं च न तु पुरुषस्य तथा शरीराणामेवागमापायाववान्तरविकारश्च न त्वात्मनो निरवयवस्येति देहेन्द्रियादिभ्यो भिन्नत्वमविक्रियत्वं नित्यत्वं चात्मनः सूचितं भवति ॥ २२ ॥

श्री० टी०—नन्वात्मनोऽविनाशित्वेऽपि तदीयशरीरनाशं पर्यालोच्य शोचामीति चेत्तत्राह—**वासांसीति**। कर्मनिबन्धनभूतानां देहानामवश्यम्भावित्वान्न जीर्णदेहनाशे शोकावकाश इत्यर्थः ॥ २२ ॥

स० टी०—ननु मास्त्वात्मनो नाशस्तथाप्येषां महात्मनाम् ॥ कथं भीष्मादिदेहानां नाशः कार्यो

मयेति चेत् ॥ १ ॥ त्यक्त्वा जीर्णानि वस्त्राणि यथा गृह्णात्यविक्रियः ॥ जनो नवानि श्रेष्ठानि जीर्णानि वयसा तथा ॥ २ ॥ भीष्मादिकशरीराणि त्यक्त्वा भीष्मादिदेहिकः ॥ सर्वोत्कृष्टानि देवादिशरीराणि प्रयात्यसौ ॥ ३ ॥ यावज्जीवं हि भीष्माद्या धर्मानुष्ठानखेदतः ॥ जर्जरीभूतदेहास्ते सर्वे स्वर्गाभिलाषिणः ॥ ४ ॥ जर्जराणि शरीराणि पातयित्वा रणे भवान् ॥ दिव्यदेहप्रदानेन तेषामुपकृतिं पराम् ॥ ५ ॥ करोत्वेवं हि युद्धेऽस्मिन्धर्म्ये सर्वोपकारिणि ॥ मा कार्षीर्दोषबुद्धिं त्वमित्यभिप्राय ईशितुः ॥ ६ ॥ २२ ॥

भा० टी०—नन्वात्मनः पुरातनदेहत्यागे नवीनदेहोपादाने च सति विक्रियावत्त्वध्रौव्यादविक्रियत्वमसिद्ध-मित्याशङ्क्यां दृष्टान्तेन परिहरति—**वासांसीति** । यथा लोके जीर्णानि दुर्बलतां गतानि वस्त्राणि नरः पुरुषः परित्यज्यापराण्यन्यानि नवान्युपादत्ते तद्वदेव देह्यात्मा जीर्णानि शरीराणि विहायान्यानि नवानि सङ्गच्छति। जीर्णानीत्यादिविशेषणत्रयेण वस्त्राणां शरीराणां च जीर्णत्वादिमत्त्वेपि तदुपादानत्यागकर्त्रोः पुरुषदेहिनोस्तत्त्वा-भावबोधकेन तयोरविक्रियत्वं कथितम् । तथाच पुरुषवदविक्रिय एवात्मेत्यर्थः । यत्तु केचित् 'नन्वे-वमात्मनोऽविनाशित्वेपि देहानां विनाशित्वात् युद्धस्य तन्नाशकत्वात् कथं भीष्मादिदेहानामनेकसुकृतसाधनानां मया युद्धेन विनाशः कार्य इत्याशङ्कायामुत्तरं वासांसीति । यथा निकृष्टानि वस्त्राणि विहाय नवान्युत्कृष्टानि जनो गृह्णाति तथा वयसा तपसा च कृशानि भीष्मादिशरीराणि विहायान्यानि देवादिशरीराणि सर्वोत्कृ-ष्टानि संयाति देही प्रकृष्टधर्मानुष्ठाता देहवान् भीष्मादिरित्यर्थः । तथाच 'अत्यन्तमुपकारके युद्धेऽपकारकत्वभ्रमं मा कार्षीः' इति तच्चिन्त्यम् । प्रकरणविरोधस्य विशेष्याध्याहारदोषस्य च स्पष्टत्वात् । जीर्णानीतिविशेष-णात् नवीनादिसाधारणशरीरनाशनिमित्तस्य युद्धस्यात्यन्तोपकारकताया मूलादसिद्धेश्च उक्तरीत्यापराणीति पदस्य सार्थकत्वेन जीर्णानि विहाय नवानि गृह्णाति विक्रियाशून्य एव नरो यथेत्येतावतैव निर्वाहे अपरा-णीति विशेषणमुत्कर्षातिशयख्यापनार्थमिति वर्णनं त्वयुक्तमिति दिक् । अत एवानेन दृष्टान्तेनाविकृतत्वप्रति-पादनमात्मनः क्रियत इति प्राचां व्याख्यानमतिस्पष्टमिति कटाक्षोपि परास्तः । आत्माविक्रियत्वप्रतिपादक-पूर्वोत्तरप्रकरणानुसारिमूलादतिस्पष्टतया प्रतीयमानस्य भाष्योक्तव्याख्यानस्यैव सम्यक्त्वात् ॥ २२ ॥

प० टी०—नन्वात्मनोऽविनाशित्वं निरूढमेव परंतु तदधिष्ठितदेहवधभयेन शोक इति चेत्तत्राह—**वासां-सीति** । उत्पत्स्यमाननूतनदेहानां कर्मनिबन्धत्वेनावश्यम्भावात्तथैव जीर्णदेहनाशेऽपीति न दोषावकाशः॥२२॥

रा० टी०—पूर्वत्र पुराणपदेन जीवस्य देहाद्देहान्तरप्राप्तिरुक्ता । सा तु देहान्यनित्यजीवसत्त्व एव युक्ता । 'कौमारं यौवनं जरा' इत्यत्र देहात्मविवेकोक्तावपि कौमारादिदेहानामतिभिन्नत्वाभावान्न तेन देहात्मनोर्विनाशि-त्वाविनाशित्वलक्षणो विवेकः स्फुटमनुभवारूढो भवतीत्यतो दृष्टान्तान्तरेण तमुपपादयति—**वासांसीति** । यद्वा ईश्वरस्य देहतः स्वरूपतश्च नित्यत्वेन तद्विषये शोकाभावेपि जीवविषये तु स भविष्यति । जीवो नि-त्यस्तद्देहयोगवियोगौ कौमारादिदेहवदेवेत्युक्तावपि सर्वलोकप्रसिद्धजनिमृतिसत्त्वात् । युद्धे च तत्प्राप्तेस्तन्निमि-त्तः शोक इत्यत आह—**वासांसीति** । शरीरयोगवियोगयोः कौमारादिवच्छोककारणत्वाभावोङ्गीकृतश्चेत्तर्हि ज-निमृती अपि न शोककारणम् । देहयोगवियोगयोरेव जनिमृतिशब्दार्थत्वादिति भावः । यद्वा वाससो जराव-त्स्वशरीरे जरादावस्वातन्त्र्यदर्शनात्सर्वत्रास्वातन्त्र्यं जीवस्य ज्ञेयमित्यनेनोच्यते । श्लोकार्थस्तु व्यक्तः॥२२॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ॥
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

त० टी०—ननु गृहदाहे तदन्तर्वर्तिपुरुषदाहवद्देहस्य छेददाहादौ सत्यात्मनोऽपि छेददाहादिः किन्न स्या-त्तथात्वेऽविनाशित्वहानिरित्यत आह—**नैनमिति** । सर्वदेहेषु समानरूपमेनमात्मानं शस्त्राग्न्यब्वायवः

छेदनदहनक्लेदनशोषणात्मकक्रियाफलाश्रयं न कुर्वन्ति छेदनदहनक्लेदनादिना विनाशयितुं न शक्नुवन्तीत्यर्थः। एकेनापि प्रसज्यात्मकनञोक्तार्थसिद्धौ तस्य चतुःकृत्व उपादानमुक्तार्थदार्ढ्यायार्जुनस्य हृदि मन्दीभूयापि शङ्का न तिष्ठेदित्येतदर्थम् ॥ २३ ॥

म० टी०—ननु देहनाशे तदभ्यन्तरवर्तिन आत्मनः कुतो न विनाशो गृहदाहे तदन्तर्वर्तिपुरुषवदित्यत आह—**नैनमिति**। शस्त्राण्यस्यादीनि अतितीक्ष्णान्यपि एनं प्रकृतमात्मानं न छिन्दन्ति अवयवविभागेन द्विधा कर्तुं न शक्नुवन्ति तथा पावकोऽग्निरतिप्रज्वलितोऽपि नैनं भस्मीकर्तुं शक्नोति। न चैनमापोऽत्यन्तं वेगवत्योऽपि आर्द्रीकरणेन विश्लिष्टावयवं कर्तुं शक्नुवन्ति मारुतो वायुरतिप्रबलोऽपि नैनं नीरसं कर्तुं शक्नोति सर्वनाशकाक्षेपे प्रकृते युद्धसमये शस्त्रादीनां प्रकृतत्वादवयुत्यानुवादेनोपन्यासः। पृथिव्यप्तेजोवायूनामेव नाशकत्वप्रसिद्धेस्तेषामेवोपन्यासो नाकाशस्य ॥ २३ ॥

शं० टी०—ननु घटजलनाशात्तत्रस्थप्रतिबिम्बस्येव शस्त्रादिना देहविनाशे सत्यात्मनोऽपि तत्रोपलभ्यमानस्य चरमविकारः स्यादेवातोऽविक्रियत्वमसिद्धमित्यतआह—**नैनमिति**। शस्यन्ते पदार्था एभिरिति शस्त्राण्यसिगदादयः पृथिवीविकारा देहवदेनं प्रकृतमात्मानं न छिन्दन्त्यवयवविश्लेषं न कुर्वन्ति निरवयवत्वादाकाशवत्तेषां शसनक्रियाविषयो न भवत्यात्मेत्यर्थः। आपोऽपि नैनमात्मानं देहवत् क्लेदयन्ति आर्द्रतामापाद्य सावयवस्येव निरवयवस्यात्मनः शैथिल्यं सम्पादयितुं न शक्नुवन्ति। पावकोऽग्निरपि देहवन्नैनं दहति दहनक्रियाया अविषयत्वात् भस्मीकर्तुं न शक्नोति। स्नेहशोषणेन देहं यथा शोषयति तथा मारुतोऽप्येनं न शोषयति शोषणक्रियाया अगोचरत्वादेनं शुष्कीकर्तुं न शक्नोति। यथा घटं जलं क्लेदयति शस्त्राणि ताडनीयानि ताडयन्ति वायुः शोषयति वह्निर्दहति तथा तत्रस्थमाकाशं निरवयवं न क्लेदयति न ताडयन्ति न शोषयति न दहति तद्वदात्मानं देहस्थमिति भावस्ततोऽविक्रियत्वमात्मनः सिद्धम्। एतेन जरारोगादयो भौतिका दैविकाश्चोपद्रवाः सर्वे शरीरस्यैव नात्मनोऽहमर्थस्येति देहादिभिन्नत्वेनात्मनो देहं विषयीकृत्य प्राप्तानर्थागोचरत्वमुक्तं ततस्तेषु प्राप्तेष्वपि स्थिरप्रज्ञतया ब्रह्मविद्भिः स्थातव्यमिति सूचितं भवति ॥ २३ ॥

श्री० टी०—कथं हन्तीत्यनेनोक्तं वधसाधनाभावं दर्शयन्नविनाशित्वमात्मनः स्फुटीकरोति—**नैनमिति**। आपो नैनं क्लेदयन्ति मृदुकरणेन शिथिलं न कुर्वन्ति ॥ २३ ॥

स० टी०—ननु देहविनाशेन कुतो नाशो न चात्मनः ॥ गृहदाहे यथा दाहस्तदभ्यन्तरवर्तिनः ॥ १ ॥ तथेत्याशङ्क्य भगवानाह सर्वज्ञ ईश्वरः ॥ शस्त्राण्यङ्गविभागेन द्विधा कर्तुं चिदात्मकम् ॥ २ ॥ न शक्नुवन्ति वह्निर्नो भस्मीकर्तुं क्षमो विभुम् ॥ न चार्द्रीकरणेऽप्यापः शक्नुवन्त्येनमान्तरम् ॥ ३ ॥ विश्लिष्टाङ्गकमात्मानं कर्तुं तद्वन्न मारुतः ॥ आत्मानं नीरसं कर्तुं शक्नोति बलवत्तरः ॥ ४ ॥ प्रसिद्धा नाशका एते प्रभवन्ति न चात्मनि ॥ पृथिव्यब्वह्निवायूनां नाशकत्वप्रसिद्धितः ॥ ५ ॥ तेषामप्यान्तरो ह्यात्मा तं विना ते मृषात्मकाः ॥ ६ ॥ २३ ॥

भा० टी०—तस्याविक्रियत्वं प्रकारान्तरेण पुनराह—**नैनमित्यादिना**। न च क्लेदयन्ति विश्लिष्टावयवं न कुर्वन्ति निरवयवत्वं हेतुः ॥ २३ ॥

प० टी०—**नैनमिति**। क्लेदनं नाम मृदुत्वहेतोः शिथिलीकरणं तथाविधो न भवति ॥ २३ ॥

रा० टी०—ननु जीवचितः कालकृतस्य बिम्बनाशादिनिमित्तकृतस्य च नाशस्याभावेपि दक्षशिरश्छेद इव शस्त्रादिप्रबलहेतुना नाशोस्ति किमित्यत आह—**नैनमिति**। एनं देहीति प्रकृतं जीवं न क्लेदयति। मृदुकरणेन शिथिलं न कुर्वन्तीत्यर्थः ॥ २३ ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

त० टी०—शस्त्रादिजन्यतन्नाशानर्हत्वे हेतूनाह—**अच्छेद्य इति** । यतोऽच्छेद्योऽयं तस्मादेनं शस्त्राणि न छिन्दन्ति । एवमेवाशोष्यान्तानि विशेषणानि हेतुरूपविशेषणानि योज्यानि । अच्छेद्यत्वादिष्वपि हेतुमाह—**नित्य इति** । अनित्यश्छेद्यदाह्यादिरूपो भवति, नो नित्यः । नित्यत्वेऽपि हेतुः—**सर्वगत इति** । सर्वगतत्वव्यापनस्वभावोऽतिसूक्ष्म इत्यर्थः । नहि व्यापनशीलमतिसूक्ष्मं वस्तु शस्त्राग्न्यादिभिश्छेद्यदाह्यादि कर्तुं शक्यते । यतोऽच्छेद्योऽदाह्यश्च तत एव स्थाणुः स्थिरस्वभावः स्वरूपान्यथाभावरहितः । स्थाणुत्वादक्लेद्यः अद्भिरार्द्रीकृत्य स्वरूपाच्च्यावयितुमशक्यः । स्थाणुत्वादेवाचलः अप्रकम्प्यः । अचलत्वादशोष्यो वायुना शोषयितुमशक्यः । तस्मादुक्तेभ्यो हेतुभ्यः सनातनः नित्यस्वरूप इत्यर्थः ॥ २४ ॥

म० टी०—शस्त्रादीनां तन्नाशकत्वासामर्थ्ये तस्य तज्जनितनाशानर्हत्वे हेतुमाह—**अच्छेद्य इति** । यतोऽच्छेद्योऽयं अतो नैनं छिन्दन्ति शस्त्राणि । अदाह्योऽयं यतोऽतो नैनं दहति पावकः । यतोऽक्लेद्योऽयं अतो नैनं क्लेदयन्त्यापः । यतोऽशोष्योऽयं अतो नैनं शोषयति मारुत इति क्रमेण योजनीयम् । एवकारः प्रत्येकं सम्बध्यमानोऽच्छेद्यत्वाद्यवधारणार्थः । चः समुच्चये हेतौ वा । छेदाद्यनर्हत्वे हेतुमाह उत्तरार्धेन—**नित्यमिति** । नित्योऽयं पूर्वापरकोटिरहितोऽतोऽनुत्पाद्यः असर्वगतत्वे ह्यनित्यत्वं स्यात् "यावद्विकारं तु विभागः" इति न्यायात् पराभ्युपगतपरमाण्वादीनामनभ्युपगमात् । अयं तु सर्वगतो विभुरतो नित्य एव । एतेन प्राप्यत्वं पराकृतं यदि चायं विकारी स्यात्तदा सर्वगतो न स्यात् । अयं तु स्थाणुरविकारी अतः सर्वगत एव । एतेन विकार्यत्वमपाकृतं यदि वायं चलः क्रियावान् स्यात् तदा विकारी स्यात् घटादिवत् । अयं त्वचलोऽतो न विकारी एतेन संस्कार्यत्वं निराकृतं पूर्वावस्थापरित्यागेनावस्थान्तरापत्तिर्विक्रिया अवस्थैक्येपि चलनमात्रं क्रियेति विशेषः । यस्मादेवं तस्मात् सनातनोऽयं सर्वदैकरूपः न कस्या अपि क्रियायाः कर्मेत्यर्थः । उत्पत्त्याप्तिविकृतिसंस्कृत्यन्यतमक्रियाफलयोगे हि कर्मत्वं स्यात् । अयं तु नित्यत्वान्नोत्पाद्यः अनित्यस्यैव घटादेरुत्पाद्यत्वात् । सर्वगतत्वान्न प्राप्यः परिच्छिन्नस्यैव घटादेः प्राप्यत्वात् । स्थाणुत्वादविकार्यः विक्रियावतो घृतादेरेव विकार्यत्वात् । अचलत्वादसंस्कार्यः । सक्रियस्यैव दर्पणादेः संस्कार्यत्वात् । तथा च श्रुतयः " आकाशवत्सर्वगतश्च नित्यः । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः । निष्कलं निष्क्रियं शान्तम् " इत्यादयः " यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यो वायौ तिष्ठन्वायोरन्तरः " इत्याद्या च श्रुतिः सर्वगतस्य सर्वान्तर्यामितया तदविषयत्वं दर्शयति—यो हि शस्त्रादौ न तिष्ठति तं शस्त्रादयश्छिन्दन्ति । अयं तु शस्त्रादीनां सत्तास्फूर्तिप्रदत्वेन तत्प्रेरकस्तदन्तर्यामी । अतः कथमेनं शस्त्रादीनि स्वव्यापारविषयीकुर्युरित्यभिप्रायः । अत्र " येन सूर्यस्तपति तेजसेद्धः " इत्यादिश्रुतयोऽनुसन्धेयाः सप्तमाध्याये च प्रकटीकरिष्यति श्रीभगवानिति दिक् ॥ २४ ॥

शं० टी०—वासांसि जीर्णानीति यतो देहव्यतिरिक्तत्वमात्मनः प्रतिपादितं ततो देहस्यैव छेदादयो दृश्यविषयकाः न त्वात्मनो निरवयवस्येति छेदक्लेददहनशोषणानि भूतचतुष्टयकार्याणि न प्रसरन्त्यात्मनीति स्फुटमाह—**अच्छेद्य इति** । सनातनोऽनादिः "न तस्य कश्चिज्जनिता न चाधिपः" इति श्रवणादात्मायं निरवयवत्वेन कुतश्चित्कारणादुत्पन्नो न भवतीति सनातनः । जन्मादिविकाररहितस्तत एव नित्यः नित्यत्वादेव सर्वगतः परिपूर्णः नित्यत्वे सर्वगतत्वेप्यात्मनः क्रियाशक्त्याश्रयत्वमस्त्विति न शङ्कनीयम् ।

नित्यत्वादिधर्मवत्याकाशे तदद्दर्शनादत एव स्थाणुः स्थिरस्वभावः स्थिरत्वादेवाचलः अयमयमित्यपरोक्षेण निर्देश आत्मनो विद्वत्प्रत्यक्षाविषयत्वज्ञापनार्थम् । सनातनत्वान्नित्यत्वात् स्थिरत्वादचलत्वाच्चायमात्मा स्वयमच्छेद्यः छेत्तुमशक्यः अदाह्यो दग्धुमशक्यः । अक्लेद्यः क्लेदयितुमशक्यः । अशोष्यश्च शोषयितुमशक्य एव भवति शस्त्रादीनामित्यर्थः । सनातनत्वविशेषणेन निर्विकारत्वं नित्यत्वविशेषणेन प्रमाणान्तराबाध्यत्वं स्थिरत्वाचलत्वविशेषणाभ्यां क्रियाया अनाश्रयत्वमविषयत्वं पूर्णत्वविशेषणेनाऽद्वितीयत्वं नित्यशुद्धत्वमानन्दैकरसत्वं चात्मनः सुचितं भवति ॥ २४ ॥

श्री० टी०–तत्र हेतूनाह–**अच्छेद्य इति सार्धेन** । निरवयवत्वादच्छेद्योऽयमक्लेद्यश्च अमूर्तत्वाददाह्यो द्रवत्वाभावादशोष्य इति भावः । इतश्च छेदादियोग्यो न भवति यतो नित्यः । अविनाशी सर्वत्र गतः । स्थाणुः स्थिरस्वभावः रूपान्तरापत्तिशून्यः । अचलः पूर्वरूपापरित्यागी सनातनः अनादिः ॥ २४ ॥

स० टी०–शस्त्रादेरात्मनो नाशासामर्थ्ये हेतवो ह्यमी ॥ अच्छेद्यत्वादयस्तेन नित्य आत्माक्षरोऽव्ययः ॥ १ ॥ अन्योन्यनाशहेतूनि भूतान्यात्मानमान्तरम् ॥ नोत्सहन्ते यतो हन्तुं नाशशङ्कामतस्त्यज ॥ २ ॥ नित्यत्वात्सर्वगो व्यापी व्यापित्वात्स्थाणुवत्स्थिरः ॥ स्थिरत्वाच्च क्रियाशून्यस्तस्मादात्मा चिरन्तनः ॥ ३ ॥ नित्यत्वान्नायमुत्पाद्यो न प्राप्यः सर्वगो यतः ॥ स्थाणुत्वादविकार्योऽयमसंस्कार्योऽचलत्वतः ॥ ४ ॥ संस्कारस्तु गुणाधानं दोषापनयनं च वा ॥ निर्गुणेन गुणाधानं स्वतः शुद्धेन चापरः ॥ ५ ॥ सत्तास्फूर्तिप्रदातास्ति शस्त्रादीनामयं यतः ॥ प्रेरकोऽन्तर्यामितया कथमेनमिमान्यपि ॥ ६ ॥ शस्त्रादीनि प्रकुर्युस्तं स्वव्यापारैकगोचरम् ॥ ७ ॥ २४ ॥

भा० टी०–फलितमाह–**अच्छेद्य इति** । एवकारस्य सर्वत्र संबन्धः । यस्मादन्योन्यनाशहेतूनि भूतानि आत्मानं नाशयितुं नोत्सहन्ते तस्मान्नित्यः परमाणुनित्यत्वे प्रमाणाभावात् । न तत्रातिप्रसङ्गः । अत एव सर्वगतः तत एव सर्वगताकाशवत्स्थाणुरिव स्थिर इत्यर्थः । तत एवाचलः अत एवायमात्मा सनातनश्चिरन्तनः न कुतश्चित्कारणान्निष्पन्न इतीदं भाष्यमुपलक्षणं यथेष्टहेतुहेतुमद्भावस्यापि तथा चोत्पाद्याप्यविकार्यसंस्कार्यरूपाणां क्रियाफलानां क्रमेण नित्य इत्यादिविशेषणचतुष्टयेन निराकरणं हेतुहेतुमद्भावविपर्ययश्च । न कुतश्चित्कारणान्निष्पन्न इति भाष्यात् । तस्योपलक्षणार्थत्वाच्च सिध्यत इति न कोपि विरोधः । यत्तु तथा च श्रुतयः "आकाशवत्सर्वगतश्च नित्यः । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः । निष्कलं निष्क्रियं शान्तम् " इत्याद्याः । " यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो योप्सु तिष्ठन्नद्भ्योन्तरो यस्तेजसि तिष्ठंस्तेजसोन्तरो यो वायौ तिष्ठन्वायोरन्तरः " इत्याद्याश्च श्रुतयः सर्वगतस्य सर्वान्तर्यामितया तदविषयत्वं दर्शयन्ति । यो हि शस्त्रादौ न तिष्ठति तं शस्त्रादयश्छिन्दन्ति । अयं तु शस्त्रादीनां सत्तास्फूर्तिप्रदत्वेन तत्प्रेरकस्तदन्तर्यामी अतः कथमेनं शस्त्रादीनि स्वव्यापारविषयीकुर्युरित्यभिप्राय इति केचिद्वर्णयन्ति । तत्रेदं वक्तव्यम् । त्वंपदशोधनप्रकरणे तत्पदवाच्यान्तर्यामिप्रतिपादकश्रुत्युदाहरणमयुक्तं गतासूनगतासूनित्युपक्रमः । देहिनोऽस्मिन्नन्तवन्त इमे देहा वासांसि जीर्णानीत्यादिर्मध्यनिर्देशः । देही नित्यमित्युपसंहारः । इत्येवंरूपतात्पर्यलिङ्गैस्त्वंपदनिरूपणप्रतीतेः स्पष्टत्वात् । आद्यषट्कं त्वंपदशोधनपरमिति सर्वैः स्वेन च तथैव स्थापितत्वाच्च । अभेदस्तु नियम्यनियामकोपाधिविनिर्मुक्तयोः शुद्धचैतन्ययोर्वास्तवः । औपाधिकस्तु भेद एव । तथा च भाष्यम् " अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशो न पारमार्थिकः" इति । एवं च येन शुद्धेन शुद्धस्यास्याभेदः । तस्य नियामकत्वाभावात् । नान्तर्यामिश्रुत्युदाहरणं प्रकृत उपयुक्तम् । तथाचौपाधिकभेदप्रतिपादकानि भगवतो बादरायणस्य सूत्राणि अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् । नच स्मार्तमतद्धर्माभिलापात् । शारीरश्चोभयेपि हि भेदेनैनमधीयत इति । "य इमं च लोकं परं च लोकं सर्वाणि च भूतान्यन्तरो यम-

यति " इत्युपक्रम्य श्रूयते । "यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति" इत्यादि । "अत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयितान्तर्यामी" इति श्रूयते । सः अधिदैवाद्यभिमानी कश्चिद्देवतात्मा स्यात् । प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी वा स्यात् अर्थान्तरं किंचिद्वा स्यात् । इति प्राप्ते राद्धान्तः योन्तर्याम्यधिदैवादिषु श्रूयते स परमात्मैव स्यान्नान्यः । कुतः तद्धर्मव्यपदेशात् । तस्य परमात्मनो धर्माणामस्यां श्रुतौ व्यपदेशात् । नच स्मार्तं प्रधानमन्तर्यामिशब्दप्रतिपाद्यं भवितुमर्हति कस्मादतद्धर्माभिलापात् । द्रष्टृत्वादीनामप्रधानधर्माणां कथनात् । ननु शारीरोस्त्वित्यत आह—शारीर इति । पूर्वसूत्रान्नेत्यनुवर्तते शारीरश्च नान्तर्यामी स्यात् । हि यस्मादुभयेऽपि काण्वा माध्यंदिनाश्चान्तर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते । यो विज्ञाने तिष्ठन्निति काण्वाः । आत्मनि तिष्ठन्निति माध्यन्दिनाः । तस्माच्छारीरादन्य आत्मान्तर्यामीति सिद्धम् । यत्तु-'यो हि शस्त्रादौ न तिष्ठति तं शस्त्रादयश्छिन्दन्ति' इति । तदपि न शस्त्रादौ स्थितस्यापि लोहादेस्तैश्छेदस्योपलब्धेः । तस्मात्सर्वज्ञैर्भाष्यकारैरुक्तो निरवयवत्वहेतुरेव समीचीन इति दिक् । न जायत इति श्लोकेनोक्तस्याप्यात्मज्ञानस्य दृष्टफलस्य व्रीह्यवहननस्यावृत्तिवत् । दृष्टफलत्वाद्दुर्बोधत्वाच्च । पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूप्यते भगवता करुणानिधिना श्रीकृष्णेन कथञ्चिदपि संसारनिमग्नानां मुमुक्षूणां बुद्धिगोचरतामापन्नं स्पष्टतत्त्वं सत् संसारनिवृत्तये स्यादित्यभिप्रायवता इति न पौनरुक्त्यम् । तथा च भगवतो व्यासस्य सूत्रम् । "आवृत्तिरसकृदुपदेशात्" इति । अस्यार्थः । " आत्मा वा अरे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः सोन्वेष्टव्यः स विजिज्ञासितव्यः " इत्यादि श्रूयते । तत्र संशयः किं सकृत्प्रत्ययः कर्तव्य आहोस्विदावृत्त्येति । किं तावत्प्राप्तं सकृत्प्रत्ययः स्यात् । प्रयाजादिवत् । तावता शास्त्रस्य कृतार्थत्वात् । अश्रूयमाणायामप्यावृत्तौ क्रियमाणायामशास्त्रार्थः कृतो भवेत् । नन्वसकृदुपदेशा उदाहृताः श्रोतव्य इत्यादयः । एवमपि यावच्छब्दमावर्तयेत् । सकृच्छ्रवणमित्यादिनातिरिक्तमित्येवं प्राप्ते ब्रूमः । प्रत्ययावृत्तिः कर्तव्या । कुतः असकृदुपदेशात् । श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवंजातीयको ह्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयति । ननूक्तं यावच्छब्दमेवावर्तयेन्नाधिकमिति न दर्शनपर्यवसानत्वादेतेषां दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति यथाऽवघातादीनि तन्दुलनिष्पत्तिपर्यवसानानि तद्वदिति ॥ २४ ॥

प० टी०—अच्छेद्य इति । निरवयवत्वादमूर्तित्वादद्रवत्वात्तथाविधो न भवति । छेद्यत्वादिदेहगतमात्मन्यारोप्यते । तदुक्तम्—'अयःपिण्डगते वह्नौ लोहकारस्य ताडनम् ॥ आरोप्यते तथा लोहे दाहकत्वादिवह्निजम्' इति । अग्रेऽपि तथैवास्तीत्याह—**नित्य इत्यादि** । नित्योऽविनाशी सर्वगतोऽपरिच्छिन्नः स्थाणुः स्थिरस्वभावो रूपान्तरशून्यः । अचलः पूर्वरूपापरित्यागी । सनातनोऽनादिः । एवंभूतश्चेत्कथं नानुभूयत इत्याह—**अव्यक्त इति** । चक्षुराद्यविषयो मनसा ज्ञातव्य इति चेदचिन्त्योऽत एव देहादिभिरविकार्यो विकारं न प्राप्यते ॥ २४ ॥

रा० टी०—ननु न छिन्दन्तीत्यादिलट्प्रयोगेन वर्तमानस्यैव छेदादेर्निषेधादिदानीं दृश्यमानत्वेनात्मनः प्राग्विनाशाभावेप्युत्तरत्र शस्त्रादिना विनाशः स्यादित्यतः छेदादियोग्यतैवात्मनो नास्तीत्याह—**अच्छेद्योऽयमिति** । अयं जीवः । " कृत्याः प्राङ्ण्वुलः " इतिसूत्रेणोक्तकृत्यसंज्ञकस्य ण्यत्प्रत्ययस्य " अर्हे कृत्यतृचश्च " इत्यर्हार्थे छिदिदहेत्यादेर्धातोर्विधानाच्छेदनाद्यर्हो न भवतीत्यर्थः । अयमयमिति पृथग्वचनं योयो जीवः स सर्वोप्येवंरूप इति प्रदर्शनाय । कुतो नार्हतेत्यत उक्तम् । नित्य इत्यादि । सर्वगतः स्थाणुरिति पदविभागः । नित्य इति सर्वगत इत्यस्य विशेषणम् । सर्वगतपदेन सर्वगतत्वविशिष्ट उच्यते । नित्यः सर्वगतत्वविशि-

ष्ट इत्युक्ते सविशेषणे हीतिन्यायेन नित्यत्वं सर्वगतत्वरूपविशेषणमुपसङ्क्रामति । नित्यं यत्सर्वगतत्वमिति तद्वान्सर्वगत इत्यर्थः। स्थाणुरिति यत्किञ्चिन्निमित्तकृतविकारहीनः। अजो नित्यः शाश्वत इत्यत्र शाश्वतपदेन सामान्यतो विकाराभावोक्तावपीह नैमित्तिकनिषेधप्रकरणान्नैमित्तिकविकाराभावोक्त्यर्थं स्थाणुरित्युक्तम्। अतो न पुनरुक्तता । अचलः प्राकृतचलनहीनः । सनातनः वक्ष्यमाणदिशा सशब्द इत्यर्थः । त्वयीश्वरे ब्रह्मणि नो विरुध्यते । विज्ञानशक्तिरहमासमनन्तशक्तेः । "परास्य शक्तिर्विविधैव श्रूयते" इत्यादिश्रुतिस्मृतिरूपशब्द-सहितः तत्प्रतिपाद्य इति यावत् । तथा च स्थाणुत्वेऽपि हरेस्तदैक्षतेत्याद्युक्तकर्तृत्वमचिन्त्यशक्त्यैव युक्तम्। ननु परारीत्या मायावशादित्युक्तं भवति । ननु नित्य इत्यादिविशेषणविशिष्टस्येश्वरत्वादयं जीवो नित्यः सर्वगः स्थाणुरिति भगवदभेदोक्तिरयुक्तेति चेत् । सत्यम् । उक्तानुपपत्तेरेव भेदोक्तिपरत्वादतद्भावे सामानाधिकरण्यं सारूप्यं गमयतीति न्यायाद्गौणी नेया । नित्यसर्वगतत्वादियुक्तभगवत्सरूपोयं जीव इति । उक्तगुणकेश्वर-प्रतिविम्बो जीव इति यावत् । तावता कथं छेदनाद्यनर्हो जीव इति शङ्कानिरास इति चेत् । यो यत्प्रतिबि-म्बः सोऽसति विरोधे तत्समानधर्मक इति व्याप्तिबलेन जीवस्य स्थाणुत्वादीश्वरधर्मसमानधर्मप्राप्तेरिति तात्पर्यात्। अनाशिनोऽप्रमेयस्येत्यत्राजो नित्यः शाश्वत इत्यत्र नित्य इति प्रकृतार्थे च जीवस्येश्वरप्रतिविम्बत्वोक्तावपि न पुनरुक्तता शङ्क्या । तत्तच्छङ्कानिवर्तकभिन्नगुणविशिष्टेश्वरप्रतिविम्बत्वस्य तत्र तत्र कथनादिति ज्ञेयम् । ननु सयुक्तिकमच्छेद्यत्वाद्युक्त्यैव नैमित्तिकनाशशङ्कानिरासात् नैनमिति व्यर्थमिति चेत्। प्रवृत्ते शस्त्रसंपात इत्यु-क्तेः प्रसक्तौ सत्यामपि वर्तमानस्य छेदादेरदृष्टेरात्मनः छेदाद्ययोग्यत्वं युक्तमिति प्रदर्शनार्थत्वात् । यद्वा नै-नमित्यादिश्लोक ईश्वरविषयः । तथाहि । वेदाविनाशिनमित्यत्रेश्वरस्य स्वतो नाशाभावोक्त्या तन्निमित्तशो-काभावेपि युद्धगतशस्त्रादिकरणविशेषेण च्छेदादिप्रसक्तेस्तन्निमित्तशोको ममेत्यत आह—**नैनमिति** । य एनं वेत्तीति श्लोके प्रकृतमीश्वरम्। शिष्टं व्यक्तम्। एतेनेश्वरस्य देहतोपि च्छेदाद्यभावात् स्वातन्त्र्यमित्युक्तं भवति । एनमेनमिति पृथक्पृथग्वचनं सर्वरूपाणामेवंभावप्रदर्शनाय । एवमव्यक्तोयमित्यत्रापि । ननु जीवस्य स्वतो ना-शाभावेपि युद्धगतशस्त्रादिकरणविशेषेण छेदादिः स्यादित्यत आह—**अच्छेद्योऽयमिति** । अयं जीवः । ननु जी-वस्यापीश्वरवदच्छेद्यत्वादिसत्वे सर्वसाम्यं स्यात् । तथा च किं तत्पूजयेत्यतो जीवस्य नित्यमीशाधीनता-माह—**नित्य इति** । सर्वगतस्थाणुरित्येकं पदम् । नित्य इति योग्यतया स्थितिरूपक्रियाविशेषणम् । क्रियाव्यय-विशेषणानां च नपुंसकत्वमेकवचनान्तत्वं च वाच्यमित्येतन्नाश्रितम्। अयं जीवः नित्यं सर्वगते हरौ तिष्ठतीति नित्यः सर्वगतस्थः । तदधीनतया सदा स्थित इति यावत्। स चासावणुश्च सर्वगतस्थाणुरित्यर्थः । ईशजीवयोः सर्वगतत्वाणुत्वरूपवैषम्यान्न सर्वसाम्यमितिभावेन सर्वगतेति अणुरिति चोक्तम्। ननु जीवस्येशाधीनत्वं यदा न स्यात्तदा स्यात्सर्वसाम्यम् । तथा च न तत्पूजा कार्येत्यत आह—**अचल इति** । सर्वगतस्थपदं बुद्धिविवि-क्तमाकृष्यते भावप्रधानम् । सर्वगतस्थत्वान्न कदाचिच्चलतीत्यचलः । नित्यं सर्वगतस्थ इत्युक्त्यैवास्यार्थस्य लाभेऽपि केनचिद्वरादिनिमित्तेनापि तदधीनत्वस्य (नाश इति) नैमित्तिकनाशाभावोक्त्यर्थमचल इत्युक्तिः। कुतः सदा हर्यधीनत्वं जीवस्येत्यत उक्तम्—**सनातन इति** । नादेन विधिनिषेधरूपशब्देन सह वर्तत इति सनादः । सनाद एव सनातनः । दशब्दस्य च्छांदसस्तनादेशः । विधिनिषेधबद्धत्वात्सदा तदधीन इति भावः । तदुक्तं विष्णुपुराणे । 'नित्यं सर्वगते विष्णावणुर्जीवो व्यवस्थितः' इत्यादि ॥ २४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ॥
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

त० टी०—किञ्चान्योऽप्यशोच्यत्वे हेतुरित्याह—**अव्यक्त इति** । छेद्यादिद्रव्याणि यथा यैः प्रमाणैर्व्यज्यन्ते तथा तैः प्रमाणैरयमात्मा न व्यज्यतेऽतोऽव्यक्तः । तथा स्वेतरसमस्तवस्तुस्वरूपस्वभावो-

पम्येन चिन्तयितुमनर्हस्ततोऽचिन्त्यः, अत एवाविकार्यः । दध्यादिवद्विकारशून्य उच्यते । तस्मादेवमुक्तस्वरूपस्वभावमेनमात्मानं विदित्वा त्वं शोचितुं नार्हसि ॥ २९ ॥

म० टी०—छेद्यत्वादिग्राहकप्रमाणाभावादपि तदभाव इत्याह—**अव्यक्तोयमित्याद्यर्धेन** । योहीन्द्रियगोचरो भवति स प्रत्यक्षत्वाद्व्यक्त इत्युच्यते। अयं तु रूपादिहीनत्वान्न तथा अतो न प्रत्यक्षं तत्र छेद्यत्वादिग्राहकमित्यर्थः । प्रत्यक्षाभावेऽप्यनुमानं स्यादित्यत आह—अचिन्त्योऽयं चिन्त्योऽनुमेयस्तद्विलक्षणोऽयं क्वचित्प्रत्यक्षो हि वह्न्यादिर्गृहीतव्याप्तिकस्य धूमादेर्दर्शनात् क्वचिदनुमेयो भवति। अप्रत्यक्षे तु व्याप्तिग्रहणासंभवान्नानुमेयत्वमिति भावः । अप्रत्यक्षस्यापीन्द्रियादेः सामान्यतो दृष्टानुमानविषयत्वं दृष्टमत आह—अविकार्योऽयं यद्विक्रियावच्चक्षुरादिकं तत्स्वकार्यान्यथानुपपत्त्या कल्प्यमानमर्थापत्तेः सामान्यतो दृष्टानुमानस्य च विषयो भवति । अयं तु न विकार्यो न विक्रियावानतो नार्थापत्तेः सामान्यतो दृष्टस्य वा विषय इत्यर्थः। लौकिकशब्दस्यापि प्रत्यक्षादिपूर्वकत्वात्तन्निषेधेनैव निषेधः। ननु वेदेनैव तत्र छेद्यत्वादि ग्रहीष्यत इत्यत आह—उच्यते वेदेन सोपकरणेन अच्छेद्याव्यक्तादिरूप एवायमुच्यते तात्पर्येण प्रतिपाद्यते अतो न वेदस्य तत्प्रतिपादकस्यापि छेद्यत्वादिप्रतिपादकत्वमित्यर्थः । अत्र नैनं छिन्दन्ति इत्यत्र शस्त्रादीनां तन्नाशकसामर्थ्याभाव उक्तः । अच्छेद्योऽयमित्यादौ तस्य च्छेदादिकर्मत्वायोग्यत्वमुक्तम्। अव्यक्तोऽयमित्यत्र तच्छेदादिग्राहकमानाभाव उक्त इत्यपौनरुक्त्यं द्रष्टव्यम्। वेदाविनाशिनमित्यादीनां तु श्लोकानामर्थतः शब्दतश्च पौनरुक्त्यं भाष्यकृद्भिः परिहृतं दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान्वासुदेवः । कथं नु नाम संसारिणां बुद्धिगोचरमापन्नं तत्त्वं संसारनिवृत्तये स्यादिति वदद्भिः । एवं पूर्वोक्तयुक्तिभिरात्मनो नित्यत्वे निर्विकारत्वे च सिद्धे तव शोको नोपपन्न इत्युपसंहरति—**तस्मादित्यर्धेन** । एतादृशात्मस्वरूपवेदनस्य शोककारणनिवर्तकत्वात्तस्मिन्सति शोको नोचितः कारणाभावे कार्याभावस्यावश्यकत्वात् तेनात्मानमविदित्वा यदन्वशोचस्तद्युक्तमेव आत्मानं विदित्वा तु नानुशोचितुमर्हसीत्यभिप्रायः ॥ २९ ॥

शं० टी०—"तरति शोकमात्मवित्" इति श्रवणादात्मनि विज्ञाते शोकनिवृत्तिरात्मविज्ञानं त्वात्मानात्मशोधनं विना न सिध्यतीति तच्छोधनमुपक्रम्य वासांसीति स्थूलशरीरभिन्नत्वमात्मनः प्रतिपाद्य नैनं छिन्दन्ति शस्त्राणीति छेदादेरविषयत्वे प्रतिपादिते सूक्ष्मकारणयोः शस्त्रादेरविषयत्वसंभवात्तत्रात्मत्वबुद्धिः स्यात्सा मा भूदिति । अव्यक्ताचिन्त्यपदाभ्यां तद्भिन्नत्वं प्रतिपादयन्नविकार्यत्वं च वदन्नेतल्लक्षणमात्मानं विदितवतस्तव न पुनः शोको युक्त इत्युपक्रान्तमुपसंहरति—**अव्यक्त इति** । अहङ्कारममकारादिभिर्व्यज्यत इति व्यक्तं लिङ्गशरीरं तद्धर्मतदवस्थासाक्षित्वेन ततो भिन्नत्वादात्मायमव्यक्तो व्यक्ताद्भिन्नः ममेदं दुःखं प्राप्तमिति दुःखानुभवितृ येन ज्ञायते स तस्माद्भिन्न एव नात्र संशयः । तथैवाचिन्त्यश्च अदृष्टादिवत्कार्येण शोकमोहादिना चिन्त्यतेऽनुमीयत इति चिन्त्यमव्याकृतमज्ञानं कारणशरीरं येन यत् ज्ञायते स ततो भिन्नो दृष्टः। मामहं न जानामीति अहमज्ञ इत्यज्ञत्वमज्ञानं यतोऽनुभूयते ततः स्वविषयकाज्ञानसाक्षित्वादात्मायमज्ञानाच्चिन्त्याद्भिन्नत्वेनाचिन्त्यश्चिन्त्याद्भिन्न एव भवतीत्यविकार्यश्च निरवयवत्वादात्माऽयं विकृतेरविषयत्वेनाऽविकार्यः अविकार्य इत्यनुत्पाद्यत्वादीनामात्मधर्माणामुपलक्षणं पुरस्तात्सिद्धं हि ब्रह्मेति श्रवणादनादिसिद्धत्वादात्मायमनुत्पाद्यः"नान्योऽतोस्ति विज्ञाता"इति श्रवणाज्ज्ञातुःस्वरूपत्वादनाप्यः शुद्धोऽबाध्यस्वरूपो बुद्धः सुखस्वरूप इति श्रवणान्नित्यशुद्धत्वादात्माऽयं न संस्कार्यः अद्वय एवायमात्मा " सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगतः" इति श्रुत्या यस्मादुच्यते तस्मात्त्वमेवं यथोक्तलक्षणमेतमात्मानमस्थूलमव्यक्तमचिन्त्यं निष्कलं निष्क्रियं कूटस्थासङ्गचिद्रूपमहमेवंलक्षण इति स्वं विज्ञाय नानुशोचितुमर्हसि । अहमेतेषां हन्ता मयैते हन्यन्त इति पूर्ववच्छोकं कर्तुं भवान्नार्हतीत्यर्थः । एतेन ब्रह्मविदामद्वैतदर्शिनां न किञ्चिच्छोच्यमस्तीति सूचितं भवति ॥ २९ ॥

श्री० टी०—किंच अव्यक्तश्चक्षुराद्यविषयः । अचिन्त्यो मनसोऽप्यविषयः । अविकार्यः कर्मेन्द्रियाणामप्यगोचर इत्यर्थः । उच्यत इति नित्यत्वादावभियुक्तोक्तिं प्रमाणयति उपसंहरति—**तस्मादिति** ॥ २५ ॥

स० टी०—मानातीतं यतो ब्रह्मवस्तु दुर्बोधमद्वयम् ॥ तस्मात्प्रसङ्गमापाद्य तदेवाह पुनः पुनः ॥ १ ॥ कथं नु नाम जीवानां मग्नानां शोकसागरे ॥ बुद्धिगोचरमापन्नं तत्त्वं बन्धाद्विमुक्तये ॥ २ ॥ स्यादेवं भगवान् स्वीयं कृपालुत्वं व्यनक्त्यजः ॥ पौनरुक्त्यमतो नैषां श्लोकानां शब्दतोऽर्थतः ॥ ३ ॥ इन्द्रियैर्व्यज्यते स्थूलदेहादिर्व्यक्तमुच्यते ॥ आत्मा रूपादिहीनत्वान्नायं प्रत्यक्षगोचरः ॥ ४ ॥ प्रत्यक्षेण गृहीतोऽर्थोऽनुमेयः स्यात्स वै क्वचित् ॥ नाप्रत्यक्षेऽनुमेयत्वमचिन्त्येऽतीन्द्रिये भवेत् ॥ ५ ॥ रूपादिभानकार्येण चिन्ताहों लिङ्गदेहकः ॥ चक्षुरादिसमूहात्मा तद्भिन्नोऽयमिहाथवा ॥ ६ ॥ न वा सामान्यतो दृष्टानुमानविषयोऽप्ययम् ॥ निर्धर्मकतया वाचामगोचरतया तथा ॥ ७ ॥ यद्विक्रियावदक्ष्यादि तदर्थापत्तिगोचरम् ॥ अयं तु विक्रियाशून्यो नार्थापत्त्यादिगोचरः ॥ ८ ॥ वेदेनापि स आत्मायमव्यक्तादिस्वरूपतः ॥ प्रतिपाद्यत आबोधं तात्पर्येण न शक्तितः ॥ ९ ॥ विकारं स्थूलसूक्ष्माख्यं कार्यभावादवस्थितिम् ॥ अर्हतीति विकार्यं वाऽस्त्वज्ञानं त्रिगुणात्मकम् ॥ १० ॥ कारणाख्यं शरीरं यत्सुप्तौ साक्ष्येकगोचरम् ॥ तदन्यः प्रत्यगात्मायमविकार्य उदाहृतः ॥ ११ ॥ एवं देहत्रयादन्यमात्मानं सर्वसाक्षिणम् ॥ ज्ञात्वा नैवं मृषा शोकं कर्तुमर्हसि बोधवान् ॥ १२ ॥ २५ ॥

भा० टी०—किंच सर्वकरणागोचरत्वान्न व्यज्यत इत्यव्यक्तः । अयं प्रत्यक्षातीतः प्रत्यक्षागोचरत्वात् । अचिन्त्योनुमानागम्यः कार्यलिङ्गकानुमानगम्योऽपि न भवतीत्याह अविकार्यः विकारं न प्राप्नोतीत्यर्थः । एतेन देहत्रयातिरिक्तोऽप्यर्थाद्बोधित इति ज्ञेयम् । यत्तु 'अविकार्यः कर्मेन्द्रियाणामप्यगोचरः' इति तच्चिन्त्यमव्यक्त इत्यनेनैव तस्य सङ्ग्रहात् । अन्यथा सामान्यतो दृष्टानुमानागोचरत्वालाभापत्तेश्च । उच्यते "नावेदविन्मनुते तं बृहन्तम्" "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिश्रुतिभिः । तस्मादेवं यथोक्तप्रकारेण एनमात्मानं ज्ञात्वाऽहं हन्ता मयैवैते हन्यन्त इति शोचितुं नार्हसि ॥ २५ ॥

प० टी०—अथोपसंहरति—**तस्मादिति** । तस्मात्कारणादेवममुना प्रकारेण निरूपितमेनमात्मानं विदित्वानुशोचितुं नार्हसि ॥ २५ ॥

रा० टी०—नन्वणोर्जीवस्याधारः परमात्मा सर्वगतश्चेत्कुतस्तथा न दृश्यते इत्यत आह—**अव्यक्तोयमिति** । अयं सर्वगतपदेन प्रकृतो हरिः । ननु नैनमितिश्लोके देहतोऽपि छेदाद्यभावात्स्वतन्त्रो हरिरित्युक्तम् । देहवान्सर्वगतश्चेत्कथमव्यक्त इत्यतोऽचिन्त्योयमिति । अचिन्त्यशक्तिक इत्यर्थः । एतेन हरेरव्यक्तत्वे तद्दर्शनश्रुत्यप्रामाण्यमिति निरस्तम् । तदाह सूत्रे "ॐ अतोनन्तेन तथाहि लिङ्गम्" इति अचिन्त्यशक्तेः प्रतिबन्धे नाशे वा तस्य प्रतीतिप्रसङ्ग इत्यत उक्तम्—अविकार्योयमिति । सा शक्तिर्न कदाप्यन्यथा भवतीत्यर्थः । कुत एतदच्छेद्यदेह (व) त्वादीत्यत उक्तम्—उच्यत इति । सदेहः सुखगन्धश्चेत्यादितात्पर्योदाहृतश्रुतिष्वेतत्सर्वं हरेरुच्यत इत्यर्थः । अयमयमिति पृथग्वचनं सर्वरूपाणामेवंभावप्रदर्शनार्थम् । तेनायमयमव्यक्तोयमयमचिन्त्योयमयमविकार्यः इतीदंशब्दो वीप्सारूपेणानेकरूपपरामर्शीति सूचितम् । नैनमित्यत्रापि पूर्वश्लोके एनमेनमिति बहुशब्दयोगेन बहुरूपपरामर्श इत्युक्तं भवति । अन्यथा नत्रः एनमित्यस्य च पुनः पुनरुक्तिरयुक्ता स्यादिति भावः । एवं सर्वशङ्कोद्धारेणात्मनित्यत्वं प्रतिपाद्योपसंहरति—**तस्मादिति** । बिम्बोपाधितत्सान्निधिनाशनिमित्तस्य शापादिनिमित्तस्य शस्त्रादिनिमित्तकस्य च नाशस्याभावेनात्मनो नित्यत्वादेनं जीवमेवं नित्यत्वादिना विदित्वा शोचितुं नार्हसीति । अथवा अस्त्वेवं भगवानेव नित्यः सर्वगतस्थाणुरित्यादावुक्तदिशा स्वतन्त्रः ततश्च किमित्यत आह—**तस्मादिति** । हरेरेव सर्वस्वतन्त्रत्वेनाखिल-

दुःखनिवृत्तिविशिष्टपुमर्थप्रदत्वात् एवं युद्धादिस्वकर्मणाऽव्यक्तत्वादिरूपेणैनं भगवन्तं ज्ञात्वा शोचितुं संसार-दुःखमनुभवितुं नार्हसि मुक्तो भविष्यसीत्यर्थः। अत उक्तरूपेण तं ज्ञात्वा युद्धादिस्वकर्मणा तमाराध्याशेषदुःखं परिहरेति भावः ॥ २५ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ॥
तथाऽपि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६ ॥

त० टी०—एवं वैदिकमतानुकूल्येन भगवता प्रत्यगात्मनोऽशोच्यत्वमुपपाद्येदानीं देहातिरिक्तो देहतुल्यपरिमाणक आत्मा देहेन सह जायते म्रियते चेति दिगम्बरमताङ्गीकारेऽपि तस्याशोच्यतोच्यते—अथ चेति। अथेति पक्षान्तरे। मदुक्तमतेतरमताभ्युपगमपक्षेऽपि नित्यजातं नित्यं वा मृतमेनमात्मानं त्वं मन्यसे तथाऽपि हे महाबाहो! नैवं शोचितुमर्हसि ॥ २६ ॥

म० टी०—एवमात्मनो निर्विकारत्वेनाशोच्यत्वमुक्तम् इदानीं विकारवत्त्वमभ्युपेत्यापि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति भगवान्। तत्रात्मा ज्ञानस्वरूपः प्रतिक्षणविनाशीति सौगताः। देह एवात्मा स च स्थिरोऽप्यनुक्षणपरिणामी जायते नश्यति चेति प्रत्यक्षसिद्धमेवैतदिति लोकायतिकाः। देहातिरिक्तोऽपि देहेन सहैव जायते नश्यति चेत्यन्ये। सर्गाद्यकाल एवाकाशवज्जायते देहभेदेप्यनुवर्तमान एवाकल्पस्थायी नश्यति प्रलय इत्यपरे। नित्य एवात्मा जायते म्रियते चेति तार्किकाः। तथाहि प्रेत्यभावो जन्म स चापूर्वदेहेन्द्रियादिसंबन्धः। एवं मरणमपि पूर्वदेहेन्द्रियादिविच्छेदः। इदं चोभयं धर्माधर्मनिमित्तत्वात्तदाधारस्य नित्यस्यैव मुख्यम्। अनित्यस्य तु कृतहान्यकृताभ्यागमप्रसङ्गेन धर्माधर्माधारत्वानुपपत्तेर्न जन्ममरणे इति वदन्ति। नित्यस्याप्यात्मनः कर्णशष्कुलीजन्मनाप्याकाशस्येव देहजन्मना जन्म तन्नाशाच्च मरणं तदुभयमौपाधिकममुख्यमेवेत्यन्ये। तत्रानित्यत्वपक्षेऽपि शोच्यत्वमात्मनो निषेधति—**अथेति**। अथेति पक्षान्तरे। चोप्यर्थे। यदि दुर्बोधत्वादात्मवस्तुनोऽसकृच्छ्रवणेऽप्यवधारणासामर्थ्यान्मदुक्तपक्षानङ्गीकारेण पक्षान्तरमभ्युपैपि तत्राप्यनित्यत्वपक्षमेवाश्रित्य यद्येनमात्मानं नित्यजातं नित्यमृतं वा मन्यसे। वा शब्दश्चार्थे। क्षणिकत्वपक्षे नित्यं प्रतिक्षणं पक्षान्तरे आवश्यकत्वान्नित्यं नियतं जातोऽयं मृतोऽयमिति लौकिकप्रत्ययवशेन यदि कल्पयसि तथापि हे महाबाहो पुरुषधौरेयेति सोपहासं कुमताभ्युपगमात्। त्वय्येतादृशी कुदृष्टिर्न संभवतीति सानुकम्पं वा। एवं 'अहो बत महत्पापं कर्तुं व्यवसिता वयम्' इत्यादि यथा शोचसि एवंप्रकारं अनुशोकं कर्तुं स्वयमपि त्वं तादृश एव सन् नार्हसि योग्यो न भवसि। क्षणिकत्वपक्षे देहात्मवादपक्षे देहेन सह जन्म विनाशपक्षे च जन्मान्तराभावेन पापभयासंभवात् पापभयेनैव खलु त्वमनुशोचसि तच्चैतादृशे दर्शने न संभवतीत्यर्थः। क्षणिकत्वपक्षे च दृष्टमपि दुःखं संभवति बन्धुविनाशदर्शित्वाभावादित्यधिकम्। पक्षान्तरे दृष्टदुःखनिमित्तं शोकमभ्यनुज्ञातुमेवंकारः दृष्टदुःखनिमित्तशोकसंभवेप्यदृष्टदुःखनिमित्तः शोकः सर्वथा नोचित इत्यर्थः प्रथमश्लोकस्य ॥ २६ ॥

शं० टी०—एवं संसारभ्रमविध्वंसकमात्मयाथात्म्यविज्ञानमुपदिश्य श्रीभगवानेतादृशविज्ञानस्यात्मप्रसादेन विना लब्धुमशक्यत्वादर्जुने तदनुदयमालक्ष्य प्रकारान्तरेण तच्छोकमपाकर्तुमिदमाह—**अथ चेति**। महाबाहो इति साभिप्रायं संबोधनम्। चशब्दो यद्यर्थः। अथवा एनमुक्तमात्मानं नित्यजातं यदा यदा देहोत्पत्तिस्तदा तदा देहेन सह जातमुत्पन्नं देहे मृते देहेन सहैनं नित्यं मृतं च मूढलोकवत्त्वं यदि मन्यसे तथापि तस्मिन् पक्षेऽप्येवम् 'नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्' इत्युक्तरीत्या शोचितुं नार्हसि ॥ २६ ॥

श्री० टी०—तदेवमात्मनो जन्मविनाशाभावान्न शोकः कार्य इत्युक्तम्। इदानीं देहेन सहात्मनो जन्म तद्विनाशेन च विनाशमङ्गीकृत्यापि शोको न कार्य इत्याह—**अथ चेति**। अथ च यद्यप्येनमात्मानं नित्यं

सर्वदा तत्तद्देहे जाते जातं मन्यसे तथा तद्देहे मृते मृतं मन्यसे पुण्यपापयोस्तत्फलभूतयोर्जन्ममरणयोरात्मगामित्वात् । तथापि त्वं शोचितुं नार्हसि ॥ २६ ॥

स० टी०—इत्यात्मनो विकारित्वादशोच्यत्वमुदाहृतम् ॥ स्वीकृत्यापि विकारित्वमुच्यतेऽशोच्यताधुना॥ १॥ यदि दुर्बोधमात्मानं श्रुत्वा त्वं मन्मुखादपि ॥ नावबोद्धुं समर्थोऽसि स्वीकरोषि मतान्तरम् ॥ २ ॥ जातं प्रतिक्षणं नष्टं मन्यसे सौगतानुगः ॥ जातोऽयं वा विनष्टोऽयं मन्यसे लौकिकानुगः ॥ ३ ॥ तथापि नोचितः शोकः किं पुनर्वैदिके मते ॥ त्वयीदृशी कुदृष्टिर्न संभवेत्पुरुषर्षभे ॥ ४ ॥ सौगते वाथ चार्वाके मते जन्मान्तरं नहि ॥ कुतस्ते पापभीतिः स्याद्दृष्टदुःखं न सौगते ॥ ५ ॥ यदीदृशे मते दुष्टे नैव शोकस्तवोचितः ॥ किं पुनः श्रौतसिद्धान्तविदस्ते शोकिता न हि ॥ ६ ॥ २६ ॥

भा० टी०—प्रौढ्या आत्मनो नित्यत्वं वेदबाह्यवादिसिद्धान्तमभ्युपेत्यापि शोकमपाकरोति—**अथेति** । पक्षान्तराभ्युपगमार्थः । एनं लोकदृष्ट्या प्रत्यनेकशरीरोत्पत्तिं जातो जात इति मन्यसे । तथा तद्विनाशं नित्यं वा मन्यसे उपलक्षणमेतद्भाष्यं नास्तिकोक्तपक्षान्तराणामपि । यद्वा इतरेषां मतानामत्रोपपादनमविवक्षितम् । प्रयोजनाभावात् । अतिस्थूलमताभ्युपगमेऽपि शोको न कार्यः । किमुत वैदिकमताङ्गीकार इति फलितार्थस्य विवक्षितत्वात् । महाबाहो इति संबोधयन् शोकमकृत्वा बाह्वोमर्हत्वं सार्थकं कुर्विति सूचयति ॥ २६ ॥

प० टी०—अथ देहात्मनोः साहचर्यदर्शनाद्देहेन सह जन्ममरणमङ्गीकृत्यापि शोको न कार्य इत्याह—**अथ चैनमिति** । अथ यद्यपि नित्यं सर्वदैनमात्मानं तत्तद्देहेन सह जातं मृतं वा मन्यसे यतः पुण्यपापयोस्तत्फलभूतयोर्जन्ममरणयोरात्मगामित्वात्तथापि न त्वं शोचितुमर्हसि ॥ २६ ॥

रा० टी०—अस्त्वेवमात्मनो नित्यत्वं अथापि देहयोगवियोगरूपजनिमृती स्त एव। युद्धे च मृतिर्नियता । अतस्तन्निमित्तं च दुःखं मदीयानां भविष्यतीति मे शोक इत्यत आह—**अथ चेति** । नित्यशब्दोत्रावधारणे । एनं जीवं नित्यजातं देहयोगरूपजनिमन्तमेव नित्यं मृतं देहवियोगरूपमृतिमन्तमेव त्वं मन्यसे चेत्तथापि हे महाबाहो एनं जीवं शोचितुं नार्हसीत्यर्थः ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

त० टी—०कुतस्तत्राह—जातस्येति । उत्पन्नस्य विनाशोऽवश्यंभावी तच्छरीरारम्भकर्मणां नियतकालस्थायित्वनियमात् । मृतस्य च पूर्वदेहकृतस्योत्तरदेहसम्बन्धहेतुकर्मणो विद्यमानत्वाज्जन्माप्यवर्जनीयं, हेतुसत्त्वे कार्योत्पत्तेः सम्भवात्। यस्मादेवं तस्मादपरिहार्येऽर्थे तत्तत्कर्माधीनावर्जनीयजन्ममरणपदार्थे त्वं शोचितुं नार्हसि ॥ २७ ॥

म० टी०—नन्वात्मन आभूतसंप्लवस्थायित्वपक्षे नित्यत्वपक्षे दृष्टादृष्टदुःखसंभवात्तद्भयेन शोचामीत्यत आह—**जातस्य हीति** द्वितीयश्लोकेन । हि यस्मात् जातस्य स्वकृतधर्माधर्मादिवशाल्लब्धशरीरेन्द्रियसंबन्धस्य स्थिरस्यात्मनो ध्रुव आवश्यको मृत्युस्तच्छरीरादिविच्छेदः तदारम्भककर्मक्षयनिमित्तः संयोगस्य वियोगावसानत्वात् । तथा ध्रुवं जन्म मृतस्य च प्राग्देहकृतकर्मफलोपभोगार्थं सानुशयस्यैव प्रस्तुतत्वान्न जीवन्मुक्तेर्व्यभिचारः तस्मादेवमपरिहार्ये परिहर्तुमशक्येऽस्मिन् जन्ममरणलक्षणेऽर्थे विषये त्वमेवं विद्वान्न शोचितुमर्हसि । तथा च वक्ष्यति 'ऋतेपि त्वां न भविष्यन्ति सर्वे' इति यदि हि त्वया युद्धेऽनाहन्यमाना एते जीवेयुरेव तदा युद्धाय शोकस्तवोचितः स्यात् । एते तु कर्मक्षयात्स्वयमेव म्रियन्त इति तत्परिहा-

रासमर्थस्य तव दृष्टदुःखनिमित्तः शोको नोचित इति भावः। एवमदृष्टदुःखनिमित्तेऽपि शोके तस्मादपरिहार्येऽर्थे इत्येवोत्तरम्। युद्धाख्यं हि कर्म क्षत्रियस्य नियतमग्निहोत्रादिवत्। यच्च युधसंप्रहारे इत्यस्माद्धातोर्निष्पन्नं शत्रुप्राणवियोगानुकूलशस्त्रप्रहाररूपं विहितत्वादग्नीषोमीयादिहिंसावन्न प्रत्यवायजनकम्। तथा च गौतमः स्मरति 'न दोषो हिंसायामाहवेऽन्यत्र व्यश्वासारथ्यनायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः' इति। ब्राह्मणग्रहणं चात्रायोद्धृब्राह्मणविषयं गवादिप्रायपाठादिति स्थितम्। एतच्च सर्वं स्वधर्ममपि चावेक्ष्येत्यत्र स्पष्टीकरिष्यते। तथा च युद्धलक्षणेऽर्थेऽग्निहोत्रादिवद्विहितत्वादपरिहार्ये परिहर्तुमशक्ये तदकरणे प्रत्यवायप्रसङ्गात् त्वमदृष्टदुःखभयेन शोचितुं नार्हसीति पूर्ववत्। यदि तु युद्धाख्यं कर्म काम्यमेव 'य आहवेषु युध्यन्ते भूम्यर्थमपराङ्मुखाः। अक्रूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा' इति याज्ञवल्क्यवचनात् 'हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्' इति भगवद्वचनाच्च। तदापि प्रारब्धस्य काम्यस्यापि अवश्यपरिसमापनीयत्वेन नित्यतुल्यत्वात्। त्वया च युद्धस्य प्रारब्धत्वादपरिहार्यत्वं तुल्यमेव। अथवा आत्मनित्यत्वपक्षे एव श्लोकद्वयम्। अर्जुनस्य परमास्तिकस्य वेदबाह्यमताभ्युगमासंभवात्। अक्षरयोजना तु नित्यश्चासौ देहेन्द्रियादिसंबन्धवशाज्जातश्चेति नित्यजातस्तमेनमात्मानं नित्यमपि सन्तं जातं चेन्मन्यसे तथा नित्यमपि सन्तं मृतं चेन्मन्यसे तथापि त्वं नानुशोचितुमर्हसीति प्रतिज्ञाय हेतुमाह—**जातस्य हीत्यादिना**। नित्यस्य जातत्वं मृतत्वं च प्राग्व्याख्यातम्। स्पष्टमन्यत्। भाष्यमप्यस्मिन् पक्षे योजनीयम्॥ २७॥

शं० टी०—अस्मिन् पक्षेऽपि शोकस्याकर्तव्यत्वे हेतुमाह—**जातस्येति**। हि यस्मात्कारणाज्जातस्य जन्मवतो मृत्युर्मरणं ध्रुवोऽनपायी। तथा मृतस्य च जन्म पुनर्जननं ध्रुवं नियतमेवं जन्ममरणयोर्मरणजन्मनोश्चाहोरात्रयोरिवाव्यभिचार्ययं नियमोऽपरिहार्यस्तस्मादपरिहार्ये ब्रह्मणापि परिहर्तुमशक्येऽर्थे अयं देवदत्तो मदीयो म्रियत इति त्वं शोचितुं नार्हसीत्यर्थः॥ २७॥

श्री० टी०—कुत इत्यत आह—**जातस्येति**। हि यस्मात् जातस्य स्वारम्भककर्मक्षये मृत्युर्ध्रुवो निश्चितः। मृतस्य तत्तद्देहकृतेन कर्मणा जन्मापि ध्रुवमेव। तत्तस्मादेवमपरिहार्येऽर्थेऽवश्यंभाविनि जन्ममरणलक्षणेऽर्थे त्वं विद्वान् शोचितुं नार्हसि। योग्यो न भवसीत्यर्थः॥ २७॥

म० टी०—ननु नित्यत्वपक्षेऽहं शोचामीहात्मनो यतः॥ दृष्टादृष्टमहादुःखसंभवोऽस्तीति भीतितः॥१॥ मैवं यतोऽस्य जातस्य स्वकृतैः सुकृतादिभिः॥ लब्धदेहादियोगस्य स्थिरस्याप्यात्मनो ध्रुवः॥ २॥ तच्छरीरादिविच्छेदस्तद्धेतोः कर्मणः क्षये॥ तथा मृतस्य प्राग्देहकृतकर्मफलस्य च॥ ३॥ भोगार्थं स्याद्ध्रुवं जन्म देहिनोऽज्ञस्य संसृतौ॥ परिहर्तुमशक्येऽस्मिन्मृत्युजन्मादिगोचरे॥ ४॥ तस्मादेवं विजानंस्त्वं कथं शोचितुमर्हसि॥ जीवेयुश्चेत्स्वदैवैतेऽहन्यमानास्त्वया रणे॥ ५॥ तदा युद्धाय शोकस्ते योग्यः स्यात्तान्निवृत्तये॥ एते स्वयं मरिष्यन्ति यदा कर्मक्षये तदा॥ ६॥ अवश्यंभाविनि ह्यर्थे नैव शोकस्तवोचितः॥७॥२७॥

भा० टी०—अस्मिन्पक्षे शोकाभावं स्फुटयति—**जातस्येति**। नन्वात्मन आभूतसंप्लवस्थायित्वपक्षेऽनित्यत्वपक्षे च दृष्टादृष्टदुःखसंभवात् तद्भयेन शोचामीत्यत आहेति तु यथाश्रुतमूलाननुगुणत्वादाचार्यैर्नावतारितम्। तस्मादपरिहार्येऽवश्यंभाविनि जन्ममरणलक्षणेऽर्थे। यत्तु 'एवमदृष्टनिमित्तेऽपि शोके तस्मादपरिहार्येऽर्थे इत्येवोत्तरं युद्धाख्यं हि कर्म क्षत्रियस्यापरिहार्यमित्यादि' तदुपेक्ष्यं प्रकरणविरोधात्। जन्ममरणलक्षणस्यार्थस्य ध्रुवताया एव पूर्वार्धे प्रस्तुतत्वात्। यत्तु अथवा आत्मनित्यत्वपक्ष एव श्लोकद्वयमर्जुनस्य परमास्तिकस्य वेदबाह्यमताभ्युपगमासंभवात्। अक्षरयोजना तु नित्यश्चासौ देहेन्द्रियसंबन्धवशाज्जातश्चेति नित्यजातस्तमेनमात्मानं नित्यमपि सन्तं जातं चेन्मन्यसे तथा नित्यमपि सन्तं मृतं चेन्मन्यसे तथापि त्वं नानु-

शोचितुमर्हसि इति प्रतिज्ञाय हेतुमाह—**जातस्य हीत्यादिना** । मृत्युः शरीरादिविच्छेदस्तत्संयोगो जन्म। भाष्यमप्यस्मिन्पक्षे योजनीयमिति तद्विचार्यम् । समासैकदेशस्य क्रियायामन्वयायोगात् । प्रयोजनशून्याक्लिष्टकल्पनाया अन्याय्यत्वाच्च । ननूक्तमेवार्जुनस्य परमास्तिकस्य वेदबाह्यमताभ्युपगमासंभवरूपं प्रयोजनमिति चेन्न । भगवतैवाभ्युपगम्य कैमुत्यन्यायः प्रदर्शित इत्युक्तत्वात् । तथा च परमास्तिकं श्रीरामचन्द्रं प्रति भगवतो वसिष्ठस्य वचनम् ' त्वं चेद्बभूविथ पुरा तथेदानीं भविष्यसि। अद्य चेह स्थितोऽसीति ज्ञातवानसि निश्चयम् ॥ तदानन्तरगानन्यान्प्राणादीन्निकटास्थितान् । बन्धूनतीतान्सुबहून्कस्मात्त्वं नानुशोचसि ॥ पूर्वमन्यस्तथेदानीं बभूविथ भविष्यसि। यदि राम तथापि त्वं सद्रूपः किं विमुह्यसि ॥ पुरा भूत्वाथ भूत्वा च भूयश्चेन्न भविष्यसि। तथापि क्षीणसंसारः किमर्थमनुशोचसि ॥ तस्मान्न दुःखिता युक्ता प्राकृते जागते भ्रमे । तथैव मुदिता युक्ता युक्तं कार्यानुवर्तनम् ॥ ' इति । विवृतं चेदं टीकाकारैः । एवमात्मनोऽसङ्गत्वाद्वितीयत्वदर्शने शोकासंभव उक्तः । इदानीमस्त्वासङ्गी तथापि स किं नित्य उत क्षणिक उत प्रागभाववद्घटादिवद्वा कालान्तरेण नश्वरः । सर्वेष्वपि पक्षेषु बन्धुशोको न युक्त इति प्रौढ्या समाधित्सुराद्ये कल्पे तावदाह– त्वं चेदिति । इति यदि निश्चयं ज्ञानवानसि बन्धून्प्राणादीनिवेत्यध्याहारः । विनिगमनाविरहात् सर्वशोकाशक्तेः क्वापि शोको न युक्त इति भावः ॥ तृतीयेप्याह–पूर्वमिति । इदानीमन्यः अग्रेप्यन्यः क्षणिकमात्मानं यदि जानासि तथापि किं सद्रूपमालम्ब्य विमुह्यसि द्वितीयक्षणे शोच्यस्य शोचितुश्चासत्वेन शोकावसराभावादित्यर्थः ॥ चतुर्थेप्याह–पुरेति । तथाप्यात्मनाशादेव क्षीणसंसारः यदात्मनो जन्मादिसङ्गित्वेन शोको न युक्तः तदा किं वाच्यमसङ्गोदासीनकूटस्थस्वप्रकाशपूर्णानन्दैकरसत्वे स न युक्त इत्याशयेनोपसंहरति–**तस्मादिति** । मुदिता सहजसंतोषवृत्तिः ॥ इति । यत्तुभाष्यमपीत्यादि तदपि न 'आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते' इति भाष्यस्यास्मिन्पक्षे योजनाया अशक्यत्वात् । नित्यत्वच्छेदेऽभ्युपगम्येति न सङ्गच्छते । नित्यत्वस्य स्वसिद्धान्तत्वात् । देहादिसंबन्धेनानित्यत्वमिति शेषपूर्णे तु जातत्वादिकमभ्युपगम्येति वक्तव्यं स्यात् । अथ चेत्यभ्युपगमार्थः । एनं प्रकृतमात्मानं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्तिं जातोऽजात इति वा मन्यसे तथा प्रति तद्विनाशं नित्यं वा मन्यसे मृतोऽमृत इति भाष्यस्य जातादौ नित्यशब्दान्वयप्रतिपादनपरस्योक्तपक्षे योजयितुमशक्यत्वाच्चेति दिक् ॥ २७ ॥

म० टी०—कुत इत्याह—**जातस्येति** । हि यस्माज्जातस्य स्वारम्भककर्मक्षये मृत्युर्ध्रुवो निश्चितो मृतस्य च तद्देहकृतेन कर्मणा जन्मापि ध्रुवमेव, तस्मादेवमपरिहार्येऽर्थेऽवश्यंभाविनि जन्ममरणलक्षणेऽर्थे त्वं शोचितुं नार्हसि ॥ २७ ॥

श० टी०—पूर्वार्धेनार्जुनशङ्कामनूद्योत्तरार्धेन तथापि त्वं न शोचितुमर्हसीत्येवोक्तं नतु तत्र हेतुरुक्तः । अतः शोकाभावे हेत्वाकाङ्क्षायां जन्ममरणयोर्यावन्मोक्षं नियतत्वादिति हेतूक्तिपूर्वं साध्यमाह—**जातस्येति** । ध्रुवो नियत इत्यर्थः । मृत्युर्मृतिः । तस्माज्जन्ममृत्योर्नियतत्वादित्यर्थः ॥ २७ ॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

त० टी०—देहवियोगयोगयोरवर्जनीयत्वेऽपि अस्मदनुभूतभीष्मादिदेहेषु नश्यत्सु एतान्कथं पुनर्द्रक्ष्यामः क्व गमिष्यन्तीति शोककारणमस्तीत्यत आह—**अव्यक्तादीनीति** । अव्यक्तं त्रिगुणात्मकं प्रधानं मायादिरुत्पत्तेः पूर्वं स्वरूपं येषां तान्यव्यक्तादीनि भूतानि चेतनाधेयभूतशरीराणि सद्रूपकारणद्रव्यात्मना स्थितान्यपि अतिसूक्ष्मत्वादुपलब्धुमयोग्यानि, नतु तार्किकाभिमतप्रागभावरूपाणि ततो व्यक्तम-

भिव्यक्तमवस्थान्तरापत्तिलक्षणं जन्मैव मध्ये येषां तथा तानि । सदेव कारणद्रव्यमवस्थान्तरापत्त्या कार्यव्यक्तादिशब्दाभिधेयं प्रत्यक्षशास्त्राभ्यां गृह्यते, अतो मध्येऽवस्थान्तरापन्नान्यपि कारणाभिन्नान्येव । "सदेव सोम्येदमग्र आसीत्" इति श्रुतेः "तदनन्यत्वमारम्भणशब्दादिभ्यः, भावे चोपलब्धेः, सत्त्वाच्चावरस्य" इत्यादिसूत्रेभ्यश्च । ननु "असदेवेदमग्र आसीत्ततः सदजायत" इति श्रुतेः कार्यस्योत्पत्तेरसत्पूर्वकत्वोक्तेस्तदनन्यत्वे चासदेवेदं जगदिति चेन्न, एतच्छ्रुतिस्थासच्छब्दार्थस्य सूत्रकारेणैव निर्णीतत्वात् "असद्व्यपदेशादिति चेन्न, धर्मान्तरेण वाक्यशेषात्, पटवच्च" इति सूत्राभ्याम् । अन्यथा तत्रैव वाक्यशेषे "कथमसतः सज्जायेत" इति श्रुतिविरोधात्, असत उत्पत्त्यङ्गीकारे तिलेभ्य इव सिकताभ्योऽपि तैलोत्पत्तिः स्यान्न च सा दृष्टा श्रुता वा । तस्मात्सत एव सूक्ष्मद्रव्यस्य स्थूलावस्थापत्तिः कार्यत्वेनाभिधीयते इति दिक् । यदुपादानकं वस्तु तस्य तत्रैव लयो नान्यत्रेत्याह—**अव्यक्तनिधनान्येवेति** । अव्यक्ते प्रधाने एव निधनं प्राणवियोगानन्तरावस्थानं येषां तानि घटकुण्डलादेर्मृत्सुवर्णादिस्वरूपापत्तिवत् । तत्रैवम्भूतेषु देहेषु नश्यत्सु का परिदेवना कः शोकनिमित्तो विलापः । बुद्धिमतो न युज्यत इत्यर्थः ॥ २८ ॥

म० टी०—तदेवं सर्वप्रकारेणात्मनोऽशोच्यत्वमुपपादितम् । अथेदानीमात्मनोऽशोच्यत्वेपि भूतसङ्घातात्मकानि शरीराण्युद्दिश्य शोचामीत्यर्जुनाशङ्कामपनुदति भगवान् **अव्यक्तादीनीति** । आदौ जन्मनः प्राक् अव्यक्तानि अनुपलब्धानि पृथिव्यादिभूतमयानि शरीराणि मध्ये जन्मानन्तरं मरणात्प्राक् व्यक्तानि उपलब्धानि सन्ति निधने पुनरव्यक्तान्येव भवन्ति । यथा स्वप्नेन्द्रजालादौ प्रतिभासमात्रजीवनानि शुक्तिरूप्यादिवन्न तु ज्ञानात् प्रागूर्ध्वं वा स्थितानि दृष्टिसृष्ट्यभ्युपगमात् । तथा च 'आदावन्ते च यन्नास्ति वर्तमानेपि तत्तथा' इति न्यायेन मध्येपि न सन्त्येवैतानि, नासतो विद्यते भाव इति प्रागुक्तेश्च । एवंसति तत्र तेषु मिथ्याभूतेष्वत्यन्ततुच्छेषु भूतेषु का परिदेवना को वा दुःखप्रलापः न कोप्युचित इत्यर्थः । न हि स्वप्ने विविधान्बन्धूनुपलभ्य प्रतिबुद्धस्तद्विच्छेदेन शोचति पृथग्जनोऽपि । एतदेवोक्तं पुराणे 'अदर्शनादापतितः पुनश्चादर्शनं गतः' भूतसङ्घ इति शेषः । तथाच शरीराण्युद्दिश्य शोको नोचित इति भावः । आकाशादिमहाभूताभिप्रायेण वा श्लोको योज्यः । अव्यक्तमव्याकृतमविद्योपहितचैतन्यमादिः प्रागवस्था येषां तानि तथा व्यक्तं नामरूपाभ्यामेवाविद्याकार्याभ्यां प्रकटीभूतं नतु स्वेन परमार्थसदात्मना मध्यस्थित्यवस्था येषां तादृशानि भूतानि आकाशादीनि अव्यक्तनिधनान्येव अव्यक्ते स्वकारणे मृदीव घटादीनां निधनं प्रलयो येषां तेषु का परिदेवनेति पूर्ववत् । तथा च श्रुतिः "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत' इत्यादिरव्यक्तोपादानतां सर्वस्य प्रपञ्चस्य दर्शयति । लयस्थानं तु तस्यार्थसिद्धं कारण एव कार्यलयस्य दर्शनात् । ग्रन्थान्तरे तु विस्तरः । तथाचाज्ञानकल्पितत्वेन तुच्छान्याकाशादिभूतान्यप्युद्दिश्य शोको नोचितश्चेत्तत्कार्याण्युद्दिश्य नोचित इति किमु वक्तव्यमिति भावः । अथवा सर्वदा तेषामव्यक्तरूपेण विद्यमानत्वाद्विच्छेदाभावेन तन्निमित्तः प्रलापो नोचित इत्यर्थः । भारतेत्यनेन संबोधयन् शुद्धवंशोद्भवत्वेन शास्त्रीयमर्थं प्रतिपत्तुमर्हसि किमिति न प्रतिपद्यस इति सूचयति ॥ २८ ॥

शं० टी०—इमे भीष्मादिशब्दवाच्याः सर्वे देहा मायाकार्यत्वेनाऽसत्त्वादेते मदीया इति न कदापि शोचनीयमिति सूचयति—**अव्यक्तादीनीति** । नामरूपगुणादिभिर्न व्यज्यत इत्यव्यक्तं माया तस्याः सकाशादादिर्जन्म येषां तान्यव्यक्तादीनि भूतानि भवन्तीति भूतानि शरीराणि । भावे क्तः । व्यक्तं व्यक्तता मध्ये येषां तानि व्यक्तमध्यानि देवस्तिर्यङ्मनुष्यो ब्राह्मण इत्याभासतो मध्ये लब्धस्वरूपाणि पुनरव्यक्तनिधनानि अव्यक्ते मायायामेव निधनं लयो येषां तान्यव्यक्तनिधनानि । ऐन्द्रजालिकवद्दृष्टनष्टस्वरूपाण्यत एव शरीराणि

मायाकार्याणि 'यथा स्वप्नप्रपञ्चोयं मयि मायाविजृम्भितः । तथा जाग्रत्प्रपञ्चोयं मयि मायाविजृम्भितः' इति वचनादिदं सर्वं स्वप्नार्थवन्मायिकमेवेति सर्वस्य मायाकार्यत्वमेव विदितवतः पुरुषस्य तत्र मायाकार्ये ममायं हन्यते म्रियते नश्यतीति का परिदेवना मिथ्याभूतार्थे कः परिताप इति विदां परितापमाक्षिपति श्रीभगवान् । यद्वा प्रमाणैः सर्वैर्न व्यज्यते व्यक्तीकर्तुं न शक्यत इत्यव्यक्तं परं ब्रह्म तदग्रहणादादिर्जन्म येषां तान्यव्यक्तादीनि भूतानि शुक्त्यग्रहणाद्रजतवदात्माऽग्रहणाल्लब्धजन्मानि । तथा व्यक्तमध्यानि सर्वं व्यञ्जयतीति व्यक्तमन्तःकरणं मध्ये स्थितिकाले येषां तानि व्यक्तमध्यानि देवतिर्यङ्मनुष्यादिभेदं स्त्रीपुंसादिभेदं पितृपुत्रादिभेदमहं ममायमित्यादिसंबन्धं च कल्पयित्वान्तःकरणमेव प्रपञ्चनिर्वाहं करोति तेन व्यक्तमध्यानि यावदधिष्ठानादर्शनं तावत्तेषां सत्तास्फूर्त्यादीनि सवासनान्तःकरणबलादेव तस्माद्व्यक्तमध्यानीत्युच्यन्ते भूतानि "मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः" इति वचनात्सत्यधिष्ठाने दृष्टे तदा पुनरव्यक्तनिधनानि अव्यक्ते स्वाधिष्ठाने ब्रह्मणि निधनमेषां तथोक्तानि अधिष्ठानाग्रहणादुत्पन्नानि यावदधिष्ठानं न ज्ञायते तावत्स्वतः स्वरूपवन्तीव भूतानि मरीचिजलवद्भान्ति । अधिष्ठाने दृष्टे सत्यधिष्ठानमात्राण्येव भवन्ति न ततो व्यतिरिच्यन्ते तत्र मरीचिजलवत्प्रतिभासमात्रे अधिष्ठानाज्ञानविजृम्भिते देहादिप्रपञ्चे अधिष्ठानसन्दर्शनेन सर्वं ब्रह्मैवेति पश्यतो विदुषः का परिदेवना परिदेवनाया अवकाशः कुत इत्यर्थः ॥ २८ ॥

श्री० टी०—किंच देहादीनां च स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे च शोको न कार्य इत्याह—**अव्यक्तादीनीति** । अव्यक्तं प्रधानं तदेव आदिः पूर्वरूपं येषां तान्यव्यक्तादीनि भूतानि शरीराणि कारणात्मनापि स्थितानामेवोत्पत्तेः । तथा व्यक्तम् अभिव्यक्तं मध्यं जन्ममरणान्तरालस्थितिलक्षणं येषाम् । अव्यक्ते निधनं लयो येषां तानीमान्येवम्भूतान्येत्र तत्र तेषु का परिदेवना कः शोकनिमित्तो विलापः । प्रतिवुद्धस्य स्वप्नदृष्टवस्तुष्विव शोको न युज्यत इत्यर्थः ॥ २८ ॥

स० टी०—तदेवमात्मनो युक्त्याऽशोच्यत्वं प्रतिपादितम् ॥ अथेदानीमशोच्यत्वेऽप्यात्मनो भौतिकानिमान् ॥ १ ॥ देहानुद्दिश्य शोचामीत्याशङ्क्याहाच्युतोऽर्जुनम् ॥ जन्मनः प्राक् शरीराणि भूतकार्याणि सर्वथा ॥ २ ॥ अदृष्टानि तथा मध्ये जनेरूर्ध्वं मृतेः पुरा ॥ उपलब्धानि सन्त्यन्तेऽप्यदृष्टानि भवन्ति च ॥ ३ ॥ यथा स्वप्नेन्द्रजालादौ प्रतिभाससमानि वै ॥ भूतानीह तथा ज्ञानात्प्रागूर्ध्वं न स्थितानि च ॥ ४ ॥ आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ॥ इति न्यायेन मध्येऽपि न सन्त्येतानि सर्वशः ॥ ५ ॥ तथाचात्यन्ततुच्छेषु तेषु तत्त्वविदस्तव ॥ को वा दुःखप्रलापोऽयं न कोऽपीहोचितस्तव ॥ ६ ॥ नहि स्वप्ने स्वपुत्रादीनुपलभ्य पृथग्जनः ॥ प्रबुद्धस्तद्वियोगेन शोचति त्वं किमप्यहो ॥ ७ ॥ अदर्शनादापतितः पुनश्चादर्शनं गतः ॥ नासौ तव न तस्य त्वं वृथा का परिदेवना ॥ ८ ॥ शुद्धवंशोद्भवत्वेन शास्त्रीयं ज्ञानमर्हसि ॥ प्राप्तुं त्वमत्र भगवानाह भारतशब्दतः ॥ ९ ॥ २८ ॥

भा० टी०—नन्वात्मनो नित्यत्वेपि कार्यकरणसङ्घातात्मकानि भूतानि शोचामीति चेत्तत्राह—**अव्यक्तादीनीति** । प्रागुत्पत्तेरव्यक्तमदर्शनमादिर्येषां पुत्रमित्रादिकार्यकरणसङ्घातानां भूतानां तानि अव्यक्तं निधनं मरणं येषां तानि तत्र का परिदेवना कः शोकः नहि शुक्तिरूप्यमुद्दिश्य कश्चिच्छोचतीति भावः । तथा चोक्तम् 'अदर्शनादापतितः पुनश्चादर्शनं गतः । नासौ तव न तस्य त्वं वृथा का परिदेवना' इति । ननु अव्यक्तमव्याकृतं भूतान्याकाशादीनि नामरूपाभ्यां व्यज्यत इति व्यक्तमित्याकाशादिमहाभूताभिप्रायेणायं श्लोक आचार्यैः कुतो न व्याख्यात इति चेत् 'तत्र का परिदेवना' इति वाक्यशेषविरोधात् । अदर्शनादापतित इत्यादिवचनेन । तस्मात्सर्वाणि भूतानीत्युपसंहारस्थेन कार्यकरणसङ्घातबोधकभूतशब्देन चैका-

र्थत्वानापत्तेश्चेति गृहाण । यथा भरतादयः अव्यक्ताद्भूत्वाऽव्यक्त एव लयं गतास्तथेति सूचयन्नाह—भारतेति ॥ २८ ॥

प० टी०—अथ देहस्य गतिरज्ञानमूलिकेति पर्यालोच्य तदुपाधिकः शोकोऽप्यज्ञानकृत इत्याह—**अव्यक्तादीनीति** । अव्यक्तं प्रधानं तदेवादिरुत्पत्तेः पूर्वरूपं येषां तान्यव्यक्तादीनि भूतानि शरीराणि कारणरूपस्थितानामेवोत्पत्तेः । तथा व्यक्तमभिव्यक्तं मध्यं जन्ममरणान्तरालस्थितिरूपं येषाम् । अव्यक्ते निधनं लयो येषामेवंविधानामज्ञानरूपादिमध्यावसानानां नाशे का परिदेवना किं दुःखम् । स्वप्ने विनष्टभ्रातृवदित्यर्थः । एवं स्वाप्नशोकापगमे जाग्रत्येव प्रतीकारः । तद्वत्स्वाज्ञानोत्पन्ने शोके तावदात्मज्ञानमेव प्रतीकारः ॥ २८ ॥

रा० टी०—एतदेव जन्ममृतिस्वरूपोक्त्या स्पष्टयति—**अव्यक्तेति** । अव्यक्तं प्रधानमादिरुत्पत्तिकारणं येषां तानि भूतानि जीवशरीराणि व्यक्तमध्यानि । व्यक्तं कार्यतापत्त्यावस्थानं मध्यं जन्म निधनान्तरालमेषां तानि व्यक्तमध्यानि । अव्यक्ते प्रधाने निधनं लयो येषां तानि अव्यक्तनिधनान्येव । तत्र तेष्वेवंरूपेषु भूतेषु का परिदेवना कः शोक इति । यद्वा कृष्णेनैवं स्वयं युक्तीरुक्त्वा शोको न कार्य इत्युक्तम् । तत्र देहनाशस्यावश्यंभावित्वं यदुक्तं तन्नास्माभिः साध्यं भवतोपि सिद्धं तेनैव शोको न कार्य इत्याह—**अथ चेति** । अत्र नित्यशब्दो नियतवाची । 'नित्यं नियतमेव च' इति वचनात् । अथेत्यस्य तिष्ठतु तावदयं प्राचीनो विस्तर इत्यर्थः । एनं जीवं नित्यजातं नियतजनिमन्तं मृतं वा नियतमृतिमन्तं त्वं मन्यसे चेत् । यदि यावन्मोक्षं जीवस्य जन्ममरणे नियते इति स्वयमेव मन्यसे । तथापि तावन्मात्रज्ञानेनापि एनं जीवं शोचितुं नार्हसि । जन्ममरणयोरवर्जनीयतया नियमेन प्राप्नुवतोस्त्वयैव ज्ञातत्वात् । अवर्जनीये कथं शोक इति भावः । एवं चास्मिन्नेव श्लोके शोकाभावे जनिमृतिनियमरूपो हेतुः स्पष्टमेवावगम्यत इति पुनस्तत्र हेत्वाकाङ्क्षाभावादेतद्विवरणपरे जातस्येत्यादिश्लोकद्वये जीवस्य जनिमृतिनैयत्यानुवादः । प्रागभिप्रेतजीवास्वातन्त्र्ये च हेतुत्वेनेति का तत्र परिदेवनेत्यनन्तरं तस्माज्जीवस्य जनिमृतिनियमवत्त्वाज्जीवे शोको यथा न कार्यः तथा स्वातन्त्र्यबुद्धिश्च न कार्येति श्लोकद्वयतात्पर्यार्थो ज्ञेयः ॥ २८ ॥

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ॥
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥ २९ ॥

त० टी०—स्यादेतद्देहानामचित्प्रधानपरिणामत्वादन्ते तत्रैव लयसम्भवान्न पुनस्तद्दर्शनादीति, आत्मा त्वपरिणामिस्वभावतया नित्यो ध्रुवश्चोक्तस्ततो देहवैलक्षण्येन दर्शनादियोग्यो भवेदित्याकाङ्क्षायां दुर्बोध आत्मेत्याह—आश्चर्यवदिति । सहस्रेषु मध्ये कश्चिद्भगवदाराधनलब्धतत्प्रसादनिवृत्तदेहाद्यभिनिवेश एनं देहिनं पश्यति शास्त्रसंस्कृतबुद्धावनुभवति । कथमाश्चर्यवत् पूर्वानुभूतसर्ववस्तुविजातीयत्वादद्भुतमिव, नतु लौकिकवस्तुसाधारणतया न केवलमनुभवितुस्तदाश्चर्यवत्त्वमपि तु तद्वक्तुरपीत्याह—आश्चर्यवदिति । तथैव कश्चिदेवान्यस्तदुपदेष्टा गुरुरपि शिष्यायाश्चर्यवद्वदाति, नतु केनचिद्दृष्टवस्तुनोपमातुं शक्नोति । तथैवान्य आश्चर्यवदेनं शृणोति । कश्चिदेनं श्रुत्वाऽपि न च नैव वेद । तस्माद्द्रष्टा श्रोता वक्ता चास्य दुर्लभ इति भावः ॥ २९ ॥

म० टी०—ननु विद्वांसोपि बहवः शोचन्ति तत् किं मामेव पुनः पुनरेवमुपालभसे । अन्यच्च 'वक्तुरेव हि तज्जाड्यं श्रोता यत्र न बुध्यते' इति न्यायात्त्वद्वचनार्थाप्रतिपत्तिरपि मम न दोषः । तत्रान्येषामपि तवेवात्मापरिज्ञानादेव शोकः आत्मप्रतिपादकशास्त्रार्थापत्तिश्च । तवाप्यन्येषामिव स्वाशयदोषादिति नोक्तदोषद्वयमित्यभिप्रेत्यात्मनो दुर्विज्ञेयतामाह—**आश्चर्यवदिति** । एनं प्रकृतं देहिनं आश्चर्येणाद्भुतेन

तुल्यतया वर्तमानं आविद्यकनानाविधविरुद्धधर्मवत्तया सन्तमप्यसन्तमिव स्वप्रकाशचैतन्यरूपमपि जडमिवानन्दघनमपि दुःखितमिव निर्विकारमपि सविकारमिव नित्यमप्यनित्यमिव प्रकाशमानमप्यप्रकाशमानमिव ब्रह्माभिन्नमपि तद्भिन्नमिव मुक्तमपि बद्धमिवाद्वितीयमपि सद्वितीयमिव संभावितविचित्रानेकाकारप्रतीतिविषयं पश्यति। शास्त्राचार्योपदेशाभ्यां आविद्यकसर्वद्वैतनिषेधेन परमात्मस्वरूपमात्राकारायां वेदान्तमहावाक्यजन्यायां सर्वसुकृतफलभूतायामन्तःकरणवृत्तौ प्रतिफलितं समाधिपरिपाकेन साक्षात्करोति कश्चित् शमदमादिसाधनसम्पन्नचरमशरीरः। कश्चिदेव नतु सर्वः। तथा कश्चिदेनं यत्पश्यति तदाश्चर्यवदिति क्रियाविशेषणम्। आत्मदर्शनमप्याश्चर्यवदेव यत्स्वरूपतो मिथ्याभूतमपि सत्यस्य व्यञ्जकम् आविद्यकमप्यविद्याया विघातकम् अविद्यामुपघ्नन् तत्कार्यतया स्वात्मानमप्युपहन्तीति। तथा यः कश्चिदेनं पश्यति स आश्चर्यवदिति कर्तृविशेषणम्। यतोसौ निवृत्ताविद्यातत्कार्योपि प्रारब्धकर्मप्राबल्यात्तद्वानिव व्यवहरति। सर्वदा समाधिनिष्ठोऽपि व्युत्तिष्ठति व्युत्थितोऽपि पुनः समाधिमनुभवतीति। प्रारब्धकर्मवैचित्र्याद्विचित्रचरित्रः प्राप्तदुष्प्रापज्ञानत्वात्सकललोकस्पृहणीयोऽत आश्चर्यवदेव भवति। तदेतत्त्रयमाश्चर्यमात्मा तज्ज्ञानं तज्ज्ञाता चेति परमदुर्विज्ञेयमात्मानं त्वं कथमनायासेन जानीया इत्यभिप्रायः। एवमुपदेष्टुरभावादप्यात्मा दुर्विज्ञेयः। यो ह्यात्मानं जानाति स एव तमन्यस्मै ध्रुवं ब्रूयात्। अज्ञस्योपदेष्टृत्वासंभवात्। जानंस्तु समाहितचित्तः प्रायेण कथं ब्रवीतु। व्युत्थितचित्तोऽपि परेण ज्ञातुमशक्यः। यथा कथञ्चिज्ज्ञातोपि लाभपूजाख्यात्यादिप्रयोजनानपेक्षत्वान्न ब्रवीत्येव। कथञ्चित्कारुण्यमात्रेण ब्रुवंस्तु परमेश्वरवदत्यन्तदुर्लभ एवेत्याह—आश्चर्यवद्वदति तथैव चान्य इति। यथा जानाति तथैव वदति एनमित्यनुकर्षणार्थश्चकारः। स चान्यः सर्वज्ञजनविलक्षणः नतु यः पश्यति ततोन्य इति व्याघातात्। तत्रापि कर्मणि क्रियायां कर्तरि चाश्चर्यवदिति योऽयम्। तत्र कर्मणः कर्तुश्च प्रागाश्चर्यत्वं व्याख्यातम्। क्रियायास्तु व्याख्यायते सर्वशब्दावाच्यस्य शुद्धस्यात्मनो यद्वचनं तदाश्चर्यवत्। तथा च श्रुतिः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति केनापि शब्देनावाच्यस्य शुद्धस्यात्मनो विशिष्टशक्तेन पदेन जहदजहत्स्वार्थलक्षणया कल्पितसंबन्धेन लक्ष्यतावच्छेदकमन्तरेणैव प्रतिपादनम्। तदपि निर्विकल्पकसाक्षात्काररूपमत्याश्चर्यमित्यर्थः। अथवा विना शक्तिं विना लक्षणां विना संबन्धान्तरं सुषुप्तोत्थापकवाक्यवत्तत्त्वमस्यादिवाक्येन यदात्मतत्त्वप्रतिपादनं तदाश्चर्यवत्। शब्दशक्तेरचिन्त्यत्वात्। न च विना संबन्धं बोधनेऽतिप्रसङ्गः। लक्षणापक्षेपि तुल्यत्वात्। शक्यसंबन्धरूपानेकसाधारणत्वात्। तात्पर्यविशेषान्नियम इति चेत् तस्यापि सर्वान्प्रत्यविशेषात्। कश्चिदेव तात्पर्यविशेषमवधारयति न सर्व इति चेत्। हन्त तर्हि पुरुषग एव कश्चिद्विशेषो निर्दोषत्वरूपो नियामकः। स चास्मिन्पक्षेपि न दण्डवारितः। तथा च यादृशस्य शुद्धान्तःकरणस्य तात्पर्यानुसन्धानपुरःसरं लक्षणया वाक्यार्थबोधो भवद्भिरङ्गीक्रियते तादृशस्यैव केवलः शब्दविशेषोऽखण्डसाक्षात्कारं विनापि संबन्धेन जनयतीति किमनुपपन्नम्। एतस्मिन्पक्षे शब्दवृत्त्यविषयत्वात् "यतो वाचो निवर्तन्ते" इति सुतरामुपपन्नम्। अयं च भगवदभिप्रायो वार्तिककारैः प्रपञ्चितः 'दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः। शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तं मोहहानतः॥ अगृहीत्वैव संबन्धमभिधानाभिधेययोः। हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः॥ जाग्रद्वन्न यतः शब्दं सुषुप्तौ वेत्ति कश्चन। ध्वस्तेऽतो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत्फलम्॥ अविद्याघातिनः शब्दाद्याहं ब्रह्मेति धीर्भवेत्। नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम्॥' इत्यादिना ग्रन्थेन। तदेवं वचनविषयस्य वक्तुर्वचनक्रियायाश्चात्याश्चर्यरूपत्वादात्मनो दुर्विज्ञानत्वमुक्त्वा श्रोतुर्दुर्लभत्वादपि तदाह—**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद** ेति। अन्यो द्रष्टुर्वक्तुश्च मुक्ताद्विलक्षणो मुमुक्षुर्वक्तारं ब्रह्मविदं विधिवदुपसृत्य एनं शृणोति श्रवणाख्यविचारं विषयीकरोति वेदान्तवाक्यतात्पर्यनिश्चयेनावधारयतीति यावत्। श्रुत्वा चैनं मनननिदिध्यासनपरि-

पाकाद्वेदापि साक्षात्करोत्यपि आश्चर्यवत् । तथा चाश्चर्यवत्पश्यति कश्चिदेनमिति व्याख्यातम्। अत्रापि कर्तुराश्चर्यरूपत्वम्। अनेकजन्मानुष्ठितसुकृतक्षालितमनोमलतयातिदुर्लभत्वात् । तथा च वक्ष्यति ' मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ' इति "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यन्न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः " इति श्रुतेश्च । एवं श्रवणश्रोतव्ययोराश्चर्यत्वं प्राग्वद्याख्येयम् । ननु यः श्रवणमननादिकं करोति स: आत्मानं वेदेति किमाश्चर्यमत आह—नचैव कश्चिदिति । चकारः क्रियाकर्मपदयोरनुषङ्गार्थः । कश्चिदेनं नैव वेद श्रवणादिकं कुर्वन्नपि । तदकुर्वंस्तु न वेदेति किमु वक्तव्यम् । ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादिति न्यायात् । उक्तं च वार्तिककारैः ' कुतस्तज्ज्ञानमिति चेत्तद्धि बन्धपरिक्षयात् । असावपि च भूतो वा भावी वा वर्तते यथा ' इति श्रवणादिकुर्वतामपि प्रतिबन्धपरिक्षयादेव ज्ञानं जायते । अन्यथा तु न । स च प्रतिबन्धपरिक्षयः कस्यचिद्भूत एव यथा हिरण्यगर्भस्य । कस्यचिद्भावी यथा वामदेवस्य । कस्यचिद्वर्तते यथा श्वेतकेतोः । तथा च प्रतिबन्धक्षयस्यातिदुर्लभत्वात् ' ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ' इति स्मृतेश्च दुर्विज्ञेयोऽयमात्मेति निर्गलितोऽर्थः । यदि तु ' श्रुत्वाप्येनं वेद न चैव कश्चित् ' इत्येव व्याख्यायेत तदा " आश्चर्यो ज्ञाता कुशलानुशिष्टः " इति श्रुत्यैकवाक्यता न स्यात् । ' यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ' इति भगवद्वचनाविरोधश्चेति विद्वद्भिरविनयः क्षन्तव्यः । अथवा न चैव कश्चिदित्यस्य सर्वत्र संबन्धः । कश्चिदेनं न पश्यति न वदति न शृणोति श्रुत्वापि न वेदेति पञ्च प्रकारा उक्ताः । कश्चित्पश्यत्येव न वदति कश्चित्पश्यति च वदति च कश्चित्तद्वचनं शृणोति च तदर्थं जानाति च कश्चिच्छ्रुत्वापि न जानाति च कश्चित्तु सर्वबहिर्भूत इति । अविद्वत्पक्षे तु असंभावनाविपरीतभावनाभिभूतत्वात् 'आश्चर्यतुल्यत्वं दर्शनवदनश्रवणेषु' इति निगदव्याख्यातः श्लोकः । चतुर्थपादे तु दृष्ट्वोक्त्वा श्रुत्वापीति योजना ॥२९॥

शं० टी०—ननु बहुभिः पण्डितैरात्मतत्त्वं श्राव्यते श्रूयते मन्यते च तथाप्येतादृशं ज्ञानं न कुत्रचिदृश्यत इत्याशङ्कायां ममेश्वरस्य श्रुत्याचार्यात्मनां च प्रसादेन विना लब्धुमशक्यमिति सूचयितुं जिज्ञासुश्रोतृवक्तॄणां चातिदुर्लभत्वं वदन्नात्मनो दुर्बोधत्वं प्रतिपादयति—**आश्चर्यवदिति** । मनुष्येषु शतकोटिसङ्ख्याकेषु यः कश्चिन्मत्प्रसादपात्रीभूत एनं कूटस्थासङ्गचिद्रूपमात्मानमद्वयमखण्डानन्दैकरसं पश्यति साक्षात्कर्तुमिच्छति स आश्चर्यवदेव भवति लोकैः कर्तुमशक्यस्य कर्मणः करणमाश्चर्यं तत्करणार्ह एव भवति यथा हनुमतः समुद्रलङ्घनं तद्वदत्र सर्वविषयाशापाशं निर्दह्य मोक्षेच्छाकरणमाश्चर्यं मोक्षेच्छाया अतिदुर्लभत्वाद्बहुजन्मलभ्यत्वाद्बहुपुण्यपरिपाकसाध्यत्वाच्चित्तप्रसादैकमूलत्वाच्च । सन्तीर्णाशेषविषयाशासिन्धुः शुद्धात्मा मोक्षैककामो मुमुक्षुरतिदुर्लभ इत्यर्थः । किंच एनमुक्तलक्षणमात्मानमन्यः पूर्वोक्ताद्दिदृक्षोर्भिन्नः य कश्चिच्छृणोति सोप्याश्चर्यवदेव भवति।आकाशगामी पुरुषो यथा।तद्वत्प्राणात्ययेपि दुस्त्यजेषु भोग्येषु वैराग्यमतिदुर्लभं सत्येतस्मिन् ससाधनस्य कर्मणः संन्यासो दुष्करः । कृतेपि च तस्मिन्नमानित्वाद्यक्रोधत्वादिब्रह्मचर्यादिर्दैवीसाधनसम्पद्दुर्लभा । तस्यामपि लब्धायां अनन्यप्रोक्ते गतिरत्र नास्ति । " आचार्यवान् पुरुषो वेद " इति श्रवणाद्ब्रह्मविदाचार्यो दुर्लभः सिद्धेप्युक्तसाधने गुरौ च मत्प्रसादैकलभ्या श्रवणादिनिष्ठा त्वतिदुर्लभा मदनुग्रहवत्कर्तृकश्रवणादेरेव सम्यग्ज्ञानजनकत्वेन मोक्षफलकत्वान्निरुक्तसाधनसंपन्न आत्मनि विषये श्रोता दुर्लभ इत्यर्थः । तथैव निरुक्तसर्वसाधनसंपन्नश्चाद्वेष्टृत्वादिस्वधर्मयुक्तो मत्प्रसादपात्रीभूतो यः कश्चिदुक्तादन्यः श्रवणादिनिष्ठया विज्ञातात्मतत्त्वो ब्रह्मनिष्ठ एव एनमुक्तलक्षणमात्मानं वदति । उपसन्नाय सच्छिष्यायात्मतत्त्वमुपदिशति सोप्याश्चर्यवदेव भवति "ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः " इति श्रुत्युक्तब्राह्मणत्वसिद्धिहेतोरतिदुःसाध्यत्वादुक्त-

लक्षणो ब्रह्मवित्तत्त्वोपदेष्टातिदुर्लभ इत्यर्थः । एवं परमार्थेच्छोः श्रोतुस्तत्त्वोपदेष्टुश्चातिदुर्लभत्वं प्रतिपाद्य इदानीमुक्तसाधनसंपद्विधुरस्य मद्विमुखस्यात्मा बोद्धुं न शक्य इत्याह–श्रुत्वाप्येनमिति । श्रुत्याचार्यमत्प्रसादराहितोऽमानित्वादिदैवसंपद्विधुरो यः कश्चिदात्मतत्त्वावगत्यै श्रवणादि करोति स उक्तसाधनवैधुर्याच्छतधा सहस्रधा वा श्रुत्वा श्रवणं कृत्वा अपिशब्दान्मननं च कृत्वाप्येनं प्रकृतमात्मानं नैव जानाति ज्ञातुं ज्ञानफलं च प्राप्तुं न शक्नोतीत्यर्थः । एतेन सर्वमिदमहं च ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वविज्ञानं दुर्लभतरमिति सूचितं भवति ॥ २९ ॥

श्री० टी०–कुतस्तर्हि विद्वांसोऽपि लोके शोचन्ति आत्माज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयतामाह–**आश्चर्यवदिति ।** कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन् आश्चर्यवत्पश्यति । सर्वगतस्य नित्यज्ञानानन्दस्वभावस्यात्मनोऽलौकिकत्वादैन्द्रजालिकवदघटमानं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् । तथा आश्चर्यवदन्यो वदति च शृणोति चान्यः कश्चित्पुनः विपरीतभावनाभिभूतः श्रुत्वापि नैव वेद । चशब्दादुक्त्वापि न सम्यग्वेदेति द्रष्टव्यम् ॥ २९ ॥

स० टी०–दुर्विज्ञेयोऽयमात्मा किं त्वामेवैकमुपालभे ॥ साधारणे हि विभ्रान्तिनिमित्ते सति दुःखदे ॥ १ ॥ शृणु त्वमात्मतत्त्वस्य दुर्ज्ञेयत्वमिहोच्यते ॥ एनं प्रकृतमात्मानमाश्चर्येणाद्भुतेन हि ॥ २ ॥ तुल्यं मायाविपर्यासकल्पनाधारमक्षतम् ॥ शास्त्राचार्योपदेशाभ्यां सर्वद्वैतनिषेधतः ॥ ३ ॥ वेदान्तवाक्यजन्यायां धीवृत्तौ प्रतिबिम्बितम् ॥ समाधिपरिपाकेन कश्चिच्छान्त्यादिसंयुतः ॥ ४ ॥ पश्यत्येनं न सर्वोऽपि दौर्लभ्यं तत्त्वदर्शिनः ॥ यत्पश्यति तदाश्चर्यवदित्येवं क्रियान्वयि ॥ ५ ॥ तथात्मदर्शनं यच्च तदप्याश्चर्यवद्यतः ॥ यत्स्वरूपान्मृषाभूतं सत्यस्य व्यञ्जकं विभोः ॥ ६ ॥ यः पश्यति स आश्चर्यवन्निरीक्ष्यो मुमुक्षुभिः ॥ यतोऽसौ तत्त्वविद्ब्रह्मीभूतोऽप्यज्ञवदेव च ॥ ७ ॥ सदाचारे प्रवृत्तः सन्देहवानिव लक्ष्यते ॥ आत्मा तद्विच्च तज्ज्ञानमेतदाश्चर्यवत्त्रयम् ॥ ८ ॥ दुर्विज्ञेयमतो ह्येनं जानीयाः कथमञ्जसा ॥ तथोपदेष्टुर्दौर्लभ्याद्दुर्विज्ञेय इतोऽप्यसौ ॥ ९ ॥ य आत्मानं विजानाति स ब्रूयान्नेतरो जनः ॥ यतोऽज्ञस्योपदेष्टृत्वासंभवो भ्रान्तिशालिनः ॥ १० ॥ ज्ञानी यस्तु समाधिस्थः स कथं प्रायशो वदेत् ॥ व्युत्थितोऽपि परेणासौ ज्ञातुं शक्यः कथं सुधीः ॥ ११ ॥ यथाकथञ्चिज्ज्ञातोऽपि पूजाख्यात्यादिके फले ॥ निःस्पृहत्वाच्च न ब्रूयात्कथञ्चित्करुणावशात् ॥ १२ ॥ ब्रुवन्नीशवदेवासौ दैशिकोऽत्यन्तदुर्लभः ॥ यथा वेत्ति तथा वक्ति य एनं साक्षिणं परम् ॥ १३ ॥ सर्वाज्ञजनभिन्नोऽसौ स आश्चर्यवदेव हि ॥ अनिर्देश्यस्य शुद्धस्य निर्विकल्पस्य साक्षिणः ॥ १४ ॥ आत्मनो वचनं यत्स्यात्तदाश्चर्यवदेव च ॥ विना शक्त्यादिना तत्त्वमादिवाक्यैः प्रबोधनम् ॥ १५ ॥ यदद्वैतात्मतत्त्वस्य तदाश्चर्यवदित्यहो ॥ शब्दशक्तेरचिन्त्यत्वात्तदुक्तं ब्रह्मविद्वरैः ॥ १६ ॥ दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः ॥ शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तं मोहहानतः ॥ १७ ॥ अगृहीत्वैव संबन्धमभिधानाभिधेययोः ॥ हित्वा निद्रां प्रबुद्ध्यन्ते सुषुप्तेर्बोधिताः परैः ॥ १८ ॥ जाग्रद्वन्न यतः शब्दं सुषुप्ते वृत्ति कश्चन ॥ ध्वस्तेऽतो वचसा ज्ञाने ब्रह्मास्मीति भवेत्फलम् ॥ १९ ॥ अविद्याघातिनः शब्दाद्याहंब्रह्मेतिधीर्भवेत् ॥ नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम् ॥ २० ॥ एवं वक्तव्य आत्मायं वक्ता च वचनक्रिया ॥ त्रयमाश्चर्यवद्यस्माद्दुर्विज्ञेय इतोऽपि सः ॥ २१ ॥ अन्यो मुमुक्षुर्वक्तारं यथाशास्त्रमुपेत्य यः ॥ वेदान्तवाक्यतात्पर्यं निश्चिनोति विचारतः ॥ २२ ॥ श्रुत्वा चैनं तथा मत्वा निदिध्यास्य निरन्तरम् ॥ साक्षात्करोति तुर्यं स्वं तदाश्चर्यवदित्यपि ॥ २३ ॥ श्रोतव्यं श्रवणं श्रोता चैतदाश्चर्यवत्त्रयम् ॥ ननु शृणोति यश्चैनं मनुते ध्यायतीह यः ॥ २४ ॥ स वेदात्मानमित्यत्र किमाश्चर्यमिवेति चेत् ॥ कश्चिदेनं मुमुक्षुर्हि श्रवणादिपरोऽपि सन् ॥ २५ ॥ प्रतिबंधवशान्नैनं वेद स्वात्मानमद्भुतम् ॥ ननु तर्हि न कोऽप्येनं जानीयादिति

चेन्नहि ॥ २६ ॥ जायते तत्त्वविज्ञानं श्रवणादि प्रकुर्वताम् ॥ प्रतिबन्धक्षयादेव तदुक्तं वार्तिके स्फुटम् ॥ २७ ॥ कुतस्तद्वानमिति चेत्तद्धि बन्धपरिक्षयात् ॥ असावपि च भूतो वा भावी वा वर्ततेऽथवा ॥ २८ ॥ भूतो हिरण्यगर्भस्य वामदेवस्य भाव्ययम् ॥ वर्तते श्वेतकेतोश्च तत्क्षयोऽप्यतिदुर्लभः ॥ २९ ॥ नचैव कश्चि-दित्यस्य सर्वत्रैवान्वयोऽस्तु वा ॥ कश्चित्पश्यति नो वक्ति कश्चित्पश्यति वक्ति च ॥ ३० ॥ कश्चिच्छृणोति तद्वाक्यं तदर्थं वेत्ति तत्त्वतः ॥ कश्चिच्छ्रुत्वापि नो वेत्ति कश्चित्सर्वबहिष्कृतः ॥ ३१ ॥ एवं पञ्चप्र-काराश्च प्रोक्ता भगवता स्फुटम् ॥ ३२ ॥ २९ ॥

भा० टी०—शुद्धात्मनो दुर्विज्ञेयत्वात् भ्रान्तेश्च सर्वसाधारणत्वात् न त्वां प्रत्येवोपालम्भो युक्त इ-त्याह—**आश्चर्यवदिति**। आश्चर्यमद्भुतमदृष्टपूर्वमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्यवत्। कश्चिदेनमात्मानमाश्चर्य-वत्पश्यति तथैव चान्य एनमाश्चर्यवद्वदति अन्यश्चैनमाश्चर्यवच्छृणोति श्रुत्वोक्त्वा दृष्ट्वाऽप्येनं कश्चित्प्रतिब-न्धवशान्न वेद साक्षान्न जानाति "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति व्याससूत्रात् फलोन्मुखं वि-द्याविरुद्धफलकं कर्म प्रस्तुतं तेन प्रतिबन्धः प्रस्तुतप्रतिबन्धः तदभावे ऐहिकमस्मिन्नेव जन्मनि विद्या जायते। सति तु तस्मिन् जन्मान्तरेऽपि सा जायते कुतः तद्दर्शनात्। प्रतिबन्धतदभावाभ्यामुभयविधविद्याजन्मनः श्रुतौ दर्शनात्। "गर्भस्थ एव वामदेवः प्रतिपेदे ब्रह्मभावम्" इति वदन्ती श्रुतिः। सति प्रतिबन्धे जन्मान्तर-सञ्चितसाधनाज्जन्मान्तरे विद्योत्पत्तिं दर्शयतीति तदर्थः। यद्वा योयमात्मानं पश्यति स आश्चर्यतुल्यः। एवमग्रे-पि यो वदति यश्च शृणोति सोऽनेकशतसहस्रेषु कश्चिदेव यश्चोक्त्वा श्रुत्वा पश्यति परोक्षज्ञानवान् भवति स ततोऽपि दुर्लभः। यस्तु साक्षात्करोति स तु ततोपि दुर्लभ इत्याह—**श्रुत्वापीति**। अतो दुर्बोध आ-त्मेत्यभिप्रायः। तथाच प्रथमपक्षे प्रथमपादेनात्मविषयकपरोक्षदर्शनस्य तथैव द्वितीयेन वदनस्य तृतीयेन श्रवणस्य च दुर्लभत्वं चतुर्थेन साक्षात्कारस्य चात्यन्तदौर्लभ्यं च दर्शयता द्रष्टुर्वक्तुः श्रोतुः साक्षा-त्कर्तुर्विरलतोच्यते। तद्वारा चात्मनो दुर्विज्ञेयत्वं कथ्यते। द्वितीयपक्षे त्वात्मनि चतुर्णां दुर्लभत्वकथनेन तदीयं दुर्बोधत्वमुच्यत इति विवेकः। इत्थं च श्रुत्यैकार्थत्वमस्याः स्मृतेः सम्यगुपपद्यते। तथाच श्रुतिः "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः। आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः" इति। विवृता चेयं भगवत्पादैः। "प्रायेण ह्येवंविध एव लोकः यस्तु श्रेयोर्थी सः अनेकशतसहस्रेषु कश्चिदेवात्मविद्भवति त्वद्विधः। यस्मादित्याह—श्रवणायापि श्रवणार्थं श्रोतुमपि यो न लभ्यः आत्मा बहुभिरनेकैः शृण्वन्तो बहवोऽनेकेऽन्ये यमात्मानं न विद्युर्न विन्दान्ति अभागिनोऽसंस्कृतात्मानो न विजानीयुः किंचास्य वक्ताऽप्याश्चर्योऽद्भुतवदेव अनेकेषु कश्चिदेव भवति तथा श्रुत्वाऽप्यस्यात्मनः कुशलो निपुण एवानेकेषु लब्धा कश्चिदेव भवति तस्मादाश्चर्यो ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेनाचा-र्येणानुशिष्टः सन् इत्यर्थः' इति। तथाच श्रवणायापीत्यादेरर्थः। आश्चर्यवत्कश्चिदेनं शृणोतीति शृण्वन्तोपीत्यादेः श्रुत्वाप्येनं वेद नचैव कश्चिदिति। आश्चर्यो वक्तेत्यस्य आश्चर्यवद्वदति तथैव चान्य इति कुशलोस्येत्यादेरा-श्चर्यवत्पश्यति कश्चिदेनमिति। आश्चर्यो ज्ञाता कुशलानुशिष्ट इत्येतत्तु कुशल इत्यादेर्व्याख्यानं तस्मादित्यादि-भाष्यात्। यद्वा लब्धापरोक्षज्ञानवान ज्ञाता साक्षात्कर्ता आश्चर्यवत्पश्यतीत्यत्रापि द्विविधं दर्शनं वक्ष्यते। श्रुत्यैकवाक्यतार्थमस्मिन्पक्षे परोक्षेणापरोक्षेण वाऽस्य दर्शनं द्रष्टा वात्यन्तदुर्लभः। परोक्षेणास्य दर्शनं द्रष्टा वा कुतो दुर्लभ इत्यत आह—आश्चर्यवद्वदतीत्यादि। यतोऽस्य कथनं वक्ता वा श्रवणं श्रोता वा दुर्लभोऽत इत्यर्थः। अपरोक्षेणास्य दर्शनस्य द्रष्टुर्वात्यन्तदौर्लभ्ये हेतुमाह—श्रुत्वापीति। 'श्रुत्वा उक्त्वा परोक्षेण दृष्ट्वाप्येनं कश्चिदभागी असंस्कृतात्मा लोको न चैव जानाति' इति। अतः साक्षादस्य दर्शनं द्रष्टा वात्यन्तदुर्लभ इत्यर्थः। एतेन यदि श्रुत्वाप्येनं वेद न चैव कश्चिदित्येवं व्याख्यायेत तदा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति श्रुत्यैकवाक्यता

न स्यात् । 'यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः' इति भगवद्वचनविरोधश्चेति प्रत्युक्तम् । य आत्मानं पश्यति स आश्चर्यतुल्यो यो वदति यश्च शृणोति सोऽनेकसहस्रेषु कश्चिदेवेति भाष्यात्स्मृतिविरोधानवकाशाच्च। अत्र केचिद्वर्णयन्ति । एनं प्रकृतं देहिनमाश्चर्येणाद्भुतेन तुल्यतया वर्तमानमाविद्यकनानाविरुद्धधर्मवत्तया सन्तमप्यसन्तमिव स्वप्रकाशचैतन्यरूपमपि जडमिवानन्दरूपमपि दुःखितमिवेत्याद्यसंभावितविचित्रानेकाकारप्रतीतिविषयं पश्यति। शास्त्राचार्योपदेशाभ्यामाविद्यकसर्वद्वैतनिषेधेन परमात्मस्वरूपाकारायां वेदान्तमहावाक्यजन्यायां सर्वसुकृतफलभूतायामन्तःकरणवृत्तौ प्रतिफलितं समाधिपरिपाकेन साक्षात्करोति कश्चिच्छमदमादिसाधनसंपन्नचरमशरीरः कश्चिदेव मर्त्यः नतु सर्वः। तथा कश्चिदेनं यत्पश्यति तदाश्चर्यवदिति क्रियाविशेषणम् । आविद्यकमपि दर्शनमविद्यां स्वात्मानं च निवर्तयतीति । तथा यः कश्चिदेनं पश्यति स आश्चर्यवदिति कर्तृविशेषणम्। यत एक एव विद्वान् समाधिव्युत्थानयोः परस्परविरुद्धमात्मनो ब्रह्मभावं जीवभावं च यावत्प्रारब्धकर्मक्षयमनुभवतीति तदेतत्त्रयमप्याश्चर्यमात्मा तज्ज्ञानं ज्ञाता चेति । एवमग्रेपि कर्मणि क्रियायां कर्तरि चाश्चर्यवदिति योज्यम्। सर्वशब्दावाच्यस्य शुद्धस्यात्मनो यद्वदनं तदाश्चर्यवत् । श्रुत्वाप्येनं वेद श्रुत्वा चैनं मनननिदिध्यासनपरिपाकाद्वेदापि साक्षात्करोत्यपि आश्चर्यवत्।तथाचाश्चर्यवत्पश्यति कश्चिदेनमित्यत्र व्याख्यातम्। ननु यः श्रवणादिकं करोति स आत्मानं वेदेति किमाश्चर्यमत आह—नचैव कश्चिदिति। चकारः क्रियाकर्मपदयोरनुषङ्गार्थः। कश्चिदेनं नैव वेद श्रवणादिकं कुर्वन्नपि तदकुर्वन्न वेदेति किमु वक्तव्यम्। अथवा नचैव कश्चिदित्यस्य सर्वत्र संबन्धः। कश्चिदेनं न पश्यति न वदति न शृणोति श्रुत्वाऽपि न वेदेति पञ्च प्रकारा उक्ताः । कश्चित्पश्यत्येव न वदति कश्चित्पश्यति वदति च कश्चित्तद्वचनं शृणोति तदर्थं जानाति च कश्चित् श्रुत्वाऽपि न जानाति कश्चित्तु सर्वबहिर्भूत इति । तत्रेदमवधेयम् । आश्चर्यमद्भुतमदृष्टमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्यवत् यो वदति यश्च शृणोति स सहस्रेषु कश्चिदेवेत्यादिवदद्भिराचार्यैः कर्तृक्रिययोराश्चर्यवत्त्वं दुर्लभत्वं प्रदर्शितम् । "श्रवणायापि बहुभिर्यो न लभ्यः" इतिश्रुत्यनुरोधात् । आत्मनस्तु कर्तृक्रियाविरलत्वद्वारैव दुर्ज्ञेयत्त्वं न तु साक्षात् । आश्चर्यवत्पदविशेष्यत्वेन श्रुतौ तथात्वासंभवात् । तदैकवाक्यतानापत्तेः । तस्मादाश्चर्यवत्पदस्य विरुद्धधर्माश्चर्यपरत्वं कर्मविशेषणत्वं चावदतामाचार्याणां न्यूनता न शङ्कनीया । यदपि वेदेत्यस्य पृथक्करणादि तदपि क्लेशमात्रं तद्विनापि श्रुत्यैकवाक्यताया निरूपितत्वात् । यदपि नचैव कश्चिदित्यस्य सर्वत्र संबन्ध इत्यादि । तदपि न आश्चर्यवदित्याद्युक्त्या बहव एनं न पश्यन्ति इत्यादेरर्थस्य स्पष्टप्रतीतेः । क्लिष्टकल्पनया पक्षान्तरप्रदर्शनस्य वैयर्थ्यात् । कश्चिदेनं पश्यतीत्यादिनोपपादिते सर्वबहिर्भूते श्रुत्वापि न वेदेत्यस्योक्तत्वेन चतुर्थप्रकारानर्थक्याच्चेति दिक् ।एतेन कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन्नाश्चर्यवत्पश्यति। सर्वगतस्य नित्यज्ञानानन्दस्वभावस्यात्मनोऽलौकिकत्वादैन्द्रजालिकवदघटमानं पश्यन्निव विस्मयेन पश्यति। असंभावनाऽभिभूतत्वादित्यादिभाष्यकृद्भिः कुतो न व्याख्यातमिति प्रत्युक्तम् । अत्रापि मूलश्रुत्यैकवाक्यत्वाभावापत्तेस्तुल्यत्वात् । अन्ये तु वज्रपञ्जरतुल्यस्य सर्वप्रमाणसिद्धस्य वियदादिप्रपञ्चस्य कथं रज्जूरगादिवदज्ञानप्रभवत्वेनात्यन्ततुच्छत्वमुच्यते । कथं वा कर्मज्ञानकाण्डापेक्षितमात्मनो यज्ञादिकर्तृत्वं चापह्नूयत इत्याशङ्क्याह—आश्चर्यवदिति। कश्चिज्ज्ञाताऽऽत्मतत्त्व एनमतीतानन्तरश्लोकोक्तं भूतग्राममाश्चर्यमद्भुतं स्वप्नमायेन्द्रजालादिकं तेन तुल्यमाश्चर्यवत्तथाभूतं पश्यति। तथा कश्चिदेनमाश्चर्यवद्वदति सत्त्वेनासत्त्वेन वा निर्वक्तुमशक्यमपि अनिर्वचनीयत्वेनैव लोकाप्रसिद्धेन रूपेणोपपादयति। तथा एनं प्रपञ्चमन्य आश्चर्यवच्छृणोति। "इमे लोका इमे देवा इमे वेदा इदं सर्वं यदयमात्मा" इति प्रत्यक्षेणानात्मतयोपलभ्यमानस्यापि प्रपञ्चस्य यत्प्रत्यगभिन्नत्वेन श्रवणं तदत्यन्तमाश्चर्यम्। तथा कश्चिदेनं प्रपञ्चं प्रत्यगनन्यत्वेन श्रुत्वापि शब्दादुक्त्वा दृष्ट्वापि तत्त्वतो न वेदेति वर्णयन्ति तदपि सर्वमुपेक्ष्यम्। देही नित्यमिति श्लोकस्थभूतानीत्यनुरोधे-

नातीतानन्तरश्लोकस्थभूतानीत्यस्य कार्यकारणसङ्घातपरत्वेन व्याख्या तत्वात् । प्रपञ्चस्यानुक्तेरेनदादेशानुपपत्तेः । एनमित्यनेन वह्वभ्यस्तस्यात्मनस्त्यागेन प्रकरणविरोधात् । वह्वध्याहारग्रस्तत्वादुपलभ्यमानमूलभूतश्रुतिविरोधात् । एतद्व्याख्यातृभिरप्यरुच्या यद्वेत्यादिपक्षान्तरस्वीकाराच्च । पक्षान्तरं च केषाञ्चिद्व्याख्यानमनूदितमिति निर्मत्सरैर्विद्वद्भिराकलनीयम् ॥ २९ ॥

प० टी०—तच्चातिदुर्गममित्याह—**आश्चर्यवदिति** । अनादिजन्मकोटिषु दृश्यजातदर्शनसंनिविष्टदृष्टिः पुमान् कश्चिच्छास्त्राचार्योपदेशान्निराकाराद्वैतचिदेकरसमात्मानमाश्चर्यवत्पश्यति । यतः प्रागननुभूतवस्तुदर्शनं श्रवणं वाश्चर्यजनकं भवति । दृष्टान्ताभावान्मुह्यमान इत्यर्थः । तथान्यो यः कश्चिदनभिज्ञातात्मतत्त्वः शास्त्रश्रुतेन शब्दमात्रेण वदति सोऽप्याश्चर्यवन्मत्वा दृश्यद्रष्टृभिनिवेशेन यत्किंचिद्वदसि तस्मादस्मिन्निरूपणे सावधानतया भवितव्यमित्यर्थः । अथैतदर्थेऽथर्वशाखीया श्रुतिरपि " श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चार्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः " इति । भाष्यम्—"यः परमात्मा सदाचार्यादपि श्रवणाय श्रवणार्थं बहुभिर्न लभ्यः बहूनां सुलभो न भवति किंतु दैववशात् कस्यापीत्यर्थः । तथा यं परमात्मानं शृण्वन्तोऽपि बहवो न विद्युर्नाविन्दन् किंतु कश्चिदेव । तथास्यात्मनो लब्धा कुशलानुशिष्टः आश्चार्यो भवति मुह्यति । तथाकुशलानुशिष्ट उपदिष्टो ज्ञाता शिष्योऽप्याश्चर्यो भवति " ॥ २९ ॥

रा० टी०—तर्हि कुत्र सा कार्या नैनमित्यादौ सा बुद्धिर्भगवति कार्येत्युक्तावपि सा किं भगवत्येव कार्या । अथ ततोन्यत्रापि क्वचिदित्याशङ्कां वतिप्रत्ययप्रयोगबलेन परिहरन् भगवत्स्वातन्त्र्यं प्रागुक्तमुपसंहरति—**आश्चर्यवदिति** । कश्चित्सात्त्विकप्रकृतिः एनमव्यक्तइत्यत्र प्रकृतमेनमीश्वरमाश्चर्यवत्पश्यति । आश्चर्यत्वेन सर्वस्वतन्त्रत्वेन सन्तमेव तमाश्चर्यवत्स्वतन्त्रवद्यथा भवति तथा पश्यतीति क्रियाविशेषणम् । ' गगनं गगनाकारम्' इत्यादिवत् । आश्चर्यभूतस्य हरेरेवाश्चर्यवदिति स्वोपमामुखेन हरेरितरस्य स्वातन्त्र्याभावज्ञापनायाश्चर्यवदिति वत्यन्तोक्तिः । अन्यश्च तथैव द्रष्टृवदेव आश्चर्यत्वेन सन्तमेनमाश्चर्यवद्यथा भवति तथा वदति । 'सागरःसागरोपमः' इतिवदन्यदाश्चर्यवस्तुनेतिज्ञापनाय स्वोपमत्वेन वक्तीत्यर्थः । अन्यश्च सात्विकः आश्चर्यत्वेन सन्तमेनं हरिं आश्चर्यवद्यथा भवति तथा । ' रामरावणयोर्युद्धं रामरावणयोरिव' इतिवत् । अन्यदाश्चर्यतया श्रोतव्यं वस्तुनेति ज्ञापनाय स्वोपमत्वेन शृणोति । कश्चिच्च सात्त्विक एनमाश्चर्यतया सन्तं हरिं श्रुत्वापि नैव वेद । अत्यद्भुतवस्तुत्वादिति भावः । ईश्वरस्य सर्वान्प्रत्याश्चर्यत्वेपि विपरीतदर्शिनामसुरादीनां बहूनां भावात् । यथावद्दर्शी यथावद्वादी च कश्चित्कश्चिदेवेति ज्ञापनाय कश्चिदित्याद्युक्तिः ॥ २९ ॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ॥
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥

त० टी०—एनमित्येकवचनेनात्मैक्यभ्रमं मा कार्षीरिति वदन्नात्मोपदेशमुपसंहरति—**देहीति** । हे भारत ! सर्वस्य देवतिर्यक्कीटादिप्राणिमात्रस्य देहे वध्यमानेऽप्ययमुक्तविधो देही कर्मफलभोगायतनभूतं देहं प्रति भिन्नस्वरूपेणाश्रयीभूतोऽवध्यः हन्तुमशक्यः । यस्मादेवं तस्मात्सर्वाणि भूतानि आत्माश्रितशरीराणि त्वं शोचितुं नार्हसि ॥ ३० ॥

म० टी०—इदानीं सर्वप्राणिसाधारणभ्रमनिवृत्तिसाधनमुक्तमुपसंहरति—**देहीति** । सर्वस्य प्राणिजातस्य देहे वध्यमानेप्ययं देही लिङ्गदेहोपाधिरात्मा वध्यो न भवतीति नित्यं नियतं यस्मात् तस्मात्सर्वाणि भूतानि

स्थूलानि सूक्ष्माणि च भीष्मादिभावापन्नान्युद्दिश्य त्वं न शोचितुमर्हसि। स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वात्। लिङ्गदेहस्याशोच्यत्वमात्मवदेवावध्यत्वादिति न स्थूलदेहस्य लिङ्गदेहस्यात्मनो वा शोच्यत्वं युक्तमिति भावः ३०

शं० टी०—पूर्वमव्यक्तादीनि भूतानीति भीष्मादिशब्दवाच्यार्थस्याशोच्यत्वमुपसंहृत्य इदानीमात्मनो लक्ष्यार्थस्याशोच्यत्वमुपसंहरति—**देहीति**। हे भारतात्मज्ञानसंपन्न! सर्वे देहा उपलब्धिस्थानत्वेनास्य सन्तीति देही सर्वदेहोपाधिमानयमात्मा सर्वस्य ब्रह्मादिस्तम्बान्तस्य प्राणिजातस्य देहे वध्यमानेपि नित्यं स्वयमवध्य एव भवति अविक्रियत्वादात्मा घटेषु नष्टेषु तत्स्थाकाशवत्स्वयं तु न नश्यति यस्मात्तस्मादात्मनोऽनश्वरत्वविज्ञानात् 'त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च' इत्युक्तरीत्या भीष्मादिसर्वभूतानि शरीराण्येते म्रियन्ते मदीया इति न त्वं शोचितुमर्हसि। एतेषु हन्यमानेष्वात्मा न नश्यतीत्यात्मनो नित्यत्वविज्ञातात्वमात्मानमुद्दिश्य शोकं मोहं च कर्तुं नार्हसीत्यर्थः। अत्र देहो नश्यतीति ममायमिति च यस्य देहविषयौ शोकमोहौ न स्तस्तस्याऽप्रतिबद्धाऽपरोक्षविज्ञानवतो विदुषः 'दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा' इति न्यायेन शरीरस्य प्रारब्धाधीनत्वाच्छरीरयात्रार्थमपि न किंचित्कर्म कर्तव्यं किमुतापरमिति सिद्धस्य ब्रह्मविदः सर्वकर्मसंन्यास एवाधिकार इति भूतानि न त्वं शोचितुमर्हसीतिपदेन सूचितं भवति ॥ ३० ॥

श्री० टी०—तदेवं दुर्बोधमात्मतत्त्वं सङ्क्षेपेणोपदिशन् अशोच्यत्वमुपसंहरति—**देहीति** ॥ ३० ॥

स० टी०—इदानीं सकलप्राणिसमानस्य भ्रमस्य च ॥ निवृत्तिसाधनं प्रोक्तमुपसंहरतीश्वरः ॥ १ ॥ सर्वस्य प्राणिजातस्य वद्धयमानेऽपि देहके ॥ देही न वद्धयते यस्मान्नियतं शुद्धवंशज ॥ २ ॥ तस्मात्सर्वाणि भूतानि भीष्मादीनि ममत्वतः ॥ उद्दिश्य त्वं न योग्योऽसि शोचितुं मूढबुद्धिवत् ॥ ३ ॥ नाशस्यापरिहार्यत्वात्स्थूलस्याशोच्यतेरिता ॥ लिङ्गस्याशोचिता चात्मवदवद्धयत्वहेतुना ॥ ४ ॥ आमोक्षं न विनाशोऽस्य लिङ्गदेहस्य सम्भवेत् ॥ सुषुप्तौ प्रलये चास्य सूक्ष्मरूपेण संस्थितिः ॥ ५ ॥ न स्थूलस्य न सूक्ष्मस्य नात्मनो वास्ति शोच्यता ॥ अतो निरास्पदः शोको न कार्यः सुविवेकिभिः ॥ ६ ॥ तदेवं स्थूलसूक्ष्माभ्यां तादात्म्याध्यासतो नृणाम् ॥ मिथ्याभूतोऽपि संसारः सत्यवद्भासते भ्रमात् ॥ ७ ॥ अविद्याकारणं तत्र सर्वानर्थैकबीजभूः ॥ सर्वसाधारणा भ्रान्तिरर्जुनस्यापि बोधतः ॥ ८ ॥ निराकार्या ततो ह्येवं देहत्रयविवेकतः ॥ आत्मस्वरूपं भगवानुक्तवान्स्वकृपावशात् ॥ ९ ॥ ३० ॥

भा० टी०—उपसंहरति—**देहीति**। देही आत्मा देहे वध्यमानेऽपि सर्वाणि भूतानि भीष्मादीनि देहाश्च भरतादिदेहवदनित्या एवेति तानुद्दिश्यापि शोचितुं नार्हसीति भारतेति संबोधनेन ध्वनितम् ॥ ३० ॥

प० टी०—अथ प्रकृतमनुसरति—**देही नित्यमिति**। देही शरीरचालक आत्मा नित्यं निरन्तरमवध्यो वधार्हो न भवतीति नित्यत्वं प्रोक्तम्। एक एव सर्वस्य भूतजातस्य देहे वर्तत इति व्यापकत्वं प्रोक्तम्। तस्मात्कारणात्सर्वाणि भूतानि भ्रातृसुहृदादीनि शोचितुं नार्हसि। तन्निमित्तशोको व्यर्थः। अथ देहनिमित्तं चेत्तर्हि तस्मादधिकरणीभूतात्सत्यादात्मनः सकाशात्सर्वाणि भूतान्याविर्भवन्तीति देहानामध्यासरूपत्वं निरूपितम्। एतदेव बृहदारण्यकेऽप्याम्नातम्—" स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एतदात्मनो व्युच्चरन्ति। तस्योपनिषत्सत्यस्य सत्यमिति। प्राणा वै सत्यं तेषामेष सत्यम्" इति। भाष्यम्—पूर्वम् " अथ यदा सुषुप्तो भवति न कस्य च न वेद " इत्यादि श्रुत्या सुषुप्तौ मनसि परमात्मनि लीने सति तत्कल्पितः स्थूलसूक्ष्मः प्रपञ्चोऽपि लीनो भवेदिति प्रतिपादितम्। अथ पुनर्जागरावस्थायां मनसि बहिर्मुखे जाते सति प्राक्संस्कारैर्यथापूर्वं मनःप्रपञ्च आविर्भवति " धाता यथापूर्वमकल्पयत् " इति श्रुतेः। एवं सुषुप्तौ प्रपञ्चलये

जागरे पुनराविर्भवे च दृष्टान्तमाह—स यथेति । ऊर्णा सूत्रविशेषो नाभौ यस्य स ऊर्णनाभिः कीटविशेषः स यथा पूर्वं स्वोत्पादितेन पुनर्ग्रस्यमानेन तन्तुना उच्चरेदूर्ध्वं चरेत् । यावत्सर्वतन्तुग्रासो भवति तद्वन्मनः सर्वसंस्काररूपं तन्तुं ग्रसित्वा स्वयमपि लीनं भवति । अथ पुनः प्रपञ्चोदये दृष्टान्तमाह—यथेति । यथा हन्यमानादुल्मुकाग्नेः सकाशाद्युगपदेव क्षुद्रा लघीयांसः सहस्रशो विस्फुलिङ्गा अग्निकणा व्युच्चरन्त्युद्गच्छन्त्येवमेवास्मात्प्रबुद्धादात्मनो मनसः सकाशात्सर्वे सूक्ष्मप्रपञ्चरूपाः प्राणास्तथा स्थूलप्रपञ्चरूपाः सर्वे भूर्भुवःस्वराद्या लोकाः सर्वे देवा इन्द्रादयः सर्वाणि भूतानि स्थावरजङ्गमात्मकानि सर्व एत आत्मानो देहा व्युच्चरन्ति निर्गच्छन्ति । तस्य परमात्मन उपनिषद्गानसत्यस्य सत्यमिति वदन्ति । एतदेव प्रकटीकरोति—वै इति । ज्ञानव्यवहारे प्राणमुख्यप्राणादयो हिरण्यगर्भाद्याः सत्यं तेषामप्येष आत्मा सत्यं सैव सत्यत्वमर्यादेत्यर्थः । एवमुभयथापि शोकानुदय इत्यर्थः । तदुक्तमध्यात्ममीमांसायाम्—" इन्द्रेन्द्राणीरतान्ते प्रविशति मनसा रेतसा साकमेतद्बुद्ध्यन्तर्विश्वजातं स सकलकरणं तेन गर्भं दधाना ॥ साऽव्यक्ते लीयमाना पुनरुदयमिता जागरादौ प्रसूते कीटे चोर्णामिवासावुत हुतवहतो निस्सरन्ति स्फुलिङ्गाः" इति ॥ ३० ॥

रा० टी०—यदेतज्जीवस्य न त्वं नेम इत्यादिना नित्यत्वमुक्तम् तत्स्वाभाविकत्वान्नेशाधीनम् । तथा च सर्वं परमेश्वराधीनं स एव सर्वस्वतन्त्र इत्युक्तमतस्तद्विरोध इत्यतस्तदपि द्रव्यं कर्म चेत्यादेरीश्वरायत्तमित्याह—**देहीति** । सर्वस्य देहिनो देहे स्थूलदेहे सूक्ष्मलिङ्गदेहे चिद्रूपस्वरूपदेहे च अयं पूर्वप्रकृतो हरिः रक्षकत्वेन तिष्ठति । अतो देही जीवो नित्यमवध्यः । हे भारत ! तस्माद्रक्षकतया स्थितत्वेन नित्यमवध्यत्वात्सर्वाणि भूतानि त्वं शोचितुं नार्हसीति । यद्वोपसंहारपरोत्तरश्लोकोपयुक्तत्वेनाप्रमेयस्येत्यादिना प्राङ्महिमोक्तावपि पुनर्महिमान्तरमाह—**आश्चर्यवदिति** । वातिरत्र एवकारार्थः । एनं पूर्वत्र प्रकृतं जीवं यः कश्चिदजादिलक्षणेश्वरसरूपत्वतदधीनत्वादिना पश्यति स पुमानाश्चर्यवत् । आश्चर्य एव । उक्तरूपेणैनं जीवं वदन् शृण्वंश्चाश्चर्य एव दुर्लभ एवेत्यर्थः । सर्वेषामप्यहमित्यात्मदर्शनादिभावात् । दर्शनादिमान्कथं दुर्लभ इत्यत उक्तमुपपादयति—**श्रुत्वेति**। दृष्ट्वा उक्त्वेत्यपि ग्राह्यं सामान्यतो दर्शनादौ सत्यप्युक्तरूपेण सम्यक् न वेदेति सम्यग्ज्ञानी दुर्लभ इत्यर्थः । प्रतिबिम्बभूतजीवस्यापि सम्यग्ज्ञानी दुर्लभः । किमीश्वरसामर्थ्यं वर्णनीयमितीश्वरसामर्थ्योक्तिर्ध्येया । देहयोगवियोगयोर्नियतत्वात्मनश्चेश्वरसरूपत्वाद्बिम्बनाशादिनिमित्तनाशाभावान्न शोकः कार्य इत्युपसंहरति—**देहीति** । प्राग्वदेव पूर्वार्धस्यार्थः । तस्मादित्यस्य तु देहयोगवियोगयोरवर्जनीयत्वादात्मनश्चेश्वरसरूपत्वेन सर्वथैवानाशादित्यर्थः । भगवत्सरूपत्वेप्यनाशः कुत इत्यतोऽतिसमर्थो भगवानिति तत्सामर्थ्यं प्रागुक्तमिति तस्य तदुपसंहारोपयुक्तता ध्येयेति ॥ ३० ॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ॥
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

त० टी०—एतावताऽऽत्मनोऽशोच्यत्वमुपपाद्य ' यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे ' इति यदर्जुनेनोक्तं तस्योत्तरमाह—स्वधर्ममिति । न केवलमात्मतत्त्वमेवावेक्ष्य किन्तु स्वधर्मं क्षत्रियधर्ममपि चावेक्ष्य शास्त्रेण निश्चित्य त्वं विकम्पितुं विचलितुं धर्मादधर्मभ्रान्त्या निवर्तितुं नार्हसि । कोऽसौ धर्म इत्यपेक्षायामाह—धर्म्यादिति । धर्मादनपेतं धर्म्यं तस्मात् युद्धादन्यत् क्षत्रियस्य श्रेयो न विद्यते । शास्त्रे इति शेषः । तथोक्तं याज्ञवल्क्येन 'पदानि क्रतुतुल्यानि भग्नेष्वप्यनिवर्तिनाम्' इति एतेन ' दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ' इत्यारभ्य ' वेपथुश्च शरीरे मे रोमहर्षश्च जायते ' इति मध्ये ' नच शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ' इत्यन्तं स्वधर्मप्रतिकूलं ते वचनमनुचितमिति भावः ॥ ३१ ॥

म० टी०—तदेवं स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपं सर्वप्राणिसाधारणमर्जुनस्य भ्रमं निराकर्तुमुपाधित्रयविवेकेनात्मस्वरूपमभिहितवान् । संप्रति युद्धाख्ये स्वधर्मे हिंसादिबाहुल्ये नाधर्मत्वप्रतिभासरूपमर्जुनस्यैव करुणादिदोषनिबन्धनमसाधारणं भ्रमं निराकर्तुं हिंसादिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावं बोधयति भगवान्—**स्वधर्ममपीति** । न केवलं परमार्थतत्त्वमेवावेक्ष्य किन्तु स्वधर्ममपि क्षत्रियधर्ममपि युद्धापराङ्मुखत्वरूपमवेक्ष्य शास्त्रतः पर्यालोच्य विकम्पितुं विचलितुं धर्मादावधर्मत्वभ्रान्त्या निवर्तितुं नार्हसि । तत्रैवं सति 'यद्यप्येते न पश्यन्ति ' इत्यादिना ' नरके नियतं वासो भवति' इत्यन्तेन युद्धस्य पापहेतुत्वं त्वया यदुक्तम् ' कथं भीष्ममहं सङ्ख्ये' इत्यादिना च गुरुवधब्रह्मवधाद्यकरणं यदभिसंहितं तत्सर्वं धर्मशास्त्रापर्यालोचनादेवोक्तम् । कस्मात् हि यस्मात् धर्म्यात् अपराङ्मुखत्वधर्मादनपेतात् युद्धादन्यत् क्षत्रियस्य श्रेयःसाधनं न विद्यते । युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षणब्राह्मणशुश्रूषादिक्षात्रधर्मनिर्वाहकमिति तदेव क्षत्रियस्य प्रशस्ततरमित्यभिप्रायः । तथा चोक्तं पराशरेण ' क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान् । निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत्' मनुनापि 'समोत्तमाधमै राजा चाहूतः पालयन् प्रजाः । न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन् ॥ सङ्ग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् । शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परम्' इत्यादिना राजशब्दश्च क्षत्रियजातिमात्रवाचीति स्थितमेवेष्ट्यधिकरणे तेन भूमिपालस्यैवायं धर्म इति न भ्रमितव्यम् । उदाहृतवचनेपि क्षत्रियोहीति क्षात्रं धर्ममिति च स्पष्टं लिङ्गम् । तस्मात्क्षत्रियस्य युद्धं प्रशस्तो धर्म इति साधु भगवताभिहितम् । अपशवोऽन्ये गोअश्वेभ्यः ' इतिवत्प्रशंसालक्षणया युद्धादन्यच्छ्रेयः साधनं न विद्यते इत्युक्तमिति न दोषः । एतेन युद्धात्प्रशस्ततरं किंचिदनुष्ठातुं ततो निवृत्तिरुचितेति निरस्तम् । ' न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ' इत्येतदपि ॥ ३१ ॥

शं० टी०—वेदाविनाशिनामित्यत्रायमर्थः स्फुटं निरूपितः सर्वमिदमहं च ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वविज्ञानमात्मप्रसादजं यस्य तस्य न किंचित्कर्तव्यमस्ति । तदन्यस्याहंममेत्याद्यभिमानवतो मुमुक्षोः " ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिश्रुतिबलाच्चित्तशुद्ध्यर्थं विधिदृष्टः स्वधर्मः पूर्वोक्तज्ञानसिद्ध्यर्थं कर्तव्य एवेति बोधयितुमिदं प्रकरणमारभ्यते । तत्रादावर्जुनस्यात्मज्ञानाभावमालक्ष्य तं स्वभक्तं मुमुक्षुं कर्तव्ये स्वधर्मे प्रवर्तयितुमिदमाह श्रीभगवान्—**स्वधर्ममिति** । यदा कर्ता करणं कार्यं च सर्वं ब्रह्मैवेति विज्ञातं तदा न किंचित्कर्तव्यमेवोपपद्यते यद्येते मदीया मया हन्यन्त इति भेदज्ञानं तदापि चरस्त्वर्थः। 'युद्धं स्वधर्मो नृपतेः प्रजानां परिपालनाम्' इत्यादिशास्त्रोक्तं स्वधर्मं क्षत्रियस्य कर्तव्येन विहितमवेक्ष्य स्वबुद्ध्या विचार्य त्वं विकम्पितुं स्वधर्माच्चलितुं नार्हसि स्वधर्मं त्यक्तुं नार्हसीत्यनेन स्वधर्मतया कर्तव्यत्वेन प्राप्ते युद्धे याग इव शोकमोहौ हिंसादिदोषविचारश्च न कर्तव्यो विदुषेति सूचितम् । धर्मशास्त्रादागतं धर्म्यं कर्तव्यत्वेन विहितं तस्माद्युद्धादन्यदपरं श्रेयः श्रेयःसाधनं क्षत्रियस्य न विद्यते नास्ति । जयलब्धधनैकसाध्यैर्यागैर्दानैर्व्रतादिभिश्चित्तशुद्धिस्तया ज्ञानं तेन मोक्ष इति युद्धस्य श्रेयःसाधनता युक्ता ततो युद्धं कर्तव्यमेवेति सिद्धम् । "ये युध्यन्ते प्रधनेषु शूरासः" इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ॥ ३१ ॥

श्री० टी०—यच्चोक्तमर्जुनेन ' वेपथुश्च शरीरे मे रोमहर्षश्च जायते ' इति तदप्ययुक्तमित्याह—**स्वधर्ममिति** । आत्मनो नाशाभावादेवैतेषां हननेऽपि विकम्पितुं नार्हसि । किंच स्वधर्ममपि अवेक्ष्य विकम्पितुं नार्हसीति संबन्धः । यच्चोक्तम् ' न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे' इत्यादि तत्राह—**धर्म्यादिति** । धर्मादनपेतान्न्याय्याद्युद्धादन्यत् ॥ ३१ ॥

स० टी०—देहत्रयविवेकेन सर्वसाधारणो भ्रमः ॥ निराकृतोऽथ युद्धाख्ये स्वधर्मेऽधर्मताभ्रमम् ॥ १ ॥ अर्जु-

नस्य निराकर्तुमसाधारणमीश्वरः ॥ स्वधर्मत्वेन युद्धस्याधर्मत्वाभावमाह वै ॥ २ ॥ वस्तुतत्त्वमवेक्ष्यैव कार्यं युद्धं न केवलम् ॥ किंतु युद्धादवैमुख्यं क्षात्रं धर्मं हि शाश्वतः ॥ ३ ॥ पर्यालोच्य स्वधर्मात्त्वं न निवर्तितुमर्हसि ॥ यस्माद्रणादवैमुख्यधर्मयुक्तान्नृपस्य च ॥ ४ ॥ न श्रेयःसाधनं सम्यग्विद्यतेऽन्यद्धि शाश्वतः ॥ जयद्वारेण सङ्ग्रामः प्रजारक्षणतस्तथा ॥ ५ ॥ विप्रभक्त्या यतः क्षात्रधर्मनिर्वाहको भवेत् ॥ तथोक्तो मनुना धर्मो राज्ञो युद्धादिलक्षणः ॥ ६ ॥समोत्तमाधमै राजा चाहूतः पालयन्प्रजाः ॥ न निवर्तेत सङ्ग्रामात्क्षात्रं धर्ममनुस्मरन् ॥ ७ ॥ न च श्रेयोऽनुपश्यामित्येतेनैव निराकृतम् ॥ ८ ॥ ३१ ॥

भा० टी०—इत्थमात्मतत्त्वापेक्षायां शोकमोहौ न संभवत इत्युक्तम् । न केवलमात्मतत्त्वापेक्षायामेव किंतु स्वधर्ममपि चावेक्ष्येत्याह—**स्वधर्ममपीति** । यत्तु कैश्चित् 'सर्वप्राणिसाधारणं भ्रमं निराकृत्यार्जुनस्यैवासाधारणं भ्रमं निराकरोति' इत्युक्तं तत्पूर्वोक्तयुक्त्या निरसनीयम् । स्वधर्मं क्षत्रियस्य धर्मयुद्धं धर्मशास्त्रादवेक्ष्य विचार्य शोकमोहाभिभूतः स्वधर्माच्चलितुं नार्हसि । यस्मात्पृथिवीजयद्वारा युद्धस्य यज्ञादिधर्मार्थत्वेन ब्राह्मणादिप्रजारक्षणार्थत्वेन च धर्मादनपेतायुद्धादन्यच्छ्रेयःसाधनं युद्धसदृशं क्षत्रियस्य न भवतीत्यर्थः । अतो मोक्षरूपश्रेयोर्थिनोऽपि ते युद्धेन स्वधर्मेण जयं लब्ध्वा यज्ञाद्यनुष्ठानप्रजापालनादिभ्योऽन्यत्तत्साधनं न भवतीत्याशयः ॥ ३१ ॥

प० टी०—अथास्तां तव सत्यत्वाभिमता दृश्यदृष्टिस्तथापि शोको न युज्यत इत्याह—**स्वधर्ममपीति** । स्वधर्मं श्रुतिस्मृतिसिद्धं क्षत्रधर्ममवेक्ष्य सम्यग्विचार्य विकम्पितुं नार्हसि । अथ त्वमेव धर्मं कथयेत्याह—**धर्म्यादिति** । क्षत्रियस्य श्रीः धर्म्यान्न्यायागतायुद्धादन्यदहिंसाद्यनुष्ठानं श्रेयः श्रेयोजनकं न विद्यते । अथ प्रागर्जुनोपक्रान्तश्रुतेस्तात्पर्यप्रतिपादिका श्रुतिः—" तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान् बलीयाꣳसꣳसमाशंसते धर्मेण यथा राज्ञैवं यो वै स्वधर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वो वदन्तꣳसत्यं वदतीतीत्येतद्ध्येवैतदुभयं भवति " इति । भाष्यम्—"तत्तस्मादनन्तरं श्रेयोरूपं धर्ममत्यसृजतातिसृष्टिस्थानीयमसृजत् । तदेतद्वक्ष्यमाणम् । तत्किम्, क्षत्रस्य क्षत्रियजातेः क्षत्रं क्षात्रलक्षणो धर्मस्तस्माद्धर्मात्परमुत्कृष्टं नास्ति यतो धर्मेण कृत्वाबलीयान् दुर्बलोपि बलीयांसं समर्थमपि समाशंसते सम्यक्प्रकारेणाक्षिपति । यथा राज्ञा स्ववशेन कृत्वा दुर्बलोपि समर्थमाक्षिपति तथेत्यर्थः । एवं वै इति निश्चयेन पूर्वोक्तो यो धर्मः स सत्यं सत्यस्य प्रापकस्तत्तस्मात्कारणात्सत्यं वदन्तं पुरुषं धर्मं वक्तीत्याहुः । वा इत्यथवा धर्मं वदन्तं पुरुषं सत्यं वदतीत्याहुरेवं सत्यधर्मयोरेकार्थवाचकत्वमस्तीत्युक्तं हीति निश्चयेन । एतद्धर्मसत्याभिधानमुभयं तद्भवति ब्रह्मरूपं भवति तत्त्वमसि तत्सद् ब्रह्मेति श्रुतेः " ॥ ३१ ॥

रा० टी०—यदुक्तं प्राक् 'वेपथुश्च शरीरे मे रोमहर्षश्च जायते' इति तत्राह—**स्वधर्ममिति** । यद्वा न केवलमात्मनित्यत्वादशोकः किं तर्हीत्यत आह—**स्वधर्ममिति** । न केवलमात्मनोऽविनाशादेवाविकम्पः । स्वधर्ममप्यवेक्ष्य विकम्पितुं शरीरे कम्पं सर्वावयवचेष्टां कर्तुं नार्हसीत्यर्थः । यच्चोक्तम् 'न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे' इति तत्राह—**धर्म्यादिति** । परलोकसुखहेतुर्धर्मः । तत्संबन्धितज्जनकमिति यावत् । यद्वा धारकत्वाद्धर्मो हरिः तत्पूजारूपं यत्तद्धर्म्यं तस्माद्युद्धादन्यच्छ्रेयः क्षत्रियस्य न विद्यते हि प्रसिद्धमेतत् ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ॥
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

त० टी०–स्वश्रेयो महता यत्नेन प्राप्यते इदं तु तत्रायत्नतः प्राप्तमित्याह–**यदृच्छयेति**। यदृच्छया स्वप्रयत्नं विनैवोपपन्नमुपस्थितमीदृशं पौरुषविशेषविशिष्टवीरपुरुषप्रतियोद्धृ निष्ठमैहिकामुष्मिकेष्टकीर्तिलाभकरं युद्धं सुखिनः सुखार्हाः क्षत्रियाः लभन्ते। ननु युद्धे मृतश्चेत्तस्य किं सुखं स्यादित्यत्राह–**स्वर्गद्वारमिति**। अप्रतिरुद्धं स्वर्गस्य द्वारभूतं तत्–'य आहवेषु युद्ध्यन्ते भूम्यर्थमपराङ्मुखाः। अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा' इति वचनात् ॥ ३२ ॥

म० टी०–ननु युद्धस्य कर्तव्यत्वेऽपि न भीष्मद्रोणादिभिर्गुरुभिः सह तत्कर्तुमुचितमतिगर्हितत्वादित्याशङ्क्याह–**यदृच्छयेति**। यदृच्छया स्वप्रयत्नव्यतिरेकेण। चोऽवधारणे। अप्रार्थनयैवोपस्थितमीदृशं भीष्मद्रोणादिवीरपुरुषप्रतियोगिकं कीर्तिराज्यलाभदृष्टफलसाधनं युद्धं ये क्षत्रियाः प्रतियोगित्वेन लभन्ते ते सुखिनः सुखभाज एव जये सत्यनायासेनैव यशसो राज्यस्य च लाभात् पराजये वातिशीघ्रमेव स्वर्गस्य लाभादित्याह–**स्वर्गद्वारमपावृतमिति**। अप्रतिबद्धं स्वर्गसाधनं युद्धमव्यवधानेनैव स्वर्गजनकम्। ज्योतिष्टोमादिकं तु चिरतरेण देहपातस्य प्रतिबन्धाभावस्य चापेक्षणादित्यर्थः। स्वर्गद्वारमित्यनेन श्येनादिवत्प्रत्यवायशङ्का परिहृता। श्येनादयो हि विहिता अपि फलदोषेण दुष्टाः। तत्फलस्य शत्रुवधस्य 'न हिंस्यात्सर्वा भूतानि। ब्राह्मणं न हन्यात्' इत्यादिशास्त्रनिषिद्धस्य प्रत्यवायजनकत्वात् फले विध्यभावाच्च। न विधिस्पृष्टे निषेधानवकाश इति न्यायावतारः। युद्धस्य हि फलं स्वर्गः स च न निषिद्धः। तथा च मनुः 'आहवेषु मिथोन्योन्यं जिघांसन्तो महीक्षितः। युद्धयमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः' इति। युद्धं तु अग्नीषोमीयाद्यालम्भवद्विहितत्वान्न निषेधेन स्प्रष्टुं शक्यते षोडशिग्रहणादिवत् ग्रहणाग्रहणयोस्तुल्यबलतया विकल्पवत्सामान्यशास्त्रस्य विशेषशास्त्रेण सङ्कोचसंभवात्। तथा च विधिस्पृष्टे निषेधानवकाश इति न्यायायुद्धं न प्रत्यवायजनकं नापि भीष्मद्रोणादिगुरुब्राह्मणादिवधनिमित्तो दोषः तेषामाततायित्वात्। तदुक्तं मनुना 'गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्। आततायिनमायान्तं हन्यादेवाविचारयन्॥ आततायिनमायान्तमपि वेदाङ्गपारगम्। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन' इत्यादि। ननु 'स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः। अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः' इति याज्ञवल्क्यवचनात् आततायिब्राह्मणवधेऽपि प्रत्यवायोस्त्येव। 'ब्राह्मणं न हन्यात्' इति हि दृष्टप्रयोजनानपेक्षत्वाद्धर्मशास्त्रम् 'जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्' इति च स्वजीवनार्थत्वादर्थशास्त्रम्। अत्रोच्यते "ब्रह्मणे ब्राह्मणमालभेत' इतिवद्युद्धविधायकमपि धर्मशास्त्रमेव 'सुखदुःखे समे कृत्वा' इत्यत्र दृष्टप्रयोजनानपेक्षत्वस्य वक्ष्यमाणत्वात्। याज्ञवल्क्यवचनं तु दृष्टप्रयोजनोद्देश्यककूटयुद्धादिकृतवधविषयमित्यदोषः। मिताक्षराकारस्तु धर्मार्थसन्निपातेर्थग्राहिण एतदेवेति द्वादशवार्षिकप्रायश्चित्तस्यैतच्छब्दपरामृष्टस्यापस्तम्बेन विधानान्मित्रलब्धाद्यर्थशास्त्रानुसारेण चतुष्पाद्व्यवहारे शत्रोरपि जये धर्मशास्त्रातिक्रमो न कर्तव्य इत्येतत्परं वचनमेतदित्याह। भवत्वेवं न नो हानिः। तदेवं युद्धकरणे सुखोक्तेः 'स्वजनं हि कथं हत्वा सुखिनः स्याम माधव' इत्यर्जुनोक्तमपाकृतम् ॥ ३२ ॥

शं० टी०–ननु जयश्चेद्युद्धस्य श्रेयःसाधनता स्यान्मृतिश्चेन्न किमप्यस्तीत्यतआह–**यदृच्छयेति**। हे पार्थ पृथापुत्र! यदृच्छयैवोपपन्नमयत्नप्राप्तमपावृतं चोद्घाटितकपाटं स्वर्गद्वारं स्वर्गप्राप्तिद्वारभूतं युद्धमीदृशं सुखिनः स्वर्गसुखार्थिनः धन्याः क्षत्रियाः पुण्येन लभन्ते भाग्यवतामेवेदृशं युद्धमभ्यागच्छतीत्यर्थः। युद्धे मृतस्याप्यस्ति स्वर्गसुखमित्यत उभयथापि फलहेतुत्वादवश्यं युद्धं कर्तव्यमित्यर्थः ॥ ३२ ॥

श्री० टी०–किंच महति श्रेयसि स्वयमेवोपगते सति कुतो विकम्पसइत्याह–**यदृच्छयेति**। यदृच्छयाऽप्रार्थितमेवोपपन्नं प्राप्तमीदृशं युद्धं सुखिनः सभाग्या एव लभन्ते। यतो निरावरणं स्वर्गद्वारमेवैतत। यद्वा य

एवंविधं युद्धं लभन्ते त एव सुखिन इत्यर्थः । एतेन ' स्वजनं हि कथं हत्वा सुखिनः स्याम ' इति यदुक्तं तन्निरस्तं भवति ॥ ३२ ॥

स० टी०—ननु भीष्मादिभिः सार्धं गुरुभिर्नोचितो रणः ॥ स्वधर्मोऽप्यतिनिन्द्यत्वादित्याशङ्क्याह केशवः ॥ १ ॥ स्वप्रयत्नं विनैवेत्थं भीष्मादिप्रतियोगिकम् ॥ कीर्त्यादिसाधनं युद्धं प्रतियोगितया च ये ॥ २ ॥ लभन्ते क्षत्रियास्ते वै भवन्ति सुखभागिनः ॥ प्रतिबन्धं विना स्वर्गहेतुर्युद्धमिदं यतः ॥ ३ ॥ आततायितया तेषां भीष्मादीनां वधे तव ॥ न दोषोऽस्ति तदेवोक्तं मनुना धर्मभास्वता ॥ ४ ॥ गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ॥ आततायिनमायान्तं हन्यादेवाविचारयन् ॥ ५ ॥ आततायिनमायान्तमपि वेदान्तपारगम् ॥ जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ ६ ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ गुरुणा ब्राह्मणेनापि बहुज्ञेन महर्षिणा ॥ ७ ॥ भीष्मस्याप्यभवद्युद्धं जामदग्न्येन ते गुरोः ॥ अतस्तवापि शास्त्रेण युद्धं कार्यतयेष्यते ॥ ८ ॥ ३२ ॥

भा० टी०—स्वधर्मत्वाद्युद्धं प्रयत्नेनापि क्षत्रियैः संपाद्यते तव तु भाग्यवशाद्भवत्प्रयत्नं विनैवोपपन्न मतः कर्तव्यमेवेत्याह—**यदृच्छयेति** । अप्रार्थिततयाऽऽगतं सद्यः स्वर्गप्रदं यतः उद्घाटितं **स्वर्गद्वारं** ये ईदृशं युद्धं क्षत्रिया लभन्ते त एव सुखिनः राज्यस्वर्गादिसुखभाजः पार्थेति संबोधयन् स्वोत्साहसदृशे उत्साहे प्रेरयति ॥ ३२ ॥

प० टी०—अथ श्रुत्यर्थमेव दृढीकुर्वन्नाह—**यदृच्छयेति** । भो पार्थ ! ईदृशं जयाजयाद्यभिनिवेशरहितं युद्धं सुखिनः सुकृतिनः क्षत्रिया लभन्ते । अथास्य दुर्लभत्वमाह—**स्वर्गेति** । पुनः कीदृशं स्वर्गद्वारमपावृतं निरावरणं यदृच्छयाऽप्रार्थनयोपपन्नं सिद्धं भवति ॥ ३२ ॥

रा० टी०—किंच स्वयमेव महति श्रेयसि प्राप्ते विकम्पोनुचित इत्याह—**यदृच्छयेति** । यदृच्छयाऽप्रयत्नेनोपपन्नं प्राप्तं यदृच्छा हि तदिच्छा स्यादित्युक्तेरीश्वरेच्छाप्राप्तमिति वा । अपावृतमपगतावरणं स्वर्गद्वारं च पारत्रिकसुखसाधनमिति यावत् । ईदृशं भगवत्पूजात्वेन स्वधर्मत्वेन स्थितं युद्धं सुखिनः सुखहेतुपुण्यवन्तः क्षत्रियाः हे पार्थ ! लभन्ते प्राप्नुवन्ति । यद्वा ईदृशं युद्धं ये क्षत्रियाः लभन्ते ते सुखिन इत्यर्थः । तेन स्वजनं हि कथं हत्वा सुखिनः स्यामेति निरस्तम् ॥ ३२ ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

त० टी०-यदुक्तम् ' एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन । अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते ॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन । इषुभिः प्रतियोत्स्यामि ' इति तस्योत्तरमाह—**अथ चेदिति** । अथ पक्षान्तरे । ऐहिकामुष्मिकसुखलाभानपेक्षया चेद्यदि धर्म्यं धर्मादनपेतम् ' निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् ' इति शास्त्रविहितमिमं संग्रामं त्वं न करिष्यसि ततः संग्रामाकरणात्स्वधर्मं स्वधर्मजन्यं निरतिशयसुखं देवसममहावीरपुरुषविजयागामिनीं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

म० टी०—ननु नाहं युद्धफलकामः ' न काङ्क्षे विजयं कृष्ण । अपि त्रैलोक्यराज्यस्य ' इत्युक्त्वा तत्कथं मया कर्तव्यमित्याशङ्क्याकरणे दोषमाह—**अथेति** । अथेति पक्षान्तरे । इमं भीष्मद्रोणादिवीरपुरुषप्रतियोगिकं धर्म्यं हिंसादिदोषेणादुष्टं सतां धर्मादनपेतमिति वा । स च मनुना दर्शितः ' न कूटैरायुधैर्हन्याद्युध्यमानो

रणे रिपून् । न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥ न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् । न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥ न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् । नायुध्यमानं पश्यन्तं न परेण समागतम् ॥ नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम् । न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ' इति सतां धर्ममुल्लङ्घ्य युध्यमानो हि पापीयान्स्यात् । त्वं तु परैराहूतोऽपि सद्धर्मोपेतमपि सङ्ग्रामं युद्धं न करिष्यसि धर्मतो लोकतो वा भीतः परावृत्तो भविष्यसि चेत् ततः ' निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् ' इत्यादिशास्त्रविहितस्य युद्धस्याकरणात्स्वधर्मं हित्वाऽननुष्ठाय कीर्तिं च महादेवादिसमागमनिमित्तां हित्वा ' न निवर्तेत सङ्ग्रामात् ' इत्यादिशास्त्रनिषिद्धसङ्ग्रामनिवृत्त्या च रणजन्यं पापमेव केवलमवाप्स्यसि न तु धर्मं कीर्तिं चेत्यभिप्रायः । अथवा अनेकजन्मार्जितं धर्मं त्यक्त्वा राजकृतं पापमेवाप्स्यसीत्यर्थः । यस्मात्त्वां परावृत्तमेते दुष्टा अवश्यं हनिष्यन्ति । अतः परावृत्तहतः सन् चिरोपार्जितनिजसुकृतपरित्यागेन परोपार्जितदुष्कृतमात्रभाङ्माभूरित्यभिप्रायः । तथा च मनुः ' यस्तु भीतः परावृत्तः सङ्ग्रामे हन्यते परैः । भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् । भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ' इति । याज्ञवल्क्योपि 'राजा सुकृतमादत्ते हतानां विपलायिनाम् ' इति तेन यदुक्तम् ' पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः। एतान्न हन्तुमिच्छामि घ्नतोपि मधुसूदन ' इति तन्निराकृतं भवति ॥ ३३ ॥

शं० टी०—मुमुक्षोर्मोक्षसाधने विध्युक्ते स्वधर्मे प्रमादो मास्त्विति ज्ञापयितुं स्वधर्मतया कर्तव्यत्वेन प्राप्तस्य युद्धस्याकरणे प्रत्यवायाऽकीर्त्याद्यनर्थपरम्पराऽऽयास्यतीति नयभयाभ्यामर्जुनं स्वधर्मे प्रवर्तयति पञ्चभिः । तत्राद्येन हिंसारूपत्वाद्दोषाय भवतीति वा तेषु स्वीयत्वभ्रमेण वा स्वधर्मं युद्धं त्यक्ष्यसि चेत्प्रत्यवायः कीर्तिनाशश्चोभाभ्यामिह परलोकभ्रंशः स्यादित्याह—**अथ चेदिति** । अथ युद्धसन्नाहसमनन्तरं त्वमिमं धर्म्यं धर्मत्वेन दृष्टं विध्युक्तं संग्रामं न करिष्यसि चेत्ततस्तदकरणेन कीर्तिमीश्वरादिभिः सह युद्धं कृतवानिति अर्जुनः स्वधर्मनिष्ठ इति वा कीर्तिं लोकप्रसिद्धां स्वधर्मं स्वस्य धर्मं च धर्मावबोधकं शास्त्रं वेदादिलक्षणं वा स्वधर्मं त्यक्तवानसि वेदोक्तकर्मत्यागेन वेदोपि त्यक्त एव भवति एवं स्वधर्मं कीर्तिं च हित्वा वेदवेदोक्तकर्मत्यागलक्षणं पापमवाप्स्यसि न तु संन्यासफलमित्यर्थः ॥ ३३ ॥

श्री० टी०—विपक्षे दोषमाह—**अथ चेत्त्वमिति** ॥ ३३ ॥

स० टी०—ननु युद्धफलं नाहमाकाङ्क्षे तन्मया कथम् ॥ युद्धं कार्यं वृथेत्येवमाशङ्क्याहात्र दूषणम् ॥१॥ यदि धर्म्यमिमं भीष्मद्रोणादिप्रतियोगिकम् ॥ आहूतोऽपि परैरेवं संग्रामं न करिष्यसि ॥ २ ॥ भविष्यसि परावृत्तो भीतो धर्मात्स्वयं तदा ॥ बहुजन्मार्जितं धर्मं त्यक्त्वा कीर्तिं च शाश्वतीम् ॥ ३ ॥ न निवर्तेत संग्रामादिति शास्त्रनिषेधतः ॥ विहिताचरणत्यागात्त्वं हि पापमवाप्स्यसि ॥ ४ ॥ यस्मात्ते त्वां परावृत्तं हनिष्यन्त्येव शत्रवः ॥ स्वधर्मत्यागतस्तस्मान्मा त्वं दुष्कृतभाग्भव ॥ ५ ॥ ३३ ॥

भा० टी०—विपक्षे दोषमाह—**अथेति** ॥ ३३ ॥

प० टी०—अथ विपक्षे दोषमाह—**अथ चेदित्यादितः** श्लोकचतुष्टयेन । अथेत्यनन्तरं मदुक्तमनाकर्ण्य धर्म्यं धर्मसाधकं संग्रामं चेन्न करिष्यसि तर्हि स्वधर्मं हित्वा स्वधर्मबहिर्मुखो भूत्वा तथेह लोके श्लाघनीयां कीर्तिं च हित्वा पापं परलोकप्रतिबन्धकमवाप्स्यसि । अनेन पापमेवाश्रयेदस्मानित्युक्तस्य परिहारः सूचितः ॥ ३३ ॥

रा० टी०—युद्धाकरणेऽनर्थप्राप्त्युक्त्या च तत्कर्तव्यतामाह—**अथ चेदित्यादिचतुर्भिः** । अथ चेत् यद-

च्छया पारत्रिकसुखहेतुत्वेन च प्राप्तमपि धर्म्यं प्राग्वत् । इमं संग्रामं युद्धं न करिष्यसि न कुर्याः तर्हि ततः स्वधर्मभूतयुद्धाकरणान्न केवलं धर्मकीर्त्योर्हानिः । स्वविहितधर्मत्यागात्पापं चावाप्स्यसि ॥ ३३ ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ॥
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

त० टी०—संग्रामत्यागे न केवलं भाविस्वधर्मकीर्तिहानिमात्रमपि तु महान्दोषः स्यादित्याह—**अकीर्तिमिति** । क्षत्रियहर्षकरे संग्रामे प्राप्ते पाण्डुपुत्रो गाण्डीवधन्वाऽर्जुनः कातरो भूत्वापलायित इत्यव्ययां वहुजनदृष्टश्रुतपरम्परया सर्वदेशव्यापिनीं पुनरविनाशिनीं तेऽकीर्तिं न केवलं क्षत्रियाः कथयिष्यन्ति किन्तु देवर्षिक्षत्रियवणिक्शूद्रान्तानि सर्वाणि भूतानि कथयिष्यन्ति । ननु युद्धे मरणसन्देहान्मरणादकीर्तिर्नाधिकेत्यतः सा सोढव्या न तु मरणोपायं कुर्यात् । तथोक्तं शान्तिपर्वणि—'साम्ना दानेन भेदेन समस्तैरुत चापृथक । विजेतुं प्रयतेतारीन्न तु युद्धयेत्कदाचन ॥ अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत्' इति तस्मान्मरणादकीर्त्तिः किमधिकं दुःखमित्यत आह—**सम्भावितस्येति** । खाण्डवे इन्द्रेणाऽप्यनिवार्यो वासुदेवसखाऽग्नितर्पणाद्यतुल्यपराक्रमैरन्यदुर्लभैर्गुणैर्वहुमतस्याकीर्तिर्मरणादतिरिच्यते अधिका भवति ॥ ३४ ॥

म० टी०—एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिर्युद्धपरित्यागे दर्शिता । तत्र पापाख्यमनिष्टं व्यवधानेन दुःखफलदमामुत्रिकत्वाच्छिष्टगर्हालक्षणं त्वनिष्टमासन्नफलदमत्यसह्यमित्याह—**अकीर्तिमिति** । भूतानि देवर्षिमनुष्यादीनि ते तव अव्ययां दीर्घकालामकीर्तिं न धर्मात्मायं न शूरोयमित्येवंरूपां कथयिष्यन्त्यन्योन्यं कथाप्रसङ्गे । कीर्तिधर्मनाशसमुच्चयार्थौ निपातौ । न केवलं कीर्तिधर्मौ हित्वा पापं प्राप्स्यसि अपि तु अकीर्तिं च प्राप्स्यसि । न केवलं त्वमेव तां प्राप्स्यसि अपि तु भूतान्यपि कथयिष्यन्तीति वा निपातयोरर्थः । ननु युद्धे स्वमरणसन्देहात्तत्परिहारार्थमकीर्तिरपि सोढव्या । आत्मरक्षणस्यात्यन्तापेक्षितत्वात् । तथा चोक्तं शान्तिपर्वणि 'साम्ना दानेन भेदेन समस्तैरुत वा पृथक् । विजेतुं प्रयतेतारीन्न युध्येत कदाचन ॥ अनित्यो विजयो यस्मात् दृश्यते युध्यमानयोः । पराजयश्च सङ्ग्रामे तस्माद्युद्धं विवर्जयेत् ॥ त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे । तथा युध्येत संपत्तौ विजयेत रिपून्यथा' इति । एवमेव मनुनाप्युक्तम् । तथा च मरणभीतस्य किमकीर्तिर्दुःखमिति शङ्कामपनुदति संभावितस्य धर्मात्मा शूर इत्येवमादिभिरनन्यलभ्यैर्गुणैर्बहुमतस्य जनस्याकीर्तिर्मरणादप्यतिरिच्यते अधिका भवति । चो हेतौ । एवं यस्मात् अतोऽकीर्तेर्मरणमेव वरं न्यूनत्वात् त्वमप्यतिसंभावितोसि महादेवादिसमागमेन अतो नाकीर्तिदुःखं सोढुं शक्ष्यसीत्यभिप्रायः । उदाहृतवचनं त्वर्थशास्त्रत्वान्न निवर्तेत । सङ्ग्रामादित्यादिधर्मशास्त्राद्दुर्बलमितिभावः ॥ ३४ ॥

शं० टी०—एतावन्मात्रमेव न भवति किंतु—**अकीर्तिमिति** । भूतानि अत्र चान्यत्र च विद्यमाना जनाः सर्वे स्वधर्मत्यागजनितामव्ययां चिरकालस्थायिनीमकीर्तिं च ते तव कथयिष्यन्ति सभासु पापिष्ठः स्वधर्मं त्यक्तवानिति । ननु स्वजनवधादागतनिन्दापेक्षया युद्धोपरतिकृतनिन्दा सोढुं शक्यत इति चेदुच्यते "ब्रह्मणे ब्राह्मणमालभेत" इति ब्राह्मणालम्भो विहितत्वाद्दोषाय न भवति यथा तथा युद्धस्य शास्त्रीयत्वाद्युद्धे स्वजनवधो दोषाय न भवति युद्धादुपरतेस्त्वशास्त्रीयत्वात्तदुपरत्याऽऽगतेयमकीर्तिर्दुष्कीर्तिः संभावितस्य । तु चस्त्वर्थः । धर्मात्मा सत्यसन्धः शूरतमोर्जुन इति सर्वत्र सर्वैरीडितस्य सत्कीर्तेस्तव पुण्यपुरुषस्य मरणादतिरिच्यते अधिका भवति लोके मरणदुःखं क्षणकालिकं दुष्कीर्तिदुःखं तु सतामापातभावित्वान्मरणदुःखान्महत्तरमतो दुष्कीर्तेर्वरं मरणमित्यर्थः ॥ ३४ ॥

श्री० टी०—किंच—अकीर्तिमिति । अव्ययां शाश्वतीं संभावितस्य बहुमानितस्याकीर्तिर्मरणादतिरिच्यते अधिकतरा भवति ॥ ३४ ॥

स० टी०—एवं युद्धपरित्यागाद्धर्मत्यागक्षतिं पराम् ॥ उक्त्वेदानीं सतां निन्दाफलं दुःसहमुच्यते ॥१॥ देवर्ष्यादीनि भूतानि दीर्घकालामनर्थदाम् ॥ न धर्मात्मा न शूरोऽयमित्येवं हि परस्परम् ॥ २ ॥ अकीर्तिं कथयिष्यन्ति गुणैः संभावितस्य ते ॥ ननु स्वमृत्युसंदेहाद्रणे तद्वर्जनाय च ॥ ३ ॥ अकीर्तिरपि सोढव्या प्रियाः प्राणा हि देहिनाम् ॥ तथा च मृत्युभीतस्य किमकीर्त्येति चेच्छृणु ॥ ४ ॥ धर्मात्मा शूर इत्येवमादिभिः प्रवरैर्गुणैः ॥ लोके बहुमतस्यास्याधिका कीर्तिर्मृतेरपि ॥ ५ ॥ महादेवादिसंग्रामे त्वं च संभावितो यतः ॥ अतोऽप्यकीर्तिजं दुःखं जातु सोढुं न शक्ष्यसि ॥ ६ ॥ ३४ ॥

भा० टी०—किंच अकीर्तिमव्ययां दीर्घकालां धर्मात्मा शूर इत्येवमादिभिर्गुणैः संभावितस्य चाकीर्तिर्मरणादतिरिच्यते । तस्याकीर्तेर्मरणं वरमित्यर्थः ॥ ३४ ॥

प० टी०—किंच—अकीर्तिमिति । भूतानि लोकास्तेऽव्ययामाकल्पस्थायिनीमकीर्तिमपयशः कथयिष्यन्ति । यतो यादृशतादृशस्याकीर्तेर्भयं नास्ति । संभावितस्य पुरुषस्याकीर्तिर्मरणादप्यतिरिच्यतेऽतिशयं प्राप्नोति । जीवतो मरणसमय एव दुःखं भवत्यकीर्तिस्तु मरणानन्तरमपि भवतीत्यर्थः ॥ ३४ ॥

रा० टी०—अपकीर्तिं चावाप्स्यसीत्याह—अकीर्तिं चेति । अपि चाकीर्तिमपकीर्तिम् । अव्ययां शाश्वतीम् । अस्तु को दोष इत्यत आह—संभावितस्येति । लोके बहुमतस्यातिरिच्यते अधिका भवति ॥ ३४ ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ॥
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

त० टी०—ननु नाहं युद्धात्कातरतया भीतो निवर्त्ते । किन्तु बन्धुस्नेहकारुण्यादतोऽकीर्तिनिमित्ताभावात्कथं मेऽकीर्तिं कथयिष्यन्तीति चेत्तत्राह—भयादिति । युद्धोद्योगात्पूर्वमेव नाहं युद्धं करिष्यामीति व्यवसायेनानुद्युक्तश्चेत्तर्ह्येवं सर्वे मन्येरन्, पूर्वं तु गराग्निदानकपटद्यूतसर्वस्वाहरणवननिर्यापणादिबहुपकारिधार्तराष्ट्रवधेच्छुः परशुरामाद्यजेयभीष्मादिभयात्तदधिकविद्यालाभाय तपःकरणगिरीशतोषणस्वर्गप्रयाणाद्यद्भुतकर्म कृत्वा सर्वान्वधिष्यामीति प्रतिज्ञापूर्वकं युद्धार्थमागत्य बहुशस्त्रास्त्रशौर्यतेजःपराक्रमैर्येषां त्वं बहुमतोऽर्जुनेन युद्धं भविष्यतीति हर्षेणागतास्ते महारथाः इदानीमुभयोः सेनयोर्मध्ये रथं मे स्थापयेति मां प्रेर्य रथे स्थित्वा सम्प्रति न्यस्तशस्त्रमश्रुव्याप्ताक्षं त्वां दृष्ट्वा भयाद्रणादुपरतं मंस्यन्ते । नहि भयं विना क्षत्रियाणां युद्धादुपरमः सम्भवतीति भावः । तस्माद्युद्धादुपरतो भीष्मद्रोणकर्णादिभ्यो लाघवं यास्यसि ॥ ३५ ॥

म० टी०—ननूदासीना मां निन्दन्तु नाम भीष्मद्रोणादयस्तु महारथाः कारुणिकत्वेन स्तोष्यन्ति मामित्यत आह—भयादिति । कर्णादिभ्यो भयाद्युद्धान्निवृत्तं न कृपयेति त्वां मंस्यन्ते भीष्मद्रोणदुर्योधनादयो महारथाः । ननु ते मां बहु मन्यमानाः कथं भीतं मंस्यन्त इत्यत आह—येषामिति । येषामेव भीष्मादीनां त्वं बहुमतो बहुभिर्गुणैर्युक्तोयमर्जुन इत्येवं मतः त एव महारथाः त्वां भयादुपरतं मंस्यन्त इत्यन्वयः । अतो भूत्वा युद्धादुपरत इति शेषः । लाघवम् अनादरविषयत्वं यास्यसि प्राप्स्यसि सर्वेषामिति शेषः । येषामेव त्वं प्राग्बहुमतोऽभूस्तेषामेव तादृशो भूत्वा लाघवं यास्यसीति वा ॥ ३५ ॥

शं० टी०—अकीर्तिमात्रमेव न भवति शूरास्त्वां लघूकरिष्यन्तीत्याह—भयादिति । महारथाः बाह्लीक-

भगदत्तसौमदत्तिद्रुपदादयः शूराः एवं दययोपरतं त्वां भीष्मेण द्रोणेन कर्णेन चान्यैर्वीरैर्योद्धुमशक्ततया तद्भयेन रणादुपरतोऽर्जुनो न तु दययेति मंस्यन्ते निश्चेष्यन्ति पूर्वं येषां त्वं बहुमतः शौर्यधैर्ययुद्धचातुर्यादिगुणैरुत्कृष्ट इति बहुमानं गमितः स त्वमिदानीं तेभ्य एव लाघवं रणभयात्पलायत इति लघुत्वमवमतिं यास्यसि । अकीर्तिः पारोक्षिकी तिरस्कृतिरवमतिर्लघुकृतिः अपारोक्षिकीति तयोर्भेदः ॥ ३५ ॥

श्री० टी०—किंच—**भयादिति** । येषां बहुगुणत्वेन त्वं पूर्वं संमतोऽभूस्त एव भयेन संग्रामात्त्वां निवृत्तं मन्येरन् ततश्च पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ॥ ३५ ॥

स० टी०—ननु निन्दन्तु मां लोका उदासीनाः पृथग्जनाः ॥ भीष्मद्रोणादयः शूरास्तोष्यन्त्येवेति चेच्छृणु ॥ १ ॥ शल्यकर्णादिशूरेभ्यो भयाद्युद्धात्पराङ्मुखम् ॥ मंस्यन्ते त्वां न कृपया भीष्मद्रोणादयोऽपि ते ॥ २ ॥ बहु मन्यन्त एते मां जिष्णुं भीष्मादयो रणे ॥ कथं भीतं हि मंस्यन्त इत्याशङ्कयाह केशवः ॥ ३ ॥ येषां त्वं भीष्ममुख्यानां गुणैराढ्यतरो मतः ॥ अभूस्तेषां परावृत्तो लघुतामेव यास्यसि ॥ ४ ॥ ३५ ॥

भा० टी०—न केवलमितरभूतान्येवाऽकीर्तिं कथयिष्यन्ति किंतु महारथा अपीत्याह—**भयादिति** । कर्णादिभयाद्युद्धान्निवृत्तं न कृपयेति चिन्तयिष्यन्ति बहुमतो बहुभिर्गुणैर्मतो भूत्वा लघुतां यास्यसि ॥ ३५ ॥

प० टी०—अथ संभावितत्वमेवाह—**भयादिति** । ते महारथास्त्वां भयान्निमित्तभूताद्रणात्संग्रामादुपरतं परावृत्तं मंस्यन्ते मन्येरन् न त्वस्मत्कृपयेति । ते के येषां वीराणां त्वं बहु यथा भवति तथा मतः संमतो भूत्वा लाघवं लघुत्वं यास्यसि प्राप्स्यसि ॥ ३५ ॥

रा० टी०—दयालुत्वान्निवृत्तोयमिति कीर्तिमेव कथयिष्यन्तीत्यत आह—**भयादिति** । मंस्यन्ते ज्ञास्यन्ते । महारथस्वरूपमुक्तं पूर्वाध्याये । मन्यन्तां ते ततः का हानिरित्यतआह—**येषामिति** । येषां महारथानां त्वं बहुमतो भूत्वासीः तेषां पुरत एव लाघवं यास्यसीत्यर्थः ॥ ३५ ॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ॥
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

त० टी०—न केवलं लाघवमात्रमपि त्वन्यदपि दुःखमित्याह—अवाच्येति । दुर्बलहृदयः पार्थोऽस्मच्छरैः कथमयं योद्धुं शक्नुयात् भीष्मादिभ्योऽन्यत्रैव यस्य सामर्थ्यमतोऽस्मत्सन्निधौ स्थातुमपि न समर्थ इति तव सामर्थ्यं निन्दन्तस्तवाहिताः कर्णदुर्योधनादयो राज्ञामग्रे बहूनवाच्यवादान्वदिष्यन्ति ॥३६॥

म० टी०—ननु भीष्मादयो महारथा न बहु मन्यन्तां दुर्योधनादयस्तु शत्रवो बहु मंस्यन्ते मां युद्धनिवृत्त्या तदुपकारित्वादित्यत आह—**अवाच्यवादानिति** । तवासाधारणं यत्सामर्थ्यं लोकप्रसिद्धं तन्निन्दन्तस्तव शत्रवो दुर्योधनादयः अवाच्यान् वादान् वचनानर्हान् षण्ढतिलादिरूपानेव शब्दान्बहूननेकप्रकारान् वदिष्यन्ति न तु बहु मंस्यन्त इत्यभिप्रायः । ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः शत्रुकृतसामर्थ्यनिन्दनादिदुःखं सोढुं शक्ष्यामीत्यत आह—ततस्तस्मान्निन्दाप्राप्तिदुःखात् किन्नु दुःखतरं ततोधिकं किमपि दुःखं नास्तीत्यर्थः ॥ ३६ ॥

शं० टी०—विद्याकुलशीलधर्मकर्मभिः प्रतिष्ठां गतस्याकीर्तिर्दुःखं ततोप्यधिकं दुःखमवमतिस्ततोप्यधिकतरं दुःखं प्रत्यक्षदूषणमिदमित्याह—**अवाच्यवादानिति** । अहिताः शत्रवो दुर्योधनकर्णविकर्णादयस्तव सामर्थ्यमत्रादृश्यमानं पौरुषं पराक्रमं च निन्दन्तः रणात्पलायितवतस्तव शौर्यं किमिति कुत्सयन्तः सन्त-

श्चावाच्यवादान् वक्तुमनर्हानवाच्यान् वादान् धिकूशब्दपूर्वकान् दूषणशब्दाननेकधा इतो वदिष्यन्ति ततः कर्णकठोरेभ्यो मर्मघातिभ्यो दूषणवचनेभ्यो दुःखतरं क्षत्रियस्याभिमानिनः शूरस्य किं नु किमस्ति न ततोन्यद्दुःखतरमस्तीत्यर्थः ॥ ३६ ॥

श्री० टी०—किंच—अवाच्येति । अवाच्यान्वादान्वचनानर्हान् शब्दांस्तवाहितास्त्वच्छत्रवो वदिष्यन्ति ॥

म० टी०—ननु भीष्मादयः शूरा मा मन्यन्तां गुणैर्युतम् ॥ शत्रवो बहु मंस्यन्ते मां तु दुर्योधनादयः ॥ १ ॥ यतो युद्धनिवृत्त्यैषा प्राणरक्षेति चेच्छृणु ॥ तव लोकप्रसिद्धं यत्सामर्थ्यं शत्रवस्तव ॥ २ ॥ निन्दन्तस्ते वदिष्यन्ति बहुशब्दांश्च निन्दितान् ॥ एते षण्ढतिला एवमादीन्वक्तुमयोग्यकान् ॥ ३ ॥ किं ते ततोऽधिकं दुःखमिह लोके परत्र वा ॥ ४ ॥ ३६ ॥

भा० टी०—न केवलमेतावदेव मंस्यन्ते अपि तु षण्ढतिल इत्यादिरूपानवाच्यवादानपि वदिष्यन्ति यतोऽहिता इत्याह—**अवाच्येति** । वक्तुमयोग्यान् वादान् वचनानि अहिताः शत्रवः । ततो निन्दाप्राप्तेर्दुःखात्कष्टतरं दुःखं नास्तीत्यर्थः ॥ ३६ ॥

प० टी०—अवाच्यवादानिति । तवाहिताः सिद्धवैरिणो दायादा अवाच्यान् वचनानर्हानपवादान् वदिष्यन्ति । किं भूतास्तव सामर्थ्यं निन्दन्तस्ततोऽपि दुःखतरं किं नु ॥ ३६ ॥

रा० टी०—न केवलं लाघवप्राप्तिस्तवाहिताः शत्रवः अवाच्यवादान्वचनानर्हशब्दान्बहून्वदिष्यन्ति । ततः शत्रुकृतनिन्दादिश्रवणात् दुःखतरं अतिशयितदुःखं किं नु । न किमपीत्यर्थः ॥ ३६ ॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

त० टी०—अतः सामर्थ्यवतो वीरस्योभयलोकरक्षणाय परैर्युद्धकरणमेव श्रेय इत्याह—हत इति । धर्मयुद्धे शत्रुभिर्हतश्चेत्स्वर्गं प्राप्स्यसि तान् जित्वा वा महीं भोक्ष्यसे, एतेन ' न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ' इति संशयो निरस्तः । यत उभयथाऽपि लाभ एव । तस्माद्युद्धाय युद्धं कर्तुं कृतनिश्चयः सन्नुत्तिष्ठ ॥ ३७ ॥

म० टी०—ननु तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थकृता निन्दा ततो निवृत्तौ तु शत्रुकृता निन्देत्युभयतः पाशारज्जुरित्याशङ्क्य जये पराजये च लाभध्रौव्याद्युद्धार्थमेवोत्थानमावश्यकमित्याह—**हतो वेति** । स्पष्टं पूर्वार्धम् । यस्मादुभयथापि ते लाभस्तस्मात् जेष्यामि शत्रून् मरिष्यामि वेति कृतनिश्चयः सन् युद्धायोत्तिष्ठ अन्यतरफलसन्देहेपि युद्धकर्तव्यताया निश्चितत्वात् । एतेन ' न चैतद्विद्मः कतरन्नो गरीयः ' इत्यादि परिहृतम् ॥ ३७ ॥

शं० टी०—ननु युद्धे कृते गुर्वादिवधवशाच्छिष्टनिन्दा स्यादकृते शत्रुनिन्दा स्यादुभयथापि निन्दादुःखमेव फलाय भवति न ततोन्यदस्तीत्याशङ्कायां न कृते युद्धे यागवद्युद्धस्य स्वधर्मत्वाद्गुर्वादिहिंसायाः पशुहिंसावत्तदन्तःपातित्वान्न शिष्टनिन्दा नापि च शत्रुनिन्दास्ति जयेप्यजये च युद्धेन इष्टफलमस्तीत्याह—**हतो वेति** । युद्धे कर्णादिभिर्हतो वा निहतश्च त्वं स्वर्गं प्राप्स्यसि रिपून् जित्वा वा जितवांश्चेन्निष्कण्टकां महीं भोक्ष्यसे यस्माद्युद्धमुभयथा फलायैव भवति न तु विफलाय तस्माद्युद्धायैव कृतनिश्चयः सन् हे कौन्तेय ! उत्तिष्ठ सन्नद्धो भवेत्यर्थः ॥ ३७ ॥

श्री० टी०—यथोक्तम् ' न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ' इति तत्राह—**हतो वेति** । पक्षद्वयेऽपि तव लाभ एवेत्यर्थः ॥ ३७ ॥

स० टी०—ननु तद्धर्मकृते युद्धे निन्दा शत्रुकृता भवेत् ॥ कृते मध्यस्थनिन्दा स्याद्भीष्मादीनां वधादपि ॥ १ ॥ इत्येवं स्यादुभयतः पाशारज्जुर्ममेति चेत् ॥ स्वधर्मकरणान्निन्दा न मध्यस्थकृता भवेत् ॥ २ ॥ नहि स्वधर्मनिष्ठानां निन्दा कुत्रापि काचन ॥ जये पराजये वा ते लाभध्रौव्याद्रणाय भोः ॥ ३ ॥ उत्थातुमुचितं तस्मादुत्तिष्ठ न च ते क्षतिः ॥ जेष्यामि वा मरिष्यामीत्येवं कृत्वा विनिश्चयम् ॥४॥३७॥

भा० टी०—विपक्षे दोषमुक्त्वा युद्धप्रवृत्तौ सर्वथा लाभ एवेत्याशयेनाह—**हत इति** । हतः कर्णादिभिः जित्वा कर्णादीन् यत एवं तस्मात् शत्रून् जेष्यामि मरिष्यामीति निश्चयं कृत्वोत्तिष्ठ कौन्तेयेति संबोधयन् शत्रून् जित्वा राज्यलाभेनावश्यं त्वया कुन्त्यै सुखं प्रदेयमिति द्योतयति ॥ ३७ ॥

प० टी०—ननु मरणवत एव स्वर्गप्राप्तिश्रवणान्न तु जयवतो जीवत इत्याह—**हत इति** । रणे मृतस्य स्वाराज्यं जीवतः साम्राज्यमित्यर्थः ॥ ३७ ॥

रा० टी०—यच्चोक्तम् 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः' इति । जयः संदिग्ध इति पक्षद्वयेप्यहानिरित्याह—हतो वेति । 'जित्वा वा भोक्ष्यसे महीम्' इत्यत्र स्वर्गं च पश्चात्प्राप्स्यसीत्यपि ध्येयम् "ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः । ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात्" इति श्रुतौ ये शूराः प्रधनेषु युद्धेषु युध्यन्ति ये च तत्र म्रियन्ते ये च सहस्रसंख्याकदक्षिणादातारः तानेवायं प्रेतोपि गच्छतादिति यमं प्रति प्रेतस्य स्वर्गप्रार्थनात् । तत्र च ये युध्यन्ते तान्प्रेतो गच्छतादिति युद्धशूराणां जयेपि स्वर्गप्राप्तेरत्र श्रुतावपगमात् । तस्मात्पक्षद्वयेपि फलभावाद्युद्धाय कृतनिश्चयः सन्नुत्तिष्ठ सन्नद्धो भवेत्यर्थः ॥ ३७ ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

त० टी०—यदुक्तं 'पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः' इति तस्योत्तरमाह—सुखदुःखे इति । यद्यपि स्वधर्मभूतयुद्धे शस्त्रपातादिनिमित्ते सुखदुःखे अवर्जनीये तथापि देहस्यैव ते नोक्तस्वभावस्य देहविलक्षणस्यात्मन इति मत्वा ते समे कृत्वा तद्धेतुभूतौ लाभालाभौ जयाजयौ च समौ कृत्वा स्वर्गादिफलेऽभिसन्धिरहितः सन् युद्धाय युज्यस्व । केवलं स्वधर्मानुष्ठानबुद्ध्या युद्धमारभस्व । एवं विवेकबुद्ध्या एतान्सर्वान्हत्वा पापं नावाप्स्यसि, प्रत्युत स्वधर्माकरणजन्यपापात्प्रमोक्ष्यसे ॥ ३८ ॥

म० टी०—नन्वेवं स्वर्गमुद्दिश्य युद्धकरणे तस्य नित्यत्वव्याघातः राज्यमुद्दिश्य युद्धकरणे त्वर्थशास्त्रत्वाद्धर्मशास्त्रापेक्षया दौर्बल्यं स्यात् ततश्च काम्यस्याकरणे कुतः पापं दृष्टार्थस्य गुरुब्राह्मणादिवधस्य कुतो धर्मत्वं तथा चाथ चेदिति श्लोकार्थो व्याहत इति चेत् तत्राह—**सुखदुःखे इति** । समताकरणं रागद्वेषराहित्यं सुखे तत्कारणे लाभे तत्कारणे जये च रागमकृत्वा । एवं दुःखे तद्धेतावलाभे तद्धेतावपजये च द्वेषमकृत्वा ततो युद्धाय युज्यस्व संनद्धो भव । एवं सुखकामनां दुःखनिवृत्तिकामनां वा विहाय स्वधर्मबुद्ध्या युध्यमानोगुरुब्राह्मणादिवधनिमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्स्यसि । यस्तु फलकामनया करोति स गुरुब्राह्मणादिवधनिमित्तं पापं प्राप्नोति यो वा न करोति स नित्यकर्माकरणनिमित्तम् । अतः फलकामनामन्तरेण कुर्वन्नुभयविधमपि पापं न प्राप्नोतीति प्रागेव व्याख्यातोभिप्रायः । 'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्' इति त्वानुषङ्गिकफलकथनमिति न दोषः । तथा चापस्तम्बः स्मरति

' तद्यथाम्रे फलार्थे निमित्ते (निर्मिते) छायागन्ध इत्यनूत्पद्यते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नोचेदनूत्पद्यन्ते न धर्महानिर्भवति ' इति । अतो युद्धशास्त्रस्यार्थशास्त्रत्वाभावात्पापमेवाश्रयेदस्मानित्यादि निराकृतं भवति ॥ ३८ ॥

शं० टी०—ननु 'हतो वा प्राप्स्यसि स्वर्गम्' इति वाक्येन युद्धस्य ऐहिकामुष्मिकसुखसाधनत्वमेव प्रतीयते न तु ' धर्म्याद्धि युद्धाच्छ्रेयोन्यत् ' इत्युक्तन्यायेन श्रेयःसाधनता विद्यते तत इन्द्रियारामाणामेव कर्तव्यं युद्धं यतः स्वर्गादिसुखहेतुत्वं युद्धस्य दृश्यते ततो बन्धकत्वान्न परमार्थापेक्षावतामित्याशङ्कायां न। भावनाभेदादत्र तत्फलभेदोऽप्यस्ति यथा ज्योतिष्टोमः स्वर्गकामनया कृतः स्वर्गहेतुरकामनया चित्तशुद्धिहेतुः तद्वद्युद्धं प्रजापरिपालनं दानं च कामाऽकामाभ्यां स्वर्गादिफलाय चित्तशुद्धये च भवति श्रेयस्कामश्चेत्त्वं युद्धकामनयैव कुर्वित्याह—सुखदुःखे इति। लाभालाभौ जयाजयौ च तत्फलभूते सुखदुःखे च समे कृत्वा समबुद्धिर्भूत्वा लाभादीनां सिद्ध्यसिद्ध्योर्हर्षविषादावकृत्वेत्यर्थः । मद्भक्त्या विधिविधेयो भूत्वा ततो विध्युक्ताय युद्धाय स्वधर्मानुष्ठानाय युज्यस्व यतस्त्व एवं विध्युक्तं यत्तदीश्वरार्पणबुद्ध्या करिष्यामीत्येवं निश्चयेन युद्धं कुर्वन् पापं नावाप्स्यसि " ब्रह्मणे ब्राह्मणमालभेत " इति श्रुत्युक्ते नरमेधे ब्राह्मणमालभ्य कर्ता यथा पापं नाप्नोति तथा " ये युध्यन्ते प्रधनेषु" इति श्रुत्युक्ते स्वधर्मे युद्धे गुर्वादीन् हत्वा गुर्वादिवधजं पापं नरमेधिवन्नावाप्स्यसीत्यर्थः ॥ ३८ ॥

श्री० टी०—यदप्युक्तं पापमेवाश्रयेदस्मानिति तत्राह—सुखदुःख इति । सुखदुःखे समे कृत्वा तथा तयोः कारणभूतौ यौ लाभालाभावपि तयोरपि कारणभूतौ जयाजयावपि समौ कृत्वा एतेषां समत्वे कारणं हर्षविषादराहित्यम् । युज्यस्व सन्नद्धो भव । सुखाद्यभिलाषं हित्वा स्वधर्मबुद्ध्या युद्ध्यमानः पापं न प्राप्स्यसीत्यर्थः ॥ ३८ ॥

स० टी०—तत्र स्वधर्म इत्येवं युद्ध्यमानस्य ते परम् ॥ उपदेशं शृणु त्वं मे सुखदुःखे समे इति ॥१॥ सुखे तत्कारणे लाभे तन्निमित्ते जयेऽपि च ॥ अकृत्वा रागमेवं च दुःखे तत्कारणे क्षतौ ॥ २ ॥ तन्निमित्तेऽजये चाप्यकृत्वा द्वेषं ततः परम् ॥ युद्धाय भव सन्नद्धो नैवं पापमवाप्स्यसि ॥ ३ ॥ फलाभिलाषया कुर्वन्गुरुविप्रवधादिकम् ॥ प्राप्नोति किल्बिषं घोरं तन्निमित्तमयं पुमान् ॥ ४ ॥ विना फलाभिलाषं तु धर्म इत्येवमाचरन् ॥ नैवं पापमवाप्नोति महेशाज्ञानुपालनात् ॥ ५ ॥ हतो वेत्यादिना प्रोक्तं फलं तच्चानुषङ्गिकम् ॥ न काम्यं कर्म संग्रामः किं तु नित्यं स्वधर्मतः ॥ ६ ॥ ३८ ॥

भा० टी०—ननु गुर्वादिवधार्थं प्रवृत्तस्य पापावाप्त्या कुतः स्वर्गप्राप्तिः । जित्वा वा कुतो भोगसुखम् । निन्दया व्याप्तत्वात्तेषामित्याशङ्क्य निष्कामस्य समदृष्टेः स्वधर्मबुद्ध्या प्रवृत्तस्य ते पापादिप्राप्तिर्नास्तीत्याशयेनाह—सुखेति । सुखदुःखे समे कृत्वा सुखे रागं दुःखे द्वेषं चाकृत्वा तथा तत्साधनीभूतौ लाभालाभौ तत्साधनीभूतौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि । तथा चाग्नीषोमीयहिंसाविधायकवचनवत् युद्धहिंसाविधायकमपि धर्मशास्त्रविशेषवचनम् ' न हिंस्यात्सर्वाभूतानि ' इत्यस्य सामान्यशास्त्रस्य बाधकम् । अतः पापावाप्तेरभावात् । युद्धप्रवृत्तौ सर्वथाऽपि लाभ एवेति ॥ ३८ ॥

प० टी०—अथ धर्म्ययुद्धस्वरूपमाह—सुखदुःखे इति । सुखदुःखे समे कृत्वा तथा तयोः कारणीभूतौ लाभालाभौ जयाजयौ समौ कृत्वा हर्षविषादरहितो भूत्वा युध्यस्वेत्यर्थः । एवममुना प्रकारेण युद्धं कृत्वा पापं न प्राप्स्यसि ॥ ३८ ॥

रा० टी०—यथोक्तं पापमेवाश्रयेदस्मानिति तत्राह—सुखेति । यथा दुःखमनुपादेयं तथा वैषयिकसुख-

मप्यनुपादेयमित्यनुपादेयत्वेन दुःखसमं सुखं कृत्वेत्यर्थः । लाभालाभावित्यादावपि समावित्यनुषङ्गः । अनुपादेयत्वेनालाभसमं लाभं कृत्वेत्यर्थः । जयाजयावित्यत्राप्येवमर्थो ध्येयः । सुखाद्यभिलापं हित्वा भगवत्पूजारूपोऽयं स्वधर्म इति बुद्धेति यावत् । युद्धाय युज्यस्व युङ्क्ष्व । ततो भगवद्भक्तिपूर्वकं स्वधर्मतयानुष्ठानात्पापं नैवाप्स्यसि । प्रत्युत पुण्यमेवाप्स्यसीत्यर्थः ॥ ३८ ॥

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ॥
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

त० टी०—एवं देहाद्विविक्तात्मतत्त्वयाथात्म्यज्ञानमुपदिश्य तदर्जुनस्य हृद्यदृढभूतं ज्ञात्वा नहि साधनमृते तत्त्वज्ञानं स्थिरीभवतीति दर्शयन्साधनानुष्ठानदार्ढ्यायोक्तमनुवदन् तत्साधनभूतं कर्मयोगं वक्तुं प्रस्तौति—एषेति । एषा ' अशोच्यानन्वशोचस्त्वम् ' इत्यारभ्य ' तस्मात्सर्वाणि भूतानि ' इत्यन्तैः श्लोकैः सांख्ये सम्यक् ख्यायते प्रकथ्यते तत्त्वमनयेति संख्याऽध्यात्मशास्त्रजा बुद्धिस्तयाऽवधारणीयं तत्त्वं साङ्ख्यं तस्मिन्विषये बुद्धिरभिहिता निरूपिता । तथापि (तव) तत्साधनानुष्ठानाभावात्त्वय्यस्थिरेव लक्ष्यतेऽतो योगे निःसङ्गतया भगवदाराधनात्मके कर्मयोगे तु तद्भिन्नां तत्साधनभूतामिमां सुखदुःखे समे कृत्वेत्यनन्तरमेव सङ्क्षेपेणोक्तामग्रे विस्तरेण वक्ष्यमाणां शृणु । हे पार्थ शुद्धान्तःकरणायाः पृथायाः पुत्र । यया बुद्ध्या युक्तस्त्वं कर्मबन्धं कर्मणा बन्धभूतं संसारं प्रहास्यसि प्रकर्षेण त्यक्ष्यसि ॥ ३९ ॥

म० टी०—ननु भवतु स्वधर्मबुद्ध्या युध्यमानस्य पापाभावस्तथापि न मां प्रति युद्धकर्तव्यतोपदेशस्तवोचितः ' य एनं वेत्ति हन्तारम् ' इत्यादिना ' कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ' इत्यनेन विदुषः सर्वकर्मप्रतिक्षयात् नह्यकर्त्रभोक्तृशुद्धस्वरूपोहमस्मि युद्धं कृत्वा तत्फलं भोक्ष्य इति च ज्ञानं संभवति विरोधात् ज्ञानकर्मणोः समुच्चयासंभवात्प्रकाशतमसोरिव अयं चार्जुनाभिप्रायो'ज्यायसी चेत्' इत्यत्र व्यक्तो भविष्यति । तस्मादेकमेव मां प्रति ज्ञानस्य कर्मणश्चोपदेशो नोपपद्यते इति चेत् न' विद्वदविद्वदवस्थाभेदेन ज्ञानकर्मोपदेशोपपत्तेरित्याह भगवान्—एषेति । एषा नत्वेवाहमित्याद्येकविंशतिश्लोकैस्ते तुभ्यमभिहिता साङ्ख्ये सम्यक् ख्यायते सर्वोपाधिशून्यतया प्रतिपाद्यते परमात्मतत्त्वमनयेति सङ्ख्योपनिषत् तयैव तात्पर्यपरिसमाप्त्या प्रतिपाद्यते यः स साङ्ख्यः औपनिषदः पुरुष इत्यर्थः । तस्मिन् बुद्धिस्तन्मात्रविषयं ज्ञानं सर्वानर्थनिवृत्तिकारणं त्वां प्रति मयोक्तं नैतादृशज्ञानवतः क्वचिदपि कर्मोच्यते तस्य कार्यं न विद्यत इति वक्ष्यमाणत्वात् । यदि पुनरेवं मयोक्तेपि तवैषा बुद्धिर्नोदेति चेच्चित्तदोषात्तदा तदपनयेनात्मतत्त्वसाक्षात्काराय कर्मयोग एव त्वयानुष्ठेयः । तस्मिन्योगे कर्मयोगे तु करणीयामिमाम् ' सुखदुःखे समे कृत्वा ' इत्यत्रोक्तां फलाभिसन्धित्यागलक्षणां बुद्धिं विस्तरेण मया वक्ष्यमाणां शृणु । तुशब्दः पूर्वबुद्धेर्योगविषयत्वव्यतिरेकसूचनार्थः । तथा च शुद्धान्तःकरणं प्रति ज्ञानोपदेशोऽशुद्धान्तःकरणं प्रति कर्मोपदेश इति कुतः समुच्चयशङ्कया विरोधावकाश इत्यभिप्रायः । योगविषयां बुद्धिं फलकथनेन स्तौति—यथा व्यवसायात्मिकया बुद्ध्या कर्मसु युक्तस्त्वं कर्मनिमित्तं बन्धं आशयाऽशुद्धिलक्षणं ज्ञानप्रतिबन्धं प्रकर्षेण पुनः प्रतिबन्धानुत्पत्तिरूपेण हास्यसि त्यक्ष्यसि । अयं भावः कर्मनिमित्तो ज्ञानप्रतिबन्धः कर्मणैव धर्माख्येनापनेतुं शक्यते । " धर्मेण पापमपनुदति" इति श्रुतेः श्रवणादिलक्षणो विचारस्तु कर्मात्मकप्रतिबन्धरहितस्यासंभावनादिप्रतिबन्धं दृष्टद्वारेणापनयतीति न कर्मबन्धनिराकरणायोपदेष्टुं शक्यते । अतोत्यन्तमलिनान्तःकरणत्वाद्बहिरङ्गसाधनं कर्मैव त्वयानुष्ठेयं नाधुना श्रवणादियोग्यतापि तव जाता दूरे तु ज्ञानयोग्यतेति । तथा च वक्ष्यति ' कर्मण्येवाधिकारः' इति ।

एतेन साङ्ख्यबुद्धेरन्तरङ्गसाधनं श्रवणादि विहाय बहिरङ्गसाधनं कर्मैव भगवता किमित्यर्जुनायोपदिश्यत इति निरस्तम् । कर्मबन्धं संसारमीश्वरप्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसीति प्राचां व्याख्याने त्वध्याहारदोषः कर्मपदवैयर्थ्यं च परिहर्तव्यम् ॥ ३९ ॥

शं० टी०–ननु ‘ वेदाविनाशिनं नित्यम् ’ इत्यादिना ब्रह्मविदो न किंचित्कर्तव्यमस्तीत्युपपाद्येदानीं स्वधर्ममपि चेत्यादिना कर्म कर्तव्यमिति त्वया पुनः कर्म विधीयते दुःखभूयिष्ठस्य कर्मणः करणापेक्षया कर्ता करणं कार्यं च सर्वं मिथ्यैवेति कर्म सर्वं संन्यस्य तूष्णीमवस्थानमेव सुखमिति चेत्सत्यमेवंविधज्ञानमेवाहंममेत्यादि संसारभ्रमविध्वंसकं भवति तथापि तदारूढविषयं न त्वारुरुक्षुविषयमिति मुमुक्षूणां कर्मतत्संन्यासमार्गपरिज्ञानाय कर्मसंन्यासकर्मयोगयोर्विषयविभागं सूचयितुं कर्मानुष्ठानप्रकारं च बोधयितुमिदमाह–**एषेति** । साङ्ख्ये यया तदक्षरमधिगम्यत इति ब्रह्मविद्भिः ऋषिभिः सम्यक् ख्यायते पठ्यत इति सङ्ख्या परविद्या तया संख्यया “ यत्तदद्रेश्यमग्राह्यम् ” इत्यादिना प्रतिपाद्यत इति साङ्ख्यं निर्विशेषं परं ब्रह्म तस्मिन् साङ्ख्ये ब्रह्मणि विषये या बुद्धिरभिहिता ‘ न जायते म्रियते ’ इत्यादिना परं ब्रह्म विषयीकृत्य पूर्वं यज्ज्ञानं ते तुभ्यमुपदिष्टं सैषा बुद्धिः तज्ज्ञानमारूढस्यैवाश्रयणीयं नत्वारुरुक्षोः आरुरुक्षोस्तव चित्तशुद्ध्यै श्रद्धयेश्वरार्पणबुद्ध्या निरभिमानेनाकामनया च सुखदुःखादिषु समबुद्ध्या च कर्मयोग एव कर्तव्यः न तु ज्ञानयोगस्तवैवं कर्तव्ये योगे कर्मयोगे त्विमां वक्ष्यमाणलक्षणां बुद्धिं ज्ञानं शृणु हे पार्थ! यया बुद्ध्या युक्तः समन्वितो वक्ष्यमाणोपदेशप्रकारेण कर्मयोगे वर्तमानः सन् त्वं कर्मबन्धं जन्ममृत्युजरादिभिः पुनःपुनः पुरुषं बध्नाति योजयतीति बन्धः कर्मैव बन्धः कर्मबन्धस्तं प्रहास्यसि बन्धकेभ्यः सर्वेभ्य कर्मभ्यो वैदिककर्मानुष्ठानसंभावितचित्तशुद्ध्युत्पन्नाऽकर्त्राऽऽत्मविज्ञानबलेन निष्क्रान्तो भविष्यसीत्यर्थः । नन्वीश्वर एव कर्ता कारयिता कर्मणां फलभोक्ता चेत्यध्यवसायात्मिकयैव बुद्ध्या कर्मबन्धप्रहाणे सति किमकर्त्रात्मज्ञानेन कर्मबन्धान्मुक्तो भविष्यसीति मध्ये कर्मबन्धस्यात्मज्ञाननिवर्त्यत्वकल्पनयेति चेद्भवानत्र प्रष्टव्यः । किं कर्मणामीश्वरार्पणमात्रेण कर्मबन्धनिवृत्तिरुच्यते उतेश्वर एव कर्ता कारयितेत्युक्तिमात्रेण वा कर्मबन्धनिवृत्तिरिति । नाद्यः तावन्मात्रेण नैष्कर्म्यासंभवात् । ‘ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ’ इति परमेश्वरस्य भक्तैर्दत्तसुकृतदुष्कृतादेरनादानस्मरणादङ्गीकृतेप्यस्मिन् पक्षे शतकोटिब्रह्मकल्पेषु कृतानामनर्पितानां सुकृतादिकर्मणां निवृत्त्यसंभवाच्च । भक्तेरिदानींतनत्वात्तेषां तत्समर्पणायोगाद्यदा जन्मारब्धं तदारभ्यास्त्येव भक्तिरिति चेन्न तथात्वे जन्मान्तर एव तव मुक्तिप्रसङ्गात् ‘लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् । जन्मान्तरप्रलयकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम्’ इति सकृत्प्रणतेः संसारमहासागरतारकमित्यादिभक्तवाक्यानामप्रामाण्यप्रसंगाच्च तत्रापि च पापस्यैव नाशो न तु पुण्यस्य । न द्वितीयः ‘ अयुद्धेन हतो वाली तस्येदं कर्मणः फलम्’ इति स्वकृतकर्मण एवापरिहार्यत्वे ईश्वरस्य परकृतकर्मपरिहारायोगात्ततोऽविक्रियात्मविज्ञानादेव पुरुषस्य सर्वकर्मनिवृत्तिर्वक्तव्या । तथा च श्रुतिः “सर्वं पाप्मानं तरति क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे” इत्यादि । तर्हि ‘बुद्ध्या युक्तो यया पार्थ!’ इति वचनस्य का गतिरिति चेत्तस्य फलाभिसन्धिराहित्येन कृतं कर्म बन्धाय न भवतीति कर्मस्तुत्या मुमुक्षुभिर्निष्कामत्वेन चित्तशुद्ध्यै कर्म कर्तव्यमिति कर्मविधिपरत्वमेव गतिरिति ब्रूमस्ततोऽविक्रियात्मविज्ञानादेव कर्मबन्धनिवृत्तिरिति सिद्धम् ॥ ३९ ॥

श्री० टी०–उपदिष्टं ज्ञानयोगमुपसंहरंस्तत्साधनं कर्मयोगं प्रस्तौति–**एषा त इति** । सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक् ज्ञानं तस्मिन् प्रकाशमानमात्मतत्त्वं सांख्यं तस्मिन्करणीया बुद्धिरेषा तवाभिहिता । एवमभिहितायामपि साङ्ख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न संभवति तर्ह्यन्तःकरणशु-

द्द्विारा ऽऽत्मतत्त्वापरोक्षार्थं कर्मयोगे त्विमां बुद्धिं शृणु यया बुद्ध्या युक्तः परमेश्वरार्पितकर्मयोगेन शुद्धान्तः-करणः सन् तत्प्रसादप्राप्तापरोक्षज्ञानेन कर्मात्मकं बन्धं प्रकर्षेण हास्यसि त्यक्ष्यसि ॥ ३९ ॥

स० टी०—ननु धर्मधिया मास्तु युद्धयमानस्य मे शुभम् ॥ तथापि युद्धकार्यत्वोपदेशस्तेन मां प्रति ॥१॥ योग्यो यस्मात्पुरा ज्ञस्य कर्माक्षेपस्त्वयोदितः॥ नह्यकर्तृस्वरूपोऽहमिति ज्ञाने पुनर्भवेत् ॥ २ ॥ युद्धं कृत्वा फलं भोक्ष्य इति ज्ञानं विरोधतः ॥ तस्मात्ते यौगपद्येन मां प्रति ज्ञानकर्मणोः ॥ ३ ॥ उपदेशः कथं योग्यः स्यादित्यत्राह माधवः ॥ ज्ञानकर्मोपदेशः स्यादवस्थाभेदतो यतः ॥ ४ ॥ एकं प्रत्यपि शास्त्रीयां व्यवस्थां शृण्वतोऽर्जुन ॥ न त्वेवेत्यत आरभ्य तुभ्यमेषा पुरोदिता ॥ ५ ॥ तत्त्वं संख्यायतं सर्वोपाधिशून्यतयानया ॥ संख्योपनिषदे तस्यां प्रतिपाद्यः परः पुमान् ॥ ६ ॥ सांख्यस्तन्मात्रविषयं ज्ञानमज्ञाननाशकम् ॥ मयोक्तं त्वां प्रतीत्येवं ज्ञानिनः कर्म नोच्यते ॥ ७ ॥ यद्येवं ते मदुक्तेऽर्थे चित्तदोषान्न धीर्भवेत् ॥ तदा तद्दोषनाशार्थं तत्त्वज्ञानोदयाय च ॥ ८ ॥ कर्मयोगो ह्यनुष्ठेयस्त्वया धीशुद्धिकारकः ॥ तस्मिन्योगे तु कर्तव्यामिमां निष्कामशालिनीम् ॥ ९ ॥ सर्वत्र समतारूपां बुद्धिं त्वं विस्तराच्छृणु ॥ तुना बुद्धेः पुरोक्ताया भेदोऽस्याः सूच्यते धियः ॥ १० ॥ तेन शुद्धधियो ज्ञानं कर्माशुद्धधियः स्मृतम् ॥ यया निश्चयरूपिण्या बुद्ध्या युक्तः स्वकर्मसु ॥ ११ ॥ बन्धं कर्मनिमित्तं त्वमाशया शुद्धिलक्षणम् ॥ प्रतिबन्धं निजज्ञाने प्रकर्षेणैव हास्यसि ॥ १२ ॥ धर्माधर्माख्यकर्मैव बन्धं तं त्वं प्रहास्यसि ॥ ईशप्रसादतस्तत्त्वज्ञानलाभसुखेन वा ॥ १३॥३९॥

भा० टी०—एष उपदेशः शोकमोहापनयसाधनस्य आत्मतत्त्वज्ञानस्य प्रसङ्गे आगतः । लौकिको न्यायः स्वधर्मविद्भिः कैश्चिल्लोकैर्यथा स्वधर्मप्रतिबन्धकौ शोकमोहौ अकृत्वा स्वधर्मोऽनुष्ठीयते । तद्वत्त्वं स्वधर्ममपि चावेक्ष्य शोकमोहाभिभूतो विकम्पितुं नार्हसीति । अथ चैनमित्यादिवत् प्रासङ्गिकः स्वधर्ममपीत्याद्यष्टभिः श्लोकैरुक्तः । ननु समुच्चयतात्पर्येण परमार्थदर्शनस्येह प्रकृतत्वात् । तच्चोक्तं परमार्थदर्शनमुपसंहरन् तदुपायभूतां योगनिष्ठां चित्तशुद्धये वक्तुं प्रतिजानीते—**एषेति** । एषा ते तुभ्यमभिहिता कथिता साङ्ख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षाच्छोकमोहादिसहेतुदोषनिवृत्तिकारणम् । योगे तु निःसङ्गतया द्वन्द्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च तत्प्राप्त्युपाये इमामनन्तरोच्यमानां बुद्धिं शृणु तां स्तौति—ययेति । यया बुद्ध्या योगविषयया युक्तः कर्मबन्धं कर्मैव धर्माधर्माख्यं बन्धस्तं प्रहास्यसि प्रकर्षेण त्यजसि । ननु योगविषयया बुद्ध्या कर्मबन्धस्य कुतो निवृत्तिर्नहि तत्त्वज्ञानमन्तरेण समूलं कर्म हातुं शक्यमिति चेत्सत्यम् । तथापीश्वरप्रसादनिमित्तज्ञानप्राप्तिद्वारेत्यभिप्रायः । द्वाराकथनं तु तत्साधनस्तुत्यर्थम् । पार्थेति संबोधयन् एतद्बुद्धियुक्तस्य मातृगर्भाप्राप्तिं सूचयति । यत्तु कर्मनिमित्तं बन्धमाशयाशुद्धिलक्षणं ज्ञानप्रतिबन्धं प्रहास्यसि । अयं भावः । कर्मनिमित्तो ज्ञानप्रतिबन्धः कर्मणैव धर्माख्येनापनेतुं शक्यते । श्रवणादिलक्षणविचारस्तु कर्मात्मकप्रतिबन्धरहितस्यासंभावनादिप्रतिबन्धं दृष्टद्वारेणापनयतीति न कर्मबन्धनिराकरणायोपदेष्टुं शक्यते इति । तन्न । स्वर्गनरकादिसाधनपुण्यपापप्रतिपादककर्मपदसंकोचे बन्धशब्दस्य प्रतिबन्धपरत्वे च कारणाभावात् । ननु एतद्बुद्ध्या धर्माधर्माख्यबन्धप्रहाणस्यासंभव एव कारणमिति चेन्न, ज्ञानप्राप्तिद्वारा तत्संभवस्योक्तत्वात् । असम्भावनादेरपि पापनिमित्तचित्ताशुद्धिमूलकत्वादत एव शुद्धचित्तस्य विद्याधरस्यासंभावनाद्यनुत्पत्तिर्वासिष्ठ उपाख्यायते । असम्भावनादिनिमित्तदुरितनिवृत्त्यर्थमेवादृष्टोत्पादको विवरणाचार्यैः श्रवणे विधिरङ्गीकृतः । अन्यथा प्राकृतप्रबन्धाद्यर्थेन दृष्टेनासंभावनादिनिरासः स्यात् तथा च वेदान्तश्रवणजेन पुण्येन पापनिवृत्त्या आत्मतत्त्वं सम्यगवगम्यते इति सर्वसंमतमनर्थकं भवेत् । एतेन कर्मबन्धं संसारमीश्वरप्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसि इति प्राचां व्याख्याने

त्वध्याहारदोषः कर्मपदवैयर्थ्यं च परिहर्तव्यमिति प्रत्युक्तम्। जन्मबन्धविनिर्मुक्ता इत्यत्र जन्मपदवत्कर्मपदस्यापि बन्धस्वरूपबोधनपरत्वेन सार्थक्यात्। भाष्ये अभिप्राय इत्युक्त्या तस्याभिप्रायकथनपरत्वेनाध्याहारदोषाभावात्। स्वेनापि 'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते' इत्यत्र द्वारस्योक्तत्वाच्चेति दिक् ॥३९॥

प० टी०—अथोपदिष्टं ज्ञानयोगमुपसंहरन् स्वधर्ममपीत्युक्तत्वात्कर्मयोगं प्रशंसन्नाह—**एषेति** । सम्यक् ख्यायते प्रकाश्यत आत्मतत्त्वमनयेति संख्या सम्यग्ज्ञानं तस्मिन् प्रकाश्यमानमात्मतत्त्वं साङ्ख्यं तत्र साधनीभूता या बुद्धिरेषा त इति तुभ्यमभिहिता कथिता। एवं कथितायामपि साङ्ख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न भवति तर्ह्यन्तःकरणशुद्धिद्वारात्मतत्त्वमपरोक्षं कर्तुं कर्मयोगे त्विमां वक्ष्यमाणां बुद्धिं शृणु । यया बुद्ध्या कर्मात्मकं बन्धं प्रकर्षेण हास्यसि त्यक्ष्यसि ॥ ३९ ॥

रा० टी०—न त्वेवेत्यादिग्रन्थोक्तार्थोपसंहारपूर्वकं तत्सङ्गतत्वेनोत्तरप्रकरणारम्भं प्रतिजानीते—**एषेति** । अत्र साङ्ख्यशब्दो जीवेश्वरज्ञानपरः। 'न त्वं नेमे' इत्यादिना जीवस्य प्राधान्येन। तादर्थ्येन 'न त्वेवाहम्' इत्यादिनेश्वरस्येति द्वयोरपि प्रकृतत्वात्। बुद्धिशब्दश्च बुध्यतेऽनयेति करणव्युत्पत्त्या बोधजनकवाक्यपरः (क्पर:)। योगशब्दश्च युज्यते प्राप्यते फलमनेनेति करणव्युत्पत्त्योपायपरः। अयमर्थः। हे पार्थ ! साङ्ख्ये जीवेश्वरस्वरूपज्ञानविषये तज्जननार्थमिति यावत्। एषा 'न त्वेवाहम्' इत्यारभ्य 'देही नित्यमवध्यः' इत्यन्ता बुद्धिः तदुभयस्वरूपबोधजनिका वाक् वाक्यानीति यावत् । ते तुभ्यमभिहिता उक्ता। योगे तज्ज्ञानहेतूपायविषये तूपायज्ञानार्थमिति यावत्। इमाम् 'त्रैगुण्यविषया' इत्यादिनाऽऽषष्ठसमाप्तिवक्ष्यमाणां बुद्धिं उपायबोधजनिकां वाचं वाक्यानीति यावत्। शृणु। श्रवणमात्रस्य विधिना विनापि संभवाच्छ्रुत्वा तत्र निष्ठां कुर्वित्यर्थः । अत्र वागभिहितेति यौगिकबुद्धिपदेन तदुक्तिर्नाविशदं वाङ्मात्रमुक्तं किंतु तदवबोधो यथोत्पद्येत तथोक्तमिति ज्ञापनायेति ध्येयम्। आदरजननाय योगं प्रशंसति—**बुद्ध्येत्यादिसार्धश्लोकेन** । यया मद्वाग्जन्यया बुद्ध्या ज्ञानोपायबुद्ध्या युक्तः सन् तदनुष्ठानद्वारा ब्रह्मसाक्षात्कारातिशयं प्राप्य कर्मबन्धं संसारं निःशेषतः प्रहास्यसि मुक्तो भविष्यसि ॥ ३९ ॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ॥
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

त० टी०—ननु "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुत्या कर्मणां कृषिवत् क्षयिष्णुत्वाभिधानात्किञ्चिदङ्गवैगुण्ये प्रत्यवायसम्भवाच्च कुतः कर्मयोगस्य कर्मबन्धप्रहाणनशक्तिरिति चेत्तत्राह—नेहेति। इह भगवदाराधनात्मके निष्कामकर्मणि अभिक्रमः प्रारम्भस्तस्य नाशो नास्ति, कृष्यादेरिव विघ्नबाहुल्येन नैष्फल्यं नास्तीत्यर्थः। आरब्धस्य च विच्छेदेऽपि प्रत्यवायो न विद्यते, भगवदाज्ञापालनबुद्ध्याऽनुष्ठिते प्रत्यवायासम्भवात्। अतोऽस्य निष्कामकर्मयोगस्य धर्मस्य स्वल्पमप्यनुष्ठानं महतो भयात्संसारात्त्रायते रक्षति ॥ ४० ॥

म० टी०—ननु " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन " इति श्रुत्या विविदिषां ज्ञानं चोद्दिश्य संयोगपृथक्त्वन्यायेन सर्वकर्मणां विनियोगात्तत्र चान्तःकरणशुद्धेर्द्वारत्वादन्यान्प्रति कर्मानुष्ठानं विधीयते तत्र " तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति श्रुतिबोधितस्य फलनाशस्य संभवात् ज्ञानं विविदिषां चोद्दिश्य क्रियमाणस्य यज्ञादेः काम्यत्वात्सर्वाङ्गोपसंहारेणानुष्ठेयस्य यत्किंचिदङ्गासंपत्तावपि वैगुण्योपपत्तेः। यज्ञेनेत्यादिवाक्यविहितानां च सर्वेषां कर्मणामेकेन पुरुषायुषपर्यवसानेऽपि कर्तुमशक्यत्वात् कुतः कर्मबन्धं प्रहास्यसीति फलप्रत्याशेत्यत आह भगवान्—**नेहा-**

भिक्रमनाशोऽस्तीति । अभिक्रम्यते कर्मणा प्रारभ्यते यत्फलं सोभिक्रमस्तस्य नाशस्तद्यथेहेत्यादिना प्रतिपादित: इह निष्कामकर्मयोगे नास्ति ' एतत्फलस्य शुद्धेः पापक्षयरूपत्वेन लोकशब्दवाच्यभोग्यत्वाभावेन च क्षयासंभवात् वेदनपर्यन्ताया एव विविदिषायाः कर्मफलत्वाद्वेदनस्य चाव्यवधानेनाज्ञाननिवृत्तिफलजनकस्य फलमजनयित्वा नाशासंभवादिह फलनाशो नास्तीति साधूक्तम् । तदुक्तम् ' तद्यथेहेति या निन्दा सा फले न तु कर्मणि । फलेच्छां तु परित्यज्य कृतं कर्म विशुद्धिकृत् ' इति । तथा प्रत्यवायः अङ्गवैगुण्यनिबन्धन वैगुण्यमिह न विद्यते । तमितिवाक्येन नित्यानामेवोपात्तदुरितक्षयद्वारेण विविदिषायां विनियोगात् । तत्र च सर्वाङ्गोपसंहारनियमाभावात् । काम्यानामपि संयोगपृथक्त्वन्यायेन विनियोग इति पक्षेपि फलाभिसन्धिराहितत्वेन तेषां नित्यतुल्यत्वात् । न हि काम्यनित्याग्निहोत्रयोः स्वतः कश्चिद्विशेषोस्ति । फलाभिसन्धितदभावाभ्यामेव तु काम्यत्वनित्यत्वव्यपदेशः । इदं च पक्षद्वयमुक्तं वार्तिके ' वेदानुवचनादीनामैकात्म्यज्ञानजन्मने । तमेतमितिवाक्येन नित्यानां वक्ष्यते विधिः ॥ यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणाम् । तमेतमिति वाक्येन संयोगस्य पृथक्त्वतः ' इति । तथा च फलाभिसन्धिना क्रियमाण एव कर्मणि सर्वाङ्गोपसंहारनियमात् । तद्विलक्षणे शुद्ध्यर्थे कर्मणि प्रतिनिध्यादिना समाप्तिसंभवान्नागमवैगुण्यनिमित्तः प्रत्यवायोऽस्तीत्यर्थः । तथा अस्य शुद्ध्यर्थस्य धर्मस्य तमेतमित्यादिवाक्यविहितस्य मध्ये स्वल्पमपि सङ्क्षेपेतिकर्तव्यतया वा यथाशक्ति भगवदाराधनार्थं किञ्चिदप्यनुष्ठितं सत् महतः संसारभयात्त्रायते भगवत्प्रसादसम्पादनेनानुष्ठातारं रक्षति ' सर्वपापप्रसक्तोपि ध्यायन्निमिषमच्युतम् । भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ' इत्यादिस्मृतेः । तमेतमिति वाक्ये समुच्चयविधायकाभावाच्च अशुद्धितारतम्यादेवानुष्ठानतारतम्योपपत्तेर्युक्तमुक्तं कर्मबन्धं प्रहास्यसीति ॥ ४० ॥

शं० टी०—उक्तमेव कर्मयोगं मुमुक्षुप्रवृत्त्यै स्तौति—नेहेति । इह मोक्षैकप्रयोजने उक्तकर्मयोगे नाभिक्रमनाशोस्ति अभिक्रम उपक्रमः कर्मण आरम्भस्तस्य नाशो नास्ति कृषिवाणिज्यादावारब्धे सति क्वचित्फलति क्वचिन्न फलति न तथेदं किं तु नियतफलवदेव भवति भुक्तिवत् । अत्र प्रत्यवायो न विद्यते ज्ञानाज्ञानकृतकर्मनियमादिलोपकृतो दोषः राजाज्ञावन्नानर्थाय कल्पते । अस्य भक्त्या क्रियमाणस्येश्वराराधनात्मकस्य वेदोक्तस्य धर्मस्य संबन्धि स्वल्पमपि केवलाग्निहोत्रं वा श्रौतमौपासनं वा स्मार्तं श्रद्धया कृतं कर्म चित्तशुद्धिजननद्वारा ज्ञानहेतुत्वात् कर्तारं महतो भयाज्जननमरणदुःखात्त्रायते रक्षत्यतो मुमुक्षोः श्रौतं स्मार्तं चोभयं वा श्रद्धाभक्तिभ्यामकामनयेश्वरप्रीत्यै यथाशक्त्यवश्यं कर्तव्यमीश्वरप्रीत्यर्थमेव कृतेन कर्मणा पुमान् तरति नान्यथेति सूचितं भवति ॥ ४० ॥

श्री० टी०—ननु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फले व्यभिचारान्मन्त्राद्यङ्गवैगुण्येन च प्रत्यवायसंभवात्कुतः कर्मयोगेन कर्मबन्धप्रहरणं तत्राह—नेहेति । इह निष्कामकर्मयोगे अभिक्रमस्य प्रारम्भस्य नाशो निष्फलत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगुण्याद्यसंभवात् । किंच अस्य धर्मस्य स्वल्पमपि उपक्रममात्रमपि कृतं महतो भयात्संसारात् त्रायते रक्षति । ननु काम्यकर्मवत् किंचिदङ्गवैगुण्यादिना नैष्फल्यमस्येत्यर्थः ॥ ४० ॥

स० टी०—ननु तमेतमित्यादिश्रुत्या विविदिषा धियौ ॥ उभे उद्दिश्य संयोगपृथक्त्वात्सर्वकर्मणाम् ॥ १ ॥ विनियोगः कृतस्तत्र धीशुद्धेर्द्वारभावतः ॥ त्वया मां प्रत्यनुष्ठानं कर्मणां च विधीयते ॥ २ ॥ तद्यथेहेतिवाक्येन फलनाशस्य संभवात् ॥ बुभुत्सादिफलं कर्म काम्यं सर्वाङ्गसंयुतम् ॥ ३ ॥ अनुष्ठेयं च यत्किञ्चिदङ्गासंपत्तिहेतुकम् ॥ स्याद्यतस्तत्र वैगुण्यं किंचैकेन नरेण च ॥ ४ ॥ यज्ञेनेत्यादिवाक्येन विहितानां हि कर्म-

णाम् ॥ सर्वेषामायुषोऽन्तेप्यशक्यत्वात्कर्तुमेव च ॥ ५ ॥ बन्धं प्रहास्यसीत्येवं फलस्याशा कुतो मम ॥ इत्याशङ्क्याह भगवान्नारायण उदारगीः ॥६॥ इह निष्कामकर्माख्ये श्रेयोमार्गे सुनिश्चिते ॥ अभिक्रमः कर्मफलं कर्मणारभ्यते यतः ॥ ७ ॥ तद्यथेहेतिवाक्येन तस्य नाशो नहीरितः ॥ एतत्फलस्य धीशुद्धेर्भोग्यत्वाभावतोऽपि च ॥ ८॥ तद्यथेहेति या निन्दा सा फले न तु कर्मणि ॥ फलेच्छां तु परित्यज्य कृतं कर्म विशुद्धिकृत् ॥ ९ ॥ प्रत्यवायोऽङ्गवैगुण्यं हेतुर्वैगुण्यमत्र न ॥ तमेतमितिवाक्येन नित्यानां विनियोगतः ॥१०॥ बुभुत्सां प्रति हेतुत्वं काम्यानामपि कर्मणाम् ॥ संयोगस्य पृथक्त्वाच्च फलसङ्गविवर्जनात् ॥ ११ ॥ एकस्य तूभयार्थत्वे स्यात्संयोगपृथक्त्वतः ॥ क्रत्वर्थस्य च यूपस्य पुमर्थत्वं यथेष्यते ॥ १२ ॥ नहि कश्चिद्विशेषोऽस्ति काम्यनित्याग्निहोत्रयोः ॥ स्वतः किंतु फलेच्छाया भावाभावकृता भिदा ॥ १३ ॥ इदं पक्षद्वयं न्यस्तं वार्तिके श्रीसुरेश्वरैः ॥ वेदानुवचनादीनामैकात्म्यज्ञानजन्मने ॥ १४ ॥ तमेतमितिवाक्येन नित्यानां वक्ष्यते विधिः ॥ यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणाम् ॥ १५ ॥ तमेतमितिवाक्येन संयोगस्य पृथक्त्वतः ॥ तथा च काम्यकर्मापि सर्वाङ्गैः संयुतं यतः ॥ १६ ॥ फलाभिसन्धिना कार्यं न तु निष्कामबुद्धिना ॥ एवं सत्यङ्गवैगुण्यहेतुकः प्रत्यवायकः ॥ १७ ॥ नास्त्येवास्येश्वरार्थस्य कर्मणः शुद्धिकारिणः ॥ शुद्ध्यर्थस्यास्य धर्मस्य स्वल्पमप्येषु कर्मसु ॥ १८ ॥ तमेतमितिवाक्येन विहितेष्वप्यनुष्ठितम् ॥ यथाशक्तीश्वरार्थं सत्रायते संसृतेर्भयात् ॥ १९ ॥ हरिप्रसादसंसिद्ध्या कर्तारं परिरक्षति ॥ सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् ॥ २० ॥ भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥ इत्युक्त्वादतो हेतोः कर्मबन्धं प्रहास्यसि ॥ २१ ॥ ४० ॥

भा० टी०—काम्यादस्य महद्वैलक्षण्यमित्याशयेनाह—**नेहेति** । इह निष्कामकर्मणि समाधियोगे च मोक्षमार्गे अभिक्रमस्य प्रारम्भस्य नाशो नास्ति कृष्यादेरिव प्रत्यवायः पापोत्पत्तिरपि चिकित्सावन्न विद्यते अस्य धर्मस्य स्वल्पमपि अनुष्ठितं महतो भयाज्जन्ममरणादिलक्षणसंसारभयाद्रक्षति ॥ ४० ॥

प० टी०—अथ परमेश्वरार्पणतया कर्मणि क्रियमाण इन्द्रादिभ्यो विघ्नं नास्तीत्याह—**नेहाभिक्रमेति** । इह निष्कामकर्मण्यभिक्रमस्य कर्मारम्भस्य विघ्नादिभिर्नाशो नास्ति । यतस्तत्रेश्वर एव विघ्नहर्ता । तदुक्तं भागवते—' त्वां सेवतां सुरकृता बहवोऽन्तरायाः स्वौको विलङ्घ्य व्रजतां परमं पदं ते ॥ नान्यस्य बर्हिषि बलिं ददतः स्वभर्मं धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ' इति । अथ हिंसाप्रधाने कर्मणि कथमीश्वरादर इत्याह—प्रत्यवाय इति । प्रत्यवायः पापं नास्ति " अग्नीषोमीयं पशुमालभेत" इत्यादि वाक्यैर्वेदबोधितत्वात् । किंचास्य परमेश्वरार्पणतया कृतस्य धर्मस्य स्वल्पमप्युपक्रममात्रमपि कृतं महतो भयात्संसारात्त्रायते रक्षति न तु काम्यकर्मादि यतः पुण्यक्षये पुनः संसारश्रवणात् ॥ ४० ॥

रा० टी०—किंच इह वक्ष्यमाणे योगशब्दितज्ञानोपायभूतनिष्कामविष्णवाराधनरूपकर्मविषये अभिक्रमस्योपक्रमस्य नाशो नास्ति । उपक्रममात्रस्यापि निष्फलता नास्तीत्यर्थः । प्रारम्भमात्रमिच्छा वेलादेः । उपक्रान्तविष्णुधर्मविच्छेदे वा विष्णुधर्मवतोन्यधर्माकरणे वा प्रत्यवायो न विद्यते । अस्य धर्मस्य विष्णुपूजात्मकनिष्कामकर्मणः स्वल्पमपि एकांशोपि महतो भयात्संसारभयात्त्रायते रक्षति । तस्मात्तत्र निष्ठां कुर्विति भावः । ननु ज्ञानं हि जैवमुक्तमिति भाष्योक्तेः । जीवतत्वं प्रागुक्तम् । ब्रह्मज्ञानोपायश्च वक्ष्यते । नहि निवृत्तकर्मानुष्ठानादिरूपो योगो जीवज्ञानहेतुः । अतः कथं पूर्वोत्तरप्रकरणयोः साध्यसाधनविषयतया सङ्गतत्वम् । मैवम् । श्रुत्वाप्येनमित्यत्र भगवत्प्रतिबिम्बत्वादिना जीवचैतन्यवेदी दुर्लभ इत्युक्त्या तादृशत्वेन तज्ज्ञानोपायस्याप्याकाङ्क्षितत्वेन वक्ष्यमाणनिवृत्तकर्मानुष्ठानाराधितभगवत्प्रीतेरेवेश्वरतत्त्वज्ञानस्योपाय-

त्वात् । तादर्थ्येन प्रकृतस्यापीश्वरस्य 'तस्मादेवं विदित्वैनम्' इत्यत्र स्वातन्त्र्यादिना ज्ञानस्य मोक्षादिसर्वपुमर्थहेतुत्वोक्त्या तज्ज्ञानोपायस्याप्याकाङ्क्षितत्वात् । वक्ष्यमाणसाधनस्य यथावत्तया परापरतत्त्वज्ञानोपायत्वान्न पूर्वोत्तरप्रकरणयोरसङ्गतिः । अत्र योगस्यानेकाध्यायप्रतिपाद्यत्वाच्छ्रोतृमनःसमाधानाय पूर्वसङ्गतत्वेन प्रतिज्ञाकरणसार्थक्यं ज्ञेयम् ॥ ४० ॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ॥
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

त० टी०—सकामकर्मविषयाया बुद्धेर्निष्कामभगवदाराधनात्मककर्मयोगविषयबुद्धेः सुखहेतुत्वेन महान्विशेष इत्याह—**व्यवसायेति** । इह कर्मानुष्ठातरि जीवलोके व्यवसायात्मिका बुद्धिरेका भगवत्तोषणात्मकमेव कर्म कर्तव्यं नान्यत् । तत्प्रसादेन सुखेनैव तरिष्यामो नान्याराधनेनेति निश्चयो व्यवसायस्तदात्मिका बुद्धिः सर्वनियन्तृसर्वकर्मफलप्रदातृसर्वमुमुक्षुध्येयसर्वेश्वराराधनैकविषयत्वादेकफलकत्वाच्चैका, अतः सुखदा, सा च परमनिःश्रेयस्कामानां मुमुक्षूणामेवेति निश्चीयते । अव्यवसायिनामनिश्चिततत्त्वानां स्वर्गधनस्त्रीपुत्रपश्वादिबहुकामानां तत्तत्कर्मफलसाधनकर्मनिष्ठानां बुद्धयः कर्मकाण्डे कामानां बहुभेदेन बहुशाखाः, तत्राप्यवान्तरानन्तप्रकारभेदादनन्ताश्च दुःखदाश्चेत्यनुभवगम्यम् ॥ ४१ ॥

म० टी०—एतदुपपादनाय तमेतामितिवाक्यविहितानामेकार्थत्वमाह—**व्यवसायात्मिकेति** । हे कुरुनन्दन ! इह श्रेयोमार्गे तमेतामितिवाक्ये वा व्यवसायात्मिका आत्मतत्त्वनिश्चयात्मिका बुद्धिरेकैव चतुर्णामाश्रमाणां साध्या विवक्षिता 'वेदानुवचनेन' इत्यादौ तृतीयाविभक्त्या प्रत्येकं निरपेक्षसाधनत्वबोधनात् । भिन्नार्थत्वे हि समुच्चयः स्यात् । एकार्थत्वेपि दर्शपूर्णमासाभ्यामितिवत् द्वन्द्वसमासेन । यदग्नये च प्रजापतये चेतिवच्चशब्देन । न तथात्र किञ्चित्प्रमाणमस्तीत्यर्थः । साङ्ख्यविषया योगविषया च बुद्धिरेकफलत्वादेका व्यवसायात्मिका सर्वविपरीतबुद्धीनां बाधिका निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसायिनां बुद्धयो बाध्या इत्यर्थ इति भाष्यकृतः । अन्ये तु परमेश्वराराधनेनैव संसारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भवतीत्यर्थमाहुः । सर्वथापि तु ज्ञानकाण्डानुसारेण 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्' इत्युपपन्नं कर्मकाण्डे पुनः बहुशाखाः अनेकभेदाः कामानामनेकभेदत्वात् अनन्ताश्च कर्मफलगुणफलादिप्रकारोपशाखाभेदात् बुद्धयो भवन्त्यव्यवसायिनां तत्फलकामानां बुद्धीनामानन्त्यप्रसिद्धिद्योतनार्थो हिशब्दः । अतः काम्यकर्मापेक्षया महद्वैलक्षण्यं शुद्ध्यर्थकर्मणामित्यभिप्रायः ॥ ४१ ॥

शं० टी०—योगविषयिण्या बुद्ध्या विशिष्टः पुमान् तरतीत्युक्तं योगविषयिणी बुद्धिः केत्याकाङ्क्षायां तस्याः स्वरूपं वदन् तदितरबुद्धिविशिष्टानां न कदाचित्तरणमस्तीति सूचयति—**व्यवसायात्मिकेति** । 'मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च । अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम्' इतिश्रवणात्कामसङ्कल्पादिकषायरहिततया शुद्धत्वेनेश्वर एवास्माकं परा गतिरिति व्यवस्थितो व्यवसायो निश्चयो यस्यां सा व्यवसायात्मिका वस्तुतत्त्वनिश्चयवतीश्वराश्रया बुद्धिरिह मोक्षैकप्रयोजने कर्मयोगे प्रवृत्तस्य व्यवसायिनो मुमुक्षोरेकैव बहिरन्तः सदैकरूपैव भवति "यो वा एतदक्षरं गार्ग्यविदित्वास्मिन् लोके जुहोति यजते तपस्तप्यते अन्तवदेवास्य तद्भवति" इति व्यतिरेकमुखेन विदित्वा जुह्वतो यजतस्तप्यतश्च सर्वं कर्म वैदिकमनन्तवदेव भवतीति वदच्छ्रुतिप्रमाणजनितत्वादेकरूपेणैव तिष्ठति न कदाचिद्भिद्यते अव्यवसायिनां विवेकबुद्धिरहितानां व्यवस्थाशून्यानामेव कामिनां बुद्धयो बहुशाखा बहुप्रकाराः आशास्ते यं यजमानोऽसा-

वित्युक्तप्रकारेण बह्वर्थविषयत्वाद्बहुधा भिद्यन्ते अत एवानन्ताः काम्यानामनन्तत्वात् । एवं बुद्धीनामनन्तत्वे तद्वतां संसारोप्यनन्त एव भवति न कदाप्युपशाम्यतीत्यर्थः ॥ ४१ ॥

श्री० टी०—कुत इत्यपेक्षायामुभयोर्वैषम्यमाह—**व्यवसायेति** । इह ईश्वराराधनलक्षणे कर्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैवैकनिष्ठैव बुद्धिर्भवति । अव्यवसायिनां तु बहिर्मुखानां कामिनां कामानामानन्त्यादनन्ताः । तत्रापि कर्मगुणफलादिभेदात् बहुशाखाश्च बुद्धयो भवन्ति। ईश्वराराधनार्थं हि नित्यनैमित्तिकं कर्म किञ्चिदङ्गवैगुण्येनापि न नश्यति । यथा शक्नुयात्तथा कुर्यादिति हि तद्विधीयते नच वैगुण्यम् । ईश्वरोद्देशेनैव वैगुण्योपरमात् । नतु तथा काम्यं कर्म "अग्निहोत्रं जुहुयात् स्वर्गकामः। दध्नेन्द्रियकामो जुहुयात्" अतो महद्वैषम्यमिति भावः ॥ ४१ ॥

स० टी०—एतत्सिद्ध्यर्थमाहेशस्तमेतमिति वाक्यतः॥ विहितानां फलैकत्वं कर्मणां शुद्धिकारिणाम् ॥ १॥ श्रेयोमार्गेऽथवा वाक्ये तमेतमिति वैदिके ॥ बुद्धिरेकैव साध्यास्ति तत्त्वनिश्चयरूपिणी ॥ २ ॥ चतुर्णामाश्रमाणां च सैव साध्या विवक्षिता ॥ एकैव साङ्ख्ये योगे च फलैक्यान्निश्चयात्मिका ॥ ३ ॥ विपरीतमतीनां सा बाधिका वेदवाक्यजा ॥ ईश्वराराधनेनैव तरिष्यामीह संसृतिम् ॥ ४ ॥ इत्येकैवास्ति वा बुद्धिर्भक्तानां निश्चयात्मिका ॥ इतरास्तु धियो बाध्या मिथ्याज्ञानवतां नृणाम् ॥ ५ ॥ कामभेदात्तथा शाखाभेदान्नानाभिदायुताः ॥ संसारानन्त्यहेतुत्वादनन्ता मूढचेतसाम् ॥ ६ ॥ ४१ ॥

भा० टी०—इह मोक्षमार्गे व्यवसायात्मिका निश्चयात्मिकोपायोपेयबुद्धिरेका सम्यक् प्रमाणजनितत्वात् । इतरविपरीतबुद्धिशाखाभेदस्य बाधिका । येतु व्यवसायात्मिका परमेश्वरभक्त्यैव तरिष्यामीति निश्चयात्मिकेति वर्णयन्ति तद्बुद्धेः स्वरूपं निरूपितं प्रमाणजनितत्वादिति वदद्भिर्भाष्यकृद्भिः सा दृढेत्युक्तमिति न विरोधः । अव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानां कामिनां बुद्धयो बहुशाखाः बह्व्यः अनुपरतसंसारप्रदाः शाखा यासां ताः प्रतिशाखाभेदेन ह्यनन्ताश्च कामनानामानन्त्यात् । यत्तु 'नन्वेवं साङ्ख्ययोगयोर्महाभयात्राणहेतुत्वं तुल्यं चेत्कोऽनयोर्विशेष इत्याशङ्क्य साङ्ख्यानां पातशङ्का नास्ति योगिनां तु यावद्विदेहकैवल्यं पातशङ्कास्तीत्याह—व्यवसायात्मिकेति' तच्चिन्त्यम् योगस्तवनपरस्य ग्रन्थस्य तन्निन्दापरत्वेनोत्थापनस्यानुचितत्वात् । कामात्मान इत्यादिना सकामस्य निन्दाप्रतीतेः स्पष्टत्वाच्च । तव उत्तमवंशोद्भवस्य व्यवसायात्मिकैव बुद्धिर्युक्तेति सूचयन्नाह—कुरुनन्दनेति ॥ ४१ ॥

प० टी०—अथ तदेव प्रकटयति—**व्यवसायेति** । इह परमेश्वराराधनरूपे कर्मयोगे व्यवसायात्मिका परमेश्वरभजनानुवृत्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका बुद्धिः सा तावदेकैव एकनिष्ठैव भवति । अथाव्यवसायिनां कामात्मनां या बुद्धयस्ता बहुशाखाः कामात्कामान्तरजनिका भवन्ति कामानामनन्तत्वात् "जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यात्" इति श्रुतेश्च ॥ ४१ ॥

रा० टी०—ननु ज्ञानोपायविषया वाचोऽन्योन्यविरुद्धा बह्व्यो मतभेदेन सन्ति । अतः कथमेकत्र त्वदीयायामेवोपायविषयवाचि निष्ठाशब्दितं विश्वासं करोमीत्यत आह—**व्यवसायेति** । व्यवसायात्मिका प्रमाणनिर्णीतार्थनिश्चयात्मिका निश्चयजनिका बुद्धिः करणव्युत्पत्त्या वाक् । एकैव एकोपायविषयैव इह लोके वेदे च । न तत्र विप्रतिपत्तिरस्ति । स एव वैष्णवधर्मानुष्ठानहेतुः । अव्यवसायिनां प्रमाणनिर्णीतार्थनिश्चयहीनानां बुद्धयः उपायविषयाः वाचः बहुशाखाः बहुमुखाः विरुद्धनानार्थविषयाः अनन्ताश्च । तथा च कथमप्रामाणिकमतविवादेन प्रामाणिकेऽर्थे अविश्वासः । मया वक्ष्यमाणोपायस्तु प्रामाणिक इति तत्र तत्र व्यक्तीभविष्यतीति भावः ॥ ४१ ॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ॥
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ॥
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम् ॥
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

त० टी०—ननु विधिवदधीतवेदानां तदर्थपरिशीलिनां पण्डितानामपि व्यवसायात्मिका बुद्धिः कुतो न भवतीत्यपेक्षायां वेदशिरोभागमविदित्वा वेदतात्पर्याज्ञानादित्याह—**यामिति** त्रिभिः । यामिमां वक्ष्यमाणां पुष्पितां विषलतावदापातरमणीयां प्रकर्षेण वदन्ति तेऽविपश्चितो ज्ञानहीनाः नतु पण्डिताः । कुतो यतो वेदवादरताः वेदेषु ये फलार्थवादाः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति, अपाम सोममृता अभूम, यत्र नोष्णं नच शीतं स्यान्न ग्लानिर्नाप्यरातयः" इत्यादयस्तेषु रताः सक्ताः । सक्तत्वलक्षणं नान्यदस्तीति वादिन इति । स्वर्गादिभोगादधिकं किञ्चित्फलं मोक्षसुखं नास्तीति वदनशीलाः ॥ ४२ ॥ एतत्कुतो यतः कामात्मानः कामा विषयेन्द्रियजन्यसुखानि तेष्वेवात्मा मनो येषां ते तथा । अत एव स्वर्गपराः एतद्देहत्यागानन्तरं दिव्यविमानारोहणाप्सरोभोगाम्लानपारिजातपुष्पमालाविधारणदिव्यचन्दनालेपामृतपानादिस्वर्गफलमेव परमपुरुषार्थं मन्यमानाः स्वर्गफलभोगावसाने इह लोके विद्याधनाढ्यकुले जन्म तदनुगुणश्रेष्ठवर्णाश्रमानिबन्धनानि कर्माणि च पुनस्तज्जन्यं पूर्वोक्तं फलं तानि प्रकर्षेण घटीयन्त्रवदविच्छेदेन ददातीति तथा तां, पुनर्भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां पूर्वोक्तो भोग ऐश्वर्यं च क्वचिदिन्द्रेण देवाधिकारे गन्धर्वाप्सरोदेवविशेषं प्रत्याज्ञापनं तयोर्गतिं प्राप्तिं प्रति साधनभूतायाः क्रियाया विशेषा बहुद्रव्याऽऽयाससाध्यचातुर्मास्यज्योतिष्टोमदर्शपूर्णमासादयस्तैर्बहुलां विस्तृतां भोगैश्वर्यप्राप्तिफलकातिविस्तृतक्रियाप्रतिपादिकामिति यावत् एतादृशीं वाचं प्रवदन्तीत्यनुषङ्गः ॥ ४३ ॥ तेषां भोगैश्वर्ययोः प्रसक्तानां तया पुष्पितया वाचाऽपहृतं चेतो येषां परमार्थतत्त्वविचारानर्हचेतसामिति यावत् अत उक्तप्रकारा व्यवसायात्मिका बुद्धिः समाधौ न विधीयते समाधीयते आत्मतत्त्वमस्मिन्निति समाधिश्चित्तैकाग्र्यं तस्मिन्मोक्षसाधनभूतभगवदाराधनात्मककर्मनिश्चयरूपा बुद्धिर्न विधीयते नोत्पद्यते इत्यर्थः ॥ ४४ ॥

म० टी०—अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति प्रमाणस्य तुल्यत्वादित्याशङ्क्य प्रतिबन्धकसद्भावान्न भवतीत्याह—**यामिमामिति** त्रिभिः । यामिमां वाचं प्रवदन्ति तया वाचापहृतचेतसामविपश्चितां व्यवसायात्मिका बुद्धिर्न भवतीत्यन्वयः । इमामध्ययनविध्युपात्तत्वेन प्रसिद्धां पुष्पितां पुष्पितपलाशवदापातरमणीयां साध्यसाधनसंबन्धप्रतिभानान्निरतिशयफलाभावाच्च कुतो निरतिशयफलत्वाभावस्तदाह—जन्मकर्मफलप्रदां जन्म चापूर्वशरीरेन्द्रियादिसंबन्धलक्षणं तदधीनं च कर्म तत्तद्वर्णाश्रमाभिमाननिमित्तं तदधीनं च फलं पुत्रपशुस्वर्गादिलक्षणं विनश्वरं तानि प्रकर्षेण घटीयन्त्रवदविच्छेदेन ददातीति तथा ताम् । कुत एवमत आह—भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलाममृतपानोर्वशीविहारपारिजातपरिमलादिनिबन्धनो यो भोगस्तत्कारणं च यदैश्वर्यं देवादिस्वामित्वं तयोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषा अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयस्तैर्बहुलां विस्तृतामतिबाहुल्येन भोगैश्वर्यसाधनक्रियाकलापप्रतिपादि-

कामिति यावत् । कर्मकाण्डस्य हि ज्ञानकाण्डापेक्षया सर्वत्रातिविस्तृतत्वं प्रसिद्धम् । एतादृशीं कर्मकाण्डलक्षणां वाचं प्रवदन्ति प्रकृष्टां परमार्थस्वर्गादिफलामभ्युपगच्छन्ति के ये अविपश्चितः विचारजन्यतात्पर्यपरिज्ञानशून्याः अत एव वेदवादरताः वेदे ये सन्ति वादा अर्थवादाः " अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति " इत्येवमादयस्तेष्वेव रता वेदार्थे सत्यत्वेन एवमेवैतदिति मिथ्याविश्वासेनसन्तुष्टाः । हे पार्थ ! अत एव नान्यदस्तीति वादिनः कर्मकाण्डापेक्षया नास्त्यन्यत् ज्ञानकाण्डं सर्वस्यापि वेदस्य कार्यपरत्वात्, कर्मफलापेक्षया च नास्त्यन्यन्निरतिशयं ज्ञानफलमिति वदनशीलाः महता प्रबन्धेन ज्ञानकाण्डविरुद्धार्थभाषिण इत्यर्थः । कुतो मोक्षद्वेषिणस्ते यतः कामात्मानः काम्यमानविषयशताकुलचित्तत्वेन काममयाः। एवंसति मोक्षमपि कुतो न कामयन्ते यतः स्वर्गपराः स्वर्ग एवोर्वश्याद्युपेतत्वेन पर उत्कृष्टो येषां ते तथा स्वर्गातिरिक्तपुरुषार्थो नास्तीति भ्राम्यन्तो विवेकवैराग्याभावान्मोक्षकथामपि सोढुमक्षमा इति यावत् । तेषां च पूर्वोक्तभोगैश्वर्ययोः प्रसक्तानां क्षयित्वादिदोषादर्शनेन निविष्टान्तःकरणाना तया क्रियाविशेषबहुलया वाचापहृतमाच्छादितं चेतो विवेकज्ञानं येषां तथाभूतानामर्थवादाः स्तुत्यर्थाः तात्पर्यविषये प्रमाणान्तराबाधिते वेदस्य प्रामाण्यमिति सुप्रसिद्धमपि ज्ञातुमसक्तानां समाधावन्तःकरणे व्यवसायात्मिका बुद्धिर्न विधीयते न भवतीत्यर्थः । समाधिविषया व्यवसायात्मिका बुद्धिस्तेषां न भवतीति वा । अधिकरणे विषये वा सप्तम्यास्तुल्यत्वात्। विधीयते इति कर्मकर्तरि लकारः । समाधीयतेऽस्मिन् सर्वमिति व्युत्पत्त्या समाधिरन्तःकरणं वा परमात्मा वेति नाप्रसिद्धार्थकल्पनम् । अहं ब्रह्मेत्यवस्थानं समाधिस्तन्निमित्तं व्यवसायात्मिका बुद्धिर्नोत्पद्यत इति व्याख्याने तु रूढिरेवादृता । अयं भावः । यद्यपि काम्यान्यग्निहोत्रादीनि शुद्ध्यर्थेभ्यो न विशिष्यन्ते तथापि फलाभिसन्धिदोषान्नाऽऽशयशुद्धिं संपादयन्ति । भोगानुगुणातुशुद्धिर्न ज्ञानोपयोगिनी । एतदेव दर्शयितुं भोगैश्वर्यप्रसक्तानामिति पुनरुपात्तं फलाभिसन्धिमन्तरेण तु कृतानि ज्ञानोपयोगिनीं शुद्धिमादधतीति सिद्धं विपश्चिदविपश्चितोः फलवैलक्षण्यम् । विस्तरेण चैतदग्रे प्रतिपादयिष्यते ॥ ४२—४४ ॥

शं० टी०—नन्वव्यवसायिनामपि योगबुद्धिरस्त्वित्याकाङ्क्षायां कामपराणां तेषामेषा नान्तःकरणमारोहतीति बोधयितुं तेषां स्वभावं वर्णयति त्रिभिः—**यामिमामिति** । वेदवादरता उच्यन्त इति वादा वाक्यानि वेदस्य वादाः वेदवादास्तेषु " वायव्यं श्वेतमालभेत भूतिकामः " इत्यादिषु कर्मतत्फलतत्साधनप्रकाशकेष्वर्थवादादिवेदवाक्येषु रताः निरतास्तत्रैव तात्पर्यवन्तोऽतएव नान्यदस्तीति वादिनः कर्मतत्फलेभ्यः साधनसाध्येभ्योऽन्यदपीश्वरो वा मोक्षो वा किंचिन्नास्तीति प्रष्टृभ्यो वक्तारो वदनशीलाः यतोऽविपश्चितः वेदानामुपक्रमोपसंहारादिषु तात्पर्यानभिज्ञा बहिर्मुखा मीमांसकाः पुष्पितां पुष्पैर्मल्लिकालतावत् " अपाम सोमम् । दक्षिणावन्तो अमृतं भजन्तः । पश्यति पुत्रं पश्यति पौत्रम् । अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति " इत्याद्यर्थवादलक्षणैः फलशून्यैः पुष्पै रञ्जयन्तीमिमां जन्मकर्मफलप्रदामित्यादिना वक्ष्यमाणलक्षणां यां वाचम् " अग्निमीळे पुरोहितम् । इषे त्वोर्जे त्वा । ब्रह्म संधत्तं तन्मे जिन्वतम् " इत्यादिवाक्यरूपां प्रवदन्ति कर्मकाण्डमेव प्राशस्त्येन वदन्ति नतूपासनाकाण्डं नापि ब्रह्मकाण्डमित्यर्थः ॥ ४२ ॥ योगबुद्ध्यनर्हत्वे तेषां स्वभावो दुष्ट इति सूचयितुं तद्गुणानेव वर्णयति कृष्णः—**कामात्मान इति** । स्वर्गपराः स्वर्ग एव परो निरतिशयः पुरुषार्थ इति निश्चयो येषां ते स्वर्गपरास्तत एव भोगैश्वर्यगतिं प्रति भुज्यन्त इति भोगाः दिव्याः स्रक्चन्दनवनितादयस्तेषां समग्रभोगायैश्वर्यमीश्वरत्वं स्वामित्वं तस्य गतिः प्राप्तिस्तां प्रत्येव काम इच्छावेग आत्मनि बुद्धौ येषां ते कामात्मानः विषयभोगलम्पटा मीमांसकाः कामिनः क्रियाविशेषबहुलां क्रियाविशेषा अग्निष्टोमातिरात्रादयः फलविशेषहेतवो बहुला बहवो यया प्रतिपाद्यन्ते सा क्रियाविशेषबहुला तां तत एव जन्मकर्मफलप्रदां जन्मपदेन मृत्युजरारोगास्तद्दुःखानि च लक्ष्यन्ते जन्मादय एव स्वप्रतिपादितकर्मणां

फलानि जन्मकर्मफलान्यनुष्ठातृभ्यः प्रददातीति जन्मकर्मफलप्रदा नानायोनिषु जन्मानि कर्मफलानि सुखादीनि च स्वप्रकाशितकर्मकर्तृभ्यो यच्छतीति वा तां जन्मकर्मफलप्रदां वाचं प्रवदन्तीति पूर्वेणान्वयः ॥ ४३ ॥ यत एवं लक्षणास्ततस्तेषां योगबुद्धिस्तत्फलं च न सिध्यतीत्याह—**भोगेति** । अर्थवादबहुलया तया कर्मकाण्डलक्षणया वाचाऽपहृतचेतसामपहृतं तिरोभावितं चेतः कार्याकार्यविवेकविज्ञानं येषां ते अपहृतचेतसः विषयाशाभ्रामितबुद्धयस्तेषामत एव भोगैश्वर्यप्रसक्तानां भुज्यन्त इति भोगा भोग्यपदार्था ऐश्वर्यं तेषामीश्वरत्वं तयोरेव प्रसक्तानां तेषां समाधौ समाधीयते पुरुषो विषयेष्वनेनेति समाधिः वासनात्मना जगत्सर्वं समाधीयते पुरुषेणास्मिन्निति वा समाधिरन्तःकरणं तस्मिन्व्यवसायात्मिका बुद्धिर्योगबुद्धिर्न विधीयते न प्रवेश्यते कामैरन्तरालाभावान्न प्रविशति यतस्ततः कारणाभावे कार्याभाव इति न्यायेन योगबुद्ध्यभावे तत्कार्यभूतो मोक्ष एतेषां कदापि न संभवतीत्यर्थः ॥ ४४ ॥

श्री० टी०—ननु कामिनोऽपि कष्टान्कामान्विहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वन्ति तत्राह—**यामिति** । पुष्पितां विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलपरामेव वदन्ति वाचं स्वर्गादिफलश्रुतिं ये तेषां तया वाचाऽपहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इति तृतीयेनान्वयः । किमिति तथा वदन्ति यतोऽविपश्चितो मूढाः । तत्र हेतुः वेदे ये वादाः अर्थवादाः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति । अपाम सोमममृता अभूम" इत्याद्याः तेष्वेव रताः प्रीताः अत एव अतः परमन्यदीश्वरतत्त्वं प्राप्यं नास्तीति वचनशीलाः ॥ ४२ ॥ अत एव—**कामात्मान इति** । कामात्मानः कामाकुलचित्ताः । अतः स्वर्ग एव परः पुरुषार्थो येषां ते । जन्म च तत्र कर्माणि च तत्फलानि च प्रददातीति तथा ताम् । भोगैश्वर्ययोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषाः ते बहुला यस्यां तां प्रवदन्तीत्यनुषङ्गः ॥ ४३ ॥ ततश्च—**भोगैश्वर्यप्रसक्तानामिति** । भोगैश्वर्ययोः प्रसक्तानामभिनिविष्टानां तया पुष्पितया वाचाऽपहृतमाकृष्टं चेतो येषां तेषां समाधिः चित्तैकाग्र्यं परमेश्वरैकाग्र्याभिमुखत्वं तस्मिन्निश्चयात्मिका बुद्धिर्न विधीयते । कर्मकर्तरिप्रयोगो नोत्पद्यत इत्यर्थः ॥ ४४ ॥

स० टी०—अनिश्चयवतां नानाप्रतिबन्धवशान्न सा॥व्यवसायात्मिका बुद्धिर्भवतीत्याह मापतिः॥ १ ॥यामिमां वक्ष्यमाणां हि वाचं श्रवणशोभनाम् ॥ आपातरमणीयां च प्रपुष्पितपलाशवत् ॥ २ ॥ देहेन्द्रियादिसम्बन्धरूपं जन्म ददाति या ॥ तदधीनं च यत्कर्म तदधीनं फलं तथा ॥ ३ ॥ ददातीति घटीयन्त्रवदविच्छेदतश्च ताम् ॥ सुधापानोर्वशीक्रीडासुगन्धादिनिबन्धनः ॥ ४ ॥ भोगस्तद्धेतुरैश्वर्यं देवादिस्वामिता तयोः ॥ प्राप्तिं प्रतिक्रियाभेदाः साधनत्वेन ये मताः ॥ ५ ॥ तैर्विस्तृतां कर्ममयीं प्रवदन्त्यविपश्चितः ॥ विचारजन्यतात्पर्यज्ञानशून्याः सुरागिणः ॥ ६ ॥ येऽर्थवादाः श्रुतौ सन्ति रोचनार्था हि कर्मणाम् ॥ अस्त्यक्षय्यं ह वै चातुर्मास्ययाजिन इत्यपि ॥ ७ ॥ तेष्वेव वेदतात्पर्यमिति विश्वासतत्पराः ॥ पशुपुत्रादिहेतुभ्यः कर्मभ्यो नान्यदस्ति तत् ॥ ८ ॥ ज्ञानं वा तत्फलं वा न श्रुतेः कर्मपरत्वतः ॥ प्रतिबन्धात्त इत्येवं विरुद्धार्थैकभाषिणः ॥ ९ ॥ विषयाकुलचित्तत्वात्सदा काममयाः शठाः ॥ स्वर्ग एव परो येषां पुरुषार्थतया मतः ॥ १० ॥ वैराग्यादिबहिर्भूता मूढा मोक्षकथामपि ॥ न क्षमन्ते ततस्तेषां भोगादौ लग्नचेतसाम्॥ ११॥ तया पूर्वोक्तया वाचा येषामाच्छादितं मनः ॥ समाधिविषयाबुद्धिर्नास्त्येषां निश्चयात्मिका ॥ १२ ॥ अहं ब्रह्मेत्यवस्थानं समाधिस्तन्निबन्धना ॥ व्यवसायात्मिका बुद्धिस्तेषां नोत्पद्यतेऽथवा ॥१३॥४२॥—॥४४॥

भा० टी०—अव्यवसायिनां तु व्यवसायात्मिका बुद्धिर्न भवति प्रतिबन्धबाहुल्यादित्याशयेनाह—**यामितित्रिभिः** । यामिमां वक्ष्यमाणां पुष्पितां फलाप्रदपुष्पितवृक्षवच्छोभमानां श्रवणमात्ररमणीयाम् "अपाम सो-

ममममृता अभूम'' इत्यादिरूपां प्रवदन्ति। अविपश्चितो बुद्धिरहिता वेदस्य वादेऽर्थवादे " अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्येवंरूपे रताः प्रीतिमन्तोऽत एव नान्यन्मोक्षादिकं स्वर्गादन्यदस्तीति वादिनः। त्वया तु मम मतमेवाभ्युपेयमिति सूचन्नाह–हे पार्थेति ॥ ४२ ॥ यतः कामे आत्मान्तःकरणं येषामत एव स्वर्ग एव परः पुरुषार्थो येषां ते कर्मणः फलं जन्मैव कर्मफलं प्रददातीति तथा तां वेदवाचा कर्माणि प्रवृत्तिः कर्मणा जन्मलाभः नतु वेदवाचः स्वतन्त्रं जन्मादिप्रदातृत्वमस्तीति अभिप्रेत्याचार्यैर्जन्म च तत्र कर्म च तत्फलं च प्रददातीति न व्याख्यातं यतो भोगैश्वर्यं च तयोर्गतिं प्राप्तिं प्रति क्रियाणां विशेषा बहुला यस्यां तां वाचं प्रवदन्तीत्यनुषङ्गः ॥ ४३ ॥ तेषां भोगैश्वर्ययोः प्रसक्तानामतिरक्तचित्तानां यतस्तया वाचाऽपहृतमाच्छादितं चेतो येषां तेषां व्यवसायात्मिका सांख्ये योगे वा या बुद्धिः सा समाधौ समाधीयते पुरुषोपभोगाय सर्वमस्मिन्नन्तःकरणं तस्मिन्न विधीयते न स्थिरीभवतीत्यर्थः। ननु 'अहंब्रह्मास्मीत्यवस्थानं समाधिस्तन्निमित्तम्' इति 'चित्तैकाग्र्यं परमेश्वरैकाग्र्याभिमुखत्वं तस्मिन् वा' इति 'व्याख्यानद्वयमाचार्यैः कुतो न प्रदर्शितमिति चेत्, अहं ब्रह्मास्मीत्यवस्थानस्य परमेश्वरैकाग्र्याभिमुखत्वस्य च व्यवसायात्मिकसाङ्ख्ययोगबुद्धावन्तर्भावमभिप्रेत्येति गृहाण ॥ ४४ ॥

प० टी०–अथ कामिनोऽप्येतां व्यवसायबुद्धिं कथं नानुतिष्ठन्त्यत आह–**यामिति**। यथा लोके पुष्पं हि फलोद्गमं सूचयत्येवं पुष्पितां फलाभिसन्धिं सूचयन्त्यविपश्चितस्तात्पर्यमजानन्तो वदन्ति समर्थयन्ति। कथम्, नान्यदस्तीतिवादिनः एतद्व्यतिरेकेणान्यच्छ्रुतितात्पर्यं नास्तीत्याभिनिवेशवन्तोऽत एते वादेऽर्थवादे रतास्तत्रैव तात्पर्यमवधारयन्तः। यद्वा " अधेन्वाचरति मायया वाचं सुश्रुवामफलामपुष्पाम्" इति श्रुतौ पुष्पफले हि देवताध्यात्मे इति निरुक्तेः पुष्पस्थानीयदेवतोपासनाविषयां वाचं वेदवाणीं प्रवदन्तीति ॥ ४२ ॥ अथ तदेव प्रकटयन्नाह–**कामात्मान इति**। कामात्मानोऽभिलाषाकुलचित्ता अत एव स्वर्गपराः स्वर्ग एव परमुत्कृष्टं येषां ते ते जन्मकर्मफलप्रदां जन्म च तत्र कर्म च फलं च प्रददाति तां भोगैश्वर्यगतिं प्रवदन्ति, भोगो रम्भादिः ऐश्वर्यं देवाधिपत्यं तयोर्गतिः प्राप्तिस्ताम्। किंभूतां क्रियाविशेषबहुलां भोगैश्वर्यप्राप्तिं प्रति साधनभूता ये क्रियाविशेषास्तैर्बहुलां गुर्वीमतिप्रयाससाध्याम् ॥ ४३ ॥ **भोगैश्वर्यप्रसक्तानामिति** भोगैश्वर्ययोः प्रसक्तानां तया पुष्पितवेदवाण्यापहृतं चेतो येषां तेषां पुरुषाणां तथैव वाण्या समाधौ परमेश्वराराधनैकाग्र्ये व्यवसायात्मिका बुद्धिर्न विधीयते नोत्पद्यते। तदुक्तम्–'सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते। ध्यानस्याविस्मृतिः सम्यक्समाधिरभिधीयते' ॥ ४४ ॥

रा० टी०–नन्ववैदिकमतानामप्रामाणिकत्वेन तत्राविश्वासेपि वैदिकेष्वपि केचित्कर्माणि स्वर्गफलान्येवाहुः। त्वया तु काम्यार्थान्येव स्वर्गादिफलानि। निष्कामानीश्वरार्पणबुद्ध्यानुष्ठितानि तु ज्ञानार्थानीत्यभिप्रेयते। तथा च कथं त्वद्वचने निष्ठा स्यादित्यतस्तेषां वैदिकाभासताप्रदर्शनाय निन्दामाह–**यामित्यादित्रयेण**। वेदवादरताः वेदैर्यदापातत उच्यते कर्मादि तत्रैव रताः। वेदोक्तविष्णुमहिमाविवादपूर्वकं वेदपाठका वा निरर्थकवेदपाठका वा। अत एवाविपश्चितः। वेदतात्पर्यार्थापरिज्ञानिनः अन्यन्मोक्षाख्यफलं वा ब्रह्मस्वरूपं वा नास्तीति वादिनः कामात्मानः काम्यफलमनस्काः भोगचित्ता इति वा। स्वर्गपराः स्वर्गतात्पर्यकाः स्वर्गमेव परमपुमर्थं मन्यमाना इति यावत्। जन्मकर्म च तत्फलं च प्रददातीति तथाविधां क्रियाविशेषबहुलां बहुकर्मविशेषप्रतिपादिकां यामिमां वाचं पुष्पितां संजातपुष्पां मोक्षफलमपेक्ष्य पुष्पस्थानीयस्वर्गादिफलकां भोगैश्वर्यप्राप्तिं प्रति प्रवदन्ति। तया वाचापहृतचेतसां भोगैश्वर्ययोरासक्तचित्तानां व्यवसायात्मिका सम्यक्प्रमाणनिर्णीतार्थनिश्चयरूपा बुद्धिः समाधौ भगवति मनःसमाधानार्थं न विधीयते। तस्यैव परमपुमर्थहेतुत्वादिति भावः। यद्वा अव्यवसायबुद्धिः केन कारणेन भवति। यत्परित्यागात्सा बुद्धिर्न भवति इत्यवो

व्यवसायबुद्धेः कारणमाह—**यामिति** । योजना तु पूर्ववदेव । वेदतात्पर्यविषयीभूतभगवत्स्वरूपमोक्षस्वरूपयोरज्ञानिनामापातप्रतीतार्थमादाय स्वर्गादिफलका वेदा इति वादिनां भोगैश्वर्यप्रसक्तानामसद्वादिनां वाक्यान्यव्यवसायबुद्धिकारणम् । तत्त्यागे च सा बुद्धिर्न भवतीति भावः । अत्र पक्षे समाधावित्यस्य तत्त्वविषयतया दार्ढ्यार्थमित्यर्थः। तस्यैव विष्णुधर्मानुष्ठानहेतुत्वादिति ॥ ४२–४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ॥
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

त० टी०—ननु यदि स्वर्गादिकं फलं परमार्थरूपं न भवति चेत्तर्हि अपौरुषेयतया निर्दोषा वेदाः सर्वजनस्य हितार्थावबोधने प्रवृत्ताः किमिति स्वर्गाद्युद्देशेन कर्माणि विदधतीति चेत्तत्राह—**त्रैगुण्यविषया इति** । त्रयो गुणाः सत्त्वरजस्तमांसि तत्र भवास्तद्वृत्तिस्थाः पुरुषास्त्रैगुण्यशब्दवाच्याः । तत्र केचित् सत्त्वाऽधिकाः केचिद्रजोऽधिकाः केचित्तमोऽधिका इति त्रिविधा जना भवन्ति तद्विषया वेदा उपनिषद्व्यतिरिक्ताः काम्यफलाद्यभिधायकाः यो यत्कामस्तस्य तदेव विहितं तदनुसारेण तत्तत्फलस्तुतितत्प्रकारांस्तत्साधनानि कर्माणि बोधयन्ति । यदि तेषां तत्तद्गुणानुसारेण तत्तद्धितसाधनं वेदा न बोधयेयुस्तर्हि तत्त्वज्ञाननिष्ठाभावात् त्रिगुणविलक्षणमोक्षफलमजानन्तः स्वाभिमतस्वर्गादिफलहितप्राप्तिसाधनानि कर्माण्यप्यविज्ञायोभयथा नष्टा भवेयुरिति तद्धितकर्मबोधनात्त्रैगुण्यविषया इति युक्तमुक्तम् । हे अर्जुन ! त्वं तु निस्त्रैगुण्यो भवेति त्रिगुणमयस्वर्गादिफलतत्साधनतत्प्रतिपादकवेदानिष्ठो भव । वेदविहितेऽपि त्रिगुणात्मकफलसाधनादौ निःस्पृहो भवेति भावः । ननु स्वर्गादौ निःस्पृहत्वेऽपि सर्वस्यान्नवस्त्रादेस्त्रिगुणमयत्वमेव तस्य च देहनिर्वाहार्थमवश्यापेक्षितत्वात् कथं निस्त्रैगुण्यसम्भव इत्यत आह—**निर्द्वन्द्व इति** । द्वन्द्वानि शीतोष्णक्षुधापिपासासुखदुःखानि तद्रहितो भव तानि सहस्वेत्यर्थः। कथमिति चेत्तत्राह—**नित्यसत्त्वस्थ इति** । नित्यसत्त्वं रजस्तमोभ्यामनभिभूतं सत्त्वं तल्लक्षणं धैर्यं तत्रस्थः सन् रजस्तमोऽभिभूतसत्त्वः पुरुषः शीतोष्णादिप्राप्तौ मरणभयेन धैर्यात्प्रचलति त्वं तु रजस्तमसी अभिभूय शुद्धसत्त्वनिष्ठो भवेति भावः। ननु परिग्रहगतस्तद्योगक्षेमार्थिनः कुतो नित्यसत्त्वस्थत्वमिति चेत्तत्राह—**निर्योगक्षेम इति** । अपेक्षितस्य लाभो योगः लब्धस्य रक्षणं क्षेमस्तान्निरपेक्षो भव। एवं चेत्कथं मे निर्वाहो भविष्यतीति सन्देहो न कर्तव्य इत्याह—**आत्मवानिति**। आत्मा परमात्मा सर्वाभीष्टप्रदो ध्येयतया विद्यते यस्य स तथा तदाश्रितो भूत्वा चिन्तां विहाय किञ्चिद्योगक्षेमाय नान्यं कञ्चन समाश्रयेति भावः ॥ ४५ ॥

म० टी०—ननु सकामानां माभूदाशयदोषाद्व्यवसायात्मिका बुद्धिः निष्कामानां तु व्यवसायात्मकबुद्ध्या कर्म कुर्वतां कर्मस्वाभाव्यात्स्वर्गादिफलप्राप्तौ ज्ञानप्रतिबन्धः समान इत्याशङ्क्याह—**त्रैगुण्यविषया इति** । त्रयाणां गुणानां कर्म त्रैगुण्यं काममूलः संसारः स एव प्रकाश्यत्वेन विषयो येषां तादृशा वेदाः कर्मकाण्डात्मकाः । यो यत्फलकामस्तस्यैव तत्फलं बोधयतीत्यर्थः । न हि सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति विनियोगेऽपि सकृदनुष्ठानात्सर्वफलप्राप्तिर्भवति तत्तत्कामनाविरहात् । यत्फलकामनयानुतिष्ठति तदेव फलं तस्मिन्प्रयोग इति स्थितम् । योगसिद्ध्यधिकरणे यस्मादेवं कामनाविरहे फलविरहः तस्मात्त्वं निस्त्रैगुण्यो निष्कामो भव हे अर्जुन ! एतेन कर्मस्वाभाव्यात्संसारो निरस्तः । ननु शीतोष्णादिद्वन्द्वप्रतीकाराय वस्त्राद्यपेक्षणात्कुतो निष्कामत्वमत आह—**निर्द्वन्द्व इति** । निर्द्वन्द्वः सर्वत्र भवेति संबध्यते । मात्रास्पर्शास्त्वित्युक्तन्यायेन शीतोष्णादिद्वन्द्वसहिष्णुर्भव। असह्यं दुःखं कथं वा सोढव्यमित्यपेक्षायामाह—**नित्यसत्त्वस्थ इति**। नित्यसत्त्वस्थः

नित्यमचञ्चलं यत्सत्त्वं धैर्यापरपर्यायं तस्मिंस्तिष्ठतीति तथा । रजस्तमोभ्यामभिभूतसत्त्वो हि शीतोष्णादिपीडया मरिष्यामीति मन्वानो धर्माद्विमुखो भवति । त्वं तु रजस्तमसी अभिभूय सत्त्वमात्रालम्बनो भव। ननु शीतोष्णादिसहनेऽपि क्षुत्पिपासादिप्रतीकारार्थं किंचिदनुपात्तमुपादेयमुपात्तं च रक्षणीयमिति तदर्थं यत्ने क्रियमाणे कुतः सत्त्वमित्यत आह—निर्योगक्षेम इति । निर्योगक्षेमः अलब्धलाभो योगः लब्धपरिरक्षणं क्षेमस्तद्रहितो भव । चित्तविक्षेपकारिपरिग्रहराहितो भवेत्यर्थः । न चैवं चिन्ता कर्तव्या कथमेवं सति जीविष्यामीति । यतः सर्वान्तर्यामी परमेश्वर एव तव योगक्षेमादि निर्वाहयिष्यतीत्याह—आत्मवानिति । आत्मवान् आत्मा परमात्मा ध्येयत्वेन योगक्षेमादिनिर्वाहकत्वेन च वर्तते यस्य स आत्मवान् सर्वकामनापरित्यागेन परमेश्वरमाराधयतो मम स एव देहयात्रामात्रमपेक्षितं सम्पादयिष्यतीति निश्चित्य निश्चिन्तो भवेत्यर्थः । आत्मवानप्रमत्तो भवेति वा ॥ ४५ ॥

शं० टी०—एवं श्रुतिवाक्यानामुपक्रमोपसंहारादिष्वेवावान्तरतात्पर्यं महत्तात्पर्यं चाविजानतामर्थवादैर्मोहितानां कामिनां योगबुद्ध्यभावादीश्वरप्रसादाभावस्तेनैव संसारोपरमाभाव इति प्रतिपाद्य इदानीं केवलमुमुक्षूणां योगबुद्धिमतामीश्वरप्रीत्यै कर्म कुर्वतां प्ररोचनवाक्यैर्न मोहितव्यमिष्टानिष्टप्राप्तौ समबुद्ध्या श्रद्धाभक्तिभ्यामीश्वराराधनात्मकं कर्म वैदिकं कर्तव्यमिति सूचयितुमाह—त्रैगुण्येति । राजसास्तामसाः सात्त्विकाश्चेति त्रिविधा गुणास्त्रिगुणा रागद्वेषलोभमोहादयस्तेषां तत्कार्याणां तत्फलानां च समाहारस्त्रैगुण्यं संसारः स एव विषयः कर्मतत्साधनादिप्रकाशनद्वारा वर्धनीयत्वेन गोचरो येषां ते त्रैगुण्यविषयाः वेदाः संसारवृद्धेर्वेदोक्तकर्माधीनत्वेन वेदास्त्रैगुण्यविषया इत्युच्यन्ते। त्रैगुण्यस्य वेदविषयत्वेन सर्वेषामुपादेयत्वे सत्यपि न तन्मुमुक्षुभिरादर्तव्यमित्याह—निस्त्रैगुण्य इति । यतस्त्वं मोक्षेच्छया योगबुद्धियुक्तः स्वधर्मे प्रवृत्तस्ततो निस्त्रैगुण्यो भव प्ररोचनश्रुतिभ्यो रागद्वेषादिभ्यस्तत्प्रधानकर्मभ्यस्तत्फलेभ्यश्च निष्क्रान्तो भव निर्द्वन्द्वश्च इष्टानिष्टपदार्थौ द्वौ द्वन्द्वशब्दवाच्यौ रागद्वेषादिदोषजनकौ तत्र समबुद्ध्या ताभ्यां निष्क्रान्तो भव मोक्षस्य तत्साधनस्य च शमदमक्षान्त्यादेः सत्त्वगुणैकलभ्यत्वान्निस्त्रैगुण्यत्वेऽपि मुमुक्षोः सत्त्वेन भवितव्यमित्याशयेनाह—नित्यसत्त्वस्थ इति । नित्यं सत्त्वगुण एव तिष्ठतीति नित्यसत्त्वस्थो भव । विवेकवैराग्यशमदमादिष्वेव तिष्ठेत्यर्थः । योगक्षेमपरस्य रागद्वेषादिः प्रसज्यते तेन शमादयः पलायन्ते ततः साधनविच्छित्तिस्तया मोक्षासिद्धिस्ततो मुमुक्षोस्ताभ्यां निर्गमः कर्तव्य इत्याशयेनाह—निर्योगक्षेमो भवेति । अविद्यमानस्य संपादनं योगः विद्यमानस्य पालनं क्षेमः प्रारब्धाधीनो भूत्वा त्वं ताभ्यां निष्क्रान्तो भव । मनसो विषयान्तरपारवश्ये स्वधर्मो न सिध्यत्यतस्तदभावेन भवितव्यमित्याह—आत्मवानिति । विहिते कर्मणि श्रवणध्यानकीर्तनादिष्वेव स्थित आत्मा मनोऽस्यास्तीत्यात्मवान् निश्चलचित्तो भवेत्यर्थः । यद्वा 'न जायते म्रियते वा कदाचित्' इति 'वेदाविनाशिनम्' इत्यादिवाक्यैः प्रतिपादिता सांख्यविषया बुद्धिर्यदि तवास्ति दृढा तदा त्वयैवं स्थातव्यमिति ज्ञानिनः कर्तव्यं सूच्यते। त्रयो गुणाः सत्त्वादयो यस्य सन्ति तत्त्रिगुणं जगद्बीजमव्याकृतं तस्मादुत्पन्नं जगत्त्रैगुण्यं तदेव प्रतिपाद्यत्वेन विषयो येषां ते त्रैगुण्यविषयाः साध्यसाधनसाधकफलदेवतात्मकजगत्प्रकाशनपराः सर्वे वेदा इत्यर्थः। वेदतदुक्तकर्मतत्फलेषु प्रवृत्तस्य द्वैतज्ञानबाधं विना नाद्वैतज्ञानं तन्निष्ठा तत्फलमपि न सिद्ध्यति अतस्तान्निष्क्रमो विदुषा कर्तव्य इत्याह—निस्त्रैगुण्यो भवेति । 'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इति स्मरणाद्वेदेभ्यस्तदुक्तकर्मभ्यस्त्रैगुण्याज्जगतश्च सर्वस्मान्निष्क्रान्तो भव सर्वसंन्यासं कुर्वित्यर्थः। कृतेऽपि सर्वसंन्यासे बहिर्मुखस्य द्वैतावलम्बिनो ब्रह्मनिष्ठायोगात्तदयोगे ज्ञानभ्रंशस्तेन मोक्षो न सिद्ध्यत्यतो ज्ञानिना द्वैतालम्बनं त्यक्तव्यमित्याह—निर्द्वन्द्व इति । द्वन्द्वे नामरूपे सर्वत्र तयोर्ग्रहणान्निर्गतो भव नामरूपयोर्ग्रहणं मा कुर्वित्यर्थः । निद्रां कुर्वतो नामरूपग्रहणं न संभवत्यतः प्राप्तां तां विदुषो निषेद्धुमाह—नित्यस-

त्त्वस्थ इति। सतो भावः सत्त्वं ब्रह्मस्वरूपं नित्यं तस्मिन्नेव तिष्ठतीति नित्यसत्त्वस्थो भव। सर्वदा ब्रह्मैवानुसन्धेहीत्यर्थः। ब्रह्मविदः शरीरयात्रापि ब्रह्मदृष्ट्यैव कर्तव्या न तु बाह्यदृष्ट्येति सूचयितुमाह–निर्योगक्षेम इति। स्थितस्यैव देहस्याहिकण्टकादिभ्यस्तात्पर्येण पालनं क्षेमः तस्यानुकूलद्रव्यसंपादनं योगस्तदुभयस्यापि प्रारब्धाधीनत्वात्स्वदृष्ट्या देहाभावाच्च अधिष्ठानज्ञानबलेन तयोर्निर्गमं कृत्वा निर्योगक्षेमो भव ब्रह्मनिष्ठायां प्रमादः क्वचिदपि मा भूदित्याह–आत्मवान् आत्मा ब्रह्माकारबुद्धिः सदा सैवास्यास्तीत्यात्मवान्। यद्वाऽहंबुद्धेर्विषय आत्मैव सदास्तु न क्वचित्प्रमादेनाप्यनात्मेति मत्वाह–आत्मवान् भवेति। अनात्मानमहंबुद्धेः क्वचित्कदाचिदपि विषयं मा कुर्वित्यर्थः॥ ४९॥

श्री० टी०–ननु च यदि स्वर्गादिकं परमं फलं न भवति तर्हि किमिति वेदैस्तत्साधनतया कर्माणि विधीयन्ते तत्राह–**त्रैगुण्यविषया इति**। त्रिगुणात्मकाः सकामा येऽधिकारिणस्तद्विषयास्तेषां कर्मफलसम्बन्धप्रतिपादका वेदाः। त्वं तु निस्त्रैगुण्यो निष्कामो भव। तत्रोपायमाह निर्द्वन्द्वः सुखदुःखशीतोष्णादियुगुलानि द्वन्द्वानि तद्रहितो भव। तानि सहस्वेत्यर्थः। कथमित्यत्राह नित्यसत्वस्थः सन् धैर्यमवलम्ब्येत्यर्थः। तथा निर्योगक्षेमः अप्राप्तस्वीकारो योगः प्राप्तपरिपालनं क्षेमं तद्रहितः आत्मवान् अप्रमत्तः। नहि द्वन्द्वाकुलस्य योगक्षेमव्यापृतस्य च प्रमादिनः त्रैगुण्यातिक्रमः संभवतीति॥ ४९॥

स० टी०–ननु मा भूत्सकामानां व्यवसायात्मिका मतिः॥निष्कामानां तया बुद्ध्या नित्यकर्मादि कुर्वताम्॥ १॥ स्वर्गाप्तौ कर्मसामर्थ्यात्प्रतिबन्धः समो भवेत्॥ तेषामप्यात्मविज्ञाने इत्याशङ्क्याह सर्वभूः॥ २॥ गुणानां कर्मसंसारस्त्रयाणां काममूलकः॥ सप्रकाश्यतया येषां विषयस्तादृशास्त्रयः॥ ३॥ कर्मकाण्डात्मका वेदास्तत्तत्कामानुसारतः॥ बोधयन्ति फलं कामाभावे निष्कामतापराः॥ ४॥ अवदाततया त्वं तु निष्कामो भव सर्वदा॥ एतेन कर्मसामर्थ्यात्संसारोऽस्तीत्यपाकृतम्॥ ५॥ ननु द्वन्द्वप्रतीकारसिद्धयेऽपेक्ष्यतेऽखिलम्॥ वस्त्राशनादि चेत्तर्हि कथं निष्कामतेति चेत्॥ ६॥ मात्रास्पर्शास्त्विहेत्युक्तन्यायेनैव विवेकतः॥ भव द्वन्द्वसहिष्णुस्त्वमालम्ब्यासङ्गसाक्षिणम्॥ ७॥ सोढव्यं वा कथं दुःखमसह्यमिति चेच्छृणु॥ यत्सत्त्वमचलं धैर्यं तदालम्बी सदा भव॥ ८॥ अलब्धलाभो योगः स्यात्क्षेमो लब्धस्य रक्षणम्॥ तच्छून्यो भव धीवृत्तिविक्षेपकमलं त्यज॥ ९॥ जीविष्यामि कथं नैवं चिन्ता कार्या यतो हरिः॥ सर्वान्तर्यामिरूपेण योगक्षेमकरस्तव॥ १०॥ आत्मा ध्येयतया यस्य परमेश्वरसंज्ञकः॥ वर्तते पालकत्वेन सदा स त्वं भवात्मवान्॥ ११॥ सदा कृष्णपदालम्बि यस्य चेतः समाहितम्॥ स निर्द्वन्द्वः स सत्त्वस्थो निःसंकल्पः सदा सुखी॥ १२॥ ४९॥

भा० टी०–वेदवादरतानां वेदोक्तत्रिगुणात्मकसंसार एव फलमित्याशयेनाह–**त्रैगुण्येति**। त्रैगुण्यं संसारः विषयः प्रतिपाद्यो येषां कर्मकाण्डपराणां वेदानां ते। तर्हि मया कथं भाव्यमित्याकाङ्क्षायामाह–निस्त्रैगुण्य इति। निस्त्रैगुण्यो निष्कामो भव। हे अर्जुनेति संबोधयन् स्वनामसार्थकं कर्तुमर्हसीति ध्वनयति। निस्त्रैगुण्यभवने उपायमाह–निर्द्वन्द्व इति। सुखदुःखहेतू प्रतिपक्षपदार्थौ द्वन्द्वशब्दवाच्यौ तस्माद्रहितो भव। तत्रोपायमाह–नित्येति। नित्यं सत्वे स्थितः भव। तत्राप्युपायमाह–निर्योगेति। अनुपात्तस्योपादानं योगः उपात्तस्य रक्षणं क्षेमः ताभ्यां निर्गतः रजोगुणरहितो भव। आत्मवानप्रमत्तः। तमोगुणाद्विनिर्गतो भवेत्यर्थः॥ ४९॥

प० टी०–ननु स्वर्गादिकं फलं न स्यात्तर्हि वेदैस्तत्साधनभूतानि कर्माणि कथं विधीयन्त इत्याशङ्क्य तद्विधायकश्रुतिवाक्यानामन्या दृक्तात्पर्यमस्तीत्याह–**त्रैगुण्येति**। अत्र केवलं वेदानां त्रैगुण्यविषयत्वे सिद्धे

प्रस्तुतं भगवदुपदिश्यमानस्य निस्त्रैगुण्यस्य वेदामूलकत्वेनोपदेशानर्हत्वात् ' तस्माच्छास्त्रं प्रमाणं ते ' तथा ' वेदैश्च सर्वैरहमेव वेद्यः ' इत्यग्रतो भगवतैव प्रतिपादनादतोऽन्यथा व्याख्यायते । यथाधिकारं सत्त्वादित्रिगुणसंबन्धि यत्फलं तत्त्रैगुण्यं तदेव विषयो निरूपणीयत्वेन प्राप्तं येषु तथाविधा वेदाः सन्ति त्वं तु सात्त्विकफले नित्यसत्त्वस्थः सन् निस्त्रैगुण्यो भव नित्यं शुद्धं च तत्सत्त्वं च तत्रस्थस्तन्निष्ठः सन् तेन तत्त्वज्ञानोत्पत्तौ गुणत्रयातीतो भव । अत्र सामान्यतः सत्त्वस्वरूपं तु–'उपासनायां यदवञ्चकत्वं वाक्कायचित्तेषु तदेव सत्त्वम् ' इत्युक्तत्वाद्वेदेनोपासनायां शबलशुद्धत्वभेदेन द्विधा सत्त्वं निरुक्तमस्ति तत्रैकं स्वर्गसुखप्रापकमन्यत्तत्त्वज्ञानोत्पादकम् । एतदेव भगवताप्यग्रे निरूपयिष्यते । 'तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनायम् । सुखसंगेन बध्नाति ज्ञानसंगेन चानघ' इति । श्रुतिरप्याश्वलोपनिषत्सु–" वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति । ब्रह्मैव लोको ब्रह्मलोकः । शेषं स्पष्टम् । तथा च शुद्धसत्त्वेन रजस्तमसी अभिभूय तथा तत्त्वज्ञानोत्पत्तौ पुष्पफलन्यायेन सत्त्वोपरमोपि । ततो निस्त्रैगुण्यत्वमेव पर्यवसन्नमित्यर्थः । यद्वा त्रैगुण्यमेव विषं त्रैगुण्यविषं तद्यापयन्ति तिरस्कुर्वन्ति ते त्रैगुण्यविषया एवंविधा वेदाः प्रथमं निरूपितमपि त्रिगुणसंबन्धि स्वर्गादिफलं त्रैगुण्यं तद्विषं घातकं जन्ममरणपर्यवसायित्वेन बन्धहेतुत्वात् पुनरुपनिषद्भिर्भागैस्तद्यापयन्ति दूषयन्ति ते तथा । श्रुतिरपि शातपथी–" पुत्रैषणायाश्च वित्तैषणायाश्च वाञ्छायार्थं भिक्षाचर्यं चरन्ति " इति । नन्वेवं ज्ञात्वापि कथं तेषां विधानमिति चेन्न गुडजिह्विकान्यायेन कर्मप्रवृत्तौ प्रलोभनमात्रत्वात् । अयमर्थः । शरीरायासद्रव्यव्ययैरतिक्लेशसाधनेषु कर्मसु सहसा प्रवृत्तिर्न भवत्यतो रोचनार्थं फलश्रुतिरुक्ता । यथा रोगार्तः शिशुर्मुखे कटु भेषजं न गृह्णाति, तत्र शर्करा निक्षिप्तास्तीति माता प्रलोभयति, सतु शर्करामाधुर्येच्छया गृह्णाति, मातुस्तात्पर्यमारोग्ये तद्वत् । अतस्त्वं निस्त्रैगुण्यो भव त्रैगुण्यतिरस्कारकवेदार्थं भज । अथ व्यतिरेकमुखेन त्रैगुण्यस्य विषयरूपत्वमाह–**निर्द्वन्द्व इत्यादि** । द्वन्द्वानि शीतोष्णादीनि तदसहिष्णुत्वम् । तथाप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य संरक्षणं क्षेमं तथा सावधानत्वमेतानि दुःखहेतवो त्रैगुण्यविषये संभवन्तीति विषरूपत्वं निस्त्रैगुण्ये तु तदभाव इति नित्यसत्त्वस्थो धैर्यत्रानात्मवान् सावधानः ॥ ४५ ॥

रा० टी०–एवं योगे त्विमां शृण्विति योगोक्तिं प्रतिज्ञाय तत्रादरजननाय सार्धश्लोकेन तं प्रशस्य स्वोक्तौ निष्ठाभावे कारणीभूतमतान्तरविधानं च श्लोकत्रयेण तन्निन्दोक्त्या निरस्येदानीं प्रतिज्ञातं योगं प्राधान्येनाह–**त्रैगुण्येत्यादिना** ।आषष्ठाध्यायसमाप्ति । बहूनि मे व्यतीतानीत्यादेः प्रासंगिकत्वेनाप्रधानत्वात् । त्रयाणां सत्त्वरजस्तमसामिदं त्रैगुण्यम् । त्रिगुणसंबन्धा (ष्य) र्थे विचित्रा हि तद्धितगतिरिति ष्यञ्प्रत्ययः । त्रिगुणजन्यं यत्स्वर्गादि तद्विषयाः आपाततः स्वर्गादिफलककर्मादिप्रतिपादकाः प्रतीयन्ते वेदाः वादो विषयकत्वं च मुखतो वचनं तथेत्येके । हे अर्जुन ! त्वं तु निस्त्रैगुण्यः निष्क्रान्तस्त्रैगुण्यात् त्रिगुणसंबन्धिस्वर्गादितो निस्त्रैगुण्यः त्रैगुण्यबुद्धितो निर्गतो भव । आपाततः प्रतीतार्थे भ्रान्तिं मा कार्षीरित्यर्थः । यद्वा त्रैगुण्यं त्रिगुणसंबन्धि स्वर्गाद्यस्थिरफलं संसारबन्धनं वा तदेव विषं त्रैगुण्यविषं यापयन्ति अपगमयन्तीति त्रैगुण्यविषयाः । यातेरन्तर्णीतण्यर्थात् "आतोऽनुपसर्गे कः" इति कः । नित्यपुमर्थहेतुभगवत्स्वरूपविषया इति यावत् । तानाश्रित्येति शेषः । निस्त्रैगुण्यो भव प्राग्वद्वेदार्थः । वेदतात्पर्यविषयीभूतार्थं बुद्ध्वा क्षुद्रफलककर्मादिरूपापातप्रतीतार्थे भ्रान्तिं मा कार्षीरिति भावः । किंच निर्द्वन्द्वः सुखदुःखे समे कृत्वेत्यत्रोक्तदिशा समदुःखसुखादिरिति वा सुखदुःखादिप्राप्तावुत्सेकानुत्सेकहीन इति वार्थः । नित्यं सत्वे साधुगुणोपेते हरौ तिष्ठतीति नित्यसत्वस्थः । नित्यं हरिस्मृतिमान्भवेति सर्वत्रान्वेति । कथं नित्यं हरिस्मृतिरित्यत आत्मवान् परमात्मवान् तथा स्मृतिमानिति । आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति सूत्रोक्तदिशा मम स्वामी हरिरिति स्मृति-

मानिति यावत् । अप्राप्तप्राप्तिर्योगः प्राप्तपरिरक्षणं क्षेमः शास्त्रविरुद्धविषये योगक्षेमाभ्यां निष्क्रान्तो नियोगक्षेमः । शास्त्रविरुद्धविषये योगक्षेमहीनो भवेत्यर्थः । उपलक्षणमेतत् । तादृशयोगक्षेमेच्छाहीनोऽपि भवेत्यर्थः । निर्द्वन्द्वत्वादिविशेषणयुक्तः सन् नित्यपुमर्थहेतुर्भगवानेव वेदतात्पर्यविषयो न काम्यकर्मेति ज्ञात्वा काम्यकर्मत्यागेन सर्वत्र सन्ततः साधुगुणो हरिः मम स्वामीति नित्यस्मरणमेव ज्ञानोपायो न त्रैक्ष्यस्मृतिरित्युक्तं भवति ॥ ४५ ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

त० टी०—ननु वेदविषयपरित्यागे तदर्थातिरिक्तपदार्थाभावान्मुमुक्षोरपि साधनानुष्ठानाद्यपेक्षितं सर्वं हेयं स्यात्तथात्वे तस्य स्वार्थभ्रंश एव स्यादिति चेत्तत्राह—**यावानिति** । यथा स्नानपानाद्यर्थिनः पुरुषस्य उदपाने वापीकूपतडागादिषु यावान्यावत्परिमाणः स्नानपानाद्यर्थः सर्वतः संप्लुतोदके बहुदेशप्रसृतजलसमूहे महानद्यादिषु तावानेवार्थः । एवं वेदार्थं विजानतः ब्राह्मणस्य ब्रह्मज्ञस्य मुमुक्षोरिति यावत् । वेदैकदेशे यावानर्थः स्वश्रेयःसाधनभूतसर्वदेवेशभगवत्तोषकरं कर्माचरणं प्रयोजनं तावानेव सर्ववेदेष्वर्थः प्रयोजनं, नतु वेदोक्तं सर्वं सर्वैरुपादेयं किन्तु यथाधिकारमेव । यथा वेदोदितमेवाग्निहोत्रश्राद्धपितृतर्पणादिकं कर्म न संन्यासिनाऽनुष्ठेयमनधिकारात् । किन्तु प्रवृत्तिनिष्ठगृहस्थस्यैव तत्राधिकारः । संन्यासिनां तु स्नानप्रणवजपतत्त्वानुसन्धानयावद्देहयात्रामात्रभिक्षावसनोपादानमेव वेदोदितमनुष्ठेयं तद्वदिति विवेकः ॥ ४६ ॥

म० टी०—न चैवं शङ्कनीयं सर्वकामनापरित्यागेन कर्म कुर्वन्नहं तैस्तैः कर्मजनितैरानन्दैर्वञ्चितः स्यामिति—**यावानिति** । यस्माद् उदपाने क्षुद्रजलाशये । जातावेकवचनम् । यावानर्थः यावत्स्नानपानादिप्रयोजनं भवति सर्वतः संप्लुतोदके महति जलाशये तावानर्थो भवत्येव । यथा हि पर्वतनिर्झराः सर्वतः स्रवन्तः क्वचिदुपत्यकायामेकत्र मिलन्ति तत्र प्रत्येकं जायमानमुदकप्रयोजनं समुदिते सुतरां भवति । सर्वेषां निर्झराणामेकत्रैव कासारेन्तर्भावात् । एवं सर्वेषु वेदेषु वेदोक्तेषु काम्यकर्मसु यावानर्थो हैरण्यगर्भानन्दपर्यन्तः तावान्विजानतो ब्रह्मतत्त्वं साक्षात्कृतवतो ब्राह्मणस्य ब्रह्मबुभूपोर्भवत्येव।क्षुद्रानन्दानां ब्रह्मानन्दांशत्वात्तत्र क्षुद्रानन्दानामन्तर्भावात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । एकस्याप्यानन्दस्याविद्याकल्पिततत्तदुपाधिपरिच्छेदमादायांशांशिवद्व्यपदेश आकाशस्येव घटाद्यवच्छेदकल्पनया । तथा च निष्कामकर्मभिः शुद्धान्तःकरणस्य तवात्मज्ञानोदये परब्रह्मानन्दप्राप्तिः स्यात्तथैव च सर्वानन्दप्राप्तौ न क्षुद्रानन्दाप्राप्तिनिबन्धनवैयर्थ्यावकाशः । अतः परमानन्दप्रापकाय तत्त्वज्ञानाय निष्कामकर्माणि कुर्वित्यभिप्रायः । अत्र यथा तथा भवतीति पदत्रयाध्याहारः । यावान् तावानिति पदद्वयानुषङ्गश्च दार्ष्टान्तिके द्रष्टव्यः ॥ ४६ ॥

शं० टी०—ननु ब्रह्मविदः श्रुत्युक्तसर्वकर्मसंन्यासे साधनाभावे साध्याभाव इति न्यायेन तत्तत्कर्मविशेषलभ्याः सुखविशेषा न संभवन्ति तर्ह्युन्मत्तस्येव निष्फलैवास्य प्रवृत्तिरित्याशङ्कायां न 'सर्वं पदं हस्तिपदे निमग्नम्' इति न्यायेन सत्क्रियालभ्याः सार्वभौमादिब्रह्मान्ता आनन्दाः सर्वे ब्रह्मानुभूतौ तिष्ठतोऽस्यारूढस्य संभवन्तीति सदृष्टान्तमुपपादयति—**यावानिति** । उदमुदकं पिबन्त्यस्मिन्नित्युदपानं जलाशयः । जातावेकवचनम् । तस्मिन्नुदपाने भूमौ सर्वत्र विद्यमानवापीकूपतटाकपुष्करिणीनदनद्यादौ पुण्यतीर्थे स्नानदा-

नार्चनादिक्रियया साध्यमानोर्थः पुण्यलक्षणो यावान् यावत्परिमाणकः सिध्यति सर्वतः संप्लुतोदके सर्वत्र संप्लुतं परिपूर्णमुदकं यस्य स सर्वतः संप्लुतोदकः समुद्रस्तस्मिन्नेव स्नानदानार्चनादिक्रियया लभ्यमानः पुण्यरूपोर्थस्तावानेव गङ्गादिपुण्यतीर्थेषु तत्रतत्र पृथक्पृथक् क्रियमाणस्नानदानादिक्रियालभ्यमानपुण्यविशेषैः समानपरिमाण एव सिध्यति न ततो न्यूनायते शते पञ्चाशन्न्यायेन परिच्छिन्नजलानां गङ्गादीनां समुद्रेऽन्तर्भावात् । एवमेव सर्वेषु वेदेषु ऋगादिषु प्रसिद्धैः कर्मभिर्यागयज्ञदानाध्ययनव्रततपोयोगादिभिरन्यैश्च पुण्यविशेषैः संपाद्यमानः श्रुत्युक्त आनन्दः सार्वभौमादिब्रह्मान्तः पुनःपुनः शतगुणितो यावान् भवति तावानानन्दो विजानतः सर्वमिदमहं च ब्रह्मैवेति जगत्सर्वं स्वं च सच्चिदानन्दं ब्रह्मैव पश्यतो ब्राह्मणस्य ब्रह्म विद्यतेर्ब्रह्मानुभूत्या सिध्यति ततो ब्रह्मविन्नित्यानन्द एव भवति । "स मोदते मोदनीयं हि लब्ध्वा" इति श्रुतेः । यद्वा उदपाने भूमौ सर्वत्र विद्यमानवापीकूपतटाकनदनद्यादौ जलप्रदेशे विद्यमानो जलरूपोर्थो यावान् तिष्ठति तावान् स जलरूपोर्थः सर्वतः संप्लुतोदके समुद्रे एककोणस्थितजलस्यांशांशो भवति यथा तथा वेदेषु शब्दादिविषयजातं विदन्ति जानन्तीति वेदाः । विदधातोः कर्तर्यच् । ब्रह्मादिपिपीलिकान्ताः सर्वे प्राणिनस्तेषु वेदेषु सर्वेषु प्राणिषु पुण्यकर्मपरिपाकवशादिष्टार्थसान्निध्ये प्रतीयमान आनन्दरूपोर्थः यावान् तावान् आनन्दरूपोर्थः सर्वतः संप्लुतोदकस्थानीये ब्रह्मणि स्थितानन्दस्य लेशांशो भवति। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । एवं स्वप्रतिबिम्बलेशांशमात्रेण ब्रह्मादिपिपीलिकान्तप्राणिजातस्य तत्तत्पुण्यविशेषतारतम्येन सुखतारतम्यप्रदं सर्वतः संप्लुतोदकस्थानीयमद्वितीयं सत्यज्ञानानन्दघनं परं ब्रह्म विजानतः एतदेवाहमिति स्वस्वरूपत्वेन साक्षात्कृतवतो ब्राह्मणस्य ब्रह्मविदोऽखण्डाकारवृत्त्या सर्वदाऽनुभूयमानोऽनन्तो बिम्बानन्द एवंलक्षण एतावानिति वक्तुं न केनापि शक्यत इत्यर्थः ॥ ४६ ॥

श्री० टी०—ननु वेदोक्तनानाफलपरित्यागेन निष्कामतया ईश्वराराधनविषया व्यवसायात्मिका बुद्धिरेवेत्याशङ्क्याह—**यावानिति** । उदकं पीयतेऽस्मिन्नित्युदपानं वापीकूपतडागादि तस्मिन्स्वल्पोदके एकत्र कृत्स्नस्याभावात् तत्रतत्र परिभ्रमणेन विभागशो यावान् स्नानपानादिरर्थः प्रयोजनं भवति तावान्सर्वोप्यर्थः सर्वतः संप्लुतोदके महाह्रदे एकत्रैव यथा भवति एवं यावान् सर्वेषु वेदेषु तत्तत्कर्मफलरूपोऽर्थः तावान् सर्वोऽपि विजानतो व्यवसायात्मकबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भूतत्वात् " एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इति श्रुतेः । तस्मादियमेव बुद्धिः सुबुद्धिरित्यर्थः ॥ ४६ ॥

स० टी०—सर्वकामपरित्यागाद्वञ्चितोऽहं सुखांशतः ॥ कर्मजात्कर्म कुर्वश्चेत्येवं मा मानसं कुरु ॥ १ ॥ यावत्स्यात्स्नानपानादिफलं क्षुद्रजलाशये ॥ तावत्फलं भवत्येव महत्यपि जलाशये ॥ २ ॥ यथाद्रिनिर्झराः सर्वे स्रवन्तस्ते क्वचिद्भुवि ॥ मिलन्त्येकत्र तत्रापि प्रत्येकं यत्प्रयोजनम् ॥ ३ ॥ तत्सर्वं तत्र सुतरामेकत्रातिजलाशये ॥ एवमेवागमोक्तेषु सर्वेषु काम्यकर्मसु ॥ ४ ॥ यावानर्थोऽस्ति हैरण्यगर्भानन्दावसानकः ॥ तावान्ब्रह्माद्वयानन्दं साक्षात्कृतवतो विदः ॥ ५ ॥ ब्राह्मणस्य भवत्येव ब्रह्मीभूतस्य सर्वथा ॥ ६ ॥ यथाकृतायो विजितोऽस्ति येनाधरेऽपि संयान्ति तमेव चायाः ॥ तथात्मविज्ञं सुकृतैकराशिं संयान्ति सर्वाणि सुखानि पुंसाम् ॥ ७ ॥ क्षुद्रानन्दाः समस्तास्ते ब्रह्मानन्दलवा यतः ॥ अविद्याकल्पितोपाधितारतम्यादनेकधा ॥ ८ ॥ ब्रह्मानन्दस्तु सर्वत्र व्यापकः सत्य आन्तरः ॥ जडदुःखानृताकारे प्रपञ्चे कुत्र वा सुखम् ॥ ९ ॥ सच्चिदानन्दमद्वैतसुखं ब्रह्मैव सर्वगम् ॥ तथा च शुद्धचित्तस्य तव निष्कामकर्मभिः ॥ १० ॥ आत्मज्ञानोदये ब्रह्मानन्दप्राप्तिः स्वतो भवेत् ॥ सर्वानन्दपरिप्राप्त्या क्षुद्रानन्दल-

वेषु ते ॥ ११ ॥ मास्तु कामो ह्यतस्तत्त्वज्ञानलाभाय सर्वथा ॥ ईश्वरार्पणया बुद्ध्या कुरु कर्मानहंकृतिः ॥ १२ ॥ ४६ ॥

भा० टी०—ननु वेदोक्तकर्मफलाकाङ्क्षा नापेक्षिता चेदीश्वरार्थमपि कर्म किमर्थमनुष्ठेयमित्याशङ्क्य फलाकाङ्क्षया कर्मानुष्ठातुरनेकानर्थसंभावना फलाभिसन्धिरहितस्य तस्य तु ज्ञानप्राप्त्या सर्वकर्मफलानां यस्मिन्ब्रह्मसुखेन्तर्भावः तत्प्राप्तिः समस्तानर्थनिवृत्तिश्च भवतीत्याशयेनाह—**यावानिति** । यथा लोके उदपाने कूपाद्यनेकस्मिन् स्वल्पे क्वचिद्धस्तादिप्रक्षालनं क्वचित्स्नानं क्वचित्पानमित्यादिर्यावानर्थः यावत्परिमाणं प्रयोजनं स सर्वार्थः तावत्परिमाण एव सर्वतः संप्लुतोदके परिपूर्णोदके भवति । तत्रान्तर्भवतीत्यर्थः । तथा यावानर्थः फलं वेदेषु वेदबोधितेषु कर्मसु तावानर्थो ब्राह्मणस्य परमार्थतत्त्वं विजानतः संभवति सर्वतः संप्लुतोदकस्थानीये ज्ञानफले ब्रह्मणि सर्वेषां फलानामन्तर्भावात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । ब्राह्मणग्रहणं ब्रह्मविद्यायां ब्राह्मणस्य मुख्याधिकारसूचनार्थम् ॥ ४६ ॥

प० टी०—अत एव ज्ञातवेदतात्पर्यं पुरुषं स्तौति—**यावानिति** । उदमुदकं पीयते यस्मिन्नित्युदपानं तस्मिन् पानपर्याप्तोदके निर्झरपल्वलादौ भ्रमणं कृतवतः पुरुषस्य यावानर्थः सिद्ध्यति तावान् सर्वतः सर्वोऽप्यर्थ एकत्र संप्लुतोदके महाह्रदे सिद्ध्यति । एवं यावान् सर्वेषु पूर्वोत्तरमीमांसादिदर्शनेषु कर्मनैष्कर्म्याद्यर्थो निरूपितोस्ति तावान् विजानतो विशेषेण वेदतात्पर्यं जानतो ब्राह्मणस्य ब्रह्मज्ञस्य पुरुषस्य संप्लुतोदकस्थानीयेषु वेदेषु सिद्ध्यति ॥ ४६ ॥

रा० टी०—ननु यामिमामिति त्रयेण काम्यकर्मिणां समाध्यभावेन ज्ञानाभावान्न मोक्ष इति निन्दां कृत्वा निस्त्रैगुण्यो भवेति काम्यकर्मत्यागेन योगानुष्ठाननियम उक्तः । सत्यमुक्तः । ज्ञानफलं कर्मिणामिव कर्मिफलं स्वर्गादिकं ज्ञानिनां नास्तीति ज्ञानकर्ममार्गयोः साम्यादित्यत आह—**यावानिति** । सामर्थ्याद्यथैवं पदयोरध्याहारः । यावान्तावानित्यनयोरावृत्तिः । अयमर्थः । यथा यावानर्थः प्रयोजनमुदपाने उदकं पीयतेऽस्मिन्निति व्युत्पत्त्या कूपे भवति तावान्स्नानपानादिरूपोर्थः सर्वतः संप्लुतोदके महासमुद्रेन्तर्भवति । एवं सर्वेषु वेदेषु सर्ववेदोक्तकाम्यकर्मिणां यावानर्थः स्वर्गादिरूपं फलं तावानर्थः तावत्फलं विजानतो परोक्षतो भगवन्तं जानतो ब्राह्मणस्य ब्रह्मापरोक्षज्ञानिनः भवत्येवेत्यर्थः । ज्ञानिकर्मिणोरन्योन्यफलाभावेपि ज्ञानिफलं महासमुद्रोदकमिव महत् कर्मिफलं तु कूपोदकमिवात्यल्पमतः कुतस्तयोः साम्यम् । तथाचाल्पास्थिरफलककर्मनिन्दया महानन्तफलज्ञानसाधने योगे प्रेरणं पूर्वश्लोकोक्तं युक्तमिति भावः । अत्र विजानत इति परोक्षज्ञानस्य ब्राह्मणपदोक्तापरोक्षज्ञानस्य च हेतुहेतुमद्भावेन द्वयोरुक्तिः । पूर्वत्र स्वामित्वेन हरिस्मरणस्य योगशब्दितज्ञानोपायत्वप्रकटनाय स्वरूपकथनमिति टीकोक्तिस्त्वभ्युपगमवादेनेति ज्ञेयम् । यद्वा पूर्वत्र निस्त्रैगुण्यो भवेति स्वर्गादिशयिष्णुफलककाम्यकर्मरूपे आपाततः प्रतीते वेदार्थे भ्रान्तिं मा कार्षीरित्युक्तकाम्यकर्मनिवृत्तौ त्रैगुण्यविषहारिवेदाश्रयणं कार्यमित्युक्तेर्थे वेदतात्पर्यार्थे निवृत्तकर्माराध्यं विष्णुं सम्यग्जानतोऽतिशयितफलावाप्तिरूपयुक्तिमाह—**यावानिति** । सर्वतः संप्लुतोदके प्रकृत्यात्मके महाप्रलयोदके । अधिकरणसप्तमी । तत्र स्थित इत्यर्थः । उदपाने परमात्मनि । उत् उद्रेकात् अपः पालकराहित्याद् अनः चेष्टकत्वाद्धेतोः उच्छ्वासाद्यपश्च अनश्चेत्युदपानस्तस्मिन्प्रलये अत्युद्रिक्तगुणतया पालकवर्जितः सन्कालादिचेष्टकतया स्थिते हरौ प्रसन्ने सति यावानर्थः धर्ममोक्षादिर्भवति तावान्सर्वेषु वेदेषु विजानतो विशेषज्ञस्य कर्माणि भगवज्ज्ञानार्थानि । भगवानेव वेदमुख्यार्थः । स्वर्गादिफलश्रवणं रुच्यर्थमित्यादि जानतो ब्राह्मणस्य तावानर्थो भवति । अतः प्रतीतार्थे त्रैगुण्ये भ्रान्तिं मा कार्षीरिति ॥ ४६ ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥ ४७ ॥

त० टी०—ननु यद्येवं तर्हि मुमुक्षुणा ज्ञाननिष्ठैव सम्पादनीया, किं कर्मणेति चेत्तत्राह—**कर्मण्येवे-ति** । ते तव मुमुक्षोः तत्त्वनिष्ठापादनाय तावदन्तःकरणशुद्धयर्थं कर्मण्येवाधिकारोऽस्ति । न च कर्म-ण्यधिकृतस्य मे तत्राऽऽसक्त्याऽव्यवसायात्मिका बुद्धिः स्यादिति वाच्यमित्याह—**मा फलेषु कदाचने-ति** । कर्मफलेषु तेऽधिकारो मा भूत् । नहि फलेच्छां त्यक्त्वा कर्म कुर्वतोऽव्यवसायात्मिका बुद्धिर्भ-वति अपि तु फलासक्तस्यैव । ननु फलेच्छाभावेऽपि कर्म कुर्वतः फलावाप्तिः स्यादेवेति चेत्तत्राह—**मा कर्मफलहेतुर्भूरिति** । मत्कृतस्य कर्मण इदं फलमित्यामानं फलं प्रति हेतुं मा भावयेथाः । फलो-द्देशं विनैव कर्म कुर्वित्यर्थः । ननु निष्फलकर्मकरणादकरणमेव ज्यायो 'न कुर्यान्निष्फलं कर्म' इति निषिद्धत्वादिति चेत्तत्राह—**मा ते संगोऽस्त्वकर्मणीति** । अकर्मणि कर्माकरणे तव मुमुक्षोः संगो न, योत्स्यामीत्यहंकारो माऽस्तु नित्यनैमित्तिकाकरणे प्रत्यवायापत्तेः 'मोक्षार्थी न प्रवर्तेत तत्र का-म्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया' इति मनुस्मरणात् ॥ ४७ ॥

म० टी०—ननु निष्कामकर्मभिरात्मज्ञानं सम्पाद्य परमानन्दप्राप्तिः क्रियते चेत्तदात्मज्ञानमेव तर्हि स-म्पाद्यं किं बह्वायासैः कर्मभिर्बहिरङ्गसाधनभूतैरित्याशङ्क्याह—**कर्मणीति** । ते तवाशुद्धान्तःकरणस्य तात्त्विकज्ञा-नोत्पत्त्ययोग्यस्य कर्मण्येवान्तःकरणशोधकेऽधिकारो मयेदं कर्तव्यमिति बोधोस्तु न ज्ञाननिष्ठारूपे वेदान्तवा-क्यविचारादौ । कर्म च कुर्वतस्तव तत्फलेषु स्वर्गादिषु कदाचन कस्यांचिदप्यवस्थायां कर्मानुष्ठानात्प्रागूर्ध्वं तत्काले वा अधिकारो मयेदं भोक्तव्यमिति बोधो मास्तु । ननु मयेदं भोक्तव्यमिति बुद्ध्यभावेपि कर्म स्वसा-मर्थ्यादेव फलं जनयिष्यतीति चेन्नेत्याह—**मेति** । मा कर्मफलहेतुर्भूः फलकामनया हि कर्म कुर्वन्फलस्य हेतुरु-त्पादको भवति त्वं तु निष्कामः सन् कर्मफलहेतुर्माभूः । न हि निष्कामेन भगवदर्पणबुद्ध्या कृतं कर्म फलाय कल्पत इत्युक्तम् । फलाभावे किं कर्मणेत्यत आह मा ते सङ्गोस्त्वकर्माणि । यदि फलं नेष्यते किं कर्मणा दुःखरू-पेणेति अकरणे तव प्रीतिर्मा भूत् ॥ ४७ ॥

शं० टी०—यद्यप्येवंलक्षणसंपन्नस्यैव ब्रह्मवित्तमस्य सर्वकर्मसंन्यासेऽधिकारस्तथापि शोकमोहाविष्टत्वा-दिधर्मैर्विचार्यमाणे नैतल्लक्षणं त्वयि दृश्यते ततस्तव कर्मण्येवाधिकारो न तु ज्ञाने नापि च संन्यासे इति वदन् शतधा कुतः श्रवणानामप्यनुदितात्मज्ञानानां मुमुक्षूणां स्वधर्मानुष्ठानमवश्यं कर्तव्यं न क्वचिदपि त्यक्तव्यमिति निष्कर्षमाह—**कर्मणीति** । मुमुक्षोस्तव श्रुतिस्मृतिभ्यां विहिते काम्यवर्जिते नित्ये नैमित्तिके च कर्मण्येवाधि-कारो योग्यता नान्यत्र ज्ञाननिष्ठायां संन्यासे वेत्यन्ययोगव्यवच्छेदार्थ एवकारः । तत्रापि कर्मफलेषु 'यज्ञो दानं तपश्चैव पावनानि' इति 'धर्मेण पापमपनुदति' इति नित्यानामपि फलश्रवणात्तत्फलेषु मा ते अधिकारः नास्ति योग्यता कदाचिदपि कर्मफलेष्वपेक्षा न कर्तव्येत्यर्थः । कर्मफलेष्वपेक्षितेषु सत्सु बीजे सत्यङ्कुरवत्पुनर्जन्मा-दयो दुःखभूमयः स्वयमेव स्युस्तस्मान्मा कर्मफलहेतुर्भूः यथा स्वर्गकामी स्वर्गफलहेतुस्तस्था त्वमेतत्कर्मफलहेतु-र्माभूः । कर्मफलेष्वपेक्षावान् मा भवेत्यर्थः । ननु फलशून्यं तत्रापि क्लेशप्रधानं कर्म कर्तुं न शक्यते तदपेक्षया तत्त्यागः सुखावह इत्याकाङ्क्षायामारुरुक्षोः कर्मत्यागो न युक्त इत्याशयेनाह—**मा त इति** । अकर्म कर्मव्यतिरेकः क्रियात्याग इति यावत्तस्मिन्नकर्मणि ते सङ्गो मनःसक्तिर्मास्तु । अकरणे प्रत्यवायस्तेन नरको दुर्योनिश्च स्यादतो मुमुक्षोः कर्मसंन्यासो न युक्त इत्यर्थः । एतेन कर्मफलानपेक्षया श्रद्धया चेश्वरप्रीत्यर्थं भक्त्या कर्म कुर्वत एव मोक्षो नान्यथेति सूचितं भवति ॥ ४७ ॥

श्री० टी०—तर्हि सर्वकर्मफलानि परमेश्वराराधनादेव भविष्यन्तीत्यभिसंधाय प्रवर्तेत किं कर्मणेत्याशङ्क्य तद्वारयन्नाह—**कर्मण्येवेति** । ते तव तत्त्वज्ञानार्थिनः कर्मण्येवाधिकारः तत्फलेषु बन्धहेतुष्वधिकारः कामो मास्तु । ननु कर्माणि कृते तत्फलं स्यादेव भोजने कृते तृप्तिवदित्याशङ्क्याह—**मा कर्मेति** । मा कर्मफलहेतुर्भूः कर्मफलं प्रवृत्तिहेतुर्यस्य तथाभूतो मा भूः । कामितस्यैव स्वर्गादेर्नियोज्यविशेषणत्वेन फलत्वादकामितं फलं न स्यादिति भावः । अत एव फलं बन्धकं भविष्यतीति भयादकर्मणि कर्माऽकरणेऽपि तव संगो निष्ठा मास्तु ॥ ४७ ॥

स० टी०—नन्वात्मबोधः संपाद्यो यदि निष्कामकर्मभिः ॥ आनन्दाय तदा तत्र यतितव्यं मुमुक्षुभिः॥ १॥ आत्मबोधे किमायासशतैः कर्मभिरेव चेत् ॥ मैवं ह्यशुद्धबुद्धेस्ते बुद्धिशोधककर्माणि ॥ २ ॥ मयेदं कार्यमित्येवास्तु बोधः कर्म कुर्वतः ॥ न च वेदान्तवाक्यानां विचारे तेऽधिकारिता ॥ ३ ॥ कर्मापि कुर्वतः सम्यक्तत्फलेषु स्वरादिषु ॥ कर्मानुष्ठानकाले वा प्रागूर्ध्वं वा कदाचन ॥४ ॥ मयेदमिह भोक्तव्यमिति बोधोऽपि मास्तु ते ॥ ननु मयेदं भोक्तव्यमिति बुद्धिं विनापि तत् ॥ ५ ॥ स्वसामर्थ्यात्फलं कर्म जनयिष्यति चेच्छृणु ॥ फलकामनया कर्म कुर्वन्नुत्पादको भवेत् ॥ ६ ॥ मा कर्मफलहेतुर्भूस्त्वं तु निष्काम एव सन् ॥ निष्कामेन कृतं कर्म कृष्णार्पणधिया स्वयम् ॥ ७ ॥ फलाय कल्पते नैव तथैव त्वं सदा कुरु ॥ फलं चेन्नेष्यते तर्हि किं स्याद्दुःखात्मकर्मणा ॥ ८ ॥ इति बुद्ध्या तव प्रीतिर्मा भूदकरणे कदा ॥ ९ ॥ ४७ ॥

भा० टी०—मम तर्हि क्वाधिकार इत्याकाङ्क्षायामाह—**कर्मणीति** । कर्मण्येव न तु ज्ञाननिष्ठायाम् अन्तःकरणशुद्ध्यभावात् तत्रापि चित्तशुद्धिहेतौ फलाभिसंधिरहिते कर्मणि न तु बन्धनिमित्ते काम्ये इत्याह—**मेति** । कदाचन कस्यांचिदवस्थायामपि कर्मफलतृष्णा ते मास्तु फलतृष्णया काम्ये तेऽधिकारो मास्त्विति यावत् । ननु तृष्णाभावेऽपि भोजनात्तृप्तिरिव कर्मणः फलं स्यादेवेति तत्राह—**मा कर्मेति** । मा कर्मफलेहेतुर्भूः फलतृष्णया तदुत्पादको मा भूः कामनया कृतस्य कर्मणः पश्वादिफलदातृत्वनियमात् । "चित्रया यजेत पशुकामः" इति श्रुतेः । यत्तु 'कर्मफलं प्रवृत्तिहेतुर्यस्य' इति तन्न बहुव्रीह्यपेक्षया तत्पुरुषस्य लघुत्वात् । दुःखरूपेण निष्फलेन कर्मणा किमिति ते कर्माकरणे संग आसक्तिर्मा भूत्॥ ४७ ॥

प० टी०—अथोक्तप्रमेयपर्यवसितमर्थमाह—**कर्मण्येवेति** । तत्त्वज्ञानार्थिनस्ते तवेश्वरकृपया कर्मण्येवाधिकारोऽस्तु परं फलेष्वधिकारो मास्तु । स्वर्गादिफलभोगाधिकारो मास्त्वित्याशीः । तथा त्वमपि कर्मफले हेतुर्मा भूः कर्मफलभोगे हेतुर्निमित्तं मा भव । तव चित्तं कर्मफलसंकल्पोऽपि न स्पृशतु । अथ साक्षात्कर्मणः फलावश्यंभावनियम इति प्रसिद्धे फलं भविष्यत्येव तस्मात्कर्मैव कार्यमित्याशङ्क्याह—**मेति** । तेऽकर्मणि कर्माकरणे संगो निष्ठा मास्तु । स्वतृप्तिमनुद्दिश्येश्वरार्पणत्वेन भोजनसामग्रीसंपादनवत्कर्म कार्यमित्यर्थः ॥ ४७ ॥

रा० टी०—ननु सकामतया कर्म कुर्वतां यामिमामित्यादिनोक्ता निन्दा न युक्ता । "स्वर्गकामो यजेत" इत्यादौ कामनाया अपि विधानात् । नहि विहितकृतां निन्दा युक्ता । न च यागकामनयोर्द्वयोरपि विधौ वाक्यभेदः स्वर्गकामनाविशिष्टयागविध्यभ्युपगमादित्यत आह—**कर्मण्येवेति** । अत्र त इति ज्ञानिभूतसर्ववर्णाश्रमोपलक्षणम् । फलेष्विति पदं फलकामोपलक्षणम् । अयमर्थः । हे पार्थ ते तव त्वादृशस्यान्यस्य ज्ञानिनोपि कर्मण्येवाधिकारो योग्यता । फलेषु स्वर्गादिफलकामनासु मा नाधिकारः । अतः कर्मैव कार्यं विधिविषय इति यावत् । न तु कामना कार्या । कुतः कुर्वन्नेवेति श्रुतौ एवं त्वयीत्युत्तरार्धे कर्माकरणे प्रत्यवाय इव कामनाया अकरणे प्रत्यवायाश्रवणात् । तथा च कामनानुवादेन यागविधिरेवायम् नतु विशिष्टविधि-

रिति भावः । अतः कामनायाः विध्यविषयत्वात् कर्मकृतौ फलं हेतुर्यस्य स कर्मफलहेतुः मा भूरित्यर्थः । शाकपार्थिवादिवत् कृतिपदलोपोत्र ध्येयः । तर्हि स्वयं क्लेशरूपत्वात् कर्म न कार्यमित्यत आह—**मा त इति** । ते तव त्वादृशस्य सर्वस्यापि ज्ञानिनो कर्मणि कर्माकरणे संगः स्नेहो मा भूत् । स्वर्गादिरूपाल्पास्थिरफलाभावेपि अनल्पस्थिरमोक्षरूपमहापुमर्थहेतुभगवज्ज्ञानभक्तिप्रसादानां भावात्तत्कामनया कर्मकरणोपपत्तेर्ज्ञानभक्त्यादिकामनायाश्च निन्दाभावात् । प्रत्युत ‘ वृणीमहे ते परितोषणाय ’ इत्यादिना चतुर्थस्कन्धे प्रचेतसां महतामाचाराच्च । तथाच सूत्रम् “बहिस्तूभयथापि स्मृतेराचाराच्च” इति । न च ज्ञानिनोऽनियमः सर्वेषामित्युक्तदिशा मोक्षस्य सिद्धतया किं कर्मकरणेन साध्यमिति चेन्न । ज्ञाने मोक्षे चातिशयार्थत्वात् । यथोक्तं भावं तु बादरायणोस्ति हीति । यद्वा पूर्वमात्मवानित्यनेनैक्यभावनं न कार्यमित्युक्तम् । तत्कुत इत्यतो जीवब्रह्मैक्यस्यैवाभावादित्यैक्याभावरूपं हेतुमाह—**कर्मण्येवेति** । त इत्युपलक्षणम् । त्वदादिसर्वजीवानां कर्मण्येवाधिकारः । कर्मसंपादन एव सामर्थ्यमित्यर्थः । एवकारव्यवच्छेद्यमाह—**मा फलेष्विति** । फलेषु कदाचनाधिकारो नास्ति । फलसंपादने सामर्थ्यं नास्ति किंत्वीश्वर एव फलदाने समर्थ इति भावः । तदाह सूत्रे “ फलमत उपपत्तेः” इति । एवं च फलसंपादने शक्तत्वाशक्तत्वाभ्यां सर्वजीवानां ईश्वरेणैक्याभावादिति युक्तिरुक्ता भवति । तस्याः प्रतिज्ञामाह—**मा कर्मफलहेतुर्भूरिति** । उक्तदिशा कर्मफलहेतुरीश्वरः मनसा स मा भूः । तदैक्यभावना न कार्येति यावत् । मिथ्योपासनायाः “ न प्रतीकेन हि सः ” इति व्याससूत्रे “ अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्याम् ” इति साङ्कर्षणसूत्रे च निषेधात् । तर्हि सत्त्वस्थ इत्युक्तदिशा नित्यं स्वामित्वेन हरिस्मृत्यैवालं किं कर्मकरणेनेत्यत आह—मा त इति । त्वदादेः सर्वस्य अकर्मणि कर्माकरणे संगः स्नेहो मा भूत् । तदकरणे प्रत्यवायश्रवणादिति भावः ॥ ४७ ॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

त० टी०—तर्हि किं कुर्यामित्यत आह—योगस्थ इति । योगस्थः सन् सङ्गं कर्तृत्वाभिनिवेशं त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वा कर्माणि कुरु । कर्माणीति बहुवचनं नित्यनैमित्तिकयोरेव बहुप्रकाराभिप्रायेण । न च काम्यस्यापि ग्रहणमिति वाच्यं, पूर्वापरविरोधात् । योगशब्दार्थं स्वयमेवाह—समत्वं योग उच्यते इति । सिद्ध्यसिद्ध्योर्यत्समचित्तत्वं स एव योग उच्यते विवेकिभिः ॥ ४८ ॥

म० टी०—पूर्वोक्तमेव विवृणोति—**योगस्थ इति** । हे धनञ्जय ! त्वं योगस्थः सन् सङ्गं फलाभिलाषं कर्तृत्वाभिनिवेशं च त्यक्त्वा कर्माणि कुरु । अत्र बहुवचनात्कर्मण्येवाधिकारस्त इत्यत्र जातावेकवचनम् । सङ्गत्यागोपायमाह—**सिद्ध्यसिद्ध्योरिति** । सिद्ध्यसिद्ध्योः समो भूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा केवलमीश्वराराधनबुद्ध्या कर्माणि कुर्वित्यर्थः । ननु योगशब्देन प्राक्कर्मोक्तमत्र तु योगस्थः कर्माणि कुर्वित्युच्यते अतः कथमेतद्बोद्धुं शक्यमित्यत आह—**समत्वमिति** । समत्वं योग उच्यते यदेतत् सिद्ध्यसिद्ध्योः समत्वमिदमेव योगस्थ इत्यत्र योगशब्देनोच्यते न तु कर्मेति न कोपि विरोध इत्यर्थः । अत्र पूर्वार्धस्योत्तरार्धेन व्याख्यानं क्रियत इत्यपौनरुक्त्यमिति भाष्यकारीयः पन्थाः । सुखदुःखे समे कृत्वेत्यत्र जयाजयसाम्येन युद्धमात्रकर्तव्यता प्रकृतत्वादुक्ता इह तु दृष्टादृष्टसर्वफलपरित्यागेन सर्वकर्मकर्तव्यतेति विशेषः ॥ ४८ ॥

शं० टी०—जन्मादिदुःखानिःशेषनिवृत्त्यपेक्षैव तवास्ति चेत्तर्हि त्वं कर्मैव कुर्वित्युपदिशति—योगस्थ इति ।

निर्दोषं हि समं ब्रह्मेति वक्ष्यमाणं ब्रह्मात्र समशब्देनोच्यते समस्य भावः समत्वं तदेव ज्ञानेन युज्यते प्राप्यत इति योग इत्युच्यते तस्मिन् योगे ब्रह्मणि स्वस्य तद्भावापत्त्यैतदेकापेक्षया तिष्ठतीति योगस्थो मोक्षैककामः सन् त्वं सङ्गमेतैर्मम दुरितक्षयोस्त्विति प्रतिबन्धनिवृत्तिरस्त्विति वा प्रसीदत्वीश्वरो मह्यमिति वा कर्मजन्यं फलं मे भूयादिति वा संगः कामस्तं कर्मसु त्यक्त्वा प्रारब्धस्य कर्मणः साङ्गतासिद्धिस्तदभावोऽसिद्धिः ईश्वरप्रसादप्राप्तिः सिद्धिस्तदप्राप्तिरसिद्धिः चित्तप्रसक्तिः सिद्धिस्तदभावोऽसिद्धिरित्यादिसिद्ध्यसिद्ध्योः समो हर्षविषादशून्यो भूत्वा कर्माणि क्लेशात्मकान्यपि विहितानीति बुद्ध्या कुर्वित्यर्थः ॥ ४८ ॥

श्री० टी०—किं तर्हि—**योगस्थ इति** । योगः परमेश्वरैकपरता तत्र स्थितः कर्माणि कुरु तथा संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु तत्फलस्य ज्ञानस्यापि सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्पणेनैव कुरु । यत एवंभूतं समत्वमेव योग उच्यते सद्भिः । चित्तसमाधानरूपत्वात् ॥ ४८॥

म० टी०—कथं कर्तव्यमिति चेच्छृणु भूत्वा समाहितः ॥ योगस्थः सन्फले कामं कर्तृत्वाभिमतिं तथा ॥ १ ॥ त्यक्त्वा त्वं कुरु कर्माणि कृष्णार्पणधिया सदा ॥ त्यक्त्वा हर्षं फलप्राप्तौ फलासिद्धौ विषादताम् ॥ २ ॥ कोऽसौ योगः स यत्रस्थः कर्म कुर्वन्न दुष्यति ॥ सिद्ध्यसिद्ध्योः समत्वं यत्स योग इह कथ्यते ॥ ३ ॥ ४८ ॥

भा० टी०—एतदेव विवृणोति—**योगस्थ इति** । योगस्थः कर्माणि कुरु केवलमीश्वरार्थम् । ननु 'योगः परमेश्वरैकपरता' इति योगशब्दार्थ आचार्यैः कुतो न प्रदर्शित इति चेत् समत्वं योग उच्यत इति अनेन तदर्थस्य मूल एवोक्तत्वात् । तत्रार्पीश्वरो मे तुष्यत्विति संगं त्यक्त्वा एतद्भाष्यमुपलक्षणं कर्तृत्वाद्यभिनिवेशस्यापि चित्तशुद्धिद्वारा ज्ञानप्राप्तिरूपायां सिद्धौ तद्विपर्ययरूपायामसिद्धौ च समो हर्षविषादशून्यो भूत्वा अयमेव योग इत्याह—समत्वमिति । दिग्विजये महीपाञ्जित्वा धनमाहृत्य राजसूययज्ञे त्वया नियोजितं तथाधुनाप्येतान् सर्वान् जित्वा यज्ञादीन् संपादयितुमर्हसीति द्योतयन्नाह—हे धनञ्जयेति ॥ ४८ ॥

प० टी०—तर्हि कथमित्याह—**योगस्थ इति** । योगः परमेश्वरसांनिध्यं तत्र कृतनिश्चयो योगस्थ एवंविधो भूत्वा कर्माणि कुरु, अत एव धनञ्जय धनं स्वर्गादिसुखं जयति तुच्छत्वेन त्यजति तथाविधस्त्वमसीत्यर्थः । किं कृत्वा संगं त्यक्त्वा कर्तृत्वाभिनिवेशं परित्यज्य । पुनः किं कृत्वा सिद्ध्यसिद्ध्योः समो भूत्वा सिद्धावसिद्धौ वा हर्षविषादरहितो भूत्वा । यतः समत्वं निर्विकारत्वमेव योग इत्युच्यते ॥ ४८ ॥

रा० टी०—मा ते संगोस्त्वकर्मणीत्युक्तं तर्हि किं कार्यमित्यत आह—**योगस्थ इति** । योगो ज्ञानोपायः तत्र तिष्ठतीति योगस्थः । ज्ञानोपायमनुतिष्ठन्संगं फलस्नेहं त्यक्त्वा तत एव फलरागत्यागादेव सिद्ध्यसिद्ध्योः समो भूत्वा कर्माणि कुरु ईश्वरप्रसत्तौ कर्माणि कुर्वित्यर्थः । योगस्थ इत्युक्तयोगः क इत्यतः संगं त्यक्त्वेत्यादिना योगशब्दार्थो व्याख्यातः । तत्र त्यागसमत्वयोः प्रत्येकं योगत्वभ्रान्तिनिरासायाह—**समत्वमिति** । संगत्यागस्याप्युपलक्षणम् । त्यागोपेतं समत्वं योग इत्यर्थः ॥ ४८ ॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ॥
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

त० टी०—ननु फलार्थमपि कर्म कर्तुरभीष्टदानेन श्रेष्ठं प्रतीयते किमर्थमसकृत्तन्निषिध्यत इत्यत आह—दूरेणेति । हे धनञ्जय ! पूर्वमेव धनं जितवानसि नहि ते धनादिफलाकाङ्क्षया स्वधर्मे प्रवृत्तिरिति भावः । व्यवसायात्मिकबुद्ध्याऽनुष्ठितः कर्मयोगो बुद्धियोगस्तस्मात् काम्यं कर्म दूरेणावरम्

अतिनिकृष्टमित्यर्थः। हि यस्मादेवं तस्माद् बुद्धौ शरणं निवासस्थानमाश्रयामिति यावत्। अन्विच्छ तदाश्रितो भवेत्यर्थः। फलहेतवः फलोद्देशेन कर्म कुर्वाणाः कृपणा अतिदीनाः त्वं तु कृपणो मा भवेति भावः ४९

म० टी०—ननु किं कर्मानुष्ठानमेव पुरुषार्थो येन निष्फलमेव सदा कर्तव्यमित्युच्यते। 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते' इति न्यायात् तद्वरं फलकामनयैव कर्मानुष्ठानमिति चेन्नेत्याह—दूरेणेति। बुद्धियोगात् आत्मबुद्धिसाधनभूतान्निष्कामकर्मयोगात् दूरेणातिविप्रकर्षेणावरमधमं कर्म फलाभिसन्धिना क्रियमाणं जन्ममरणहेतुभूतम्। अथवा परमात्मबुद्धियोगाद्दूरेणावरं सर्वमपि कर्म हि यस्मात् हे धनंजय! तस्मात् बुद्धौ परमात्मबुद्धौ सर्वानर्थनिवर्तकायां शरणं प्रतिबन्धकपापक्षयेण रक्षकं निष्कामकर्मयोगमन्विच्छ कर्तुमिच्छ। ये तु फलहेतवः फलकामाः अवरं कर्म कुर्वन्ति ते कृपणाः सर्वदा जन्ममरणादिघटीयन्त्रभ्रमणेन परवशाः अत्यन्तदीना इत्यर्थः। "यो वा एतदक्षरं गार्ग्यविदित्वा अस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः। तथा च त्वमपि कृपणो मा भूः किन्तु सर्वानर्थनिवर्तकात्मज्ञानोत्पादकं निष्कामकर्मयोगमेवानुतिष्ठेत्यभिप्रायः। यथाहि कृपणा जनाः अतिदुःखेन धनमर्जयन्तो यत्किंचिद्दृष्टसुखमात्रलोभेन दानादिजनितं महत्सुखमनुभवितुं न शक्नुवन्तीत्यात्मानमेव वञ्चयन्ति। तथा महता दुःखेन कर्माणि कुर्वाणाः क्षुद्रफलमात्रलोभेन परमानन्दानुभवेन वञ्चिता इत्यहो दौर्भाग्यं मौढ्यं च तेषामिति कृपणपदेन ध्वनितम्॥ ४९॥

शं० टी०—मोक्षेच्छयैव फलानपेक्षया समबुद्ध्या च कर्माणि नित्यानि नैमित्तिकानि च कुर्वतश्चित्तशुद्धिर्यदा जायते कर्मभिस्तत्फलैश्च भोग्यैर्न किमप्यस्ति तुच्छैरित्यलंबुद्धिलक्षणा तदा निकृष्टफलदे कर्मण्यनास्थया ज्ञानयोग एवादर्तव्य इति बोधयति—दूरेणेति। बहुसाधनसाध्यत्वात्क्लेशभूयिष्ठत्वादसाङ्गत्वे फलवैगुण्यात्साङ्गत्वे च जन्मादिदुःखबीजत्वादकरणे प्रत्यवायजनकतया निरयहेतुत्वाच्च अवरं निकृष्टं कर्म नित्यनिरतिशयमोक्षसुखहेतोर्बुद्धियोगाज्ज्ञानयोगाद्दूरेण वर्तते "दूरमेते विपरीते विषूची अविद्या या च विद्या" इति श्रवणाद्विपरीतभावहेतुतया मोक्षहेतोर्ज्ञानयोगस्य दूरमेव भवति "अष्टादशोक्तमवरं येषु कर्म" इतिश्रुत्योक्तमवरत्वं कर्मणो हिशब्दोद्योतयत्यतः कर्म नास्थेयमिति भावः। ननु बहवः कर्मयोगमेवानुतिष्ठन्ति कथं कर्मावरमित्यत आह—कृपणा इति। कर्मजन्यफलस्य स्वर्गस्य सुखस्य वाप्यैहिकस्य हेतवः कर्मफलहेतवः कर्मफलप्रार्थिनः कामिनो ये त एव कृपणा अधमा नीचाः "यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः" इति श्रुतिर्विशिष्टजन्मकर्मशीलगुणवतोऽप्यजानत एव ब्रह्मतत्त्वं कर्मिणोऽधमत्वं ब्रवीति "एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरा मृत्युं ते पुनरेवापि यन्ति। यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते" इति कर्मिणां कर्मफलमोहितानां ब्रवीति श्रुतिरनर्थमेव। "अतो धीरा अमृतत्त्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य। ज्ञानादेव तु कैवल्यम्। ययाचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषमुपैति विद्वान्" इत्यादिश्रुतिभिर्विवेकवतां भोग्येष्वप्रार्थ्यत्वं मोक्षस्यैव प्रार्थ्यत्वं विद्यैकगम्यत्वं च प्रतिपाद्यते यस्मात्तस्माद्धनञ्जय बुद्धौ सांख्यबुद्धौ चित्तप्रसादासादितज्ञानयोग एव शरणं वासं मनसोऽन्विच्छ तत्रैव मनः स्थापय तव चित्तं यदा प्रसीदति तदारभ्य ज्ञानयोग एव तिष्ठ। अवरत्वादसाधनत्वादनात्मन्यात्मताधीहेतुत्वाच्च न कचित्कर्मणि तिष्ठेत्यर्थः। एतेन यावच्चित्तप्रसादस्तावदेव कर्मसाधनं मुमुक्षोरतः परं ज्ञानयोग एवेति सूचितम्। तेन यावज्जीवमग्निहोत्रमपक्वबुद्धेरेवेति सिद्धम्॥ ४९॥

श्री० टी०—काम्यं तु कर्मातिनिकृष्टमित्याह—दूरेणेति। बुद्ध्या व्यवसायात्मिकया कृतः कर्मयोगो बुद्धियोगः बुद्धिसाधनभूतो वा तस्मात्सकाशात् अन्यत् काम्यं कर्म दूरेणावरमत्यन्तमपकृष्टम्। हि

यस्मादेवं तस्माद् बुद्धौ ज्ञाने शरणमाश्रयं कर्मयोगमन्विच्छ अनुतिष्ठ । यद्वा बुद्धौ शरणं त्रातारमीश्वरमाश्रयेत्यर्थः । फलहेतवस्तु सकामा नराः कृपणाः दीनाः "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः ॥ ४९ ॥

स० टी०—ननु निष्कामकर्माणि कर्तव्यानि कुतो मम ॥ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ॥ १ ॥ इतिन्यायाद्दूरं कर्मानुष्ठानं फलवाञ्छया ॥ किमर्थं निष्फलं कर्म कर्तव्यमिति चेच्छृणु ॥ २ ॥ फलकामनया कर्म कृतं जन्मादिहेतुकम् ॥ निकृष्टं तत्त्वविज्ञानहेतोर्निष्कामकर्मणः ॥ ३ ॥ यद्वात्मबुद्धियोगात्तत्कर्म दूरं यतोऽखिलम् ॥ निकृष्टं किं पुनर्वाच्यं नैकृष्ट्यं काम्यकर्मणः ॥ ४ ॥ सर्वानर्थनिवर्तिन्यां बुद्धौ तस्माद्धनञ्जय ॥ प्रतिबन्धकपापस्य क्षयेण परिरक्षकम् ॥ ५ ॥ निष्कामकर्मयोगं त्वं कर्तुमिच्छ स्थिरो भव ॥ फलकामनया कर्म ये कुर्वन्त्यविचक्षणाः ॥ ६ ॥ कृपणास्ते सदा जन्ममृत्युग्रस्ता भवन्ति ते ॥ यथातिकृपणा लोके दुःखेनाप्यर्जितं धनम् ॥ ७ ॥ दानादिजनितं भोगं कर्तुं शक्ता भवन्ति न ॥ तथात्यन्तप्रयत्नेन कुर्वाणाः कर्म वैदिकम् ॥ ८ ॥ क्षुद्रानन्दाभिलाषेण वञ्चिताः कृपणाः सुखात् ॥ अहो दौर्भाग्यमेतेषां मौढ्यं चेत्याशयो हरेः ॥ ९ ॥ ४९ ॥

भा० टी०—काम्यं त्वतिनिकृष्टमित्याह—दूरेणेति । दूरेण विप्रकर्षेणावरमधमफलाभिसन्धिनानुष्ठीयमानं कर्म बुद्धियोगात्समत्वबुद्धियुक्तादीश्वराराधनार्थात्कर्मणः जन्मादिहेतुत्वाद्बुद्धियोगात् आत्मबुद्धिसाधनभूतात् समत्वलक्षणाद्योगादिति वाऽर्थः । यत एवमतो बुद्धौ समत्वबुद्धिं साङ्ख्यबुद्धिं वा शरणमाश्रयमभयप्राप्तेः परम्परया साक्षाद्वा कारणमन्विच्छ प्रार्थयस्व शरणो भवेत्यर्थः । बुद्धौ शरणं त्रातारमीश्वरमित्यर्थस्त्वप्रक्रान्तार्थकल्पनाया विशेष्याध्याहारेण च ग्रस्तोऽत आचार्यैर्न प्रदर्शितः यतः कारणादवरं कर्म कुर्वाणाः दीना यतः फलहेतवः फलतृष्णायुक्ताः "यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः" इति श्रुतेः । धनं त्वया हृतं तेन युधिष्ठिरेण स्वाराज्यकामनया राजसूयकर्मानुष्ठितं तस्य फलं भवद्भिः पूर्वमनुभूतमधुना चोपस्थितमतः काम्यं कर्मात्यधममिति सूचयन्संबोधयति—धनञ्जयेति ॥ ४९ ॥

प० टी०—अत एव ज्ञानयोगं प्रशंसन्नाह—दूरेणेति । भो धनञ्जय बुद्धियोगात्सकाशात्फलोद्देशेन कृतं कर्म दूरेणात्यन्तमवरमपकृष्टं तथा च चित्तशुद्धिद्वारा ज्ञानयोगमुद्दिश्यैव कर्म कर्तव्यम् । तस्मात्त्वं बुद्धौ ज्ञाने शरणं कर्मयोगमन्विच्छाश्रयेत्यर्थः । हि यस्मात्कारणात्फलहेतवः कर्मकरणे फलमेव हेतुः कारणमिति मन्वानाः पुरुषाः कृपणा विषयसुखलम्पटाः । यद्वा फलव्यतिरेकेण निरर्थकं कर्मार्थे धनव्ययः कथं कर्तव्य इति तेषां कार्पण्यम् । श्रुतिरपि—"यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वा प्रैति स ब्राह्मणः" इति । भाष्यम्—"भो गार्गि वाचक्नवि यः पुरुष एतदक्षरं परं ब्रह्माविदित्वाज्ञात्वा फलोद्देशेन कर्म कृत्वास्मान्मनुष्यलोकाल्लोकान्तरं प्रैति मृत्वा गच्छति स कृपणः स्वर्विषयभोगेच्छुः । तथैतदक्षरं विदित्वा प्रैति स ब्राह्मणो ब्रह्मरूपो भवति" ॥ ४९ ॥

रा० टी०—किंच कर्मफलस्य ज्ञानफलादल्पत्वाज्ज्ञानोपायानुष्ठानाय प्रयतस्वेति यावानर्थ इत्यत्रोक्तेर्थे कर्मरूपस्य पुमर्थोपायस्य ज्ञानरूपोपायादधमत्वरूपं हेत्वन्तरमुच्यते—दूरेणेति । बुद्धियोगाज्ज्ञानलक्षणपुमर्थसाधनात्कर्म दूरेणातीवावरमधममतो बुद्धौ ज्ञाने शरणमन्विच्छ ज्ञानस्योपायभूतयोगानुष्ठानलक्षणां ज्ञाने स्थितिम् अन्विच्छेत्यर्थः । कथं कर्म ज्ञानादवरमित्यत आह—कृपणा इति । फले कर्मकृतौ हेतुर्येषां ते फलहेतवः । ते कृपणाः दीनाः इमं लोकं हीनतरं लोकं वा विशन्तीत्यर्थः । यद्वोत्तरार्धस्यैवमर्थः । ज्ञानस्य कर्मत उत्तमत्वे सति उत्तमायां ज्ञानावस्थायामीश्वरैक्यभावनं युक्तमित्यत आह—बुद्धाविति । बुद्धौ ज्ञाने जातेपि

विष्णुमेव शरणमन्विच्छ । कुतः फलहेतवः फलहेतुरीश्वरः फलहेतवः ईश्वरैक्यभाविनो ये ते कृपणाः कृपाविषयाः । तमःप्राप्तिमन्त इत्यर्थः ॥ ४९ ॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ॥
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

त० टी०—काम्यकर्मणि दोषं प्रदर्श्य बुद्धियोगे गुणं दर्शयति—बुद्धीति । बुद्धियुक्तः पुरुष इह कर्मभूमौ उभे सुकृतदुष्कृते पुण्यपापे जहाति । तस्माद्योगायोक्तबुद्धियोगाय युज्यस्व प्रवृत्तो भव । कर्मसु वर्तमानस्य पुरुषस्य योगः समत्वं कौशलं यद्बन्धनहेतूनां कर्मणां मोक्षहेतुत्वापादनमिति महत्कुशलत्वमित्यर्थः ॥ ५० ॥

म० टी०—एवं बुद्धियोगाभावे दोषमुक्त्वा तद्भावे गुणमाह—**बुद्धियुक्त इति** । इह कर्मसु बुद्धियुक्तः समत्वबुद्ध्या युक्तो जहाति परित्यजति उभे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यस्मादेवं तस्मात्समत्वबुद्धियोगाय त्वं युज्यस्व घटस्व उद्युक्तो भव यस्मादीदृशः समत्वबुद्धियोग ईश्वरार्पितचेतसः कर्मसु प्रवर्तमानस्य कौशलं कुशलभावः यद्बन्धहेतूनामपि कर्मणां तदभावो मोक्षपर्यवसायित्वं च तन्महत्कौशलं समत्वबुद्धियुक्तः कर्मयोगः कर्मात्मापि सन् दुष्कर्मक्षयं करोतीति महाकुशलस्त्वं तु न कुशलो यतश्चेतनोपि सजातीयतद्दुष्टक्षयं न करोषीति व्यतिरेकोऽत्र ध्वनितः । अथवा इह समत्वबुद्धियुक्ते कर्मणि कृते सति सत्त्वशुद्धिद्वारेण बुद्धियुक्तः परमात्मसाक्षात्कारवान्सन् जहात्युभे सुकृतदुष्कृते तस्मात्समत्वबुद्धियुक्ताय कर्मयोगाय युज्यस्व । यस्मात् कर्मसु मध्ये समत्वबुद्धियुक्तः कर्मयोगः कौशलं कुशलः दुष्टकर्मनिवारणचतुर इत्यर्थः ॥ ५० ॥

शं० टी०—मुमुक्षोर्जन्मादिहेतूनां सर्वेषामपि कर्मणां निःशेषनिवृत्तिर्ज्ञानयोगबलेनैव सिध्यति नान्येनातस्त्वं तत्रैव निष्ठां कुर्विति बोधयति—**बुद्धियुक्त इति** । बुद्धिः साङ्ख्यविषया निरुक्ता तया युक्तः ज्ञानयोगेन युक्तो ब्रह्मविदारूढः स्वस्य कूटस्थासङ्गचिदात्मत्वविज्ञानबलेनैव इह लोके जन्मान्तरशतसहस्रेष्वधुना ज्ञानोत्पत्तेः प्रागूर्ध्वं च कृते नानायोनिसहस्रप्रापके उभे सुकृतदुष्कृते जहाति ज्ञानाग्निना निर्मूल्यात्र जीवन्नेव मुक्तो भवति यस्मात्तस्मात्त्वं योगाय ज्ञानयोगाय युज्यस्व यतस्व । ननु कृच्छ्रचान्द्रायणादिप्रायश्चित्तैस्त्रिसुपर्णादिजपैरश्वमेधादियागैर्गङ्गादिमहानदीस्नानदानैश्च सर्वपापक्षये सति किमर्थं ज्ञानयोगाभ्यासक्लेश इति चेत् न तैर्निःशेषनिवृत्त्यसंभवादुक्ताः प्रायश्चित्तादयो यदुद्देशेन क्रियन्ते तैस्तदेव निवर्त्यते नेतरदन्यथा प्रायश्चित्तभेदविध्यानर्थक्यप्रसङ्गात् " तरति ब्रह्महत्यां योऽश्वमेधेन यजते " इति ब्रह्महत्यान्यतिरिक्तपापतरणाश्रवणात्कृतेऽपि प्रायश्चित्तादौ पापस्यैव निवृत्तिर्न तु पुण्यस्य शतकोटिजन्महेतोः नहि पुण्यस्य निवर्तकमस्ति महत्साधनं विनात्मज्ञानं तदा विद्वान् पुण्यपापे विधूयेति " स य एवं विद्वानेते आत्मान ँ स्पृणुते" इति श्रुतावत्रैवास्ति उभे सुकृतदुष्कृते इत्यतः पापपुण्योभयात्मकेषु कर्मसु निवर्तितव्येषु सत्सु योगो ज्ञानयोग एव कौशलं कुशलमेव कौशलं निपुणं ज्ञानकुशलैर्दृष्टं परमं साधनं तस्माद्योगाय युज्यस्वेति पूर्वेणान्वयः । जहातीहेत्यत्रासन्धिरार्षः ॥ ५० ॥

श्री० टी०—बुद्धियोगयुक्तस्तु श्रेष्ठ इत्याह—बुद्धीति । सुकृतं स्वर्गादिप्रापकं दुष्कृतं निरयादिप्रापकं ते उभे इहैव जन्मनि परमेश्वरप्रसादेन जहाति त्यजति तस्माद्योगाय तदर्थाय कर्मयोगाय युज्यस्व घटस्व यतः कर्मसु यत्कौशलं बन्धकानामपि तेषामीश्वराराधनेन मोक्षपरत्वसंपादनचातुर्यं स एव योगः ॥ ५० ॥

स० टी०—समत्वबुद्धियुक्तः सन्स्वधर्ममनुतिष्ठति ।। पुमांस्तस्य फलं यत्स्यात्तदत्र हरिणोच्यते ।। १ ।। समत्वप्रज्ञया युक्तः सत्वशुद्ध्यात्मबोधतः ।। जहाति पुण्यपापे द्वे समूले सफले कृते ।। २ ।। जीवन्नेव पुमान्ब्रह्मीभूतो भवति बोधवान् ।। यस्मादेवं ततः सम्यग्बुद्धियोगाय सर्वथा ।। ३ ।। उद्युक्तो भव योगोऽसौ वर्तमानस्य कर्मसु ।। मोक्षपर्यवसायित्वादतिदक्षो यतो मतः ।। ४ ।। ५० ।।

भा० टी०—काम्यकर्मणोऽवरत्वमुक्त्वा निष्कामकर्मणः श्रैष्ठ्यमाह—**बुद्धियुक्त इति** । समत्वबुद्धियुक्तः सत्वशुद्धिज्ञानप्राप्तिद्वारेणोभे पुण्यपापे त्यजति सांख्यबुद्धियुक्त इति वा तस्माद्योगाय समत्वलक्षणकर्मयोगानुष्ठानार्थं घटस्व ज्ञानयोगप्राप्त्यर्थमिति वा यस्माद्योगः समत्वलक्षणः कर्मसु सर्वेषु कौशलं बन्धकानामपि तेषामीश्वरार्पितचेतस्तया मोक्षपरत्वसंपादनचातुर्यं ज्ञानयोग इति वा अस्मिन्पक्षे कर्मसु ज्ञानप्रतिबन्धकेषु फलाभिसन्धि विहाय ज्ञानलाभचातुर्यमिति व्याख्येयं तस्मात्समत्वयुक्तो भवेत्यर्थः ।। ५० ।।

प० टी०—अथ ज्ञानं प्रशंसन्नाह—**बुद्धियुक्त इति** । बुद्धिर्विज्ञानं तद्युक्तो ज्ञानी पुरुषः स्वर्गप्रापकं तथा दुष्कृतमधमयोनिप्रापकं ते उभे जहाति त्यजति । श्रुतिरपि—"पापमकरवमित्यतः कल्याणमकरवमित्युभे उभे एष एते तरत्यमृतः साध्वसाधुनी नैनं कृताकृते तपतः" इति । भाष्यम्—"अतो ज्ञानोत्पत्त्यनन्तरमहं पापमकरवमकार्यमिति तथा कल्याणं सुकृतमकरवमित्येते उभे साध्वसाधुनी सुकृतदुष्कृते अमृतो मुक्तः संस्तरति उल्लङ्घयति तथैवं तत्त्वज्ञानिनं पुरुषं कृताकृते कृते वा साध्वसाधुनी न तपतः नाक्रामतः न स्वाधीनं कुरुतोऽनुष्ठितेऽननुष्ठिते फलदानाय समर्थे न भवत इत्यर्थः । " तस्मात्त्वं योगाय परमेश्वरप्राप्तये युज्यस्व घटस्व । अथ योगस्य स्वरूपमाह—**योगेति**। योगः कर्मसु कौशलं बन्धजनकेषु कर्मस्वबन्धजनकत्वसंपादकत्वं कौशलम् ।। ५० ।।

रा० टी०—ज्ञानात्कर्मावरमित्येतत्काम्यकर्मिणां कृपणत्वोक्त्योपपाद्येदानीं कर्मफलाज्ज्ञानफलस्य विलक्षणत्वोक्त्याप्युपपादयति—**बुद्धियुक्त इति** । बुद्धियुक्तो भगवज्ज्ञानयुक्तः उभे सुकृतदुष्कृते पुण्यपापे जहाति त्यजति । पुण्यमध्ये यदनिष्टं मानुष्यादिफ (लकं) लं तज्जहाति । यत्तूपासनादिजन्यं ज्ञानवृद्धिकरं मुक्तावानन्दकरं च तत्पुण्यं नैव जहाति। दुष्कृतं तु सर्वात्मना जहाति । तस्माज्ज्ञानस्य सर्वानिष्टनिवृत्तिविशिष्टोभयवृद्धिरूपमहाफलत्वात् । योगाय ज्ञानोपायाय युज्यस्व सन्नद्धो भव प्रयतस्वेति वा । योगं स्तौति—**योग इति** । योगो ज्ञानोपायः कर्मसु कौशलं श्रेष्ठमित्यर्थः । यद्वा अस्तु ज्ञानोपायाय प्रयत्नः । किंफलस्नेहरहितकर्मणेत्यत आह—**योग इति** । कर्मसु मध्ये भगवज्ज्ञानपूर्वं फलस्नेहरहितं भगवदर्थत्वेन क्रियमाणं कर्मकौशलमुच्यते । स एव च योगो नाम । अतः फलस्नेहहीनं कर्मैव ज्ञानोपाय इत्यर्थः ।। ५० ।।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ।। ५१ ।।

त० टी०—ननु दुष्कृतत्यागे भवति कौशलं सुकृतं तु किमर्थं त्याज्यमित्यत आह—**कर्मजमिति**। उक्तबुद्ध्या युक्ता मनीषिणः बन्धमोक्षहेतुमननशीलाः हि यतः कर्मजं फलं सुखदुःखात्मकमुभयविधमपि बन्धनरूपं मत्वा न केवलं दुष्कृतफलमपि तु जन्मापादकं सुकृतफलमपि त्यक्त्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धस्तस्माद्विनिर्मुक्ताः सन्तः अनामयमामयो मायाकार्यस्वभावः परिणामापक्षयादिरूपो रोगस्तद्रहितं पदमुपनिषत्प्रतिपाद्यं परवैकुण्ठाख्यं स्थानं गच्छन्ति । तस्मात्तुच्छफलं सुकृतमप्यनन्तफलाय त्याज्यमिति भावः ।। ५१ ।।

म० टी०—ननु दुष्कृतहानमपेक्षितं न तु सुकृतहानं पुरुषार्थभ्रंशापत्तेरित्याशङ्क्य तुच्छफलत्यागेन पर-

मपुरुषार्थप्राप्तिं फलमाह—कर्मजमिति । समत्वबुद्धियुक्ता हि यस्मात्कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्माणि कुर्वाणाः सत्वशुद्धिद्वारेण मनीषिणस्तत्त्वमस्यादिवाक्यजन्यात्ममनीषावन्तो भवन्ति तादृशाश्च सन्तो जन्मात्मकेन बन्धेन विनिर्मुक्ता विशेषेणात्यन्तिकत्वलक्षणेन निरवशेषं मुक्ताः पदं पदनीयमात्मतत्त्वमानन्दरूपं ब्रह्म अनामयं अविद्यातत्कार्यात्मकरोगरहितमभयं मोक्षाख्यं पुरुषार्थं गच्छन्त्यभेदेन प्राप्नुवन्तीत्यर्थः । यस्मादेवं फलकामनां त्यक्त्वा समत्वबुद्ध्या कर्माण्यनुतिष्ठन्तस्तैः कृतान्तःकरणशुद्धयस्तत्त्वमस्यादिप्रमाणोत्पन्नात्मतत्त्वज्ञानाविनष्टाज्ञानतत्कार्याः सन्तः सकलानर्थनिवृत्तिपरमानन्दप्राप्तिरूपं मोक्षाख्यं विष्णोः परमं पदं गच्छन्ति । तस्मात्त्वमपि 'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इत्युक्तेः श्रेयोजिज्ञासुरेवंविधं कर्मयोगमनुतिष्ठेति भगवतोऽभिप्रायः ॥ ५१ ॥

शं० टी०—फलानपेक्षया समबुद्ध्या च सम्यगनुष्ठितनित्यनैमित्तिककर्मपरिपाकसंजातचित्तशुद्धेः फलभूतायाः श्रवणादिजनिताऽविक्रियाऽत्मतत्त्वविज्ञानसिद्धेः फलमाह—**कर्मजमिति** । बुद्धियुक्ताः बुद्धिः सांख्यबुद्धिर्ब्रह्मात्मैकत्वविज्ञानं तया युक्तास्तन्निष्ठासंपन्ना हि ज्ञानयोगनिष्ठाः खलु मनीषिणो विद्वांसः कर्मजं कर्मभ्यः संचितादिभ्यो जातं नानायोनिसहस्रप्रापकं फलं जन्मादिलक्षणं त्यक्त्वा 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन ज्ञानाग्निना सर्वेषामपि कर्मणां दाहे सति तत्फलानां च जन्मादीनां दाहसंभवात्तेन त्यक्तकर्मफला भवन्ति । आत्मनः कूटस्थत्वासङ्गत्वविज्ञानशक्तिबलेन विद्वांसः स्वयं कर्मफलाऽविषयाभूत्वेत्यर्थः । जन्मबन्धविनिर्मुक्ताः जन्मना बन्धः संबन्धो यस्य स जन्मबन्धो देह उत्तरकालभावी वर्तमानश्च तेन विनिर्मुक्ताः । कारणाभावाद्भाविदेहसंबन्धरहितास्तादात्म्याभावाद्वर्तमानदेहसंबन्धरहिताश्च सन्तः स्वयमिह जीवन्त एवाऽनामयमाध्यात्मिकादिसर्वोपद्रवरहितं नित्यशुद्धबुद्धमुक्तस्वभावमखण्डानन्दैकरसं पदं पद्यते ज्ञानेन प्राप्यत इति पदं परं ब्रह्म गच्छन्ति । अविद्याकृतं वासनाकृतमप्यन्यभावं परित्यज्य तद्भावमेव प्राप्नुवन्तीत्यर्थः । हिर्विद्वदनुभवद्योतनार्थः ॥ ५१ ॥

श्री० टी०—कर्मणां मोक्षसाधनत्वप्रकारमाह—**कर्मेति** । कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थमेव कर्म कुर्वाणा मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बन्धेन विनिर्मुक्ताः सन्तोऽनामयं सर्वोपद्रवरहितं विष्णोः पदं मोक्षाख्यं गच्छन्ति ॥ ५१ ॥

स० टी०—ननु सर्वस्य मम च पापहानमपेक्षितम् ॥ पुण्यहानं न कस्यापि पुरुषार्थक्षयोऽन्यथा ॥१॥ मैवं जन्मप्रदं पुण्यं हेयत्वेन विवक्षितम् ॥ नतु धीशोधकं पुण्यं मुमुक्षोरीश्वरार्पितम् ॥ २ ॥ तत्फलज्ञानसंसिद्धौ कर्ममात्रं विनश्यति ॥ अतः समत्वधीयुक्ताः संत्यक्त्वा कर्मजं फलम् ॥ ३ ॥ ईश्वराराधनार्थं च कुर्वाणाः कर्म केवलम् ॥ धीशुद्धिद्वारतो वेदवाक्यजन्यात्मधीयुताः ॥ ४ ॥ सन्तो जन्माख्यबन्धेन विनिर्मुक्ता अशेषतः ॥ आत्मतत्त्वं पदं ब्रह्मानन्दं मायादिवर्जितम् ॥ ५ ॥ पुरुषार्थं विमोक्षाख्यं प्राप्नुवन्तीह तादृशाः ॥ त्वमप्येतादृशो भूत्वा गच्छ विष्णोः परं पदम् ॥ ६ ॥ ५१ ॥

भा० टी०—पुण्यपापत्यागमात्रस्य फलत्वाभावमाशङ्क्याह—**कर्मजमिति** । कर्मजं फलमिष्टानिष्टदेहप्राप्तिलक्षणं त्यक्त्वा हि यस्मात् समत्वबुद्धियुक्ता मनीषिणो ज्ञानिनो भूत्वा जन्मैव बन्धस्तेन विनिर्मुक्ताः सर्वोपद्रवरहितं विष्णोः परमं मोक्षाख्यं पदं गच्छन्ति जीवन्त एव स्वस्वरूपेण जानन्तीत्यर्थः । कर्मजं फलं त्यक्त्वा साङ्ख्यबुद्धियुक्ताः शुद्धैकाग्रमनस इति वा ॥ ५१ ॥

प० टी०—अथ कौशलेन कृतानां कर्मणां मोक्षसाधनत्वमाह—**कर्मजमिति** । व्यवसायात्मकबुद्धियुक्ता मनीषिणो ज्ञानिनः कर्मजं फलं त्यक्त्वा तृणवदगणय्यानामयं सर्वोपद्रवरहितं पदं गच्छन्ति । किंभूताः जन्मबन्धविनिर्मुक्ताः कर्मजफले हि पुनर्जन्मबन्धो दृश्यते तस्माद्विशेषेण निर्मुक्ताः ॥ ५१ ॥

रा० टी०—पूर्वोक्तं ज्ञानसाधनं ज्ञानफलं च विवृणोति—कर्मजमिति । कर्मजं फलं त्यक्त्वेत्युपलक्षणम् । कर्मजफलसंकल्पत्यागादिपूर्वकं भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपं योगमास्थाय बुद्धियुक्ताः सम्यक्शास्त्रजनितभगवज्ज्ञानिन इत्यनेन ज्ञानसाधनं योगो विवृतः । ततश्च मनीषिणः प्रशंसायां मतुबर्थेनिप्रत्ययः । अपरोक्षज्ञानिनो भूत्वा जन्मबन्धविनिर्मुक्ताः सन्तोऽनामयं निर्दुःखं पदं मोक्षं गच्छन्तीत्युक्त्या ज्ञानफलं विवृतं ज्ञेयम् ॥ ५१ ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

त० टी०—कर्माणि कुर्वतो ममाप्येवम्भूतो निर्वेदः कदा भविष्यतीत्यपेक्षायामाह—यदेति । नास्ति कालनियमः किन्तु यदा यस्मिन्काले ते बुद्धिर्मोहकलिलं मोहो मन्निमित्तमेते मरिष्यन्ति अहं पापभागी स्यामित्याद्यन्तःकरणविभ्रम एव कलिलं गहनकर्दमं व्यतितरिष्यति विशेषेणोल्लङ्घ्य गमिष्यति तदा श्रोतव्यस्य श्रोतुं योग्यस्य श्रुतस्य च कर्मफलस्य निर्वेदं वैराग्यं गन्तासि गमिष्यसि प्राप्स्यसि । पुनस्तज्जिज्ञासां न करिष्यसीति भावः ॥ ५२ ॥

म० टी०—एवं कर्माण्यनुतिष्ठतः कदा मे सत्त्वशुद्धिः स्यादित्यत आह—यदेति । न ह्येतावता कालेन सत्त्वशुद्धिर्भवतीति कालनियमोऽस्ति किंतु यस्मिन् काले ते तव बुद्धिरन्तःकरणं मोहकलिलं व्यतितरिष्यति अविवेकात्मकं कालुष्यं अहमिदं ममेदमित्याद्यज्ञानविलसितमतिगहनं व्यतिक्रमिष्यति रजस्तमोमलमपहाय शुद्धभावमापत्स्यत इति यावत् । तदा तस्मिन् काले श्रोतव्यस्य श्रुतस्य च कर्मफलस्य निर्वेदं वैतृष्ण्यं गन्तासि प्राप्तासि (प्राप्नोषि) " परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् " इति श्रुतेः निर्वेदेन फलेनान्तःकरणशुद्धिं ज्ञास्यसीत्यभिप्रायः ॥ ५२ ॥

शं० टी०—चित्तशुद्धिजन्यं सर्वत्रालंबुद्धिलक्षणं वैराग्यं प्रज्ञास्थैर्यलक्षणं योगं च कदा केन वा प्राप्स्यामीत्यभिप्रायमर्जुनस्यालक्ष्य यदा तव बुद्धिकालुष्यनिवृत्तिर्यदा वा प्रज्ञा निर्विकल्पा भविष्यति तदा वैराग्यं योगं च प्राप्स्यसीत्येतद्द्वयं श्लोकद्वयेन क्रमेण प्रतिपादयति—यदेति । सदसद्विवेकशून्यतयान्तःकरणमसत्स्वेव विषयेषु रम्यमरम्यमिष्टमनिष्टं ग्राह्यमग्राह्यमिति येन रागद्वेषग्रस्तं सत्सर्वदा प्रवर्तते तदेव मोहकलिलं मोहो विचित्तताविषयजातमेतत्सर्वमसन्मायिकं तुच्छमिति विवेकाभावः पदार्थाऽपरिज्ञानं तदेव कलिलं कालुष्यं दर्पणस्य धूलिपटलवद्विवेकबुद्धेरावरणमेवंलक्षणं मोहकलिलं ते बुद्धिर्यदा व्यतितरिष्यति । ' यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः । नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ' इत्यादिवचनार्थस्य सम्यग्ग्रहणजन्येन शिवप्रसादमूलकेन दृश्यमानं सर्वं मिथ्यैवेति निश्चयेन यदा त्यक्ष्यति तदा श्रोतव्यस्य श्रुतस्य च द्रष्टव्यस्य दृष्टस्य च ज्ञातव्यस्य ज्ञातस्य च गृहीतस्य ग्राह्यस्य च वस्तुनो मिथ्यात्वमेव विज्ञाय निर्वेदं वैराग्यं सर्वत्रालंबुद्धिलक्षणं गन्तासि प्राप्स्यसि। व्यवहार्यस्य मिथ्यात्वाद्व्यवहारस्य मिथ्यार्थगोचरत्वान्निष्फलेनानेन मम किमिति सर्वस्माद्व्यवहार्याद्व्यवहाराच्चोपरतो भविष्यसीत्यर्थः ॥ ५२ ॥

श्री० टी०—कदा तत्पदमहं प्राप्स्यामीत्यपेक्षायामाह—यदेति द्वाभ्याम् । मोहो देहादिष्वात्मबुद्धिः तदेव कलिलम् । 'कलिलं गहनं विदुः' इत्यभिधानकोशस्मृतेः। ततश्चायमर्थः एवं परमेश्वराराधने क्रियमाणे यदा तत्प्रसादेन तव बुद्धिः देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषेणातितरिष्यति तदा श्रोतव्यस्य श्रुतस्यार्थस्य च निर्वेदं वैराग्यं गन्तासि प्राप्स्यसि तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः॥५२॥

स० टी०—एवं मे कुर्वतः कर्म चित्तशुद्धिः कदेति चेत्॥ न कालनियमस्तत्र शृणु त्वं भोः समाहितः॥ १॥

यस्मिन्कालेऽतिकालुष्यमविवेकात्मकं मलम् ॥ अहं ममेदमित्येवमाद्यविद्याविजृम्भणम् ॥ २ ॥ अत्यन्तगहनं तीर्त्वा तवान्तःकरणं पराम् ॥ शुद्धिमापत्स्यते त्यक्त्वा राजसं तामसं मलम् ॥ ३ ॥ तस्मिन्काले समस्तस्य श्रोतव्यस्य श्रुतस्य च ॥ फलस्य कर्मणां सम्यग्वैतृष्ण्यं यास्यसि स्वयम् ॥ ४ ॥ त्वं निर्वेदफलेनैव धीशुद्धिं ज्ञास्यसीति च ॥ ५ ॥ ५२ ॥

भा० टी०—सांख्यं बुद्धिं कदा प्राप्स्यामि यदर्थं कर्मानुष्ठानं भवतोपदिश्यत इत्यत आह—यदेति । यदा यस्यामवस्थायां तव बुद्धिर्मोहात्मकमविवेकरूपं कालुष्यं व्यतिक्रमिष्यति तदा तस्यामवस्थायां श्रोतव्यस्य श्रुतस्य च वैराग्यं प्राप्तासि पूर्वं श्रुतिभिरनेकसाध्यसाधनश्रवणैर्विप्रतिपन्ना विक्षिप्ता श्रुतश्रोतव्ययोर्निर्वेदं लब्ध्वा यदा समाधीयते चित्तमस्मिन्निति समाधिरात्मा तस्मिन्निश्चला विक्षेपरहिता स्थास्यति स्थिरीभूता भविष्यति तदा योगं सांख्ययोगमवाप्स्यसीति द्वयोरर्थः । यद्वा योगानुष्ठानजनितसत्त्वशुद्धिजा वैराग्यादीतरसाधनसहिता नित्यानित्यवस्तुविवेकरूपा ज्ञानाधिकारसंपादिका बुद्धिः कदा प्राप्यत इत्यत आह—यदेति । यदा तव बुद्धिर्मोहात्मकमविवेकरूपं कालुष्यं चित्ताशुद्धिजं व्यतितरिष्यति तदा श्रोतव्यस्य श्रुतस्य च कर्मफलस्य निर्वेदं गन्तासि ॥ ५२ ॥

प० टी०—अथ कदा पदप्राप्तिरित्याह—यदेति । ते बुद्धिर्यदा मोहकलिलं व्यतितरिष्यति मोहो देहात्मबुद्धिस्तदेव कलिलं गहनं दुरतिक्रमत्वात् ते बुद्धिस्तद्विशेषात्तरिष्यत्युल्लङ्घयिष्यति, तदा श्रोतव्यस्य श्रुतस्य च फलोपधानस्य निर्वेदं वैराग्यं गन्तासि प्राप्स्यासि । तदुक्तं पातञ्जले—'भोगापवर्गौ बुद्धिकृतौ बुद्धावेव वर्तमानौ कथं पुरुषे व्यपदिश्येते स हि तत्फलभोक्तेति । यथा विजयः पराजयो वा योधेषु वर्तमानः स्वामिन्यपदिश्यते स हि तत्फलभोक्तेति । बुद्धिरेव पुरुषार्थापरिसमाप्तिर्बन्धस्तदर्थव्यवसायो मोक्षः' इति ॥ ५२ ॥

रा० टी०—फलकामनादिवर्जितानीश्वराराधनरूपाणि कर्माणि मोक्षसाधनज्ञानार्थिना कियत्पर्यन्तं कर्तव्यानीत्यत आह—यदा त इति । यदा ते तव बुद्धिरन्तःकरणं मोहकलिलमन्यथाज्ञानलक्षणं दोषं व्यतितरिष्यति परित्यक्ष्यति तदा मह्यः श्रुतस्य श्रोतव्यस्य च। सर्वकर्मोपलक्षणमेतत् । तस्य सर्वस्य निर्वेदं नितरां लाभं गन्तासि प्राप्स्यासि । मुक्तिहेतुज्ञानसाधनभूतो निवृत्तकर्मानुष्ठानरूपो योगः साक्षाज्ज्ञानहेतुः श्रवणादिरूपप्रमाणस्यादृष्टद्वारा सत्त्वशुद्ध्युत्पादनेनोपकारकः सन्मिथ्याज्ञानदोषानिवृत्तिपर्यन्तं तत्त्वज्ञानोदयपर्यन्तं कर्तव्य इति भावः ॥ ५२ ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

त० टी०—निष्कामकर्मानुष्ठानेन कदा योगं प्राप्स्यामीत्यपेक्षायामाह—श्रुतीति । इतः पूर्वमतत्त्वविद्भ्यः श्रुतिभिर्नानाविधसाधनफलश्रवणैस्ते बुद्धिर्विप्रतिपन्ना इदं श्रेय इदं वेत्यादिसंशयग्रस्ततयाऽतत्त्वनिष्ठा सती विक्षिप्ताऽऽसीत् । यदा यस्मिन्काले समाधिर्मनस आत्मप्रावण्यं तस्मिन्नचला विषयान्तराग्रहणेन तदेकनिश्चया सती स्थास्यति तदा योगं योगफलमात्मयाथात्म्यानुभवमवाप्स्यसि ॥ ५३ ॥

म० टी०—अन्तःकरणशुद्ध्यैवं जातनिर्वेदस्य कदा ज्ञानप्राप्तिरित्यपेक्षायामाह—श्रुतिविप्रतिपन्नेति । ते तव बुद्धिः श्रुतिभिर्नानाविधफलश्रवणैरविचारिततात्पर्यैर्विप्रतिपन्ना अनेकविधसंशयविपर्यासवत्त्वेन विक्षिप्ता प्राक् । यदा यस्मिन् काले शुद्धिजविवेकजनितेन दोषदर्शनेन तं विक्षेपं परित्यज्य समाधौ परमात्मनि निश्चला जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिता अचला सुषुप्तिमूर्च्छास्तब्धीभावादिरूपलयलक्षणचलनरहिता

सती स्थास्यति लयविक्षेपलक्षणौ दोषौ परित्यज्य समाहिता भविष्यतीति यावत् । अथवा निश्चला संभावनाविपरीतभावनारहिता अचला दीर्घकालादरनैरन्तर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषिता सती निर्वातप्रदीपवदात्मनि स्थास्यतीति योजना । तदा तस्मिन्काले योगं जीवपरमात्मैक्यलक्षणं तत्त्वमस्यादिवाक्यजन्यमखण्डसाक्षात्कारं सर्वयोगफलमवाप्स्यसि । तदा पुनः साध्यान्तराभावात् कृतकृत्यः स्थितप्रज्ञो भविष्यसीत्यभिप्रायः ॥ ५३ ॥

शं० टी०—एवं मुमुक्षोर्ज्ञानयोगसिद्धेरसाधारणकारणं बाह्योपरमणं निरूप्याथ ज्ञानयोगसिद्धिप्रकारमाह—**श्रुतीति** । ऋगादिभिः श्रुतिभिः कुत्रचित्कर्मविशेषास्तत्फलविशेषास्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते । कुत्रचिदुपास्तिविशेषास्तत्फलविशेषास्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते । कुत्रचिद्ब्रह्म सगुणं तन्माहात्म्यं तत्फलस्य औत्कृष्ट्यं च प्रतिपाद्यते । कुत्रचिन्निर्गुणं ब्रह्म तज्ज्ञानं तन्माहात्म्यं तत्फलप्राशस्त्यं च प्रतिपाद्यते । एतत्सर्वं श्रुतवतो विप्रतिपत्तिः । किं सर्वेषां प्राधान्यं वा उत सगुणस्य वा उत निर्गुणस्य वा उतोभयेषां वेत्येवं श्रुतिवाक्यैर्विप्रतिपन्ना संशयाविष्टा बहुविक्षेपवती ते बुद्धिः प्रज्ञया शास्त्रं सर्वमवलोक्य श्रुतिस्मृतियुक्तिबलेन गुरूपदेशेन च 'सर्वे वेदा यत्पदमामनन्ति' इति न्यायेन सर्वस्यापि शास्त्रस्य महत्तात्पर्यं निर्विशेषे एव ब्रह्मणि पर्यवसितमिति परिज्ञाय विप्रतिपत्तीः सर्वाः परित्यज्य निश्चला निर्विशेषा भूत्वा समाधौ समाधीयते चित्तमस्मिन्निति समाधिः परं ब्रह्म तस्मिन् तदाकारेणैवाचलाचलनहेतूनां बाह्यवासनानां नाशादविक्रिया निश्चला सती यदा स्थास्यति तदा योगं प्रज्ञास्थैर्यलक्षणमवाप्स्यसि । यद्वा "सत्यं ज्ञानमनन्तं ब्रह्म सर्वं ब्रह्मैतदात्म्यमिदं सर्वं सद्धीदं सर्वं चिद्धीदं सर्वं तत्त्वमसि अयमात्मा ब्रह्म तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं ब्रह्मैवेदं सर्वम्" इत्यादिश्रुतिभिः सर्वस्य ब्रह्ममात्रत्वप्रतिपत्तिजनकाभिर्विशेषप्रतिपत्तिमती या सा श्रुतिविप्रतिपन्ना "सर्वं ब्रह्मैव" इति श्रुतिभिः संभावितविशिष्टज्ञानवतीत्यर्थः । तत एव निश्चला विक्षेपनिर्मुक्ता न हि परमाप्तवाक्यश्रवणेन वाप्यधिष्ठानसंदर्शनेन वा सद्बुद्धेर्विप्रतिपत्तिर्विक्षेपो वा संभवत्यत एवं सम्यक् श्रवणेन मननेन च संपन्ना ते बुद्धिः समाधावसंप्रज्ञाताख्ये अचला निर्वातस्थदीपवन्निश्चला निष्कम्पा भूत्वा यदा यस्मिन्काले चित्तपरिपाकावस्थायां स्थास्यति स्थिता भविष्यति तदा त्वं योगं ज्ञानयोगमप्रतिबद्धं प्राप्स्यसि योगारूढो भविष्यसीत्यर्थः ॥ ५३ ॥

श्री० टी०—ततश्च—**श्रुतीति** । श्रुतिभिः नानालौकिकवैदिकार्थश्रवणैः विप्रतिपन्ना इतः पूर्वं विक्षिप्ता सती तव बुद्धिर्यदा समाधौ स्थास्यतीति । समाधीयते चित्तमस्मिन्निति समाधिः परमेश्वरस्तस्मिन्निश्चला विक्षेपव्यातिविषयान्तरैनाकृष्टाऽत एवाचला अभ्यासपटुत्वेन तत्रैव च स्थिरा च सती तदा योगं योगफलं तत्त्वज्ञानमवाप्स्यसि ॥ ५३ ॥

स० टी०—धीशुद्ध्यैवं परिप्राप्तवैराग्यस्य कदा मम ॥ आत्मज्ञानोदयश्चैवमपेक्षायां वचः शृणु ॥ १ ॥ अविचारिततात्पर्यैरनेकश्रवणैस्तव ॥ धीः संशयविपर्यासैर्विक्षिप्ता प्रागनेकधा ॥ २ ॥ यस्मिन्काले विशुद्ध्युत्थविवेकजनितेन च ॥ इहामुत्रफले दोषदर्शनेन समन्विता ॥ ३ ॥ त्यक्त्वा विक्षेपमद्वैततत्त्वेऽत्यन्तविनिश्चला ॥ जाग्रत्स्वप्नमनोराज्यवर्जिता ब्रह्मणि स्थिता ॥ ४ ॥ अचला सुप्तिमूर्छादिलयशून्या सती स्वयम् ॥ यद्वाऽसंभावनां त्यक्त्वा विपरीतमतिं तथा ॥ ५ ॥ निदिध्यासनसंपन्ना तत्त्वे स्थास्यति निश्चला ॥ तस्मिन्काले परात्मैक्ययोगं वेदान्तवाक्यजम् ॥ ६ ॥ अखण्डसाक्षात्काराख्यं सर्वयोगफलं परम् ॥ अवाप्स्यसि स्थितप्रज्ञः कृतकृत्यो भविष्यसि ॥ ७ ॥ ५३ ॥

भा० टी०—चित्तशुद्धिद्वारा लब्धात्मविवेकबुद्धिः कर्मयोगजं फलं परमात्मयोगं कदाऽऽप्स्यसीति तच्छृणु—**श्रुतीति** । प्राग्वद्व्याख्यानद्वयमपि भाष्याल्लभ्यत इति बोध्यम् ॥ ५३ ॥

प० टी०—अथैतदेव परमेश्वरप्राप्तिनिमित्तमित्याह—श्रुतीति । श्रुती रोचनार्था फलश्रुतिस्तत्र विप्रतिपन्ना त्यक्तादरा एवंविधा ते बुद्धिः समाधौ सम्यगाधीयते चित्तं यस्मिन्निति समाधिः परमेश्वररूपं तस्मिन् निश्चला कृतनिश्चयात एवाचलाऽविक्षेपा सती यदा स्थास्यति स्थिता भविष्यति तदा योगं तत्सान्निध्यमवाप्स्यासि ॥ ५३ ॥

रा० टी०—किं तन्मोहकलिलं कीदृशं च तदतितरणमित्याकाङ्क्षायां पुंसामधममध्यमोत्तमावस्थादिप्रदर्शनेन पूर्वश्लोकोक्तमेव योगानुष्ठानविधिं स्पष्टयति—श्रुतीति। परोक्षनिश्चयात्पूर्वावस्थायां श्रुतिभिर्वेदैर्विप्रतिपन्ना विरुद्धा सती बुद्धिर्यदा वेदार्थानुकूलेन तत्त्वनिश्चयेनासच्छास्त्रै (श्चलन) र्हीना इदमदो वेति संशयानास्कन्दिता सती स्थास्यति । ततश्च समाधिर्भवति । जाते च समाधौ असंप्रज्ञातध्याने अपरोक्षज्ञानं भवति । तेन च ब्रह्मदर्शनेन परमानन्दमग्नतया भेरीताडनादिनापि चलनहीना बुद्धिर्मनो यदा स्थास्यति तदा योगं योगफलं ज्ञानोपायानुष्ठानस्य फलमवाप्स्यसीत्यर्थः । पूर्वावस्थायामनुष्ठितयोगस्य परोक्षभगवन्निश्चयावधित्वमुक्तम् । परोक्षनिश्चयस्य काष्ठा त्वसच्छास्त्रैरनेकधा परिलोड्यमानत्वेप्यप्रामाण्यशङ्काकलाङ्कितत्वशून्यस्त्वम्। तद्दशायामनुष्ठितनिवृत्तकर्मरूपयोगस्य तु समाधौ भगवदपरोक्षज्ञानावधित्वम् । तस्य तु काष्ठा भेरीताडनादिनाप्यप्रतिबोधसमाधिस्थत्वम् । एतेन बुद्धेर्मनसः मोहकलिलं श्रुतिविरुद्धत्वरूपो दोषः । तत्तरणं नाम वेदार्थानुकूलेन निश्चयेन दृढतयावस्थानम्। तदा निर्वेदं गन्तासीत्यस्य विवरणं समाधावचला बुद्धिरित्युक्तं भवति । श्लोकद्वयस्याप्यचञ्चलसमाध्यवस्थाप्राप्तिर्योगानुष्ठानावधिरिति तात्पर्यं ध्येयम् । यद्वा बुद्धिर्मनः श्रुतिविप्रतिपन्ना श्रुतिविशेषेण प्रपन्ना श्रुत्यर्थनिर्णयं प्राप्ता सती इदमदो वेति चञ्चलत्वहीना यदा स्थास्यति तदा समाधौ समाधिः समाधानम् । सतिसप्तमी । श्रुत्यर्थनिश्चयेन निश्चलत्वे सति अपरोक्षज्ञानं भवतीति योज्यम् । तेन च विष्णावचला भवति बुद्धिः । ततश्च योगं भगवद्योगं मुक्तिमवाप्स्यसीति ॥५३॥

अर्जुन उवाच—स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ॥
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

त० टी०—यदा समाधावचला बुद्धिस्तदा योगमवाप्स्यसीत्युक्तं तेन समाधिस्थः स्थितप्रज्ञस्तत्त्वज्ञो भवतीति विज्ञाय तस्य लक्षणभाषणासनव्रजनानि जिज्ञासुरर्जुनः पृच्छति—स्थितप्रज्ञस्येति। हे केशव स्थिता प्रज्ञा बुद्धिर्यस्य तत्कुतो यतः समाधिस्थस्तस्य का भाषा भाष्यते प्रकर्षेण कथ्यतेऽनयेति भाषालक्षणमित्यर्थः। तथा स्थितधीः पुरुषः समाधेरुत्थाय किं प्रभाषेत किं भाषणं कथं वा भाषणं कुर्वीत । तथा किमासीत कथमासीत उपविशेत । तथा किं कथं वा व्रजेत गमनं कुर्यात् । स्थितप्रज्ञस्य मूढजनाद्विलक्षणानि भाषणादीन्यतः पृच्छामि। एतद्ब्रूहीति शेषः । ननु समाधिस्थस्य लक्षणभाषणादिकं समाधिमच्छ्रेष्ठो ब्रह्मशिवादिः कश्चिज्जानीयात्तत एव जिज्ञासितव्यमित्याशङ्कानिरासकं सम्बोधनमुक्तं केशवेति । कश्च ईशश्च केशौ वापयति उत्पादयति नियमयति ताभ्यां ज्ञानं प्रापयति वा तथा स त्वमेव ब्रह्मशिवादिजनकत्वान्नियन्तृत्वाद्गुरुत्वाद्वा सर्वेश्वरः सर्वज्ञश्च समाश्रयणीय इत्यर्थः । "यो ब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये तस्य ध्यानान्तःस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत" 'क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवान्' इत्यादि श्रुतिस्मृतिभ्यः ॥ ५४ ॥

म० टी०—एवं लब्धावसरः स्थितप्रज्ञलक्षणं ज्ञातुमर्जुन उवाच यान्येव हि जीवन्मुक्तानां लक्षणानि तान्येव मुमुक्षूणां मोक्षोपायभूतानीति मन्वानः—स्थितप्रज्ञस्येति । स्थिता निश्चलाहं ब्रह्मास्मीति प्रज्ञा यस्य

स स्थितप्रज्ञोऽवस्थाद्वयवान् समाधिस्थो व्युत्थितचित्तश्चेति । अतो विशिनष्टि समाधिस्थस्य स्थितप्रज्ञस्य का भाषा लक्षणं समाधिस्थः स्थितप्रज्ञः केन लक्षणेनान्यैर्व्यवह्रियत इत्यर्थः । स च व्युत्थितचित्तः स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभाषेत स्तुतिनिन्दादावभिनन्दनद्वेषादिलक्षणं किं कथं प्रभाषते । सर्वत्र संभावनायां लिङ् । तथा किमासीतेति व्युत्थितचित्तनिग्रहाय कथं बहिरिन्द्रियाणां निग्रहं करोति तन्निग्रहाभावकाले च किं व्रजेत कथं विषयान्प्राप्नोति । तत्कर्तृकभाषणासनव्रजनानि मूढजनविलक्षणानि कीदृशानीत्यर्थः । तदेवं चत्वारः प्रश्नाः समाधिस्थे स्थितप्रज्ञे एकः व्युत्थिते स्थितप्रज्ञे त्रय इति । केशवेति संबोधयन् सर्वान्तर्यामितया त्वमेवेतादृशं रहस्यं वक्तुं समर्थोऽसीति सूचयति ॥ ५४ ॥

शं० टी०—श्रवणमननाभ्यां विज्ञातात्मतत्त्वस्य विदुषः समाधिना प्रज्ञास्थैर्यसिद्धिं श्रुत्वा स्थितप्रज्ञस्य लक्षणं विज्ञातुकामोऽर्जुनः पृच्छति—**स्थितप्रज्ञस्येति**। स्थितप्रज्ञस्य स्थिता ब्रह्माकारेण निश्चला बाह्याऽनवगाहिनी प्रज्ञा बुद्धिर्यस्य स स्थितप्रज्ञ आरूढस्तस्य भाषा भाषणं का कदा सिद्ध्यति । समाधिस्थस्य नित्यं निरन्तरं नियमेन समाधिं कुर्वाणस्य समाधिनिष्ठा निरतो विद्वान् पण्डितैरयं स्थितप्रज्ञ इति कदा भाष्यत इत्यर्थः । स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभाषेत किमासीत किं व्रजेत कथं तिष्ठति कथं चरति किं वदतीत्यर्थः ॥ ५४ ॥

श्री० टी०—पूर्वश्लोकोक्तस्यात्मतत्त्वज्ञस्य लक्षणं जिज्ञासुरर्जुन उवाच—**स्थितप्रज्ञस्येति** । स्वाभाविके समाधौ स्थितस्यात एव स्थिता निश्चला प्रज्ञा बुद्धिर्यस्य तस्य का भाषा भाष्यतेऽनयेति भाषा लक्षणमिति यावत् केन लक्षणेन स्थितप्रज्ञ उच्यत इत्यर्थः । तथा स्थितधीः किं कथं भाषणमासनं व्रजनं च कुर्यादित्यर्थः ॥ ५४ ॥

स० टी०—उपलभ्यार्जुनः प्रश्नबीजं सर्वहिताय च ॥ तत्त्वज्ञलक्षणं ज्ञातुं प्रोवाच श्रीहरिं प्रति ॥ १ ॥ यान्येव जीवन्मुक्तानां लक्षणानि भवन्ति हि ॥ तान्येवात्र मुमुक्षूणां मोक्षोपायात्मकान्यपि ॥ २ ॥ ब्रह्मैवास्मीति धीर्यस्य निश्चला स्थितधीर्हि सः ॥ समाधिस्थस्य षष्ठीयं कर्मण्येव न कर्तरि ॥ ३ ॥ समाधिस्थो व्युत्थितश्च स्थितप्रज्ञो द्विधोच्यते ॥ तत्राद्यः केन चिह्नेन ज्ञायतेऽन्यैर्जनैरपि ॥ ४ ॥ समाधिस्थस्य का भाषा लक्षणं भाष्यतेऽनया ॥ व्युत्थितोऽसौ स्थितप्रज्ञः किं प्रभाषेत वा स्वयम् ॥ ५ ॥ स्तुतिनिन्दादिविषयान्छब्दानज्ञविलक्षणान् ॥ किमासीत कथं चित्तनिरोधार्थं विनिग्रहम् ॥ ६ ॥ इन्द्रियाणां करोत्येष व्यवहारे कथं व्रजेत् ॥ विषयान्कथमाप्नोति स्वारब्धादागतान्सुधीः ॥ ७ ॥ लक्षणं भाषणं स्थानं व्रजनं च चतुर्थकम् ॥ चत्वारि कीदृशान्यस्य भिन्नान्यज्ञेभ्य इत्यलम् ॥ ८ ॥ एवं प्रश्ना हि चत्वारः समाधिस्थस्य चाग्रिमः ॥ व्युत्थितस्य त्रयः प्रोक्ताः स्थितप्रज्ञस्य भागशः ॥ ९ ॥ त्वमेवैतादृशं गुह्यं रहस्यं वक्तुमर्हसि ॥ सर्वान्तर्यामिभावेन सर्वसामर्थ्यवान् हरिः ॥ १० ॥ आह्वयन्केशवेत्येवं सूचयत्यर्जुनः सुधीः ॥ ११ ॥ ५४ ॥

भा० टी०—तत्त्वविल्लक्षणानि जिज्ञासुरर्जुन उवाच—**स्थितेति** । स्थिता प्रस्थिता प्रतिष्ठिताऽहं ब्रह्मास्मीति प्रज्ञा यस्य स एव समाधिस्थः न त्वात्मज्ञानशून्यस्य मुख्यसमाधिरस्तीति भावः । तस्य का भाषा कमथसौ लोकैर्भाष्यते कैर्लक्षणैर्लक्षितः सन लोकैः स्थितप्रज्ञ इत्युच्यते इत्यर्थः । यथा भवानपि केशिहननादिकर्मणा केशव इत्युच्यते तथेति सूचयन्नाह—हे केशवेति । एतेनावस्थाद्वयवान्समाधिस्थो व्युत्थितचेताश्चेति अतो विशिनष्टि समाधिस्थस्य स्थितप्रज्ञस्येत्यादि प्रत्युक्तम् । योगिनोऽप्रक्रान्तत्वेन तस्य लक्षणप्रश्नानौचित्यात् । तत्त्वज्ञानरूपसमाधिस्थस्यैव प्रक्रान्तत्वात् । उत्तरे प्राणनिरोधं यदा करोति तदा समाधिस्थ इत्यनुक्तत्वाच्च ज्ञानिनः प्राणायामानपेक्षसमाधेर्वासिष्ठे स्पष्टमुक्तत्वाच्च । तथाहि परिघ उवाच 'यद्यतसंसारजालेऽस्मिन् क्रियते

कर्म भूमिप । तत्समाहितचित्तस्य सुखायान्यस्य नानघ ॥ कच्चित्संकल्परहितं परं विश्रमणास्पदम् । परमोपशमं श्रेयः समाधिमनुतिष्ठसि ॥ रघुरुवाच । एतन्मे ब्रूहि भगवन्सर्वसंकल्पवर्जितम् । परमोपशमं श्रेयः समाधिर्हि किमुच्यते ॥ योऽज्ञो महात्मन्सततं तिष्ठन्व्यवहरंश्च वा । असमाहितचित्तोऽसौ कदा भवति कः किल ॥ नित्यप्रबुद्धचित्तास्तु कुर्वन्तोऽभिजगत्क्रियाः । आत्मैकतत्त्वसंनिष्ठाः सदैव सुसमाधयः ॥ बद्धपद्मासनस्यापि कृतब्रह्माञ्जलेरपि । अविश्रान्तः स्वभावस्य कः समाधिः कथं च वा ॥ तत्त्वावबोधो भगवन्सर्वाशातृणपावकः । प्रोक्तः समाधिशब्देन नतु तूष्णीमवस्थितिः ॥ समाहिता नित्यतृप्ता यथा भूतार्थदर्शिनी । साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ॥ अक्षुब्धा निरहंकारा द्वन्द्वेष्वननुपातिनी । प्रोक्ता समाधिशब्देन मेरोः स्थिरतराकृतिः ॥ निश्चिताभिगताभीष्टा हेयोपादेयवर्जिता । प्रोक्ता समाधिशब्देन परिपूर्णा मनोगतिः ॥ यतः प्रभृति बोधेन युक्तमात्यन्तिकं मनः । तदारभ्य समाधानमव्युच्छिन्नं महात्मनः' इत्यादि । स्थितधीः स्वयं वा किं प्रभाषेत किं प्रभाषणमासनं व्रजनं वा तस्य कथमित्यर्थः । आत्मनि स्थितस्य स्थितप्रज्ञस्य लक्षणं ब्रूहीति प्रश्नार्थः । तथाच भाष्यम् "स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छति यो ह्यादित एव सन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तः यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य प्रजहातीत्यारभ्याध्यायपरिसमाप्तिपर्यन्तं स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते । सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात् " इति ॥ ५४ ॥

प० टी०—अथ समाधौ स्थिरबुद्धेः स्वरूपमर्जुनः पृच्छति—**स्थितप्रज्ञस्येति** । भाष्यते प्रोच्यतेऽनेनेति भाषा स्थितप्रज्ञः पुमान् कैर्लक्षणैरुच्यत इत्यर्थः । तथा समाधिस्थस्य च किं लक्षणं स्थितप्रज्ञः समाधिस्थो वा कैर्लक्षणैर्बोद्धव्यः । ननु परबुद्धेरप्रत्यक्षत्वात्कथं दर्शनमात्रेण स्वरूपं ज्ञायते इति चेत्तर्ह्यतिबुद्धिमताकारेणैव मनोगतं ज्ञायते यतः—' उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति नोदिताः । अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ' इत्युक्तत्वात् । अथ व्यवहारेण वा तल्लक्षणं पृच्छति—**स्थितधीरिति** । स्थितधीः किं प्रभाषेत कथं वदति, किमासीत कथमासीनो भवति, कथं वा व्रजेत गच्छतीति प्रश्नार्थः । प्रश्नाक्षराणि व्याख्याय वाक्यार्थमाह—**स्थितप्रज्ञस्येति** ॥ ५४ ॥

रा० टी०—ज्ञानिनि प्रकृते(सति)लब्धावसरोऽर्जुनः प्रागुक्तलक्षणानुवादपूर्वकं लक्षणान्तरादिकं पृच्छति—**स्थितेति** । स्थिता प्रतिष्ठां प्राप्ता प्रज्ञाऽपरोक्षदर्शिर्यस्य स तथा तस्य समाधिस्थस्य समाध्यवस्थां गतस्य प्राक्त्वदुक्तदिशाऽसंप्रज्ञातध्यानस्थत्वलक्षणं गतस्य का भाषा भाष्यतेऽनयेति भाषाशब्दो लक्षणवचनः किं लक्षणमित्यर्थः । येन लक्षणेनायं ज्ञानीति व्यवह्रियते तत्किमित्यर्थः । केशव ! ब्रह्मरुद्रप्रवर्तक ! "केशाद्वोऽन्यतरस्याम्" इति मत्वर्थे वप्रयोक्तेः । प्रशस्तकेशवानिति वा । स्थितधीरपरोक्षज्ञानी किं प्रभाषेत किं प्रत्यासति किमुद्दिश्य व्रजेत प्रवृत्तिं कुर्यादित्यर्थः । अत्र किंलक्षणमिति वक्तव्ये यौगिकभाषाशब्देन तदुक्तिः । प्रागुक्तं समाधिस्थत्वलक्षणं यावद्द्रव्यभावित्वान्न सम्यग्व्यवहारोपयोगि । यावल्लक्ष्यभावितुः सम्यक्सार्वत्रिकव्यवहारापयोगि अतोऽसार्वत्रिकव्यवहारहेतुभूतं यावल्लक्ष्यभाविलक्षणं किमिति प्रष्टुमिति ज्ञेयम् । स्थितप्रज्ञस्य का भाषेत्येव पूर्तौ समाधिस्थस्येति प्राचीनलक्षणानुवादस्तु त्वदुक्तं लक्षणं ज्ञातं तन्न पृच्छ्यते येन सिद्धार्थता प्रश्नस्य स्यात् किंत्वन्यदेव पृच्छ्यत इति ज्ञापयितुम् ।यद्वा समाधिस्थस्य विषमबुद्धिवर्जितस्येत्यर्थः । उत्तरार्धे किंशब्दः आक्षेपार्थः ।भेरीताडनादिनापि अप्रतिबद्धो ब्रह्मदर्शनेन परमानन्दमग्नत्वात् । स्थितधीरपरोक्षज्ञानी भाषणोपवेशनगमनादिरूपप्रवृत्तिं किमर्थं कुर्यात् । करोति च शुकादिः । अतः ' समाधावचला बुद्धिस्तदा योगमवाप्स्यसि' इति उक्तमसदिति ॥ ५४ ॥

श्रीभगवानुवाच–प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ॥
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

त० टी०–एवमर्जुनस्य चतुरः प्रश्नान् क्रमेण यावदध्यायान्तं वक्तुं तावत्प्रथमप्रश्नस्योत्तरं **श्रीभगवानुवाच–प्रजहातीति** द्वाभ्याम् । मनोगतान्सर्वान्कामान्यदा प्रजहाति प्रकर्षेण त्यजति तदा स्थितप्रज्ञ उच्यते । मनोगतकामपरित्यागे किं गमकमित्यत आह–**आत्मन्येवात्मना तुष्ट** इति । आत्मनि स्वस्वरूपे प्रजापतिविद्योक्तापहतपाप्मत्वादिविशिष्टे ज्ञानानन्दस्वरूपे आत्मना काममलपरित्यागान्निर्मलीभूतेन मनसा तुष्टः प्रसन्नो यदा भवति तदा तस्य स्थितप्रज्ञता ज्ञेयेत्यर्थः ॥ ५५ ॥

म० टी०–एतेषां चतुर्णां प्रश्नानां क्रमेणोत्तरं भगवानुवाच–**प्रजहातीति** यावदध्यायसमाप्ति । कामान् कामसङ्कल्पादीन्मनोवृत्तिविशेषान् प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेन तन्त्रान्तरे पञ्चधा प्रपञ्चितान् सर्वान्निरवशेषान्प्रकर्षेण कारणबाधेन यदा जहाति परित्यजति सर्ववृत्तिशून्य एव यदा भवति स्थितप्रज्ञस्तदोच्यते । समाधिस्थ इति शेषः । कामानामनात्मधर्मत्वेन परित्यागयोग्यतामाह–**मनोगतानिति** । यदि ह्यात्मधर्माः स्युस्तदा न त्यक्तुं शक्येरन् वह्न्यौष्ण्यवत् स्वाभाविकत्वात् मनसस्तु धर्मा एते अतस्तत्परित्यागेन परित्यक्तुं शक्या एवेत्यर्थः। ननु स्थितप्रज्ञस्य मुखप्रसादलिङ्गस्य सन्तोषविशेषः प्रतीयते स कथं सर्वकामपरित्यागे स्यादित्यत आह–**आत्मनीति** । आत्मन्येव परमानन्दरूपे न त्वनात्मनि तुच्छे आत्मना स्वप्रकाशचिद्रूपेण भासमाने नतु वृत्त्या तुष्टः परितृप्तः परमपुरुषार्थलाभात् । तथा च श्रुतिः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति । तथा च समाधिस्थः स्थितप्रज्ञ एवंविधैर्लक्षणवाचिभिः शब्दैर्भाष्यत इति प्रथमप्रश्नस्योत्तरम् ॥ ५५ ॥

शं० टी०–सिद्धस्य लक्षणानि यानि तान्येव साधकस्य साधनानि प्रयत्नेन संपाद्यानि येषु सिद्धेषु सत्स्वेव विदुषः प्रज्ञास्थैर्यं विदेहकैवल्यं च सिध्यत्यतस्तानि मुमुक्षोर्यत्नेन साधनीयानीति सूचयितुमध्यायपरिसमाप्तेस्तान्येव प्रतिपाद्यन्ते । तत्रादौ प्रथमप्रश्नस्योत्तरमाह **श्रीभगवान्–प्रजहातीति** । श्रवणादिना सम्यग्विज्ञातात्मतत्त्वो मुमुक्षुः समाधौ वर्तमानो मनोगतान्"मनसैवानुद्रष्टव्यम्" इति श्रवणादात्मस्वरूपप्रकाशनैककारणे मनस्येव स्थितान् विषयान् कामयन्तीति कामाः विषयभोगेच्छास्तान् सर्वान्यदा यस्मिन्काले समाधिसिद्धिदशायां प्रजहाति निःशेषं परित्यजति। विषयाशानां निःशेषपरित्यागे हेतुमाह–**आत्मनीति** । स्वतः सिद्धे नित्यकूटस्थासङ्गचिद्रूपे चक्षुषो रूपवत्सर्वत्रोपलभ्यमान आनन्दैकरस आत्मनि स्वस्वरूपे क्रीडन् रममाणो ब्रह्मविदात्मना स्वस्वरूपेणैवोक्तलक्षणेन तुष्टः स्वात्मानन्दरसानुभूत्यैव संतोषं तृप्तिं च प्राप्यामृतरसपायी लवणाम्बुवत्तुच्छं विषयसुखं नापेक्षते तत एव तद्विषयान् कामान् सर्वान् प्रजहाति यदैवंलक्षणो भवति तदा स्थितप्रज्ञोऽयमिति पण्डितैरुच्यत इत्यर्थः । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य" इति श्रुतेरर्थोऽनेन प्रतिपादितो भवति । ननु विषयेषु कामोदयकारणेषु सत्सु दृष्टेषु च विदुषोऽपि तदनुभूतौ कामो जायत एव न निःशेषेण कामपरित्यागः संभवतीति चेद्भवानत्र प्रष्टव्यः विषयेषु कामोदयो विषयस्वभावो वा किं पुरुषस्वभावो वा 'नाद्यः दृष्टे तृणपर्णादौ भोक्तुं पुंसः कामानुदयात्' न द्वितीयः कान्तासन्निधौ बालस्य कामादर्शनात् तर्हि कथं कामोदय इति चेदुच्यते ' काम !जानामि ते मूलं संकल्पात्किल जायसे ' इति स्मरणात्कामः संकल्पमूलकः संकल्पो वासनामूलकः नहि वासनया विना वस्तुनि समीचीनत्वबुद्धिरुदेति समीचीनत्वबुद्धिं विना कामोऽपि न घटते ततः कामोत्पत्तेः कारणं विषयेषु भोग्यत्ववासनैव वासना नाम भोगजन्यसंस्कारः भोग्यत्ववासनाबलादेव विषयेषु कामः प्रवृत्तिश्च जन्तूनां तदिदं

लोकशास्त्रप्रसिद्धं विदुषस्तु नित्यं निरन्तरं समाधिनिष्ठायामेव तिष्ठतः सदा सर्वत्र ब्रह्मैव पश्यतो विषय-ग्रहणं न संभवति मृदात्मना पश्यतो घटाग्रहणं यथा तथा सर्वं ब्रह्मात्मना पश्यतस्तदभावे विषयवासनाः स्वयमेव क्षीयन्ते तासां क्षये कामाः स्वयमेव विनश्यन्ति स्वयमेव विनश्यतां कामानां नाशो विदुषि ह्युपचर्यते प्रजहाति यदेति प्रभया नश्यतस्तमसो नाशनं सूर्यः करोतीतिवद्यत एवं ततस्तत्सिद्धं निर्वासनत्वं विदुषो लक्षणमिति । तदिदं निर्वासनत्वं समाधिना साधकस्य संपादनीयमित्यवसितं च ॥ ५५ ॥

श्री० टी०—अत्र च यानि साधकस्य ज्ञानसाधनानि तान्येव स्वाभाविकानि सिद्धस्य लक्षणानि अतः सिद्धस्य लक्षणानि कथयन्नेवान्तरङ्गाणि ज्ञानसाधनान्याह—यावदध्यायसमाप्ति । तत्र प्रथमप्रश्नोत्तरमाह—**प्रजहातीति** द्वाभ्याम् । श्रीभगवानुवाच मनसि स्थितान्कामान्यदा प्रकर्षेण जहाति त्यागे हेतुः आत्मन्येव स्वस्मिन्नेव परमानन्दरूपे आत्मना स्वयमेव तुष्ट इति आत्मारामः सन्यदा क्षुद्रविषयाभिलाषांस्त्यजति तदा तेन लक्षणेन मुनिः स्थितप्रज्ञ उच्यत इत्यर्थः ॥ ५५ ॥

स० टी०—एषां चतुर्णां प्रश्नानां क्रमेणाहोत्तरं हरिः ॥ कामान्संकल्पमुख्यान्वै मनोवृत्त्यात्मकान्यदा ॥ १ ॥ सर्वान्कारणबाधेन जहात्येतानशेषतः ॥ सर्वकामविनिर्मुक्तो यदा भवति निश्चलः ॥ २ ॥ स्थित-प्रज्ञः समाधिस्थस्तदायं प्रोच्यते मुनिः ॥ कामा अनात्मधर्मत्वात्त्यक्तुं योग्या अशेषतः ॥ ३ ॥ यद्येते ह्यात्मधर्माः स्युस्त्यक्तुं शक्याः कथं तदा ॥ वह्न्यौष्ण्यवत्स्वभावत्वात्स्वभावो दुरतिक्रमः ॥ ४ ॥ मनोधर्मा यतस्त्वेते त्यक्तुं शक्याः सुखेन वै ॥ तन्निरोधेन ते सर्वे निरुद्धाः सन्ति वै यथा ॥ ५ ॥ तत्त्यागेन तथा त्यक्तास्तद्धर्माः स्युर्मृषात्मकाः ॥ ननु स्थितधियस्तर्हि सन्तोषः किंनिबन्धनः ॥ ६ ॥ कामत्यागे भवे-दित्याकाङ्क्षायामाह केशवः ॥ आत्मन्येव परानन्दे न त्वनात्मनि तुच्छके ॥ ७ ॥ आत्मना स्वप्रकाशत्वा-द्भासमानेन चित्त्वतः ॥ परितृप्तः सदानन्दपुरुषार्थैकलाभतः ॥ ८ ॥ स्थितप्रज्ञः समाधिस्थ एवं लक्षणवा-चिभिः ॥ शब्दैर्भाष्यत इत्याद्यप्रश्नोत्तरमुदाहृतम् ॥ ९ ॥ ५५ ॥

भा० टी०—एवं पृष्टः श्रीभगवान् वासुदेवो मुमुक्षोर्यत्नसाध्यानि जीवन्मुक्तस्वभावभूतानि लक्षणानि वदन्प्रथमप्रश्नस्योत्तरमाह—**प्रजहातीति** द्वाभ्याम् । यदा कामानिच्छाभेदान्मनोगतान् मनसि प्रतिष्ठितान् सर्वा-नशेषान्प्रजहाति प्रकर्षेण त्यजति । ननु सर्वान्कामान् परित्यज्यापि प्रारब्धकर्मवशाज्जीवतस्तस्य उन्मत्त-वत्प्रवृत्तिः प्राप्तेत्यत आह—**आत्मन्येवेति** । आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यविषयलाभ-निरपेक्षः परमार्थदर्शनामृतरसलाभेनान्यस्मात् प्राप्तालंप्रत्ययस्तुष्टस्तदा स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मा-नात्मविवेकजा प्रज्ञा यस्य स विद्वान् तदोच्यते आत्मानं जिज्ञासमानो वैराग्यद्वारा पुत्रवित्तलोकैषणा-त्यागात्मकं सन्यासमासाद्य श्रवणाद्यावृत्त्या तज्ज्ञानं प्राप्य तस्मिन्नेव आसक्त्या विषयवैमुख्येन तत्फल-भूतां तुष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागित्यर्थः । एतेनसमाधिस्थ इति शेष इति प्रत्युक्तं शेषस्यो-क्तयुक्त्या निरर्थकत्वात् । एतादृशलक्षणसंबन्धेन स्थितप्रज्ञ उच्यते यथा पृथासंबन्धेन त्वं पार्थ इति सूच-यन्नाह—**पार्थेति** ॥ ५५ ॥

प० टी०—तत्र भगवान् क्रमेणोत्तरयति—**प्रजहातीति** यावदध्यायसमाप्ति । भो पार्थ मनोगतान् सर्वान् कामान् प्रजहात्यात्यन्तिकत्वेन वा तान् त्यजति तर्हि । न हि निरालम्बं मनः स्थातुं शक्नोतीत्याह—**आत्म-नीति** । आत्मन्यानन्दघने आत्मना स्वयं तुष्टात्मसुखानुभवेन संतुष्टोऽत एव क्षुद्रानन्देभ्यो निवृत्त एतादृशी दशा यदा तदा स्थितप्रज्ञ इत्युच्यते । अत्र प्रज्ञानशब्देन विज्ञानमेव, स्थिरीभूतविज्ञानो जीव-न्मुक्त इत्यर्थः । श्रुतिरपि—"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति । अत्रैव देहे ब्रह्मानन्दमनुभवति। शेषं स्पष्टार्थम् ॥ ५५ ॥

रा० टी०—का भाषेति कृतलक्षणप्रश्नस्योत्तरमाह—**प्रजहातीति** । उत्तरार्धे कृताक्षेपस्य तु समाधिं 'या निशा' इत्यग्रे वक्ष्यति । यदा मनोगतान्सर्वान्कामान्प्रजहाति परित्यजति । कामानित्युपलक्षणं कामक्रोधादीनित्यर्थः । यदा चात्मन्येव परमात्मन्येव व्यवस्थितः सन् तदेकचित्तः सन्निति यावत् । आत्मना परमात्मना तत्प्रसादेनेत्यर्थः । तुष्टः संतोषयुक्तः तदा स्थितप्रज्ञोऽपरोक्षज्ञानी उच्यत इत्यर्थः । अत्र सर्वान्कामानित्यस्य विरुद्धकामानित्यर्थः । कामादेर्मनोगतत्वाव्यभिचारेपि मनोगतानित्युक्तिर्विरुद्धसर्वकामप्रहाणघटनाय ज्ञानस्य कामादेश्च मानसैकनिष्ठत्वात् 'रसोप्यस्य परं दृष्ट्वा निवर्तते' इति वक्ष्यमाणदिशान्योन्यं विरुद्धत्वान्मनसि भगवज्ज्ञाने जाते तद्विरुद्धाः कामादयो न स्थातुमर्हन्तीति युक्तिसूचनेन तद्घटनात् प्रायः सर्वविरुद्धकामादित्यागवत्त्वे सति भगवदेकचित्ततया संतुष्टत्वं ज्ञानिलक्षणमित्युक्तं भवति । न च 'योगे त्विमां शृणु' इति ज्ञानोपायं प्रतिज्ञाय ज्ञानिलक्षणोक्तिरसङ्गतेति शङ्क्यम् । प्रायो विरुद्धकामत्यागभगवदेकचित्ततत्प्रसादायत्तसंतोषवत्त्वादीनां ज्ञानिलक्षणतयोक्तवक्ष्यमाणानामेव ज्ञानोपायशब्दितयोगरूपत्वात् । परन्तु ज्ञानार्थिनैतानि यत्नसाध्यानि ज्ञानिनि तु स्वभावसिद्धानीति विशेषः ॥ ५५ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

त० टी०—नन्विदं लक्षणं स्वसंवेद्यं तस्यात्मसंतुष्टत्वमन्यैः कथं ज्ञेयमित्यपेक्षायामाह—**दुःखेष्विति** । दुःखानि तावदध्यात्माधिदैवाधिभौतिकभेदात्त्रिविधानि । तत्राध्यात्मं शारीरकमानसभेदाद्द्विविधम् । तत्राक्षिशिरोरोगातिसारज्वरादिकं शारीरम् । निन्दाऽसूयाऽवमानेर्ष्यादिजन्यं मानसम् । शीतोष्णवातवर्षाविद्युदादिसमुद्भवमाधिदैविकम् । मनुष्यराक्षसपशुपक्ष्यादिजन्यमाधिभौतिकमिति विवेकः । तेषु प्रारब्धवशात्प्राप्तेषु एतान्यागमापायित्वात्स्वयमेव भोगेन वा नङ्क्ष्यन्तीति विचारेण नोद्विग्नं मनो यस्य सोऽनुद्विग्नमनाः तथा प्रारब्धवशात्सुखान्यपि प्राप्नुवन्ति तेष्वनागतेषु विगतस्पृहः वाञ्छारहितः । तत्र हेतुः—**वीतरागभयक्रोध** इति । मनस आसक्तिर्विषयेष्वभीष्टपदार्थेषु ममैते मा छिद्येरन्निति प्रीत्यतिशयो रागः प्रियवियोगजन्यागामिदुःखनिमित्तजन्यं दुःखं भयं प्रियवस्तुनाशहेतावुपस्थिते तद्वियोगकर्तृविषयोऽन्तःकरणविकारविशेषः क्रोधः एते रागादयो नित्यसुखस्वरूपे आत्मन्यविवेकेन जायन्ते तद्विवेकेन वीता गता यस्मात्स मुनिर्मननशीलः स्थितप्रज्ञ उच्यते विवेकिभिरिति शेषः ॥ ५६ ॥

म० टी०—इदानीं व्युत्थितस्य स्थितप्रज्ञस्य भाषणोपवेशनगमनानि मूढजनविलक्षणानि व्याख्येयानि । तत्र किं प्रभाषेतेत्यस्योत्तरमाह—**दुःखेष्विति** द्वाभ्याम् । दुःखानि त्रिविधानि शोकमोहज्वरशिरोरोगादिनिमित्तान्याध्यात्मिकानि व्याघ्रसर्पादियुक्तान्याधिभौतिकानि अतिवातातिवृष्ट्यादिहेतुकान्याधिदैविकानि तेषु दुःखेषु रजःपरिणामसन्तापात्मकचित्तवृत्तिविशेषेषु प्रारब्धपापकर्मप्रापितेषु नोद्विग्नं दुःखपरिहाराक्षमतया व्याकुलं न भवति मनो यस्य सोऽनुद्विग्नमनाः अविवेकिनो हि दुःखप्राप्तौ सत्यामहो पापोऽहं धिङ्मां दुरात्मानमेतादृशदुःखभागिनं को मे दुःखमीदृशं निराकुर्यादित्यनुतापात्मको भ्रान्तिरूपस्तामसचित्तवृत्तिविशेष उद्वेगाख्यो जायते । यद्ययं पापानुष्ठानसमये स्यात्तदा तत्प्रवृत्तिप्रतिबन्धकत्वेन सफलः स्यात् भोगकाले तु भवेत्कारणे सति कार्यस्योच्छेत्तुमशक्यत्वान्निष्प्रयोजने दुःखकारणे सत्यपि किमिति मम दुःखं जायत इति अविवेकभ्रमरूपत्वात् न विवेकिनः स्थितप्रज्ञस्य संभवति दुःखमात्रं हि प्रारब्धकर्मणा प्राप्यते नतु तदुत्तरकालीनो भ्रमोपि । ननु दुःखान्तरकारणत्वात्सोपि प्रारब्धकर्मान्तरेण प्राप्यतामिति चेत् न स्थितप्रज्ञस्य भ्रमोपादानाज्ञाननाशेन भ्रमासंभवात्तज्जन्यदुःखप्रापकप्रारब्धाभावात् । यथा कथंचिद्देहयात्रामात्रनिर्वाहकप्रार-

ब्धकर्मफलस्य भ्रमाभावेऽपि बाधितानुवृत्त्योपपत्तेरिति विस्तरेणाग्रे वक्ष्यते। तथा सुखेषु सत्त्वपरिणामरूपप्रीत्यात्मकचित्तवृत्तिविशेषेषु त्रिविधेषु प्रारब्धपुण्यकर्मप्रापितेषु विगतस्पृहः आगामितज्जातीयसुखस्पृहारहितः।स्पृहा हि नाम सुखानुभवकाले तज्जातीयसुखस्य कारणं धर्ममननुष्ठाय वृथैव तदाकाङ्क्षारूपा तामसी चित्तवृत्तिर्भ्रान्तिरेव सा चाविवेकिन एव जायते न हि कारणाभावे कार्यं भवितुमर्हति अतो यथा सति कारणे कार्यं मा भूदिति वृथाकाङ्क्षारूप उद्वेगो विवेकिनो न संभवति तथैवासति कारणे कार्यं भूयादिति वृथाकाङ्क्षारूपा तृष्णात्मिका स्पृहापि नोपपद्यते प्रारब्धकर्मणः सुखमात्रप्रापकत्वात्। हर्षात्मिका वा चित्तवृत्तिः स्पृहाशब्देनोक्ता सापि भ्रान्तिरेव अहो धन्योहं यस्य ममेदृशं सुखमुपस्थितं को वा मया तुल्यस्त्रिभुवने केन वोपायेन ममेदृशं सुखं न विच्छिद्येतेत्येवमात्मिकोत्फुल्लतारूपा तामसी चित्तवृत्तिः। अत एवोक्तं भाष्ये 'नाग्निरिवेन्धनाद्याधाने यः सुखान्यनुविवर्धते स विगतस्पृहः' इति। वक्ष्यति च 'न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्' इति। सापि न विवेकिनः संभवति भ्रान्तित्वात्। तथा वीतरागभयक्रोधः रागः शोभनाध्यासनिबन्धनो विषयेषु रञ्जनात्मकश्चित्तवृत्तिविशेषोत्पन्नाभिनिवेशरूपः। रागविषयस्य नाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकश्चित्तवृत्तिविशेषो भयम्। एवं रागविषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमानस्याभिज्वलनात्मकश्चित्तवृत्तिविशेषः क्रोधस्ते सर्वे विपर्ययरूपत्वाद्विगता यस्मात् स तथा एतादृशो मुनिर्मननशीलः संन्यासी स्थितप्रज्ञ उच्यते। एवं लक्षणः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थमनुद्वेगनिस्पृहत्वादिवाचः प्रभाषत इत्यन्वय उक्तः। एवं चान्योपि मुमुक्षुर्दुःखे नोद्विजेत् न प्रहृष्येत् रागभयक्रोधरहितश्च भवेदित्यभिप्रायः॥ ५६॥

शं० टी०—इदं मुमुक्षोरवश्यं साधनीयं साधनमिति सूचयितुं सिद्धस्य लक्षणान्तरमाह—दुःखेष्विति। दुःखेषु दुःखप्रापकेषु ज्वरशूलशिरोवेदनादिष्वाध्यात्मिकेषु चौराऽहिव्याघ्रादिष्वाधिभौतिकेषु वर्षवातातपादिष्वाधिदैविकेपूपद्रवेषु प्राप्तेषु सत्सु स्वयमनुद्विग्नमनाः अनुद्विग्नं किं करोमि क्व गच्छामीति विक्षेपव्यथाविधुरं मनो यस्य सोऽनुद्विग्नमनाः समाधिनिष्ठया तैरक्षोभितचित्त इत्यर्थः। तथा सुखेषु सुखप्रापकेषु मिष्टान्नरसादिषु स्वयं प्राप्तेषु विगतस्पृहः विगता विशिष्य निर्गता स्पृहा रसनादीन्द्रियलौल्यं यस्य स विगतस्पृहः स्वानन्दरसास्वादासक्त्या तेष्वादररहित इत्यर्थः। वीतरागभयक्रोधः उपकारिणि रागः प्रीतिरत्यन्ताऽपकारिणि क्रोधोऽप्रीतिरासन्ने मरणहेतौ भयं चैतत्त्रितयं स्वात्मनिष्ठया वीतं न प्राप्तं येन स वीतरागभयक्रोधः प्रीत्यप्रीतिभयहेतूनां प्रीत्यादीनां तत्कार्याणां चाविषयीभूत इत्यर्थः। दुःखादिषु विषादाद्यनुदये हेतुमाह—मुनिरिति।श्रुतं दृष्टं स्पृष्टं च सर्वं प्रत्यक्दृष्ट्या ब्रह्मैव मनुते पश्यति जानाति नतु तत्तदाकारेणेति मुनिर्ब्रह्मनिष्ठः।एवंलक्षणो यः स स्थितधीः स्थितप्रज्ञः सिद्ध इत्युच्यत इत्यर्थः। एतेन दुःखादिबाह्याऽनालम्बिन एव सद्ब्रह्मनिष्ठावत एव सम्यग्ज्ञानं सम्यक्ज्ञानिन एव विदेहमुक्तिरिति सूचितं भवति।संसिद्धो ब्रह्मविद्यतिरापत्सु संपत्सु न किंचिद्वदति किंतु तूष्णीमेव स्वात्मना तिष्ठतीति किं प्रभाषेतेत्यस्य प्रश्नस्योत्तरं दत्तम्॥ ५६॥

श्री० टी०—किंच—दुःखेष्विति। दुःखेषु प्राप्तेष्वपि अनुद्विग्नमक्षुभितं मनो यस्य सः। सुखेषु विगता स्पृहा यस्य सः। तत्र हेतुः वीता अपगता रागभयक्रोधा यस्मात्। तत्र रागः प्रीतिः। स मुनिः स्थितधीः स्थितप्रज्ञ इत्युच्यते॥ ५६॥

स० टी०—अथ व्युत्थितचित्तस्य स्थितप्रज्ञस्य भाषणम्॥ आसनं गमनं चैतत्त्रयं मूढविलक्षणम्॥ १॥ व्याख्येयं तत्र चाद्यस्य व्याख्यानं सम्यगुच्यते॥ शोकमोहज्वरादीनि दुःखान्याध्यात्मिकानि वै॥ २॥

आधिभौतिकदुःखानि व्याघ्रसर्पादिजानि च ॥ अतिवातातिवृष्ट्यादि दुःखं स्याच्चाधिदैविकम् ॥ ३ ॥ तेषु दुःखेषु रजसः परिणामात्मकेषु च ॥ प्रारब्धकर्मणाप्तेषु व्याकुलं यस्य नो मनः ॥ ४ ॥ भ्रान्तिकार्यतया तेषु नोद्वेगं भजते बुधः ॥ देहाभिमानिनो दुःखप्राप्तौ सत्यामहो बत ॥ ५ ॥ पापिष्ठोऽहं च धिङ्मां स्यादीदृशं दुःखभागिनम् ॥ को मे दुःखं निराकुर्यादित्युद्वेगोऽभिजायते ॥ ६ ॥ पापानुष्ठानसमये यद्येवं स्यात्तदा ततः ॥ प्रतिबन्धेन पापस्य सफलः स्याज्जडात्मनः ॥ ७ ॥ भोगकाले वृथोद्वेगो मूढस्यैव न तद्विदः ॥ तथा सुखेषु सत्त्वस्य परिणामात्मकेषु च ॥ ८ ॥ प्रारब्धकर्मणाप्तेषु त्रिविधेषु गतस्पृहः ॥ सुखानुभवकाले हि मूढानामविवेकिनाम् ॥ ९ ॥ वृथाकाङ्क्षा विना धर्मं तज्जातीयसुखस्य च ॥ स्थितप्रज्ञस्य च भ्रान्तेरभावात्तामसो भ्रमः ॥ १० ॥ नैवास्त्यतः स्पृहाशून्यः स्वात्मतत्त्वे स्थितः सुधीः ॥ अनात्मन्यात्मधीरेव कारणं सकलभ्रमे ॥ ११ ॥ शोभनाध्यासजो रागो विषये रञ्जनात्मकः ॥ अत्यन्ताभिनिवेशात्मा चित्तवृत्तिविशेषकः ॥ १२ ॥ तद्गोचरस्य दुर्दैवान्नाशके प्रत्युपस्थिते ॥ तन्निराकरणाशक्तेर्यद्दैन्यं तद्भयं स्मृतम् ॥ १३ ॥ तन्निवारणसामर्थ्यं मन्यमानस्य चात्मनः ॥ चित्तवृत्तिविशेषः स्यात्क्रोधोऽभिज्वलनात्मकः ॥ १४ ॥ ते विपर्ययरूपत्वाद्रागाद्या विगता यतः ॥ एतादृशो मुनिर्धीरः स्थितप्रज्ञ उदाहृतः ॥ १५ ॥ एवं स शिष्यशिक्षार्थमनुद्वेगादिका गिरः ॥ स्वानुभूतिप्रकाशेन निर्मलास्ताः प्रभाषते ॥ १६ ॥ एवं मुमुक्षुर्नो हृष्येत्सुखे दुःखे च नोद्विजेत् । रागक्रोधादिशून्यः स्यादित्येवात्राशयो हरेः ॥ १७ ॥ ५६ ॥

भा० टी०—किंच—दुःखेष्विति । यत्तु 'पूर्वश्लोकेन प्रथमप्रश्नस्योत्तरमुक्तम् इदानीं व्युत्थितचित्तस्य स्थितप्रज्ञस्य भाषणोपवेशनगमनानि मूढजनविलक्षणानि व्याख्येयानि तत्र किं प्रभाषेतेत्यस्योत्तरमाह' इति तच्चिन्त्यम् । स्थितधीर्मुनिरुच्यते इति वाक्यशेषेण प्रथमप्रश्नोत्तरप्रतीतेः स्पष्टत्वात् । दुःखेष्वाध्यात्मिकाधिदैविकाऽधिभौतिकेष्वनुद्विग्नमक्षुभितं मनो यस्य स तथा त्रिविधसुखेषु विगता स्पृहाभिलाषो यस्य सः । अत एव वीता रागभयक्रोधा यस्मात्स स्थितधीः स्थितप्रज्ञस्तदोच्यते ॥ ५६ ॥

प० टी०—अथान्यदाह—दुःखेष्विति । दैवात्प्राप्तेषु दुःखेष्वनुद्विग्नमना नोद्विग्नमुद्वेगं प्राप्तं मनो यस्य स तथा । तथा च प्राप्तेषु सुखेषु विगतस्पृहोऽनादरः । अत्र यथासंभवं हेतुमाह—**वीतराग इति** । स्पष्टम् ॥ ५६ ॥

रा० टी०—एतदेव कामशब्दोपलक्षितदोषान्तरत्यागकथनादिना त्रिभिः स्पष्टयति—**दुःखेष्वित्यादिभिः** । दुःखेषु प्राप्तेषु अनुद्विग्नं क्षान्तं मनो यस्य स तथा सुखेषु विषये विगतेच्छः । अशोभने शोभनाध्यासो रागः । रागभयक्रोधाः वीता अपगता यस्मात्स तथा तादृशो मुनिः स्थितधीरुच्यते ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ॥
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

त० टी०—इदानीं स्थितधीः किं प्रभाषेतेत्यस्योत्तरमाह—**यः सर्वत्रेति** । यो मुनिः सर्वविषयेष्वनभिस्नेहश्चित्तासक्तिरहितस्तत एव तत्तत् शुभाशुभं मूढजनाभिमतं शुभं सुखहेतुं सुमिष्टस्निग्धपायसमोदकादिभोजनमिष्टरसादिपानं कोमलं सुरूपं वस्त्रं गृहपानादिकं वा प्राप्य नाभिनन्दति त्वया ममातिप्रियं कृतं त्वत्समो नास्ति कश्चिदित्यभिनन्दनं न करोति । अशुभं दुःखहेतुतया मतमुक्ताद्विपरीतभोजनपानादिमृषासमाधिर्दाम्भिक इत्यादि वाक्यं वा प्राप्य कश्चित्प्रति न द्वेष्टि । अतो रागद्वेषाभावात्स्तुतिनिन्दारहितं सर्वहितमल्पभाषणं करोतीति भावः । तस्य प्रज्ञा प्रतिष्ठिता, स स्थितप्रज्ञ इत्यर्थः ॥ ५७ ॥

म० टी०—किंच सर्वदेहेषु जीवनादिष्वपि यो मुनिरनभिस्नेहः यस्मिन्सत्यन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते स तादृशोन्यविषयः प्रेमापरपर्यायस्तामसो वृत्तिविशेषः स्नेहः सर्वप्रकारेण तद्रहितोऽनभिस्नेहः। भगवति परमात्मनि तु सर्वथाभिस्नेहवान्भवेदेव अनात्मस्नेहाभावस्य तदर्थत्वादिति द्रष्टव्यम् । तत्तत्प्रारब्धकर्मपरिप्रापितं शुभं सुखहेतुं विषयं प्राप्य नाभिनन्दति हर्षविशेषपुरस्सरं न प्रशंसति। अशुभं दुःखहेतुं विषयं प्राप्य न द्वेष्टि अन्तरसूयापूर्वकं न निन्दति। अज्ञस्य हि सुखहेतुर्यः स्वकलत्रादिः स शुभो विषयस्तद्गुणकथनादिप्रवर्तिका धीवृत्तिर्भ्रान्तिरूपाभिनन्दः स च तामसः तद्गुणकथनादेः परप्ररोचनार्थत्वाभावेन व्यर्थत्वात्। एवमसूयोत्पादनेन दुःखहेतुः परकीयविद्याप्रकर्षादिरेनं प्रत्यशुभो विषयस्तं निन्दादिप्रवर्तिका भ्रान्तिरूपा धीवृत्तिर्द्वेषः सोऽपि तामसः तं निन्दाया निवारणार्थत्वाभावेन व्यर्थत्वात्। तावभिनन्दद्वेषौ भ्रान्तिरूपौ तामसौ कथमभ्रान्ते शुद्धसत्त्वे स्थितप्रज्ञे संभवेतां तस्माद्विचालकाभावात् । तस्यानभिस्नेहस्य हर्षविषादरहितस्य मुनेः प्रज्ञा परमात्मतत्त्वविषया प्रतिष्ठिता फलपर्यवसायिनी स स्थितप्रज्ञ इत्यर्थः । एवमन्योपि मुमुक्षुः सर्वत्रानभिस्नेहो भवेत् शुभं प्राप्य न प्रशंसेत् अशुभं प्राप्य न निन्देदित्यभिप्रायः । अत्र च निन्दाप्रशंसादिरूपा वाचो न प्रभाषेत इति व्यतिरेक उक्तः ॥ ५७ ॥

शं० टी०—श्रवणादिना विज्ञातात्मतत्त्वो विदेहकैवल्यार्थी सन् ज्ञानपरिपाकाय समाधौ प्रवृत्तः साधको य एवं वर्तते तस्यैव ज्ञाननिष्ठा सिध्यतीत्याह—य इति। यः समाधौ प्रवृत्तो यतिः सर्वत्र कन्थाकौपीनादिपरिग्रहे देहजीवनेप्यनभिस्नेहः अत्यन्तासक्तिरहितो भवति प्रारब्धवशादागतं यच्छुभमनुकूलं तन्नाभिनन्दति यदशुभं प्रतिकूलं तत् न द्वेष्टि हर्षविषादरहितो भूत्वा सर्वत्र समबुद्धिः सन् समाधावेव तिष्ठति तस्यैव प्रज्ञा प्रतिष्ठिता स्याज्ज्ञाननिष्ठा सिध्यति नेतरस्येत्यर्थः ॥ ५७ ॥

श्री० टी०—कथं भाषेतेत्यस्योत्तरमाह—य इति। यः सर्वत्र पुत्रादिष्वपि अनभिस्नेहशून्यः अत एव बाधितानुवृत्त्या तत्तच्छुभमनुकूलं प्राप्य नाभिनन्दति न प्रशंसति अशुभं प्रतिकूलं प्राप्य न द्वेष्टि न निन्दति किंतु केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः ॥ ५७ ॥

स० टी०—यस्मिन्सत्यन्यदीये हि हानिवृद्धी वृथात्मनि ॥ आरोप्येते तमोवृत्त्या स्नेहः प्रेमापराभिधः ॥ ॥ १ ॥ देहे वित्ते कलत्रादौ स्नेहशून्यः स तादृशः ॥ सुखहेतुं शुभं तत्तद्विषयं प्राप्य कर्मणा ॥ २ ॥ न प्रशंसति हर्षेण दुःखहेतुं तथा शुभम् ॥ विषयं प्राप्य नासूयापूर्वकं तं च निन्दति ॥ ३ ॥ अज्ञस्य सुखहेतुर्यः स्वकलत्रादिकः शुभः ॥ तद्गुणख्यापनोद्युक्ता धीवृत्तिरभिनन्दकः ॥ ४ ॥ तथान्यदीयविद्यादिप्रकर्षोऽज्ञजनं प्रति ॥ अशुभो विषयस्तस्य तन्निन्दादिप्रवर्तिका ॥ ५ ॥ धीवृत्तिर्भ्रान्तिरूपा स्याद्द्वेषः सोऽस्त्यन्ततामसः ॥ तावुभौ शुद्धसत्वेऽस्मिन्संभवेतां कथं मुनौ ॥ ६ ॥ तस्माद्विचालकाभावात्प्रज्ञा तस्यात्मगोचरा ॥ प्रतिष्ठां निश्चलां प्राप्ता फलपर्यवसायिनी ॥ ७ ॥ स्थितप्रज्ञः स्तुतिं निन्दां कस्याप्येवं न भाषते ॥ एवं मुमुक्षुरन्योऽपि निःस्नेहः सकले भवेत् ॥ ८ ॥ न प्रशंसेच्छुभं प्राप्य न निन्देदशुभं गतः ॥ ९ ॥ ५७ ॥

मा० टी०—द्वितीयप्रश्नस्योत्तरमाह—य इति। यो मुनिः सर्वत्र देहजीवनादिष्वपि स्नेहवर्जितः तत्तत्प्राप्य शुभाशुभं शुभं लब्ध्वा नाभिनन्दति हर्षगर्भितं स्तुतिवचनं नाभिभाषते तथाऽशुभं लब्ध्वा न द्वेष्टि द्वेषगर्भितं निन्दावाक्यं न वक्तीत्यर्थः। तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

प० टी०—अथान्यदप्याह—यः सर्वत्रेति । यः सर्वत्र देहादिविषयेष्वथवा सर्वावस्थास्वप्यनभिस्नेहः स्नेहशून्यः। अथ तदेवाह—नाभिनन्दतीति । तच्छुभाशुभं प्राप्य क्रमेण नाभिनन्दति शुभं प्राप्य न प्रशंसत्यशुभं प्राप्य न निन्दति केवलमुदासीनत्वेन तिष्ठति तस्य प्रज्ञा प्रतिष्ठितेति विद्धि ॥ ५७ ॥

रा० टी०—वीतरागभयक्रोधत्वं केन हेतुना भवतीत्यत आह—य इति । अनभिस्नेह इति हेतुगर्भम् । यः सर्वत्राऽनभिस्नेहत्वात्तत्तच्छुभाशुभं प्राप्यापि नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा अपरोक्षधीः प्रतिष्ठिता ॥५७॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ॥
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

त० टी०—किमसीतेत्यस्योत्तरमाह—यदेति । यदा समाधेर्व्युत्थानसमये अयं योगी इन्द्रियार्थेभ्यः शब्दादिविषयेभ्यः सर्वेभ्यः सर्वश इन्द्रियाणि श्रोत्रादिज्ञानेन्द्रियाणि संहरते बहिर्न प्रवर्तयति कर्मेन्द्रियाणि त्वावश्यके कर्मणि संकोचेन प्रवर्तयति च । तत्र दृष्टान्तः कर्मोऽङ्गानीवेति । यथा कूर्मोऽन्यभयात्करचरणाद्यङ्गानि शरीरान्तरुपसंहरति आहारार्थे शनैर्निःसार्य प्रवर्तते च तद्वत् । तस्य प्रज्ञा प्रतिष्ठिता स्थितप्रज्ञ एवमासीतेत्यर्थः ॥ ५८ ॥

म० टी०—इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभते भगवान्—यदेति षड्भिः श्लोकैः । तत्र प्रारब्धकर्मवशाद्व्युत्थानेन विक्षिप्तानीन्द्रियाणि पुनरुपसंहृत्य समाध्यर्थमेव स्थितप्रज्ञस्योपवेशनमिति दर्शयितुमाह—अयामिति । अयं व्युत्थितः सर्वशः सर्वाणीन्द्रियाणि इन्द्रियार्थेभ्यः शब्दादिभ्यः सर्वेभ्यः । चः पुनरर्थे । यदा संहरते पुनरुपसंहरति सङ्कोचयति । तत्र दृष्टान्तः कर्मोऽङ्गानीव । तदा तस्य प्रज्ञा प्रतिष्ठितेति स्पष्टम् । पूर्वश्लोकाभ्यां व्युत्थानदशायामपि सकलतामसवृत्त्यभाव उक्तः । अधुना तु पुनः समाध्यवस्थायां सकलवृत्त्यभाव इति विशेषः ॥ ५८ ॥

शं० टी०—यद्यपि ज्ञाननिष्ठासिद्धेर्महद्वैराग्यं तीव्रमोक्षेच्छा तत्परत्वं चैतत्त्रितयमेव कारणं तथापीन्द्रियनिग्रहाभावे वैराग्यादिज्ञाननिष्ठा च न सिध्यतीत्यतः साधकस्य यतेर्यत्नत इन्द्रियजयः संपाद्यः प्रज्ञासिद्ध्या इत्याह—यदेति । योयं ज्ञाननिष्ठायां प्रवृत्तो यतिर्यथा कूर्मः स्वाङ्गानि परेभ्यो भयात् सर्वशः सर्वाणि तत्तत्काले स्वस्मिन्नेवोपसंहरते तद्वदिन्द्रियार्थेभ्यस्तत्तद्विषयेभ्यो भयाद्रागादिदोषाप्रसक्तिभयात्समाधिविघ्नभयाच्च वागादीनि चक्षुरादीनि च सर्वशः सर्वाणि यदा स्वयं स्वस्मिन्नुपसंहरते समाधिस्थैर्याय तत्तत्प्रवृत्तिं वारयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः ॥ ५८ ॥

श्री० टी०—किंच—यदेति । यदा चायं योगी इन्द्रियार्थेभ्यः शब्दादिभ्यः सकाशात् इन्द्रियाणि संहरते प्रत्याहरति । अनायासेन संहारे दृष्टान्तः अङ्गानि करचरणादीनि कूर्मो यथा स्वभावेनैव आकर्षति तद्वत् ५८॥

स० टी०—किमासीतेतिप्रश्नस्य वक्तुमुत्तरमीश्वरः ॥ षड्भिरारभते श्लोकैः सर्वमङ्गलहेतवे ॥ १ ॥ विक्षिप्तानीन्द्रियाण्येष व्युत्थाने सति कर्मणा ॥ समस्तानीन्द्रियार्थेभ्यः शब्दादिभ्यो यदा स्वयम् ॥ २ ॥ संकोचयति धैर्येण कूर्मोऽङ्गानीव सर्वशः ॥ समाधिकाले तस्यास्ति प्रज्ञा सम्यक् प्रतिष्ठिता ॥ ३ ॥ पूर्वश्लोकद्वये प्रोक्तो व्युत्थानसमये मुनेः ॥ सर्वतामसवृत्तीनामभावस्तत्त्वदर्शनात् ॥ ४ ॥ पुनः समाध्यवस्थायामधुनोक्तो महात्मनः ॥ समस्तवृत्त्यभावोऽत्र विशेषोऽयं विचार्यताम् ॥ ५ ॥ ५८ ॥

भा० टी०—विचारादिनेन्द्रियनिग्रहार्थं स्थितप्रज्ञस्योपवेशनमिति तृतीयप्रश्नस्योत्तरं वक्तुं जितेन्द्रियत्वं तस्य लक्षणमाह—यदेति । यथा कूर्मः कमठो भयादङ्गान्युपसंहरति तथा यदा ज्ञाननिष्ठः यतिः शब्दादिविषयेभ्य इन्द्रियाण्युपसंहरति तदा तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

प० टी०—किंच—यदेति । योगीन्द्रियार्थेभ्यः शब्दादिभ्यः सकाशाद्यदेन्द्रियाणि संहरते प्रत्याहरति तदा तस्य प्रज्ञा प्रतिष्ठितेति विद्धि । अथापरिपक्वमनस इन्द्रियाकर्षणे भूयान् प्रयासो भवति तथा तस्य न

वेति सुखोपायेनेन्द्रियाकर्षणे दृष्टान्तमाह—**यथेति** । यथा कूर्मः कच्छपोऽङ्गानि करचरणादीनि स्वभावेनैवाकर्षति तद्वदलौकिकात्मसुखानुभवे सुषुप्त्यारम्भ इव स्वत एवेन्द्रियवृत्तिः ॥ ५८ ॥

रा० टी०—किंचायं ज्ञानी यदा इन्द्रियार्थेभ्यः शब्दस्पर्शरूपरसगन्धेभ्यः सर्वशः सर्वाणि इन्द्रियाणि श्रोत्रादीनि कूर्मः करचरणाद्यङ्गानि स्वभावेनोपसंहरति तद्वदनायासेनोपसंहरते तस्य प्रज्ञा प्रतिष्ठिता। ज्ञानिनो जिज्ञासोरिवेन्द्रियप्रत्याहरणं न यत्नसाध्यं किंत्वनायासेनैवेति ज्ञापनाय कर्मोऽङ्गानीवेति दृष्टान्तः ॥ ५८ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ॥
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

त० टी०—नन्वयोगिनां मूढानामपि रोगादिवशादिन्द्रियाणि विषयेभ्यः स्वयमुपसंह्रियन्ते कथमिन्द्रियाणां विषयेष्वप्रवर्तनं स्थितप्रज्ञस्य लक्षणमिति चेत्तत्राह—**विषया इति** । निराहारस्य रोगेण भोजनरहितस्य देहिन इन्द्रियशैथिल्याद्विषयाः शब्दस्पर्शादिभोगास्तद्ग्रहणाशक्यत्वाद्विशेषेण निवर्तन्ते इति सत्यं, तथाऽपि रसवर्जं रसो विषयेष्वत्यन्तरागः स्नेहस्तं विना रागेण पुरुषस्य विषयभोगो निवर्तते,परन्तु दुःखनिवृत्तेरनन्तरं मधुराम्लभक्षणपानस्त्रीभोगादि सर्वं सुखं भोक्ष्यामीति मनसि वासना न निवर्तते इत्यर्थः । स रसोऽपि अस्य विदुषः परं परमानन्दं दृष्ट्वा निवर्तते । नहि नित्यानन्तानन्दज्ञस्य विनाशिनि तुच्छानन्दे रागो भवति । परशब्दार्थस्तु सर्वानन्दकारणस्य निखिलहेयगन्धवर्जितस्य (ध्येयस्य) भगवतश्चिद्घनं वपुरेव " एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । यदात्मको भगवांस्तदात्मिका व्यक्तिः किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकश्च " इति श्रुतेः ॥ ५९ ॥

म० टी०—ननु मूढस्यापि रोगादिवशाद्विषयेभ्य इन्द्रियाणामुपसंहरणं भवति तत्कथं तस्य प्रज्ञा प्रतिष्ठितेत्युक्तमत आह—**विषया इति** । निराहारस्य इन्द्रियैर्विषयाननाहरतो देहिनो देहाभिमानवतो मूढस्यापि रोगिणः काष्ठतपस्विनो वा विषयाः शब्दादयो विनिवर्तन्ते किन्तु रसवर्जं रसस्तृष्णा तं वर्जयित्वा अज्ञस्य विषया निवर्तन्ते तद्विषयो रागस्तु न निवर्तत इत्यर्थः । अस्य तु स्थितप्रज्ञस्य परं पुरुषार्थं दृष्ट्वा तदेवाहमस्मीति साक्षात्कृत्य स्थितस्य रसोपि क्षुद्रसुखरागोपि निवर्तते अपिशब्दाद्विषयाश्च । तथाच यावानर्थ इत्यादौ व्याख्यातम् । एवं च सरागविषयनिवृत्तिः स्थितप्रज्ञलक्षणमिति न मूढे व्यभिचार इत्यर्थः । यस्मान्नासति परमात्मसम्यग्दर्शने सरागविषयोच्छेदः तस्मात्सरागविषयोच्छेदिकायाः सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं महता यत्नेन संपादयेदित्यभिप्रायः ॥ ५९ ॥

शं० टी०—नन्विन्द्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्यकारणमित्येतदयुक्तं यत्किंचित्कार्यमुद्दिश्य सर्वेन्द्रियनिग्रहं कृत्वा तिष्ठति पुरुषे इन्द्रियनिग्रहो दृश्यते नतु प्रज्ञास्थैर्यमिति चेन्न तस्य रागवत्त्वेन ब्रह्मज्ञानं तन्निष्ठा च न संभवतीति सूचयितुमाह—**विषया इति** । आह्रियन्ते विषया यैस्ते आहारा इन्द्रियाणि नियमार्थं तेभ्यो निर्गतो यः स निराहार इन्द्रियनिग्रहवान् तापसस्तस्य देहिनः देह एवाहमित्यहंबुद्धेरालम्बनत्वेनास्यास्तीति देही देहाद्यभिमानी तस्य इन्द्रियाणां निगृहीतत्वाद्विषयाः शब्दादयः सर्वे विनिवर्तन्ते विशिष्य निवृत्ता भवन्ति रसवर्जं रागं विना ' रसो रागे गुणे द्रव्ये ' इत्यभिधानाद्रसो रागो न गच्छति ' रागो लिङ्गमबोधस्य ' इति नियमात्सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वज्ञानं रागश्च नैतद्द्वयमेकत्र स्थातुं शक्नोत्यतो रागवत्त्वादेवास्य बोधाभावस्तत एव रुद्धेन्द्रियत्वेपि न प्रज्ञास्थैर्यप्रसक्तिरित्यर्थः । तर्हि कथं तस्य रागनिवृत्तिः प्रज्ञा च सिध्यतीत्याकाङ्क्षायामाह—**रसोपीति** । अस्य मौनेनेन्द्रियनिग्रहेण प्रसादिना

चित्तशुद्धौ सत्यां श्रवणादिजन्यज्ञानेन परं ब्रह्माद्वितीयं दृष्ट्वा इदमेवाहमस्मीति स्वात्मना साक्षात्कृतवतो रसो निर्वतते निर्गच्छति । विषयेषु भोग्यत्वभावनानिवृत्त्या रागनिवृत्तिः । भोग्यत्वभावना तु ब्रह्मदृष्ट्या निवर्तते । सर्वस्य स्वस्य च ब्रह्ममात्रत्वावगमाग्निना भोक्तृभोग्यत्वादिभेदवने निर्दग्धे सति तदाश्रितत्वात्तेन सहैव स्वयं च दग्धो भवतीत्यर्थः । अपिशब्दात्प्रज्ञास्थैर्यं च सिध्यतीति सूचितं भवति ॥ ५९ ॥

श्री० टी०—ननु नेन्द्रियाणां विषयेष्वप्रवृत्तिः स्थितप्रज्ञस्य लक्षणं भवितुमर्हति जडानामातुराणामुपवासपराणां च विषयेष्वप्रवृत्तेरविशेषात्तत्राह—**विषया इति** ।इन्द्रियैर्विषयाणामाहरणं ग्रहणमाहारः । निराहारस्येन्द्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानिनोऽज्ञस्य विषया विनिवर्तन्ते तदनुभवो निवर्तत इत्यर्थः । किंतु रसो रागोऽभिलाषस्तद्वर्जम् । अभिलाषस्तु न निवर्तते इत्यर्थः । रसोऽपि रागोऽपि परं परमात्मानं दृष्ट्वाऽस्य स्थितप्रज्ञस्य स्वतो निवर्तते नश्यतीत्यर्थः । यद्वा निराहारस्योपवासपरस्य विषयाः प्रायशो विनिवर्तन्ते क्षुधासंतप्तस्य शब्दस्पर्शाद्यपेक्षाभावात् । परन्तु रसवर्जं रसापेक्षा तु न निवर्तत इत्यर्थः । शेषं समानम् ॥ ५९ ॥

स० टी०—ननु मूढजनस्यापि रोगादिवशतः स्वयम् ॥ विषयेभ्यो ह्युपरतिरिन्द्रियाणां भवत्यतः ॥ १ ॥ प्रज्ञा प्रतिष्ठिता तस्य कथमुक्तमिहेति चेत् ॥ आतुरस्येन्द्रियैर्भोगाननाहरत आग्रहात् ॥ २ ॥ शब्दादयो निवर्तन्ते यद्वा काष्ठतपस्विनः ॥ विषयेषु निवृत्तेषु तत्तृष्णा न निवर्तते ॥ ३ ॥ स्थितप्रज्ञस्य धीरस्य साक्षात्कृत्य परं पदम् ॥ तदेवाहमिति स्वात्मपदे नित्यं स्थितस्य च ॥ ४ ॥ क्षुद्रानन्दे सरागोऽपि विषयैः सह नश्यति ॥ एवं रागनिवृत्तिस्तु नास्त्यनात्मविदो यतः ॥ ५ ॥ समूलरागाद्युच्छेदस्तत्त्वसाक्षात्कृतेर्मुनेः ॥ तस्मात्त्वमपि तत्त्वैक्यसाक्षात्कारे यतस्व भोः ॥ ६ ॥ ५९ ॥

भा० टी०—ननु निराहारस्य रोगिणो व्रतिनो वापि विषयेभ्य इन्द्रियाणि विनिवर्तन्तेऽत इदं लक्षणं मूढेष्वप्यागतमित्याशङ्क्य परिहरति—**विषया इति** । विषया लक्षणयेन्द्रियाणि शब्दादयो वा रसवर्जं रसो रागस्तं वर्जयित्वा निराहारस्याहारविनिर्मुक्तस्यानाह्रियमाणविषयस्य कष्टेन तपसि स्थितस्य मूर्खस्यापि देहिनो देहवतः विनिवर्तन्ते परं परमात्मानं दृष्ट्वाऽहंब्रह्मास्मीति साक्षादुपलभ्य रसोपि रञ्जनात्मकः सूक्ष्मोप्यस्य यतेर्निवर्तते निर्बीजं विषयज्ञानं संपद्यत इत्यर्थः । तस्माद्रसस्योच्छेदाय सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः ॥ ५९ ॥

प० टी०—ननु प्राप्तोपवासस्य जडस्य रोगाभिभूतस्य यस्य कस्यापि शब्दस्पर्शादयो विषया विनिवर्तन्त एव एवं तस्य तथा निवृत्तविषयस्य स्थितप्रज्ञस्य च को विशेष इत्याह—**विषया इति** । निराहारस्य प्राप्तोपवासस्य यस्य कस्यापि देहाभिमानवतो जीवस्य विषया अप्राप्याः स्वत एव निवर्तन्ते परं तु रसवर्जं रसो रागोऽभिलाषस्तत्तद्विषयापेक्षा तद्वर्जं यद्यपि दुःसाध्यत्वेन विषयेभ्यो निवृत्तिरस्ति तथापि विषयैर्भवितव्यमिति संकल्पोऽस्त्यस्य, स्थितप्रज्ञस्य तु परं परमात्मानं दृष्ट्वा विषयाभिलाषो निवर्तत इति महान्विशेष इत्यर्थः ॥ ५९ ॥

रा० टी०—नन्वेवं कामप्रहाणादिलक्षणसाधनं चेज्ज्ञानं तर्हि सर्वोपि जनः कस्मान्न तत्साधयति कामाद्युपद्रवपरिहारार्थं किं दन्दह्यमानशिराः बम्भ्रमीति इत्यतो निराहारत्वेनेन्द्रियजयः तेनैव च ज्ञानमित्यादि दुःसंपादत्वं ज्ञानस्य—**विषया इत्यादिभिस्त्रिभिः** । तत्राद्येनेन्द्रियजय उच्यते । देहिनो निराहारस्य हेतुगर्भमिदम् । निराहारत्वेन हेतुना विषयाः रूपादयः इन्द्रियाणां तद्भोगशक्तय उपलक्ष्यन्ते ताः निवर्तन्ते । रसवर्जं रसो रागः मानसिकविषयाभिलाषवर्जं निराहारत्वेन विषयाभिलाषो न निवर्तते । रसोप्यस्य देहिनः परं दृष्ट्वा निवर्तते परमात्मदर्शनेनैव विषयाभिलाषोऽप्यातीत्यर्थः । यद्वा रसेतरे रूपगन्धस्पर्शशब्दाः नि-

वर्तन्ते । अत्रापि विषयपदेनेन्द्रियाणां तद्भोगशक्त्यादयो लक्ष्यन्ते । चक्षुरादीन्द्रियाणां रूपादिविषयभोगशक्तयो मनसस्तदाकाङ्क्षाश्च निवर्तन्ते इत्यर्थः । रसवर्जं रसशब्दः प्राग्वल्लाक्षणिकः रसनेन्द्रियस्य रसभोगशक्तिवर्जं मानसिकरसाकाङ्क्षावर्जमिति रसविषयकमनोगताकाङ्क्षा रसनेन्द्रियगतरसभोगशक्तिश्च निराहारत्वेन हेतुना न निवर्तत इत्यर्थः । तद्द्वयं कदा निवर्तत इत्यत उक्तम्—रसोपीति । अस्य देहिनः रसः मानसिको रसविषयको रागः रसनेन्द्रियस्य तद्भोगशक्तिश्च परं दृष्ट्वा निवर्तते । अचेतने चेतनवदुपचाराद्रसः परं दृष्ट्वा निवर्तत इत्युक्तमिति ज्ञेयम् । अयमर्थः । बाह्येन्द्रियाणि विषयसन्निधानेपि न तैः सन्निकृष्यन्ते । सन्निकृष्टान्यपि मनस्तदाभिमुख्येन हरन्ति । अपहृतेपि मनसि न विषयरागो जायते । तदा नात्मनः क्षोभो भवति इत्येष इन्द्रियजयः । सोयं संग्रहेण द्वेधा भवति बाह्येन्द्रियाणां शक्तिजयान्मनसो रागक्षयाच्च । एतद्द्वयं च जिज्ञासोर्निराहारत्वेन ज्ञानिनो ब्रह्मदर्शनेन भवतीत्येवमिन्द्रियजयस्य महाप्रयत्नसाध्यत्वमिति ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ॥
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

त० टी०—स्थितप्रज्ञतायामिन्द्रियसंयमस्य कारणत्वमुक्तं तदभावे दोषमाह—यतत इति । हे कौन्तेय ! विपश्चितः विविधं गुणदोषं पश्यतो विवेकिनः पुरुषस्य यततोऽपि मनो ध्येयरूपे प्रवणीकरणार्थं भूयो भूयो विषयेभ्यो निवर्तने प्रयतमानस्यापि मनः सर्वेन्द्रियाणि प्रसभं बलात्कारेण हरन्ति विषयेषु रागवत्कुर्वन्ति । यततोऽपि विपश्चितश्च कथं हरन्ति तत्राह—प्रमाथीनीति । प्रमथनशीलानि अतस्तद्विवेकं यत्नं चाकिञ्चित्कृत्वा विषयानुध्याने प्रवर्तयन्तीत्यर्थः ॥ ६० ॥

म० टी०—तत्र प्रज्ञास्थैर्ये बाह्येन्द्रियनिग्रहो मनोनिग्रहश्चासाधारणं कारणं तदुभयाभावे प्रज्ञानाशदर्शनादिति वक्तुं बाह्येन्द्रियनिग्रहाभावे प्रथमं दोषमाह—**यतत** इति । हे कौन्तेय ! यततः भूयोभूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतोऽपि । चक्षिङो ङित्त्वकरणादनुदात्तेतोऽनावश्यकमात्मनेपदमिति ज्ञापनात्परस्मैपदमविरुद्धम् । विपश्चितः अत्यन्तविवेकिनोपि पुरुषस्य मनः क्षणमात्रनिर्विकारं कृतमपि इन्द्रियाणि हरन्ति विकारं प्रापयन्ति । ननु विरोधिनि विवेके सति कुतो विकारप्राप्तिस्तत्राह—**प्रमाथीनीति** । प्रमाथीनि प्रमथनशीलानि अतिबलीयस्त्वाद्विवेकोपमर्दनक्षमाणि अतः प्रसह्य बलात्कारेण पश्यत्येव विपश्चिति स्वामिनि विवेके च रक्षके सति सर्वप्रमाथित्वादेवेन्द्रियाणि विवेकजप्रज्ञायां प्रविष्टं मनस्ततः प्रच्याव्य स्वविषयाविष्टत्वेन हरन्तीत्यर्थः । हिशब्दः प्रसिद्धिं द्योतयति प्रसिद्धो ह्ययमर्थो लोके यथा प्रमाथिनो दस्यवः प्रसभमेव धनिनं धनरक्षकं चाभिभूय तयोः पश्यतोरेव धनं हरन्ति तथेन्द्रियाण्यपि विषयसंनिधाने मनो हरन्तीति ॥ ६० ॥

शं० टी०—यत एवमतः सिद्धं मुमुक्षोर्यतेः सर्वस्य ब्रह्ममात्रत्वज्ञानं संपादनीयं रागद्वेषादिनिःशेषनिवृत्तये निष्प्रवृत्तये विदेहमुक्तये चेति विदेहकैवल्यसिद्धेः कारणभूतब्रह्मज्ञानस्य सम्यक्त्वसिद्धये समाधौ प्रवृत्तस्य यतेरिन्द्रियनिग्रह एव आदाववश्यं कर्तव्यस्तदभावे महाननर्थ इति सूचयितुमाह—**यतत इति** । हि यस्मात्कारणाद्यततः समाधिना ज्ञानस्याऽप्रतिबन्धत्वसिद्धये प्रयत्नं कुर्वतः समाधौ तिष्ठतोपीत्यर्थः । विपश्चितः विषयजातं मायिकमसत्तुच्छमिति विषयप्रवृत्तिर्बन्धाय भवतीति च विजानतोपि पुरुषस्य मुमुक्षोर्मनः मनुते ब्रह्मानेनेति मनः सर्वत्र सदवलोकनकारणं इन्द्रियाणि प्रमाथीनि प्रमथितुं विषयदर्शनमात्रेण व्याकुलीकर्तुं शीलं येषां तानि प्रमाथीनीन्द्रियाणि रागादिदोषग्रस्तानि प्रसभं बलात्कारेणास्य पश्यतः

सतो विवेकयुक्तमपि मनः हरन्ति गृहीत्वा विषयेषु पातयन्ति स्वरूपाच्च्यावयन्तीत्येतदिन्द्रियनिग्रहमकुर्वतः स्वरूपभ्रंश एव विदुषो महाननर्थः ॥ ६० ॥

श्री० टी०—इन्द्रियसंयमं विना तु स्थितप्रज्ञता न संभवति अतः साधकावस्थायां तत्र महान्प्रयत्नः कर्तव्य इत्याह—**यततो ह्यपीति** द्वाभ्याम् । यततः मोक्षे प्रयतमानस्यापि विपश्चितो विवेकिनोऽपि मनः इन्द्रियाणि प्रसभं बलाद्धरन्ति यतः प्रमाथीनि प्रमथनशीलानि प्रक्षोभकाणि ॥ ६० ॥

स० टी०—प्रज्ञास्थैर्ये परो हेतुः सेन्द्रियस्वान्तनिग्रहः ॥ तदभावे परा हानिः प्रज्ञाया इति कथ्यते ॥ १ ॥ भूयोभूयोऽपि भोगेषु दोषदृष्टिं प्रकुर्वतः ॥ सम्यग्विवेकिनोऽप्येतन्मनः स्थितमपि क्षणम् ॥ २ ॥ विकारं प्रापयन्त्येतानीन्द्रियाणि प्रसह्य तत् ॥ पश्यत्येव बलात्कारात्स्वामिन्यपि विपश्चिति ॥ ३ ॥ क्षोभकाणि बलीयस्त्वाद्विवेके सति रक्षके ॥ प्रविष्टं तानि प्रच्याव्य विवेकजमतौ मनः ॥ ४ ॥ विषयावेशसामर्थ्याद्धरन्त्येवेन्द्रियाण्यदः ॥ यथा प्रमाथिनश्चौराः प्रसह्य धनिनो धनम् ॥ ५ ॥ हरन्त्येवं मनः स्वेस्वे विषयेऽपीन्द्रियाणि वै ॥ ६ ॥ ६० ॥

भा० टी०—सम्यग्दर्शनं विना रसस्योच्छेदो नास्तीत्युक्तम् । तच्चाजितेन्द्रियस्य दुर्लभमिन्द्रियनिग्रहश्चातियत्नसाध्यः । तस्मात्सम्यग्दर्शनलक्षणं प्रज्ञास्थैर्यं चिकीर्षता आदाविन्द्रियजयः कार्य इत्याशयेन तदकरणे दोषमाह—**यतत इति** । हि यस्माद्विपश्चितो बुद्धिमतः प्रज्ञास्थैर्यार्थं यततो यतमानस्यापीन्द्रियाणि प्रमथनशीलानि पुरुषं विषयाभिमुखं कर्तुं समर्थानि तं व्याकुलीकृत्य प्रसभं बलात्कारेण विवेकयुक्तमपि मनो हरन्ति । कौन्तेयेति संबोधयन् इन्द्रियापेक्षया पुरुषस्य दौर्बल्यं सूचयति ॥ ६० ॥

प० टी०—एवं विस्मृतव्यवहारस्य स्थितप्रज्ञस्य दशामुक्त्वेदानीमभ्यासादिपूर्वरूपवतो दशामाह द्वितयेन—**यतत इत्यादि** । यतत आत्मप्राप्त्यर्थे प्रयत्नं कुर्वतोऽपि विपश्चित आत्मानात्मविवेकवतः पुरुषस्येन्द्रियाणि चक्षुरादीन्यनादिविषयविक्षिप्ततया प्रमाथीनि क्षोभकाण्यात्माभिमुखमपि मनः प्रसभमकस्माद्धरन्ति विषयविक्षिप्तं कुर्वन्ति ॥ ६० ॥

रा० टी०—नन्विन्द्रियजयार्थं किं निराहारत्वरूपमहाप्रयत्नेन प्रत्याहारादिसाधारणयत्नेनापि तत्संभवात् । तथा किं ब्रह्मापरोक्षज्ञानेन नित्यानित्यविवेकज्ञानेनापि रागनिवृत्त्युपपत्तेरित्यत आह—**यततो ह्यपीति** । विपश्चितः परोक्षज्ञानिनः यततोपि साधारणप्रयत्नवतोऽपि पुरुषस्य देहाभिमानिनः इन्द्रियाणि मनः प्रसभं बलात् हरन्ति स्वयं विषयसन्निकृष्टानि सन्ति तदभिमुखं कृत्वा तद्रागीकुर्वन्तीत्यर्थः । तावता आत्मनः कथमिन्द्रियाविजय इत्यत आह—प्रमाथीनीति । प्रमथनशीलानि पुरुषस्य क्षोभणशीलानि न तेन तानि जितानि यो हि यं व्याकुलं करोति स तेन विजित इत्युच्यते । अतो महाप्रयत्नः प्रागुक्तदिशा कार्य इति । यदि साधारणयत्नविवेकज्ञानाभ्यामिन्द्रियाणि न जीयन्ते तर्ह्यशक्यान्येव तानि जेतुं निराहारत्वे देहावस्थित्यसंभवात् ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

त० टी०—यस्मादवशीकृतेन्द्रियाण्यनर्थकारणानि तस्मान्मुमुक्षुणा प्रथमं तज्जयः कर्तव्य इत्याह—**तानीति** । तानि दुष्टानि सर्वाणीन्द्रियाणि संयम्य सम्यङ्नियम्य वशीकृत्य युक्तः ध्येये नियुक्तमना आसीत समादध्यादित्यर्थः । ननु यदि तानि प्रमाथीनि तर्हि कथं तेषां संयमः स्यादित्यत आह—मत्पर इति । अहं हृषीकेशः पर उत्कृष्ट उपायो यस्य स तथा मदाश्रयो भूत्वा अनायासेन जयेदित्यर्थः ।

मदाश्रयणं विनेन्द्रियाणि वशीकर्तुमशक्यानीति भावः। इन्द्रियवशीकरणमेव पुरुषार्थकारणमित्याह–**वशे हीति**। हीत्यवधारणे। यस्य साधकस्येन्द्रियाणि वशे भवन्ति तस्यैव प्रज्ञा प्रतिष्ठिता भवति नान्यस्येत्यर्थः। एतावता किमासीतेत्यस्योत्तरमुक्तम् ॥ ६१ ॥

म० टी०—एवं तर्हि तत्र कः प्रतीकार इत्यत आह—**तानीति**। तानि इन्द्रियाणि सर्वाणि ज्ञानकर्मसाधनभूतानि संयम्य वशीकृत्य युक्तः समाहितः निगृहीतमनाः सन्नासीत निर्व्यापारस्तिष्ठेत्। प्रमाथिनां कथं स्ववशीकरणमिति चेत्तत्राह—मत्पर इति। अहं सर्वात्मा वासुदेव एव पर उत्कृष्ट उपादेयो यस्य स मत्परः एकान्तमद्भक्त इत्यर्थः। तथा चोक्तम् 'न वासुदेवभक्तानामशुभं विद्यते क्वचित्' इति। यथा हि लोके बलवन्तं राजानमाश्रित्य दस्यवो निगृह्यन्ते राजाश्रितोयमिति ज्ञात्वा च स्वयमेव तद्वश्या भवन्ति तथैव भगवन्तं सर्वान्तर्यामिणमाश्रित्य तत्प्रभावेणैव दुष्टानीन्द्रियाणि निग्राह्याणि। पुनश्च भगवदाश्रितोयमिति मत्वा तानि तद्वश्यान्येव भवन्तीति भावः। यथा च भगवद्भक्तेर्महाप्रभावत्वं तथा विस्तरेणाग्रे व्याख्यास्यामः। इन्द्रियवशीकारे फलमाह—**वशे हीति**। स्पष्टम्। तदेतद्वशीकृतेन्द्रियः सन्नासीतेति प्रश्नस्योत्तरमुक्तं भवति ॥६१॥

शं० टी०—यस्मादेवं तस्मादिन्द्रियसंयमवत एव स्थितप्रज्ञत्वमाह—**तानीति**। विषयेषु पुनःपुनर्दोषदर्शनेन बन्धकत्वभयेन च रागद्वेषाभ्यां वियोजितानि तानीन्द्रियाणि सर्वाणि संयम्य तेषु प्रवृत्तिं निरुध्य तत्तद्गोलकेषु स्थापयित्वा ब्रह्मविद्यातिर्युक्तो योगेन युक्तः समाहितचित्तः वृत्तेर्ब्रह्माकारतामापाद्येत्यर्थः। मत्परः अहमेव परः परमात्मेति परस्मिन्नेव ब्रह्मण्यहंधीर्यस्य स मत्परः "सर्वमिदमहं च ब्रह्मैव" इति सर्वं स्वं च ब्रह्मैव पश्यन्नासीत प्रत्यग्दृष्ट्या सर्वदा तिष्ठेदित्यर्थः। एवं नित्यं निरन्तरं पश्यतो यस्य यतेरिन्द्रियाणि विषयग्रहानवकाशतया नीरागाणि भूत्वा वशे वश्यानि भवन्ति तस्य हि खलु प्रज्ञा प्रतिष्ठिता निश्चला भवति मोक्षश्च सिध्यति नैवेतरस्येत्यर्थः ॥ ६१ ॥

श्री० टी०—यस्मादेवं तस्मात्—**तानीति**। युक्तो योगी तानीन्द्रियाणि संयम्य मत्परः सन् आसीत। यस्य वशे वशवर्तीनि। एतेन कथमासीतेति प्रश्नस्य वशीकृतेन्द्रियः सन् आसीतेत्युत्तरमुक्तं भवति ॥६१॥

स० टी०—एवं तर्हि प्रतीकारः कस्तत्रेत्यत आह तम् ॥ तानीन्द्रियाणि धीकर्मसाधकान्यखिलान्यपि ॥ १ ॥ समाहितो वशीकृत्य निगृहीतमनाश्च सन् ॥ निर्व्यापारतया तिष्ठेन्मां समाश्रित्य मत्परः ॥ २ ॥ वासुदेवोऽहमेवेशो यस्योपादेय आन्तरः ॥ स चास्त्येकान्तमद्भक्तो वशीकर्तुं क्षमोऽखिलम् ॥३॥ यथा राजानमाश्रित्य निगृह्यन्ते हि दस्यवः ॥ राजाश्रितोऽयमित्येवं ज्ञात्वा वश्या भवन्ति ते ॥ ४ ॥ भगवन्तं तथाश्रित्य तत्प्रभावेन सर्वशः ॥ निगृह्याणीन्द्रियाण्येव क्षोभकाण्यपि योगिनः ॥ ५ ॥ कृष्णाश्रितोऽयं मत्वेत्थं स्वयं वश्यानि सन्ति वै ॥ माहात्म्यं भगवद्भक्तेः स्फुटं चाग्रे भविष्यति ॥ ६ ॥ इन्द्रियाणां वशीकारे फलमाह रमापतिः ॥ वशे हीति स्पष्टमिदं किमासीतेति पृच्छतः ॥ ७ ॥ उत्तरं प्रोक्तमित्येतदतः कृत्यं यतेः शृणु ॥ ८ ॥ ६१ ॥

भा० टी०—तस्मात्तानि सर्वाणि वशीकृत्य युक्तः समाहितः सन् मत्परोहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परो नान्यस्तस्मादहमित्यासीतेत्यर्थः। स्पष्टमन्यत् ॥ ६१ ॥

प० टी०—तथा मनोनिग्रहव्यतिरेकेण बाह्येन्द्रियनिग्रहो मृषैव भवत्येवं तानि सर्वाणि संयम्यान्तरिन्द्रियनिग्रहेण स्वाधीनानि कृत्वा मत्परः सन् मदाश्रयवर्तित्वेन मुक्तः सन्नासीत। एवमनेनापि प्रकारेणेन्द्रियाणि यस्य वशे भवन्ति तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः। अनेन किमासीतेत्युत्तरमुक्तं भवति। तदुक्तमर्थोपनिषत्सु " यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सह। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ यस्तु विज्ञानवान् भवति युक्तेन मनसा सह। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इति। स्पष्टार्थेयं श्रुतिः ॥ ६१ ॥

रा० टी०—इन्द्रियजयस्य ब्रह्मदृष्टिसाध्यतयाभिमतत्वेन तस्य तद्धेतुत्वे विवक्षिते सत्यन्योन्याश्रयप्रसङ्गादित्यत आह—तानीति। तानीन्द्रियाणि सर्वाणि संयम्य विषयेभ्य उपसंहृत्य मत्परः अहमेव भगवान्कृष्ण एव परः सर्वोत्कृष्टो यस्य स मत्परः भगवानेव सर्वोत्तम इति ज्ञात्वा युक्तः। समाध्यर्थस्य युजे रूपम्। भगवति मनो युञ्जान इत्यर्थः। आसीत तिष्ठेत्। अयं भावः। यद्यपीन्द्रियजये परोक्तः प्रत्याहारादिः साधारणप्रयत्नो न साधनं नापि निराहारत्वादिकं प्रागुक्तमशक्यं तथापि तत्प्रतिनिधिना महाप्रयत्नेन जेयानि। तत्र भगवतः सर्वोत्तमत्वज्ञानपूर्वं तस्मिन्नेव निरन्तरं मनोयोजनमिन्द्रियजये मुख्यं साधनं निराहारत्वादिकं तु वस्तुगतिप्रदर्शनार्थमेवोक्तमिति। यदर्थं सार्धश्लोकद्वयेनेन्द्रियजयरूपोपोद्घात उक्तः। अथेदानीं महाप्रयत्नेन साधितेन्द्रियजयस्य ज्ञानसिद्धिः फलमित्याह—वशे हीति। यस्य वशे इन्द्रियाणि वर्तन्ते तस्य प्रज्ञा प्रतिष्ठितेति। यत एवं महायाससाध्येन्द्रियजयफलं ज्ञानमत एवायासभीरुर्जनो न तत्साधयतीति। ननु ज्ञानस्योक्तलक्षणाभावादिति श्लोकत्रयतात्पर्यार्थः। अत्रोक्तमिन्द्रियजयस्य ज्ञानरूपं फलं न साक्षादिति रागद्वेषवियुक्तैरित्यादौ व्यक्तीभविष्यतीति ज्ञेयम्॥ ६१॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते॥
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते॥ ६२॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥ ६३॥

त० टी०—एवं वशीकृतेन्द्रियत्वं स्थितप्रज्ञतालक्षणमुक्तमिदानीं बाह्येन्द्रियसंयमे सत्यपि मनःसंयमाभावेऽनर्थप्राप्तिः स्यादित्याह—ध्यायत इति द्वाभ्याम्। विषयान् रूपरसादीन्ध्यायतो मनसा पुनः पुनश्चिन्तयतः पुंसस्तेषु सङ्ग आसक्तिः सुखहेतुबुद्ध्या प्रीत्यतिशय उपजायते। सङ्गात्कामः सङ्गस्य परिणामोऽवस्थाविशेषः, यस्मिन् जाते पुरुषो विषयाननुभूय बधिरोऽन्ध उन्मत्त इव जायते स कामः सम्यग्जायते। कामात् क्रोधोऽभिजायते कामे जाते विषयप्राप्तिप्रतिबन्धे सति तत्प्रतिबन्धकेषु जनेषु अभिज्वलनात्मकोऽन्तःकरणपरिणामः क्रोधः साक्षाज्जायते। क्रोधात्संमोहः कार्याकार्याविवेको भवति। संमोहात् स्मृतिविभ्रमः स्मृतेराचार्योपदिष्टशास्त्रार्थविचारस्य विभ्रमो भ्रंशो भवति। स्मृतिभ्रंशात्स्वस्वरूपात्मव्यवसायात्मिकाया बुद्धेर्नाशः। बुद्धिनाशात्प्रणश्यति सर्वपुरुषार्थहीनो मृततुल्यो भवतीत्यर्थः। तस्मान्मनोनिग्रहोऽवश्यं कर्तव्य इति भावः॥ ६२॥ ६३॥

म० टी०—ननु मनसो बाह्येन्द्रियप्रवृत्तिद्वाराऽनर्थहेतुत्वं निगृहीतबाह्येन्द्रियस्य तूत्खातदंष्ट्रोरगवन्मनस्यनिगृहीतेऽपि न कापि क्षतिः बाह्योद्योगाभावेनैव कृतकृत्यत्वादतो युक्त आसीतेति व्यर्थमुक्तमित्याशङ्क्य निगृहीतबाह्येन्द्रियस्यापि युक्तत्वाभावे सर्वानर्थप्राप्तिमाह—ध्यायत इति द्वाभ्याम्। निगृहीतबाह्येन्द्रियस्यापि शब्दादीन् विषयान् ध्यायतो मनसा पुनः पुनश्चिन्तयतः पुंसस्तेषु विषयेषु सङ्गः आसङ्गः ममात्यन्तं सुखहेतव एत इत्येवं शोभनाध्यासलक्षणप्रीतिविशेषः उपजायते। सङ्गात् सुखहेतुत्वज्ञानलक्षणात् संजायते कामः ममैते भवन्त्विति तृष्णाविशेषः। तस्मात् कामात् कुतश्चित्प्रतिहन्यमानात् प्रतिघातकविषयः क्रोधोऽभिज्वलनात्माभिजायते। क्रोधाद्भवति संमोहः कार्याकार्यविवेकाभावरूपः। संमोहात्स्मृतिविभ्रमः स्मृतेः शास्त्राचार्योपदिष्टार्थानुसन्धानस्य विभ्रमो विचलनं विभ्रंशः तस्माच्च स्मृतिभ्रंशात् बुद्धेरैकात्म्याकारमनोवृत्तेर्नाशः विपरीतभावनोपचयदोषेण प्रतिबन्धाद् अनुत्पत्तिरुत्पन्नायाश्च फलायोग्यत्वेन विलयः। बुद्धिनाशात् प्रणश्यति तस्याश्च फलभूताया बुद्धेर्विलोपात्प्रणश्यति सर्वपुरुषार्थायोग्यो भवति। यो हि पुरुषार्थायोग्यो जातः स मृत एवेति

लोके व्यवह्रियते अतः प्रणश्यतीत्युक्तम् । यस्मादेवं मनसो निग्रहाभावे निगृहीतबाह्येन्द्रियस्यापि परमानर्थप्राप्तिस्तस्मान्महता प्रयत्नेन मनो निगृह्णीयादित्यभिप्रायः । अतो युक्तमुक्तं तानि सर्वाणि संयम्य युक्त आसीतेति ॥ ६२ ॥ ६३ ॥

शं० टी०—नन्विन्द्रियैरन्तःकरणं विषयेषु पातितं चेदनेनास्य विदुषः कोवाऽनर्थ इति चेद्विषयाभिध्यानमेव सर्वानर्थबीजं तेनानर्थहेतुपरम्पराऽऽपतति तयापरावरैकत्वविज्ञानं विनश्यति तन्नाशाज्जननमरणतरङ्गमालिनि संसाराब्धौ पतित्वा स्वयं च विद्वान् विनश्यतीति विदुषोपि बहिर्मुखत्वस्य जन्मादिदुःखप्रवाहपातानपायित्वमेव फलं नतु मुक्तिः कारणाभावात् रागद्वेषाभ्यां विषयेषु प्रविष्टस्य विदुषोपि विषयाभिध्यानमेव प्रसज्यते नतु ब्रह्मध्यानमिति सर्वानर्थमूलं विषयाभिध्यानं तत्कार्यं च प्रतिपादयति—ध्यायत इति द्वाभ्याम् । विषयान् शब्दादीन् ध्यायतस्तेषु रम्यत्वमरम्यत्वं च इदं भोग्यमिति वा चिन्तयतः पुंसः सङ्गस्तेषु रम्यत्वाकारेण वा भोग्यत्वाकारेण वा भावितेषु भोगेषु प्रीतिः प्राक्तनसंस्कारादासक्तिरुपजायते सद्य उत्पद्यते सङ्गात्प्रीत्या तत्र ममामुना भवितव्यमिति कामो भोगेच्छावेगः सम्यक् जायते प्रस्तो येनाऽभोग्यमपि कलत्रादि स्त्रैणो भगिन्यादि वा भोग्यत्वबुद्ध्या भोक्तुं त्वरयते पुरुषः । कामाद्येनकेनापि प्रतिबन्धेन हतात् क्रोधोऽभिजायते परवशीकृतात्मनः परापकारकरणहेतुबुद्धिविशेषः क्रोधः ॥ ६२ ॥ क्रोधादिति । क्रोधात्संमोहो वैचित्यं कार्याकार्यविवेकशून्यता जायते । क्रोधाविष्टः खलु संमोहेन महतामप्यपचरति गुरुमपि धिक्करोति । संमोहादुक्तलक्षणात्स्मृतिविभ्रमो जायते । वेदान्तश्रवणजन्यज्ञानेन ब्रह्मैवाहमिति पुनः पुनः कृतस्वानुभवसंस्कारजस्तदाकारपरिणामिबुद्धिवृत्तिविशेषः स्मृतिरित्युच्यते । तस्या विभ्रमो भ्रंशः स्मृतिहेतुषु सत्स्वपि स्मृतेरनुदयः । तस्मात् स्मृतिभ्रंशाद्बुद्धिनाशः । बुद्धिर्ब्रह्ममयी वृत्तिस्तस्याः स्वविषयकस्मृतिविनाशान्नाशो भवति । यथा पुरोवर्तिन्येव पुरुषे पुत्र इति स्मृतिरस्ति चेन्ममाऽयं पुत्र इति पुत्राकारेण बुद्धिर्जायते । भ्रान्तस्य तु स्मृत्यसंभवात्पुत्राकारा बुद्धिर्न जायते । तथा ब्रह्मण्यपरोक्षेपि विषयव्यामोहाक्रान्तचित्तस्य विदुषः स्वविषयकस्मृत्यभावादिदमहं च ब्रह्मैवेति दृश्याकारतामुत्सृज्य जगतः स्वस्य च ब्रह्माकारत्वावगाहिन्यखण्डात्मिका चिन्मयी वृत्तिर्न जायते किंतु भोक्तृभोग्याकारवृत्तिभिः स्वयं तिरोहिता भूत्वा नष्टा भवति । एवं स्वविज्ञानविनाशाद्विद्वान् स्वयमपि प्रणश्यति प्रकर्षेण नश्यति प्रणश्यति । संसारकारागारे पतितत्वात्कदाचिदपि मुक्तिं न प्राप्नोति विषं पिबतोऽमरत्वमिव असन्मार्गे प्रविष्टस्य सद्गतिर्न संभवत्यतो विषयाणामवकाशमदत्वा सर्वेन्द्रियनिग्रहपूर्वकं समाधिं कुर्वत एव सम्यग्ज्ञानं तत्फलं च सिध्यतीति सिद्धम् ॥ ६३ ॥

श्री० टी०—बाह्येन्द्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह—ध्यायत इति द्वाभ्याम् । गुणबुध्या विषयान्ध्यायतः पुरुषस्य तेषु सङ्ग आसक्तिर्भवति आसक्त्या च तेष्वधिकः कामो भवति कामाच्च केनचित्प्रतिहतात्क्रोधो भवति । किंच—क्रोधादिति । क्रोधात्संमोहः कार्याकार्यविवेकाभावः । ततः शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विचलनं विभ्रंशः । ततो बुद्धेश्चेतनायाः विनाशः वृक्षादिष्विवाभिभवः । ततः प्रणश्यति मृततुल्यो भवति ॥ ६२ ॥ ६३ ॥

स० टी०—नन्विन्द्रियवशीकारे जाते स्वान्तविनिग्रहः ॥ स्वतः सिद्धः किमर्थं तदासीतेति पृथक् श्रमः ॥ १ ॥ इन्द्रियद्वारतोऽनर्थकरं नैव स्वतो मनः ॥ उत्खातदंष्ट्रोरगवदानिरोधेऽस्य का क्षतिः ॥ २ ॥ मैवं मनो निरोद्धव्यं सर्वानर्थकरं यतः ॥ निगृहीतेन्द्रियस्यापि मनसा विषयान्प्रियान् ॥ ३ ॥ पुंसश्चिन्तयतस्तेषु शोभनाध्यासहेतुकः ॥ प्रीतिभेदो य आसङ्गो ममैते सुखहेतवः ॥ ४ ॥ इत्येवं जायते तस्मात्सङ्गात्कामः प्रजायते ॥ भवन्त्वेते ममेत्येवं तृष्णाभेदस्ततोऽपि च ॥ ५ ॥ कुतश्चिद्धन्यमानात्तत्प्रतिघातकगो-

चरः ॥ क्रोधोऽभिज्वलनात्मास्य जायते क्रोधतस्ततः ॥ ६ ॥ कार्याकार्यविवेकस्याभावः संमोह उद्भवेत् ॥ येनाप्तगुरुमित्रादीन्यथाक्रुश्यति मूढधीः ॥ ७ ॥ संमोहाज्जायते तस्मात्स्मृतेर्भ्रंशो ह्यनर्थदः ॥ शास्त्राचार्योपदिष्टार्थानुसंधानस्य विभ्रमः ॥ ८ ॥ ततो ब्रह्मैक्यधीवृत्तेः प्रतिबन्धो विपर्ययात् ॥ बुद्धेर्नाशस्ततस्तस्या विलोपादेव पूरुषः ॥ ९ ॥ पुमर्थायोग्यतापन्नो मृत एवेति कथ्यते ॥ यस्मादेवं हि मनसो निग्रहाभावतः पुमान् ॥ १० ॥ मृततुल्यो भवेत्तस्माद्यतस्वास्य विनिग्रहे ॥ अतो युक्तं मयोक्तं तदासीतेति पुरा तव ॥ ११ ॥ श्रीमत्कृष्णपदारविन्दसुरभौ वृत्तिं वहद्भ्रामरीं श्रद्धाभक्तियुतं मनोऽनवरतं यावत्प्रविष्टं नहि ॥ तावत्क्षोभकशीलतां प्रतिपदं नाद्धा जहाति स्विकां चाञ्चल्यं प्रजहाति तत्र निरतं चेतः स्वयं त्वाधिदम् ॥ १२ ॥ ६२ ॥ ६३ ॥

भा० टी०—इन्द्रियस्य जयः प्रयत्नेन संपाद्य इत्युक्तं तत्र मनसा विषयाचिन्तनाभ्यास एवोपाय इत्याशयेन व्यतिरेके दोषमाह—**ध्यायत इति** । विषयांश्चिन्तयतः पुरुषस्य तेषु प्रीतिरुपजायते सङ्गादभिलाषः संजायते कामात्कुतश्चित्प्रतिहतात् क्रोधोऽभिजायते क्रोधात्कर्तव्याकर्तव्यविषये विभ्रमो भवति क्रुद्धो हि संमूढो गुरूनप्याक्रोशति तस्मात् स्मृतेः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः विभ्रंशः स्यात्, स्मृत्युत्पत्तिनिमित्तप्राप्तावनुत्पत्तिः, ततः कार्याकार्यविवेकायोग्यता बुद्धेर्नाशः, तस्मात्प्रणश्यति जीवन्नेव मृतः पुरुषार्थायोग्यो भवतीति द्वयोरर्थः । विषयध्यानमेव सर्वानर्थबीजमित्यभिप्रायः ॥ ६२ ॥ ६३ ॥

प० टी०—एवं बाह्येन्द्रियसंयमाभावे दोषमुक्त्वाऽधुना मनःसंयमाभावे दोषमाह—**ध्यायत इति** द्वाभ्याम् । विषयान् ध्यायतः पुंसः पुरुषस्य तेषु सङ्ग आसक्तिर्भवति ततः सङ्गात्कामस्तैर्विषयैरवश्यं भवितव्यमिति तदर्जन आदरो भवति तत्र केनचिदन्तराये कृते क्रोधो भवति क्रोधात्संमोहः कार्याकार्यविचाराभावस्तस्मात्स्मृतिविभ्रमः शास्त्राचार्योपदिष्टः कीदृशोऽहं किं करोमीति न स्मरति तस्माद्बुद्धिनाशस्तस्मात्प्रणश्यति लोकनिन्दास्पदत्वेन जीवन्मृततुल्यो भवति । एवमनेन प्रथमतो विषयानुस्मृतिः परिहार्येत्युक्तम् । उक्तं च 'लोक एष विषयानुरञ्जनं दुःखगर्भमपि मन्यते सुखम् । आमिषं बडिशगर्भमप्यहो मोहतो ग्रसति यद्वदण्डजः' इति ॥ ६२ ॥ ६३ ॥

रा० टी०—मत्परो युक्त आसीतेति हरिसर्वोत्तमत्वज्ञानपूर्वं तस्मिन्नेव मनोयोजनमिन्द्रियजयस्य मुख्यं साधनं रागद्वेषवियुक्तैरिति वक्ष्यमाणदिशा रागादिपरिहारोऽप्यपरं साधनम् । तत्र रागादेर्यत्कारणं यच्च फलं तदुभयज्ञाने सति तत्परित्यागो भवत्यतः तदुपोद्घातत्वेन तदुभयमाह—**ध्यायत इति** श्लोकद्वयेन । यद्यपि वीतरागभयक्रोध इति रागादिराहित्यं ज्ञानिलक्षणत्वेनोक्तं तथापि तस्य तत्सिद्धं जिज्ञासुना च साध्यमतस्तत्परिहाराय तत्कारणफलयोरुक्तिर्नायुक्तेति ज्ञेयम् । विषयाञ्छब्दादीन् हितबुद्ध्या ध्यायतः पुंसस्तेषु विषयेषु सङ्ग आसक्तिर्भवति । आसक्त्या च तेषु कामः संजायते अधिको भवति । कामाच्च केनचित्प्रतिहतात्क्रोधो भवति । किंच क्रोधाद्भवति संमोहः अकार्येच्छा परवित्तापहरणाद्यधर्मे धर्मबुद्धिरित्यादिमिथ्याज्ञानं वा । संमोहादुक्तद्विरूपात्स्मृतिविभ्रमः । क्रमात्प्रतिषेधादिस्मृतिनाशः । परवित्ताहरणादेरधर्मत्वाद्यभिधायकश्रुत्यार्थस्य पूर्वं स्वयं ज्ञातस्याप्यन्यथास्मरणं वा स्मृतिभ्रंशाद्बुद्धिनाशः येन पूर्वं निर्णीतदोषबुद्धेः सर्वात्मना नाशो भवति तन्नाशात् तेन चाधर्मकरणाच्च प्रणश्यति नरकाद्यनर्थं प्राप्नोति । एतदुक्तं भवति । रागद्वेषयोः परंपरया नरकाद्यनर्थप्राप्तिः फलमिति ज्ञानेन तत्परिजिहीर्षायां विषयध्यानं परंपरया तत्कारणमिति ज्ञानेन तदकरणाद्रागद्वेषयोरनुत्पाद इति ॥ ६२ ॥ ६३ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ॥
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

त० टी०—मनसो निग्रहे बाह्येन्द्रियनिग्रहाभावेऽपि न दोषयोग इति वदन् व्रजेत किमित्यवशिष्टस्य प्रश्नस्योत्तरमाह—**रागेति** द्वाभ्याम् । तुशब्दः पूर्वस्माद्वैलक्षण्यद्योतनार्थः । विधेयः वशीभूत आत्मा मनो यस्य स रागद्वेषवियुक्तैरिन्द्रियैर्विषयान् चरन् भुञ्जानः प्रसादं चित्तस्य प्रसन्नतामिधिगच्छति निर्मलान्तःकरणो भवतीत्यर्थः ॥ ६४ ॥

म० टी०—मनसि निगृहीते तु बाह्येन्द्रियनिग्रहाभावेऽपि न दोष इति वदन् किं व्रजेतेत्यस्योत्तरमाह—**रागद्वेषवियुक्तैरि**त्यष्टभिः । योऽसमाहितचेताः स बाह्येन्द्रियाणि निगृह्यापि रागद्वेषदुष्टेन मनसा विषयांश्चिन्तयन्पुरुषार्थाद्भ्रष्टो भवति । विधेयात्मा तु तुशब्दः पूर्वस्माद्व्यतिरेकार्थः । वशीकृतान्तःकरणस्तु आत्मवश्यैर्मनोधीनैः स्वाधीनैरिति वा रागद्वेषाभ्यां वियुक्तैर्विरहितैरिन्द्रियैः श्रोत्रादिभिर्विषयान् शब्दादीननिषिद्धान् चरन्नुपलभमानः प्रसादं प्रसन्नतां चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्रयुक्तानि इन्द्रियाणि दोषहेतुतां प्रतिपद्यन्ते । मनसि स्ववशे तु न रागद्वेषौ । तयोरभावे च न तदधीनेन्द्रियप्रवृत्तिः । अवर्जनीयतया तु विषयोपलम्भो न दोषमावहतीति न शुद्धिव्याघात इति भावः । एतेन विषयाणां स्मरणमपि चेदनर्थकारणं सुतरा तर्हि भोगः । तेन जीवनार्थं विषयान् भुञ्जानः कथमनर्थं न प्रतिपद्येतेति शङ्का निरस्ता । स्वाधीनैरिन्द्रियैर्विषयान्प्राप्नोतीति च किं व्रजेतेति प्रश्नस्योत्तरमुक्तं भवति ॥ ६४ ॥

शं० टी०—नन्विन्द्रियैर्विषयग्रहणाभावे विदुषः कथं शरीरयात्रा सेत्स्यतीत्याशङ्कायां तत्प्रकारं नित्यं समाधिमनुतिष्ठतश्चित्तप्रसादं च प्रतिपादयति—**रागेति** । रागद्वेषयोर्बीजं विषयेष्विष्टत्वानिष्टत्वबुद्धिरेव दोषदर्शनेन तस्यां परित्यक्तायामिन्द्रियाणि रागद्वेषवियुक्तानि भवन्ति तैः रागद्वेषवियुक्तैर्विषयेष्वसत्त्वतुच्छत्वबन्धकत्वबुद्ध्या रागद्वेषाभ्यां वियोजितैरित्यर्थः । तत एवात्मवश्यैरात्मनः स्वस्य वश्यैः संकोचव्याकोचयोर्वशवर्तिभिः प्रसन्नैरिन्द्रियैस्तु विषयानन्नरसादीनानिषिद्धान् तत्रापि प्राणत्राणमात्रपर्याप्तान् चरन् भुञ्जानो ब्रह्मविद्यतिर्विधेयात्मा विधेयः इन्द्रियशुद्ध्या समाधिना च निर्मुक्तरागादिदोषतया शुद्धत्वेन स्वाधीन आत्मा मनो यस्य स विधेयात्मा सन् प्रसादं चित्तस्य स्वाध्यमत्यन्तनिर्मलतां गच्छति । "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" इति श्रवणादिन्द्रियशुद्ध्या चित्तशुद्धिः सिध्यतीत्यर्थः ॥ ६४ ॥

श्री० टी०—नन्विन्द्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वादयं दोषो दुष्परिहर इति स्थितप्रज्ञत्वं कथं स्यादित्याशङ्क्याह—**रागेति** द्वाभ्याम् । रागद्वेषरहितैर्विगतदर्पैरिन्द्रियैर्विषयांश्चरन् भुञ्जानोऽपि प्रसादं शान्तिं प्राप्नोति । रागद्वेषराहित्यमेवाह—आत्मनो मनसो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति । अनेनैव कथं व्रजेत भुञ्जीतेत्यस्य चतुर्थप्रश्नस्य स्वाधीनैरिन्द्रियैर्विषयानधिगच्छति इत्युत्तरमुक्तं भवति ॥ ६४ ॥

स० टी०—निगृहीते तु मनसि विनेन्द्रियविनिग्रहम् ॥ दोषो नेति वदन्नाह व्रजेतेत्यस्य चोत्तरम् ॥ १ ॥ वशीकृतमना यस्तु स्वाधीनैरिन्द्रियैश्चरन् ॥ वियुक्तैरागद्वेषाभ्यां शब्दादिविषयांस्तथा ॥ २ ॥ चित्तस्य स्वच्छतां ब्रह्मसाक्षात्कारैकयोग्यताम् ॥ स प्राप्नोति ततश्चित्तं निरोद्धव्यं प्रयत्नतः ॥ ३ ॥ ६४ ॥

भा० टी०—एवं विषयचिन्तनस्यानर्थोपायत्वमुक्त्वा अथेदानीं विषयध्यानरहितस्य स्वाधीनस्य चेतसः परमपुरुषार्थोपायत्वं वदन् किं व्रजेतेत्यस्योत्तरमाह—**रागेति** । विधेयात्मा स्वाधीनचित्तोऽत एवात्मवश्यैः स्वाधीनैरत एव रागद्वेषाभ्यां स्वाभाविकेन्द्रियप्रवृत्तिहेतुरूपाभ्यां वियुक्तैरिन्द्रियैः विषयाञ्जीवनहेतून् भोजनाच्छादनादींश्चरन्नुपलभमानः प्रसन्नतां स्वास्थ्यं प्राप्नोति ॥ ६४ ॥

प० टी०—अथैतत्कर्तुमसमर्थोऽपि तरतीति व्रजेत किमस्योत्तरमाह—**रागद्वेषेति** । रागद्वेषवियुक्तैरिन्द्रियैर्विषयांश्चरन् प्रसादमधिगच्छति । रागः प्रीतिरासक्तिर्द्वेषश्च ताभ्यां वियुक्तैरुदासीनैरिन्द्रियैर्विषयान् भुञ्जानः । अथ रागद्वेषवियुक्तत्वे हेतुमाह—**आत्मवश्यैरिति** । आत्मा वश्यो येषां तानि सर्वत्रात्मभावनायुक्तानि तैर्विधेयः परिनिष्ठित आत्मा मनो यस्य स तथाभूतः प्रसादं शान्तिमधिगच्छतीत्यर्थः । तदुक्तम्—'अग्निसङ्गाद्यथा लोहमग्नित्वमुपगच्छति । आत्मसङ्गात्तथा गच्छत्यात्मतामिन्द्रियादिकम्' इति ॥ ६४ ॥

रा० टी०—अस्त्वेवमुक्तदिशा रागद्वेषपरिहारः । ततः किमित्यतस्तस्येन्द्रियजयाख्यं फलमिन्द्रियजयाज्जायमानं फलं चाह—**रागद्वेषेति** । यद्यपीद्रियजयस्य वशे हीत्यर्थे ज्ञानं फलमित्युक्तं तथापि तन्न साक्षात् किंतु मनःप्रसादद्वारेति अत्र श्लोकद्वयेनोच्यत इत्यदोषः । अयमर्थः । य उक्तविधया त्यक्तरागद्वेषः स पुमान् रागद्वेषवियुक्तैस्ताभ्यामप्रयुक्तैरिन्द्रियैश्चक्षुरादिबाह्येन्द्रियैः अत एवात्मवश्यैः स्वाधीनैः रूपरसादीन्विषयान्केवलदेहधारणमात्रार्थं चरन्ननुभवति । विधेयात्मा विधेयः स्वाधीनः आत्मा मनो यस्य स तथा तादृशो भूत्वा प्रसादं मनसः स्वतोपि प्रायो विषयागतिलक्षणं प्रसादमधिगच्छति प्राप्नोति । अत्र पादत्रयेण रागद्वेषपरिहाराख्येन्द्रियजयाख्यं फलमुक्तम् । रागद्वेषाप्रयुक्तत्वादेवेन्द्रियाणां विधेयात्मत्वहेतुनात्मवश्यत्वस्येन्द्रियाणामुक्त्या तज्जयस्य प्रतीतेरात्मवश्यत्वस्य स्वात्मनः क्षोभानापादकत्वरूपत्वात् । विषयांश्चरन्नित्युक्तिस्त्विन्द्रियजयकारणत्वं निराहारत्वस्य प्रागुक्तमयुक्तमशक्यत्वादित्याशङ्क्य देहधारणमात्रोपयुक्तविषयानुभवो न दोषायेति वक्तुमिन्द्रियजयस्याव्यवहितफलोक्तिर्विधेयात्मा प्रसादमधिगच्छतीति ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

त० टी०—चित्तप्रसादे सति अस्य मुमुक्षोः सर्वदुःखानामाध्यात्मिकादीनां हानिरुपजायते । विषयासक्तचेतसां विपाकदशायां यान्यवर्जनीयानि दुःखानि, निर्मलमनसस्तेषां हानिर्नियतभोगनिवृत्तिरनायासेन भवतीत्यर्थः । न केवलं तस्य दुःखहानिमात्रमपि तु महत्फलं प्राप्नोतीत्याह—**प्रसन्नचेतस इति** । हीत्यवधारणे । प्रसन्नचेतस आशु शीघ्रमेव बुद्धिः पर्यवतिष्ठते परितः सर्ववृत्तीः समाकृष्य निश्चला भवतीत्यर्थः ॥ ६५ ॥

म० टी०—प्रसादमधिगच्छतीत्युक्तं तत्र प्रसादे सति किं स्यादित्युच्यते । चित्तस्य प्रसादे स्वच्छत्वरूपे सति सर्वदुःखानामाध्यात्मिकादीनामज्ञानविलसितानां हानिर्विनाशोऽस्य यतेरुपजायते । हि यस्मात् प्रसन्नचेतसो यतेराशु शीघ्रमेव बुद्धिर्ब्रह्मात्मैक्याकारा पर्यवतिष्ठते परि समन्तादवतिष्ठते स्थिरा भवति । विपरीतभावनादिप्रतिबन्धाभावात् । ततश्च प्रसादे सति बुद्धिपर्यवस्थानं ततस्तद्विरोध्यज्ञाननिवृत्तिः ततस्तत्कार्यसकलदुःखहानिरिति क्रमोपि प्रसादे यत्नाधिक्याय सर्वदुःखहानिकरत्वकथनमिति न विरोधः ॥ ६५ ॥

शं० टी०—नित्यं समाधिनिष्ठया चेन्द्रियाणां मनसश्च शुद्धिलक्षणं प्रसादं संपादितवतो विदुषस्तत्सिद्धेः फलमाह—**प्रसाद इति** । इन्द्रियशुद्धिसिद्धेः प्रसादे प्राप्ते सत्यस्य विदुषः सर्वदुःखानाम् । अत्र दुःखशब्देन तद्धेतवो विक्षेपा लक्ष्यन्ते तेषां सर्वेषां विक्षेपाणां हानिर्निःशेषनिवृत्तिरुपजायते । तत एव आशु शीघ्रमेव प्रसन्नचेतसो निर्मलात्मनस्तस्य बुद्धिः सर्वत्र ब्रह्मदर्शिनी प्रज्ञा पर्यवतिष्ठते प्रतिष्ठिता भवतीत्यर्थः ॥ ६५ ॥

श्री० टी०—प्रसादे सति किं स्यादित्यत्राह—**प्रसाद** इति । प्रसादे सति सर्वदुःखनाशस्ततश्च प्रसन्नचेतसो बुद्धिः प्रतिष्ठिता भवतीत्यर्थः ॥ ६५ ॥

स० टी०—चित्तस्य स्वच्छतायां तु भ्रान्तिज्ञानैकजन्मनाम् ॥ आध्यात्मिकादिदुःखानां सर्वेषां जायते क्षयः ॥ १ ॥ यस्माच्छीघ्रं यतेरस्य प्रसन्नमनसो मतिः ॥ ब्रह्मात्मैक्यसुखाकारा समन्तादवतिष्ठते ॥ २ ॥ अतः सर्वप्रयत्नेन मुमुक्षुर्मत्परायणः ॥ वशीकृत्य मनः स्वीयं तिष्ठेद्ब्रह्माद्वये मयि ॥ ३ ॥ ६५ ॥

भा० टी०—**प्रसाद** इति । प्रसादे सति अस्य विवेकिनः सर्वदुःखानां त्रिविधतापानां हानिरुपजायते । कुत इत्यत आह—**प्रसन्नेति** । हि यस्मात् प्रसन्नचेतस आशु शीघ्रं बुद्धिः आत्मस्वरूपेणैव निश्चलीभवतीत्यर्थः । एवं प्रसन्नचेतसः स्थिरबुद्धेः कृतकृत्यता यतः तस्माद्रागद्वेषवियुक्तैरिन्द्रियैः शास्त्राविरुद्धेष्वावश्यकेषु जीवनहेतुभूतेषु युक्तः समाचरेदिति वाक्यार्थः ॥ ६५ ॥

प० टी०—अथ तेन किं स्यादित्याह—**प्रसाद** इति । अस्य पुरुषस्य प्रसादे जाते सति सर्वदुःखाना हानिर्जायते । एवं सर्वदुःखातिगत्वेन प्रसन्नमनस आशु शीघ्रं बुद्धिः पर्यवतिष्ठते निश्चला भवति । तदुक्तम् 'विज्ञानामृतनिर्झरावनिरिव स्वानन्दपूर्णोदधेरूर्मिः शाश्वतसुप्रसादसदनं भूतानुकम्पाप्रसूः । निर्वातस्थितसुप्रदीपकलिका वैराग्यभाग्यास्पदं दृश्यातीतपदावलम्बरसिका स्वान्तस्थितिस्तद्विदाम्' ॥ ६५ ॥

रा० टी०—प्रसादे सति किं स्यादित्यत उक्तम्—**प्रसाद** इति । प्रागुक्तरूपमनःप्रसादे सति अस्य प्रसन्नचेतसः पुंसः आशु शीघ्रं बुद्धिर्ब्रह्मापरोक्षज्ञानं पर्यवतिष्ठति सम्यग्भवति । ततश्चास्यापरोक्षज्ञानिनः सर्वदुःखानां हानिरुपजायते । हि प्रसिद्धमेतत् तरति शोकमात्मविदित्यादौ इति । अत्र प्रसादे सति बुद्धिः पर्यवतिष्ठतीत्येतावत्येव वक्तव्ये सर्वदुःखानां हानिरिति ज्ञानफलस्याप्युक्तिः । बुद्धियुक्तो जहातीहेत्यत्र सुकृतदुष्कृतहानस्य ज्ञानफलत्वोक्तिरयुक्ता । सुखदुःखप्राप्तिपरिहारयोरन्यतरत्वाभावेनापुमर्थत्वादित्याशङ्कानिरासाय प्रसङ्गात्प्राप्तेति ज्ञेयम् ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

त० टी०—उक्तार्थदृढीकरणायासंयतमनसः सर्वं विपरीतफलं दर्शयति—नास्तीति । अयुक्तस्यावशीकृतचित्तस्य बुद्धिः सर्ववेदवेदान्तनिर्णीततत्त्वविषयिणी व्यवसायात्मिका न भवति । किञ्च अयुक्तस्य भावना तत्त्वपरिशीलनात्मिका मनोवृत्तिर्नास्ति । अभावयतः भावनाशून्यस्य शान्तिर्विषयेभ्य उपरतिर्न भवति । अशान्तस्य सुखं दुःखक्लेशासंभिन्नं नित्यानपायिसुखं कुतः स्यात् । प्राकृतविषयजन्यं राजसं सुखं तु तस्यापि भवति विषयेन्द्रियसंयोगादित्यादिना वक्ष्यमाणत्वात् ॥ ६६ ॥

म० टी०—इममेवार्थं व्यतिरेकमुखेन द्रढयति—**नास्तीति** । अयुक्तस्याजितचित्तस्य बुद्धिरात्मविषया श्रवणमननाख्यवेदान्तविचारजन्या नास्ति नोत्पद्यते । तद्बुद्ध्यभावे न चायुक्तस्य भावना निदिध्यासनात्मिका विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपा । सर्वत्र नञोऽस्तीत्यनेनान्वयः । नचाभावयत आत्मानं शान्तिः सकार्याविद्यानिवृत्तिरूपा वेदान्तवाक्यजन्या ब्रह्मात्मैक्यसाक्षात्कृतिः । अशान्तस्यात्मसाक्षात्कारशून्यस्य कुतः सुखं मोक्षानन्द इत्यर्थः ॥ ६६ ॥

शं० टी०—नित्यानित्यविवेकवैराग्याभ्यां तीव्रमुमुक्षुतया च सर्वं संन्यस्य मुमुक्षवो ये यतयः श्रवणं कुर्वन्ति तेषां मुक्तिः सम्यग्ज्ञानेन विना न सिध्यति सम्यक्ज्ञानं च समाधिं विना समाधिश्चेन्द्रिय-

निग्रहं विना चेन्द्रियनिग्रहोपि निःशेषरागादित्यागं विना न सिध्यतीति । यततो ह्यपि कौन्तेय इत्यादिना रागद्वेषपरित्यागमिन्द्रियनिग्रहं समाध्यनुष्ठानं च प्रतिपाद्य ध्यायतो विषयान्पुंस इति ज्ञानिनोपि बहिर्मुखस्य ज्ञाननाशाद्यनर्थनिपातं प्रतिपाद्येदानीं बहुधा श्रुतश्रावितवेदान्तस्य पठनपाठनमात्रेण आत्मानं कृतार्थं मन्यमानस्य मुमुक्षोरालस्येन दुर्मेधया च ध्यानादावप्रवृत्तस्य समाधिरवश्यं कर्तव्य इति सूचयितुं तदकर्तुरनर्थमाह—**नास्तीति** । शतधा श्रुतवेदान्तोपि यस्तीव्रमुमुक्षया शान्तो दान्त उपरतस्तितिक्षुर्भूत्वाऽप्रतिबद्धज्ञानसिद्धये समाधिं न करोति तस्याऽयुक्तस्याऽसमाहितचेतसः पुरुषस्य बुद्धिः सर्वत्र ब्रह्मदर्शनलक्षणा चित्तप्रसादैकलभ्या प्रत्यग्दृष्टिर्नास्ति । बहुधा कृतेपि श्रवणे तदुत्पन्नं ज्ञानं पदवाक्यार्थगोचरमेव भवति नतु वस्तुगोचरं सूक्ष्मबुद्ध्या क्वचिज्जातमपि न तिष्ठति स्थिरमित्यर्थः । अयुक्तस्येति पुनरुक्तिः समाधेरवश्यकर्तव्यत्वद्योतनार्था । 'कारणाभावे कार्याभावः' इति न्यायेन अयुक्तस्य समाधिसमुत्पन्नब्रह्मापरोक्षज्ञानशून्यस्य भावना न च नास्ति देह इव इदमेवाहमस्मीति स्वात्मना साक्षात्कृते ब्रह्मण्येवात्मत्वाभिनिवेशो भावना तत्तादात्म्यापत्त्या स्वस्य ब्रह्मण्येव व्यवस्थिताऽहंबुद्धिलक्षणा या सा चायुक्तस्य न संभवतीत्यर्थः। तदसंभवे तत्कार्यं च न संभवतीत्याह—**न चाभावयत इति** । प्रबुद्धो यथा देहं तथा ब्रह्मैवाऽहं नेतरदित्यात्मानं ब्रह्मैवाऽभावयतोऽमन्यमानस्य ब्रह्मात्मना स्वयमतिष्ठतो यतेः शान्तिरनात्मतादात्म्यतत्कार्यसंबन्धाऽदर्शनलक्षणा चोपशान्तिर्न सिध्यति । किंचाऽशान्तस्याऽनात्मानमेवात्मानं द्वैतं च पश्यतः सुखं नित्यं निरन्तरं ब्राह्मं कुतः सर्वमिदमहं च ब्रह्मैवेति सर्वं स्वं च ब्रह्मैव पश्यत एव यतेर्ब्रह्मानन्दरसानुभवः स्यात्तद्विपरीतदर्शिनः कुतः सिध्यतीत्यर्थः । यद्वा न चाभावयतः शान्तिः श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं स्वयं च सर्वं चिद्रूपं ब्रह्मैवेति सर्वस्य चिन्मात्रत्वमखण्डया चिदात्मिकया वृत्त्या नित्यं निरन्तरमभावयतोऽपश्यतोऽविदुषः शान्तिर्विदेहमुक्तिश्चिदानन्दैकरसब्रह्मरूपेणावस्थानलक्षणा नास्ति। एवमशान्तस्य विदेहमुक्तिमप्राप्तस्य सुखं विदेहकैवल्यसुखं कुतः ब्रह्मभावमप्राप्तस्य ब्रह्मसुखं न सिध्यतीत्यर्थः ॥ ६६ ॥

श्री० टी०—इन्द्रियानिग्रहस्य स्थितप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपादयति—**नास्तीति** । अयुक्तस्यावशीकृतेन्द्रियस्य नास्ति बुद्धिः शास्त्राचार्योपदेशाभ्यामात्मविषया बुद्धिः प्रज्ञैव नोत्पद्यते । कुतस्तस्य प्रतिष्ठा वार्ता वा कुत इत्यत आह—नचायुक्तस्य भावना ध्यानम् । भावनया हि बुद्धेरात्मनि प्रतिष्ठा भवति सा चायुक्तस्य यतो नास्ति न चाभावयत आत्मध्यानमकुर्वतः शान्तिः आत्मनि चित्तोपरतिः अशान्तस्य कुतः सुखं मोक्षानन्द इत्यर्थः ॥ ६६ ॥

स० टी०—व्यतिरेकमुखेनेमं दृढयत्यर्थमीश्वरः ॥ पुंसो ह्यजितचित्तस्य बुद्धिर्वेदान्तवाक्यजा ॥१॥ नोत्पद्यतेऽस्य तद्बुद्ध्यभावे नास्त्येव भावना ॥ निदिध्यासनरूपा या शान्तिहेतुः स्थिरात्मिका ॥ २ ॥ निदिध्यासनशून्यस्य नास्त्यविद्यापरिक्षयः॥ साक्षात्कारः परात्मैक्यतत्त्वस्यानन्दकारणम् ॥ ३ ॥ तत्साक्षात्कारशून्यस्य मोक्षानन्दः कुतो भवेत् ॥ अतश्चित्तं नियम्याशु यतस्वानन्दसिद्धये ॥ ४ ॥ ६६ ॥

भा० टी०—ननु किं चित्तप्रसादस्यैव साक्षाद्बुद्धिप्रतिष्ठासाधनत्वमुत परंपरयेत्याकाङ्क्षायां निदिध्यासनद्वारेणेति वक्तुं चित्तप्रसादं विना तन्न जायत इति पूर्वोक्तेस्तात्पर्यं प्रसन्नतास्तुत्या स्फुटयति—**नास्तीति** । यत्तु समनस्कानामिन्द्रियाणामनिग्रहे दोष उक्तः बुद्धेरपर्यवस्थाने को दोष इत्यत आहेति तच्चिन्त्यम् । अयुक्तस्य बुद्धिर्नास्तीत्युक्त्या चित्तप्रसादस्तुतेः स्पष्टप्रतीतेः तथोत्थापनानौचित्यात् । अयुक्तस्यासमाहितचेतसः अप्रसन्नचित्तस्येति यावद् बुद्धिरात्मस्वरूपज्ञानविषया ब्रह्मात्मैक्याकारा कुत इत्यत आह—**नचेति** । नचायुक्तस्य भावना पूजा प्रतिष्ठाद्यर्थं श्रवणमननयोः सत्वेऽपि भावनाऽभिनिवेशो निदिध्यासनं बुद्धिसाधनं नास्ति न

चाभावयतः विजातीयप्रत्ययस्य विषयानुसन्धानस्य तिरस्कारमकुर्वतः शान्तिरुपशमः तृष्णाया इच्छापरपर्यायायाः अभावो नास्ति अशान्तस्य कुतः सुखम् । अविद्यानिवृत्त्या आविद्यकतृष्णाद्यभावकर्तुस्तत्त्वसाक्षात्कारस्याभावात् ब्रह्मानन्दसुखं तु तस्य नास्त्येव । विषयसुखमपि तस्य नास्तीति द्योतयितुं कुतःशब्दः । ननु विषयार्जनतद्विना शयोः दुःखसाधनत्वेपि विषयोपभोगस्य सुखहेतुत्वं भविष्यतीति चेन्न । तस्मिन्कालेऽपि सर्वदुःखमूलभूतायस्तृष्णायाः सत्त्वेन सुखगन्धस्याप्यनुपपत्तेः । तृष्णायाः दुःखहेतुत्वमुक्तं वासिष्ठे 'यान्येतानि दुरन्तानि दुर्जराण्युन्नतानि च । तृष्णावल्ल्याः फलानीह तानि दुःखानि राघव ॥ इच्छोदयो यथा दुःखमिच्छाशान्तिर्यथा सुखम् । तथा न नरकेनापि ब्रह्मलोकेऽनुभूयते ॥ यावती यावती जन्तोरिच्छोदेति यथा यथा । तावती तावती दुःखबीजमुष्टिः प्ररोहति' इत्यादि ॥ ६६ ॥

प० टी०—इन्द्रियानिग्रहस्य स्थितप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपादयति—**नास्ति बुद्धिरिति** । अयुक्तस्यावशीकृतेन्द्रियस्य बुद्धिर्नोत्पद्यते च परं तया बुद्ध्याऽयुक्तस्य भावनात्मभावना नास्ति । तथाभावयतो ब्रह्मभावनावार्जितस्य सुखमात्मसुखं कुतो नास्तीत्यर्थः ॥ ६६ ॥

रा० टी०—श्रवणमननाभ्यामुपकृतेन ध्यानेनैव ब्रह्मापरोक्षज्ञानसिद्धेः किमनेन प्रसादेनेत्यतः प्रसादाभावे दोषमाह—**नास्तीत्यादिश्लोकद्वयेन** । विपक्षे दोषोक्तिपरत्वान्मनःप्रसादाभावे युक्तिशब्दितचित्तनिरोधो न भवतीत्येतत्प्रकरणप्राप्तमादौ योज्यम् । नास्ति बुद्धिरित्येतदग्रे योज्यम् । अयुक्तस्य चित्तनिरोधहीनस्य भावना ध्यानं न भवति । अभावयतश्चाध्यायिनश्च बुद्धिरपरोक्षज्ञानं न भवति । न चाबुद्धेरिति शेषः । अपरोक्षहीनस्य च शान्तिर्मुक्तिर्नास्ति । अशान्तस्यामुक्तस्य च सुखं कुतः न कुतोपीत्यर्थः । अबुद्धेः शान्तिर्नेत्येतावत्येव वाच्येऽशान्तस्य कुतः सुखमित्युक्तिर्न केवलमपरोक्षिणो मुक्तौ सर्वदुःखप्रहाणमात्रं किंतु संसारिभिरलभ्यं परमं सुखं चेति ज्ञापयितुं प्रसङ्गात्प्राप्तेति ज्ञेयम् । यद्वा शान्तिर्भगवदेकानिष्ठबुद्धिता । सुखं मोक्षः ॥ ६६ ॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

त० टी०—अयुक्तस्य बुद्धिः कुतो नास्तीत्यत आह—इन्द्रियाणामिति । हि यस्मात् इन्द्रियाणा चरतां विषयेषु प्रवर्तमानानां मध्ये यत्किमपीन्द्रियं मनोऽनुविधीयते, कर्मभूतं मनः पुरुषेणानुवर्त्यते तदिन्द्रियं मनो वा अस्य पुरुषस्य प्रज्ञां आत्मतत्त्वविषयिणीं बुद्धिं हरति, तत्त्वतः प्रच्याव्य स्वानुवर्तिनीं विषयाभिमुखीं करोति । तत्र दृष्टान्तः—वायुर्नावमिवेति । यथा अम्भसि नीयमानां नावं प्रतिकूलो वायुर्हरति गन्तव्यमार्गात्प्रच्याव्य विकटे प्रक्षिप्य नाशयति तद्वादित्यर्थः ॥ ६७ ॥

म० टी०—अयुक्तस्य कुतो नास्ति बुद्धिरित्यत आह—**इन्द्रियाणामिति** । चरतां स्वविषयेषु प्रवर्तमानानामवशीकृतानामिन्द्रियाणां मध्ये यदेकमपीन्द्रियमनुलक्षीकृत्य मनोऽनुविधीयते प्रेर्यते प्रवर्तत इति यावत् । कर्मकर्तरि लकारः । तदिन्द्रियमेकमपि मनसाऽनुसृतं अस्य साधकस्य मनसो वा प्रज्ञामात्मविषयां शास्त्रीयां हरति अपनयति मनसस्तद्विषयाविष्टत्वात् । यदैकमपीन्द्रियं प्रज्ञां हरति तदा सर्वाणि हरन्तीति किमु वक्तव्यमित्यर्थः । दृष्टान्तस्तु स्पष्टः । अम्भस्येव वायोर्नौकाहरणसामर्थ्यं न भुवीति सूचयितुमम्भसीत्युक्तम् । एवं दार्ष्टान्तिकेप्यम्भःस्थानीये मनश्चाञ्चल्ये सत्येव प्रज्ञाहरणसामर्थ्यमिन्द्रियस्य नतु भूस्थानीये मनःस्थैर्य इति सूचितम् ॥ ६७ ॥

शं०टी०—ननु सूक्ष्मबुद्धेः श्रवणादिजन्यज्ञानं समाध्यभावेऽपि न नश्यति यथा मेधाविनाऽधीतमीमांसादिशास्त्रजन्यज्ञानं मेधया प्रतिष्ठितमेव भवति तथैवेति चेन्न । इष्टकाचयनादिज्ञानमतिस्थूलमपि मुहुर्मुहुरवलोडनं चरणं प्रचारणं वा विना न स्फुटं प्रतिभाति किमु वक्तव्यमतिसूक्ष्ममतीन्द्रियमविषयमप्रचुरमसंस्कृतमनारूढमविनष्टप्रतिपक्षमात्मज्ञानं समाध्यभावे न प्रतिभातीति । ततस्तत्सिद्ध्यै मुमुक्षोः समाधिः कर्तव्य इति सूचयितुं बहिःप्रवृत्तस्य ज्ञाननाशनप्रकारं सदृष्टान्तमाह—**इन्द्रियाणामिति** । हि यस्मात्कारणादिन्द्रियाणां श्रोत्रादीनां वागादीनां च स्वस्वविषयेषु चरतां सतां लोकशास्त्रविषयकर्मवासनाभिराविष्टं यन्मनोऽनुविधीयते विदुषा तत्तदिच्छावता स्वेच्छानुरूपं प्रवर्त्यते तदेव मनः अम्भसि नदीजले वायुर्नावमिवास्य स्ववासनानुरूपं प्रवर्तमानस्यास्य विदुषः प्रज्ञामात्मानात्मविवेकबुद्धिं हरति संहरति । अत्रायमभिप्रायः । नद्याः परपारं गच्छन्तीं नौकां प्रतिकूलो वायुर्गृहीत्वा महाऽऽवर्ते तां पातयति जलेनापूर्य वा मज्जयति महापाषाणेनाभिहत्य भञ्जयति पुनरपारं वा विषमस्थानं वा गमयति सर्वथाऽनर्थवतीमेव करोति तथा तथा विदुषोपि प्रज्ञां विवेकबुद्धिमनाद्यविद्यावासनाभिरुच्चावचाभिराकृष्टं मनो विषये वा कर्मणि वा योगे वाप्युपास्तौ वा व्यवहारे वान्यत्र वा पातयित्वा वायुर्नावमिव विध्वंसयतीत्यर्थः ॥ ६७ ॥

श्री० टी०—नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह—**इन्द्रियाणामिति** । इन्द्रियाणामवशीकृतानां स्वैरं विषयेषु चरतां मध्ये यदेवैकमिन्द्रियं मनोऽनुविधीयते अवशीकृतं सदिन्द्रियेण सह गच्छति तदेवैकमिन्द्रियमस्य मनसः पुरुषस्य वा प्रज्ञां हरति विषयविक्षिप्तां करोति किमुत वक्तव्यं बहूनि प्रज्ञां हरन्तीति यथा प्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे सर्वतः परिभ्रामयति तद्वत् ॥ ६७ ॥

स० टी०—अयुक्तस्य कुतो नास्ति बुद्धिरित्यत उच्यते ॥ स्वैरं प्रवर्तमानानामिन्द्रियाणां प्रमाथिनाम् ॥ १ ॥ विषयेषु च तन्मध्ये यद्येकमपि हीन्द्रियम् ॥ मनोऽनुलक्षीकृत्यैव साधकस्य प्रवर्तते ॥ २ ॥ मनसानुसृतं तच्च प्रज्ञामात्मैकगोचराम् ॥ साधकस्यापनयाति शास्त्रीयां विषयावृतम् ॥ ३ ॥ यद्येकमपि तां प्रज्ञां विदुषो हरतीन्द्रियम् ॥ किमुवाच्यं तदा सर्वाणीन्द्रियाणि हरन्ति ताम् ॥ ४ ॥ नौकाहरणसामर्थ्यमम्भस्येव नतु क्षितौ ॥ वायोस्तथेन्द्रियस्यापि चाञ्चल्ये मनसः सति ॥५॥ प्रज्ञाहरणसामर्थ्यं मनःस्थैर्ये तु नास्य तत् ॥ इति सूचयितुं प्रोक्तमम्भसीति पदं त्विह ॥ ६ ॥ ६७ ॥

भा० टी०—अयुक्तस्य बुद्धिर्नास्तीत्युक्तं तत्र हेतुमाह—**इन्द्रियाणामिति** । यत्तु तदभावे दोषमाह इति तदयुक्तं पूर्वश्लोकेऽपि दोषस्यैवोक्तत्वात् । इन्द्रियाणां स्वविषये प्रवर्तमानानां यन्मनोऽनुवर्तते तदिन्द्रियविषयविकल्पे प्रवृत्तमस्य पुरुषस्य विवेकिनः प्रज्ञामात्मानात्मविवेकजां हरति अम्भसि नावं वायुरिव जले जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वायुः प्रवर्तयाति तद्वत् । यत्तु इन्द्रियाणां मध्ये यदेकमपीन्द्रियमनुलक्षीकृत्य विधीयते प्रेर्यते प्रवर्तत इति यावत् तदिन्द्रियमेकमपि मनसानुसृतं अस्य साधकस्य मनसो वा प्रज्ञां हरति इत्यादि तदयुक्तम् 'नास्ति बुद्धिरयुक्तस्य' इत्यनुरोधेन इन्द्रियानुगतमनस एव बुद्धिहरणकर्तृत्वस्य विवक्षितत्वात् । श्रुतं मनःपदं त्यक्त्वाऽश्रुतस्यैकेन्द्रियस्य यत्तत्पदेनोपादानानौचित्यात् मनस इत्यपि न साधकस्यैव प्रकृतत्वात् ॥ ६७ ॥

प० टी०—अथ नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह—**इन्द्रियाणामिति** । विषयेषु स्वैरं चरतामिन्द्रियाणां मध्य एकमिन्द्रियं यन्मनोऽनु तदनुगतमेव विधीयते प्रेर्यते तदस्य पुरुषस्य प्रज्ञां हरति तथा चैकस्य मनसः संयमे कृते सर्वेषां संयमः कृत एव स्यादित्यर्थः । अथ प्रज्ञाहरणे दृष्टान्तमाह—वायुरिति । असावधानकर्णधाराधिष्ठितां नावं वायुर्यथेतस्ततो भ्रामयति तद्वत् ॥ ६७ ॥

रा० टी०—अयुक्तस्य भावना नेत्युक्तं कृतश्रवणमननस्य पुंसो ध्यानोपपत्तेरित्यत आह—इन्द्रियाणामिति। चक्षुरादीन्द्रियाणां स्वैरं विषयेषु चरतां गच्छतामनु पृष्ठभावितया मनो विषयान्प्रति विधीयते ईश्वरेण क्रियते यत्तन्मनस इन्द्रियाणां पृष्ठभावितया ईश्वरेण मनसः करणं अस्य पुंसः प्रज्ञां परोक्षनिश्चयं हरति। उत्पत्स्यत्परोक्षज्ञानं निवारयति । उत्पन्नमपि ज्ञानं चित्तनिरोधहीनस्य न ध्यानोपयोगि सदपरोक्षज्ञानाय प्रभवतीत्यर्थः । कथमम्भसि वायुर्नावमिव प्लवमिवेति ॥ ६७ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

त० टी०—एवमिन्द्रियाणि प्रमाथीनीत्यादिनेन्द्रियाणां मनोबुद्धिभ्रंशकत्वं तन्नियमनस्य च स्थितप्रज्ञताहेतुत्वं चानेकधोपपाद्येदानीं तमर्थमनूद्योपसंहरति—तस्मादिति । यस्मादिन्द्रियाण्येव विषयप्रवृत्तिहेतुत्वेनानर्थकराणि तस्मात् हे महाबाहो ! यस्य पुरुषस्य सर्वशः सर्वप्रकारेण इन्द्रियाणि इन्द्रियार्थेभ्यो निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता भवति ॥ ६८ ॥

म० टी०—हि यस्मादेवं सर्वशः सर्वाणि समनस्कानि हे महाबाहो इति संबोधयन् सर्वशत्रुनिवारणक्षमत्वादिन्द्रियशत्रुनिवारणेऽपि त्वं क्षमोसीति सूचयति । स्पष्टमन्यत् । तस्येति सिद्धस्य साधकस्य च परामर्शः । इन्द्रियसंयमस्य स्थितप्रज्ञं प्रति लक्षणत्वस्य मुमुक्षुं प्रति प्रज्ञासाधनत्वस्य चोपसंहरणीयत्वात् ॥ ६८ ॥

शं० टी०—यस्माद्रागद्वेषलोभमोहादिदोषैरेवेन्द्रियप्रवृत्तिस्तया समाध्यभावस्तेन ज्ञानाभावस्तेनैव ब्रह्मणि स्वात्मन्यहंभावाभावस्तस्मान्मुक्त्यभावस्ततः सुखाभावश्चैवमनर्थव्रातापातो रागद्वेषादिभिरिन्द्रियनिग्रहमकृत्वा बहिःप्रवृत्तस्य ज्ञानिनोऽपि तस्मादिन्द्रियग्रामं रागादिभिर्वियोज्य सम्यङ्निगृह्य च मुमुक्षोर्यतेर्विदेहमुक्त्यै समाधिरवश्यं कर्तव्य इति सूचयितुमाह—तस्मादिति । रागादिशत्रुसंहारसमर्थस्यैवात्राधिकारो नान्यस्येति सूचनार्थं महाबाहो इति संबोधनम् । यस्य मोक्षैकार्थिनो यतेरिन्द्रियार्थेभ्यः सर्वाणीन्द्रियाणि निगृहीतानि भवन्ति तीव्रवैराग्येण तस्यैव धन्यस्य समाधिः सिध्यति प्रज्ञा प्रतिष्ठिता भवति विदेहबुद्धिरग्रे तिष्ठति तत्सुखं चेत्यर्थः ॥ ६८ ॥

श्री० टी०—इन्द्रियसंयमस्य स्थितप्रज्ञत्वसाधनत्वलक्षणत्वं प्रोक्तमुपसंहरति—तस्मादिति । प्रतिष्ठिता भवतीत्यर्थः । लक्षणत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्येत्यर्थः । महाबाहो इति संबोधनं वैरिनिग्रहसमर्थस्य तवात्रापि सामर्थ्यं भवेदिति सूचयति ॥ ६८ ॥

स० टी०—यस्मादेवं ततो यस्य सचित्तानीन्द्रियाणि च ॥ निगृहीतानि सर्वाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ १ ॥ निवातकवचादीन्योऽसुरांश्च जितवानासि ॥ महाबाहो समर्थस्त्वमिन्द्रियारिनिवारणे ॥ २ ॥ ६८ ॥

भा० टी०—उपसंहरति—तस्मादिति । महाबाहुभ्यां शत्रून्विजित्य यथा राज्यस्य प्रतिष्ठितत्वं शूरैः संपाद्यते एवं विवेकिभिः इन्द्रियशत्रूञ्जित्वा प्रज्ञाप्रतिष्ठितत्वमिति सूचयन् संबोधयति--हे महाबाहो इति ॥ ६८ ॥

प० टी०—अथोपसंहरन्नाह—तस्मादिति । भो महाबाहो ! यस्मादेवं तस्मात्कारणाद्यस्य पुरुषस्य सर्वशः सर्वाणीन्द्रियाणीन्द्रियार्थेभ्यो निगृहीतान्याकर्षितानि भवन्ति तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

रा० टी०—प्रजहातीत्यादिनोक्तज्ञानिलक्षणस्यासंभवनिरासाय ज्ञानस्य महाप्रयत्नसाध्येन्द्रियनिग्रहसाध्यत्वं विषया विनिवर्तन्त इत्यादिना यदुक्तं तदुपसंहरति—तस्मादिति । यस्मादेवं निगृहीतेन्द्रियस्यैवोक्तरूपः

प्रसादः प्रसादवत एव चित्तनिरोधरूपा युक्तिः युक्तिमत एव श्रवणमनने ताभ्यां तत्त्वनिश्चयः तत्त्वनिश्चयवत एवापरोक्षसाधनं ध्यानं तस्मात् हे महाबाहो सर्वश इन्द्रियाणि सर्वाण्यपीन्द्रियाणि इन्द्रियार्थेभ्यः रूपादिसर्वेन्द्रियविषयेभ्यो यस्य निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता । प्रसादयुक्तिश्रवणमननतत्त्वनिश्चयध्यानप्रणाड्या अपरोक्षधीः प्रतिष्ठिता प्रकर्षेण जायत इति ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

त० टी०—ननु सर्वेन्द्रियव्यापारशून्यः स्थितप्रज्ञ उक्तस्तथाभूतो न कोऽपि दृश्यते, किं त्वन्यजनवद्दर्शनश्रवणादिव्यापारः स्थितप्रज्ञस्याप्यवर्जनीयः कथमुक्तार्थः संभाव्येतेत्याशङ्क्य स्थितप्रज्ञस्य दर्शनादि सर्वलोकविलक्षणमित्याह—**या निशेति** । सर्वभूतानां प्राणिनां या निशेव निशा आत्मस्वरूपादिदर्शनयोग्या बुद्धिवृत्तिः, विषयासक्तचेतसां दर्शनाद्ययोग्यतया गाढान्धतमस्वती कुहूशर्वरीव तस्यामात्मस्वरूपादिदर्शनार्हबुद्धिवृत्तौ प्राणिमात्रनिशायां संयमी सम्यङ्नियमितबाह्यान्तःकरणो मुनिर्जागर्ति, प्रबुद्धः सन् याथात्म्येन शास्त्रतत्त्वं बुद्धावनुभवति । यस्यां तु विषयानुभवयोग्यायामनात्मनिष्ठायां बुद्धिवृत्तौ भूतानि अवशीकृतबाह्यान्तःकरणा प्राणिनः जाग्रति सावधानतया वर्तन्ते सा विषयानुभवयोग्या बुद्धिवृत्तिः आत्मतत्त्वं याथात्म्येन पश्यतो मुनेर्निशा निशेव निशा विषयदर्शनानर्हा बुद्धिवृत्तिरित्यर्थः । अतः संभावितमेवेदं स्थितप्रज्ञस्य लक्षणमिति सिद्धम् ॥ ६९ ॥

म० टी०—तदेवं मुमुक्षुणा प्रज्ञास्थैर्याय प्रयत्नपूर्वकमिन्द्रियसंयमः कर्तव्य इत्युक्तं स्थितप्रज्ञस्य तु स्वतः सिद्ध एव सर्वेन्द्रियसंयम इत्याह—**या निशेति** । या वेदान्तवाक्यजनितसाक्षात्काररूपाऽहंब्रह्मास्मीति प्रज्ञा सर्वभूतानामज्ञानां निशेव निशा तान् प्रत्यप्रकाशरूपत्वात् । तस्यां ब्रह्मविद्यालक्षणायां सर्वभूतनिशायां जागर्ति अज्ञाननिद्रायाः प्रबुद्धः सन् सावधानो वर्तते संयमी इन्द्रियसंयमवान् स्थितप्रज्ञ इत्यर्थः । यस्यां तु द्वैतदर्शनलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव भूतानि जाग्रति स्वप्नवद्व्यवहरन्ति सा निशा न प्रकाशते आत्मतत्त्वं पश्यतोऽपरोक्षतया मुनेः स्थितप्रज्ञस्य यावद्धि न प्रबुध्यते तावदेव स्वप्नदर्शनं बाधपर्यन्तत्वाद् भ्रमस्य । तत्त्वज्ञानकाले तु न भ्रमनिमित्तः कश्चिद्व्यवहारः । तदुक्तं वार्तिककारैः 'कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते । शुद्धे वस्तुनि सिद्धे च कारकव्याप्रुतिस्तथा ॥ काकोलूकनिशेवायं संसारो ज्ञात्मवेदिनोः । या निशा सर्वभूतानामित्यवोचत्स्वयं हरिः' इति । तथा च यस्य विपरीतदर्शनं तस्य न वस्तुदर्शनं . विपरीतदर्शनस्य वस्त्वदर्शनजन्यत्वात् । यस्य च वस्तुदर्शनं तस्य न विपरीतदर्शनं विपरीतदर्शनकारणस्य वस्त्वदर्शनस्य वस्तुदर्शनेन बाधितत्वात् । तथा च श्रुतिः "यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येत् । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति । विद्याविद्ययोर्व्यवस्थामाह—यथा काकस्य राऽयन्धस्य दिनमुलूकस्य दिवान्धस्य निशा रात्रौ पश्यतश्चोलूकस्य यद्दिनं रात्रिरेव सा काकस्येति महदाश्चर्यमेतत् । अतस्तत्त्वदर्शिनः कथमाविधिकक्रियाकारकादिव्यवहारः स्यादिति स्वतःसिद्ध एव तस्येन्द्रियसंयम इत्यर्थः ॥ ६९ ॥

शं० टी०—जन्मानेकशतसहस्रकृतसुकृतपरिपाकेन श्रुत्याचार्येश्वरप्रसादपौष्कल्यं प्राप्तवतो यस्य समाधिना सर्वमिदमहं च ब्रह्मैवेति ब्रह्माऽपरोक्षविज्ञानमप्रतिबद्धं भवति तस्य महात्मनः स्थितप्रज्ञस्य प्रबुद्धस्य स्वप्नव्यवहारवदहं ममेदमित्यादिव्यवहारो लौकिको वैदिकश्च निःशेषो विनिवर्तते । निद्रावदविद्याया निःशेषविनष्टत्वात्तत्कार्यस्यापि निःशेषनिवृत्तिरतः प्रबुद्धो जागर इव जीवन्मुक्तो ब्रह्मविद्ब्रह्मण्येवारमति नान्यत्रेति प्रतिपादयति—**या निशेति** । प्राचीनकर्मफलानुभूत्यै पुनः पुनर्भवन्ति जायन्त इति भूतानि प्राणिनस्तेषां

सर्वेषां भूतानां स्थितप्रज्ञव्यतिरिक्तानां सर्वभूतानां या निशा भवति " तेजः परस्यां देवतायाम् " इत्यादिश्रुत्युक्ता या परदेवता सर्वप्रमाणाऽगोचरा निर्विशेषा सत्तामात्रा स्वयं निशेव भवति यथा निशा नितरां शेरते प्राणिनो यत्र सा निशा तमिस्रा रात्रिः सर्वव्यापकत्वेन दृष्टेः प्रवेष्टुमशक्यत्वेन सर्वपदार्थानां स्वमात्रत्वापादनेन च भूतानां मनुष्यादीनां व्यवहर्तुमशक्या भवति तथा सेयं परदेवतापि सर्वव्यापकत्वादिधर्मैः सर्वभूतानां व्यवहर्तुमशक्यत्वान्निशेत्युच्यते । शं सुखं नितरां सुखरूपत्वान्निशा तस्यां निशायामत्यन्तसुखरूपायां परस्यां देवतायां परे ब्रह्मण्यानन्दघने स्वयमविद्यानिद्राप्रबुद्धः संयमी बहिःप्रवृत्तिनिवृत्तसर्वेन्द्रियो ब्रह्मविदेक एव जागर्ति तत्रैवारमति क्रीडत्यानन्दति तदन्ये तु शेरते श्रुतवेदान्ता अपि निद्रिता इव तत्स्वरूपं किमपि न जानन्तीत्यर्थः । यस्यामविद्याया द्रष्टृदर्शनदृश्यादिभेदवत्यां भूतानि जाग्रति अहं ममेदमिष्टमनिष्टमिदं कार्यमिदमकार्यमिति व्यवहरन्ति सा त्वविद्या द्वैतभूमिः पश्यतः द्रष्टारं दर्शनं दृश्यं च सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव पश्यतो मुनेर्ब्रह्मनिष्ठस्य निशा भवति । यथा निशायां प्राणिनो न व्यवहरन्ति तथायमविद्यानिशायामहं ममेति न व्यवहरति । अहं ममेत्यादिप्रत्ययहेतूनामनाद्यविद्यावासनानां निःशेषविनष्टत्वेन तद्बुद्धेर्ब्रह्ममय्याः प्रवेष्टुमशक्यत्वादत्राहं ममेदमिति प्राकृतमेव व्यवहारं न करोति । कुत एवंलक्षणस्यास्य विदुषो वैदिकव्यवहारः सिध्यतीत्यर्थः । यद्वा " अधीहि भगवो ब्रह्मविद्यां वरिष्ठाम् " इत्यादिश्रुतिप्रसिद्धा या ब्रह्मविद्या सर्वभूतानां सर्वेषां प्राणिनां निशा भवति स्वयं चिदाकृत्या सूर्यप्रभावत्प्रकाशरूपापि सुदृष्टिशून्यानां निशेव भवतीति निशेत्युच्यते । यथा प्रसिद्धनिशा स्वकीयतमःशक्त्या नामरूपभेदमपास्य सर्वं वस्तुजातं तमोमात्रं कृत्वा स्वयमेव सर्वत्र विजृम्भते तथैवैषा ब्रह्मविद्या स्वकीयचिच्छक्तया नामरूपभेदमपोह्य सर्वं दृश्यजातं चिन्मात्रं कृत्वा स्वयमेकैव सर्वत्र विजृम्भते । यत्र निशायामिव अज्ञास्तज्ज्ञाश्च सर्वे व्यवस्थानरूपान् स्वप्नान् पश्यन्तः शेरते तस्यां ब्रह्मविद्यायां संयमी बहिःप्रवृत्तिशून्यः स्थितप्रज्ञो ब्रह्मविदेक एव जागर्ति आत्मरतिरात्मक्रीड आत्ममिथुन आत्मज्योतिरात्मानन्दो भूत्वा सर्वदाऽऽस्ते । यस्यामविद्यायां सर्वाणि भूतानि जाग्रति त्वमहमिदमद इति व्यवहरन्ति सा त्वविद्या द्वैतावस्था पश्यतो द्रष्टारं दर्शनं दृश्यं च सर्वं मिथ्यैवेति पश्यतो ब्रह्मविदो निशा भवति यथा प्राणिनां ब्रह्मविद्या निशा तथा ब्रह्मविदोऽप्यविद्या निशा ब्रह्मविद्यया ब्रह्मैवाहमिति स्वमानन्दैकरसं परिपूर्णं विषयीकर्तुं यथैवाऽज्ञा न शक्नुवन्ति तथैवायं ब्रह्मविदविद्ययाहं ममेदमिति देहेन्द्रियादिकं विषयीकर्तुं न शक्नोतीत्यर्थः । तत एवास्य लौकिके वैदिके च कर्मण्यनधिकारः योग्यत्वाभावात् । यस्य देहतदाश्रितवर्णजात्यादावभिमानः फलार्थित्वं ममेदं कर्तव्यमिदं न कर्तव्यमिति क्रियासु गुणदोषदर्शनं च विद्यते तस्यैव कर्मणि योग्यता दृश्यते न तूक्तलक्षणशून्यस्य । नहि नित्यनिरन्तर समाधिनिष्ठया निरूढविज्ञानबलेनाऽविद्यां तत्कार्यं चाऽध्यासादिकं निर्मूल्य ब्रह्मतादात्म्यमापाद्य ब्रह्मैवाहमिति सर्वदा ब्रह्मण्येव तदात्मना तिष्ठतो विदुषः पुनः शरीरतादात्म्यापत्तिस्तत्राहं ममेत्याभिमानश्च संभवति । तदसंभवे तत्रारोपितवर्णजात्याद्यभिमानोऽपि न सिध्यति । तदसिद्धौ सर्वमिथ्यात्वदर्शिनः फलाभिसंध्यसिद्धेः क्रियासु गुणदोषदर्शनाऽसिद्धेश्च सत्येवं न विदुषः कर्मण्यधिकार उपयुज्यते सर्वमिथ्यात्वदर्शनस्य प्रवृत्तेश्च परस्परविरुद्धत्वादेकाधिकरणत्वानुपपत्तेः । वस्तुनः सत्यत्वनिश्चयधीपूर्विकाप्रवृत्तिर्भ्रमकल्पितत्वानिश्चयधीमूलकं मिथ्यात्वज्ञानं ततस्तयोः परस्परविरुद्धत्वमेकाधिकरणत्वानुपपत्तिश्च । ननु कर्ता करणं कार्यं च सर्वं मिथ्यैवेति विदुषा कर्म क्रियतां मिथ्यात्वेन कृतं कर्म बन्धाय न भवतीति चेन्न । मिथ्यात्वज्ञानस्य प्रवृत्तिविरोधान्नेदं जलं किंतु मरुरेवेति जलमिथ्यात्ववेदिनस्तृषितस्यापि प्रवृत्त्यदर्शनात्किमुतारोपितं दृश्यं सर्वं मिथ्यैवेति तदधिष्ठानं ब्रह्मैव सर्वत्र पश्यतः प्रवृत्तिरनुपपन्नेत्यतो ह्यविद्यावत एव कर्मण्यधिकारो नतु विद्या-

वतो विद्याया अविद्यातत्कार्यविरोधित्वाद्विद्यावति ब्रह्मविद्यविद्या तत्कार्यं च तेजसीव तमः सकार्यं स्थातुं न शक्नोति । यत एवं ततो विधिर्विधानं विधेयं विधाता च सर्वमाविद्यकं मिथ्यैवेति विजानतो ब्रह्मविदः सदात्मना तूष्णीमवस्थितिं विना न किंचित्कर्तव्यमस्तीति सिद्धम् ॥ ६९ ॥

श्री० टी०—ननु च कश्चिदपि प्रसुप्त इव दर्शनादिव्यापारशून्यः सर्वात्मना निगृहीतेन्द्रियो लोके न दृश्यतेऽतोऽसंभावितमिदं लक्षणमित्याशङ्क्याह—**या निशेति**। सर्वेषां भूतानां या निशा निशेव निशा आत्मनिष्ठा आत्माज्ञानध्वान्तावृतमतीनां तस्यां दर्शनादिव्यवहाराभावात् तस्यामात्मनिष्ठायां संयमी निगृहीतेन्द्रियो जागर्ति प्रबुद्ध्यते यस्यां तु विषयबुद्ध्या भूतानि जाग्रति प्रबुद्ध्यन्ते सा आत्मतत्त्वं पश्यतो मुनेर्निशा तस्यां दर्शनादिव्यापारस्तस्य नास्तीत्यर्थः । एतदुक्तं भवति । यथा दिवान्धानामुलूकादीनां रात्रावेव दर्शनं नतु दिवसे एवं ब्रह्मज्ञस्योन्मीलिताक्षस्यापि ब्रह्मण्येव दृष्टिर्नतु विषयेषु। अतो नासंभावितमिदं लक्षणमिति ॥ ६९ ॥

स० टी०—एवं मुमुक्षुणा प्रज्ञास्थैर्यायेन्द्रियसंयमः॥ कार्यः प्रयत्नतः शास्त्राचार्याभ्यामुपदेशतः ॥ १ ॥ उत्पन्ने तत्त्वविज्ञाने क्षीणेऽज्ञाने सकार्यके ॥ इन्द्रियाणां सचित्तानां स्वतः सिद्धोऽस्ति संयमः ॥ २ ॥ इत्याह भगवान्विष्णुर्ब्रह्मनिष्ठाप्रदर्शनात् ॥ वेदान्तवाक्यजा प्रज्ञाहंब्रह्मास्मीति या दृढा ॥ ३ ॥ अज्ञानप्रत्यक्प्रकाशत्वादज्ञानां रजनीव या ॥ ब्रह्मविद्यास्वरूपिण्यां तस्यां जागर्ति संयमी ॥ ४ ॥ जितेन्द्रियो जितमनाः स्थितप्रज्ञ उदारधीः ॥ प्रबुद्धोऽज्ञाननिद्रातः सावधानः स वर्तते ॥ ५ ॥ ग्राह्यग्राहकरूपा या निशाऽविद्या तमोमयी ॥ प्रसुप्तान्येव भूतानि यस्यां व्यवरन्ति वै ॥ ६ ॥ स्वप्नवत्सा निशा तस्य ब्रह्मतत्त्वं प्रपश्यतः ॥ स्थितप्रज्ञस्य विदुषो भेददृङ् नावभासते ॥ ७ ॥ प्रबुद्ध्यते न यावद्धि तावत्स्वप्नस्य दर्शनम् ॥ प्रबुद्धस्य पुनः स्वप्नो बाधितो भ्रमकालिकः ॥ ८ ॥ बाधपर्यन्तता दृष्टा सकार्यस्य भ्रमस्य च ॥ साक्षात्कृते परे तत्त्वे न भ्रमो न च तत्कृतिः ॥९॥ समूलभ्रान्तिबाधाच्च तदुक्तं वार्तिके स्फुटम् ॥ कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते ॥ १० ॥ शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा ॥ काकोलूकनिशेवायं संसारो ऽज्ञात्मवेदिनोः ॥ ११ ॥ या निशा सर्वभूतानामित्यवोचत्स्वयं हरिः ॥ विपरीतदृशो नास्ति सम्यग्वस्तुनिरीक्षणम् ॥ १२ ॥ वस्त्वदर्शनजा यस्माद्विपरीता दृगेव सा ॥ सम्यग्वस्तुदृशो नास्ति विपर्ययनिरीक्षणम् ॥ १३ ॥ सम्यग्दृशा बाधितत्वात्समूलस्य भ्रमस्य हि ॥ उलूकस्य दिवान्धस्य यथा काकदिनं निशा ॥ १४ ॥ रात्र्यन्धस्य च काकस्य यथोलूकदिनं निशा ॥ तथाऽज्ञस्य निशेवास्ति निष्ठा ब्रह्मविदो मुनेः ॥१५॥ तथा ब्रह्मविदो मूढनिष्ठा रात्रिरिवोदिता॥ अतस्तत्त्वदृशो नास्ति क्रियाकारकलक्षणः ॥१६॥ व्यवहारोऽस्य सिद्धोऽतः सचित्तेन्द्रियसंयमः ॥ वितृष्णस्यात्मनिष्ठत्वादेषणात्रयमुज्झतः ॥१७॥ ज्ञस्याप्यनिच्छतो ध्यानमर्थायातं प्रवर्तते ॥ इत्युक्तं श्रीवसिष्ठेन रघुनाथं प्रति स्फुटम् ॥ १८ ॥ ६९ ॥

भा० टी०—एवं स्थितप्रज्ञलक्षणवर्णनेन मुमुक्षुभिरतियत्नेन स्थितप्रज्ञत्वाय समनस्केन्द्रियनिग्रहः कर्तव्य इत्युक्तम् । उत्पन्नविवेकविज्ञानस्य स्थितप्रज्ञस्य तु स्वतः सिद्ध एव समनस्केन्द्रियसंयमः । अविद्याविरोधिन्या विद्यया समूलस्य सर्वव्यवहारस्य निवृत्तेरित्येतद्वक्तुकामोऽविद्यावस्थायामेव कर्माणि विधीयन्ते न विद्यावस्थायामिति द्योतयन्नाह—**येति** । सर्वभूतानामुलूकस्थानीयानां या निशेव निशा रात्रिः परमार्थतत्त्वलक्षणा तस्यामज्ञाननिद्रातः प्रबुद्धः संयमी स्थितप्रज्ञो ज्ञानयोगी जागर्ति यस्यां ग्राह्यग्राहकलक्षणायामविद्यायां भूतानि जाग्रति सा पश्यतो मुनेर्निशेव निशेत्यर्थः ॥ ६९ ॥

पु० टी०—अथ विषयपरावृत्तेन्द्रियस्य स्थितिमाह—**या निशेति** । सर्वाणि भूतान्यात्मानं न जान-

न्त्यत आत्मविषयकाज्ञानरूपा तेषां भूतानां रात्रिर्यथोलूकानां दिनमेव रात्रिरेवं तस्यां रात्रौ संयमी परावृत्तेन्द्रियो योगी जागर्त्युद्बुद्धो भवति । तथा यस्यां जाग्रद्दशायां भूतानि जाग्रति स्वव्यवहारं कुर्वन्ति सा पश्यत आत्मदृष्टेर्मुनेर्मननशीलस्य निशा भवति तत्र व्यवहाराभावात् । तदुक्तम्—'आत्मा न हि स्फुरति सर्वशरीरभाजां तेषां निशा भवति सा खलु तत्र योगी । जागर्ति जाग्रति च ते व्यवहारजाते तन्न स्फुरत्युरुधियः क्षणदास्य सा ते ' इति । एवं सकलेन्द्रियपरावृत्तित्वमेव स्थितप्रज्ञत्वमित्यर्थः । यद्वा सर्वभूतानां सर्वदेहिनां या सकलेन्द्रियोपरमरूपा निशा सुषुप्तिस्तत्रात्माकारान्तःकरणवृत्तौ सत्यामप्यात्मानं न विन्दत्यथ तस्यां तुर्यावस्थापरिणतायां संयम्यात्मनिष्ठः पुमान् जागर्त्यात्मसुखानुभववान् भवति । " दैवं ह्येतन्मिथुनं परमो ह्येष आनन्दस्तस्मादेवंवित्स्वाप्याल्लोक्यं हैत एवं तदेव ते मिथुनेन प्रियेण धाम्ना समर्धयति " इतिश्रुतेः । वाशिष्ठेपि—' निद्रादौ जागरस्यान्ते यो भाव उपपद्यते । तं भावं भावयन् साक्षाददृयानन्दमश्नुते ' इति । अथ यस्यां जाग्रदवस्थायां भूतानि जाग्रति स्वव्यापारं कुर्वन्ति सा व्यवहारमपश्यत आत्मदृष्टेः पुरुषस्य निशा दृश्यप्रपञ्चास्फुरणात् ॥ ६९ ॥

रा० टी०—स्थितप्रज्ञस्य का भाषेति पृष्टस्य ज्ञानिलक्षणस्य प्रजहातीत्यादिश्लोकचतुष्टयेनोक्त्वा तस्यासंभवं च विषया इत्यादिश्लोकनवकेनोक्त्वा तस्मादित्यनेन तदुपसंहृत्येदानीं स्थितधीः किं प्रभाषेतेत्युत्तरार्धे भाषणादिप्रवृत्तिं परमानन्दतृप्तः किमर्थं करोतीति कृतज्ञानिप्रवृत्त्याद्याक्षेपस्योत्तरमाह—या निशेति । यद्वा प्रजहातीत्यादिश्लोकचतुष्टये विक्षिप्योक्तं ज्ञानिलक्षणं पिण्डीकृत्याह—या निशेति । या भूतानां प्राणिनां निशेव निशा परमेश्वरस्वरूपलक्षणा यत्परमेश्वरस्वरूपं प्राणिनां निशास्थानीयमिति यावत् । निशायां सुप्तानीव न किंचिद्भगवत्स्वरूपं जानन्तीति भावः । तस्यां भगवत्स्वरूपलक्षणायां प्राणिनिशायां संयमीन्द्रियसंयमयुक्तो ज्ञानी जागर्ति भगवत्स्वरूपं सम्यगपरोक्ष्येण पश्यति । यस्यां विषयलक्षणायां भूतानि जाग्रति रूपादिविषयेष्वासक्त्यानुभववन्तो वर्तन्ते प्राणिनः सा निशा मुनेर्मननवतः अत एव पश्यतोऽपरोक्षिणः सा निशेव निशा न किंचिज्जानातीत्यर्थः । तथात्वे भाषणभिक्षाटनादिप्रवृत्त्यनुपपत्तिरिति चेत्, प्रारब्धकर्मणेषत्तिरोहितब्रह्मस्वरूपस्य वासनया प्रायोल्पाभिसंधिपूर्वकं प्रवृत्तीनां मत्तस्येवोपपत्तेरिति भावः । एतेन नित्यं भगवदेकचित्ततया तदितरत्राभिसंधिहीनत्वं ज्ञानिलक्षणमित्युक्तं भवति । एतच्च देवेतरज्ञानिलक्षणं बोध्यम् । अन्यथा सर्वप्रेरकाणां देवानामपि ज्ञानित्वात्तेषां भगवदितरत्राभिसंध्यभावे लोकयात्रोच्छेदापत्तेः । शब्दक्रमादर्थक्रमस्य बलवत्त्वान्मुनेः पश्यत इति व्यत्यासेन मुनेर्मननवतः पश्यत इति पौर्वापर्येण योजना । ततश्च तयोर्हेतुहेतुमद्भावलाभः । स च मननादेः प्राग्दर्शनसाधनत्वस्य स्पष्टमनुक्तेः इह प्रसङ्गादुक्त इति ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ॥
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

त० टी०—नन्वेवं निगृहीतसर्वेन्द्रियस्य सर्वविषयेभ्यो निवृत्तबुद्धेर्योगिनो योगप्रभावाद्यदि सर्वे कामसिद्धयः स्वयं प्राप्नुयुः स तान् कामान् गृह्णीयाच्चेत्तर्हि तस्य तत्रासक्त्या तत्त्वतश्च्युतिः स्यादित्याशङ्कावारणायाह—आपूर्यमाणमिति । सर्वाभिर्नदीभिः सदा आपूर्यमाणं तथाऽप्यनुल्लङ्घितमर्यादं समुद्रं पुनरपि वृष्टिजाः सर्वा आपः प्रविशन्ति स यद्वन्न कश्चन विशेषमापद्यते, तद्वत् । विषयात्मभिः काम्यन्त इति कामाः सर्वे रूपरसादयो विषयाः प्रारब्धकर्मवशाद्योगविघ्नार्थं देवैः प्रेषिता वा यं स्थितप्रज्ञं मुनिं प्रविशन्ति तदिन्द्रियग्राह्यतां स्वयमेव प्राप्नुवन्त्यपि किञ्चिद्विकारं कर्तुं न प्रभवन्ति स शान्तिं सर्वविक्षेपहेतुकर्मध्वंसेन निरतिशयानन्दरूपां मुक्तिमाप्नोति । न तस्य तत्त्वनिष्ठाया

भ्रंशशङ्काऽपीत्यर्थः । विषयिणस्तदभावमाह—न कामकामीति । कामान्विषयान्कामयितुं शीलं यस्य स तथा शान्तिं न प्राप्नोति किन्तु विषयानुभवार्हे संसार एव वर्तते ॥ ७० ॥

म० टी०—एतादृशस्य स्थितप्रज्ञस्य सर्वविक्षेपशान्तिरप्यर्थसिद्धेति सदृष्टान्तमाह—आपूर्यमाणमिति । सर्वाभिर्नदीभिरापूर्यमाणं सन्तं वृष्ट्यादिप्रभवा अपि सर्वा आपः समुद्रं प्रविशन्ति । कीदृशमचलप्रतिष्ठमनतिक्रान्तमर्यादम् । अचलानां मैनाकादीनां प्रतिष्ठा यस्मिन्निति वा गाम्भीर्यातिशय उक्तः । यद्वत् येन प्रकारेण निर्विकारत्वेन तद्वत् तेनैव निर्विकारप्रकारेण यं स्थितप्रज्ञं निर्विकारमेव सन्तं कामाः अज्ञैर्लोकैः काम्यमानाः शब्दाद्याः सर्वे विषयाः अवर्जनीयतया प्रारब्धकर्मवशात्प्रविशन्ति न तु विकर्तुं शक्नुवन्ति । स महासमुद्रस्थानीयः स्थितप्रज्ञःशान्तिं सर्वलौकिकालौकिककर्मविक्षेपनिवृत्तिं बाधितानुवृत्तावविद्याकार्यनिवृत्तिं चाप्नोति ज्ञानबलेन न कामकामी काम्यान् विषयान् कामयितुं शीलं यस्य स कामकाम्यज्ञः शान्तिं व्याख्यातां नाप्नोति अपि तु सर्वदा लौकिकालौकिककर्मविक्षेपेण महति क्लेशार्णवे मग्नो भवतीति वाक्यार्थः । एतेन ज्ञानिन एव फलभूतो विद्वत्संन्यासस्तस्यैव च सर्वविक्षेपनिवृत्तिरूपा जीवन्मुक्तिर्दैवाधीनविषयभोगेपि निर्विकारतेत्यादिकमुक्तं वेदितव्यम् ॥ ७० ॥

शं० टी०—यथा कन्यका स्वयमृतुमती भूत्वा जननीं जनकं भ्रातरं च सर्वं स्वजनं त्यक्त्वा भर्तारमेवैकमाश्रित्य तदेकालम्बना भूत्वा तत्रैव रमते तेनैव तुष्यति हृष्यत्यानन्दति नान्यं शृणोति पश्यति स्मरति स्पृशति स्वयं पतिव्रता भूत्वा तत्रैव तिष्ठति तथैव यस्य ब्रह्मविदो यतेः प्रज्ञा समाधिना प्रौढीभूय देहं प्राणमिन्द्रियजातं च सर्वं दूरतः परित्यज्य सच्चिदानन्दैकरसं परं ब्रह्मैकमेवाश्रित्य तदेकालम्बना भूत्वा तत्रैव रमन्ती क्रीडन्ती नन्दन्ती तुष्यन्ती हृष्यन्ती सती पतिव्रतावन्नान्यच्छृणोति पश्यति मनुते विजानाति स्वयं सदा तदात्मना तिष्ठति स एव जीवन्मुक्तिसुखं विदेहकैवल्यसुखं च विन्दत इति सूचयितुं स्थितप्रज्ञस्य यतेर्भिक्षादावपि वृत्तेर्बाह्यानालम्बनत्वमेव प्रतिपादयति श्रीभगवान् एवंलक्षण एव यातिर्विदेहमुक्तिं प्राप्नोति नान्यविध इति निर्धारयन्—आपूर्यमाणमिति । गङ्गानर्मदागोदावरीकृष्णाकावेरीसिन्ध्वादीनां महानदनदीनां दशशतसहस्रसंख्याकेभ्यो मुखेभ्योऽतिपरिणामवद्भ्यः समागतैरभ्रंकषैर्महाप्रवाहैरपरिमितैः समन्तादापूर्यमाणमपि स्वयमचलप्रतिष्ठमचला चलनवर्जिता प्राक्तनस्वीयलक्षणमनतिक्रान्ता वृद्धिक्षयशून्या प्रतिष्ठा जलस्थितिमर्यादा यस्य सोऽचलप्रतिष्ठस्तं प्रवाहाऽप्रवेशकाल इव प्रवेशकालेऽप्येकरूपेण सत्ताविशेषशून्यतया वर्तमानमित्यर्थः । सदैकरूपेणैव तिष्ठन्तं समुद्रमापः गङ्गासिन्ध्वादिमहानदीनां नानामुखेभ्यः समागतानि जलानि नानाविधवर्णरसगन्धगुणफलवत्य आपो यद्वत्प्रविशन्ति स्वकीयशुक्लनीलारुणपीतादिरूपविशेषं मधुराम्लतिक्तकषायादिरसविशेषं परिमलपूत्यादिगन्धविशेषं लघुत्वगुरुत्वादिगुणविशेषमेकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशशतकृच्छ्रसमानपुण्यविशेषं तत्तन्नामविशेषं च परित्यज्य समुद्रभावमेव यथा गच्छन्ति समुद्रं प्राप्य तत्संबन्धमहिम्ना नामरूपगुणविशेषैर्यथा समुद्रान्न भिद्यन्त इत्यर्थः । तद्वत्कामा यं प्रविशन्ते काम्यन्ते नामभेदेन रूपभेदेन रसभेदेन गन्धभेदेन पाकभेदेन च विविच्य गृह्यन्त इति कामा भोग्यपदार्थाः सूपाऽपूपरसान्नादयस्तदन्ये च भोग्यविशेषा नानाविधैर्नामरूपरसगन्धपाकसंस्कारादिविशेषविचित्रैरनेकैर्भोग्यविशेषैः सर्वतोऽनिच्छाप्रारब्धादेव संप्राप्तैरापूर्यमाणं मां गृहाण मां गृहाणेति दातृजनद्वारा समन्तात्पतद्भिर्व्याकुलीक्रियमाणमप्यचलप्रतिष्ठमचला निर्विकल्पा विपरीतभावशून्या व्युत्थानदशायामप्याहारादौ सदाकारतामापाद्य सदात्मनैव निश्चलीभूय स्थिताऽखण्डाकारवृत्तेः प्रतिष्ठा स्थितिर्यस्य सोऽचलप्रतिष्ठः तदानीमपि बाह्यानविकल्प्य समाधिनिष्ठया विपरिणामरहितान्तःकरण इत्यर्थः । तमचलप्रतिष्ठमेव यं ब्रह्मविदं यतिं सर्वे कामाः प्रविशन्ति यं

ब्रह्मनिष्ठं प्राप्य सर्वे विषयाश्चिद्भावापन्ना अध्यात्मदृष्ट्या प्रविलापिताः सन्तः स्वकीयं नामविशेषं रूपविशेषं गन्धविशेषं पाकविशेषं संस्कारविशेषं रुचिविशेषं च परित्यज्य समुद्रप्रविष्टमहानदीजलानि समुद्रभावमिव स्वयं ब्रह्मभावं गच्छन्तीत्यर्थः । य एवंलक्षणो ब्रह्मविद्यतिः स एव शान्तिमविद्याप्रपञ्चोपशमलक्षणां विदेहमुक्तिमाप्नोति नतु कामकामी कामान् विषयान् यः कामयते स कामकामी स्वयं कैवल्यकारणभूतां ब्रह्मनिष्ठां स्वधर्मं परित्यज्यानात्मन्येवात्मभावमापद्य भोक्ता सन् शुक्तौ रजतमिव मरौ जलमिव ब्रह्मण्यद्वितीये ह्यविद्यमानमेव द्वैतं कल्पयित्वा अहं भोक्तेदं भोग्यमित्यनृताभिसंधितया बाह्यवासनाभिरसत्यहन्ताममताभिनिवेशेन बद्धः सन् इदं रम्यमिदमिष्टमित्यादिभेदबुद्ध्या नामरूपादिविशेषविभागेन पदार्थान् गृह्णाति यतस्ततः कामकामी भेददर्शी शान्तिं न प्राप्नोति देहादितादात्म्यापत्त्या योऽसदभिनिवेशेन ब्रह्मण्यद्वितीये भेदं पश्यति स एव कामकामी द्वैतदर्शी मुक्तिं न प्राप्नोतीत्यर्थः । तथाच श्रुतिः " यदा ह्येवैष एतस्मिन्नु दरमन्तरं कुरुते अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य" इति । नहि देहतादात्म्यं विना भेददर्शनं कामना च सिध्यति नापि देहतादात्म्यं चाविद्यां विना संभवत्यविद्यावतो मुक्त्यभावो युक्त एव यतस्ततः कचित्कदाचिदपि देहतादात्म्यापत्त्या भेददृष्टिर्न कर्तव्या विदेहकैवल्यार्थिना यतिनेति सिद्धम् । पूर्वश्लोकेनानेन च द्वाभ्यामाहारादावपि स्थितप्रज्ञो ब्रह्मविद्यतिर्ब्रह्मात्मना ब्रह्मण्येव तिष्ठति न कचिदप्यनात्मनीति किमासीतेति प्रश्नस्योत्तरं दत्तम् ॥ ७० ॥

श्री० टी०—ननु विषयेषु दृष्ट्यभावे कथमसौ तान् भुङ्क्ते इत्यपेक्षायामाह—**आपूर्यमाणमिति** । नाना नदीभिरापूर्यमाणमपि अचलप्रतिष्ठमनतिक्रान्तमर्यादमेव समुद्रं पुनरप्यन्या आपो यथा प्रविशन्ति तथा कामा विषया यं मुनिमन्तर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्मभिराक्षिप्ताः सन्तः प्रविशन्ति स शान्तिं कैवल्यं प्राप्नोति नतु कामकामी भोगकामनाशीलः ॥ ७० ॥

स० टी०—तदेवं सर्वविक्षेपनिवृत्तिरतस्य धीमतः ॥ उक्ताधुना कामशान्तिः सदृष्टान्ता निदर्श्यते ॥१॥ आपूर्यमाणं सर्वाभिर्नदीभिरपि सागरम् ॥ वृष्ट्यादिप्रभवा आपः प्रविशन्ति यथाखिलाः ॥ २ ॥ अनतिक्रान्तमर्यादं तिष्ठन्तं निर्विकारतः ॥ धीरं तेन प्रकारेण स्थितप्रज्ञमवस्थितम् ॥ ३ ॥ निर्विकारतया सन्तं काम्यमाना अपीतरैः ॥ शब्दाद्या विषयाः सर्वे यदि प्रारब्धकर्मणा ॥ ४ ॥ प्रविशन्ति न तच्चित्तं विकर्तुं शक्नुवन्ति ते ॥ स महार्णवतुल्यो यः स्थितप्रज्ञो विचक्षणः ॥ ५ ॥ सर्वलौकिकविक्षेपनिवृत्तेर्ज्ञानतेजसा अविद्याकार्यमाभासमपि त्यक्त्वा च नैष्ठिकीम् ॥ ६ ॥ शान्तिमाप्नोति मूढस्तु कामकामी न शान्तिभाक् ॥ काम्यान्कामयितुं शीलं यस्य संसारिणः स च ॥७॥ सदा क्लेशार्णवे मग्नो भवतीत्याशयो हरेः॥८॥७०॥

भा० टी०—एतादृशस्यैव मोक्षप्राप्तिः न कामिन इति सदृष्टान्तमाह—**आपूर्यमाणमिति** । अद्भिरापूर्यमाणमचलप्रतिष्ठमनतिक्रान्तमर्यादम् । अचलानां मैनाकादीनां प्रतिष्ठा यस्मिन् तमेतेन गाम्भीर्यातिशय उक्त इत्यर्थस्तु भाष्यकृद्भिर्न कृतः अनतिक्रान्तमर्यादत्वस्यैवात्र विवक्षितत्वात् मैनाकादेरिन्द्रवज्रभयात्समुद्रे तिरोभूय स्थितस्य सपक्षत्वेन तस्मिन्नचलशब्दप्रवृत्तौ कारणाभावाच्च । समुद्रमापः काश्चित्सकण्टकाः काश्चित्सपुष्पाः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत्तद्वत्सर्वे कामाः लोकैः काम्यमाना विषयाः यं स्थितप्रज्ञमचलाऽप्रकम्प्या प्रतिष्ठा यस्य अचले ब्रह्मणि प्रतिष्ठा यस्येति वा । प्रविशन्ति सर्वे आत्मन्येव लीयन्ते न ह्यात्मवशं कुर्वन्ति सः शान्तिं मोक्षाभिधां प्राप्नोति कामान् विषयान् कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः । यत्वन्ये प्रजहातीत्यादिग्रन्थेन कामादित्यागेन्द्रियनिग्रहकथनपरेण कामादीनां पृथक्सत्त्वमुक्तमतो नाद्वैतसिद्धिरित्याशङ्क्य सदृष्टान्तं परिहरति—प्रविशन्तीभिरद्भिरापूर्यमाणमचलप्रतिष्ठं समुद्रं

यद्वदापः प्रविशन्ति तद्वद्यं पुरुषं कामैरापूर्यमाणं हीयमानं वाचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वाद् आत्मप्रभवाः सर्वे कामाः प्रविशन्ति स शान्तिमाप्नोति न तु कामकामी काम्यन्त इति कामा विषयाः तान्कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः । अयं भावः । पूर्वग्रन्थेन कामादीनां पृथक्सत्त्वं न प्रतिपाद्यते किंतु पामरसिद्धं पृथक्सत्वमभिप्रेत्य प्रहाणादिकमुच्यते इत्यादि वर्णयन्ति तदुपेक्ष्यं प्रकरणविरोधाद् यत्पदेन पूर्वोत्तरं बह्वभ्यस्तस्यात्रापि यमिति श्रूयमाणस्य मोक्षाधिकारिणस्त्यागायोगात् स शान्तिमाप्नोति न कामकामीति वाक्यशेषविरोधाच्चेति दिक् ॥ ७० ॥

प० टी०—अथेन्द्रियपरावृत्तिं दृष्टान्तेनाह—आपूर्यमाणमिति । स पुरुषः शान्तिं शमसुखमाप्नोति । स कः सर्वे कामाः सर्वे विषयास्तावद्यं प्रविशन्ति तद्वत् परावृत्ता भवन्ति । किंवत्, यद्वदापो नानानदीप्रवाहाः समुद्रं प्रविशन्ति । किंभूतम् आपूर्यमाणं मेघैर्वहिर्निःसार्यमाणेऽप्युदकेऽनुपक्षीणं तथा पुनर्वर्षमाणोत्पन्नप्रवाहैर्युक्तेप्यचलप्रतिष्ठमनुल्लङ्घितमर्यादम् । एवं प्रकृतेऽपि विषयवृत्तिषु बहिर्निःसृतास्वपि स्थितप्रज्ञत्वादनुपक्षीणं पुनः प्रतिष्ठास्वप्यहं निवृत्तेन्द्रिय इत्यभिमानशून्यमित्यर्थः । एवंविध एवात्मसुखभाक् परंतु न कामकामी भोगकामनाशीलः ॥ ७० ॥

रा० टी०—ननु ज्ञानिनो बाह्यानुसंधानहीनस्य मत्तस्येव युज्येतापि कथंचिद्गमनादिकम् । विषयानुभवस्तु दृश्यमानः कथं स्यात् । तस्य नियतसाधनसाध्यस्यानुसंधानेन विनानुदयात् । इत्यतो ज्ञानिना क्रियमाणविषयानुभवप्रकारमाह—आपूर्यमाणमिति । नानानदीजलैरापूर्यमाणमपि अचलप्रतिष्ठं सरित्प्रवेशाद्वृद्धिविशेषहीनतया स्वभावत एव स्थितम् । सरितामप्रवेशनिमित्तशोषहीनं च सरित्प्रवेशार्थं यत्नहीनं चेत्यपि ध्येयम् । समुद्रमापो यद्वद्यथा प्रविशन्ति तद्वत् तथायं ज्ञानिनं विषयैरापूर्यमाणत्वे वा उत्सेकानुत्सेकहीनं कामा विषयाः प्रविशन्ति स ज्ञानी शान्तिं मोक्षमाप्नोति न तु कामकामी कुत्सितविषयेच्छावान् शान्तिमाप्नोतीत्यर्थः । यद्वा विषयभोक्ता कामी कथमुच्यत इत्यत उक्तम्—नत्विति । एवं विषयाननुभवन्स ज्ञानी न कामकामी ॥ ७० ॥

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः ॥
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१ ॥

त० टी०—एवंभूतमहाफलस्य योगस्य कोऽधिकारीत्यपेक्षायामाह—विहायेति । सामान्ययच्छब्दप्रयोगात्सर्वविषयत्यागपूर्वकात्मनिष्ठायां वर्णाश्रमविशेषनियमो नास्ति, किन्तु यः कश्चिदपि पुमान्सर्वान्कामानप्राप्तान्प्राप्तान्वा विहाय विशेषेण त्यक्त्वा देहयात्रामात्रेऽपि निस्पृहः अत एव निर्ममः यदृच्छाप्राप्ते भोजनाच्छादनादौ ममेदमित्यभिमानशून्यः पुनश्च निरहङ्कारः देहेन्द्रियादावहङ्काररहितः आत्मनस्तद्वैलक्षण्यज्ञानपूर्वकदेहादिसम्बन्धस्यानित्यत्वज्ञानात् चरति यदृच्छाप्राप्तभोगान् भुङ्क्ते यत्र क्व वा गच्छति स शान्तिमुक्तलक्षणामधिगच्छति निर्वन्धतया प्राप्नोति ॥ ७१ ॥

म० टी०—यस्मादेवं तस्मात्प्राप्तानपि सर्वान् बाह्यान् गृहक्षेत्रादीन् आन्तरान्मनोराज्यरूपान् वासनामात्ररूपांश्च पथि गच्छतस्तृणस्पर्शरूपान् कामांस्त्रिविधान् विहायोपेक्ष्य शरीरजीवनमात्रेपि निस्पृहः सन् यतो निरहङ्कारः शरीरेन्द्रियादावयमहमित्यभिमानशून्यः विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इति वा । अतो निर्ममः शरीरयात्रामात्रार्थेऽपि प्रारब्धकर्माक्षिप्ते कौपीनाच्छादनादौ ममेदमित्यभिमानवर्जितः सन् यः पुमान् चरति प्रारब्धकर्मवशेन भोगान् भुङ्क्ते यादृच्छिकतया यत्र क्वापि गच्छतीति वा स एवंभूतः स्थितप्रज्ञः शान्तिं

सर्वसंसारदुःखोपरमलक्षणामविद्यातत्कार्यनिवृत्तिमधिगच्छति ज्ञानबलेन प्राप्नोति । तदेतदीदृशं व्रजनं स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तम् ॥ ७१ ॥

शं० टी०—यस्मात् ध्यायतो विषयानित्यत्र विषयाणां श्रवणेन दर्शनेन च विनैव केवलध्यानमात्रेण कामाद्यनर्थाविर्भूत्या विदुषोऽपि प्रणाशः प्रतिपादितः किमुत ब्रह्मनिष्ठामुत्सृज्य बाह्यवृत्त्या विषयानिन्द्रियैर्गृह्णतो भुञ्जतो यथेच्छं विहरतो वा कामकामिनः प्रणाश इति तस्माद्विदेहकैवल्यार्थिना यतिना ब्रह्मविदा सर्वथाविषयग्राहमुत्सृज्य सर्वेन्द्रियनिग्रहपूर्वकं सदात्मनिष्ठया स्थातव्यमेवं यस्तिष्ठति स एव विदेहमुक्तिं विन्दतीति प्रतिपादयति—**विहायेति** । पुमर्थमतिदुर्लभं मोक्षं महता प्रयत्नेन संपादयति ब्रह्मवित् खलु पुमान् पुरुषशब्दवाच्यो यो ब्रह्मविद्यतिः स्वयं निरहंकारः ब्रह्मैवाहमिति ब्रह्मण्येव निरूढात्मत्वाभिनिवेशेन देहान्निर्गतोऽहंकारोहमात्मिका बुद्धिर्यस्य स निरहंकारः नित्यनिरन्तरब्रह्मनिष्ठया निर्मूलितानात्मतादात्म्यग्रन्थिरित्यर्थः । तत एव निर्ममः देहतद्धर्मतत्कर्मतदवस्थादिभ्यो निर्गतो ममताबन्धो यस्य स निर्ममः ब्रह्म तादात्म्यापत्त्या वपुष्यहंभावाभावे तद्धर्मादौ ममताभावो विदुषो युक्त एवेत्यर्थः । तत एव निःस्पृहः विषयेभ्यो निर्गता स्पृहा सुखाशालक्षणा यस्य स निःस्पृहः ब्रह्मण्येवात्मतापत्त्या देहादेरनात्मत्वेन निरस्तत्वात्तमुद्दिश्य सुखाशाऽसंभवात्स्वस्य निरन्तरब्रह्मानन्दामृतरसेनैव तृप्तत्वाच्च विदुषो विषयसुखापेक्षाऽभावो युक्तः । तत एव सर्वान् कामान् बाह्यशब्दवाच्यान् विषयान् विहाय शुक्तिरजततुल्यैस्तैः प्रयोजनाभावादिन्द्रियैस्तद्ग्रहणमकृत्वा सर्वमिदमहं च ब्रह्मैवेति स्वं सर्वं च ब्रह्मैव पश्यन् चरति । “ कामान्नीकामरूप्यनुसंचरन् ” इत्यादिश्रुत्युक्तप्रकारेण भूमौ सर्वत्राऽसङ्गोदासीनो भूत्वा यः पर्यटति परमहंसः स एव शान्तिमात्यन्तिकसंसारोपरमलक्षणां विदेहमुक्तिमधिगच्छति नैतद्विपरीतलक्षण इत्यर्थः । ब्रह्मात्मना सर्वं वीक्षमाणो ब्रह्मानन्दमनुभुञ्जानो ब्रह्मवित्सर्वत्र चरति नैकत्र तिष्ठतीति व्रजेत किमितिप्रश्नस्योत्तरं दत्तम् ॥ ७१ ॥

श्री० टी०—यस्मादेवं तस्मात्—**विहायेति** । प्राप्तान्कामान्विहाय त्यक्त्वा उपेक्ष्य अप्राप्तेषु च निःस्पृहः यतो निरहङ्कारः अतएव तद्भोगसाधनेषु निर्ममः सन्नन्तर्दृष्टिर्भूत्वा यश्चरति प्रारब्धवशेन भोगान्भुङ्क्ते यत्र क्वापि गच्छति वा स शान्तिमाप्नोति ॥ ७१ ॥

स० टी०—यस्मादेवमतः प्राप्तानपि बाह्यान्गृहादिकान् ॥ वासनामात्ररूपांश्च मनोराज्यात्मकानपि ॥१॥ पथि प्राप्तांस्तृणस्पर्शतुल्यांस्तांस्त्रिविधानपि ॥ उपेक्ष्य देहयात्रायामपि यो निःस्पृहो मुनिः ॥ २ ॥ देहाद्यहंकृतेः शून्यः स्वश्लाघादिविवर्जितः ॥ तादात्म्याध्यासशून्यत्वात्संसर्गाध्यासवर्जितः ॥ ३ ॥ शरीरयात्रामात्रार्थे प्राप्ते प्रारब्धकर्मणा ॥ ममेदमिति तत्रापि स्वत्वभ्रान्तिविवर्जितः ॥ ४ ॥ भोगानारब्धवशतो भुङ्क्ते भोक्तृत्वमन्तरा ॥ यादृच्छिकतया यत्र क्वापि याति स वा पुमान् ॥ ५ ॥ य एवंभूत एषोऽत्र स्थितप्रज्ञ उदारधीः ॥ शान्तिं समस्तसंसारदुःखाभावोपलक्षिताम् ॥ ६ ॥ निर्वाणाख्यामवाप्नोति तत्त्वबोधबलेन वै ॥ ईदृशं व्रजनं तस्य स्थितप्रज्ञस्य कीर्तितम् ॥ ७ ॥ ७१ ॥

भा० टी०—चतुर्थप्रश्नस्योत्तरमुपसंहरति—**विहायेति** । यस्मादेवं तस्माद्विहाय कामान्सर्वान्यः स्थितप्रज्ञः शरीरजीवनमात्रेपि निःस्पृहः । अत एव शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि ममेदमित्यभिनिवेशरहितः निरहंकारः विद्यावत्त्वादिनिमित्तात्मसंभावनावर्जितः । ननु देहाभिमानरहित इत्याचार्यैः कुतो न व्याख्यातमिति चेदुक्ताहंभावेऽस्यान्तर्भावविवक्षयेत्यदोषः । चरति पर्यटति स शान्तिमविद्यातत्कार्योपरमरूपां निर्वाणाभिधामधिगच्छति प्राप्नोति ॥ ७१ ॥

प० टी०—अथ तदेव प्रकटयति—**विहायेति** । यः पुमान् साधितपुरुषार्थः सर्वान् कामान् विहाय तृणोपमान् कृत्वा निस्पृहश्चरति । अथ निस्पृहत्वमेवाह—**निर्मम इति** । विषयेषु सत्स्वपि ममताभिसा-

नशून्यः परावृत्तेषु निरहंकारोऽहं कृतकृत्य इति श्लाघाशून्य एवंविधो यो निस्पृहः स एव शान्तिमधिगच्छति नान्यः ॥ ७१ ॥

रा० टी०—एतच्छ्लोकोक्तं प्रपञ्चयति—विहायेति । यो निस्पृहो निषिद्धस्पृहाहीनः निर्ममः स्वामित्वाभिमानहीनः निरहंकारः भक्षयामीति कर्तृत्वाभिमानहीनः सन्सर्वान्कामान्विषयान्विहाय चरति भक्षयाति भक्षयामीति कर्तृत्वाद्यभिमानत्यागेन विषयाननुभवतीत्यर्थः । स एव पुमानन्यः पशुरिति वा स पुमान् शान्तिमधिगच्छतीति वा ज्ञानिन इयं स्तुतिः ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

त० टी०—उक्तात्मनिष्ठां स्तुवन्नुपसंहरति—एषेति । एषाऽसङ्गकर्मपूर्विका ब्राह्मी ब्रह्मसंबन्धिनी ब्रह्मप्रापिकेति यावत् । स्थितिः स्थितप्रज्ञालक्षणा निष्ठोक्तेति शेषः । एनां स्थितिं प्राप्य कर्मयोगी न विमुह्यति देहात्मबुद्धिं न प्राप्नोति । अस्यां स्थित्यामन्तकाले मरणासन्नकालेऽपि स्थित्वा ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं सर्वकर्मध्वंसपूर्वकं दुःखात्यन्ताभावं निरतिशयसुखं मोक्षमृच्छति प्राप्नोति । प्राकृतोभयशरीरत्यागपूर्वकमप्राकृतदेहवान् भूत्वा निरन्तरभगवद्भजनानन्दसुखानुभवयोग्यो भवतीति भावः । किं पुनर्वक्तव्यं यदि पूर्वे समर्थे वयस्यस्यां स्थित्वा ब्रह्मनिर्वाणमृच्छतीति ॥ ७२ ॥

भगवत्प्राप्तिहेतुस्तत्पराभक्तिर्हि वक्ष्यते । तदङ्गमात्मविज्ञानं साधनं तस्य कर्म च ॥ १ ॥
असङ्गं तेन शुद्धात्मा स्थितप्रज्ञो भवेत्ततः । सर्वदुःखविनिर्मुक्तः परां शान्तिं निगच्छति ॥ २ ॥
इति गीतार्थसंक्षेपः श्रीकृष्णेन कृपावशात् । अध्यायेऽस्मिन् समादिष्टो भक्तानां हितसिद्धये ॥ ३ ॥

इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवकाश्मीरिभट्टाचार्यविरचितायां गीतासंग्रहार्थप्रकाशो नाम द्वितीयोऽध्यायः ॥ २ ॥

म० टी०—तदेवं चतुर्णां प्रश्नानामुत्तरव्याजेन सर्वाणि स्थितप्रज्ञलक्षणानि मुमुक्षुकर्तव्यतया कथितानि-संप्रति कर्मयोगफलभूतां सांख्यनिष्ठां फलेन स्तुवन्नुपसंहरति—एषेति । एषा स्थितप्रज्ञलक्षणव्याजेन कथिता एषा तेऽभिहिता सांख्ये बुद्धिः इति च प्रागुक्ता स्थितिर्निष्ठा सर्वकर्मसंन्यासपूर्वकपरमात्मज्ञानलक्षणा ब्राह्मी ब्रह्मविषया । हे पार्थ ! एनां स्थितिं प्राप्य यः कश्चिदपि पुनर्न विमुह्यति नहि ज्ञानबाधितस्याज्ञानस्य पुनः संभवोऽस्ति अनादित्वेनोत्पत्त्यसंभवात् । अस्यां स्थितौ अन्तकालेपि अन्त्येऽपि वयसि स्थित्वा ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं निर्वृतिं ब्रह्मरूपं निर्वाणमिति वा ऋच्छति गच्छत्यभेदेन किमु वक्तव्यं यो ब्रह्मचर्यादेव संन्यस्य यावज्जीवमस्यां ब्राह्म्यां स्थिताववतिष्ठते स ब्रह्मनिर्वाणमृच्छतीत्यपिशब्दार्थः ॥ ७२ ॥

ज्ञानं तत्साधनं कर्म सत्त्वशुद्धिश्च तत्फलम् ॥ तत्फलं ज्ञाननिष्ठेवेत्यध्यायेऽस्मिन्प्रकीर्तितम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीयपादशिष्यमधुसूदनसरस्वतीविरचितायां श्रीमद्भगवद्गीतागूढार्थदीपिकायां सर्वगीतार्थसूत्रणं नाम द्वितीयोऽध्यायः ॥ २ ॥

शं० टी०—मुमुक्षोर्यतेः श्रवणजन्यं ज्ञानं प्रपञ्चवासनाभिः कामक्रोधादिभिरहंममाद्यभिमानविशेषैश्च सप्रतिबन्धकं विदेहमुक्त्यै नालमिति निश्चित्य परमकृपालुः श्रीभगवान् समाधावचला बुद्धिः इति ब्रह्म-

निष्ठां प्रस्तुत्य निरन्तरं ब्रह्मनिष्ठया सर्वकामप्रहाणं कृतवतः शरीरयात्रादावपि ब्रह्मात्मना ब्रह्मणि तिष्ठतोऽहंममादिबन्धान्मुक्तवत एव विदुषो विदेहमुक्तिं प्रतिपाद्येदानीं मुमुक्षोरेपैव संपादनीया ह्यनयैव विदेहमुक्तिर्नान्यथेति सूचयन्नुपक्रान्तां ब्रह्मनिष्ठामुपसंहरति—**एषेति** । स्वस्वरूपं प्रकाश्य मुमुक्षुं संसारमृत्योः पातीति पः परमात्मा तमेवाऽर्थयते वाञ्छतीति पार्थस्तस्य संवुद्धिः हे पार्थ मुमुक्षो ! त्वमिदं मयोच्यमानं शृणु श्रुत्वा कुरु । ब्राह्मी ब्रह्मप्राप्तेर्नियतकारणत्वाद्ब्राह्मी ब्रह्मप्रापिका स्थितिर्निष्ठा एपा मया प्रतिपादिता । मुमुक्षूणां विदेहकैवल्यार्थी ब्रह्मविन्मुमुक्षुरेनां प्रस्तुतां ब्रह्मनिष्ठां प्राप्यानुष्ठाय न मुह्यति विमोहाय न कल्पते । सर्वेषां प्राणिनामहमिति विशिष्टो मोहो यत्र स विमोहो देहस्तं न प्राप्नोति एतस्यां निष्ठायां स्थित्वा ब्रह्मवित्पुनर्देही न भवतीत्यर्थः । किंच पूर्वस्मिन्नेव वयसि प्रसिद्धसाधनो जन्मातरीयसंन्यासश्रवणादिपुण्यकर्मपरिपाकवशाद्विद्वानिह प्रारब्धविशेषबलेन किंचित्कालं संसृत्यान्तकाले चरमावस्थायामप्यस्यां निष्ठायां स्थित्वा निर्वाणं निष्क्रियं नित्यानन्दैकरसं ब्रह्म ऋच्छति मुक्तिं गच्छतीत्यर्थः । 'विज्ञाय चरमावस्थां देवताभ्यो नृपोत्तमः । खट्वाङ्गो नाम राजर्षिर्मुहूर्ते मुक्तिमेयिवान्' इति प्रसिद्धेः । यत एवं ततो विदेहकैवल्यार्थिभिर्यतिभिर्वाह्ये प्रवृत्तिं परित्यज्यास्यामेव निष्ठायां सर्वदा स्थातव्यमिति सिद्धम् ॥ ७२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशङ्करानन्दसरस्वती-
कृतौ गीतावाक्यतात्पर्यबोधिन्यां द्वितीयोऽध्यायः ॥ २ ॥

श्री० टी०—उक्तां ज्ञाननिष्ठां स्तुवन्नुपसंहरति—**एषेति** । ब्राह्मी स्थितिः ब्रह्मज्ञाननिष्ठा एषा एवंविधा एनां परमेश्वराराधनेन विशुद्धान्तःकरणः पुमान् प्राप्य न विमुह्यति पुनः संसारमोहं न प्राप्नोति । यतः अन्तकाले मृत्युसमयेऽपि अस्यां क्षणमात्रमपि स्थित्वा ब्रह्मणि निर्वाणं लयमृच्छति प्राप्नोति किं पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति ॥ ७२ ॥

शोकपङ्कनिमग्नं यः सांख्ययोगोपदेशतः ॥ उज्जहारार्जुनं भक्तं स कृष्णः शरणं मम ॥ १ ॥

इति श्रीमद्भगवद्गीताटीकायां सुबोधिन्यां द्वितीयोऽध्यायः ॥ २ ॥

स० टी०—एवं चतुर्णां प्रश्नानामुत्तरव्याजतोऽत्र च ॥ तत्त्वविल्लक्षणान्येतान्यखिलानि मुमुक्षुणा ॥१॥ प्रकर्तव्यतयोक्तानि जीवन्मुक्त्यैकसिद्धये ॥ स्तूयते ज्ञाननिष्ठेयमधुनात्रोपसंहृतौ ॥ २ ॥ एषा यथोक्ता ब्राह्मी या ब्रह्माद्वैतैकगोचरा ॥ निष्ठा च कर्मसंन्यासपूर्विका ज्ञानलक्षणा ॥ ३ ॥ एतां ब्राह्मीं स्थितिं प्राप्य यः कोऽपि न विमुह्यति ॥ मोहहेतोरविद्याया बाधितत्वान्न संभवः ॥४॥ अस्यामन्त्येऽपि वयसि स्थितौ स्थित्वातिनिश्चलाम् ॥ ब्रह्मात्मनिर्वृतिं नित्यां मोक्षाख्यामाधिगच्छति ॥ ५ ॥ किमुवाच ब्रह्मचर्यादेव सन्यस्य यः पुमान् ॥ यावज्जीवं स्थितावस्यां ब्राह्म्यामेवावतिष्ठते ॥ ६ ॥ स याति ब्रह्मनिर्वाणमित्यपेराशयो हरेः ७।७२

आदित आरभ्य टीकाश्लोकसंख्या ॥ ९४७ ॥

बन्धोच्छेद्यात्मबोधं तदनु मति मलोच्छेदनार्थं स्वधर्मं तज्जां शुद्धिं ततोऽद्धाऽखिलकरणफलं ज्ञाननिष्ठां परेष्टाम् ॥ यो भक्ताय प्रियायावददमलयशाः श्रीपतिर्धर्मगोप्ता स श्रीकृष्णोऽखिलस्य भ्रमतिमिरहरो भातु भास्वान्ममान्तः ॥ १ ॥ ६७२ ॥

इति भावप्रकाशे श्रीसदानन्दविदाकृते ॥ गीतार्थसूत्रणं नाम द्वितीयः पूर्णतां गतः ॥ ६७३ ॥

भा० टी०—ज्ञाननिष्ठां स्तुवन्नुपसंहरति—**एषेति** । एषा यथोक्ता ब्रह्मणि भवा स्थितिः सर्वं परित्यज्य ब्रह्मरूपेणैवावस्थानमिति यावत् "ब्रह्मविद्ब्रह्मैव भवति" इतिश्रुत्या ब्रह्मशब्देनात्र ब्रह्मविद्ग्रहत इति व्याख्या-

नं त्वाचार्यैर्न कृतं मुख्यार्थेन वाक्यार्थनिर्वाहेऽमुख्यार्थस्यानौचित्यात् । एनां स्थितिं लब्ध्वा न विमुह्यति मोहं न प्राप्नोति । अस्यां ब्राह्म्यां स्थितावन्तकाले वृद्धावस्थायामपि स्थित्वा ब्रह्मणि निर्वृतिं मोक्षमृच्छति गच्छति किं वक्तव्यं प्रथमावस्थात आरभ्य ब्रह्मण्येव योऽवतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति । अन्तकाले मृत्युसमये इत्यर्थस्तु न तस्मिन्काले एतादृशस्थित्यसंभवात् नतु तदा विवशस्य स्मरणोद्यमः संभवतीति यंयं वापीति श्लोकस्थस्वोक्तिविरोधाच्च । ब्रह्मणि निर्वाणमिति भाष्यस्योपलक्षणत्वेन ब्रह्मरूपं निर्वाणमित्यर्थोऽप्यविरुद्धः निर्गतं यानं गमनं यस्मिन्नित्यर्थोऽपि तवाप्ययं शोकमोहाभिभूतत्वरूपः स्वभावो नोचितः किंतु जीवन्मुक्तस्वभाव एवेति सूचयन्नाह—पार्थेति । यद्वा मत्संबन्धिनस्तव मयि ब्रह्मण्येवावस्थानं युक्तमिति सूचयन्नाह—पार्थेति । तदनेन द्वितीयाध्यायेन तत्पदलक्ष्यं परमात्मानमेव त्वंपदलक्ष्यत्वेन प्रतिपादयता साक्षाच्छोकमोहनिवृत्तिहेतुभूतां ज्ञाननिष्ठां लक्षणसहितां प्राधान्येन तदुपायभूतां योगनिष्ठां च गुणभावेन प्रदर्शयता उपायोपेयभूतं निष्ठाद्वयं प्रकाशितम् ॥ ७२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिविदुषा विरचितायां गीताभाष्योत्कर्षदीपिकायां द्वितीयोऽध्यायः ॥ २ ॥

प० टी०—अथोपसंहरन्नाह—**एषेति** । एषोक्तलक्षणा ब्राह्मी स्थितिर्ब्रह्माकारेणावस्थितिरुपन्यस्ता । एनां प्राप्य न मुह्यति पुनर्मोहं न प्राप्नोति । अस्यामन्तकाले देहावसाने क्षणं स्थित्वापि ब्रह्मनिर्वाणमृच्छति प्राप्नोति किं पुनर्यावज्जीवमित्यर्थः ॥ ७२ ॥

अथाध्यायतात्पर्यम् ।

शोको देहात्मबुद्ध्या ननु भवति मृषा येन देहातिरिक्तो देहद्रष्टैक आत्मा विभुरनुपहतो हन्तृहन्यत्वशून्यः ॥ तस्य ज्ञानान्न शोकस्तदिह निजमनःशुद्धितः सा स्वधर्मादित्युक्तः स द्वितीये भृशमिममवदत्सांख्ययोगाधिकारम् ॥ १ ॥

इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितायां श्रीमद्भगवद्गीताटीकायां परमार्थप्रपायां सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

रा टी०—प्रजहातीत्यादिनोक्तं ज्ञानिलक्षणप्रकरणं समापयति—**एषेति** । एषा प्रजहातीत्यादिनोपक्रान्ता या निशेत्यत्र निष्कृष्योक्ता ब्राह्मी ब्रह्मविषया स्थितिः सर्वकामप्रहाणनित्यभगवदनुस्मृत्यादिरूपब्रह्मज्ञानिलक्षणरूपा स्थितिरिति यावत् । एनामुक्तरूपां स्थितिं प्राप्य न मुह्यति भववेदनानुभववान्न भवति । अन्तकालेपि देहत्यागकालेपि अस्यां भगवदनुस्मृत्यादिरूपस्थित्यां स्थित्वा निर्वाणं प्राकृतशरीरहीनं ब्रह्म ऋच्छति प्राप्नोति । प्रारब्धकर्माभावे यद्देहे ज्ञानोदयस्तद्देहत्यागकाले भगवदनुस्मृत्या तद्देहपातानन्तरमेव मुक्तिः प्रारब्धसत्वे तु देहान्तरं प्राप्येति भावः । तथाच सूत्रम् "भोगेन त्वितरे क्षपयित्वाथ संपत्स्यते" इति । ब्रह्मपदेन विरिञ्चोपादानव्यावृत्त्यर्थं निर्वाणमिति विशेषणं परब्रह्मप्राप्तेरेव मोक्षत्वादिति भावः ॥ ७२ ॥

इति श्रीमद्राघवेन्द्रयतिकृते श्रीमद्भगवद्गीतार्थसंग्रहे द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

**अर्जुन उवाच—ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥**

त० टी०—एवं तावदर्जुनस्यात्मतत्त्वोपदेशनिमित्तशोकमोहप्रदर्शनायोपोद्घाततत्त्वेन प्रथमाध्यायो निरूपितस्ततः शोकमोहनिवृत्तये देहात्मविवेकस्तत्साधनभूतासङ्गकर्मयोगसत्त्वशुद्धिपूर्वकभगवदाश्रयणसाध्यसर्वेन्द्रियसंयमस्ततः स्थितप्रज्ञता तत्फलं सर्वदुःखनिवृत्तिपूर्वकपरमा शान्तिरिति सर्वगीताशास्त्रार्थः संक्षेपेण द्वितीयाध्याये निरूपितः । तत उक्तार्थस्यैव षोडशाध्यायैर्विस्तरः कृतो बोध्यः । तत्र तावत्पूर्वाध्याये अशोच्यानन्वशोचस्त्वमिति श्लोकेनात्मज्ञानहीनं मां कुत्सयित्वा न त्वेवाहमित्यारभ्य एषा तेऽभिहिता सांख्ये बुद्धिरित्यन्तेन शोकविनाशोपायं ज्ञानयोगं मह्यमुपदिश्य पुनः योगे त्विमां शृणु इत्युक्त्वा कर्मण्येवाधिकारस्ते, मा ते सङ्गोऽस्त्वकर्मणि, योगस्थः कुरु कर्माणि इत्यादिना कर्मनिष्ठामुपादेयतयाऽभिधाय, श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला इत्यादिना समाधिनिष्ठामुपदिश्य, स्थितप्रज्ञलक्षणे सर्वकामत्यागपूर्वकसर्वेन्द्रियसंयममात्मनैव सन्तुष्टत्वं चोक्त्वा या निशेत्यादिना एषा ब्राह्मी स्थितिः पार्थ, स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति इति ज्ञानफलेनोपसंहारात् । मध्येऽभिहितायाः कर्मबुद्धेः सकाशात् ज्ञाननिष्ठाया ज्यायस्त्वं भगवतोऽभिप्रेतमिति प्रतीयते । एवं सति सर्वज्ञो हितोपदेष्टा गुरुर्भगवान्निकृष्टे कर्माधिकारे मां कथं नियोजयतीति संदिह्य, पृच्छति । अर्जुन उवाच—ज्यायसी चेदिति । हे जनार्दन श्रेयोर्थिभिः सर्वैर्भक्तैः स्वस्याभीष्टमर्द्यते याच्यते तथाभूतस्त्वं मयाऽपि स्वश्रेयःसाधननिश्चयार्थं याच्यते इत्यर्थः । कर्मणः सकाशात् बुद्धिर्ज्ञानयोगाख्या मोक्षहेतुत्वेन ज्यायसी श्रेष्ठतरा चेद्यदि ते तव मता तत्तर्हि किं किमर्थं घोरे हिंसाबहुले युद्धाख्ये कर्मणि मां त्वदेकशरणं नियोजयसि कर्मण्येवाधिकारस्ते इत्यादिना प्रेरयसि । हे केशव ! ब्रह्मशिवादीनामीश्वर ! त्वया भक्तस्य मम बुद्धिव्यामोहो न कर्तव्य इत्यभिप्रायः ॥ १ ॥

म० टी०—एवं तावत्प्रथमेनाध्यायेनोपोद्घातितो द्वितीयेनाध्यायेन कृत्स्नः शास्त्रार्थः सूत्रितः।तथाहि आदौ निष्कामकर्मनिष्ठा ततोऽन्तःकरणशुद्धिस्ततः शमदमादिसाधनपुरस्सरः सर्वकर्मसंन्यासस्ततो वेदान्तवाक्यविचारसहिता भगवद्भक्तिनिष्ठा ततस्तत्त्वज्ञाननिष्ठा तस्याः फलं च त्रिगुणात्मकाविद्यानिवृत्त्या जीवन्मुक्तिः प्रारब्धकर्मफलभोगपर्यन्तं तदन्ते च विदेहमुक्तिः जीवन्मुक्तिदशायां च परमपुरुषार्थालम्बनेन परवैराग्यप्राप्तिः दैवसंपदाख्या च शुभवासना तदुपकारिण्यादेया आसुरसंपदाख्या त्वशुभवासना तद्विरोधिनी हेया दैवसंपदोऽसाधारणं कारणं सात्त्विकी श्रद्धा आसुरसंपदस्तु राजसी तामसी चेति हेयोपादेयविभागेन कृत्स्नशास्त्रार्थपरिसमाप्तिः। तत्र योगस्थः कुरु कर्माणीत्यादिना सूत्रिता सत्त्वशुद्धिसाधनभूता निष्कामकर्मनिष्ठा सामान्यविशेषरूपेण तृतीयचतुर्थाभ्यां प्रपञ्च्यते । ततः शुद्धान्तःकरणस्य शमदमादिसाधनसंपत्तिपुरस्सरा विहाय कामान्यः सर्वानित्यादिना सूत्रिता सर्वकर्मसंन्यासनिष्ठा संक्षेपविस्तररूपेण पञ्चमषष्ठाभ्याम् । एतावता च त्वम्पदार्थोऽपि निरूपितः । ततो वेदान्तवाक्यविचारसहिता युक्त आसीत मत्पर इत्यादिना सूत्रितानेकप्रकारा भगवद्भक्तिनिष्ठाध्यायषट्केन प्रतिपाद्यते । तावता च तत्पदार्थोऽपि निरूपितः । प्रत्यध्यायं चावान्तरसङ्गतिमवान्तर-

प्रयोजनभेदं च तत्र तत्र प्रदर्शयिष्यामः । ततस्तत्त्वंपदार्थैक्यज्ञानरूपा वेदाविनाशिनं नित्यमित्यादिना सूत्रिता तत्त्वज्ञाननिष्ठा त्रयोदशे प्रकृतिपुरुषविवेकद्वारा प्रपञ्चितज्ञाननिष्ठायाश्च फलं त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्यादिना सूत्रिता त्रैगुण्यनिवृत्तिश्चतुर्दशे सैव जीवन्मुक्तिरिति गुणातीतलक्षणकथनेन प्रपञ्चिता तदा गन्तासि निर्वेदमित्यादिना सूत्रिता परमवैराग्यनिष्ठा संसारवृक्षच्छेदद्वारेण पञ्चदशे दुःखेष्वनुद्विग्नमना इत्यादिना स्थितप्रज्ञलक्षणेन सूत्रिता परवैराग्योपकारिणी दैवी संपदादेया यामिमां पुष्पितां वाचमित्यादिना सूत्रिता तद्विरोधिन्यासुरी सम्पच्च हेया षोडशे दैवसंपदोऽसाधारणं कारणं च सात्त्विकी श्रद्धा निर्द्वन्द्वो नित्यसत्त्वस्थ इत्यादिना सूत्रिता तद्विरोधपरिहारेण सप्तदशे एवं सफला ज्ञाननिष्ठा अध्यायपञ्चकेन प्रतिपादिता अष्टादशेन च पूर्वोक्तसर्वोपसंहार इति कृत्स्नगीतार्थसङ्गतिः । तत्र पूर्वाध्याये साङ्ख्यबुद्धिमाश्रित्य ज्ञाननिष्ठा भगवतोक्ता एषा तेऽभिहिता सांख्ये बुद्धिरिति तथा योगबुद्धिमाश्रित्य कर्मनिष्ठोक्ता योगे त्विमां शृण्वित्यारभ्य कर्मण्येवाधिकारस्ते मा ते सङ्गोऽस्त्वकर्मणीत्यन्तेन न चानयोर्निष्ठयोरधिकारिभेदः स्पष्टमुपदिष्टो भगवता । न चैकाधिकारिकत्वमेवोभयोः समुच्चयस्य विवक्षितत्वादिति वाच्यं दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयेति कर्मनिष्ठायाः बुद्धिनिष्ठापेक्षया निकृष्टत्वाभिधानात् यावानर्थ-उदपाने इत्यत्र च ज्ञानफले सर्वकर्मफलान्तर्भावस्य दर्शितत्वात् स्थितप्रज्ञलक्षणमुक्त्वा च एषा ब्राह्मी स्थितिः पार्थेति सप्रशंसं ज्ञानफलोपसंहारात् । या निशा सर्वभूतानामित्यादौ ज्ञानिनो द्वैतदर्शनाभावेन कर्मानुष्ठानासंभवस्य चोक्तत्वाद् । अविद्यानिवृत्तिलक्षणे मोक्षफले ज्ञानमात्रस्यैव लोकानुसारेण साधनत्वकल्पनात् "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुतेश्च । ननु तर्हि तेजस्तिमिरयोरिव विरोधिनोर्ज्ञानकर्मणोः समुच्चयासंभवाद्भिन्नाधिकारिकत्वमेवास्तु सत्यमेवं संभवति एकमर्जुनं प्रति तूभयोपदेशो न युक्तः नहि कर्माधिकारिणं प्रति ज्ञाननिष्ठोपदेष्टुमुचिता न वा ज्ञानाधिकारिणं प्रति कर्मनिष्ठा । एकमेव प्रति विकल्पेनोभयोपदेश इति चेन्न, उत्कृष्टनिकृष्टयोर्विकल्पानुपपत्तेः । अविद्यानिवृत्त्युपलक्षितात्मस्वरूपे मोक्षे तारतम्यासंभवाच्च । तस्माज्ज्ञानकर्मनिष्ठयोर्भिन्नाधिकारिकत्वे एकं प्रत्युपदेशायोगादेकाधिकारिकत्वे च विरुद्धयोः समुच्चयासंभवात्कर्मापेक्षया ज्ञानप्राशस्त्यानुपपत्तेश्च विकल्पाभ्युपगमे चोत्कृष्टमनायाससाध्यं ज्ञानं विहाय निकृष्टमनेकायासबहुलं कर्मानुष्ठातुमयोग्यमिति मत्वा पर्याकुलीभूतबुद्धिः हे जनार्दन ! सर्वैर्जनैरर्द्यते याच्यते स्वाभिलषितासिद्धय इति त्वं तथाभूतो मयापि श्रेयोनिश्चयार्थं याच्यस इति नैवानुचितमिति संबोधनाभिप्रायः । कर्मणो निष्कामादपि बुद्धिरात्मतत्त्वविषया ज्यायसी प्रशस्ततरा चेद्यदि ते तव मता तत्तदा किं कर्मणि घोरे हिंसाद्यनेकायासबहुले मामतिभक्तं नियोजयसि कर्मण्येवाधिकारस्त इत्यादिना विशेषेण प्रेरयसि हे केशव सर्वेश्वर! सर्वेश्वरस्य सर्वेष्टदायिनस्तव मां भक्तं शिष्यस्तेऽहं शाधि मामित्यादिना त्वदेकशरणतयोपसन्नं प्रति प्रतारणा नोचितेत्यभिप्रायः ॥ १ ॥

शं० टी०— न त्वेवाहं जातु नासमित्यात्मानात्मविवेचनमुपक्रम्य न जायते म्रियते वा इत्यादिना सम्यगात्मतत्त्वं निर्धार्य वेदाविनाशिनमित्यादिना ब्रह्मविदः सर्वकर्मसंन्यासमुक्त्वा तस्यैव प्रजहातीत्यारभ्य स शान्तिमाप्नोतीत्यन्तेन ग्रन्थेन ब्रह्मनिष्ठां तत्फलं च मोक्षं प्रतिपाद्य न कामकामीति कामकामिनो मोक्षाभावः प्रतिपादितस्तेन सर्वकर्मसंन्यासपूर्वकं ब्रह्मनिष्ठया मोक्षः संपादनीय इति सर्वेषां प्रवृत्तौ संप्रसक्तायाम् 'विरक्तः प्रव्रजेद्धीमान् सरक्तस्तु गृहे वसेत् । सरागो नरकं याति प्रव्रजन् हि द्विजाधमः ॥ यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु । तदा संन्यासमिच्छन्ति पतितः स्याद्विपर्यये ॥ प्रवृत्तिलक्षणं कर्म ज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥ यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ॥ अहमेव परं ब्रह्म

वासुदेवाख्यमव्ययम् । इति बोधो दृढो यस्य तदा भवति भैक्ष्यभुक् ॥ प्राणे गते यथा देहः सुखं दुःखं न विन्दति । तथा चेत्प्राणयुक्तोपि स कैवल्याश्रमे वसेत् ॥ अनधीत्याखिलान्वेदाननिष्ट्वैवाखिलान् सुरान् । अनुत्पाद्य सुतान् विप्रो न संन्यसितुमर्हति ॥ अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । प्रचरन्निन्द्रियार्थेषु नरः पतनमृच्छति ॥ ज्ञात्वा नैष्कर्म्यमाचरेत् सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः' " ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति 'परं ब्रह्म परिज्ञाय प्रव्रजेद्ब्राह्मणोत्तमः । अन्यथा कर्म कुर्वीत न प्रमाद्येत कर्हिचित् ॥ स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपरीतस्तु दोषः स्यादुभयोरेष निश्चयः ' इत्यादिश्रुतिस्मृतिवचनेभ्यो ह्यधिकारिणामेव संन्यासो नानधिकारिणाम् ' अन्यथा कृत्वा पतिष्यन्ति ' इति ज्ञानकर्मयोगयोरधिकार्यादिभेदेन भेद एवेति तयोर्विभागं दर्शयितुं चानधिकारिणां कर्मैव चित्तशुद्धिद्वारा मोक्षसाधनं तदेवावश्यं कर्तव्यमिति बोधयितुं च तृतीयाध्याय आरभ्यते । तत्रादौ कर्मण्येवाधिकारस्ते मा फलेषु कदा च नेति तव कर्मण्येवाधिकारो नान्यत्रेत्यवधारणपूर्वकं कर्म विधाय ' दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय । बुद्धौ शरणमन्विच्छ' इति ज्ञानयोगात्कर्मयोगो निकृष्टस्ततो ज्ञानयोगमेवाश्रयेति ज्ञानयोगविधानाच्च तेन व्याकुलीभूतान्तरात्मा भूत्वार्जुनः स्वयम् दूरेण ह्यवरं कर्मेतिवचनार्थमेव मनसि निधाय कर्मयोगाज्ज्ञानयोगस्य साक्षान्मोक्षसाधनत्वेन विशिष्टतरत्वं मन्यमान इदमुवाच—**ज्यायसीति** । जनं जननं तत्कारणमज्ञानं च स्वसाक्षात्कारेणार्दयति हिनस्तीति जनार्दनस्तस्य संबुद्धिर्हे ! जनार्दन कर्मणः कर्मयोगाद्बुद्धिर्ज्ञानयोग एव ज्यायसी श्रेष्ठेति ते मताभिमता चेत्किं किमर्थम् कर्मण्येवाधिकारस्ते इति मां कर्मणि ज्ञानान्निकृष्टे नियोजयसि तत्रापि घोरे हिंसात्मके तस्माद्युध्यस्व भारतेति चोदयसि भवानीश्वरस्तव वचनमलङ्घ्यं मां भक्तमनुरक्तं च योग्यमर्थं त्याजयित्वाऽयोग्यार्थे प्रेषयसीत्यर्थः ॥ १ ॥

श्री० टी०—एवं तावदशोच्यानन्वशोचस्त्वमित्यादिना प्रथमं मोक्षसाधनत्वेन देहात्मविवेकबुद्धिरुक्ता । तदनन्तरम् एषा तेऽभिहिता सांख्ये बुद्धिर्योगेत्विमां शृणु इत्यादिना कर्म चोक्तं न च तयोर्गुणप्रधानभावः स्पष्टं दर्शितः । तत्र बुद्धियुक्तस्य स्थितप्रज्ञस्य निष्कामत्वनियतेन्द्रियत्वनिरहंकारत्वाद्यभिधानात् एषा ब्राह्मी स्थितिः पार्थ इति सप्रशंसमुपसंहाराच्च बुद्धिकर्मणोर्मध्ये बुद्धेः श्रैष्ठ्यं भगवतोऽभिमतं मन्वानोऽर्जुन उवाच—**ज्यायसी चेदिति** । कर्मणः सकाशान्मोक्षान्तरङ्गत्वेन बुद्धिर्ज्यायसी अधिकतरा श्रेष्ठा चेत्तव संमता तर्हि किमर्थं तद्युद्ध्यस्वेति तस्मादुत्तिष्ठेति च वारंवारं वदन् घोरे हिंसात्मके कर्मणि मां नियोजयसि प्रवर्तयसि ॥ १ ॥

स० टी०—महीभारोद्धारं सुजनपरिवारं सुरगुरुं गुणाधारं सारं निरवधिविहारं रसरसम् ॥ परप्रेमागारव्रजभुवि सुचारं कलपदं हरिं वारंवारं हृदि गतमुदारं सुकलये ॥ १ ॥ पूर्वाध्याये समाश्रित्य सांख्यबुद्धिं विपश्चिताम् ॥ ज्ञाननिष्ठा विभज्योक्ता हरिणा विजयं प्रति ॥ २ ॥ एषा तेऽभिहिता सांख्ये बुद्धिरित्यादिना स्फुटम् ॥ योगबुद्धिं समाश्रित्य कर्मनिष्ठाप्युदाहृता ॥ ३ ॥ योगे त्विमां शृण्वित्यादौ कर्मण्येवेति चान्ततः ॥ नानयोर्निष्ठयोः स्पष्टमधिकारभिदोदिता ॥ ४ ॥ नैकाधिकारिकत्वं वोभयोः प्रोक्तं यतोऽनयोः ॥ परस्परविरुद्धत्वं तेजस्तिमिरयोरिव ॥ ५ ॥ दूरेण ह्यवरं कर्म बुद्धियोगादिति स्फुटम् ॥ कर्मणां बुद्धिनिष्ठायाः सकाशान्न्यूनतोदिता ॥ ६ ॥ यावानर्थ उदपान इति ज्ञानफले परे ॥ सर्वकर्मफलानां चाप्यन्तर्भावः प्रदर्शितः ॥ ७ ॥ स्थितधीलक्षणं प्रोच्याध्यायान्ते धीप्रशंसया ॥ एषा ब्राह्मीति विज्ञानफलेनैवोपसंहृतिः ॥ ८ ॥ या निशा सर्वभूतानामित्यादौ तत्त्ववेदिनः ॥ द्वैतदृष्टेरभावाच्चानुष्ठाना-

संभवः क्षितौ ॥ ९ ॥ भिन्नाधिकारिकत्वे चाप्यनयोर्ज्ञानकर्मणोः ॥ एककर्तृकनिर्देशः स्यादयोग्यस्तदा किल ॥ १० ॥ एकाधिकारिकत्वे तु विरोधान्न समुच्चयः ॥ संभवेद्युगपत्तत्र तथा सत्यपि च द्वयोः ॥ ११ ॥ नैव स्याज्ज्ञानप्राशस्त्यवचनं तदपेक्षया ॥ विकल्पस्वीकृतौ श्रेष्ठं ज्ञानं सुकरमासुखम् ॥ १२ ॥ त्यक्त्वा निकृष्टमायासबहुलं कर्म नश्वरम् ॥ अयोग्यं स्यादनुष्ठातुमिति मत्वाऽऽकुलोऽर्जुनः ॥ १३ ॥ हे जनार्दन नाम्नैव त्वं प्रार्थ्योऽसीत्युवाच ह ॥ यतस्त्वं याच्यसे सर्वैः स्वाभिवाञ्छितसिद्धये ॥ १४ ॥ तथाभूतो मयापि त्वं स्वश्रेयोनिश्चयेऽर्थ्यसे ॥ आत्मतत्त्वैकविषयान्निष्कामादपि कर्मणः ॥ १५ ॥ सुप्रशस्ततरा बुद्धिर्यदि तेऽभिमता तदा ॥ हिंसाद्यायासबहुले भक्तं मां क्रूरकर्मणि ॥ १६ ॥ कर्मण्येवाधिकारस्त इत्यारभ्य विशेषतः ॥ किमर्थं प्रेरयस्येवं हे सर्वेश्वर केशव ॥ १७ ॥ शिष्यत्वेन प्रपन्नं मामनन्यशरणं प्रति ॥ सर्वेश्वरस्य कृष्णस्य नोचिता ते प्रतारणा ॥ १८ ॥ १ ॥

भा० टी०—पूर्वाध्याये उपायोपेयभूते कर्मनिष्ठा ज्ञाननिष्ठा चेति द्वे निष्ठे प्रोक्ते तत्र प्रजहातीत्यादिना एषा ब्राह्मीत्यन्तेन ज्ञाननिष्ठाऽत्युत्तमेत्यभिहितं तदेव श्रुत्वाऽर्जुनः फलभूतायां ज्ञाननिष्ठायामत्युत्कण्ठितः स्वस्यापि चित्तशुद्धिपुरःसरं ज्ञानाधिकारं मन्यमान उवाच—**ज्यायसीति**। जनान्देवविपक्षभूतानर्दयति पीडयतीति जनार्दनः तं संबोधयन् ममासुरत्वाभावाद् घोरे कर्मणि प्रेरणेन पीडादातृत्वं तवानुचितमिति सूचयति। यदि निष्कामकर्मणः सकाशादपि बुद्धिर्ज्ञानं श्रेष्ठं तवाभिमतं तर्हि कस्माद् घोरे हिंसाप्रधाने क्रूरे कर्मणि मां स्वभक्तम् तस्माद्युध्यस्व इत्यादिना नियोजयसि प्रेरयसि। हे केशव ब्रह्मादिमनुकम्पार्थं गच्छतीति] तथा संबोधयन् मामपि स्वभक्तं प्रति केशवो भव नतु जनार्दन इति द्योतयति ॥ १ ॥

प० टी०—पूर्वं कर्मण्येवाधिकारस्त इत्यादिवाक्यैः कर्मप्रशंसा कृतानन्तरं स्थितप्रज्ञस्येत्यादिवाक्यैर्यावदध्यायसमाप्तिस्तावद्बुद्धियोगप्रशंसा कृता। एवमुभयोः प्रशंसने संदिहानोऽर्जुनः पृच्छति—**ज्यायसी चेदिति** द्वाभ्याम्। भो जनार्दन ते तव कर्मणः कर्मयोगात्सकाशान्मतिर्बुद्धिर्ज्यायसी श्रेष्ठा मता ज्ञानयोगः श्रेष्ठ इत्यभिमतं चेत्तर्हि मां घोरेऽतिप्रयासे कर्माणि कथं नियोजयस्याज्ञापयसि ॥ १ ॥

रा० टी०—एषा तेऽभिहिता सांख्ये इत्यन्तेन नत्वेवाहमित्यादिना ग्रन्थेन जीवेश्वरस्वरूपमुक्त्वा तज्ज्ञानोपायं च योगे त्विमां शृण्विति प्रतिज्ञापूर्वं त्रैगुण्यविषया वेदा इत्यादिनोक्त्वा कर्मजं बुद्धियुक्ता हीत्यादिना किंचित्प्रपञ्चनं तस्य कृतं पूर्वाध्याये। अत्र तु पूर्वोक्तस्यैव निवृत्तकर्मरूपज्ञानोपायशब्दितं योगस्यावश्यकार्यताज्ञापनरूपं प्रपञ्चनं प्राचुर्येण क्रियत इति पूर्वोत्तराध्याययोः पौर्वापर्यं ध्येयम्। दूरेण ह्यवरं कर्मेत्युक्ते लब्धावसरः पृच्छति दूरेण ह्यवरं कर्म बुद्धियोगात्, कृपणाः फलहेतव इत्यादिनोक्तदिशा बुद्धिः कर्मणः सकाशात् ज्यायसी चेत् श्रेष्ठा यदि हे जनार्दन ते तव मता तत् तर्हि कर्माणि किं किमर्थं मां नियोजयसीत्येकः प्रश्नः। तत्रापि घोरे रागद्वेषाद्युपेते युद्धाख्ये कर्माणि किमर्थं नियोजयसीत्यन्यः। अत्र केशवशब्दार्थ उक्तः प्रथमाध्याये। न जायते अर्दयति च संसारमिति दशमभाष्ये नञः परनिपातः अत एव नलोपाभावः। उत्तरपदे परतः तस्य स्मरणात् इति तट्टीकोक्तदिशा च जनार्दनशब्दार्थो ध्येयः। अयं भावः। "सर्व एते पुण्यलोका भवन्ति" इत्यादि फलश्रवणेन सर्वकर्मणां हतो वा प्राप्स्यसे स्वर्गमित्यादियुद्धस्यापि काम्यत्वात्तेषां च बुद्धियोगादवरत्वात्। यत्याश्रमविहितानां शमादीनां फलाश्रवणेनाकाम्यत्वात् शान्तो दान्त इत्युपक्रम्यात्मानं पश्येदिति ज्ञानार्थत्वश्रवणाच्च यत्याश्रमं स्वीकृत्य तद्धर्मनिष्ठो भवेत्येव नियोक्तव्यं नतु काम्यकर्मणि युद्धे युद्ध्यस्व भारतेति नियोजनं युक्तमिति ॥ १ ॥

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ॥
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

त० टी०—ननु नाहं त्वद्बुद्धिं मोहयामि त्वं मे किं व्यामोहकत्वं पश्यसि तद्वदेति चेत्तत्राह—**व्यामिश्रेणैवेति** । न त्वेवाहमित्यादिना ज्ञाननिष्ठामुपदिश्य योगस्थः कुरु कर्माणीति कर्मनिष्ठां चोपदिश्य पुनरन्ते ज्ञाननिष्ठामेव सप्रशंसं यदुपदिष्टवान् भवांस्तत्ते वाक्यमधिकारिभेदाप्रतिपादनेन मदेकविषयत्वाद्व्यामिश्रमेव संकीर्णार्थं सन्देहोत्पादकमिति यावत्, तेन व्यामिश्रेणैव वाक्येन मम बुद्धिं मोहयसीव । यद्यपि महाकारुणिकस्य सर्वसुहृदो गुरोस्तव मोहकत्वं नास्त्येव, तथाऽपि तव वाक्यार्थानिश्चयान्ममैव तथा भातीतीवशब्दाभिप्रायः । यस्मादेवं तस्मादेकं ज्ञानं कर्म वा निश्चित्य वद येनानुष्ठितेनाहं श्रेयोऽर्थी श्रेय आप्नुयां प्राप्नुयाम् ॥ २ ॥

म० टी०—ननु नाहं कंचिदपि प्रतारयामि किं पुनस्त्वामतिप्रियं त्वं तु किं मे प्रतारणाचिह्नं पश्यसीति चेत् तत्राह—**व्यामिश्रेणेति** । तव वचनं व्यामिश्रं न भवत्येव मम त्वेकाधिकारिकत्वभिन्नाधिकारिकत्वसन्देहाद्व्यामिश्रं सङ्कीर्णार्थमिव ते यद्वाक्यं मां प्रति ज्ञानकर्मनिष्ठाद्वयप्रतिपादकं तेन वाक्येन त्वं मे मम मन्दबुद्धेर्वाक्यतात्पर्यापरिज्ञानाद् बुद्धिमन्तःकरणं मोहयसीव भ्रान्त्या योजयसीव परमकारुणिकत्वात्त्वं न मोहयस्येव मम तु स्वाशयदोषान्मोहो भवतीतीवशब्दार्थः । एकाधिकारित्वे विरुद्धयोः समुच्चयानुपपत्तेरेकार्थत्वाभावेन च विकल्पानुपपत्तेः प्रागुक्तेर्यद्यधिकारिभेदं मन्यसे तदैकं मां प्रति विरुद्धयोर्निष्ठयोरुपदेशायोगात् तत् ज्ञानं वा कर्म वा एकमेवाधिकारं मे निश्चित्य वद येनाधिकारनिश्चयपुरःसरमुक्तेन त्वया मया चानुष्ठितेन ज्ञानेन कर्मणा चैकेन श्रेयो मोक्षमहमाप्नुयां प्राप्तुं योग्यः स्याम् । एवं ज्ञानकर्मनिष्ठयोरेकाधिकारित्वे विकल्पसमुच्चययोरसंभवादधिकारिभेदज्ञानायार्जुनस्य प्रश्न इति स्थितम् ॥ इहेतरेषां कुमतं समस्तं श्रुतिस्मृतिन्यायबलान्निरस्तं पुनः पुनर्भाष्यकृतातियत्नादतो न तत्कर्तुमहं प्रवृत्तः ॥ भाष्यकारमतसारदर्शिना ग्रन्थमात्रमिह योज्यते मया । आशयो भगवतः प्रकाश्यते केवलं स्ववचसो विशुद्धये ॥ २ ॥

शं० टी०—किंच—**व्यामिश्रेणेति** । कर्मण्येवाधिकारस्ते इति 'बुद्धौ शरणमन्विच्छ' इति चैवंलक्षणेन व्यामिश्रेणेव क्षीरनीरयोरिव द्वयोर्मेलनं व्यामिश्रं तेनेव ज्ञानकर्मणोः समुच्चयवतैव वाक्येन मम बुद्धिं मोहयसीव मां कर्मणि नियोजयसि । यद्यपि युद्धं कर्तव्यं वा त्यक्तव्यं वेति संशयालोस्त्वां शरणं गतस्य मम भ्रमापनयनाय भवान् दयया प्रवृत्तो नतु मोहनाय तथापि विवेकाविकलस्य जडात्मनो मम भवद्वचनं व्यामिश्रमिव भाति तेन व्यामिश्रवाक्येन मम बुद्धिं मोहयसीव प्रतीयते तदपि मम बुद्धिदोष एवेति भावः । तर्हीदानीं किं कर्तव्यमित्यत आह—**तदेकमिति** । ज्ञानकर्मणोः क्रियाकारकफलभेदेन विपरीतयोरेककर्तृत्वासंभवात्तयोरेकं ज्ञानं वा कर्म वा मदधिकारानुरूपं तत्र मम योग्यत्वमयोग्यत्वं च विचार्य इदमेवास्यार्हमिति निश्चित्य वद येन ज्ञानेन वा कर्मणा तयोरेकतरेण वाहं साक्षात्परंपरया वा श्रेयः परमपुरुषार्थं प्राप्नुयाम् ॥ २ ॥

श्री० टी०—ननु धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते इत्यादिना कर्मणोऽपि श्रेष्ठत्वमुक्तमेवेत्याशङ्क्याह—**व्यामिश्रेणेति** । क्वचित्कर्मप्रशंसा क्वचिज्ज्ञानप्रशंसेत्येवं व्यामिश्रं संदेहोत्पादकमिव यद्वाक्यं तेन मे बुद्धिं मतिमुभयत्र दोलायितां कुर्वन्मोहयसीव । परमकारुणिकस्य तव मोहकत्वं नास्त्येव तथापि भ्रान्त्या ममैवं भाति इतीवशब्देनोक्तम् । अत उभयोर्मध्ये यद्भद्रं तदेकं निश्चित्य वदेति । यद्वा इदमेव श्रेयःसाधनमिति निश्चित्य येनानुष्ठितेन श्रेयो मोक्षमहमाप्नुयां प्राप्स्यामि तदेवैकं निश्चित्य वदेत्यर्थः ॥ २ ॥

स० टी०–नाहं प्रतारयाम्यन्यं किं पुनस्त्वामतिप्रियम् ॥ किंवा प्रतारणाचिह्नं पश्यसि त्वं मयीति चेन् ॥ १ ॥ नह्येवं किंतु मे भ्रान्तिवशाद्भाति प्रतारणा ॥ व्यामिश्रं नैव ते वाक्यं सुविविक्ताभिधायिनः ॥२॥ भिन्नाधिकारिकं वा स्यात्किं स्यादेकाधिकारिकम् ॥ कर्मज्ञानं ममेत्येव संदेहात्ते वचास्त्विदम् ॥ ३ ॥ संकीर्णार्थमिवाभाति तात्पर्यानवधारणात् ॥ मम मन्दमतेस्तेन वाक्येनैवान्तारिन्द्रियम् ॥ ४ ॥ भ्रान्त्या योजयसीवेति कल्पयामि न वस्तुतः ॥ त्वं मोहयसि मे किंतु मोहः स्वाशयदोषतः ॥ ५ ॥ तस्माद्विरुद्धयोरेकं मां प्रति ज्ञानकर्मणोः ॥ निर्देशासंभवादेकं ज्ञानं वा कर्म वा मम ॥ ६ ॥ अधिकारानुसारेण विनिश्चित्य वद स्फुटम् ॥ येनाधिकारमाश्रित्यानुष्ठितेन यथाविधि ॥ ७ ॥ ज्ञानेन कर्मणा वाहं सम्यङ्मोक्षमवाप्नुयाम् ॥ ८ ॥ २ ॥

भा० टी०–ननु त्वया सैव ज्यायसी ममेति मद्वाक्यान्निश्चिता चेत् किमर्थमधुना पृच्छसीत्याशङ्क्याह–व्यामिश्रेणेवेति । 'बुद्ध्यायुक्तो यया' इत्यादिना कर्मप्रशंसा 'या निशा सर्वभूतानाम्' इत्यादिना ज्ञानप्रशंसा 'कर्मण्येवाधिकारस्ते' इत्यादिना मम कर्मण्येवाधिकारबोधनं 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' इति ज्ञाननिष्ठाधिकारबोधनमित्येवं व्यामिश्रेण किं श्रेष्ठं किमश्रेष्ठं क ममाधिकारः क नेति संदेहोत्पादकेन वाक्येन । यद्यपि विविक्ताभिधायी भगवांस्तथापि मम मन्दबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभातीतीवशब्दार्थः । मम बुद्धेर्मोहापनयार्थं हि प्रवृत्तस्त्वं कथं मोहयस्यतो ब्रवीमि–बुद्धिं मोहयसीव म इति । भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि त्वं मन्यसे तर्हि तयोर्मध्ये एकं ज्ञानं वा कर्म वा इदमेव तव योग्यमिति निश्चित्य वद येन ज्ञानकर्मान्यतरेण श्रेयो मोक्षमहं प्राप्नुयामित्यर्थः ॥ २ ॥

प० टी०–शेषं स्पष्टम् ॥ २ ॥

रा० टी०–ननु 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि' इति बुद्धिपदोक्तयुद्धाख्यकर्मणोपि ज्ञानार्थत्वमुक्तमिति चेत् तर्हि व्यामिश्रेण कचित्कर्मप्रशंसा कचिज्ज्ञानप्रशंसेत्येवम् । यद्वा युद्धस्य कचित्स्वर्गार्थत्वं कचिज्ज्ञानार्थत्वमित्येवं व्यामिश्रेण संदेहोत्पादकेन बुद्धिं मोहयसीव दोलायमानां करोषीव । यदि कामिनो युद्धं स्वर्गार्थमकामिनो ज्ञानार्थमिति चेत्तथापि यतिधर्म एव नियोगो युक्तो न तु वैकल्पिके युद्धे अतो येनाहं श्रेय आप्नुयां तदेकं निश्चित्य वदेति ॥ २ ॥

श्रीभगवानुवाच–लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ॥
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

त० टी०–तत्रोत्तरं श्रीभगवानुवाच लोकेऽस्मिन्निति । हे अनघार्जुन! त्वं तूपदेशयोग्यः, यथा तव संदेहो जातस्तथा न मया मोक्षसाधनत्वेन परस्परनिरपेक्षत्वेन ज्ञानकर्मात्मिके द्वे निष्ठे एकाधिकार्युद्देशेनाभिहिते किंतु एकस्याप्यधिकारभेदेनाङ्गाङ्गिभावेन निष्ठाद्वयमुक्तमिति विविच्य दर्शयति–लोक इति । नानाविधेऽप्यस्मिन् लोके जने मुमुक्षुजनोद्देशेन द्विविधा द्विप्रकारा ज्ञानकर्मात्मिका निष्ठा मत्प्राप्तिसाधनलक्षणा स्थितिर्यथाधिकारमसंकीर्णा पुरा पूर्वाध्याये मयोक्ता 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' इत्यादिना । अधिकारभेदमेव दर्शयति–ज्ञानेति । सम्यक् ख्यायते आत्मतत्त्वमनयेति संख्या बुद्धिस्तन्निष्ठाः सांख्यास्तेषां यथाऽधिकारमनभिहितफलकैरीश्वराराधनभूतैः कर्मभिः शुद्धान्तःकरणानां ज्ञानयोगेन स्थितप्रज्ञतालक्षणा निष्ठोक्ता 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः' इत्यादिना योगिनां पूर्वमननुष्ठितानभिसंहितफलकर्मणामशुद्धान्तःकरणानां मुमुक्षूणामुक्तसांख्यनिष्ठामारुरुक्षूणामन्तःकरणशुद्धिद्वारा स्थितप्रज्ञतालक्षणज्ञानारूढतामाप्त्यर्थं योगो निष्का-

मकर्मानुष्ठानं तद्वतां योगिनां कर्मयोगेन ' कर्मण्येवाधिकारस्ते ' इत्यादिना निष्ठा स्थितिरुक्ता । " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इतिश्रुतेः कर्मणा विविदिषायां विनियोगात् । न चैषोऽधिकारभेदोऽनुष्ठातृपुरुषभेद एव नियत इति शङ्कनीयम्, एकस्यापि पुरुषस्यावस्थाभेदेनाधिकारभेदस्य संभवात् । तथाहि " अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते । अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते " इति श्रुतिस्मृत्यभिहिताविद्याशब्दवाच्येन कर्मणा पुरुषो मृत्युं प्रमादं तीर्त्वा तत्कारणमन्तःकरणमलं विधूय विद्ययाऽमृतं मोक्षमश्नुते प्राप्नोति ' इति श्रुत्यर्थानुसारेण मुमुक्षायां जातायां पुरुषो न सहसा ज्ञानेऽधिकरोति अपि तु निष्कामकर्मानुष्ठानेनान्तःकरणबुद्धिद्वारेणैवेति भगवता निष्ठाद्वयमुपदिष्टम् । यस्य तु कर्मानुष्ठानं विनैवेह जन्मन्युक्तलक्षणं ज्ञानं जायेत तस्य जन्मान्तरानुष्ठितनिष्कामकर्मभिरन्तःकरणशुद्धिरनुमेयेति नोक्तव्यवस्थायां कश्चिद्विरोधः ॥ ३ ॥

म० टी०—एवमधिकारिभेदेऽर्जुनेन पृष्टे तदनुरूपं प्रतिवचनमस्मिन्नधिकारित्वाभिमते लोके शुद्धाशुद्धान्तःकरणभेदेन द्विविधे जने द्विविधा द्विप्रकारा निष्ठा स्थितिः ज्ञानपरता कर्मपरता च पुरा पूर्वाध्याये मया तवात्यन्तहितकारिणा प्रोक्ता प्रकर्षेण स्पष्टत्वलक्षणेनोक्ता । तथा चाधिकार्यैक्यशङ्कया मा ग्लासीरिति भावः । हे अनघ अपापेति सम्बोधयन्नुपदेशयोग्यतामर्जुनस्य सूचयति । एकैव निष्ठा साध्यसाधनावस्थाभेदेन द्विप्रकारा न तु द्वे एव स्वतन्त्रे निष्ठे इति कथयितुं निष्ठेत्येकवचनम् । तथाच वक्ष्यति ' एकं सांख्यं च योगं च यः पश्यति स पश्यति ' इति । तामेव निष्ठां द्वैविध्येन दर्शयति संख्या सम्यगात्मबुद्धिस्तां प्राप्तवतां ब्रह्मचर्यादेव कृतसंन्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां ज्ञानभूमिमारूढानां शुद्धान्तःकरणानां सांख्यानां ज्ञानयोगेन ज्ञानमेव युज्यते ब्रह्मणानेनेति व्युत्पत्त्या योगस्तेन निष्ठोक्ता 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः ' इत्यादिना । अशुद्धान्तःकरणानां तु ज्ञानभूमिमनारूढानां योगिनां कर्माधिकारयोगिनां कर्मयोगेन कर्मैव युज्यतेऽन्तःकरणशुद्ध्यानेनेति व्युत्पत्त्या योगस्तेन निष्ठोक्तान्तःकरणशुद्धिद्वारा ज्ञानभूमिकारोहणार्थम् ' धर्म्याद्धि युद्धाच्छ्रेयोन्यत क्षत्रियस्य न विद्यते ' इत्यादिना । अत एव न ज्ञानकर्मणोः समुच्चयो विकल्पो वा किंतु निष्कामकर्मणा शुद्धान्तःकरणानां सर्वकर्मसंन्यासेनैव ज्ञानमिति चित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैकमेव त्वां प्रति द्विविधा निष्ठोक्ता ' एषा तेभिहिता साङ्ख्ये बुद्धियोंगे त्विमां शृणु ' इति । अतो भूमिकाभेदेनैकमेव प्रत्युभयोपयोगान्नाधिकारभेदेऽप्युपदेशवैयर्थ्यमित्यभिप्रायः । एतदेव दर्शयितुमशुद्धचित्तस्य चित्तशुद्धिपर्यन्तं कर्मानुष्ठानम् न कर्मणामनारम्भात इत्यादिभिः मोघं पार्थ स जीवति इत्यन्तैस्त्रयोदशभिर्दर्शयति । शुद्धचित्तस्य तु ज्ञानिनो न किंचिदपि कर्मापेक्षितमिति दर्शयति--यस्त्वात्मरतिरिति द्वाभ्याम् । तस्मादसक्तः इत्यारभ्य तु बन्धहेतोरपि कर्मणो मोक्षहेतुत्वं सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेण संभवति फलाभिसन्धिराहित्यरूपकौशलेनेति दर्शयिष्यति । ततः परं त्वथ केनेति प्रश्नमुत्थाप्य कामदोषेणैव काम्यकर्मणः शुद्धिहेतुत्वं नास्ति अतः कामराहित्येनैव कर्माणि कुर्वन्नन्तःकरणशुद्ध्या ज्ञानाधिकारी भविष्यसीति यावदध्यायसमाप्ति वदिष्यति भगवान् ॥ ३ ॥

शं० टी०—त्वया यदुक्तं तत्सत्यं तवैवायं बुद्धिदोषस्तदा यदुक्तं तत्त्वया न ज्ञातं विद्याबुद्धिशक्त्यवस्थादौ विचार्यमाणे तव कर्मण्येवाधिकारो नतु संन्यासे तत एवोक्तं मया—कर्मण्येवाधिकारस्ते इति । तथापि चित्तशुद्धिद्वारा ज्ञानसिद्ध्यै कर्म कुरु नतु फलायेति सूचयितुं—बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः, इत्युक्तं नतु कर्म त्यक्त्वा बुद्धिमाश्रयेत्युक्तं नाप्युभयं च कुर्विति ज्ञानकर्मणो राजसूयबृहस्पतिसवाद्विवद्भिन्नकर्तृकत्वेनैकपुरुषानुष्ठेयत्वायोगादिदं पूर्वमेव सूचितम् । एषा तेऽभिहिता सांख्ये बुद्धि-

योगे त्विमां शृणु ' इति तदेव पुनरुच्यते श्रूयतामित्याशयेन श्रीभगवानुवाच–लोक इति । अस्मिन् लोके ब्राह्मणादीनां स्वधर्मपराणां मुमुक्षूणां पुरा पूर्वकाले मया वेदरूपिणा सर्वज्ञेन सर्वधर्मोपदेष्ट्रा द्विविधा द्विप्रकारा निष्ठा शास्त्रीयस्यानुष्ठेयस्य धर्मस्यासांकर्यं यथा तथा नियमेन स्थितिर्व्यवस्था प्रोक्ता कृतेत्यर्थः । तत्कथमिति चेदुच्यते–ज्ञानयोगेनेति । वेदान्तैः सर्वैः सम्यक् ख्यायते तात्पर्येण प्रतिपाद्यत इति सांख्यं निर्विशेषं परं ब्रह्म तदेव स्वात्मत्वेन ये विदुस्ते सांख्याः ब्रह्मविदस्तेषां सांख्यानां यतीनां ब्रह्मज्ञानां ज्ञानयोगेन ब्रह्मविद्ब्रह्मणा युज्यत एकीक्रियतेऽनेनेति योगः ज्ञानमेव योगो ज्ञानयोगस्तेन " सर्वमिदमहं च ब्रह्मैवेति ब्रह्माकारवृत्त्या निष्ठा नैश्चल्येन स्थितिः प्रोक्ता सदैकरीत्या कर्तव्यत्वेन विहिता तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ । ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय । तमसःपरस्तात् । वेदान्तविज्ञानसुनिश्चितार्थाः । सर्वं खल्विदं ब्रह्म । तज्जलानिति शान्त उपासीत । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् " इत्यादिवाक्यैरतत्प्रवृत्तिं निषिध्य तेषां ब्रह्मनिष्ठैव कर्तव्यत्वेन प्रोक्तेत्यर्थः । योगिनां कर्मयोगिनां गृहिणां कर्मयोगेन युज्यते अभ्युदयोऽनेनेति योगः कर्मैव योगः कर्मयोगस्तेन निष्ठा नियमस्थितिः प्रोक्ता । " अहरहः सन्ध्यामुपासीत । उदिते सूर्ये प्रातर्जुहोति । वसन्ते ब्राह्मणोऽग्नीनादधीत । कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । तस्मात्स्वाध्यायोऽध्येतव्यः । ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । सत्यं वद धर्मं चर । तानि त्वयोपास्यानि " इति श्रौतस्मार्तकर्मनिष्ठैव कर्मिणां कर्तव्यत्वेन प्रोक्ता विहिता । एवं निष्ठाद्वयं कर्मिणां गृहस्थानामकर्मिणां संन्यासिनां चाऽसंकीर्णं विभज्य प्रदर्शितमित्यर्थः ॥ ३ ॥

श्री० टी०–अत्रोत्तरं श्रीभगवानुवाच–**लोकेस्मिन्निति** । अयमर्थः यदि मया परस्परनिरपेक्षं मोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तं स्यात्तर्हि द्वयोर्मध्ये यद्भद्रं तदेकं वदेति त्वदीयः प्रश्नः संगच्छेत नतु मया तथोक्तं किंतु द्वाभ्यामेकैव ब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोस्तयोः स्वातन्त्र्यानुपपत्तेः। एकस्या एव तु प्रकारभेदमात्रमधिकारभेदेनोक्तमिति । अस्मिन् शुद्धाशुद्धान्तःकरणतया द्विविधे लोके अधिकारिजने द्वे विधे प्रकारौ यस्याः सा द्विविधा निष्ठा मोक्षपरता पुरा पूर्वाध्याये मया सर्वज्ञेन प्रोक्ता स्पष्टमेवोक्ता । प्रकारद्वयमेव निर्दिशति सांख्यानां शुद्धान्तःकरणानां ज्ञानभूमिकामारूढानां ज्ञानपरिपाकार्थं ज्ञानयोगेन ध्यानादिना निष्ठा ब्रह्मपरतोक्ता 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः' इत्यादिना । सांख्यभूमिकामारुरुक्षूणां तु अन्तःकरणशुद्धिद्वारा तदारोहार्थं तदुपायभूतकर्मयोगाधिकारिणां योगिनां कर्मयोगेन निष्ठोक्ता ' धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते' इत्यादिना । अत एव चित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैव द्विविधापि निष्ठोक्ता 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' इति ॥ ३ ॥

स० टी०–एवमेकाधिकारित्वे न विकल्पसमुच्चयौ ॥ अधिकारभिदा ज्ञानसिद्ध्यै प्रश्नोऽर्जुनस्य च ॥१॥ पृष्टेऽधिकारभेदे श्रीभगवानाह सूत्तरम् ॥ चित्तशुद्ध्यविशुद्धिभ्यां जनेऽस्मिन्नधिकारिणि ॥ २ ॥ द्विविधे द्विप्रकारैव पूर्वाध्याये स्फुटं मया ॥ ज्ञानकर्मपरत्वाख्या निष्ठोक्ता ते हितैषिणा ॥ ३ ॥ यद्वा पुरेति सर्गादौ प्रजाः सृष्ट्वा चतुर्विधाः ॥ तासां स्वर्गापवर्गाप्तिसाधनं वेदपद्धतिः ॥ ४ ॥ मयाविष्कुर्वता प्रोक्ता सर्वज्ञेनेश्वरेण च ॥ तथाच त्वं भो मा ग्लासीरधिकार्यैक्यशङ्कया ॥ ५ ॥ अनघेतिपदेनैषा सूच्यते योग्यताऽर्जुने ॥ साध्यसाधनभेदेन निष्ठैकैवास्ति सा द्विधा ॥ ६ ॥ न तु निष्ठे स्वतन्त्रे द्वे निष्ठेत्यत्रैकताध्वनिः ॥ द्वैविध्येन च तामेव निष्ठां संदर्शयत्यजः ॥ ७ ॥ सम्यक्तत्त्वमतिः संख्या तां संप्राप्तवतां सताम् ॥ ब्रह्मचर्याश्रमादेव वेदान्तश्रवणादिभिः ॥ ८ ॥ ज्ञानभूमौ प्रविष्टानां सांख्यानां शुद्धचेतसाम् ॥ युज्यते ब्रह्मणा-

नेन ज्ञानं तद्योग इत्यतः ॥ ९ ॥ ज्ञानयोगेन तेनैव निष्ठा तेषामुदाहृता ॥ कर्माधिकारिणां पुंसामशुद्धमनसां तथा ॥ १० ॥ कर्मैव युज्यते चित्तशुद्ध्यानेनेति योगकः ॥ तेनैव कर्मयोगेन निष्ठा तेषामुदाहृता ॥ ११ ॥ धीशुद्धिद्वारतो ज्ञानभूमौ सम्यक्प्रवेशनम् ॥ नान्यथेत्याशयो विष्णोः श्रीकृष्णस्य कृपानिधेः ॥ १२ ॥ अतो भिन्नाधिकारित्वात्साध्यसाधनरूपयोः ॥ न विकल्पस्तयोर्ज्ञानकर्मणोर्वा समुच्चयः॥ १३ ॥ तस्मादवस्थाभेदेन चैकमेव प्रतिद्वयोः ॥ उपयोगान्न वैयर्थ्यमुपदेशस्य चेति दिक् ॥ १४ ॥ ३ ॥

भा० टी०—अर्जुनप्रश्नानुरूपमुत्तरं श्रीभगवानुवाच—**लोक इति** । लोकेऽस्मिन् शास्त्रोक्तानुष्ठानाधिकृते त्रैवर्णिके जने शुद्धाशुद्धान्तःकरणतया द्विविधे द्विविधा उपायोपेयभेदेन द्विप्रकारा निष्ठाऽनुष्ठेयतात्पर्यं पुरा सर्गादौ मया सर्वज्ञेनेश्वरेण प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयससाधनवेदार्थसंप्रदायमाविष्कुर्वता प्रोक्ता । यत्तु पुरा पूर्वाध्याय इति भाष्यविरुद्धं वर्णयन्ति तन्न प्रोक्तेत्येतावतैव निर्वाहे लोकेऽस्मिन्नित्यस्य पुरेत्यस्य च वैयर्थ्यप्रसङ्गात् 'इमं विवस्वते योगं प्रोक्तवानहमव्ययम्' इति वक्ष्यमाणेन भाष्योक्तार्थस्य स्पष्टप्रतिपादकेन मूलेन विरोधाच्च । हे अनघेति संबोधयन् भवच्चित्तशुद्ध्यर्थमेव त्वां स्वधर्मे नियोजयामि न स्वार्थमिति ध्वनयति । निष्ठायाः प्रकारविभागमाह—**ज्ञानेति** । युज्यते ब्रह्मणानेनेति योगः ज्ञानमेव योगः ज्ञानयोगः तेन सांख्यानां चित्तशुद्ध्यात्मानात्मविषयविवेकज्ञानवतां निष्ठा स्थितिः प्रोक्ता । चित्तशुद्धिद्वारा युज्यतेऽनेन ज्ञानेनेति योगः कर्मैव योगः कर्मयोगः तेन योगिनामशुद्धान्तःकरणानां कर्मिणां मया निष्ठा प्रोक्तेत्यर्थः ॥ ३ ॥

प० टी०—ततो भगवानाह—**लोकेऽस्मिन्निति** । लोक्यते ज्ञायतेऽनेनेति लोको मुमुक्षुजनस्तस्मिन् द्विविधा द्विप्रकारा निष्ठा मर्यादा पुरा द्वितीयाध्याये प्रोक्ता । तत्र सांख्यानां शुद्धान्तःकरणानां ज्ञानयोगेन ' तथाशुद्धान्तःकरणानां योगिनां कर्मकुशलानां कर्मयोगेन, न ह्येकं प्रत्युपायद्वयकथनं किंत्वधिकारभेदादतो व्यामिश्रेणेव वाक्येनेति वक्तुं नार्हसीत्यर्थः ॥ ३ ॥

रा० टी०—यद्यपि सर्वकर्माण्याश्रमत्रयविहितानि काम्यकामिभेदेन काम्यान्यकाम्यानि चेति वैकल्पिकानि यतिधर्मास्तु शमादयः केवलमकाम्याः युद्धकर्मैव नरकाद्यनर्थहेतुरागद्वेषाद्युपेताश्च न भवन्ति तथापि तेषामनधिकारिकविषयत्वात् तव च जनकप्रियव्रतादेरिव आधिकारिकत्वात् सुखदुःखे समे कृत्वेत्यत्रोक्तदिशा भगवद्भक्त्या स्वधर्मत्वेनानुष्ठाने पापानवाप्तेर्वैकल्पिकेपि युद्धकर्मण्येव नियोज्य इति भावेनाद्यप्रश्नस्योत्तरमाह—**लोक** इत्यादिना । द्वितीयस्य तु श्रेयानित्यादिनाग्रे ध्येयम् । अस्मिन्लोके साधकवर्गे निष्ठा स्वरूपेण स्थितिः मुक्तिरिति यावत् । यद्वा निष्ठा नितरां संसारगतिनिवृत्तिर्द्विविधा द्विप्रकारा द्विविधसाधनसाध्येत्यर्थः । पुरा मया प्रोक्ता हे अनघेति संबुद्धिः । कथमित्यत आह—**सांख्यानां** ज्ञानप्रधानानां देवानां सनकादियतीनां च ज्ञानयोगेन प्राचुर्याज्ज्ञानस्योक्तिः । अप्रचुरकर्मोपेतप्रचुरज्ञानोपायेन जपध्यानादिना निष्ठा मुक्तिः योगिनां कर्मरूपोपायवतां कर्मयोगेनाप्रचुरज्ञानोपेतेन प्रचुरकर्मोपायेन निष्ठा मुक्तिः । योगिनामित्यनन्तरमितिशब्दोऽध्याहार्यः । अत्र भगवज्ज्ञानिनामप्युभयेषां न ज्ञानमात्रेण स्वयोग्ययावदानन्दानुभवरूपसंपूर्णमुक्तिः अपितु कर्मसमुच्चितेनैव । तत्र केचन सनकादयो यतयः स्वगतज्ञानकर्मणोर्मध्ये ज्ञानप्रचुराः सन्तो मुक्तिभाजः केचित्तु जनकप्रियव्रतादयो गृहस्थाः स्वगतज्ञानकर्मणोर्मध्ये प्रचुरकर्माणः सन्त एव मुक्तिभाजो भवन्ति आधिकारिकतया तथैव भगवता क्लृप्तत्वात् । तथाच त्वमप्याधिकारिक इति कर्मणि विनियोज्य एवेति भावः । अत्र नीरमिश्रक्षीरे क्षीरशब्दप्रयोगवत्प्राचुर्याभिप्रायेण ज्ञानयोगेन कर्मयोगेनेत्येकैकोक्तिरिति ज्ञेयम् ॥ ३ ॥

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ॥
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

त० टी०—कर्मणां ज्ञानार्थं विनियोग इत्युक्तं तदभावे न ज्ञानप्राप्तिरित्याह—**न कर्मणामिति**। स्वस्ववर्णाश्रमोचितभगवदाज्ञापालनात्मककर्मणामनारम्भादकरणान्नैष्कर्म्यं कर्मराहित्यं ज्ञानं पुरुषो नाश्नुते न प्राप्नोति। ननु "एतमेव लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुतेः सर्वकर्मसंन्यासादेव मोक्षाभिधानात्किं कर्मभिरित्यत आह—**न चेति**। चित्तशुद्ध्यभावेन ज्ञानं विना कृतात्केवलात्संन्यासात्सिद्धिं मोक्षं न च समधिगच्छति प्राप्नोति। लोके संन्यासीति प्रथामात्रप्राप्तावपि न संन्यासफलभाग्भवतीत्यर्थः ॥ ४ ॥

म० टी०—तत्र कारणाभावे कार्यानुपपत्तेः कर्मणाम् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन" इति श्रुत्याऽऽत्मज्ञाने विनियुक्तानामनारम्भादननुष्ठानाच्चित्तशुद्ध्यभावेन ज्ञानायोग्यो बहिर्मुखः पुरुषो नैष्कर्म्यं सर्वकर्मशून्यत्वं ज्ञानयोगेन निष्ठामिति यावत् नाश्नुते न प्राप्नोति। ननु "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुतेः सर्वकर्मसंन्यासादेव ज्ञाननिष्ठोपपत्तेः कृतं कर्मभिरित्यत आह—**न चेति**। न च संन्यसनादेव चित्तशुद्धिं विना कृतात् सिद्धिं ज्ञाननिष्ठालक्षणां सम्यक् फलपर्यवसायित्वेन नाधिगच्छति नैव प्राप्नोतीत्यर्थः। कर्मजन्यां चित्तशुद्धिमन्तरेण संन्यास एव न संभवति यथाकथंचिदौत्सुक्यमात्रेण कृतोपि न फलपर्यवसायीति भावः ॥ ४ ॥

शं० टी०—नन्वेवं सति ज्ञानकर्मणोरुभयोरपीतरेतरानपेक्षयैव साक्षान्मोक्षहेतुत्वं प्राप्तमिति चेन्न "न कर्मणा न प्रजया" इत्यादिश्रुतिभिः कर्मणो मोक्षसाधनत्वनिषेधात् 'ज्ञानादेव तु कैवल्यम्' इतीतरव्यावृत्तिपूर्वकं ज्ञानस्यैव साक्षान्मोक्षसाधनत्वावधारणाच्च न कर्मणो मोक्षसाधनता संभवति। यद्यपि ज्ञानमेव समुत्पन्नं स्वयमन्यानपेक्षया पुरुषस्य सद्यो मुक्तिसुखं प्रयच्छति तथापि "सत्त्वशुद्धौ ध्रुवा स्मृतिः" इति श्रवणात्सत्त्वशुद्धिं विना ज्ञानं नोदेति। सत्त्वशुद्धिश्च "ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इतिश्रवणाद्यज्ञदानादिसत्कर्मानुष्ठितिं विना न सिध्यत्यतो मुमुक्षोरनुत्पन्नात्मज्ञानस्यावश्यं चित्तशुध्यर्थं कर्म कर्तव्यमन्यथा मोक्षो न सिध्यतीत्याह—**न कर्मणामिति**। नित्यानां कर्मणां श्रौतादीनामनारम्भादनाचरणान्नैष्कर्म्यं न यत्र कर्म तन्निष्कर्म ब्रह्म "निष्कलं निष्क्रियम्" इतिश्रुतेः तस्य भावो नैष्कर्म्यं निष्क्रियब्रह्मात्मनावस्थानलक्षणां मुक्तिं पुरुषो नाश्नुते उपायाभावात्सत्येवोपाये उपेयं सिध्यति यत उपायभूतानां कर्मणामननुष्ठानादुपेयभूतं ज्ञानं तत्फलं च नैष्कर्म्यं पुरुषस्य न सिध्यत्यतो मुमुक्षोरीश्वरार्पणबुद्ध्या नित्यं नैमित्तिकं च कर्मावश्यमनुष्ठातव्यं तेन ज्ञानं मोक्षश्च सिध्यतीत्यर्थः। ननु "न कर्मणा न प्रजया" इतिश्रुत्यैव कर्मणो मोक्षसाधनत्वनिषेधात् "संन्यासयोगात्" इति संन्यासस्यैव यतीनां मुक्तिहेतुत्वश्रवणाच्च सर्वकर्मणां संन्यासमेव कृत्वाऽहं तूष्णीं सुखमासे न कदापि च कुर्वे क्लेशभूयिष्ठं कर्म तत्रापि च हिंसाप्रधानमित्याशङ्कायामाह—**न चेति**। कर्मणि क्लेशभूयिष्ठत्वबुद्ध्याप्यलसत्वेन वाप्यापातवैराग्याच्छिखायज्ञोपवीतत्यागमात्रादेव सिद्धिं नैष्कर्म्यसिद्धिं विदेहमुक्तिं ब्राह्मणो मुमुक्षुर्न समधिगच्छति विनैव वेदान्तश्रवणजन्यज्ञानेन "ज्ञानादेव तु कैवल्यम्" इति श्रुतिप्रसिद्धेः। ननु संन्यस्य मुक्त्यर्थं दहरोपास्तिं वा वैश्वानरीं वोपास्तिं शिवस्य पूजां तन्नामकीर्तनं वा कुर्यामिति चेन्नाद्यः "सत्यकामः सत्यसंकल्पः" इति दहरोपासनस्य सत्यकामत्वादिगुणवत्त्वश्रवणाद्गुणवदुपास्त्या तद्भावापत्तिप्रसङ्गात्। न द्वितीयः "स सर्वेषु भूतेष्वन्नमत्ति" इतिश्रवणाद्वैश्वानरोपास्त्या सर्वभूतात्मनान्नादनमात्रफलप्रसङ्गात्। न तृतीयः "देवो भूत्वा

देवानप्येति " इतिश्रवणात्तल्लोकप्राप्तिप्रसङ्गात् । नापि चतुर्थः ' नास्ति पातकमहो कलिकाले नामकीर्तनपरेषु नरेषु ' ' पुण्यश्रवणकीर्तनम् ' इत्यादिवचनात्पापक्षयमात्रप्रयोजनसिद्धेः । " यद्दृश्यं तदसत् " इत्यव्याकृतादेः स्थूलान्तरस्य सगुणस्य सर्वस्य दृश्यत्वेनासत्त्वावगमादुपास्यस्य सर्वस्यापि सगुणत्वेनाऽसत्त्वाद्व्यभिचारादसदुपास्त्या त्वसद्भाव एव फलं सिध्यति न कचिदपि सद्भाव उपासनानुरूपत्वात्फलसिद्धेः "तं यथायथोपासते तथैव भवति । असन्नेव स भवति असद्ब्रह्मेति इति चेदवेत् " इत्यादिश्रुतेः ' ये यथा माम् ' इतिस्मृतेश्च । किंच "असूर्या नाम ते लोकाः" इति "न चेदिहावेदीन्महती विनष्टिः" इत्यात्मतत्त्वाज्ञानिनोऽसुरलोकप्राप्तिरूपमहानर्थश्रवणात् "अरुन्मुखान यतीन् सालावृकेभ्यः प्रायच्छम् " इति वेदान्तविमुखानां यतीनामिन्द्रभयश्रवणाच्च ' प्रत्यक्तत्त्वविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्या विधीयते तस्मात्तत्त्यागी पतितो भवेत् ' इति यतेः स्वरूपविवेकाभावे पतितत्वस्मरणात्संन्यासस्यापि कर्मत्वाविशेषात्तावन्मात्रेण मोक्षासंभवाच्च तस्माद्यतेर्मुमुक्षोः सर्वथा वेदान्तश्रवणेन ज्ञानं प्रयत्नेन संपादनीयमिति सूचितं भगवता—नच संन्यसनादेव सिद्धिंसमधिगच्छतीति । चकारस्त्वर्थः । संन्यासयोगादित्यत्र ब्रह्मविदां यतीनां ब्रह्मण्यारोपितनामरूपग्रहणत्यागः संन्यासशब्देनोच्यते नतु कर्मसंन्यासः यतय इतिपदेनैव संन्यासस्य सिद्धत्वादन्यथा पुनरुक्तिप्रसङ्गस्तस्माद्यतेः संन्यासस्य फलं वेदान्तश्रवणजन्यज्ञानमेवेति सिद्धम् ॥ ४ ॥

श्री० टी०—अतः सम्यक्चित्तशुद्ध्यर्थं ज्ञानोत्पत्तिपर्यन्तं वर्णाश्रमोचितानि कर्माणि कर्तव्यानि अन्यथा चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तेरित्याह—**न कर्मणामिति** । कर्मणामनारम्भादननुष्ठानान्नैष्कर्म्यं ज्ञानं नाश्नुते नाप्नोति । ननु च " एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति " इति संन्यासस्य मोक्षाङ्गत्वश्रुतेः संन्यासादेव मोक्षो भविष्यतीति किं कर्मभिरित्याशङ्क्योक्तम्—**न चेति** । न च चित्तशुद्धिं विना कृतात्संन्यसनादेव ज्ञानशून्यात्सिद्धिं मोक्षं समधिगच्छति प्राप्नोति ॥ ४ ॥

स० टी०—शुद्ध्यन्तं कर्म कर्तव्यमस्त्यशुद्धधियास्त्विति ॥ न कर्मणामनारम्भादित्यारभ्य प्रवक्ष्यते ॥१॥ मोघं स जीवतीत्यन्तैस्त्रयोदशभिरेव च ॥ विदुषः शुद्धबुद्धेस्तु कर्तव्यं नास्ति किंचन ॥ २ ॥ यस्त्वात्मरतिरित्यादिद्वाभ्यामित्थं प्रवक्ष्यते ॥ तस्मादसक्त इत्यादौ बन्धहेतोश्च कर्मणः ॥ ३ ॥ धीशुद्ध्या मोक्षहेतुत्वं ज्ञानोत्पत्तिमुखेन च ॥ अथ केनेति चोत्थाप्य प्रश्नं कामस्य शत्रुता ॥ ४ ॥ वक्ष्यते मोक्षमार्गेऽस्मिंस्तत्यागाज्ज्ञानयोगतः ॥ मोक्षोऽस्तीत्येव भगवानध्यायान्ते च वक्ष्यति ॥ ५ ॥ तत्रादौ कारणाभावे कार्याभावः प्रदर्श्यते ॥ तमेतमितिवाक्येन विहितानां हि कर्मणाम् ॥ ६ ॥ चित्तशुद्ध्यात्मबोधार्थमननुष्ठानतः पुमान् ॥ सत्त्वशुद्धेरभावात्स्याज्ज्ञानायोग्यो वहिर्मुखः ॥ ७ ॥ ज्ञानयोगेन निष्ठां नावाप्नोत्यात्मन्यवस्थितिम् ॥ नन्वेतमेव प्रव्राजिनो लोकमिति वेदतः ॥ ८ ॥ समस्तकर्मसंन्यासाज्ज्ञाननिष्ठोपपत्तितः ॥ कृतं कर्मभिरित्यत्र प्राह नारायणो हरिः ॥ ९ ॥ यतः सन्यसनादेव चित्तशुद्धिं विना कृतात् ॥ ज्ञाननिष्ठात्मिकां सिद्धिं नैवाप्नोति फलावधिम् ॥ १० ॥ न धीशुद्धिमृते न्यासः संभवेदथ चेत्कृतः ॥ फले पर्यवसायी नो भवेदित्याशयो हरेः ॥ ११ ॥ ४ ॥

भा० टी०—तत्किं कर्मणि घोरे मां नियोजयसि केशवेत्युक्तवन्तं खिन्नचित्तमर्जुनं कर्म न कर्तव्यमित्येवं मन्वानमालक्ष्याह—**नेति** । यद्वा निष्ठेत्येकवचनेन सूचितं कर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थसाधनत्वं ज्ञाननिष्ठायाः कर्मनिष्ठोपायलब्धस्वरूपायास्तु स्वातन्त्र्येणैव पुरुषार्थहेतुत्वं च स्फुटं वक्तुमारभते—**नेत्यादिना** । कर्मणाम् " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इति श्रुत्या ' ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ' इति स्मृत्या ' सर्वापेक्षा च यज्ञादिश्रुतेः ' इतिन्यायेन च चित्तशुद्धिद्वारा ज्ञानोपाय-

त्वेन विहितानामकरणान्नैष्कर्म्यं कर्मशून्यत्वं ज्ञानयोगेन निष्ठां पुरुषो नाश्नुते न प्राप्नोति किंतु तेषामारम्भात् प्राप्नोतीत्यर्थः । ननु 'ह्यभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत्' इत्यादौ कर्तव्यकर्मसंन्यासादपि नैष्कर्म्यप्राप्तिः श्रूयतेऽतस्तदर्थिनः किं कर्मारम्भेणेति चेत्तत्राह—नेति । न च संन्यसनात् कर्मत्यागमात्रात् ज्ञानशून्यात्सिद्धिं नैष्कर्म्यलक्षणां प्राप्नोतीत्यर्थः ॥ ४ ॥

प० टी०—सम्यक्चित्तशुद्ध्या ज्ञानोत्पत्तिपर्यन्तं वर्णाश्रमोचितानि कर्माणि कर्तव्यानि अन्यथा चित्तशुद्ध्यभावे ज्ञानानुत्पत्तिरित्यभिप्रायं प्रकटन्नाह—**न कर्मणामिति** । कर्मणामनारम्भादननुष्ठानान्नैष्कर्म्यं ज्ञानं नाश्नुते न प्राप्नोति । ननु च " एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति " इत्यादि श्रुतेः संन्यासस्यापि मोक्षसाधनत्वात्तेनैवार्थसिद्धेः किं कर्मणेत्याशङ्क्याह—न चेति । श्रुतिरपि यजुःसंहितायाम् " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे " भाष्यम्—इह मोक्षमार्गे कर्माणि कुर्वन्नेव शतं समाः । शतवर्षाणि जिजीविषेज्जीवितुमिच्छेत् । कर्माकरणे तु मृत्युरेव श्रेयानित्यर्थः । एवकारोऽन्ययोगव्यवच्छेदार्थः । तेन कर्म कर्तव्यमेवेत्युक्तम् । एवममुना प्रकारेण नरे मनुष्ये देहाभिमानिनि कर्म कृतवति सति तन्मोक्षप्रापकं कर्म त्वयि न लिप्यते फलभोगाय न भवति इतः परमन्यथा मोक्षमार्गो नास्ति ॥ ४ ॥

रा० टी०—यतिधर्माः शमादय एवानुष्ठेया न तु गृहिधर्माः । तत्रापि न घोरं युद्धकर्मेति वादिनं पार्थं प्रति तव जनकादेरिवाधिकारिकत्वात् वर्णाश्रमोचिता धर्मास्त्वयानुष्ठेया एवेति उक्तम् । इदानीं कर्म न कार्यमिति वदतः किं कर्माकरणप्राप्यत्वहेतुना मुक्तेर्नैष्कर्म्यशब्दवाच्यत्वात्तदन्यथानुपपत्त्या कर्म न कार्यमित्यभिप्रायः उत कर्मणः संसारबीजत्वात्तदकरणं मुक्तिहेतुरिति 'कर्मणा बध्यते जन्तुः' इति स्मृतेः कर्मणो मुक्तिप्रतिबन्धकत्वाद्वा । आद्यं निराह—नेति । कर्मणामनारम्भादकरणान्नैष्कर्म्यं कर्माकरणप्राप्यत्वहेतुना नैष्कर्म्यशब्दवाच्यं मोक्षमश्नुते इति यत्त्वयोक्तं तन्न भवति । कुत इत्यत उक्तम्—पुरुष इति । पुराणि शरीराणि सरति प्राप्नोतीति पुरुसः पुरुस एव पुरुषः । हेतुगर्भमिदम् । सदा सूक्ष्मेण स्थूलेन च देहेन युक्तत्वादिति । कर्माकरणमात्रेण मोक्ष इति पक्षे कदाचित्कर्मानधिकारशरीरस्यापि संभवेन तद्देहे कर्माकरणनिमित्तमोक्षप्राप्त्याधुना दृश्यमानं पुरुषत्वं न स्यादिति भावः । नैष्कर्म्यशब्दवाच्यत्वं तु काम्यकर्माप्राप्यत्वनिमित्तेनोपपन्नं मया तु निवृत्तकर्मण्येव नियोगः क्रियत इति भावः । द्वितीयमपि निराह—नेति । कर्मणामनारम्भादकरणान्नैष्कर्म्यं काम्यकर्माप्राप्यं मोक्षमश्नुते । संसारबीजभूतकर्माभावादिति त्वयोक्तं यत्तन्न कुतः—पुरुष इति । प्राग्वदेवार्थः । अनादौ संसारे कर्माधिकृतानन्तजन्मसंभवेन सदा पुरुषशब्दितदेहयुतत्वात्तत्र कृतानन्तकर्मणां भावेनाद्यतनदेहावच्छेदेन कर्माकरणमात्रेण संसारबीजाभावकृतमोक्षाशा कुतः स्यादिति भावः । तृतीयपक्षनिरासस्तु यज्ञार्थात्कर्मणोन्यत्रेत्यादौ वक्ष्यते । ननु 'निष्कामं ज्ञानपूर्वं तु' इतिस्मृतौ निवृत्तकर्मणा मोक्ष उच्यते । तस्य मोक्षहेतुत्वे फलान्तराभाव एव युक्तिर्न त्वन्या । तथाच कर्माकरणस्यापि फलान्तराभावरूपयुक्तिसाम्याद् आयासाभावरूपगुणवत्त्वाच्च कर्माकरणादपि मोक्षः स्यात् । " एवं त्वयि नान्यथेतोस्ति " इत्यादौ श्रुतः कर्माकरणे प्रत्यवायस्तु अमुमुक्षुविषयतयोपपन्न इत्यत आह—**न चेति** । संन्यसनात् काम्यकर्माकरणादेव तन्मात्रादितियावत् । अनेन निवृत्तकर्मकरणमुपलक्ष्यते । निवृत्तकर्मकरणमात्रात्सिद्धिं मोक्षं पुरुषो न समधिगच्छति प्राप्नोति किंतु तेनान्तःकरणशुद्धिविषयवैराग्यश्रवणमननध्यानज्ञानद्वारैव । " निवृत्तं सेवमानस्तु ब्रह्माभ्येति " इतिश्रुतेरप्ययमेवाभिप्रायः । तथाच न तत्प्रतिबन्धाकर्माकरणस्य मोक्षहेतुत्वं शङ्क्यमिति भावः । ननु यत्याश्रमधर्माणां श्रुत्यादिसिद्धे मुक्तिहेतुत्वे फलान्तराभाव एव मुक्तिरिति तत्प्रतिबन्ध्यास्तु कर्माकरणस्य युक्तिहेतुत्वमित्यतो

प्युक्तम्–न चेति । संन्यसनाद्यत्याश्रमादेवेत्यर्थः । स तु भगवति मनःसमाधानद्वारा तत्प्रीतिविशेषद्वारा वा मुक्तिहेतुर्न फलान्तराभाववत्त्वहेतुना येन तत्प्रतिबन्ध्यापि फलान्तराभावयुक्त्या कर्माकरणस्य मुक्तिहेतुत्वं शङ्क्येतेति। एतेन लोक इतिपूर्वश्लोकोक्तदिशा न केवलमाधिकारिकत्वात्तव कर्मणि नियोगः अपि तु कर्माकरणस्य त्वदुक्तरीत्या मुक्तिहेतुत्वभावादपीति हेत्वन्तरमुक्तं भवति ॥ ४ ॥

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

त० टी०–तस्य फलपर्यवसायित्वं दूरे तिष्ठतु तावत्सर्वकर्मसंन्यास एवाशक्य इत्याह–**न हीति** । जातु कदाचित्कश्चिदपि मूर्खो ज्ञानी वा क्षणमपि अकर्मकृत्कर्माकुर्वाणो न हि तिष्ठति । हीत्यवधारणे । नैव तिष्ठति अपि तु वैदिकं लौकिकं वा कर्म कुर्वन्नेव तिष्ठतीत्यर्थः । हि यतोऽवशः यावत्स्थूलसूक्ष्मदेहहेतुभूतकर्मास्ति तावत्प्रकृतिवशगस्तस्मात्प्रकृतिजैः सर्वजगद्धेतुप्रकृतिसमुद्भवैः सत्त्वादिभिर्गुणैः सर्वोऽपि जनः कर्म कार्यते बलात्कर्मणि नियुज्यते । तस्मान्मुमुक्षुणा ज्ञानप्रतिबन्धकपापक्षयार्थं स्वोचितः कर्मयोग एवानुष्ठेयः ॥ ५ ॥

म० टी०–तत्र कर्मजन्यशुद्ध्यभावे बहिर्मुखः हि यस्मात्क्षणमपि कालं जातु कदाचित् कश्चिदप्यजितेन्द्रियः अकर्मकृत्सन्न तिष्ठति अपि तु लौकिकवैदिककर्मानुष्ठानव्यग्र एव तिष्ठति तस्मादशुद्धचित्तस्य संन्यासो न संभवतीत्यर्थः। कस्मात्पुनरविद्वान्कर्माण्यकुर्वाणो न तिष्ठति हि यस्मात् सर्वः प्राणी चित्तशुद्धिरहितः अवशः अस्वतन्त्र एव सन् प्रकृतिजैः प्रकृतितो जातैरभिव्यक्तैः कार्याकारेण सत्त्वरजस्तमोभिः स्वभावप्रभवैर्वा रागद्वेषादिभिर्गुणैः कर्म लौकिकं वैदिकं वा कार्यते अतः कर्माण्यकुर्वाणो न कश्चिदपि तिष्ठतीत्यर्थः । स्वाभाविका गुणाश्चालकाः अतः परवशतया सर्वदा कर्माणि कुर्वतोऽशुद्धबुद्धेः सर्वकर्मन्यासो न संभवतीति न संन्यासनिबन्धना ज्ञाननिष्ठा संभवतीत्यर्थः ॥ ५ ॥

शं० टी०–यदुक्तं सर्वकर्मसंन्यासं कृत्वाहं तूष्णीं सुखमास इति तन्न संस्कारजप्रवृत्तेः क्रियाया निःशेषत्यागायोगाद्वृत्तेरालम्बनाभावाच्च तूष्णीमासनं ब्रह्मनिष्ठं विना न कस्यापि घटत इत्याशयेनाह–**न हीति** । अत्र लोके जातु कदाचिदपि कश्चिद्यो वा को वापि प्राणी क्षणं क्षणार्धमप्यकर्मकृत्किमपि कर्माकुर्वन्न तिष्ठति किंतु सुषुप्तिं विना जाग्रत्स्वप्नयोः सर्वदा कायेन वा मनसा वा वाचा वा चक्षुरादिभिर्वा यत्किंचित्कर्म कुर्वन्नेव तिष्ठति न कचिदपि तूष्णीमित्यर्थः। इदं सर्वं प्रत्यक्षमिति हिः प्रसिद्धिद्योतनार्थः । कस्मात्तूष्णीं स्थातुं न शक्नोतीत्याकाङ्क्षायामाह–**कार्यत इति** । हि यस्मात्कारणात्सर्वोऽपि प्राणिवर्गः प्रकृतिजैः सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिस्तस्याः सकाशाज्जाताः प्रकृतिजास्तैर्गुणैर्गुणाः द्रव्यवासना गुणवासना: कर्मवासना जातिवासना रागद्वेषादयश्च तैः प्रकृतिजैर्गुणैरन्तःप्रेर्यमाणोऽवशोऽस्वतन्त्रः सन्नेव बहिरन्तः कर्म नानाव्यापाररूपं कार्यते वासनात्मिकायाः प्रवृत्तेर्वशो भूत्वा न कोपि तूष्णीं स्थातुं शक्नोति विना ब्रह्मविद्वर्यं ब्रह्मविद्वर्यस्तु निर्विकल्पसमाध्यग्निना निर्मूलितप्रकृतिगुणतत्कार्यतूलपटलत्वाद्वायुना मेरुरिव स्वयं गुणैर्न चाल्यते किंतु निष्क्रियब्रह्मात्मना तूष्णीमेव तिष्ठति 'उदासीनवदासीनो गुणैर्यो न विचाल्यते' इति स्मरणात्ततो ब्रह्मविद्वर्य एक एव तूष्णीं स्थातुं शक्नोति न ततोऽन्य इत्यर्थः ॥ ५ ॥

श्री० टी०–कर्मणां च संन्यासस्तेष्वनासक्तिमात्रं न तु स्वरूपेणाशक्यत्वादित्याह–**न हीति** । जातु कस्यांचिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञानी वाऽज्ञो वा कर्मकृत्कर्माण्यकुर्वाणो न तिष्ठति । तत्र हेतुः प्रकृतिजैः स्वभावप्रभवैः रागद्वेषादिगुणैः सर्वोऽपि जनः कर्म कार्यते कर्मणि प्रवर्तते अवशः अस्वतन्त्रः सन् ॥५॥

स० टी०—यतः कश्चिदपि प्राणी क्षणं नापि कदाचन ॥ तिष्ठतीह विना कर्म नातः शुद्धिमृतेऽक्रियः ॥ १ ॥ यतोऽशुद्धमनाः सर्वो रजःसत्त्वतमोगुणैः ॥ स्वभावप्रभवैर्वापि रागद्वेषादिभिर्गुणैः ॥ २ ॥ अस्वतन्त्रोऽखिलं कर्म वैदिकं लौकिकं बलात् ॥ कार्यतेऽतो विना शुद्धिं न संन्यासोऽपि संभवेत् ॥ ३ ॥५॥

भा० टी०—तत्र हेत्वाकाङ्क्षायामाह—**न हीति** । हि यस्मात्कश्चिदज्ञोऽशुद्धचित्तः क्षणमपि कालं जातु कदाचिदपि कस्यां चिदप्यवस्थायामकर्मकृत्सन्न तिष्ठति हि यस्मादस्वतन्त्र एव सर्वोऽज्ञलोकः प्रकृतितो जातैः सत्त्वरजस्तमोभिः गुणैः कर्म कार्यते एतेन कर्मणां च संन्यासस्तेष्वनासक्तिमात्रं नतु स्वरूपेणाशक्यत्वादित्याह—**न हीति** । कश्चिदपि ज्ञानी वाऽज्ञो वेति परास्तम् । अस्य पक्षस्य युक्तिशतेन भगवत्पादैर्निराकृतत्वात् ' गुणैर्यो न विचाल्यते ' इति वक्ष्यमाणविरोधस्यात्रैवाचार्यैरुक्तत्वाच्च । अतोऽज्ञं कर्मत्यागिनं निन्दति कर्मेन्द्रियाणीति स्वपरग्रन्थविरोधाच्च ॥ ५ ॥

प० टी०—अथ सत्कर्मण्युद्विग्नचित्तं जनमुपपत्त्या बोधयति—**न हीति** । कश्चिदपि जातु कदाचिदप्यकर्मकृन्न हि तिष्ठति किं तु सर्वोपि जनोऽवशोऽस्वतन्त्रः सन् प्रकृतिजैः स्वभावजैर्गुणैः करचरणचेष्टारूपं कर्म कार्यते कर्मणि प्रयोज्यते । तत्रोद्विग्नः सन् करोत्येव परं तु सत्कर्मणि न प्रवर्तते इत्याश्चर्यम् ॥ ५ ॥

रा० टी०—किंच कर्मणेत्यादिस्मृतिबलात्कर्मणो मुक्तिप्रतिबन्धकत्वमिति तृतीयपक्षे स्मृतौ कर्मशब्दः संकुचितवृत्तिरिति वक्ष्यमाणोपोद्घाततया कर्माणि सर्वात्मना त्यक्तुं न शक्यानीत्याह—**न हीति** । जातु कस्यांचिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञोऽज्ञो वा अकर्मकृत्कर्माण्यकुर्वन्न तिष्ठति । कुत इत्यत उक्तम्—**कार्यत इति** । सर्वः सर्वेण जनेन व्यत्ययात् । अवशः अवशेन "अःइति ब्रह्म" इतिश्रुतेः । विष्णुवशेनैव सता स्वतन्त्रकर्तृविष्ण्वधीनकर्तृताकेनैव कर्त्रा प्रकृतिजैर्गुणैः सत्त्वादिभिर्विकारकर्तृभूतैः कर्म कार्यते । स्वतन्त्रकर्त्रा भगवता विकारकर्तृसत्त्वादिभिश्च प्रेरितो जनः सदा किंचित्कर्म करोतीति हेतोरकर्मकृत्कोऽपि नेत्यर्थः ॥ ५ ॥

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

त० टी०—ननु कर्मणः कर्मेन्द्रियाधीनत्वात् तन्नियमने कर्म कथं स्यादिति चेत्तत्राह—**कर्मेन्द्रियाणीति** । यो विमूढात्मा अनादिविषयवासनया मलीमसत्वेनाऽऽत्मतत्त्वस्मरणानर्हतया विषयासक्तमनाः कर्मेन्द्रियाणि संयम्य मनसा इन्द्रियार्थान्विषयान् स्मरन्नास्ते स मिथ्याचार उच्यते । निष्कामकर्मानुष्ठानं विनाऽनादिपापानिवृत्त्या मनसो विषयासङ्गोऽवर्जनीय इति भावः । तस्मात्परमार्थोपयोगित्वाभावात्सर्वकर्मसंन्यास्यहमिति लोके दर्शयितुं मिथ्या वृथैव कर्मेन्द्रियसंयमरूप आचारो यस्य स तथा उच्यते । शास्त्रविद्भिरिति शेषः ॥ ६ ॥

म० टी०—यथा कथंचिदौत्सुक्यमात्रेण कृतसंन्यासस्त्वशुद्धचित्तस्तत्फलभाङ्न भवति यतः यो विमूढात्मा रागद्वेषादिदूषितान्तःकरण औत्सुक्यमात्रेण कर्मेन्द्रियाणि वाक्पाण्यादीनि संयम्य निगृह्य बहिरिन्द्रियैः कर्माण्यकुर्वन्निति यावत् मनसा रागादिप्रेरितेन इन्द्रियार्थान् शब्दादीन् नत्वात्मतत्त्वं स्मरन्नास्ते कृतसंन्यासोऽहमित्यभिमानेन कर्मशून्यस्तिष्ठति स मिथ्याचारः सत्त्वशुद्ध्यभावेन फलायोग्यत्वात्पापाचार उच्यते ' त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्येह विहितो यस्मात्तत्त्यागी पतितो भवेत् ' इत्यादिधर्मशास्त्रेण । अत उपपन्नं न च संन्यसनादेवाशुद्धान्तःकरणः सिद्धिं समधिगच्छतीति ॥ ६ ॥

शं० टी०—ननु सर्वं कर्म संन्यस्य करपादादीन्द्रियग्रामं रुद्ध्वा वहिस्तूष्णीं स्थाणुवन्नैश्चल्येन स्थातुं शक्यत एवेत्याशङ्कायां न वन्धमोक्षयोर्गतिं स्वाधिकारं चाविज्ञाय किं कर्मणा निष्फलेन क्लेशभूयिष्ठेनेति दुरहंकारेण मुक्तिसाधनं वैदिकं कर्म सर्वं संन्यस्य यस्तूष्णीं तिष्ठति स दम्भाचार इत्याह—**कर्मेन्द्रियाणीति**। विमूढात्मा विमूढः कार्याकार्यविवेकरहित आत्मा मनो यस्य स विमूढात्मा सन् स्वस्य कर्तव्यं वैदिकं कर्म मुक्तिसाधनं परित्यज्य वहिः कर्मेन्द्रियाणि संयम्य निरुध्य चक्षुषी निमील्यान्तरिन्द्रियार्थान् शब्दादीन् स्मरन् चिन्तयन् य आस्ते ब्रह्मविदहमेव कर्मसंन्यासेन कृतार्थोऽस्मीति स मिथ्याचारोऽसदाचारः कपटचारित्र आत्मवञ्चक इति सद्भिरुच्यत इत्यर्थः। एतेन श्रवणार्थं वान्यथा वा संन्यस्य श्रवणादिकमकृत्वा वेषेण जीवनं कुर्वन् संन्यासेनैव कृतार्थोऽहमिति यो यतिर्मन्यते सोऽपि मिथ्याचार एवेति सूचितं भवति ॥ ६ ॥

श्री० टी०—अतोऽज्ञं कर्मत्यागिनं निन्दति—**कर्मेन्द्रियाणीति**। वाक्पाण्यादीनि कर्मेन्द्रियाण्यपि संयम्य निगृह्य यो मनसा भगवद्ध्यानच्छलेनेन्द्रियार्थान् विषयान् स्मरन्नास्ते आविशुद्धतया मनस आत्मनि स्थैर्याभावात् स मिथ्याचारः कपटाचारो दाम्भिक उच्यत इत्यर्थः ॥ ६ ॥

स० टी०—रागाद्याक्रान्तचित्तस्तु योऽकुर्वन्वहिरिन्द्रियैः॥ कर्माणि मनसा रागद्वेषादिप्रेरितेन च ॥ १ ॥ शब्दादीन्संस्मरंन्नित्यं कर्म त्यक्त्वैव तिष्ठति ॥ स सत्त्वशुद्ध्यभावेन पापाचारः प्रकथ्यते ॥ २ ॥ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् ॥ श्रुत्या विधीयते यस्मादन्यथा पतितो भवेत् ॥ ३ ॥ ६ ॥

भा० टी०—ननु हठात्कर्मेन्द्रियाणि संयम्याकर्मकृद्भविष्यतीत्याशङ्क्य यस्त्वनात्मज्ञोऽशुद्धान्तःकरणो हठात्कर्मेन्द्रियाणि संयम्य विहितं कर्म न करोति औत्सुक्यात्संन्यस्यति स तूभयतो भ्रष्ट इत्याह—**कर्मेति**। कर्मेन्द्रियाणि यो विमूढात्मा रागद्वेषादिभिर्मलिनचित्तः हस्तादीनि संहृत्य इन्द्रियार्थान् शब्दादीन् मनसा स्मरन्नास्ते स मिथ्याचारोऽसदाचारः पापाचार उच्यते ॥ ६ ॥

प० टी०—अथ कोऽपि पुमानहं प्राप्तनैष्कर्म्यसिद्धिरिति ध्यानच्छलेन नेत्रे निमील्य तिष्ठति सोऽपि निन्द्यते—**कर्मेन्द्रियाणीति**। कर्मेन्द्रियाणि वाक्पाणिपादादीनि संयम्य नियम्य तूष्णीं तिष्ठति मनसा त्विन्द्रियार्थान् रूपरसादीन् विषयान् स्मरति मिथ्याचारो दाम्भिकः सन्नास्ते स विमूढात्मेत्युच्यते। स्वहितमजानन् व्यर्थमायुः परिकलयतीत्यर्थः ॥ ६ ॥

रा० टी०—ननु शरीरयात्राद्यर्थकर्मणां त्यक्तुमशक्यत्वेऽपि यज्ञादिकर्मणां त्यक्तुं शक्यत्वात्तेषामस्तु त्यागः। न ह्यशक्यविषये शास्त्रप्रवृत्तिरस्ति। अतः कर्मणा वध्यत इति कर्मत्यागपरे शास्त्रे कर्मशब्दो यज्ञादिकर्मपरो भविष्यतीत्यतो मन एव बन्धमोक्षयोः प्रयोजकं न कर्मकरणाकरणे इतिभावेन मनस एव प्राधान्यमाह—**कर्मेत्यादिश्लोकाभ्याम्**। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि चक्षुरादीन्युपलक्ष्यन्ते। संयम्य निगृह्य यो मनसा इन्द्रियार्थान् रूपादीन्मनसा स्मरन्नास्ते वर्तते स विमूढात्मा भ्रान्तः मिथ्याचारः कपटाचारः दाम्भिक उच्यत इत्यर्थः ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ॥
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

त० टी०—तस्माद्विषयासक्तिशून्यः कर्मकर्तापि ततः श्रेष्ठ इत्याह—**यस्त्विति**। तुशब्दः पूर्वोक्तसंन्यासिनो वैलक्षण्यद्योतनार्थः। इन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि आत्मस्मरणयोग्येन विषय-

विमुक्तेन मनसा नियम्य वशीकृत्य कर्मेन्द्रियैः वाक्पाणिपादादिभिः कर्मयोगमसक्तः फलाभिसन्धिरहितः सन् य आरभते स क्रमेण महच्छ्रेयोयोग्यत्वाद्विशिष्यते श्रेष्ठो भवति ॥ ७ ॥

म० टी०—औत्सुक्यमात्रेण सर्वकर्माण्यसंन्यस्य चित्तशुद्धये निष्कामकर्माण्येव यथाशास्त्रं कुर्यात् यस्मात् तुशब्दोऽशुद्धान्तःकरणसंन्यासिव्यतिरेकार्थः। इन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि मनसा सह नियम्य पापहेतुशब्दादिविषयासक्तेर्निवर्त्य मनसा विवेकयुक्तेन नियम्येति वा कर्मेन्द्रियैर्वाक्पाण्यादिभिःकर्मयोगं शुद्धिहेतुतया विहितं कर्मारभते करोत्यसक्तः फलाभिलाषशून्यः सन् यो विवेकी स इतरस्मान्मिथ्याचाराद्विशिष्यते परिश्रमसाम्येऽपि फलातिशयभाक्त्वेन श्रेष्ठो भवति। हे अर्जुन आश्चर्यमिदं पश्य यदेकः कर्मेन्द्रियाणि निगृह्णन् ज्ञानेन्द्रियाणि व्यापारयन् पुरुषार्थशून्योऽपरस्तु ज्ञानेन्द्रियाणि निगृह्य कर्मेन्द्रियाणि व्यापारयन् परमपुरुषार्थभाग्भवतीति वा ॥ ७ ॥

शं० टी०—अनात्मज्ञस्य मुमुक्षोः कर्मसंन्यासापेक्षया कर्मयोग एव श्रेष्ठ इत्याह—**यस्त्विति**। तुशब्दः पूर्वस्मादस्य श्रेष्ठत्वद्योतनार्थः। यस्त्वनात्मज्ञो मुमुक्षुर्विचक्षणः कर्मसंन्यासमकृत्वैव चक्षुरादीनीन्द्रियाणि रागद्वेषादिदोषाणां गोचराणि भवेयुर्यथा तथान्तर्नियम्य स्वयमसक्तः फलाभिसन्धिरहितो भूत्वेश्वरार्पणबुद्ध्या कर्मेन्द्रियैर्वागादिभिः कर्मयोगं श्रौतं स्मार्तं वारभते श्रद्धया चित्तशुद्ध्यै करोति स विशिष्यते मोक्षसाधनीभूतकर्मयोगनिष्ठत्वात्कर्मयोगी पूर्वोक्तदाम्भिककर्मसंन्यासापेक्षया श्रेष्ठ इत्यर्थः ॥ ७ ॥

श्री० टी०—एतद्विपरीतः कर्मकर्ता श्रेष्ठ इत्याह—**यस्त्विति**। यस्तु ज्ञानेन्द्रियाणि मनसा नियम्य ईश्वरप्रवणानि कृत्वा कर्मेन्द्रियैः कर्मरूपं योगं उपायमारभते अनुतिष्ठति असक्तः फलाभिलाषरहितः सन् स विशिष्यते विशिष्टो भवति चित्तशुद्ध्या ज्ञानवान् भवतीत्यर्थः ॥ ७ ॥

स० टी०—कर्मण्यधिकृतो यस्तु सचित्तानीन्द्रियाणि च ॥ भोगासक्तेर्निवर्त्याशु वाक्पाण्यादिभिरिन्द्रियैः ॥ १ ॥ शुद्धिहेतुतया प्रोक्तं कर्मयोगविवेकवान् ॥ फलाभिलाषशून्यः सन्करोति स विशिष्यते ॥ २ ॥ श्रमे साम्येऽपि पूर्वोक्तान्मिथ्यासंन्यासिनो नरान् ॥ चित्तशुद्ध्यै क्रियाः कुर्वन् श्रेष्ठः स्यात्फलभाग्यतः ॥ ३ ॥ ७ ॥

भा० टी०—**य इति**। यस्त्वज्ञः कर्मण्यधिकृतः ज्ञानेन्द्रियाणि विवेकवैराग्ययुक्तेन मनसा नियम्य मनसा सहेत्यर्थस्त्वरुचिग्रस्तः अरुचिबीजं तु पूर्वश्लोकोक्तस्य करणत्वस्य त्यागः सहशब्दाध्याहारश्च फलाभिसन्धिरहितः कर्मेन्द्रियैः कर्मयोगमारभते स पूर्वस्माच्छ्रेष्ठो भवति ज्ञाननिष्ठोपाये स्थितो यतः अर्जुनेति संबोधयन् एवमेव त्वमपि कुर्वन् अन्वर्थसंज्ञो भविष्यसीति ध्वनयति ॥ ७ ॥

प० टी०—अथाविमूढात्मानं वर्णयति—**यस्त्विति**। यस्तु ज्ञानेन्द्रियाणि आत्मप्रवणेन मनसा नियम्यासक्तः फलानपेक्षः सन् कर्मेन्द्रियैः कृत्वा कर्मयोगमारभते स एव विशिष्यते विशिष्टो भवति चित्तशुद्ध्या ज्ञानवान् भवति यस्मादेवं तस्मात्तथा भवेति तात्पर्यम् ॥ ७ ॥

रा० टी०—यस्त्विन्द्रियाणि चक्षुरादिज्ञानेन्द्रियाणि मनसा नियम्य असक्तः फलेच्छाहीनः सन् कर्मेन्द्रियैः कर्मयोगं स्ववर्णाश्रमोचितकर्मरूपज्ञानोपायमारभते करोति स विशिष्यते पूर्वतनादधिको भवति। एतेन पूर्वश्लोके मनसो निग्रहाभावे बन्ध इत्यन्वयः। द्वितीये तु मनसो निग्रहे बन्धाभाव इति व्यतिरेक उक्तः। तथा पूर्वत्र मनसोऽनिग्रहे मोक्षाभाव इति व्यतिरेकः। द्वितीये तु श्लोके मनसोऽनिग्रहे मोक्ष इत्यन्वय इति बन्धापेक्षया मनसोऽनिग्रहनिग्रहयोरन्वयव्यतिरेकौ मोक्षापेक्षया च व्यतिरेकान्वयावित्युक्तदिशाभिप्रेततया बन्धमोक्षयोर्मनोऽनिग्रहनिग्रहावेव प्रयोजकावित्युक्तं भवति।

मनस एव प्रयोजकत्वज्ञापनाय मनसा स्मरन्नित्युक्तिः । अन्यथा स्मरणस्य मानसत्वाव्यभिचारान्मनसेति व्यर्थं स्यादिति ज्ञेयम् ॥ ७ ॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥ ८ ॥

त० टी०—पूर्वोक्तयत्तच्छब्दाभ्यामन्यपर एवायमुपदेश इति न मन्तव्यमित्याह—**नियतमिति**। मोहालिङ्गेन पूर्वमकृतनिष्कामकर्मा त्वं नियतं नित्यकर्तव्यतया विहितं स्नानसन्ध्योपासनतर्पणादिकं कर्म कुरु । हि यस्मादकर्मणः कर्माकरणात्कर्म ज्यायः प्रशस्यं पापक्षयहेतुत्वात् । न केवलं प्रशस्यतया कर्तव्यमपि तु अकर्मणः सर्वकर्मरहितस्य तव शरीरयात्रा देहनिर्वाहोऽपि न प्रकर्षेण सिद्ध्येत्कुतोऽन्यदिति अपिशब्दार्थः ॥ ८ ॥

म० टी०—यस्मादेवं तस्मात् मनसा ज्ञानेन्द्रियाणि निगृह्य कर्मेन्द्रियैः त्वं प्रागननुष्ठितशुद्धिहेतुकर्मा नियतं विध्युद्देशे फलसंबन्धशून्यतया नियतनिमित्तेन विहितं कर्म श्रौतं स्मार्तं च नित्यमिति प्रसिद्धं कुरु कुर्विति मध्यमपुरुषप्रयोगेणैव त्वमिति लब्धे त्वमिति पदमर्थान्तरे संक्रमितं कस्मादशुद्धान्तःकरणेन कर्मैव कर्तव्यं हि यस्मात् अकर्मणोऽकरणात् कर्मैव ज्यायः प्रशस्यतरं न केवलं कर्माभावे तवान्तःकरणशुद्धिरेव न सिध्येत् किंतु अकर्मणो युद्धादिकर्मरहितस्य ते तव शरीरयात्रा शरीरस्थितिरपि न प्रकर्षेण क्षात्रवृत्तिकृतत्वलक्षणेन सिध्येत् । तथा च प्रागुक्तम् । अपि चेत्यन्तःकरणशुद्धिसमुच्चयार्थः ॥ ८ ॥

शं० टी०—मुमुक्षोर्नैष्कर्म्यसिद्धये मिथ्याचारत्वादौ निवृत्तये चावश्यं कर्म कर्तव्यमिति सूचयितुमाह—**नियतमिति** । हि यस्मात्कारणादकर्मणः येन न संभाव्यते कर्मबन्धः पुरुषस्य स कर्मसंन्यासस्तस्मादकर्मणो मूढकर्तृकाद्विवेकवता मोक्षसाधनत्वेन क्रियमाणं कर्म ज्यायः श्रेष्ठम् । यद्यपि "संन्यास एवात्यरेचयत्" इति संन्यासस्यैव सर्वोत्कृष्टतमत्वं श्रूयते तथापि 'योग्यप्रयुक्तं साधनं कार्यसाधकम्' इतिन्यायेन नाहं कर्म करोमीत्यभिमानवन्मूढतमकृतत्वात्संन्यासस्य तदपेक्षया परमेश्वरमाराध्याहं तरिष्यामीतीश्वरार्पणबुद्ध्या निरभिमानिना मुमुक्षुणा क्रियमाणत्वात्कर्म ज्याय इत्युपचर्यते नतु संन्यासो दूष्यते किंतु विद्वत्संन्यासाद्विविदिषासंन्यासाद्विलक्षणः संन्यासः स्वस्थेन न कर्तव्य इत्युच्यते तत्र विध्यभावाद्यत आत्मतत्त्वमज्ञात्वैव केवलमूढेनाविविदिषुणा कर्मसंन्यासः कृतश्चेत्तेन प्रत्यवाय एकोऽनर्थः नरकपातो द्वितीयः दुर्योनिस्तृतीयः मोक्षाभावश्चतुर्थः कृते तु कर्मणि प्रत्यवायाभावः ईश्वरप्रसादश्चित्तशुद्धिर्ज्ञानं मोक्षश्च सिध्यत्यतः फलभूयस्त्वात्कर्मणस्त्वं नियतं विध्युक्तं कर्म नित्यं वा नैमित्तिकं वेश्वरप्रीत्यर्थं चित्तशुद्ध्यर्थं च कुर्वित्यर्थः। न केवलमामुष्मिकार्थमेव कर्म कर्तव्यं भवति किंत्वैहिकार्थमपि कर्तव्यमित्याह—**शरीरेति** । निश्चलात्मना स्थाणुवत्तूष्णीमवस्थानं खल्वकर्म कर्मसंन्यासस्तस्मादकर्मणो निःशेषकर्मपरित्यागात्ते शरीरयात्रापि न प्रसिध्येत् सुखेन न सिध्यतीत्यर्थः। नहि बृहच्छिलावद्गुहायां कन्दरे वा तूष्णीं तिष्ठतः शरीरयात्रा सिध्यति यत्किंचित्तदनुकूलव्यापारं विना ततस्तदर्थमपि कर्म कर्तव्यमेव । ननु यावता कर्मणा शरीरपरित्राणं सिध्येत्तावत्कर्म कुर्यां न ततोऽतिरिक्तमिति चेत्तत एव भवानतिमूढः संन्यासानर्हश्च भवति यतः स्वेतरस्यैवाऽनात्मनो देहस्य रक्षणं कर्तुमिच्छति नत्वात्मनः तवायमात्मा जननमरणप्रवाहे पतित्वा मुहुर्मुहुर्निमज्जन्नुन्मज्जन्निरन्तरदुःखेन क्लिश्नाति त्वमात्मनस्त्राणमकृत्वा अनात्मनः शत्रोरेव त्राणाय यतस इतोऽपि वा दुरभिमानं त्यक्त्वा कर्मणा शरीरत्राणमत्यन्तास्थया यथा करोषि तथा विहितानि कर्माण्यनुष्ठाय तेन प्राप्तचित्तशुद्ध्याऽऽत्मज्ञानमपरोक्षलक्षणं संपाद्यात्मानं दुःखसागरादुद्धर 'उद्धरेदात्मनात्मानम्' इतिवचनादात्मनो मोक्षार्थमेव कर्म कुरु न कचिदप्यन्यार्थमित्यर्थः ॥ ८ ॥

श्री० टी०—यस्मादेवं तस्मात्—**नियतमिति** । नियतं नित्यं सन्ध्योपासनादि कर्म कुरु हि यस्माद-कर्मणः कर्माकरणात्सकाशात्कर्म ज्यायः अधिकतरम् । अन्यथाऽकर्मणः सर्वकर्मशून्यस्य तव शरीरनिर्वाहोऽपि न भवेत् ॥ ८ ॥

स० टी०—यस्मादेवं ततो बुद्ध्या धीन्द्रियाणि निगृह्य वै ॥ फलसंबन्धशून्यं यद्विहितं विधिनैव तत् ॥ १ ॥ नियतं कर्म नित्यं त्वं श्रौतं स्मार्तं समाचर ॥ अशुद्धबुद्धेः कर्मैवाकरणादधिकं यतः ॥ २ ॥ न सिद्ध्येन्मनसः शुद्धिः कर्माभावेन केवलम् ॥ किंतु स्वधर्मशून्यस्य देहस्थितिरपीहते ॥ ३ ॥ नैव सिद्ध्येत्प्रकर्षेण ततः कर्म समाचर ॥ ४ ॥ ८ ॥

भा० टी—यत एवमतो नियतं स्ववर्णाश्रमोचितं नित्यं कर्म त्वं फलाभिसन्धिरहितः कुरु हि यस्माद-करणात् चित्तशोधकं कर्म श्रेष्ठं न केवलमकरणाच्चित्तशुद्ध्यभाव एव किंतु शरीरयात्रापि शरीरस्थितिरपि च ते प्रकर्षेण स्वधर्मवृत्त्या न सिद्ध्येदकर्मणः ॥ ८ ॥

प० टी०—एवं वेदविहितं कर्म द्विविधमुपन्यस्तमेकमिहामुत्रफलभोगजनकमपरं नैष्कर्म्यजनकं तयोरुभयोर्यद्रोचते तत्कार्यं परं तूभयशून्यत्वं मा भजेत्याह—**नियतमिति** । नियतमकरणे प्रत्यवायजनकं संध्योपासनादि कुरु । हि यस्मात् कारणादकर्मणः कर्माकरणात्सकाशात्कर्म ज्यायः श्रेष्ठम् । कुत इत्याह—**अकर्मण इति** । कर्मशून्यत्वात्ते शरीरयात्रापि न प्रसिध्येत् पुनरेतादृशशरीरप्राप्तिर्न भवेदधमयोनिप्राप्तौ सर्वमपि नश्यतीत्यर्थः ॥ ८ ॥

रा० टी०—ततः किमित्यत आह—**नियतमिति** । हि यस्मादकर्मणः कर्माकरणात्कर्मानुष्ठानं ज्यायः प्रशस्ततममतो नियतं वर्णाश्रमोचितं कर्म कुरु । किंचाकर्मणः कर्माकुर्वतस्ते तव शरीरयात्रापि देहनिर्वाहोपि न प्रसिद्ध्येदित्यर्थः ॥ ८ ॥

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ॥
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

त० टी०—ननु " ज्ञात्वा देवं मुच्यते सर्वपाशैः," इति श्रुतेः, 'कर्मणा बध्यते जन्तुः' इति स्मृतेश्च सर्वकर्मणो बन्धकत्वाभिधानात्कथं मां तत्रैव प्रवर्तयसीति विवक्षुं मत्वाऽऽह—यज्ञार्थादिति । यज्ञो विष्णुः " यज्ञो वै विष्णुः " इति श्रुतेः तदर्थं तदाराधनं तदाज्ञापालनात्मकं यत्कर्म ततोऽन्यत्र कर्मणि प्रवृत्तोऽयं लोकः कर्माधिकारी जनः कर्मबन्धनः कर्मैव बन्धनं यस्य स तथा कर्मणा बध्यते इत्यर्थः । अतस्तदर्थं विष्णुप्रीत्यर्थं कर्म हे कौन्तेय मुक्तसङ्गः फलसंकल्परहितः सन् सम्यग्विधिश्रद्धापूर्वकमाचर ॥ ९ ॥

म० टी०—'कर्मणा बध्यते जन्तुः ' इति स्मृतेः सर्वं कर्म बन्धात्मकत्वान्मुमुक्षुणा न कर्तव्यमिति मत्वा तस्योत्तरमाह—**यज्ञार्थादिति** । यज्ञः परमेश्वरः " यज्ञो वै विष्णुः " इति श्रुतेः । तदाराधनार्थं यत्क्रियते कर्म तद्यज्ञार्थं तस्मात्कर्मणोन्यत्र कर्माणि प्रवृत्तोऽयं लोकः कर्माधिकारी कर्मबन्धनः कर्मणा बध्यते नत्वीश्वराराधनार्थेन अतस्तदर्थं कर्म हे कौन्तेय त्वं कर्मण्यधिकृतो मुक्तसङ्गः सन् समाचार सम्यक् श्रद्धादि-पुरस्सरमाचर ॥ ९ ॥

शं० टी०—ननु 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते' इति कर्मणां बन्धहेतुत्वस्मरणात्कथं बन्धकं कर्म कर्तुं शक्यते इत्याशङ्कायां न, काम्यस्यैव कर्मणो बन्धकत्वं नत्वीश्वरार्पणबुद्ध्या क्रियमाणस्येत्याह—**यज्ञार्थादिति** । " यज्ञो वै विष्णुः " इतिश्रवणाद्यज्ञस्य श्रीविष्णोः परमेश्वरस्यार्थं संतुष्टिनिमित्तं यत्कर्म क्रियते

वैदिकं तद्यज्ञार्थमित्युच्यते तस्माद्यज्ञार्थात्कर्मणो नित्यादीश्वरप्रीतिहेतोरन्यत्र काम्यादौ कर्मण्ययं लोकोऽधिकारी ब्राह्मणादिः कर्मबन्धनः कर्मैवबन्धनं जन्मादेर्निबन्धनं हेतुर्यस्य स कर्मबन्धनो भवति विहिताकरणेन वा काम्येन निषिद्धेन वा कृतेन कर्मणा नरो बन्धवान् भवति नत्वीश्वरप्रीत्यै क्रियमाणेन कर्मणा। ‘ तत्कर्म यन्न बन्धाय’ इति स्मरणादीश्वराराधनात्मकमेव कर्माऽबन्धकं तदन्यत्तु बन्धकमित्यर्थः । ततस्तदर्थमीश्वरप्रीत्यर्थं चाऽवश्यं त्वं मुक्तसङ्गः फलाभिसन्धिरहितो भूत्वा विहितं कर्म समाचर सम्यगनुतिष्ठ तेन तुष्टेश्वरप्रसादात् शुद्धात्मा सन् ज्ञानं प्राप्य मुक्तो भविष्यसीत्यर्थः ॥ ९ ॥

श्री० टी०—सांख्यास्तु सर्वमपि कर्म बन्धकत्वान्न कार्यमित्याहुस्तन्निराकुर्वन्नाह—**यज्ञार्थादिति** । यज्ञोऽत्र विष्णुः “ यज्ञो वै विष्णुः ” इति श्रुतेस्तदाराधनार्थात्कर्मणोऽन्यत्र तदेकं विनाऽयं लोकः कर्मबन्धनः कर्मभिर्बध्यते नत्वीश्वराराधनार्थेन कर्मणा अतस्तदर्थं विष्णुप्रीत्यर्थं मुक्तसङ्गो निष्कामः सन्कर्म सम्यगाचर ॥ ९ ॥

स० टी०—कर्मणा बध्यते जन्तुरिति स्मृत्या मुमुक्षुणा ॥ बन्धकत्वात्कथं कर्म कर्तव्यमिति चेच्छृणु ॥ १ ॥ यज्ञो वै विष्णुरित्युक्तस्तदाराधनहेतुकम् ॥ यत्कर्म क्रियते तस्मात्प्रवृत्तोऽन्यत्र कर्मणि ॥२॥ कर्माधिकार्ययं लोकः कर्मणा बध्यते तदा ॥ नेश्वराराधनार्थेन बध्यतेऽतस्तदर्थकम् ॥ ३ ॥ कर्मण्यधिकृतः संस्त्वं फलसङ्गविवर्जितः ॥ सम्यक् श्रद्धादिना कर्म कौन्तेय कुरु शास्त्रतः ॥ ४ ॥ ९ ॥

भा० टी०—ननु ‘ कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ’ इतिस्मृत्या यच्च मन्यसे बन्धार्थत्वात्कर्म न कर्तव्यमिति तदप्यसदित्याह—यज्ञेति यज्ञार्थात् ईश्वरार्थात् “ यज्ञो वै विष्णुः ” इतिश्रुतेः कर्मणोऽन्यत्रान्येन कर्मणाऽयं लोकः कर्म बन्धनं यस्य सः ये त्वन्यत्र कर्मणि प्रवृत्तोऽयं लोकः कर्मणा बध्यत इति भाष्यविरुद्धं वर्णयन्ति तैः प्रवृत्तपदाध्याहारदोषः कर्मण्यनुशासनाभावाद्बहुलग्रहणस्यागतिकगतित्वात् ल्युडनुपपत्तिदोषो बहुव्रीह्यभावेन पुलिङ्गानुपपत्तिदोषश्च परिहरणीयः । तस्मात्कर्मफलासङ्गवर्जितः सन् यज्ञार्थं कर्म समाचर कौन्तेयेति संबोधयन् स्वपक्षग्रहण उत्साहयति ॥ ९ ॥

प० टी०—अथ सांख्याः सर्वमपि कर्म बन्धकत्वान्न कार्यमित्याहुस्तन्निषेधयाति—**यज्ञार्थादिति** । “ यज्ञो वै विष्णुः ” इत्यादि श्रुतेः यज्ञो विष्णुः स एवार्थः प्रयोजनं यस्य तद्यज्ञार्थात्परमेश्वरार्पणत्वेन कृतात्कर्मणः सकाशादन्यत्र बन्धके कर्माणि कर्मैव बन्धनं यस्य स कर्मबन्धनो लोको जनः सज्जतेऽत एव मुक्तसङ्गस्त्यक्तफलाभिसंधिः सन् ॥ ९ ॥

रा० टी०—‘कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः’ इतिस्मृतेर्मुक्तिप्रतिबन्धकत्वात्कर्म न कार्यमिति प्राग्विकल्पितं तृतीयं पक्षं निराह—**यज्ञार्थादिति** । यज्ञो विष्णुः “ यज्ञो वै विष्णुः ” इति श्रुतेः । तदर्थात् । यद्वा जानातीति ज्ञः । इगुपधज्ञाप्रीकिरः कः । स्वपरगताशेषविशेषज्ञत्वात् । ज्ञो विष्णुः येनोद्देशेन यातो विषयीकृतः स उद्देशो यज्ञः विष्णुविषयोद्देशार्थात्कर्मणोऽन्यत्र विष्ण्वन्यविषये विष्णूद्देशादन्योद्देशविषये वा। अयं लोको जनः कर्मबन्धनः। “ कृत्यल्युटो बहुलम् ” इति कर्तरि ल्युट् । कर्म बन्धनं बन्धकं यस्य स कर्मबन्धनः। अवैष्णवकर्मैव प्रतिबन्धकं न वैष्णवं कर्म। कर्मणेतिस्मृतौ कर्मपदमवैष्णवकर्मपरं नतु कर्ममात्रपरम् । अत एव प्राक् ‘ न हि कश्चित् ’ इति श्लोके कर्मणेति स्मृतिबलात्कर्ममात्रं न करोमीति त्वया वक्तुमशक्यम् । स्मृतौ कर्मपदस्य संकोचस्त्वयाप्यभ्युपेय इति भावे नाकर्मकृत्कोऽपि नास्ति । सदा भगवदादिप्रेरितः किंचित्कर्म कुर्वन्नेव सर्वोप्यास्ते इत्यसंकुचितवृत्तित्वे बाधकमुक्तम् । तथा शरीरयात्रापीत्यत्रापि देहनिर्वाहाभावो बाधक उक्तः । अतस्तदर्थं भगवत्पूजार्थं मुक्तसङ्गः फलकामनाहीनः सन्कर्म समाचर कुर्विति ॥ ९ ॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ॥
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥

त० टी०—एवं मुमुक्षुणा ज्ञानलाभाय विष्णुप्रीत्यर्थं तदाराधनात्मकं निष्कामकर्म कर्तव्यमित्युक्तमिदानीं विष्ण्वाराधनरूपं कर्म स्वभक्तायैवोपदिशामि, नतु सर्वजनेभ्यः। यतोमद्भक्तेतरे सर्वे जनाः सृष्टिवृद्धये प्रजापतिना विष्णिवतरदेवताऽऽराधने काम्ये कर्मणि नियुक्ता इति ज्ञापनाय प्रजाः प्रति तन्नियोगमाह—**सहयज्ञा इति** चतुर्भिः। सहयज्ञा यज्ञसाधनद्रव्यक्रियाकलापसहिताः प्रजाः ब्राह्मणादित्रिवर्णान् पुरा सर्गकाले कल्पादौ सृष्ट्वा प्रजापतिर्ब्रह्मोवाच। किं? तदाह—अनेन यज्ञेन यथावर्णाश्रमोचित-विधिश्रद्धायुक्तेन प्रसविष्यध्वं प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः। अनेन कथं वृद्धिः स्यादत आह—एष यज्ञो वो युष्माकमिष्टकामधुगस्तु। इष्टानभीष्टान्कामान्दोग्धीति तथा ऐहिकामु-ष्मिकाभीष्टभोगप्रदोऽस्त्वित्यर्थः। इहेत्थं काम्यकर्मणि नियोगः प्रलोभनं चोक्तसङ्गत्यैव संगच्छते। अन्यथा 'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते, असक्तः स विशिष्यते, मुक्तसङ्गः समाचर' इति प्रकृतनिष्कामकर्मोपदेशविरोधात्। 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः' इत्यादिवक्ष्यमाणात्मरतस्य कर्मनिरपेक्षत्वोक्तेरनासक्त्या चरतो मोक्षफलोक्तेर्जनकादिनिदर्शनाच्चासङ्गतं स्यादित्यलं विस्तरेण ॥१०॥

म० टी०—प्रजापतिवचनादप्यधिकृतेन कर्म कर्तव्यमित्याह—**सहयज्ञा** इत्यादिचतुर्भिः। सह यज्ञेन विहितकर्मकलापेन वर्तन्त इति सहयज्ञाः कर्माधिकृता इति यावत् "वोपसर्जनस्य" इति पक्षे सादेशा-भावः। प्रजाः त्रीन् वर्णान् पुरा कल्पादौ सृष्ट्वोवाच प्रजानां पतिः स्रष्टा। किमुवाचेत्याह—**अनेनेति**। **अनेन यज्ञेन** स्वाश्रमोचितधर्मेण प्रसविष्यध्वं प्रसूयध्वं प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः। **कथमनेन** वृद्धिः स्यादत आह—एष यज्ञाख्यो धर्मः वो युष्माकम् इष्टकामधुक् इष्टानभिमतान् कामान् काम्यानि फलानि दोग्धि प्रापयतीति तथा अभीष्टभोगप्रदोऽस्त्वित्यर्थः। अत्र यद्यपि यज्ञग्रहणमावश्यककर्मो-पलक्षणार्थम् अकरणे प्रत्यवायस्याग्रे कथनात् काम्यकर्मणां च प्रकृते प्रस्तावो नास्त्येव 'मा कर्मफलहेतुर्भूः' इत्यनेन निराकृतत्वात् तथापि नित्यकर्मणामप्यानुषङ्गिकफलसद्भावात् 'एष वोऽस्त्विष्टकामधुक्' इत्यु-पपद्यते। तथाचापस्तम्बः स्मरति तद्यथा 'आम्रे फलार्थे निमिते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नो चेदनूत्पद्यन्ते न धर्महानिर्भवति' इति फलसद्भावेऽपि तदभिसन्ध्यनभिस-न्धिभ्यां काम्यनित्ययोर्विशेषः। अनभिसंहितस्यापि वस्तुस्वभावादुत्पत्तौ न विशेषः। विस्तरेण चाग्रे प्रतिपादयिष्यते ॥ १० ॥

शं० टी०—पूर्वं नैष्कर्म्यसिद्धये मिथ्याचारत्वनिवृत्तये शरीरयात्रासिद्धये चावश्यं कर्म कर्तव्यमि-त्युक्त्वा इदानीं धर्मज्ञसमयः प्रमाणमिति सूत्रोक्तरीत्या धर्मज्ञतमेन ब्रह्मणा प्रोक्तः प्रामाणिकोऽयं परमो धर्मो मुमुक्षूणामवश्यं कर्तव्य इन्द्रादिदेवताप्रसादसिद्धय इत्याह—**सहयज्ञा इति** द्वाभ्याम्। पुरा सृष्ट्यादौ प्रजा-पतिर्ब्रह्मा श्रुत्युक्तैर्यज्ञैः सह प्रजा ब्राह्मणादिवर्णान् सृष्ट्वा ताः प्रजा उवाच यूयमनेन यज्ञेन श्रौतेन स्मार्तेन च प्रसविष्यध्वं चरुपुरोडाशादिद्रव्यैर्देवानां प्रीतिमुत्पादयध्वम्। एष देवानुद्दिश्य श्रद्धया कृतो यज्ञोऽपि व इष्टानिच्छाया विषयभूतान् काम्यन्त इति कामाः फलविशेषास्तान् दोग्धीतीष्टकामधुक् भवतु। निष्कामानां ज्ञानप्रतिबन्धकदुरितक्षयाय सकामानां स्वर्गसुखाय भवेदित्यभिप्रायः ॥ १० ॥

श्री० टी०—प्रजापतिवचनादपि कर्मकर्तैव श्रेष्ठ इत्याह—**सहयज्ञा इति** चतुर्भिः। यज्ञेन सह वर्तन्त

इति सहयज्ञाः यज्ञाधिकृता ब्राह्मणाद्याः प्रजाः पुरा सर्गादौ सृष्ट्वा ब्रह्मा इदमुवाच—अनेन यज्ञेन प्रसविष्यध्वं प्रसूयध्वम् प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः । तत्र हेतुः एष यज्ञः वो युष्माकम् इष्टकामधुक् इष्टान् कामान्दोग्धीति तथा अभीष्टभोगप्रदोऽस्त्वित्यर्थः । अत्र च यज्ञग्रहणमावश्यककर्मोपलक्षणार्थम् काम्यकर्मप्रशंसा तु प्रकरणेऽसङ्गतापि सामान्यतोऽकर्मणः कर्म श्रेष्ठमित्येतदर्थेत्यदोषः ॥ १० ॥

स० टी०—प्रजापतिगिराप्येवं कर्म कर्तव्यमादरात् ॥ सृष्ट्वा कर्मकलापेन सह वर्णत्रयात्मिकाः ॥ १ ॥ प्रजाः स्रष्टा स कल्पादावुवाचाधिकृतान् जनान् ॥ स्वाश्रमोचितधर्मेणाभिवृद्धिं ह्युत्तरोत्तरम् ॥ २ ॥ लभध्वं यूयमेतस्मात्कुरुध्वं यज्ञमादरात् ॥ युष्माकमेष यज्ञोऽस्तु सर्वाभीष्टफलप्रदः ॥ ३ ॥ यद्यप्यावश्यकं कर्म यज्ञशब्देन लक्ष्यते ॥ निन्दितत्वान्न चात्रास्ति प्रस्तावः काम्यकर्मणाम् ॥ ४ ॥ तथापि फलसद्भावो नित्यानामपि कर्मणाम् ॥ आनुषङ्गिक एवोक्त एष वोऽस्त्विष्टकामधुक् ॥ ५ ॥ १० ॥

भा० टी०—इतश्च हेतोरधिकृतेन कर्म कर्तव्यं प्रजापतिर्ब्रह्मा सर्गादौ यज्ञसहिताः त्रैवर्णिकाः प्रजाः सृष्ट्वोवाचानेन यज्ञेन कर्मणा प्रसविष्यध्वं वृद्धिं लभध्वमुत्पत्तिं कुरुध्वम् वृद्ध्यादिहेतुत्वमस्यास्तीत्याह—एष यज्ञो वो युष्माकमभिप्रेतभोगप्रदो भवतु ॥ १० ॥

प० टी०—एवमनुष्ठेयरहस्यमुक्त्वाधुना कर्मनिबन्धनानां लोकानां ब्रह्मवाक्योक्तां गतिं दर्शयति—**सहयज्ञा इति** । पुरा सृष्ट्यादौ प्रजापतिर्ब्रह्मा यज्ञेन सह वर्तन्ते ताः सहयज्ञास्तदधिकारिण्यः प्रजा ब्राह्मणादयः सृष्ट्वा निर्मायेत्युवाच तत्किं भो प्रजा अनेन यज्ञेन कृत्वा यूयं प्रसविष्यध्वं पुत्रपौत्राद्युत्तरोत्तराभिवृद्धिं भजध्वम् । तत्र हेतुः—एष यज्ञो वो युष्माकमिष्टकामधुगभीष्टभोगप्रदोऽस्तु ॥ १० ॥

रा० टी०—वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुतिनिन्दापरकृतिपुराकल्परूपार्थवादं चाह—**सहेत्यादिचतुर्भिः** श्लोकैः । यज्ञैः सह वर्तन्त इति सहयज्ञाः ब्राह्मणादिप्रजाः पुरा सर्गादौ सृष्ट्वा प्रजापतिरुवाच । किमुवाचेत्यत आह—**अनेनेत्यादिना** कारणादित्यन्तेन । हे प्रजाः अनेन यज्ञेन यूयं प्रसविष्यध्वम् । इष्टकामानिति शेषः । स्वस्वाभिमतपुमर्थान्संपादयत । एष यज्ञः वो युष्माकमिष्टकामधुक् कामा भोगास्तान्दोग्धीति कामधुक् इच्छाविषयभोगप्रदोऽस्तु ॥ १० ॥

देवान्भावयतानेन ते देवा भावयन्तु वः ॥
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

त० टी०—कथमयमिष्टकामधुक् स्यादित्यपेक्षायामाह—देवानिति । अनेन यज्ञेन यूयं देवानिन्द्रादीन्भावयत हविर्भागैर्वर्द्धयत । ते देवा वर्धिताः सन्तो वो युष्मान्भावयन्तु वृष्ट्याऽन्नोत्पत्तिद्वारेण धनसन्ततिदानेन वर्द्धयन्तु । एवं परस्परमन्योन्यं भावयन्तो यूयं देवाश्च परं श्रेयोऽभिमतार्थं प्राप्स्यथ॥ ११॥

म० टी०—कथमिष्टकामदोग्धृत्वं यज्ञस्येति तदाह—अनेन यज्ञेन यूयं यजमाना देवानिन्द्रादीन् भावयत हविर्भागैः संवर्धयत तर्पयतेत्यर्थः । ते देवा युष्माभिर्भाविताः सन्तो वो युष्मान् भावयन्तु वृष्ट्यादिना अन्नोत्पत्तिद्वारेण संवर्धयन्तु । एवमन्योन्यं संवर्धयन्तो देवाश्च यूयं च परं श्रेयोऽभिमतमर्थं प्राप्स्यथ देवास्तृप्तिं प्राप्स्यन्ति यूयं च स्वर्गाख्यं परं श्रेयः प्राप्स्यथेत्यर्थः ॥ ११ ॥

शं० टी०—कथमयं यज्ञोऽस्माकमिष्टार्थाय भवतीत्यत आह—**देवानिति** । अनेन यज्ञेन श्रौतेन स्मार्तेन च यूयं देवानिन्द्रादीन भावयत संभावयत चरुपुरोडाशादिभिः संतुष्टान् कुरुतेत्यर्थः । अनेन संभाविताः तुष्टाः सन्तस्ते देवा इन्द्रादयो वः युष्मान् भावयन्तु इष्टार्थप्रदानेन संभावयन्तु । एवं परस्परं भावयन्तः

सन्तो यूयं देवानां प्रसादेन निःशेषविनष्टप्रतिबन्धा भूत्वा सत्त्वशुद्ध्या सम्यग्ज्ञानं प्राप्य परं निरतिशयानन्दलक्षणं श्रेयो विदेहकैवल्यमवाप्स्यथ । यद्यप्यत्र परस्परं भावयन्तः श्रेयः परमवाप्स्यथेत्युभयेषां परश्रेयःप्राप्तिविधिः प्रतीयते तथापि विचार्यमाणे प्रजानामेव धर्मोपदेशविषयत्वेनोक्तधर्मानुष्ठानलभ्यपरमश्रेयःप्राप्तिविधिर्न तु तदनुग्राहकाणां देवानां तेषामुपदेशाविषयत्वात्स्वयंप्रभातविज्ञानत्वाज्जीवन्मुक्तत्वाच्च न श्रेयोविधिरुपयुज्यते, ततः संभावनायामेव परस्परपदस्य संबन्धो न तु परमश्रेयःप्राप्तिविधाविति ज्ञेयम् ॥ ११ ॥

श्री० टी०—कथमिष्टकामदोग्धा यज्ञो भवेदित्यत्राह—**देवानिति** । अनेन यज्ञेन यूयं देवान् भावयत हविर्भागैः संवर्धयत ते च देवा वो युष्मान्संवर्धयन्तु वृष्ट्यादिनाऽन्नोत्पत्तिद्वारेण । एवमन्योन्यं संवर्धयन्तो देवाश्च यूयं परस्परं श्रेयोऽभीष्टमर्थं प्राप्स्यथ ॥ ११ ॥

स० टी०—कामदोग्धृत्वमप्याह यज्ञस्य भगवानिति ॥ यजमानतया यूयं देवानिन्द्रमुखान्सदा ॥ १ ॥ तर्पयध्वं हविर्भागैर्यज्ञेनानेन शाश्वतः ॥ युष्माभिस्तर्पिता देवा युष्मान्वृष्ट्यादिभिर्हितैः ॥ २ ॥ संवर्धयन्तु यूयं ते देवाश्चैवं परस्परम् ॥ संवर्धयन्तः सततं प्राप्स्यथाभिमतं फलम् ॥ ३ ॥ प्राप्स्यान्ति देवतास्तृप्तिं यूयं स्वर्गफलं तथा ॥ ४ ॥ ११ ॥

भा० टी०—कथमित्याकाङ्क्षायामाह—**देवानिति** । अनेन यज्ञेन देवानिन्द्रादीन् वर्धयत । ते वृष्ट्यादिद्वाराऽन्नदानेन युष्मान् वर्धयन्तु । एवं परस्परं वर्धयन्तोऽभीष्टं परं परलोके स्वर्गादिकमवाप्स्यथ ॥ ११ ॥

प० टी०—अथ भोगप्रदत्वे हेतुमाह—**देवानिति** । भो प्रजा अनेन यज्ञेन देवान् भावयत संवर्धयत । अथ संतुष्टास्ते देवा वो युष्मान् भावयन्तु फलदानैः कृत्वा संवर्धयन्तु । एवं परस्परभावनेन परमुत्कृष्टं श्रेयोऽभीष्टमर्थं प्राप्स्यथ ॥ ११ ॥

रा० टी०—कथमिष्टकामदोग्धृत्वं यज्ञस्येत्यत आह—**देवानिति** । हे प्रजा अनेन यज्ञेन यूयं देवान् भावयत संभावयत हविर्भिस्तर्पयत । ते हविरादिभिस्तृप्ता देवा वो युष्मान् भावयन्तु इष्टकामदानेन तर्पयन्तु । एवमन्योन्यं भावयन्तो देवाश्च यूयं च परं श्रेयो मोक्षाख्यमवाप्स्यथ ॥ ११ ॥

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ॥
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

त० टी०—उक्तार्थं दृढीकुर्वंस्तस्याकर्तुर्दोषमाह—**इष्टानिति** । यज्ञैर्भाविता देवा युष्मभ्यमिष्टान्भोगान्हि निश्चितं दास्यन्ते । यस्तैर्देवैर्दत्तान्भोगानेभ्यो देवेभ्योऽप्रदाय बलिवैश्वदेवाग्निहोत्राद्यकरणेनादत्त्वा यो भुंक्ते स स्तेन एव, स चौरवद्दण्ड्य इति भावः ॥ १२ ॥

म० टी०—न केवलं पारत्रिकमेव फलं यज्ञात् किन्त्वैहिकमपीत्याह—**इष्टानिति** । अभिलषितान् भोगान् पश्वन्नहिरण्यादीन् वो युष्मभ्यं देवा दास्यन्ते वितरिष्यन्ति हि यस्मात् यज्ञैर्भावितास्तोषितास्ते यस्मात्तैर्ऋणवद्भवद्भ्यो दत्ता भोगास्तस्मात्तैर्देवैर्दत्तान्भोगानेभ्यो देवेभ्योऽप्रदाय यज्ञेषु देवोद्देशेनाहुतीरसंपाद्य यो भुङ्क्ते देहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवस्वापहारी, देवर्णानपाकरणात् ॥ १२ ॥

शं० टी०—यज्ञैः संभाविता देवा मुमुक्षूणां न केवलमामुष्मिकमेव सुखं प्रयच्छन्ति किंतु ऐहिकसंपत्सुखमप्यऽतस्तेषां प्रीत्यै यज्ञाद्यवश्यं कर्तव्यमन्यथा प्रत्यवायी भवतीति सूचयितुमाह—**इष्टानिति** । यज्ञैः श्रौतैः स्मार्तैश्च भाविताः संभाविता देवा वो युष्मभ्यमिष्टानिच्छाविषयभूतान् भोगान् पशुपुत्रकलत्रधनधान्यादीन् दास्यन्ते वितरिष्यन्ति एवं तैर्देवैर्दत्तान् पदार्थान् पुनश्चरुपुरोडाशादिरूपेणैभ्यो देवेभ्योऽप्रदायाऽदत्त्वा

देवानामृषीणां पितॄणां च यज्ञेन ब्रह्मचर्येण प्रजया चाऽनृण्यमकृत्वा यः स्वशरीरमेव पोष्टुं भुङ्क्ते स स्तेनो देवादीनां चोर एव भवति शिष्टाना निन्द्यश्च देवब्रह्मस्वहारिणस्तस्करस्य या गतिस्तां च गच्छतीत्यर्थः ॥१२॥

श्री० टी०—एतदेव स्पष्टीकुर्वन्कर्माकरणे दोषमाह—**इष्टानिति** । यज्ञैर्भाविताः सन्तो देवा वृष्ट्यादिद्वारेण वः युष्मभ्यं भोगान् दास्यन्ति हि अतो देवैर्दत्तानन्नादीनेभ्यो देवेभ्यः पञ्चयज्ञादिभिरदत्त्वा यो भुङ्क्ते स तु स्तनश्चोर एव ज्ञेयः ॥ १२ ॥

स० टी०—न केवलं परत्रैव फलं किंत्वैहिकानपि ॥ हिरण्यपशुधान्यादीन्देवा भोगांश्च वाञ्छितान् ॥ १ ॥ वितरिष्यन्ति युष्मभ्यं यज्ञैस्ते तोषिता यतः ॥ भोगास्तैर्ऋणवद्दत्ता भवद्भ्यश्च यतोऽमरैः ॥ २ ॥ तस्माद्देवैः प्रदत्तांस्तान्भोगानेभ्योऽध्वरेषु च ॥ असंपाद्याहुतीर्देवोद्देशेनात्मम्भरिस्तु यः ॥ ३ ॥ देहप्राणेन्द्रियाण्येव तर्पयत्येष तस्करः ॥ देवर्णमनपाकृत्य देवस्वापहरोऽधमः ॥ ४ ॥ १२ ॥

भा० टी०—किंच ते देवा यज्ञैर्वर्धिता वो युष्मभ्यमिष्टान् भोगान् स्त्रीपुत्रपशुस्वर्णादीन् दास्यन्ते वितरिष्यन्ति यस्तु तैर्देवैर्दत्तान् भोगानेभ्योदेवेभ्योऽदत्त्वाऽऽनृण्यमकृत्वा स्वदेहादीन्येव तर्पयति स तस्कर एव देवादिस्वापहारी ॥ १२ ॥

प० टी०—एवं फलनिश्चयं निरूपयन्नकरणे दोषमाह—**इष्टानिति** । यज्ञभाविता देवा वो युष्माकमिष्टान् भोगान् दास्यन्ति । अथ देवदत्तैर्भोगैः प्रमत्तत्वेन कर्मत्यागपरान्निन्दति—**तैरिति** । तैर्देवैर्दत्तानन्नादिभोगानेभ्यो देवेभ्योऽप्रदायादत्वा यो भुङ्क्ते स स्तेनश्चोर एव ज्ञेयः ॥ १२ ॥

रा० टी०—एतदेव स्पष्टयितुं कर्माकरणे दोषमाह—**इष्टानिति** । यज्ञैर्भाविता देवा वो युष्मभ्यम् इष्टान् भोगान्दास्यन्ति । तैर्देवैर्दत्तानन्नादीन्तेभ्यो यज्ञादिभिरप्रदाय यो भुङ्क्ते सः स्तेन एव चोर एव ॥ १२ ॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ॥
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

त० टी०—तस्माद्देवार्चानुभोजिनो निर्दोषा इत्याह—**यज्ञशिष्टाशिन इति** । यज्ञशिष्टं देवर्षिभूताद्यर्चनाख्यपञ्चमहायज्ञावशिष्टमन्नं येऽश्नन्ति, ते सन्तः सदाचाराः सर्वकिल्बिषैर्विहिताकरणाविहितकरणजैः स्वर्गप्रतिबन्धकैः पञ्चसूनोद्भवैर्मुच्यन्ते । पञ्च यज्ञास्तु 'पाठोहोमश्चातिथीनां सपर्या तर्पणं बलिः । अमी पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः' इत्युक्ताः । पञ्च सूनाश्च 'कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विदन्ति ॥ पञ्चसूनाकृतं पापं पञ्चयज्ञैर्व्यपोहति' इति स्मृत्युक्ताः । ये त्वात्मकारणाद् आत्मनः स्वस्य भोजनार्थं पचन्ति, नतु देवाद्यर्थं, ते पापाः पापाचारा अघं पञ्चसूनानिमित्तं विध्युपेक्षादिनिमित्तं च पापं भुञ्जते प्राप्नुवन्ति ॥

म० टी०—**यज्ञशिष्टाशिन इति** । ये तु वैश्वदेवादियज्ञावशिष्टममृतमश्नन्ति ते सन्तः शिष्टा वेदोक्तकारित्वेन देवाद्यृणापाकरणात् । अतस्ते मुच्यन्ते सर्वैर्विहिताकरणनिमित्तैः पूर्वकृतैश्च पञ्चसूनानिमित्तैः किल्बिषैः । भूतभाविपातकाऽसंसर्गिणस्ते भवन्तीत्यर्थः । एवमन्वये भूतभाविपापाभावमुक्त्वा व्यतिरेके दोषमाह--**भुञ्जत इति** । भुञ्जते ते वैश्वदेवाद्यकारिणोऽघं पापमेव । तुशब्दोऽवधारणे । ये पापाः पञ्चसूनानिमित्तं प्रमादकृतहिंसानिमित्तं च कृतपापाः सन्त आत्मकारणादेव पचन्ति नतु वैश्वदेवाद्यर्थम् । तथा च पञ्चसूनादिकृतपापे विद्यमान एव वैश्वदेवादिनित्यकर्माकरणनिमित्तमपरं पापमाप्नुवन्तीति भुञ्जते त्वघं पापा इत्युक्तम् । तथा च स्मृतिः 'कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति' 'पञ्चसूनाकृतं पापं पञ्च यज्ञैर्व्यपोहति' इति च । श्रुतिश्च "इदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्याव-

र्तते मिश्रं ह्येतत्" इति । मन्त्रवर्णोपि "मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति नो सखायम् । केवलाघो भवति केवलादी " इति इदं चोपलक्षणं पञ्चमहायज्ञानां स्मार्तानांश्रौतानां च नित्यकर्मणाम् अधिकृतेन नित्यानि कर्माण्यवश्यमनुष्ठेयानीति च प्रजापतिवचनार्थः ।। १३ ।।

शं० टी०—ये तु पञ्चमहायज्ञान् कृत्वाऽवशिष्टान्नाऽशिनो भवन्ति ते सर्वपापैर्मुक्ता भवन्ति ये तु देवतातिथ्यादीननुद्दिश्य स्वार्थमेव पचन्ति ते पापाशिन एवेति पञ्चमहायज्ञानुष्ठानाननुष्ठानयोः फलं प्रतिपादयति । पञ्चमहायज्ञानां दैनंदिनत्वेनावश्यकर्तव्यत्वदाढर्याय—**यज्ञशिष्टाशिन इति** । ब्राह्मणा यज्ञशिष्टाशिनः सन्तो देवयज्ञः पितृयज्ञ इतिश्रुत्युक्तपञ्चमहायज्ञाननुष्ठाय तच्छेषान्नभोजिनो भूत्वा सर्वकिल्विषैः ' कण्डनी पेषणी चुल्ली चोदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य वध्यते यास्तु वाहयन् ' इति स्मृत्युक्तानि यानि बुद्धिपूर्वकं पाणिपादपातोत्पन्नानि यान्यवशेन प्राप्तानि तैरेतैः सर्वैः किल्विषैर्मुच्यन्ते तेषां मोकाच्चित्तशुद्धिस्तया ज्ञानं मुक्तिं च विन्दन्तीत्यर्थः । पञ्चमहायज्ञानकुर्वाणाः पापा ये ब्राह्मणा आत्मकारणात्स्वोदरपूर्तिहेतोरेव पचन्ति शूद्रवन्न देवार्थं वैश्वदेवार्थं पचन्ति देवेभ्यः ब्राह्मणेभ्यश्चाऽदत्वा स्वयमेव भुञ्जते च ते तु पापमेवान्नरूपेण स्थितं भुञ्जते न त्वन्नं स्वदृष्टया तदन्नमिव भाति शास्त्रदृष्ट्या देवतादृष्ट्या च पापमेव भवति त एव पापिष्ठतमा इत्यर्थः । तथाच श्रुतिः " मोघमन्नं विन्दते अप्रचेताः । केवलाघो भवति केवलादी " इति ' एकाक्रिया द्व्यर्थकरी बभूव ' इतिन्यायेन मुमुक्षुणा श्रोत्रियेण क्रियमाणं कर्म सत्त्वशुद्धिद्वारा स्वस्य मोक्षहेतुर्भवति वृष्टयादिद्वारा जगत्स्थितिहेतुश्च भवत्यत उभयथापि कर्म कर्तव्यमेव ।। १३ ।।

श्री० टी०—अतश्च यजन्त एव श्रेष्ठा नेतर इत्याह—**यज्ञशिष्टाशिन इति** । वैश्वदेवादियज्ञावशिष्टं येऽश्नन्ति ते पञ्चसूनाकृतैः सर्वैः किल्विषैर्मुच्यन्ते । पञ्च सूनाश्च स्मृतावुक्ताः ' कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी ।। पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ' इति । ये त्वात्मनो भोजनार्थमेवान्नं पचन्ति नतु वैश्वदेवाद्यर्थं ते पापाः दुराचाराः अघमेव भुञ्जते ।। १३ ।।

स० टी०—वैश्वदेवादियज्ञानामवशिष्टं सदामृतम् ।। येऽश्नन्ति शिष्टा वेदोक्तकारित्वेनैव तेऽनृणाः ।।१।। पञ्चसूनानिमित्तैश्च प्राकृतैः किल्बिषैरपि ।। नित्याकरणजैस्तेऽतो मुच्यन्ते सर्वकिल्बिषैः ।। २ ।। सन्त्यसंसर्गिणस्तैस्तैर्भूतैरागामिभिर्मलैः ।। ये तु नैवं प्रकुर्वन्ति तान्प्रत्याहातिदूषणम् ।। ३ ।। भुञ्जते पापमेवाघा वैश्वदेवाद्यकारिणः ।। पञ्चसूनानिमित्तं च प्रमादादिनिबन्धनम् ।। ४ ।। पापं कृत्वा पचन्त्यात्मकारणादेव येऽधमाः ।। प्राचीने सत्यघे चान्यं प्रयान्त्यकरणात्कृतोः ।। ५ ।। अतोऽघं भुञ्जते पापास्तथोक्तं स्मृतिकर्तृभिः ।। कण्डनी पेषणी चुल्ली उदकुम्भी प्रमार्जनी ।। ६ ।। पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ।। पञ्चसूनाकृतं पापं पञ्चयज्ञैर्व्यपोहति ।। ७ ।। ब्रह्मदेवमनुष्याणां पितृणां भूतसंज्ञिनाम् ।। यज्ञाः सन्ति जपो होमो दानं च तर्पणं बलिः ।। ८ ।। अनुष्ठेयानि कर्माणि कर्मण्यधिकृतैर्जनैः ।। प्रजापतिगिरामर्थः समाप्तोऽयं यथातथम् ।। ९ ।। १३ ।।

भा० टी०—ये पुनर्यज्ञान् ' ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च । भूतयज्ञो नृयज्ञश्च पञ्चयज्ञाः प्रकीर्तिताः ।। अध्यापनमध्ययनं चाद्यः, होमो द्वितीयः, तर्पणं श्राद्धं च तृतीयः, भूतेभ्यो बलिप्रदानं चतुर्थः, अतिथिपूजनं पञ्चमः, इत्युक्तान्कृत्वा तच्छिष्टममृतमशितुं शीलं येषां ते सन्तः सर्वपापैः ' कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य वर्तन्तेऽहरहः सदा ' इति स्मृत्युक्तेः पञ्चसूनाकृतैरन्यैश्च मुच्यन्ते । ये त्वन्ये आत्मकारणात्स्वोदरपूरणार्थं न तु वैश्वदेवाद्यर्थं पाकं कुर्वन्ति ते तु पापं भुञ्जते । तुशब्दः पूर्वेभ्यो वैलक्षण्यार्थः । अवधारणं तु ' सर्वं वाक्यं सावधारणम् ' इति न्यायलब्धम् । एतेन तुशब्दोऽवधारण इत्याचार्यविरुद्धोक्तिः प्रत्युक्ता ।। १३ ।।

प० टी०—अथ साधून् स्तौति—यज्ञशिष्टाशिन इति । वैश्वदेवादियज्ञावशिष्टं येऽश्नन्त्यत एव साधवस्तेपि दैनंदिनैः पञ्चसूनादिसर्वकिल्बिषैर्मुच्यन्ते । अथ ये पापाः पातकिनः पुरुषा आत्मकारणात् केवलं पिण्डपोषणार्थं पचन्ति पाकं कुर्वन्ति तेऽघमेव भुञ्जते । ऋक्शाखीया श्रुतिरपि—"मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति नो सखायं । केवलाघो भवति केवलादी " इति । भाष्यम्—न प्रकृष्टं चेतो यस्यासावप्रचेताः मूर्खो मोघं निष्फलमन्नं विन्दते संपादयति । स तस्य वधइद्वध एवात्मघातक एवेत्यर्थः । स कः यो वैश्वदेवेनार्यमणं सूर्यं न पुष्यति न संतर्पयति । रात्रौ च सखायमुपकारकमग्निं न संतर्पयति । एवं यः केवलमत्तीति केवलादी पिण्डपोषणार्थमेव भक्षयति स केवलाघो भवति पापमेव भक्षयतीति सत्यं ब्रवीमि न वैश्वदेवार्थवादमित्यर्थः । शतपथेऽपि—" न स पाप्मनो व्यावर्तते " इति ॥ १३ ॥

रा० टी०—एवमयजतो विनिन्द्य यजतः स्तौति—यज्ञेति । विष्णुतदितरदेवाराधनावशिष्टभोजिनः सन्तः सर्वकिल्बिषैः पापैर्मुच्यन्ते । यद्वा वैश्वदेवादियज्ञावशिष्टभोजिनः सन्तः सर्वकिल्बिषैः 'कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति ' इत्युक्तपञ्चसूनाकृतदोषैर्मुच्यन्त इत्यर्थः । पुनरयजतो निन्दति—भुञ्जत इति । आत्मकारणात्स्वार्थमेव ये पचन्ति ते पापाः अघमेव भुञ्जते अघनिमित्तमेव भुञ्जते तद्भोजनं पापहेतुरेवेत्यर्थः । इति प्रजापतिरुवाचेति इतिशब्दो योज्यः ॥ १३ ॥

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ॥
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

न० टी०—एवं जगत्प्रवृत्त्यधिकारिणः कर्मकरणाकरणयोर्हेतुना गुणदोषौ दर्शयित्वा पुनस्तस्यैव कर्माकरणे हेत्वन्तरेण दोषमाह—अन्नादिति त्रिभिः । भुक्तादन्नाद्रजोरेतोरूपेण परिणतानि सजीवानि शरीराणि भवन्ति उत्पद्यन्ते । पर्जन्याद् वृष्टेरन्नस्य संभवः प्रसिद्धः । पर्जन्यो यज्ञाद्भवतीति शास्त्रेण ज्ञायते । यज्ञश्च समिदाज्यादिद्रव्यस्य मन्त्रपुरःसरमग्नौ प्रक्षेपणादिरूपकर्तृव्यापाररूपात्कर्मणः समुद्भवति। इति सर्वं विलोमेनाह मनुः ' अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठति । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' इति ॥ १४ ॥

म० टी०—न केवलं प्रजापतिवचनादेव कर्म कर्तव्यमपि तु जगच्चक्रप्रवृत्तिहेतुत्वादपीत्याह—**अन्नादिति** त्रिभिः । अन्नाद्भुक्ताद्रेतोलोहितरूपेण परिणताद्भूतानि प्राणिशरीराणि भवन्ति जायन्ते । अन्नस्य संभवो जन्म अन्नसंभवः पर्जन्याद् वृष्टेः प्रत्यक्षसिद्धमेवैतत् । अत्र कर्मोपयोगमाह—**यज्ञादिति** । यज्ञात्कारीर्यादेरग्निहोत्रादेश्चापूर्वाख्याद्धर्माद्भवति पर्जन्यः । यथा चाग्निहोत्राहुतेर्वृष्टिजनकत्वं तथा व्याख्यातमष्टाध्यायीकाण्डे जनकयाज्ञवल्क्यसंवादरूपायां षट्प्रश्न्याम् । मनुना चोक्तम् ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' इति । स च यज्ञो धर्माख्यः सूक्ष्मः कर्मसमुद्भवः ऋत्विग्यजमानव्यापारसाध्यः । यज्ञस्य हि अपूर्वस्य विहितं कर्म कारणम् ॥ १४ ॥

शं० टी०—' मुच्यन्ते सर्वकिल्बिषैः ' इति ' नैष्कर्म्यं पुरुषोऽश्नुते ' इति कर्मणो मोक्षहेतुत्वं प्रतिपादितं जगत्स्थितिहेतुत्वमिदानीं निरूप्यते—अन्नादिति त्रयेण । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' इति स्मृत्युक्तप्रक्रियया यज्ञाच्छ्रोत्रियेण यथाशास्त्रं निर्वर्तितात्पर्जन्यो वृष्टिर्भवति, पर्जन्याद्व्रीहियवादिरूपस्य अन्नस्य संभव उत्पत्तिर्भवति, अन्नात्स्त्रीपुंसाभ्यां भुक्ताच्छुक्रशोणितरूपेण परिणताद्भूतानि प्राणिनो भवन्ति जायन्ते, जातान्यन्नेनैव जीवन्ति च । एवं वृष्टयन्नद्वारा जगज्जीवनहेतुर्यो यज्ञः स तु कर्मसमुद्भवः ऋत्विग्यजमानादिभिः क्रियमाणहोममन्त्रतन्त्रादिक्रिया वैदिकी कर्मेत्युच्यते तस्मात्सम्यगुद्भवोऽयस्य स कर्मसमुद्भवोऽपूर्वलक्षणो यज्ञः ॥ १४ ॥

श्री० टी०—जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म कर्तव्यमित्याह—**अन्नादिति** त्रिभिः । अन्नाच्छुक्रशोणितरूपेण परिणताद्भूतान्युत्पद्यन्ते । अन्नस्य च संभवः पर्जन्याद्वृष्टेः । स च पर्जन्यो यज्ञाद्भवति । स च यज्ञः कर्मसमुद्भवः कर्मणा यजमानादिव्यापारेण सम्यङ्निष्पद्यत इत्यर्थः । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मृतेः ॥ १४ ॥

स० टी०—न केवलं विधेर्वाक्यादेव कर्तव्यमास्ति तत् ॥ कर्म किंतु जगच्चक्रप्रवृत्तेः कारणादपि ॥१॥ शुक्रशोणितरूपेण ह्यन्नात्परिणतात्किल ॥ शरीराणि प्रजायन्ते वृष्टेरन्नस्य जन्म च ॥ २ ॥ यज्ञाद्धर्मादपूर्वाख्याज्जायते वृष्टिरर्कतः ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ ३ ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ सूक्ष्मो यज्ञः स धर्माख्य ऋत्विगादेश्च कर्मणः ॥ ४ ॥ अपूर्वाख्यस्य यज्ञस्य विहितं कर्म कारणम् ॥ ५ ॥ १४ ॥

भा० टी०—जगच्चक्रप्रवृत्तिहेतुत्वादप्यधिकृतेन कर्म कर्तव्यमित्याह—**अन्नादिति** । अन्नाद्भुक्ताद्रेतआदिरूपेण परिणताद्भूतानि प्राणिशरीराणि भवन्ति । पर्जन्याद्वृष्टेरन्नस्य संभव उत्पत्तिर्यज्ञादपूर्वात्पर्जन्यो भवति। तदुक्तम् " अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः " इति । यज्ञः कर्मणः ऋत्विग्यजमानव्यापारात्समुद्भवो यस्य सः ॥ १४ ॥

प० टी०—अथ विश्वोपकारार्थमपि कर्म कर्तव्यमित्याह—**अन्नादिति** । अन्नाद्रेतोरूपेण परिणताद्भूतानि भवन्ति । अत्र भवन्तीत्यनेन अन्नादेव जीवन्ति वर्धन्त इत्यपि ज्ञेयम् । श्रुतिरपि ब्रह्मवल्ल्याम्—"अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते जातान्यन्नेन वर्धन्ते " इत्यादिः । अथान्नं कस्मात् पर्जन्यात्, स च यज्ञात् पर्जन्येप्सितः, यज्ञश्च कस्मात्स च कर्मसमुद्भवः । कर्म यजमानस्य सदर्थव्यापारः ॥ १४ ॥

रा० टी०—वर्णाश्रमोचितकर्मणः सर्वथा कर्तव्यत्वे स्तुत्याद्यात्मकार्थवादं चतुर्भिरुक्त्वा अधुना जगच्चक्रप्रवर्तकत्वरूपं हेत्वन्तरं विपक्षेऽनर्थोक्त्याह—**अन्नादित्यादित्रिभिः**श्लोकैः । अन्नाद्भूतानि भवन्ति रेतोद्वारा प्राणिन उत्पद्यन्ते । पर्जन्यादादित्यादन्नसंभवः वृष्टिद्वारा अन्नस्योत्पत्तिः । पर्जन्यो मेघचक्राभिमानी आदित्यः यज्ञाद्भवति । यज्ञशब्दोऽत्राज्यादिहविःपरः । यजमानदत्तेनाज्यादिहविषामुपभोजनेनादित्यस्य बलाद्युपचयान्निमित्तादुपचारेण ' यज्ञाद्भवति पर्जन्यः ' इत्युच्यते । यद्वा पर्जन्यशब्देनादित्याभिमन्यमानं मेघचक्रमेव लक्षणया वा 'जननात्परसस्यादेः पर्जन्यो मेघसन्ततिः ' इतिस्मृत्युक्तयोगवृत्त्या वा ग्राह्यम् । तच्च यज्ञाद्भवति हविर्भागेन परितुष्टादादित्यादुत्पद्यते ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः' इत्यादेः वृष्टिर्वार्षिकमेघचक्रं जायत इत्यर्थः । यज्ञो देवतोद्देशेन द्रव्यत्यागरूपो ज्योतिष्टोमादिः कर्मसमुद्भवस्तदङ्गक्रिययोत्पद्यते ॥ १४ ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ॥
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

त० टी०—यज्ञहेतुभूतं कर्म ब्रह्मोद्भवं विद्धि । अत्र ब्रह्मशब्देन प्रकृतिपरिणामरूपं शरीरं विवक्षितम् " तदेतद् ब्रह्म नाम रूपमन्नं च जायते " इति श्रुतौ ब्रह्मशब्देन प्रकृतिर्निर्दिष्टा । इहापि चतुर्दशाध्याये वक्ष्यते'मम योनिर्महद्ब्रह्म ' इति अतो ब्रह्मशब्दनिर्दिष्टप्रकृतिपरिणामरूपशरीरोद्भवं कर्मेति युक्तम् ' कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ' इति प्रकृतेः कर्महेतुत्वेन वक्ष्यमाणत्वात् । तच्च शरीररूपेणैव संभवति । ब्रह्म उक्तस्वरूपमक्षरसमुद्भवम् । अत्राक्षरशब्देन पुरुषक्षेत्रज्ञादिशब्दवाच्यो

जीवात्मोच्यते 'कूटस्थोऽक्षर उच्यते' इति वक्ष्यमाणत्वात्। तेनाधिष्ठितं शरीररूपं प्रकृत्याख्यं ब्रह्म भुक्तान्नपानादिना पुष्ट्या लब्धसामर्थ्यं सत्कर्मोत्पादने योग्यं भवति। कार्योत्पादनयोग्यतैव समुद्भवशब्देनाभिहिता, अतो ब्रह्माक्षरसमुद्भवमित्युक्तं, प्रकृतिरपि क्षेत्रज्ञाधिष्ठितैव कार्योत्पादने समर्था, न केवला। तथा चोक्तं विष्णुपुराणे 'गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने। गुणव्यञ्जनसंभूतः सर्गकाले द्विजोत्तम' इति यस्मादक्षरशब्दवाच्यं जीवाधिष्ठितं शरीरात्मना परिणतं प्रकृत्याख्यं ब्रह्म यज्ञहेतुभूतकर्मोत्पादकं तस्मात्सर्वगतं यज्ञादिकर्मसु सर्वाधिकारे गतं प्राप्तम्, न तेन विना यज्ञप्रवृत्तिर्भवेदिति भावः। अत एव नित्यं यज्ञे प्रतिष्ठितं यजमानहोत्रादिशरीरं नित्यं यज्ञे प्रतिष्ठितं, प्रकर्षेण स्थितं पूजितं वेत्यर्थः॥ १५॥

म० टी०—कर्मेति। तच्चापूर्वोत्पादकं ब्रह्मोद्भवं ब्रह्म वेदः स एवोद्भवः प्रमाणं यस्य तत्तथा। वेदविहितमेव कर्माऽपूर्वसाधनं जानीहि, न त्वन्यत्पाषण्डप्रतिपादितमित्यर्थः। ननु पाषण्डशास्त्रापेक्षया वेदस्य किं वैलक्षण्यं यतो वेदप्रतिपादित एव धर्मो नान्य इत्यत आह--ब्रह्म वेदाख्यमक्षरसमुद्भवमक्षरात्परमात्मनो निर्दोषात्पुरुषनिश्वासन्यायेनाबुद्धिपूर्वं समुद्भव आविर्भावो यस्य तदक्षरसमुद्भवं तथा चापौरुषेयत्वेन निरस्तसमस्तदोषासङ्गवेदवाक्यं प्रमितिजनकतया प्रमाणमतीन्द्रियेऽर्थे न तु भ्रमप्रमादकरणापाटवविप्रलिप्सादिदोषवत्प्रणीतं पाषण्डवाक्यं प्रमितिजनकमिति भावः। तथाच श्रुतिः "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानि" इति। तस्मात्साक्षात्परमात्मसमुद्भवतया सर्वगतं सर्वप्रकाशकं नित्यमविनाशि च ब्रह्म वेदाख्यं यज्ञे धर्माख्येऽतीन्द्रिये प्रतिष्ठितं तात्पर्येण। अतः पाषण्डप्रतिपादितोपधर्मपरित्यागेन वेदबोधित एव धर्मोऽनुष्ठेय इत्यर्थः॥ १५॥

शं० टी०—कर्मेति। यज्ञकारणभूतं यत्कर्म तत्तु ब्रह्मोद्भवं ब्रह्म वेद ऋगादिस्तस्मादुत्पन्नं विद्धि। तच्च ब्रह्माक्षरसमुद्भवं विद्धि "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इति श्रवणात्सर्वजगत्कारणभूतादक्षरात्परमात्मनः सकाशान्निःश्वासरूपेण स्वयमेवाविर्भूतमत एव नित्यमपौरुषेयं ब्रह्म वेदं विजानीहीत्यर्थः। यस्माद्यज्ञैकमूलाज्जगदुत्पत्तिः स्थितिश्च तस्मात्स्वयं सर्वगतं सर्वार्थप्रकाशकत्वेन सर्वलोकस्थानां तत्तद्धर्मानियतिस्थापकत्वेन च सर्वत्र स्थितमपि ब्रह्म वेदो यज्ञे ब्राह्मणादिभिरनुष्ठेये औपासनाद्यश्वमेधान्ते कर्मण्येव तद्विधानैकप्रयोजनत्वात्प्रतिष्ठितं नित्यं नियमेन स्थितं भवति, वर्णाश्रमिणां कर्तव्यत्वेन कर्माणि वेद एव विदधातीत्यर्थः॥ १५॥

श्री० टी०—तथा—कर्म ब्रह्मोद्भवमिति। तच्च यजमानादिव्यापाररूपं कर्म ब्रह्मोद्भवं विद्धि ब्रह्म वेदस्तस्मात्प्रवृत्तं जानीहि। तच्च ब्रह्म वेदाख्यमक्षरात्परब्रह्मणः समुद्भूतं विद्धि "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः" इति श्रुतेः। यत एवमक्षरादेव यज्ञप्रवृत्तेरत्यन्तं तस्याभिप्रेतो यज्ञस्तस्मात्सर्वगतमप्यक्षरं ब्रह्म नित्यं सर्वदा यज्ञे प्रतिष्ठितं यज्ञेनोपायभूतेन प्राप्यत इति यज्ञे प्रतिष्ठितमुच्यते 'उद्यमस्था सदा लक्ष्मीः' इतिवत्। यद्वा यस्माज्जगच्चक्रमूलं कर्म तस्मात्सर्वगतं मन्त्रार्थवादैः सर्वेषु सिद्धार्थप्रतिपादकेषु भूतार्थाख्यानादिषु गतं स्थितमपि वेदाख्यं ब्रह्म सर्वदा यज्ञे च तात्पर्यरूपेण प्रतिष्ठितम्, अतो यज्ञादि कर्म कर्तव्यमित्यर्थः॥ १५॥

स० टी०—वेदप्रमाणकं कर्मापूर्वस्योत्पादकं भवेत्॥ नतु पाषण्डसंसिद्धं धर्मस्योत्पादकं भवेत्॥ १॥ ननु पाषण्डशास्त्रात्किं वैलक्षण्यं श्रुतेर्यतः॥ श्रुतिप्रमाणको धर्मो नान्योऽस्तीति शृणूत्तरम्॥ २॥ आविर्भावोऽपि वेदस्य ह्यक्षरात्परमात्मनः॥ तथा चापौरुषेयत्वान्निरस्ताखिलसंशयः॥ ३॥ अर्थे ह्यतीन्द्रिये

वेदः प्रमाणं स्वत एव सः ॥ ननु प्रमादमायादिदोषवद्रचितं हि तत् ॥ ४ ॥ पाषण्डवाक्यं प्रामाण्यजनकं स्यादतीन्द्रिये ॥ तस्मात्साक्षात्परब्रह्महेतुत्वात्सर्वभासकम् ॥ ५ ॥ अविनाशि च वेदाख्यं ब्रह्मयज्ञे प्रतिष्ठितम् ॥ अतोऽप्यतीन्द्रियो धर्मोऽनुष्ठेयो वेदबोधितः ॥ ६ ॥ त्यक्त्वोपधर्मं पाषण्डबोधितं सर्वथा जनैः ॥ ७ ॥ १५ ॥

भा० टी०—कर्म ब्रह्म वेद उद्भवः कारणं यस्य तज्जानीहि । ब्रह्म वेदाख्यमक्षरः परमात्मा समुद्भवः कारणं यस्य तत् "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः" इत्यादिश्रुतेः । यस्मादेवं तस्मात्सर्वार्थप्रकाशकत्वात् सर्वगतमपि सद्वेदाख्यं ब्रह्म नित्यं सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितम् यत्त्वक्षरं ब्रह्म सर्वदा यज्ञे प्रतिष्ठितं यज्ञेनोपायभूतेन प्राप्यत इत्यपरेषां व्याख्यानं तदरुचिग्रस्तम्, अरुचिबीजं तु पूर्वार्धस्थब्रह्मपदद्वयस्य वेदपरत्वेनात्रान्यपरत्वे 'वेदो वा प्रायदर्शनात्' इतिन्यायविरोधादि ॥ १५ ॥

प० टी०—कर्म च ब्रह्मोद्भवं ब्रह्म मन्त्रात्मकं वाग् ब्रह्म वेदस्तस्मात् । अथ वेदोऽपि कस्मादित्याह--अक्षरेति । न क्षरतीत्यक्षरं वैराजं ब्रह्म तस्मादुद्भूतः । श्रुतिरपि शातपथी--"यथाग्नेरभ्याहतस्य पृथग्धूमा विनिश्चरन्त्यरेऽस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वः" इत्यादिः । भाष्यम्--यथावदभित आहतस्य नान्तःप्रविष्टस्यार्द्रैधोऽग्नेरार्द्रं यदेधः काष्ठं तत्रत्याग्नेः पृथग्भूता नानाकारा धूमा विनिश्चरन्ति, अरे मैत्रेयि तद्वदस्य महतो भूतस्य महाभूतारब्धस्य वैराजब्रह्मणो निःश्वसितं निःश्वासरूपमेतद्यदृग्वेद इत्यादि । ननु सर्वज्ञोपि ब्रह्मा मुख्यां कर्मणो गतिमपहाय गौणीं किमुपदिष्टवानित्याशङ्कयोपसंहारे परमप्रयोजनमपि दर्शयन्नाह—तस्मादिति । तस्मात् कारणात् सर्वगतमिन्द्रसूर्यादिसर्वदेवेष्वन्तर्यामित्वेन स्थितं ब्रह्म नित्यमनश्वरफलरूपं यज्ञे प्रतिष्ठितं प्रतिष्ठां प्राप्तं यज्ञोपायेनैव लभ्यम् "यज्ञेन यज्ञमयजन्त देवाः" इति श्रुतेः । अथानश्वरफलदत्वे श्रुतिरप्यग्निरहस्ये—"स य आत्मानमेव लोकमुपास्ते नेहास्य कर्म क्षीयते" इत्यादिः ॥ १५ ॥

रा० टी०—कर्म ब्रह्मोद्भवं परब्रह्मजन्यं विद्धि जानीहि । ब्रह्म परब्रह्म चाक्षरसमुद्भवं अक्षरशब्दितवेदाभिव्यङ्ग्यम् । वेदेन यथावदवगतमेव ब्रह्म सत्कर्म कारयतीति भावः । तानि चाक्षराणि भूतव्यङ्ग्यानीति शेषोक्त्या चक्रं ध्येयम् । तस्मादुक्तपरम्परया यज्ञाभिव्यङ्ग्यत्वात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितमित्युच्यते । एवं च भगवतो यज्ञे प्रतिष्ठितत्वात् यज्ञानुष्ठानेन चक्रप्रवृत्तौ भूतस्थितिहेतुत्वनिमित्तसुकृतमिव भगवदभिव्यक्तिनिमित्तं च सुकृतं भवतीति भावः ॥ १५ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ॥
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

त० टी०—एतेन किं निर्दिष्टमित्यत आह—एवमिति । अयं भावः परमेश्वरेणादौ सृष्टिकाले स्वस्मिन् लीनानां जीवानां तत्तत्कर्मफलभोगसिद्धये स्वांशभूतजीवानुप्रवेशेन प्रकृतिपरिणामद्वारा नामरूपविभागं कृत्वा, चतुर्मुखद्वारेण ब्राह्मणादीनुत्पाद्य सृष्टिवृद्ध्यर्थं तेभ्योऽन्नादिभोगं प्रदर्श्य, ततो ब्राह्मणादीनां यज्ञादिकर्मोत्पादनसामर्थ्यं, ततः कर्मोत्पत्तिस्ततो यज्ञसंभवस्ततो वृष्टिस्ततः पुनरन्नोत्पत्तिस्ततः सजीवानि शरीराणीत्येवं प्रकारेणेश्वरेण प्रवर्तितं जगच्चक्रमिह जगति कर्माधिकारे वर्तमानो यः स्वाधिकारानुसारं नानुवर्तयति, यज्ञादिकर्मणा सृष्टिं न वर्धयति सोऽघायुरघार्थमेवायुर्यस्य स तथाभूतो भवति । यतः इन्द्रियारामः इन्द्रियप्रीतयेऽयज्ञशिष्टान्नवर्धितदेहत्वेन देवपित्रतिथिवञ्चकः पापवर्धक एवेत्यर्थः । हे पार्थ स पुरुषो मोघं वृथैव जीवति तज्जीवनान्मरणं श्रेय इति भावः ॥

म० टी०—भवत्वेवं ततः किं फलितमित्याह—**एवमिति** । आदौ परमेश्वरात्सर्वावभासकान्नित्यनिर्दोषवेदाविर्भावस्ततः कर्मपरिज्ञानं ततोनुष्ठानाद्धर्मोत्पादस्ततःपर्जन्यस्ततोऽन्नं ततो भूतानि पुनस्तथैव भूतानां कर्मप्रवृत्तिरित्येवं परमेश्वरेणैव प्रवर्तितं चक्रं सर्वजगन्निर्वाहकं यो नानुवर्तयति नानुतिष्ठति सोऽघायुः पापजीविनो मोघं व्यर्थमेव जीवति,हे पार्थ!तस्य जीवनान्मरणमेव वरं जन्मान्तरे धर्मानुष्ठानसंभवादित्यर्थः । तथाच श्रुतिः"अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत् पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोकः" इति । ब्रह्मविदं व्यावर्तयति—**इन्द्रियाराम** इति । यत इन्द्रियैर्विषयेष्वारमति अतः कर्माधिकारी संस्तदकरणात्पापमेवाचिन्वन् व्यर्थमेव जीवतीत्यभिप्रायः ॥ १६ ॥

शं० टी०—**एवमिति** । ईश्वरः श्रुतिमुखेन यज्ञसन्ततिं विधाय यज्ञद्वारा वृष्टिं चान्नं च संभाव्य भूतसृष्टिं तत्स्थितिं च निर्वोढुमिच्छया स्वयमेवं चक्रं प्रवर्तितवान् । तदिदमीश्वरप्रवर्तितं चक्रं नियतमिह लोके यः कर्माधिकारी ब्राह्मणादिर्नानुवर्तयति परमेश्वरेण श्रुत्या विधायितं कर्मयोगं नानुतिष्ठति एतदीश्वरशासनमकृत्वा स्वयमिन्द्रियाराम इन्द्रियार्थेष्वेव अजस्रमारमतीतीन्द्रियारामो विषयभोगलम्पटः सन्नत एवाघायुरायुषः फलमघमेव यस्य सोऽघायुर्भूत्वा काकवच्छाल्मलिवन्मोघं व्यर्थं निष्फलमेव जीवति नैतावन्मात्रमेव भवति किंत्वीश्वराज्ञोल्लङ्घनदोषेण विहिताकरणप्रत्यवायेन नित्यकृतपापसंघातेन चानेककल्पं नरकं चाधिगच्छतीत्यर्थः । ततो विवेकिनो ब्राह्मणस्य मुमुक्षोरनात्मज्ञस्य तरणार्थं लोकहितार्थं चावश्यं वदोक्तं कर्म कर्तव्यमेवेति सिद्धम् ॥ १६ ॥

श्री० टी०—यस्मादेवं परमेश्वरेणैव भूतानां पुरुषार्थसिद्धये कर्मादिचक्रं प्रवर्तितं तस्मात्तदकुर्वतो वृथैव जीवितमित्याह—**एवमिति** । परमेश्वरवाक्यभूताद्वेदाख्याद्ब्रह्मणः पुरुषाणां कर्मणि वृत्तिस्ततः कर्मनिष्पत्तिस्ततः पर्जन्यस्ततोऽन्नं ततो भूतानि भूतानां च पुनस्तथैव कर्मणि प्रवृत्तिः इत्येवं प्रवर्तितं चक्रं यो नानुवर्तयति नानुष्ठिति स अघायुः अघं पापरूपमायुर्यस्य सः यत इन्द्रियैर्विषयेष्वेव रमति नतु ईश्वराराधनार्थे कर्मणि अतो मोघं व्यर्थं स जीवति ॥ १६ ॥

स० टी०—आदौ सर्वेश्वराद्वेदः कर्मज्ञानं ततो भवेत् ॥ ततोऽधर्मस्ततोनुष्ठानतो वृष्टिस्ततः परम् ॥१॥ अन्नमन्नाच्छरीराणि पुनस्तेषां तथैव च ॥ कर्मप्रवृत्तिरित्येवमीश्वरेण प्रवर्तितम् ॥२॥ जगन्निर्वाहकं चक्रं यो मूढो नानुतिष्ठति ॥ स पापजीवितो व्यर्थमेव जीवति केवलम् ॥ ३ ॥ यतोऽसाविन्द्रियैर्भोगे रमते हि स्वभावतः ॥ स कर्माधिकृतो भूत्वाऽकुर्वन्कर्म प्रयात्यघम् ॥ ४ ॥ १६ ॥

भा० टी०—फलितमाह—एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं य इह लोके कर्माधिकृतो नानुवर्तयति नानुतिष्ठति स अघायुरघं पापमायुर्जीवनं यस्य स इन्द्रियैरारमणं विषयसेवनं यस्य सः व्यर्थं जीवति । त्वया तु जगच्चक्रप्रवर्तकस्य ममानुसरणमवश्यं कर्तव्यमिति द्योतयन्नाह—पार्थेति । तस्मादज्ञेनाधिकृतेन कर्म कर्तव्यमेवेति प्रकरणार्थः ॥ १६ ॥

प० टी०—अथ पर्यवसितमर्थमाह—**एवमिति** । एवमुक्तप्रकारेण प्रवर्तितं प्रवृत्तिरूपेणोपपादितमिहामुष्मिकफलभोगरूपम् । तथा चक्रं चक्रतिर्गतिकर्मा परमगतिरूपमन्नादिकार्यजातस्यात्यन्तिककारणमक्षरं यो नानुवर्तयति तारतम्यभावेन पुनः पुनर्न परिशीलयति ज्ञात्वापि पुनरिन्द्रियसंतर्पणनिमित्तं फलभोगमपेक्षते सोऽघायुरित्यादिवाक्यैर्निन्द्यते । अघायुः पापेच्छावानिन्द्रियारामो विषयसुखलम्पटः ॥ १६ ॥

रा० टी०—एवं पुरातनैः प्रवर्तितं भगवतैव वा प्राणिनामिष्टासिद्धये प्रवर्तितं जगच्चक्रमिहलोके यो नानुवर्तयति कर्म न करोतीति यावत् । विश्वस्य चक्रेऽन्तर्भावात् कर्माकरणेन चक्राप्रवृत्तौ चक्रविनाशकत्वेन विश्वहन्तृत्वात् स अघायुः । तादर्थ्यात्ताच्छब्द्यम् । अघनिमित्तमायुर्यस्य स तथा । इन्द्रियाराम इन्द्रियैर्विषयेषु रतिमान् । हे पार्थ व्यर्थमेव जीवति नरके मज्जतीत्यर्थः । यज्ञदानतपोरूपत्रिविधकर्मणां गृहस्थानामिव ब्रह्मचर्याद्याश्रमत्रयस्यापि विद्यादानाभयदानस्वभोक्तव्यान्नदानस्य च तथाध्ययनप्रवचनध्यानादिरूपवाचिकमानासिकयज्ञस्य तथा कृच्छ्रचान्द्रायणादितपसः सत्त्वेन तेषामपि चक्रप्रवर्तनसंभवो ज्ञेयः । उक्तं हि ' वाचिको मानसो यज्ञो न्यासिनां तु विशेषतः ' इत्यादि ॥ १६ ॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

त० टी०—एवमनादिविषयवासनावतां प्रवृत्त्यधिकारिणां जगच्चक्रप्रवृत्तिहेतुभूते काम्ये कर्मण्यधिकार इति निर्णीतमिदानीं विषयवासनाशून्यस्यात्मनिष्ठस्य तूक्तयज्ञादिकर्माकरणे न कश्चिद्दोषयोग इत्याह—**यस्त्विति** द्वाभ्याम् । तुशब्दः पूर्वोक्तात्सकामान्निष्कामस्य विदुषो महद्वैलक्षण्यं द्योतयति । यो मानवः आत्मरतिः आत्मनि स्वात्मभूते भगवति रतिः प्रीतिर्यस्य, नतु शब्दादिपञ्चेन्द्रियविषयेषु स्त्रीषु वा तथाऽऽत्मना तेनैव तृप्तः पूर्णः, नतु नानाविधभोजनादिना । तथाऽऽत्मन्येव संतुष्ट आत्मस्वरूपगुणाद्यनुभव एव संतुष्टः स्यात्, नतु धनपुत्रपशुक्षेत्रादिलाभे । तस्य तथाभूतस्य कार्यं कर्तव्यं कर्म न विद्यते, न स कर्मनियोगार्ह इत्यर्थः ॥ १७ ॥

म० टी०—यस्त्विन्द्रियारामो न भवति परमार्थदर्शी स एवं जगच्चक्रप्रवृत्तिहेतुभूतं कर्माननुतिष्ठन्नपि न प्रत्यवैति कृतकृत्यत्वादित्याह द्वाभ्याम्—**यस्त्विति**। इन्द्रियारामो हि स्रक्चन्दनवनितादिषु रतिमनुभवति मनोज्ञान्नपानादिषु तृप्तिं पशुपुत्रहिरण्यादिलाभेन रोगाद्यभावेन च तुष्टिम् । उक्तविषयाभावे रागिणामरत्यतृप्त्यतुष्टिदर्शनाद्रतितृप्तितुष्टयो मनोवृत्तिविशेषाः साक्षिसिद्धाः । लब्धपरमात्मानन्दस्तु द्वैतदर्शनाभावादतिफल्गुत्वाच्च विषयसुखं न कामयत इत्युक्तम् 'यावानर्थ उदपाने' इत्यत्र।अतोऽनात्मविषयकरतितृप्तितुष्ट्यभावादात्मानं परमानन्दमद्वयं साक्षात्कुर्वन्नुपचारादेवमुच्यते आत्मरतिरात्मतृप्त आत्मसंतुष्ट इति। तथा च श्रुतिः "आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः" इति। आत्मतृप्तश्चेति चकार एवकारानुकर्षणार्थः । मानव इति यः कश्चिदपि मनुष्य एवंभूतः स एव कृतकृत्यो नतु ब्राह्मणत्वादिप्रकर्षेणेति कथयितुम् । आत्मन्येव च संतुष्ट इत्यत्र चकारः समुच्चयार्थः । य एवंभूतस्तस्याधिकारहेत्वभावात्किमपि कार्यं वैदिकं लौकिकं वा न विद्यते ॥१७॥

शं० टी०—तत्र श्रीभगवान् ' ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ' इति सांख्यानां संन्यासिनामसांख्यानां योगिनां गृहिणां चोत्तरदक्षिणायनवदसंकीर्णं निष्ठाद्वयं विभज्य दर्शयित्वा ' तदेकं वद निश्चित्य ' इति स्वस्य कर्तव्यं पृष्टवतोऽर्जुनस्य कर्माधिकारिणः सान्निहितत्वात्तद्धितमुपदेष्टुं ' न कर्मणामनारम्भात्' इति कर्मयोगमुपक्रम्य 'नियतं कुरु कर्म त्वम्' इत्यस्मै कर्मयोगमेवोपदिश्य 'यज्ञार्थात्' इत्यारभ्य ' मोघं पार्थ स जीवति ' इत्यन्तेन ग्रन्थेनानात्मज्ञस्य मुमुक्षोरवश्यं सत्त्वशुद्ध्यर्थं कर्म कर्तव्यमेवं कृते कर्मणि देवताप्रसाद ईश्वरप्रसादश्च सिध्यतीति सूचयितुं कर्मणः कर्तव्यत्वमेव बहुप्रक्रियया निश्चित्य इदानीं सांख्यस्य यतेर्ज्ञानयोगनिष्ठां विना नान्यत्कथंचिदपीषत्कर्तव्यमस्तीति सूचयितुमाह—**य इति** । तुशब्दोऽनात्मरतिव्यावृत्त्यर्थः । यस्तु मानवः बहिरन्तश्च सर्वत्र ब्रह्मैव मापयति ग्राहयतीति मानं प्रत्यग्दर्शनं तदेव सर्वदा वाति भजतीति मानवो ब्रह्मविद्यतिरात्मरतिः "अहं ब्रह्मास्मि" इति श्रुत्युक्तरीत्या स्वात्मना साक्षा-

त्कृते नित्यानन्दैकरसेऽद्वितीये परे ब्रह्मण्येव रतिरन्तःकरणस्य रमणं क्रीडा सर्वदा विहारो यस्य स आत्मरतिरेव भवेत् "आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः" इति श्रवणाद्यो ब्रह्मवित्सर्वदात्मन्येव विहरति न क्वचिदप्यनात्मनीत्यर्थः । किंचात्मतृप्तश्च आत्मनैवानन्दैकरसेन पूर्णेन स्वीकृत्याधिगतेन तृप्तः 'आत्मलाभान्न परं विद्यते' इति स्मरणादतः प्राप्तव्यान्तराभावादात्मप्राप्त्यैव सर्वत्र प्राप्तालंबुद्धिर्यस्य स आत्मतृप्तश्च भवेत् । आत्मन्येव चक्षुषो रूपवद्बहिरन्तः सर्वत्र वृत्तेर्विषयभूते चिदानन्दैकरसे ब्रह्मण्येव संतुष्टः यथा कामी इष्टार्थे संतुष्टो भवति तथा य आत्मन्येव संतुष्टश्च स्यात् तस्य महात्मन आत्मारामस्य कृतकृत्यस्य यतेः कार्यं कर्तव्यं कर्म न विद्यते नास्ति पर्याप्तकामत्वेन प्राप्तव्याभावात् । नन्वधिकृतत्वाविशेषाद्विदुषोऽपि कर्तव्यमेव वैदिकं कर्म कर्मविधेः सर्वसामान्यात्कर्मशास्त्रतदर्थतन्नियमपरिज्ञातृत्वाद्विदुषः "विद्वान् यजते" इति विशेषविधानाच्च विधिबलाद्विदुषाप्यवश्यं कर्म कर्तव्यमेवेति चेद्भवानत्र प्रष्टव्यः परावरैकत्वविज्ञानवह्निनिर्मूलितद्वैतभ्रमस्य सर्वं ब्रह्मैव पश्यतो जीवन्मुक्तस्य ब्रह्मविदः कर्मकरणं स्वार्थं वा किं परार्थं वा आद्ये कर्मैहिकार्थं वा किमामुष्मिकार्थं वा आद्ये शरीररक्षार्थं वा किं परिग्रहरक्षार्थं वाप्युत विलासार्थम् । नाद्यः 'सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः' इतिवचनाच्छरीरस्थितेः प्रारब्धाधीनत्वात्तदुद्दिश्य विदुषः कर्माऽनुपपत्तेः । न द्वितीयः "एवं वैतमात्मानं विदित्वा" इतिश्रुतेः निःशेषनिवृत्तमिथ्याज्ञानानां ब्रह्मविदां पुत्राद्येषणाभ्यो व्युत्थानश्रवणात्ताभ्य उत्थितवतो विदुषः परिग्रहाभावात्तद्रक्षानिमित्तककर्मानुपपत्तेः । न तृतीयः सर्वमात्मानमेव पश्यत आत्मरतेर्विदुषोऽन्यत्र रत्यप्रसक्तौ विलासासंभवात् । तर्ह्यामुष्मिकार्थमस्त्विति चेत्तत्रापि किं स्वर्गार्थं वा किमपवर्गार्थं किमात्मशुद्ध्यर्थं वा । नाद्यः पर्याप्तकामस्य कृतात्मनस्तु "इहैव सर्वे प्रविलीयन्ति कामाः" इतिसर्वकामप्रविलयश्रवणाद्विदुषः स्वर्गकामासंभवात्तदर्थककर्मानुष्ठानानुपपत्तेः । न द्वितीयः "न कर्मणा न प्रजया" इतिश्रुत्या कर्मणा मोक्षसाधनत्वनिषेधाज्जीवन्मुक्तत्वाच्च विदुषस्तदर्थककर्मासिद्धेः । तृतीये किं शरीरशुद्ध्यर्थं वा किं चित्तशुद्ध्यर्थं वा किमात्मशुद्ध्यर्थं वा कर्म कर्तव्यम् । नाद्यः 'कलेवरं मूत्रपुरीषभाजनम्' इति स्मरणात्प्रत्यक्षत्वाच्च मलमांसास्थिमतो वपुषः कर्मणा शुद्ध्यसंभवात् । न द्वितीयः "यतयः शुद्धसत्त्वाः" इति श्रवणात् शुद्धचित्तत्वादेव सम्यगुत्पन्नात्मज्ञानत्वाद्विदुषस्तच्छुद्ध्यपेक्षाऽसिद्धेः । न तृतीयः "अस्नाविरꣳ शुद्धमपापविद्धम्" इति श्रवणान्निरवयवत्वेनाऽविषयत्वाच्च कर्मणात्मनः शुद्धिकल्पनाऽयोगात् यज्ज्ञानबलेन विष्णुरुद्रादयोऽकार्यशतकोटिमपि कृत्वा स्वयं शुद्ध्यन्त्यन्यानपि च शोधयन्ति तमात्मानं कः केन शोधयेत् स्वत एव सतः शुद्धिर्नासता येन केनचिदित्यात्मनः स्वत एव शुद्धत्वात् । तर्हि विदुषः कर्माचरणं परार्थमेवास्त्विति चेत्त्वमत्र प्रष्टव्यः लोकार्थं यः कर्म करोति स किमपरोक्षज्ञानी उत परोक्षज्ञानी वेति । आद्ये स यतिर्वा गृहस्थो वा । नाद्यः तस्य निरभिमानत्वात्संन्यस्तसर्वकर्मतत्साधनत्वाच्च कर्मशब्दाऽप्रसक्तेः देहवर्णाश्रमादिष्वहं ममेत्यभिमानः प्रपञ्चसत्यत्वबुद्धिरर्थित्वं कर्तव्यताबुद्धिरकरणे प्रत्यवायभयं शास्त्रभयं च खलु प्रवृत्तेर्बीजं तदेतत्सर्वमपि समूलं परावरैकत्वविज्ञानमहाग्निना निर्दह्य स्वयं निष्क्रियब्रह्मात्मना तिष्ठतो निर्दग्धानात्मतादात्म्यग्रन्थेः सर्वात्मभावापन्नस्य स्वात्मारामस्य यतेरतिवदनमेव न संभवति किमुत कर्मणि प्रवृत्तिरिति । तथाच श्रुतिः "प्राणो ह्येष सर्वभूतैर्विभाति । विजानन्विद्वान् भवते नातिवादी" इति । ततो ब्रह्मनिष्ठस्यात्मरतेः स्वार्थं वा परार्थं वा कर्मणि प्रवृत्तिर्न संभवति । नापि द्वितीयः जन्मानेकसहस्रकृतपुण्यकर्मपुञ्जपरिपाकेनेश्वरप्रसादेन च सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं ब्रह्मैवाहमिति ब्रह्मात्मैकत्वविज्ञानमप्रतिबद्धं यदा समुत्पन्नं स्यात्तदैव गृहस्थोपि याज्ञवल्क्यादिवदेषणाभ्यो व्युत्थास्यति नत्वहं ममेति संसर्तुमर्हति तत्कारणासंभवात् । संसारकारणं खल्वनात्मनि देहादावहंभावस्तदन्यत्र ममभावश्च तदेतद्द्वयं यस्य ब्रह्मात्मैकत्वविज्ञानेन विध्वस्तं

न स पुनः संसाराय कल्पते नहि ब्रह्मैवाहमिति विज्ञानं ब्राह्मणोऽहं ममेदमितिबुद्धिश्च तेजस्तिमिरवत्परस्परविरुद्धमेकत्र वस्तुं शक्नोति ततो ब्रह्मतत्त्वविज्ञानखड्गनिर्भिन्नहृदयग्रन्थेर्विदुषः पुनः संसरणं न संभवत्यतः संसाराद्व्युत्तिष्ठत्येव गृह्यपि विद्वान् यदि न व्युत्तिष्ठेत्तद्व्युत्थानमेव ज्ञापयत्यज्ञानतत्कार्यनिगृहीतत्वं विदुषः । ननु तद्धेतुकप्रारब्धाभावाद्गृही ब्रह्मभावापन्नोऽपि नोत्तिष्ठतीति चेज्जडभरतवद्वसेत् न त्वहं ममेदमिति संसरति मिथ्यात्वज्ञानस्य संसारस्य च मिथो विरोधात् नहि मरुं निर्जलं दृष्ट्वा पुनर्दूरात्प्रतीयमानं जलमादातुं पातुं वा विवेकी गच्छति स्वयं बलवता प्रेष्यमाणोऽपि वेगेन हर्षेण च न गच्छति किंतु हा कष्टमिति रुदन् मन्दंमन्दं गच्छति नाप्यन्यं चोदयति तद्वत्प्रतिकूलप्रारब्धवानपि विद्वान् तत्सर्वमिथ्यात्वदर्शी संसर्तुं न हृष्यति नान्यं प्रेषयति च किंतु भग्नकटिसर्पवन्मन्दगतिर्भविष्यति प्रवृत्तिहेतोरनात्मन्यहंभावस्याभावात् ब्रह्मैवाहमिति ब्रह्मात्मना ब्रह्मण्येव तिष्ठतो ब्रह्मविदो ब्राह्मणस्य चाण्डालमिव तनु स्प्रष्टुं न रोचते देहादितादात्म्यं विनाऽहं ममेति व्यवहर्तुं च न शक्यते ब्रह्मविदां देहादितादात्म्यमतीव दुःखं तत्तादात्म्येनाहं ममेति प्रवृत्तिस्ततोऽतिदुःखं तत्रापि कर्मकरणमत्यन्तदुःखमेवेति विज्ञाय गृहस्थोऽपि विद्वान् सर्वं संन्यस्यत्येव न स्वार्थे न परार्थे वा कर्म कर्तुं शक्नोति अतः परोक्षज्ञान्येव चतुर्थाध्याये चात्र च वक्ष्यमाणरीत्या लोकसंग्रहं करिष्यतीति न कश्चिदप्यपरोक्षज्ञानी निःशेषविनष्टानात्माऽहंभावः । ननु ‘ योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ’ इत्यादिवाक्यार्थपर्यालोचनया त्वपरोक्षज्ञानिनोपि लोकसंग्रहार्थं कर्म कर्तव्यमेवेति प्रतीयते कथं परोक्षज्ञान्येव लोकसंग्रहं करिष्यतीति नियमः क्रियते विशुद्धात्मत्वादिविशेषणजातं कथं परोक्षज्ञानिनः सिध्येद्विना ब्रह्मविदं ब्रह्मनिष्ठं मुनिरिति तत्त्वविदिति ब्रह्मविल्लिङ्गदर्शनात्ततोऽपरोक्षज्ञानिनोऽपि लोकसंग्रहार्थं कर्म कर्तव्यमेवेति चेत्सत्यं विशुद्धात्मादिविशेषणजातमितरस्माद्ब्रह्मविदं व्यावर्तयति तदिदं मुक्तिकृतलक्षणं जन्मशतकोट्याप्यन्येषामलभ्यं तथाप्यत्र त्वं प्रष्टव्यः अपरोक्षज्ञानी द्विविधः सिद्धः साधकश्चेति तयोः किं सिद्धस्योच्यते उत साधकस्य वा लोकसंग्रह इति । नाद्यः मुक्तत्वात्तस्य लोकसंग्रहानुपपत्तेः “सर्वमिदमहं च ब्रह्मैव” इति नित्यनिरन्तरब्रह्मनिष्ठया निशितीकृतपरावरैकत्वविज्ञानखड्गेन द्वैतभ्रमबन्धं विच्छिद्य ब्रह्मादिस्तम्बपर्यन्तैः सह सर्वप्राणिभिः स्वं मुक्तं पश्यतो ब्रह्म विद्यतेस्तद्दृष्ट्या बद्धलोकाभावात्तत्संग्रहाऽसंभवात् यथा देवदत्तः सर्वेभ्यः पूर्वं स्वयं भुक्त्वा स्वमेव भुक्तवन्तं पश्यति नान्यं यथा वा यज्ञदत्तः स्वयं पूर्वं प्रतिबुध्य स्वमेव प्रतिबुद्धं पश्यति न तथा विद्वानात्मानमेव मुक्तं पश्यति किंतु स्वविज्ञानेन स्वं च सर्वं च प्राणिजातं मुक्तमेव पश्यति यथा बुद्धिमान् स्वस्य चेतनत्वधर्मवैशिष्ट्यविज्ञानेन ब्रह्माण्डस्थं प्राणिजातं सर्वं चेतनत्वधर्मविशिष्टमेव विजानाति यथा वा पाचकः स्थालीपुलाकस्यैकस्य पक्वताज्ञानेन सर्वस्याप्यन्यस्य पक्वतां विजानाति तथा ब्रह्मविद्यतिः स्वमुक्त्या सर्वान्मुक्तानेव विजानाति नतु स्वमात्रं यस्तु स्वमात्रमेव मुक्तं पश्यति नत्वन्यं न स ब्रह्मविदेव भवति नापि च मुक्तः किंतु स वाचा मुक्तः नत्वविद्याबन्धात् यथा विवेकी सूक्ष्मबुद्ध्या तरङ्गफेनबुद्बुदाद्यम्मयं सर्वं जलमात्रं पश्यति यथा कटकमुकुटादि हैमं सर्वं हेममात्रं पश्यति यथा वा रज्जुसर्पं रज्जुमात्रं पश्यति तथा यस्तु प्रत्यक्दृष्ट्या स्वं च जगत्सर्वं च ब्रह्ममात्रं पश्यति स एव ब्रह्मविद्द्वैतदर्श्यविद्याबन्धविमुक्तश्च तस्यैतस्याद्वैतदर्शिनो महात्मनः सिद्धस्य सुप्तोत्थितवत्स्वातिरिक्तमपश्यतः पूर्णवृत्तेर्ब्रह्मविद्वरिष्ठस्य लोकविधिविधानविधेयादेरभावात्तदुद्देशेन कर्मणि प्रवृत्तिर्न संभवति ‘ कुर्वन्नपि न लिप्यते ’ इतिप्रवृत्तिद्योतकं वाक्यं विद्यते तत्कथमितिचेत्तदर्थं श्लोकव्याख्यानावसरे वक्ष्यामः “ विद्वान्यजते ” इत्यत्र विदितवेदार्थो ब्राह्मणो विद्वच्छब्दार्थो नतु ब्रह्मविद्यतिस्तस्य सर्वकर्मसंन्यासित्वाद्विधेरपि लोकवन्मिथ्यात्वकोट्यन्तःपातित्वाच्च

कर्म विध्यनुपपत्तेः । न द्वितीयः साधकस्य मुमुक्षोर्यतेः कर्मविध्यदर्शनात् नहि मुमुक्षोर्यतेर्निदिध्यासो लोकसंग्रहार्थं कर्म कर्तव्यमिति विधिरस्ति विना समाधिम् "तमेव धीरो विज्ञाय प्रज्ञाम्" इति "परं ब्रह्मानुसंदध्यात्" "यच्छेद्वाङ्मनसी प्राज्ञः" इति "ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति ज्ञाननिष्ठैव कर्तव्यत्वेन श्रूयते स्मर्यते च 'मनः संयम्य मच्चित्तः' इति 'ध्यानयोगपरो नित्यम्' इति 'वाचं यच्छ मनो यच्छ' इति चातःसाधकस्यात्मवेदिनो यतेः कर्तव्यः समाधिरेव न श्रौतं न स्मार्तं च स्वार्थं वा परार्थं वा शौचमाचमनं स्नानं नतु चोदनया चरेदिति ज्ञाननिष्ठस्य विध्यभावस्मरणात् "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुत्या जिज्ञासया संन्यस्तसर्वकर्मणो यतेर्विविदिषोरेव जिज्ञासायां संप्रवृत्तो "नाद्रियेत्कर्मचोदनाम्" इति श्रवणादिज्ञानसाधनं विना नान्यत्कर्तव्यमिति कर्मविधेरुपेक्ष्यत्वस्मरणात्किमुत सिद्धस्य विज्ञातात्मतत्त्वस्य साधकस्य कर्मतन्त्रानवकाश इति अतः परोक्षज्ञान्येव बहुधा कृतश्रवण आभासात्मज्ञान्यहं ममादिबाह्यवासनाबद्धो लोकसंग्रहवचनस्य विषयः अथवा लोकानुग्रहार्थं ब्रह्मणा सृष्टा महान्तो व्यासागस्त्यपराशरवसिष्ठादयस्तत्सदृशा वा अन्ये आधिकारिका निग्रहानुग्रहक्षमास्ते वा भवेयुर्लोकसंग्रहवचनस्य विषयाः नतु सिद्धो नापि च साधको मुमुक्षुर्यतिस्तत एवोच्यते भगवता सर्वज्ञेन—तस्य कार्यं न विद्यते इति ॥ १७ ॥

श्री० टी०—तदेवं न कर्मणामनारम्भान्नैष्कर्म्यमित्यादिनाज्ञस्यान्तःकरणशुद्ध्यर्थं कर्मयोगमुक्त्वा ज्ञानिनः कर्मानुपयोगमाह—**यस्त्विति** द्वाभ्याम् । आत्मन्येव रतिः प्रीतिर्यस्य ततश्चात्मन्येव तृप्तः स्वानन्दानुभवेन निर्वृतः अत एवात्मन्येव संतुष्टो भोगापेक्षारहितो यस्तस्य कर्तव्यं नास्ति ॥ १७ ॥

स० टी०—यस्तु नास्तीन्द्रियारामस्तत्त्वदर्शी स कर्म तत् ॥ अकुर्वन्नपि नैवासौ प्रत्यवैति कथंचन ॥१॥ रतिं यातीन्द्रियारामः स्रग्गन्धवनितादिषु ॥ तृप्तिं यात्यन्नपानादौ तुष्टिं पुत्रादिलाभतः ॥ २ ॥ विषयाणां यथोक्तानामभावे दुःखमेति च ॥ साक्षात्कृतनिजानन्दो द्वैतदृष्टेरभावतः ॥ ३ ॥ अतितुच्छतया भोग्यसुखं नेच्छाति तत्त्वदृक् ॥ तथोक्तं श्रीवसिष्ठेन निर्वाणस्योत्तरे दले ॥ ४ ॥ स्वभावो दृश्यवैरस्यमेव तत्त्वविदो निजः ॥ दृश्यस्पन्दनमेवाहुरतत्त्वज्ञत्वमुत्तमाः ॥ ५ ॥ अतज्ज्ञायैव विषयाः स्वदन्ते न तु तद्विदः ॥ नहि पीतामृतायान्तःस्वदते कटु काञ्जिकम् ॥ ६ ॥ मनोवृत्तिविशेषा हि स्यू रतितृप्तितुष्टयः ॥ साक्षिसिद्धा अतोऽनात्मधर्मास्तेषु कथं बुधः ॥ ७ ॥ सज्जेतात्मसुखे मग्नो गलितानात्मधीः स्वतः ॥ आत्मन्येव सुखाम्भोधौ स्वभावादेव तत्त्ववित् ॥ ८ ॥ रतिं तृप्तिं च तुष्टिं च यात्यसौ सुखसागरः ॥ अतोऽनात्मनि रत्यादेरभावादात्मतत्त्ववित् ॥ ९ ॥ साक्षात्कुर्वन्परानन्दमुपचारतयोच्यते ॥ आत्मरतिरात्मतृप्त आत्मसंतुष्ट इत्यपि ॥ १० ॥ एवंभूतो मनुष्यो यः कृतकृत्यः स एव हि ॥ वर्णाश्रमानियम्यो न मानवश्चेतिशब्दतः ॥११॥ एवंभूतस्य कर्तव्यं वैदिकं लौकिकं मनाक् ॥ न विद्यते भ्रान्तिनाशात्स्थितस्याद्वयवस्तुनि ॥१२॥१७॥

भा० टी०—'न कर्मणाम्' इत्यारभ्य 'शरीरयात्रापि' इत्यन्तेन ग्रन्थेनात्मज्ञाननिष्ठायोग्यताप्राप्त्यर्थं फलाभिसंधिरहितं कर्मानुष्ठेयमिति प्रतिपाद्य 'यज्ञार्थात्' इत्यादिना मोघमित्यन्तेन प्रासङ्गिकमनात्मविदोऽधिकृतस्य कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्तनं कृतमेवंस्थिते किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्तनीयमुतानात्मज्ञेनाशुद्धान्तःकरणेन ज्ञानप्राप्त्यर्थमित्यर्जुनसंशयमालक्ष्य स्वयमेव वा शास्त्रस्य विवेकप्रतिपत्त्यर्थं तत्त्वविदस्तन्निषेधति—**यस्त्विति** । यस्तु मानव आत्मज्ञाननिष्ठ आत्मन्येव रतिर्न विषयेषु यस्य स आत्मनैव नान्नरसादिना तृप्तश्च भवेद् आत्मन्येव तुष्टो न बाह्येष्वर्थेषु सर्वतो विगततृष्ण इत्यर्थः तस्य कर्तव्यं नास्ति ॥ १७ ॥

प० टी०—एवं ब्रह्ममतं निरूप्येदानीमनुत्पन्नज्ञानं भवन्तं प्रत्येवायं कर्मोपदेशो नोत्पन्नज्ञानं प्रतीत्याह—

यस्त्विति । यस्त्वात्मरतिरात्मन्येव रतिः प्रीतिर्यस्य तथात्मन्येव तृप्तोऽवाप्तसकलकामत्वादत एवात्मन्येव संतुष्टो भोगापेक्षारहितस्तस्य कार्यं कर्तव्यं न विद्यते ॥ १७ ॥

रा० टी०—एवं न कर्मणामनारम्भादित्यादिना सहयज्ञा इत्यादिना चोक्तदिशा कर्माकरणतत्करणयोर्हानिलाभौ चेत्तर्हि परमेश्वरे असंप्रज्ञातसमाधिरूपं मनःसमाधानमपि न कार्यं प्रसज्येत तत्र कर्मलोपस्यावश्यकत्वादित्यत आह—**यस्त्विति** । तुशब्दः समाधिस्थत्वविशेषसूचकः । यस्त्वसंप्रज्ञातसमाधिस्थः मानवोऽपरोक्षज्ञानी । मनुतेरवण् । आत्मरतिरेव । अत्रात्मशब्दः सर्वोपि परमात्मपरः । आत्मनि आत्मनो वा रतिमान्दर्शनजन्यसुखवान् परमात्मविषयकदर्शनजन्यसुखवानेव नत्वन्यत्र रतिमानित्येवकारार्थः । भगवतोऽन्यत्र रतिराहित्यं न प्रायेणेति मन्तव्यं किंतु सर्वात्मनेत्याह—आत्मतृप्त इति । आत्मना तृप्तः परमात्मप्रसादेनैव तदन्यत्र सर्वात्मनालंबुद्धिमानित्यर्थः । अन्यत्रालंबुद्धिरपि भगवत्प्रसादायत्तेति भावः । किंचातिशयितं सुखं दत्त्वा भगवानन्यत्र सर्वात्मनालंबुद्धिमुत्पादयतीत्यतोऽन्यत्रालंबुद्धौ हेतुतया प्रागुक्तरत्याख्यमेव सुखमाह—**आत्मन्येव च संतुष्ट इति** । सम्यक् तुष्टिमान्संतुष्टः महासुखवानित्यर्थः । हेतुगर्भमिदम् । भगवद्दर्शननिमित्तकमहासुखवत्त्वादन्यत्रालंबुद्धिमानिति । भगवद्दर्शनानिमित्तकं महासुखं केन हेतुना स्यादित्यतः संतुष्टत्वे हेतुः—आत्मन्येवेति । अधिकरणसप्तमी । आत्मनि स्थित एव सन्संतुष्ट इति । असंप्रज्ञातसमाधिरूपयात्मनि स्थित्यैव संतुष्टो नत्वन्येन केनापीत्येवकारार्थः । अत्र मानव इति उक्तिः अपरोक्षिण एवासंप्रज्ञातसमाधिरिति द्योतयितुम् । यस्त्वेवंरूपस्तस्य कार्यं कर्तव्यं संध्यावन्दनादिकं किमपि कर्म न विद्यते ॥ १७ ॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ॥
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

त० टी०—तत्र हेतुमाह—**नैवेति** । लोके कर्मणां कर्तुरुत्कर्षो भवति तदकरणेऽपकर्षो जायते । तस्यात्मरतस्य विदुषः कृतेन कर्मणा कश्चनोत्कर्षाद्यर्थो नास्ति न चाप्यकृतेनेह कश्चनापकर्षो दोषो वा भवति । आत्मव्यतिरिक्तस्य सर्वस्योपेक्षितत्वाद् अत एव चास्यात्मविदः सर्वभूतेषु देवमनुष्यादिषु कश्चिदर्थव्यपाश्रयः कोऽप्यर्थाय प्रयोजनाय सेवनीयो न भवतीत्यर्थः ॥ १८ ॥

म० टी०—नन्वात्मविदोऽपि अभ्युदयार्थं निःश्रेयसार्थं प्रत्यवायपरिहारार्थं वा कर्म स्यादित्यत आह—**नैवेति** । तस्यात्मरतेः कृतेन कर्मणाभ्युदयलक्षणो निःश्रेयसलक्षणो वाऽर्थः प्रयोजनं नैवास्ति तस्य स्वर्गाद्यभ्युदयाऽनर्थित्वात् निःश्रेयसस्य च कर्मासाध्यत्वात् । तथा च श्रुतिः "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इति । अकृतो नित्यो मोक्षः कृतेन कर्मणा नास्तीत्यर्थः । ज्ञानसाध्यस्यापि व्यावृत्तिरेवकारेण सूचिता । आत्मरूपस्य हि निःश्रेयसस्य नित्यप्राप्तस्याज्ञानमात्रमप्राप्तिः तच्च तत्त्वज्ञानमात्रापनोद्यं तस्मिंस्तत्त्वज्ञानेनापनुन्ने तस्यात्मविदो न किंचित् कर्मसाध्यं ज्ञानसाध्यं वा प्रयोजनमस्तीत्यर्थः । एवंभूतेनापि प्रत्यवायपरिहारार्थं कर्माण्यनुष्ठेयान्येवेत्यत आह—नाकृतेनेति । भावे निष्ठा नित्यकर्माकरणेन इह लोके गर्हितत्वरूपः प्रत्यवायप्राप्तिरूपो वा कश्चनार्थो नास्ति । सर्वत्रोपपत्तिमाह—उत्तरार्धेन । चो हेतौ । यस्मादस्यात्मविदः सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कोपि अर्थव्यपाश्रयः प्रयोजनसंबन्धो नास्ति । कंचिद्भूतविशेषमाश्रित्य कोपि क्रियासाध्योऽर्थो नास्तीति वाक्यार्थः । अतोऽस्य कृताकृते निष्प्रयोजने "नैनं कृताकृते तपतः" इति श्रुतेः । "तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवति" इति श्रुतेर्देवा अपि तस्य मोक्षाभवनाय न समर्था इत्युक्तेर्न विघ्नाभावार्थमपि देवाराधनरूपकर्मानुष्ठानमित्यभिप्रायः । एतादृशो ब्रह्मविद्भूमिकासप्तकभेदेन निरूपितो वसिष्ठेन 'ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता ।

विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका । पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ' इति। तत्र नित्यानित्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा । ततो गुरुमुपसृत्य वेदान्तवाक्यविचारः श्रवणमननात्मको द्वितीया । ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं ततीया । एतद्भूमिकात्रयं साधनरूपं जाग्रदवस्थोच्यते योगिभिर्भेदेन जगतो भानात् । तदुक्तम् ' भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्थितम् । यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ' इति । ततो वेदान्तवाक्यान्निर्विकल्पको ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका फलरूपा सत्त्वापत्तिः स्वप्नावस्थोच्यते सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात् । तदुक्तम् ' अद्वैते स्थैर्यमायाते द्वैते प्रशममागते । पश्यन्ति स्वप्नवल्लोकं चतुर्थी भूमिकामिताः ' इति । सोऽयं चतुर्थभूमिं प्राप्तो योगी ब्रह्मविदित्युच्यते । पञ्चमीषष्ठीसप्तम्यस्तु भूमिका जीवन्मुक्तेरवान्तरभेदाः । तत्र सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्था साऽसंसक्तिरिति सुषुप्तिरिति चोच्यते ततः स्वयमेव व्युत्थानात् । सोऽयं योगी ब्रह्मविद्वरः । ततस्तदभ्यासपरिपाकेण चिरकालावस्थायिनी सा पदार्थाभावनीति गाढसुषुप्तिरिति चोच्यते । ततः स्वयमनुत्थितस्य योगिनः परप्रयत्नेनैव व्युत्थानात् सोयं ब्रह्मविद्वरीयान् । उक्तं हि ' पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकाम् । षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकाम् ' इति । यस्यास्तु समाध्यवस्थायाः न स्वतो वा परतो व्युत्थितो भवति सर्वथा भेददर्शनाभावात् किंतु सर्वदा तन्मय एव स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुवशादन्यैर्निर्वाह्यमानदैहिकव्यवहारः परिपूर्णपरमानन्दघन एव सर्वतास्तिष्ठति सा सप्तमी तुरीयावस्था तां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते । उक्तं हि ' षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् । किंचिदेवैष संपन्नस्त्वथ वैष न किंचन ॥ विदेहमुक्तता तूक्ता सप्तमी योगभूमिका । अगम्या वचसां शान्ता सा सीमा योगभूमिषु ' इति यामधिकृत्य श्रीमद्भागवते स्मर्यते ' देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोध्यगमत्स्वरूपम् । दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥ देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षत एव सासुः । तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ' इति । श्रुतिश्च " तद्यथा हिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव " इति । तत्रायं संग्रहः ' चतुर्थी भूमिका ज्ञानं तिस्रः स्युः साधनं पुरा । जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः ' अत्र प्रथमभूमित्रयमारूढोऽज्ञोपि न कर्माधिकारी किं पुनस्तत्त्वज्ञानी तद्विशिष्टो जीवन्मुक्तो वेत्यभिप्रायः ॥ १८ ॥

शं० टी०—ननु ब्रह्मेन्द्रादिभिस्तत्तत्पदं लब्ध्वा प्राप्तं यत्सुखं तत्कर्मजन्यमेव ततः सर्वत्र सुखस्य कर्मसंपाद्यत्वाद्ब्रह्मविदोऽपि सुखार्थित्वाच्च तस्य निरन्तरसुखसिद्ध्यै कर्म यत्किंचित्कर्तव्यमेवेत्याशङ्कायां न "आनन्दो ब्रह्मेति" "विज्ञानमानन्दं ब्रह्म" इति ब्रह्मण आनन्दैकरूपत्वश्रवणान्निरन्तरब्रह्मनिष्ठया तद्भावापन्नस्याखण्डानन्दस्वरूपेणैव तिष्ठतोऽस्य निरन्तरब्रह्मानन्दरसानुभूतेरनवच्छिन्नत्वात्क्रियाजन्यसुखस्यानित्यत्वात्तदनपेक्षिणो ब्रह्मविदः कर्मसाध्योऽर्थस्तदभावे पुमर्थो वा न कश्चिदस्तीत्याह—नैवेति । तस्याहमेवेदं सर्वमिति सर्वमात्मानमेवाद्वितीयं पश्यत आत्मारामस्यात्मानन्दस्य यतेः सिद्धस्य कृतेनानुष्ठितेन कर्मणा प्राप्तव्योऽर्थः कश्चिदपि नैवास्ति आत्मतृप्तत्वात्सर्वमिथ्यात्वदर्शित्वाच्च । योगक्रियया प्राप्तव्याकाशगमनाणिमादिसिद्धिर्नापेक्ष्यते सर्वात्मभावापन्नत्वात्तपःक्रियया प्राप्तव्यब्रह्मेन्द्रादिपदापेक्षा च न संभवति जीवन्मुक्तत्वाद्वैदिकक्रियया प्राप्तव्यचित्तशुद्धिद्वारकमोक्षापेक्षापि नास्त्यतो ब्रह्मवित्तमस्य कर्मणा साधनीयोऽर्थः कश्चिदपि नास्त्येवेत्यर्थः। नन्वेतस्य कर्मणा प्राप्तव्येष्टार्थाभावेऽपि विध्युल्लङ्घनदोषो वाप्यकरणे प्रत्यवायदोषो वा स्यात्तेन ज्ञानह्रा-

निर्वा स्वरूपहानिर्वा प्रसज्येतेत्याशङ्कायामाह—नाकृतेनेति । उक्तलक्षणस्य ब्रह्मविदस्त्वकृतेन विहिताना-चरणेनानर्थ उक्तः कश्चनेह लोके न संभवति ' मायामात्रमिदं द्वैतम् ' इतिन्यायेन विधेरप्याविद्यकत्वेन मिथ्यात्वाद्विदुषस्तदुल्लङ्घने दोषाभावः " उभे ह्येवैष एते आत्मानं स्पृणुते " इति श्रवणादकर्मणोऽपि ब्रह्ममात्रत्वदर्शनेन स्वतः सत्ताभावादकर्माऽपि दोषाय न कल्पते निरन्तरब्रह्मनिष्ठयैव तिष्ठतो विदुषस्तेन ज्ञानहानिर्न संभवति " एष नित्यो महिमा ब्राह्मणस्य " इतिब्रह्मवित्स्वरूपस्य कर्माकर्मभ्यां वृद्धिक्षयाभावश्रवणाद्ब्रह्मविदोऽकर्मणा स्वरूपहानिश्च न भवति तस्मादकृतेनास्य न कश्चिदप्यनर्थ इत्यर्थः । नन्वस्य मुक्तिप्रतिबन्धकनिवृत्त्यर्थं वाप्याध्यात्मिकाद्युपद्रवनिवृत्त्यर्थं वाप्युपास्तिक्रियया शिवो वा विष्णुर्वाऽन्यो वा व्यपाश्रयणीयो भवति अथवा शरीरयात्रार्थं ब्राह्मणो वा क्षत्रियो वाप्यनुसृत्याश्रयणीयो भवत्यतो विदुषः सर्वदा कर्मत्यागो न युज्यत एवेत्याशङ्कायामाह—**न चेति** । अस्योक्तलक्षणस्य ब्रह्मवित्तमस्य देवेषु शिवो वा विष्णुर्वा सर्वभूतेषु ब्राह्मणो वान्यो वा कश्चिदपि यत्किंचित्कार्यमुक्तलक्षणमुद्दिश्य क्रियया व्यपाश्रय आश्रयणीयः कश्चिदपि नास्ति ' इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ' इति वचनादिहैवास्मिन् शरीरे नित्यनिरन्तरब्रह्मनिष्ठया भाविशरीरप्रापकमज्ञानं तत्कार्यं संचितादिसर्वकर्मजातं च विनिर्मूल्य स्वयं शरीरसंबन्धरहितत्वेनैव सदा स्थितत्वाद्ब्रह्मविदोऽत्रैव मुक्तस्य इतो मुक्तिप्रतिबन्धकासंभवान्मिथ्याकोट्यन्तःपातित्वाच्च शिवविष्ण्वादिराराध्यो न भवति आध्यात्मिकाद्युपद्रवस्य शरीरत्राणस्य च प्रारब्धाधीनत्वात्पुंप्रयत्नस्य वैयर्थ्यदर्शनाच्च न कोऽपि ब्राह्मणादिराश्रयणीय एवातो ब्रह्मविद्वर्यस्य मुक्तस्य क्वचिदपि यत्किंचिदपि कर्म न कर्तव्यमेव कृतं चेत्स ब्रह्मविदेव न भवति । तथाच स्मृतिः ' ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ' इति ॥ १८ ॥

श्री० टी०—तत्र हेतुमाह—**नैव तस्येति** । कृतेन कर्मणा तस्यार्थः पुण्यं नैवास्ति न चाकृतेन कश्चन कोऽपि प्रत्यवायोऽस्ति निरहंकारत्वेन विधिनिषेधातीतत्वात् तथापि "तस्मात्तदेषां देवानां न प्रियं यदेतन्मनुष्या विदुः" इति श्रुतेः मोक्षे देवकृतविघ्नसंभवात् तत्परिहारार्थं कर्मभिर्देवाः सेव्या इत्याशङ्क्योक्तं सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदपि अर्थव्यपाश्रयः आश्रय एव व्यपाश्रयः अर्थे मोक्ष आश्रयणीयोऽस्य नास्तीत्यर्थः । विघ्नाभावस्य श्रुत्यैवोक्तत्वात् । तथाच श्रुतिः—" तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवति " इति । हनेत्यव्ययमप्यर्थे । देवा अपि तस्यात्मतत्त्वज्ञस्य अभूत्यै ब्रह्मताप्रतिबन्धनाय नेशते न शक्नुवन्तीति श्रुतेरर्थः । देवकृतास्तु विघ्नाः सम्यग्ज्ञानोत्पत्तेः प्रागेव " यदेतद्ब्रह्म मनुष्या विदुस्तद्देवानां न प्रियम् " इति श्रुत्यां ब्रह्मज्ञानस्यैवाप्रियत्वोक्त्या तत्रैव विघ्नकर्तृत्वस्य सूचितत्वात् ॥ १८ ॥

स० टी०—नन्वस्त्वात्मविदः कर्माभ्युदयादिनिबन्धनम् ॥ प्रत्यवायक्षयार्थं वा को दोष इति चेच्छृणु॥ १॥ कृतेन कर्मणा तस्य न स्वर्गादिप्रयोजनम् ॥ प्राप्यं तस्य तु सर्वत्र स्वर्गादौ तुच्छतामतिः ॥ २ ॥ कर्मासाध्यतया मुक्तेः स्वात्मत्वाच्चात्मवेदिनः ॥ तदर्थमपि नो कार्यं नित्यप्राप्ततया मुनेः॥ ३॥ स्वात्मावस्था न मोक्षस्य नित्यप्राप्तस्य केवलम् ॥ अज्ञानमात्रमप्राप्तिस्तद्बाध्यं स्वात्मबोधतः ॥ ४ ॥ अज्ञाने ज्ञानतो नष्टे सकार्ये तत्त्ववेदिन॥ न किंचित्कर्मणा साध्यं ज्ञानसाध्यं न किंचन ॥५॥ न कर्माकरणेनास्य प्रत्यवायोऽपि कश्चन ॥ यस्मादात्मविदः सर्वभूतेषु द्रुहिणादिषु ॥ ६ ॥ न प्रयोजनसंबन्धः कोऽप्यस्त्यात्मरतेर्मुनेः ॥ अतः कृताकृते तस्य निष्फले इति निर्णयः ॥ ७ ॥ मुमुक्षोरपि नैवास्ति कर्म कर्तव्यमाग्रहात् ॥ भूमिकात्रयसंस्थस्य किं पुनर्ज्ञानिनो मुनेः ॥ ८ ॥ भूमिसप्तकभेदेन ब्रह्मवित्संनिरूपितः ॥ वसिष्ठे जानकीनाथं संमुखीकृत्य तद्विदा ॥ ९ ॥ ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता ॥ विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ १० ॥ भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्थितम् ॥ यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ॥ ११ ॥

अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ॥ पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः ॥ १२ ॥ पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकाम् ॥ षष्ठीं गाढसुषुप्ताख्यां क्रमात्पतति भूमिकाम् ॥ १३ ॥ षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ॥ किंचिदेवैष संपन्नस्त्वथ वैष न किंचन ॥ १४ ॥ अगम्या वचसां शान्ता सा सीमा योगभूमिषु ॥ एवं वसिष्ठमुनिना शरदेन्दुः प्रबोधितः ॥ १५ ॥ चतुर्थीं भूमिमारभ्य ब्रह्मविज्ञानकर्मणोः ॥ न साध्यमीक्षते किंचित्कृतकृत्यतयात्मनः ॥ १६ ॥ साध्याभावादतो ब्रह्मविदः कार्यं न विद्यते ॥ १७ ॥ १८ ॥

भा० टी०—चतुर्थपादं विवृणोति—**नैवेति** । तस्यात्मरतेः कृतेन कर्मणाऽभ्युदयार्थेन ज्ञानार्थेन मोक्षार्थेन वा प्रयोजनं नैवास्ति स्वर्गस्य तुच्छरूपेण ज्ञातत्वात् ज्ञानस्य जातत्वात् "नास्त्यकृतः कृतेन" इतिश्रुत्या मोक्षस्य कर्माकार्यत्वप्रतिपादनात् । अस्तु तर्ह्यकृतेन प्रत्यवायाख्योऽर्थ इत्यत आह—**नेति** । इह लोके कश्चिदपि प्रत्यवायप्राप्तिरूपः स्वहानिलक्षणोऽर्थो नास्ति आत्मरतेः नित्यकरणेऽधिकृतत्वाभावात् तस्मिन्काले प्रत्यवायजनकभावरूपविहितान्यकर्मणि तस्य व्यापृतत्वाभावाच्च । यतो यत्किंचिदपि कस्मादपि तस्य साध्यं नास्तीत्याह—**न चेति** । अस्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदर्थोऽर्थार्थमाश्रयणीयः सेवनीयो नास्ति येन तदर्था क्रियानुष्ठेया स्यात् । अस्मिन्श्लोके भूमिकारूढस्येत्यादिशब्दस्याभावेनाप्रासङ्गिकं वसिष्ठोक्तभूमिकाप्रदर्शनं कैश्चित्कृतमिति बोध्यम् ॥ १८ ॥

प० टी०—तत्र हेतुमाह—**नैवेति** । तस्यात्मनिष्ठस्य कृतेन कर्मणार्थः सुकृतातिशयो नैव तथाकृतेन च प्रत्यवायोऽपि नैव निरहंकारत्वेन विधिनिषेधातीतत्वात् । अत्र श्रुतिरपि "तदेतदृचाभ्युक्तमेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् । तस्यैव स्यात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन" इति । भाष्यम्—तत्तद्बृहदारण्यकं निरूपणीयार्थऋक्शाखीयां श्रुतिं संमतित्वेन दर्शयति—**तदेतदिति** । तदेतत्प्रमेयमृचा ऋग्वेदेनाभ्युक्तमप्यभितो निरूपितमस्ति । तत्किम्, ब्राह्मणस्य ब्रह्मज्ञस्य पुरुषस्य एष नित्यो महिमा शाश्वतं सामर्थ्यम् । तत्किम्, कृतेन कर्मणा न वर्धते उत्कृष्टत्वं न प्राप्नोति नाप्यकृतेन कनीयान् कनिष्ठो भवत्येवंविधो यस्तस्यैव पदवित् पदमात्मरूपं तस्य विद् ध्यानं भवत्येवं तं परमात्मानं विदित्वा सत्कर्मणा पापकेन वा न लिप्यते । अथोपक्रान्तऋक्शाखायामपि—"हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः । अत्राह त्वं विजहुर्वेद्याभिरोहब्राह्मणा विचरन्त्युत्वे । इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः । त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः" इति ऋग्द्वयम् । रावणभाष्यम्—हृदा बुद्धिरूपेण मनसा तष्टेषु निराकृतेषु मनसो जवेषु वृत्तिरूपेषु मनोजवेषु वेगेषु सत्सु यद्यस्मात्कारणाद् ब्रह्मज्ञाः ब्राह्मणाः सखायः सर्वभूतसुहृत्तमाः सन्तः सम्यक् प्रकारेण यजन्तेऽन्तर्यागं कुर्वते । तत्रान्तर्यागे क्रियमाणे किं भवतीत्याह—अत्रेति । अत्राहं त्वमिति पदविभागे अहेत्यत्रानुस्वारलोपश्छान्दसः । अहं त्वं विजहुरन्तर्यागेन भेदभावनां त्यक्तवन्तः । किंभूता वेद्याभिर्विद्याभिज्ञानवृत्तिभिरभित ऊह्यं ब्रह्म यैस्ते पदार्थप्रतीतिरूपेण ज्ञातब्रह्माणः सन्तः उ इति निर्धारणे विचरन्ति अखण्डैकरसत्वेन व्यवहरन्ति । तदुक्तमागमेऽपि—'स्वाधिष्ठानगते कुण्डे चिद्रूपं वह्निमुज्ज्वलेत् । जुहुयात्प्रणवेनात्र त्वमहंतां निवेदयेत् ॥ आत्मनात्मानमद्वैते भूत्वा संवित्सुखात्मकः । स्थीयते यत्कियत्कालं सोऽन्तर्यागः स्मृतो बुधैः' इति । इमे ये इति । इमे ये उक्तलक्षणाः पुरुषास्ते अर्वाङ् मनुष्यलोके न चरन्ति न संभवन्ति । नपरः पर इति सकारान्तमव्ययम् । परस्मिन् देवलोकेऽपि नोत्पद्यन्ते कृताकृतैः कर्मभिरुत्तमाधमलोकं न गच्छन्ति । किं त्वत्रैव ब्रह्मीभूतास्तिष्ठन्तीत्यर्थः । "न तस्य प्राणा उत्क्रामन्त्यत्रैव समलीयन्ते" इति श्रुतेः । परं तु ब्राह्मणा जातिमात्रविप्रास्तथा सुतं सोममभिसृतं कुर्वन्तीति सुतेकरास्त

एव सुतेकरासो याज्ञिकास्तथा भवन्ति किंतु ते उत्तममध्यमाधमगतिं प्राप्नुवन्त्येवेत्यर्थः । अत्र हेतुमाह—त एत इति । त एते निरूपितप्रकारा ब्राह्मणाः सुतेकराश्च वाचं फलप्रतिपादकां वेदवाणीमभिपद्य ज्ञात्वा सिरीः सीरिणः कृषिकर्तार इव भूत्वा पापया फलाशया तन्त्रं यज्ञादिकं तन्वते विस्तारयन्ति, अत एव अप्रजज्ञयो न प्रकृष्टा जाज्ञिर्जन्म येषां तेऽप्रकृष्टजन्मान इत्यर्थः । अथ प्रकृतमनुसरामः । तथास्य पुरुषस्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदर्थव्यपाश्रयोऽर्थः प्रयोजनं तस्य व्यपाश्रय आश्रयः कश्चिदपि न मृग्यते परमार्थसाधने भगवत्कृपापात्रस्य तस्य विघ्नोपशान्त्यर्थं कोऽप्याश्रयणीयो नास्तीत्यर्थः । श्रुतिरपि—“तस्य ह न देवा नाभूत्या ईशते आत्मा ह्येषां स भवति” इति। तस्य पुरुषस्याभूत्या अनैश्वर्यायापकर्षणाय देवा इन्द्राद्या नेशते समर्था न भवन्ति हि यस्मात्कारणात्स पुरुष एषां देवानामात्मान्तर्यामी प्रयोजको भवति न हि प्रयोजकमन्तरा विघ्नकरणार्थे प्रवृत्तिरित्यर्थः ॥ १८ ॥

रा० टी०—ननु कर्मकरणाकरणयोर्लाभहानी चेत्तर्हि समाधिर्न कार्यः प्रसज्येतेति चोदिते समाधिस्थस्य कार्यं न विद्यते इत्युत्तरं कस्मादुक्तं कर्मकृतिकाले त्वयाहमुद्बोधनीय इति कंचित्प्रत्युक्त्वा समाधौ स्थितः सन् तेन योगशास्त्रोक्तैरुपायैरुद्बोधितः कर्म करोतीत्येवोत्तरं कुतो नोक्तमित्यत आह—नैवेति । तस्यासंप्रज्ञातसमाधिस्थस्य समाधिं विनेह कृतेन यज्ञादिकर्मणात्मरत्यधिकस्तत्समो वार्थः पुमर्थो नास्ति । ननु यज्ञादिकरणार्थमुत्थानाभावेऽपि नित्यनैमित्तिककर्माकरणे प्रत्यवायात् तत्करणार्थं समाधित उद्बोधनमावश्यकमित्यत आह—नाकृतेनेति । तस्य समाधिस्थस्याकृतेन कर्मणा संध्यावन्दनादितत्तत्कालानुष्ठेयकर्माभावेन कश्चन नास्ति दोष इति शेषः । ननु समाधिस्थस्यात्पस्य यज्ञादेरनुष्ठाने फलाभावेपि संध्याद्यकृतौ प्रत्यवायाभावेपि गुरुदेवतादिषु पूजाकरणाकरणयोरर्थप्रत्यवायौ स्यातामेवातस्तत्सन्निधानप्राप्तौ उद्बोधनमावश्यकमित्यत आह—न चेति । अस्यासंप्रज्ञातसमाधिस्थस्य सर्वभूतेषु । विषयसप्तमीयम् । अर्थव्यपाश्रयः अर्थस्य व्यपाश्रयः प्राप्तिः येन दर्शनसंभाषणपूजनादिव्यापारेण भवति सोर्थव्यपाश्रय इति व्यधिकरणबहुव्रीहिः । गुर्वादिविषयकदर्शनभाषणवन्दनादिव्यापारः पुमर्थप्राप्तिहेतुभूतः समाधिस्थस्य नास्तीत्यर्थः । चशब्दः पूर्वार्धोक्तसमुच्चये । गुर्वादिविषयव्यापारेणाप्यात्मरतितुल्यं सुखं न लभ्यत इत्यभिप्रायः । एवं तत्पूजाद्यकरणमपि समाधिस्थस्य नानर्थप्राप्तिहेतुरित्युपलक्ष्यते । यद्वा न केवलं चक्रप्रवर्तकत्वेन भूतस्थितिहेतुत्वात्कर्म कर्तव्यं किंतु मुक्तस्यैवाकर्मत्वादमुक्तेनावश्यं कर्म कार्यमिति तस्मादित्यनेन वक्तुमकर्मकत्वं मुक्तस्यैवेत्याह—यस्त्विति । यस्तु मानवः प्राप्तज्ञानफलो मुक्तः आत्मरतिः आत्मना परमात्मना रतिः अभिव्यक्तस्वरूपानन्दो यस्य स तथा । आत्मना परमात्मना तृप्तः कृतकृत्यः आत्मतृप्तः आत्मन्येव च संतुष्टः प्रीतिमान् । यद्वा तृप्तिसंतोषशब्दयोः प्रीतिरूपैकार्थत्वेऽप्यात्मना तृप्तः प्रीतिमान् आत्मन्येव च संतुष्ट इत्येतावतार्थभेदो ध्येयः । तस्य तु तस्यैवेति तुशब्दोऽत्र योज्यः । मुक्तस्यैव कार्यं न विद्यते । ननु ‘ कृष्णो मुक्तैरिज्यते वीतमोहैः ’ इत्युक्तेर्मुक्तस्यापि कर्म कर्तव्यमित्यत आह—नैवेति । प्राग्वदेवार्थः। स्वेच्छयैव करणं न विधिबद्धत्वेन न वा फलापेक्षया तस्यैव फलरूपत्वेन फलान्तराभावादिति भावः ॥ १८ ॥

तस्मादसक्तः सततं कार्यं कर्म समाचर ॥
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ १९ ॥

त० टी०—एवंभूतात्मज्ञान्यवस्थेप्सुना फलाभिसंधिशून्यं कर्म कर्तव्यमित्याह—तस्मादिति । यस्मात्परमेश्वराराधनात्मकं कर्म एवंभूतज्ञानफलकं तस्मादसक्तः फलसंकल्पवर्जितः सन् कार्यं नियतं कर्तव्यं कर्म सततं नित्यं यावज्जीवं समाचर, हि यतः असक्तः सन्कर्माचरन् पूरुषः कोऽपीश्वराराधकः सत्त्वशुद्धिज्ञानद्वारा परं सर्वोत्तमं परमेश्वरं मोक्षाख्यं फलं वा आप्नोति ॥ १९ ॥

म० टी०—यस्मान्न त्वमेवंभूतो ज्ञानी किंतु धर्माधिकृत एव मुमुक्षुः असक्तः फलकामनारहितः सततं सर्वदा न तु कदाचित् कार्यं अवश्यकर्तव्यं यावज्जीवादिश्रुतिचोदितम् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन" इति श्रुत्या ज्ञाने विनियुक्तं कर्म नित्यनैमित्तिकलक्षणं सम्यगाचर यथाशास्त्रं निर्वर्तय। असक्तो हि यस्मादाचरन्नीश्वरार्थं कर्म कुर्वन्सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण परं मोक्षमाप्नोति पूरुषः, पुरुषः स एव सत्पुरुषो नान्य इत्यभिप्रायः ॥ १९ ॥

शं० टी०—योगारूढो यस्तस्यैव मुक्तस्य यतेरात्मारामस्य कर्म न कर्तव्यं किंत्वारुरुक्षोर्मोक्षार्थिनस्तव कर्म कर्तव्यमेवेति बोधयितुमाह—तस्मादिति। हि यस्मात्कारणान्मुमुक्षुः पुरुषः स्वयमसक्तः फलाभिसंधिरहितो भूत्वा वैदिकं कर्माचरन् सम्यगनुतिष्ठन्नेव परं परमपुरुषार्थं मोक्षमाप्नोति यथाऽयमात्मरतिरस्मिन् जन्मनि जन्मान्तरेषु च वैदिकं कर्म कृत्वैव चित्तशुद्धिं प्राप्यात्मज्ञानेन मुक्तिं प्राप्तवान् तथान्योऽपि कर्मभूमिस्थः कर्म कृत्वैव ज्ञानं प्राप्य मुक्तो भवति नैवान्यथा तस्मात्त्वमपि मुमुक्षुरसक्तो निष्कामः सन् सततं कार्यं कर्तव्यं वैधं नित्यं नैमित्तिकं च कर्म समाचर श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या सम्यक्कुरु। कर्मणैव चित्तशुद्धिं प्राप्य ज्ञानं च मोक्षं च प्राप्स्यसीत्यर्थः "धर्मेण पापमपनुदति" इति 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति 'ज्ञानादेव तु कैवल्यम्' इत्यादिश्रुतिस्मृतिभिर्धर्मानुष्ठानादेव पापक्षयः पापक्षयादेव ज्ञानं ज्ञानादेव मोक्ष इति प्रतिपाद्यते ॥ १९ ॥

श्री० टी०—यस्मादेवंभूतस्य ज्ञानिन एव कर्मानुपयोगो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह—तस्मादिति। असक्तः फलसङ्गरहितः सन्कार्यमवश्यकर्तव्यतया विहितं नित्यनैमित्तिकं कर्म सम्यगाचर हि यस्मात् असक्तः कर्माचरन्पुरुषः परं मोक्षं चित्तशुद्धिज्ञानद्वारा प्राप्नोति ॥ १९ ॥

स० टी०—यस्मान्नैवं त्वमात्मज्ञः किंतु कर्माधिकारवान् ॥ तस्मान्नित्यं फलासङ्गशून्यः कर्म यथाविधि ॥ १ ॥ तमेतमितिवाक्येन विहितं सम्यगाचर ॥ यस्मात्समाचरन्नीशाराधनं सङ्गवर्जितः ॥ २ ॥ धीशुद्ध्या ज्ञानसंप्राप्तिद्वारेण परमं पदम् ॥ पुरुषो मोक्षमाप्नोति स एव पुरुषो मतः ॥ ३ ॥ १९ ॥

भा० टी०—तव तु चित्तशुद्धिद्वारा ज्ञानार्थं कर्मण्यधिकारः तस्मादसक्तः फलासक्तिवर्जितः कार्यमवश्यं कर्तव्यं नित्यं नैमित्तिकं च कर्म सर्वदा समाचर हि यस्मात्पुरुषोऽसक्तः कर्म समाचरन् ईश्वरार्थं कर्म कुर्वन् तत्त्वशुद्धिद्वारा ज्ञानप्राप्त्या परं मोक्षं प्राप्नोति ॥ १९ ॥

प० टी०—यस्मादेवंभूतस्योत्पन्नज्ञानस्य कर्मोपरमो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह—तस्मादिति। असक्तः फलसङ्गरहितः सन् कार्यं कर्म नित्यं नैमित्तिकं सततं निरन्तरं समाचर हि यस्मादसक्तः सन् पुरुषः परं ब्रह्माप्नोति ॥ १९ ॥

रा० टी०—तस्मादसंप्रज्ञातसमाधिस्थस्य वा मुक्तस्यैव वाऽकर्मत्वेन त्वादृशेनावश्यं कर्मणः कर्तव्यत्वादसक्तः फलस्नेहरहितः सन् कार्यमवश्यकर्तव्यं कर्म सततं समाचर भगवत्पूजात्वेनानुतिष्ठ। ननु मुक्तस्य कर्मणा प्रयोजनाभावात्कार्याभावः, एवं मुमुक्षोरपि कर्मणा फलाभावात्कार्याभावः किं न स्यादित्यत आह—असक्त इति। पुरुषः असक्तः कर्माचरन्नेव ज्ञानद्वारा परमाप्नोति हि यस्मात्तस्मान्मुक्तसमाधिस्थाभ्यामन्यस्य कर्मणा फलसत्त्वादस्त्येव कार्यमिति भावः ॥ १९ ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥

त० टी०—नन्वन्तःकरणशुद्ध्यर्थमेव कर्म कर्तव्यं तच्छुद्ध्या ज्ञाने जाते कर्म त्याज्यमन्यथा सदा

कर्मणि क्रियमाणे मोक्षो न स्यात्तेन बन्धः स्यात् "नास्त्यकृतः कृतेन" इति श्रुतेः 'कर्मणा बध्यते जन्तुः' इति शास्त्रादित्याशङ्कानिरासार्थं कर्म कुर्वतो ज्ञानिनः प्रमाणयति—कर्मणैवेति। कर्मणेति सहार्थे तृतीया वृद्धो यूनेति निर्देशात्। तथा च कर्मणा सहैव नतु कर्मत्यागेन ज्ञानित्वेन विख्याता जनकादयः जनकाश्वपतिप्रभृतयः ज्ञानस्य संसिद्धिं मोक्षाख्यामास्थिताः प्राप्ताः, नतु कर्मानुष्ठानेन बन्धं प्राप्ता ज्ञानप्रभावादिति भावः। हि यत एवं तस्मात्त्वमपि ज्ञानी चेत्कर्म कर्तुमर्हसि। ननु ज्ञाननिष्ठः पुरुषः कर्मणि क्रियमाणेऽपि ज्ञानफलसिद्धिमेव प्राप्नोति, नतु कर्मणा बध्यते। एवंप्रभावा ज्ञाननिष्ठा चेत्किमर्थं ज्ञानिनोऽपि कर्मकरणावश्यकत्वमिति चेदत आह—लोकसंग्रहमिति। यद्यपि ज्ञाननिष्ठार्हस्त्वं तथाऽपि लोकसंग्रहमेव पश्यन् लोकानां स्वधर्मे प्रवर्तनमधर्मान्निवर्तनं लोकसंग्रहस्तं संपश्यन्कर्तुमर्हसि योग्यो भवसि॥ २०॥

म० टी०—ननु विविदिषोरपि ज्ञाननिष्ठाप्राप्त्यर्थं श्रवणमनननिदिध्यासनानुष्ठानाय सर्वकर्मत्यागलक्षणः संन्यासो विहितः। तथा च न केवलं ज्ञानिन एव कर्मानधिकारः किंतु ज्ञानार्थिनोपि विरक्तस्य। तथा च मयापि विरक्तेन ज्ञानार्थिना कर्माणि हेयान्येवेत्यर्जुनाशङ्कां क्षत्रियस्य संन्यासानधिकारप्रतिपादनेनापनुदति भगवान्—कर्मणेति। जनकादयो जनकाजातशत्रुप्रभृतयः श्रुतिस्मृतिपुराणप्रसिद्धाः क्षत्रिया विद्वांसोपि कर्मणैव सह नतु कर्मत्यागेन सह संसिद्धिं श्रवणादिसाध्यां ज्ञाननिष्ठामास्थिताः प्राप्ताः। हि यस्मादेवं तस्मात्त्वमपि क्षत्रियो विविदिषुर्विद्वान्वा कर्म कर्तुमर्हसीत्यनुषङ्गः "ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति संन्यासविधायके वाक्ये ब्राह्मणत्वस्य विवक्षितत्वात् "स्वाराज्यकामो राजा राजसूयेन यजेत" इत्यत्र क्षत्रियत्ववत्। 'चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ वैश्यस्य' इति च स्मृतेः। पुराणेपि 'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्। बाहुजातोरुजातानां नायं धर्मः प्रशस्यते' इति क्षत्रियवैश्ययोः संन्यासाभाव उक्तः। तस्माद्युक्तमेवोक्तं भगवता कर्मणैव हि संसिद्धिमास्थिता जनकादयः इति" 'सर्वे राजाश्रिता धर्मा राजा धर्मस्य धारकः' इत्यादिस्मृतेर्वर्णाश्रमधर्मप्रवर्तकत्वेनापि क्षत्रियोऽवश्यं कर्म कुर्यादित्याह—लोकेति। लोकानां स्वे स्वे धर्मे प्रवर्तनमुन्मार्गान्निवर्तनं च लोकसंग्रहस्तं पश्यन्नपिशब्दाज्जनकादिशिष्टाचारमपि पश्यन्कर्म कर्तुमर्हस्येवेत्यन्वयः। क्षत्रियजन्मप्रापकेण कर्मणाऽऽरब्धशरीरस्त्वं विद्वानपि जनकादिवत्प्रारब्धकर्मबलेन लोकसंग्रहार्थं कर्म कर्तुं योग्यो भवसि न तु त्यक्तुं ब्राह्मणजन्मालाभादित्यभिप्रायः। एतादृशभगवदभिप्रायविदा भगवता भाष्यकृता ब्राह्मणस्यैव संन्यासो नान्यस्येति निर्णीतं, वार्तिककृता तु प्रौढिवादमात्रेण क्षत्रियवैश्ययोरपि संन्यासोऽस्तीत्युक्तमिति द्रष्टव्यम्॥ २०॥

शं० टी०—ततो मुमुक्षोरज्ञातात्मतत्त्वस्यावश्यं कर्मैव कर्तव्यमित्युपदिश्यास्मिन्नर्थे वृद्धाचारं प्रमाणयति श्रीभगवान्—कर्मणैवेति। जनकादयः जनको वैदेह आदिर्येषां ते जनकादयः अश्वपतिभगीरथादयः क्षत्रियाः कर्मणैव श्रौतस्मार्तकर्मानुष्ठानेनैव चित्तशुद्धिं प्राप्य ज्ञानेन संसिद्धिमास्थिता मुक्तिं प्राप्य कृतार्था जाता इत्यतस्त्वमपि कर्मैव कृत्वा तदुत्पन्नचित्तशुद्ध्या ज्ञानं प्राप्य मुक्तो भूत्वा सुखेन तिष्ठेत्यर्थः। यद्वा जनकादयो ज्ञानयोगनिष्ठानिरूढतया संसिद्धिं मुक्तिं प्राप्यापि लोकहितार्थं कर्मणैव सह स्थिताः स्वयं कृतार्था अपि मूढतारणार्थं कर्म कुर्वन्त एव स्थिता इत्यर्थः। आरूढानामेवैवं सति किमुतानात्मज्ञेनारुरुक्षुणा त्वया मोक्षार्थं कर्म कर्तव्यमिति। एवं मुमुक्षोरनात्मज्ञस्यारुरुक्षोर्मोक्षार्थमवश्यं कर्म कर्तव्यमेवेति निर्धार्य इदानीं मुक्तेनाप्याधिकारिकेण लोकहितार्थं कर्म कर्तव्यमेवेति बोधयितुं तत्र दृष्टान्तत्वेन जनकादीनां ज्ञानवृद्धानां प्रवृत्तिमुदाहृत्य तवाप्येतादृशोऽधिकारो यद्यस्ति तिष्ठतु तथापि जनका-

दिवत्त्वया लोकहितार्थमपि कर्मावश्यं कर्तव्यमेव महापुरुषप्रवृत्त्या खलु शास्त्रस्य प्रामाण्यं कर्मणः प्राशस्त्यमज्ञतरणं च पारम्पर्येणाचारप्रचयोऽपि च सिध्यत्यतो मुक्तेनाप्यवश्यं महता कर्म कर्तव्यमित्याशयेनाह—**लोकसंग्रहमिति** । लोकः पामरजनस्तस्य संग्रहः सत्कर्ममार्गप्रदर्शनेन तारणमुन्मार्गान्निवारणं वा तमिमं लोकसंग्रहमेवार्थं संपश्यन् मया क्रियमाणं कर्म लोकोपकाराय भवतीति पश्यन्नपि कर्म कर्तुं त्वमर्हसीत्यर्थः ॥ २० ॥

श्री० टी०—अत्र सदाचारं प्रमाणयति—**कर्मणैवेति** । कर्मणैव शुद्धसत्त्वाः सन्तः संसिद्धिं सम्यग्ज्ञानं प्राप्ता इत्यर्थः । यद्यपि त्वं सम्यग्ज्ञानिनमेवात्मानं मन्यसे तथापि कर्माचरणं भद्रमेवेत्याह—**लोकसंग्रहमिति** । लोकस्य संग्रहः स्वधर्मे प्रवर्तनं मया कर्माणि कृते जनः सर्वोऽपि करिष्यति अन्यथा ज्ञानिदृष्टान्तेन अज्ञः कर्म त्यजेदित्येवं लोकरक्षणमपि तावत्प्रयोजनं पश्यन्कर्म कर्तुमेवार्हसि नतु त्यक्तुमित्यर्थः ॥ २० ॥

स० टी०—ननु मे ब्रह्मजिज्ञासोर्ज्ञाननिष्ठाप्तये सदा ॥ श्रवणाद्येव कर्तव्यं कर्मत्यागपुरःसरम् ॥ १ ॥ यथा तत्त्वविदः कर्मसंन्यासोऽस्ति तथा मम ॥ बुभुत्सोरपि संन्यासः किं न स्यादिति चेच्छृणु ॥ २ ॥ श्रुतिस्मृतिप्रसिद्धा ये क्षत्रिया जनकादयः ॥ मुमुक्षवो वा विद्वांसः स्वधर्मेण सहैव ते ॥ ३ ॥ धीशुद्धिं ज्ञाननिष्ठां वा प्राप्ता न त्यागतो यतः ॥ ततोऽपि त्वं बुभुत्सुर्वा विद्वान्वा क्षत्रियत्वतः ॥ ४ ॥ स्वधर्माचरणं सम्यक्कर्तुमेव सदार्हसि ॥ संन्यासविधिवाक्ये हि ब्राह्मणत्वं विवक्षितम् ॥ ५ ॥ संन्यासाभाव एवास्ति यतः क्षत्रियवैश्ययोः ॥ चत्वार आश्रमा विप्रे राजन्यस्य त्रयः स्मृताः ॥६ ॥ द्वौ वैश्यस्य स्मृतौ सिद्धौ पुराणे भारते तथा ॥ मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ॥ ७ ॥ बाहुजातोरुजातानां नायं धर्मः प्रशस्यते ॥ जनकादिसमाचारं पश्यंस्त्वं कर्म साधय ॥ ८ ॥ स्वे स्वे धर्मे च लोकानामुन्मार्गाद्विनिवर्त्य यत् ॥ स्थापनं प्रोच्यते लोकसंग्रहस्तं त्वमाश्रय ॥ ९ ॥ सर्वे राजाश्रिता धर्मा राजा धर्मस्य धारकः ॥ १० ॥ २० ॥

भा० टी०—हि यस्माच्च जनकादयो जनकाश्वपतिप्रभृतयः पूर्वे क्षत्रियाः कर्मणैव संसिद्धिं मोक्षं गन्तुमास्थिताः प्रवृत्ताः श्रवणादिसाध्यां ज्ञाननिष्ठां प्राप्ता इति वा । इदं व्याख्यानं परमाप्नोति पूरुष इति पूर्वोक्ताननुगुणमत आचार्यैः परित्यक्तम् । यदि प्राप्तसम्यग्दर्शनास्तर्हि लोकसंग्रहार्थं प्रारब्धकर्मत्वात्कर्मणा सहैवासंन्यस्यैवाथाप्राप्तसम्यग्दर्शनास्तदा कर्मणा चित्तशुद्धिसाधनभूतेन कर्मणेत्यर्थः । पूर्वैरप्यज्ञानवद्भिरेव कर्तव्यं कर्म कृतमतो नावश्यमन्येन तत्त्वज्ञेन कृतार्थेन कर्तव्यमिति चेत्तथापि प्रारब्धकर्माधीनस्त्वं लोकस्योन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहस्तमेवापि प्रयोजनं संपश्यन्कर्तुमर्हसीत्यर्थः ॥ २० ॥

प० टी०—अत्रार्थे सदाचारं प्रमाणयति—**कर्मणैवेति** । जनकादयो राजानोऽपि वर्णाश्रमोचितेन कर्मणैव कृत्वा सिद्धिं तत्त्वज्ञानरूपिणीं प्राप्ताः । अथ तत्त्वज्ञानोत्पत्तावपि कर्म न त्याज्यमित्याह—**लोकसंग्रहमिति** । लोकसंग्रहमपि पश्यन् कर्तुमर्हसि केऽप्यल्पज्ञा वयमपि तत्त्वज्ञानिन इति मत्वा कर्म त्यक्ष्यन्ति तदर्थमपि कर्माचर । तदुक्तम्—'सर्पिरस्ति पयसीक्षुगो रसस्तैलमास्ति तिलमध्य एव तत् । लभ्यते मथनयन्त्रकर्मणा कर्मणा हृदि गता तथैव चित्' इति ॥ २० ॥

रा० टी०—ननु ज्ञानादेव मोक्षसिद्धेः कथमसक्तो ह्याचरन्नेवेत्युच्यत इत्यतो मुक्तावानन्दातिशयार्थं विहितकर्मणोऽवश्यकर्तव्यतायां ज्ञानिनामाचारमपि प्रमाणयति—**कर्मणैवेति** । सहयोगे तृतीया । जनकादयो जनकप्रियव्रतादयो ज्ञानिनः कर्मणैव कर्मसहिता एव कर्म कुर्वन्त एव संसिद्धिं संपूर्णमोक्षमास्थिताः प्राप्ताः ।

ज्ञानमात्रान्मुक्तिसिद्धावपि तत्रानन्दातिशयार्थं कर्म कुर्वन्तीत्यर्थः। तृतीयायाः करणार्थत्वेपि कर्मणा करणेन संसिद्धिं मोक्षमाप्ता इत्यर्थः। लाङ्गलेन जीवाम इतिवत् ज्ञानद्वारकत्वाभिप्रायं करणत्वमिति। यद्वा संसिद्धिं ज्ञानं कर्मणा प्राप्ता इत्यर्थः। न केवलं ज्ञानिनामाचारात्कर्म कर्तव्यं किन्त्वीश्वरप्रीतिद्वारा मुक्तिहेतुलोकसंग्रहार्थत्वाच्च कर्म कार्यमित्याह—लोकेति। लोकानामज्ञजनानां कर्माणि प्रवृत्तिरूपं संग्रहमेवापि न केवलं ज्ञान्याचारमित्यपेरर्थः। एवकारस्तु तिष्ठतु तावत्कर्मकरणेऽन्यो हेतुरित्यर्थसूचकः। संपश्यन्कर्म कर्तुमर्हसि। जनानां कर्माणि प्रवर्तनेन भगवत्प्रीतिस्तथा च मोक्षे सुखातिशय इति ज्ञेयम्। तदुक्तम् 'अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसंग्रहात्। अद्वैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा' इति ॥ २० ॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

त० टी०—ननु मया कर्मकरणे लोकसंग्रहः कथं स्यादित्यत आह—**यद्यदिति**। श्रेष्ठः जातिकुलगुणादिना लोकेऽतिशयप्रशस्यतया संमतः पुरुषो यद्यत्कर्माऽऽचरति, इतरस्ततो निकृष्टो जनस्तत्तदेवाचरति। ननु शुभाशुभाचारयोः शास्त्रमेव सर्वेषां प्रमाणं तदेव दृष्ट्वाऽन्येऽपि किं न कुर्वन्तीत्यत आह—**स इति**। स श्रेष्ठः पुरुषो यच्छास्त्रमन्यद्वा प्रमाणं कुरुते मन्यते लोकोऽज्ञजनस्तदेवानुवर्तते तदुक्तवचनं विश्वरतः कुरुते। यथा शास्त्रगर्हितमपि मत्स्यभोजनं पूर्वं केनचिच्छ्रेष्ठेन कृतं कान्यकुब्जादयस्तदनुवर्तिनो वहवो भुञ्जते तद्वत् ॥ २१ ॥

म० टी०—ननु मया कर्माणि क्रियमाणेऽपि लोकः किमिति तत्संगृह्णीयादित्याशङ्क्य श्रेष्ठाचारानुविधायित्वादित्याह—**यद्यदिति**। श्रेष्ठः प्रधानभूतो राजादिर्यद्यत्कर्माचरति शुभमशुभं वा तत्तदेवाचरतीतरः प्राकृतस्तदनुगतो जनो न त्वन्यत्स्वातन्त्र्योणेत्यर्थः। ननु शास्त्रमवलोक्याशास्त्रीयं श्रेष्ठाचारं परित्यज्य शास्त्रीयमेव कुतो नाचरति लोक इत्याशङ्क्याचारवत्प्रतिपत्तावपि श्रेष्ठानुसारितामितरस्य दर्शयति—**स यदिति**। स श्रेष्ठो यल्लौकिकं वैदिकं वा प्रमाणं कुरुते प्रमाणत्वेन मन्यते तदेव लोकोप्यनुवर्तते प्रमाणं कुरुते न तु स्वातन्त्र्येण किंचिदित्यर्थः। तथाच प्रधानभूतेन त्वया राज्ञा लोकसंरक्षणार्थं कर्म कर्तव्यमेव 'प्रधानानुयायिनो जनव्यवहारा भवन्ति' इति न्यायादित्यभिप्रायः ॥ २१ ॥

शं० टी०—मत्कर्तृकं कर्म कथं लोकस्योपकाराय भवतीति चेदुच्यते—**यद्यदाचरतीति**। वेदशास्त्राध्ययनाध्यापनयोस्तदर्थज्ञानज्ञापनयोस्तदुक्तकर्मानुष्ठानानुष्ठापनयोश्च दक्षिणः कुलशीलादिमहत्त्वसंपन्नश्च यो द्विजश्रेष्ठः यद्यच्छ्रौतं स्मार्तं वा अन्यद्वाचरति नियमेनानुतिष्ठति मुमुक्षुः इतरः पामरोपि तत्तदेव कर्माचरति न तु स्वयमप्यन्यत्करोति शास्त्रतज्ज्ञानतदुक्तकर्मपरिज्ञानाभावात्। किंच उक्तलक्षणः श्रेष्ठः यद्यच्छास्त्रं स्वयं प्रमाणं कुरुते इदमेव प्रमाणमिति व्यवहरति लोको मूढजनस्तदेव तेन प्रमाणीकृतमेव शास्त्रमनुवर्तते तदेव शास्त्रं स्वयं प्रमाणं करोति, श्रेष्ठानुसारी भवति पामर इत्यर्थः। एतेन श्रेष्ठस्य कृतार्थस्यापि लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धम् ॥ २१ ॥

श्री० टी०—कर्मकरणे लोकसंग्रहो यथा स्यात्तथाह—**यदिति**। इतरः प्राकृतो जनस्तत्तदेवाचरति स श्रेष्ठो जनः कर्मशास्त्रं निवृत्तिशास्त्रं वा यत्प्रमाणं मन्यते तदेव लोकोऽप्यनुवर्ततेऽनुसरति ॥ २१ ॥

स० टी०—कर्माणि क्रियमाणेऽपि मया कथमयं जनः॥ संगृह्णीयादिति भ्रान्तिवारणायाह माधवः ॥१॥ प्रधानभूतो राजादिर्यद्यदेव शुभाशुभम् ॥ कर्माचरति सामान्यस्तत्तदाचरतीतरः ॥ २ ॥ ननु शास्त्रं समालोच्य श्रेष्ठं शास्त्रीयमादरात् ॥ आचारं स्वयमेवान्यः कुतो नाचरतीति चेत् ॥ ३ ॥ मैवं श्रेष्ठो जनो

यद्यद्वैदिकं लौकिकं च वा ॥ प्रमाणत्वेन लोकेऽस्मिन्मन्यतेऽन्यो जनोऽपि च ॥ ४ ॥ तदेव कुरुते मानं न स्वातन्त्र्येण किंचन ॥ त्वया प्रधानभूतेन लोकसंरक्षणाय च ॥ ५ ॥ शास्त्रीयं कर्म कर्तव्यं तस्मादित्याशयो हरेः ॥ ६ ॥ २१ ॥

भा० टी०—मयि कर्माणि प्रवृत्ते कथं लोकसंग्रहो भविष्यतीत्यत आह—**यदिति** । यद्यत्कर्म श्रेष्ठः प्रधान आचरति तत्तदेव कर्मेतरोऽन्यो जनस्तदनुगत आचरति । किंच स प्रधानः यल्लौकिकं वैदिकं वा प्रमाणं कुरुते लोकस्तदनुवर्तते तदेव प्रमाणीकुरुते इत्यर्थः । यत्कर्मशास्त्रं वा निवृत्तिशास्त्रं वेत्याचार्यैः संकोचे मानाभावमभिप्रेत्य न व्याख्यातम् ॥ २१ ॥

प० टी०—अथ तदेव प्रकटयन्नाह—**यद्यदिति** । श्रेष्ठः संभावितो जनो यद्यदाचरतीतरः प्राकृतोऽपि जनस्तदेवाचरति तथा स श्रेष्ठो जनो यद्वेदशास्त्रादिकं प्रमाणत्वेन मनुते लोकोऽपि तदनुलक्षीकृत्य वर्तते ॥ २१ ॥

रा० टी०—कथं कर्मकरणेन लोकसंग्रह इत्यत आह—**यद्यदिति** । श्रेष्ठो महात्मा यत्प्रमाणं कुरुते यद्वाक्यादिकं प्रमाणं सदपि लोके प्रमाणत्वेनानवगतं प्रमाणतया ज्ञपयतीत्यर्थः । यद्वा यत्प्रमाणमित्येकं पदं बहुव्रीहिः । यत्प्रमाणं लौकिकं वैदिकं वा कर्म कुरुते तदेव लोकोऽनुवर्तते अनुसरति ॥ २१ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

त० टी०—न केवलं त्वामेवेदमाज्ञापयामि किंत्वहमपि लोकसंग्रहार्थमेव कर्म करोमीत्याह—**न मे इति** । हे पार्थ मे मम त्रिषु लोकेषु अनवाप्तमप्राप्तम् अवाप्तव्यं प्राप्तुं योग्यमपेक्षितं किंचन नास्ति, अतः कर्तव्यं नास्ति तथापि कर्मणि वर्त एव, कर्म करोम्येवेत्यर्थः ॥ २२ ॥

म० टी०—अत्र चाहमेव दृष्टान्त इत्याह त्रिभिः—**न मे इति** । हे पार्थ मे मम त्रिष्वपि लोकेषु किमपि कर्तव्यं नास्ति यतोऽनवाप्तं फलं किंचिन्ममावाप्तव्यं नास्ति तथापि वर्त एव कर्मण्यहं, कर्म करोम्येवेत्यर्थः।पार्थेति संबोधयन् विशुद्धक्षत्रियवंशोद्भवस्त्वं शूरापत्यापत्यत्वेन चात्यन्तं मत्समोऽहमिव वर्तितुमर्हसीति दर्शयति ॥ २२ ॥

शं० टी०—ननु महात्मनः कृतार्थस्य कर्मणा साध्यमपश्यतः कर्मकरणं कुत्रापि न दृष्टमित्याशङ्कायामस्मिन्नर्थे त्वहमेव प्रमाणमित्याह श्रीभगवान्—**न मे इति** । हे पार्थ षड्गुणैश्वर्यसंपन्नस्यावाप्तसर्वकामस्य सर्वेश्वरस्य मे यत्किंचित्कार्यमाप्तव्यमर्थमुद्दिश्य कर्तव्यं कर्म नास्ति तत्कुतः अनवाप्तमप्राप्तं सत् मम क्रिययाऽवाप्तव्यं प्राप्तव्यं वस्तु किंचिदपि त्रिषु लोकेषु न विद्यते । गृहस्वामिनो गृहस्थद्रव्यवद्ब्रह्माण्डस्थं सर्वं वस्तु ब्रह्माण्डस्वामिनो मे प्राप्तमेव भवति न तु प्राप्तव्यं किंचिदस्ति । एवं महाभाग्यवैराग्यज्ञानसमृद्धोऽप्यहं लोकसंग्रहात्मके कर्मणि वर्ते एव हि । चकारो ह्यर्थः । मम वैदिके लौकिके च कर्माणि प्रवर्तनं भवतां प्रत्यक्षसिद्धमिति हिः प्रसिद्धिबोधनार्थः ॥ २२ ॥

श्री० टी०—अत्र चाहमेव दृष्टान्त इत्याह त्रिभिः—**न मे पार्थेति** । हे पार्थ मे कर्तव्यं नास्ति । यतस्त्रिष्वपि लोकेष्वनवाप्तमप्राप्तं सदवाप्तव्यं प्राप्यं नास्ति । तथापि कर्मण्यहं वर्ते कर्म करोम्येवेत्यर्थः ॥ २२ ॥

स० टी०—अत्राहमेव दृष्टान्त इत्याह त्रिभिरीश्वरः ॥ ममेश्वरस्य हे पार्थ कर्तव्यं नास्ति किंचन ॥ १ ॥ लोकत्रयेऽपि यस्मान्मेऽनवाप्तं नास्ति किंचन ॥ प्राप्तव्यं तदपीशोऽहं करोम्येव जगद्धितम् ॥ २ ॥ २२ ॥

भा० टी०—अहमिव त्वमपि लोकसंग्रहं कुर्वित्याशयेनाह—**नेति** । त्रिषु लोकेषु मम कर्तव्यं किंचि-

दपि न विद्यते यस्मादनवाप्तमप्राप्तमवाप्तव्यं प्रापणीयं त्रिषु लोकेषु किंचिदपि मे नास्ति । यद्यप्येवं तथापि कर्मणि वर्त एव कर्म करोम्येवेत्यर्थः । त्वयापि मत्संबन्धित्वान्मत्पक्षपात एव कर्तव्य इति सूचयन्नाह—पार्थेति ॥ २२ ॥

प० टी०—एतन्न केवलं तुभ्यमुपदिशाम्यहमपि तथैवाचरामीत्याह—**न मे इति** । भो पार्थ त्रिष्वपि लोकेषु भूर्भुवःप्रमुखेषु, अथवा देवपितृमनुष्यलोकेषु मम कर्तव्यं किमपि नास्ति । किमुद्दिश्य कर्तव्यमित्याह—**नानवाप्तमिति** । अप्राप्तस्य प्राप्त्यर्थे प्रयत्नः कर्तव्यश्चेत्तर्हि ममानवाप्तं किमपि नास्त्यवाप्तसकलकामत्वात् । अथ कामनातीतं परं ब्रह्म प्राप्तव्यमिति मनोरथस्तर्हि किमवाप्तव्यं तत्स्वरूपेणाहमेवास्मि । एवंविधोऽप्यहं कर्मणि वर्त एवातः परिशेषाल्लोकसंग्रहार्थमेवेत्यर्थः ॥ २२ ॥

रा० टी०—किंच प्रयोजनमात्रहीनेनापि मया केवलानुग्रहेण लोकसंग्रहार्थं कर्म क्रियते मुक्तावानन्दवृद्धिप्रयोजनवता ज्ञानिना तत्कर्तव्यमिति किं वाच्यमितिभावेनाह—**न मे इत्यादित्रिभिः** । हे पार्थ मे किंचन कर्तव्यं नास्ति यतस्त्रिषु लोकेषु प्रागप्राप्तं पश्चात्प्राप्तव्यं नास्ति तथापि कर्मणि वर्त एव कर्म करोम्येव ॥ २२ ॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ॥
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

त० टी०—तदकरणे मम दोषः स्यादित्याह—**यदीति** । जातु कदाचिदतन्द्रितोऽनलसः सन्यदि कर्मण्यहं न वर्तेयं कर्म नाचरेयं, तर्हि हे पार्थ जगद्धिताय धर्मज्ञशिष्टजनाग्रवर्तिवसुदेवगृहेऽवतीर्णस्य सर्वेश्वरस्य वर्त्म कर्मानुष्ठानमार्गं मनुष्याः कर्माधिकारिणः सर्वशः सर्वप्रकारेणानुवर्तन्ते अयमेव धर्म इति स्वहिताय स्वीकुर्वन्ति ममाचारप्रमाणका भवन्तीत्यर्थः ॥ २३ ॥

म० टी०—लोकसंग्रहोऽपि न ते कर्तव्यो विफलत्वादित्याशङ्क्याह—**यदीति** । यदि पुनरहमतन्द्रितोऽनलसः सन् कर्माणि जातु कदाचिन्न वर्तेयं नानुतिष्ठेयं कर्माणि तदा मम श्रेष्ठस्य सतो वर्त्म मार्गं हे पार्थ मनुष्याः कर्माधिकारिणः सन्तः अनुवर्तन्ते अनुवर्तेरन् सर्वशः सर्वप्रकारैः ॥ २३ ॥

शं० टी०—ननु सर्वेश्वरस्य तव लोकसंग्रहोपि न कर्तव्यः अनर्थाभावादित्याशङ्क्य 'न अश्रेष्ठः श्रेष्ठानुसारी' इतिन्यायेन सर्वज्ञोऽयं कृष्ण इति सर्वे मदनुसारिणो भवन्ति मय्यकर्मणि सति सर्वेऽप्यकर्माणो भवेयुस्तेन लोकक्षतिरुपपद्यते अतः कर्म मम कर्तव्यमेवेत्याशयेनाह—**यदीति** द्वाभ्याम् । अहं कृतार्थोस्मीति वा, न कर्मणा मम साध्यमस्तीति वाऽप्यहमतन्द्रितः मन्त्रतन्त्रप्रयोगादावप्रमत्तो भूत्वा जातु क्वचित्कदाचिदपि कर्मणि विहिते न वर्तेयं यदि विहितकर्मकर्ता न स्यां चेन्मामकर्माणं दृष्ट्वा सर्वे मनुष्या अप्यकर्माणो भवेयुः । हि यस्मात्कारणान्मनुष्याः सर्वे भगवानयं सर्वज्ञ इति मयि सर्वज्ञत्वबुद्ध्या मम वर्त्म मदीयमेव मार्गमनुवर्तन्ते अश्रेष्ठस्य श्रेष्ठानुसारित्वनियमान्मया कर्मणि त्यक्ते स्वयमपि कर्म त्यजेयुरित्यर्थः ॥ २३ ॥

श्री० टी०—अकरणे लोकस्य नाशं दर्शयति—**यदीति** । जातुकदाचिद्अतन्द्रितोऽनलसः सन्यदि कर्मणि न वर्तेयं कर्म नानुतिष्ठेयं तर्हि ममैव वर्त्म मार्गं मनुष्या अनुवर्तन्ते अनुवर्तेरन्नित्यर्थः ॥ २३ ॥

स० टी०—यद्यहं जगतामीशः कर्माण्यनलसोऽपि सन् ॥ कदाचिन्नानुतिष्ठेयं तदा सर्वेशितुर्मम ॥१॥ मार्गं सर्वप्रकारैस्ते नराः कर्माधिकारिणः ॥ सर्वदैवानुवर्तेरंस्तत्र दोषं शृणुष्व भोः ॥ २ ॥ २३ ॥

भा० टी०—यद्यहमतन्द्रितोऽनलसः सन् कर्माणि कदाचिन्न वर्तेयं मम श्रेष्ठस्य वर्त्म मार्गमनुवर्तन्ते

सर्वे मनुष्याः अनुवर्तेरन् । इतरे जना अपि मम मार्गमनुवर्तन्ते त्वं संबन्धी नानुवर्तस इत्यत्याश्चर्यमिति द्योतयन् संबोधयति—पार्थेति ॥ २३ ॥

प० टी०—अथ व्यतिरेकेऽनिष्टमाह—**यदीति** । यद्यहं जातु कदाचिदप्यतन्द्रितोऽनलसः सन् कर्मणि न वर्तेयं कर्म नानुतिष्ठेयं तर्हि ममैव वर्त्म मार्गं सर्वशः सर्वे मनुष्या अनुवर्तन्तेऽनुवर्तेरन् ॥ २३ ॥

रा० टी०—यदि ह्यहं जातु कदाचिदतन्द्रितोऽनलसः कर्मणि न वर्तयं न कर्म कुर्यां तर्हि मम वर्त्म मार्गं कर्माकरणरूपं मनुष्याः सर्वशः सर्वेऽपि अनुवर्तन्ते अनुसरेयुः। मद्दृष्टान्तेन कर्म न कुर्युरित्यर्थः॥२३॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ॥
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

त० टी०—ननु लोकानां सर्वज्ञस्य सर्वश्रेष्ठस्य तवानुवर्तनमुचितमेव, तव कर्माकरणे को दोष इत्यत आह—उत्सीदेयुरिति । चेद्यद्यहं कर्म न कुर्यां तर्हीमे ममाचारानुवर्तिनो लोका जना उत्सीदेयुः कर्मविदामग्रणीर्वासुदेवो यदि कर्म न करोति तर्ह्यस्माभिरपि न कर्तव्यमिति मत्वा धर्माद्भ्रष्टा भवेयुरित्यर्थः । स्वधर्मानियमत्यागात्संकरः वर्णानां सांकर्यं स्यात्तस्य कर्ताऽहमेव स्यां ततश्चेमाः प्रजा उपहन्यां नरकपातार्हताहेतुना विनाशकर्ता स्यामित्यर्थः । एवं सर्वलोकसंरक्षणार्थमवतीर्णस्य मम महान्दोष एव स्यादिति भावः ॥ २४ ॥

म० टी०—श्रेष्ठस्य तव मार्गानुवर्तित्वं मनुष्याणामुचितमेव, अनुवर्तित्वे को दोष इत्यत आह—**उत्सीदेयुरिति** ।अहमीश्वरश्चेद्यदि कर्म न कुर्यां तदा मदनुवर्तिनां मन्वादीनामपि कर्मानुपपत्तेः लोकस्थितिहेतोः कर्मणो लोपेनेमे सर्वे लोका उत्सीदेयुर्विनश्येयुस्ततश्च वर्णसंकरस्य च कर्ताहमेव स्यां तेन चेमाः सर्वाः प्रजा अहमेवोपहन्यां धर्मलोपेन विनाशयेयं, कथं च प्रजानामनुग्रहार्थे प्रवृत्त ईश्वरोहं ताः सर्वा विनाशयेयमित्यभिप्रायः । यद्यदाचरतीत्यादेरपरा योजना। न केवलं लोकसंग्रहं पश्यन्कर्तुमर्हसि अपि तु श्रेष्ठाचारत्वादपीत्याह—**यद्यदिति** । तथा च मम श्रेष्ठस्य यादृश आचारस्तादृश एव मदनुवर्तिना त्वयानुष्ठेयो न स्वातन्त्र्येणान्य इत्यर्थः। कीदृशस्तवाचारो यो मयानुवर्तनीय इत्याकाङ्क्षायां न मे पार्थेत्यादिभिस्त्रिभिः श्लोकैस्तत्प्रदर्शनमिति।२४।

शं० टी०—ननु तैरपि कर्म त्यज्यतां ततः कोऽनर्थ इत्यत आह—**उत्सीदेयुरिति** । सर्वैः कर्मणि परित्यक्ते अन्नाद्भवन्ति भूतानि इत्युक्तरीत्या हविर्भागाभावादेवाः प्रक्षीणा भवेयुर्वृष्ट्याद्यभावान्मनुष्यादीनामनुत्पत्तिरुत्पन्नानां च विनाशः स्यात् । एतावानेवानर्थो न भवतिकिंतु वर्णसांकर्यमपिचस्यादित्याह—**संकरस्येति** । कृतकृत्यत्वाभिमानेनाऽहं लोकस्थितिकारणं वैदिकं कर्मत्याजयित्वासंकरस्यचकर्ता स्याम् । तत्तद्वर्णजातिभेदव्यवस्थापककर्माभावे सर्वेषामैकरूप्यापत्तौ वर्णाः संकीर्यन्तेसोऽपिवर्णसंकरो मत्कर्तृक एव स्यात् । एवं सांकर्यसंपादनेनाहं सर्वाः प्रजा उपहन्यां सर्वासां प्रजानामुपहतिकर्ता च स्याम् । उपहतिर्दुर्गतिप्राप्तिः सद्गतिहेतोः सत्कर्मानुष्ठानस्याभावात्सर्वे नरकभाजो भवेयुरित्यर्थः । यत एषानर्थपरंपरापत्तिस्ततः कृतकृत्यस्यापि मम तव चाप्यात्मविदोऽन्यस्य च लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धम् ॥ २४ ॥

श्री० टी०—ततः किमत आह—**उत्सीदेयुरिति** । उत्सीदेयुः कर्मलोपेन नश्येयुः ततश्च यो वर्णसंकरो भवेत्तस्याप्यहमेव कर्ता स्यां भवेयम् । एवमहमेव प्रजा उपहन्यां मलिनीकुर्याम् ॥ २४ ॥

स० टी०—यद्यहं कर्म नो कुर्यां तदा मदनुवर्तिनाम् ॥ कर्माकरणतो लोकस्थितिहेतोश्च कर्मणः ॥ १ ॥ लोपेनैते विनश्येयुः सर्वे कर्माधिकारिणः ॥ तदा कर्ताहमेव स्यां वर्णानां संकरस्य च ॥ २ ॥ इमाः सर्वाः प्रजास्तेन धर्मलोपेन संकरात् ॥ अहमेवोपहन्यां यः प्रवृत्तोऽनुग्रहाय सः ॥ ३ ॥ २४ ॥

भा० टी०–तथाच को दोष इत्यत आह–उत्सीदेयुरिति । अहं चेत्कर्म न कुर्यां तर्हि इमे लोका उत्सीदेयुर्नश्येयुः लोकानुच्छित्तिनिमित्तकर्मणोऽभावात् संकरस्य च कर्ता स्यां तेनेमाः प्रजाः उपहन्यामतः प्रजानामनुग्रहाय प्रवृत्तस्य ममेदं नानुरूपमित्यर्थः । यत्तु यद्यदाचरतीत्यादेरपरा योजना, न केवलं लोकसंग्रहं पश्यन्कर्तुमर्हस्यपि तु श्रेष्ठाचारत्वादपीत्याह–यद्यदिति । तथाच मम श्रेष्ठस्य यादृश आचारस्तादृश एव मदनुवर्तिना त्वयानुष्ठेयो न स्वातन्त्र्येणान्य इत्यर्थः । कीदृशस्तवाचारो मयानुवर्तनीय इत्याकाङ्क्षायां न मे पार्थेत्यादिभिस्त्रिभिस्तत्प्रदर्शनामिति केषांचिद्व्याख्यानं तद्भाष्यानुगुण्येन योजनीयम् । यद्वा लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसीति पूर्वोक्तानुरोधेन लोकसंग्रहं कः कर्तुमिच्छति कथं चेत्युच्यते, यद्यदित्यस्य भाष्योक्तोत्थापनविरुद्धं न केवलमित्याद्युपेक्ष्यं कर्मणैवेत्यादिना शिष्टाचारस्योक्तत्वात् सक्ता इत्यादिना विदुषो लोकसंग्रहाय कर्माणि प्रवृत्तिं दर्शयता यदि त्वमात्मानं विद्वांसं मन्यसे तर्हि लोकसंग्रहं संप्रति पश्यन्कर्म कर्तुमर्हसीत्येवं दृढीकृतं तस्मान्मध्येऽपि स्वस्य श्रेष्ठस्य कर्माणि प्रवृत्तिं प्रत्यक्षासिद्धां दर्शयंस्तदेव द्रढयति । योजनान्तरानीतार्थस्त्वर्थात्संबोधनाद्वापि सिध्यतीति न तदर्था भाष्यविरुद्धा क्लिष्टयोजना प्रदर्शनीयेति दिक् ॥ २४ ॥

प० टी०–नन्वसङ्गोदासीनस्य तव लोके किं प्रयोजनमित्याशङ्क्य वर्णाश्रमधर्मप्रवर्तकः सन् परमकारुणिकोऽस्मीत्याह–उत्सीदेयुरिति । अहं चेत्कर्म न कुर्यां तर्हीमे लोका उत्सीदेयुः स्वकर्मलोपेन भ्रंशेयुः । ततश्च यो वर्णसंकरो भविष्यति तस्य कर्ताहमेव स्यां तेन मत्कृपापात्रत्वेन स्थिताः प्रजा उपहन्यां मालिन्योपहताः कुर्याम् । यथा मार्गभ्रष्टानां रङ्कानां व्याघ्रचोरादिभीतिर्मा भूदिति कृपया कोऽपि मार्गद्रष्टा भवति प्रकृतेऽपि तथैव ॥ २४ ॥

रा० टी०–ततः को दोष इत्यत उच्यते–उत्सीदेयुरिति । अहं चेत्कर्म न कुर्यां तदा इमे लोकाः उत्सीदेयुः कर्मलोपेन नरकं प्राप्नुयुः । किंच कर्मलोपे सति ब्रह्मक्षत्रादिवर्णविवेको न स्यात् । अतो वर्णसंकरस्य च कर्ता स्यां भवेयम् । एवमहमेव प्रजा उपहन्यां हतवान् भवेयम् ॥ २४ ॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ॥
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

त० टी०–तस्माद्विदुषाऽपि लोकोपकारार्थं कर्म कर्तव्यमित्याह–सक्ता इति त्रिभिः । अविद्वांसो वेदान्ततत्त्वज्ञानहीनाः कर्माणि सक्ता अभिनिविष्टाः सन्तो यथा कर्म कुर्वन्ति, विद्वानात्मानात्मविवेकज्ञोऽसक्तः कर्मणि तत्फलेऽभिनिवेशवर्जितः सन् लोकसंग्रहं चिकीर्षुः स्वाचारेण लोकानां स्वधर्मे निश्चयं कर्तुमिच्छुस्तथाऽविद्वद्वत्कुर्यात् ॥ २५ ॥

म० टी०–ननु तवेश्वरस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्यापि कर्तृत्वाभिमानाभावान्न कापि क्षतिः मम तु जीवस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिभवः स्यादित्यत आह–सक्ता इति । सक्ताः कर्तृत्वाभिमानेन फलाभिसन्धिना च कर्मण्यभिनिविष्टा अविद्वांसोऽज्ञा यथा कुर्वन्ति कर्म लोकसंग्रहं कर्तुमिच्छुर्विद्वानात्मविदपि तथैव कुर्यात् किंतु असक्तः सन् कर्तृत्वाभिमानं फलाभिसन्धिं चाकुर्वन्नित्यर्थः । भारतेति भरतवंशोद्भवत्वेन भा ज्ञानं तस्यां रतत्वेन वा त्वं यथोक्तशास्त्रार्थबोधयोग्योऽसीति दर्शयति ॥ २५ ॥

शं० टी०–तर्हि लोकहितार्थं कर्मणि प्रवृत्तेन विदुषा कथं कर्म कर्तव्यमित्याकाङ्क्षायामाह–सक्ता इति । अविद्वांसोऽनात्मज्ञाः कर्मणि कर्मजन्यफले स्वर्गपुत्रधनादौ सक्ता आसक्तिमन्तो भूत्वा नियमेन श्रद्धाभक्तिभ्यां यथा विहितं कर्म कुर्वन्ति तथैव वर्तमानः सन् लोकसंग्रहं चिकीर्षुर्विद्वान् ब्रह्मविदाधिकारिकः

स्वयमसक्तः कर्तृत्वाभिनिवेशरहितः फलापेक्षारहितोऽपि भूत्वा कर्म कुर्यादेवं कुर्वन्स्वयं तीर्णः परानपि तारयतीति भावः । कर्तृत्वाभिनिवेशराहितत्वं फलानपेक्षित्वं साकल्यवैकल्ययोर्हर्षविषादशून्यत्वं च तज्ज्ञाज्ञयोर्वैलक्षण्यं नियमेन कर्मकरणं तूभयत्र सममेव ॥ २५ ॥

श्री० टी०—तस्मादात्मविदापि लोकसंग्रहार्थं तत्कृपया कर्म कार्यमेवेत्युपसंहरति—**सक्ता इति** । कर्माणि सक्ता अभिनिविष्टाः सन्तोऽज्ञा यथा कर्म कुर्वन्ति, असक्तः सन् विद्वानपि तथैव कुर्यात् लोकसंग्रहं कर्तुमिच्छुः ॥ २५ ॥

म० टी०—नन्वीश्वरस्य तव तु कर्तृत्वादेरभावतः ॥ न क्षतिर्मे त्वनीशस्य क्षतिर्ज्ञानाभिभूतितः ॥१॥ कर्मणि क्रियमाणे स्यादित्याशङ्क्याह माधवः ॥ यथा फलानुरागेण कर्तृत्वाभिनिवेशतः ॥ २ ॥ कर्मण्यभिनिविष्टाश्च कुर्वन्त्यज्ञाः स्वकर्म तत् ॥ तथैव कर्तुमिच्छुः सन्नात्मविल्लोकसंग्रहम् ॥ ३ ॥ कुर्यात्त्यक्त्वा फले रागं कर्तृत्वाभिमतिं तथा ॥ तथाच क्रियमाणेऽपि कर्मण्यात्मविदो नहि ॥ ४ ॥ क्षतिर्नापि मुमुक्षोर्वा धीशुद्ध्यर्थं प्रकुर्वतः ॥ किंतु कर्तृत्वधीः कर्मफले रागश्च बन्धने ॥ ५ ॥ हेतुस्तस्माद्द्वयं त्यक्त्वा कुर्वन्नाप्नोति वन्धनम् ॥ भो ज्ञानं तद्रतत्वेन यथोक्तं वोद्धुमर्हसि ॥ ६ ॥ यद्वोत्कृष्टकुलोत्पन्नतया भारतशब्दतः ॥७॥२५॥

भा० टी०—यथाहं कृतार्थो लोकसंग्रहार्थं कर्म करोमि तथा त्वमन्यो वा विद्वांस्तदर्थं कर्म कुर्यादित्याह—**सक्ता इति** । यथाऽविद्वांसः कर्माणि सक्ताः कर्तृत्वाभिमानफलाभिसंधिभ्यामासक्ताः कर्म कुर्वन्ति तथाऽसक्तः सन् विद्वानात्मविल्लोकसंग्रहं कर्तुमिच्छुः कर्म कुर्यात् । तव तु भरतवंशोद्भवत्वादपि लोकसंग्रहोऽवश्यं संपाद्य इति सूचयन्नाह—भारतेति ॥ २५ ॥

प० टी०—एवमस्मद्दृष्टान्तेन सद्भिरपि कथं न वर्तितव्यमित्याह—**सक्ता इति** । अविद्वांसः परमार्थानभिज्ञाः कर्मजडाः कर्माणि सक्ताः साक्षात्कर्मणः फलावश्यंभावानियम इति निश्चित्य फलाशया प्रवृत्ताः सन्तो यथा कुर्वन्त्येवमसक्तोऽपि विद्वांस्तथाविधमार्गमनुलङ्घ्य कुर्यात् । किंभूतो लोकसंग्रहं चिकीर्षुरिति पूर्ववत् ॥ २५ ॥

रा० टी०—ननु अज्ञवदाग्रहेण ज्ञानिनापि कर्म कार्यं चेद्विद्वदविद्वत्कर्मणोरविशेषप्रसङ्ग इत्यत आह—**सक्ता इति** । हे भारत अविद्वांसोऽज्ञाः कर्माणि सक्ता अभिनिविष्टाः फलेच्छावन्तः सन्तो यथा कर्म कुर्वन्ति तथा विद्वान् ज्ञान्यपि असक्तः फलेच्छाहीनः सन् लोकसंग्रहं चिकीर्षुः कर्म कुर्यादित्यर्थः । सक्त्यसक्तिपूर्वकत्वेन कर्मानुष्ठानं तयोर्विशेष इति भावः ॥ २५ ॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥
जोषयेत्[1]सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

त० टी०—ननु पङ्कक्षिप्तानां पङ्क (नि) पातनवत्कर्मासक्तानामज्ञानां कर्मण्येव प्रवर्तनमहितमेव कृतं स्यादतस्तद्धितेप्सुना विदुषा ज्ञानमेवोपदेष्टव्यमिति चेत्तत्राह—**न बुद्धिभेदमिति** । अज्ञानामन्तःकरणशुद्ध्यभावात्तत्त्वोपदेशानर्हाणामत एव कर्मसङ्गिनामनादिकर्मवासनयाऽशुद्धमनस्त्वेन कर्मण्येवारूढमतीनामात्मज्ञानं विना कर्मभिर्मोक्षो नास्तीति बुद्धिभेदं न जनयेन्नोत्पादयेत् । किं तर्हि एते ज्ञानेऽनधिकृताः कर्मच्युता भ्रष्टा भवेयुरिति विद्वान् तेषां हितबुद्ध्या युक्तः सन्सर्वकर्माणि नित्यनैमित्तिकानि समाचरन् अज्ञान्कर्मसु जोषयेत् प्रीतिं जनयेत् ॥ २६ ॥

म० टी०—ननु कर्मानुष्ठानेनैव लोकसंग्रहः कर्तव्यो न तु तत्त्वज्ञानोपदेशेनेति को हेतुरत आह—**नेति** । अज्ञानामविवेकिनां कर्तृत्वाभिमानेन फलाभिसन्धिना च कर्मसङ्गिनां कर्मण्यभिनिविष्टानां या बुद्धिरहमेत-

१ योजयेत् इति प. प्र. धृतः पाठः ।

स्कर्म करिष्ये एतत्फलं च भोक्ष्य इति तस्या भेदं विचालनमकर्त्रात्मोपदेशेन न कुर्यात् किंतु युक्तोऽवहितः सन् विद्वान् लोकसंग्रहं चिकीर्षुः अविद्वदधिकारिकाणि सर्वकर्माणि समाचरन् तेषां श्रद्धामुत्पाद्य जोषयेत् प्रीत्या सेवयेत्, अनधिकारिणामुपदेशेन बुद्धिविचालने कृते कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानुत्पत्तेरुभयभ्रष्टत्वं स्यात् । तथा चोक्तम् ' अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् । महानिरयजालेषु स तेन विनियोजितः' इति ॥ २६ ॥

शं० टी०—किंच—न बुद्धिभेदमिति । विद्वान् ब्रह्मवित्स्वयं युक्त आत्मनो देहादितादात्म्याभावदर्शनयोगनिष्ठो भूत्वा समाचरन् कालोचितं कर्म कुर्वन् कर्मसङ्गिनां कर्मासक्तानां फलापेक्षया नियमेन कर्म कुर्वतामित्यर्थः । यद्वा देहेन्द्रियादिभिरेव क्रियमाणेषु कर्मस्वहं कर्ता भोक्तेत्यभिमानः सङ्गः स येषां तेषां कर्मसङ्गिनामतत्त्वविदां मूढानां स्वयं पण्डितत्वाभिमानेन बुद्धिभेदम् "ज्योतिष्टोमेन स्वर्गकामः" इति वचनात् ज्योतिष्टोमं कृत्वा स्वर्गफलं भोक्ष्य इत्यादिफलविषया या कामना बुद्धिस्तस्या भेदं चालनं न जनयेत् न कर्माणि कामनया कर्तव्यानीति वा स्वर्गादिफलमसदिति वा कर्त्रादि सर्वं मिथ्येति वा तेषां बुद्धेर्वैकल्यं न संपादयेत् किंतु "अक्षय्यं ह वै चातुर्मास्ययाजिनः" इति "पश्यति पुत्रं पश्यति पौत्रम्" इति 'तस्माद्धर्मं परमं वदन्ति' इत्यादिना च सर्वाणि कर्माणि वैदिकानि जोषयेत् प्रीणयेत् कर्मफलस्तुत्या कर्माणि कर्तुमिच्छामेव संपादयेदित्यर्थः ॥ २६ ॥

श्री० टी०—ननु कृपया तत्त्वज्ञानमेवोपदेष्टुं युक्तं, नेत्याह—नेति । अज्ञानामत एव कर्मसङ्गिनां कर्मासक्तानामकर्तात्मोपदेशेन बुद्धेर्भेदमन्यथात्वं न जनयेत् कर्मणः सकाशाद्बुद्धिचालनं न कुर्यात् अपितु जोषयेत् सेवयेत् । जुषी प्रीतिसेवनयोः । अज्ञान् कर्माणि कारयेत् । कथं युक्तः अवहितो भूत्वा स्वयं च समाचरन् । बुद्धिचालने कृते सति कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानुत्पत्तेस्तेषामुभयभ्रंशः स्यादिति भावः ॥२६॥

स० टी०—अनुष्ठानेन धर्मस्य कर्तव्यो लोकसंग्रहः ॥ तत्त्वज्ञानोपदेशेन कर्मणोऽज्ञान्न चालयेत् ॥ १ ॥ अविवेकवतां यास्ति कर्तृत्वाभिनिवेशिनाम् ॥ फलाभिसन्धिनां बुद्धिरिदं कर्म करोम्यहम् ॥ २ ॥ भोक्ष्येऽहं तत्फलं चेति तस्याः कुर्यान्न चालनम् ॥ अकर्त्रात्मोपदेशेन किंतु भूत्वा समाहितः ॥ ३ ॥ आत्मवित्सर्वकर्माणि चिकीर्षुर्लोकसंग्रहम् ॥ कुर्वंस्तेषां समुत्पाद्य श्रद्धां प्रीत्या हि सेवयेत् ॥ ४ ॥ अकर्त्रात्मोपदेशेन कृते बुद्धेर्विचालने ॥ कर्मश्रद्धानिवृत्त्या स्याद्धर्मभ्रष्टो जनस्ततः ॥ ५ ॥ चित्तशुद्धेरभावात्स्याज्ज्ञानानुत्पत्तिदूषणम् ॥ उभयभ्रष्टता पुंसां स्यात्तथोक्तं महर्षिणा ॥ ६ ॥ अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ॥ महानिरयजालेषु स तेन विनियोजितः ॥ ७ ॥ २६ ॥

भा० टी०—लोकसंग्रहं चिकीर्षोस्तत्त्वविद इदमुपदिश्यते—**नेति ।** अज्ञानामत एव कर्मसङ्गिनां फलार्थे कर्मण्यासक्तानामिदं कर्म मयावश्यं कर्तव्यं तत्फलं च भोक्तव्यमिति निश्चितरूपाया बुद्धेर्भेदनं चालनं न कर्मणेत्याद्युपदेशेन नोत्पादयेत् किंतु विद्वान्युक्तः समाहितः सन्नविदुषां कर्म स्वयं समाचरन् सर्वकर्माणि जोषयेत् कारयेदन्यथा कर्मसु तेषां श्रद्धापगमे चित्तशुद्ध्यभावाज्ज्ञानाप्राप्त्योभयभ्रष्टत्वं स्यादिति भावः ॥ २६ ॥

प० टी०—अथ कृपालुना लोकानां तत्त्वज्ञानमेव कथं नोपदिश्यत इत्याशङ्क्य नह्यज्ञानां तत्त्वोपदेशाधिकार इत्याह—**न बुद्धिभेदमिति ।** कर्मसङ्गिनां कर्ममार्गप्रवृत्तानामात्मोपदेशेन बुद्धिभेदं न जनयेद्यतस्तथा कृते सत्युभयभ्रष्टता स्यात् । तर्हि किं कुर्यादित्याह—**योजयेदिति ।** युक्तः कर्मकौशलवान् विद्वानपि समाचरन् सम्यगाचरन् सन् सर्वकर्माणि योजयेत्कारयेज्जोषयेत्सेवेत वा ॥ २६ ॥

रा० टी०—अज्ञानां कर्माणि सक्तिं जनयितुमपि ज्ञानिना कर्म कार्यमित्याह—न बुद्धीति । अज्ञानां भगवत्स्वरूपमजानतां कर्मसङ्गिनां कर्माभिनिवेशिनां बुद्धेर्भेदं विपर्यासं न जनयेत् कर्मानुष्ठानाद्बुद्धेश्चालनं

न कुर्यात् । विद्वान्युक्तो भगवति मनोयोगवान् तत्पूजात्वेनेतियावत्, कर्म समाचरन् सर्वकर्माणि जोषयेत् सेवयेत् । अज्ञानिति शेषः ॥ २६ ॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥
अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

त० टी०—ननु विदुषोऽप्यविद्वद्वत्कर्मानुष्ठानं चेत्तर्ह्यविदुषो विदुषः को विशेष इत्याकाङ्क्षोपशमार्थं तद्विशेषं दर्शयति—प्रकृतेरिति द्वाभ्याम् । प्रकृतिरीश्वरस्याचिच्छक्तिर्माया तस्या गुणैः सत्त्वादिभिर्देहेन्द्रियरूपेण परिणतैः सर्वशः सर्वप्रकारेण क्रियमाणानि कर्माणि अहंकारविमूढात्मा अनात्मनि देहादावात्मबुद्धिरहंकारस्तेन विमूढ आत्मा मनो यस्य सोऽहं कर्ता इति मन्यते, नतु गुणांस्तत्कार्यभूतान्देहेन्द्रियादीन्वा । यद्यपि "कर्ता शास्त्रार्थवत्त्वात्" इत्यादिशास्त्रादात्मनः कर्तृत्वमस्ति, तथापि बद्धावस्थायां संकुचितज्ञानत्वाद्देहेन्द्रियाद्यधीनं कर्तृत्वं न केवलस्यात्मनः 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' इति वक्ष्यमाणत्वात् । अत एव अहंकारविमूढात्मा कर्ताऽहमिति मन्यते इत्युक्तम्, अन्यथा "यक्ष्यन् क्रीडन् रममाणः सह ब्रह्मणा विपश्चिता" इति मोक्षदशायामप्यात्मनः कर्तृत्वप्रतिपादकश्रुतिबाधः स्यादित्यलं विस्तरेण ॥ २७ ॥

म० टी०—विद्वदविदुषोः कर्मानुष्ठानसाम्येपि कर्तृत्वाभिमानतदभावाभ्यां विशेषं दर्शयन्सक्ताः कर्मणीति श्लोकार्थं विवृणोति द्वाभ्याम्—प्रकृतेरिति । प्रकृतिर्माया सत्त्वरजस्तमोगुणमयी मिथ्याज्ञानात्मिका पारमेश्वरी शक्तिः "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतेस्तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकारणरूपैः क्रियमाणानि लौकिकानि वैदिकानि च कर्माणि सर्वशः सर्वप्रकारैः अहंकारेण कार्यकारणसङ्घातात्मप्रत्ययेन विमूढः स्वरूपविवेकासमर्थ आत्मान्तःकरणं यस्य सोहंकारविमूढात्मा अनात्मन्यात्माभिमानी तानि कर्माणि कर्ताहमिति करोम्यहमिति मन्यते । कर्त्रध्यासेन कर्ताहमिति तृन्प्रत्ययः तेन "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति षष्ठीप्रतिषेधः ॥ २७ ॥

शं० टी०—मूढानामेव कर्म न तु पण्डितानामिति सूचयितुमज्ञानां कर्मसङ्गिनामित्युक्तम् । कर्मसङ्गिनामिति यदुक्तं तदेव विस्पष्टयति—प्रकृतेरिति । प्रकृतिर्माया सत्त्वादिगुणद्वारा आकाशादिमहाभूतरूपेण परिणता तस्याः प्रकृतेर्गुणाः कार्यभूताः देहेन्द्रियादयस्तैरेव न कचिदप्यात्मना क्रियमाणानि सर्वाणि कर्माणि प्रति अविद्वानहंकारविमूढात्मा स्वाविद्यया देहेन्द्रियादावनात्मन्यहमितिबुद्धिरहंकारस्तेन विमूढो विपरीतग्रहणतत्पर आत्मा मनो यस्य सोहंकारविमूढात्मा । यद्वा विमूढ इत्यत्रान्तर्गर्भितो णिच् देहेन्द्रियादिष्वहंकरणेन विमोहितो द्रष्टाहं स्प्रष्टाहं श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता भोक्तेति तत्तदुपाधिसंबन्धसंभावितविपरीतवृत्तीनां विषयतां गमित आत्मा प्रत्यग्लक्षणो येन सोहंकारविमूढात्मा । यद्वा देहेन्द्रियादिष्वहंकरणेन विमोहितोऽहंप्रत्ययार्थत्वेनाऽविदित आत्मा येन सोऽहंकारविमूढात्मा कर्ताहमिति मन्यते दुष्टादुष्टप्रारब्धवशाद्देहेन्द्रियैः कृतेषु दुष्टेष्वदुष्टेष्वपि कर्मस्वकर्तारमेवात्मानं मया पापं कृतं पुण्यं कृतमिति तत्तत्क्रियायाः कर्तारमेव पश्यतीत्यर्थः ॥ २७ ॥

श्री० टी०—ननु विदुषापि चेत्कर्म कर्तव्यं तर्हि विद्वदविदुषोः को विशेष इति चेत्तं दर्शयति—प्रकृतेरिति द्वाभ्याम् । प्रकृतेर्गुणैः प्रकृतिकार्यैरिन्द्रियैः सर्वप्रकारेण क्रियमाणानि यानि कर्माणि तान्यहमेव कर्ता करोमीति मन्यते । तत्र हेतुः अहंकारेण इन्द्रियादिष्वात्माध्यासेन विमूढ आत्मा बुद्धिर्यस्य सः ॥ २७ ॥

स० टी०–कर्मानुष्ठानसाम्येऽपि विशेषश्चाज्ञतज्ज्ञयोः ॥ अध्यासतदभावाभ्यां कर्तृत्वादेः प्रदर्श्यते ॥१॥ मिथ्याज्ञानात्मिका माया प्रकृतिः पारमेश्वरी ॥ कार्यकारणरूपेण तस्याः परिणतैर्गुणैः ॥ २ ॥ क्रियमाणानि कर्माणि श्रौतानि लौकिकानि च ॥ सर्वप्रकारैस्तत्रायं कार्यकारणसंहतौ ॥ ३ ॥ आत्मत्वाध्यासतः स्वात्मविवेकाक्षममानसः ॥ तानि कर्माणि कर्ताहं करोमीत्यभिमन्यते ॥ ४ ॥ अक्रिये कर्तृताध्यासादात्माज्ञानावृतो जनः ॥ जन्ममृत्युमयीं घोरां संसृतिं याति दुःसहाम् ॥ ५ ॥ २७ ॥

भा० टी०–सक्ताः कर्मणीत्येतं श्लोकं व्याचष्टे–**प्रकृतेरिति** द्वाभ्याम् । प्रकृतेः प्रधानस्य मायाशक्तेर्गुणैर्विकारैः कार्यकारणरूपैः क्रियमाणानि कर्माणि सर्वाणि सर्वप्रकारैः कार्यकरणसंघातेऽहंप्रत्ययोऽहंकारस्तेन विमूढः स्वात्मस्वरूपविवेकासमर्थः आत्मान्तःकरणं यस्य सोऽविद्यया कर्मणामहं कर्तेति मन्यते ॥ २७ ॥

प० टी०–अथ कर्मकरणे सर्वेषां विधिस्तुल्य एव, तथाच विद्वदविदुषां को भेद इत्याह–**प्रकृतेरिति** द्वाभ्याम् । प्रकृतेर्गुणैः प्रकृतिकार्यैरिन्द्रियैः क्रियमाणानि सर्वाणि तान्यहमेव करोमीत्यहंकारेणेन्द्रियादिष्वात्माध्यासेन विमूढ आत्मा बुद्धिर्यस्य सोऽहं कर्तेति मन्यते कर्तृत्वाभिनिविष्टो भवति तेन वध्यते ॥ २७ ॥

रा० टी०–ज्ञान्यज्ञानिनोः सक्ताः इत्यादि श्लोकद्वयोक्तं कर्मानुष्ठानवैलक्षण्यं प्रपञ्चयति–**प्रकृतेरित्यादि**-श्लोकत्रयेण । अत्र प्रकृतिशब्देन जीवस्वभावेश्वरजडप्रकृतयो ग्राह्याः । प्रकृतेः प्रकृष्टकृतिमत्त्वहेतुना प्रकृतिपदवाच्यस्य हरेर्गुणैरिच्छाज्ञानप्रयत्नादिरूपगुणैर्धर्मैः स्वतन्त्रैः, तथा प्रकृतेः उत्तममध्यमाधमरूपजीवराशिस्वभावस्य गुणैरनुगुणैस्तत्त्वज्ञानमिश्रज्ञानमिथ्याज्ञानादिरूपधर्मैरीशाधीनैः, तथा प्रकृतेर्जडप्रकृतेः संबन्धिभिर्गुणैस्तत्कार्यभूतैः सत्त्वरजस्तमोगुणैः प्रकृतेर्विकारभूतैर्देहेन्द्रियान्तःकरणरूपगुणैः क्रियमाणानि कर्माणि साधुकर्ममिश्रकर्मासाधुकर्माणि प्रति अहंकारविमूढात्मा सन् कर्ताहं स्वतन्त्रकर्ताहमिति मन्यते । ईश्वरः स्वतन्त्रकर्ता सन् स्वज्ञानेच्छादिना स्वाधीनकर्त्रा त्रिविधजीवस्वभावमनुसृत्य प्रकृतिविकारजीवकरणैः प्रकृतिकार्यसत्त्वादिगुणरूपोपादानकारणेन क्रियमाणकर्मणामहमेव स्वतन्त्रकर्तेत्यात्मानमज्ञो जनो मन्यत इत्यर्थः २७

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

त० टी०–गुणानां सकार्याणां सत्त्वादीनां विभागः, कर्माणि सत्त्वाद्यनुगुणानि तेषां च विभागः दैहिकमानसादिरूपः, तयोर्विभागयोस्तत्त्वं याथात्म्यं वेत्तीति गुणकर्मविभागवित् स तु गुणाः सत्त्वादिकार्यभूता मनोवाक्शरीररूपाः गुणेषु स्वस्वकर्मभूतविषयेषु वर्तन्त इति मत्वा न सज्जते अहमेव करोमीति न मन्यते ॥ २८ ॥

म० टी०–विद्वांस्तु तथा न मन्यत इत्याह--**तत्त्वविदिति**। तत्त्वं याथात्म्यं वेत्तीति तत्त्ववित् । तुशब्देन तस्याज्ञाद्वैशिष्ट्यमाह । कस्य तत्त्वमित्यत आह–गुणकर्मविभागयोः गुणा देहेन्द्रियान्तःकरणान्यहंकारास्पदानि कर्माणि च तेषां व्यापारभूतानि ममकारास्पदानीति । गुणकर्मेति द्वन्द्वैकवद्भावः । विभज्यते सर्वेषां जडानां विकारिणां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसङ्ग आत्मा । गुणकर्म च विभागश्चेति द्वन्द्वः तयोर्गुणकर्मविभागयोर्भास्यभासकयोर्जडचैतन्ययोर्विकारिनिर्विकारयोस्तत्त्वं याथात्म्यं यो वेत्ति स गुणाः करणात्मका गुणेषु विषयेषु प्रवर्तन्ते विकारित्वात् न तु निर्विकार आत्मेति मत्वा न सज्जते सक्तिं कर्तृत्वाभिनिवेशमतत्त्वविदिव न करोति । हे महाबाहो इति संबोधयन्सामुद्रिकोक्तसत्पुरुषलक्षणयोगित्वान्न पृथग्जनसाधारण्येन त्वमविवेकी भवितुमर्हसीति सूचयति । गुणविभागस्य कर्मविभागस्य च तत्त्वविदिति वा अस्मिन्पक्षे गुणकर्मणोरित्येतावतैव निर्वाहे विभागपदस्य प्रयोजनं चिन्त्यम् ॥ २८ ॥

शं० टी०—विद्वान् युक्त इति यदुक्तमात्मनो देहेन्द्रियतत्कर्मसंबन्धाभावदर्शनं विदुषस्तदनेन प्रतिपाद्यते—तत्त्वविदिति। गुणकर्मविभागयोः गुणाश्चक्षुरादयो वागादयो बुद्धिर्मनश्च। तत्र चक्षुःश्रोत्रादीनामेव दर्शनश्रवणादिक्रिया वाक्पाण्यादीनामेव वचनादानादिक्रिया बुद्धेरेवाहंकरणक्रिया मनस एव संकल्पनक्रिया आत्मनस्तु कूटस्थासङ्गचिद्रूपेणावस्थानमात्रम् एवं गुणविभागः कर्मविभागश्च तयोर्गुणकर्मविभागयोरात्मनश्च तत्त्वं याथात्म्यं सम्यग्वेत्तीति तत्त्वविद्विद्वान्। तुशब्दोऽविद्वद्व्यावृत्त्यर्थः। सर्वकर्मसु गुणाश्चक्षुरादय एव गुणेषु रूपादिषु वर्तन्ते वागादय एव वचनादिषु वर्तन्ते बुद्धिरेव तेषां कर्मस्वहं कर्तेत्यहंकरोति अहं तु न शृणोमि न पश्यामि न वदामि न करोमि न गच्छामि किंतु कूटस्थासङ्गचिदात्मना सर्वदा तूष्णीमेवासामिति मत्वा निश्चित्य तेषां कर्मसु न सज्जते तत्राहं ममेति प्रत्ययं न करोतीत्यर्थः॥ २८॥

श्री० टी०—विद्वांस्तु तथा न मन्यत इत्याह—तत्त्वविदिति। नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः न मे कर्माणीति कर्मभ्योऽप्यात्मनो विभागस्तयोर्गुणकर्मविभागयोर्यस्तत्त्वं वेत्ति स तु न सज्जते कर्तृत्वाभिनिवेशं न करोति। तत्र हेतुः गुणा इन्द्रियाणि गुणेषु विषयेषु वर्तन्ते नाहमिति मत्वा॥ २८॥

स० टी०—विद्वांस्तु मन्यते नैवं तत्त्वं वेत्ति यतः परम्॥ कस्य तत्त्वं तदित्याह गुणकर्मविभागयोः॥ १॥ अहंकारास्पदा एव गुणा देहेन्द्रियादयः॥ तेषां व्यापारभूतानि कर्माणि विविधानि च॥ २॥ ममकारास्पदान्येव बाह्यान्याभ्यन्तराणि च॥ अत्र द्वन्द्वैकवद्भावे गुणकर्मेति बोध्यताम्॥ ३॥ भासकत्वेन सर्वेषां जडानां हि विकारिणाम्॥ विभज्यते विभागोऽयं पृथग्भवति चिद्धनः॥ ४॥ स्वप्रकाशतयासङ्ग आत्मा जडविलक्षणः॥ भास्यभासकयोरेवं जडचैतन्ययोर्द्वयोः॥ ५॥ याथात्म्यं वेत्ति यो विद्वाञ्छास्त्रानुभवयुक्तिभिः॥ विकारित्वेन वर्तन्ते गुणा हि करणात्मकाः॥ ६॥ गुणेषु विषयेष्वेवं न त्वात्माविक्रियत्वतः॥ आत्मनो निर्विकारत्वं गुणानां च विकारिताम्॥ ७॥ ज्ञात्वा कर्तृत्वबुद्धिं न करोत्येष विमूढवत्॥ सामुद्रिकोक्तसच्चिह्नयुक्तत्वात्त्वं विमूढवत्॥ ८॥ कर्तृत्वाभिनिवेशं मा कार्षीरिति महाभुज॥ ९॥ २८॥

भा० टी०—तत्त्ववित्तु तुशब्दोऽज्ञाद्वैलक्षण्यद्योतनार्थः। कस्य तत्त्वविदित्यत आह—गुणकर्मविभागयोः गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थ इति भाष्यम्। अस्यायमर्थः। नाहं कार्यकरणसंघातात्मेति गुणेभ्य आत्मनो विभागः न मे कर्माणीत्यात्मनस्तेभ्यो विभागः गुणकर्मभ्यां विभक्तात्मसाक्षात्कारवान् तथाच नायमहंकारविमूढात्मा नापि कर्मण्यासक्तो येनाहं कर्तेति मन्येत विभागपदाभावे स्वयमर्थो न लभ्यते विग्रहस्तु विभागश्च विभागश्च विभागौ गुणकर्मभ्यो विभागौ गुणकर्मविभागौ तयोर्गुणकर्मविभागयोरिति बोध्यः। एतेन गुणविभागस्य कर्मविभागस्य च तत्त्वविदिति वा अस्मिन्पक्षे गुणकर्मणोरित्येतावतैव निर्वाहे विभागपदस्य प्रयोजनं चिन्त्यमित्याक्षेपः प्रत्युक्तः। यत्त्वाक्षेप्त्रा स्वव्याख्यानं प्रदर्शितं गुणानि देहेन्द्रियान्तःकरणान्यहंकारास्पदानि कर्माणि च तेषां व्यापारभूतानि ममकारास्पदानीति गुणकर्मेति द्वन्द्वैकवद्भावः विभज्यते सर्वेषां जडानां विकारिणां भासकत्वेन यथा भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसङ्ग आत्मा गुणकर्म च विभागश्चेति द्वन्द्वः तयोर्गुणकर्मविभागयोर्भास्यभासकयोर्जडचैतन्ययोर्विकारिनिर्विकारयोस्तत्त्वं याथात्म्यं यो वेत्तीति तच्चिन्त्यं, गुणकर्मेत्यस्यैकपदत्वेऽल्पाच्त्वादभ्यर्हितत्वाच्च विभागपदस्य पूर्वनिपातापत्तेश्छान्दसत्वनिपातप्रकरणानित्यत्वयोराश्रयणस्य भाष्योक्तरीत्या सत्यां गतौ अनुचितत्वात् विभागपदस्य प्रसिद्धमर्थं परित्यज्याप्रसिद्धार्थकल्पनायाः क्लिष्टकल्पनायाश्चान्याय्यत्वादिति दिक्। यदप्यन्ये यस्तत्त्ववित्स गुणाः गुणेषु वर्तन्त इति मत्वा गुणविभागे कर्मविभागे च न सज्जत इति योजना। गुणानां सत्त्वरजस्तमसां विभागः बुद्ध्यहंकारज्ञानेन्द्रियविषयरूपेण विभज्यावस्थानं तस्मिन्न सज्जते इदमहमिति न मन्यते, एतेन

कर्मविभागोऽप्यावश्यकत्वेन व्याख्यातः अन्यथा चिदात्मन्येवादानादिकर्तृत्वं दुःखादिमत्वं चापतति। तथा-चात्मानात्मनोर्याथात्म्यज्ञः व्यापृतेष्वहंकारादिषु तत्कर्मसु चाभिमानादिषु कुसुमेषु सूत्रमिवानुवर्तमानमात्मानं तेभ्यः पृथग्भूतं जानन्गुणा धीचक्षुरादयः गुणेषु दुःखरूपादिषु वर्तन्ते न त्वात्मेति मत्वा न सज्जतेऽहमेव हस्तादिसंघातरूपो ममैवेदमादानादिकं कर्मेति न सक्तो भवतीत्यर्थ इति तदपि विचार्यं, गुणकर्मणोर्न सज्जत इत्येतावतैव निर्वाहे विभागपदवैय्यर्थ्यापत्तेः, तथाचेत्यादिग्रन्थस्य स्वव्याख्यानाननुरूपत्वाच्चेति दिक्। गुणाः करणात्मकाः गुणेषु विषयेषु प्रवर्तन्ते नात्मेति मत्वा न सज्जते सक्तिं कर्तृत्वाभिनिवेशं न करोति। महान्तौ बाहू शत्रुहनने प्रवर्तेते नाहमिति मत्वा त्वमपि कर्तृत्वाभिनिवेशं कर्तुं नार्हसीति ध्वनयन्नाह–हे महाबाहो इति ॥ २८ ॥

प० टी०–अथ ज्ञानिनो विशेषं दर्शयति–**तत्त्वविदिति**। गुणकर्मविभागयोस्तत्त्वविन्नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागो विभक्तत्वम्, न मे कर्माणीति कर्मभ्योऽप्यात्मनो विभागस्तयोस्तत्त्वं वेत्तीति तत्त्ववित् गुणा इन्द्रियाणि गुणेषु विषयेषु वर्तन्ते स्वभावतः प्रवृत्तानीति मत्वा न सज्जते कर्तृत्वाभिनिवेशं न करोति। तदुक्तम्–'धूलिधूमाम्बुदैर्यद्वन्मलिनं क्रियते नभः। परामृष्टस्तथैवात्मा विशुद्धः प्राकृतैर्गुणैः' इति ॥ २८ ॥

रा० टी०–एवमविद्वान्करोति चेत् विद्वान् कथमित्यत आह–**तत्त्वविदिति**। गुणकर्मविभागयोः गुणानामिच्छादिभगवद्गुणानां सत्त्वादिप्रकृतिगुणानां प्रकृतिविकारतया प्रकृत्युपसर्जनभूतचक्षुरादीन्द्रिशरीरमनसां चान्योन्यमुक्तविधया विभागस्य तथा कर्म च स्वतन्त्रभगवत्कर्तृकं तदायत्तजीवकर्तृकं विकाररूपप्रकृतिकर्तृकं चेति कर्मविभागस्य तत्त्ववित्तु तत्त्वज्ञानी तु गुणा भगवदिच्छादयः गुणेषु जीवस्वभावकर्मादिषु प्रेरकत्वेन वर्तन्ते भगवदिच्छाद्यनुसारेण च गुणा इन्द्रियाणि गुणेषु शब्दादिविषयेषु वर्तन्ते अतो जीवस्य न क्वापि स्वातन्त्र्यमिति मत्वा न सज्जते स्वात्मनः कर्तृत्वाभिमानेन संसारमग्नो न भवतीत्यर्थः ॥ २८ ॥

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ॥
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥

स० टी०–एवं विद्वदविदुषोर्भेदं प्रदर्श्य पुनः न बुद्धिभेदं जनयेत् इत्युक्तमेव दृढयति–प्रकृतेरिति। प्रकृतेर्गुणैः संमूढाः सन्तः पूर्वोक्तगुणकर्मसु सज्जन्ते वयमेवैतत्कर्म कृत्वैतत्फलं भोक्ष्याम इत्यमासक्ता भवन्ति तानकृत्स्नविद आत्मज्ञानहीनानत एव मन्दान्मन्दबुद्धीन् कृत्स्नवित् गुणकर्मविभागात्मवित् न विचालयेत् कर्मनिष्ठातो न च्यावयेत् ॥ २९ ॥

म० टी०–तदेवं विद्वदविदुषोः कर्मानुष्ठानसाम्येन विद्वानविदुषो बुद्धिभेदं न कुर्यादित्युक्तमुपसंहरति–**प्रकृतेरिति**। प्रकृतेः पूर्वोक्ताया मायाया गुणैः कार्यतया धर्मैर्देहादिभिर्विकारैः सम्यङ्मूढाः स्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमानास्तेषामेव गुणानां देहेन्द्रियान्तःकरणानां कर्मसु व्यापारेषु सज्जन्ते सक्तिं वयं कर्म कुर्मस्तत्फलायेति दृढतरामात्मीयबुद्धिं कुर्वन्ति ये तान् कर्मसङ्गिनोऽकृत्स्नविदोऽनात्माभिमानिनो मन्दानशुद्धचित्तत्वेन ज्ञानाधिकारमप्राप्तान् कृत्स्नवित्परिपूर्णात्मावित् स्वयं न विचालयेत्कर्मश्रद्धातो न प्रच्यावयेदित्यर्थः। ये त्वमन्दाः शुद्धान्तःकरणास्ते स्वयमेव विवेकोदये न विचलन्ति ज्ञानाधिकारं प्राप्ता इत्यभिप्रायः। कृत्स्नाकृत्स्नशब्दौ आत्मानात्मपरतया श्रुत्यर्थानुसारेण वार्तिककृद्भिर्व्याख्यातौ 'सदेवेत्यादिवाक्येभ्यः कृत्स्नं वस्तु यतोऽद्वयम्। संभवस्तद्विरुद्धस्य कुतोऽकृत्स्नस्य वस्तुनः ॥ यस्मिन्दृष्टेप्यदृष्टोर्थः स तद्वन्यश्च शिष्यते। तथादृष्टेऽपि दृष्टः स्यादकृत्स्नस्तादृगुच्यते' इति। अनात्मनः सावयवत्वादनेकधर्म-

वत्त्वाच्च केनचिद्धर्मेण केनचिदवयवेन वा विशिष्टे तस्मिन्नेकस्मिन् घटादौ ज्ञातेऽपि धर्मान्तरेणावयवान्तरेण वा विशिष्टः स एवाज्ञातोऽवशिष्यते तदन्यश्च पटादिरज्ञातोऽवशिष्यत एव तथा तस्मिन् घटादावज्ञातेऽपि पटादिर्ज्ञातः स्यादिति तज्ज्ञानेऽपि तस्यान्यस्य चाज्ञानात्तदज्ञानेऽप्यन्यज्ञानाच्च सोऽकृत्स्न उच्यते कृत्स्नस्त्वद्वय आत्मैव तज्ज्ञाने कस्यचिदवशेषस्याभावादिति श्लोकद्वयार्थः ॥ २९ ॥

शं० टी०—एवं देहेन्द्रियादिभिः क्रियमाणेषु कर्मसु स्वस्याकर्तृत्वदृष्ट्या विद्वान् स्वविलक्षणानज्ञान कर्मिणः प्रमादेनापि न विचालयेदिति पुनरुक्तमेवार्थं द्रढयति—**प्रकृतेरिति**। कर्मिणां विद्वद्वैलक्षण्यं दर्शयति—**प्रकृतेर्गुणसंमूढा** इति। प्रकृतेरुक्तलक्षणाया गुणेषु कार्येषु देहेन्द्रियादिष्वहंबुद्ध्या संमूढास्तदात्मतामापन्नाः पामराः स्वयं गुणकर्मसु गुणैः श्रवणादिभिर्वागादिभिः क्रियमाणेषु कर्मसु श्रवणदर्शनवचनादानभोजनादिष्वहमेव श्रोता द्रष्टा वक्ता दाता कर्ता भोक्तेति सज्जन्तेऽभिनिवेशं कुर्वन्ति एतान् कर्मिणोऽकृत्स्नविदोऽब्रह्मविदोऽज्ञान् कृत्स्नवित्पूर्वोक्तलक्षणो ब्रह्मविन्न विचालयेत् कामनया कर्म न कर्तव्यमिति वा कर्मफलमसादिति वा कर्त्रादि मिथ्येति वा त्वं ब्रह्मैव तव न किंचित्कर्तव्यमस्तीति वा न विक्षेपयेत् किंतु कर्मस्तुत्या कर्मस्वेव प्रवर्तयेदित्यर्थः ॥ २९ ॥

श्री० टी०—न बुद्धिभेदं जनयेदित्युक्तमुपसंहरति—**प्रकृतेरिति**। यैः प्रकृतेर्गुणैः सत्त्वादिभिः संमूढाः सन्तो गुणेष्विन्द्रियेषु तत्कर्मसु च सज्जन्ते वयं कुर्म इति तानकृत्स्नविदो मन्दमतीन्कृत्स्नवित्सर्वज्ञो न विचालयेत् ॥ २९ ॥

स० टी०—मायायाः कार्यरूपेण गुणैः परिणतैर्जनाः ॥ देहेन्द्रियादिभिः सम्यङ्मूढास्तत्राभिमानिनः ॥ १ ॥ तेषां देहेन्द्रियादीनां व्यापारेषु भ्रमावृताः ॥ स्वीयां बुद्धिं प्रकुर्वन्ति तान्मूढान्कर्मसंगिनः ॥ २ ॥ मन्दानशुद्धचित्तत्वाद्देहाद्यात्माभिमानिनः ॥ ज्ञानाधिकारमप्राप्तान्परिपूर्णात्मवित्स्वयम् ॥ ३ ॥ नैव प्रच्यावयेत्कर्मश्रद्धातोऽल्पविदो जनान् ॥ ४ ॥ २९ ॥

भा० टी०—विद्वत्स्वरूपमविद्वत्स्वरूपं च प्रकृतमुपपाद्य विद्वानविदुषो बुद्धिभेदनं न कुर्यादित्युपसंहरति—**प्रकृतेरिति**। प्रकृतेः प्रधानस्य मायाशक्तेर्गुणैः विकारैः कार्यकरणरूपैः सम्यङ्मूढाः स्वस्वरूपास्फुरणेन तानेवात्मतया मन्यमानास्तेषामेव गुणानां कर्मसु व्यापारेषु सज्जन्ते वयं कुर्मः फलायेति दृढतरस्वकीयबुद्धिं कुर्वन्ति ये तान्कर्मसङ्गिनोऽत एवाकृत्स्नविद आत्मज्ञानशून्यान् यतो मन्दप्रज्ञान् कृत्स्नविदात्मवित् "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" इतिश्रुत्याऽऽत्मविदः कृत्स्नवित्त्वप्रतिपादनात् स्वयं न विचालयेत् बुद्धिभेदं न कुर्यादित्यर्थः। प्रकृतेर्गुणैः सत्त्वादिभिरिति व्याख्यानं तु भाष्यविरुद्धं प्रकृतेः क्रिमाणानि गुणैरित्यत्रेन्द्रियैरिति स्वोक्त्यननुरूपं च। एतेन गुणेष्विन्द्रियेषु तत्कर्मसु च प्रकृतेः संबन्धिषु गुणेषु देहादिषु कर्मसु गमनादिषु चेति व्याख्यानद्वयमपि प्रत्युक्तं, देहेन्द्रियाद्यासक्तेर्गुणसंमूढा इत्यनेनैवोक्तत्वात् प्रकृतेरित्यस्य गुणकर्मस्वित्यनेन संबन्धस्य प्रयोजनशून्यत्वाच्च ॥ २९ ॥

प० टी०— अथ न बुद्धिभेदं जनयेदित्युपसंहरति—**प्रकृतेरिति**। प्रकृतेर्गुणैः सत्त्वादिभिः संमूढा मोहं प्राप्ताः सन्तो गुणकर्मसु गुणेष्विन्द्रियेषु तत्कर्मसु द्रष्टव्यश्रोतव्यादिषु च ये सज्जन्ते तानकृत्स्नविद एकैकेन्द्रियोपासकान् कृत्स्नं वेत्तीति कृत्स्नवित्कृत्स्नं सर्वेन्द्रियचालकमात्मानं वेत्ति न स विचालयेत् कर्माणि करचरणव्यापारं कुर्वतः पुरुषानापि भ्रंशं न प्रापयेत्। श्रुतिरपि शातपथी—"स योत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एक भवति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं विन्दते य एवं वेद" इति। भाष्यम्—पूर्वश्रुतौ प्राणन्नेव प्राणो नाम भवतीत्यादिना सर्वेन्द्रियाण्यात्मन एव कर्मनामानि भवन्तीत्युक्तं

तत्र य एकैकमुपास्ते आत्मानभिज्ञः सन् एकैकेन्द्रियोपासनां करोति न स वेद न जानाति । एष एकैकेन्द्रियेणाकृत्स्नो भवति । अथ कृत्स्नः केन प्रकारेण भवतीत्याह—आत्मेति । सर्वेन्द्रियेषु स्वस्वविषयं गृह्णत्सु सत्सु पदार्थभासकोऽयमेवेत्येवोपासीत । यतोत्रात्मनि सर्वे विषयाः प्रतीतिरूपेणैकीभवन्ति । तदेतस्यात्मनः पदनीयं ज्ञातव्यं स्थानं यद्यस्मात् कारणादस्य सर्वस्य जगतोऽयमात्मा अनेनात्मना सर्वं वेद जानाति । अतो रूपरसादिसर्वपदार्थग्रहणे प्रतीतिरूपेणात्मैव ज्ञातो भवति । तत्र दृष्टान्तमाह—यथेति । यथा पदेन गोपदानुसारं गच्छतो गोज्ञानमेवं यो वेद स कीर्तिं श्लोकं यशश्च विन्दते प्राप्नोति । तदुक्तं तैत्तिरीयकेऽपि " अन्तः प्रविष्टः शास्ता जनानामेकः सन् बहुधा विचारः । शतं शुक्राणि यत्रैकं भवन्ति । सर्वे वेदा यत्रैकं भवन्ति । अतो बहुप्रकारमिन्द्रियमार्गैर्विचरन्ति " इति । शुक्राणि इन्द्रियवृत्तयः । शेषं स्पष्टम् ॥ २९ ॥

रा० टी०—स्वात्मनः स्वतन्त्रकर्तृतां मन्यमाना अविद्वांसो ज्ञानिना बोधनीया इत्यत आह—प्रकृतेरिति । प्रकृतेरीश्वरस्येच्छादिगुणैः कर्तृभूतैः प्रकृतेर्जडस्य कार्यभूतसत्त्वादिगुणैर्निमित्तैः प्रकृतेः प्रकृतेर्जडस्य विकारभूतगुणेष्विन्द्रियेषु संमूढा ममैवैतानि करणानि, इति तेषु स्वातन्त्र्याभिमानिनः अत एव गुणकर्मसु गुणेषु शब्दादिविषयेषु सज्जन्ते स्नेहातिशयवन्तो भवन्ति । स्वकर्मसु च सज्जन्ते स्वातन्त्र्यभ्रमवन्तो ये तानकृत्स्नविदः गुणकर्मविभागाज्ञान्मन्दानयोग्यजनान् स्वयं कृत्स्नविज्ज्ञानी न विचालयेत् । गुणकर्मसु सङ्गं त्याजयित्वा सन्मार्गे न प्रवर्तयेदित्यर्थः । शब्दाद्या इन्द्रियाद्याश्च सत्त्वाद्याश्च शुभानि चेत्यादेः गुणशब्दोऽनेकार्थो ध्येयः ॥ २९ ॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

त० टी०—एवं न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते इत्यारभ्य कर्मकरणावश्यकत्वं तस्य फलाभिसंधिरहितत्वेनाबन्धकत्वं लोकसंग्रहार्थमनासक्त्या कर्तव्यत्वमभिहितमेतत्सर्वं कथं स्यादिति चिन्तयतेऽर्जुनाय कृपया भगवान्स्वयमेव तत्प्रकारमुपदिशति—मयीति । मयि भगवति सर्वज्ञे सर्वशक्तौ सर्वान्तर्यामिणि वासुदेवे सर्वाणि कर्माणि दैहिकमानसादीनि सर्वप्रकाराणि अध्यात्मचेतसा अध्यात्मन्यन्तर्यामिणि यच्चेतस्तदध्यात्मचेतस्तेन संन्यस्य ममान्तर्यामीश्वर एव सर्वकर्माणि कारयति नाहं स्वतन्त्रः कर्तेति मत्वा तत्प्रीत्यर्थमेव भवेयुरिति बुद्ध्याऽर्पयित्वा निराशीः कर्मसु फलकामनावर्जितः, अत एव निर्ममस्तत्र ममताशून्यो भूत्वा विगतज्वरः शोकमोहरहितः सन् युद्ध्यस्व । एवं कृतेऽसङ्गत्वमन्तःशुद्धिर्लोकसंग्रहश्च भवेदिति भावः ॥ ३० ॥

म० टी०—एवं कर्मानुष्ठानसाम्येऽप्यज्ञविज्ञयोः कर्तृत्वाभिनिवेशतदभावाभ्यां विशेष उक्तः । इदानीमज्ञस्यापि मुमुक्षोरमुमुक्षवपेक्षया भगवदर्पणं फलाभिसन्ध्यभावं च विशेषं वदन्नज्ञतयाऽर्जुनस्य कर्माधिकारं द्रढयति—मयीति । मयि भगवति वासुदेवे परमेश्वरे सर्वज्ञे सर्वनियन्तरि सर्वात्मनि सर्वाणि कर्माणि लौकिकानि वैदिकानि च सर्वप्रकाराणि अध्यात्मचेतसा अहं कर्तान्तर्याम्यधीनस्तस्मा एवेश्वराय राज्ञ इव भृत्यः कर्माणि करोमीत्यनया बुद्ध्या संन्यस्य समर्प्य निराशीर्निष्कामः निर्ममो देहपुत्रभ्रात्रादिषु स्वीयेषु ममताशून्यः विगतज्वरः संतापहेतुत्वाच्छोक एव ज्वरशब्देनोक्तः, ऐहिकपारत्रिकदुर्यशोनरकपातादिनिमित्तशोकरहितश्च भूत्वा त्वं मुमुक्षुर्युध्यस्व विहितानि कर्माणि कुर्वित्यभिप्रायः । अत्र भगवदर्पणं निष्कामत्वं च सर्वकर्मसाधारणं मुमुक्षोः निर्ममत्वं त्यक्तशोकत्वं च युद्धमात्रे प्रकृत इति द्रष्टव्यम् । अन्यत्र ममताशोकयोरप्रसक्तत्वात् ॥ ३० ॥

शं० टी०—एवं ज्ञानिनामप्याधिकारिकाणां लोकसंग्रहार्थमवश्यं कर्म कर्तव्यमिति लोकसंग्रहकारिणेत्येवं वर्तितव्यमिति चोपदिश्याधुना लोकसंग्रहदृष्ट्यापि स्वधर्मं कुर्वित्याह—**मयीति**। लोकसंग्रहकर्तात्मतत्त्वज्ञस्त्वमध्यात्मचेतसा "सर्वं यदयमात्मा" इति श्रुत्युक्तरीत्यात्मानमधिकृत्य प्रवृत्तमध्यात्मं चेतो ज्ञानमध्यात्मं च तच्चेतश्च तेनाध्यात्मचेतसा ब्रह्मार्पणं ब्रह्म हविः इति वक्ष्यमाणलक्षणया प्रत्यग्दृष्ट्या सर्वं ब्रह्मैवेतिदर्शनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि मयि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेति प्रविलाप्य जयेन प्राप्ते राज्ये युद्धक्रियाफले निराशीर्निरपेक्षः सन् वध्यमानेषु भ्रात्रादिषु निर्ममो ममतारहितो भूत्वा एते मदीया मया हन्यन्त इति यो ज्वरः संतापः स विगतो यस्य स विगतज्वरो निःशोको भूत्वा युध्यस्व लोकसंग्रहार्थं कर्म कुर्वित्यर्थः। अत्रायमभिप्रायः "सर्वमिदमहं च ब्रह्मैव" इतिपरावरैकत्वविषयकाऽप्रतिबद्धाऽपरोक्षज्ञानवानाधिकारिको ब्रह्मविदत्रोक्तरीत्या लोकहितार्थं कर्म कुर्याज्जीवत एव मुक्तत्वादस्य परतारणमेव प्रयोजनम्। परोक्षज्ञानी चेदात्मा देहादिभिन्नस्तद्द्रष्टृत्वाद्घटद्रष्टृवदिति स्वस्य देहादिभिन्नत्वज्ञानेन यौक्तिकेन, नाऽहं कर्ता कारयितेत्यकर्तृत्वबुद्ध्या "मायामात्रमिदं द्वैतम्" इत्यादिश्रुतिबलेन, इदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकवदित्यादियुक्तिबलेन च कर्ता कार्यं करणं च सर्वं मिथ्यैवेति कर्त्रादेः सर्वस्य मिथ्यात्वमेव पश्यन् सर्वत्र निराशीर्निर्ममो भूत्वा लोकहितार्थं कर्म कुर्यात्तेन चित्तपरिपाको ज्ञानं मोक्षश्च सिध्यति लोकोपकारश्चास्य तरणं तारणं चोभयमप्युपपद्यते। अनात्मज्ञश्चेत्परिग्रहे ममतारहितः कर्मफलानपेक्षश्च भूत्वा श्रौतानि स्मार्तानि च सर्वाणि कर्माणीश्वरार्पणबुद्ध्या स्वार्थमेव कुर्यात्तेन चित्तशुद्धिस्तया ज्ञानं मोक्षश्चास्य सिध्यतीति ॥ ३० ॥

श्री० टी०—तदेवं तत्त्वविदापि कर्म कर्तव्यं त्वं तु नाद्यापि तत्त्ववित् अतः कर्मैव कुर्वित्याह—**मयीति**। सर्वाणि कर्माणि मयि संन्यस्य समर्प्याध्यात्मचेतसान्तर्याम्यधीनोऽहं करोमीति दृष्ट्या निराशीर्निष्कामोऽत एव मत्फलसाधनं मदर्थमिदं कर्मेत्येवं ममताशून्यश्च भूत्वा विगतज्वरस्त्यक्तशोकश्च भूत्वा युध्यस्व ॥३०॥

स० टी०—कथं मुमुक्षुणाज्ञेन कर्मण्यधिकृतेन च ॥ कर्तव्यं कर्म शास्त्रीयमित्यत्राह रमापतिः ॥ १ ॥ मयि सर्वात्मनीशाह्वे सर्वज्ञे परमेश्वरे ॥ श्रौतानि सर्वकर्माणि लौकिकानि समर्प्य च ॥ २ ॥ अहं कर्तेश्वराधीनस्तदर्थं भृत्यवत्सदा ॥ करोमीत्यनया बुद्ध्या निष्कामो ममतोज्झितः ॥ ३ ॥ दुर्यशो नरकप्राप्तिहेतुशोकाविवर्जितः। युद्धयस्वेति विहितानि कुरु कर्माणि शाश्वतः ॥ ४ ॥ ३० ॥

भा० टी०—ननु नाहं तत्त्ववित् किंत्वज्ञो मुमुक्षुर्मया कथं कर्म कर्तव्यमिति चेत्तत्राह—**मयीति**। मयि परमेश्वरे सर्वाणि वैदिकानि लौकिकानि च कर्माणि अध्यात्मचेतसा विवेकबुद्ध्याऽहं कर्तेश्वराय भृत्यवत्करोमीत्यनया बुद्ध्या संन्यस्य समर्प्य निराशीः फलाभिसंधिरहितः ममत्वशून्यस्त्वं भूत्वा विगतज्वरो विगतशोकः सन् युध्यस्व। यत्त्वत्र भगवदर्पणं निष्कामत्वं च सर्वकर्मसाधारणं मुमुक्षोः निर्ममत्वं त्यक्तशोकत्वं च युद्धमात्रे प्रकृत इति द्रष्टव्यमन्यत्र ममताशोकयोरप्रसक्तत्वादिति, तच्चिन्त्यं सर्वस्मिन्कर्मणि ममेदमिति ममत्वस्य निष्फले कष्टसाध्ये वा कर्मणि ज्वरस्य च प्रसक्तत्वात्। शोकादेर्निवृत्त्यर्थमेव सिद्ध्यसिद्ध्योः समो भूत्वेति भगवतोक्तत्वाच्चेति दिक् ॥ ३० ॥

प० टी०—अथ प्रकृतमनुसरति—**मयीति**। सर्वाणि कर्माणि मयि संन्यस्य समर्प्याध्यात्मचेतसान्तर्याम्यधीनोऽहं करोमीति दृष्ट्या निराशीरमुकं मे भूयादिति कामरहितस्तथा यन्निमित्तं तव ज्वरः समुदितोऽभूत्तद्विषये निर्ममो ममताशून्यो भूत्वा ततो विगतज्वरः सन् युध्यस्व ॥ ३० ॥

रा० टी०—एवमविद्वत्कर्मतो विद्वत्कर्मणोऽनभिमानेनानुष्ठानरूपवैलक्षण्यमुक्त्वेदानीं तवापि ज्ञानित्वात्तथैवानुष्ठेयं कर्मेत्याह—**मयीति**। अध्यात्मचेतसा आत्मानं परमात्मानं मामधिकृत्य स्थितमध्यात्मम्, अध्यात्मं च

तत् चेतश्च तदध्यात्मचेत: तेनेति वा, अधि अधिकं सचासावात्मा चाध्यात्मा अध्यात्मनि चेतोऽध्यात्मचेतस्तेनेति वा सर्वाधिकपरमात्मभूतमन्निष्ठमनसा निराशी: विष्णुभक्तिज्ञानाद्यन्यकामरहित: निर्मम: कर्मण्यहमेव स्वातन्त्र्येण करोमीति स्वतन्त्रकर्तृताभिमानहीनो भूत्वा सर्वाणि कर्माणि मयि संन्यस्य भगवान् कृष्ण एव मयि स्थित्वा सर्वकर्माणि करोतीति ज्ञात्वा तानि च श्रीकृष्णपूजारूपाणीति मयि समर्प्य विगतज्वरस्त्यक्तशोक: सन् युध्यस्वेति । तदुक्तम् ' नाहं कर्ता हरि: कर्ता तत्पूजा कर्म चाखिलम् ' इत्यादि ॥ ३० ॥

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

त० टी०—एतेन " अन्तः प्रविष्टः शास्ता जनानाम् । सर्वात्मा । एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते । स कारयेत् पुण्यमथापि पापं न तावता दोषवानीषिताऽपि " इत्यादिश्रुतिशतसिद्धं परमेश्वराधीनं सर्वात्मकर्तृत्वं, तदर्पणबुद्ध्या च कृतं कर्म दोषस्पर्शाय न भवतीति भगवता स्वमतमुक्तमिदानीं श्रद्धयेदमनुतिष्ठतां गुणमननुतिष्ठतां च दोषमाह—ये मे मतमिति द्वाभ्याम् । इदं पूर्वश्लोके कर्मविषयं मम मतं नित्यं श्रुतिस्मृतिभिर्निर्णीतं सनातनं तुभ्यमुपदिष्टं ये केऽपि मानवाः कर्ममात्राधिकारिणः श्रद्धावन्तो भगवतोक्तं शास्त्रनिर्णीतमेवैतदिति विश्वासवन्तः अनसूयन्तः असूया दोषारोपो गुणेष्वपि सा चेह निराशीर्निर्ममो भूत्वा युद्ध्यस्व इति काममताहीनं विधाय तस्य प्रयोजनशून्ये युद्धे प्रवर्तनान्न समीचीनमिदं मतमित्येवंरूपा तामकुर्वन्तोऽनुतिष्ठन्ति तेऽपि कर्मभिः शुभाशुभैर्मुच्यन्ते ॥ ३१ ॥

म० टी०—फलाभिसन्धिराहित्येन भगवदर्पणबुद्ध्या विहितकर्मानुष्ठानं सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण मुक्तिफलमित्याह—ये मे इति । इदं फलाभिसन्धिराहित्येन विहितकर्माचरणरूपं मम मतं नित्यं नित्यवेदबोधितत्वेनानादिपरंपरागतमावश्यकमिति वा सर्वदेति वा । मानवा: मनुष्या ये केचित् मनुष्याधिकारित्वात्कर्मणां श्रद्धावन्त: शास्त्राचार्योपादिष्टेऽर्थेऽननुभूतेप्येवमेवैतदिति विश्वास: श्रद्धा तद्वन्त: । अनसूयन्त: गुणेषु दोषाविष्करणमसूया सा च दु:खात्मके कर्मणि मां प्रवर्तयन्न कारुणिकोऽयमित्येवंरूपा प्रकृते प्रसक्तां तामसूयामपि गुरौ वासुदेवे सर्वसुहृद्यकुर्वन्तो येऽनुतिष्ठन्ति तेऽपि सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण सम्यक् ज्ञानिवन्मुच्यन्ते कर्मभिर्धर्माधर्माख्यै: ॥ ३१ ॥

शं० टी०—'न कर्मणामनारम्भात्' इत्यारभ्य 'मयि सर्वाणि कर्माणि' इत्यन्तेन ग्रन्थेन मुमुक्षोरवश्यं मोक्षार्थमीश्वरार्पणबुद्ध्या कर्म कर्तव्यमिदं मम मतमिति निश्चित्य श्रीभगवान् स्वमतानुसारिणो ये ते मुक्ता भविष्यन्ति ये तु विपरीतकारिणस्ते विनङ्क्ष्यन्तीति नियमयति—ये मे मतमिति । ये विवेकिनो मानवा ब्राह्मणादयो मुमुक्षव इदमुक्तलक्षणं मे ममेश्वरस्य मतं शासनमनसूयन्त: असूया नाम गुणदूषणा जगद्गुरौ मयि तामकुर्वन्त: किंतु श्रद्धावन्तस्तत्र श्रद्धां भक्तिं च कुर्वन्त: सन्तोऽनुतिष्ठन्तिं समनुवर्तन्ते मच्छासनमनुल्लङ्घ्य ये नित्यं कर्म कुर्वन्तीत्यर्थ: । ते सत्त्वशुद्ध्या निर्विकारात्मविज्ञानं प्राप्य कर्मभि: पुण्यापुण्यलक्षणैर्नानादु:खहेतुभि: संचितादिभिर्मुच्यन्ते । अपिशब्दाज्जन्मादिभिश्च मुक्ता भवन्तीत्यर्थ: ॥ ३१ ॥

श्री० टी०—एवं कर्मानुष्ठाने गुणमाह—ये मे मतमिति । मद्वाक्ये श्रद्धावन्त अनसूयन्त: दु:खात्मके कर्मणि प्रवर्तयतीति दोषदृष्टिमकुर्वन्तश्च ये मे मदीयमिदं मतमनुतिष्ठन्ति तेऽपि शनै: कर्मकुर्वाणा: सम्यग्ज्ञानिवत्कर्मभिर्मुच्यन्ते ॥ ३१ ॥

स० टी०—ये मदीयं यथोक्तं च मतमावश्यकं सदा ॥ श्रद्धावन्तोऽनुवर्तन्ते नरा: कर्माधिकारिण: ॥ १ ॥ मयीश्वरे गुरौ विष्णौ सर्वभूतानुकम्पिनि ॥ अहो दु:खात्मके क्रूरे कर्मणीश: प्रवर्तयन् ॥ २ ॥ मामकारु-

णिकोऽयं स्यादित्युदारगुणेष्वपि ॥ असूयां दोषबुद्धिं चाकुर्वन्तो धर्मतत्पराः ॥ ३ ॥ तेऽपि धीशुद्धितस्तत्त्वज्ञानप्राप्तिमुखेन च ॥ सम्यग्ज्ञानिवदेवाशु धर्माधर्माख्यकर्मभिः ॥ ४ ॥ बन्धनापरपर्यायैर्मुच्यन्ते मत्प्रसादतः ॥ ५ ॥ ३१ ॥

भा० टी०—येऽन्येऽपि मानवाः मम परमेश्वरस्य मतं फलाभिसंधिराहित्येन चित्तशोधकं कर्मानुष्ठेयमित्येवंरूपं सप्रमाणमुक्तमीश्वरेण सर्वज्ञेनाप्ततमेनोक्तं यत्तत्तथ्यमेवेति निश्चयः श्रद्धा तद्युक्ता अत एवानसूयन्तो मयि परमगुरौ वासुदेवेऽसूया दुःखात्मके कर्मण्यस्मान्प्रेरयतीति सुखसाधने तस्मिन्दोषारोपणमकुर्वन्तोऽनुतिष्ठन्ति अनुवर्तन्ते तेऽप्येवंभूताः सत्त्वशुद्धिद्वारा ज्ञानप्राप्त्या धर्माधर्माख्यैः कर्मभिर्मुच्यन्ते ॥ ३१ ॥

प० टी०—एवमनुष्ठाने गुणमाह—**ये मे इति** । इदं मे मतं ये मद्वाक्यं श्रद्धावन्तोऽनसूयन्तो दुःखास्पदे कर्माणि प्रवर्तयतीति दोषदृष्टिरहिताः सन्तोऽनुतिष्ठन्ति तेऽपि शनैर्ज्ञानिवत्कर्मभिर्मुच्यन्ते ॥ ३१ ॥

रा० टी०—विद्वांस एवं कर्म कुर्वन्तीत्येतावता मयाप्युक्तविधया कर्म कार्यमिति कुत इत्यतः स्वोक्तस्य करणे अकरणे च फलमाह—**ये मे** इत्यादिश्लोकद्वयेन । ये मानवाः श्रद्धावन्तः मद्वाक्येष्वास्तिक्यबुद्धिमन्तः अनसूयन्तः कष्टे कर्मणि प्रवर्तयतीति मयि दोषदृष्टिमकुर्वन्तः सन्तः इदं पूर्वोक्तश्लोकोक्तरीत्या कर्मानुष्ठानरूपं मे मतं नित्यमनुतिष्ठन्ति तेऽपि कर्मभिर्निर्वृत्तकर्मभिर्मुच्यन्ते । ज्ञानद्वारेतियोज्यम् । किमुतापरोक्षज्ञानिनो मुच्यन्त इति कैमुत्यसूचनार्थोऽपिशब्दः । एतत्सूचनं च प्रासङ्गिकं ध्येयम् ॥ ३१ ॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

त० टी०—ये तु एतन्मम मतं अभ्यसूयन्तो दोषारोपं कुर्वन्तो नानुतिष्ठन्ति नानुवर्तन्ते तान्सर्वज्ञानविमूढान् सर्वकर्मज्ञाने विशेषतो मूढान् यतोऽचेतसोऽशुद्धचित्तान्नष्टान् सदा संसारिणो विद्धि जानीहि ॥ ३२ ॥

म० टी०—एवमन्वये गुणमुक्त्वा व्यतिरेके दोषमाह—**येत्विति** । तुशब्दः श्रद्धावद्वैधर्म्यमश्रद्धां सूचयति तेन ये नास्तिक्यादश्रद्दधाना अभ्यसूयन्तो दोषमुद्भावयन्त एतन्मम मतं नानुवर्तन्ते तानचेतसो दुष्टचित्तान् अत एव सर्वज्ञानविमूढान् सर्वत्र कर्मणि ब्रह्मणि सगुणे निर्गुणे च यज्ज्ञानं तत्र विविधं प्रमाणतः प्रमेयतः प्रयोजनतश्च मूढान् सर्वप्रकारेणायोग्यान्नष्टान् सर्वपुरुषार्थभ्रष्टान्विद्धि जानीहि ॥ ३२ ॥

शं० टी०—विपर्यये दण्डमाह—**ये त्विति** । ये त्वविवेकिनो ब्राह्मणादयो दुरहंकारा एतदुक्तं ममेश्वरस्य मतं शासनमभ्यसूयन्तोऽत्यन्तं दूषयन्तः सन्तो नानुतिष्ठन्ति दुराग्रहेण मदाज्ञां न कुर्वते सर्वज्ञानविमूढान् सर्वात्मकत्वाद्ब्रह्म सर्वमित्युच्यते तद्विषयकं ज्ञानं सर्वज्ञानं तस्मिन् विषये विशिष्य मूढांस्तान् सर्वज्ञानविमूढान् अचेतसो विचेतसोऽविवेकिनः कर्म बहुसाधनसाध्यं क्लेशभूयिष्ठमदृष्टफलं चातस्तत्संन्यास एव परमसुखमित्येवं विपरीतबुद्धयस्तान् संन्यासानर्हानकर्मनिष्ठान् जनान्नष्टान् विनष्टपुण्यलोकान् विद्धि स्वधर्मं परित्यज्य परधर्मे वर्तमानाः स्वयमेव विपरीतबुद्ध्या विनश्येयुरित्यर्थः ॥ ३२ ॥

श्री० टी०—विपक्षे दोषमाह—**ये त्विति** । ये तु मे मतमीश्वरार्थं कर्म कर्तव्यमित्यनुशासनमभ्यसूयन्तः द्विषन्तः नानुतिष्ठन्ति तान् अचेतसः विवेकशून्यानत एव सर्वस्मिन्कर्मणि ब्रह्मविषये च यज्ज्ञानं तत्र विमूढान्नष्टान्विद्धि ॥ ३२ ॥

स० टी०—एवमुक्त्वान्वये मोक्षं दोषमाह विपर्यये ॥ ये तु नास्तिक्यतः श्रद्धाहीना एतन्मतं मम ॥ १ ॥ दोषमुद्भावयन्तो नानुवर्तन्तेऽतिदुर्धियः ॥ तानतो दुष्टचित्तांश्च मन्दभाग्यान्सुधिक्कृतान् ॥ २ ॥ सर्वत्र

कर्मणीशे वा सगुणे निर्गुणे च यत् ॥ ज्ञानं तत्रात्ययोग्यांश्च मानतो मेयतः फलात् ॥ ३ ॥ पुरुपार्थपरिभ्र-ष्टाञ्जानीहि हतकर्मणः ॥ ४ ॥ ३२ ॥

भा० टी०—ये तु तद्विपरीताः श्रद्धाहीना एतन्मम मतमभ्यसूयन्तः गुणेऽपि दोषमारोप्य निन्दन्तः नानुतिष्ठन्ति तान् कर्मज्ञाने सगुणज्ञाने निर्गुणज्ञाने चेति सर्वेपु ज्ञानेपु विविधप्रमाणप्रमेयप्रयोजनविभागे मूढान् सर्वप्रकारेणायोग्यान् अचेतसोऽविवेकिनो दुष्टचेतसो नष्टान् सर्वपुरुपार्थेभ्यो भ्रष्टान् विद्धि । सर्वशव्द ईश्वरवाची ' सर्वं समाप्नोषि ततोऽसि सर्वः ' इतिनिर्वचनात् । तस्य ज्ञाने इति व्याख्यानं तूक्तव्याख्याने ईश्वरज्ञानस्यान्तर्भावात् व्यर्थमेव लोकप्रसिद्धित्याग इत्यत उपेक्ष्यम् ॥ ३२ ॥

प० टी०—विपक्षे दोषमाह—ये त्वेतदिति । ये तु प्राङ्निरूपितप्रकाररहिताः सन्तो मे मतं नानुतिष्ठन्ति तानचेतसो भ्रान्तांस्तथा सर्वज्ञानरहितान्नष्टान् विद्धि ॥ ३२ ॥

रा० टी०—ये तु एतन्मे मतमभ्यसूयन्तः कष्टं कर्मेति दोषदृष्टिमन्तः सन्तो नानुतिष्ठन्ति तानचेतसः विवेकशून्यान् अत एव ज्ञातव्यसर्वज्ञानविषये विमूढान् विशेषेण मिथ्याज्ञानिनः अत एव नष्टान् नरका-द्यनर्थभाजो विद्धि जानीहि ॥ ३२ ॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

त० टी०—नन्वेवं शास्त्रप्रतिपादितं तव मतं सर्वे कुतो नानुतिष्ठन्ति शास्त्ररूपाज्ञाप्रतिकूलाः कथं भवन्तीत्यपेक्षायामाह—सदृशमिति । प्रकृतिर्हि पूर्वजन्मकृतगुणानुकूलं शुभाशुभकर्मसंस्कारेणेह जन्मन्यभिव्यक्तः स्वभावविशेषस्तस्याः स्वस्याः प्रकृतेः स्वभावस्य सदृशं स्वभावानुकूलमिति यावत् ज्ञानवानपि वेदस्मृतिपुराणशब्दार्थज्ञानवानपि चेष्टते, किं पुनर्वक्तव्यं मूर्खः प्रकृतेः सदृशं चेष्टत इति । तस्मात् भूतानि सर्वे प्राणिनः प्रकृतिमुक्तरूपां यान्ति प्राप्नुवन्ति स्वभावस्य वशे भवन्तीत्यर्थः । नि-ग्रहः शास्त्रीयाज्ञा किं करिष्यति अनादिविषयवासनादूषितचेतसां सर्वकामत्यागपूर्वकमय्यर्पणबुद्धिर्न जायते इत्यर्थः ॥ ३३ ॥

म० टी०—ननु राज्ञ इव तव शासनातिक्रमे भयं पश्यन्तः कथमसूयन्तस्तव मतं नानुवर्तन्ते कथं वा सर्वपुरुषार्थसाधने प्रतिकूला भवन्तीत्यत आह—सदृशमिति।प्रकृतिर्नाम प्राग्जन्मकृतधर्माधर्मज्ञानेच्छादिसंस्कारो वर्तमानजन्मन्यभिव्यक्तः सर्वतो बलवान् "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" इति श्रुतिप्रमाणकः । तस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपमेव सर्वो जन्तुर्ज्ञानवान् ब्रह्मविदपि 'पश्वादिभिश्चाविशेषात्' इतिन्या-यात् गुणदोषज्ञानवान्वा चेष्टते किं पुनर्मूर्खस्तस्मात् भूतानि सर्वे प्राणिनः प्रकृतिं यान्त्यनुवर्तन्ते पुरुषार्थ-भ्रंशहेतुभूतामपि तत्र मम वा राज्ञो वा निग्रहः किं करिष्यति रागौत्कट्येन दुरितान्निवर्तयितुं न शक्नो-तीत्यर्थः ।महानरकसाधनत्वं ज्ञात्वापि दुर्वासनाप्राबल्यात्पापेपु प्रवर्तमाना न मच्छासनातिक्रमदोषाद्बिभ्य-तीति भावः ॥ ३३ ॥

शं० टी०—मम मतमनादृत्य कर्तव्यं कर्म संन्यस्य स्थाणुवत्तूष्णीमास्महे इति ये तु मन्यन्ते तेषां प्रकृ-त्यधीनानामचलित्वा तूष्णीमासनं न घटते ज्ञानिनामप्यजयायाः प्रकृतेर्मम मायाया निग्रहस्यातिदुष्करत्वा-दिति कार्यते ह्यवशः कर्म इतिवचनार्थमेव पुनर्द्रढयति मूढानां कर्माणि नियमनार्थम्—सदृशमिति । नित्यनिरन्तरब्रह्मनिष्ठानिर्मूलितसर्ववासनाग्रन्थिरपि ब्रह्मवित्प्राणत्राणहेतुतयाऽविशिष्टायाः स्वस्याः प्रकृतेर्वा-सनायाः सदृशमनुरूपमेवाहारादौ चेष्टते तां निग्रहीतुं न शक्नोति शरीरस्थितिहेतोः प्रकृतेर्दुर्निवारत्वात् ।

एवं ब्रह्मनिष्ठया प्रकृतिमतीत्य तिष्ठतो जितेन्द्रियस्य ब्रह्मविदोऽपि प्रकृत्यनुवर्तित्वे सत्यवशिष्टानां मूढानां किमु वक्तव्यमित्याशयेनाह—**प्रकृतिमिति** । सुखदुःखयोरनुभूत्यै स्वस्वकर्मणा भवन्तीति भूतानि सर्वे प्राणिनः स्वस्वजात्यनुरूपेण नानाक्रियानिर्वृत्तिहेतुभूतां प्रकृतिं रागद्वेषादिगुणवतीं वासनात्मिकां यान्ति स्वस्वप्रकृत्यनुरूपेण रागद्वेषाभ्यां नानारूपं चेष्टन्त एव न प्रकृत्यधीनास्तूष्णीं स्थातुं क्षणमपि शक्नुवन्त्यतो वयं न किंचित्कुर्म इति निग्रहस्तात्कालिकेन्द्रियनिरोधः किं करिष्यति । रागादिदोषवत्स्वकीयप्रकृतिवेगेन सर्वस्यापि चेष्टितव्ये सति नाहं किंचित्करोमीति नियमो व्यर्थ इत्यर्थः ॥ ३३ ॥

श्री० टी०—ननु तर्हि महाफलत्वादिन्द्रियाणि निगृह्य निष्कामाः सन्तः सर्वेऽपि स्वधर्ममेव किं नानुतिष्ठन्ति तत्राह—**सदृशमिति** । प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्याः स्वकीयायाः प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गुणदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्यमज्ञश्चेष्टत इति । तस्माद्भूतानि सर्वेऽपि प्राणिनः प्रकृतिं यान्ति अनुवर्तन्ते । एवं सति इन्द्रियनिग्रहः किं करिष्यति प्रकृतेर्बलिष्ठत्वादित्यर्थः ॥३३॥

स० टी०—ननु राज्ञ इवेशस्य तवाज्ञातिक्रमे भयम् ॥ पश्यन्तस्ते मतं नानुतिष्ठन्तीति कथं तव॥१॥प्रतिकूलाः कथं वाते पुरुषार्थैकसाधने ॥ शृणु प्राग्जन्मसंस्कारो धर्माधर्मादिगोचरः ॥२॥वर्तमानभवे व्यक्तः सर्वतो बलवांश्च यः ॥ प्रकृतिः सा स्वकीयायास्तस्याः सदृशमेव हि ॥ ३ ॥ सर्वोऽपि गुणदोषज्ञश्चेष्टते किमु मूढधीः ॥ तस्मात्सर्वेऽनुवर्तन्ते प्राणिनः प्रकृतिं स्विकाम् ॥४॥ पुरुषार्थक्षये हेतुभूतामपि दुरत्ययाम् ॥ राज्ञो वा मम वा तत्र निग्रहः किं करिष्यति ॥ ५ ॥ रागौत्कट्येन दुरितान्न निवर्तयितुं क्षमाः ॥ महानरकहेतुत्वं ज्ञात्वापि वासनाबलात् ॥६॥ प्रवर्तमानाः पापेषु मदाज्ञातिक्रमादपि ॥ न बिभ्यतीति तात्पर्यं हरेर्नारायणस्य च ॥ ७ ॥ ३३॥

भा० टी०—ननु कस्मात्त्वत्प्रतिकूलास्त्वच्छासनातिक्रमान्न बिभ्यति त्वदीयं मतं स्वधर्मं नानुतिष्ठन्ति परधर्मं चानुतिष्ठन्तीति चेत्तत्राह—**सदृशमिति** । ज्ञानवानपि ‘ पश्वादिभिश्चाविशेषात् ’ इतिन्यायाद्गुणदोषज्ञानवानपीति वा । स्वस्याः प्रकृतेः सा च पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तस्तस्याः सदृशमनुरूपं चेष्टां करोति किं पुनर्मूर्खस्तस्माद्भूतानि प्राणिनः प्रकृतिं यान्त्यनुगच्छन्ति निग्रहो निषेधरूपः मम परमेश्वरस्यान्यस्य राज्ञो वा किं करिष्यति प्रकृतेः प्राबल्यान्नास्मदादिशासनाद्बिभ्यतीति भावः ॥ ३३॥

प० टी०—ननु सर्वे ज्ञातारोऽपि भगवद्वाक्यविश्वासादिन्द्रियाणि निगृह्य कथं स्वधर्माचरणं न कुर्वन्तीत्याह—**सदृशमिति** । ज्ञानवानपि प्रकृतेः सदृशं चेष्टते प्राचीनकर्मसंस्काराधीनः स्वभावः प्रकृतिस्तत्सदृशं तदनुरूपं यथा भवति तथा गुणदोषज्ञानवानपि चेष्टते किं पुनरज्ञश्चेष्टते इति । यतः सर्वाणि भूतानि प्रकृतिं यान्त्यनुवर्तन्ते । एवं सतीन्द्रियनिग्रहः किं करिष्यति प्रकृतेर्बलिष्ठत्वात् ॥ ३३ ॥

रा० टी०—यदि त्वन्मतानुष्ठाने मोक्षः अन्यथा तु नाशस्तर्हि ते मतं किमिति लोको नानुतिष्ठतीत्यत आह—**सदृशमिति** । प्रकृतिशब्दोऽत्र पूर्वसंस्कारार्थः सन् तत्कार्यरागद्वेषोपलक्षकः । ज्ञानवानपि त्वन्मतकरणाकरणयोरिष्टानिष्टज्ञानवानपि स्वस्याः प्रकृतेः स्वकीयपूर्वसंस्कारकार्यरागद्वेषयोः सदृशमनुगुणमेव चेष्टते कर्म करोति । किमुताज्ञ इत्यपेरर्थः । ननु मनोनिग्रहे स्वभावानुगतचेष्टोपरतिः स्यादित्यत आह—**प्रकृतिमिति** । प्रकृतिं स्वभावं यान्ति प्राणिनस्तत्र मनोनिग्रहः किं करिष्यति न किमपीत्यर्थः । तदुक्तम् ‘बुद्धाप्यखौ यतो नित्यस्वभावानुगचेष्टितः । स्वभावं यान्ति भूतानि निग्रहः किं करिष्यति ’ इति । यद्वा मन्दान्न विचालयेत् इत्ययोग्येषु तत्त्वबोधो न कार्य इत्युक्तम् । तत्कुत इत्यत आह—**सदृशमिति** । प्रागिवार्थः । तत्त्वोपदेशेनोत्पन्नज्ञानवानपि स्वभावानुगुणचेष्टावानेव भवति न तूपदेशजन्यज्ञानानुरूपचेष्टावानपि भवति । अतस्तत्र तत्त्वोपदेशो व्यर्थ इति भावः ॥ ३३ ॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

त० टी०—यद्येवं सर्वे प्रकृतिं यान्ति तर्हि प्रकृतिशून्यो न कोऽप्यस्ति । तथात्वे गुरुशास्त्रोपदेशस्य वैयर्थ्यं प्रसज्येतेत्यत आह—इन्द्रियस्येति । इन्द्रियस्येन्द्रियस्येति वीप्सया श्रोत्रादिज्ञानेन्द्रियस्य वागादिकर्मेन्द्रियस्य च अर्थे शब्दादिविषये वचनादौ कर्मणि च रागद्वेषौ व्यवस्थितौ स्वानुकूले मधुरादौ रागः कामः, प्रतिकूले परुषादौ द्वेषः क्रोधः इति प्राचीनवासनानुसारेण सर्वेषां व्यवस्थितौ स्वभावसिद्धौ । गुरुशास्त्रोपदेशस्तु तयो रागद्वेषयोर्वशं न गच्छेदित्येवंरूपः ततो निवर्तयति । किमर्थं हि यस्मात्तौ रागद्वेषौ अस्य मुमुक्षोः परिपन्थिनौ पथिकस्योत्पथनयनेन सर्वस्वहारिचौरवत् ज्ञानभक्तिरूपमोक्षमार्गात्प्रच्याव्यापथे विषयप्राप्तिसाधने नीत्वा तत्रासक्तं कृत्वा मोक्षसाधनसर्वस्वहारिणौ । तत्र यथा राजभटः पथिकं चौरवशं प्राप्नुवन्तं दृष्ट्वा ततो प्रतिवार्य सुमार्गे प्रवर्तयति तथा शास्त्राचार्योपदेशो विषये रागद्वेषवशं गच्छन्तं मुमुक्षुं ततो वारयित्वा मोक्षप्राप्तिहेतुभूते परमेश्वराराधने सुमार्गे प्रवर्तयति । अतो न गुरुशास्त्रोपदेशस्य वैयर्थ्यम् ॥ ३४ ॥

म० टी०—ननु सर्वस्य प्राणिवर्गस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यं प्राप्तं न च प्रकृतिशून्यः कश्चिदस्ति यं प्रति तदर्थवत्त्वं स्यादित्यत आह—इन्द्रियस्येन्द्रियस्येति । वीप्सया सर्वेषामिन्द्रियाणामर्थे विषये शब्दे स्पर्शे रूपे रसे गन्धे च । एवं कर्मेन्द्रियविषयेपि वचनादौ अनुकूले शास्त्रनिषिद्धेपि रागः प्रतिकूले शास्त्रविहितेपि द्वेष इत्येवं प्रतीन्द्रियार्थं रागद्वेषौ व्यवस्थितावानुकूल्यप्रातिकूल्यव्यवस्थया स्थितौ नत्वनियमेन सर्वत्र तौ भवतस्तत्र पुरुषकारस्य शास्त्रस्य चायं विषयो यत्तयोर्वशं नागच्छेदिति । कथं या हि पुरुषस्य प्रकृतिः सा बलवदनिष्टानुबन्धित्वज्ञानाभावसहकृतेष्टसाधनत्वज्ञान निबन्धनं रागं पुरस्कृत्यैव शास्त्रनिषिद्धे कलञ्जभक्षणादौ प्रवर्तयति । तथा बलवदिष्टसाधनत्वज्ञानाभावसहकृतानिष्टसाधनत्वज्ञाननिबन्धनं द्वेषं पुरस्कृत्यैव शास्त्रविहितादपि सन्ध्यावन्दनादेर्निवर्तयति । तत्र शास्त्रेण प्रतिषिद्धस्य बलवदनिष्टानुबन्धित्वे ज्ञापिते सहकार्यभावात्केवलं दृष्टेष्टसाधनताज्ञानं मधुविषसंपृक्तान्नभोजन इव तत्र न रागं जनयितुं शक्नोति । एवं विहितस्य शास्त्रेण बलवदिष्टानुबन्धित्वे बोधिते सहकार्यभावात्केवलमनिष्टसाधनत्वज्ञानं भोजनादाविव तत्र न द्वेषं जनयितुं शक्नोति । ततश्चाप्रतिबद्धं शास्त्रं विहिते पुरुषं प्रवर्तयति निषिद्धाच्च निवर्तयतीति शास्त्रीयविवेकविज्ञानप्राबल्येन स्वाभाविकरागद्वेषयोः कारणोपमर्दनोपमर्दान्न प्रकृतिर्विपरीतमार्गे पुरुषं शास्त्रदृष्टिं प्रवर्तयितुं शक्नोतीति न शास्त्रस्य पुरुषकारस्य च वैयर्थ्यप्रसङ्गः । तयोरागद्वेषयोर्वशं नागच्छेत्तदधीनो न प्रवर्तेत निवर्तेत वा किंतु शास्त्रीयतद्विपक्षज्ञानेन तत्कारणविघटनद्वारा तौ नाशयेत् । हि यस्मात् तौ रागद्वेषौ स्वाभाविकदोषप्रयुक्तौ अस्य पुरुषस्य श्रेयोर्थिनः परिपन्थिनौ शत्रू श्रेयोमार्गस्य विघ्नकर्तारौ दस्यू इव पथिकस्य । इदं च "द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त" इत्यादिश्रुतौ स्वाभाविकरागद्वेषनिमित्तशास्त्रविपरीतप्रवृत्तिमसुरत्वेन शास्त्रीयप्रवृत्तिं च देवत्वेन निरूप्य व्याख्यातमतिविस्तरेणेत्युपरम्यते ॥ ३४ ॥

शं० टी०—ननु सर्वस्यापि प्राणिजातस्य रागद्वेषात्मिकया प्रकृत्या ग्रस्तत्वे त्वन्मतानुसारिणामप्युक्तलक्षणप्रकृतिग्रस्तत्वात्त्वदुक्ते कर्मयोगे कथं तेषां प्रवृत्तिर्घटेतेत्याकाङ्क्षायां रागद्वेषयोः समीचीनत्वाऽसमीचीनत्वबुद्धिमूलकत्वात् 'न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते' इतिन्यायेन ईश्वराराधनात्मके कर्तव्ये विध्युक्ते कर्मणि कुशलत्वाऽकुशलत्वबुद्धिपरित्यागे रागद्वेषयोरनवकाश इति सूचयितुं रागद्वेषयोः स्थितिं

तन्निवृत्तिप्रकारं तयोर्बन्धकत्वं चाह—**इन्द्रियस्येति**। इन्द्रियस्येन्द्रियस्य सर्वेषामिन्द्रियाणां श्रोत्रादीनामर्थे शब्दादौ रागद्वेषौ व्यवस्थितौ इष्टे रागोऽनिष्टे द्वेष इत्येवं प्रतिविषयं नियमेन स्थितौ भवतः। इन्द्रियाणां विषयेषु रागो वा द्वेषो वास्तु मुमुक्षोस्तेन तु का हानिरित्यत आह—तौ हीति। हि यस्मात्कारणात्तौ रागद्वेषावस्य धर्मं चिकीर्षोर्मोक्षमार्गस्य परिपन्थिनौ पथि चोराविव प्रतिबन्धकौ मुमुक्षुं मोक्षसाधनमाश्रयन्तं स्वाश्रयबलेन विषयारण्ये पातयित्वा तदन्तरेव भ्रामयतः। ततो मुमुक्षुः पुरुषः सदसद्विवेकी विषये समीचीनत्वादिबुद्ध्या तयो रागद्वेषयोः वशमधीनतां न गच्छेत् द्रव्ये गुणे कर्माणि वा समीचीनत्वादिबुद्धिं न कुर्याद्विषयेषु समीचीनत्वाऽसमीचीनत्वबुद्धिकरणमेव तयोर्वशवर्तित्वहेतुस्तां मुमुक्षुरकुर्वन् रागद्वेषयोरविषयो भूत्वा स्वधर्मे कुशले वाकुशले वाऽ पीश्वरप्रीत्यै प्रवर्तेत। एवं प्रवृत्तो निष्प्रत्यूहं मोक्षं प्राप्नोतीत्यर्थः॥ ३४॥

श्री० टी०—नन्वेवं प्रकृत्यधीनैव चेत्पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं प्राप्तमित्याशङ्क्याह—**इन्द्रियस्येन्द्रियस्येति**। वीप्सया प्रत्येकं सर्वेषामिन्द्रियाणामित्युक्तम्। अर्थे स्वस्वविषयेऽनुकूले रागः प्रतिकूले द्वेषश्चेत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ ततश्च तदनुरूपा प्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्ती न भवेदिति शास्त्रेण नियम्यते। हि यस्मात् अस्य मुमुक्षोस्तौ परिपन्थिनौ प्रतिपक्षौ। अयं भावः विषयस्मरणादिना रागद्वेषावुत्पाद्यानवहितं पुरुषमनर्थेऽपि गम्भीरे स्रोतसीव प्रकृतिर्बलात्प्रवर्तयति शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबन्धके परमेश्वरभजनादौ प्रवर्तयति। गम्भीरस्रोतःपातात्पूर्वमेव नावमाश्रित इव नानर्थं प्राप्नोतीति॥ ३४॥

स० टी०—नन्वेवं प्राणिनः सर्वे प्रकृतेर्वशवर्तिनः॥ विध्यादिशास्त्रानर्थक्यं प्राप्तं तर्हि यतो जनः॥१॥ न कश्चित्प्रकृतेर्हीनो यं प्रति स्यात्तदर्थवत्॥ पौरुषस्यापि वैयर्थ्यं प्राप्तमित्यत्र चोच्यते॥ २॥ इन्द्रियाणां समस्तानां शब्दादिविषयेऽखिले॥ रागः शास्त्रनिषिद्धेऽपि द्वेषस्तद्विहितेऽपि च॥३॥ प्रतीन्द्रियार्थमित्येवं रागद्वेषौ व्यवस्थितौ॥ प्रातिकूल्यानुकूल्याख्या व्यवस्था तत्र कारणम्॥४॥ तत्र पूरुषकारस्य शास्त्रस्य विषयस्त्वयम्॥ न तयोर्वशमागच्छेच्छास्त्रीयात्सद्विवेकतः॥५॥ अत्यानिष्टानुबन्धित्वज्ञानाभावपुरःसरम्॥ इष्टसाधनताज्ञानं हेतू रागोद्भवे नृणाम्॥ ६॥ पुरस्कृत्यैव तं रागं निषिद्धे प्रकृतिर्हि सा॥ कलञ्जभक्षणादौ च प्रवर्तयति पूरुषम्॥ ७॥ अभीष्टहेतुताज्ञानाभावेनैवोपबृंहितम्॥ अनिष्टहेतुताज्ञानं हेतुर्द्वेषोद्भवे नृणाम्॥८॥ पुरस्कृत्यैव सा द्वेषं शास्त्रीयादपि पूरुषम्॥ निवर्तयति नित्यादेः प्रकृतिः कर्मणो वशम्॥९॥ शास्त्रेण ज्ञापिता तत्र निषिद्धेऽनर्थहेतुता॥ विहितेऽभीष्टहेतुत्वं ज्ञापितं तद्द्वयं बुधः॥ १०॥ विनिश्चित्यास्तिकस्तत्र यथाशास्त्रं प्रवर्तते॥ तदा सा प्रकृतिर्ह्येनं ज्ञानवन्तं नरं बलात्॥ ११॥ न शक्नोति तमानेतुं रागद्वेषवशे कदा॥ विषसंपृक्तमिष्टान्नभोजनादौ यथा नृणाम्॥ १२॥ निवृत्तिर्दृश्यतेऽभीष्टहेतुताज्ञानबाधनात्॥ तपोवित्तव्ययादौ चाभीष्टसाधनताधिया॥१३॥ प्रवृत्तिर्दृश्यतेऽनिष्टहेतुताज्ञानबाधनात्॥ शास्त्रीयं ज्ञानमाश्रित्य रागद्वेषौ विनाशयेत्॥ १४॥ रागद्वेषौ यतः शत्रू मोक्षमार्गवियोजकौ॥ आध्यासिकौ विघ्नकरौ श्रेयोमार्गेऽतिदुःसहौ॥ १५॥ शास्त्रीयज्ञानप्राबल्यात्पौरुषेण पुमानयम्॥ समूलौ तौ समुच्छेत्तुं शक्नोत्यात्मावबोधतः॥ १६॥ ३४॥

भा० टी०—ननु सर्वस्यापि प्राणिजातस्य प्रकृत्यायत्तत्वात्पुरुषकारस्य विषयालाभाद्विधिनिषेधशास्त्रानर्थक्यं प्राप्तमित्याशङ्क्याह—**इन्द्रियस्येति**। सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे रागोऽनिष्टे द्वेष इति प्रतिविषयं रागद्वेषाववश्यंभाविनौ तस्मात्तयोर्वशं नागच्छेत्तदधीनो न प्रवर्तेत। तत्रायमेव पुरुषप्रयत्नस्य शास्त्रस्य च विषय उच्यते। तथाहि इन्द्रियार्थसंनिकर्षे पदार्थज्ञानं ततो मिथ्याज्ञानवशात्तत्र रागादिः प्रकृतिश्च रागादिपुरःसरैव पुरुषं स्वकार्ये प्रवर्तयति तदा निषिद्धाचरणं विहितत्यागश्च संपद्यते। यदा पुनः शास्त्रदृष्ट्या

पूर्वमेव यथावद्वस्तु प्रतिभाति तदा मिथ्याज्ञाननिवृत्त्या रागादिर्निवर्तते सहकारिनिवृत्त्या च प्रकृतिः प्रवर्तयितुं न शक्नोति तस्मात्प्रथममेव पुरुषकारेण रागद्वेषयोर्वशं नागच्छेत् । नच पुरुषकारे शास्त्रे च प्रवृत्तिरेव न सिध्यति प्रकृतेः प्रतिबन्धिकायाः सत्त्वादिति वाच्यम्, अदृष्टस्य दृष्टसामग्रीं विना प्रतिबन्धकत्त्वाभावात्। ननु तुल्यन्यायेन दृष्टस्यापि शास्त्रादौ प्रवृत्तिरूपस्यादृष्टापेक्षतया प्रकृत्यधीनत्वमेव पुनरागतमिति चेत्तर्हि तदनुकूलसंस्कारोऽपि ब्राह्मणाद्यधिकारिजनेऽस्त्येवेति न काचिदनुपपत्तिः। नच तत एव सर्वं भविष्यति किं विधिनिषेधमोक्षपरैः शास्त्रैरिति वाच्यम्, अदृष्टस्य दृष्टसामग्र्यपेक्षाया आवश्यकत्वस्योक्तत्वात् । तथाच यथा लोके संस्काररूपेण स्थितस्य कामस्य कामिनीदर्शनमुद्बोधकं तथा शास्त्रमपि । ननु शास्त्रश्रवणे प्रवृत्तिजनकस्य तस्य किमुद्दीपकमिति चेत् यथा जनकस्य क्रीडार्थमुद्यानं गतस्याकस्मिकं सिद्धवाक्यश्रवणं यथा वा कार्यान्तरवशाच्छ्रवणशालायामागतस्य तत्रत्यशब्दश्रवणं यथा वा केनचिल्लौकिकेन निमित्तेन मित्रतां प्राप्तस्य कस्यचिच्छिष्टस्य वचनमिति गृहाणेत्यलं विस्तरेण । हि यस्मात्तौ रागद्वेषौ अस्य पुरुषस्य परिपन्थिनौ श्रेयोमार्गस्य विघ्नकरौ तस्कराविव पथि ॥ ३४ ॥

प० टी०—नन्वेवं प्राचीनस्वभावाधीना चेत्पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं स्यादित्याह—**इन्द्रियस्येति** । मुख्येन्द्रियस्य मनस इन्द्रियस्यार्थरूपरसादिविषये रागद्वेषौ व्यवस्थिताववश्यंभाविनौ स्याताम् । स्वानुकूलेऽर्थे विषये रागः प्रीतिः प्रतिकूले च द्वेषस्तथापि तयोर्वशं नागच्छेत् तद्वशवर्ती न भवेत् हि यस्मात् कारणात् तौ रागद्वेषावस्य मुमुक्षोर्मनसः परिपन्थिनौ क्षोभकत्वेन शत्रुवदुपस्थितौ । नहि कश्चिल्लोकेऽपि वैरिवशवर्ती भवति दुःखहेतौ प्रवृत्त्यभावाद् । अथ तौ प्रकृतिबलेन वशं नयतस्तथापि मदाश्रयबलेन शास्त्राचार्यबलेन च वशं न गच्छेदित्यर्थः । ननु तत्रापि प्राक्संस्कार एव शरणमिति चेन्न "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादिवाक्यैरुपायस्य श्रुतिबोधितत्वात् ॥ ३४ ॥

रा० टी०—यदि सर्वाणि भूतानि स्वभावानुगुणमेव चेष्टन्ते निग्रहोऽकिंचित्करस्तर्हि 'मयि सर्वाणि' इत्यत्रेतिकर्तव्यतापूर्वं कर्मविधानं ये मे मतमित्यादिना तस्य फलोक्तिश्च व्यर्थेत्यत आह--**इन्द्रियस्येति** । जात्येकवचनम् । इन्द्रियाणां चक्षुरादीनामर्थेषु रूपादिषु इन्द्रियाणां रागद्वेषौ अनुकूले रागः प्रतिकूले द्वेषश्चेत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ । लोभमोहमदमत्सराणामुपलक्षणम् । प्राधान्याद्द्वयोरेवोक्तिः । तदनुरूपा च प्राणिनां चेष्टेति निग्रहोऽकिंचित्करो यद्यपि तथापि तयो रागद्वेषयो रागादिषड्वर्गस्य वशं न गच्छेत् न प्राप्नुयात् । कुतः हि यस्मादस्य श्रेयोर्थिनस्तौ परिपन्थिनौ श्रेयोविघातकौ पापहेतू चात इत्यर्थः । निग्रहात्सद्यः फलाभावेप्यतिप्रयत्नवतो भवत्येव फलमिति भावः । उक्तं हि 'संस्कारो बलवानेव' इत्यादि । एतच्च योग्यजनविषयं ध्येयम् ॥ ३४ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

त० टी०—ननु शास्त्राचार्योपदेशेनासन्मार्गान्निवृत्तस्येश्वराराधनाय निर्हिंसकसात्त्विकयदृच्छालाभसंतोषवन्याश्नादिजीवनरूपो मुनिधर्म एव श्रेयान्भाति, किं निरनुक्रोशेन राजसतामसरूपेण क्षत्रियधर्मेण युद्धेनेत्याशङ्क्याह—श्रेयानिति । स्वधर्मः स्ववर्णाश्रमनिबन्धनः शास्त्रविहितो यो धर्मः स विगुणोऽपि कियद्गुणहीनोऽपि सुष्ठु सर्वाङ्गतयाऽनुष्ठितात्परधर्मादन्यवर्णाश्रमोद्देशेन विहिताद्धर्मात् श्रेयान् प्रशस्यतरः, अतः स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः अतिशयेन प्रशस्यम् । कस्मात् परधर्मे जीवनादपि । यतः परधर्मो भयावहः परस्यान्यस्यान्येनानुष्ठितः शास्त्रीयोऽपि धर्मः तद्रुचिरपि पापवत् भयावहः नर-

कादिभयं तत्फलमावहति प्रापयतीति तथा 'पर्युदस्तो हि यो यस्माच्छास्त्रीयादपि कर्मणः । न स तत्राधिकारी स्याद्दानादौ दीक्षितो यथा ' इति शास्त्रनियमात् ॥ ३५ ॥

म० टी०—ननु स्वाभाविकरागद्वेषप्रयुक्तपश्वादिसाधारणप्रवृत्तिप्रहाणेन शास्त्रीयमेव कर्म कर्तव्यं चेत्तर्हि यत्सुकरं भिक्षाशनादि तदेव क्रियतां किमतिदुःखावहेन युद्धेनेत्यत आह—श्रेयानिति । श्रेयान् प्रशस्यतरः स्वधर्मः यं वर्णमाश्रमं प्रति यो विहितः स तस्य स्वधर्मः विगुणोऽपि सर्वाङ्गोपसंहारमन्तरेण कृतोऽपि परधर्मात् स्वं प्रत्यविहितात् स्वनुष्ठितात् सर्वाङ्गोपसंहारेण संपादितादपि नहि वेदातिरिक्तमानगम्यो धर्मः येन परधर्मोऽप्यनुष्ठेयः धर्मत्वात् स्वधर्मवदित्यनुमानं तत्र मानं स्यात् ' चोदनालक्षणोऽर्थो धर्मः' इति न्यायात् । अतः स्वधर्मे किंचिदङ्गहीनेऽपि स्थितस्य निधनं मरणमपि श्रेयः प्रशस्यतरं परधर्मस्थस्य जीवितादपि स्वधर्मस्थस्य निधनं हि इह लोके कीर्त्यावहं परलोके च स्वर्गादिप्रापकम् । परधर्मस्तु इहाकीर्तिकरत्वेन परत्र नरकप्रदत्वेन च भयावहो यतः अतो रागद्वेषादिप्रयुक्तस्वाभाविकप्रवृत्तिवत्परधर्मोऽपि हेय एवेत्यर्थः । एवं तावद्भगवन्मताङ्गीकारिणां श्रेयःप्राप्तिस्तदनङ्गीकारिणां च श्रेयोमार्गभ्रष्टत्वमुक्तं श्रेयोमार्गभ्रंशेन फलाभिसन्धिपूर्वककाम्यकर्माचरणे च केवलपापमात्राचरणे च बहूनि कारणानि कथितानि ये त्वेतदभ्यसूयन्तः इत्यादिना । तत्रायं संग्रहश्लोकः 'श्रद्धाहानिस्तथाऽसूया दुष्टचित्तत्वमूढते । प्रकृतेर्वशवर्तित्वं रागद्वेषौ च पुष्कलौ ॥ परधर्मरुचित्वं चेत्युक्ता दुर्मार्गवाहकाः' ॥ ३५ ॥

शं० टी०—ननु ' अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत् ' इतिस्मरणात्कर्मसंन्यासोऽपि धर्मः कर्तव्य एवेति चेत्सत्यं संन्यासोऽपि शास्त्रीय एव धर्मः कर्तव्यश्च मुमुक्षोस्तथापि ' स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ' इतिवचनादपक्कान्तःकरणस्य स धर्मो न भवति किंतु बहुजन्मानुष्ठितपुण्यपुञ्जैः परिपक्कान्तःकरणस्य सर्वतो विरक्तस्य कर्मणां मोक्षसाधनत्वमपश्यत एव मुमुक्षोर्विविदिषया कर्तव्यो धर्मः संन्यासः कृतार्थस्य वा विदुषः नतु मूढस्य कर्मस्वलसस्य दुःखबुद्ध्या ततोऽस्य संन्यासः परधर्म एव नतु स्वधर्मः, नापि च श्रेयोहेतुः किंतु कर्मैव स्वधर्मः श्रेयोहेतुश्चानुष्ठेय इत्याह—श्रेयानिति । वर्णाश्रमिणामयं परमोपदेशः क्रियते भगवता शृण्वन्तु मुमुक्षवः। स्वनुष्ठितात् यथाशास्त्रं सुसम्यङ्नियमेनानुष्ठितादाचरितात्परधर्माद्विगुणोऽपि व्यङ्गोऽप्यसम्यगनुष्ठितोऽपि स्वधर्मः कर्तव्यत्वेन स्वस्य यः शास्त्रेण विहितः स एव स्वधर्मः पुरुषस्य श्रेयान् श्रेष्ठतरः विध्युक्तत्वात् । यथा कर्मणः परधर्मत्वाद्यतेः स्नानजपस्तोत्रादिकर्मापेक्षया ज्ञानसाधनश्रवणाद्येकप्रयोजनः सर्वकर्मसंन्यास एव श्रेष्ठो धर्मस्तथा कर्मसंन्यासस्य परधर्मत्वाद्गृहिणोऽपि सर्वकर्मसंन्यासापेक्षया ज्ञानसाधनसत्त्वशुद्ध्येकप्रयोजनः कर्मयोग एव श्रेष्ठो धर्मः । एवमेवेतरेषां वर्णाश्रमिणां च परधर्मापेक्षया स्वधर्म एव श्रेयस्कर इत्यर्थः । किंच सुतरां परधर्मं परित्यज्य स्वल्पे व्यङ्गेऽपि वा स्वधर्मे नियमेन वर्तमानस्य निधनं मरणं श्रेयः श्रेयसे स्वर्गायाऽपवर्गाय वा भवति न कचिदप्यश्रेयसे नरकाय, स्वधर्मं संपरित्यज्य वागगोचरेऽपि परधर्मे वर्तमानस्य निधनं कचिच्छ्रेयसे न भवति किंतु परधर्मो भयावहः इति नियमेन सम्यगनुष्ठितोऽपि परधर्मो भयं यमदूतेभ्यो नरकं चावहति संपादयतीति भयावहः नरकगर्भवासादिदुःखप्रवाहहेतुरेव भवतीत्यर्थः ॥ ३५ ॥

श्री० टी०—तदेवं स्वाभाविकीं पश्वादिसदृशीं प्रकृतिं त्यक्त्वा स्वधर्मे प्रवर्तितव्यमित्युक्तम् । तर्हि स्वधर्मस्य युद्धादेर्दुःखरूपस्य यथावत्कर्तुमशक्यत्वात्परधर्मस्य च अहिंसादेः सुकरत्वाद्धर्मत्वाविशेषाच्च तत्र प्रवर्तितुमिच्छन्तं प्रत्याह—श्रेयानिति । किंचिदङ्गहीनोऽपि स्वधर्मः श्रेयान् प्रशस्यतरः स्वनुष्ठितात्सर्वाङ्गपूर्त्या कृतादपि परधर्मात्सकाशात् । तत्र हेतुः स्वधर्मे युद्धादौ प्रवर्तमानस्य निधनं मरणमपि श्रेष्ठं स्वर्गादिप्रापकत्वात् । परधर्मस्तु स्वस्य भयावहः निषिद्धत्वेन नरकप्रापकत्वात् ॥ ३५ ॥

स० टी०—ननु स्वाभाविकीं रागद्वेषहेतुप्रवृत्तिकीम् ॥ त्यक्त्वा शास्त्रीयमेवेह कर्म कर्तव्यमस्ति चेत् ॥ १ ॥ तदा यदञ्जसा कर्तुं शक्यं भिक्षाशनादिकम् ॥ तदेव क्रियतां किं मे युद्धेन श्रमदायिना ॥ २ ॥ मैवं स्वधर्मोऽयं वर्णमाश्रमं प्रति चोदितः ॥ श्रुत्या स एव तस्यास्ति प्रशस्यतर आमृतेः ॥ ३ ॥ स सर्वाङ्गोपसंहारमन्तरेण कृतोऽपि च ॥ स्वं प्रत्यविहिताद्धर्मात्सर्वाङ्गैः साधितादपि ॥ ४ ॥ अतः स्थितस्य स्वे धर्मे किंचिदङ्गाननुष्ठिते ॥ अपि स्यान्मरणं श्रेयः परधर्मस्थजीवितात् ॥ ५ ॥ इह कीर्त्यावहो यस्मात्परलोके सुखावहः ॥ स्वधर्मस्तत्र धीमद्भिः स्थेयं शास्त्रार्थवेदिभिः ॥ ६ ॥ परधर्मस्तु लोकानामिहाकीर्तिकरो यतः ॥ परत्रानर्थदो घोरनरकादिप्रदानतः ॥ ७ ॥ तस्माद्रागादिवद्धयन्यधर्मो हेयो मुमुक्षुभिः ॥८॥३५॥

भा० टी०—ननु शास्त्रीयमेव कर्म कर्तव्यं चेत्तर्हि परधर्मोऽपि सुकरो धर्मत्वात् कुतो नानुष्ठेय इति चेत्तत्राह—**श्रेयानिति** । परधर्मात्साद्गुण्येन संपादितादपि स्वकीयो धर्मो विगतगुणोऽपि अनुष्ठीयमानः प्रशस्यतरः । स्वधर्मे स्थितस्य मरणमपि श्रेयः इहलोके कीर्त्यावहममुत्र स्वर्गप्रापकम् । परधर्मस्तु तद्विपर्ययेण भयप्रदः । यद्वा तत्तादिन्द्रियविषये स्थितयोः रागद्वेषयोरात्मप्रापक आत्मधर्मे विघ्नकर्तृत्वेऽपीन्द्रियधर्मे प्रावृत्तिके विषयसुखजनके तयोस्तत्त्वाभावात् इन्द्रियधर्म एवानुष्ठेयः किमात्मधर्मानुष्ठानेन विघ्नकर्तृयुक्तेनेति चेत्तत्राह—**श्रेयानिति** । परेषामिन्द्रियाणां धर्मात्प्रावृत्तिकात्स्वनुष्ठितात् सुगमत्वेनानुष्ठातुं शक्यादपि स्वधर्म आत्मधर्म अध्यात्मावगतिरूपः विगुणः प्राकृतगुणवियुक्तः मुक्तिहेतुत्वात्प्रशस्यतरः तत्र निधनं श्रेयः अपुनर्भवत्वात् । परधर्मो भयावहः अविद्यारूपतया संसारपातहेतुत्वात् ॥ ३५ ॥

प० टी०—ननु धर्माविशेषाच्छमदमादिसंपदुपेतं ब्रह्मकर्मैवानुष्ठेयम्, स्वपरहिंसाप्रधानत्वेन दुःखनिदाने क्षत्रधर्मे कथं प्रवर्तितव्यमित्याशङ्क्याह—**श्रेयानिति** । सुष्ठु यथा भवति तथानुष्ठितात्परधर्माच्छमदमादिसंपदुपेताद्ब्राह्मणधर्मात्सकाशादुक्तप्रकारेण विगुणोऽपि स्वधर्मः श्रेयान् प्रशस्यतरः प्रोक्तः । यथा सौभाग्यादिगुणोपेतायाः परमातुः सकाशात्कुरूपापि स्वमाता हितावहा भवति । अतः स्वधर्मे मरणं श्रेयः श्रुतिबोधितस्वमार्गादिसाधनत्वात् । परधर्मस्तु भयावहः निषिद्धत्वेन निरयप्रापकत्वात् । अन्यथा वेदेन चातुर्वर्ण्यं कथं कल्प्येत ॥ ३५ ॥

रा० टी०—ज्यायसी चेदित्यत्रार्जुनेन कर्मैव न कार्यं तत्रापि नरकाद्यनर्थहेतुरागद्वेषोपेततया घोरं युद्धाख्यं कर्म तु नैव कार्यमिति कृताक्षेपद्वयमध्ये प्राथमिको लोकेऽस्मिन्नित्यादिनोत्तारितः । द्वितीयस्त्वधुना युध्यस्व विगतज्वरः तयोर्न वशमागच्छेदित्याद्युक्त्या स्मारितः सन्परिह्रियते—**श्रेयानिति** । स्वधर्मः स्ववर्णाश्रमोचितो धर्मः विगुणः अङ्गहीनोपि स्वनुष्ठितात्सर्वाङ्गसाकल्येन कृतात्परधर्मादन्यवर्णाश्रमोचितधर्मादपि श्रेयानधिकतरः । कुतः स्वधर्मे युद्धादौ निधनमपि श्रेयः श्रेष्ठतरं परधर्मः वर्णाश्रमान्तरधर्मस्तु भयावहः निषिद्धत्वादनर्थप्रापको यतोऽत इत्यर्थः ॥ ३५ ॥

अर्जुन उवाच—अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ॥
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

त० टी०—परधर्मो भयावहः इत्युक्तं तेन नरकादिभयहेतुः पापं सूचितम् । इदानीं पापाचारस्य हेतुं जिज्ञासुरर्जुन उवाच—**अथेति** । अथशब्दः प्रश्नान्तरे । परधर्मरुचिर्भयावहेति त्वदुक्तं मयाऽवधारितं किंचिदन्यत्पृच्छामीत्यर्थः । हे वार्ष्णेय परधर्मरुच्युपलक्षितं नरकादिफलकं पापं कर्तुमनिच्छन्नपि केन प्रयुक्तः प्रेरितोऽयं पूरुषः पापं चरति आचरति । तत्रापि बलादिव नियोजितः, इति मे ब्रूहीति शेषः ॥ ३६ ॥

म० टी०–तत्र काम्यप्रतिषिद्धकर्मप्रवृत्तिकारणमपनुद्य भगवन्मतमनुवर्तितुं तत्कारणावधारणाय 'ध्यायतो विषयान्पुंसः' इत्यादिना पूर्वमनर्थमूलमुक्तम् । साम्प्रतं च प्रकृतेर्गुणसंमूढाः, इत्यादिना बहुविस्तरं कथितम् तत्र किं सर्वाण्यपि समप्राधान्येन कारणानि । अथवैकमेव मुख्यं कारणमितराणि तु तत्सहकारीणि केवलम् । तत्राद्ये सर्वेषां पृथक्पृथङ्निवारणे महान्प्रयासः स्यात्, अन्त्ये त्वेकस्मिन्नेव निराकृते कृतकृत्यता स्यादित्यतो ब्रूहि मे केन हेतुना प्रयुक्तः प्रेरितोयं त्वन्मताननुवर्ती सर्वज्ञानविमूढः पुरुषः पापमनर्थानुबन्धि सर्वं फलाभिसन्धिपुरःसरं काम्यं चित्रादि शत्रुवधसाधनं च श्येनादि प्रतिषिद्धं च कलञ्जभक्षणादि बहुविधं कर्माचरति स्वयं कर्तुमनिच्छन्नपि न तु निवृत्तिलक्षणं परमपुरुषार्थानुबन्धि त्वदुपदिष्टं कर्मेच्छन्नपि करोति । न च पारतन्त्र्यं विनेत्थं संभवति । अतो येन बलादिव नियोजितो राज्ञेव भृत्यस्त्वन्मतविरुद्धं सर्वानर्थानुबन्धित्वं जानन्नपि तादृशं कर्माचरति तमनर्थमार्गप्रवर्तकं मां प्रति ब्रूहि ज्ञात्वा समुच्छेदायेत्यर्थः । हे वार्ष्णेय वृष्णिवंशे मन्मातामहकुले कृपयावतीर्णेति संबोधनेन वार्ष्णेयीसुतोहं त्वया नोपेक्षणीय इति सूचयति ॥ ३६ ॥

शं० टी०–यद्यपि ध्यायतो विषयानिति इन्द्रियस्येन्द्रियस्य इति च पुरुषस्य जननमरणाद्यनर्थपरंपरागमनकारणं निरूपितं तथापि विशेषतस्तत्स्वरूपं तदधिष्ठानं तज्जयोपायं च विज्ञातुकामोऽर्जुनः स्वयं विस्मृतवत्तदेव पृच्छति । संसारकारणे विज्ञाते पण्डितैस्तदुपायेन परिहर्तुं शक्यत इत्यर्जुन उवाच–अथेति । अथशब्दः पृथक्प्रश्नारम्भार्थः।ब्रह्मविदां ब्रह्मानन्दामृतं वर्षतीति वृष्णिः सम्यग्बोधस्तेनावगम्यते इति वार्ष्णेयः परमात्मा श्रीभगवान् तस्य संबुद्धिर्हे वार्ष्णेय बलवता राज्ञा चान्येन वा बलात्कारेण नियोजितः प्रेष्य इव कार्याकार्यज्ञोऽप्ययं पुरुषः स्वयं फलं पापसाध्यमनिच्छन्नपि पापमाचरति केन प्रयुक्तोऽस्मिन् कार्यकारणसंघाते बलवता केन प्रेरितो भूत्वाऽयुक्तमपि करोति तं ब्रूहीत्यर्थः ॥ ३६ ॥

श्री० टी०–तयोर्न वशमागच्छेदित्युम्, तदेतदशक्यं मन्वानोऽर्जुन उवाच–अथ केनेति । वृष्णेर्वंशेऽवतीर्णो वार्ष्णेयः हे वार्ष्णेय अनर्थरूपं पापं कर्तुमनिच्छन्नपि केन प्रयुक्तः प्रेरितोऽयं पुरुषः पापं चरति । कामक्रोधौ विवेकबलेन निरुन्धतोऽपि पुरुषस्य पुनः पापे प्रवृत्तिदर्शनादन्योऽपि तयोर्मूलभूतः कश्चित्प्रवर्तको भवेदिति संभावनायां प्रश्नः ॥ ३६ ॥

स० टी०–यद्यप्यनर्थमूलं प्राग्ध्यायतो विषयानिति ॥ प्रोक्तं तथाधुना रागद्वेषौ शत्रू प्रकीर्तितौ ॥ १ ॥ प्रकृतेर्गुणसंमूढा इत्यादौ बहुविस्तरात् ॥ पुंसः पृथक्पृथक् तत्र सर्वेषां विनिवारणे ॥ २ ॥ महाप्रयास एव स्यादतः सर्वस्य कारणम् ॥ किमेकं यन्निवृत्त्या स्यात्कृतकृत्यत्वमञ्जसा ॥ ३ ॥ ममेत्याशयवानाह हरिं प्रत्यर्जुनो वचः ॥ केनायं हेतुभूतेन प्रेरितः पुरुषोऽवशः ॥ ४ ॥ अनिष्टहेतुकं कर्म निषिद्धं चरति स्फुटम् ॥ अनिच्छन्नप्ययं कर्तुं भृत्यो राज्ञेव येन सः ॥ ५ ॥ बलान्नियोजितो जानन्नप्यनिष्टानुबन्धि तत् ॥ कर्मानुचरतीत्येनं प्रेरकं ब्रूहि मां प्रति ॥६॥ वृष्णिवंशेऽवतीर्णत्वान्नोपेक्ष्योऽहं हरे त्वया ॥७॥३६॥

भा० टी०–ध्यायतो विषयान् रागद्वेषौ ह्यस्य परिपन्थिनाविति पूर्वग्रन्थेन संसारपातहेतुभूतानि विस्तरेण भगवतोक्तानि । तत्र संक्षिप्तं निश्चितमिदमेवेति ज्ञातुमिच्छन्नर्जुन उवाच ज्ञाते हि तस्मिंस्तदुच्छेदाय प्रयत्नं कुर्यामित्यभिप्रायेण–अथेति । केन हेतुभूतेन प्रयुक्तः प्रेरितः सन्ननिच्छन्नपि बलादिव नियोजितो राज्ञेव भृत्योऽयं पुरुषः पापमाचरति यथा त्वमजोऽपि केनचिदतिभक्तेन प्रार्थितः वृष्णिकुले जन्मलब्धवानसि तथेति सूचयन्नाह–वार्ष्णेयेति । तं वैरिणं ब्रूहि इत्यर्थः ॥ ३६ ॥

प० टी०–अथ तयोर्न वशमागच्छेदिति यदुक्तं तदशक्यं मन्यमानोऽर्जुनः पृच्छति–अथेति । भो वा-

ष्र्णेय वृष्णिकुलोद्भव कृष्ण पापं कर्तुमिच्छन्निव पुरुषः केन प्रयुक्तः सन् पापं चरति । किंवन् बलादिव बलात्कारेण नियोजित इवाज्ञप्त इव यथा त्वयाहमिति सूचयन् वार्ष्णेयेति संबुद्धिः ॥ ३६ ॥

रा० टी०—तयोर्न वशमागच्छेदित्यत्रातिप्रयत्नवतः पापहेत्वरिषड्वर्गजयः शक्य इत्युक्तम् । तेषु को बलवान् तं महाप्रयत्नेन जेष्यामीतिभावेन पृच्छति—**अथेति** । मयि संन्यस्य कर्माणीत्यादावुक्तसेति-कर्तव्यताककर्मकर्तव्यतारूपप्रकृतप्रमेये पापहेतुप्रश्नोऽनुपयुक्तः । तथापि तयोर्न वशमित्यर्धे कामाद्यरिषड्वर्गस्य पापहेतुत्वोक्त्या स्मारितम् । तेषु प्रबलपापहेतुप्रश्नोयं प्रासङ्गिक इतिभावेन गीताकृता प्रकृतादर्थादर्थान्तर-द्योतकोऽथशब्दः प्रयुक्तः । यद्वा प्रकृतेः क्रियमाणानीत्यत्रेश्वरस्य सर्वप्रेरकत्वोक्त्या तत्प्रेरकत्वस्य पार्थस्य देवत्वेन देवानां प्रेरकत्वस्य च ज्ञाततया तत्र प्रश्नायोगात् । इन्द्रियस्येत्यत्र रागशब्दितकामाद्यरि-षड्वर्गस्य प्रवर्तकत्वोक्त्या परमेश्वराद्देवजाताच्चाथानन्तरं कामादिषट्सु बलवत्प्रश्नोयमिति द्योतनादानन्तर्य-वाच्येवायमथशब्दः । तथाचायमर्थः । अथ परमेश्वराद्देवेभ्यश्चानन्तरमयं पुरुषः पापाचारमनिच्छन्नपि बला-न्नियोजित इव पापं चरति स कामादिषु केन बलवता प्रयुक्तः प्रेरितश्चरति । हे वार्ष्णेय वृष्णिकुलोद्भवेति ॥३६॥

श्रीभगवानुवाच–काम एष क्रोध एष रजोगुणसमुद्भवः ॥
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

त० टी०—एवं पृष्टो ध्यायतो विषयानित्यादिना सङ्गात्सञ्जायते कामः इत्युक्त इन्द्रियस्येन्द्रियस्यार्थे इत्यत्र च रागशब्देनाभिहितः काम एव पापाचारहेतुर्महाञ्छत्रुरित्युत्तरं **श्रीभगवानुवाच–काम इति** । यस्त्वया पापाचरणे प्रयोजकः पृष्टः स एष इन्द्रियार्थे रागपर्यायः काम एव । ननु क्रोधोऽपि हिंसाद्यनर्थहेतुरुक्त इति चेत्सत्यं सोऽपि न ततो भिन्नः, किन्तु क्रोध एष इति काम एव केनचित्प्रतिहतः क्रोधरूपेण परिणमते । अतः क्रोधोऽपि काम एव । कामजय एव क्रोधजयः न तज्जये पृथग्यत्नः कर्तव्य इति भावः । तज्जयोपायदर्शनाय तत्कारणमाह—**रजोगुणसमुद्भव इति** । रजोगुणात्सम्यगुद्भवति उत्पद्यते इति रजोगुणसमुद्भवः । एतेन सत्त्ववृद्ध्या रजोऽभिभवद्वारेण कामजयो भवेदिति सूचितम् । तस्य दुर्जेयतामाह—**महाशन इति** । महदशनं यस्य बहुधनधान्यस्त्रीराज्यलाभेऽपि हविषाग्निरिव वर्धते नतु शाम्यति । अत एव महापाप्मा केनचिन्निवारितः क्रोधात्मना परिणमय्य पितृभ्रातृगुर्वादि-हिंसनमपि दोषमगणय्य कारयति । अत एनमिह श्रेयोमार्गे वैरिणं विद्धि ॥ ३७ ॥

म० टी०—एवमर्जुनेन पृष्टे "अथो खल्वाहुः काममय एवायं पुरुषः" इति "आत्मैवेदमग्र आसी-देक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीय" इत्यादिश्रुतिसिद्धमु-त्तरं **श्रीभगवानुवाच–काम इति** । यस्त्वया पृष्टो हेतुर्बलादनर्थमार्गे प्रवर्तकः स एष काम एव महान् शत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनाम् । ननु क्रोधोऽप्यभिचारादौ प्रवर्तको दृष्ट इत्यत आह—क्रोध एषः काम एव केनचिद्धेतुना प्रतिहतः क्रोधत्वेन परिणमतेऽतः क्रोधोप्येष काम एव। एतस्मिन्नेव महावैरिणि निवारिते सर्वपुरुषार्थप्राप्तिरित्यर्थः । तन्निवारणोपायज्ञानाय तत्कारणमाह—रजोगुणसमुद्भवः । दुःखप्रवृत्तिबलात्मको रजोगुण एव समुद्भवः कारणं यस्य, अतः कारणानुविधायित्वात् कार्यस्य सोपि तथा । यद्यपि तमोगुणोपि तस्य कारणं तथापि दुःखे प्रवृत्तौ च रजस एव प्राधान्यात्तस्यैव निर्देशः । एतेन सात्त्विकया वृत्त्या रजसि क्षीणे सोऽपि क्षीयत इत्युक्तम् । अथवा तस्य कथमनर्थमार्गे प्रवर्तकत्वमित्यत आह—रजोगुणस्य प्रवृत्त्यादिलक्षणस्य समुद्भवो यस्मात्, कामो हि विषयाभिलाषात्मकः स्वयमुद्भूतो रजः प्रवर्तयन्पुरुषं दुःखा-त्मके कर्मणि प्रवर्तयति । तेनायमवश्यं हन्तव्य इत्यभिप्रायः । ननु सामदानभेददण्डाश्चत्वार उपायास्तत्र

प्रथमत्रिकस्यासंभवे चतुर्थो दण्डः प्रयोक्तव्यो न तु हठादेवेत्याशङ्क्य त्रयाणामसंभवं वक्तुं विशिनष्टि–महाशनो महापाप्मेति । महदशनमस्येति महाशनः ‘ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ’ इति स्मृतेः । अतो न दानेन सन्धातुं शक्यो नापि सामभेदाभ्यां यतो महापाप्माऽत्युग्रस्तेन हि बलात्प्रेरितोऽनिष्टफलमपि जानन्पापं करोति । अतो विद्धि जानीहि एनं काममिह संसारे वैरिणम् । तदेतत्सर्वं विवृतं वार्तिककारैः “ आत्मैवेदमग्र आसीत् ” इति श्रुतिव्याख्याने–‘ प्रवृत्तौ च निवृत्तौ च यथोक्तस्याधिकारिणः । स्वातन्त्र्ये सति संसारसृतौ कस्मात्प्रवर्तते ॥ ननु निःशेषविध्वस्तसंसारानर्थवर्त्मनि । निवृत्तिलक्षणे वाच्यं केनायं प्रेर्यतेऽवशः ॥ अनर्थपरिपाकत्वमपि जानन्प्रवर्तते । पारतन्त्र्यमृते दृष्टा प्रवृत्तिर्नेदृशी क्वचित् ॥ तस्माच्छ्रेयोर्थिनः पुंसः प्रेरकोऽनिष्टकर्मणि । वक्तव्यस्तन्निरासार्थमित्यर्था स्यात्परा श्रुतिः ॥ अनाप्तपुरुषार्थोऽयं निःशेषानर्थसंकुलः । इत्यकामयतानाप्तान्पुमर्थान्साधनैर्जडः ॥ जिहासति तथानर्थानविद्वानात्मनि श्रितान् । अविद्योद्भूतकामः सन्नथो खल्विति च श्रुतिः ॥ अकामतः क्रियाः काश्चिद्दृश्यन्ते नेह कस्यचित् । यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥ काम एष क्रोध एष इत्यादिवचनं स्मृतेः । प्रवर्तको नापरोऽतः कामादन्यः प्रतीयते ’ इति । अकामतः इति मनुवचनम् । अन्यत्स्पष्टम् ॥ ३७ ॥

शं० टी०–‘अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् । यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्’ इति न्यायेन पुंसः सकलकर्माचरणकारणं सर्वानर्थबीजं काम एवेति बोधयितुं श्रीभगवानुवाच–**काम एष** इति । सर्वेषां प्रवृत्तेः काममूलत्वात्कामः सर्वप्रत्यक्ष इत्यभिप्रायेण एष इति पुरोनिर्देशः । योग्यत्वायोग्यत्वविचारमन्तरेण वस्तु दृष्टं श्रुतं च कामयति पुमांसमिति कामः वैषयिकी प्रबलेच्छाऽत्र कामशब्देनोच्यते । एष कामः यः पुंसः संसारकारणं स एष काम एव । केनाचित्स्वविषये प्रतिबद्धे क्रोधात्मना परिणमते ततः क्रोधोऽप्येष काम एव । स्वयं रजोगुणसमुद्भवः रजसः गुणो रागो रञ्जनात्मिका वैषयिकी सामान्येच्छा स एव । विषयसन्निधाने काममुद्भावयतीति कामो रजोगुणसमुद्भवः । यद्वा ‘ प्रज्ञां तु सात्त्विकीं प्राहुस्तामसीं तु विचित्तताम् । क्रियां तु राजसीं प्राहुर्गुणतत्त्वविदो बुधाः ’ इतिवचनात्क्रिया रजोगुणस्तस्य समुद्भवो यस्मात्स रजोगुणसमुद्भवः काम एव प्रवृत्तिहेतुरित्यर्थः । ‘ न जातु कामः कामानामुपभोगेन शाम्यति’ इतिवचनान्महदियत्ताशून्यमशनमुपभोगलक्षणं यस्य स महाशनः कदाचित्तृप्तिरहित इत्यर्थः । तत एव महापाप्मा महान् पाप्मा दोषो यस्मात्पुरुषस्यायाति स महापाप्मा । यतः कामाविष्टः स्वसारमप्यारोढुमिच्छति चण्डालादप्यर्थं गृह्णाति क्रुद्धो गुरुमप्याक्रोशति गामपि च हन्त्यतः कामस्य युक्तं महापाप्मत्वमित्यर्थः । तस्मात्त्वमिह संसारे मुमुक्षोरेनं काममेव वैरिणं विद्धि मुक्तिप्रतिबन्धकमेतमेव विजानीहीत्यर्थः ॥ ३७ ॥

श्री० टी०–अत्रोत्तरं श्रीभगवानुवाच–**काम एष इति** । यस्त्वया पृष्टो हेतुरेष काम एव । ननु क्रोधोपि पूर्वं त्वयोक्तः इन्द्रियस्येन्द्रियस्येत्यत्र, सत्यं नासौ ततः पृथक् किंतु क्रोधोऽप्येष एव काम एव । केनचित् प्रतिहतः क्रोधात्मना परिणमते अतः पूर्वं पृथक्त्वेनोक्तोऽपि क्रोधः कामज एवेत्यभिप्रायेण कामेनैकीकृत्योच्यते रजोगुणात्समुद्भवतीति तथा । अनेन सत्त्ववृद्ध्या रजसि क्षयं नीते सति कामोऽपि क्षीयत इति सूचितम् । एनं काममिह मोक्षमार्गे वैरिणं विद्धि । अयं च वक्ष्यमाणक्रमेण हन्तव्य एव यतो नासौ दानेन सन्धातुं शक्य इत्याह—**महाशनः** । महदशनं यस्य दुष्पूर इत्यर्थः । नच साम्ना संधातुं शक्यः यतो महापाप्मा अत्युग्रः ॥ ३७ ॥

स० टी०–एवं पृष्टेऽर्जुनेनाह भगवानुत्तरं वचः ॥ अथो खल्वाहुरित्यादिश्रुतिसिद्धमसंशयम् ॥ १ ॥ शृणु तं वैरिणं यं त्वं पृच्छस्यत्यन्तदुःसहम् ॥ बलादनर्थमार्गेऽस्मिन्काम एष प्रवर्तकः ॥ २ ॥ सर्वानर्थप-

रिप्राप्तिनिमित्तं शत्रुरात्मनः ॥ केनचिद्धेतुना कामः प्रतिबद्धः स एव हि ॥ ३ ॥ क्रोधः परिणतो भाति तस्मिन्कामे निवारिते ॥ सर्वश्रेयःपरिप्राप्तिस्ततोऽस्य शृणु कारणम् ॥ ४ ॥ चलप्रवृत्तिदुःखात्मा यस्य हेतू रजोगुणः ॥ यद्वा रजोगुणस्यायं कारणं लोभरूपधृक् ॥ ५ ॥ नायं सामादिभिः साध्यो हन्तव्यो दण्डतो रिपुः ॥ महाशनत्वाद्दानेन संधातुं नैष शक्यते ॥ ६ ॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥ ७ ॥ संधातुं सामभेदाभ्यामत्युग्रत्वान्न शक्यते ॥ तेनायं प्रेरितो जन्तुर्महापापे प्रवर्तते ॥ ८ ॥ अतो जानीहि संसारे काममेनं हि वैरिणम् ॥ तदेतद्विवृतं सर्वं वार्तिके श्रीसुरेश्वरैः ॥ ९ ॥ आत्मैवेदमिति श्रुत्या व्याख्याने निर्मलैः पदैः ॥ प्रवृत्तौ च निवृत्तौ च यथोक्तस्याधिकारिणः ॥ १० ॥ स्वातन्त्र्ये सति संसारसृतौ कस्मात्प्रवर्तते ॥ ननु निःशेषविध्वस्तसंसारानर्थवर्त्मनि ॥ ११ ॥ निवृत्तिलक्षणे वाच्यं केनायं प्रेर्यतेऽवशः ॥ अनर्थपरिपाकत्वमपि जानन्प्रवर्तते ॥१२॥ पारतन्त्र्यमृते दृष्टा प्रवृत्तिर्नेदृशी क्वचित् ॥ तस्माच्छ्रेयोऽर्थिनः पुंसः प्रेरकोऽनिष्टकर्मणि ॥ १३ ॥ वक्तव्यस्तन्निरासार्थमित्यर्था स्यात्परा श्रुतिः ॥ अनाप्तपुरुषार्थोऽयं निःशेषानर्थसंकुलः ॥ १४ ॥ इत्यकामयतानाप्तान्पुमर्थान्साधनैर्जडः ॥ जिहासति तथानर्थानविद्वानात्मनि श्रितान् ॥ १५ ॥ अविद्योद्भूतिकामः सन्नथो खल्विति च श्रुतिः ॥ अकामतः क्रियाः काश्चिद्दृश्यन्ते नेह कस्यचित् ॥ १६ ॥ यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥ काम एष क्रोध एष इत्यादिवचनं स्मृतेः ॥ १७ ॥ प्रवर्तको नापरोऽतः कामादन्यः प्रतीयते ॥ १८ ॥ ॥ ३७ ॥

भा० टी०—एवं पृष्टः श्रीभगवान् 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इत्युक्तं समग्रमैश्वर्यादिषट्कं नित्यमप्रतिबन्धेन यस्मिन्वासुदेवे वर्तते 'उत्पत्तिं निधनं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' इत्युत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेवो भगवानितिशब्दवाच्य उवाचोत्तरमुक्तवान्—**काम इति** । यस्त्वया वैरी पृष्टः एष कामः शत्रुर्यन्निमित्ता सर्वानर्थप्राप्तिर्लोकस्य । ननु क्रोधोऽप्यनर्थहेतुर्लोके दृश्यते इत्यत आह—स एव कामः कुतश्चिन्निमित्तात्प्रतिहतः क्रोधत्वेन परिणमतेऽतः क्रोधोऽप्येष एव शत्रोः पुत्रत्वादप्ययं शत्रुरित्याह । रजोगुणः समुद्भवो यस्य सः । यद्वा कथं शत्रुतां करोतीत्यत आह--रजोगुणस्य समुद्भवः कारणं कामो रजः प्रवर्तयन्पुरुषं प्रवर्तयति । ननु विषयभोगेन तृप्तिं नीतः शत्रुत्वं जिहास्यतीति चेत्तत्राह--महदशनमस्य सः । तदुक्तम् 'न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत्' इति । ननु लोके यथा स्वेनापराधितः कश्चिच्छत्रुत्वं भजति तथायमप्यतोऽपराधं तस्य न करिष्यामीति चेत्तत्राह—महाशनत्वान्महापाप्माऽत्युग्रो विनैवापराधं स्वेनोपकृतश्च नाशयतीत्यर्थः । अतः काममेव परमं वैरिणं विद्धि ज्ञात्वा च तत्परिहाराय यतस्वेति भावः ॥ ३७ ॥

प० टी०—अत्रोत्तरं भगवानाह—**काम एष इति** । यदा विवेकिनोऽपि पुरुषस्य सत्त्वगुणः प्रच्छन्नो भवति तदा रजोगुणः प्रादुर्भवति तस्मात्कामक्रोधावुत्पद्येते । तयोः क्रमेण स्वरूपमाह—**महाशन इति** । तत्र कामो महाशनो दुष्पूरत्वात् क्रोधस्तु महापाप्मातिक्रूरत्वादनयोरुभयोर्दुर्जेयत्वं व्यञ्जितम् । एवमेनं कामं क्रोधं वा वैरिणं विद्धि । तथाच शत्रुरेव पापे प्रवर्तयति न तु मित्रम् । तथा त्वं बन्धुसुहृद्विषयकामेन स्वधर्मत्यागरूपेण पातके प्रवर्तस इत्यर्थः ॥ ३७ ॥

रा० टी०—काममूलत्वात्सर्वेषां स एव बलवानित्याह—**काम एष इति** । एष त्वया पृष्टः पुरुषस्य पापेषु बलवान्प्रवर्तक इत्यनूद्य काम इति विधीयते । एष कामः एष क्रोधः कामात्क्रोधोऽभिजायत इत्युक्तेः,

कामजत्वात्क्रोधस्य कार्यकारणयोः " गोभिः श्रीणीत मत्सरम् " इत्यादाविवाभेदोपचारेणेयमुक्तिः । स च क्रोधो रजोगुणात्समुद्भवतीति स तथा कामनिमित्तको रजोगुणपरिणाम इत्यर्थः । क्रोध इत्युपलक्षणम्। तथाच कामनिवृत्तौ तन्मूलाः क्रोधादयः पापहेतवो निवार्तितुं शक्यन्त इति कामनिवृत्तावेवातिप्रयत्नः कार्य इति भावः । कामस्य यावदपेक्षितं दत्त्वा जेतव्यः स इत्यतः कामं विशिनष्टि--**महाशन इति** । महाशनः महदशनं भोग्यं विषयो यस्य स तथा महत्पाप्म पापं ब्रह्महत्यादिरूपं यस्मात्स तथा । इह ऐहिकामुष्मिक-पुरुषार्थविषये एनं कामं वैरिणं नित्यमशुभेष्वेव प्रवर्तकतया मोक्षविरोधित्वात् शत्रुभूतं विद्धि जानीहि । कामाभिमानी कालनेमिर्ज्ञेयः ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ॥
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

त० टी०—तस्य वैरित्वं दृष्टान्तैरुपपादयति—धूमेनेति । यथा धूमेन वह्निराव्रियते आच्छाद्यते यथा वाऽऽदर्शो मलेन, यथा च उल्बेन गर्भवेष्टनेन चर्मणा जरायुणा गर्भ आवृतः तथा तेनेद-मावृतम् ॥ ३८ ॥

म० टी०—तस्य महापाप्मत्वेन वैरित्वमेव । वैरित्वमेव दृष्टान्तैः स्पष्टयति—धूमेति । तत्र शरीरारम्भा-त्प्रागन्तःकरणस्यालब्धवृत्तिकत्वात्सूक्ष्मः कामः शरीरारम्भकेण कर्मणा स्थूलशरीरावच्छिन्ने लब्धवृत्तिकेन्तः-करणे कृताभिव्यक्तिः सन् स्थूलो भवति स एव विषयस्य चिन्त्यमानावस्थायां पुनः पुनरुद्रिच्यमानः स्थूलतरो भवति । स एव पुनर्विषयस्य भुज्यमानतावस्थायामत्यन्तोद्रेकं प्राप्तः स्थूलतमो भवति। तत्र प्रथमाव-स्थायां दृष्टान्तः, यथा धूमेन सहजेनाप्रकाशात्मकेन प्रकाशात्मको वह्निराव्रियते, द्वितीयावस्थायां दृष्टान्तः यथादर्शो मलेनासहजेनादर्शोत्पत्त्यनन्तरमुद्रिक्तेन । चकारोऽवान्तरवैधर्म्यसूचनार्थः आव्रियत इति क्रिया-नुकर्षणार्थश्च । तृतीयावस्थायां दृष्टान्तः, यथोल्बेन जरायुणा गर्भवेष्टनचर्मणातिस्थूलेन सर्वतो निरुध्यावृतस्तथा प्रकारत्रयेणापि तेन कामेनेदमावृतम् । अत्र धूमेनावृतोपि वह्निर्दाहादिलक्षणं स्वकार्यं करोति । मलेनावृतस्त्वादर्शः प्रतिबिम्बग्रहणलक्षणं स्वकार्यं न करोति । स्वच्छताधर्ममात्रतिरोधानात् स्वरूपतस्तूपलभ्यत एव । उल्बेनावृतस्तु गर्भो न हस्तपादादिप्रसारणरूपं स्वकार्यं करोति न वा स्वरूपत उपलभ्यत इति विशेषः ॥ ३८ ॥

शं० टी०—यदुक्तं मुमुक्षोर्मुक्तिप्रतिबन्धकत्वेन वैरित्वं कामस्य तदेव विस्पष्टयति--धूमेनेति द्वाभ्याम् । धूमेनाऽप्रकाशस्वरूपेण स्वयंप्रकाशस्वरूपोऽपि वह्निर्यथाऽऽव्रियते आवृतो भवति । मलेन लेपनस्वभावेन रजसा स्वयं बिम्बप्रकाशनेनाह्लादकर आदर्शश्च यथाऽऽव्रियते । अचेतनेनोल्बेन चेतनो गर्भः शिशुर्यथा ऽऽवृतो भवति । तथाऽप्रकाशरूपेण लेपकेन अचेतनेन च तेन पूर्वोक्तेन कामेन प्रकाशस्वरूपमात्मप्रकाशने-नानन्दकरमाभासव्याप्त्या चेतनतुल्यमिदं पुरुषस्य ज्ञानमावृतं तिरोहितमित्यर्थः ॥ ३८ ॥

श्री० टी०--कामस्य वैरित्वं दर्शयति--धूमेनेति । यथा धूमेन सहजेन वह्निराव्रियते आच्छाद्यते । यथा वा आदर्शो मलेनागन्तुकेन । यथा च उल्बेन गर्भवेष्टन चर्मणा गर्भः सर्वतो निरुद्ध्यावृतस्तथा प्रकारत्रयेणापि तेन कामेनावृतमिदम् ॥ ३८ ॥

स० टी०--महापाप्मतया तस्य स्पष्टयत्यतिवैरिताम्॥दृष्टान्तैस्तत्र कामोऽयं चतुर्धा प्रोच्यते क्रमात् ॥१॥ मनसोलब्धवृत्तित्वाच्छरीरारम्भतः पुरा ॥ सूक्ष्मः कामः शरीरे चारब्धे स्थूलः सवृत्तिके ॥ २ ॥ विषये चिन्त्यमाने स्यात्कामः स्थूलतरस्ततः ॥ भोगस्यावसरेऽत्यन्तोद्रिक्तस्थूलतमस्ततः ॥ ३ ॥ अप्रकाशेन धूमेन सहजेनानलो यथा ॥ प्रकाशात्मा वृतो दाहमुखं कार्यं करोति च ॥४॥ मलेनागन्तुकेनासावादर्शस्त्वावृतः

स्वकम् ॥ प्रतिच्छायाग्रहं कार्यं न करोति यथा स्फुटम् ॥ ५ ॥ स्वच्छताधर्ममात्रस्य तिरोधानवशात्स च ॥ उपलभ्यत एवासौ स्वरूपेण च दर्पणः ॥ ६ ॥ जरायुणा वृतो गर्भः स्वरूपेण न लभ्यते ॥ हस्तपादादिचेष्टां च न करोति यथेष्टतः ॥ ७ ॥ तत्प्रकारत्रयेणेदं कामेनाच्छाद्यते तथा ॥ ८ ॥ ३८ ॥

भा० टी०—तस्य शत्रुत्वं स्पष्टयति—**धूमेनेति** । यथा धूमेन सहजेनाप्रकाशात्मकेनाग्निः प्रकाशात्मको यथा वाऽऽदर्शो मलेनाव्रियते यथोल्बेन गर्भवेष्टनेन जरायुणा गर्भ आच्छादितस्तथा तेन कामेनेदं ज्ञानमावृतम् । प्रथमदृष्टान्तेनात्मस्वरूपप्रकाशात्मकत्वं द्वितीयेन यथावद्विषयस्वरूपप्रतिभानात्मकत्वं तृतीयेनोहापोहात्मकत्वं ज्ञानस्यावृतमिति बोध्यम् ॥ ३८ ॥

प० टी०—अथ सत्त्वप्रच्छादने दृष्टान्तत्रयमाह—**धूमेनेति** । यथार्द्रेन्धनोपाधिप्रसृतेन धूमेनाग्निराव्रियते यथा वा प्रतिबिम्बदर्शक आदर्शो मलेनाच्छिद्यते यथोल्बेन गर्भावरणीभूतेन चर्मणा गर्भ आव्रियते, तथा तेन कामेन क्रोधेन चेदं सत्त्वोत्पन्नं ज्ञानमाव्रियते ॥ ३८ ॥

रा० टी०—अशुभप्रेरकेषु क्रोधाद्यभिमान्यसुरेषु कामः कथं बलवानित्यत आह—**धूमेनेत्यादिश्लोकद्वयेन** । वह्निर्यथा धूमेनाव्रियते तथा तेन कामेनेदमुत्तमजीवजातं किंचिदावृतम् । यथा चादर्शो दर्पणो मलेनावृतस्तथेदं मध्यमजीवजातं तेन कामेनाधिकमावृतम् । यथा च गर्भ उल्बेन गर्भवेष्टनचर्मणाव्रियते आच्छाद्यते तथेदमधमजीवजातं तेन कामेनात्यन्तमावृतम् । त्रिविधस्यापि जीवजातस्य यथायोग्यं यथावत्तया परावरतत्त्वज्ञानप्रतिबन्धकः काम इत्यर्थः । यद्वा इदमित्यनेनेश्वरान्तःकरणजीवाख्यं वस्तुत्रयं ग्राह्यम् । वह्निर्यथा धूमेनाव्रियते तथेश्वरो जीवगतकामेनावृतः । प्रकाशरूपोप्यग्निर्धूमेनावृतोऽन्यैर्यथा न दृश्यते तथेश्वरः स्वयं सर्वं जानन्नपि नान्यैर्ज्ञायत इत्यर्थः । आदर्शो मलेनेवान्तःकरणं कामेनावृतं, यथाऽऽदर्शो मलेनावृतो मुखाद्यभिव्यक्तिहेतुर्न भवति तथा जीवान्तःकरणं कामावृतं सदीश्वरं जीवं वा न प्रकाशयतीत्यर्थः । यथोल्बेनावृतो गर्भस्तथा कामेनावृतो जीव उल्बेन वेष्टितो गर्भो यथा व्यापाराक्षमस्तथा जीवोऽपि कामेनावृतो नेश्वरादिज्ञाने क्षम इत्यर्थः ॥ ३८ ॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

त० टी०—तदिदंशब्दार्थं स्वयमेव वदन् दार्ष्टान्तं स्पष्टयति—**आवृतमिति** । एतेन कामरूपेण ज्ञानिनो नित्यवैरिणा धर्मभूतं ज्ञानमावृतम् । कामरूपेण किंरूपेण हे कौन्तेय दुष्पूरेण दुःखेन पूर्यते इति दुष्पूरस्तेन अनलेन चेति । च इवार्थे । अनलेन वह्निनेवेत्यर्थः । यथाऽनलो हविषा न पूर्यते, तथायं विषयभोगेन न पूर्यते इत्यर्थः । अज्ञस्य तु विषयभोगकाले कामः सुखहेतुत्वेन प्रिय एव प्रतीयते, परिणामे दुःखानुभवकाले वैर्यनुभूयते । ज्ञानी तु भोगसमयेऽप्येनं दुःखमेव जानाति, किं पुनः परिणामेऽतो ज्ञानिनो नित्यवैरिणेत्युक्तम् ॥ ३९ ॥

म० टी०—तथा तेनेदमावृतमिति संग्रहवाक्यं विवृणोति—**आवृतमिति** । ज्ञायतेऽनेनेति ज्ञानमन्तःकरणं विवेकविज्ञानं वा इदंशब्दनिर्दिष्टमेतेन कामेनावृतम् । तथाप्यापाततः सुखहेतुत्वादुपादेयः स्यादित्यत आह—**ज्ञानिनो नित्यवैरिणा** । अज्ञो हि विषयभोगकाले कामं मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते वैरित्वं जानाति कामेनाहं दुःखित्वमापादित इति, ज्ञानी तु भोगकालेऽपि जानात्यनेनाहमनर्थे प्रवेशित इति।अतो विवेकी दुःखी भवति भोगकाले च तत्परिणामे चानेनेति ज्ञानिनोऽसौ नित्यवैरीति सर्वथा तेन हन्तव्य एवेत्यर्थः । तर्हि किंस्वरूपोऽसावित्यत आह—**कामरूपेण** काम इच्छा तृष्णा सैव रूपं यस्य तेन।हे कौन्तेयेति संबन्धाविष्कारेण प्रेमाणं सूचयति।

ननु विवेकिना हातव्योप्यविवेकिनोपादेयः स्यादित्यत आह—दुष्पूरेणानलेन च । चकार उपमार्थः। न विद्यतेऽलं पर्याप्तिर्यस्येत्यनलो वह्निः, स यथा हविषा पूरयितुमशक्यस्तथायमपि भोगेनेत्यर्थः । अतो निरन्तरं सन्तापहेतुत्वाद्विवेकिन इवाविवेकिनोपि हेय एवासौ। तथा च स्मृतिः ‘ न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ’ इति। अथवा इच्छाया विषयसिद्धिनिवर्त्यत्वादिच्छारूपः कामो विषयभोगेन स्वयमेव निवर्तिष्यते किं तत्रातिनिर्बन्धेनेत्यत उक्तं दुष्पूरेणानलेनचेति। विषयसिद्ध्या तत्कालमिच्छातिरोधानेऽपि पुनः प्रादुर्भावान्न विषयसिद्धिरिच्छानिवर्तिका किंतु विषयदोषदृष्टिरेव तथेति भावः ॥ ३९ ॥

शं० टी०—ज्ञानावरणमेव विशदयति—आवृतमिति । यस्मादनलेन निरन्तरविषयसेवयाप्यलंभावो यस्य नास्ति सोऽनलः हृद्यन्तरनलवदाचरतीति वाऽनलस्तेन दुष्पूरेण दुःखेन पूरणमिष्टप्रापणं यस्य स दुष्पूरः कामिताऽप्राप्तौ पुरुषं दुःखेन पूरयतीति वा दुष्पूरस्तेन, कामरूपेण काम्यत इति कामो विषयस्तमेव सर्वत्र रूपयति गोचरयाति न कचिद्ब्रह्मेति कामरूपस्तेन, तस्मादेव ज्ञानिनो नित्यवैरिणा नित्यं बाह्यालम्बनहेतुत्वेन प्रतिकूलत्वान्नित्यवैरी। नित्यग्रहणहेतोर्ज्ञानस्याऽऽवरकत्वाद्वा नित्यवैरिणा, एतेन कामेन ज्ञानं सर्वत्र ब्रह्मग्राहिका बुद्धिवृत्तिरावृतं पङ्केन जलमिव राहुणा चन्द्रबिम्बमिव पिहितमित्यर्थः ॥ ३९ ॥

श्री० टी०—इदंशब्दनिर्दिष्टं दर्शयन्वैरित्वं स्फुटयति—आवृतमिति । इदं तु विवेकज्ञानमेतेनावृतम् । अज्ञस्य खलु भोगसमये कामः सुखहेतुरेव परिणामे तु वैरितां प्रपद्यते । ज्ञानिनः पुनस्तत्कालमप्यनर्थानुसन्धानाद्दुःखहेतुरेवेति नित्यवैरिणेत्युक्तम् । किंच विषयैः पूर्यमाणोऽपि दुष्पूरः । अपूर्यमाणः शोकसन्तापहेतुत्वादनलतुल्यः । अनेन सर्वान्प्रति नित्यवैरित्वमुक्तम् ॥ ३९ ॥

स० टी०—तथा तेनेति वाक्यं च विवृणोति हरिः स्वयम् ॥ इदंशब्दोदितं ज्ञानमन्तःकरणमेव वा ॥१॥ कामेनाच्छादितं तत्त्वज्ञानिनो नित्यवैरिणा ॥ अज्ञो हि भोगकाले तं पश्यन्मित्रमिवाधमम् ॥ २ ॥ प्राप्ते दुःखे च तत्कार्ये वैरितां वेत्ति दुःखितः ॥ ज्ञानी तु भोगकालेऽपि वेत्त्यनेनाहमाग्रहात् ॥ ३ ॥ अनर्थेऽस्मिन्प्रयुक्तोऽस्मीत्यतो ज्ञस्य सदा रिपुः ॥ इच्छातृष्णादिरूपोऽसौ हन्तव्यः सर्वथा ततः ॥ ४ ॥ न विद्यतेऽलंपर्याप्तिर्यस्य सोऽत्यन्तदुर्भरः ॥ यथा पूरयितुं नैव हविषा शक्यतेऽनलः ॥ ५ ॥ तथायमपि भोगेन हेयस्तस्माद्विवेकिना ॥ ६ ॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ७ ॥ इतिस्मृत्यापि कामस्य त्याग एव विशिष्यते ॥ दोषदृष्ट्या हि भोगेषु न भोगासक्तिरासुरी ॥ ८ ॥ ३९ ॥

भा० टी०—इदंशब्दवाच्यं दर्शयति—आवृतमिति । एतेन कामेन ज्ञानं विवेकरूपमावृतं ज्ञानिनो नित्यवैरिणा। ज्ञानी हि तदुत्पत्तिकालेऽपि जानात्यनेनाहमनर्थे नियोजित इति तत आरभ्यैव दुःखी भवति तेनासौ ज्ञानिनो नित्यवैरी नतु मूर्खस्य। स हि कामं तदुत्पत्तिकाले मित्रमिव पश्यन् तदानीमहमनेन दुःखे नियोजित इति न जानाति किंतु तत्कार्ये दुःखे प्राप्तेऽतस्तस्य नायं नित्यवैरी। केन रूपेण वैरीत्यत आह—कामः कामनेच्छैव रूपं यस्य तेन। दुःखेन पूरणमस्य तेन । कुत इत्यत आह—नालं पर्याप्तिरस्य विद्यत इत्यनलः तेन । यो हि कदाचित्तृप्तिं गच्छति स पूरयितुं शक्यः, अयं तु न तथेत्यर्थः । चकार उपमार्थः । अनलेन वह्निनेवेति व्याख्यानं तु सुगमत्वादाचार्यैरुपेक्षितम् । यत्तु ज्ञायतेऽनेनेति ज्ञानमन्तःकरणमिति तदुपेक्ष्यं ज्ञानविज्ञाननाशनमित्यनुरोधेनात्राऽपि विवेकज्ञानग्रहणस्यौचित्यात्। कौन्तेय इति संबोधयन् संबन्धिवियोगो मा भवत्विदत्येवंरूपेण कामेनैवावृतज्ञानस्त्वमपि स्त्रीस्वभावे शोकमोहरूपे नियोजितोऽसीति ध्वनयति ॥ ३९॥

प० टी०—अथ तदेव विविच्याह—आवृतमिति । पूर्वं कामक्रोधौ पृथङ्निरूपितावथैकत्वेनाह । यतः काम एव केनाप्याक्षिप्तः सन् क्रोधत्वेन परिणमति । एवमेकेन कामरूपेण ज्ञानमावृतम् । किंभूतेन ज्ञानिनः

पुरुषस्य नित्यवैरिणा । अज्ञस्य भोगावसरे कामः सुखहेतुर्भवति परिणामे दुःखरूपः । ज्ञानिनस्त्वनर्थानुसन्धानेन नित्यं दुःखहेतुत्वान्नित्यवैरिणेत्युक्तम् । किंभूतेन दुष्पूरेणानलेन च दुष्पूरेण दुर्भरेण विषयाप्राप्तावनलेनाग्निरूपेण । अथ कामस्य स्वरूपं दुष्पूरत्वं च निरूपयितुं शातपथी श्रुतिरपि—"एतावान्वै कामो नेत्संश्च नातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्याकृत्स्नतः" इति । भाष्यम्—पूर्वश्रुत्या निरूपितः काम एतावानेतादृशः । अत्र नेदिति निपातो निषेधार्थे । स कामः सन्न भवति तथाप्यतः कामात्सकाशाद्भूयो महत्तरं न विन्देत् न जानाति यत एवं तस्मात्कामात्प्रथममेकाकी मातृगर्भादेक एवोत्पन्नोऽनन्तरं जाया मे स्यादिति कामयते अथानन्तरं प्रजायेय प्रजात्वेन भूयासम् " आत्मा वै पुत्रनामासि " इति श्रुतेः । तत्पोषणार्थं वित्तं मे स्यात्तदर्थं सेवा कृष्यादिकर्म कर्तव्यमित्येतावान् काम इति पूर्वेणान्वयः । अथ कामस्य दुष्पूरत्वमाह—स यावदिति । स कामयानः पुरुष एतेषां पूर्वोक्तानां कामानां मध्ये यावदेकैकं कामं न प्राप्नोति तावदहमकृत्स्न एव अकृतार्थ इति मन्यते इयमेव तस्याकृत्स्नता ॥ ३९ ॥

रा० टी०—एवं ज्ञेयस्येश्वरादेः ज्ञानकारणस्य मनसः ज्ञातुर्जीवस्य प्रतिबन्धकः काम इत्युक्त्या ज्ञानोऽत्पत्तिप्रतिबन्धकत्वमुक्तम् । इदानीं शास्त्रतो जातमपि ज्ञानं स्वकार्यापरोक्षज्ञानाय न प्रभवतीत्याह—**आवृतमिति** । ज्ञानिनः शास्त्रजनितज्ञानिनोपि ज्ञानं कामावृतं भगवदपरोक्षज्ञानाय न प्रभवति । किमु गुरूपदेशमात्रजज्ञानवत इति सूचनाय ज्ञानिन इत्युक्तम् । अन्यथा ज्ञानस्य ज्ञानिसंबन्धव्यभिचाराज्ज्ञानिन इत्युक्तिर्व्यर्था स्यात् । केनावृतं ज्ञानमित्यत उक्तम्—कामरूपेणेति । रूप्यते निरूप्यतेऽनयेति रूपमाख्या कामेति रूपमाख्या यस्य तेन कामरूपेण कामाख्येन नित्यवैरिणा सदापकारिणा दुष्पूरेण दुःखेन पूरयितव्येन । न केवलं दुष्पूरः किंत्वनलेन न विद्यतेऽलं तृप्तिर्यस्य सोऽनलः, तेन महतो भोग्यस्य विषयस्य प्राप्तावपि अधिकेच्छयालंबुद्धिहीनेनेत्यर्थः ॥ ३९ ॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ॥
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

त० टी०—एवंभूतस्य वैरिणः कामस्य हननायाधिष्ठानमाह—इन्द्रियाणीति । एतैरिन्द्रियमनोबुद्धिभिरेष कामः ज्ञानं यथार्थानुभवमावृत्य देहिनं विमोहयति विवेकं नाशयित्वा सुखदुःखाभिनिवेशे योजयति । वस्तुस्वरूपान्यथाज्ञानं मोहः, तथाच कामविमोहितः पुरुषः दुःखहेतुमपि विषयं सुखमेव मत्वा तत्प्राप्तावेव सर्वथा यतते ॥ ४० ॥

म० टी०—ज्ञाते हि शत्रोरधिष्ठाने सुखेन स जेतुं शक्यत इति तदधिष्ठानमाह—**इन्द्रियाणीति**। इन्द्रियाणि शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रादीनि वचनादानगमनविसर्गानन्दजनकानि वागादीनि च। मनः सङ्कल्पात्मकं बुद्धिरध्यवसायात्मिका च।अस्य कामस्याधिष्ठानमाश्रय उच्यते।यतः एतैरिन्द्रियादिभिःस्वस्वव्यापारवद्भिराश्रयैर्विमोहयति विविधं मोहयति एष कामो ज्ञानं विवेकज्ञानमावृत्याच्छाद्य देहिनं देहाभिमानिनम्।।४०।।

शं० टी०—ननु संसारकारणं कामस्तत्कार्यं ज्ञानतिरोधानं विषयसन्निधापनं तापनं दुःखप्रापणं च निरूपितम् । तथापि मुमुक्षोस्तज्जयो दुर्घटस्तदधिष्ठानाऽज्ञानात् । ज्ञाते हि शत्रोः स्थाने तज्जित्यै यत्नः कर्तुं शक्यत इत्याकाङ्क्षायामाह—**इन्द्रियाणीति** । " यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् " इत्येतच्छ्रुतितात्पर्यज्ञैरिन्द्रियादीनां कामाश्रयत्वमुच्यते कामस्यैव तत्रे-

ष्टाहेतुत्वात् । तत इन्द्रियाणि चक्षुरादीनि मनोबुद्धिश्चास्य कामस्याधिष्ठानमाश्रय इति बोद्धव्यम् । स्वप्रवृत्तेर्द्वारभूतैर्यैरिन्द्रियव्यापारैरेष कामः ज्ञानं प्रत्यग्दृष्टिमावृत्य वृत्तेर्बहिःप्रवणतां कृत्वा देहिनं देहात्मबुद्धिं पुरुषं ज्ञानिनमज्ञानिनं च विमोहयति, अहं भोक्ता इदं भोग्यं रम्यमरम्यमिदं सुखमिदं दुःखमित्यादिना विविधं भावयति । कामदोषेणैव बुद्धेश्चलनं देहेन्द्रियादितादात्म्यापत्तिरहंममेतिसंसारः पुंस इत्यर्थः ॥ ४० ॥

श्री० टी०--इदानीं तस्याधिष्ठानं कथयन् जयोपायमाह--**इन्द्रियाणीति द्वाभ्याम्** । विषयदर्शनश्रवणादिभिः संकल्पेनाध्यवसायेन च कामस्याविर्भावादिन्द्रियाणि च मनश्च बुद्धिश्चास्याधिष्ठानमुच्यते एतैरिन्द्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमावृत्य देहिनं विमोहयति ॥ ४० ॥

स० टी०--ज्ञाते शत्रोरधिष्ठाने स जेतुं शक्यतेऽञ्जसा ॥ तदधिष्ठानमेवाह समस्तानीन्द्रियाणि च ॥ १ ॥ शब्दादिग्राहकाण्यस्य वचनादिकराणि च ॥ संकल्पात्मा मनो ज्ञेयं बुद्धिर्निश्चयरूपिणी ॥ २ ॥ कामस्य ह्याश्रयो यस्मादेतैः सोऽपीन्द्रियादिभिः ॥ स्वस्वव्यापारवद्भिस्तैराश्रयैर्मोहयत्यसौ ॥ ३ ॥ विवेकज्ञानमाच्छाद्य मूढं देहाभिमानिनम् ॥ ४ ॥ ४० ॥

भा० टी०--सुखेन शत्रुं नाशयितुं तदधिष्ठानं किमित्यर्जुनाकाङ्क्षायामाह--**इन्द्रियाणीति** । इन्द्रियादीन्यस्य कामस्याधिष्ठानमाश्रय उच्यते। एतैराश्रयैर्विवेकज्ञानमावृत्य जीवं विविधं मोहयति। यत्तु ज्ञानं चिदात्मकमिति तन्न उक्तयुक्तेः ॥ ४० ॥

प० टी०--अथ कामोन्मूलनप्रकारं निरूपयिषुस्तदधिष्ठानमाह--**इन्द्रियाणीति** । अस्य कामस्याधिष्ठानमाश्रयीभूतास्त्रयो भवन्ति । दर्शनादाविन्द्रियाणि, संकल्पे मनः, प्रादुर्भावे बुद्धिः, एतैस्त्रिभिरधिष्ठानभूतैः कृत्वा ज्ञानमावृत्य देहिनं जीवं विमोहयति ॥ ४० ॥

रा० टी०--यदर्थमर्जुनेन पापप्रवर्तकेषु बलवान्पृष्ट उत्तरितश्च तस्य बलवतः कामस्य शत्रोर्वधार्थमधिष्ठानमाह--**इन्द्रियाणीति** । अस्य कामाख्यशत्रोरिन्द्रियाणि चक्षुरादीनि मनोबुद्धिश्चाधिष्ठानम् । प्राधान्यज्ञापनाय मनोबुद्ध्योः पृथगुक्तिः । अधिष्ठानतां व्यनक्ति--**एतैरिति** । एतैर्मनोबुद्धीन्द्रियैर्विषयसंसृष्टैरेष कामाख्यशत्रुर्ज्ञानमावृत्य ज्ञानजन्म प्रतिबध्येति वा जातमपि ज्ञानं कार्याक्षमं कृत्वेति वार्थः । देहिनं जीवं विमोहयति ॥ ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ॥
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

त० टी०--अधिष्ठाननिरूपणं तन्निग्रहपूर्वकं कामजयार्थमेव तदेवाह--तस्मादिति । यस्मादिन्द्रियाधिष्ठित एव कामो विमोहकस्तस्माद्धे भरतर्षभ त्वमादाविन्द्रियाणि नियम्य विषयेभ्यो निवर्त्य ततो ज्ञानविज्ञाननाशनं ज्ञानं गुरुशास्त्रोपदेशजं विज्ञानं मननानन्तरनिदिध्यासनजं तयोर्नाशनमत एव पाप्मानं सर्वपापहेतुत्वात्पापरूपमेनं कामं प्रजहि प्रकर्षेण नाशय । यथा पुनर्नोद्भवेदित्यर्थः ॥ ४१ ॥

म० टी०--तस्मादिति। यस्मादेवं तस्मादिन्द्रियाधिष्ठानः कामो देहिनं मोहयति तस्मात्त्वमादौ मोहनात्पूर्वं कामनिरोधात्पूर्वमिति वा, इन्द्रियाणि श्रोत्रादीनि नियम्य वशीकृत्य तेषु हि वशीकृतेषु मनोबुद्ध्योरपि वशीकरणं सिध्यति सङ्कल्पाध्यवसाययोर्बाह्येन्द्रियप्रवृत्तिद्वारैवानर्थहेतुत्वात् । अत इन्द्रियाणि मनो बुद्धिरिति पूर्वं पृथङ्निर्दिश्यापीहेन्द्रियाणीत्येतावदुक्तम्। इन्द्रियत्वेन तयोरपि संग्रहो वा । हे भरतर्षभ महावंशप्रसूतत्वेन समर्थोसि । पाप्मानं सर्वपापमूलभूतमेनं कामं वैरिणं प्रजहि हि परित्यज । हि स्फुटं प्रजहि प्रकर्षेण मारयेति वा । जहि शत्रुमित्युपसंहाराच्च । ज्ञानं शास्त्राचार्योपदेशजं परोक्षं विज्ञानमपरोक्षं तत्फलं तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनम् ॥ ४१ ॥

शं० टी०—निःशेषकामनिर्वर्हणाभावे बुद्धेर्नैश्चल्यं न संभवति तदसंभवे ज्ञानं विशुद्धं न भवति तदभावे मोक्षाभावस्ततो मुमुक्षुणा तज्जयोऽवश्यं कर्तव्य इति सूचयितुमाह—**तस्मादिति** । हि यस्मान्मनोबुद्धीन्द्रियव्यापारैकबलः कामो मुमुक्षोस्तव नित्यशत्रुस्तस्मात्त्वमादाविन्द्रियाण्यनन्तरं मनो बुद्धिं च नियम्य विषयग्रहविमुखानि कृत्वा इन्द्रियाण्यादावित्युक्तिर्मनोबुद्ध्योर्नियमनं सूचयति । नियमविधावादिपदस्यानन्तरकृत्यद्योतकत्वात् सत्यामन्तर्विषयचिन्तायामिन्द्रियनिग्रहस्य विफलत्वात् 'मनस्तु पूर्वमादद्यात्कुमीनमिव मत्स्यहा' इतिवचनाद्वस्तुदर्शने मनस एव करणत्वाच्चात इन्द्रियनियमनानन्तरमेव मनोबुद्ध्योरपि निग्रहः कर्तव्य एव । एवं कामाधिष्ठाननिरोधं कृत्वा ज्ञानविज्ञाननाशनं ज्ञानं श्रुतियुक्तिभिः पर्वते वह्निरस्तीतिवत्परोक्षको वस्तुनिश्चयः सर्वं ब्रह्मैवेति, विज्ञानं तु विषयव्याप्तवृत्तिजन्यं महानसाग्निज्ञानवदिदमेवाहमिति, एवंरूपयोर्मोक्षैकप्रयोजनयोश्चन्द्रसूर्ययोरिवाऽविशेषविशेषस्फुरणयोर्ज्ञानविज्ञानयोर्नाशनं विध्वंसकमत एव स्ववैरिणं पाप्मानं पापिष्ठमेनं कामं प्रजहि निःशेषं विध्वंसयेत्यर्थः ॥ ४१ ॥

श्री० टी०—यस्मादेवम्—**तस्मात्त्वमिति** । आदौ विमोहात्पूर्वमेव इन्द्रियाणि मनो बुद्धिं च नियम्य पापरूपमेनं कामं हि स्फुटं प्रजहि घातय । यद्वा प्रजहि परित्यज ज्ञानमात्मविषयं विज्ञानं शास्त्रीयं तयोर्नाशकम् । यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनजम् " तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत " इति श्रुतेः ॥ ४१ ॥

स० टी०—यतोऽसाविन्द्रियाधारः कामो मोहाय देहिनः ॥ तस्मात्त्वं मोहनात्पूर्वं प्राग्वा कामनिरोधतः ॥ १ ॥ श्रोत्रादीनीन्द्रियाण्येव वशीकृत्य सुवंशज ॥ पापमूलं रिपुं कामं मारयैनमशेषतः ॥ २ ॥ ज्ञानं परोक्षमित्युक्तं शास्त्राचार्योपदेशजम् ॥ अपरोक्षं हि विज्ञानं श्रेयःसाधनयोस्तयोः ॥ ३ ॥ नाशनं दुष्टमत्यन्तं तत्त्वज्ञानी रिपुं शठम् ॥ ननु ज्ञानं समुत्पन्नं सविज्ञानं यदा तदा ॥ ४ ॥ बाधित्वाऽज्ञानतत्कार्ये तिष्ठत्यात्मनि निश्चलम् ॥ कामस्योत्पत्तिमात्रेण तस्य नाशः कथं भवेत् ॥ ५ ॥ वेदान्तमानसं सिद्धं ज्ञानं विज्ञानसंयुतम् ॥ कामादिमात्रनाश्यं चेद्वृथा तत्र परिश्रमः ॥ ६ ॥ ज्ञानं वस्तुप्रमायत्तं साधितं ब्रह्मविद्वरैः ॥ तत्कथं नश्यति क्षिप्रं सति माने च वस्तुनि ॥ ७ ॥ किंच ज्ञानस्य नाशेन प्रतिद्वन्द्विसमुद्भवः ॥ यथा दीपप्रभानाशे तिमिरस्य समुद्भवः ॥ ८ ॥ तद्विरुद्धमनिर्वाच्यानाद्येकाज्ञानवादिनाम् ॥ अनादिभावरूपस्याज्ञानस्यास्य जनिः कथम् ॥ ९ ॥ अन्यथा भवतामेव स्वसिद्धान्तक्षतिर्भवेत् ॥ बाढं ज्ञानं सविज्ञानं जातं जातु न नश्यति ॥ १० ॥ तदुक्तेः का गतिस्तर्हि शृणु त्वं युक्तितः स्फुटम् ॥ ज्ञानविज्ञानघातित्वं कामस्येत्यत्र नो हरेः ॥ ११ ॥ तात्पर्यं किंतु कामस्य दुष्टस्यात्यन्तनिन्दया ॥ हेयत्वेऽस्त्यन्यथा वाक्यभेदः स्यात्तत एव च ॥ १२ ॥ तत्त्वज्ञाने समुत्पन्ने जीवन्मुक्तमुनेरयम् ॥ कामाभासः समुत्पन्नो यदि प्रारब्धकर्मणा ॥ १३ ॥ प्रत्युत ज्ञाननाश्योऽसावक्षमो ज्ञाननाशने ॥ तथाप्ययं न विश्वास्यः काम इत्येव कथ्यते ॥ १४ ॥ मुमुक्षोरुपदेशार्थं हरिणा भ्रान्तिहारिणा ॥ अयमत्रास्ति निष्कर्षो भगवद्वचसो मतः ॥ १५ ॥ बाध्योऽप्यज्ञानबाधाच्छ्रुतिशिखरवचोजन्यबोधेन कामो वामोऽयं मोक्षमार्गे प्रबलतररिपुर्नैव विश्वासयोग्यः ॥ तत्त्यागे सन्मुमुक्षोरनुदिनमधिकं यत्नमास्थाय बोधः साध्यो विज्ञानयुक्तो हरिरिति वदति ब्रह्मविद्याप्रदाता ॥ १६ ॥ यद्वा कामस्य यद्दौष्ट्यं तत्सर्वमिह वर्ण्यते ॥ तत्त्यागाय तथा प्राह ज्ञानविज्ञाननाशनम् ॥ १७ ॥ ज्ञानविज्ञानशब्दाभ्यां तत्फलं मुक्तिरुच्यते ॥ सा द्विधास्ति सदेहैका विदेहान्येति तत्र च ॥ १८ ॥ उत्पन्ने तत्त्वविज्ञाने साक्षात्कारापराभिधे ॥ अवश्यं स भवेन्मुक्तो देहपातादनन्तरम् ॥ १९ ॥ जीवन्मुक्तिफलं कामक्रोधादिभिरिहारिभिः ॥ प्रतिबद्ध्यत एवेति दर्शनार्थमिहोच्यते ॥ २० ॥ अहो कामस्य दुष्टत्वं किमु वाच्यमतः परम् ॥ यदयं ज्ञानविज्ञानफले सत्यपि तत्क्षणे ॥ २१ ॥ उद्भूतः प्रतिबध्नाति

जीवन्मुक्तिसुखं मुनेः ॥ यस्यां वृत्तौ स आह्लादो जीवन्मुक्तिसुखाभिधः ॥ २२ ॥ आरूढः सुखयत्येनं नष्टाविद्यं विचक्षणम् ॥ यदि तत्रागतः कामो दृष्टप्रारब्धकर्मणा ॥२३॥ तत्क्षणे तत्सुखं चासौ प्रतिबध्नाति वेदिनः ॥ ननु ज्ञाने स्थिते तत्र साविज्ञाने ज्ञचेतसि ॥ २४ ॥ कथं कामोद्भवस्तत्र संभवेदिति चेच्छृणु ॥ प्रारब्धकर्मप्राबल्यात्कामोत्पत्तिर्ज्ञचेतसि ॥ २५ ॥ सति मिथ्यात्वबोधेऽपि विषयेषु च संभवेत् ॥ ननु तत्त्वविदां चित्ते कामः प्रारब्धकर्मणा ॥२६॥ जायतेऽत्र प्रमाणं किमिति चेच्छ्रीहरेर्वचः ॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ २७ ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ तथैवोक्तं च वासिष्ठे निर्वाणे कुम्भवाक्यतः ॥ २८ ॥ ज्ञस्याज्ञस्य च देहस्य यावद्देहमयं क्रमः ॥ लोकवद्व्यवहारोऽयं शक्त्याशक्त्याथ वा सदा ॥ २९ ॥ ये परिज्ञातगतयो ये चाज्ञाः पशुधर्मिणः ॥ लोकस्य व्यवहारेषु ते स्थिता लोकजालवत् ॥ ३० ॥ व्यवहारे यथैवाज्ञस्तथैवाखिलपण्डितः ॥ वासनामात्रभेदोऽत्र कारणं बन्धमोक्षयोः ॥ ३१ ॥ यावच्छरीरं तावद्धि दुःखे दुःखं सुखे सुखम् ॥ असंसक्तधियो धीरा दर्शयन्त्यप्रबुद्धवत् ॥ ३२ ॥ तथैव भाष्ये भामत्यां चायमर्थो निदर्शितः ॥ पश्वादिभिश्चाविशेषादित्यत्रातिस्फुटं तथा ॥ ३३ ॥ विदन्तु श्रुतियुक्तिभ्यां देहादिभ्यो विलक्षणम् ॥ विशुद्धं प्रत्यगात्मानं ब्रह्मैक्यं चिद्घनं सुखम् ॥ ३४ ॥ प्राणभृन्मात्रधर्मं तु व्यवहारे विदां वराः ॥ नातिवर्तन्त इत्यादौ भामत्यां निर्णयः कृतः ॥ ३५ ॥ प्रारब्धकर्मनानात्वाद्बुधानामन्यथान्यथा ॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः ॥ ३६ ॥ स्वस्वकर्मानुसारेण वर्तन्तां ते तथातथा ॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः ॥ ३७ ॥ इत्यादिसंप्रदायज्ञैरयमर्थ उदीरितः ॥ जातेऽपि तत्त्वविज्ञाने प्रारब्धाख्येन कर्मणा ॥ ३८ ॥ जीवतः पुरुषस्यास्ति चित्तधर्मो ह्यनेकधा ॥ रागद्वेषादिकक्लेशहेतुत्वादेष तद्विदः ॥ ३९ ॥ स बाधितानुवृत्त्यापि बन्धो भवति तत्क्षणे ॥ चित्तवृत्तिनिरोधेन तस्य योगेन वारणम् ॥ ४० ॥ प्रोक्तं बहुविधं शास्त्रे जीवन्मुक्तिसुखाप्तये ॥ अतः कामोद्भवाज्जीवन्मुक्तेः स्यात्प्रतिबन्धनम् ॥ ४१ ॥ तदर्थं हरिणा प्रोक्तं ज्ञानविज्ञाननाशनम् ॥ चित्तस्य सर्वदोषाणां राजा काम उदीरितः ॥ ४२ ॥ तन्निराकरणेनैव सर्वदोषनिराकृतिः ॥ जीवन्मुक्तिसुखं तज्ज्ञचेतस्याविर्भवत्यपि ॥ ४३ ॥ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ॥ तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ ४४ ॥ कामोद्भवो मुमुक्षोर्हि तत्त्वधीप्रतिबन्धकः ॥ तज्ज्ञस्यात्मसुखास्वादप्रतिबन्धक ईर्यते ॥ ४५ ॥ तदर्थं तस्य नाशाय यत्न आस्थेय आदरात् ॥ मुमुक्षुणात्मबोधाय तज्ज्ञेनात्मसुखाय च ॥ ४६ ॥ इति श्रीकरुणासिन्धोर्हरेरद्भुतकर्मणः ॥ तात्पर्यं गम्यते विष्णोः शास्त्रयोनेरमापतेः ॥ ४७ ॥ तत्त्वज्ञानेऽपि जाते भ्रमतिमिरहरे शान्तिदे सज्जनानां जीवन्मुक्त्यापि भाव्यं परमसुखदयासर्वविक्षेपनाशात् ॥ तत्र प्रारब्धदोषाद्यदि भवति मतौ कामशत्रोः प्रचारो मोक्षो भाव्यन्तकाले त्वपि सपदि परं दृष्टदुःखं न नश्येत् ॥ ४८ ॥ अथवा तत्त्वजिज्ञासोरुपदेशार्थमेव हि ॥ कामनिन्दाद्युपक्रान्ता तथाहि श्रीहरेर्मतम् ॥ ४९ ॥ कामस्तृष्णादिपर्यायो दुःपूरो यत्र तिष्ठति ॥ ज्ञानविज्ञानयोस्तत्र गन्धोऽप्यत्यन्तदुर्लभः ॥ ५० ॥ वक्ष्यत्येव हरिः साक्षात्षोडशे कामदुष्टताम् ॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ ५१ ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ॥ ५२ ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ कामलोभावुभावत्र कामशब्देन कीर्तितौ ॥५३॥ क्रोधस्तस्यानुजोऽप्यत्र काममूल उदीरितः ॥ काम एष क्रोध एष इत्यत्र हरिणा स्वयम् ॥ ५४ ॥ तस्मात्कामरिपावन्तर्भूतत्वेनैव तौ मतौ ॥ तस्मिन्सति न गन्धोऽपि श्रेयसः साधनस्य वा ॥ ५५ ॥ अत एनं रिपुं कामं विनियम्येन्द्रियाणि च ॥ नाशय त्वं सुखावास्यै पौरुषेण बलीसाय ॥ ५६ ॥ नन्विन्द्रियनिरोधेन कथं कामस्य नाशनम् ॥ सति कामे निरोधोऽपि तेषां भातीह दुर्घटः ॥५७॥ काममूल-

मिदं यस्माच्चाञ्चल्यं हीन्द्रियाश्रयम् ॥ केनोपायेन तीव्रेण क्षमः स्यां कामनाशने ॥ ५८ ॥ इत्यत्राह हरिः साक्षाज्ज्ञानविज्ञानसाधनम् ॥ नाशने बाधने ज्ञानविज्ञाने अस्य वै यतः ॥ ५९ ॥ ज्ञानविज्ञानरूपाभ्यां साधनाभ्यां समूलतः ॥ नाशनं यस्य कामस्य तत्र त्वं यत्नवान्भव ॥ ६० ॥ देहेन्द्रियादिसंघाते यावदस्यात्मधीर्दृढा ॥ कामोऽपि तावदेवास्ति बलवानतिदुःखदः ॥ ६१ ॥ अविद्याहेतवः कामाः काममूलाः प्रवृत्तयः ॥ धर्माधर्मौ च तन्मूलौ देहोऽनर्थाश्रयस्ततः ॥ ६२ ॥ अतोऽविद्यानिरोधे स्यान्निरोधो विदुषः सदा ॥ निःशेषकर्महेतूनां विकाराणां तदैव तु ॥ ६३ ॥ इत्युक्तं वार्तिके स्पष्टं तैत्तिरीयकभाष्यके ॥ अहंकारचिदात्मानावेकीकृत्याविवेकतः ॥ ६४ ॥ इदं मे स्यादिदं मे स्यादितीच्छाकामशब्दिता ॥ देहादिभ्यो विविच्यातो ज्ञाते ब्रह्मात्मवस्तुनि ॥ ६५ ॥ समूलस्यैव कामस्य नाशनं भवति स्वयम् ॥ अतो मुख्य उपायोऽयं तुभ्यं समुपदिश्यते ॥ ६६ ॥ ज्ञानं शास्त्रीयमाश्रित्य तत्त्वमस्यादिवाक्यजम् ॥ देशिकोक्तनयैर्युक्तं विज्ञानं स्वानुभूतिजम् ॥ ६७ ॥ नाशय त्वमिमं शत्रुं कामं पौरुषमास्थितः ॥ इत्येवं वा कृपासिन्धोस्तात्पर्यं श्रीहरेर्विभोः ॥ ६८ ॥ संदर्भस्योत्तरस्यापि यतोऽस्मिन्पक्ष एव हि ॥ स्वारस्यं तत्र चिद्धातोर्जडवर्गाद्विवेचनम् ॥ ६९ ॥ स्वाज्ञानाध्यस्तदेहद्वयमहमिति संश्रित्य यस्यास्ति यावत्कामक्रोधादिदोषः प्रभवति भयदस्तस्य तावन्मुमुक्षोः ॥ देहादिभ्यो विविच्याभयपदममलं तत्त्वमाज्ञाय सम्यग्ध्वस्तेऽज्ञाने सकार्ये ह्यपनयति सुधीः कामशत्रुं सुखेन ॥ ७० ॥ क शास्त्रं गीताख्यं हरिमुखसरोजाद्विगलितं क चास्माकं बुद्धिर्विषयविषपङ्के निपतिता ॥ तथापि श्रीकान्तप्रचुरगुणलक्ष्मीविरचितं कटाक्षं स्वच्छाच्छं ह्यनुसृतवतां किं न सुलभम् ॥ ७१ ॥ ४१ ॥

भा० टी०—**तस्मादिति** । तस्मादिन्द्रियादीनामाश्रयत्वात्त्वमिन्द्रियाणि पूर्वं कामनिरोधात्प्रागवस्थायां मोहनात्पूर्वमिति वा नियम्य वशीकृत्य पाप्मानं पापाचारं कामं प्रजहि, आत्मनः सकाशात्परित्यज । कामस्य परित्याग एव मारणं नतु शस्त्रेण शिरश्छेदनम् । एवं जहि शत्रुमित्युपसंहारेऽपि परित्यजेत्येवार्थः । एतेन प्रजहि प्रकर्षेण जहि मारयेति भाष्यानुक्तं कैश्चिदुक्तं प्रत्युक्तम् । हि यस्माज्ज्ञानविज्ञाननाशनमस्य विशेषणस्य हेतुगर्भत्वं सूचयति हिशब्दः । तथाच यस्मादित्यस्याध्याहारोऽपि नापेक्षितः । एतेन हि प्रस्फुटमिति प्रत्युक्तम् । ज्ञानं शास्त्रत आचार्यतश्चात्मादीनामवबोधः, विज्ञानं विशेषतस्तदनुभवः, तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोर्नाशनम् । ये तु ज्ञानमात्मविषयं विज्ञानं शास्त्रीयं, यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनम् "विज्ञाय प्रज्ञां कुर्वीत" इतिश्रुतेरिति वर्णयन्ति तेषां व्याख्याने प्रथमपक्षोऽरुचिग्रस्तः । अरुचिबीजं ज्ञानं विवेकज्ञानमिति पूर्वं स्वेन व्याख्यातं तच्चात्मविषयं शास्त्रीयमेवेति विज्ञानपदेन पौनरुक्त्यम् । द्वितीयस्तु विज्ञानं विशेषतस्तदनुभव इति भाष्यस्य निदिध्यासनपरत्वं व्याख्याय तद्विरुद्धो बोध्यः । तेनेदमावृतम्, आवृतं ज्ञानमेतेन, ज्ञानमावृत्येत्यनुरोधेन नाशनमित्यस्यादर्शनसंपादकमित्यर्थः । णश् अदर्शन इति स्मरणात् । ज्ञानविज्ञानयोरुत्पन्नयोरावरणात्मकाज्ञानबाधकत्वप्रसिद्ध्या विक्षेपात्मकाज्ञानेन कदाचित्प्रारब्धप्राबल्यादाभासरूपेणोत्पन्नस्य कामस्य तावत्कालज्ञानविज्ञाननाशनत्वमुपपद्यते । यद्वा मुमुक्षुणा मोक्षसाधनज्ञानविज्ञानप्राप्तये यतमानेनेन्द्रियाणि नियम्य ज्ञानविज्ञानावरकः कामो हातव्य इति । तथाच नाशनमावरकमिति व्याख्यानेऽस्य सम्यक्त्वेन घातकमित्यर्थभ्रान्त्या ज्ञानविज्ञाननाशासंभवशङ्काया्स्तदुत्तरस्य चानवकाशः । भरतैरप्ययं शत्रुः परित्यक्तः त्वं तु भरतर्षभ इति सूचयन्नाह—भरतर्षभेति ॥ ४१ ॥

प० टी०—अथ क्रमेणास्योपरमप्रकारमाह—**तस्मादिति** । यस्मादयं बुद्धिपर्यन्तगतिस्तस्मात्कारणादादौ प्रथमत इन्द्रियाणि चक्षुरादीनि नियम्य विषयपराङ्मुखानि कृत्वैनं पाप्मानमत्युग्रं कामं प्रजहि घातय । किंभूतं ज्ञानविज्ञाननाशनम् । ज्ञानं शास्त्रोत्थं विज्ञानमनुभवस्तयोः प्रतिबन्धकीभूतम् ॥ ४१ ॥

रा० टी०—तस्मादिति। हि यस्मात् हे भरतर्षभ त्वमिन्द्रियाण्यादौ नियम्य विषयसङ्गतान्यकृत्वा सङ्गतत्वे वा मनोबुद्ध्योर्विषयस्पर्शमकृत्वा तयोर्विषयसंस्पर्शेऽपि क्षोभमप्राप्येति वार्थः। ज्ञानविज्ञानयोर्नाशनं यस्मात्त्वं पाप्मानं पापहेतुमेनं कामं प्रजहि हतं कुरु। हताधिष्ठानो हि शत्रुर्नाशयितुं शक्य इति प्रसिद्धिद्योतको हिशब्दः। इन्द्रियजयः कामहननोपाय इति भावः॥ ४१॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः॥
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥

न० टी०—एवं ज्ञानविज्ञानविरोधिकामनाशने द्वारभूतेन्द्रियनियमनमुक्तमिदानीं ज्ञानविरोधेऽधिष्ठानभूतानीन्द्रियाणि क्रमतः प्रधानानि प्रदर्श्य सर्वप्रधानभूतं कामं हन्यादित्युपदिशन्नुपसंहरति—इन्द्रियाणीति द्वाभ्याम्। ज्ञानावरणे इन्द्रियाणि पराणि प्रधानकारणान्याहुः। यत इन्द्रियेषु विषयप्रवणेषु आत्मनि ज्ञानं न जायते। इन्द्रियेभ्यः परं मनः, इन्द्रियेषूपरतेष्वपि मनसि विषयप्रवणे नात्मनि ज्ञानं प्रकाशते। मनसस्तु परा बुद्धिः, मनसि विषयविमुखे सत्यपि विपरीताध्यवसायवत्यां बुद्धौ सत्यां नात्मज्ञानं प्रकाशते। यो बुद्धेः परतस्तु सः, स पूर्वोक्तः कामः यत इन्द्रियादिषु बुद्धिपर्यन्तेषु ज्ञानविरोधिपूत्तरोत्तरप्रधानभूतेषु कथञ्चिद्विषयेभ्य उपरतेष्वपि रजोगुणसमुद्भवोऽनादिसूक्ष्माभिलाषरूपः कामः मनोबुद्धी विषयसंकल्पाध्यवसायिन्यौ विधायात्मज्ञानमाच्छादयति। अतो बुद्धेः परः सर्वज्ञानविरोधिप्रधानभूतो वैरी स काम एवेत्यर्थः। केचित्, यस्तु बुद्धेः परस्तत्साक्षित्वेनावस्थितः सर्वान्तरः स आत्मा विमोहयति देहिनमिति देहिशब्दोक्त आत्मा स इति परामृश्यते इत्येवं व्याख्यायन्ते, तदसङ्गतं व्यवहितस्य देहिनः परामर्शासंभवात् 'पाप्मानं प्रजहि ह्येनम्' 'जहि शत्रुं महाबाहो कामरूपम्' इति पूर्वोत्तरश्लोकयोः कामस्यैव प्रकृतत्वात्। न ह्यनन्तरोक्तं विहाय व्यवहितस्य परामर्शं पण्डिताः कुर्वन्तीत्यलं विस्तरेण॥ ४२॥

म० टी०—ननु यथाकथंचिद्बाह्येन्द्रियनियमसंभवेऽप्यान्तरतृष्णात्यागोऽतिदुष्कर इति चेत् न, रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्यत्र परदर्शनस्य रसाभिधानीयकतृष्णात्यागसाधनस्य प्रागुक्तेः। तर्हि कोऽसौ परो यद्दर्शनात्तृष्णानिवृत्तिरित्याशङ्क्य शुद्धमात्मानं परशब्दवाच्यं देहादिभ्यो विविच्य दर्शयति—इन्द्रियेति। श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च स्थूलं जडं परिच्छिन्नं बाह्यं च देहमपेक्ष्य पराणि सूक्ष्मत्वात्प्रकाशकत्वाद्व्यापकत्वादन्तःस्थत्वाच्च प्रकृष्टान्याहुः पण्डिताः श्रुतयो वा। तथेन्द्रियेभ्यः परं मनः सङ्कल्पविकल्पात्मकं तत्प्रवर्तकत्वात्। तथा मनसस्तु परा बुद्धिरध्यवसायात्मिका। अध्यवसायो हि निश्चयस्तत्पूर्वक एव सङ्कल्पादिर्मनोधर्मः। यस्तु बुद्धेः परतस्तद्भासकत्वेनावस्थितो यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तः कामोऽज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा पर आत्मा। स एष इह प्रविष्ट इतिवद्व्यवहितस्यापि देहिनस्तदा परामर्शः। अत्रार्थे श्रुतिः 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति। अत्रात्मनः परत्वस्यैव वाक्यतात्पर्यविषयत्वादिन्द्रियादिपरत्वस्याविवक्षितत्वादिन्द्रियेभ्यः परा अर्था इति स्थानेऽर्थेभ्यः पराणीन्द्रियाणीति विवक्षाभेदेन भगवदुक्तं न विरुध्यते। बुद्धेरस्मदादिव्यष्टिबुद्धेः सकाशान्महानात्मा समष्टिबुद्धिरूपः परः 'मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः' इति वायुपुराणवचनात्। महतो हैरण्यगर्भबुद्धेः परमव्यक्तमव्याकृतं सर्वजगद्बीजं मायाख्यं "मायां तु प्रकृतिं विद्यात्" इति श्रुतेः "तद्धेदं तर्ह्यव्याकृतमासीत्" इति च। अव्यक्तात्सकाशात्सकलजडवर्गप्रकाशकः पुरुषः पूर्ण आत्मा परस्तस्मादपि कश्चिदन्यः परः स्यादित्यत आह—पुरुषान्न परं किंचिदिति। कुत एवं

यस्मात् सा काष्ठा समाप्तिः सर्वाधिष्ठानत्वात्सा परा गतिः " सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् " इत्यादिश्रुतिप्रसिद्धा परा गतिरपि सैवेत्यर्थः । तदेतत्सर्वं यो बुद्धेः परतस्तु स इत्यनेनोक्तम् ॥ ४२ ॥

शं० टी०—ननु कामो दुर्जयो दुर्जयस्य जये बलवदाश्रयोऽपेक्ष्यते मुमुक्षुः कमाश्रित्य कस्य महिम्ना कामं जयेदित्याकाङ्क्षायाम् 'रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ' इतिन्यायेन परमात्मानं सर्वान्तरं सर्वगमवगम्य तदाश्रयणेन त्वं कामं जहीति बोधयितुमात्माधिगमप्रकारमाह—**इन्द्रियाणीति** । " इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः" इत्याद्याः श्रुतय इन्द्रियाणि पराण्याहुः इन्द्रियाणि श्रोत्रादीनि पञ्च पञ्च कर्मेन्द्रियाणि च स्वापेक्षया जडं बाह्यं स्थूलं प्रवर्त्यं व्याप्यं कार्यं च यच्छरीरं तस्मात्प्रकाशकत्वान्तरत्वसूक्ष्मत्वप्रवर्तकत्वव्यापकत्वकारणत्वादिधर्मैः पराण्युत्कृष्टतराण्याहुर्वदन्ति । येन यत्प्रकाश्यते प्रवर्त्यते च तत्तदपेक्ष्य व्यापकं सूक्ष्मं परं भिन्नं च भवति यथाऽयसोऽयस्थो वह्निस्तथा देहमपेक्ष्येन्द्रियाणि देहतद्धर्मप्रकाशकत्वात्प्रवर्तकत्वाच्च पराणि भिन्नानि च भवन्तीत्यर्थः । तथेन्द्रियेभ्यो मनः प्रकाशकत्वादिधर्मेण परमुत्कृष्टं भिन्नं च भवति, इन्द्रियतद्धर्माणां प्रकाशकत्वान्मनः खल्वन्तस्थं सदिन्द्रियाणि तद्धर्मांश्च प्रकाशयति । ततो मनसस्तत्परत्वं भिन्नत्वं च युक्तमित्यर्थः । एवं मनसोऽपि प्रकाशकत्वादिधर्मैर्बुद्धिः परा भवति । बुद्ध्या खलु मनस्तद्धर्मांश्च प्रकाश्यन्ते प्रवर्त्यन्ते च ततस्तत्परत्वं भिन्नत्वं च बुद्धेः सिद्धमेव । सूक्ष्मत्वान्तरत्वव्यापकत्वकारणत्वप्रवर्तकत्वप्रकाशकत्वादिधर्मैर्यस्त्वयं सर्वतो व्याप्य बुद्ध्यादिस्थूलपर्यन्तं कार्यकरणसंघातं स्वसंनिधिमात्रेण प्रवर्तयन् तद्धर्मतत्कर्मतद्गुणतद्विकारांश्च सर्वानविकारात्मना साक्षाज्जानाति प्रकाशयति स एव आत्मा बुद्धेः परतः परः सर्वस्मादुत्कृष्टतमो भिन्नश्च नित्यत्वात्सर्वज्ञत्वात्सर्वप्रकाशकत्वात्सर्वसाक्षित्वाच्च "पुरुषान्न परं किंचित् " इति श्रवणात् । यत एवं ततः सर्वस्मात्परं सर्वद्रष्टारमत एव देहेन्द्रियादिभ्यो भिन्नं सर्वप्रकाशकं चिदानन्दैकरसं सन्मात्रं परिपूर्णमेतमेव स्वात्मानं विजानीहीत्यर्थः ॥ ४२ ॥

श्री० टी०—अथ यत्र प्रसन्नतया चित्तप्रणिधानेन इन्द्रियाणि नियन्तुं शक्यन्ते तदात्मस्वरूपं देहादिभ्यो विविच्य दर्शयति—**इन्द्रियाणीति** । इन्द्रियाणि देहादिभ्यो ग्राह्येभ्यः पराणि श्रेष्ठान्याहुः सूक्ष्मत्वात्प्रकाशकत्वाच्च, अत एव तद्व्यतिरिक्तत्वमप्यर्थादुक्तं भवति । इन्द्रियेभ्यश्च संकल्पात्मकं मनः परं तत्प्रवर्वकत्वात् । मनसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात्संकल्पस्य । यस्तु बुद्धेः परस्तत्साक्षित्वेनावस्थितः सर्वान्तरः स आत्मा 'विमोहयति देहिनम् ' इति देहिशब्दोक्त आत्मा स इति परामृश्यते ॥ ४२ ॥

स० टी०—स्वस्मिन्भोक्तृत्वविज्ञानात्स्वात्मानन्दाविवेकतः ॥ भोग्यसौन्दर्यसंभ्रान्त्या कामोऽयं जायते नृणाम् ॥ १ ॥ प्रत्यगात्मा विविच्यातो द्रष्टव्योऽन्तर्धिया नयैः ॥ कामशत्रुविनाशाय निजानन्दाप्तये तथा ॥ २ ॥ देहेन्द्रियमनोधीभ्यः पृथक्कृत्य विवेकतः ॥ सर्वसाक्षी परो दृश्याद्दृष्टा द्रष्टव्य आदरात् ॥३॥ असङ्गात्मानमाश्रित्य भोग्यमिथ्यात्वबोधतः ॥ हेयः कामः परः शत्रुरित्याह भगवान्हरिः ॥ ४ ॥ स्थूलं जडं परिच्छिन्नं बाह्यं देहमपेक्ष्य हि ॥ प्रकाशकत्वात्सूक्ष्मत्वाद्व्यापकत्वात्पराणि च ॥ ५ ॥ इन्द्रियाणीन्द्रियेभ्यस्तु प्रेरकत्वान्मनः परम् ॥ मनसस्तु परा बुद्धिर्निश्चयैकस्वरूपिणी ॥ ६ ॥ यस्तु बुद्धेः परस्तस्याभासकत्वेन चिद्वपुः ॥ यमविद्यावृतं कामः स्वाश्रयैर्मोहयत्यसौ ॥ ७ ॥ बुद्धेर्द्रष्टा परः सोऽयमात्मा साक्षी विविच्यताम् ॥ अत्रायमस्ति निष्कर्षः साक्षितत्त्वविवेचने ॥ ८ ॥ देहः स्थूलो जडोऽयं जनिमरणयुतो नायमात्मा कदाचित्सूक्ष्मो लिङ्गापराख्यो भ्रमशतवलितो वैकृतो नायमात्मा ॥ सुप्त्यादौ भावहीनस्ताडिदिव गलितोऽज्ञानमात्रैकहेतुः साक्षी तस्याप्यभावं सुखघनवपुषा वेत्ति तद्भिन्नबोधः ॥ ९ ॥ विश्वो वैश्वानरोऽयं व्यभिचरति यतो जागरे विप्रणष्टे सूत्रात्मा तैजसोऽपि स्वयमिह गलति प्रत्यहं संप्रसादे ॥ प्राज्ञेशौ संप्रबोधे सुखघनविषये संलयं प्राप्नुतश्च प्रत्यग्ब्रह्माद्वयात्मा स्वयमिह निगमाच्छिष्यते भ्रान्तिशून्यः ॥ १० ॥ ४२ ॥

भा० टी०—इन्द्रियाण्यादौ नियम्य कामं वैरिणं जहीत्युक्तं तत्र किमाश्रयः कामं जह्यादित्यपेक्षायां रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्युक्तं स्मारयन्परं ज्ञापयति—इन्द्रियाणीति । इन्द्रियाणि श्रोत्रादीनि देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यान्तरस्थितत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टान्याहुः पण्डिता उक्ताविवक्षया न तु श्रुतयः साक्षादाहुः 'इन्द्रियेभ्यः परा ह्यर्थाः' इति श्रुतावुक्तत्वात् । तथेन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकम् । मनसस्तु बुद्धिर्निश्चयात्मिका परा । बुद्धेः परतस्तु सः बुद्धेर्द्रष्टा परमात्मा यः सर्वदृश्येभ्यो बुद्ध्यन्तेभ्यः आभ्यन्तरः । यमिन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारा मोहयति । परतस्तु इत्युक्तिस्तु " बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " इतिश्रुत्यर्थसंग्रहार्था । श्रुत्यनुसारेणेन्द्रियेभ्यः परा ह्यर्था इति वक्तव्येपि एवं भगवत उक्तिः सफला पूर्वपुरुषपरत्वप्रतिपादनायाः श्रुतेरफलार्थादिपरत्वाभिधाने तात्पर्याभावज्ञापनार्थेति मन्तव्यम् । तदुक्तम्—आध्यानाय प्रयोजनाभावात् आत्मशब्दाच्चेति ॥ ४२ ॥

प० टी०—अथेन्द्रियाद्यधिष्ठानत्रयगतः कामो जेतुं न शक्यतेऽतस्तेभ्योऽपि विविक्तमात्मानं दर्शयति—इन्द्रियाणीति । इन्द्रियाणि देहादिभ्यो ग्राह्येभ्यः पराण्युत्कृष्टान्याहुः सूक्ष्मत्वादर्थप्रकाशकत्वाच्च । तत एवार्थादतिरिक्तत्वमुक्तं भवति । इन्द्रियेभ्यश्च संकल्पात्मकं मनः परमुत्कृष्टं तत्प्रवर्तकत्वात् । मनसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य । यस्तु बुद्धेः परतस्तत्साक्षित्वेनावस्थितः सर्वान्तरः स आत्मा । अत्रार्थे कठशाखीया श्रुतिः—"इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ एवं सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः " इति ॥ ४२ ॥

रा० टी०—शत्रुहनने आयुधरूपं ज्ञानम्, एवं बुद्धेरित्युत्तरश्लोके वक्तुं ज्ञानविषयमाह—इन्द्रियाणीति । शरीरादिन्द्रियाणि पराणि उत्कृष्टानीत्यर्थः । इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मन इत्यध्याहारेण योजना ध्येया । तथा यो बुद्धेः परतस्तु सः, इत्यत्र ' बुद्धेरात्मा महान्परः । महतः परमव्यक्तं यो व्यक्तात्परतस्तु सः' इत्यपि ध्येयम् । स परमात्मेत्यर्थः । " इन्द्रियेभ्यः परा ह्यर्था" इत्यादि काठकश्रुतेः । अस्यार्थस्तु ' देवेभ्य इन्द्रियात्मभ्यो ज्यायांसोऽर्थाभिमानिनः । सोमवित्तपसूर्याप्या अश्व्यग्नीन्द्रेन्द्रसूनवः ॥ यमो दक्षश्चेन्द्रियेशाः सौपर्णी वारुणी तथा । उमेति चार्थमानिन्यस्तिस्रो द्विध्येकदेवताः ॥ मनोभिमानिनो रुद्रवीन्द्रशेषास्त्रयोऽपि तु । श्रेष्ठा अर्थाभिमानिभ्यस्तेभ्यो बुद्धिः सरस्वती ॥ तस्या ब्रह्मा महानात्मा ततो व्यक्ताभिधा रमा । तस्यास्तु पुरुषो विष्णुः पूर्णत्वान्नैव तत्समः ' इत्यादिकाठकभाष्यात् । तथा ' सर्वेभ्यः प्रवरा देवाः ' इत्यादितात्पर्यवाक्याच्चावसेयः ॥ ४२ ॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे तृतीयोऽध्यायः ॥ ३ ॥

त० टी०—एवं ज्ञातस्वरूपाधिष्ठानबलस्य शत्रोर्हनने प्रयतितव्यमिति द्रढयति—एवमिति । एव-मुक्तप्रकारेण बुद्धेः परं सूक्ष्मं वासनारूपं प्रधानं वैरिणं बुद्ध्वा, आत्मानं मन आत्मना सात्त्विक्या

बुद्ध्या संस्तभ्य कामावशगं कृत्वा मनोबुद्धिभ्यां वियुक्तं निर्बलं सन्तं कामरूपं शत्रुं जहि । हे महाबाहो महान्तौ बाहू यस्य स त्वं शत्रुनिग्रहणे समर्थः । यद्यपि दुरासदं दुःखेनासादनीयं दुर्निग्राह्यमिति यावत्, तथापि मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा, इत्युक्तं सज्ञानं मदुपासनं तदेव महाबाहुद्वयं तेन बलान्निगृह्य जहि नाशयेत्यर्थः । इन्द्रियाद्यधिष्ठानं त्याजयेति वा ॥ ४३ ॥

ज्ञानसाधनभूतोऽपि कर्मयोगोऽधिकारतः ॥ स्वप्रसादाय निष्कामः प्राधान्येनेह कीर्तितः ॥ १ ॥

इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवकाश्मीरिभट्टाचार्यविरचितायां कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

म० टी०—फलितमाह—**एवमिति** । 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते ' इत्यत्र यः परशब्देनोक्तस्तमेवंभूतं पूर्णमात्मानं बुद्धेः परं बुद्ध्वा साक्षात्कृत्य संस्तभ्य स्थिरीकृत्यात्मानं मन आत्मना एतादृशनिश्चयात्मिकया बुद्धया जहि मारय शत्रुं सर्वपुरुषार्थशातनम् । हे महाबाहो महाबाहोर्हि शत्रुमारणं सुकरमिति योग्यं संबोधनम् । कामरूपं तृष्णारूपम् । दुरासदं दुःखेनासादनीयं दुर्विज्ञेयानेकविशेषमिति यत्नाधिक्याय विशेषणम् ॥ ४३ ॥

उपायः कर्मनिष्ठात्र प्राधान्येनोपसंहृता । उपेया ज्ञाननिष्ठा तु तद्गुणत्वेन कीर्तिता ॥ १ ॥

इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीयपादशिष्यमधुसूदनसरस्वतीविरचितायां श्रीमद्भगवद्गीतागूढार्थदीपिकायां ज्ञाननिष्ठावर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

शं० टी०एवं बुद्ध्यादेर्दृश्यजातस्य द्रष्टारमात्मानं सन्मात्रमात्मत्वेनाधिगम्य तन्निष्ठया स्वशत्रोः कामस्य संसारहेतोर्निःशेषनिर्मूलनं कुर्विति कर्मयोगस्य मोक्षोपायभूतस्योपेयभूतया ज्ञाननिष्ठया संभाव्यमानः सर्वकामनिर्मोक एव मुक्तिरिति सूचयन् कर्मयोगमुपसंहरति—**एवमिति** । महाबाहो इति विशेषणं मुमुक्षोः कामरूपशत्रुसंहारणपटीयस्त्वद्योतनार्थम् । बुद्धेर्बुद्ध्यादेः सर्वदृश्यस्य परं विलक्षणं द्रष्टारमखण्डानन्दैकरसमात्मानमयमेवाहमस्मीत्यवं स्वात्मना सम्यग्बुद्ध्वाऽऽत्मन्येवात्मत्वबुद्धिं दृढां कृत्वा त्वमात्मानं कामस्याश्रयभूतं कारणभूतं चान्तःकरणमात्मना स्वस्वरूपेणान्तर्बहिःपूर्णेनाखण्डैकरसेन संस्तभ्य संयोज्यारोपितं नामरूपग्रहणमकृत्वा तदधिष्ठानभूतब्रह्मदर्शन एव नियोज्य सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदर्शनादन्यत्र दुरासदं दुर्जयं जेतुमशक्यस्वभावं कामरूपं शत्रुं जहि विध्वंसय । विशिष्यविषयग्रहणमेव कामाविर्भूतिकारणं सर्वत्र ब्रह्मदृष्ट्या तदग्रहणमेव कामविनाशनहेतुरतः सर्वं ब्रह्मैव पश्यन् कामं निर्मूलयेत्यर्थः । अत्र न कर्मणामनारम्भात्, इति कर्मयोगमुपक्रम्य मुमुक्षोस्तत्त्यागनिन्दनपूर्वकं बहुवचनैः कर्मण एव कर्तव्यत्वं प्रतिपाद्य, अहं ममेति संसारस्य प्रवृत्तिलक्षणस्य कारणं काम एवेति काममाहात्म्यं वर्णयित्वा कर्मणा प्राप्तचित्तशुद्धेः पुरुषस्य ज्ञानयोगनिष्ठया तज्जयः कर्तव्य इति वदता भगवता " यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः " इत्यादिश्रुतिप्रमाणककामनिर्मोक एव मोक्ष इति सूचितं भवति । तेन मोक्षहेतोर्ज्ञानयोगस्यैव प्राधान्यं कर्मयोगस्योपसर्जनत्वेत्यस्याध्यायस्य ज्ञानयोगपर्यवसायित्वात्तत्परत्वमेवेति सिद्धम् ॥ ४३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां तृतीयोऽध्यायः ॥ ३ ॥

श्री०— टी०—उपसंहरति—**एवमिति** । बुद्धेरेव विषयेन्द्रियादिजन्याः कामादिविक्रियाः आत्मा तु निर्विकारस्तत्साक्षीत्येवं बुद्धेः परमात्मानं बुद्ध्वा आत्मना एवंभूतनिश्चयात्मिकया बुद्ध्यात्मानं मनः संस्तभ्य निश्चलं कृत्वा कामरूपं शत्रुं जहि मारय । दुरासदं दुःखेनासादनीयं दुर्विज्ञेयगतिमित्यर्थः ॥ ४३ ॥

स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता नराः । तं कृष्णं परमात्मानं तोषयेत्सर्वकर्मभिः ॥ १ ॥

इति श्रीमद्भगवद्गीताटीकायां सुबोधिन्यां तृतीयोऽध्यायः ॥ ३ ॥

स० टी०—एवं बुद्धेः परं पूर्णं साक्षात्कृत्य स्वया धिया ॥ स्थिरीकृत्य मनः कामं शत्रुं मारय सर्वथा ॥ १ ॥ समूलोच्छेदनं तस्य मारणं तत्त्वबोधतः ॥ तृष्णारूपं च दुर्ज्ञेयानेकभेदं भ्रमप्रदम् ॥ २ ॥ प्रयत्नाधिक्यमाश्रित्य नाश्योऽयं सर्वथा रिपुः ॥ ३ ॥ ४३ ॥ एतदध्यायश्लोकसंख्या ॥ ३६९ ॥

यं योगी श्रद्दधानः क्रतुभिरपि यजंश्चित्तशुद्ध्यैति मोक्षं सांख्यो यन्निष्ठयाप्तापरमितपदधीर्मज्जति स्वे सुखाब्धौ ॥ यत्स्मृत्या कामशत्रुं ह्यपनयति सुधीः साक्षिणं संविविच्य स्वान्ते तं दीनबन्धुं गुरुमतिसुहृदं संस्थितं कृष्णमीडे ॥ १ ॥

इति भावप्रकाशे श्रीसदानन्दविदा कृते ॥ ज्ञाननिष्ठाप्रधानोऽयं तृतीयः पूर्णतां गतः ॥ ३ ॥
आदित आरभ्य टीकाश्लोकसंख्या ॥ १३०६ ॥

भा० टी०—ततः किमित्याशङ्क्येन्द्रियादिसमाधानपूर्वकादात्मज्ञानात्कामजयो भवतीत्युपसंहरति—**एवमिति** । आत्मना संस्कृतमनसा बुद्ध्या वाऽऽत्मानं मनः सम्यक्स्तंभनं कृत्वा समाधाय बुद्धेः परं साक्षिभूतं ज्ञात्वा साक्षात्कृत्वा मूलोच्छेदेन कामरूपं दुरासदं दुर्विज्ञेयानेकविशेषं शत्रुं जहि परित्यज । महाबाहो इति संबोधयन्मदुक्तमुपायं विना महद्भिर्बाहुभिः बाह्यशत्रुवदयमजेय इति सूचयति । तदनेन तृतीयाध्यायेन साधनभूता कर्मनिष्ठा प्राधान्येनोक्ता साध्या तु ज्ञाननिष्ठा गुणत्वेनेति विवेक्तव्यम् ॥ ४३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिविदुषा विरचितायां गीताभाष्योत्कर्षदीपिकायां तृतीयोऽध्यायः ॥ ३ ॥

प० टी०—अथोक्तार्थमुपसंहरति—**एवमिति** । भो महाबाहो पुरुषार्थिन् एवममुना प्रकारेण बुद्धेः परं बुद्ध्यातिरिक्तं तत्साक्षिणं परमात्मानं बुद्ध्वात्मनैवंभूतनिश्चयात्मिकया बुद्ध्यात्मानं मनः संस्तभ्य निश्चलं कृत्वा कामरूपं दुरासदं दुर्जयं शत्रुं जहि मारय । अथ तदेव बृहदारण्यके प्रथमतो दैवासुरसंग्रामव्याजेन द्वयाहप्राजापत्यादिदशभिः कण्डिकाभिः प्रतिपादितम् । तत्रोपसंहारश्रुतिस्तु "अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यथाश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन् परासुरा भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद" इत्यादिः । भाष्यम्—अथानन्तरं हशब्दो वृत्तान्तद्योतनार्थः । मोघप्रयत्नास्ते देवा इममासन्यं समीपे च वर्तमानं सर्वेन्द्रियचालकं मुख्यप्राणं वक्ष्यमाणेन्द्रशब्दव्यपदेश्यं प्रत्यूचुस्त्वं न उद्गायेति । त्वं नोऽस्मदर्थमुद्गानं कुरु । तस्योद्गानमवाग्जपणवरूपं तेन सोऽपि पूर्ववदुदगायत् । तदुक्तं छान्दोग्ये "अथाध्यात्मम् । एवं मुख्यप्राणस्तमुद्गीथमुपासीतोमिति" इति । अथ तं प्राणमुद्गातारं ज्ञात्वा कामक्रोधाद्यसुरास्तमभिद्रुत्याविध्यन् वेधितवन्तो विध्वंसमाना विशीर्णमानाश्च विष्वञ्चोपि विश्वस्मिन्नञ्चन्ति ते विष्वञ्चो नानागतयो विनेशुर्विनाशं प्राप्ताः । अत्र दृष्टान्तमाह—यथाश्मानं पाषाणमृत्वा प्राप्य लोष्टः पांसुपिण्डो विध्वंसते तथैव मुख्यप्राणाभिद्रुतास्ते दैत्या नाशं प्राप्ता इत्यर्थः । अत्रैतदुक्तं भवति । प्राणनं जीवनं करोतीति प्राणो वागाद्यधिदैवतानां शक्त्युत्पादको हिरण्यगर्भः । तथा कामादीनां प्रसरस्तु बुद्धिपर्यन्तमेव । तदग्रे कामादीनामभाव एव संभवतीत्यर्थः । ततो दैत्यनाशानन्तरं देवाः परासुरा अभवन् । अत्र मध्यमपदलोपी समासः । पराभूता असुरा यैस्ते परासुरा विजयवन्त इत्यर्थः । एवमुक्तप्रकारं दैवासुरसंग्रामं वेद स आत्मना भवति कामादीन् परास्य पराभूय स्वेनात्मना कृत्वा संपद्यते न कामाद्यैः । एवमात्मज्ञानसंपत्तौ जातायां तस्य द्विषन् द्वेष्टापि भ्रातृव्यो भवतीति । अयमेवार्थः सामवेदे कल्माषसाम्नोपपादितः—"हाउ ३ सेतूँस्तर १ दुस्तरान् ३ दानेनादानं १ हाउ ३ अह-

मस्मि प्रथमाजा ऋतस्या हाउ ३ सेतूँस्तर ३ दुस्तरान् ३ अक्रोधेन क्रोधम् " इत्यादिः । भाष्यम्—यथा जलप्रवाहप्रतिबन्धकाः सेतवो भवन्ति तद्वदखण्डैकरसानुभवे चत्वारः सेतवः सन्ति । ते तु अदानक्रोधाश्रद्धानृतानि । तांश्चतुरः सेतूँस्तर उल्लङ्घ्य । तत्र प्रथमसेतोरुल्लङ्घने उपायमाह—दानेनेति । यद्ब्रह्मार्पणत्वेन दीयते तद्दानशब्दव्यपदेश्यम्, ततोऽन्यज्जायापुत्रार्थं यद्व्ययीक्रियते तददानमेवं दानेन कृत्वा अदानं तर । अदानमपि ब्रह्मार्पणत्वेन गणयेदित्यर्थः । यतोहमृतस्य सत्यस्य ब्रह्मणः प्रथमजा प्रथमं शबलत्वेनोपस्थितो हिरण्यगर्भोऽस्मि । यत्किंचिद्दीयते तत्सर्वं मदर्पणमेव भवतीत्यर्थः । तथैव क्रोधलक्षणं द्वितीयसेतुमक्रोधेन क्षमया कृत्वा तरेति । अत्र पूर्वदेवेभ्योऽमृतस्य नाभा इत्यादिश्रुतयोऽस्माभिः शतश्लोकभाष्ये सम्यग्व्याख्याताः सन्ति । तदुक्तम्—"क्रमो न वाचां शिरसो न शूलं न चित्ततापो न तनोर्विमर्दः । न चापि हिंसादिरनर्थयोगः श्लाघ्या परं क्रोधजयेऽहमेका " ॥ ४३ ॥

अथाध्यायतात्पर्यम् ।

यज्ञाद्यं वर्णधर्मोचितमपि नियतं कर्म शर्मप्रदं स्यान्न त्याज्यं कार्यमेतद्द्विगुणमपि यतोऽकर्मणः कर्म शस्तम् । जीवन्मर्त्यः कदाचित्करचरणयुतो नैव तिष्ठत्यकर्मा तस्माच्छ्रेयान् स्वधर्मो यदुपतिगदितश्चित्तशुद्ध्यै तृतीये ॥ ३ ॥

इति दैवज्ञपण्डितसूर्यविरचितायां श्रीमद्भगवद्गीताटीकायां परमार्थप्रपायां तृतीयोऽध्यायः ॥ ३ ॥

रा० टी०—एवं तारतम्यान्तगतत्वेन ज्ञेयमुक्त्वा तज्ज्ञानमाह—**एवमिति** । एवमुक्तदिशा बुद्धेर्महतोऽव्यक्ताच्च परं बुद्ध्वा आत्मानं मन आत्मना बुद्ध्या संस्तभ्य निश्चलं कृत्वा दुरासदं दुःखेनासादनीयं निवर्तनीयमिति यावत् । कामरूपं शत्रुं जहि हतं कुरु हे महाबाहो इति ॥ ४३ ॥

इति श्रीगीतार्थसंग्रहे राघवेन्द्रयतिकृते तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥ ४ ॥

श्रीभगवानुवाच—इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ॥
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

त० टी०—तृतीयाध्यायेऽमृदितकषायस्य मुमुक्षोः सहसा ज्ञानयोगेऽनधिकारात् ज्ञानवद्भ्रंशशङ्कावर्जितः कर्मयोग एव श्रेयोऽर्थः कार्यः । ज्ञानयोगाधिकारिणोऽपि फलकर्तृत्वत्यागपूर्वकं लोकसंग्रहाय कर्मैव कर्तव्यमिति निर्णीतम् । इदानीं चतुर्थेऽध्याये कर्मयोगस्यैव ज्ञानानुसंधानप्रकारं ज्ञानफलकत्वं कर्मस्वरूपं तद्भेदांश्च वक्तुं श्रेष्ठजनाधिकारिकत्वेन परंपराप्राप्तमित्युक्तकर्मयोगं प्रशंसन् श्रीभगवानुवाच—इममित्यादित्रिभिः । योऽयं कर्मयोगस्तुभ्यं मयोदितः स त्वां युद्धे प्रोत्साहनायैवाधुनिकः प्रोक्त इति न मन्तव्यं, किंतु जगद्रक्षणाय मन्वन्तरादौ जगद्यात्रानिर्वाहकाय विवस्वते सूर्याय परमश्रेयःसाधनतयेममेवाव्ययं योगमहं प्रोक्तवान् । विवस्वान्सूर्यो मनवे स्वपुत्राय सत्यव्रताय प्राह । मनुर्वैवस्वत इक्ष्वाकवे ज्येष्ठाय स्वपुत्रायाब्रवीत् ॥ १ ॥

म० टी०—यद्यपि पूर्वमुपेयत्वेन ज्ञानयोगस्तदुपायत्वेन च कर्मयोग इति द्वौ योगौ कथितौ तथाप्येकं सांख्यं च योगं च यः पश्यति स पश्यतीत्यनया दिशा साध्यसाधनयोः फलैक्यादैक्यमुपचर्य साधनभूतं कर्मयोगं साध्यभूतं च ज्ञानयोगमनेकविधगुणविधानाय स्तौति वंशकथनेन भगवान्—इममिति । इममध्या-

यद्वयेनोक्तं योगं ज्ञाननिष्ठालक्षणं कर्मनिष्ठोपायलभ्यं विवस्वते सर्वक्षत्रियवंशबीजभूतायादित्याय प्रोक्तवान् प्रकर्षेण सर्वसंदेहोच्छेदादिरूपेणोक्तवानहं भगवान् वासुदेवः सर्वजगत्परिपालकः सर्गादिकाले राज्ञां बलाधानेन तदधीनं सर्वजगत्पालयितुम् । कथमनेन बलाधानमिति विशेषणेन दर्शयति—अव्ययं अव्ययवेदमूलत्वादव्ययमोक्षफलत्वाच्च न व्येति स्वफलादित्यव्ययमव्यभिचारिफलं तथाचैतादृशेन बलाधानं शक्यमिति भावः । स च मम शिष्यो विवस्वान् मनवे वैवस्वताय स्वपुत्राय प्राह । स च मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् । यद्यपि प्रतिमन्वन्तरं स्वायंभुवमन्वादिसाधारणोयं भगवदुपदेशस्तथापि सांप्रतिकवैवस्वतमन्वन्तराभिप्रायेणादित्यमारभ्य संप्रदायो गणितः ॥ १ ॥

शं० टी०—द्वितीयाध्याये तदनन्तराध्याये च कर्मयोगैकोपायस्य ज्ञानयोगस्यैव एषा ब्राह्मी स्थितिः, इति संस्तभ्यात्मानमात्मना, इत्यादिवचनैर्मोक्षैकसाधनत्वं प्रतिपाद्याधुना तस्यैव योगस्य "एष पन्था एतत्कर्म । एतद्ब्रह्म" इत्यादिश्रुतिप्रमाणकत्वे सिद्धेऽपि सिद्धपरंपराभ्युपगतत्वेनापि प्रामाण्यं सूचयितुमिदमाह श्रीभगवान्—**इममिति** । अहं परमात्मा सृष्ट्यादौ अव्ययः अव्ययवेदैकप्रमाणत्वादव्ययः "न स पुनरावर्तते । न स पुनरावर्तते" इति श्रवणादव्ययफलहेतुत्वाद्वाऽव्ययः । सर्वत्र ब्रह्मदर्शनलक्षणयोगसाध्यस्य मोक्षस्य व्ययाऽभावाज्ज्ञानस्याव्ययफलहेतुत्वं यत्साध्यं तदनित्यमिति मोक्षस्य ज्ञानसाध्यत्वान्न नित्यत्वमिति नानुमानस्यावकाशस्तस्योक्तश्रुतिपराहतत्वात्तमव्ययं नित्यफलमित्यर्थः। इममध्यायद्वयेन प्रतिपादितं मोक्षैकप्रयोजनं योगं ज्ञानयोगं विवस्वते सूर्याय प्रोक्तवानस्मि। 'स्वयं तीर्णः परान् तारयति' इतिन्यायेन सोऽपि विवस्वान्मनवे प्राह स्वपुत्रायोक्तवान् । मनुरपि स्वपुत्रायेक्ष्वाकवेऽब्रवीदुपदिष्टवानित्यर्थः॥१॥

श्री० टी०—आविर्भावतिरोभावावाविष्कर्तुं स्वयं हरिः ॥ तत्त्वंपदविवेकार्थं कर्मयोगं प्रशंसति ॥ एवं तावदध्यायद्वयेन कर्मयोगोपायो ज्ञानयोगोपायश्च मोक्षसाधनत्वेन उक्तः । तमेव ब्रह्मार्पणादिगुणविधानेन त्वंपदार्थविवेकादिना च प्रपञ्चयिष्यन्प्रथमं तावत्परंपराप्राप्तत्वेन स्तुवन् श्रीभगवानुवाच—**इममिति त्रिभिः** । अव्ययफलत्वादव्ययमिमं योगं पुराहं विवस्वते आदित्याय कथितवान् ।स च स्वपुत्राय मनवे श्राद्धदेवाय प्राह । स च मनुः स्वपुत्रायेक्ष्वाकवेऽब्रवीत् ॥ १ ॥

स० टी०—यमाराध्यानन्तं रविमनुमुखा ब्रह्मपदवीं विदित्वा त्रैलोक्ये सुजनमणितामापुरमिताम् ॥ श्रुतीनां सिद्धान्तं प्रथितमहिमा देशिकवपुः स्वभक्तायाहेशस्तमहममलं नौमि शतशः ॥१॥ साध्यसाधनरूपौ द्वौ योगौ पूर्वमुदाहृतौ ॥ साध्यसाधनयोरैक्यं फलैक्यादौपचारिकम् ॥ २ ॥ साधनं कर्मयोगाख्यं साध्यं ज्ञानमनेकधा ॥ गुणैः स्तौति हरिर्वंशकीर्तनेनाधुना स्फुटम् ॥ ३ ॥ एतावान्सर्ववेदार्थो गीतार्थश्च विवक्षितः ॥ श्रीहरेरित्यतश्चोर्ध्वं वेदार्थं सकलं हरिः ॥ ४ ॥ समाप्तं किलमन्वानः स्तौति वेत्यवतारिका ॥ इममध्याययुग्मेन प्रोक्तं योगं विवस्वते ॥५॥ सर्वक्षितीशसद्वंशबीजभूताय भास्वते ॥ सर्गादौ प्रोक्तवान्सर्वजगतां पालको ह्यहम् ॥ ६ ॥ जगत्पालयितुं राज्ञां बलाधानाय तेन ते ॥ युक्ता योगबलेन स्युः समर्था विश्वपालने ॥ ७ ॥ अक्षयश्रुतिमूलत्वादविनाशिफलत्वतः ॥ अव्ययं स्वफलान्नैव व्येति राज्ञां बलं ह्यतः ॥ ॥ ८ ॥ आधातुं राजयोगोऽयं क्षमते विश्वपालने ॥ मम शिष्यः स वै सूर्यः श्राद्धदेवाय सूनवे ॥ ९ ॥ मनवे प्राह तं योगं ब्रह्मासौ कारणं परम् ॥ मनुर्वैवस्वतः प्राह स्वपुत्रायादिभूभुजे ॥ १० ॥ इक्ष्वाकवे स इत्थं हि योगः संस्तूयतेऽधुना ॥ प्रतिमन्वन्तरं योगोपदेशो यद्यपीशितुः ॥ ११ ॥ साधारणस्तथाप्यर्कमारभ्य हरिणाधुना ॥ वैवस्वतमनौ वर्तमाने वंशपरंपरा ॥ १२ ॥ संप्रदायविशुद्ध्यर्थं प्रोक्ता लोकहिताय च ॥ एतादृशाय शिष्याय पुत्रायानुगताय च ॥ १३ ॥ देयोऽयं राजयोगश्चेत्याशयः श्रीरमापतेः॥ १४॥१॥

भा० टी०—एवमध्यायद्वयेनोक्तस्य निष्ठाद्वयात्मकस्य वेदार्थस्य समाप्तिं मन्यमानः संप्रदायप्रदर्शनेन

तं स्तुवन् श्रीभगवानुवाच—इममिति । इममध्यायद्वयेनोक्तं योगं सांख्ययोगं कर्मयोगरूपोपायसहितं ससंन्यासमिमं संध्योपासनादिनिर्विकल्पकसमाध्यनुष्ठानान्तं कर्मयोगं ज्ञाननिष्ठोपसर्जनं पारिव्राज्यानधिकारिणां राज्ञामेव योग्यमित्यन्येषां व्याख्याने तु द्वितीयाध्यायार्थस्येदंशब्देनाग्रहणप्रसङ्गः । न चेष्टापत्तिः । अध्यायद्वयोक्तेर्थेऽप्रामाण्यशङ्का मा भूदिति विद्यावंशसंप्रदायं दर्शयति इममित्यादिनेति स्वोक्तिविरोधात् । एतेन राज्ञामेव योग्यमित्यपि प्रत्युक्तम् । अध्यायद्वयेन प्रतिपादितेऽवेदार्थेऽग्रे विस्तरेण वक्ष्यमाणे ब्राह्मणादियोग्यताभावप्रसङ्गात् । सर्गादौ विवस्वते सूर्यायाहं श्रीकृष्णः प्रोक्तवान् ब्रह्मपरिपालनसमर्थबलाधानाय ब्रह्मक्षत्रे परिपालिते सर्वं जगद्रक्षितं भवति । अव्ययमव्ययफलत्वादिदं भाष्यमुपलक्षणम्, अव्ययवेदमूलत्वात् न व्येति स्वफलादित्यव्ययमव्यभिचारि फलमित्यस्यापि यत्त्वव्ययमविच्छिन्नसंप्रदायमिति तत्तु स कालेनेह महता योगो नष्टः परंतप इतिवाक्यशेषविरोधादुपेक्ष्यम् । स च विवस्वान्मनवे श्राद्धदेवाय प्राह । स च मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् ॥ १ ॥

प० टी०—द्वितीयतृतीयाध्यायाभ्यां ज्ञानकर्मयोगौ निरूप्येदानीं ब्रह्मार्पणत्वेनैव कर्म मोक्षप्रापकं भवतीति निरूपणार्थं चतुर्थाध्यायस्य प्रवृत्तिस्तत्र वक्ष्यमाणमप्रमेयं यदुपदेशात्परंपरया बहुभिरनुष्ठितमित्याह—इममिति त्रिभिः । इमं वक्ष्यमाणं योगमव्ययमनुपक्षीणं पूर्वं विवस्वते प्रोक्तवान् । ततस्तमेव योगं विवस्वान् सूर्यो मनवे प्राह । मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

रा० टी०—पूर्वाध्याये नियतं कुरु कर्म त्वमित्यादिना किंचिद्विवृतस्य निवृत्तकर्मणस्तथा यो बुद्धेः परतस्तु सः, इत्यादिना तारतम्यान्तगत्वेनोक्तविष्णोस्तज्ज्ञानस्य च विस्तरेण निरूपणमत्राध्याये क्रियते । एवं ज्ञात्वा कृतं कर्मेत्यतः प्राक्तनग्रन्थेन बुद्धेः परस्य विष्णोर्माहात्म्यमुच्यते । श्रेयान्द्रव्यमयाद्यज्ञादित्यतः पूर्वेण निवृत्तस्य कर्मणोऽन्यस्माद्भेदः । निवृत्तकर्मण्येवोपासनायज्ञादिरूपेण भेद इत्येवं कर्मविस्तारोक्तिः शेषेण ज्ञानमाहात्म्योक्तिरिति विवेकः । मयि सर्वाणीत्युक्तनिवृत्तकर्मलक्षणज्ञानोपायानुष्ठानाननुष्ठानाभ्यां ये मे मतमित्यादिनार्थानर्थयोरुक्तया अवश्यमनुष्ठेयमित्युक्तम् । पुनस्तदनुष्ठाने रुच्युत्पादनाय पूर्वानुष्ठितश्चायं धर्म इत्याह—इममित्यादित्रयेण । अव्ययफलत्वादव्ययम् । इमं योगं मयि सर्वाणीत्यनेनोक्तं निवृत्तकर्मलक्षणं ज्ञानोपायं विवस्वते आदित्याय स च स्वपुत्राय मनवे श्राद्धदेवाय स च मनुः स्वपुत्रायेक्ष्वाकवे ॥१॥

एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

त० टी०—एवमुक्तप्रकारेण शिष्टपरंपराप्राप्तमिमं योगं राजर्षयो राजानश्च ते ऋषयश्च निमिसगरादिप्रभृतयो विधिना पित्रादिप्रोक्तं विदुः । अतोऽनादिवेदमूलत्वेनानादिरयमित्यभिप्रायः । स एव महाप्रभावोऽयं योगः महता कालेनाधिकारिबुद्धिमान्द्याद्विच्छिन्नसंप्रदायतयेह लोके नष्टोऽदर्शनं यातः ॥ २ ॥

म० टी०—एवमादित्यमारभ्य गुरुशिष्यपरंपरया प्राप्तमिमं योगं राजानश्च ते ऋषयश्चेति राजर्षयः प्रभुत्वे सति सूक्ष्मार्थनिरीक्षणक्षमा निमिप्रमुखाः स्वपित्रादिप्रोक्तं विदुस्तस्मादनादिवेदमूलत्वेनानन्तफलत्वेनानादिगुरुशिष्यपरम्पराप्राप्तत्वेन च कृत्रिमत्वशङ्कानास्पदत्वान्महाप्रभावोऽयं योग इति श्रद्धातिशयाय स्तूयते। स एवं महाप्रयोजनोऽपि योगः कालेन महता दीर्घेण धर्मह्रासकरेण इह इदानीमावयोर्व्यवहारकाले द्वापरान्ते दुर्बलानजितेन्द्रियाननधिकारिणः प्राप्य कामक्रोधादिभिरभिभूयमानो नष्टो विच्छिन्नसंप्रदायो जातः, तं विना पुरुषार्थाप्राप्तेः अहो दौर्भाग्यं लोकस्येति शोचति भगवान् । हे परन्तप परं कामक्रोधा-

दिरूपं शत्रुगणं शौर्येण बलवता विवेकेन तपसा च भानुरिव तापयतीति परन्तपः शत्रुतापनो जितेन्द्रिय इत्यर्थः । उर्वश्युपेक्षणाद्यद्भुतकर्मदर्शनात् । तस्मात् त्वं जितेन्द्रियत्वादत्राधिकारीति सूचयति ॥ २ ॥

शं० टी०—स्वप्रोक्तज्ञानयोगस्य विशिष्टजनपरिगृहीतत्वमेव विस्पष्टयति—**एवमिति** । ब्रह्मनिष्ठया परं शत्रुं कामक्रोधादिलक्षणं तापयति विनाशयतीति परन्तपेति संबुद्धिः । एवमुक्तरीत्या विवस्वदादिविशिष्ट-जनपरम्पराप्राप्तं ज्ञानयोगमिममर्वाचीना राजर्षयो जनकादयो विदुरेवमेव विदुरिति वा राजानश्चते ऋषयश्च राजर्षय इदं ब्राह्मणादीनामुपलक्षणं राजानश्च ऋषयश्च विदुरिति वा । ननु राजभिर्ऋषिभिर्महापुरुषैः परि-गृहीतत्वे सर्वत्र प्रसिद्धत्वात्किं त्वयोपादिश्यत इत्यत आह—**स इति** । पूर्वं विवस्वदादिषु मया प्रवर्तितो यो योगः स इदानीं महता कालेन कालदेशविपर्यासेन प्रवर्त्यप्रवर्तकजनाभावादिहास्मिंल्लोके नष्टः संप्रदायवि-च्छित्तिं प्राप्त इत्यर्थः ॥ २ ॥

श्री० टी०—**एवमिति** । राजानश्च ते ऋषयश्चान्येऽपि राजर्षयो निमिप्रमुखाः स्वपुत्रादिभिरिक्ष्वाकु-प्रमुखैः प्रोक्तमिमं योगं विदुर्जानन्ति स्म । अद्यतनानामज्ञाने कारणमाह—हे परंतप शत्रुतापन स योगः काल-वशादिह लोके नष्टो विच्छिन्नः ॥ २ ॥

स० टी०—एवमादित्यमारभ्य गुरुशिष्यपरंपरा ॥ तया प्राप्तमिमं योगं राजान ऋषयश्च ते ॥ १ ॥ प्रभुत्वे सति सूक्ष्मार्थनिरीक्षणक्षमा नृपाः ॥ विदुर्निम्यादयः पूर्वे स्वपित्राद्युक्तमादरात् ॥ २ ॥ अनादिवेद-मूलत्वादनन्तफलभावतः ॥ अनादिसंप्रदायत्वाद्योगोऽयं स्तूयते महान् ॥ ३ ॥ एवं महाफलो योगो धर्म-ह्रासकरेण सः ॥ नष्टो दीर्घेण कालेन द्वापरान्तेऽधुना क्षितौ ॥ ४ ॥ दुर्बलान्प्राप्य भोगादौ तत्परानजि-तेन्द्रियान् ॥ कामाद्यैरभिभूतः सन् विच्छिन्नः संप्रदायतः ॥ ५ ॥ क्रोधादिशत्रुसंघं यः शौर्येण स्वविवे:कतः ॥ तापयत्यर्कवत्सत्वमधिकारी जितेन्द्रियः ॥ ६ ॥ स्वर्लोकेऽप्युर्वशीत्यागितया सम्यक्परीक्षितः ॥ परे विपक्षभूतास्तान् शौर्यतेजोगभस्तिभिः ॥ ७ ॥ तापयत्यर्कवद्यायं प्रोक्तस्त्वं हि परंतपः ॥ ८ ॥ २ ॥

भा० टी०—एवं क्षत्रियपरंपरया प्राप्तमागतमिमं योगं राजानश्च ते ऋषयश्च प्रभुत्वे साति सूक्ष्मार्थदर्श-नसमर्थाः निमिप्रभृतयो विदुः । यत्तु जनकाजातशत्रुकैकयप्रभृतयो राजानः ऋषयश्च सनकवसिष्ठाद्याः सूक्ष्मार्थदर्शिन इति पक्षान्तरप्रदर्शनं तदरुचिग्रस्तं तद्बीजं तु अभ्यर्हितस्य पूर्वनिपातादि । स योगो महता कालेनेहलोके नष्टः संप्रदायविच्छेदेनादर्शनं गतः । परान् शत्रून्कामादीन् तापयतीति परंतपः, दुर्बलानजिते-न्द्रियान् प्राप्य नष्टं योगं मत्त उपलभ्य जितेन्द्रियस्त्वं पुनर्लोके स्थापयेति सूचयन् संबोधयति—परंतपेति॥२॥

प० टी०—**एवमिति** । एवमिक्ष्वाकोः सूर्यवंशप्रधानीभूताद्राज्ञः सकाशात्परंपरया प्राप्तं राजर्षयो राजान ऋषयश्च विदुर्ज्ञातवन्तः । श्रुतिरपि—"तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" इति ॥ २ ॥

रा० टी०—राजानश्च ऋषयश्चेति वा राजर्षयो राजश्रेष्ठाः निमिप्रभृतयः स्वपित्रिक्ष्वाकुप्रभृतिभिर्विदुरिति वा । अत्र प्रवचनवेदनशब्दैः विवस्वदादीनामनुष्ठानमप्युपलक्ष्यम् । अद्यतनानामज्ञाने कारणमाह—**स इति** । हे परन्तप शत्रुतापन स च योगः महता कालेन इह लोके नष्ट अदर्शनं गतः ॥ २ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

त० टी०—यः पुरा विवस्वते प्रोक्तः स एवायं पुरातनो योगो मयाऽद्य ते तुभ्यं प्रोक्तः । यतस्त्वं मे भक्तः सखा चासि अत एवोक्तः, नान्यस्मै प्रोक्त इत्यर्थः । अन्यस्मै कुतो नोक्तोऽत आह-हि यतः एतज्ज्ञानमुत्तमं रहस्यम्, अनधिकारिणो गोपनीयमित्यर्थः ॥ ३ ॥

म० टी०—स एवेति । य एवं पूर्वमुपदिष्टोप्यधिकार्यभावाद्विच्छिन्नसंप्रदायोऽभूद् यं विना च पुरुषार्थो न लभ्यते स एवायं पुरातनोऽनादिगुरुपरंपरागतो योगोऽद्य संप्रदायविच्छेदकाले मयाऽतिस्निग्धेन त तुभ्यं प्रकर्षेणोक्तः । न त्वन्यस्मै कस्मैचित् । कस्मात् भक्तोसि मे सखा चेति । इतिशब्दो हेतौ । यस्मात्त्वं मम भक्तः शरणागतत्वे सत्यत्यन्तप्रीतिमान् सखा च समानवयाः स्निग्धसहायोऽसि सर्वदा भवसि अतस्तुभ्यमुक्त इत्यर्थः । अन्यस्मै कुतो नोच्यते तत्राह—हि यस्मादेतज्ज्ञानमुत्तमं रहस्यमतिगोप्यम् ॥ ३ ॥

शं० टी०—विनष्टसंप्रदायः स योगः किमर्थं पुनरिदानीं त्वया प्रवर्तित इत्याकाङ्क्षायां कूटस्थासङ्गचिद्रूप एवात्मन्यविक्रियेऽविषयेऽनात्मतद्धर्मकर्माण्यध्यस्य कर्ताहं भोक्ताहं सुखी दुःखीति मोमुह्यमानं दोधूयमानं लोकमिममालोक्य कृपया तं संसारसागरादुद्दिधीर्षया मया त्वां निमित्तीकृत्य प्रवर्तित इत्याशयेनाह—**स एवायमिति ।** पूर्वं विवस्वते संप्रदायप्रवृत्तये पुरातनः अनादिश्रुतिमूलकत्वात्सनातनो यो योगः प्रोक्तः संसारध्वान्तविध्वंसकः स एवायं योगो मयाऽद्य कर्तृत्वभोक्तृत्वभ्रमेण मुह्यमानाय ते तुभ्यं प्रोक्तो बुद्धिमोहविच्छित्तये उपदिष्ट इत्यर्थः । अर्जुनस्य ज्ञानोपदेशयोग्यतां दर्शयति—**भक्त इत्यादिना ।** 'यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः' इति शिवकेशवयोरभेदश्रवणाच्छिवरूपं मामेव बहिरन्तरमायया श्रद्धया भजस्यतो मे भक्तोसि सदा मद्भजनशीलोऽसि सखा चासि सखा स्निग्धः सख्युः स्मरणश्रवणादिभिर्द्रवीभूयमानचित्तः स्निग्धश्चासि । ममायं भक्तः स्निग्धश्चेतिहेतोरेव स योगस्त उपदिष्ट इत्यर्थः । किमेवं पात्रपरिशीलनं योगोपदेशायेत्यत आह—रहस्यमिति । हि यस्मादेतज्ज्ञानशास्त्रं रहस्यं गोप्यं यस्मै कस्मैचित्पृष्टवते वक्तुमयोग्यम् । तत्कुत इत्यत आह—उत्तममिति । उत्तमं सर्वोत्तमं परं ब्रह्म तत्प्राप्तिहेतुत्वादुत्तमसाधनं मुक्तेरत एव रहस्यमत एव न कस्मैचिद्वक्तव्यमित्यर्थः ॥ ३ ॥

श्री० टी०—स एवायमिति । स एवायं योगोऽद्य विच्छिन्ने संप्रदाये सति पुनश्च मया ते तुभ्यमुक्तः यतस्त्वं मम भक्तोऽसि सखा चेति । अन्यस्मै मया नोच्यते हि यस्मादिदमुत्तमं रहस्यम् ॥ ३ ॥

स० टी०—स एवायं पराचीनस्तुभ्यं स्नेहवशान्मया ॥ प्रोक्तो यतस्त्वं मद्भक्तो मामेव शरणं गतः ॥ १ ॥ सखा स्निग्धः सहायोऽसि ततस्तुभ्यमनुत्तमम् ॥ गोपनीयमिदं ज्ञानं प्रोक्तमत्यद्भुतोपमम् ॥ २ ॥ मायातीतोऽप्यसङ्गो विमलमतिमतां भावगम्योऽप्यगम्यो यः संकल्पेन लोकान् विरचयति विभुर्ब्रह्मरुद्रादिनेतॄन् ॥ यस्तिष्ठन्स्वे महिम्नि स्वपदरतधियां भक्तिविद्यादिसिद्ध्यै स्वात्मानं नित्यशुद्धं वपुरिव सृजति श्रीपतिं तं श्रयेऽहम् ॥ ३ ॥ ॥ ३ ॥

भा० टी०—स एवेति । स आदित्यं प्रत्युक्त एव पुरातनोऽयमध्यायद्वयनिरूपितस्ते तुभ्यं मया प्रोक्तो भक्तोऽसि मे सखा चासीतिहेतोः।नन्वन्यस्मै कुतो नोच्यत इत्यत आह—रहस्यं गुह्यं हि यस्मादेतज्ज्ञानमुत्तमम्॥३॥

प० टी०—स एवेति । स एवायं पुरातनयोगो महता कालेन नष्ट उज्झितोऽभूत्सोऽयं योग इति कारणान्मया तेऽद्य प्रोक्तो वक्तुमुपक्रान्तः । इतीति किं यतस्त्वं मद्भक्तः सन् सखा भवसि सखित्वलक्षणा भक्तिस्त्वयि वर्तत इत्यर्थः । अथान्यत्रास्यानिर्वाच्यत्वमाह—किंभूतो योगः, उत्तमं रहस्यमेकान्तवेद्यमित्यर्थः ॥ ३ ॥

रा० टी०—कुतः प्रोक्त इत्यत उक्तम्—**भक्तोसीत्यादि ।** हिशब्दो हेतौ । भक्तत्वादिहेतुना हि यतस्ते प्रोक्तोऽत एवद्रहस्यम् उत्तमं चेति । हि यतो रहस्यम् उत्तमं चातो भक्तत्वात्ते प्रोक्त अवश्यानुष्ठानायेति वा । कर्मणैव हि संसिद्धिमित्यत्र गृहस्थधर्मस्त्वया न त्याज्य इत्यत्र जनकादिज्ञान्याचार उक्तः, अत्र तु निवृत्तकर्मानुष्ठाने महदाचारः प्रमाणत्वेनोच्यत इति न तेन गतार्थत्वं शङ्क्यम् ॥ ३ ॥

अर्जुन उवाच—अपरं भवतो जन्म परं जन्म विवस्वतः ॥
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

त० टी०—इमं विवस्वते योगं प्रोक्तवानहमिति भगवतो वचः सर्वेश्वरत्वेन (सर्वकारणत्वेन) प्रकृतिकालकर्मादिनियन्तृत्वेनावस्थितस्य परस्य ब्रह्मणः स्वेच्छया वसुदेवगृहेऽवतीर्णस्य जीवेष्वसंभाविताश्चर्यरूपानेकचरितैर्ज्ञातानुभावोऽर्जुनः संभावितं जानन्नपि अनादिपापवासनादूषितमतीनां भगवति वासुदेवे विपरीतभावनावतां तत्रेतरसजातीयजन्मकर्मबुद्धिमपाकरणाय भगवज्जन्मकर्मयाथात्म्यं भगवन्मुखेनैव निर्णाययितुमुक्तमसंभावितमिव मन्वानोऽर्जुन उवाच—अपरमिति । अपरमर्वाचीनमस्मज्जन्मसमकालं वसुदेवगृहे भवतो जन्म प्रसिद्धं, परं प्राक्कालिकं मन्वादौ विवस्वतो जन्म, तस्मात्तवार्वाचीनत्वान्मनुष्यत्वाच्च प्राचीनाय देवाय विवस्वते त्वमादौ प्रोक्तवानेतत्कथमहं विजानीयां कथं संभावयेयमित्यर्थः ॥ ४ ॥

म० टी०—या भगवति वासुदेवे मनुष्यत्वेनासर्वज्ञत्वानित्यत्वाशङ्का मूर्खाणां तामपनेतुमनुवदन्नर्जुन आशङ्कते-अपरमिति। अपरमल्पकालीनमिदानींतनं वसुदेवगृहे भवतो जन्म शरीरग्रहणं विहीनं च मनुष्यत्वात् । परं बहुकालीनं सर्गादिभवमुत्कृष्टं च देवत्वाद् विवस्वतो जन्म। अत्रात्मनो जन्माभावस्य प्राग्व्युत्पादितत्वाद्देहाभिप्रायेणैवार्जुनस्य प्रश्नः । अतः कथमेतद्विजानीयामतिविरुद्धार्थतया । एतच्छब्दार्थमेव विवृणोति—त्वमादौ प्रोक्तवानिति । त्वमिदानीन्तनो मनुष्योऽसर्वज्ञः सर्गादौ पूर्वतनाय सर्वज्ञायादित्याय प्रोक्तवानिति विरुद्धार्थमेतादिति भावः । अत्रायं निर्गलितोर्थः। एतद्देहावच्छिन्नस्य तव देहान्तरावच्छेदेन वा आदित्यं प्रत्युपदेष्टृत्वं एतद्देहेन वा । नाद्यः जन्मान्तरानुभूतस्यासर्वज्ञेन स्मर्तुमशक्यत्वात्। अन्यथा ममापि जन्मान्तरानुभूतस्मरणप्रसङ्गः, तव मम च मनुष्यत्वेनासर्वज्ञत्वाविशेषात् । तदुक्तमभियुक्तैः 'जन्मान्तरानुभूतं च न स्मर्यते' इति । नापि द्वितीयः सर्गादाविदानीन्तनस्य देहस्यासद्भावात् । तदेवं देहान्तरेण सर्गादौ सद्भावसंभवेपिदानीन्तनस्मरणानुपपत्तिः । अनेन देहेन स्मरणोपपत्तावपि सर्गादौ सद्भावानुपपत्तिरित्यसर्वज्ञत्वानित्यत्वाभ्यां द्वावर्जुनस्य पूर्वपक्षौ ॥ ४ ॥

शं० टी०—राजसाधारणोऽयं कृष्णः, वसुदेवपुत्रत्वादनेनोक्तमिदं शास्त्रमप्रमाणमित्यत्र गीतायां सर्वेषामविश्वासः स्यात्तद्व्युदासुर्भगवत ईश्वरत्वे विज्ञाते श्रद्धाभक्तिभ्यां प्रवृत्तिः संपद्येत तया सर्वे कृतार्थाः स्युरिति श्रीकृष्णस्य परमेश्वरत्वं तन्मुखेनैव प्रथयितव्यमित्याशयेनार्जुन उवाच—अपरामिति । श्रीकृष्णाभिधानस्य भवतो जन्मापरमर्वाचीनं वसुदेवगृहे त्वदुत्पत्तेर्दृष्टत्वात् ।विवस्वतः सर्वजगत्प्रकाशकं तेजोऽस्यास्तीति विवस्वान् सूर्यस्तस्य तु जन्म परं प्राचीनं सृष्ट्यादौ "चक्षोः सूर्यो अजायत"इति श्रवणात्। एवमुभयोर्जन्मव्यत्यासे सति त्वमादौ विवस्वत इमं योगं प्रोक्तवानित्येतद्वचनं सत्यमित्यहं कथं विजानीयामन्यो वा विजानीयात् 'एष वन्ध्यासुतो याति' इतिवाक्य इवास्मिन् वाक्ये त्वदुक्तशास्त्रे च सर्वेषामविश्वास एवोदेतीत्यर्थः ॥४॥

श्री० टी०—भगवतो विवस्वन्तं प्रति योगोपदेशासंभवं पश्यन्नर्जुन उवाच—अपरमिति । अपरमर्वाचीनं तव जन्म, परं प्राक्कालीनं विवस्वतो जन्म तस्मात्तवाधुनिकत्वाच्चिरन्तनाय विवस्वते त्वमादौ योगं प्रोक्तवानित्येतत्कथमहं विजानीयां ज्ञातुं शक्नुयाम् ॥ ४ ॥

स० टी०—वासुदेवे भगवति मूढानामविचारिणाम् ॥ मनुष्यत्वेन जन्मादिशङ्का या तां स चार्जुनः ॥ १ ॥ अपनेतुमनूद्यैवमुवाच श्रीपतिं प्रति ॥ वसुदेवगृहे जन्म भवतश्चाधुनातनम् ॥ २ ॥ सर्गादौ बहुकालीनं जन्मादित्यस्य च श्रुतम् ॥ कथमेतद्विजानीयामविरुद्धार्थभावतः ॥ ३ ॥ त्वमिदानींतनस्तस्मै सर्गादौ प्रोक्तवानिति ॥ ४ ॥ ४ ॥

भा० टी०—भगवति वासुदेवे मनुष्यवत् स्थिते याऽनीश्वरत्वासर्वज्ञत्वशङ्का मूर्खाणां तत्परिहाराय चोद्यमिव कुर्वन्नर्जुन उवाच—अपरमिति। भवतो जन्मापरमर्वाचीनं वसुदेवगृहे, विवस्वतो जन्म परं पूर्वं सर्गादौ

तत्तस्मादेतज्ज्ञानं त्वमेवादौ प्रोक्तवानिति कथं विजानीयाम्। यत्तु अपरमतिहीनं च मनुष्यत्वात् परमुत्कृष्टं च देवत्वात्, इति तत्तु त्वमादौ प्रोक्तवानिति वाक्यशेषविरोधादुपेक्ष्यं भाष्यस्योपलक्षणपरत्वेन तदविरोधेन वा ग्राह्यम्। आदित्यं प्रत्युपदेष्टा सर्वज्ञ ईश्वरस्त्वं तु तदन्यत्वादनीश्वरः, तत एवासर्वज्ञश्चेत्येवं तस्माद्विरुद्धमिदमहमादौ प्रोक्तवानिति ॥ ४ ॥

प० टी०—अथ संदिहानोऽर्जुनः पृच्छति—**अपरमिति**। भवतस्तव जन्मापरमाधुनिकं तथा विवस्वतः सूर्यस्य जन्म परं प्राचीनम्, एवं सत्यादौ त्वं प्रोक्तवानिति कथं विजानीयाम् ॥ ४ ॥

रा० टी०—मयि सर्वाणीत्यत्र हरेः पूज्यत्वमर्जुनस्य पूजकत्वमित्युक्तम्। तथा तस्यैव स्वतन्त्रकर्तृत्वमन्यस्य तदधीनकर्तृत्वमुक्तम्। एवं च पूज्यपूजकत्वादिना तत्राभिप्रेतं जीवेश्वरभेदं प्रमाणेन ज्ञातुं पृच्छति—**अपरमित्यादिना**। एवं च न त्वेवाहमित्यादिना सर्वप्रकारेणोत्पत्तिनाशराहित्यं भगवतः श्रुतवान्कथमेवमपरं पश्चात्तनं भवतो जन्मेति पृच्छतीति चोद्यानवकाशः ॥ ४ ॥

श्रीभगवानुवाच—बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

त० टी०—अर्जुनाभिप्रायज्ञ उक्तसंदेहनिरासाय श्रीभगवानुवाच—**बहूनीति**। मे मम जन्मानि देहेनाविर्भावरूपाणि बहूनि व्यतीतानि अभूवन्। तव च चकारादन्येषामपि जीवानाम्, हे अर्जुन! तानि आत्मनोऽन्येषां च सर्वाणि जन्मानि अहं सर्वज्ञो वेद जानामि, अनावृतज्ञानत्वात्। न त्वं वेत्थ आत्मनोऽपि, कुतोऽन्येषामावृतज्ञानत्वात् ॥ ५ ॥

म० टी०—**बहूनीति**। तत्र सर्वज्ञत्वेन प्रथमस्य परिहारं जन्मानि लीलादेहग्रहणानि लोकदृष्ट्यभिप्रायेणादित्यस्योदयवन्मे मम बहूनि व्यतीतानि तव चाज्ञानिनः कर्मार्जितानि देहग्रहणानि। तव चेत्युपलक्षणमितरेषामपि जीवानां जीवैक्याभिप्रायेण वा। हे अर्जुन! श्लेषेण अर्जुनवृक्षनाम्ना संबोधयन्नावृतज्ञानत्वं सूचयति। तानि जन्मान्यहं सर्वज्ञः सर्वशक्तिरीश्वरो वेद जानामि सर्वाणि मदीयानि त्वदीयान्यन्यदीयानि च न त्वमज्ञो जीवस्तिरोभूतज्ञानशक्तिर्वेत्थ न जानासि स्वीयान्यपि किं पुनः परकीयाणि, हे परन्तप परं शत्रुं भेददृष्ट्या परिकल्प्य हन्तुं प्रवृत्तोऽसीति विपरीतदर्शित्वाद्भ्रान्तोऽसीति सूचयति। तदनेन संबोधनद्वयेनावरणविक्षेपौ द्वावप्यज्ञानधर्मौ दर्शितौ ॥ ५ ॥

शं० टी०—इदं मम मायाविलासवैभवमेव सत्यमिति जानतां केवलमूढानामेवं प्रत्ययो न तु मत्तत्त्वं विदितवतां पण्डितानां तेषामस्त्येव मयीश्वरत्वभावना श्रद्धा भक्तिश्च मदुक्तौ च प्रमाणताबुद्धिः। अहं तु स्वयमजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावस्तथापि तस्यैतस्य स्वमहिम्ना सिद्धनित्यज्ञानैश्वर्यशक्तिबलवीर्यतेजःसंपन्नस्य लोकनिग्रहानुग्रहचिकीर्षोर्ममैवमेव बहूनि जन्मानि सन्तीत्याह—**बहूनीति**। मे ममाप्रमेयस्वभावस्यानन्तशक्तेः परमेश्वरस्य देवतिर्यङ्मनुष्येषु जन्मानि व्यतीतान्यतिक्रान्तानि बहून्यसंख्यानि सन्ति तव चान्येषां च भूतानां तानि गतानि जन्मानि सर्वाण्यहं वेद वेद्मि "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इति श्रवणादप्रतिहतविज्ञानशक्तित्वादतीतानागतवर्तमानार्थं सर्वं विजानामीत्यर्थः। त्वं तु तानि जन्मानि न वेत्थ पापपुण्यरागद्वेषादिदोषैस्तिरोभूतज्ञानशक्तित्वादतीतानागतवर्तमानं न किंचिज्जानासीत्यर्थः ॥ ५ ॥

श्री० टी०—इति पृष्टवन्तमर्जुनं रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरं श्रीभगवानुवाच—**बहूनीति**। मम बहूनि जन्मानि तव च व्यतीतानि तानि सर्वाण्यहं वेद जानामि अलुप्तविद्याशक्तित्वात्। त्वं तु न वेत्थ न जानासि अविद्यावृतत्वात् ॥ ५ ॥

स० टी०—शङ्कां परिहरन्नाह सर्वज्ञः सर्वशक्तिमान् ॥ अतिक्रान्तानि जन्मानि स्वेच्छोपात्तवपूंषि मे॥ १॥ बहूनि परमेशस्य वासुदेवस्य सद्विभोः ॥ तव चाज्ञानिनः कर्मनिर्मितानि तथार्जुन ॥ २ ॥ अर्जुनेतितरोनाम्ना सूचयत्यावृतां मतिम् ॥ तानि जन्मानि सर्वाणि सर्वज्ञोऽहं महेश्वरः ॥ ३ ॥ विजानामि त्वदीयानि मदीयानीत्यलुप्तदृक् ॥ न त्वं वेत्थ तिरोभूतज्ञानशक्तितयाज्ञकः ॥ ४ ॥ भेददृष्टया परं शत्रुं परिकल्प्य त्वमुद्यतः ॥ हन्तुं विपर्ययज्ञानवत्त्वादित्याशयो हरेः ॥ ५ ॥ ५ ॥

भा० टी०—मूर्खाणां शङ्का परिहरन् श्रीभगवानुवाच-**बहूनीति** । बहूनि मे तवान्यस्य च जन्मानि व्यतीतानि तानि सर्वाण्यहं शुद्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तिर्वेद जानामि त्वं तु न वेत्थ धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वान्न जानासि, इत्येतत्सूचनार्थमेव संबोधनद्वयम्, हे अर्जुन शुद्धधर्मवत्त्वाच्छुद्ध हे परंतप परमात्मानमन्यान्वा अधर्मेण तापयतीति तथेतिविवक्षणात् ॥ ५ ॥

प० टी०—तत्र भगवानाह—**बहूनीति** । मम तव जन्मानि च बहूनि व्यतीतानि व्यतिक्रान्तानि । तर्हि को विशेष इत्याह—**तानीति** । तानि सर्वाणि जन्मान्यहं वेद त्वं च न वेत्थ न ज्ञातवान् । अयमर्थः । ममेश्वरस्य जन्म स्वेच्छाविर्भावमात्रम्, अत एवालुप्तज्ञानशक्तित्वात्सर्वाणि वेद्मि, तव जीवस्य तु कर्मवशाद्देहधारिणो लुप्तज्ञानशक्तित्वान्न प्राक्तनजन्मज्ञानम् ॥ ५ ॥

रा० टी०—अत एव विदितप्रश्नाभिप्रायो भगवान् तव चेति न त्वं वेत्थेति पराक्त्वाज्ञत्वयोरुक्तिं कृतवान् । अन्यथा बहूनि मे व्यतीतानि जन्मानीत्येतावता प्रश्नपरिहारात्तव चेत्याद्युक्तिर्व्यर्था स्यादिति ज्ञेयम् ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥

त० टी०—तव जन्मन्यपि ज्ञानावरणं नास्ति चेत्तर्हि कथं जन्मेत्यपेक्षायामाह—**अज इति** । अजोऽपि सन् जीववत्कर्मनिमित्तजन्माऽपूर्वदेहग्रहणं तद्रहितोऽपि सन्, अव्ययात्मा पूर्वदेहवियोगरहितोऽपि सन्, भूतानां सर्वेषां प्राणिनामीश्वरो नियन्ताऽपि सन्, स्वां प्रकृतिं स्वभावमसङ्गत्वाजेयत्वानतिक्रमणीयत्वावार्यत्वादि स्वं स्वभावमधिष्ठाय आत्ममायया मीयते कार्यमनयेति माया ज्ञानं संकल्पो वा "माया वयुनं ज्ञानम्" इति निघण्टुकोशात् । तथाच प्रकृतिं स्वामधिष्ठाय स्वस्वभावमपरित्यज्यात्मसंकल्पेन संभवामि सम्यक् लोकहितं कुर्वन्नाविर्भवामि । "अजायमानो बहुधा व्यजायत" इति श्रुतिरप्याह । तथा भगवद्विग्रहप्रकारोऽपि श्रुतिनिर्णीत एव । "आनन्दरूपममृतं यद्विभाति, आदित्यवर्णं तमसः परस्तात्, हिरण्यकेशः हिरण्यश्मश्रुः आप्रणखात्सुवर्णः यदात्मको भगवांस्तदात्मिका व्यक्तिः । किमात्मको भगवान् ? ज्ञानात्मक ऐश्वर्यात्मकः तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" इत्यादिश्रुतिभ्यो ज्ञेयः । एवं च सर्वज्ञः सर्वशक्तिः सर्वेश्वरोऽजहत्स्वरूपगुणशक्तिरेव सच्चित्प्रकाशानन्दविग्रहेण स्वसंकल्पेनैवाविर्भवामीति न मेऽसंभावितोक्तिरिति भावः । केचित्तु प्रकृतिं स्वामधिष्ठाय मम वैष्णवीं त्रिगुणात्मिकां यस्या वशे सर्वं जगद्वर्तते तया मोहितः सन्स्वमात्मानं वासुदेवं न जानाति । तां प्रकृतिं स्वात्ममायामधिष्ठाय वशीकृत्य संभवामि देहवानिव जात इव आत्मनो मायया न परमार्थतः, लोकवदिति व्याख्यायन्ते तदुक्तश्रुतिविरुद्धत्वात् 'जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः' इति भक्ष्यमाणभगवद्वाक्यविरोधाच्चोपेक्षणीयं, त्रिगुणात्मिकमायाकृतजन्मकर्मणोर्दिव्यत्वासंभवात् । किंच वगवद्विग्रहस्य त्रिगुणमायिकत्वाङ्गीकारे भौतिकत्वं मिथ्यात्वं चाप्यङ्गीकृतं स्यात् । तथात्वे दोष उक्तो

बृहद्वैष्णवे " यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिष्कार्यः श्रौतस्मार्तविधानतः ॥ मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत् " । महाभारतेऽपि " न भूतसंघसंस्थानो देहोऽस्य परमात्मनः " इति । श्रीभागवतेऽपि " अस्यापि देववपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि " इति । तस्माच्छ्रुतिस्मृतीतिहासपुराणाविरोधायास्मदुक्तार्थ एवास्तिकैरङ्गीकार्य इत्यलं विस्तरेण ॥ ६ ॥

म० टी०—नन्वतीतानेकजन्मवत्त्वमात्मनः स्मरसि चेतर्हि जातिस्मरो जीवस्त्वं, परजन्मज्ञानमपि योगिनः सार्वात्म्याभिमानेन 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति न्यायेन संभवति । तथाचाह वामदेवो जीवोपि " अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्रः" इत्यादिदाशतय्याम् । अत एव न मुख्यः सर्वज्ञस्त्वं तथाच कथमादित्यं सर्वज्ञमुपदिष्टवानस्यनीश्वरः सन् । न हि जीवस्य मुख्यं सार्वज्ञ्यं संभवति व्यष्ट्युपाधेः परिच्छिन्नत्वेन सर्वसंबन्धित्वाभावात् । समष्ट्युपाधेरपि विराजः स्थूलभूतोपाधित्वेन सूक्ष्मभूतपरिणामविषयं मायापरिणामविषयं च ज्ञानं न संभवति । एवं सूक्ष्मभूतोपाधेरपि हिरण्यगर्भस्य तत्कारणमायापरिणामाकाशादिसर्गक्रमादिविषयज्ञानाभावः सिद्ध एव । तस्मादीश्वर एव कारणोपाधित्वादतीतानागतवर्तमानसर्वार्थविषयज्ञानवान्मुख्यः सर्वज्ञः । अतीतानागतवर्तमानविषयं मायावृत्तित्रयमेकैव वा सर्वविषया मायावृत्तिरित्यन्यत् । तस्य च नित्येश्वरस्य सर्वज्ञस्य धर्माधर्माद्यभावेन जन्मैवानुपपन्नमतीतानेकजन्मवत्त्वं तु दूरोत्सारितमेव । तथा च जीवत्वे सार्वज्ञ्यानुपपत्तिरीश्वरत्वे च देहग्रहणानुपपत्तिरिति शङ्काद्वयं परिहरन्ननित्यत्वपक्षस्यापि परिहारमाह—अपूर्वदेहेन्द्रियादिग्रहणं जन्म । पूर्वगृहीतदेहेन्द्रियादिवियोगो व्ययः । यदुभयं तार्किकैः प्रेत्यभाव इत्युच्यते । तदुक्तम् 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' इति तदुभयं च धर्माधर्मवशाद्भवति । धर्माधर्मवशत्वं चाज्ञस्य जीवस्य देहाभिमानिनः कर्माधिकारित्वाद्भवति तत्र यदुच्यते सर्वज्ञस्येश्वरस्य सर्वकारणस्येदृग्देहग्रहणं नोपपद्यत इति तत्तथैव । कथं यदि तस्य शरीरं स्थूलभूतकार्यं स्यात्तदा व्यष्टिरूपत्वे जाग्रदवस्थाऽस्मदादितुल्यत्वं समष्टिरूपत्वे च विराट्जीवत्वं तस्य तदुपाधित्वात् । अथ सूक्ष्मभूतकार्यं तदा व्यष्टिरूपत्वे स्वप्नावस्थाऽस्मदादितुल्यत्वं समष्टिरूपत्वे च हिरण्यगर्भजीवत्वं तस्य तदुपाधित्वात् । तथाच भौतिकं शरीरं जीवानाविष्टं परमेश्वरस्य न संभवत्येवेति सिद्धम् । नच जीवाविष्ट एतादृशे शरीरे तस्य भूतावेशवत्प्रवेश इति वाच्यम्, तच्छरीरावच्छेदेन तज्जीवस्य भोगाभ्युपगमेऽन्तर्यामिरूपेण सर्वशरीरप्रवेशस्य विद्यमानत्वेन शरीरविशेषाभ्युपगमवैयर्थ्यात् । भोगाभावे च जीवशरीरत्वानुपपत्तेः । अतो न भौतिकं शरीरमीश्वरस्येति पूर्वार्धेनाङ्गीकरोति—**अजोपि सन्निति** । अजोपि सन्नित्यपूर्वदेहग्रहणम् । अव्ययात्मापि सन्निति पूर्वदेहविच्छेदं भूतानां भवनधर्माणां सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानामीश्वरोपि सन्निति धर्माधर्मवशत्वं निवारयति । कथं तर्हि देहग्रहणमित्युत्तरार्धेनाह—**प्रकृतिमिति** । प्रकृतिं मायाख्यां विचित्रानेकशक्तिमघटमानघटनापटीयसीं स्वां स्वोपाधिभूतामधिष्ठाय चिदाभासेन वशीकृत्य संभवामि तत्परिणामविशेषैरेव देहवानिव जात इव च भवामि । अनादिमायैव मदुपाधिभूता यावत्कालस्थायित्वेन च नित्या जगत्कारणत्वसंपादिका मदिच्छयैव प्रवर्तमाना विशुद्धसत्त्वमयत्वेन मम मूर्तिस्तद्विशिष्टस्य चाजत्वमव्ययत्वमीश्वरत्वं चोपपन्नमतोऽनेन नित्येनैव देहेन विवस्वन्तं च त्वां च प्रति इमं योगमुपदिष्टवानहमित्युपपन्नम् । तथाच श्रुतिः " आकाशशरीरं ब्रह्म " इति । आकाशोऽत्राव्याकृतम् । "आकाश एव तदोतं च प्रोतं च" इत्यादौ तथा दर्शनात् 'आकाशस्तल्लिङ्गात्' इति न्यायाच्च । तर्हि भौतिकविग्रहाभावात्तद्धर्ममनुष्यत्वादिप्रतीतिः कथमिति चेत् तत्राह—**आत्ममाययेति** । मन्माययैव मयि मनुष्यत्वादिप्रतीतिर्लोकानुग्रहाय न वस्तुवृत्त्येति भावः । तथा चोक्तं मोक्षधर्मे 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि' इति सर्वभूतगुणै-

र्युक्तं कारणोपाधिं मां चर्मचक्षुषा द्रष्टुं नार्हसीत्यर्थः । उक्तं च भगवता भाष्यकारेण स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन्लक्ष्यते स्वप्रयोजनाभावेपि भूतानुजिघृक्षयेति। व्याख्यातृभिश्चोक्तं स्वेच्छाविनिर्मितेन मायामयेन दिव्येन रूपेण संबभूवेति “ नित्यो यः कारणोपाधिर्मायाख्योऽनेकशक्तिमान् । स एव भगवद्देह इति भाष्यकृतां मतम् ” । अन्ये तु परमेश्वरे देहदेहिभावं न मन्यन्ते । किंतु यश्च नित्यो विभुः सच्चिदानन्दघनो भगवान्वासुदेवः परिपूर्णो निर्गुणः परमात्मा स एव तद्विग्रहो नान्यः कश्चिद्भौतिको मायिको वेति । अस्मिन्पक्षे योजना “ आकाशवत्सर्वगतश्च नित्यः । अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ” इत्यादिश्रुतेः । “ असंभवस्तु सतोनुपपत्तेः” “नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः” इत्यादिन्यायाच्च । वस्तुगत्या जन्मविनाशरहितः सर्वभासकः सर्वकारणमायाधिष्ठानत्वेन सर्वभूतेश्वरोपि सन्नहं प्रकृतिं स्वभावं सच्चिदानन्दघनैकरसम् । मायां व्यावर्तयति–स्वामिति निजस्वरूपमित्यर्थः । “ स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नि ” इतिश्रुतेः । स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सन् संभवामि देहदेहिभावमन्तरेणैव देहिवद्व्यवहारामि । कथं तर्हि देहे सच्चिदानन्दघने देहत्वप्रतीतिरत आह--आत्ममाययेति। निर्गुणे शुद्धे सच्चिदानन्दरसघने मयि भगवति वासुदेवे देहदेहिभावशून्ये तद्रूपेण प्रतीतिर्मायामात्रमित्यर्थः। तदुक्तम् ‘कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोप्यत्र देहीवाभाति मायया’ इति ‘अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् । यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ’ इति च । केचित्तु नित्यस्य निरवयवस्य निर्विकारस्यापि परमानन्दस्यावयवावयविभावं वास्तवमेवेच्छन्ति ते ‘निर्युक्तिकं ब्रुवाणस्तु नास्माभिर्विनिवार्यत’ इति न्यायेन नापवाद्याः । यदि संभवेत्तथैवास्तु किमतिपल्लवितेनेत्युपरम्यते ॥ ६ ॥

शं० टी०–ननु ‘कर्मणा जायते जन्तुः कर्मणैव प्रलीयते’ इति स्मरणाज्जन्मादिहेतोः पुण्यपापादेरभावात्त्वेश्वरस्य स्वतन्त्रस्य कथं जन्मादिरित्याकाङ्क्षायां माययैव मम जन्मादयो न तु लोकवत्कर्मणेति बोधयितुमाह–अजोऽपीति । कदाचित्कथंचित्कुतश्चिन्न जायत इत्यजः “ न तस्य कश्चिज्जनिता न चाधिपः ” इतिश्रवणाज्जन्महेतोरुपादानादेरभावादजो जन्मरहित एवास्मि। एवमजः सन्नपि तथाऽव्ययात्मा निरवयवत्वेन विनाशकारणसामग्रीसंबन्धायोगादव्ययः नाशनक्रियाया अविषयः आत्मा स्वभावो यस्य सोऽव्ययात्मा नित्यः “ अजो नित्यः” इति श्रवणादव्ययात्मा नित्य एवास्मि न कचिदपि षष्ठविकारवान् । अजोऽव्ययात्मेति विशेषणद्वयं तदन्तरालविकारासंभवद्योतनार्थम् । आद्यन्तयोरभावे तदन्तरवस्थाकल्पनाऽयोगात् । ननु तव कर्मनिमित्तकजन्माभावेपीश्वरो नियन्ता स्यादेवेत्यत आह–भूतेति । ब्रह्मादीनामन्येषां च भूतानामहमेवेश्वरो नियन्ता स्वसन्निधिमात्रेण “ एष सर्वेश्वरः” इति श्रुतेः। न तु ममान्योऽस्ति नियन्ता “न चाधिपः” इतिश्रवणादतोऽहं न कस्यापि च नियोगविषयः । एवमजोऽप्यव्ययात्मापीश्वरोपि च सन्नहं निर्विकार एव परमात्मा प्रकृतिं प्रकर्षेण कृतिः सृष्ट्यादिक्रिया यस्याः सकाशान्मम सा प्रकृतिस्त्रिगुणात्मिका दैवी माया “ मायां तु प्रकृतिं विद्यात् ” इति श्रुतेः । तां प्रकृतिं स्वां स्वकीयाम् “ कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ” इति श्रवणात् स्वस्योपाधिभूतामव्यक्तसंज्ञिकां मूलप्रकृतिमधिष्ठाय तस्यां तत्कार्ये चाहंममेति भावनां कृत्वा योऽजत्वादिलक्षणः सोऽहं संभवाम्यात्ममायया आत्माधीना माया आत्ममाया तया संभवामि। यद्वा भानोः प्रभावद्वह्नेर्दग्धृत्वशक्तिवदात्मनो ममाऽभिन्ना माया आत्ममाया नतु मद्व्यतिरिक्ता “ देवात्मशक्तिं स्वगुणैर्निगूढाम् ” इति श्रवणादन्यथा त्वद्वैतहानिः श्रुतिविरोधश्च स्यादतो वह्नेर्दहनशक्तिवदभिन्नैव सा प्रकृतिशब्दिता माया तयैवाहं जन्मवान्न तु वस्तुतस्तथात्वे “ निष्कलं निष्क्रियम ” इति “ न जायते

म्रियते वा विपश्चित्" इति श्रुतेर्विरोधापत्तेस्ततो माययैवाहं देवादिषु संभवामीत्यर्थः। एवं तत्पदार्थस्येश्वरस्य जन्मादेर्मायिकत्वे बोधिते त्वंपदार्थस्यापि तदभिन्नत्वाज्जन्मकर्माद्याविद्यकमेवेति सूचितं भवति ॥ ६ ॥

श्री० टी०—नन्वनादेस्तव कुतो जन्म अविनाशिनश्च कथं पुनर्जन्म येन बहूनि मे व्यतीतानीत्युच्यते, ईश्वरस्य तव पुण्यपापविहीनस्य कथं जीववज्जन्मेत्यत आह—**अजोऽपीति** । सत्यमेवं तथापि अजोऽपि सन्नहं तथाव्ययात्मापि अनश्वरस्वभावोऽपि सन् तथा ईश्वरोऽपि कर्मपारतन्त्र्यरहितोऽपि सन्स्वमायया संभवामि सम्यगप्रच्युतज्ञानबलवीर्यादिशक्त्यैव भवामि । ननु तथापि षोडशकलात्मकलिङ्गदेहशून्यस्य तव कुतो जन्मेत्यत उक्तम्—स्वां शुद्धसत्त्वात्मिकां प्रकृतिमधिष्ठाय स्वीकृत्य विशुद्धोर्जितसत्त्वमूर्त्या स्वेच्छया अवतरामीत्यर्थः ॥ ६ ॥

स० टी०—सर्वज्ञस्य तवेशस्य धर्माधर्माद्यभावतः ॥ जन्मैवासंभवि स्वामिन्कुतस्ते बहुधा जनिः ॥ १ ॥ इत्यत्राह चिदानन्दकन्दलः श्रीरमापतिः ॥ अपूर्वदेहसंबन्धो जन्म तद्वर्जितोऽप्यहम् ॥ २ ॥ पूर्वदेहस्य विच्छेदो व्ययस्तद्रहितोऽपि सन् ॥ ब्रह्मादीनां च भूतानां सर्वेषामीश्वरोऽपि सन् ॥ ३ ॥ विचित्रानेकाशक्त्याढ्यां मायाख्यां प्रकृतिं स्विकाम् ॥ स्वोपाधिभूतामत्यन्तासंभावितप्रदर्शिनीम् ॥ ४ ॥ चिच्छायया वशीकृत्य स्यामहं देहवानिव ॥ अजातो जात इव च स्वेच्छया स्वात्ममायया ॥ ५ ॥ वैष्णवी मम मायेयं मनुष्यत्वादिनाटनम् ॥ लोकस्यानुग्रहायैव वस्तुवृत्त्या न तन्मयि ॥ ६ ॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ॥ सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि ॥ ७ ॥ मोक्षधर्मोक्तरीत्यापि वस्तुतोऽहं निराकृतिः ॥ यस्याविद्यादिसंबन्धो जन्म तस्यैव युज्यते ॥ ८ ॥ निरविद्यस्य शुद्धस्य कथं भूतमयं वपुः ॥ तथैवोक्तं पुराणेऽपि ब्रह्माण्डाख्ये महर्षिणा ॥ ९ ॥ स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते ॥ किंतु निर्दोषचैतन्यं सुखनित्यां स्विकां तनुम् ॥ १० ॥ प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ॥ नित्यो यः कारणोपाधिर्मायाख्यो नैकशक्तिमान् ॥ ११ ॥ स एव भगवद्देह इति भाष्यकृतां मतम् ॥ अन्ये त्वाहुर्न चैवास्ति देहदेहिभिदा हरौ ॥ १२ ॥ किंत्वखण्डचिदानन्दघनो यो विभुरद्वयः ॥ निर्गुणो नित्यपूर्णात्मा विग्रहोऽस्य स एव हि ॥ १३ ॥ भौतिको मायिको वान्यो नास्ति देहो हरेर्विभोः ॥ अत आह स्वयं विष्णुरज इत्यादिका गिरः ॥ १४ ॥ आकाशवत्सर्वगतो नित्य इत्यादिवेदतः ॥ प्रकृतिं स्वां चिदानन्दस्वभावं प्रकृतेः परम् ॥१५॥ सर्वदैकरसं नित्यं स्वे महिम्नि प्रतिष्ठितम् ॥ स्वस्वरूपमधिष्ठाय स्वस्वरूपेऽवस्थितः ॥ १६ ॥ देहिवद्विहरामीशो देहदेहिभिदोज्झितः ॥ १७ ॥ स्वतः स्वच्छे बोधे विगलितमहामोहतिमिरे मयीशे जन्मादेर्न भवति कदा कापि कलना ॥ स्वभक्तोद्धारार्थं स्वयमहमजोऽप्यात्मकलया चिदानन्दाकारं पुनरिव सृजामीड्यममलम् ॥ १८ ॥ ६ ॥

भा० टी०—ईश्वरस्य तव धर्माधर्माद्यभावाज्जन्मैवायुक्तं व्यतीतानेकजन्मवत्त्वं तु दूरं निरस्तमित्याशङ्क्य वस्तुतो जन्माभावेऽपि स्वमायया जन्म संभवतीत्याह—**अजोऽपीति** । अजो जन्मरहितोऽपि सन्नव्ययात्माऽक्षीणज्ञानशक्तिस्वभावोऽपि सन् कदापि मम विच्छेदाभावात् । तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानामीश्वर ईशनशीलोऽपि सन् प्रकृतिं मम वैष्णवीं त्रिगुणात्मिकां मायां यस्या वशे सर्वं जगद्वर्तते यया मोहितः सन् स्वमात्मानं वासुदेवं न जानाति तामधिष्ठाय वशीकृत्य संभवामि देहवानिव जात इव, आत्मनः स्वस्य मायया मन्माययैव मयि विग्रहवत्त्वादिप्रतीतिः साधकानुग्रहार्थं न परमार्थत इति भावः । तदुक्तं मोक्षधर्मे 'एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते। इच्छन्मुहूर्तान्नश्येयमीशोऽहं जगतो गुरुः" नश्येयमदृश्यो भवेयमित्यर्थः । 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि ' इति सर्वभूतगुणैर्युक्तं कारणोपाधिकमित्यर्थः । अत्र केचित् ' नित्यो यः कारणोपाधिर्मायाख्योऽनेकशक्ति-

मान्। स एव भगवद्देह इति भाष्यकृतां मतम् ' इत्याचार्यानुसारिव्याख्यानानन्तरं तन्मतं संग्रहेणोक्त्वा मतान्तरं प्रदर्शयन्ति । अन्ये तु परमेश्वरे देहदेहिभावं न मन्यन्ते किंतु यश्च नित्यो विभुः सच्चिदानन्दघनो भगवान्वासुदेवः परिपूर्णो निर्गुणः परमात्मा जन्मविनाशरहितः सर्वभासकः सर्वकारणत्वेन सर्वभूतेश्वरोऽपि सन् अहं प्रकृतिं स्वभावं सच्चिदानन्दघनैकरसम् । मायां व्यावर्तयति—स्वामिति । निजरूपमित्यर्थः । "स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नि" इतिश्रुतेः स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सन् संभवामि देहदेहिभावमन्तरेणैव देहिवद्व्यवहरामि । कथं तर्ह्यदेहे सच्चिदानन्दघने देहित्वप्रतीतिरत आह—आत्ममाययेति । निर्गुणे शुद्धे सच्चिदानन्दरसघने मयि भगवति वासुदेवे देहदेहिभावशून्ये तद्रूपेण प्रतीतिर्मायामात्रमित्यर्थः । तदुक्तम् ' कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ' इति ' अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् । यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ' इति चेति । तत्रेदमवधेयं, परमेश्वरे देहदेहिभावो नास्तीत्युक्तिर्मायया देहदेहिभावो न वस्तुत इत्यङ्गीकुर्वतां भाष्यकृतां मतेन प्रतिकूला यत्तु नित्य इत्यादि तत्र यो निर्गुणः " अथात आदेशो नेति नेति । नेदं यदिदमुपासते । एकमेवाद्वितीयम् । सत्यं ज्ञानमनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म । अस्थूलमनल्पमनण्वह्रस्वमदीर्घम् । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा । यो वै भूमा तत्सुखम् । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । तदेतदपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । अपाणिपादम्' इत्यादिश्रुतितात्पर्यसिद्धः परमात्मा स एव तद्विग्रहः। स च विग्रहः किं साकार उत निराकारः,आद्ये निर्गुणस्य परिणाम उत विवर्तः। नाद्यः निर्विकारस्य विकाररूपपरिणामायोगात् । अन्यथा तस्यानित्यत्वं स्यात्। द्वितीये मायाया विवर्तसाधिकाया आवश्यकत्वेन न मायिक इत्युक्तिरनुपपन्ना । न द्वितीयः सर्वाकारशून्यः पुनश्च विशेषाकारेण गृह्यत इति विग्रह इति वदतो व्याघातात्। किंच सविग्रहः किं हस्तपादादिमान् उत तद्रहितः। आद्ये हस्तादयोऽपि किं दृश्या उतादृश्याः। आद्ये विग्रहस्य भूतकार्यत्वाभावान्मायिकत्वमवश्यमभ्युपेयम् । न द्वितीयः भक्तानां तद्दर्शनाद्यनापत्तेः । नन्वदृश्या अपि मायया दृश्या इति चेत्तर्हि किं परमाण्वादिवददृश्या उत ब्रह्मरूपेण। आद्ये योगिनामक्षिगोचराः स्युः,द्वितीये हस्तादयोऽवयवास्तद्वान्विग्रह इति कृतमुक्तिमात्रेण स्वशिष्यधन्धनेन । न द्वितीयः तद्रहितो विग्रहश्चेति व्याघातात्। एतेन एतत्पक्षानुसारेण क्लिष्टकल्पनया श्लोकयोजनापि प्रत्युक्ता । उदाहृतवचनद्वयमपि भाष्यकृतां मत एव सम्यगुपपद्यते तस्मात्सच्चिदानन्दस्वरूपः मायावच्छिन्नः "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति " ' यतः सर्वाणि भूतानि भवन्त्यादियुगागमे । यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ' 'जन्माद्यस्य यतः' इत्यादिश्रुतिस्मृतिन्यायैर्जगत्कारणत्वेन प्रतिपादितः शुद्धबुद्धमुक्तस्वभावः अशरीरी परमात्मा सर्वेश्वरो मायानियन्ता साधकानुग्रहार्थं स्वमायया लीलाविग्रहं गृहीत्वा जात इव विग्रहवानिव भातीति श्रुतिस्मृतीतिहासपुराणाद्यनुगृहीतं सर्वज्ञानां भाष्यकृतां मतं शरणीकरणीयमिति दिक् । अन्ये तु न कर्मफलं भगवतः शरीरमत एव न भौतिकं तस्माद्युक्तमजोऽपि सन्निति । ननु तर्हि भगवच्छरीरस्य किमुपादानम्, अविद्येति चेन्न परमेश्वरे तदभावात् । जीवाविद्येति चेन्न, शुक्तिरजतादिवत्तुच्छत्वापत्तेः । चिन्मात्रं चेन्न,चितः साकारत्वायोगात्, तथात्वे वा तस्यातीन्द्रियत्वापत्तिः । तस्मात्किमालम्बनोऽयं भगवद्देहो देवकीगर्भप्रवेशजननबाल्यकौमारपौगण्डयौवनादिप्रतीतिविषय इति चेत् शृणु—प्रकृतिं स्वामिति । अयमर्थः । जीवात्मानो हि अनात्मभूतां प्रकृतिं तेजोबन्नात्मिकां पञ्चभूतात्मिकां वाऽधिष्ठाय संभवन्ति जन्मादींल्लभन्ते, अहं तु स्वां प्रत्यगनन्यां प्रकृतिं प्रत्यक्चैतन्यमित्यर्थः । तदेवाधिष्ठाय नतूपादानान्तरम् । आत्ममायया स्वीयमायया संभवामि । यथा कश्चिन्मायावी स्वयं स्वस्थानादप्रच्युतस्वभावो-

ऽप्यदृश्यो भूत्वा स्थूलसूक्ष्मभूतान्यनुपादायैव केवलया मायया द्वितीयं मायाविनं स्वसदृशमेव सूत्रमार्गेण गगनमारोहन्तं सृजति,एवमहं कूटस्थचिन्मात्रोऽग्राह्यः स्वमायया चिन्मयमात्मनः शरीरं सृजामि। तस्य वालाद्यवस्थाश्च सूत्रारोहणवद्दर्शयामीति। एतावांस्तु विशेषः, लौकिकमायावी मायामुपसंहरन् द्वितीयं मायाविनमप्युपसंहरति, अहं तु तामनुपसंहरन्स्वविग्रहमपि नोपसंहरामीति । एवं हि सति हिरण्यश्मश्रुत्वादिलक्षणविग्रहयोगिनश्चेतनस्य 'अन्तस्तद्धर्मोपदेशात्' इत्यादिन्यायसिद्धं वियदाद्युपादानलक्षणं सर्वेश्वरत्वं युज्यते नान्यथेति । तस्मात्सिद्धं परमेश्वरस्य मायामयं शरीरं नित्यमिति । एकेनैव हिरण्यश्मश्रुत्वादिलक्षणेन देहेन विवस्वन्तमुपदिश्य त्वामप्युपदिशामीत्यादि वर्णयन्ति । अत्रेदं वक्तव्यं नियम्यदेहातिरिक्तनियामकदेहाभावादेकेनैवेत्यादि नोपपद्यते। किंच हिरण्यश्मश्रुत्वादिविशिष्ट आदित्यान्तर्यामिदेह एव यदि कृष्णादिदेहः स्यात्तर्हि तथैव प्रतीयेत नतु मेघश्यामत्वादिलक्षणः। ननु मायया तथेति चेद्वरं परमेश्वरस्याशरीरस्यैव साधकानुग्रहायादित्यान्तर्यामिरूपेण कृष्णादिदेहात्मना च माययाऽवस्थानवर्णनं कृष्णादिविग्रहाणां परंपरया मायिकत्वकल्पनाया भाष्यविरुद्धाया हिरण्यश्मश्रुत्वादिविशिष्टस्यापि सविशेषत्वेन मायिकत्वात् । यदपि यथा कश्चिदित्यादि तदपि न भगवता वासुदेवेनैवादौ चतुर्भुजं विग्रहं प्रदर्श्य पुनर्द्विभुजं रूपं प्रदर्शितं तदपि तिरोधाय पुनस्तदपि प्रकटितमिति प्रसिद्धेरन्यथा परमेश्वरदेहानां मोहिन्यादिरूपाणामनन्तानां युगपत्प्रतीत्यापत्तेः । तस्मादीश्वरो भक्तार्थं तत्तद्विग्रहमाविर्भावयति तिरोभावयति चेत्यवश्यमभ्युपेयम् । एतेनाहमित्याद्यपि प्रत्युक्तम् । अजोपीत्यादिविशेषणैर्भाष्योक्तव्याख्यानेन च जीवाद्वैलक्षण्यस्य सम्यक्प्रतीतेः क्लिष्टाप्रसिद्धकल्पनाया भाष्यविरुद्धाया अनौचित्यात् । अत एवेश्वरदेहाभिप्रायेणैवायमर्जुनस्य प्रश्न इति पूर्वोक्तं प्रत्युक्तं परमात्मनो वास्तवदेहस्याभावात् तस्मात्त्वमपि कश्चिदसर्वज्ञोऽनीश्वरो जीव एव तस्य तवादित्यं प्रत्युपदेष्टृत्वं विरुद्धमिति मूर्खाणामभिप्रायेणार्जुनस्य शङ्काऽहं जीववत् धर्माधर्मादिपारतन्त्र्याभावादजोऽव्ययात्मा भूतानामीश्वर एतादृशोऽपि सन् प्रकृतिं स्वामधिष्ठाय स्वमायया संभवामीत्यनेन योऽहमीश्वरः सर्वज्ञः सर्गादावुपदेशाय योग्यं विग्रहमुपादाय सूर्यं प्रति योगमुक्तवान् स एवाहमिदानीमुक्तवानित्युत्तरमित्यलं विस्तरेण ॥ ६ ॥

प० टी०—अथ स्वस्येश्वरत्वं प्रकटयन्नाह—**अजोऽपीति** । अजोऽनुत्पत्तिधर्माव्ययोऽविनाशधर्मा भूतानामीश्वरः कर्मपारतन्त्र्यरहितः सन् संभवामि सम्यक्प्रकारेणालुप्तसर्वज्ञत्वादिगुणः सन् भवामि । नन्वीश्वरत्वे लिङ्गदेहादिशून्यस्य कथं जन्मेत्याह—**प्रकृतिमिति**। स्वां स्वस्मिन्नध्यस्तां शुद्धसत्त्वात्मिकां प्रकृतिमवष्टभ्याधिष्ठाय स्वेच्छाविर्भूतशुद्धसत्त्वात्मकमूर्त्यावतरामि। तदुक्तम् 'सतो हि मायया जन्म जायते न तु तत्त्वतः। असतो मायया जन्म तत्त्वतो नहि युज्यते । वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते' इति ॥ ६ ॥

रा० टी०—जन्मान्यतीतानि चेत्तर्हि न जननमरणराहित्यमीश्वरत्वं वा तव स्यात् । तथा चाविनाशित्वित्युक्तविरोध इत्यत आह—**अजोपीति**। देहतोऽप्युत्पत्तिहीनोपि अव्ययोऽविनाशी आत्मा स्वरूपं देहश्च यस्य सोऽव्ययात्मा सन्नपि भूतानामीश्वरः सन्नपि संभवामीत्वन्वयः । स्वरूपतो देहतश्च अनादिनित्यस्य कथं जनिरित्यत उक्तम्—प्रकृतिमधिष्ठायेति। प्रकृतिशब्द प्राकृतपरः। प्राकृतान्प्रकृतिजान्वसुदेवादीनधिष्ठायानुप्रविश्यात्ममायया स्वज्ञानेन वा संभवामि प्रादुर्भवामि । अतो जात इति लोकस्य भ्रान्तो व्यवहार इति भावः । यद्वा स्वां स्वकीयां मदधीनां प्रकृतिं तमोरूपामधिष्ठाय आश्रित्य संभवामि संभूतो जात इति भ्रमविषयो भवामि लोकस्येत्यर्थः। स्वाधीनप्रकृत्या वसुदेवादिदेहान्निर्माय तेष्वनुप्रविश्य प्रादुर्भवकरणे किं प्रयोजनमित्यतोऽप्युक्तम्—स्वां प्रकृतिमधिष्ठायेति । स्वस्वभावमनुसृत्य संभवामीति देवस्यैष स्वभाव एव न प्रयोजनापेक्षेति भावः । एतेन जीवजन्मविलक्षणजन्मवत्त्वाद्धरेः पूज्यत्वादिना जीवभेद उपपादित इति ज्ञेयम् ॥ ६ ॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७ ॥

त० टी०—भवतु तवानादित्वाद्विवस्वदाद्युपदेष्टृत्वं स्वेच्छया निर्विकारत्वेनैव जन्म चेति । तथाऽपि बहूनीत्युक्तत्वात् कदा कदा जन्मेत्यपेक्षायामाह—**यदा यदेति** । न मे जन्मकालनियमोऽस्ति । **यदा यदा हि** यस्मिन्यस्मिन्नेव युगे धर्मस्य परमश्रेयःप्राप्तिहेतुभूतस्य मद्भक्तिलक्षणस्य ग्लानिर्हानिर्भवति । तत्प्रतिपक्षस्य चाधर्मस्य अभ्युत्थानमभिवृद्धिर्भवति । तदा तदाऽहमुक्तप्रकारेणात्मानं सृजामि आविर्भवामीत्यर्थः । न चात्र धर्मशब्देन वेदोदितवर्णाश्रमनिबन्धनः सामान्यधर्मो विवक्षितः, कथमन्यथा व्याख्यायते इति वाच्यं, तदानीं सामान्यवर्णाश्रमधर्मस्य हान्यभावात् । किंतु भगवद्भक्तिविरोध्यसुरराजन्यबाहुल्येन भागवतधर्मस्योच्छिन्नप्रायत्व एवावतारः । एवमेव धरण्याह ब्रह्मवैवर्ते 'कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः । तेषां महापातकिनामशक्ता भारवाहने" इति । अत एव 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् ' इति । "अनन्येनैव योगेन मां ध्यायन्त उपासते । तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् " इत्यादिना बहुशो वक्ष्यमाणत्वात् । धर्मस्वरूपं स्वयमेवोक्तं श्रीभागवते 'सत्त्वाद्वृद्धाद्भवेद्धर्मः पुंसो मद्भक्तिलक्षणः । धर्मो मद्भक्तिकृत्प्रोक्तः ' इत्यादिना । ' धर्मः स्वनुष्ठितः पुंसो विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्' इत्यनेन भक्तिहीनस्य केवलधर्मस्याकिंचित्करत्वाभिधानात् ॥ ७ ॥

म० टी०—एवं सच्चिदानन्दघनस्य तव कदा किमर्थं वा देहिवद्व्यवहार इति तत्रोच्यते धर्मस्य वेदविहितस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य प्रवृत्तिनिवृत्तिलक्षणस्य वर्णाश्रमतदाचारव्यङ्ग्यस्य यदा यदा ग्लानिर्हानिर्भवति हे भारत ! भरतवंशोद्भवत्वेन भा ज्ञानं तत्र रतत्वेन वा त्वं न धर्महानिं सोढुं शक्नोषीति संबोधनार्थः । एवं यदा यदाऽभ्युत्त्थानमुद्भवोऽधर्मस्य वेदनिषिद्धस्य नानाविधदुःखसाधनस्य धर्मविरोधिनस्तदा तदाऽऽत्मानं देहं सृजामि नित्यसिद्धमेवं सृष्टमिव दर्शयामि मायया ॥ ७ ॥

शं० टी०—देवादिषु मायया तव संभवः कदेत्याकाङ्क्षायामाह—**यदेति** । वर्णाश्रमिणामभ्युदयनिःश्रेयससिद्धेः सम्यगनुष्ठेयस्य धर्मस्य वैदिकस्य ग्लानिर्विघ्नकारिभिर्निर्विशेषविच्छित्तिर्यदा यदा भवति । हिः पुराणप्रसिद्धिद्योतनार्थः । तथैवाधर्मस्य सर्वानर्थहेतोरभ्युत्थानम् अभितः सर्वत्राश्रमेषु वर्णेषु चोत्थानं धूमकेतोरिवोत्पत्तिर्भवति तदा तदात्मानं स्वस्य धर्माधर्मयोस्तद्वतां चानुग्रहनिग्रहयोग्यं देहमात्ममायया सर्वनियन्ताहमीश्वरः सृजामीत्यर्थः ॥ ७ ॥

श्री० टी०—कदा संभवसीत्यपेक्षायामाह—**यदा यदेति** । धर्मस्य ग्लानिर्हानिः । अधर्मस्य अभ्युत्थानमाधिक्यम् ॥ ७ ॥

स० टी०—चिदानन्दघनस्यैवं किमर्थं तव वा कदा ॥ देहिवद्व्यवहारोऽस्तीत्यत आह जगद्गुरुः ॥१॥ द्विविधस्यास्य धर्मस्य वेदप्रामाणिकस्य च ॥ स्वर्गमोक्षनिमित्तस्य प्राणिनां हि यदा यदा ॥ २ ॥ क्षतिर्भवत्यधर्मांशैः स्वर्गमोक्षविरोधिभिः ॥ श्रुतिस्मृतिनिषिद्धस्याधर्मस्यानर्थकारिणः ॥ ३ ॥ उद्भवो धर्मशत्रोश्च भवतीह यदा यदा ॥ तदा तदाहमात्मानं नित्यसिद्धं स्वमायया ॥ ४ ॥ दर्शयामि सृष्टमिव चिद्घनं परमार्थतः ॥ ५ ॥ ७ ॥

भा० टी०—एवं सर्वज्ञः सर्वेश्वरो शरीरी त्वं कदा किमर्थं देहवानिव जात इव प्रतीयस इत्यत आह—**यदेति** । ग्लानिर्हानिः, अभ्युत्थानं वृद्धिः, भरतवंशोद्भवत्वेन धर्महानिं कर्तुमयोग्योऽसीति सूचयन्नाह-भारतेति । त्वमपि धर्मसंस्थापनाय भरतवंशेऽवतीर्णोसीति गूढाभिप्रायेण वा संबोधयति—भारतेति । माय-

या आत्मानं स्वं सृजामि जन्मवन्तमिव प्रदर्शयामि। आत्मानं देहं सृजामि नित्यसिद्धमेव सृष्टमिव प्रदर्शयामीति केचित्। तन्न, परमेश्वरस्य देहः किं तस्मादन्य उतानन्यः। नाद्यः, तस्यासत्त्वाद्यापत्त्या सच्चिदादिरूपत्वस्वीकारविरोधात्। द्वितीयेऽपि स देहः किं परिच्छिन्न उतापरिच्छिन्नः, आद्ये ईश्वरस्य नित्यमेव परिच्छिन्नत्वं स्यात् तथाच देहस्य नित्यसिद्धत्वं वदद्भिः परमेश्वरस्यासत्त्वसंपादनेन मूलोच्छेद एव संपादितः। न द्वितीयः अपरिच्छिन्नः पुनरवयवसमूहः परिमिताकारो देह इति वदतो व्याघातात् ॥ ७ ॥

प० टी०—अथावतरणावसरमाह—**यदेति**। यदा धर्मस्य ग्लानिरुच्छित्तिस्तथाऽधर्मस्याभ्युत्थानमभ्युदयस्तदात्मानं सृजामि स्वयं स्वेच्छयाविर्भवामि ॥ ७ ॥

रा० टी०—किंच स्वप्रयोजनाभावेपि लोकापेक्षितधर्माधर्मस्थापनोत्सादनाद्यर्थमवतार इति संभवकालोक्तिपूर्वकमाह—**यदेत्यादिश्लोकद्वयेन** ॥ ७ ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

त० टी०—जन्मप्रयोजनमाह—परित्राणायेति। साधवः समदर्शिनो भगवद्भक्ताः। तथोक्तं भागवते यमेनान्वयव्यतिरेकाभ्याम् 'ये साधवः समदृशो भगवत्प्रपन्नास्तान्नोपसीदत हरेर्गदयाऽभिगुप्तान्। नैषां वयं नच वयः प्रभवाम दण्डे तानानयध्वमसतोऽकृतविष्णुकृत्यान्' इत्यादिना। तेषां साधूनां प्रह्लादादीनां परित्राणाय सर्वतो रक्षणाय दुष्कृतां भक्तिविरोधिनां हिरण्यकशिपुकंसमगधपौण्ड्रकचैद्यशाल्वादीनां विनाशाय च धर्मस्य भागवतस्य सम्यक् स्थापनाय युगे युगे संभवामि ॥ ८ ॥

म० टी०—तत्किं धर्मस्य हानिरधर्मस्य च वृद्धिस्तव परितोषकारणं येन तस्मिन्नेव काल आविर्भवसीति तथा चानर्थावह एव तवावतारः स्यादिति नेत्याह धर्महान्या हीयमानानां साधूनां पुण्यकारिणां वेदमार्गस्थानां परित्राणाय परितः सर्वतो रक्षणाय। तथाऽधर्मवृद्ध्या वर्धमानानां दुष्कृतां पापकारिणां वेदमार्गविरोधिनां विनाशाय च। तदुभयं कथं स्यादिति तदाह—धर्मसंस्थापनार्थाय। धर्मस्य सम्यगधर्मनिवारणेन स्थापनं वेदमार्गपरिरक्षणं धर्मसंस्थापनं तदर्थं संभवामि पूर्ववत्, युगे युगे प्रतियुगम् ॥ ८ ॥

शं० टी०—उक्तमर्थं स्पष्टयति—**परित्राणायेति**। प्राणात्ययेपि ये स्वधर्मं न त्यजन्ति त एव साधवस्तेषां स्वधर्मैकशरणानां परित्राणाय तेषां विनैव प्रार्थनामिहपरलोकयोर्विच्छित्तिर्यथा न स्यात्तथा रक्षणं परित्राणं तस्मै। एतेन साधुभिरीश्वर एवास्माकं त्रातेति धैर्येण स्वधर्मे स्थातव्यमिति सूचितं भवति। किंच दुष्कृतां ये तु त्रिभिरपि करणैः शास्त्रनिषिद्धमेव कुर्वन्ति नान्यत्ते दुष्कृतो जगद्दूषणास्तेषां समूलविनाशाय च धर्मसंस्थापनार्थाय च धर्मस्य सतामभ्युदयनिःश्रेयसहेतोरधर्मस्य न्यक्कारपूर्वकं संस्थापनार्थाय धर्मस्याधिकारिभिः सर्वैर्नियमेन यथाशास्त्रमनुष्ठापनमेव संस्थापनं तदेवार्थः प्रयोजनं तस्मै। युगे युगे कृतादौ भूयो भूयः स्वमायया स्वयमेव संभवाम्यवतरामीत्यर्थः। एतेन साधुपरिपालनमसाधुविनाशनं धर्मसंस्थापनं चैतत्त्रितयमेव भगवदवतारस्य प्रयोजनमिति सूचितं भवति। यज्ञादिधर्मेण संरक्षितेन देवा वर्धन्ते वृष्टयश्च ताभिरन्नमन्नेन प्राणिनः सर्वे जीवन्त्यतो धर्मसंरक्षणमात्रेण विश्वं सर्वं रक्षितमेव भवतीति भावः ॥ ८ ॥

श्री० टी०—किमर्थमित्यपेक्षायामाह—**परित्राणायेति**। साधूनां स्वधर्मवर्तिनां रक्षणाय दुष्टं कर्म कुर्वन्तीति दुष्कृतस्तेषां वधाय च। एवं धर्मस्य संस्थापनार्थाय साधुरक्षणेन दुष्टवधेन च धर्मं स्थिरीकर्तुं युगे युगे तत्तदवसरे संभवामीत्यर्थः। नचैवं दुष्टनिग्रहं कुर्वतोऽपि नैर्घृण्यं शङ्कनीयं यथा चाहुः—'लालने ताडने मातुर्नाकारुण्यं यथाऽर्भके ॥ तद्वदेव महेशस्य नियन्तुर्गुणदोषयोः' इति ॥ ८ ॥

स० टी०—धर्माधर्मविपर्यासः किं तवाभिमतो यतः ॥ तदैवाविर्भवस्येवमपेक्षायामितीर्यते ॥ १ ॥ साधूनां ह्रीयमानानां धर्महान्या महात्मनाम् ॥ वेदमार्गे स्थितानां च रक्षणाय समन्ततः ॥ २ ॥ पापिनां वर्धमानानामधर्मस्योद्भवेन च ॥ विध्वंसनाय दुष्टानां वेदमार्गविरोधिनाम् ॥ ३ ॥ वेदमार्गपरित्राणधर्मसंस्थापनाय च ॥ नित्यसिद्धः प्रतियुगं स्वयं प्रादुर्भवाम्यहम् ॥ ४ ॥ ८ ॥

भा० टी०—अवतरणप्रयोजनमाह—परित्राणाय रक्षणाय साधूनां सन्मार्गस्थानां भक्तानां विनाशाय च पापिष्ठानां किंच धर्मसंस्थापनार्थाय तथाचावतरणप्रयोजनत्रयमुक्तम् । यत्तु तदुभयं कथं स्यादित्यत आह—**धर्मसंस्थापनार्थायेति** । तच्चिन्त्यं धर्मसंस्थापनेन साधूनां रक्षणस्य पापिनां नाशस्य चासिद्धेः । यथा वसुदेवगृहेऽवतीर्णेन श्रीकृष्णेन गीताद्युपदेशेन धर्मस्थापनं युधिष्ठिरादिपरिपालनेन साधुपरित्राणं कंसादिमारणेन दुष्कृतां विनाश इति प्रयोजनत्रयमेव संपादितं नहि गीतोपदेशमात्रेण तत्र तत्र कृतमर्जुनसंरक्षणं तत्तदुपायैः कर्णनाशश्च सिध्यति इति दिक् । एतेन साधुरक्षणेन दुष्टवधेन च धर्मं स्थिरीकर्तुमिति प्रत्युक्तम् । नहि वसुदेवादिरक्षणेन कंसादिवधेन च कस्यचिद्धर्मस्य स्थापनं भवति धर्मस्थापनहेतुभूतैतत्कर्मद्वयाकर्तुर्व्यासावतारस्य धर्मसंस्थापनार्थस्य वैयर्थ्यापत्तेश्च । तथाच कदाचिदेकस्मै कदाचिद्द्वाभ्यां कदाचित्सर्वस्मै प्रयोजनाय भगवदवतरणमिति ध्येयम् ॥ ८ ॥

प० टी०—किमर्थमित्याह—**परित्राणायेति** । साधूनां स्वमार्गवर्तिनां परित्राणाय विघ्नेभ्यो रक्षणाय तथा दुष्टं कर्म कुर्वन्ति ते दुष्कृतस्तेषां विनाशाय । एतदपि किमर्थं धर्मसंस्थापनार्थाय, धर्मसंस्थापनमेवार्थः प्रयोजनं तस्मै, युगे युगे तत्तदवसरेऽन्यथा जातिसंकरः स्यात् । श्रुतिरपि " स सेतुर्विधरणमेषां लोकानामसंभेदाय " इति । अत्र तुल्यदृष्टेः परमेश्वरस्य साधुसंरक्षणं खलनिवर्हणमयुक्तमिति नाशङ्कनीयम् । यथाहुः—' लालने ताडने मातुर्न वैषम्यं यथार्भके । तद्वदेव महेशस्य नियन्तुर्गुणदोषयोः ' इति ॥ ८ ॥

रा० टी०—युगे युग इति धर्महान्यधर्मवृद्धिकाल इत्यर्थः । अवतारं विना साधुपरित्राणादिसंभवेऽपि लीलयैवावतारद्वारा परित्राणादिकं स्वभावादेव तस्येति ज्ञेयम् ॥ ८ ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

त० टी०—एवंभूतस्वजन्मकर्मज्ञातुः फलमाह—जन्म कर्म चेति । सर्वज्ञस्य सर्वशक्तेः सर्वेश्वरस्य सर्वकारणस्य मे मम जन्म त्रिगुणमायाऽस्पृष्टनित्यासिद्धं सच्चिदानन्दविग्रहेण स्वेच्छयाऽऽविर्भावरूपं, कर्म च भक्तपरित्राणमभक्तविनाशनं च दिव्यमप्राकृतं तत्त्वतः परमार्थबुद्ध्या यो वेत्ति हे अर्जुन ! स पुरुषः देहं स्थूलं तद्धेतुभूतं सूक्ष्मं च त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति। किंतु मां मुक्तप्राप्यं सत्यज्ञानानन्दस्वरूपं परब्रह्म भगवन्तं वासुदेवमेवैति प्राप्नोति । मद्भावं प्राप्नोतीत्यर्थः ॥ ९ ॥

म० टी०—जन्म नित्यसिद्धस्यैव मम सच्चिदानन्दघनस्य लीलया तथानुकरणं कर्म च धर्मसंस्थापनेन जगत्परिपालनं मे मम नित्यसिद्धेश्वरस्य दिव्यमप्राकृतमन्यैः कर्तुमशक्यमीश्वरस्यैवासाधारणम् । एवमजोऽपि सन्नित्यादिना प्रतिपादितं यो वेत्ति तत्वतो भ्रमनिवर्तनेन। मूढैर्हि मनुष्यत्वभ्रान्त्या भवतोऽपि गर्भवासादिरूपमेव जन्म स्वभोगार्थमेव कर्मेत्यारोपितं परमार्थतः शुद्धसच्चिदानन्दघनरूपत्वाज्ज्ञानेन तदपनुद्य अजस्यापि मायया जन्मानुकरणमकर्तुरपि परानुग्रहाय कर्मानुकरणमित्येवं यो वेत्ति स आत्मनोपि तत्त्वस्फुरणात् त्यक्त्वा देहमिमं पुनर्जन्म नैति किंतु मां भगवन्तं वासुदेवमेव सच्चिदानन्दघनमेति संसारात् मुच्यत इत्यर्थः । हे अर्जुन ॥ ९ ॥

शं० टी०—दुष्टानां शिष्टानां च निग्रहानुग्रहार्थं धर्मसंस्थापनार्थं च विवस्वदादिभ्यो योगोपदेशाय च मायया संभावितानि यानि शरीराणि यानि तैः कृतानि कर्माणि तान्येतानि च सर्वाणि वस्तुतो ब्रह्ममात्रमेवेति यो जानाति स मुक्तिं गच्छतीत्याह—जन्म कर्मेति । इतरानपेक्षया स्वात्मनि स्वयमेव स्वप्रकाशेन दीप्यते प्रकाशत इति दिव्यं निर्विशेषचिदेकरसं परं ब्रह्म दिविति दिवुधातोः क्विबन्तं रूपं तस्मिन् दिवि परे ब्रह्मणि पूर्णानन्दैकघनेऽद्वितीये सर्वाधिष्ठाने प्रतीता या प्रकृतिर्यच्च प्राकृतं मे जन्म शरीरं यच्च तत्कृतं कर्म तदेतत्सर्वं तत्त्वतोऽध्यात्मदृष्ट्या परिशील्य दिव्यं दिवो ब्रह्मणः स्वरूपं दिव्यं चैतन्यं तन्मात्रमेवेत्येवं यो वेत्ति साक्षाद्विजानाति स सर्वस्य ब्रह्ममात्रत्वदर्शी विद्वानिमं विद्वद्देहं त्यक्त्वा पुनर्जन्म नैति नतु पुनर्जायते किंतु मामेति सच्चिदानन्दैकरसं मां ब्रह्मैव प्राप्नोति विदेहमुक्तिं गच्छतीत्यर्थः ॥ ९ ॥

श्री० टी०—एवंविधानामीश्वरजन्मकर्मणां ज्ञाने फलमाह—जन्म कर्मेति । मे जन्म स्वेच्छाकृतं कर्म च धर्मपालनरूपं दिव्यमलौकिकं तत्त्वतः परानुग्रहार्थमेवेति यो वेत्ति स देहाभिमानं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति किंतु मामेव प्राप्नोति ॥ ९ ॥

स० टी०—जन्मैवं नित्यसिद्धस्य चिदानन्दघनस्य मे ॥ लीलयाऽमोघया शक्त्या तथानुकरणं क्षितौ ॥ १ ॥ धर्मसंस्थापनेनैव जगतः परिपालनम् ॥ कर्म मे वासुदेवस्य नित्यसिद्धेश्वरस्य च ॥ २ ॥ अक्रियस्यातिशुद्धस्य दिव्यमप्राकृतं परम् ॥ अन्यैः कर्तुमशक्यं यदसाधारणमैश्वरम् ॥ ३ ॥ यो वेत्ति तत्त्वतो भ्रान्तिं त्यक्त्वैवं मूढधीगताम् ॥ सच्चिदानन्दरूपस्याजस्यापि स्वात्ममायया ॥ ४ ॥ जन्मानुकरणं चैवमकर्तुरपि सर्वथा ॥ कर्मानुकरणं लोकानुग्रहायेति वेत्ति यः ॥ ५ ॥ स आत्मतत्त्वविज्ञानात्त्यक्त्वा देहमिमं बुधः ॥ प्राप्नोति न पुनर्जन्म मामेवैति चिदद्वयम् ॥ ६ ॥ जीवन्मुक्तो मुनिर्भूत्वा संसारान्मुच्यतेऽर्जुन ॥७॥ ९ ॥

भा० टी०—जन्म मायिकं कर्म साधुपरित्राणादि मम परमेश्वरस्यैश्वरमप्राकृतं यस्तत्त्वतो वेत्ति स देहं त्यक्त्वा पुनरुत्पत्तिं न प्राप्नोति किंतु मां परमात्मानमेति मुच्यत इत्यर्थः । अर्जुनेति संबोधयन् मज्जन्मकर्मतत्त्वज्ञानशोधितत्वंपदस्तत्पदाभेदं लब्ध्वा मुच्यत इति सूचयति ॥ ९ ॥

प० टी०—एवंविधानामीश्वरजन्मकर्मणां ज्ञाने फलमाह—जन्मेति । जन्म स्वेच्छाकृतं कर्म पालनरूपं तत्त्वतोऽनुग्रहार्थमेवेति यथावत्परमेश्वरस्वरूपं वेत्ति स वर्तमानं देहं त्यक्त्वा पुनर्जन्म नैति किंतु मामेति मामेव प्राप्नोति ॥ ९ ॥

रा० टी०—एवं स्वभावादेवावतारादिस्वव्यापारमुक्त्वा तज्ज्ञानफलमाह—जन्मेति । एवमुक्तप्रकारेण दिव्यमलौकिकं मे जन्म कर्म च तत्त्वतो यथावत्तया यो वेत्ति स ज्ञानी देहं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति किंतु मामेति । अत्र जन्मकर्मरूपैकदेशज्ञानेन मुक्त्युक्तिर्योग्यगुणज्ञानोपलक्षणार्था ज्ञेया ॥ ९ ॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ॥
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

त० टी०—मामेतीत्युक्तं तत्र त्वत्प्राप्तौ त्वज्ज्ञाने च साधनान्तरमपेक्षितं न वा प्राप्तिः स्वरूपैक्येन भेदेन वा तादात्म्येन वेत्यपेक्षायामाह—वीतरागेति । रागः स्त्रीपुत्रादिषु स्नेहः, भयं भयानुबन्धि कर्म, क्रोधः किंचिद्वस्त्विच्छाविघातके चित्तविकारः । वीता विशेषतो गता रागभयक्रोधा येभ्यस्ते शुद्धदेहेन्द्रियमनस्का इत्यर्थः । एतेन ज्ञानसाधनमुक्तम् । अतो मन्मया मदात्मका वासुदेवात्मका वयमिति जातनिश्चयाः “ ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ” ‘ इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ’ इत्यादिश्रुतिस्मृतिभ्यः ।

एवंभूता मामुपाश्रिताः उक्तस्वरूपं मामेवार्चनवन्दनध्यानैः सेवितवन्तः, नतु देवान्तरभक्ताः। एतेन स्वप्राप्तिसाधनं सूचितम्। एवंभूता बहवो भक्ता ज्ञानतपसा मज्जन्मकर्मविषयकज्ञानमेव तपः सर्वकर्मभर्जकम् 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते' इति वक्ष्यमाणत्वात्। तेन पूता निरस्ताऽज्ञानतत्कार्यशुभाशुभवासनाः सन्तो मद्भावमागताः, मम यो भावः अपरिच्छिन्नज्ञानानन्दवत्त्वे सत्यप्राकृतप्रकाशानन्दविग्रहवत्त्वं तमागताः प्राप्ताः। स्वरूपभेदे सति "सर्वं ह पश्यः पश्यति" इति मुक्तौ सार्वज्ञ्ययोगोक्तेः सार्वज्ञ्यादिधर्माविर्भावेन विग्रहसाम्येन चाभेदं तादात्म्यलक्षणं भेदाभेदं प्राप्ता इत्यर्थः। भेदसहिष्णुरभेदस्तादात्म्यमिति भगवत्पतञ्जल्युक्ततादात्म्यलक्षणसमन्वयात्। एवं साधर्म्यवचनेन मुक्तौ स्वरूपैक्यवादः केवलभेदवादश्च बहुवचनेनात्मैक्यवादश्च स्पष्टं निरस्तः॥ १०॥

म० टी०—मामेति सोऽर्जुनेत्युक्तं तत्र स्वस्य सर्वमुक्तप्राप्यतया पुरुषार्थत्वमस्य मोक्षमार्गस्यानादिपरंपरागतत्वं च दर्शयति—**वीतरागेति**। रागस्तत्फलं तृष्णा, सर्वान्विषयान्परित्यज्य ज्ञानमार्गे कथं जीवितव्यमिति त्रासो भयं, सर्वविषयोच्छेदकोयं ज्ञानमार्गः कथं हितः स्यादिति द्वेषः क्रोधः, त एते रागभयक्रोधा वीता विवेकेन विगता येभ्यस्ते वीतरागभयक्रोधाः शुद्धसत्त्वाः। मन्मयाः मां परमात्मानं तत्पदार्थं त्वंपदार्थाभेदेन साक्षात्कृतवन्तः मदेकचित्ता वा। मामुपाश्रिता एकान्तप्रेमभक्त्या मामीश्वरं शरणं गताः। बहवोऽनेके ज्ञानतपसा ज्ञानमेव तपः सर्वकर्मक्षयहेतुत्वात् 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति हि वक्ष्यति तेन पूताः क्षीणसर्वपापाः सन्तो निरस्ताज्ञानतत्कार्यमलाः मद्भावं मद्रूपत्वं विशुद्धसच्चिदानन्दघनं मोक्षमागताः अज्ञानमात्रापनयेन मोक्षं प्राप्ताः। ज्ञानतपसा पूता जीवन्मुक्ताः सन्तो मद्भावं मद्विषयं भावं रत्याख्यं प्रेमाणमागता इति वा 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति हि वक्ष्यति॥ १०॥

शं० टी०—सर्वं ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वदर्शनयोगेन प्राञ्चो बहवो मुक्ता इति 'योगः प्रोक्तः पुरातनः' इति यदुक्तं योगस्य प्राक्तनत्वं तत्प्रतिपादयति—**वीतरागेति**। भोगेषूपकारिषु च राग आध्यात्मिकाद्युपद्रवेभ्यो भयं स्वस्यापकारिषु क्रोधः क्रोध इत्यापस्तम्बेनोक्तानां भूतदाहीयानां दुर्गुणानामुपलक्षणम्। तीव्रमुमुक्षया सदसद्विवेकवैराग्याभ्यां वीता विशिष्य निर्गता रागभयक्रोधा येषां ते वीतरागभयक्रोधाः। ज्ञानतपसा ज्ञानं ब्रह्मैवाहमिति साक्षाद्ब्रह्मण्येवात्मत्ववेदनमप्रतिबद्धं यत्तज्ज्ञानं तदेव तपः मुमुक्षोर्यतेः कर्तव्यम् 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इतिस्मरणात्तेन ज्ञानतपसा पूताः सम्यग्विनष्टानात्मस्वभावत्वेन शुद्ध आत्मा मनो येषां ते शुद्धात्मानो बहवो वामदेवादयो मुमुक्षवः स्वयं सर्वदा मामुपाश्रिताः मामपूर्वमनपरमनन्तरमबाह्यमाद्वितीयं परं ब्रह्मैवोपाश्रिता उपश्रयणं नाम सर्वं ब्रह्मैवेति बहिरन्तः सर्वत्र प्रत्यग्दृष्ट्या सदेकत्वदर्शनं तदेव कुर्वन्तः सन्तो मन्मया मदात्मना पूर्णा भूत्वा देहपातानन्तरं मद्भावं ब्रह्मात्मनावस्थानलक्षणमागता विदेहमुक्तिं प्राप्ता इत्यर्थः॥ १०॥

श्री० टी०—कथं जन्मकर्मज्ञानेन त्वत्प्राप्तिः स्यादित्यत्राह—**वीतरागेति**। अहं शुद्धसत्त्वावतारैर्धर्मपरिपालनं करोमीति मदीयं परमकारुणिकत्वं ज्ञात्वा वीता विगता रागभयक्रोधा येभ्यस्ते विक्षेपाभावात्। मन्मया मदेकचित्ता भूत्वा मामेवोपाश्रिताः सन्तो मत्प्रसादलभ्यं यदात्मज्ञानं च तपश्च तत्परिपाकहेतुः स्वधर्मः तयोर्द्वन्द्वैकवद्भावः तेन ज्ञानतपसा पूताः शुद्धा निरस्ताज्ञानतत्कार्यमलाः सन्तो मद्भावं मत्सायुज्यं प्राप्ता बहवः। न त्वधुनैवप्रवृत्तोऽयं मद्भक्तिमार्ग इत्यर्थः। तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्याविद्योपाधिभ्यां तत्त्वंपदार्थावीश्वरजीवौ प्रदर्श्येश्वरस्य चाविद्याभावेन नित्यशुद्धत्वाज्जीवस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः शुद्धस्य सतश्चिदंशेन तदैक्यमुक्तमिति द्रष्टव्यम्॥ १०॥

स० टी०—सर्वमुक्तजनैः प्राप्यं स्वात्मानं संप्रदर्श्य च॥ मोक्षाध्वनोऽप्यनादित्वं दर्शयत्यधुना हरिः

॥ १ ॥ तत्तत्फलैषणा रागो भयं भोगेषु दीनता ॥ विषयोच्छेदकत्वेन ज्ञानमार्गः कथं हितः ॥ २ ॥ इति द्वेषोऽत्र क्रोधोऽस्ति ते त्रयोऽत्यन्तदुःसहाः ॥ विवेकाद्विगता येभ्यः शुद्धसत्त्वा विरागिणः ॥ ३ ॥ तत्त्वंपदार्थाभेदेन मामेवाद्वयमान्तरम् ॥ साक्षात्कृत्यैव मद्रूपा मामेव शरणं गताः ॥ ४ ॥ ज्ञानमेव तपः सर्वकर्मविध्वंसकारणम् ॥ तेन पूताः परिक्षीणाज्ञानतत्कार्यकल्मषाः ॥ ५ ॥ बहवः सच्चिदानन्दघनं मद्भावमागताः ॥ ६ ॥ १० ॥

भा० टी०-अस्य मोक्षमार्गस्याधुनिकत्वं वारयति-**वीतेति** । रागो विषयेषु रञ्जनात्मकश्चित्तवृत्तिविशेषः । विषयत्यागान्नाशाच्च भयं, विषयप्राप्तौ विघ्नकर्तृषु ताडनाक्रोशनादिकर्तृषु च क्रोधः, वीता विगता रागादयो येभ्यस्ते । अत एव मन्मया ईश्वराभेददर्शिनः कर्मानुष्ठानसहभावं वारयति मामेव परमेश्वरमुपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः । 'तन्निष्ठस्य मोक्षोपदेशात्' इति न्यायात् । इतरकर्मानपेक्षाः केवलज्ञाननिष्ठा मुच्यन्त इति ज्ञापयन् विशिनष्टि बहवोऽनेके ज्ञानमेव तपस्तेन पूताः परां शुद्धिं गताः पूर्वेषामघानां नाशादुत्तरेषामसंबन्धाच्च 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' इति न्यायात्, मद्भावं ब्रह्मभावं मोक्षं प्राप्ताः । यत्तु मन्मयाः मदेकचित्ताः मामुपाश्रिता एकान्तभक्त्या मामीश्वरं शरणं गताः सन्तो मत्प्रसादलभ्यं यदात्मज्ञानं च तपश्च तत्परिपाकहेतुः स्वधर्मस्तयोः द्वन्द्वैकवद्भावः तेन पूताः शुद्धाः निरस्ता ज्ञानतत्कार्यमलाः मद्भावं सायुज्यं प्राप्ता इति तत्रेदं बोध्यं मन्मयशब्दार्थत्यागे कारणाभावात्, तच्छब्दार्थानुरोधेन मामुपाश्रिता इत्यस्यापि भाष्योक्तव्याख्यानमेव सम्यक् इति । यदपि यदात्मज्ञानं चेत्यादि तदपि न, समुच्चयप्रसङ्गात् । यत्तु मद्भावं मद्विषयं भावं रत्याख्यं प्रेमाणमागता इति वेति तच्चिन्त्यं, त्यक्त्वा देहमित्यादिपूर्वग्रन्थानुगुण्याभावप्रसङ्गात् ॥ १० ॥

प० टी०-अथ कथमेतावतैव त्वत्प्राप्तिः स्यादत आह-**वीतरागेति** । वीता अतिक्रान्ता रागभयक्रोधा येभ्यस्तेऽत एव मन्मया मदेकचित्ता भूत्वा मामेवोपाश्रिताः सन्तो मत्प्रसादाल्लब्धेन ज्ञानतपसा ज्ञानमात्मानात्मविवेकरूपं तपश्च तन्निमित्तरूपं कर्म तेन बहवो योगिनः पूताः शुद्धाः सन्तो मद्भावं मत्सायुज्यमागताः ॥ १० ॥

रा० टी०-एवं ज्ञात्वा मुक्ताः सन्ति किमित्यतः सन्तीत्याह-**वीतरागेति** । तज्ज्ञानस्य मुक्तिहेतुत्वं कुत इत्यतो वाह-**वीतेति** । अपगतरागभयक्रोधाः मन्मयाः मत्प्रधाना अहमेव प्रधान इति जानन्त इतियावत् । यद्वा मन्मया मत्प्रचुरा मामेव सर्वभूतेषु सत्ताप्रतीत्यादिप्रदं जानन्त इति यावत् । मामुपाश्रिताः मदेकशरणा बहवो ज्ञानाख्यतपसा ज्ञानेन तपसा चेति वा पूताः दग्धकर्माणः मद्भावं मयि सायुज्यलक्षणं भावं स्थितिमागताः प्राप्ताः ॥ १० ॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ॥
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

त० टी०-ननु यदि ज्ञानतपसा पूतानां निष्कामभक्तानामेवात्मभावं ददासि नान्येषां सकामभक्तानां तर्हि त्वय्यपि वैषम्यं स्यादित्याशंक्याह-**ये यथेति** । ये भक्ता यथा येन प्रकारेण सकामतया निष्कामतया च मां प्रपद्यन्ते उपासते तांस्तथैव तदीप्सितफलदानप्रकारेण भजामि अनुगृह्णामि । तत्रापि न केवलमात्मभक्तानेवापि तु अन्यदेवभक्तानप्यनुगृह्णामि । यतः सर्वशः सर्वप्रकारेण इन्द्रादिदेवानपि भजन्तो मनुष्या मम सर्वात्मभूतस्य वासुदेवस्य वर्त्म भजनमार्गमनुवर्तन्ते 'यमिन्द्रमाहुर्वरुणं यमाहुः स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्" इत्यादिश्रुतेः । "यदाह वसुधा सर्वं

सत्यमेतद्दिवौकसः । अहं भवो भवन्तश्च सर्वे नारायणात्मकाः" इति वैष्णवे। तस्माद्यं कंचिदपि भजतां कर्मफलदाता सर्वात्मा भगवान्वासुदेव एवेति फलितम् "फलमत उपपत्तेः" इति न्यायात् ॥ ११ ॥

म० टी०—ननु ये ज्ञानतपसा पूता निष्कामास्ते त्वद्भावं गच्छन्ति ये त्वपूताः सकामास्ते न गच्छन्तीति फलदातुस्तव वैषम्यनैर्घृण्ये स्यातामिति नेत्याह—ये यथेति । ये आर्ताः अर्थार्थिनो जिज्ञासवो ज्ञानिनश्च यथा येन प्रकारेण सकामतया निष्कामतया च मामीश्वरं सर्वफलदातारं प्रपद्यन्ते भजन्ति तांस्तथैव तदपेक्षितफलदानेनैव भजाम्यनुगृह्णाम्यहं न विपर्ययेण । तत्रामुमुक्षूनार्तानर्थार्थिनश्चार्तिहरणेनार्थदानेन चानुगृह्णामि " जिज्ञासून् विविदिषन्ति यज्ञेन " इत्यादिश्रुतिविहितनिष्कामकर्मानुष्ठातॄन् ज्ञानदानेन ज्ञानिनश्च मुमुक्षून् मोक्षदानेन न त्वन्यकामायान्यद्ददामीत्यर्थः । ननु तथापि स्वभक्तानामेव फलं ददासि नत्वन्यदेवभक्तानामिति वैषम्यं स्थितमेवेति नेत्याह—मम सर्वात्मनो वासुदेवस्य वर्त्म भजनमार्गं कर्मज्ञानलक्षणमनुवर्तन्ते हे पार्थ सर्वशः सर्वप्रकारैरिन्द्रादीनप्यनुवर्तमाना मनुष्या इति कर्माधिकारेण 'इन्द्रं मित्रं वरुणमग्निमाहुः" इत्यादिमन्त्रवर्णात् 'फलमत उपपत्तेः' इति न्यायाच्च सर्वरूपेणापि फलदाता भगवानेक एवेत्यर्थः । तथा च वक्ष्यति येऽप्यन्यदेवताभक्ता इत्यादि ॥ ११ ॥

शं० टी०—ननु सर्वे प्राणिनः सुधाब्धाविव त्वय्येवाद्वितीये परे ब्रह्मणि तिष्ठन्ति त्वदावासस्य सर्वसमत्वे केभ्यश्चिदेव तत्र मुक्तिं प्रयच्छसि नतु सर्वेभ्यः कस्तवायं पक्षपात इत्याशङ्कायां न, सुधाब्धिवासस्य सर्वसमत्वेऽपि निपीतसुधानामेवामरत्वं न त्वितरेषां यथा तथैव मय्यवस्थानस्य सर्वसमत्वेऽपि मामेकं परं भावं ये भजन्ति तेषामेव विमुक्तिर्न त्वपरं भावं भजतां कामिनामिति " तं यथा यथोपासते तथैव भवति " इत्येतच्छ्रुत्यर्थमनुसृत्याह—ये यथेति । 'द्वे रूपे वासुदेवस्य व्यक्तं चाव्यक्तमेव च । अव्यक्तं ब्रह्मणो रूपं व्यक्तमेतच्चराचरम् ' इति स्मरणादव्यक्तं निर्विशेषं परं ब्रह्म व्यक्तं तु मायोपाधिकमपरं ब्रह्म सकार्यमेवं व्यवस्थितं मत्तत्त्वं शास्त्राचार्योपदेशसंस्कृतस्वस्वप्रज्ञानुरूपेण तत्तद्विज्ञाय परंब्रह्मविदो वाप्यपरंब्रह्मविदोऽपि वा तत्तत्फलार्थिनो ये जना मामेवं द्वेधावस्थितं परमात्मानं यथा प्रपद्यन्ते ज्ञानयोगेन वाप्यन्यथा वा येन प्रकारेणोपासते तत्तत्साधननिष्ठान् तानुपासकान् तथैव यस्मिन् यस्मिन् तत्त्वे परिनिष्ठिता भवन्ति तत्तद्रूपेणैव प्रत्यक्षीभूय भजाम्यनुगृण्हामि तत्तद्वस्तूपासनानुरूपफलेन योजयामीत्यर्थः । ' यादृशी भावना यत्र सिद्धिर्भवति तादृशी ' इति नियमात्स्वस्वप्रज्ञाबलेन परिगृहीतवस्तूपासनानुरूपेणैव तेषां तेषां फलं सिध्यति नान्यथाऽतो मम न कश्चित्पक्षपात इति भावः । एवं ज्ञानकर्मयोगफलप्रदाने समभावेन मयि स्थिते सत्यपि शास्त्रार्थज्ञास्तदनुसारिणो ये मनुष्या ब्राह्मणादयो मुमुक्षवस्ते सर्वे ममेश्वरस्याभिमतं श्रुतिस्मृतिविहितं वर्त्म कर्ममार्गमेव अनुवर्न्तते । यद्वा ममेश्वरस्य कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्ते विशिष्य कर्मैव कुर्वन्तीत्यर्थः ॥ ११ ॥

श्री० टी०—ननु तर्हि किं त्वय्यापि वैषम्यमस्ति यस्मादेवं त्वदेकशरणानामेवात्मभावं ददासि नान्येषां सकामानामित्यत आह—ये यथेति । यथा येन प्रकारेण सकामतया निष्कामतया वा ये मां भजन्ति तानहं तथैव तदपेक्षितफलदानेन भजामि अनुगृह्णामि नतु ये सकामा मां विहायेन्द्रादीनेव भजन्ते तानहमुपेक्ष इति मन्तव्यम्। यतः सर्वशः सर्वप्रकारैः इन्द्रादिसेवका अपि ममैव वर्त्म भजनमार्गमनुवर्तन्ते इन्द्रादिरूपेणापि ममैव सेव्यत्वात् ॥ ११ ॥

स० टी०—ये ज्ञानतपसा पूतास्त्वद्भावं यान्ति ते जनाः ॥ नेतरे चेति वैषम्यं फलदातुस्तवेति चेत् ॥ १ ॥ शृण्वार्ता वित्तकामाश्च ज्ञानिनश्च मुमुक्षवः ॥ सकामत्वेन निष्कामतया ये मां यथेश्वरम् ॥ २ ॥ समस्तफलदातारं भजन्ते तांस्तथैव च । तदभीष्टप्रदानेन त्वनुगृह्णाम्यहं हरिः ॥ ३ ॥ आर्तानार्तिविनाशेन

वित्तदानेन चार्थिनः ॥ जिज्ञासून् ज्ञानदानेन ज्ञानिनो मोक्षदानतः ॥ ४ ॥ अनुगृह्णाम्यहं स्वामी नान्यकामाय चान्यथा ॥ फलार्थित्वे मुमुक्षुत्वे हरिरेव नृणां गतिः ॥ ५ ॥ इत्याहाखिलभूतानामात्मा स्वामी गुरुः सखा ॥ सर्वात्मनः परेशस्य मम मार्गे द्विधेरितम् ॥ ६ ॥ ज्ञानकर्मात्मकं सर्वे जीवाः कर्माधिकारिणः ॥ अनुवर्तन्त एवास्मिन्पार्थ सर्वप्रकारतः ॥ ७ ॥ अन्यदेवान्भजन्तोऽपि भजन्ते माखिलात्मकम् ॥८॥११॥

भा० टी०—एवं स्वस्मिन्प्रसक्तौ रागद्वेषौ वारयति--**य इति** । ये यथा येन प्रकारेण यदर्थं मोक्षार्थमर्थार्थमार्तिनिवृत्त्यर्थं ज्ञानार्थं च मां प्रपद्यन्ते भजन्ति तांस्तथैव तत्तत्फलप्रदानेनाहं समस्तफलप्रदाता परमेश्वरो भजामि अनुगृह्णामि । ये मनुष्याः यत्फलार्थितया यस्मिन्कर्मण्यधिकृता इन्द्रादिदेवतान्तरं यजन्ते सर्वशः सर्वप्रकारेण प्रवृत्तास्ते ममैव सर्वात्मनस्तत्कर्मात्मकं वर्त्म मार्गमनुवर्तन्ते । ये तु ये मनुष्याः मां सर्वशरीरस्थं यथा येन प्रकारेण शत्रुत्वेन मित्रत्वेन वा प्रपद्यन्ते प्राप्नुवन्ति तांस्तेनैव प्रकारेणाहमपि भजाम्यनुसरामि । ये तु मम वर्त्म भक्तिध्यानप्रणिधानात्मकमनुवर्तन्ते तान् ममात्मभूतान् तथैव सर्वशः सर्वप्रकारैरनुवर्तेऽहमिति. वर्णयन्ति तैस्स्वर्थान्तरं वर्णनीयमिति व्यग्रचित्तैः मामुपाश्रिताः यजन्त इति पूर्वोत्तरग्रन्थानुसारी प्रपद्यन्ते भजामीत्यनयोर्यथाश्रुतार्थः परित्यक्तः एतेन ममेत्यादिक्लिष्टकल्पनापि प्रत्युक्ता । इतरमनुष्या अपि मम वर्त्मानुवर्तन्ते त्वया तु मत्संबन्धिनापि मदनुवर्तनं न क्रियत इत्यत्याश्चर्यमिति द्योतयन्नाह पार्थेति ॥ ११ ॥

प० टी०—ननु तर्हि त्वय्यपि वैषम्यमस्ति यतस्त्वदेकशरणानामेवात्मभावं ददासि न कामात्मनामित्यत आह—**ये यथेति** । ये उपासकाः पुरुषा यथा यदुद्दिश्य मां प्रपद्यन्ते शरणं व्रजन्ति, अहमपि तांस्तथैव भजामि तं तमुद्देशं पूर्णीकरोमि । तदुक्तम् ‘ सुरद्रुमो यद्वदुपाश्रितार्थदः ’ इति । अथ तत्तदुद्देशप्रवर्तकोऽप्यहमेवेत्याह—**ममेति** । सर्वशः सर्वे मनुष्या मम वर्त्म मार्गमनुलक्ष्यीकृत्य वर्तन्ते सर्वान्तर्यामित्वेन तत्तद्गुणविशिष्टबुद्धीनां प्रेरकोऽप्यहमेवास्मि ॥ ११ ॥

रा० टी०—ननु सामान्यतो विष्णुं सर्वोत्तमं ज्ञात्वा अन्यदेवताः पितॄंश्चेष्ट्वान्ते तत्कर्म विष्णौ समर्पयन्ति ये त्रैविद्यास्तेषामपि मोक्षश्चेत्को विशेषस्त्वामुपाश्रितानामित्यतो न ज्ञानिनां त्रैविद्यानां च फलसाम्यं तत्तत्सेवानुसारेणैव मोक्षस्वर्गरूपभिन्नफलदानात्सेवायाश्च वैषम्यादितो न वैषम्यादिदोष इति भावेनाह—**ये यथेति** । ये ज्ञानिनस्त्रैविद्या वा यथा येन प्रकारेण मोक्षेच्छया मद्यजनप्रकारेण स्वर्गादीच्छया अन्यदेवतायजनप्रकारेण मां प्रपद्यन्ते तांस्तथैव तत्तद्भजनानुसारेणाहं भजामि मोक्षस्वर्गफलदानेन सेवेत गुणभावेनेत्यर्थः । फलतारतम्यहेतुरयं ज्ञानिभ्यस्त्रैविद्यानां सेवायां विशेषः किंप्रकार इत्यत आह—**ममेति** । हे पार्थ सर्वशः सर्वे ज्ञानिनः त्रैविद्याश्च मनुष्याः ममवर्त्मानुवर्तन्ते मत्कर्मकर्तृत्वात्तद्यागीयहविरादिभोक्तृत्वान्मम वर्त्मानुवर्तिन एव सर्व इत्यर्थः ॥ ११ ॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ॥
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

त० टी०—एवं चेत्तर्हि सर्वे जना निष्कामा भूत्वा मोक्षार्थं साक्षात्त्वामेव कुतो नाश्रयन्ते इत्यत आह—**कांक्षन्त इति** । कर्मणां सिद्धिं धनस्त्रीपुत्रपश्वादिप्राप्तिरूपां सिद्धिं कांक्षन्तो वाञ्छन्तः प्राय इह कर्माधिकारिणि मनुष्यलोके देवता इन्द्रादीनेव यजन्ते, नतु साक्षान्मां भजन्ते । कुतः हि यस्मात्कर्मजा सिद्धिः देवताराधनजं कर्म क्षुद्रफलं क्षिप्रं शीघ्रं भवति, ज्ञानफलो मोक्षस्तु न शीघ्रं भवति तस्यानेकजन्मसाधनसिद्धिलभ्यत्वात् ‘ अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ’ इति

वक्ष्यति। अतस्तेषां मुमुक्षाभावात् क्षुद्रफलसिद्ध्यर्थं क्षुद्रफलदा देवता एव यजन्ते, न साक्षान्मामाश्रयन्ते इति भावः ॥ १२ ॥

म० टी०—ननु त्वामेव भगवन्तं वासुदेवं किमिति सर्वे न प्रपद्यन्त इति तत्राह—**काङ्क्षन्त इति**। कर्मणां सिद्धिं फलनिष्पत्तिं काङ्क्षन्त इह लोके देवताः देवान् इन्द्राग्न्याद्यान् यजन्ते पूजयन्ति अज्ञानप्रतिहतत्वान्न तु निष्कामाः सन्तो मां भगवन्तम्। वासुदेवमिति शेषः। कस्मात् हि यस्मात् इन्द्रादिदेवतायाजिनां तत्फलकाङ्क्षिणां कर्मजा सिद्धिः कर्मजन्यं फलं क्षिप्रं शीघ्रमेव भवति मानुषे लोके, ज्ञानफलं त्वन्तःकरणशुद्धिसापेक्षत्वान्न क्षिप्रं प्रभवति। मानुषे लोके कर्मफलं शीघ्रं भवतीति विशेषणादन्यलोकेऽपि वर्णाश्रमधर्मव्यतिरिक्तकर्मफलसिद्धिर्भगवता सूचिता। यतस्तत्तत्क्षुद्रफलसिद्ध्यर्थं सकामा मोक्षविमुखाः अन्या देवता यजन्तेऽतो न मुमुक्षव इव मां वासुदेवं साक्षात्ते प्रपद्यन्त इत्यर्थः ॥ १२ ॥

शं० टी०—ननु मोक्षस्य सन्निकृष्टकारणं प्रकृष्टं सर्वश्रुतिप्रसिद्धं ज्ञानयोगमुत्सृज्य पण्डिता अपि किं कर्ममार्गमनुतिष्ठन्तीत्याशङ्कायां न ज्ञानयोगस्य चित्तशुद्ध्येकलभ्यत्वात्तदसिद्धौ सर्वकर्मसंन्यस्य ज्ञानयोगे प्रवृत्तस्य ज्ञाननिष्ठाऽसंभवात्तदसिद्धौ मोक्षासिद्धेस्तेन ज्ञानकर्मफलयोरुभयोरपि भ्रंशः स्यात्ततो मोक्षस्यादिमं परं कारणं चित्तशुद्धिरेव कर्मभिः संपादनीयेति विचक्षणाः कर्मैव कुर्वन्तीत्याशयेनाह—**कांक्षन्त इति**। इहास्मिन् लोके देवता इन्द्राग्न्यादिदेवान् तत्प्रसादसिद्धये यजन्त आज्यादिहविषाऽऽराधयन्तः पण्डिताः कर्मणां श्रद्धाभक्तिभ्यां नियमेनानुष्ठितानां श्रौतादीनामनुष्ठानेन लब्धां सिद्धिं सत्त्वशुद्धिलक्षणां काङ्क्षन्तो मम वर्त्मानुवर्तन्त इति पूर्वेणान्वयः। ननु हठादियोगैरपि धीशुद्धिः संपादयितुं शक्यते किं कर्मणेत्याशङ्कायां न तेषामवैदिकत्वाद्ब्राह्मणस्याऽविहितत्वाच्च कर्तुमयोग्यत्वात्कृतैरपि तैश्चित्तशुद्धेर्बहुकालभाव्यत्वाच्चावश्यं ब्राह्मणस्य मुमुक्षोः कर्मणैव भवितव्यमित्याशयेनाह—**क्षिप्रमिति**। हि यस्मात्कारणान्मानुषे लोके कर्मभूमौ कर्मजा वैदिककर्मानुष्ठानसंपन्ना सिद्धिश्चित्तशुद्धिलक्षणा क्षिप्रं शीघ्रमेव भवति यज्ञैराराधितानां देवानां प्रसादाच्छीघ्रमेव मनः प्रसीदतीत्यर्थः। मानुषे लोके सिद्धिरित्युक्तिर्मनुष्यलोक एव चातुर्वर्ण्यं चातुराश्रम्यं कर्मविधिश्च नास्त्यन्यत्र लोक इति सूचितं भवति ॥ १२ ॥

श्री० टी०—तर्हि मोक्षार्थमेव किमिति सर्वे त्वां न भजन्तीत्यत आह—**काङ्क्षन्त इति**। कर्मणां सिद्धिं फलं काङ्क्षन्तः प्रायशः इह मनुष्यलोके इन्द्रादिदेवता एव यजन्ते नतु साक्षान्मामेव हि यस्मात्कर्मजा सिद्धिः कर्मजं फलं शीघ्रं भवति नतु ज्ञानफलं कैवल्यं दुष्प्राप्यत्वाज्ज्ञानस्य ॥ १२ ॥

स० टी०—ननु त्वामेव सर्वेशं न भजन्ते कुतोऽखिलाः ॥ सर्वाभीष्टप्रदातारमित्यत्राह रमापतिः ॥ १ ॥ कर्मणां फलनिष्पत्तिं प्रार्थयन्तो जना इह ॥ पूजयन्तीन्द्रवह्न्यादीनज्ञानहतबुद्धयः ॥ २ ॥ कर्मजन्यं फलं यस्मादिन्द्रवह्न्यादियाजिनाम् ॥ तत्फलं कांक्षिणां पुंसां शीघ्रं भवति भारत ॥ ३ ॥ तत्त्वज्ञानफलं बुद्धिशुद्धिसाक्षेपभावतः ॥ न शीघ्रं भवतीत्यस्मादन्यान्देवान्भजन्ति ते ॥ ४ ॥ क्षिप्रं हि मानुषे लोके इत्यस्मात्तु विशेषणात् ॥ अन्यलोकेऽप्युपासादिकर्मजा सिद्धिरूहिता ॥ ५ ॥ सकामा मोक्षविमुखास्तत्तत्क्षुद्रफलाप्तये ॥ अन्यदेवान्यजन्तेऽतो मां भजन्ति मुमुक्षवः ॥ ६ ॥ १२ ॥

भा० टी०—ननु वासुदेवः सर्वमितिज्ञानार्थं सर्वे त्वामेव कुतो नानुवर्तन्त इत्याशङ्क्य मम वर्त्मेत्यादि विवृण्वन् तत्र कारणमाह—**काङ्क्षन्त इति**। काङ्क्षन्तः प्रार्थयन्त इहास्मिँल्लोके इन्द्राग्न्यादयः देवता यजन्ते हि यस्मान्मानुषे लोके काम्यकर्मजा सिद्धिः फलं क्षिप्रं शीघ्रं भवति। क्षिप्रं मानुषे लोके इति विशेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्।मानुषे लोके वर्णाश्रमादिकर्माणीति विशेषः ॥ १२ ॥

प० टी०—अथ तदेव प्रकटयन्नाह द्वाभ्याम्—**काङ्क्षन्त इति**। केऽपि कर्मणां सिद्धिं काङ्क्षन्तः सन्तो

देवता इन्द्रादीन्यजन्ते, तेषां हीति निश्चयेन कर्मजा सिद्धिरिहैव मनुष्यलोके क्षिप्रं शीघ्रं भवति न तु जन्मान्तरविलम्बेन, यतो यद्देवतार्पणं कुर्वन्ति तेन तद्देवतां तर्पयाम्यहमेव संतर्पितो भूत्वा तत्तद्देवतारूपेण कामान् पूरयामीत्यर्थः ॥ १२ ॥

रा० टी०—एतावान्विशेषः—**काङ्क्षन्त इति** । अहमेव सर्वयज्ञानां भोक्ता प्रेरकश्च । तदेतज्ज्ञात्वा भागवताः निष्कामाः मामेव यजन्ते त्रैविद्यास्ते तत्तत्त्वमजानानाः कर्मणां सिद्धिं काङ्क्षन्तः अन्यदेवता इह यजन्त इति । ननु मम वर्त्मानुवर्तन्त इति यत्सर्वकर्मकर्तृत्वं सर्वकर्मभोक्तृत्वं चोक्तं तत्र सर्वकर्मकर्तृत्वं जीवानामस्वातन्त्र्यदर्शनात्सिद्धं, यज्ञादिभोक्तृत्वं कुतो मानाज्ज्ञेयमित्यत आह—**क्षिप्रं हीति** । यस्मान्मानुषे लोके कर्मजा सिद्धिः कर्मजं फलं क्षिप्रं शीघ्रं भवति तस्मान्मम वर्त्मानुवर्तन्ते सर्वयज्ञभोक्तेतियावत्।भगवतः सर्वयज्ञभोक्तृत्वादेव तत्फलमिह यजमानस्य क्षिप्रमुपलभ्यते नान्यथा । "तस्मात्ते धनसनयः" "फलमत उपपत्तेः" इति श्रुतिसूत्रादिना हरेरेव फलदातृत्वादिति भावः । यद्वा त्रैविद्यानामन्यदेवतायाजित्वात्कथमुच्यते मां प्रपद्यन्त इत्यत इह लोके अन्यदेवता यजन्तः यजिकर्मणां सिद्धिं काङ्क्षन्तः सर्वशो मनुष्यास्त्रैविद्या अन्ते मयि तत्कर्मसमर्पणेन मम वर्त्मानुवर्तन्ते वैष्णवमार्गमेव अनुसृता भवन्ति।कुत एतत्, हि यस्मात्कर्मजा सिद्धिरिह लोके क्षिप्रं भवति अत इति । अन्यथा तन्न स्यादिति भावः ॥ १२ ॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

त० टी०—ननु केचिदेव साक्षात्त्वां भजन्ते नतु सर्वे, तर्हि तेऽन्यदेवताभक्ता विषमस्वभावाः केन सृष्टाः, कस्येदं वैषम्यमिति चेत्तत्राह—चातुर्वर्ण्यमिति । चत्वारो वर्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ् । मयेश्वरेण सृष्टमुत्पादितं, कथं गुणकर्मविभागशः, गुणविभागेन कर्मविभागेन चेत्यर्थः । तत्र सत्त्वप्रधाना ब्राह्मणास्तेषां सात्त्विकानि शमदमादीनि कर्माणि । सत्त्वोपसर्जनरजःप्रधानाः क्षत्रियास्तेषां च तादृशानि शौर्यतेजोयुद्धादीनि कर्माणि । तमउपसर्जनरजःप्रधाना वैश्यास्तेषां च तादृशानि कृष्यादीनि कर्माणि । रजउपसर्जनतमःप्रधानाः शूद्रास्तेषां च तादृशानि त्रैवर्णिकशुश्रूषादीनि कर्माणि । तस्य विषमस्वभावस्य चातुर्वर्ण्यस्य कर्तारमपि मामकर्तारं वैषम्यकर्तृत्वशून्यं विद्धि । कुतः, यतोऽव्ययं स्वरूपगुणशक्तिविग्रहान्यथाभावरहितं निर्विकारमित्यर्थः ॥ १३ ॥

म० टी०—शरीरारम्भकगुणवैषम्यादपि न सर्वे समानस्वभावा इत्याह—**चातुर्वर्ण्यमिति** । चत्वारो वर्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ्। मयेश्वरेण सृष्टमुत्पादितं गुणकर्मविभागशः गुणविभागशः कर्मविभागशश्च। तथाहि सत्त्वप्रधाना ब्राह्मणास्तेषां च सात्त्विकानि शमदमादीनि कर्माणि, सत्त्वोपसर्जनरजःप्रधानाः क्षत्रियास्तेषां च तादृशानि शौर्यतेजःप्रभृतीनि कर्माणि तमोपसर्जनरजःप्रधाना वैश्यास्तेषां च कृष्यादीनि तादृशानि कर्माणि, तमःप्रधानाः शूद्रास्तेषां च तामसानि त्रैवर्णिकशुश्रूषादीनि कर्माणीति मानुषे लोके व्यवस्थितानि । एवं तर्हि विषमस्वभावचातुर्वर्ण्यस्रष्टृत्वेन तव वैषम्यं दुर्वारमित्याशङ्क्य नेत्याह—**तस्येति** । तस्य विषमस्वभावस्य चातुर्वर्ण्यस्य व्यवहारदृष्ट्या कर्तारमपि मां परमार्थदृष्ट्या विद्ध्यकर्तारमव्ययं निरहंकारत्वेनाक्षीणमहिमानम् ॥ १३ ॥

शं० टी०—मम वर्त्मानुवर्तन्त इत्यत्र मत्कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्त इति यदुक्तं तद्विस्पष्टयति—**चातुर्वर्ण्यमिति** । गुणकर्मविभागशः, गुणानां सत्त्वादीनां कर्मणां शमादीनां च विभागेन रजउपसर्जनसत्त्वप्रधानस्य ब्राह्मणस्य शमदमादयः कर्माणि, सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजोधृत्यादयः

कर्माणि, तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजउपसर्जनतमःप्रधानस्य शूद्रस्य परिचर्यात्मकं कर्म, एवं गुणकर्मविभागशश्चातुर्वर्ण्यं चत्वारो वर्णा एव चातुर्वर्ण्यं चातुराश्रम्यं च सर्गादौ मया सृष्टमत एव मम वर्त्मानुवर्तन्ते मनुष्याः इति यदुक्तं तत्सिद्धम् "यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते" इति श्रवणात्तवापि तर्हि चातुर्वर्ण्यसृष्टिकर्मकर्तुस्तत्फलेन जन्मादिना संबन्धसंभवान्न नित्यत्वेश्वरत्वादिः सिध्यतीत्याशङ्कायां न विकल्पो नहि वस्तु " मायामात्रमिदं द्वैतम् " इतिश्रवणात् स्रष्टृस्रष्टव्यादेर्मायिकत्वेन मिथ्यात्वान्निष्कलस्य निष्क्रियस्याविक्रियस्य मम सर्जनादिक्रियाऽयोगाद्वस्तुतो मामकर्तारमेव विजानीहीत्याह—**तस्येति** । तस्य चातुर्वर्ण्यस्य प्रपञ्चस्य च मायया कर्तारमपि मायामोहितचित्तानां कर्तृत्वेन प्रतीयमानं मां परमात्मानमकर्तारं निर्गुणत्वाद्वस्तुतः कर्तृत्वादिधर्मशून्यमेव विद्धि । तदभावे कर्माऽसंभूतौ तत्फलजन्माद्यसंभवादव्ययं नाशरहितं नित्यशुद्धबुद्धमुक्तस्वभावमेव विजानीहीत्यर्थः ॥ १३ ॥

श्री० टी०—ननु केचित्सकामतया प्रवर्तन्ते केचिन्निष्कामतयेति कर्मवैचित्र्यं तत्कर्तृणां च ब्राह्मणादीनामुत्तममध्यमादिवैचित्र्यं कुर्वतस्तव कथं वैषम्यं नास्तीत्याशङ्क्याह—**चातुर्वर्ण्यमिति** । चत्वारो वर्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ्प्रत्ययः । अयमर्थः । सत्त्वप्रधाना ब्राह्मणास्तेषां शमदमादीनि कर्माणि, सत्त्वरजःप्रधानाः क्षत्रियास्तेषां च शौर्ययुद्धादीनि कर्माणि, रजस्तमःप्रधाना वैश्यास्तेषां कृषिवाणिज्यादीनि कर्माणि, तमःप्रधानाः शूद्रास्तेषां च त्रैवर्णिकशुश्रूषादिकर्माणीत्येवंगुणानां कर्मणां च विभागैश्चातुर्वर्ण्यं मयैव सृष्टमिति सत्यं तथाप्येवं तस्य कर्तारमपि फलतोऽकर्तारमेव मां विद्धि । तत्र हेतुः अव्ययम्, आसक्तिराहित्येन श्रमरहितं नाशादिरहितम् ॥ १३ ॥

स० टी०—गुणानामपि वैषम्याच्छरीरारम्भकारिणाम् ॥ न सर्वे तुल्यशीलाः स्युरित्याह प्रकृतेः पतिः ॥ १ ॥ चत्वार एव वर्णास्ते ष्यञः स्वार्थे विधानतः ॥ गुणकर्मविभागेन वर्णास्ते ब्राह्मणादयः ॥ २ ॥ चत्वारो निर्मिताः सर्गे मया भगवता यतः ॥ सत्त्वप्रधाना ये विप्रास्तेषां कर्म शमादिकम् ॥ ३ ॥ सत्त्वगौणरजोमुख्या नृपाः शौर्यादिकर्मिणः ॥ तमोगौणरजोमुख्या वैश्याः कृष्यादिकर्मिणः ॥ ४ ॥ तमःप्रधानाः शूद्रास्तत्कर्म शुश्रूषणादिकम् ॥ तदिदं मानुषे लोके चातुर्वर्ण्यं व्यवस्थितम् ॥ ५ ॥ एवं वैषम्यसृष्टेस्ते कर्तृत्वात्तत्फलेन च ॥ संबन्धो दुर्निवारः स्यादित्यतः प्राह माधवः ॥ ६ ॥ व्यवहारदृशा तस्य चातुर्वर्ण्यस्य सर्वशः ॥ कर्तारं सन्तमपि मां परमार्थदृशाऽव्ययम् ॥७॥ विद्ध्यकर्तारमक्षीणस्वभावमनहंकृतिम् ॥ निर्विकारतया सन्तं मां ज्ञात्वा मुच्यते भयात् ॥ ८ ॥ १३ ॥

भा० टी०—कस्मात्पुनः कारणात्तवैव वर्त्मानुवर्तन्ते नान्यस्येत्यत आह, यद्वा मानुष एव लोके वर्णाश्रमकर्माधिकारो नान्येष्विति नियमः किंनिमित्त इति तत्राह—**चातुर्वर्ण्यमिति** । यत्तु ननु च केचित्सकामतया वर्तन्ते केचिन्निष्कामतयेति कर्मवैचित्र्यं तत्कर्तृणां ब्राह्मणादीनामुत्तममध्यमादिवैचित्र्यं च कुर्वतस्तव कथं वैषम्यं नास्तीत्याशङ्क्याहेति तदुपेक्ष्यं भाष्योक्तरीत्याऽव्यवहितेन संबन्धे संभवति व्यवहितसंबन्धेनोत्थानानौचित्यात् । शरीरारम्भकगुणवैषम्यादपि न सर्वे समानस्वभावा इत्याहेति वा । अस्मिन्पक्षे गुणकर्मविभागशश्चातुर्वर्ण्यमुत्पन्नमित्येतावतैव निर्वाहे मया सृष्टमित्यस्य प्रयोजनं चिन्त्यम् । चत्वार एव वर्णाश्चातुर्वर्ण्यं गुणविभागशः कर्मविभागशश्च सत्त्वप्रधानस्य ब्राह्मणस्य शमदमादीनि कर्माणि, सत्त्वोपसर्जनरजःप्रधानस्य राजन्यस्य शौर्यादीनि, तमउपसर्जनस्य रजःप्रधानस्य वैश्यस्य कृष्यादीनि, रजउपसर्जनस्य तमःप्रधानस्य शूद्रस्य त्रैवर्णिकशुश्रूषैवेत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मयेश्वरेण सृष्टम् । चतुर्णां वर्णानां हितं चातुर्वर्ण्यं गुणाश्च कर्माणि चेति गुणकर्म द्वन्द्वैकवद्भावः कर्माण्यग्निहोत्रादीनि गुणाश्च द्रव्यदेवतारूपाः, विभागशः साधारणासाधारणविभागेन । तथाहि । दानजपादिकं सर्वसाधारणम्, अग्निहोत्रादिकं

त्रैवर्णिकस्यैव न शूद्रस्य राजसूयादिकं राज्ञ एव नेतरेषामिति विभागो दृश्यते। यतश्चातुर्वर्ण्यं गुणकर्म च मया सृष्टं ततोऽन्यदेवतानामपि मदुक्तस्थत्वात् पुत्रप्रीत्या पितुरिव तत्प्रीत्या ममैव तृप्तिरस्तीत्यर्थस्तु विभागपदेन साकाङ्क्षेण गुणकर्मणोः समासस्यौचित्यमभिप्रेत्याचार्यैर्न प्रदर्शित इति बोध्यम् । एवं तर्हि चातुर्वर्ण्यस्य विषमस्वभावस्य सृष्ट्यादेस्तन्निष्ठव्यापारस्य च निर्वर्तकत्वात्, वैषम्यस्य कर्मफलस्य कर्तृगामित्वात् कर्तृत्वभोक्तृत्वयोश्च त्वयि प्रसङ्गात् संसारित्वादिकं ते स्यादित्याशङ्क्य मायया कर्तृत्वं न वस्तुत इत्यतो नित्यमुक्तस्य मम संसारित्वस्याभाव इत्याशयेनाह—**तस्येति**। तस्य चातुर्वर्ण्यस्य मायिकेन व्यवहारेण कर्तारमपि मां परमार्थतोऽकर्तारं विद्धि, अत एव कर्तृत्वाभावादभोक्तृत्वादिसिद्ध्याऽव्ययमविकारिणमक्षीणमहिमानम्, असंसारिणमिति यावत् । आसक्तिराहित्येन श्रमरहितमित्यर्थस्त्वयुक्तः, फलासक्तिरहितानां जीवानां श्रमस्योपलब्धेः ॥ १३ ॥

प० टी०—अथ वैषम्यपरिहारार्थमाह—**चातुर्वर्ण्यमिति** । चतुर्णां वर्णानां भावश्चातुर्वर्ण्यं ब्रह्मक्षत्रविट्शूद्ररूपं गुणकर्मविभागशो मयैव सृष्टम् । गुणाः सत्त्वादयः, कर्म वर्णाश्रमोचितं, तद्विभागेन तत्तद्वर्णोचितेन निर्मितं विराड्रूपेण । तस्य चातुर्वर्ण्यस्य विराड्रूपेणैव कर्तारं मां विद्धि जानीहि । तथाव्ययमक्षरं शुद्धस्वरूपमसङ्गमकर्तारं विद्धि । अत्र शातपथी श्रुतिः "तदेतद्ब्रह्मक्षत्रविट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः" इति। भाष्यम्, ब्रह्मक्षत्रविट्शूद्र इति यच्चातुर्वर्ण्यं तदेतत् । तत्किं तत्तेष्वग्निना वैश्वानरापरपर्यायेण विराड्रूपेण समष्टिना देवेषु ब्रह्माभवत्, स एव मनुष्येषु क्षत्रियोऽभवत्, तथा देवेषु षड्विधेन वसुरुद्रादित्यादिना वैश्येन मनुष्येषु वैश्योऽभवत्, तथा देवेष्वेकविधेन पूषसंज्ञकेन शूद्रेण मनुष्येषु शूद्रोऽभवत् । तथा "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः" इत्यपि ॥ १३ ॥

रा० टी०—भगवद्भजनं विना कुतो न फलमित्यतो वा ज्ञानिनामिव त्रैविद्यानामपि कुतो न महाफलमित्यतो वा तस्य पितृत्वात्पितरं परित्यज्यान्यदेवतायाजिनां फलप्राप्तिरेव नास्ति कुतो महाफलप्राप्तिरितिभावेनाह—**चातुर्वर्ण्यमिति** । चत्वारो वर्णाश्चातुर्वर्ण्यम् । "चतुर्वर्णादिभ्यः स्वार्थ उपसंख्यानम्" इत्युक्तेः स्वार्थे ष्यञ् । यद्वा चतुर्णां वर्णानां समूहश्चातुर्वर्ण्यम् 'विचित्रा हि तद्धितगतिः' इति समूहार्थे ष्यञ् । गुणकर्मविभागशः, सत्त्वादिगुणविभागेन कर्मविभागेन च चातुर्वर्ण्यं चतुर्वर्णसंघो मया सृष्टः। जनाः सात्त्विकसात्त्विकाः राजससात्त्विकास्तामससात्त्विकाश्चेति त्रिविधाः । तत्र राजससात्त्विकानामत्र ग्रहणम् 'राजसास्तु नरा विप्राः' इत्यष्टादशतात्पर्योक्तेः "सात्त्विको ब्राह्मणः" इत्याद्येतद्भाष्योक्तेश्च । तथाच अतिसत्त्वाधिकरजोगुणयुक्ताः ब्राह्मणाः, किंचित्सत्त्वाधिकरजोगुणयुक्ताः क्षत्रियाः, तमोपेक्षयाधिकं समसत्त्वं यद्रजस्तद्युक्ता वैश्याः, रजोपेक्षयाधिकतमउपेतः तमोपेक्षयाधिकसत्त्वोपेतश्च शूद्र इति गुणविभागकृतो ब्राह्मणादिवर्णः । ब्राह्मणादियोग्यकर्मविभागस्तु, अष्टादशाध्याये शमो दम इत्यादिश्लोकत्रयेण वक्ष्यते । ननु यथा भवान्सर्वस्य कर्ता तथा तवाप्यन्यः कर्तास्ति किमित्यत आह—**तस्येति** । तस्य चातुर्वर्ण्यस्याव्ययं कर्तारं मां विद्धि। तथाऽकर्तारत्रपि कर्त्रन्तरहीनमपि विद्धि। मेऽन्यः कर्ता नास्तीत्यपि विद्धीत्यर्थः । यद्वा यदि त्वया चत्वारो वर्णाः सृष्टास्तर्हि कर्तृत्वाज्जीववत्तवापि कर्मलेपः स्यादित्यतः कर्मलेपाभावं न मामित्यादिना वक्तुं लेपाभावे हेतुं तावदाह—**तस्येति**। तस्य कर्तारमपि मां जीवविलक्षणकर्तृत्वादकर्तारं कर्तृत्वहीनं विद्धीति ॥ १३॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ॥
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते॥ १४ ॥

क० त० टी०—एतत्कुतस्तत्राह—**न मामिति** । कर्माणि विविधजगत्सृष्ट्यादीनि तन्निमित्तानुगुणकर्तारं सर्वज्ञं मां न लिम्पन्ति, तद्वैषम्यजन्यपुण्यपापानि न स्पृशन्तीत्यर्थः । अयं भावः । यथा व्रीह्याम्रकण्टक्यादीनां विषमाणामुत्पत्तौ पर्जन्यस्यासाधारणकारणत्वेऽपि वैषम्यस्य तत्तद्बीजवृत्तित्वेन न पर्जन्ये तत्प्रसक्तिः, तथैवोत्तमाधमगुणकर्मविशिष्टसौम्यक्रूरस्वभावसुखिदुःखिविविधजीवसृष्टौ तत्फलदाने च वासुदेवस्य भगवतोऽसाधारणकारणत्वेऽपि वैषम्यस्य तत्तद्बीजात्मकानादिकर्मनिष्ठत्वेन परमेश्वरे भगवति न वैषम्यनैर्घृण्यप्रसक्तिरिति। तथा चाह भगवान्सूत्रकारः—"वैषम्यनैर्घृण्ये न सापेक्षत्वात्" इति। तत्र हेतुमाह—**न मे कर्मफले स्पृहेति** । यथा आत्मबन्धुमित्राणां सुखस्पृहया सुखहेतुकं कर्म कुर्वन्ति, स्ववैरिदुःखस्पृहया तथाभूतं कर्म कुर्वन्ति । न यथोत्तमाधमसुखदुःखविशिष्टप्राणिसर्जनात्मककर्मणां मे फले स्पृहाऽस्ति, आप्तकामत्वात् । न किंचित्फलोद्देशेन करोमीत्यर्थः । इति उक्तप्रकारेण जगत्सृष्ट्यादेः कर्तारमकर्तारं तत्कर्मसङ्गरहितं च यो मां साक्षाज्जानाति स कर्मभिः क्रियमाणैर्न बद्ध्यते ॥ १४ ॥

म० टी०—न मामिति । कर्माणि विश्वसर्गादीनि मां निरहंकारत्वेन कर्तृत्वाभिमानहीनं भगवन्तं न लिम्पन्ति देहारम्भकत्वेन न बध्नन्ति । एवं कर्तृत्वं निराकृत्य भोक्तृत्वं निराकरोति न मे ममाप्तकामस्य कर्मफले स्पृहा तृष्णा 'आप्तकामस्य का स्पृहा'' इति श्रुतेः कर्तृत्वाभिमानफलस्पृहाभ्यां हि कर्माणि लिम्पन्ति तदभावान्न मां कर्माणि लिम्पन्तीति एवं योऽन्योपि मामकर्तारमभोक्तारं चात्मत्वेनाभिजानाति कर्मभिर्न स बध्यते अकर्त्रात्मज्ञानेन मुच्यत इत्यर्थः ॥ १४ ॥

शं० टी०—परस्य ब्रह्मणो ममोपाधिद्वयं मायातत्कार्ये न स्वस्य कूटस्थासङ्गचिद्रूपत्वेन मायातत्कार्यसंबन्धासंभवान्मायाकर्तृकैर्जगत्सृष्ट्यादिकर्मभिःश्लेषो यथा नास्ति तथा प्रत्यग्रूपस्य ममासङ्गत्वेन देहेन्द्रियादिकृतकर्मभिरपि श्लेषो नास्त्येवं कर्तृत्वभोक्तृत्वादिधर्मशून्यं मां परमात्मानं श्रवणमननादिसंजातविज्ञानबलेन यः स्वात्मत्वेन विज्ञाय कर्मणि प्रवर्तते स कर्मभिर्न बध्यत इत्याह—**न मामिति**। कूटस्थासङ्गचिद्रूपत्वेन बुद्ध्यादिसबन्धशून्यस्य मे प्रत्यगात्मनः कर्मफले कर्मसु तज्जन्यफलेषु च न स्पृहास्ति।स्पृहाया बुद्धिधर्मत्वाद्बुद्ध्यादिसाक्षिणोऽविकारिणो मम तद्धर्मायोगान्न कर्मफलेच्छा संभवत्यत एव न मां कर्माणि लिम्पन्ति ''स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत इति'' कामिन एव कर्मसंकल्पतदारम्भश्रवणात्कर्मफलेच्छुनैव विज्ञात्मना कर्माणि क्रियन्ते नत्वकामिना अक्रियेण मया अतो न बुद्ध्यादिभिः कृतानि कर्माणि मामकर्तारं कर्मतत्कर्तृसाक्षिणं लिम्पन्ति स्पृशन्ति। येन यत्कर्म क्रियते फलेच्छुना स तेन कर्मणा लिप्यते तैलवन्नान्यस्ततो बुद्ध्यादेः कर्मकर्तुरन्यस्य बुद्ध्यादिकृतकर्माणि लेपाय न भवन्ति, इत्येवं कर्मफलेच्छारहितं कर्मणामकर्तारमभोक्तारं चाकाशवत्सर्वगतमसङ्गमविक्रियं बुद्धितद्धर्मतत्कर्मतदवस्थासाक्षिणं मां परमात्मानं स्वतत्त्वं योऽभिजानाति सम्यगाभिमुख्येन अयमेवाहमस्मीति साक्षात्स्वात्मना यो वेत्ति स विद्वानाधिकारिको लोकसंग्रहार्थं कृतैः कर्मभिर्न बध्यते कृतानि कर्माण्यमुष्य देहारम्भकाणि न भवन्तीत्यर्थः ॥ १४ ॥

श्री० टी०—तदेव दर्शयन्नाह—न मामिति । कर्माणि विश्वसृष्ट्यादीन्यपि मां न लिम्पन्ति आसक्तं न कुर्वन्ति निरहंकारत्वात् आप्तकामत्वेन मम कर्मफले स्पृहाभावाच्च । मां न लिम्पन्तीति किं वक्तव्यं यतः कर्मफले स्पृहाराहित्येन मां योऽभिजानाति सोऽपि कर्मभिर्न बद्ध्यते। मम निर्लेपत्वे कारणं निरहंकारत्वनिःस्पृहत्वादिकं जानतस्तस्याप्यहंकारादिशैथिल्यात् ॥ १४ ॥

स० टी०—कर्तृत्वं च निराकृत्य निराचष्टेऽथ भोक्तृताम् ॥ कर्माणि विश्वसृष्ट्यादीन्यनहंकारमीश्वरम् ॥ १ ॥ देहाद्यारम्भकत्वेन न मां बध्नन्ति चिद्घनम् ॥ न वा ममाप्तकामस्य तृष्णा कर्मफले यतः ॥ २ ॥

कर्तृत्वाभिनिवेशेन तथैव फलतृष्णया ॥ लिम्पन्त्यज्ञांस्तु कर्माणि तदभावान्न मां हरिम् ॥ ३ ॥ एवं योऽन्योऽपि मामीशमात्मत्वेन श्रुतेर्नयात् ॥ अकर्तारमभोक्तारं वेत्ति स्वानुभवेन च ॥ ४ ॥ धर्माधर्मादिरूपाणि कर्माणि बन्धकान्यपि ॥ तस्यापि नैव देहाद्यारम्भकाणि भवन्ति वै ॥ ५ ॥ स चाकर्त्रात्मबोधेन मुच्यते कर्मबन्धनैः ॥ ६ ॥ १४ ॥

भा० टी०—अत एवाहंकाराभावात् तानि कर्माणि मां न लिम्पन्ति देहाद्यारम्भकत्वेन न निबध्नन्ति। आसक्तं न कुर्वन्तीत्यर्थस्तु न मे कर्मफले स्पृहेत्यनेन पौनरुक्त्यमभिप्रेत्याचार्यैर्न दर्शितः, मे मम कर्मफले स्पृहा तृष्णा आसक्तिर्नास्ति, अतोऽपि मां कर्माणि न लिम्पन्तीत्येतत् । यत्तु ननु कर्तुरपि कथमकर्तृत्वमत आह—**न मामिति** । कर्मलेपोपिऽकुतो नास्तीत्यत आह—न मे इति । यः कर्तृत्वाभिमानी स लिप्यते यस्तु फलेच्छुः स एवात्मनः कर्तृत्वं मन्यत इति फलेच्छाभावादकर्ताऽकर्तृत्वाच्च न लिप्यत इति तच्चिन्त्यं, कर्तृत्वाभिनिवेशस्य फलासक्तेश्च बन्धकतयोक्तत्वेनात्रान्यथा वर्णनस्यानौचित्यात् । फलेच्छारहितस्य मुमुक्षोस्तावतैवाकर्तृत्वापत्त्या निर्लेपत्वेन जन्माभावप्रसङ्गाच्च । मां कर्माणि न लिम्पन्तीति किं वक्तव्यम्, इति मां य आत्मत्वेनाभिजानाति परात्माभिन्नस्य मे कर्तृत्वं कर्मफले स्पृहा च नास्तीति स कर्मभिर्न निबध्यते देहादिसंबन्धं प्राप्य न संसरतीत्यर्थः । यत्तु मम निर्लेपत्वे कारणं निरहंकारत्वनिस्पृहत्वादिकं जानतस्तस्याप्यहंकारशैथिल्यादिति तच्चिन्त्यम्, ईश्वराभेदसाक्षात्कारं विना कर्तृत्वादेर्मूलोच्छेदाभावेनोक्तज्ञानवतो मोक्षासंभवात् । अन्यथा मूर्खाणामप्येतावज्ज्ञानवतां कर्मप्रयुक्तबन्धनाभावप्रसङ्गात् ॥ १४ ॥

प० टी०—अथ विश्वस्यकर्तारमव्ययमित्येव विविच्याह—**न मामिति** । मां कर्माणि सृष्ट्यादिकर्तृत्वरूपाणि न लिम्पन्त्यसङ्गत्वात् । अत एव न मे कर्मफले स्पृहा वाञ्छापि। अवाप्तसकलकामेन मया किमुद्दिश्यैतत्कर्म कर्तव्यमित्यर्थः । यथा सूर्यो जगद्व्यापारहेतुत्वेऽपि तत्कर्मणा न लिप्यते एवमित्युक्तप्रकारेण यो मामभिजानाति सोऽपि कर्मभिर्न बध्यते किं पुनरहमित्यर्थः ॥ १४ ॥

रा० टी०—ततः किमित्यत आह—**न मामिति** । जीवविलक्षणक्रियावत्त्वेनाकर्तृत्वान्मां कर्माणि न लिम्पन्ति । किंच जीवानां कर्मलेपे अभिनिवेशो हेतुः नच मेऽसावस्तीत्याह—न मे कर्मफले स्पृहेति । फलप्राप्तिपर्यन्तं मनोविक्षेपशब्दितोऽभिनिवेशः कर्मफले मे नास्ति अतोऽपि न लिम्पन्ति कर्माणीत्यर्थः । कैमुत्येनापि स्वस्य कर्मालेपमाह—**इतीति** । कर्मलेपो मे नास्ति तत्फले स्पृहापि नेत्येवं मां योऽभिजानाति सोऽपि कर्मभिर्न बध्यते किम्वहमिति इति योऽभिजानातीति वाच्ये मामिति पुनर्वचनं स्वस्य ईश्वराभेदाभिप्रायेण। स्वात्मानमुद्दिश्य न मां कर्माणि लिम्पन्तीत्यादि यो जानातीति जीवाभेदप्रतीतिनिरासाय मां योऽभिजानाति न स्वात्मानमिति ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

त० टी०—तस्मात्फलितमाह—**एवमिति** । यथा फलस्पृहाराहित्येन परमेश्वरो जगत्सृष्ट्यादीनि महान्त्यपि कर्माणि कुर्वन्न बध्यते, तथा कर्तृत्वाभिमानतत्फलेच्छाराहित्येन यथाधिकारं विधिना कृतं कर्म बन्धकं न भवतीत्येवं ज्ञात्वा पूर्वैरपि मुमुक्षुभिर्मनुजनकादिभिः कर्म कृतम् । यस्मादेवं तस्मात्त्वमपि मुमुक्षुः पूर्वैः कृतं पूर्वतरं शिष्टपरंपरागतं कर्मैव कुरु ॥ १५ ॥

म० टी०—यतो नाहं कर्ता न मे कर्मफले स्पृहेति ज्ञानात्कर्मभिर्न बध्यते अतः—**एवमिति** । एवमात्मनोऽकर्तुः कर्मालेपं ज्ञात्वा कृतं कर्म पूर्वैरतिक्रान्तैरपि अस्मिन् युगे ययातियदुप्रभृतिभिर्मुमुक्षुभिः, तस्मात्त्वमपि कर्मैव

कुरु न तूष्णीमासनं नापि संन्यासं यद्यतत्त्ववित्तदात्मशुद्ध्यर्थम् तत्त्वविच्चेल्लोकसंग्रहार्थम् । पूर्वैः जनकादिभिः पूर्वतरमतिपूर्वं युगान्तरेपि कृतम् । एतेनास्मिन्युगेऽन्ययुगे च पूर्वपूर्वतरैः कृतत्वादवश्यं त्वया कर्तव्यं कर्मेति दर्शयति ॥ १५ ॥

शं० टी०—विदुष उपाधिकृतानां कर्मणामबन्धकत्वज्ञानमेव परार्थप्रवृत्तौ बलवत्साधनमिति सूचयित्वा प्राच्योऽप्यबन्धकत्वज्ञाने नैव परार्थे प्रवृत्ता इति शिष्टाचारं प्रमाणय्य त्वयाप्येवमेव प्रवर्तितव्यमित्याह—**एवमिति** । एवं ज्ञात्वा अहंबुद्ध्यादिसाक्षी प्रत्यगेवास्मि देहेन्द्रियादिभ्यो भिन्नः सन् देहेन्द्रियकृतैः कर्मभिर्न बद्ध इत्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं देहादिकृतकर्मणामबन्धकत्वं चैवमुक्तरीत्या विज्ञाय मुमुक्षुभिर्मुक्तैर्मुमोचयिषुभिरितीदं गर्भितणिजन्तरूपम् । अविद्याबन्धेभ्यो मोचयितुमिच्छद्भिर्मुमुक्षुभिः पूर्वैरपि जनकादिभिर्लोकहितार्थं कर्म कृतं भवति यस्मात्तस्मात्त्वं पूर्वैः कृतं ज्ञानवृद्धैः सद्भिरनुष्ठितं पूर्वतरमनादिकालप्रवृत्तं कर्मैव लोकहितार्थं कुरु नतु संन्यासमित्यर्थः ॥ १५ ॥

श्री० टी०—ये यथा मां प्रपद्यन्त इत्यादिचतुर्भिः श्लोकैः प्रासङ्गिकमीश्वरस्य वैषम्यं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपञ्चयितुमनुस्मारयति—**एवमिति** । अहंकारादिराहित्येन कृतं कर्म बन्धकं न भवतीत्येवं ज्ञात्वा पूर्वैर्जनकादिभिरपि मुमुक्षुभिः सत्त्वशुद्ध्यर्थं पूर्वतरं युगान्तरेष्वपि कृतं तस्मात्त्वमपि प्रथमं कर्मैव कुरु ॥ १५ ॥

स० टी०—एवमेवात्मनोऽकर्तुः कर्मालेपं विचार्य वै ॥ कृतं कर्म युगेऽप्यस्मिन्नतिक्रान्तैर्मुमुक्षुभिः ॥१॥ तस्मात्त्वमपि कर्मैव कुरु त्यागस्तु नोचितः ॥ धीशुद्ध्यर्थं मुमुक्षुश्चेत्तज्ज्ञश्चेत्संग्रहाय च ॥२॥ युगान्तरे कृतं पूर्वैः कृतं तज्जनकादिभिः ॥ अवश्यं कर्म कर्तव्यं कृतत्वात्सार्वकालिकैः ॥ ३ ॥ १५ ॥

भा० टी०—**एवमिति** । नाहं कर्ता न मे कर्मफले स्पृहेत्येवं ज्ञात्वा पूर्वैरपि मुमुक्षुभिश्चित्तशुद्धिद्वारा ज्ञानार्थं कर्म कृतं तस्मात्त्वमपि कर्मैव कुरु, नापि तूष्णीमासनं नापि संन्यासं यस्मात्त्वत्तोऽपि पूर्वैर्जनकादिभिः ज्ञानिभिर्लोकसंग्रहार्थम्, अनादिसिद्धत्वात्पूर्वतरं कृतं यद्यज्ञो मुमुक्षुस्त्वं तर्हि सत्त्वशुद्ध्यर्थं तत्त्वविच्चेत्तर्हि लोकसंग्रहार्थं कर्म कुर्वित्यभिप्रायः ॥ १५ ॥

म० टी०—अथ प्रकृतमनुसरति—**एवमिति** । एवममुना प्रकारेण मदीयं कर्तृत्वाद्यभिमानशून्यत्वं ज्ञात्वा मुमुक्षुभिर्मोक्षमिच्छद्भिः पूर्वैः पुरातनैरपि कर्म कृतम् । तस्मात्त्वमपि प्रस्तुतं कर्मैव कुरु । यतः पूर्वैः पूर्वतरमनादिसिद्धं कृतम् । अनेन शिष्टाचारोऽपि प्रमाणमिति सूचितम् ॥ १५ ॥

रा० टी०—यदि ज्ञानी कर्मभिर्न बध्यते तर्हि ममापि ज्ञानित्वात्कर्मबन्धाभावरूपमुक्तिसत्त्वात्कथं कर्मविधानमित्यतो ज्ञानिनामप्यधिकमोक्षाकाङ्क्षया कर्मकरणे आचारोऽप्यस्तीत्याह—**एवमिति** । प्राक् जनकादीनां विवस्वदादीनां च विद्यमानमपि ज्ञानित्वं भगवतो न विवक्षितम्' अत्र तु विवक्षितमिति न तेन पौनरुक्त्यं शङ्क्यम् । पूर्वैर्मुमुक्षुभिः "आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु" इति तत्साधुकारिण्युप्रत्ययः । अधिकमोक्षेच्छावद्भिरेवमुक्तप्रकारेण हार्दं ज्ञात्वापि कर्म कृतं तस्मात्त्वमपि पूर्वैः कृतं पूर्वतरं ततोऽपि पूर्वभावि कर्म कुर्विति ॥ १५ ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

त० टी०—ननु कर्मैव कर्तव्यं चेत्त्वद्वचनादेव करिष्यामि, परंतु कर्मणि कश्चित्संदेहोऽस्ति किं यतः पूर्वैः पूर्वतरं कृतमित्युदाहरसीत्यत आह—**किं कर्मेति** । मुमुक्षुणाऽनुष्ठेयं कर्म किंस्वरूपम्, अकर्म च

किमत्र कर्माकर्मज्ञानाविषये कवयो विद्वांसोऽपि मोहितास्तन्निर्णयं कर्तुमशक्ताः यथावन्न जानन्ति। यस्मात्कर्मादिज्ञानं दुर्घटं, तत्तस्मात्ते तुभ्यं कर्म अकर्म च प्रवक्ष्यामि, यत्कर्माकर्मस्वरूपं ज्ञात्वा अशुभात्संसारान्मोक्ष्यसे ॥ १६ ॥

म० टी०—ननु कर्मविषये किं कश्चित्संशयोऽप्यस्ति येन पूर्वैः पूर्वतरं कृतमित्यतिनिर्बध्नासि अस्त्येवेत्याह—**किमिति।** नौस्थस्य निष्क्रियेष्वपि तटस्थवृक्षेषु गमनभ्रमदर्शनात् तथातिदूराच्चक्षुःसन्निकृष्टेषु गच्छत्स्वपि पुरुषेष्वगमनभ्रमदर्शनात् परमार्थतः किं कर्म किं वा परमार्थतोऽकर्मेति कवयो मेधाविनोऽप्यत्रास्मिन्विषये मोहिताः मोहं निर्णयासामर्थ्यं प्राप्ताः अत्यन्तदुर्निरूपत्वादित्यर्थः। तत्तस्मात्ते तुभ्यमहं कर्म, अकारप्रश्लेषेण छेदादकर्म च प्रवक्ष्यामि। प्रकर्षेण सन्देहोच्छेदेन वक्ष्यामि। यत्कर्माकर्मस्वरूपं ज्ञात्वा मोक्ष्यसे मुक्तो भविष्यस्यशुभात्संसारात् ॥ १६ ॥

शं० टी०—ननु कर्मणां बन्धकत्वमेव सिद्ध्यति 'कर्मणा बध्यते जन्तुः' इति कर्मणां बन्धकत्वस्मरणादिति चेन्न, तत्स्मृतेरविद्वत्कर्तृककर्मविषयत्वात् "तं विदित्वा न लिप्यते कर्मणा पापकेन" इति विदुषः कर्मालेपश्रवणात्कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा विदुषा क्रियमाणं कर्माऽकर्मैव तन्न बन्धाय भवति। अविदुषा कृतमकर्मैव कर्म तदेव बन्धाय भवति, तर्हि कर्माकर्मणोर्लक्षणं किमित्याकाङ्क्षायामाह—**किं कर्मेति।** श्रुतिस्मृतिभ्यां यद्विहितं तत्कर्म यदविहितं तदकर्मेति केचित्पण्डिता जगुः। वैदिकं श्रौतं स्मार्तं च यत्तत्सर्वं कर्म तत्संन्यासोऽकर्मेत्यपरे। चलनात्मकं कर्म त्वचलनं तूष्णीमासनमकर्मेत्यन्ये। केचित्तु किं कर्म किमकर्मेति किं वा कर्मशब्दवाच्यमकर्मशब्दवाच्यं वा किमिति कवयः सर्वशास्त्रज्ञा अप्यत्र कर्माकर्मतत्त्वनिर्णये मोहिता मूढभावं गतास्तत्तत्त्वं निर्णेतुमसमर्था जाता इत्यर्थः। यत एवं ततः कर्माकर्मस्वरूपमजानते ते तुभ्यं कर्म चाकर्म च प्रवक्ष्यामि तयोर्लक्षणमुपदेक्ष्यामि यज्ज्ञात्वा ययोस्तत्त्वं विज्ञायाऽशुभात्संसारान्मोक्ष्यसे कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा मुक्तो भविष्यसीत्यर्थः ॥ १६ ॥

श्री० टी०— तच्च तत्त्वविद्भिः सह विचार्य कर्तव्यं न लोकपरम्परामात्रेणेत्याह—**किं कर्मेति।** किं कर्म कीदृशं कर्मकरणं किमकर्म कीदृशं कर्माकरणमित्येतस्मिन्नर्थे विवेकिनोऽपि मोहिताः। अतो यज्ज्ञात्वानुष्ठाय अशुभात्संसारान्मोक्ष्यसे मुक्तो भविष्यसि तत्कर्माकर्म च तुभ्यमहं प्रवक्ष्यामि शृणु ॥ १६ ॥

स० टी०— नन्वत्र कर्मविषये किं कश्चित्संशयोऽस्ति वा ॥ पूर्वैः पूर्वतरं चेति येनोक्तमिति चेच्छृणु ॥ १ ॥ निष्क्रियेष्वपि तीरस्थवृक्षेषु गमनभ्रमः ॥ नौस्थस्य दृश्यते पुंसस्तस्मात्किं कर्म वस्तुतः ॥ २ ॥ चक्षुषा संनिकृष्टेषु गच्छत्स्वप्यतिदूरतः ॥ नरेष्वगमनभ्रान्तिदर्शनात्किमकर्म तत् ॥ ३ ॥ अतः किं वस्तुतः कर्म किमकर्मेति वार्थतः ॥ मेधाविनोऽपि कर्मादिविषये निर्णयेऽर्थतः ॥ ४ ॥ असामर्थ्यं गताश्चातिदुर्निरूपतयाखिलाः ॥ तस्मात्तुभ्यमहं कर्म वक्ष्यामि तदकर्म च ॥ ५ ॥ कर्माकर्मस्वरूपं यज्ज्ञात्वा मुक्तो भविष्यसि ॥ अशुभागारसंसाराज्जन्ममृत्युप्रवाहतः ॥ ६ ॥ १६ ॥

भा० टी०—ननु कर्म कर्तव्यं चेत्त्वदुक्त्यैवाहमिदं कर्मेति स्वबुद्ध्या विचार्य करोमि किं पूर्वैः पूर्वतरं कृतमिति विशेषितेनेत्याशङ्क्य कर्मणि महावैषम्यस्य सत्त्वात् तस्य पूर्वैरित्यादिविशेषितत्वेन तव प्रवृत्तिस्तस्मिन्सुकरेत्याशयेन कर्मणो दुर्विज्ञेयत्वमाह—**किमिति।** यत्तु तच्च तत्त्वविद्भिः सह विचार्य कर्तव्यं न लोकपरम्परामात्रेणेत्याहेति तच्चिन्त्यम् 'कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्' इति स्वयमतिनिर्बन्धेनोक्त्वा पुनस्तत्रैवानिर्बन्धं वदतः परमेश्वरस्य पूर्वापरविरोधापत्तेः। अत्रास्मिन्कर्मादिविषये कवयो मेधाविनोऽपि मोहं किं कर्म किमकर्मेति संशयं गताः प्राप्ताः, अतस्ते तुभ्यमहं कर्म, अप्रश्लेषेणाकर्म च प्रवक्ष्यामि यत्कर्मादि ज्ञात्वाऽशुभात्संसारान्मोक्ष्यसे ॥ १६ ॥

प० टी०— अथ कर्मणो दुर्ज्ञेयत्वमाह—**किं कर्मेति** त्रिभिः । कर्म वेदबोधितं कीदृशं, तथा तत्समाप्तिरूपमकर्म नैष्कर्म्यं कीदृशमित्यत्र कवयः पण्डिता अपि मोहिताः किं पुनर्भवादृशा इत्यर्थः । यस्मादेवं तस्मात्ते मुमुक्षवेऽनुष्ठेयं कर्म प्रवक्ष्यामि । तात्किं, यज्ज्ञात्वाऽशुभात्संसारान्मोक्ष्यसे ॥ १६ ॥

रा० टी०—कुर्विति कर्तव्यतयोक्तकर्मस्वरूपं वक्तुं तत्र जिज्ञासाजननाय कर्मणो दुर्ज्ञेयत्वमाह—**किमिति**। अकर्मपदेन कर्माभावो विरुद्धकर्म च ग्राह्यम् । अत्र कर्मविषये कवयोपि मोहिताः विभ्रमवन्तस्तर्हि किं तत्स्वरूपं ब्रूहीत्यत आह—**तदिति** । तस्मात्कवीनामपि मोहविषयत्वादिति वा यत्कर्तव्यत्वादिनोक्तं तत्कर्मेति वा ते जिज्ञासवे प्रवक्ष्यामि । यज्ज्ञात्वाऽशुभात्कर्मबन्धान्मोक्ष्यसे तत्कर्मेति वा कर्म प्रवक्ष्यामीत्यकर्मविकर्मणोरप्युपलक्षणम् । अनुष्ठेयतया प्राधान्यात्कर्मेत्येवोक्तम् । यद्वा ते कर्मेत्यत्राकारप्रश्लेषेणाकर्मेत्यपि पदच्छेदो ज्ञेयः ॥ १६ ॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

त० टी०—ननु शरीरेन्द्रियव्यापारः कर्म तदभावः क्रियाशून्यत्वमकर्मेति सर्वजनप्रसिद्धं, कथमत्र कवयोऽपि मोहिता इत्युक्तमिति चेत्तत्राह—**कर्मण इति** । हि निश्चयेन कर्मणः शास्त्रविहितस्य शरीरेन्द्रियव्यापारस्यापि तत्त्वं बोद्धव्यमस्ति । विकर्मणः प्रतिषिद्धस्यापि तत्त्वं बोद्धव्यमस्ति। अकर्मणः क्रियाऽभावस्य तूष्णीमासनस्यापि तत्त्वं बोद्धव्यमस्ति । यतो गहना कर्मणो गतिः । कर्मण इत्युपलक्षणं कर्माकर्मविकर्मणां तत्त्वं दुर्विज्ञेयमित्यर्थः ॥ १७ ॥

म० टी०—ननु सर्वलोकप्रसिद्धत्वादहमेवैतज्जानामि देहेन्द्रियादिव्यापारः कर्म तूष्णीमासनमकर्मेति तत्र किं त्वया वक्तव्यमिति तत्राह—**कर्मण इति** । हि यस्मात् कर्मणः शास्त्रविहितस्यापि तत्त्वं बोद्धव्यमस्ति, विकर्मणश्च प्रतिषिद्धस्य, अकर्मणश्च तूष्णींभावस्य । अत्र वाक्यत्रयेऽपि तत्त्वमस्तीत्यध्याहारः। यस्मात् गहना दुर्ज्ञाना कर्मण इत्युपलक्षणं कर्माकर्मविकर्मणां गतिस्तत्त्वमित्यर्थः ॥ १७ ॥

शं० टी०—ननु कर्माकर्मणोरुभयोस्तत्त्वमारुरुक्षोर्ज्ञातव्यं वा किमारूढस्यैवेत्याकाङ्क्षायामारुरुक्षोः कर्माकर्मविकर्मणामेव तत्त्वं सम्यक् ज्ञातव्यं तद्बोधस्यैव तस्य दुरवगाहत्वात्तान्येव बोद्धव्यानि प्रयत्नेनास्यात्रैवाधिकारो नान्यत्रेत्याशयेनाह—**कर्मण इति** । मुमुक्षोरारोढुमिच्छतः कर्मणो वर्णाश्रमादेरनुष्ठेयस्य बोद्धव्यमस्ति ज्ञाते सति हि कर्मस्वरूपे यथाशास्त्रं कर्म कर्तुं शक्यते नाज्ञाते । शास्त्राणामनेकत्वाच्छास्त्रप्रवर्तकानां बहुविधत्वाच्च देशकालयुगाधिकारिवर्णाश्रमवयोवस्थादिभेदेन संकोचव्याकोचाभ्यां कर्मविधेरनेकरूपत्वाच्च कर्तव्यस्य कर्मणस्तत्त्वं सम्यग्बोद्धव्यमित्यर्थः । विकर्मणोऽनन्तसंबन्धवता विधिना विहितविपरीततया विधीयमानत्वाद्विकर्म प्रतिषिद्धं निन्दितं कर्म तस्य विकर्मणोऽपि बोद्धव्यमस्ति, ज्ञाते हि निषिद्धांशे यन्निषिद्धं तत्परिहर्तुं शक्यते ततो निरुक्तदेशकालादिभेदेन निषिद्धस्यापि बहुविधत्वाद्बोद्धव्यमस्तीत्यर्थः । तथैवाकर्मणोऽपि न कर्माकर्मकर्माभावः यस्मात्कर्म न संभवति तदकर्मेति वा कर्मसंन्यासस्तस्याऽपि बोद्धव्यमस्ति काम्यकर्मत्यागो निषिद्धत्यागः कर्मफलत्यागः सर्वकर्मपरित्यागः कर्ममात्रपरित्याग इत्यादिभेदेन संन्यासोऽपि बहुधा भिद्यते ततस्तस्यापि बोद्धव्यमस्तीत्यर्थः । हि यस्मात्कारणात्कर्मणः, कर्मण इति विकर्माकर्मणोरप्युपलक्षणं कर्माकर्मविकर्मणां त्रयाणामपि गतिरेवं कर्तव्यमिति कर्तव्यता निश्चितिर्गहना विदुषामपि दुर्ज्ञेया भवत्यत आरुरुक्षोः कर्माकर्मविकर्मणां स्वरूपं शास्त्रत आचार्यतश्च सलक्षणं सरहस्यं च सम्यग्ज्ञातव्यमित्यर्थः ॥ १७ ॥

श्री० टी०—ननु लोकप्रसिद्धमेव कर्म देहादिव्यापारात्मकमकर्म च तदव्यापारात्मकमतः कथमुच्यते कवयोऽप्यत्र मोहं प्राप्ता इति तत्राह—**कर्मण इति** । कर्मणो विहितव्यापारस्यापि तत्त्वं बोद्धव्यमस्ति नतु लोकसिद्धमात्रमेव । अकर्मणोऽविहितव्यापारस्यापि तत्त्वं बोद्धव्यमस्ति विकर्मणोऽपि निषिद्धस्यापि तत्त्वं बोद्धव्यमस्ति यतः कर्मणो गतिर्गहना । कर्मण इत्युपलक्षणार्थम्, कर्माकर्मविकर्मणां तत्त्वं बोद्धव्यमस्ति यतः दुर्विज्ञेयमित्यर्थः ॥ १७ ॥

स० टी०—सर्वलोकप्रसिद्धत्वाज्ज्ञानाम्यप्यहमेव तत् ॥ देहेन्द्रियादिव्यापारः कर्माकर्मविपर्ययः ॥ १ ॥ किं त्वया तत्र वक्तव्यमिति चेच्छृणु तत्त्वतः ॥ यस्माच्छास्त्रविधानस्य बोद्धव्यं तत्त्वमस्ति ते ॥ २ ॥ निषिद्धस्यापि बोद्धव्यं तत्त्वमस्ति विकर्मणः ॥ तूष्णींभावस्य बोद्धव्यमस्ति तत्त्वमकर्मणः ॥ ३ ॥ यतस्तत्त्वं च दुर्ज्ञेयं कर्माकर्मविकर्मणाम् ॥ ४ ॥ १७ ॥

भा० टी०—ननु देहादिव्यापारः कर्माकरणं तूष्णीमासनमिति लोकप्रसिद्ध्यैव ज्ञातुं शक्यमिति तत्राह—**कर्मण इति** । हि यस्मात्कर्मणः शास्त्रविहितस्यापि तत्त्वं बोद्धव्यं ज्ञातव्यमस्ति, विकर्मणश्च प्रतिषिद्धस्य तत्त्वं बोद्धव्यमस्ति, अकर्मणश्च तूष्णींभावस्य तत्त्वं बोद्धव्यमस्ति । सर्वत्र तत्त्वमस्तीतिपदाध्याहारः । भाष्ये-त्वस्तीत्यस्याध्याहारकथनमुपलक्षणमित्यविरोधः । यस्माद्गहना कर्मण इत्युपलक्षणार्थं कर्माकर्मविकर्मणां गतिस्तत्त्वं याथात्म्यमित्यर्थः ॥ १७ ॥

प० टी०—अथ गहनत्वमेवाह—**कर्मण इति** । मोक्षनिरूपणे तावत्कर्माकरणे विकर्मणोऽनुपक्रान्तत्वात्कर्मणो वेदविहितात्किं भवतीति बोद्धव्यं तत्त्वतो ज्ञातव्यम् । तस्मिन् वक्ष्यमाणप्रकारेण द्विधा ज्ञाते सति विनश्वरफलं कर्म विकर्म स्वर्गप्रापकं तस्मात्किं भविष्यतीति बोद्धव्यं तथाकर्मणस्तत्समाप्तिरूपान्नैष्कर्म्यात्किं भवतीति बोद्धव्यम् । यतः कर्मणो गतिर्गहना । तदुक्तं टिप्पणिकासु 'कर्माकर्मविकर्ममर्म सुधिया बोद्धव्यमेवादितः कर्म स्याद्विधिपूर्वकं तु मनसा सर्वेन्द्रियव्यापृतिः । तद्द्वेधा सफलं फलेन रहितं त्वाद्यं विकर्म स्मृतं बन्धादन्यदकर्म शुद्धिकरणान्नैष्कर्म्यतामागतम्' इति । अस्यार्थः—सुधिया पुरुषेणादितः प्रथमतः कर्माकर्मविकर्मणां मर्म रहस्यं बोद्धव्यं ज्ञातव्यम् । तत्र कर्म किं नामेत्याह—विधिपूर्वकं यथा भवति तथा मनसा सह सर्वेन्द्रियव्यापृतिः सत्त्वसंपन्नेन मनसा साकं सर्वेन्द्रियाणां ज्ञानकर्मेन्द्रियाणां या व्यापृतिर्व्यापारस्तत्कर्मेत्युक्तम् । यज्ञोपकरणं दर्शनं तत्प्रतिपादकं वेदश्रवणं होमधूमाघ्राणं यज्ञपात्रस्य दर्शनं पुरोडाशास्वादनं यज्ञसामग्रीसंपादनार्थं हस्तपादक्रिया ऋतौ भार्याभिगमनं दक्षिणस्यां दिशि मलोत्सर्ग इत्यादिविध्युक्त इन्द्रियव्यापारः कर्मशब्देनोच्यते । अथ तत्कर्म द्विधा सफलं स्वर्गप्रापकं फलेन रहितं मोक्षप्रापकं च । उभयत्र विधिस्तुल्य एव परंतु संकल्पकृतो भेदस्तत्राद्यं स्वर्गप्रापकं विकर्म विनश्वरफलं कुतो बन्धहेतुत्वात् । तथान्यन्मोक्षप्रापकं कर्माकर्म । यतश्चित्तशुद्धिकरणानन्तरं स्वयमुपरमं प्राप्तं सन्नैष्कर्म्यतामागतं, ज्ञानपदत्वं प्राप्तमित्यर्थः ॥ १७ ॥

रा० टी०—कर्मादिस्वरूपज्ञानमावश्यकमितिभावेनाह—**कर्मणो हीति** । पूर्वस्मात्कर्माकर्मपदयोरनुवृत्तिः । कर्मणः सकाशादकर्म कर्माकरणं विरुद्धकर्म च विविच्य बोद्धव्यम् । विकर्मणो निषिद्धकर्मणश्च कर्माकर्म च विविच्य बोद्धव्यम् । अकर्मणश्च कर्म विकर्म च विविच्य बोद्धव्यम् । कुत इत्यत आह—गहनेति । पूर्वत्र दुर्ज्ञेयत्वोक्तावपि तच्छापादिप्रबलानिमित्तं न भवति किंतु स्वभावत एवेति वक्तुं गहना कर्मणो गतिरिति पुनर्वचनम् । यद्वा कर्म प्रवक्ष्यामीति प्रतिज्ञातं कर्मादिस्वरूपमाह—**कर्मणो हीति** । अत्र कर्म न इति विकर्म न इति अकर्म न इति पदविभागः । ब्रह्माण इन्द्रोपयाहि विद्वानित्यत्र ब्रह्माण इत्यस्येव भिन्नपदस्यापि न इत्यस्य रेफोत्तरस्य णत्वं ध्येयम् । तेन "रषाभ्यां नो णः समानपदे" इत्युक्तावपि छान्दसं णत्वमत्र ध्येयम् । कर्म नो मत्तो भवतीति विकर्म अकर्म च नो मत्तो भवतीत्येवं योजना । कर्मादिस्वरूपं न स्वतन्त्रं किंतु भगवदधीनं बोद्धव्यमित्यर्थः । न

इति बहुवचनं बहुरूपत्वात् । एवंरूपेण कर्मस्वरूपज्ञानं दुःशकमित्याह—गहनेति । एतच्च श्रोतुरधिकादरजननायोक्तम् ॥ १७ ॥

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

त० टी०—तदेव कर्मादीनां तत्त्वं कृपयाऽऽह—**कर्मणीति** । कर्मणि भगवदाराधनलक्षणे किंचिदङ्गवैगुण्येऽपि अकर्म प्रत्यवायापादकं कर्मेदं न भवतीति यः पश्येत्, तथाभूतस्य कर्मणः सत्त्वशुद्धिपूर्वकज्ञानद्वारेण मोक्षहेतुत्वाद्बन्धकत्वाभावादकर्मैव जानीयादित्यर्थः । 'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते,' इत्युक्तत्वादकर्मणि योग्यतायां सत्यां विहिताकरणे तूष्णींभावे कर्म यः पश्येत्, प्रत्यवायापादकत्वेन बन्धकं यः पश्येदित्यर्थः । कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् इत्यादिना मिथ्याचारः स उच्यते, इत्युक्तत्वात् । चकारेण केवलकर्मनिष्ठस्य यथा वृन्ताकमसूरादिभक्षणनिषिद्धाचरणे दोष एव । भगवदाराधकस्य कथंचित्केनाचिद्दत्तभगवत्प्रसादमिश्रिततद्भक्षणं चेन्न दोष इति विकर्मणोऽपि तत्त्वं सूचितम् । तथा चोक्तं श्रीभागवते 'स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः । विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः' इति । एवं कर्माकर्मादितत्त्वज्ञं स्तौति—**स इति** । यः कर्मादिस्वरूपतत्त्वज्ञः स पुरुषः मनुष्येषु सर्वेषु बुद्धिमान् सम्यग्ज्ञानवाञ्छ्रेष्ठ इत्यर्थः । किंच स युक्तः योगयुक्तः, स एव कृत्स्नकर्मकृत्, कृत्स्नफलहेतुकर्मकर्ता सर्वकर्मफलानां तत्रैवान्तर्भावादित्यर्थः ॥ १८ ॥

म० टी०—कीदृशं तर्हि कर्मादीनां तत्त्वमिति तदाह—**कर्मणीति** । कर्मणि देहेन्द्रियादिव्यापारे विहिते प्रतिषिद्धे च अहं करोमीति धर्मा (र्म्य) ध्यासेनात्मन्यारोपिते नौस्थेनाचलत्सु तटस्थवृक्षादिषु समारोपिते चलन इव अकर्त्रात्मस्वरूपालोचनेन वस्तुतः कर्माभावं तटस्थवृक्षादिष्विव यः पश्येत पश्यति । तथा देहेन्द्रियादिषु त्रिगुणमायापरिणामत्वेन सर्वदा सव्यापारेषु निर्व्यापारस्तूष्णीं सुखमास इत्यभिमानेन समारोपितेऽकर्मणि व्यापारोपरमे दूरस्थचक्षुःसंनिकृष्टपुरुषेषु गच्छत्स्वप्यगमन इव सर्वदा सव्यापारदेहेन्द्रियादिस्वरूपपर्यालोचनेन च वस्तुगत्या कर्म निवृत्त्याख्यप्रयत्नरूपं व्यापारं यः पश्येदुदाहृतपुरुषेषु गमनमिव । औदासीन्यावस्थायामप्युदासीनोऽहमास इत्यभिमान एव कर्म । एतादृशः परमार्थदर्शी स बुद्धिमानित्यादिना बुद्धिमत्त्वयोगयुक्तत्वसर्वधर्मकृत्त्वैस्त्रिभिर्धर्मैः स्तूयते । अत्र प्रथमपादेन कर्मविकर्मणोस्तत्त्वं कर्मशब्दस्य विहितप्रतिषिद्धपरत्वात्, द्वितीयपादेन चाकर्मणस्तत्त्वं दर्शितमिति द्रष्टव्यम् । तत्र यत्त्वं मन्यसे कर्मणो बन्धहेतुत्वात्तूष्णीमेव मया सुखेन स्थातव्यमिति तन्मृषा । असति कर्तृत्वाभिमाने विहितस्य प्रतिषिद्धस्य वा कर्मणो बन्धहेतुत्वाभावात् । तथाच व्याख्यातं न मां कर्माणि लिम्पन्तीत्यादिना । सति च कर्तृत्वाभिमाने तूष्णीमहमास इत्यौदासीन्याभिमानात्मकं यत्कर्म तदपि बन्धहेतुरेव वस्तुतत्त्वापरिज्ञानात् । तस्मात् कर्मविकर्माकर्मणां तत्त्वमीदृशं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभिमानफलाभिसन्धिहानेन विहितं कर्मैव कुर्वित्यभिप्रायः । अपरा व्याख्या कर्मणि ज्ञानकर्मणि दृश्ये जडे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वभ्रमाधिष्ठानमकर्म अवेद्यं स्वप्रकाशचैतन्यं परमार्थदृष्ट्या यः पश्येत् । तथा अकर्मणि च स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थसत्, दृग्दृश्ययोः संबन्धानुपपत्तेः "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सते" इति श्रुतेः । एवं परस्पराध्यासेपि शुद्धं वस्तु यः पश्यति मनुष्येषु मध्ये स एव बुद्धिमान्नान्यः, अस्य परमार्थदर्शित्वादन्यस्य चापरमार्थदर्शित्वात् । स च

बुद्धिसाधनयोगयुक्तः अन्तःकरणशुद्ध्या एकाग्रचित्तः । अतः स एवान्तःकरणशुद्धिसाधनकृत्स्नकर्मकृदिति वास्तवधर्मैरेव स्तूयते । यस्मादेवं तस्मात् त्वमपि परमार्थदर्शी भव तावतैव कृत्स्नकर्मकारित्वोपपत्तेरित्यभिप्रायः । अतो यदुक्तं यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति यच्चोक्तं कर्मादीनां तत्त्वं बोद्धव्यमस्तीति स बुद्धिमानित्यादिस्तुतिश्च तत्सर्वं परमार्थदर्शने सङ्गच्छते। अन्यज्ज्ञानादशुभात्संसारान्मोक्षानुपपत्तेः । अतस्त्वयान्यत् न बोद्धव्यं न वा तज्ज्ञाने बुद्धिमत्वमिति युक्तैव परमार्थदर्शिनां व्याख्या । यत्तु व्याख्यानं कर्मणि नित्ये परमेश्वरार्थेऽनुष्ठीयमाने बन्धहेतुत्वाभावादकर्मेदमिति यः पश्येत् । तथा अकर्मणि च नित्यकर्माकरणे प्रत्यवायहेतुत्वेन कर्मेदमिति यः पश्येत् स बुद्धिमानित्यादि तदसङ्गतमेव नित्यकर्मण्यकर्मेदमिति ज्ञानस्याशुभमोक्षहेतुत्वाभावात्, मिथ्याज्ञानत्वेन तस्यैवाशुभत्वाच्च । नचैतादृशं मिथ्याज्ञानं बोद्धव्यं तत्त्वं नाप्येतादृशज्ञाने बुद्धिमत्त्वादिस्तुत्युपपत्तिर्भ्रान्तत्वात् । नित्यकर्मानुष्ठानं हि स्वरूपतोऽन्तःकरणशुद्धिद्वारोपयुज्यते न तत्राकर्मबुद्धिः कुत्राप्युपयुज्यते शास्त्रेण नामादिपु ब्रह्मदृष्टिवदविहितत्वात् । नापीदमेव वाक्यं तद्विधायकमुपक्रमादिविरोधस्योक्तेः । एवं नित्यकर्माकरणमपि स्वरूपतो नित्यकर्मविरुद्धकर्मलक्षकतयोपयुज्यते नतु तत्र कर्मदृष्टिः काप्युपयुज्यते । नापि नित्यकर्माकरणात्प्रत्यवायः, अभावाद्भावोत्पत्त्ययोगात् । अन्यथा तदविशेषेण सर्वदा कार्योत्पत्तिप्रसङ्गात् । भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैष ह्यर्थो विधीयत इति न्यायेन भावार्थस्यैवापूर्वजनकत्वात् 'अतिरात्रे षोडशिनं न गृह्णाति' इत्यादावपि संकल्पविशेषस्यैवापूर्वजनकत्वाभ्युपगमात् 'नेक्षेतोद्यन्तमादित्यम्' इत्यादि प्रजापतिव्रतवत् । अतो नित्यकर्मानुष्ठानार्हे काले तद्विरुद्धतया यदुपवेशनादि कर्म तदेव नित्यकर्माकरणोपलक्षितं प्रत्यवायहेतुरिति वैदिकानां सिद्धान्तः । अत एवाकुर्वन्विहितं कर्मेत्यत्र लक्षणार्थे शता व्याख्यातः "लक्षणहेत्वोः क्रियायाः" इत्यविशेषस्मरणेप्यत्र हेतुत्वानुपपत्तेः । तस्मान्मिथ्यादर्शनापनोदे प्रस्तुते मिथ्यादर्शनव्याख्यानं न शोभतेतराम्, नापि नित्यानुष्ठानपरमेवैतद्वाक्यं नित्यानि कुर्यादित्यर्थे कर्मण्यकर्म यः पश्येदित्यादि तदवोधकं वाक्यं प्रयुञ्जानस्य भगवतः प्रतारकत्वापत्तेरित्यादि भाष्य एव विस्तरेण व्याख्यातमित्युपरम्यते ॥ १८ ॥

शं० टी०—नैवैतान्यारूढस्य तु बोद्धव्यानि किंतु आरुरुक्षोः कर्माकर्मणोरेव तत्त्वं बोद्धव्यमशुभमोक्षायेति पूर्वं वक्ष्यामीति यत्प्रतिज्ञातं तदिदानीमुपदिशति—**कर्मणीति** । क्रियते देहेन्द्रियैरेव निर्वर्त्यत इति कर्म लौकिको वैदिकश्च सर्वोऽपि व्यापारस्तस्मिन् कर्मणि चेष्टामात्रे औपाधिके आत्मयाथात्म्यज्ञो विद्वान् अकर्म कर्माभावं यः पश्येत् । तथैवाकर्मणि देहेन्द्रियव्यापारोपरमलक्षणे तूष्णीमवस्थायां कर्म क्रियामेव यः पश्येत्। ननु कर्मण्यकर्मदर्शनं चाकर्मणि कर्मदर्शनं चोभयमपि न संभवति प्रत्यक्षविरोधान्नहि कर्माकर्म भवितुमर्हति व्यापारस्य दृश्यमानत्वान्नाप्यकर्म च कर्म भवति स्थाणुवत्तूष्णींभावस्योपलभ्यमानत्वाद्भावे चाऽभावदर्शनमभावे च भावदर्शनमतिविरुद्धमप्रामाणिकं च भावाभावयोरभावत्वभावत्वाऽसंभवादिति चेन्न, सद्बुद्ध्या विचार्यमाणे दर्शनद्वयोपपत्तेस्तत्कथमिति चेदुच्यते स्वयमकर्मासन्नेव पुमानन्यकर्मणा कर्मी भवति, यथा मेघक्रियया चन्द्रः क्रियावान्, यथा चालनक्रिययाऽऽतपः क्रियावान्, तथा देहादितादात्म्येन देहादिक्रियया स्वयमक्रियोऽपि क्रियावान् भवत्यखिलो जन्तुस्तथापि ब्रह्मवेत्ता ब्रह्मैवाहमिति ब्रह्मण्येवात्मत्वविज्ञानेन स्वस्य देहादिसंबन्धाभावात्तत्कर्तृकं कर्माकर्मैव पश्यति । तत्राहं ममेति स्वत्वाभावात् । नह्यन्यकर्तृके कर्मण्यन्यस्य स्वत्वमुपपद्यते तदभावाद्देहादिकर्तृकं कर्मास्याकर्मैव भवत्यबन्धकत्वेनाकर्मतुल्यत्वात्तस्मात्तदकर्मैव पश्यतीत्यर्थः । न तु स्वगतं कर्माऽकर्म पश्यति, स्वस्य निरवयवत्वेन क्रियासमवायानुपपत्तेः। यथा वृक्षे चलति सति तत्स्थमाकाशं निष्क्रियं पश्यति, यथा मेघेपु धावत्सु सत्सु चन्द्रं निष्क्रियं पश्यति, तथा देहेन्द्रियादिपु स्वच्छन्दं विषयेपु प्रवृत्तेषु सत्सु स्वं निष्क्रियमेव पश्यति विद्वान् ततः "निष्कलं

निष्क्रियम् " इत्यादिश्रुतिप्रामाण्यात्कूटस्थासङ्गचिद्रूपमात्मानमेवात्मत्वेन विजानतो विदुषो देहादिकर्तृके कर्मण्यकर्मदर्शनमुपपद्यत एव, तस्यैतस्य दर्शनस्य विद्वत्प्रत्यक्षत्वात् 'कर्तारं स पश्यति' इत्यादिस्मृतिसिद्धत्वाच्च प्रामाण्योपपत्तेः। किंच मूढः स्वस्मिन् देहाद्यध्यस्य तद्व्यापारोपरमे चाहमासे तूष्णीं सुखं न किंचित्करोमि दुःखकरं कर्मेत्यसुखे देहेन्द्रियनिरोधे सुखबुद्ध्या तदक्रियया स्वमक्रियमेव पश्यति, यथाऽश्वारूढोऽश्वस्थित्या स्वं स्थितं पश्यति, यथा गच्छन्तमेव सूर्यमगच्छन्तं पश्यति, न तथा विद्वान् किंतु तस्मिन् देहादिव्यापारोपरमेऽप्यकर्मणि कर्मैव पश्यति। यथा निगूढाङ्गुलिमुष्टौ बहिःक्रियाभावेऽप्यन्तरङ्गुलीनां मुकुलीभावसिद्धेः कारणभूताङ्गुलिनिरोधनक्रिया विद्यते। यथा निमीलिते चक्षुषि बहिर्दर्शनक्रियाऽभावेऽपि पक्ष्मनिरोधनक्रिया विद्यते। तथा नाहं किंचित्करोमीति तूष्णीमवस्थायामपि बहिर्देहेन्द्रियादिचलनक्रियाऽभावेऽप्यन्तर्नाहं किंचित्करोमीति कर्तुराग्रहरूपा मानसी क्रिया विद्यत एव। अन्तराग्रहक्रियाभावे बहिः पाण्यादिनिरोधायोगान्मनोव्यापारैकमूलत्वात्सर्वार्थसिद्धये इन्द्रियक्रियासंभवाच्च। ऐन्द्रियनिग्रहक्रिययैव देहो निश्चलस्तिष्ठति तदभावे देहचलनं वेन्द्रियचलनं वा स्यात्ततो मूढदृष्ट्या त्वकर्मणि तूष्णीमवस्थानेऽपि कर्मदर्शनस्य न्यायदृष्टान्तानुभवसिद्धत्वादकर्मणि कर्मदर्शनमविरुद्धं प्रामाणिकं च। भावे चाभावदर्शनमभावे च भावदर्शनमयुक्तमिति यत्तन्न, देहचेष्टाया भावत्वेऽप्यबन्धकत्वेनाभावतुल्यत्वात्तत्र कर्माभावदर्शनस्योपयुक्तत्वाद्भावे चाभावदर्शनमुपपद्यते। तूष्णीमवस्थायामकर्मण्यप्युक्तरीत्या कर्मदर्शनादकर्मणि कर्मदर्शनं चोपपन्नतरमेवातो न कोऽपि विरोधः। ननु विदुषः कर्मण्यकर्मदर्शनमतीतानागतवर्तमानसर्वकर्मनिर्मोकहेतुत्वेन जन्मादिबन्धनिवर्तकत्वात्कर्तव्यमेव भवति, अकर्मणि कर्मदर्शनस्य तु प्रयोजनाभावादकर्मणि च कर्म यः पश्येदिति विधिर्निरर्थक एवेति चेन्न, तस्याप्यकर्मास्पष्टात्मदर्शनसाधनत्वेन सफलत्वोपपत्तेः। "निष्क्रियं शान्तम्" इति निष्क्रियत्वशान्तत्वयोर्ब्रह्मलक्षणत्वश्रवणादत्रापि निष्क्रियत्वशान्तत्वधर्मवति देहेन्द्रियव्यापारोपरमे तूष्णीमवस्थाने स्वरूपभ्रमः स्यात्तन्माभूदित्युपदिशति "अकर्मणिचकर्म यः" इति। कर्मवदकर्मणोऽप्यौपाधिकत्वात् पुरुषतन्त्रत्वात् दृश्यत्वाद्विचार्यमाणे सक्रियत्वाच्च स्वयमनात्मैव भवति तद्द्रष्टा यः स एवात्मेति बोद्धव्यमिति सूचयितुमुपदिश्यते—अकर्मणि च कर्म य इति। किंचाकर्मणोऽपि कर्मवत्कर्मत्वज्ञानेन कर्माकर्मणोरुभयोरप्यनात्मत्वे सिद्धे विदुषस्तूष्णीमवस्थायामकर्मणो निष्फलत्वात्तदपेक्षया लोकोपकारकत्वात्कर्मणि प्रवृत्तिः सफलेत्यपि सूचयति—अकर्मणि च कर्म य इति। अतो विधेः सर्वथा साफल्यमस्ति। ननु कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं चैककर्तृकं न संभवति परस्परविरुद्धत्वेन तयोरेकाश्रयत्वायोगात् विकल्पो नहि वस्त्विति द्वैतं सर्वं मिथ्यैव पश्यतो विदुषो देहेन्द्रियादेर्मिथ्यात्वात्तदाश्रितकर्मणोऽपि मिथ्यात्वदर्शनं युक्तं न त्वकर्मणि कर्मदर्शनं युक्तं तस्य देहादिसत्यत्वज्ञानैकसाध्यत्वाद्देहादेः सत्यत्वे खलु तदाश्रितस्याऽकर्मणः सत्यत्वं कर्मत्वं च सिध्यति तत्सिद्धौ तु कर्मण्यकर्मदर्शनं न सिध्यति तस्य मिथ्यात्वज्ञाननिबन्धनत्वादेवं परस्परविरुद्धयोस्तयोरेकपुरुषाधिकरणत्वं न संभवति कर्मण्यकर्म यः पश्येदकर्मणि च कर्म य इति यच्छब्दद्वयश्रवणाच्च ततस्तयोर्भिन्नपुरुषाश्रयत्वमेवेति चेन्न, विदुष उभयत्र मिथ्यात्वदर्शनस्यैव विवक्षितत्वाद्यथा देहेन्द्रियादेस्तत्कर्मणोऽपि च मिथ्यात्वं द्रष्टव्यं तथा तद्व्यापारोपरमस्यापि मिथ्यात्वमेव द्रष्टव्यम्। उभयोरप्यविद्याकार्यभूतदेहाश्रयत्वेनाऽवस्तुत्वाऽविशेषादन्यथा भेददृष्टेरशुभमोक्षासंभवात्। यः कर्माकर्मणोरुभयोस्तदाश्रयस्यापि मिथ्यात्वमेव विनिश्चित्य तदधिष्ठानं परं ब्रह्म निष्कलं निष्क्रियं शान्तमनन्तमखण्डानन्दैकरसमिदमेवाहमिति स्वात्मना विज्ञाय तदात्मना तिष्ठति स एवाऽशुभान्मुक्तो भवत्यतोऽन्यथात्मानं पश्यतो न मुक्तिरस्ति, तस्मात्तयोरेकपुरुषाश्रयत्वमेव नत्वनेकपुरुषाश्रयत्वं, यच्छब्दद्वयं तु "यतो वा इमानि भूतानि जायन्ते" इत्यत्र यथा, तथा बोधसौकर्यार्थमेव नतु ग्रहीतृभेदासिद्ध्यर्थम्। 'स बुद्धि-

मानित्येकेनैव तच्छब्देनोपसंहारात् । एवं कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं च यः करोति शास्त्रत आचार्यतो युक्तितश्चानुभूतितश्च स एव मनुष्येष्वधिकृतः सर्वशास्त्रेषु बुद्धिमानात्मतत्त्वज्ञः स एव युक्तो योगी च स एव कृत्स्नकर्मकृत्सर्वेषां श्रौतानां स्मार्तानामितरेषां च पुण्यकर्मणां कर्ता च भवति " यथा कृताय विजितायाधरेयाः संयन्त्येवमेनᳲसर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेदयत्स वेद " इति श्रवणात्सर्वाणि सर्वलोकैः कृतानि पुण्यकर्माण्यनेन कृतानि भवन्तीत्यर्थः ॥ १८ ॥

यद्वा किं कर्म किमकर्म इति श्लोकव्याख्यानपुच्छमत्र लिख्यते—अशुभात्संसारान्मोक्ष्यसे कर्माकर्मणो स्तत्त्वं सम्यक् ज्ञात्वा मुक्तो भविष्यसीत्यर्थः (॥ १६ ॥) ननु " तमेव विदित्वातिमृत्युमेति " इत्यात्मवस्त्वज्ञानादेव मुक्तिः श्रूयते नतु कर्माकर्मणोस्तत्त्वज्ञानादिति चेत्सत्यम्, आत्मज्ञानादेव मुक्तिस्तथापि " तदा विद्वान् पुण्यपापे विधूय ' इति पुण्यपापविध्वंसनं कृतवत एव विदुषो मुक्तिः श्रूयते ततो मुमुक्षोः कर्मादितत्त्वज्ञानेन जन्मादिहेतुभ्यः कर्मादिभ्यो मोक्तव्यं तदर्थं कर्मादीनां तत्त्वं ज्ञातव्यमित्याह—**कर्मणो ह्यपीति** । कर्मणोऽपि कर्तव्यत्वेन शास्त्रेणोक्तस्य स्वर्गादिहेतोस्तत्त्वं मुमुक्षोर्बोद्धव्यं तद्विपरीतस्य दुर्गतिहेतोर्विकर्मणो निषिद्धस्यापि तत्त्वं बोद्धव्यं तथैवानर्थहेतोरकर्मणोऽप्यश्रद्धया विहिताकरणलक्षणस्य तत्त्वं बोद्धव्यं सद्गुरोः। ननु 'चलनात्मकं कर्म' इति चलनमेव कर्मणः स्वरूपं किं तस्य बोद्धव्यमस्तीत्याशङ्कायां न, कर्माकर्मविकर्मणां तत्त्वं मूढैर्ज्ञातुं न शक्यमित्याह—गहनेति । हि यस्मात्कारणात्कर्मणः कर्मण इतीतरयोरप्युपलक्षणं कर्मणो विकर्मणोऽप्यकर्मणश्च गतिस्तत्त्वावगतिर्याथात्म्यवेदनं सद्गुरूपदेशेन विना ज्ञातुं गहना दुर्घटा दुर्लभेत्यर्थः (॥ १७ ॥) तर्हि तेषां तत्त्वं त्वयैवोपदेष्टव्यं जगद्गुरुणेत्याकाङ्क्षायां कर्माकर्मविकर्मणां चाकाशादिप्रपञ्चस्य सर्वस्यापि तत्त्वं ब्रह्मैव तस्मिन्विदिते सर्वस्यापि तत्त्वं विदितं भवतीति ' सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । संपश्यन् ब्रह्म परमम् ' इत्येतच्छ्रुतिप्रमाणकं परावरैकत्वदर्शनं निःशेषसंसारभ्रमविध्वंसकमुपादिशति—**कर्मण्यकर्म य इति** । क्रियते सृज्यत इति कर्म ब्रह्मकार्यं महदादिस्थूलान्तं जगत्तस्मिन् कर्माणि सर्वत्र जगत्यकर्म न विद्यते यत्र कर्म तदकर्म " निष्कलं निष्क्रियम् " इति श्रवणान्निष्क्रियं परं ब्रह्म यः पश्येत्, प्रतीतं प्रपञ्चं सर्वं ब्रह्मैव यः पश्यतीत्यर्थः । ननु सविशेषं जगन्निर्विशेषं परं ब्रह्म गवाश्ववदेतद्द्वयं परस्परं विलक्षणं भवति गामश्वमिव ब्रह्मविलक्षणं विश्वं कथं ब्रह्म पश्यति विद्वानिति चेन्न, तयोः कार्यकारणभावापन्नत्वाद्वैलक्षण्यानुपपत्तेः। गवाश्वयोस्तु कार्यकारणभावाभावाज्जातिभेदाच्च वैलक्षण्यं संभवति न तथा जगद्ब्रह्मणोः । ननु नामतो रूपतो गुणतो जातितश्च जगद्भिद्यते निरुक्तभेदस्य प्रत्यक्षत्वादेवं भेदभिन्नं जगत्कथं ब्रह्म पश्यतीति चेन्न, नामरूपादेरधिष्ठानाज्ञानकल्पितत्वाद्यथैकस्मिन् तोये तरङ्गफेनबुद्बुदादिभेदकल्पना, यथैकस्यामेव भूम्यां गृहक्षेत्रादिभेदकल्पना, तथैवैकस्मिन् ब्रह्मणि नामरूपादिभेदकल्पना भ्रममूला नतु वास्तवी । यथा द्रवत्वशीतत्वशुक्लत्वमधुरत्वादीनां तोयधर्माणां तरङ्गादिषु बहिरन्तरनुस्यूतत्वाज्जलसत्ताव्यतिरेकेण पृथक्सत्ताभावाच्च तरङ्गादि सर्वं जलमात्रमेव भवति,तथा जगत्यपि बहिरन्तः सर्वत्राविच्छेदेन सत्त्वचित्त्वादीनां ब्रह्मधर्माणामनुगमदर्शनाद्ब्रह्मसत्ताव्यतिरेकेण पृथक्सत्ताऽभावाच्च "चिद्धीदं सर्वम्। सद्धीदं सर्वम्। सर्वं खल्विदं ब्रह्म। ब्रह्मैवेदं सर्वम्" इत्यादिश्रुतिभिरिदं सर्वं ब्रह्मैव ब्रह्मकार्यत्वान्मृत्कार्यभूतो घटो मृद्यथा इदं सर्वं ब्रह्मैव ब्रह्मण्यारोपितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिर्मृदादिदृष्टान्तैश्च सम्यग्विचार्यमाणे जगत्सर्वं ब्रह्मैव भवत्यत एव शुद्धात्मा ब्रह्मवित्सर्वं जगद्ब्रह्मैव पश्यतीत्यर्थः । यद्यपि श्रुतियुक्तिदृष्टान्तानुभवैर्जगतो ब्रह्ममात्रत्वे सिद्धे जगतः कार्यत्वं निवृत्तं तन्निवृत्त्या ब्रह्मणोऽपि 'निमित्तापाये नैमित्तिकस्याप्यपायः' इतिन्यायेन कारणत्वं निवृत्तमेव भवति, कार्यत्वसापेक्षत्वात्कारणत्वस्य तन्निवृत्त्या तन्निवृत्तिरेवमुभयनिवृत्त्या तु कार्यकारणभावविकलमेवाद्वितीयं ब्रह्मेति ब्रह्मणोऽद्वितीयत्वं सिद्धं तथाप्यधुना विचारादद्वितीयत्वं ब्रह्मणः सिद्धं पूर्वं तु जग-

दिति ब्रह्मेति द्वैतमस्त्येवेत्याशङ्कायां न, पूर्वमपि यथा रज्जुरेव सर्पतच्छिरःपुच्छादिरूपेणाभात्, यथा-मरुरेव जलतत्तरङ्गफेनादिरूपेणाभात्तथा ब्रह्मैव भ्रान्त्या द्रव्यगुणकर्मादिभेदाभिन्नजगदात्मना भातं नतु वस्तुतो जगदस्तीति मुमुक्षुणा ब्रह्मणः कालत्रयेऽप्यद्वितीयत्वसिद्धये ब्रह्मणि तद्विवर्तत्वेन जगत्स्थितमिति द्रष्टव्यमिति व्यतिहारमुखेनोक्तमेव दर्शनं पुनर्द्रढयति जगतो ब्रह्ममात्रत्वे निर्विचिकित्सत्वाय—अकर्मणि च कर्म य इति। अकर्मण्युक्तलक्षणे ब्रह्मणि कर्म चोक्तलक्षणं जगद्यः पश्येद्ब्रह्मविवर्तत्वेन स्वतःसत्ताभावाद्रजतं शुक्तिमिव सलिलं मरुमिव जगत्सर्वं ब्रह्मैव यः पश्यतीत्यर्थः। "सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद" इति श्रुतिर्ब्रह्मणः पृथक्सत्तावत्त्वेन नामरूपादिभेदभिन्नं जगत् पश्यतो विदुषोऽनर्थं ब्रवीति यतस्ततो नामरूपादिद्वैतदर्शनं भ्रमकल्पितमुत्सृज्य निःश्रेयसार्थिना निःशेषविनष्टविपर्ययं यथातथा नाम रूपं गुणं कर्म च सर्वं ब्रह्मैवेति द्रष्टव्यमिति सिद्धम्। एवमसन्दिग्धमविपर्यस्तं सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव यः पश्यति स एव बुद्धिमान् ब्रह्मवेत्ता स एव युक्तो ब्रह्मनिष्ठः स एव कृत्स्नकर्मकृत् कृत्स्नानि सर्वाण्यनेककल्पार्जितानि संचितान्याधुनिकजन्मकृतान्यप्रवृत्तफलानि कर्माणि नानायोनिप्रापकाणि स्वयाथात्म्यविज्ञानखङ्गेन कृन्तति छिनत्तीति कृत्स्नकर्मकृत् "सर्वं पाप्मानं तरति" इतिश्रवणादेवं द्रष्टा यः सोऽशुभान्मुक्तो भवतीत्यर्थः ॥ १८ ॥

श्री० टी०—तदेवं कर्मादीनां दुर्विज्ञेयत्वं दर्शयन्नाह—**कर्मण्यकर्मेति**। परमेश्वराराधनलक्षणे कर्मणि विषये अकर्म कर्मेदं न भवतीति यः पश्येत्तस्य ज्ञानहेतुत्वेन बन्धकत्वाभावात्, अकर्मणि च विहिताकरणे कर्म यः पश्येत्तस्य प्रत्यवायोत्पादकत्वेन बन्धहेतुत्वात्, मनुष्येषु कर्म कुर्वाणेषु स बुद्धिमान्व्यवसायात्मकबुद्धिमत्त्वाच्छ्रेष्ठः। तं स्तौति स युक्तः योगी तेन कर्मणा ज्ञानयोगावाप्तेः। स एव कृत्स्नकर्मकर्ता च सर्वतः संप्लुतोदकस्थानीये तस्मिन्कर्मणि सर्वकर्मफलानामन्तर्भूतत्वात्। तदेवमारुरुक्षोः कर्मयोगाधिकारावस्थायां न कर्मणामनारम्भादित्यादिनोक्त एव कर्मयोगः स्फुटीकृतः। तत्प्रपञ्चरूपत्वाच्चास्य प्रकरणस्य न पौनरुक्त्यदोषः। अनेनैव योगारूढावस्थायां यस्त्वात्मरतिरेव स्यादित्यादिना यः कर्मानुपयोग उक्तस्तस्याप्यर्थात्प्रपञ्चः कृतो वेदितव्यः। यदा आरुरुक्षोरपि कर्म बन्धकं न भवति तदारूढस्य कुतो बन्धकं स्यादित्यत्रापि श्लोको योज्यते। यद्वा कर्मणि देहेन्द्रियादिव्यापारे वर्तमानेऽप्यात्मनो देहादिव्यतिरेकानुभवेनाकर्म स्वाभाविकं नैष्कर्म्यमेव यः पश्येत्, तथाकर्मणि च ज्ञानरहिते दुःखबुद्ध्या कर्मणां त्यागे कर्म यः पश्येत् तस्य प्रतिबन्धकत्वेन मिथ्याचारत्वात्। तदुक्तम्—कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्निति। य एवंभूतः स तु सर्वेषु मनुष्येषु बुद्धिमान्पण्डितः। तत्र हेतुः यतः कृत्स्नानि सर्वाणि यदृच्छया प्राप्तान्याहारादीनि कर्माणि कुर्वन्नपि स युक्त एवाकर्त्रात्मज्ञानेन समाधिस्थ एवेत्यर्थः। अनेनैव ज्ञानिनः स्वभावादापन्नं कलञ्जभक्षणादिकं न दोषाय, अज्ञस्य तु रागतः कृतं दोषायेति विकर्मणोऽपि तत्त्वं निरूपितं द्रष्टव्यम् ॥ १८ ॥

स० टी०—कीदृशं तर्हि कर्मादेस्तत्त्वमित्यत्र कथ्यते॥ देहेन्द्रियादिव्यापारे निषिद्धे विहिते तथा ॥ १ ॥ कर्मण्यहं करोमीति धर्माध्यासे प्रकल्पिते ॥ स्वात्मन्यसङ्गचिद्रूपे निरीहे निष्क्रियेऽमले ॥ २ ॥ पश्यत्यकर्म यो वस्तुदृष्ट्या सम्यग्विवेकतः ॥ यथा नौस्थेन तीरस्थवृक्षेष्वविचलेष्वपि ॥ ३ ॥ कल्पितं चलनं तद्वदक्रिये कर्म कल्पितम् ॥ अकर्त्रात्मविचारेण कर्माभावं च वस्तुतः ॥ ४ ॥ तीरस्थवृक्षेष्विव यः पश्यत्यात्मस्वरूपवित् ॥ तथा मायाविकारेषु सदा देहेन्द्रियादिषु ॥ ५ ॥ सव्यापारेषु तच्छून्यस्तूष्णीमासे सुखं त्विति ॥ आरोपिताभिमानेन व्यापारोपरमाभिधे ॥ ६ ॥ गच्छत्स्वगमनं यद्वत्कल्पितं नृषु दूरगैः ॥ सदा देहेन्द्रियादीनां स व्यापारविचारणात् ॥ ७ ॥ यश्च कर्म निवृत्त्याख्यं व्यापारं परिपश्यति ॥ उदासीनदशायामप्यहमासे स तादृशः ॥ ८ ॥ एवंरूपोऽभिमानोऽस्ति कर्म यश्चेति पश्यति ॥ एवंभूतः स आत्मज्ञो बुद्धि-

सत्त्वादिभिर्गुणैः ॥ ९ ॥ स्तूयते वासुदेवेन सम्यग्दर्शितया मुनिः ॥ अत्राद्यपादे संप्रोक्तं तत्त्वं कर्मविकर्मणोः ॥ १० ॥ विहिते प्रतिषिद्धे च कर्मशब्दप्रयोगतः ॥ अकर्मणो द्वितीयेन तत्त्वमत्र प्रदर्शितम् ॥ ११ ॥ सत्यां कर्तृत्वबुद्धौ हि तूष्णीमासेऽहमित्यपि ॥ बन्धहेतुरविद्येयं वस्तुतत्त्वाविचारणात् ॥ १२ ॥ तस्मात्त्वमीदृशं तत्त्वं कर्माकर्मविकर्मणाम् ॥ ज्ञात्वा कर्मैव विहितं कुरु त्यक्त्वोभयं त्रिपु ॥ १३ ॥ यद्वा कर्मणि दृश्येऽस्मिन् जडे हि ज्ञानकर्मणि ॥ सत्तास्फूर्त्यात्मना तत्त्वमनुस्यूतं सदद्वयम् ॥ १४ ॥ भ्रमाधिष्ठानचैतन्यमकर्मावेद्यमान्तरम् ॥ परमार्थदृशैवं यः पश्यत्यद्धा विविक्तदृक् ॥ १५ ॥ तथाकर्मणि दृग्वस्तु स्वप्रकाशे प्रकल्पितम् ॥ कर्म दृश्यं मृषारूपं मायाकार्यं क्षरं जडम् ॥ १६ ॥ दृग्दृश्ययोर्न संबन्धो विनाध्यासं भ्रमात्मकम् ॥ अन्योन्याध्यासमाबाध्य यः शुद्धं वस्तु पश्यति ॥ १७ ॥ स बुद्धिमान्मनुष्येषु सत्त्वदर्शितयोत्तमः ॥ स युक्तो योगफलभाग्धीशुद्ध्या सर्वकर्मकृत् ॥ १८ ॥ तस्मात्त्वमपि याथात्म्यं ज्ञात्वा स्तुत्यो भवात्मनः ॥ इदमेव हि बोद्धव्यं तत्त्वं कर्मादिगोचरम् ॥ १९ ॥ एवं ज्ञानाद्विमुक्तः स्यात्संसारान्नान्यबोधतः ॥ अत्र पद्ये कुधीभिर्यत्कल्पितं स्वकपोलतः॥ २० ॥ खण्डितं भाष्यकारैस्तद्व्याख्यानं चात्यसङ्गतम् ॥ २१ ॥ १८ ॥

भा० टी०—किं पुनः कर्मादेस्तत्त्वं बोद्धव्यमस्तीत्यपेक्षायामाह—**कर्मणीति** । नौस्थस्य तटस्थतरुपर्वतादिषु समारोपितचाञ्चल्यप्रतीतिरिव लोकस्य देहाद्याश्रयं कर्मात्मन्यारोप्याहं कर्ता ममैतत्कर्मास्य फलं मया भोक्तव्यमिति भ्रान्त्या प्रतीतिस्तन्निवृत्त्यर्थं भगवानाह—कर्मणि क्रियत इति कर्म व्यापारमात्रमात्मन्यारोपितं तस्मिन्नकर्म पूर्वैर्जनकादिभिर्मुक्तैर्मुमुक्षुभिश्च नाहं कर्ता न ममैतत्कर्मास्य फलं मम नापेक्षितमिति कर्माभावः यथा दृष्टस्तथाधुनातनोऽपि यः कश्चित्पश्यति सूर्यादिषु गच्छत्स्वप्यगमनप्रतीतिरिव देहेन्द्रियादिषु मायिकेषु नित्यं प्रवृत्तिनिवृत्तिरूपक्रियायुक्तेषु निर्व्यापारस्तूष्णीं सुखमास इति भ्रान्त्या प्रतीतिस्तन्निराकरणायाह—अकर्मणि कर्म यः पश्यति निवृत्तेरपि क्रियात्वात् स मनुष्येषु बुद्धिमान् स युक्तः योगी कृत्स्नकर्मकृत् समस्तकर्मकृच्च स इति कर्माकर्मणोस्तत्त्वदर्शी स्तूयते । यत्तु परमेश्वराराधनलक्षणे कर्मणि विषयेऽकर्म कर्मेदं न भवति इति यः पश्येत्तस्य ज्ञानहेतुत्वेन बन्धकस्वाभावात् अकर्मणि च विहिताकरणे कर्म यः पश्येत्प्रत्यवायोत्पादकत्वेन बन्धहेतुत्वात् स बुद्धिमानित्यादि तदसङ्गतम् । एवं ज्ञानादशुभान्मोक्षस्यानुपपत्त्या यज्ज्ञात्वेत्यादि भगवदुक्तिबाधप्रसङ्गात् नहि नित्यानामनुष्ठानसापेक्षाणां कर्मणां फलाभावज्ञानान्मोक्षणं भवति नापि कर्माकर्माकर्म कर्मेति मिथ्याज्ञानादशुभस्वरूपादन्यतोऽशुभान्मोक्ष उपपद्यते अकर्मणश्चाभावरूपतया भावरूपस्य प्रत्यवायस्योत्पत्तेर्वर्णनम् "कथमसतः सज्जायेत" इति श्रुतिविरुद्धमिति संक्षेपः । विस्तरस्तु भाष्ये द्रष्टव्यः । यदपि कर्मणि ज्ञानकर्मणि दृश्ये जडे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वभ्रमाधिष्ठानमकर्मावेद्यं स्वप्रकाशचैतन्यं परमार्थदृष्ट्या यः पश्येत्तथाऽकर्मणि च स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थसत् दृग्दृश्ययोः संबन्धानुपपत्तेः । एवं परस्पराध्यासेऽपि शुद्धं वस्तु यः पश्यति स परमार्थदर्शित्वाद्बुद्धिमानित्यादिवास्तवैरेव गुणैः स्तूयत इति कैश्चित् व्याख्यातं तदप्युपेक्ष्यं, ज्ञानकर्मणः घटादिरूपस्याप्रस्तुतत्वात् । एवं ज्ञात्वेत्यादिनोपक्रम्य किं कर्मेत्यनेन तत्र वैषम्यं प्रदर्श्य तस्य कर्मणो बोद्धव्यं तत्त्वमस्तीति निरूप्यानेन श्लोकेन तत्त्वकथनस्योचितत्वेन ज्ञानकर्मणोऽकर्तव्यस्य वर्णनमसङ्गतमिति दिक् । यदपि कर्माकर्मणी वक्तव्यत्वेन बोद्धव्यत्वेन चोपक्षिप्यात्र तयोर्लक्षणदर्शनमुचितम् अतो यदकर्मणा विशेषितं तदेव कर्म नान्यदिति कर्मलक्षणं यच्च कर्मणा विशेषितं तदेवाकर्म इत्यकर्मलक्षणमिति व्याख्येयम् । अक्षरार्थस्तु कर्म यज्ञादिकं ससाधनं तदकर्म स्पन्दशून्यं कूटस्थं ब्रह्म यः पश्येत्कर्म तदङ्गेषु ब्रह्मदृष्टिमध्यसेत् 'अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्' इत्युक्तेः । अन्यथा यत्कृतं

तद्वृथाचेष्टारूपमेवातो गहना कर्मणो गतिः । किं तदकर्म यत्कर्मण्यध्यस्यते इत्याकाङ्क्षायां यत्रैतत् कर्म पुण्यपापात्मकं दृश्यते पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति तत्फलं च सुखदुःखादिकमहं सुख्यहं दुःखीति स प्रत्यक्चेतनोऽकर्म तत्रैवेदं कर्म अस्पन्दे स्पन्दात्मकं सर्पः असर्प इव अध्यस्तमिति यः पश्येदिति तदप्यसङ्गतमेव प्रकरणाविरोधस्यात्रापि तुल्यत्वात्। प्रस्तुतस्य तूष्णीं भावात्मकस्याकर्मणः प्रत्यक्चैतन्यपरत्ववर्णने प्रस्तुतविरोधः स्फुटः तथा कर्मण्यकर्मेत्यत्रापि कर्मप्रतियोगिकमेवाकर्मापेक्षितं नापि यज्ञरूपे कर्मणि ब्रह्मदृष्टयध्यासात्फलाभिसन्धिकर्तृत्वाभिनिवेशत्यागं विनाऽशुभान्मोक्षणं संभवति । तस्मात्सर्वज्ञैर्भाष्यकृद्भिरुक्तं व्याख्यानमेव समीचीनमिति दिक् ॥ १८ ॥

प० टी०—अथैतदेव विविच्याह—**कर्मणीति** । वेदविहिते कर्माणि योऽकर्म नैष्कर्म्यं पश्येत्, तथाकर्मणि नैष्कर्म्ये निमित्तभूतं कर्मैव पश्येत्, एवं मिथः कार्यकारणरूपत्वं पश्येत् स एव व्यवसायात्मकबुद्धिमान् स एव कृत्स्नकर्मकृत्, मुक्तौ सर्वकर्मफलानामन्तर्भूतत्वात् ॥ १८ ॥

रा टी०—कर्मादिस्वरूपं प्रपञ्चयँस्तद्बोधं स्तौति—**कर्मणीति** । वर्णाश्रमोचितकर्मणि क्रियमाणे सति अकर्म कर्माभावं स्वस्य यः पश्येत् भगवानेव कर्ता नाहं स्वतन्त्रः किंतु तदधीनकर्तृशक्तिकः सन्करोमीति यः पश्येदित्यर्थः । अकर्मणि जीवकर्तृककर्मकरणहीने सुप्त्यादौ जीवस्य कर्माकरणावस्थायामिति यावत् कर्म यः पश्येत् जीवव्यापारस्य भावे अभावे च सदा भगवानेव महदादिस्वप्रादौ गजादि करोतीति पश्येदित्यर्थः । अनेन हरेः परानपेक्षया कर्तृत्वं स्वस्य. तदधीनकर्तृत्वं ज्ञात्वा वर्णाश्रमविहितानुष्ठानं कर्मेत्युक्तं भवति । एतेन कर्माकरणमकर्म निषिद्धं कर्म विकर्मेत्युक्तप्रायम् । कर्मादिबोधं स्तौति—**स इति** । य एवं पश्येत्स बुद्धिमान् ज्ञानी । प्रशंसायां मतुप् । स एव युक्तः ज्ञानोपायवान्, स एव कृत्स्नकर्मकृत् स्वयोग्यकृत्स्नकर्मफलस्य ज्ञानस्य मोक्षस्य प्राप्तप्रायत्वादिति भावः । यद्वा करशब्दः सकारान्तः कर्मविधिवाची तेन मीयते विषयीक्रियते इति कर्म । उपपदस्य टिलोपो मातेः कनिन्प्रत्ययः । 'करोऽस्मिन्मीयत इति कर्म जीव उदाहृतः' इति निर्वचनात् विधिबद्धत्वात्कर्मशब्दार्थो जीवः। कर्मविधेस्तत्फलस्य चाभावादकर्मपदेनेश्वरो ग्राह्यः । तथाच कर्मणि विधिबद्धे जीवे अस्वातन्त्र्याद्धेतोरकर्म कर्माभावं यः पश्येत् तथाऽकर्मणि विष्णौ कर्म यः पश्येत् सर्वकर्मकर्तृत्वात्तदीयमेव सर्वकर्मेति पश्येत् स बुद्धिमान् ज्ञानीत्येवं प्राग्वदेव स्तुतिपरतार्थस्य ध्येया ॥ १८ ॥

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥

श्री० टी०—उक्तप्रकारेण कर्माकर्मादिज्ञातुर्बुद्धिमत्त्वं यदुक्तं तदेवोपपादयति—यस्येति । यस्य मुमुक्षोः सर्वे समारम्भा नित्यनैमित्तिकभगवज्जन्मकर्मोत्सवादिसंबन्धिनः सम्यगारम्भाः कामसंकल्पवर्जिताः, काम्यन्त इति कामाः फलानि तत्संकल्पवर्जिता भवन्ति, तं बुधाः पण्डितं ज्ञानिनमाहुः । यतो ज्ञानाग्निदग्धकर्माणम्, उक्तप्रकारैः कर्मभिर्निर्मलीभूतेऽन्तःकरणे जातो यो ज्ञानरूपोऽग्निस्तेन दग्धानि फलदान्यपि भर्जितान्नवत्फलोत्पादनानर्हीभूतानि कर्माणि यस्य तमित्यर्थः ॥ १९ ॥

म० टी०—तदेतत्परमार्थदर्शिनः कर्तृत्वाभिमानाभावेन कर्मालिप्तत्वं प्रपञ्च्यते—यस्येत्यादिना ब्रह्मकर्मसमाधिनेत्यन्तेन । यस्य पूर्वोक्तपरमार्थदर्शिनः सर्वे यावन्तो वैदिका लौकिका वा समारम्भाः समारभ्यन्त इति व्युत्पत्त्या कर्माणि, कामसंकल्पवर्जिता कामः फलतृष्णा संकल्पोऽहं करोमीति कर्तृत्वाभिमानस्ताभ्यां वर्जिताः लोकसंग्रहार्थं वा जीवनमात्रार्थं वा प्रारब्धकर्मवेगाद्वृथाचेष्टारूपा भवन्ति तथा कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्"

इति न्यायात् ज्ञानाग्निदग्धकर्माणं तं बुधाः ब्रह्मविदः परमार्थतः पण्डितं आहुः सम्यग्दर्शी हि पण्डित उच्यते नतु भ्रान्त इत्यर्थः ॥ १९ ॥

शां० टी०—"यथा पुष्करपलाश आपो न श्लिष्यन्ते" इत्येतच्छ्रुत्युक्तरीत्या कर्मण्यकर्मत्वदर्शनेन शरीरयात्रोपयुक्तानि ज्ञानसमकालानि सर्वाणि कर्माणि यो विश्लेपयति स एव पण्डित इत्याह—**यस्येति**। समारम्भाः सम्यग्देहेन्द्रियादिभिरेवारभ्यन्ते क्रियन्त इति समारम्भाः प्राणत्राणोपयोगिनो देहेन्द्रियव्यापाराः सर्वे यस्य ब्रह्मविदः कामसंकल्पवर्जिताः कामोऽनेन भवितव्यमितीच्छावेगः संकल्पस्तद्धेतुः सम्यक्त्वबुद्धिस्ताभ्यां वर्जिताः क्षुदादिवत्तात्कालिका भवन्ति तं ज्ञानाग्निदग्धकर्माणं कूटस्थासङ्गचिद्रूप एवाहं नतु कर्ता भोक्ता श्रोता द्रष्टा वक्तेत्यात्मन्येवात्मभावापत्त्या देहतद्धर्मतत्कर्मसुखस्यासङ्गत्वदर्शनं तदेवाग्निस्तेन दग्धानि निर्मूलितानि सर्वाणि विहिताविहितादिरूपाणि कर्माण्यौपाधिकानि यस्य तमेव जीवन्मुक्तं महापुरुषं बुधाः शास्त्रज्ञाः पण्डितं प्राहुः । पण्डा कल्याणी सर्वत्र ब्रह्ममात्रावगाहिन्यखण्डात्मिका वृत्तिरस्य संजातेति पण्डितस्तमेव पण्डितं वदन्ति नान्यमित्यर्थः। अत्र कामवर्जिता इत्यनेन 'यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्' इति न्यायात्कर्मसु प्रवृत्तेः कारणं कामस्तत्कारणं संकल्प एवारम्भाणां तद्विवर्जितत्वे स्वार्थे परार्थे वा विदुषः प्रवृत्तिरनुपपन्ना सती शरीरयात्रामात्रावशिष्टा सापि तात्कालिकी तत्रापि कामाद्यभावाद्वेगवर्जिता ज्ञानाग्निनिर्दग्धा च भवतीति सूचितं भवति ॥ १९ ॥

श्री० टी०—कर्मण्यकर्म यः पश्येदितिश्रुत्यर्थार्थापत्तिभ्यां यदुक्तमर्थद्वयं तदेव स्पष्टयति—**यस्येत्यादि**-पञ्चभिः। सम्यगारभ्यन्त इति समारम्भाः कर्माणि काम्यत इति कामः फलं तत्संकल्पेन वर्जिता यस्य भवन्ति तं पण्डितमाहुः। तत्र हेतुः यतस्तैः समारम्भैः शुद्धचित्ते सति जातेन ज्ञानाग्निना दग्धानि अकर्मतां नीतानि कर्माणि यस्य तम्। आरूढावस्थायां तु कामः फलविषयस्तदर्थमिदं कर्म कर्तव्यमिति कर्मविषयः संकल्पश्च ताभ्यां वर्जितः। शेषं स्पष्टम् ॥ १९ ॥

स० टी०—यथार्थदर्शिनोऽध्यासाभावात्कर्माद्यसङ्गता॥ प्रपञ्च्यतेऽत्र हरिणा श्लोकैः षड्भिरतिस्फुटम्॥१॥ यथोक्तदर्शिनो यस्य सर्वे श्रौताश्च लौकिकाः॥ कर्माभिधाः समारम्भाः फलाहंकारवर्जिताः॥ २॥ शरीरयात्रामात्रार्थं संग्रहायाथ वा मुधा॥ चेष्टामात्रा भवन्त्याप्तकामस्याद्वैतदर्शिनः॥ ३ ॥ यत्कर्मादावकर्मादिदर्शनं ज्ञानमेव तत्॥ अग्निस्तेन प्रदग्धानि यस्य कर्माणि सर्वशः॥४॥ परमार्थेन तं प्राहुः पण्डितं ब्रह्मविद्वराः॥ पण्डितस्तत्त्वदर्शी स्यान्न तु भ्रान्तो जडात्मदृक्॥ ५॥ १९॥

भा० टी०—तदेतत्स्तौति—**यस्येति**। यथोक्तदर्शिनः सर्वे समारभ्यन्त इति समारम्भाः कर्माणि कामैः फलतृष्णाभिः संकल्पैस्तत्र तत्र कर्तृत्वाभिनिवेशैस्तत्कारणीभूतैः यद्वा काम्यन्त इति कामाः। फलानि तैः तत्कारणीभूतैस्तत्संकल्पैश्च वर्जिताः मुधैव चेष्टामात्रा अनुष्ठीयन्ते। कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तं परमार्थतः पण्डितं बुधाः तत्त्वदर्शिन आहुः॥ १९॥

प० टी०—अथैवं पश्यतः पुरुषस्य स्वरूपमाह—**यस्येति** पञ्चभिः। यस्य पुरुषस्य सम्यगारभ्यन्त इति समारम्भाः कर्माणि काम्यत इति कामः फलं तत्संकल्पेन वर्जिता भवन्ति तं पण्डितमाहुः किं भूतम्, ज्ञानाग्निदग्धकर्माणम्, ज्ञानाग्निना निर्दग्धानि भर्जितबीजानि कर्माणि यस्य॥ १९॥

रा० टी०—न केवलं कर्तृत्वाभिमानत्यागेन वर्णाश्रमोचितकृत्स्नकर्मकृत्त्वं किंतु कामादिपरित्यागेनापि भाव्यमितिभावेन कर्मस्वरूपमेव प्रपञ्चयति—**यस्येत्यादि**श्लोकपञ्चकेन । यस्य पुंसः सर्वे समारम्भाः सर्वकर्मोपक्रमाः कामसंकल्पवर्जिताः कामः फलेच्छा अनेनेदं स्वर्गादिसाधयिष्यामीति संकल्पः, ताभ्यां हीनाः तं ज्ञानाग्निदग्धकर्माणं हरेरेव स्वतन्त्रकर्तृत्वं ज्ञात्वा पश्चात्स्वस्य स्वातन्त्र्येण कर्माभावज्ञानित्वं ज्ञानाग्निदग्धकर्मत्वं तादृशं बुधाः ज्ञानिनः पण्डितं तत्त्वज्ञानिनमाहुः॥ १९॥

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥

त० टी०—एतेन निष्कामस्य ज्ञानिनः पूर्वकर्मविनाश उक्तः। इदानीं क्रियमाणकर्मणामश्लेषमाह—त्यक्त्वेति। कर्मणि तत्फले च आसङ्गं फलकर्तृत्वाभिमानं त्यक्त्वा नित्येन स्वरूपानन्देन तृप्तः, निराश्रयः देहाद्यर्थमाश्रयणीयरहितो यः स शास्त्रीये लौकिके वा कर्मणि आभिमुख्येन प्रवृत्तोऽपि किंचित्कर्म न करोति न तेन श्लिष्यते इत्यर्थः ॥ २० ॥

म० टी०—भवतु ज्ञानाग्निना प्राक्तनानामप्रारब्धकर्मणां दाहः आगामिनां चानुत्पत्तिः, ज्ञानोत्पत्तिकाले क्रियमाणं तु पूर्वोत्तरयोरनन्तर्भावात् फलाय भवेदिति भवेत्कस्यचिदाशङ्का तामपनुदति—त्यक्त्वेति। कर्मणि फले चासङ्गं कर्तृत्वाभिमानं भोगाभिलाषं च त्यक्त्वा अकर्त्रभोक्त्रात्मसम्यग्दर्शनेन बाधितत्वान्नित्यतृप्तः परमानन्दस्वरूपलाभेन सर्वत्र निराकाङ्क्षः निराश्रयः आश्रयो देहेन्द्रियादिरद्वैतदर्शनेन निर्गतो यस्मात् स निराश्रयो देहेन्द्रियाद्यभिमानशून्यः फलकामनायाः कर्तृत्वाभिमानस्य च निवृत्तौ हेतुगर्भं क्रमेण विशेषणद्वयम्। एवंभूतो जीवन्मुक्तो व्युत्थानदशायां कर्मणि वैदिके लौकिके वा अभिप्रवृत्तोपि प्रारब्धकर्मवशाल्लोकदृष्ट्याऽभितः साङ्गोपाङ्गानुष्ठानाय प्रवृत्तोपि स्वदृष्ट्या नैव किंचित् करोति सः निष्क्रियात्मदर्शनेन बाधितत्वादित्यर्थः ॥ २० ॥

शं० टी०—सर्वं ब्रह्मैव पश्यतो विदुषः स्वार्था परार्था वा प्रवृत्तिर्न संभवति कचिद्वासनया आहारादौ कर्मणि प्रवृत्तोपि स्वयमकर्मैव भवतीत्याह—त्यक्त्वेति। ब्रह्मवित्स्वयं नित्यतृप्तः नित्येनानन्दैकरसेन स्वात्मना साक्षात्कृतेन ब्रह्मणैव तृप्तस्तृप्तिं गतः स्वरूपसुखसंपन्नस्तत एव निराश्रयः येन ससाधनं कर्म पुमानाश्रयति स आश्रयः कामस्तस्मान्निर्गतो यः स निराश्रयो निष्कामस्तत एव कर्मसु न प्रवर्तते काममूलत्वात्प्रवृत्तेस्तदभावात्तदभावो युक्तः। यदि वासनया भिक्षाटनादौ कचित्प्रवर्तते तदा कर्मफलासङ्गं कर्माणि फलन्ति यत्रेति वा कर्माणि फलतीति वा स्वयं कर्मणा फलत्वाद्वा कर्मफलो देहस्तत्रासङ्गं कर्ता भोक्ता वक्ता श्रोता द्रष्टाहमिति तत्तादात्म्यं त्यक्त्वा कर्मणि स्वोचितेऽभिप्रवृत्तोऽपि स विद्वान् परदृष्ट्या कुर्वन्नपि स्वदृष्ट्या तु किंचिन्न करोत्येव, कर्मण्यकर्मत्वदर्शनेन कर्मभिरुपाधिकृतैर्न लिप्यत इत्यर्थः ॥ २० ॥

श्री० टी०—किंच—त्यक्त्वेति। कर्मणि तत्फले चासक्तिं त्यक्त्वा नित्येन निजानन्देन तृप्तः अत एव योगक्षेमार्थमाश्रयणीयरहितः एवंभूतो यः स्वाभाविके विहिते च कर्मणि अभितः प्रवृत्तोऽपि किंचिदपि नैव करोति तस्य कर्माकर्मतामापद्यत इत्यर्थः ॥ २० ॥

स० टी०—सम्यग्ज्ञाने समुत्पन्ने कार्यं ज्ञस्य न किंचन ॥ कृतैः कर्मभिरस्पृष्टभावत्वादेवमुच्यते ॥१॥ कर्तृत्वाहंकृतिं त्यक्त्वा फले तृष्णां च कर्मणि ॥ परानन्दात्मलाभेन निराकाङ्क्षोऽखिले फले ॥ २ ॥ देहाद्यहंकृतेः शून्यो दृष्टादृष्टाश्रयातिगः ॥ एवंभूतः प्रवृत्तोऽपि लोकदृष्ट्या यथाविधि ॥ ३ ॥ लौकिके वैदिके वासौ कर्मण्यारब्धयोजितः ॥ स्वदृष्ट्या निष्क्रियः स्वात्मदर्शनध्वस्तविक्रियः ॥ ४ ॥ स्वे महिम्नि स्थितो धीरो नैव किंचित्करोत्यसौ ॥ ५ ॥ २० ॥

भा० टी०—ज्ञानाग्निदग्धकर्मत्वात्तदीयं ज्ञानोत्तरं क्रियमाणमपि कर्माकर्मैव संपद्यत इत्येतमर्थं दर्शयन्नाह—त्यक्त्वेत्यादिना। यत्तु भवतु ज्ञानाग्निना प्राक्तनानामप्रारब्धकर्मणां दाहः आगामिनां चानुत्पत्तिः ज्ञानोत्पत्तिकाले क्रियमाणं तु पूर्वोत्तरयोरनन्तर्भावात् फलाय भवेदिति भवेत्कस्यचिदाशङ्का तामपनुदतीति, तच्चिन्त्यं मूलात्तत्प्राप्त्यादेवंभूतो जीवन्मुक्तो व्युत्थानदशायां कर्मणि वैदिके लौकिके प्रवृत्तोऽपीत्यादिस्वग्रन्थाच्च ज्ञानो-

त्तरक्रियमाणकर्माश्लेषस्य प्रतीतेः स्फुटत्वेनैवमुत्थानानौचित्यात् । ज्ञानोत्पत्तिकाल इत्यस्य किं ज्ञानोत्पत्तिक्षण इत्यर्थः, उत ज्ञानसाधनानामनुष्ठानकाल इति । आद्ये पापादेरसंभवः, द्वितीये तत्कर्मणः पूर्वकर्मण्यन्तर्भाव इति शङ्काया अप्यनुत्थानाच्च अत एव तस्य नाशो वा विश्लेषो वा व्यासेन पृथक् न सूत्रितः कर्मस्वभिमानं फलासक्तिं च त्यक्त्वा यथोक्तेन ज्ञानेन नित्यतृप्तः विषयेषु निराकाङ्क्षः अत एव दृष्टादृष्टेष्टफलसाधनाश्रयरहितः योगक्षेमार्थाश्रयणीयरहित इति व्याख्या तु भाष्यान्तर्भूता यत्त्वाश्रयो देहेन्द्रियादिरद्वैतदर्शनेन निर्गतो यस्मात्स निराश्रयः देहेन्द्रियाद्यभिमानशून्यः । फलकामनायाः कर्तृत्वाभिनिवेशस्य च निवृत्तौ क्रमेण विशेषणद्वयमिति व्याख्यानं तदपि दृष्टादृष्टेष्टफलसाधनानि देहेन्द्रियादीनि तदेवाश्रयस्तद्रहितः देहाद्यभिमानशून्य इति भाष्यं व्याख्याय तदविरोधेनादेयम् । तेनेवंभूतेन प्रयोजनाभावात्समग्रं कर्म यद्यपि त्याज्यं तथापि प्रारब्धप्राबल्याल्लोकसंग्रहार्थं लोकदृष्ट्या पूर्ववत्कर्मण्यभितः साङ्गोपाङ्गानुष्ठानाय प्रवृत्तोऽपि निष्क्रियात्मदर्शनसंपन्नत्वात्स्वदृष्ट्या नैव किंचित्करोति सः तत्त्वविदः क्रियमाणकर्मसंबन्धो न भवतीत्यर्थः २०॥

प० टी०—किंच—त्यक्त्वेति । कर्मफलानामासमन्तात्सङ्गं त्यक्त्वा निजानन्देन नित्यतृप्तोऽत एव निराश्रय आश्रयणीयरहित एवंविधो योऽभितः सर्वकर्मप्रवृत्तोऽपि नैव किंचित्करोति कर्तृत्वाभिमानशून्यो भवति तस्य कर्माकर्मतामेति ॥ २० ॥

रा० टी०—कामसंकल्पवर्जितत्वमात्रेण न कर्मस्वरूपं पूर्णं किंतु कर्मफलस्नेहत्यागेनापि भाव्यमित्याह—त्यक्त्वेति । कर्मणि फले चासङ्गं स्नेहं च त्यक्त्वा नित्यतृप्तो निराश्रयः नित्यतृप्तनिराश्रयभगवत्सरूपोऽस्मीति ज्ञानवान् कर्मण्यभिप्रवृत्तोऽपि स नैव किंचित्करोति स्वातन्त्र्याभावात् । अनिराश्रय इति वा पदविभागः । भगवदाश्रयत्वादनिराश्रय इत्यर्थः ॥ २० ॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

त० टी०—यद्येवं तर्हि—निराशीरिति । निर्गता आशिषः कामना यस्मात्स तथा यतं वशीकृतं चित्तमात्मा सेन्द्रियो देहश्च येन सः, त्यक्तः सर्वपरिग्रहः संग्रहो येन स केवलं शारीरं शरीरसम्बन्धिमात्रं नित्यावर्जनीयं कर्म कुर्वन् किल्बिषं पापं नाप्नोतीति किमु वक्तव्यमित्यर्थः ॥ २१ ॥

म० टी०—यदात्यन्तविक्षेपहेतोरपि ज्योतिष्टोमादेः सम्यग्ज्ञानवशात् न तत्फलजनकत्वं तदा शरीरस्थितिमात्रहेतोरविक्षेपकस्य भिक्षाटनादेर्नास्त्येव बन्धहेतुत्वमिति कैमुत्यन्यायेनाह—निराशीरिति । निराशीर्गततृष्णः यतचित्तात्मा चित्तमन्तःकरणमात्मा बाह्येन्द्रियसहितो देहस्तौ संयतौ प्रत्याहारेण निगृहीतौ येन सः यतो जितेन्द्रियोऽतो विगततृष्णत्वात् त्यक्तसर्वपरिग्रहः त्यक्ताः सर्वे परिग्रहा भोगोपकरणानि येन सः एतादृशोऽपि प्रारब्धकर्मवशात् शारीरं शरीरस्थितिमात्रप्रयोजनं कौपीनाच्छादनादिग्रहणभिक्षाटनादिरूपं यतिं प्रति शास्त्राभ्यनुज्ञातं कर्म कायिकं वाचिकं मानसं च तदपि केवलं कर्तृत्वाभिमानशून्यं पराध्यारोपितकर्तृत्वेन कुर्वन्परमार्थतोऽकर्त्रात्मदर्शनान्नाप्नोति न प्राप्नोति किल्बिषं धर्माधर्मफलभूतमनिष्टं संसारं पापवत्पुण्यस्याप्यनिष्टफलत्वेन किल्बिषत्वात् । ये तु शरीरनिर्वर्त्यं शारीरमिति व्याचक्षते तन्मते केवलं कर्म कुर्वन्नित्यतोऽधिकार्थालाभादव्यावर्तकत्वेन शारीरपदस्य वैयर्थ्यम् । अथ वाचिकमानसिकव्यावर्तनार्थमिति ब्रूयात् तदा कर्मपदस्य विहितमात्रपरत्वे शारीरं विहितं कर्म कुर्वन्नाप्नोति किल्बिषमित्यप्रसक्तप्रतिषेधोऽनर्थकः वाचिकं मानसं च विहितं कर्म कुर्वन्नाप्नोति किल्बिषमिति च शास्त्रविरुद्धमुक्तं स्यात् विहितप्रतिषिद्धसाधारणपरत्वेप्येवमेव व्याघात इति भाष्य एव विस्तरः ॥ २१ ॥

शं० टी०—यस्तु विवेकवैराग्यशमदमादिसाधनसंपत्त्या सर्वाणि कर्माणि संन्यस्य श्रवणमननाभ्यां विज्ञातात्मतत्त्वो यतिर्निदिध्यासनपरो भवति स तु शरीरयात्रामात्रात्मकं कर्म कृत्वा ब्रह्मनिष्ठया निर्मूलितबन्धः सन्मुक्तो भवतीत्याह—**निराशीरिति** । निःशेषं निर्गता आशिषो वैषयिक्यः कामना यस्मात्स निराशीर्विनष्टसर्वकाम इत्यर्थः । तत एव त्यक्तसर्वपरिग्रहः त्यक्ताः कौपीनकन्थातिरिक्ताः सर्वे परिग्रहा येन स त्यक्तसर्वपरिग्रहो योगनिष्ठापरो यतिः स्वयं यतचित्तात्मा आत्मा देहः यतौ निरुद्धौ चित्तात्मानौ येन स यतचित्तात्मा । यद्वा यतं संस्थापितं चित्तमात्मन्येव न क्वचिदनात्मनि येन स यतचित्तात्मा सन् शारीरं शरीरस्थितिकारणं शारीरं प्राणत्राणैकप्रयोजनं तत्रापि केवलं यतित्वज्ञानित्वकर्तृत्वाभिमाननिर्मुक्तं शारीरं कर्म कुर्वन् किल्बिषं नाप्नोति । ननु "व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति प्राणत्राणहेतोर्भिक्षाया यतेर्विहितत्वाद्विहितानुष्ठित्या किल्बिषासंभवादप्राप्तकिल्बिषप्राप्त्यभावप्रतिपादनमयुक्तमिति चेन्न, क्वचित्किल्बिषप्राप्तिप्रसङ्गाद्यतचित्तात्मेत्युक्त्या वाचोऽपि निरुद्धत्वान्मौनिनो यतेः क्वचिदभिशस्तादिभ्योऽपि भिक्षाग्रहप्रसङ्गात् " अभिशस्तपतितवर्जम् " इत्यादिश्रुतिप्रतिषिद्धानुष्ठित्या स्यादेव किल्बिषं सम्यग्ज्ञानप्रतिबन्धकं यत्तदेव कर्मण्यकर्मत्वदर्शनाग्निना निर्दह्य मुक्तिं प्राप्नोतीत्याशयेनोच्यते—कुर्वन्नाप्नोतिकिल्बिषमिति । यद्वा "मधु मांसं च मद्यं च ताम्बूलं तैलमौषधम् । त्याज्यान्यष्टौ यतेर्दूरात्तथा कान्ता च काञ्चनम्" इत्यतिनिषिद्धमपि शारीरं शरीरस्थितिकारणं यदभावे शरीरं निर्गच्छति श्रवणादि न सिद्ध्यति तच्छारीरं सर्पदंशननेत्ररोगोदरशूलादिमहोपद्रवे औषधसेवालक्षणम् "औषधवदशनमाचरेत्" इतिश्रवणाच्छारीरं कर्म केवलमयत्नासिद्धं कुर्वन् यतिः श्रवणादिशीलः किल्बिषं न प्राप्नोति । यद्वा निराशीर्नित्यानित्यविवेकवैराग्यतीव्रमोक्षेच्छाभिराशीर्भ्य ऐहिकामुष्मिकसुखाशाभ्यस्तुच्छविषयाभ्यो निर्गतो यः स निराशीस्तत एव त्यक्तसर्वपरिग्रहः धर्मप्रजासंपत्त्यर्थं परिगृह्यत इति परिग्रहो दारादिः सर्वोऽपि मोक्षेच्छया परित्यक्तो येन स त्यक्तसर्वपरिग्रहः संन्यस्तसर्वकर्मतत्साधनो यतिः स्वयं यतचित्तात्मा यतौ बाह्यप्रवृत्तेर्निवर्तितौ चित्तमात्मा कार्यकारणसंघातश्च द्वौ येन स यतचित्तात्मा सन् शारीरं शरीरोपाधिकत्वादात्मा शारीरस्तत्प्रापकं कर्मापि श्रवणादिकं शारीरमेव भवति बाह्यं जपादिकर्म सर्वं परित्यज्यानन्तरं केवलं शारीरमेव श्रवणादिलक्षणं कर्म कुर्वन् किल्बिषं दुःखप्रदं संसारबन्धनं न प्राप्नोति । कुर्वन्नाप्नोति किल्बिषमिति वदता भगवता जपादिकर्मणा सह श्रवणादि कुर्वन्वा श्रवणादि त्यक्त्वा यतिस्तद्व्यतिरिक्तं कर्मैव कुर्वन् किल्बिषमेव प्राप्नोतीति सूचितं भवति । तेन यतेः श्रवणाद्येव सर्वदा कर्तव्यं नान्यत्स्तोत्रमन्त्रजपादिकमिति सिद्धं भवति । तथा च स्मृतिः 'यमानभीक्ष्णं सेवेत नियमान्मत्परस्त्यजेत् । जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम् ' इति ' संन्यस्य श्रवणं कुर्यान्नान्यत्कुर्याद्यतिः क्वचित् ' इति च ॥ २१ ॥

श्री० टी०—किंच—**निराशीरिति** । निर्गता आशिषः कामना यस्माद् यतं नियतं चित्तमात्मा च शरीरं यस्य त्यक्ताः सर्वे परिग्रहा येन सः शारीरं शरीरमात्रनिर्वर्त्यं कर्तृत्वाभिनिवेशरहितं कर्म कुर्वन्नपि किल्बिषं बन्धनं न प्राप्नोति योगारूढपक्षे शरीरनिर्वाहमात्रोपयोगि स्वाभाविकं भिक्षाटनादि कर्म कुर्वन्नपि किल्बिषं विहिताकरणनिमित्तं दोषं न प्राप्नोतीति ॥ २१ ॥

स० टी०—यदा चात्यन्तविक्षेपकारणैरपि कर्मभिः ॥ सम्यग्ज्ञानान्न लेपोऽस्ति तदा भिक्षाटनादिभिः ॥ १ ॥ नास्ति बन्धो ब्रह्मविदः किमु वाच्यमितीर्यते ॥ वीततृष्णो वशे नीतं चित्तं देहेन्द्रियैः सह ॥ २ ॥ येन सोऽत्यन्तवैराग्यात्त्यक्तभोगोपकारकः ॥ एतादृशोऽपि प्रारब्धवशाद्भिक्षाटनादिकम् ॥ ३ ॥ शरीरस्थितिमात्रार्थं कायिकं वाचिकं तथा ॥ मानसं कर्म कर्तृत्वाध्यासशून्यः समाचरन् ॥ ४ ॥ अकर्त्रात्मदृशा नासौ धर्माधर्मफलं यतिः ॥ संसारं किंचनाप्नोति बाधितत्वाच्छुभाशुभम् ॥ ५ ॥ यतेरनिष्टहेतुत्वात्पुण्यमप्यस्य किल्बिषम् ॥ ६ ॥ २१ ॥

भा० टी०—सत्यपि विक्षेपके दर्शपूर्णमासादिकर्मणि निष्क्रियात्मावित् निर्लेप एव भवति किं पुनर्वक्तव्यं यो विक्षेपरहितः शरीरमात्रचेष्टो यतिर्ज्ञाननिष्ठो नाप्नोति किल्बिषमितीत्याशयेनाह—**निराशीरिति** । निर्गता आशिषस्तृष्णा यस्मात्सः, यतौ निगृहीतौ चित्तात्मानावन्तःकरणबाह्यकार्यकरणसंघातौ येन सः, त्यक्तः सर्वः परिग्रहो येन सः, केवलं शारीरं शरीरस्थितिमात्रप्रयोजनं भिक्षाशनादिकं कर्म तत्रापि अभिमानवर्जितं लोकदृष्ट्या कुर्वन्किल्बिषं धर्माधर्माख्यं संसारं नाप्नोति, मुमुक्षुप्रतिबन्धोदर्कत्वेन धर्मस्यापि किल्बिषरूपत्वात् । यत्तु नन्वेतस्माद्गौणात्करणादकरणं मुख्यमेव तद्वरमित्याशङ्क्य गृहस्थस्य तत्प्रत्यवायावहमिति व्यतिरेकमुखेनाह—यस्तु त्यक्तसर्वपरिग्रहः स निराशीरपि यतचित्तात्मापि केवलमपि शारीरं कर्म कुर्वन् विहिताकरणात् किल्बिषं प्राप्नोत्येवेत्यर्थ इति, तदुपेक्ष्यं निराशीरित्यादिविशेषणाननुरूपया कुकल्पनया व्यतिरेकमुखेन ' नैव किंचित्करोति सः । कृत्वापि न निबध्यते । हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ' इत्यादिविरुद्धार्थप्रदर्शनानौचित्यात् " कथमसतः सज्जायेत " इति श्रुत्याऽकरणादभावरूपात् किल्बिषस्य भावस्य उत्पत्तिर्न जायतेऽपि तु प्रतिषिद्धाचरणादित्यसकृद्भाष्यकारैरुक्तत्वेन च शारीरं केवलमिति विशेषणात् किल्बिषस्याप्राप्तेः प्राप्नोत्येवेत्यस्यासङ्गतत्वात् प्रत्यवायेन निबध्यत इति स्वपरग्रन्थविरोधाच्चेति दिक् ॥२१॥

प० टी०—किंच—**निराशीरिति** । निराशीरमुकं मे भूयादित्याशीर्विरहितः यतं नियतं चित्तमात्मा शरीरं च यस्य सः, तथा त्यक्ताः सर्वे परिग्रहा बन्धहेतवो येन स केवलं शारीरं कर्म शरीरनिर्वाहमात्ररूपं कर्म कुर्वन् किल्बिषं परिग्रहादिदोषं न प्राप्नोति ॥ २१ ॥

रा० टी०—कामसंकल्पादित्यागोपायमाह—**निराशीरिति** । आत्मा मनः यतौ नियतौ चित्तात्मानौ यस्य स यतचित्तात्मा भूत्वा निराशीः निष्कामः त्यक्तसर्वपरिग्रहश्च भवतीत्यर्थः । मनोनिग्रहेणैव कामादित्याग इति भावः । परिग्रहत्यागो नाम देहेन्द्रियादिपरिग्रहे अभिमानत्यागो ज्ञेयः । केवलं शारीरं शरीरयात्रार्थम् । यद्वा केवलं कामादिरहितं शारीरं शरीरेन्द्रियादिकरणकं कर्म कुर्वन् किल्बिषं कर्मबन्धं नाप्नोति । नैव किंचित्करोतीति प्रागुक्तस्य कर्मणां मिथ्यात्वादिति विपरीतभ्रमनिरासाय नाप्नोतिकिल्बिषमिति तदभिप्रायोऽत्र गौण्या वृत्त्या वर्णितः ॥ २१ ॥

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ॥
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥ २२ ॥

त० टी०—ननु स्यादेव केवलशारीरकर्मस्पर्शाभाव इति यदि पुनः पूर्वाभ्यासेन कर्मविशेषं कुर्याच्चेत्तर्हि तेन बध्येतेति चेत्तत्राह—**यदृच्छेति** । इच्छां प्रयत्नं विनैव येन केनचित्प्रेरिता या चित्तेन भोगप्राप्तिर्यदृच्छा तयैव यो लाभः स यदृच्छालाभः वस्त्रान्नादिस्तेन संतुष्टः, यदि न प्राप्नुयात्तदा द्वन्द्वातीतः, द्वन्द्वानि क्षुत्पिपासाशीतोष्णवातवर्षादीनि अतीतस्तत्प्राप्तावकातरः । किंच विमत्सरः, परस्य भोजनादिप्राप्तौ स्वस्याप्राप्तौ चासहनताशून्यः । अत एव सिद्धावसिद्धौ च लाभालाभे च हर्षविषादरहितः । एवंप्रवृत्तिर्ज्ञानावस्थितो विद्वान् स्वार्थं किंचित्कर्म न करोति, किंतु केनचित्स्वहिताय याचितश्चेत्सर्वज्ञत्वात्परार्थं भगवत्संबन्धि यज्ञादिकं विशेषकर्म कृत्वाऽपि न निबध्यते बन्धनं न प्राप्नोति । केचित्तु इमं श्लोकं त्यक्तसर्वपरिग्रहस्य यतेः शरीरस्थित्यर्थं याचनादिप्राप्तौ सत्यामयाचितादिना शरीरस्थितिं कुर्यादिति नियमपरतया व्याख्याय यतेरकर्तृत्वसाधनायान्ते नैव किंचिद्भिक्षाटनादिकं कर्म करोति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति । स्वानुभवे तु शास्त्रप्रमाणजनितेनाकर्तैव सः । एवं पराध्यारोपितकर्तृत्वं शरीरस्थितिमात्रप्रयोजनं भिक्षाट-

नादिकं कर्म कृत्वाऽपि न निबध्यते बन्धहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निदग्धत्वादिति वदन्ति, तत्पौनरुक्तिदोषादसङ्गतम्, तस्य पूर्वश्लोकेनैव सिद्धत्वाद्यतः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्मेति पूर्वोक्तशारीरान्न किंचिद्विशिष्यते। अस्य वैयर्थ्यं प्रसज्येत । किंच यतिपरत्वे उत्तरश्लोकद्वयसङ्गतिर्विरुध्येत। तत्र यज्ञायाचरतः कर्मेत्युक्तत्वात्, यतेर्यज्ञादिकर्मानधिकारात् । तस्मान्न संन्यासिपरमिदं प्रकरणं वक्तुं शक्यमनुपपन्नत्वात् किंतु निष्कामज्ञानिभक्तपरमेवोपपद्यते, इत्यलं प्रासङ्गिकेन ॥ २२ ॥

म० टी०—त्यक्तसर्वपरिग्रहस्य यतेः शरीरस्थितिमात्रप्रयोजनं कर्माभ्यनुज्ञातम् । तत्रान्नाच्छादनादिव्यतिरेकेण शरीरस्थितेरसंभवाद्याच्ञादिनापि स्वप्रयत्नेनान्नादिकं संपाद्यमिति प्राप्ते नियमनाह—यदृच्छेति। शास्त्रानुमतप्रयत्नव्यतिरेको यदृच्छा तयैव यो लाभोऽन्नाच्छादनादेः शास्त्रानुमतस्य स यदृच्छालाभस्तेन संतुष्टस्तदधिकतृष्णारहितः । तथाच शास्त्रम् 'भैक्षं चरेत्' इति प्रकृत्य 'अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' इति याच्ञासंकल्पादिप्रयत्नं वारयति। मनुरपि 'न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्' इति 'यतयो भिक्षार्थं ग्रामं विशन्ति' इत्यादिशास्त्रानुमतस्तु प्रयत्नः कर्तव्य एव एवं लब्धव्यमपि शास्त्रनियतमेव 'कौपीनयुगलं वासः कन्थां शीतनिवारिणीम्। पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम्'इत्यादि। एवमन्यदपि विधिनिषेधरूपं शास्त्रमूह्यम्। ननु स्वप्रयत्नमन्तरेणालाभे शीतोष्णादिपीडितः कथं जीवेदत आह—द्वन्द्वातीतः द्वन्द्वानि क्षुत्पिपासाशीतोष्णवर्षादीनि अतीतोऽतिक्रान्तः समाधिदशायां तेषामस्फुरणात् व्युत्थानदशायां स्फुरणेपि परमानन्दाद्वितीयाकर्त्रभोक्त्रात्मप्रत्ययेन बाधात् तैर्द्वन्द्वैरुपहन्यमानोऽप्यक्षुभितचित्तः अत एव परस्य लाभे स्वस्यालाभे च विमत्सरः परोत्कर्षासहनपूर्विका स्वोत्कर्षवाञ्छा मत्सरस्तद्रहितः अद्वितीयात्मदर्शनेन निर्वैरबुद्धिः अत एव समस्तुल्यो यदृच्छालाभस्य सिद्धावसिद्धौ च सिद्धौ न हृष्टः नाप्यसिद्धौ विषण्णः स स्वानुभवेनाकर्तैव परैरारोपितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिरूपं कर्म कृत्वापि न निबध्यते बन्धहेतोः सहेतुकस्य कर्मणो ज्ञानाग्निना दग्धत्वादिति पूर्वोक्तानुवादः ॥ २२ ॥

शं० टी०—परावरैकत्वविज्ञानाग्निनिर्दग्धाविद्यातत्कार्यग्रन्थेर्जीवन्मुक्तस्य विदुषः शरीरयात्रातिरिक्तं कर्तव्यं कर्म नास्तीति प्रतिपाद्य निदिध्यासोर्यतेर्मौनिनस्त्वक्ततद्दातृविचारमन्तरेण शरीरयात्रां कुर्वतोऽपि विमुक्तिर्न प्रतिबध्यत इत्युक्त्वा जीवन्मुक्तस्याऽजगरवृत्तेर्यदृच्छाप्राप्तेन जीवनं कुर्वतोऽपि यतेर्या वृत्तिः सा मुक्तिप्रतिबन्धकी न भवतीतीदानीं प्रतिपादयति श्रीभगवान्—यदृच्छेति । द्वन्द्वातीतः द्वन्द्वानि त्वमहमिति इदमद इति इष्टमनिष्टमिति शुद्धमशुद्धमिति द्वैतमद्वैतमित्यादीनि विपरीतज्ञानान्यतीतः सर्वत्र ब्रह्मदृष्ट्या विनष्टविपरीतदर्शनस्तत एव विमत्सरः अहमेवेदं सर्वमिति सर्वस्य स्वात्मत्वेनाधिगतत्वादुत्कृष्टत्वाऽपकृष्टत्वभावनानुपपत्तौ सर्वत्रात्मबुद्धिरत एव यदृच्छालाभसंतुष्टः अयत्नप्राप्तो लाभो यदृच्छालाभः प्रारब्धवशात्स्वत एव प्राप्तः साधुना वाऽसाधुना वा दत्तः शुद्धोऽशुद्धो वाल्पोऽनल्पो वान्नादिस्तेनैव संतुष्टः परितृप्तिं प्राप्तः सन्नाहारस्य सिद्धावसिद्धौ च समो ब्रह्मानन्दानुभूत्या स्वयं हर्षविषादवैवर्ण्यादिरहितो भूत्वैवं शरीरयात्रां कृत्वाप्याजगरो ब्रह्मविद्यतिर्न निबध्यते मुक्तेः प्रतिबन्धनं न प्राप्नोति लोकदृष्ट्या स्वाहारादिवैषम्येण प्रतिबन्धकवद्दोषेण प्रतीयमानोऽपि विद्वान् "सर्वमिदमहं च ब्रह्मैव" इतिभोक्तृभोग्यदातृदेयादेः सर्वदृश्यस्य ब्रह्ममात्रत्वेन प्रविलापितत्वात्परे ब्रह्मण्यद्वितीये प्रतिबन्धहेतोरन्यस्यासंभवात्पतितेऽस्मिन् विद्वद्देहे विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ २२ ॥

श्री० टी०—किंच—यदृच्छेति । अप्रार्थितोपस्थितो लाभो यदृच्छालाभः तेन संतुष्टः द्वन्द्वानि शीतोष्णादीन्यतीतः अतिक्रान्तः तत्सहनशील इत्यर्थः । विमत्सरो निर्वैरः यदृच्छालाभस्यापि सिद्धावसिद्धौ च

समः हर्षविषादरहितः य एवंभूतः स पूर्वोत्तरभूमिकयोर्यथायथं विहितं स्वाभाविकं वा कर्म कृत्वाऽपि न बन्धं प्राप्नोति ॥ २२ ॥

स० टी०—यतेरकिंचनस्यापि शरीरस्थितिकारणम् ॥ याच्ञादिना न संपाद्यमन्नादीत्याह विश्वपाः ॥ १ ॥ लाभो ह्यप्रार्थितोऽयत्नात्तेनालंप्रत्ययं गतः ॥ शास्त्रानुमतभिक्षादिलाभात्संतुष्ट एव वा ॥ २ ॥ स्वप्रयत्नं विनाऽलाभे शीतोष्णादिभिरर्दितः ॥ द्वन्द्वैरक्षुब्धचित्तो यो निर्वैरः सर्वजन्तुषु ॥ ३ ॥ शरीरस्थितिहेतोश्च लाभेऽलाभेऽविकारधीः ॥ स्वानुभूत्या स चाकर्तैवान्यैरारोपितक्रियः ॥ ४ ॥ भिक्षाटनादिकं कृत्वा बन्धं नाप्नोति किंचन ॥ ५ ॥ २२ ॥

भा० टी०—ननु त्यक्तसर्वपरिग्रहस्य यतेः अन्नादेः शरीरस्थितिहेतोः परिग्रहाभावाद् याचनादिना शरीरस्थितिः कर्तव्येत्याशङ्क्य अयाचितमसंक्लृप्तमुपपन्नं यदृच्छयेति वचनानुरोधेनोत्तरमाह—**यदृच्छेति** । अप्रार्थितोऽप्रयत्नो लाभो यदृच्छालाभः तेन संतुष्टः संजातालंप्रत्ययः, द्वन्द्वैः शीतोष्णादिभिः स्वप्रयत्नमन्तरेण वस्त्राद्यलाभे पीड्यमानोऽप्यखिन्नचित्तः द्वन्द्वातीतः, अत एव परस्य कौपीनाच्छादनलाभेन परोत्कर्षासहनरूपमत्सरशून्यः निर्वैर इत्यर्थः । समस्तुल्यो यदृच्छालाभस्य सिद्धावसिद्धौ च हर्षविषादरहित इत्यर्थः । यतयो भिक्षार्थं ग्रामं प्रविशन्ति 'विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । अतीतपात्रसंचारे भिक्षां लिप्सेत वै मुनिः ॥ कौपीनयुगुलं वासः कन्थां शीतनिवारिणीम् । पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम्' इत्यादिशास्त्राल्लोकदृष्ट्या भिक्षाटनादिकं शरीरस्थितिमात्रप्रयोजनं कर्म कृत्वापि कर्मादावकर्मादिदर्शी यथाभूतात्मज्ञाननिष्ठः कृत्वाऽपि न निबध्यते बन्धहेतोः सहेतुकस्य कर्मणः ज्ञानाग्निना दग्धत्वादित्युक्तानुवादः । यत्त्वन्ये ननु सपरिग्रहः कुटुम्बभरणव्यग्रचित्ततया कथं व्ययायाससाध्याग्निहोत्रादीन्यनुतिष्ठेदित्याशङ्क्याह—यदृच्छालाभसंतुष्टः, द्वन्द्वातीतो बहुलाभेऽलाभे वा सुखदुःखाद्यतीतः परस्य लाभं दृष्ट्वा संतापहीनः समः यदृच्छालाभेनैव इष्टिपशुचातुर्मास्यादेर्नित्यात्कर्मणः सिद्धावसिद्धौ च समः निर्विकारः एवंभूत इष्ट्यादीनि कृत्वाऽपि तन्मूलेन स्वर्गादिना न निबध्यते अपिशब्दात्तज्जेन प्रत्यवायेन न निबध्यते बन्धहेतोः कर्मणस्तत्त्वज्ञानेनैव दाहात् । तथाच स्मृतिः ' न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः । श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ' इति व्याचख्युः, तदसङ्गतम् । उक्तरीत्या त्यक्तसर्वपरिग्रहस्य यतेः पूर्वश्लोकेन वर्णनौचित्येनैवमुत्थापनस्यानौचित्यात् । शङ्कानुरूपस्य श्लोकाक्षरैरुत्तरस्याप्रतीतेश्च तस्मादनेन श्लोकेन परिग्रहरहितस्यैव वर्णनं न्याय्यमिति दिक् ॥ २२ ॥

प० टी०—किंच—**यदृच्छेति** । अप्रार्थितोपस्थितो लाभो यदृच्छालाभस्तेन संतुष्टः सोऽपि निर्वाहमात्रपर्याप्तः " मा गृधः कस्यचिद्धनम् " इति श्रुतेः । द्वन्द्वानि शीतोष्णादीन्यतीतो विमत्सरोऽन्यशुभद्वेषरहितः सिद्धावसिद्धौ समो हर्षविषादरहितः स एव पूर्वोत्तरदशयोर्यथायथं कर्म कुर्वन् बन्धं न प्राप्नोति ॥२२॥

रा० टी०—यतचित्तात्मा कीदृश इत्यतस्तस्य लक्षणमाह—**यदृच्छेति** । अप्रयत्नलब्धेन तृप्तिमान् सुखदुःखलाभालाभादिद्वन्द्वान्यतीतो द्वन्द्वातीतः । विमत्सरः, स्वानधीनत्वनिमित्तमनःखेदहीनः । द्वन्द्वातीतत्वं किंप्रकारमिति जिज्ञासायां तद्विवृणोति—**सम** इत्यादिना । सिद्ध्यसिद्ध्योरुत्सेकानुत्सेकहीनस्वरूपसमत्वमेव द्वन्द्वातीतत्वमित्यर्थः । एवंविधः कर्म कृत्वापि तेन न निबध्यत इति । यदृच्छालाभसंतुष्टत्वादिकं यतचित्तात्मनो लक्षणमित्युक्तं भवति ॥ २२ ॥

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

त० टी०—कृत्वाऽपि न निबध्यत इत्युक्तं तत्र हेतुमाह—**गतसङ्गस्येति** । कर्मणि स्वफलोद्देशरहितस्य अत एव मुक्तस्य अन्यै रागद्वेषविवर्जितस्य यतो ज्ञानेऽवस्थितं निश्चलं चेतो यस्य तस्य यज्ञाय विष्णुप्रीत्यर्थमाचरतः साङ्गोपाङ्गं विधिपूर्वकं कर्मानुष्ठानं कुर्वतः समग्रं निःशेषं प्रविलीयते तस्मै पुण्यदानायापि योग्यो न भवति । कुतस्तद्वैगुण्यजन्यप्रत्यवायाय भवेदित्यर्थः । यद्यपि 'कर्ता कारयिता चैव प्रेरकश्चानुमोदकः । सुकृते दुष्कृते चैव चत्वारः समभागिनः' इति कर्तुरपि समफलत्वमुक्तं तथापि फलोद्देशेनैव कुर्वतस्तत्संबन्धो नैवंविधस्येति भावः ॥ २३ ॥

म० टी०—त्यक्तसर्वपरिग्रहस्य यदृच्छालाभसंतुष्टस्य यतेर्यच्छरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिरूपं कर्म तत्कृत्वा न निबध्यत इत्युक्तेर्गृहस्थस्य ब्रह्मविदो जनकादेर्यज्ञादिरूपं यत्कर्म तद्बन्धहेतुः स्यादिति भवेत्कस्यचिदाशङ्का तामपनेतुं त्यक्त्वा कर्मफलासङ्गमित्यादिनोक्तं विवृणोति—**गतसङ्गस्येति** । गतसङ्गस्य फलासङ्गशून्यस्य मुक्तस्य कर्तृत्वभोक्तृत्वाद्यध्यासशून्यस्य, ज्ञानावस्थितचेतसः निर्विकल्पब्रह्मात्मैक्यबोध एव स्थितं चित्तं यस्य तस्य स्थितप्रज्ञस्येत्यर्थः । उत्तरोत्तरविशेषणस्य पूर्वपूर्वहेतुत्वेनान्वयो द्रष्टव्यः । गतसङ्गत्वं कुतः यतोऽध्यासहीनत्वं तत् कुतो यतः स्थितप्रज्ञत्वमिति । ईदृशस्यापि प्रारब्धकर्मवशाद् यज्ञाय यज्ञसंरक्षणार्थं ज्योतिष्टोमादियज्ञे श्रेष्ठाचारत्वेन लोकप्रवृत्त्यर्थं यज्ञाय विष्णवे तत्प्रीत्यर्थमिति वा आचरतः कर्म यज्ञदानादिकं समग्रं सहाग्रेण फलेन विद्यत इति समग्रं प्रविलीयते प्रकर्षेण कारणोच्छेदेन तत्त्वदर्शनाद्विलीयते विनश्यतीत्यर्थः ॥ २३ ॥

शं० टी०—ननु सर्वमिदमहं च ब्रह्मैवेति सर्वस्यापि स्वस्य च ब्रह्मत्वमेव प्रत्यग्दृष्ट्या सर्वदा पश्यतां ब्रह्मविदां जीवन्मुक्तानां शरीरयात्रात्मकं कर्म ब्रह्मदृष्ट्या प्रविलापितत्वेन निःसत्ताकतया तेषां मुक्तिप्रतिबन्धकं मास्तु लोकानुग्रहकाम्यया कर्माणि प्रवृत्तस्याधिकारिकस्यान्यस्य वाऽविदुषोऽहं कर्तानेनेदं कर्तव्यमिति क्रियाकारकभेददृष्टिमवष्टभ्य क्रियमाणेन कर्मणा मुक्तिः प्रतिबध्यत एव 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्यादिस्मृतिनियमादित्याशङ्कायां न ब्रह्मविद्भिर्महापुरुषैः क्रियमाणं क्रियाकारकादिभेदभिन्नमपि कर्म लौकिकं वैदिकं च सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मबुद्ध्यैव क्रियते नतु मयेदं क्रियत इति भेददृष्ट्या, ततस्तैः क्रियमाणं कर्माकर्मैव सत्स्वयं मुक्तिं तेषां प्रतिबद्धुं न शक्नोतीत्याशयेनाह—**गतसङ्गस्येति** । मुक्तस्य ब्रह्मण्येवात्मभावापत्त्याऽहंममाभिनिवेशेन विमुक्तस्य निरहंकृतेरत एव गतसङ्गस्य सज्यते पुमाननेन कर्मस्विति सङ्गः कामः स गतो यस्य तस्य गतसङ्गस्य निष्कामस्यात एव ज्ञानावस्थितचेतसः ज्ञानं सर्वत्र ब्रह्मदर्शनलक्षणं तत्रैवावस्थितं चेतो यस्य तस्य ज्ञानावस्थितचेतसः दृश्यावगाहिन्या वृत्तेः सदा ब्रह्माकारतामेवापादयतो यज्ञाय विष्णवे । यद्वा श्रौतैः स्मार्तैश्च कर्मभिर्देवान् यजन्तीति यज्ञाः ब्राह्मणादयस्तेभ्यः । जातावेकवचनम् । यज्ञाय लोकहितायैवाचरतः कर्माणि कुर्वतः आधिकारिकस्य नित्यमनुष्ठीयमानं कर्म समग्रं करणत्रयनिर्वर्तितं सर्वं कर्माकर्मादिलक्षणं वा सर्वं प्रविलीयते ब्रह्मबुद्ध्या प्रविलापितं सत्समूलं विनश्यति न जन्मादिफलाय कल्पत इत्यर्थः ॥ २३ ॥

श्री० टी०—किंच—**गतसङ्गस्येति** । गतसङ्गस्य निष्कामस्य रागादिभिर्मुक्तस्य ज्ञानेऽवस्थितं चेतो यस्य यज्ञाय परमेश्वरार्थं कर्माचरतः सतः समग्रं सवासनं कर्म प्रविलीयते अकर्मभावमापद्यते । आरूढयोगपक्षे यज्ञायेति यज्ञसंरक्षणार्थं लोकसंग्रहार्थमेव कर्म कुर्वत इत्यर्थः ॥ २३ ॥

स० टी०—तत्त्वज्ञस्य गृहस्थस्य कर्म यागादिकं कृतम् ॥ नैव बन्धकमित्याह पूर्वोक्तमपि केशवः ॥ १ ॥ फलासङ्गविहीनस्य निर्गताध्यासकस्य च ॥ निर्विकल्पात्मतत्त्वैक्यबोधे यस्य स्थितं मनः ॥ २ ॥ ईदृ-

शस्यापि प्रारब्धवशाल्लोकप्रवृत्तये ॥ कुर्वतः कर्म यज्ञादि विष्णुप्रीत्यर्थमेव वा ॥ ३ ॥ सहाग्रेण फलेनैतत्कर्म ज्ञस्य विनश्यति ॥ फलं चाजनयित्वैव मूलोच्छेदादृशोक्तया ॥ ४ ॥ २३ ॥

भा० टी०—यस्तु प्रारब्धवशात्पूर्वं कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोतीत्युक्तं तदेव विवृण्वन्नाह—**गतसङ्गस्येति** । गतः सर्वतो निवृत्तः सङ्ग आसक्तिर्यस्य तस्य मुक्तस्य निवृत्तधर्माधर्मादिबन्धनस्येति भाष्यं तत्रादिशब्देन कर्तृत्वभोक्तृत्वाद्यध्यासो रागादिश्च गृह्यत इत्यविरोधः । ज्ञान एवावस्थितं चेतो यस्य तस्य यज्ञायाग्निष्टोमादियज्ञनिर्वृत्त्यर्थं विष्णुप्रीतिनिर्वृत्त्यर्थमिति वाऽऽचरतः कुर्वतः सहाग्रेण फलेन वर्तत इति समग्रं प्रकर्षेण कारणोच्छेदेन तत्त्वसाक्षात्काराद्विलीयते नश्यतीत्यर्थः ॥ २३ ॥

प० टी०—किंच **गतसङ्गस्येति** । गतसङ्गस्य रागादिभिर्विमुक्तस्य ज्ञानावस्थितमात्मज्ञानैकतत्परं चेतो यस्यैवंभूतस्य यज्ञाय परमेश्वरार्थं यागार्थं वा कर्माचरतः समग्रं सवासनं प्रविलीयतेऽकर्मतामापद्यते ॥ २३ ॥

रा० टी०—विक्षिप्य प्रागुक्तं पिण्डीकृत्य दर्शयति—**गतसङ्गस्येति** । गतसङ्गस्य फलस्नेहरहितस्य मुक्तस्य देहाद्यभिमानहीनस्य स्वातन्त्र्याभिमानहीनस्येति वा ज्ञानावस्थितचेतसः विष्णुज्ञानेऽभिनिविष्टचित्तस्य यज्ञाय विष्णवे तत्प्रीत्यर्थं कर्माचरतः कुर्वतः कर्म प्रविलीयते बन्धकं न भवतीत्यर्थः । यस्येत्यादिना यत्कामादिवर्जनमुक्तं तद्गतसङ्गस्येत्यनेन त्यक्तसर्वपरिग्रह इत्येतन्मुक्तस्येत्यनेन कर्मण्यकर्मेति नित्यतृप्त इति च ज्ञानावस्थितचेतस इत्यनेन पिण्डीकृत्य प्रदर्शितं ध्येयम् ॥ २३ ॥

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

त० टी०—एवमुक्तविधस्य योगिनः समग्रकर्मप्रविलय उक्तस्तत्र कथमाकाङ्क्षायां ज्ञानावस्थितचेतस इतिपदस्य व्याख्यारूपं साङ्गस्य यज्ञस्य ब्रह्मात्मकतानुसंधानप्रकारमाह—ब्रह्मार्पणमिति । अर्प्यतेऽनेनेति अर्पणं स्रुगादि मन्त्रादि च ब्रह्मात्मकत्वाद्ब्रह्मैव, हविरग्नौ प्रक्षेपणीयं द्रव्यं ब्रह्मैव, ब्रह्माग्नौ-ब्रह्मभूतेऽग्नौ ब्रह्मणा कर्त्रा यजमानेन हुतं प्रक्षेपणक्रियापि ब्रह्मैव, तथाऽर्पणसंप्रदानभूतदेवताऽप्यनुसन्धेया । तथाच कर्ता कर्म करणमधिकरणं संप्रदानं क्रिया च सर्वं ब्रह्मैवेत्यर्थः । एवं ब्रह्मात्मकं कर्मणि समाधिस्तत्त्वानुसंधानं यस्य स ब्रह्मकर्मसमाधिस्तेन ब्रह्मैव गन्तव्यं प्राप्यं फलं नतु स्वर्गादिनश्वरफलमित्यर्थः ॥ २४ ॥

म० टी०—ननु क्रियमाणं कर्म फलमजनयित्वैव कुतो नश्यति ब्रह्मबोधे तत्कारणोच्छेदादित्याह—**ब्रह्मार्पणमिति** । अनेककारकसाध्या हि यज्ञादिक्रिया भवति।देवतोद्देशेन हि द्रव्यत्यागो यागः। स एव त्यज्यमानद्रव्यस्याग्नौ प्रक्षेपाद्धोम इत्युच्यते। तत्रोद्देश्या देवता संप्रदानं, त्यज्यमानं द्रव्यं हविःशब्दवाच्यं साक्षाद्धात्वर्थकर्म, तत्फलं तु स्वर्गादि व्यवहितं भावनाकर्म । एवं धारकत्वेन हविषोऽग्नौ प्रक्षेपे साधकतमतया जुह्वादि करणं प्रकाशकतया मन्त्रादि करणमपि कारकज्ञापकभेदेन द्विविधम् । एवं त्यागोऽग्नौ प्रक्षेपश्च द्वे क्रिये।तत्राद्यायां यजमानः कर्ता। प्रक्षेपे तु यजमानपरिक्रीतोऽध्वर्युः।प्रक्षेपाधिकरणं चाग्निः । एवं देशकालादिकमप्यधिकरणं सर्व क्रियासाधारणं द्रष्टव्यम्। तदेवं सर्वेषां क्रियाकारकादिव्यवहाराणां ब्रह्माज्ञानकल्पितानां रज्ज्वज्ञानकल्पितानां सर्पधारादण्डादीनां रज्जुतत्त्वज्ञानेनेव ब्रह्मतत्त्वज्ञानेन बाधे बाधितानुवृत्त्या क्रियाकारकादिव्यवहाराभासो दृश्यमानोऽपि दग्धपटन्यायेन न फलाय कल्पत इत्यनेन श्लोकेन प्रतिपाद्यते । ब्रह्मदृष्टिरेव च सर्वयज्ञात्मिकेति स्तूयते । तथाहि अर्प्यते अनेनेति करणव्युत्पत्त्या अर्पणं जुह्वादि मन्त्रादि च । एवमर्प्यतेऽस्मा इति व्युत्पत्त्या अर्पणं देवता-

रूपं संप्रदानम् । एवमर्प्यते अस्मिन्निति व्युत्पत्त्याऽर्पणमधिकरणं देशकालादि । तत्सर्वं ब्रह्मणि कल्पितत्वाद्ब्रह्मैव रज्जुकल्पितभुजङ्गवदधिष्ठानव्यतिरेकेणासदित्यर्थः । एवं हविस्त्यागप्रक्षेपक्रिययोः साक्षात्कर्म कारकं तदपि ब्रह्मैव । एवं यत्र प्रक्षिप्यतेऽग्नौ सोऽपि ब्रह्मैव । ब्रह्माग्नाविति समस्तं पदम् । तथा येन कर्त्रा यजमानेनाध्वर्युणा च त्यज्यते प्रक्षिप्यते च तदुभयमपि कर्तृकारकं कर्तरि विहितया तृतीययानूद्य ब्रह्मेति विधीयते ब्रह्मणेति, एवं हुतमिति हवनं त्यागक्रिया प्रक्षेपक्रिया च तदपि ब्रह्मैव । तथा तेन हवनेन यद्गन्तव्यं स्वर्गादि व्यवहितं कर्म तदपि ब्रह्मैव । अत्रत्य एवकारः सर्वत्र संबध्यते । हुतमित्यत्रापि इत एव ब्रह्मेत्यनुषज्यते व्यवधानाभावात् साकाङ्क्षत्वाच्च "चित्पतिस्त्वापुनातु" इत्यादावच्छिद्रेणेत्यादिपरवाक्यशेषवत् । अनेन रूपेण कर्मणि समाधिः ब्रह्मज्ञानं यस्य स कर्मसमाधिस्तेन ब्रह्मविदा कर्मानुष्ठात्रापि ब्रह्म परमानन्दाद्वयं गन्तव्यमित्यनुषज्यते।साकाङ्क्षत्वादव्यवधानाच्च या ते अग्ने रजाशयेत्यादौ तनूर्वर्षिष्ठेत्यादिपूर्ववाक्यशेषवत् । अथवा अर्प्यतेऽस्मै फलायेति व्युत्पत्त्याऽर्पणपदेनैव स्वर्गादिफलमपि ग्राह्यम् । तथाच ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिनेत्युत्तरार्द्धं ज्ञानफलकथनार्थैवेति समञ्जसम् । अस्मिन्पक्षे ब्रह्मकर्मसमाधिनेत्येकं वा पदम् । पूर्वं ब्रह्मपदं हुतमित्यनेन संबध्यते चरमं गन्तव्यपदेनेति भिन्नं वा पदम् । एवं च नानुषङ्गद्वयक्लेश इति द्रष्टव्यम् । ब्रह्म गन्तव्यमित्यभेदेनैव तत्प्राप्तिरुपचारात् । अत एव न स्वर्गादि तुच्छफलं तेन गन्तव्यं विद्यया आविद्यककारकव्यवहारोच्छेदात् । तदुक्तं वार्तिककृद्भिः 'कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते । शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिः कुतः' इति । अर्पणादिकारकस्वरूपानुपमर्देनैव तत्र नामादाविव ब्रह्मदृष्टिः क्षिप्यते सम्पन्मात्रेण फलविशेषायेति केषांचिद्व्याख्यानं भाष्यकृद्भिरेव निराकृतमुपक्रमादिविरोधाद्ब्रह्मविद्याप्रकरणे सम्पन्मात्रस्याप्रसक्तत्वादित्यादियुक्तिभिः ॥ २४ ॥

शं० टी०—प्रविलापनप्रकारमेवाह—**ब्रह्मार्पणमिति** । ब्रह्मार्पणं हविरर्प्यतेऽनेनेत्यर्पणं चमसस्रुक्स्रुवादिकं सर्वं ब्रह्मैवेति प्रत्यग्दृष्ट्या ब्रह्मवित्पश्यति । मूढदृष्ट्या यद्रजतं तदेव विवेकिदृष्ट्या शुक्तिर्यथा तथाऽज्ञदृष्ट्या यच्चमसादि यज्ञसाधनं तदेव ब्रह्मविदृष्ट्या ब्रह्मैव भवतीत्यर्थः । ब्रह्म हविर्यज्ञियं यद्धविश्चरुपुरोडाशादिकं होम्यद्रव्यं तत्सर्वं ब्रह्मैव पश्यति । ब्रह्मणा होमकर्त्रा कर्तापि ब्रह्मैवेति यजमानं स्वं ब्रह्मविद्ब्रह्मैव पश्यति । ब्रह्माग्नौ ब्रह्मैवाग्निस्तं होमाधिकरणं ब्रह्मैवेति पश्यति । तस्मिन् ब्रह्माग्नौ यद्धुतं हवनक्रिया तदपि ब्रह्मैव पश्यति । ब्रह्मकर्मसमाधिना सर्वस्य ब्रह्ममात्रत्वदर्शनं यत्तद्ब्रह्मकर्म तस्मिन् ब्रह्मकर्मणि समाधिश्चित्तस्य स्थापनं यस्य तेन ब्रह्मकर्मसमाधिना सर्वं ब्रह्मैव पश्यता ब्रह्मविदा यद्गन्तव्यमेवं दर्शनस्य फलत्वेन प्राप्तव्यमिदमेवाहमस्मीति तद्ब्रह्मैव भवति । इत्थं लोकहितार्थं प्रवृत्तस्याधिकारिकस्य ब्रह्मविदोऽपि ससाधनं सर्वं कर्म ब्रह्मवृत्त्या ब्रह्ममात्रत्वेन प्रविलापितत्वात्स्वयं निःसत्त्वेनाकर्मैव सद्बन्धाय न भवतीति सिद्धम् । एतेन चलनात्मिकायाः प्रवृत्तेर्निरोधस्य दुष्करत्वात्सर्वदा विदुषोऽपि प्रवर्तितव्यत्वे प्राप्ते विवेकिनो व्यर्थव्यावृत्त्यपेक्षया वैदिकी प्रवृत्तिर्भूषणाय मनोहर्षाय लोकहिताय चान्ततोऽप्यबन्धाय च भवत्यतस्तयैव दृष्ट्या सद्भिर्ब्रह्मविद्भिः प्रवर्तितव्यमिति सूचितं भवति ॥ २४ ॥

श्री० टी०—तदेवं परमेश्वराराधनलक्षणं कर्म ज्ञानहेतुत्वेन बन्धकत्वाभावादकर्मैव, आरूढावस्थायां त्वकर्त्रात्मज्ञानेन बाधितत्त्वात्स्वाभाविकमपि कर्माकर्मैवेति कर्मण्यकर्म यः पश्येदित्यनेनोक्तः कर्मप्रविलयः प्रपञ्चितः, इदानीं कर्मणि तदङ्गेषु च ब्रह्मैवानुस्यूतं पश्यतः कर्मप्रविलयमाह—**ब्रह्मार्पणमिति** । अर्प्यतेऽनेनेत्यर्पणं स्रुवादि तदपि ब्रह्मैव, अर्प्यमाणं हविरपि घृतादिकं ब्रह्मैवाग्निस्तस्मिन्ब्रह्मणा कर्त्रा च हुतं ब्रह्मैव होमः, अग्निश्च कर्ता च क्रिया च ब्रह्मैवेत्यर्थः । एवं ब्रह्मण्येव कर्मात्मके समाधिश्चित्तैकाग्र्यं यस्य तेन ब्रह्मैव गन्तव्यं प्राप्यं नतु फलान्तरमित्यर्थः ॥ २४ ॥

स० टी०–ननु ज्ञाने समुत्पन्ने पूर्वं कर्म विनश्यतु ॥ क्रियमाणं कथं कर्माऽजनयित्वा फलं विदः ॥ १ ॥ नश्यतीत्यत्र ब्रह्मैक्यबोधेनेत्याह माधवः ॥ बहुकारकसाध्यास्ति क्रिया यागादिकाऽखिला ॥ २ ॥ देवतोद्देशतो द्रव्यत्यागो याग उदाहृतः ॥ स एव त्यज्यमानस्य द्रव्यस्याग्नौ यथाविधि ॥ ३ ॥ प्रक्षेपाद्धोम इत्युक्तस्तत्रोद्देश्यास्ति देवता ॥ संप्रदानं हविःशब्दवाच्यं द्रव्यं यदस्ति तत् ॥ ४ ॥ साक्षाद्धात्वर्थकर्मास्ति तत्फलं तु स्वरादिकम् ॥ भावना कर्म यस्मात्तत्तद्द्रव्यं विहितं भवेत् ॥ ५ ॥ एवं जुह्वादिकरणं प्रक्षेपेऽत्यन्तसाधकम् ॥ भासकत्वेन मन्त्रादिकरणं द्विविधं तथा ॥ ६ ॥ त्यागप्रक्षेपभेदेन क्रियापि द्विविधेरिता ॥ त्यागे यजमानः कर्ता प्रक्षेपोऽध्वर्युकर्तृकः ॥ ७ ॥ प्रक्षेपाधिकरणं स्यादग्निः स्वर्गादिकं फलम् ॥ तदेवमखिलं यज्ञक्रियाकारकवस्तु यत् ॥ ८ ॥ ब्रह्माज्ञानेन तत्रैवाध्यस्तं रज्जौ स्रगादिवत् ॥ ब्रह्मज्ञानेन बाधे तु भासमानमपि स्फुटम् ॥ ९ ॥ कल्पते नैव बन्धाय यथा स्वाप्नं प्रजागरे ॥ ब्रह्मदृष्टिरियं सर्वयज्ञरूपतयाधुना ॥ १० ॥ स्तूयते हरिणा सम्यग्दृष्टिदार्ढ्याय तद्विदाम् ॥ अर्पणं चार्प्यतेऽनेन जुह्वादि करणं हि यत् ॥ ११ ॥ अर्प्यतेऽस्मा इति प्रोक्तं संप्रदानं च देवता ॥ अर्प्यतेऽस्मिंस्तु देशाद्याधारोऽधिकरणं तथा ॥ १२ ॥ ब्रह्मण्यारोपितत्वात्तत्सर्वं ब्रह्मैव नेतरत् ॥ कल्पितस्य पृथक्सत्ताधिष्ठानान्नास्ति सर्वथा ॥ १३ ॥ त्यागादिकक्रिया कर्म हविर्ब्रह्मैव वस्तु सत् ॥ यत्र प्रक्षिप्यतेऽग्नौ तत्सोऽपि ब्रह्मैव केवलम् ॥ १४ ॥ त्यज्यते क्षिप्यते येन स कर्ता ब्रह्म चिन्मयम् ॥ त्यागप्रक्षेपरूपा या क्रिया ब्रह्मैव तद्धुतम् ॥ १५ ॥ हुतेन तेन गन्तव्यं फलं ब्रह्म स्वरादि तत् ॥ कर्मण्यनेन रूपेण समाधिर्यस्य धीमतः ॥ १६ ॥ तेन ब्रह्मविदा ब्रह्म गन्तव्यं चित्सुखाद्वयम् ॥ १७ ॥ २४ ॥

भा० टी०–ननु 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादिवचनेभ्यः कर्मफलस्यावश्यंभावित्वकथनात्, कस्मात्पुनः कारणात्क्रियमाणं कर्म स्वकार्यारम्भं बन्धनमकुर्वत्समग्रं प्रविलीयत इत्याशङ्क्य सर्वक्रियाकारकफलजातं द्वैतं ब्रह्मैव ब्रह्मविद इति हेतोस्तस्य समग्रं कर्म विनश्यतीत्याह–**ब्रह्मार्पणमिति**। असमस्ते पदे । अर्प्यतेऽनेन हस्तादिना करणेनेत्यर्पणं करणं कारकं, अर्प्यतेऽस्मिन्नित्यर्पणमधिकरणं देशकालादि, अर्प्यतेऽस्मै इति संप्रदानं देवतारूपं, भाष्यस्योपलक्षणार्थतयाऽविरोधः, तद्ब्रह्मैवेति बाधायां सामानाधिकरण्यं, यश्चौरः स स्थाणुरितिवदेवमग्रेपि यद्धविर्बुद्ध्या गृह्यमाणं घृतादिकं प्रत्यागप्रक्षेपक्रिययोः साक्षात्कर्म कारकं तदपि ब्रह्मैव तत्त्वविदः, तथा । ब्रह्माग्नाविति समस्तं पदम् । एतेन ब्रह्मणीतिपदमध्याहर्तव्यमित्यपास्तम् । यस्मिन्हूयते सोऽग्निरधिकरणकारकमपि ब्रह्मैव, तथा येन यजमानेनाध्वर्युणा च त्यज्यते क्षिप्यते च तदुभयमपि कर्तृकारकं ब्रह्मैवेत्यर्थः । यत्तेन हुतं हवनक्रियाऽपि ब्रह्मैव । अत्रत्य एवकारःसर्वत्र संबध्यते । ब्रह्मपदं च काकाक्षिगोलकन्यायेनोभयत्र । ब्रह्मैव कर्म तत्र समाधिर्यस्य सः तेन गन्तव्यं फलमपि ब्रह्मैव । एवं लोकसंग्रहचिकीर्षुणाऽपि क्रियमाणं कर्म परमार्थतोऽकर्म, ब्रह्मबुद्ध्युपमर्दितत्वात् निवृत्तकर्मणोऽपि यतेः सम्यग्दर्शिनः सम्यग्दर्शनस्तुत्यर्थं ज्ञानस्य यज्ञत्वसंपादनं सुतरामुपपद्यते । यदर्पणादि यज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैवाऽन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्, यत्तु यद्ब्रह्म तदर्पणादीति ब्रह्मैव खल्वर्पणादिना पञ्चविधेन कारकात्मनाऽवस्थितं सत् तदेव कर्म करोति नात्रार्पणादिबुद्धिर्निवर्त्यते किंत्वर्पणादिषु प्रतिमादौ विष्णुबुद्धिरिव ब्रह्मबुद्धिराधीयत इति, तदसत् ज्ञानयज्ञस्तुत्यर्थत्वादस्य प्रकरणस्य, अत्र सम्यग्दर्शनं ज्ञानयज्ञशब्दप्रतिपादितम् । अनेकान् क्रियाविशेषान् यज्ञशब्दितानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः इति ज्ञानं स्तौतीति भाष्ये विस्तरः । एतेन कर्मण्यकर्म यः पश्येदित्यारभ्यारुरुक्षुपरत्वेन दृश्यमानमपरेषां व्याख्यानमसङ्गतमिति ध्येयम्, यत्तु अथवाऽर्प्यतेऽस्मै फलायेति व्युत्पत्त्याऽर्पणपदेन स्वर्गादिफलमपि ग्राह्यम् । तथाच ब्रह्मैवेत्याद्युत्तरार्धं ज्ञानफलकथनार्थमेवेति समञ्जसम् ।

अस्मिन्पक्षे ब्रह्मकर्मसमाधिनेत्येकं वा पदं पूर्वं ब्रह्मपदं हुतमित्यनेन संबध्यते चरमं गन्तव्यमित्यनेनेति भिन्नं वा पदम्, एवंच नानुषङ्गद्वयक्लेश इति तच्चिन्त्यं, श्रुतं गन्तव्यपदं विहाय क्लिष्टव्युत्पत्त्या तदानयनस्यान्याय्यत्वात्। ज्ञानप्रभावमुक्त्वा ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छतीति ज्ञानयज्ञफलस्य वक्ष्यमाणत्वात्। भाष्ये तु ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यमिति तेन गन्तव्यं फलमपि ब्रह्मैवेत्यस्यानुवादो ब्रह्मेत्यादिपदस्यान्वयप्रदर्शनार्थः, न तु ब्रह्मैव गन्तव्यमितिपदद्वयानुषङ्गेण ज्ञानफलप्रदर्शनम्। एतेन पूर्वमित्यादिपरास्तं काकाक्षिगोलकन्यायस्य प्रदर्शितत्वादिति दिक् ॥ २४ ॥

प० टी०—अथोपक्रान्तप्रमेयमुपसंहरन्नाह—**ब्रह्मार्पणमिति** । अर्पणं चित्तस्य दानसंकल्पो यस्तद्ब्रह्मरूपत्वाद् ब्रह्मैव । तथा हविः समित्तिलाज्यादि वैराजब्रह्मणो व्यष्टिरूपत्वाद् ब्रह्मैव । अग्निरपि वैश्वानरापरपर्यायं ब्रह्मैव । तस्मिन् येन पुरुषेण हुतं सोऽपि ब्रह्मैव । इति ज्ञात्वा येन क्रियते तेन ब्रह्मैव गन्तव्यं प्राप्तव्यम् । किंभूतेन ब्रह्मकर्मसमाधिना । ब्रह्मार्पणं कर्म ब्रह्मकर्म तस्मिन् समाधिश्चित्तैकाग्र्यं यस्य तेन ॥ २४ ॥

रा० टी०—एवं तत्ते कर्म प्रवक्ष्यामीति प्रतिज्ञातं कर्मस्वरूपं संक्षेपविस्तराभ्यां प्रतिपाद्य गतसङ्गस्येत्यनेनोपसंहृत्याधुना ज्ञानावस्थितचेतस्त्वं स्पष्टयति—**ब्रह्मेति** । अर्प्यते समर्प्यतेऽनेनेत्यर्पणं दर्वीपिठरादि । अर्पणहविरग्नीनां ब्रह्माभेद उच्यते, ब्रह्म च तदर्पणं चेत्यादिव्युत्पत्तेः । तथा समाधिना सह सहितं कर्म चाग्निहोत्रादि ब्रह्मेति कर्मसमाध्योरपि । तथा ब्रह्मणा हुतमित्यत्रापि प्रायपाठाद्ब्रह्मैव हुतमिति होमस्यापि ब्रह्माभेदः स तु अर्पणादिसत्ताप्रतीत्यादेर्ब्रह्माधीनत्वाभिप्रायेण । त्वदधीनं यतः सर्वमतः सर्वो मतो भवानित्यादेः । इति मां योऽभिजानातीति श्लोकान्ते शेषः । तेनैव ब्रह्म गन्तव्यमित्यन्वयः । एतेन ज्ञानावस्थितचेतःपदोक्तं परमेश्वरज्ञानमेवंरूपमिति स्पष्टीकृतं भवति । यद्वा ब्रह्मणा हुतमिति असामानाधिकरण्यनिर्देशप्रायपाठात् । ब्रह्मण्यर्पणं ब्रह्मणो हविः ब्रह्मणोऽग्नौ ब्रह्मणः कर्म ब्रह्मकर्म न केवलं कर्ममात्रं ब्रह्मणः किंतु समाधिना सहितं कर्म ब्रह्मण इत्यर्थः । अर्पणादिकं सर्वं तत्स्वामिकमिति यो जानाति तेन ब्रह्म गन्तव्यमिति योजना । एतेन प्राङ्मुक्तपदेनोक्तस्वातन्त्र्याभिमानत्यागः कर्माङ्गमुक्तः स कुत्र कार्यः-त्यक्तस्वातन्त्र्याभिमानं च वस्तु किमधीनं ज्ञेयं यज्ञायेत्युक्तयज्ञार्थत्वं च किमिति शङ्कात्रयं निरस्तम् । हविरादौ स्वातन्त्र्याभिमानत्यागब्रह्माधीनत्वयोः विष्णवर्पणमेव यज्ञार्थत्वमित्यस्य चात्र प्रतीतेरिति ॥ २४ ॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

त० टी०—एवं साङ्गस्य यज्ञरूपकर्मणो ब्रह्मात्मकतानुसंधानेनानुष्ठातुर्ब्रह्मप्राप्तिरूपफलमुक्त्वेदानीं तस्यैव श्रैष्ठ्यप्रदर्शनाय अधिकारिभेदेनापरान्बहुविधान्यज्ञानाह—**दैवमित्याद्यष्टभिः** । केवला इन्द्रादयो देवा इज्यन्ते पूज्यन्ते यस्मिन्स दैवस्तं यज्ञमपरे योगिनो ज्ञानहीनाः केवलकर्मनिष्ठाः पर्युपासते सम्यगनुतिष्ठन्ति । अपरे योगिनः किंचिज्ज्ञानविशिष्टकर्मनिष्ठा ब्रह्माग्नौ ब्रह्मरूपत्वेनाभिमतेऽग्नौ यज्ञं यज्ञद्रव्यं हविर्यज्ञेन यज्ञसाधनेन स्रुगादिना जुह्वति प्रक्षिपन्ति । अग्निमात्रे ब्रह्मबुद्धयस्ते, नतु कर्तृकर्मादिकारककलापेऽतस्तेषां पूर्वोक्ताद्ब्रह्मार्पणादिबुद्धिमतोऽवरत्वमिति भावः ॥ २५ ॥

म० टी०—अधुना सम्यग्दर्शनस्य यज्ञरूपत्वेन स्तावकतया ब्रह्मार्पणमन्त्रे स्थिते पुनरपि तस्य स्तुत्यर्थमितरान्यज्ञानुपन्यस्यति—**दैवमेवेति** । देवा इन्द्राग्न्यादय इज्यन्ते येन स दैवस्तमेव यज्ञं दर्शपूर्णमासज्योतिष्टोमादिरूपमपरे योगिनः कर्मिणः पर्युपासते सर्वदा कुर्वन्ति न ज्ञानयज्ञम् । एवं कर्मयज्ञमुक्त्वाऽन्तः-

करणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमाह—**ब्रह्माग्नाविति** । ब्रह्माग्नौ सत्यज्ञानानन्तानन्दरूपं निरस्तसमस्तविशेषं ब्रह्म तत्पदार्थस्तस्मिन्नग्नौ यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनैव, यज्ञशब्द आत्मनामसु यास्केन पठितः । इत्थंभूतलक्षणे तृतीया । एवकारो भेदाभेदव्यावृत्त्यर्थः । त्वंपदार्थाभेदेनैव उपजुह्वति तत्स्वरूपतया पश्यन्तीत्यर्थः । अपरे पूर्वविलक्षणास्तत्त्वदर्शननिष्ठाः संन्यासिन इत्यर्थः । जीवब्रह्माभेददर्शनं यज्ञत्वेन संपाद्य तत्साधनयज्ञमध्ये पठ्यते श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ इत्यादिना स्तोतुम् ॥ २५ ॥

शं० टी०—पूर्वं ब्रह्मार्पणं ब्रह्महविरितिमन्त्रेण चमसादीनां ब्रह्ममात्रत्वदर्शनलक्षणं ज्ञानं यज्ञरूपत्वेन वर्णयित्वा तस्यैव ज्ञानयज्ञस्य साक्षान्मोक्षैकसाधनत्वेन दैवादियज्ञापेक्षया सर्वोत्तमत्वं प्रतिपादयितुं मोक्षस्य व्यवहितसाधनानां दैवादियज्ञानां मुमुक्षुभिः स्वाधिकारानुरूपेण चित्तशुद्ध्यर्थमनुष्ठेयत्वं सूचयितुं च दैवादियज्ञान्निरूपयति—**दैवमिति** । देवानिन्द्रादीनुद्दिश्य प्रवृत्तो यज्ञो दैवस्तं दैवमेव यज्ञं श्रौतं स्मार्तं चापरे मोक्षकामा योगिनः कर्मयोगिनो गृहिणश्चित्तशुद्ध्यर्थं पर्युपासतेऽनुतिष्ठन्तीति, दैव एव वैदिको यज्ञो गृहिणां कर्तव्य इति सूचयित्वा ब्रह्मविदां यतीनां स्वयमेव यज्ञः कर्तव्यो मुक्त्यर्थमित्युक्तमेत्र ज्ञानयज्ञं प्रकारान्तरेण वर्णयति—**ब्रह्माग्नाविति** । अपरे गृहिभ्यो भिन्ना यतयः श्रवणादिभिर्विज्ञातात्मतत्त्वाः स्वयं ब्रह्माग्नौ "सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दो ब्रह्म । तदेतद्ब्रह्मापूर्वमनपरम्" इत्यादिश्रुतिप्रसिद्धं निरस्ताशेषविशेषं सच्चिदानन्दघनं यत्परं ब्रह्म तदेवाग्निरविद्यातत्कार्यदाहकत्वात्सोपाधिकात्माहुतिप्रक्षेपस्याधिकरणत्वाच्च परं ब्रह्माग्निरित्युच्यते तस्मिन् ब्रह्माग्नौ यज्ञं पामरैरहं भोक्तेति विषयोपभोगैरिज्यत इति यज्ञ आत्मा सोपाधिकस्तं यज्ञं वस्तुतो निर्विशेषमप्यध्यासतो बुद्ध्याद्युपाधियुक्तमात्मानमाहुतिनिक्षेपणकाले यज्ञेनात्मना निर्विशेषस्वरूपेणैव ब्रह्मणि जुह्वति, अहं ब्रह्मास्मीत्यहमित्यहंपदार्थं सोपाधिकवत्प्रतीयमानं विवेकवृत्त्या निर्विशेषं भावयित्वा ब्रह्माभिन्नमनुभवन्तीत्यर्थः । यद्वा यज्ञमात्मानं सोपाधिकं यज्ञेन "यज्ञो वै विष्णुः" इतिश्रवणात्सोपाधिकेनेश्वरेण सहैव जुह्वति । सोपाधिकमीश्वरं सोपाधिकमात्मानं चोभौ तत्तदुपाधिमपोह्य चोभयोरधिष्ठानभूतेन तुरीयेण निर्विशेषेण ब्रह्मणाऽभिन्नौ पश्यन्ति, यथा तरङ्गबुद्बुदौ तन्नामरूपापोहेन तदाधारभूतसमुद्रेणाऽभिन्नौ पश्यन्ति तद्वदित्यर्थः ॥ २५ ॥

श्री० टी०—एतदेव यज्ञत्वेन संपादितं सर्वत्र ब्रह्मदर्शनलक्षणं ज्ञानं सर्वयज्ञोपायप्राप्यत्वात्सर्वयज्ञेभ्यः श्रेष्ठमित्येवं स्तोतुमधिकारिभेदेन ज्ञानोपायभूतान्बहून्यज्ञानाह—**दैवमित्यष्टभिः** । देवा इन्द्रवरुणादय इज्यन्ते यस्मिन्, एवकारेणेन्द्रादिषु ब्रह्मबुद्धिराहित्यं दर्शितम् । तं दैवं यज्ञमपरे कर्मयोगिनः पर्युपासते श्रद्धयाऽनुतिष्ठन्ति । अपरे तु ज्ञानयोगिनः ब्रह्मरूपेऽग्नौ यज्ञेनैवोपायभूतेन ब्रह्मार्पणमित्युक्तप्रकारेण यज्ञमुपजुह्वति यज्ञादिसर्वकर्माणि प्रविलापयन्तीत्यर्थः । सोऽयं ज्ञानयज्ञः ॥ २५ ॥

स० टी०—एवं संपाद्य यज्ञत्वं सम्यग्दृष्टेरथाधुना ॥ तत्स्तुत्यर्थं मखानन्यानुपन्यस्यति केशवः ॥ १ ॥ देवा इन्द्रमुखा येनेज्यन्ते यज्ञः स दैवकः ॥ तं कुर्वन्ति सदा यज्ञं योगिनः कर्मिणोऽपरे ॥ २ ॥ सत्यं ज्ञानमनन्तं यन्निर्विशेषं निरञ्जनम् ॥ तत्पदार्थः परं ब्रह्म तदेवाग्निर्हुताश्रयः ॥ ३ ॥ तस्मिन्नग्नौ चिदात्मानं त्वंपदार्थं मुमुक्षवः ॥ वस्तुतो ब्रह्मसन्तं तं यज्ञं बुद्ध्यादिसंयुतम् ॥ ४ ॥ आहुतीरूपमध्यस्तं ब्रह्मत्वेनैव जुह्वति ॥ सर्वोपाधिपरित्यागाद्ब्रह्मात्मैक्यमखण्डितम् ॥ ५ ॥ पश्यन्ति ब्रह्मनिष्ठास्ते भेदं सम्यङ्निरस्य च ॥ यज्ञत्वेनैव संपाद्य ब्रह्मात्माभेददर्शनम् ॥ ६ ॥ तत्स्तोतुं पठ्यते मध्ये तत्साधनमखेषु वै ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ इतीह सा ॥ ७ ॥ संस्तुतिर्ज्ञानयज्ञस्य सम्यग्भगवतोच्यते ॥ ८ ॥ २५ ॥

भा० टी०—सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यन्ते—**दैवमेवेत्यादिना** । देवा एवेज्यन्तेऽनेनाग्निष्टोमादिनाऽसौ दैवः यज्ञस्तमपरे कर्मयोगिनः पर्युपासते कुर्वन्ति । ब्रह्माग्नौ "सत्यं-

ज्ञानमनन्तं ब्रह्म " इत्यादिश्रुत्युक्तमसंसारिस्वरूपं ब्रह्म तदेव होमाधिकरणविवक्षयाऽग्निः तस्मिन्नपरे ब्रह्मविदः आत्मनामसु यज्ञशब्दस्य पाठात् यज्ञमात्मानं जीवमाहुतिरूपं यज्ञेन सत्यादिलक्षणेनोपजुह्वति, सोपाधिकस्यात्मनो निरुपाधिकेन परब्रह्मरूपेणैव यदवलोकनं स तस्मिन्होमस्तं कुर्वन्तीत्यर्थः । ब्रह्मरूपेऽग्नौ यज्ञेनैवोपायेन ब्रह्मार्पणमित्युक्तप्रकारेण यज्ञमुपजुह्वति यज्ञादिसर्वकर्म प्रविलापयतीत्यर्थ इति वा । अस्मिन्पक्षे यज्ञं यज्ञेनेत्यनयोः स्वारस्यं श्रोत्रादीनीत्यादिनोक्तयज्ञानुगुण्यं च चिन्त्यम् ॥ २५ ॥

प० टी०—अथ इज्यते यस्मिन्निति यज्ञ इति व्युत्पत्त्या यज्ञत्वेनोपपादितं ब्रह्मानुभवलक्षणं ज्ञानं तत्सर्वयज्ञेभ्यः श्रेष्ठमिति दर्शयितुं तथा तदधिकारिभेदाद्बहुधेति वक्तुं द्वादशयज्ञानाह दैवमित्यादितोऽष्टभिः— **दैवमिति** । अपरे योगिनः कर्मकुशला दैवं यज्ञं पर्युपासते देवसंबन्धी दैवो देवा इन्द्रसूर्यवरुणादय इज्यन्ते यस्मिन्निति दैवस्तं यज्ञं परितः सर्वत्र देवेषु ब्रह्मबुद्धिराहित्येनोपासत इत्यर्थः । अपरे ज्ञानयोगिनस्तु यज्ञेन ज्ञानयज्ञेन कृत्वा यज्ञं कर्मरूपं ब्रह्मरूपेऽग्नौजुह्वति प्रविलापयन्तीत्यर्थः ॥ २५ ॥

रा० टी०—पूर्वं भगवदधीनकर्तृत्वानुसंधानपूर्वं तत्प्रीत्युद्देशेन वर्णाश्रमविहितानुष्ठानं कर्मेति सामान्यतः कर्मस्वरूपमुक्तं तद्यज्ञादिभेदभिन्नमित्याह—**दैवमिति** । दैवं विष्णुं यज्ञं यथा भवति तथा परे केचन योगिनो यतयः पर्युपासते । यज्ञपदमत्रोपासनरूपक्रियाविशेषणम् । दैवमेवेत्येवकारोऽपि क्रिययैवान्वेति । भगवदुपासनमेव यज्ञतयानुतिष्ठन्ति केचिद्यतय इत्यर्थः । एतेनायज्ञस्येत्यादिना यज्ञादिहीनस्य नायं लोकोस्तीति वक्ष्यमाणतया यत्याश्रमविलोपप्रसङ्ग इति शङ्का निरस्ता । तेषामपि भगवदुपासनारूपयज्ञसत्त्वादिति । यद्वा दैवं यज्ञमिति सामानाधिकरण्यम् । यज्ञरूपं भगवन्तं योगिनः पर्युपासते यज्ञत्वेनोपासते । तेषां तथोपासनमेव यज्ञ इति भावः । भगवतः स्वानन्दरूपहविर्भोक्तृत्वात्स्वस्यैवाग्निरूपत्वाच्चेति ज्ञेयम् । ब्रह्माग्नौ ब्रह्माख्याग्नौ यज्ञेनाग्निहोत्रादियज्ञेन यज्ञं भगवन्तं प्रति जुह्वति । यद्वा ब्रह्माग्नौ यज्ञमग्निहोत्रादिकं यज्ञेनैव यज्ञनामकेन भगवता निमित्तेन जुह्वति समर्पयन्ति । सर्वं यज्ञनामकविष्णवधीनं ज्ञात्वा स्वस्य स्वातन्त्र्याभिमानत्यागेन कृतं कर्म विष्णौ समर्पयन्तीति यावत् । यज्ञेनैवेत्यग्रे सर्वत्रान्वेति ॥ २५ ॥

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ॥
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

त० टी०—तेभ्यः श्रेष्ठानाह—**श्रोत्रादीनीति** । अन्ये निवृत्तिधर्मनिष्ठा ब्रह्मज्ञानाभिकामा ज्ञानपरिपन्थिभूतानि श्रोत्रादीनीन्द्रियाणि तत्तत्संयमरूपेष्वग्निषु जुह्वति, इन्द्रियाणां विषयेभ्यो नियमनपरास्तिष्ठन्तीत्यर्थः । अन्ये प्रवृत्तिधर्मनिष्ठाः संततिवृद्धिकामा विषयभोगसमये हविष्ट्वेन भावितान् शब्दादीन्विषयानग्नित्वेन भावितेषु इन्द्रियेषु जुह्वति, यज्ञरूपकेण विषयानुभवे वर्तन्त इत्यर्थः ॥ २६ ॥

म० टी०—तदनेन मुख्यगौणौ द्वौ यज्ञभेदौ दर्शितौ । यावद्धि किंचिद्वैदिकं श्रेयःसाधनं तत्सर्वं यज्ञत्वेन संपाद्यते । तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि तानि शब्दादिविषयेभ्यः प्रत्याहृत्य अन्ये प्रत्याहारपराः संयमाग्निषु धारणा ध्यानं समाधिरिति त्रयमेकविषयं संयमशब्देनोच्यते । तथा चाह भगवान् पतञ्जलिः ' त्रयमेकत्र संयमः ' इति तत्र हृत्पुण्डरीकादौ मनसश्चिरकालस्थापनं धारणा । एवमेकत्र धृतस्य चित्तस्य भगवदाकारवृत्तिप्रवाहोन्तरान्याकारप्रत्ययव्यवहितो ध्यानं सर्वथा विजातीयप्रत्ययानन्तरितः सजातीयप्रत्ययप्रवाहः समाधिः। स तु चित्तभूमिभेदेन द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्च । चित्तस्य हि पञ्च भूमयो भवन्ति क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति । तत्र रागद्वेषादि शाद्विषयेष्वभिनिविष्टं क्षिप्तं तन्द्रादिग्रस्तं मूढं सर्वदा

विषयासक्तमपि कदाचिद्ध्याननिष्ठं क्षिप्ताद्विशिष्टतया विक्षिप्तम् । तत्र क्षिप्तमूढयोः समाधिशङ्कैव नास्ति । विक्षिप्ते तु चेतसि कादाचित्कः समाधिर्विक्षेपप्राधान्याद्योगपक्षे न वर्तते किंतु तीव्रपवनविक्षिप्तप्रदीपवत्स्वयमेव नश्यति । एकाग्रं तु एकविषयकधारावाहिकवृत्तिसमर्थं सत्त्वोद्रेकेण तमोगुणकृततन्द्रादिरूपलयाभावादात्माकारवृत्तिः । सा च रजोगुणकृतचाञ्चल्यरूपविक्षेपाभावादेकविषयैवेति शुद्धे सत्त्वे भवति चित्तमेकाग्रम् । अस्यां भूमौ संप्रज्ञातः समाधिः । तत्र ध्येयाकारा वृत्तिरपि भासते तस्या अपि निरोधे निरुद्धं चित्तमसंप्रज्ञातसमाधिभूमिः । तदुक्तम् 'तस्या अपि निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिः' इति अयमेव सर्वतो विरक्तस्य समाधिफलमपि सुखमनपेक्षमाणस्य योगिनो दृढभूमिः सन् धर्ममेघ इत्युच्यते । तदुक्तम् 'प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः' 'ततः क्लेशकर्मनिवृत्तिः' इति । अनेन रूपेण संयमानां भेदादग्निष्विति बहुवचनम् । तेषु इन्द्रियाणि जुह्वति धारणाध्यानसमाधिसिद्ध्यर्थं सर्वाणीन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याहरन्तीत्यर्थः । तदुक्तम् 'स्वस्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः' इति विषयेभ्यो निगृहीतानीन्द्रियाणि चित्तरूपाण्येव भवन्ति । ततश्च विक्षेपाभावाच्चित्तं धारणादिकं निर्वहतीत्यर्थः । तदनेन प्रत्याहारधारणाध्यानसमाधिरूपं योगाङ्गचतुष्टयमुक्तम् । तदेवं समाध्यवस्थायां सर्वेन्द्रियवृत्तिनिरोधो यज्ञत्वेनोक्तः । इदानीं व्युत्थानावस्थायां रागद्वेषराहित्येन विषयभोगो यः सोऽप्यपरो यज्ञ इत्याह—शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति अन्ये व्युत्थितावस्थाः श्रोत्रादिभिरविरुद्धविषयग्रहणं स्पृहाशून्यत्वेनान्यसाधारणं कुर्वन्ति स एव तेषां होमः ॥ २६ ॥

शं० टी०—एवं ब्रह्मविदां कर्तव्यं ज्ञानयज्ञं विधायाथाऽब्रह्मविदां कर्तव्यानि यज्ञान्तराण्याह—**श्रोत्रादीनीति** । उक्तेभ्योऽन्ये त्वब्रह्मविदो मुमुक्षवो नैष्ठिकब्रह्मचार्यादय इन्द्रियाणि श्रोत्रादीनि वागादीनि च संयमाग्निषु संयमो नाम तत्तदिन्द्रियस्य तत्तद्विषयाद्विनिवर्त्य तत्तत्स्थाने निग्रहः । इन्द्रियाणां बहुत्वात्संयमा बहवस्त एवाग्नयस्तेषु संयमाग्निषु चक्षुरादीन्द्रियाहुतीर्जुह्वति इन्द्रियनिग्रहरूपं यज्ञं कुर्वन्तीत्यर्थः । एतदन्ये गृहिणो मुमुक्षवः स्वधर्मनिष्ठाः शब्दादिविषयाननिषिद्धान् योग्यकाल एवेन्द्रियाग्निषु तन्निक्षेपणाधिकरणत्वादिन्द्रियाण्येवाग्नयस्तेषु जुह्वति विषयानुभवनियम एव तेषां यज्ञ इत्यर्थः ॥ २६ ॥

श्री० टी०—श्रोत्रादीनीति । अन्ये नैष्ठिकब्रह्मचारिणस्तत्तदिन्द्रियसंयमरूपेष्वग्निषु श्रोत्रादीनि जुह्वति प्रविलापयन्ति, इन्द्रियाणि निरुद्ध्य संयमप्रधानास्तिष्ठन्तीत्यर्थः । इन्द्रियाण्येवाग्नयस्तेषु शब्दादीनन्ये गृहस्था जुह्वति विषयान् भोगसमयेऽप्यनासक्ताः सन्तोऽग्नित्वेन भावितेष्विन्द्रियेषु हविष्ट्वेन भावितान् शब्दादीन्प्रक्षिपन्तीत्यर्थः ॥ २६ ॥

स० टी०—श्रेयसः साधनं यावत्किंचिदस्तीह वैदिकम् ॥ यज्ञत्वेनैव तत्सर्वमत्र संपाद्यतेऽधुना ॥ १ ॥ प्रत्याहारपराः केचिच्छ्रोत्रादीनीन्द्रियाणि ते ॥ विषयेभ्यः समाकृष्य संयमाग्निषु जुह्वति ॥ २ ॥ धारणाध्यानसिद्ध्यर्थं समस्तानीन्द्रियाण्यपि ॥ धीराः समस्तभोगेभ्यः प्रत्याहृत्यात्मनि स्थिताः ॥ ३ ॥ अपरे व्युत्थितावस्थाः श्रोत्रादिभिरपीन्द्रियैः ॥ अविरुद्धार्थस्वीकारं होमं मन्यन्त एव तम् ॥ ४ ॥ २६ ॥

भा० टी०—श्रोत्रेति । श्रोत्रादीनि ज्ञानेन्द्रियाण्यन्ये योगिनः प्रत्याहारपराः प्रतीन्द्रियं संयम्य प्रत्याहारस्य सत्त्वात् बहुवचनम्, संयमा एवाग्नयस्तेषु जुह्वतीन्द्रियसंयमनमेव कुर्वन्तीत्यर्थः । यत्तु धारणाध्यानसमाधित्रितयमेकविषयं संयमशब्देनोच्यते तत्र हृत्पुण्डरीकादौ मनसश्चिरकालस्थापनं धारणा, एवमेकत्र धृतस्य चित्तस्य भगवदाकारवृत्तिप्रवाहोऽन्तरान्तराऽन्याकारप्रत्ययव्यवहितो ध्यानं, सर्वथा विजातीयप्रत्ययानन्तरितः सजातीयप्रत्ययप्रवाहः समाधिः । अनेन रूपेण संयमानां भेदाद् अग्निष्विति बहुवचनम् । तेष्विन्द्रियाणि जुह्वति धारणाध्यानसमाधिसिद्ध्यर्थं सर्वाणीन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याहरन्तीत्यर्थ इत्यादि सच्चिन्त्यं, प्रत्याहार-

रूपेष्वग्निषु श्रोत्रादीन्द्रियाणा होमस्यात्र विवक्षितत्वादन्यथा होमाधिकरणस्यालाभात्। ध्यानादीनां तु मनोहोमाधिकरणत्वादिति दिक्। एतेन तदनेन प्रत्याहारध्यानधारणासमाधिरूपं योगाङ्गचतुष्टयमुक्तमिति प्रत्युक्तं प्रत्याहारस्यैवात्राक्षरस्वारस्यात्प्रतीतेः, अत एव तत्र कंचिद्बाह्यमाभ्यन्तरं वा विशेषमुपादाय तत्र चेतसो नियमनं क्रियते ते च संयमा अनेकविषयत्वादनेके पृथक्फलाश्च। तथाच योगसूत्रकृता प्रोक्तम् "भुवनज्ञानं सूर्ये संयमात् चन्द्रे ताराव्यूहज्ञानं कण्ठकूपे क्षुत्पिपासानिवृत्तिः" इत्यादीति परास्तम्। अन्ये तत्त्वविदः प्रारब्धवशादुपलब्धान् शब्दादीन् शास्त्राविरुद्धान् विषयान् इन्द्रियाग्निषु जुह्वति, श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्त इत्यर्थः। यत्तु तथान्ये विषयेभ्यः प्रत्याहृतकरणाः धारणाध्यानसमाध्यात्मकं मनसः संयममेकत्र मूलाधाराद्यन्यतमचक्रे कर्तुमशक्ताः समनस्केन्द्रियेषु विषयवियोगाद्दग्धेन्धनानलवत्स्वयं विलीनेषु येषां समाधिबुद्धिस्तैः समनस्केन्द्रियेषु विषया एवोपसंहृताः, इत्याद्यन्ये वर्णयन्ति तदसत्। इन्द्रियप्रत्याहाररूपस्य यज्ञस्य श्रोत्रादीनीत्यादिनोक्तत्वेन यज्ञान्तरत्वाभावप्रसङ्गात्। उक्तरीत्या विषयासन्निकर्षाग्नौ इन्द्रियाणि जुह्वतीति वक्तव्यत्वापत्तेश्चेति दिक्॥ २६॥

प० टी०—स्पष्टार्थम्॥ २६॥

रा० टी०—श्रोत्रेति। अन्ये योगिनः श्रोत्रादीनि ज्ञानेन्द्रियाणि संयमाग्निषु जुह्वति भगवत्पूजात्वेनेन्द्रियनियमनं कुर्वन्ति। प्रत्याहारादिना सर्वं यज्ञाख्यहर्यधीनं न कचिदपि स्वातन्त्र्यमिति ज्ञात्वेत्यर्थः। एतदपि ब्रह्मार्पणरूपमेव विवक्षितम्। एवमग्रेपि। अत एव वक्ष्यति एवं बहुविधा यज्ञा इति ज्ञेयम्। अन्ये योगिनः शब्दादीन् शब्दस्पर्शरूपरसगन्धान्विषयान् श्रोत्रादीन्द्रियाख्याग्निषु जुह्वति, यज्ञेनैव यज्ञाधीनं ज्ञात्वा स्वस्वातन्त्र्याभिमानत्यागेन भगवत्पूजात्वेन विषयान्भुञ्जत इत्यर्थः॥ २६॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे॥
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ २७॥

त० टी०—तेभ्योऽपि श्रेष्ठाधिकारिण आह—सर्वाणीति। अपरे पूर्वमेव नियमितज्ञानेन्द्रियत्वाद्बाह्यविषयासक्तिशून्या योगिनः सर्वाणीन्द्रियकर्माणि वाक्पाणिपादपायूपस्थानां कर्मेन्द्रियाणां वचनादानगमनोत्सर्गानन्दाख्यानि कर्माणि प्राणकर्माणि च पञ्चप्राणानां कर्माणि तत्र प्राणस्योर्ध्वगमनम्, अपानस्याधोगमनं, व्यानस्य विष्वक्शरीरे गमनाकुञ्चनप्रसारणानि, उदानस्य पीताशितान्नाद्युद्गारकरणं, समानस्याशितपीतान्नादेः सर्वत्र शरीरे समीकरणम्। एतानि आत्मसंयमयोगाग्नौ आत्मनो मनसः संयमो वृत्त्यन्तरवैमुख्यपूर्वकमात्मप्रवणीकरणं ध्यानयोग्यतासंपादनं स योग एव सर्वाशुभदाहकत्वादग्निस्तस्मिन् ज्ञानदीपिते ज्ञानेन प्रज्वलिते जुह्वति, ध्येयं सम्यङ् निश्चित्य तस्मिन्मनो निश्चलीकर्तुमिन्द्रियप्राणकर्माणि त्याजयन्तीत्यर्थः॥ २७॥

म० टी०—तदेवं पातञ्जलमतानुसारेण लयपूर्वकसमाधिं ततो व्युत्थानं च यज्ञद्वयमुक्त्वा ब्रह्मवादिमतानुसारेण बाधपूर्वकं समाधिं कारणोच्छेदेन व्युत्थानशून्यं सर्वफलभूतं यज्ञान्तरमाह—सर्वाणीति। द्विविधो हि समाधिर्भवति लयपूर्वको बाधपूर्वकश्च। तत्र 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति न्यायेन कारणव्यतिरेकेण कार्यस्यासत्त्वात्। पञ्चीकृतपञ्चभूतकार्यं व्यष्टिरूपं समष्टिरूपविराट्कार्यत्वात्तद्व्यतिरेकेण नास्ति। तथा समष्टिरूपमपि पञ्चीकृतपञ्चभूतात्मकं कार्यमपञ्चीकृतपञ्चमहाभूतकार्यत्वात्तद्व्यतिरेकेण नास्ति। तत्रापि पृथिवी शब्दस्पर्शरूपरसगन्धाख्यपञ्चगुणा गन्धेतरचतुर्गुणापकार्यत्वात्तद्व्यतिरेकेण नास्ति। ताश्चतुर्गुणाः आपो गन्धरसेतरत्रिगुणात्मकतेजःकार्यत्वात्तद्व्यतिरेकेण न सन्ति। तदपि त्रिगुणात्मकं तेजो गन्धरस-

रूपेतरद्विगुणवायुकार्यत्वात्तद्व्यतिरेकेण नास्ति । सोऽपि द्विगुणात्मको वायुः शब्दमात्रगुणाकाशकार्यत्वात्तद्व्यतिरेकेण नास्ति । स च शब्दगुण आकाशो बहु स्यामिति परमेश्वरसंकल्पात्मकाहंकारकार्यत्वात्तद्व्यतिरेकेण नास्ति। सोपि संकल्पात्मकोऽहंकारो मायेक्षणरूपमहत्तत्त्वकार्यत्वात्तद्व्यतिरेकेण नास्ति। तदपि ईक्षणरूपं महत्तत्त्वं मायापरिणामत्वात्तद्व्यतिरेकेण नास्ति । तदपि मायाख्यं कारणं जडत्वेन चैतन्येऽध्यस्तत्वात्तद्व्यतिरेकेण नास्तीत्यनुसंधानेन विद्यमानेपि कार्यकारणात्मके प्रपञ्चे चैतन्यमात्रगोचरो यः समाधिः स लयपूर्वक उच्यते । तत्र तत्त्वमस्यादिवेदान्तमहावाक्यार्थज्ञानाभावेनाविद्यातत्कार्यस्याक्षीणत्वात् । एवं चिन्तनेऽपि कारणसत्त्वेन पुनः कृत्स्नप्रपञ्चोत्थानादयं सुषुप्तिवत्सबीजः समाधिर्न मुख्यः । मुख्यस्तु तत्त्वमस्यादिमहावाक्यार्थसाक्षात्कारेण विद्याया निवृत्तौ सर्गक्रमेण तत्कार्यनिवृत्तेरनाद्यविद्यायाश्च पुनरुत्थानाभावेन तत्कार्यस्यापि पुनरुत्थानाभावान्निर्बीजो बाधपूर्वकः समाधिः । स एवानेन श्लोकेन प्रदर्श्यते । तथाहि सर्वाणि निखिलानि स्थूलरूपाणि संस्काररूपाणि च इन्द्रियकर्माणि इन्द्रियाणां श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानां पञ्चानां वाक्पाणिपादपायूपस्थाख्यानां च पञ्चानां बाह्यानामिन्द्रियाणामान्तरयोश्च मनोबुद्ध्योः कर्माणि शब्दश्रवणस्पर्शग्रहणरूपदर्शनरसग्रहणगन्धग्रहणानि वचनादानविहरणोत्सर्गानन्दाख्यानि च संकल्पाध्यवसायौ च। एवं प्राणकर्माणि च प्राणानां प्राणापानव्यानोदानसमानाख्यानां पञ्चानां कर्माणि बहिर्नयनमधोनयनमाकुञ्चनप्रसारणादि अशितपीतसमनयनमूर्ध्वनयनमित्यादीनि । अनेन पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्राणा, मनो, बुद्धिश्चेति सप्तदशात्मकं लिङ्गमुक्तम् । तच्च सूक्ष्मभूतसमष्टिरूपं हिरण्यगर्भाख्यमिह विवक्षितमिति वदितुं सर्वाणीति विशेषणम् । आत्मसंयमयोगाग्नौ आत्मविषयकः संयमो धारणाध्यानसंप्रज्ञातसमाधिरूपस्तत्परिपाके सति योगो निरोधसमाधिः । यं पतञ्जलिः सूत्रयामास 'व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः' इति । व्युत्थानं क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं तत्संस्काराः समाधिविरोधिनस्ते योगिना प्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयन्ते। तद्विरोधिनश्च निरोधसंस्काराः प्रादुर्भवन्ति । ततश्च निरोधमात्रक्षणेन चित्तान्वयो निरोधपरिणाम इति । तस्य फलमाह 'ततः प्रशान्तवाहिता संस्कारात्' इति तमोरजसोः क्षयाल्लयविक्षेपशून्यत्वेन शुद्धसत्त्वस्वरूपं चित्तं प्रशान्तमित्युच्यते। पूर्वपूर्वप्रशमसंस्कारपाटवेन तदाधिक्यं प्रशान्तवाहितेति। तत्कारणं च सूत्रयामास 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः' इति । विरामो वृत्त्युपरमस्तस्य प्रत्ययः कारणं वृत्त्युपरमार्थः पुरुषप्रयत्नस्तस्याभ्यासः पौनःपुन्येन संपादनं तत्पूर्वकस्तज्जन्योऽन्यः संप्रज्ञाताद्विलक्षणोऽसंप्रज्ञात इत्यर्थः । एतादृशो य आत्मसंयमयोगः स एवाग्निस्तस्मिन् ज्ञानदीपिते ज्ञानं वेदान्तवाक्यजन्यो ब्रह्मात्मैक्यसाक्षात्कारस्तेनाविद्यातत्कार्यनाशद्वारा दीपिते अत्यन्तोज्ज्वलिते बाधपूर्वके समाधौ समष्टिलिङ्गशरीरमपरे जुह्वति प्रविलापयन्तीत्यर्थः । अत्र च सर्वाणीति आत्मेति ज्ञानदीपित इति विशेषणैरग्नावित्येकवचनेन च पूर्ववैलक्षण्यं सूचितमिति न पौनरुक्त्यम् ॥ २७ ॥

शं० टी०–किंच–सर्वाणीति। उक्तेभ्योऽपरे केचन यतयो ध्याननिष्ठा इन्द्रियकर्माणि ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च कर्माणि श्रवणदर्शनादीनि वचनादानादीनि च सर्वाणि प्राणकर्माणि च प्राणस्यापानव्यानादिभेदभिन्नस्य कर्माण्युच्छ्वासनिश्वासनिमेषोन्मेषजृम्भणोद्गारादीनि कर्माणि सर्वाण्यपि ज्ञानदीपिते ज्ञानेनात्मविषयकेण दीपिते सम्यगवगमिते आत्मसंयमयोगाग्नौ स्वस्वरूपे आत्मनि संयमयोगो मनोनिरोधः समाधिः स एवाग्निस्तस्मिन् प्राणकर्माणीन्द्रियकर्माणि च जुह्वति प्राणेन्द्रियव्यापारं निरुद्ध्य सदात्मानमेवानुभवन्तीत्यर्थः ॥ २७ ॥

श्री० टी०–सर्वाणीति। अपरे ध्याननिष्ठाः बुद्धीन्द्रियाणां श्रोत्रादीनां कर्माणि श्रवणदर्शनादीनि कर्मे-

न्द्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादानादीनि च । प्राणानां दशानां कर्माणि प्राणस्य बहिर्गमनम्, अपानस्याधो नयनम्,व्यानस्य व्यानयनाकुञ्चनप्रसारणादि,समानस्याशितपीतादीनां सम्यगुन्नयनम्, उदानस्योर्ध्वनयनम् । 'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः । कृकरः क्षुतकृज्ज्ञेयो देवदत्तो विजृम्भणे ॥ न जहाति मृतं चापि सर्वव्यापी धनञ्जयः' इत्येवंरूपाणि जुह्वति क आत्मानि संयमो व्यानैकाग्र्यं स एव योगः स एवाग्नि स्तस्मिन् ज्ञानेन ध्येयविषयेण दीपिते प्रज्वलिते ध्येयं सम्यग् ज्ञात्वा तस्मिन्मनः संयम्य तानि सर्वाणि कर्माण्युपरमयतीत्यर्थः ॥ २७ ॥

स० टी०—पातञ्जलमतेनैवमुक्त्वा यज्ञद्वयं हरिः ॥ ब्रह्मवादिमतेनाह यज्ञान्तरमकामिनाम् ॥ १ ॥ सर्वाणि स्थूलरूपाणि सूक्ष्मरूपाणि सर्वशः ॥ शब्दाद्यादानरूपाणीन्द्रियकर्माणि योगिनः ॥ २ ॥ तथैव प्राणकर्माण्याकुञ्चनप्रभृतीनि च ॥ अर्थाद्व्यष्टिसमष्ट्यात्मलिङ्गं सप्तदशाङ्गकम् ॥ ३ ॥ आत्मसंयमयोगाग्नौ समाधौ निर्विकल्पके ॥ प्रक्षिपन्त्यात्मविज्ञानदीपितेऽत्यन्ततेजसि ॥ ४ ॥ बाधित्वा ज्ञानमखिलं सम्यग्ज्ञानेन योगिनः ॥ विलापयन्ति ते लिङ्गं समाधौ सर्वतो ध्रुवम् ॥ ५ ॥ २७ ॥

भा० टी०—किंच—सर्वाणीति। सर्वाणीन्द्रियकर्माणि इन्द्रियाणां श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानां ज्ञानेन्द्रियाणां वाक्पाणिपादपायूपस्थाभिधानां कर्मेन्द्रियाणां कर्माणि शब्दस्पर्शरूपरसगन्धग्रहणात्मकानि वचनादानविहरणोत्सर्गानन्दाख्यानि च तथा प्राणानां प्राणापानव्यानोदानसमानाभिधानां कर्माणि बहिर्नयनमधोनयनमाकुञ्चनप्रसारणादि अशितपीतसमनयनमूर्ध्वनयनमित्यादीनि 'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः । कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतं चापि सर्वव्यापी धनञ्जयः' इति उक्तानि नागादिपञ्चप्राणकर्माणि चापरे आत्मानि संयमः प्रविलापनं स एव योगाग्निस्तस्मिन् तैलेन दीप इव ज्ञानेन विवेकेन सर्वोपाधिनिरासेनोज्ज्वलतामापादिते जुह्वति प्रविलापयन्तीत्यर्थः । अत्र भाष्यस्य समानरूपतया न तेन व्याख्यान्तराणां विरोध इति ध्येयम् ॥ २७ ॥

प० टी०—सर्वाणीति । अपरे ध्याननिष्ठाः श्रोत्रादिज्ञानेन्द्रियाणां वागादीनां कर्माणि वचनादीनि तथा मुख्यप्राणानां पञ्चानां कर्माणि बहिर्निर्गमनादीनि तथोपप्राणानां नागादीनां पञ्चानामुद्गारादीनीत्येवंरूपाणि कर्माण्यात्मनो मनसः संयमरूपो योगो ध्यानैकाग्र्यं स एवाग्निस्तस्मिन् ज्ञानेन स्वानुभवरूपेण दीपिते प्रज्वलिते ध्येयं सम्यग् ज्ञात्वा, तत्र सर्वाणि कर्माण्युपरमन्तीत्यर्थः ॥ २७ ॥

रा० टी०—सर्वाणीति। अपरे योगिनः सर्वाणीन्द्रियकर्माणि वाक्पाणिपादपायूपस्थरूपकर्मेन्द्रियव्यापारान्, तथा प्राणकर्माणि प्राणापानादिव्यापारांश्च आत्मसंयमयोगाग्नौ जुह्वति, आत्मनो मनसो यः संयमः स एव योग उपायः स एवाग्निः ज्ञानदीपिते तत्र जुह्वति, यज्ञेनैव भगवदधीनताज्ञानपूर्वं स्वातन्त्र्याभिमानत्यागेन मनो निगृह्य कर्मेन्द्रियादिव्यापारान् भगवत्पूजात्वेन नियच्छन्तीत्यर्थः ॥ २७ ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ॥
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

त० टी०—किंच—द्रव्ययज्ञा इति । केचिद्द्रव्ययज्ञाः स्वधर्मतो द्रव्यार्जनं कृत्वा पात्रे प्रतिपादनदेवार्चनहोमवापीकूपतडागादिषु प्रयुञ्जन्ति ते द्रव्ययज्ञाः, केचित्तपोयज्ञाः कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषां ते तपस्विनः । तथाऽपरे योगयज्ञाः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इत्यष्टाङ्गो योग एव यज्ञस्तन्निष्ठाः । स्वाध्यायो वेदाध्ययनमेव यज्ञो येषां ते स्वाध्याययज्ञाः, वेदवेदान्तार्थाभ्यासनिष्ठा ज्ञानयज्ञाः । यतयः यत्नशीलाः, संशितव्रताः सम्यक् शितानि तीक्ष्णीकृतानि दृढानि व्रतानि येषां ते व्रतयज्ञाः ॥ २८ ॥

म० टी०–एवं त्रिभिः श्लोकैः पञ्च यज्ञानुक्त्वाऽधुनैकेन श्लोकेन षड यज्ञानाह–द्रव्ययज्ञा इति। द्रव्यत्याग एव यथाशास्त्रं यज्ञो येषां ते द्रव्ययज्ञाः पूर्तदत्ताख्यस्मार्तकर्मपराः । तथाच स्मृतिः 'वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥ शरणागतसंत्राणं भूतानां चाप्यहिंसनम् । बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते 'इति । इष्टाख्यं श्रौतं कर्म तु दैवमेवापरे यज्ञमित्यत्रोक्तम् । अन्तर्वेदिदानमपि तत्रैवान्तर्भूतम् । तथा कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषां ते तपोयज्ञास्तपस्विनः । तथा योगश्चित्तवृत्तिनिरोधोऽष्टाङ्गो यज्ञो येषां ते योगयज्ञाः यमनियमासनादियोगाङ्गानुष्ठानपराः । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो हि योगस्याष्टावङ्गानि । तत्र प्रत्याहारः श्रोत्रादीनीन्द्रियाण्यन्य इत्यत्रोक्तः । धारणाध्यानसमाधय आत्मसंयमयोगाग्नावित्यत्रोक्ताः। प्राणायामोऽपाने जुह्वति प्राणमित्यनन्तरश्लोके वक्ष्यते । यमनियमासनान्यत्रोच्यन्ते । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः पञ्च । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः पञ्च । स्थिरसुखमासनं पद्मकस्वस्तिकाद्यनेकविधम् । अशास्त्रीयः प्राणिवधो हिंसा । सा च कृतकारितानुमोदितभेदेन त्रिविधा । एवमयथार्थभाषणमवध्यहिंसानुबन्धि यथार्थभाषणं चानृतम् । स्तेयमशास्त्रीयमार्गेण परद्रव्यस्वीकरणम्, अशास्त्रीयः स्त्रीपुंसव्यतिकरो मैथुनम्, शास्त्रनिषिद्धमार्गेण देहयात्रानिर्वाहकाधिकभोगसाधनस्वीकारः परिग्रहः, एतन्निवृत्तिलक्षणा उपरमा यमाः 'यम उपरमे' इति स्मरणात् । तथा शौचं द्विविधं बाह्यमाभ्यन्तरं च । मृज्जलादिभिः कायादिक्षालनं हितमितमेध्याशनादि च बाह्यम् । मैत्रीमुदितादिभिर्मदमानादिचित्तमलक्षालनमान्तरम् । सन्तोषो विद्यमानभोगोपकरणादधिकस्यानुपादित्सारूपा चित्तवृत्तिः । तपः क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहनं काष्ठमौनाकारमौनादिव्रतानि च । इङ्गितेनापि स्वाभिप्रायाप्रकाशनं काष्ठमौनम्, अवचनमात्रमाकारमौनमिति भेदः । स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा । ईश्वरप्रणिधानं सर्वकर्मणां तस्मिन्परमगुरौ फलनिरपेक्षतयाऽर्पणम् । एते विधिरूपा नियमाः पुराणेषु येऽधिका उक्तास्त एष्वेव यमनियमेष्वन्तर्भाव्याः । एतादृशयमनियमाद्यभ्यासपरा योगयज्ञाः स्वाध्यायज्ञानयज्ञाश्च । यथाविधि वेदाभ्यासपराः स्वाध्याययज्ञाः, न्यायेन वेदार्थनिश्चयपरा ज्ञानयज्ञाः । यज्ञान्तरमाह–यतयो यत्नशीलाः । संशितव्रताः सम्यक् शितानि तीक्ष्णीकृतान्यतिदृढानि व्रतानि येषां ते, संशितव्रतयज्ञा इत्यर्थः । तथाच भगवान्पतञ्जलिः 'ते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्' इति । ये पूर्वमहिंसाद्याः पञ्च यमा उक्तास्त एव जात्याद्यनवच्छेदेन दृढभूमयो महाव्रतशब्दवाच्याः । तत्राहिंसा जात्यवच्छिन्ना यथा मृगयोर्मृगातिरिक्तान्न हनिष्यामीति, देशावच्छिन्ना न तीर्थे हनिष्यामीति, सैव कालावच्छिन्ना यथा न चतुर्दश्यां न पुण्येहनीति, सैव प्रयोजनविशेषरूपसमयावच्छिन्ना यथा क्षत्रियस्य देवब्राह्मणप्रयोजनव्यतिरेकेण न हनिष्यामीति युद्धं विना न हनिष्यामीति च, एवं विवाहादिप्रयोजनव्यतिरेकेणानृतं न वदिष्यामीति, एवमापत्कालव्यतिरेकेण क्षुद्रयाद्यतिरिक्तः स्तेयं न करिष्यामीति च, एवमृतुव्यतिरिक्तकाले पत्नीं न गमिष्यामीति, एवं गुर्वादिप्रयोजनमन्तरेण न परिग्रहीष्यामीति यथायोग्यमवच्छेदो द्रष्टव्यः । एतादृगवच्छेदपरिहारेण यदा सर्वजातिसर्वदेशसर्वकालसर्वप्रयोजनेषु भवाः सार्वभौमाः अहिंसादयो भवन्ति महता प्रयत्नेन परिपाल्यमानत्वात् । तदा ते महाव्रतशब्देनोच्यन्ते । एवं काष्ठमौनादिव्रतमपि द्रष्टव्यम् । एतादृशव्रतदार्ढ्ये च कामक्रोधलोभमोहानां चतुर्णामपि नरकद्वारभूतानां निवृत्तिः । तत्राहिंसया क्षमया क्रोधस्य, ब्रह्मचर्येण वस्तुविचारेण कामस्य, अस्तेयापरिग्रहरूपेण सन्तोषेण लोभस्य, सत्येन यथार्थज्ञानरूपेण विवेकेन मोहस्य, तन्मूलानां च सर्वेषां निवृत्तिरिति द्रष्टव्यम् । इतराणि च फलानि सकामनां योगशास्त्रे कथितानि ॥ २८ ॥

शं० टी०–एतान्यपि मुमुक्षुभिः कर्तव्यानीति सूचयितुं पुनरपि यज्ञान्तराण्याह–द्रव्येति । उक्तेभ्यो-

ऽपरे केचन मुमुक्षवो द्रव्ययज्ञाः सत्पात्रेषु नियमेन श्रद्धया द्रव्यनिक्षेपणमयमेवास्माकं यज्ञ इति ये कुर्वन्ति ते द्रव्ययज्ञाः । केचन तपोयज्ञाः तपश्चान्द्रायणप्राजापत्याद्युपवासादिरूपं वा इदमेवास्माकं यज्ञ इति ये कुर्वन्ति ते तपोयज्ञाः । केचन योगयज्ञाः योग आसनप्राणायामादिभिः स्वाङ्गैर्युक्तो लक्ष्ये चित्तस्थैर्यलक्षण एव यज्ञो येषां ते योगयज्ञाः । तथा केचन स्वाध्यायज्ञानयज्ञाः । अन्ते श्रूयमाणो यज्ञशब्दः प्रत्येकं संबध्यते तेनस्वाध्याययज्ञाः ज्ञानयज्ञा इति रूपद्वयम् " तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः " इति श्रुत्युक्तानध्यायद्वयं त्यक्त्वा सर्वदा वेदपारायणमेवास्माकं यज्ञ इत्यध्ययनाविधिं नियमेन ये कुर्वन्ति ते स्वाध्याययज्ञास्तथा केचन ज्ञानयज्ञाः ज्ञानं ज्ञानशास्त्रपरिशीलनमिदं नो यज्ञ इति सदा ये कुर्वन्ति ते ज्ञानयज्ञाः । एवं मोक्षार्थं यतयो यत्नशीलाः संशितव्रतास्तत्र तत्र स्वस्वनिष्ठायां संशितमतितीक्ष्णं व्रतं नियमो येषां ते संशितव्रताः बहवः सन्तीति द्रव्यत्यागस्य तपसो योगस्य स्वाध्यायावृत्तेः शास्त्रपरिशीलनस्य च यज्ञत्वं सूचितं भवति ॥ २८ ॥

श्री० टी०—किंच—द्रव्येति । द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः। कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषां ते तपोयज्ञाः। योगश्चित्तवृत्तिनिरोधलक्षणः समाधिः, स एव यज्ञो येषां ते योगयज्ञाः । स्वाध्यायेन वेदेन श्रवणमननादिना यत्तदर्थज्ञानं तदेव यज्ञो येषां ते, अथवा वेदपाठयज्ञास्तदर्थज्ञानयज्ञाश्चेति द्विविधा यतयः प्रयत्नशीलाः सम्यक् शितं निशितं तीक्ष्णीकृतं व्रतं येषां ते ॥ २८ ॥

स० टी०—पञ्चयज्ञांस्त्रिभिः श्लोकैरुक्त्वैकेन षडाह च॥ द्रव्यत्यागो यथाशास्त्रं यज्ञो येषां त एव ते॥ १ ॥ तप एवातिकृच्छ्रादियज्ञो येषां तपस्विनाम् ॥ चित्तवृत्तिनिरोधाख्यो यज्ञो येषां सुयोगिनाम्॥२॥ वेदाभ्यासो यथाशास्त्रं येषां स्वाध्यायिनां मखः ॥ शास्त्रार्थनिश्चयो येषां न्यायेन ज्ञानयाजिनाम् ॥३॥ व्रतान्यतिदृढान्येव येषां ते व्रतिनां वराः ॥ ४ ॥ २८ ॥

भा० टी०—एवं त्रिभिः श्लोकैर्यज्ञपञ्चकमुक्त्वाथैकेन पञ्चयज्ञानाह—**द्रव्ययज्ञा इति** । तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या ये कुर्वन्ति ते द्रव्ययज्ञा इति भाष्यं तस्यैव विवरणं द्रव्ययज्ञाः पूर्तदत्ताख्यस्मार्तयज्ञपराः । तथाच स्मृतिः ' वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ शरणागतसंत्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते ' इत्यादीति बोध्यम् । तथा पञ्चाग्निसेवनादि तप एव यज्ञो येषां ते तपोयज्ञाः, तथा यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिलक्षणो योग एव यज्ञो येषां ते योगयज्ञाः, तथा परे स्वाध्यायो विधिवद्वेदाभ्यासो यज्ञो येषां ते स्वाध्याययज्ञाः। ज्ञानं पूर्वोत्तरमीमांसाविचारेण शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाश्च । यतयो यत्नशीलाः सम्यक् शितानि सूक्ष्माणि तीक्ष्णीकृतानि च व्रतानि येषां ते इति सर्वेषां विशेषणमन्त्यानां वा केचित्त्वनेन विशेषणेन यज्ञान्तरं वर्णयन्ति व्रतयज्ञा इत्यर्थ इति तेषां कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषामिति तपोयज्ञा इत्यस्य व्याख्यानकर्तॄणां मते पौनरुक्त्यं यज्ञानां त्रयोदशत्वं चापतति। अपान इत्यादिसार्धश्लोकेनैकयज्ञवर्णनं तु प्रामादिकम्। अपर इत्यस्य वारद्वयमुपलब्धेरिति ज्ञेयम्॥ २८ ॥

प० टी०—अथान्यान् पञ्चयज्ञानाह—**द्रव्ययज्ञा इति** । द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः अपरे तपांसि कृच्छ्रचान्द्रायणादीनि यज्ञो येषां ते, योगयज्ञास्तथापरे स्वाध्यायो वेदपाठलक्षणो यज्ञो येषां ते तथा ज्ञानं शास्त्रोत्थं शास्त्रश्रवणं स एव यज्ञो येषां ते एवं पञ्चयाज्ञिकाः । किंभूता यतयः, यतन्ते ते यतयः प्रयत्नशीलास्तथा सम्यक् प्रकारेण शितानि तीक्ष्णीकृतानि व्रतानि पूर्वोक्तानि यैस्ते संशितव्रता एवं नवयज्ञाः ॥ २८ ॥

रा० टी०—**द्रव्येति** । अपरे द्रव्ययज्ञाः द्रव्यस्य याजकाः। कर्त्रर्थोऽयं यज्ञशब्दः । तपोयज्ञाः कृच्छ्रचान्द्रा-

यणादि तपो हर्यर्पणबुद्ध्या हरौ जुह्वतीति तपोयज्ञाः । भगवत्पूजात्वेन ध्यानं कुर्वन्तीति योगयज्ञाः । विष्णुपूजात्वेन स्वाध्यायमधीयत इति स्वाध्याययज्ञाः । यज्ञेनैवेति सर्वत्रान्वेतीत्युक्तं तदर्थः प्राग्वत् । ज्ञानयज्ञाः भगवत्पूजात्वेन श्रवणादि कुर्वन्तीति । संशितव्रताः तीक्ष्णव्रताः यतयो यत्नशीलाः ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ॥
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

त० टी०-प्राणायामयज्ञमाह-अपान-इति सार्धेन । अपानेऽधोवृत्तौ प्राणमूर्ध्ववृत्तिं जुह्वति पूरकं कुर्वन्ति । प्राणेऽपानमिति रेचकं कुर्वन्ति । किं कृत्वा प्राणापानयो रुद्ध्वा कुम्भकं कृत्वेत्यर्थः । ननु पूरकानन्तरं रेचकमिति भावः । एवं च पूरककुम्भकरेचकैः प्राणायामपरायणा अपरे योगिनः प्राणायामयज्ञं कुर्वन्तीत्यर्थः । अपरे योगिनो नियताहारा आहारनियमाभ्यासनिष्ठाः सन्तो योगाभ्यासेऽन्तरायकरान्प्राणान् ज्ञानकर्मात्मकानि द्विविधानीन्द्रियाणि प्राणेषु ऊर्ध्वाधोगतिनियमनेन मध्ये स्थिरीकृतेषु जुह्वति, कुम्भक एव तद्वृत्तीर्विलाययन्तीत्यर्थः । अयमपि प्राणायामयज्ञ एव, न पृथक् ॥ २९ ॥ एवमेते द्वादशयज्ञा दर्शिताः । इदानीमेषां यज्ञविदां फलमाह-सर्वेऽपीति । एते पूर्वोक्ताः सर्वेऽपि यज्ञान् विदन्ति विजानन्ति, विन्दन्ति लभन्त इति वा यज्ञविदो यज्ञज्ञातारः कर्तारो वा यज्ञैः पूर्वोक्तैः क्षपितं नाशितं कल्मषं यैस्ते यज्ञक्षपितकल्मषाः । यज्ञानुष्ठानानन्तरः कालो यज्ञशिष्टशब्दवाच्यस्तस्मिन्काले भोज्यं यदन्नादि तदमृतं भुञ्जते इति यज्ञशिष्टामृतभुजः, ते सर्वेऽपि सत्त्वशुद्धिपूर्वकज्ञानप्राप्तिद्वारेण सनातनं ब्रह्म यान्तीत्यवैष्णवपक्षे व्याख्यानम् । वैष्णवपक्षे तु पूर्वोक्तयज्ञैर्निष्कामतयाऽनुष्ठितैः क्षपितपूर्वकल्मषा यज्ञो विष्णुस्तच्छिष्टं तद्भुक्तावशिष्टं विष्णुनिवेदितान्नमित्यर्थः । तदेवामृतं भुञ्जत इति यज्ञशिष्टामृतभुजस्ते सनातनं ब्रह्म यान्ति । तथोक्तं स्कान्दे नारायणेन ब्रह्माणं प्रति 'भोक्तव्यं मम चोच्छिष्टं मम भक्तिपरायणैः । पवित्रकरणं पुत्र पापिनामपि मुक्तिदम् ॥ ममाशनस्य शेषं च यो भुनक्ति दिने दिने । सिक्थे सिक्थे भवेत्पुण्यं चान्द्रायणशतं सुत ' इति । अन्यथा दोषमाह तत्रैव 'अवशिष्टं यथोच्छिष्टं भक्तानां भोजनद्वयम् । नान्यद्वै भोजनं तेषां भुक्त्वा चान्द्रायणं चरेत् ॥ अनर्पयित्वा यो भुङ्क्ते अन्नपानादिकं च यत् । शुनो विष्ठासमं चान्नं पानं च मदिरासमम्' इति । वक्ष्यति च भगवान्स्वयमपि 'यत्करोषि यदश्नासि' इत्यादिना । तत्फलं च 'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः' इति । तस्माद्विष्ण्वनर्पितस्य भोज्यस्य कुतोऽमृतत्वं कुतो वा तद्भुञ्जतां ब्रह्मप्राप्तिरिति संक्षेपः ॥ ३० ॥ एवं यज्ञानुष्ठाने गुणमुक्त्वा तदभावे दोषमाहार्धेन—नायमिति । पूर्वोक्तानां यज्ञानां मध्ये यस्य कोऽपि यज्ञो नास्ति, सोऽयज्ञस्तस्यायमल्पसुखो मनुष्यलोकोऽपि नास्ति । कुतोऽन्यो विशिष्टसुखः परलोको हे कुरुसत्तमेति ॥ ३१ ॥

म० टी०-प्राणायामयज्ञमाह-अपान इति सार्धेन । अपाने अपानवृत्तौ जुह्वति प्रक्षिपन्ति प्राणवृत्तिं बाह्यवायोः शरीराभ्यन्तरप्रवेशेन पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः । प्राणेऽपानं तथाऽपरे जुह्वति शारी-

रवायोर्वहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वन्तीत्यर्थः । पूरकरेचककथनेन च तदविनाभूतो द्विविधः कुम्भकोऽपि कथित एव । यथाशक्ति वायुमापूर्यानन्तरं श्वासप्रश्वासनिरोधः क्रियमाणोऽन्तःकुम्भकः, यथाशक्ति सर्वं वायुं विरेच्यानन्तरं क्रियमाणो बहिः कुम्भकः, एतत्प्राणायामत्रयानुवादपूर्वकं चतुर्थं कुम्भकमाह— **प्राणापानगती** । प्राणापानगती मुखनासिकाभ्यामान्तरस्य वायोर्बहिर्निर्गमः श्वासः प्राणस्य गतिः, बहिर्निर्गतस्यान्तःप्रवेशः प्रश्वासोऽपानस्य गतिः । तत्र पूरके प्राणगतिनिरोधः रेचकेऽपानगतिनिरोधः कुम्भके तूभयगतिनिरोध इति क्रमेण युगपच्च श्वासप्रश्वासाख्ये प्राणापानगती रुद्ध्वा प्राणायामपरायणाः सन्तोऽपरे पूर्वविलक्षणाः नियताहाराः आहारनियमादियोगसाधनविशिष्टाः प्राणेषु बाह्याभ्यन्तरकुम्भकाभ्यासनिगृहीतेषु प्राणान् ज्ञानेन्द्रियकर्मेन्द्रियरूपान् जुह्वति चतुर्थकुम्भकाभ्यासेन विलापयन्तीत्यर्थः । तदेतत्सर्वं भगवता पतञ्जलिना सङ्क्षेपविस्ताराभ्यां सूत्रितम् । तत्र संक्षेपसूत्रम् ‘ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः प्राणायामः ’ इति । तस्मिन्नासने स्थिरे सति प्राणायामोनुष्ठेयः। कीदृशः, श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वासयोः प्राणापानधर्मयोर्या गतिः पुरुषप्रयत्नमन्तरेण स्वाभाविकप्रवहणं क्रमेण युगपच्च पुरुषप्रयत्नविशेषेण तस्या विच्छेदो निरोध एव लक्षणं स्वरूपं यस्य स तथेति । एतदेव विवृणोति “बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः” इति । बाह्यगतिनिरोधरूपत्वाद्बाह्यवृत्तिः पूरकः । आन्तरगतिनिरोधरूपत्वादान्तरवृत्ती रेचकः । कैश्चित्तु बाह्यशब्देन रेचकः आन्तरशब्देन च पूरको व्याख्यातः । युगपदुभयगतिनिरोधस्तम्भस्तद्वृत्तिः कुम्भकः । तदुक्तं यत्रोभयोः श्वासप्रश्वसायोः सकृदेव विधारकात्प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रयत्नौघविधारणं नापि रेचनप्रयत्नौघविधारणं किंतु यथा तप्त उपले निहितं जलं परिशुष्यत्सर्वतः संकोचमापद्यते एवमयमपि मारुतो वहनशीलो बलवद्विधारकप्रयत्नावरुद्धक्रियः शरीर एव सूक्ष्मभूतोऽवतिष्ठते नतु पूरयति येन पूरकः नतु रेचयति येन रेचक इति त्रिविधोऽयं प्राणायामो देशेन कालेन संख्यया च परीक्षितो दीर्घसूक्ष्मसंज्ञो भवति, यथा घनीभूतस्तूलपिण्डः प्रसार्यमाणो विरलतया दीर्घः सूक्ष्मश्च भवति तथा प्राणोपि देशकालसंख्याधिक्येनाभ्यस्यमानो दीर्घो दुर्लक्ष्यतया सूक्ष्मोऽपि संपद्यते । तथाहि हृदयान्निर्गत्य नासाग्रसंमुखे द्वादशाङ्गुलपर्यन्ते देशे श्वासः समाप्यते । तत एव च परावृत्त्य हृदयपर्यन्तं प्रविशतीति स्वाभाविकी प्राणापानयोर्गतिः । अभ्यासेन तु क्रमेण नाभेराधारद्वारा निर्गच्छति । नासान्तश्चतुर्विंशत्यङ्गुलपर्यन्ते षट्त्रिंशदङ्गुलपर्यन्ते वा देशे समाप्यते । एवं प्रवेशोपि तावानवगन्तव्यः । तत्र बाह्यदेशव्याप्तिर्निवाते देशे इषीकादिसूक्ष्मतूलक्रियया ऽनुमातव्या । अन्तरापि पिपीलिकास्पर्शसदृशेन स्पर्शेनानुमातव्या । सेयं देशपरीक्षा । तथा निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्ताऽवधारणीया । स्वजानुमण्डलं पाणिना त्रिःपरामृश्य छोटिकावच्छिन्नः कालो मात्रा । ताभिः षड्त्रिंशन्मात्राभिः प्रथम उद्घातो मन्दः । स एव द्विगुणीकृतो द्वितीयो मध्यः । स एव त्रिगुणीकृतस्तृतीयस्तीव्र इति । नाभिमूलात्प्रेरितस्य वायोर्विरिच्यमानस्य शिरस्यभिहननमुद्घात इत्युच्यते । सेयं कालपरीक्षा । संख्यापरीक्षा च प्रणवजपावृत्तिभेदेन वा संख्यापरीक्षा श्वासप्रवेशगणनया वा । कालसंख्ययोः कथंचिद्भेदविवक्षया पृथगुपन्यासः । यद्यपि कुम्भके देशव्याप्तिर्नावगम्यते तथापि कालसंख्याव्याप्तिरवगम्यत एव । स खल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासादिक्रमेण देशकालप्रचयव्यापितया दीर्घः परमनैपुण्यसमधिगमनीयतया च सूक्ष्म इति निरूपितस्त्रिविधः प्राणायामः । चतुर्थं फलभूतं सूत्रयति स्म “बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः” इति । बाह्यविषयः श्वासो रेचकः । आभ्यन्तरविषयः प्रश्वासः पूरकः । वैपरीत्यं वा । तावुभावपेक्ष्य सकृद्बलवद्विधारकप्रयत्नवशाद्भवति बाह्याभ्यन्तरभेदेन द्विविधस्तृतीयः कुम्भकः । तावुभावनपेक्ष्यैव केवलकुम्भकाभ्यासपाटवेनासकृत्तत्तत्प्रयत्नवशाद्भवति चतुर्थः कुम्भकः ।

तथाच बाह्याभ्यन्तरविषयाक्षेपीति तदनपेक्ष इत्यर्थः। अन्या व्याख्या, बाह्यो विषयो द्वादशान्तादिराभ्यन्तरो विषयो हृदयनाभिचक्रादिः, तौ द्वौ विषयावाक्षिप्य पर्यालोच्य यः स्तम्भरूपो गतिविच्छेदः स चतुर्थः प्राणायाम इति। तृतीयस्तु बाह्याभ्यन्तरौ विषयावपर्यालोच्यैव सहसा भवतीति विशेषः। एतादृशश्चतुर्विधः प्राणायामः, अपाने जुह्वति प्राणमित्यादिना सार्धेन श्लोकेन दर्शितः॥ तदेवमुक्तानां द्वादशधा यज्ञविदां फलमाह—**सर्वे इति**। यज्ञान्विदन्ति जानन्ति विन्दन्ति लभन्ते वेति यज्ञविदो यज्ञानां ज्ञातारः कर्तारश्च। यज्ञैः पूर्वोक्तैः क्षपितं नाशितं कल्मषं पापं येषां ते यज्ञक्षपितकल्मषाः। यज्ञान् कृत्वाऽवशिष्टे कालेऽन्नममृतशब्दवाच्यं भुञ्जत इति यज्ञशिष्टामृतभुजः, ते सर्वेपि सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यान्ति ब्रह्म सनातनं नित्यं संसारान्मुच्यन्त इत्यर्थः। एवमन्वये गुणमुक्त्वा व्यतिरेके दोषमाह—**नायमित्यर्धेन**। उक्तानां यज्ञानां मध्येऽन्यतमोऽपि यज्ञोऽस्य नास्ति सोऽयज्ञस्तस्यायमल्पसुखोऽपि मनुष्यलोको नास्ति सर्वनिन्द्यत्वात्। कुतोऽन्यो विशिष्टसाधनसाध्यः परलोकः हे कुरुसत्तम॥ २९॥ ३०॥ ३१॥

शं० टी०—प्राणायामोऽपि मुमुक्षोः पापक्षयार्थिनो यज्ञ एव स कर्तव्य इति सूचयितुमाह—**अपान इति**। केचन मुमुक्षवः अपाने अपानवृत्तौ वायुप्रवेशनाड्यां प्राणं प्राणवृत्तिं जुह्वति नासिकाद्वये तत्तत्कालं ज्ञात्वा पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। तथा केचन प्राणे प्राणवृत्तौ वायुनिर्गमनाड्यामपानमपानवृत्तिं जुह्वति रेचकमेव प्रणायामं कुर्वन्तीत्यर्थः। केचन प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां बहिर्वायोर्गमनं प्राणस्य गतिस्ताभ्यां वायोरन्तःप्रवेशोऽपानगतिरेते प्राणापानगती रुद्ध्वा प्राणायामनिरताः केवलं कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। यद्वा अपरे केचन प्राणायामपरायणाः मुमुक्षवः प्राणापानयोर्गती मुखनासिकाभ्यां वायोर्निर्गमप्रवेशौ त्रिकूटे निरुध्य ततो हृदये प्राणेऽपानं तथाऽपाने प्राणं च जुह्वति प्राणेनापानमपानेन प्राणं च योजयन्त्येकीकुर्वन्ति तेन सर्वनाडीषु स्थितं पापं सर्वं भस्मीभवतीत्यर्थः। प्राणेऽपानं जुह्वति पूरकं कुर्वन्ति ततः प्राणापानगती रुद्ध्वा कुम्भकं कृत्वा तथाऽपाने प्राणं जुह्वति रेचकं कुर्वन्तीति वा योजना॥ २९॥ किंच—**अपर इति**। अपरे केचन मुमुक्षवः नियताहाराः स्वल्पाहाराः क्षीराद्यल्पाहारेणान्तर्वायूनां वश्यत्वसंपादनाय प्राणानन्तर्वायून् प्राणेषु तेषु वायुभेदेषु जुह्वति बस्तिधौत्यादिक्रिययाऽन्तःशोधनं कुर्वन्तीत्यर्थः। एवं दैवादियज्ञान्नियमेन कुर्वतां तत्तद्यज्ञानुष्ठानस्य फलमाह—**सर्वेऽपीति**। यज्ञविदः यज्ञान् विदन्त्यनुतिष्ठन्तीति यज्ञविदो दैवादियज्ञानुष्ठायिन एते निरुक्ताः सर्वेऽपि यज्ञशिष्टामृतभुजः यज्ञानुष्ठानानन्तरभावित्वादेतेषामन्नं यज्ञशिष्टं यज्ञशिष्टत्वादेवामृतं तद्भुञ्जत इति यज्ञशिष्टामृतभुजः॥ ३०॥ यद्वा यज्ञानुष्ठानेन शिष्टो यज्ञशिष्टः नित्यत्वादमृतः कालः भोजनसंबद्धत्वादमृतशब्देन काल उच्यते। यज्ञशिष्टो योऽमृतः कालस्तस्मिन् भुञ्जत इति यज्ञशिष्टामृतभुजः सन्तो यज्ञक्षपितकल्मषाः यज्ञैर्नियमेनानुष्ठितैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः यज्ञानुष्ठाननिःशेषविनष्टज्ञानप्रतिबन्धका भूत्वा सकृदुपदेशेनैव सद्गुरोरात्मज्ञानं प्राप्य सनातनं नित्यं ब्रह्म सच्चिदानन्दैकरसं यान्ति ज्ञानानुत्पत्तौ क्रमान्मुक्ता भवन्तीत्यभिप्रायः। उक्तेषु यज्ञेष्वन्यतरं यज्ञमकुर्वतो दुःशीलस्य दुर्भगस्यानुष्ठानफलमाह—**नायमिति**। अयज्ञस्य यस्य न विद्यते यज्ञेपूक्तेष्वेकोऽपि यज्ञो मोक्षसाधनः सोऽयमयज्ञस्तस्य मोक्षधर्मशून्यस्य दुर्बुद्धेरयं लोकः लोक्यत इति लोको देहो मुक्तिसंपादनयोग्यो मानव एव नास्ति इतोऽन्यो दैवो वा ब्राह्मो वा शैवो वा कुतः कस्माद्धेतोरधर्मनिष्ठस्यासाधारणकारणसाध्यः सिध्यतीति द्वयोरर्थः॥ ३१॥

श्री० टी०—किंच—**अपान इति**। अपाने अधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूरकेण जुह्वति पूरककाले प्राणमपानेनैकीकुर्वन्ति तथा कुम्भकेन प्राणापानयोरूर्ध्वाधोगती रुद्ध्वा रेचककाले अपानं प्राणे जुह्वति एवं पूरककुम्भकरेचकैः प्राणायामपरायणा अपरे इत्यर्थः॥ २९॥ किंच—**अपर इति**। अपरे त्वाहारसंकोचमभ्यस्य-

न्तः स्वयमेव जीर्यमाणेष्विन्द्रियेषु तत्तदिन्द्रियवृत्तिलयं होमं भावयन्तीत्यर्थः । यद्वा अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे, इत्यनेन पूरकरेचकयोरावर्त्यमानयोर्हंसः सोहमित्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानेनाजपामन्त्रेण तत्त्वंपदार्थैक्यं व्यतिहारेण भावयन्तीत्यर्थः। तदुक्तं योगशास्त्रे 'सकारेण बहिर्याति हकारेण विशेत्पुनः । प्राणस्तत्र स एवाहं हंस इत्यनुचिन्तयेत् ' इति । प्राणापानगतीरुद्ध्वेत्यनेन तु श्लोकेन प्राणायामयज्ञाः अपरैः कथ्यन्ते तत्रायमर्थः—' द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्' इत्येवमादिवचनोक्तो नियत आहारो येषां ते कुम्भकेन प्राणापानगती रुद्ध्वा प्राणायामपरायणाः सन्तः प्राणानिन्द्रियाणि प्राणेषु जुह्वति कुम्भके हि सर्वे प्राणा एकीभवन्तीति तत्रैव लीयमानेष्विन्द्रियेषु होमं भावयन्तीत्यर्थः । तदुक्तं योगशास्त्रे 'यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् । वायुवाक्कायदृष्टीनां स्थिरता च तथा तथा' इति। तदेवमुक्तानां द्वादशानां यज्ञविदां फलमाह—सर्वे इति । यज्ञान्विदन्ति लभन्त इति यज्ञविदः यज्ञज्ञा इति वा । यज्ञैः क्षपितं नाशितं कल्मषं यैस्ते ॥ ३० ॥ **यज्ञशिष्टेति**। यज्ञान्कृत्वाऽवशिष्टे कालेऽनिषिद्धमन्नममृतरूपं भुञ्जत इति तथा ते सनातनं नित्यं ब्रह्म ज्ञानद्वारेण प्राप्नुवन्ति। तदकरणे दोषमाह—**नायं लोक इति** । अयमल्पसुखोऽपि मनुष्यलोकः अयज्ञस्य यज्ञानुष्ठानशून्यस्य नास्ति कुतोऽन्यः परलोकः अतो यज्ञाः सर्वथा कर्तव्या इत्यर्थः ॥ ३१ ॥

स० टी०—इदानीमाह सार्धेन प्राणायामं चतुर्विधम् ॥ जुह्वत्यपानवृत्तौ च प्राणवृत्तिं तथा परे ॥ १ ॥ पूरकाख्यं प्रकुर्वन्ति प्राणायामं सदैव ते ॥ रेचकाख्यं प्रकुर्वन्ति प्राणेऽपानमितीतरे ॥ २ ॥ मुखनासिकाभ्यां वायोर्निर्गमः प्राणिकी गतिः ॥ विपरीतमतोऽपानगमनं ते गती उभे ॥ ३ ॥ निरुध्य कुम्भकं प्राणायामं कुर्वन्ति योगिनः ॥ ४ ॥ २९ ॥ अन्ये परिमिताहारा निगृहीतेषु वायुषु ॥ विलापयन्ति ते प्राणान् ज्ञानकर्मेन्द्रियाणि च ॥ १ ॥ तदेवं सम्यगुक्तानां फलमाहाध्वराध्वनाम् ॥ सर्वेऽप्येते हि यज्ञानां ज्ञातारः साधकास्तथा ॥ २ ॥ नाशितं कल्पषं येषां यज्ञैः पूर्वोदितैः कृतैः ॥ ३ ॥ ३० ॥ यज्ञान्कृत्वावशिष्टं ये कालेऽन्नं भुञ्जतेऽमृतम् ॥ चित्तशुद्ध्यात्मसद्बोधप्राप्तिद्वारेण तेऽखिलाः ॥ १ ॥ ब्रह्मीभूता विमुच्यन्ते संसाराद्दुःखसागरात् ॥ यस्य नैकोऽपि यज्ञानामुक्तानां मध्य ऐश्वरः ॥ २ ॥ नायमल्पसुखस्तस्य नृलोकोऽप्यधमस्य नु ॥ सर्वनिन्द्यतया दुःखभागिनोऽतिदरिद्रिणः ॥ ३ ॥ कुतोऽन्यः स्वर्गमोक्षादिः साध्यो यः साधनैर्वरैः ॥ ४ ॥ ३१ ॥

भा० टी०—एकादशयज्ञमाह—**अपान इति** । अपानेऽपानप्रवृत्तौ प्राणवृत्तिमपरे जुह्वति पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। तथा प्राणेऽपानं जुह्वति रेचकाख्यं प्राणायामं कुर्वन्ति। प्राणापानयोर्मुखनासिकाभ्यां वायोर्निर्गमनाधोगमनरूपे गती रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः ॥ २९ ॥ द्वादशयज्ञमाह—**अपर इति** । नियतः परिमित आहारो येषां ते नियताहाराः सन्तः प्राणान् जिता वायुभेदान्प्राणेषु जितेषु वायुभेदेषु जुह्वति तेऽजितान् अपि तत्र प्रविष्टा जिता इव भवन्तीत्यर्थः। यत्तु अपरे त्वाहारसंकोचमभ्यस्यन्तः स्वयमेव जीर्यमाणेष्विन्द्रियेषु तत्तदिन्द्रियवृत्तिलयं होमं भावयन्तीत्यर्थः । यद्वा अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे इत्यनेन पूरकरेचकयोरावर्तमानयोर्हंसः सोहमित्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानाऽजपामन्त्रेण तत्त्वंपदार्थैक्यं व्यतिहारेण भावयन्तीत्यर्थः । प्राणापानगती इत्यनेन तु श्लोकेन प्राणायामयज्ञा अपरे कल्प्यन्ते, तत्रायमर्थः 'द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्' इत्येवमुक्तो नियत आहारो येषां ते कुम्भकेन, प्राणापानगती रुद्ध्वा प्राणायामपरायणाः सन्तः प्राणानिन्द्रियाणि प्राणेषु जुह्वति कुम्भके सर्वे प्राणा एकीभवन्ति तत्रैव लीयमानेष्विन्द्रियेषु होमं भावयन्तीति भाष्यविरुद्धं व्याचख्युस्तदुपेक्ष्यं, प्रसिद्धार्थपरित्यागबीजभूतानुपपत्त्याद्यनुप-

लब्ध्या श्रोत्रादीन्द्रियहोमस्य प्रत्याहाररूपेष्वग्निपूक्तत्वेन च पक्षान्तरे श्लोकोत्तरार्द्धस्य सत्यपि संभवे स्वपूर्वार्धेनान्वयं विहायापरपूर्वार्धेनान्वयस्यान्याय्यत्वेन पूरकरेचकयोरित्यादिग्रन्थस्याक्षरार्थत्वाभावेन च पूरकरेचककुम्भकरूपं प्राणायामं कुर्वन्तीति भाष्योक्तस्यैव सम्यक्त्वात् । एतेन प्राणानिन्द्रियाणीत्याद्यपि प्रत्युक्तं लोकाप्रसिद्धार्थकल्पनापत्तेः।अत एव प्राणेषु बाह्याभ्यन्तरकुम्भकाभ्यासनिगृहीतेषु प्राणान् ज्ञानेन्द्रियकर्मेन्द्रियरूपान् जुह्वति चतुष्कुम्भकाभ्यासेन विलापयन्तीत्यर्थः इत्यपास्तम् । इन्द्रियाणि जुह्वतीत्युक्त्या इन्द्रियनिरोधयज्ञस्याप्युपलब्ध्या प्राणायामयज्ञमाह सार्धेनेति स्वोक्तिविरोधाच्च । यदपि नियताहारा वैराग्यादिमन्तः प्राणानत्र समनस्कानीन्द्रियाणि प्राणशब्देन गृह्यन्ते द्वितीयान्तप्राणशब्देन श्रोत्रादीनि वागादीनि च गृह्यन्ते तान्प्राणान्प्राणेषु समनश्चित्ताहंकारेष्वन्तःकरणवृत्तिभेदेषु जुह्वति प्रविलापयन्ति, इन्द्रियाणि संकल्पात्मके मनसि संहृत्य मनोऽपि स्मरणात्मके चित्ते संहृत्य तदप्यहंकारे संहरन्ति स चाभिमानरूपोऽहंकारोऽभिमन्तव्याभावात् स्वयमेव दग्धेन्धनानलवत् विलीयते इत्यन्ये, तदप्यसमञ्जसं लोकाप्रसिद्धार्थकल्पनादिदोषस्यात्रापि तुल्यत्वादिति दिक् । एते सर्वेऽपि यज्ञविदो यज्ञानां ज्ञातारः कर्तारश्च यज्ञैर्यथोक्तैः क्षपिता नाशिताः कल्मषाः पापानि येषां ते ॥ ३० ॥ एवं यथोक्तान्यज्ञान्निर्वर्त्य तच्छिष्टेन कालेन यथाविधिचोदितमन्नममृताख्यं भुञ्जत इति यज्ञशिष्टामृतभुजः। यत्त्वन्ये सर्वेषामप्येतेषां मध्येऽन्यतममप्यनुष्ठातुमशक्तं प्रति प्राह—**यज्ञेति** । यज्ञाः पञ्चमहायज्ञाः तेभ्यः शिष्टमवशिष्टमन्नममृताख्यं ये भुञ्जत इत्यादि तच्चिन्त्यं, श्रुतहानेरश्रुतकल्पनायाश्चान्याय्यत्वात् । पञ्चयज्ञानामपि दैवादिश्रौतस्मार्तयज्ञेष्वन्तर्भावाच्च । ब्रह्म सनातनं मोक्षाख्यं यान्ति यथोक्तानां यज्ञानामेकोऽपि यज्ञो यस्य नास्ति सोऽयज्ञः तस्यायं लोकः सर्वप्राणिसाधारणोऽपि नास्ति शुद्धचित्तेन श्रवणादिविशिष्टसाधनलभ्योऽन्यः सर्वलोकातीत आत्मस्वरूपस्तस्य कुतः कुरुसत्तमेति संबोधयन् कुरवोऽपि यज्ञविद आसन् त्वं तु तेषु सत्तमः श्रेष्ठोऽतस्त्वया यज्ञवित्त्वमवश्यं संपादनीयमिति सूचयति ॥ ३१ ॥

प० टी०—अथान्ययज्ञत्रितयमाह—**अपान इति** । अपानेऽधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूरकेण जुह्वति । पूरककाले प्राणमपानेनैकीकुर्वन्ति । तथा कुम्भकेन प्राणापानयोरूर्ध्वाधोगती रुद्ध्वा रेचककालेऽपाने प्राणान् जुह्वति । एवं रेचकपूरककुम्भकैः प्राणवायुं वशीकुर्वन्तः प्राणायामपरायणाः प्राणायाम एव परमयनं गतिर्येषां ते । तदुक्तम्—'यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् । वायुवाक्कायदृष्टीनां स्थिरता च तथा तथा' इति । श्रुतिरप्यथर्ववल्ल्याम् " आत्मा देवानां भुवनस्य गर्भो यथा वशं चरति एष देवः । घोषा इदं यस्य शृण्वीत रूपं तस्मै वाताय हविषा विधेम " इति । भाष्यम्—तस्मै वाताय प्राणमुख्याय " वायुर्वै गौतम सूत्रं तथा वायुर्वै क्षेपिष्ठा देवता तथा वायो त्वमेव प्रत्यक्षं ब्रह्मासि " इत्यादिश्रुतेर्वाताय हिरण्यगर्भाय हविषा हविर्द्रव्येण यथोचिताहाररूपेण कृत्वा विधेम परिचरेम । विदधातिः परिचरणकर्मा । तस्मै कस्मै, यस्य इदमनुभूयमानं रूपं घोषा अनाहतध्वनयस्तथा शृण्वीत श्रवणविषयीकुर्वीत यथैष प्राणलक्षणो देवो वशं चरति वशवर्ती भवति । किंभूतो देवः देवानामात्मान्तर्यामी न केवलं देवानां भुवनस्य गर्भो बीजरूपः ॥ २९ ॥ **अपर इति** । अपरे आहारसंकोचमभ्यस्यन्तः स्वयमेव जीर्यमाणेषु प्राणेष्विन्द्रियेषु प्राणांस्तत्तदिन्द्रियरूपान् जुह्वति । अथोपसंहरति—**सर्वे इति** । सर्वेऽप्येते निरूपितप्रकारा यज्ञविदो याज्ञिका एव भवन्ति । किंभूता यज्ञक्षपितकल्मषा यज्ञैः क्षपितं कल्मषं मनोवेगलक्षणं पापं यैस्ते ॥ ३० ॥ अथ द्वादशानां यज्ञानां फलमाह—**यज्ञेति** । यज्ञानन्तरं शिष्टं विशिष्टं सर्वफलापेक्षयोत्तमं यदमृतं सोमचक्राद्गलितमात्मसुखं वा तद्भुञ्जते ते तथाविधाः सन्तः सनातनं नित्यं ब्रह्म यान्ति तदतिरिक्तं सर्वं फलं नश्वरमित्यर्थः । अथोक्तयज्ञाकरणे दोषमाह—**नायमिति** । अयज्ञस्योक्तयज्ञेष्वेकमप्यकुर्वाणस्यायं मनुष्यलोकोऽपि नास्ति कुतोऽन्यः किं पुनरुत्तमलोकः, अधमयोनिषु पततीत्यर्थः ॥ ३१ ॥

रा० टी०—अपर इति । अपरे प्राणायामपरायणाः प्राणापानगती रुद्ध्वा निरुध्य अपाने प्राणं जुह्वति तत्र प्रवेशयन्ति । प्राणे चापानं जुह्वति कुम्भकस्था एवेत्यर्थः ॥ २९ ॥ अपरे नियताहाराः सन्तः प्राणानिन्द्रियाणि श्रोत्रादीन्द्रियवृत्तीः प्राणेष्विन्द्रियेषु जुह्वति संकुचितवृत्तीन्प्राणान्कुर्वन्ति । नियताहारत्वेनेन्द्रियाणां शक्तिह्रासादिति भावः । यद्वा प्राणान्वागादीन्द्रियदेवान् मनःप्रभृत्युत्तमदेवाधीनान्ध्यायन्तीत्यर्थः । अस्मिन्पक्षे भगवत्पूजात्वेन नियताहारः पृथग्यज्ञो ज्ञातव्यः । तान्स्तौति—सर्वेप्येत इति । यज्ञविदो यज्ञज्ञाः यज्ञक्षपितकल्मषाः यज्ञानुष्ठाननाशितपापाः ॥ ३० ॥ एवं यज्ञभेदान् ज्ञात्वाताननुतिष्ठतामननुतिष्ठतां च फलभेदमाह—यज्ञेति । यज्ञे देवतायै दत्तहविःशेषोऽमृतमुच्यते तद्भुजः यज्ञानुष्ठातार इति यावत् । सनातनमनादिनित्यं ब्रह्म यान्ति प्राप्नुवन्ति अयज्ञस्य तु अयं लोकः अल्पसुखोऽपि मानुषो लोको नास्ति कुतोऽन्यः स्वर्गादिः । अतो यज्ञाः सर्वथा कार्या इति भावः ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

त० टी०—उक्तयज्ञानां प्रमाणापेक्षायां वैदिकत्वमाह—एवमिति । एवमुक्तप्रकारेण बहुप्रकारा यज्ञा ब्रह्मणो वेदस्य मुखे पूर्वकाण्डे वितता विस्तृताः । वेदद्वारेणैव ते ज्ञेयाः, वेदादेव वैदिकैः परम्परयावगन्तव्या इत्यर्थः । तान्सर्वान् कर्मजान् कायिकवाचिकमानसकर्मसमुद्भवान् विद्धि जानीहि । कर्मणामनित्यत्वेनात्मस्वरूपस्य च नित्यत्वान्न नित्यसंबन्धः, इत्येवं ज्ञात्वा विमोक्ष्यसे कर्ममयसंसारादित्यर्थः ॥ ३२ ॥

म० टी०—किं त्वया स्वोत्प्रेक्षामात्रेणैवमुच्यते नहि वेद एवात्र प्रमाणमित्याह–एवमिति । एवं यथोक्ताः बहुविधाः बहुप्रकारा यज्ञाः सर्ववैदिकश्रेयःसाधनरूपाः विततः विस्तृताः ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणैव तेऽवगता इत्यर्थः । वेदवाक्यानि तु प्रत्येकं विस्तरभयान्नोदाह्रियन्ते । कर्मजान् कायिकवाचिकमानसिकर्मोद्भवान्विद्धि जानीहि । तान्सर्वान्यज्ञानात्मजान् निर्व्यापारो ह्यात्मा न तद्व्यापारा एते किंतु निर्व्यापारोऽहमुदासीन इत्येवं ज्ञात्वा विमोक्ष्यसेऽस्मात्संसारबन्धनादिति शेषः ॥ ३२ ॥

शं० टी०—त्वत्कल्पिता एवैते यज्ञा नतु शास्त्रीया इत्याशङ्कायां न, ते वेदैकमूला इत्याह–एवमिति । दैवमेवापरे यज्ञमित्येवमाद्या बहुविधा बहुप्रकारा निरुक्ता यज्ञाः सर्वे ब्रह्मणो वेदस्य मुखे मुखेनैव विततः विस्तृताः प्रतिपादिता इत्यर्थः । ननु ‘ यज्ञविदो यान्ति ब्रह्म सनातनम् ’ इति यज्ञानामपि साक्षान्मोक्षसाधनत्वं प्रतीयते किं ज्ञानप्रयासेनेत्याशङ्कायां न, तेषामपि कर्मत्वेन “न कर्मणा न प्रजया” इत्यादिबहुश्रुतिविरोधान्न नित्यफलदातृत्वं किंत्वनित्यफलदत्त्वमिति सूचयितुमाह–कर्मजानिति । ‘क्रिया कुर्वद्धि कारकम्’ इति स्मरणात्कर्मभ्यः कर्मकारकेभ्यो जाताः कर्मजा वागादीन्द्रियसंभवास्तान् कर्मजान् कर्माण्येव तान् सर्वान् यज्ञान् विद्धि । नन्वपूर्वाः खलु यज्ञा वागादीन्द्रियव्यापारजा एवेति चेदपूर्वत्वे पूर्वत्वे वा तेषां कर्मत्वं न व्यभिचरत्यत एवानित्यफलदत्त्वमेवं ज्ञात्वा नित्यफलदं ज्ञानं प्राप्य संसारान्मोक्ष्यसे नत्वनित्यफलदान् यज्ञानित्यर्थः ॥ ३२ ॥

श्री० टी०—ज्ञानयज्ञं स्तोतुमुक्तान्यज्ञानुपसंहरति–एवमिति । ब्रह्मणो वेदस्य मुखे विततः वेदेन साक्षाद्विहिता इत्यर्थः । तथापि तान्सर्वान्वाङ्मनःकायकर्मजनितानात्मस्वरूपसंस्पर्शरहितान्विद्धि जानीहि । आत्मनः कर्मागोचरत्वादेवं ज्ञात्वा ज्ञाननिष्ठः सन्संसाराद्विमुक्तो भविष्यसि ॥ ३२ ॥

स० टी०—एवं बहुप्रकारास्ते वेदद्वारेण विस्तृताः ॥ यज्ञा अवगतास्तांस्त्वं यज्ञाञ्जानीहि सर्वकान्

॥ १ ॥ कायवाङ्मनसामेव कर्मभ्यो हि समुद्भवान् ॥ नत्वात्मजान्यतश्चात्मा निर्व्यापारश्चिदद्वयः ॥ २ ॥ मद्व्यापारा न चैवैते निर्व्यापारोऽहमक्षरः ॥ देहेन्द्रियादयः सर्वे क्रियाधारा जडाश्चलाः ॥ ३ ॥ मय्यक्रिये चिदानन्दे कल्पिताः खे यथा मलाः ॥ नह्यध्यस्तस्य दोषेण गुणेनास्ति मनागपि ॥ ४ ॥ लेपोऽधिष्ठानचिद्धातोर्ममाद्वैतस्य सर्वथा ॥ एवं ज्ञात्वैव संसारबन्धनात्त्वं विमोक्ष्यसे ॥ ५ ॥ ३२ ॥

भा० टी०—उक्तानां यज्ञानां वेदमूलत्वेनाप्रामाण्यशङ्कां वारयति—**एवमिति** । बहुविधा बहुप्रकारा यज्ञाः ब्रह्मणो वेदस्य मुखे द्वारे वितता विस्तीर्णाः वेदद्वारेणावगम्यमानाः तान्सर्वान्कायिकवाचिकमानसकर्मोद्भवान् विद्धि । निर्व्यापारो ह्यात्मा न ममात्मस्वरूपस्योदासीनस्य व्यापारा एते इत्येवं ज्ञात्वाऽस्मात्संसारबन्धनान्मोक्ष्यसे ॥ ३२ ॥

प० टी०—अथ ज्ञानयोगं स्तोतुमन्यान्यज्ञानुपसंहरति—**एवमिति** । एवममुना प्रकारेण ब्रह्मणो मुखे ब्रह्ममुखान्निःसृते वेदे बहुविधा वितता विस्तृता विस्तारेण कथिताः सन्ति, तान् सर्वान् कर्मजान् विद्धि कर्मणा कृत्वा निष्पन्नान् जानीहि । तस्मात् कर्म कर्तव्यमेव । एवं कर्मणि कृते सति चित्तशुद्धिद्वारा ज्ञात्वा ज्ञानमुत्पाद्य विमोक्ष्यसे मोक्षं प्राप्नोषि ॥ ३२ ॥

रा० टी०—उक्तान्कर्मभेदानुपसंहरति—**एवमिति** । एवं दैवमेवेत्यादिना श्लोकषट्केनोक्तदिशा मानसिकवाचिकभेदेन बहुप्रकाराः यज्ञाः ब्रह्मणो हरेर्मुखे वितता विस्तृताः तस्य सर्वयज्ञभोक्तृत्वात् । अहं हि सर्वयज्ञानां भोक्तेत्यादेः श्रोत्रादीत्यादिनोक्तेन्द्रियनियमनादिरूपयज्ञेषु तदाराध्यस्यानुक्तेर्ब्रह्मणोऽन्यस्तदाराध्य इति शङ्कानिरासाय ब्रह्मणो मुखे वितता इत्युक्तम् । ननु यज्ञानां बहुविधत्वे ज्ञानयज्ञादिनैवालं किं कर्मात्मकेन युद्धेनेत्यत आह—**कर्मजानिति** । तान्प्रागुक्तान्सर्वान्यज्ञान्कर्मजान्कर्मरूपान्विद्धि जानीहि मानसवाचिककायिककर्मजान्विद्धीति वार्थः । ततः किमित्यत आह—एवमिति । मानसिकवाचिकादिसर्वयज्ञाः कर्मात्मका इति जानासि चेत् तर्हि युद्धादिस्वविहितकर्माणि कृत्वैव विमोक्ष्यसे संसारादात्मानं मोक्तु (मोचयितु) मिच्छसि । सर्वेषां कर्मजत्वज्ञाने सति मोक्षार्थं युद्धादिकं कर्तव्यमिति तवैवेच्छा भविष्यतीत्यर्थः । सर्वेषां यज्ञत्वे ज्ञानोपासनस्वाध्यायाद्यकर्मरूपयज्ञेनैव भगवत्प्रीतिसिद्धेः किं कर्मात्मकयुद्धेनेति पार्थाभिप्रायस्येदमुत्तरं ज्ञात्वेति । तस्यायं भावः, युद्धं हित्वा मोक्षार्थं यदुपासनादिकं करिष्यसि तदपि कर्मात्मकमेव । तथाच युद्धत्यागे विहितधर्मत्याग एव कृतः स्यात् नतु कर्मत्यागः । अत एवं जानतः तव विहितं युद्धादिकं न त्याज्यमिति । एवमभिप्रायाभावे कर्मजानित्यर्धस्य प्रकृतानुपयोगः स्यात् । ननु सत्यमेवमथाप्ययमर्थो लुडन्तशब्देन कथं लभ्यते इति चेत्, नायं लुडन्तः किंतु मुचॢ मोक्षण इत्यतः सन्नन्तात्कर्मकर्तरि लट्प्रत्यये सति विमोक्ष्यस इति रूपम् । यद्यपि धातोः कर्मण इति सन्प्रत्यये सन्यङोरिति द्विर्वचने हलन्ताच्चेति सनः कित्वेन गुणाभावे च मुमुक्ष्येति भाव्यं तथापि गुणाभ्यासलोपौ छान्दसावित्युपेत्य सन्नन्तान्मोक्षशब्दाद्वर्तमाने लडिति लट्प्रत्यये तस्य सिबादेशे कर्मवत्कर्मणा तुल्यक्रिय इतिसूत्रेण कर्तुः कर्मवद्भावे कर्मकारकनिमित्तयगात्मनेपदचिण्वद्भावादिकार्याणि लभत इत्युक्तेर्यकि सत्यतो लोपे मोक्ष्यस इति रूपसिद्धिर्ज्ञेया । लुडन्तत्वपक्षे त्वयमर्थः सर्वेषां कर्मजत्वं ज्ञात्वा तान्यनुष्ठाय मुक्तो भविष्यसीति ॥ ३२ ॥

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

त० टी०—सर्वेषां तुल्यवन्निर्देशाज्ज्ञानयज्ञस्यापि तदन्तर्गणनात्तत्साम्यापत्तिं वारयन्नाह—**श्रेयानिति** । हे परन्तप द्रव्यमयाद्दैवादिरूपात्तदुपलक्षिताज्ज्ञानहीनादल्पफलकात्सर्वस्माद्यज्ञाज्ज्ञानयज्ञः

श्रेयान् प्रशस्यतरः । तत्र हेतुः सर्वं कर्म साङ्गोपाङ्गमखिलं हेतुफलसहितं ज्ञाने तत्त्वंपदार्थस्वरूप-गुणसंबन्धविषयकानुभवे परिसमाप्यते अन्तर्भवतीति "सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति श्रुतेः । श्रीभागवतेऽपि 'तपस्तीर्थं जपो दानं पवित्राणीतराणि च । नालंकुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता' इति ॥ ३३ ॥

म० टी०—सर्वेषां तु तुल्यवन्निर्देशात्कर्मज्ञानयोः साम्यप्राप्तावाह—**श्रेयानिति** । श्रेयान्प्रशस्यतरः साक्षान्मोक्षफलत्वात् द्रव्यमयात्तदुपलक्षितात् ज्ञानशून्यात्सर्वस्मादपि यज्ञात्संसारफलात् ज्ञानयज्ञ एक एव हे परन्तप कस्मादेवं यस्मात् सर्वं कर्म इष्टिपशुसोमचयनरूपं श्रौतम् अखिलं निरवशेषं स्मार्तमुपासनादिरूपं च यत्कर्म तत् ज्ञाने ब्रह्मात्मैक्यसाक्षात्कारे समाप्यते प्रतिबन्धक्षयद्वारेण पर्यवस्यति "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति "धर्मेण पापमपनुदति" इति च श्रुतेः । सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति न्यायाच्चेत्यर्थः ॥ ३३ ॥

शं० टी०—तत एव ज्ञानयज्ञं ब्रह्मार्पणम् इत्यनेन मन्त्रेण वर्णितं दैवादिभ्यो यज्ञेभ्यो व्यवहित-साधनेभ्यः साक्षान्मोक्षैकसाधनत्वादुत्कर्षयति—**श्रेयानिति** । द्रव्यमयात् द्रव्यमन्त्रतन्त्रक्रियाश्रमसाध्याद-नित्याल्पस्वर्गादिफलहेतोर्यज्ञादुक्तात्सर्वयज्ञजातान्नित्यनिरन्तरानन्दरूपमोक्षैकफलदो ज्ञानयज्ञः श्रेयान् श्रेष्ठ-तरसंप्राप्तिः । यत्र ज्ञाने पुंसः कर्तव्यं श्रौतं स्मार्तं लौकिकं यच्च यावच्च तत्सर्वं कर्माखिलं खिलः शेषः स न विद्यते यत्र तदखिलं निःशेषं परिसमाप्यते समापितं भवति । वेलां प्राप्तस्य यथा गन्तव्यं नास्ति तथा ज्ञानं प्राप्तवतः कर्तव्यं किंचिन्नास्तीत्यर्थः । यद्वा यत्र ज्ञाने संप्राप्ते कर्म ब्रह्मकल्पशतार्जितं संचितमागामि च प्रवृत्तमप्रवृत्तं च सर्वमखिलं निरवशेषं परिसमाप्यते ज्ञानशक्त्या सूर्यप्रभया तम इव कर्म सर्वं निर्मूल्यत इत्यर्थः । यद्वा "यथा कृतायविजितायाधरेयाः संयन्ति" इत्येतच्छ्रुत्युक्तरीत्या लोके सर्वत्र पुण्यश-रीरिभिर्यज्ञदानतपोव्रतादिरूपं यद्यत्पुण्यं क्रियते तत्सर्वं यस्मिन् ज्ञाने संप्राप्ते विदुषा परिसमाप्यते संप्राप्तं भवति यत्प्राप्त्या सर्वकर्मणामनुष्ठाता विद्वान् भवतीत्यर्थः ॥ ३३ ॥

श्री० टी०—कर्मयज्ञाज्ज्ञानयज्ञस्तु श्रेष्ठ इत्याह—**श्रेयानिति** । द्रव्यमयादनात्मव्यापारजन्याद्दैवादियज्ञा-ज्ज्ञानयज्ञः श्रेयान्श्रेष्ठः । यद्यपि ज्ञानयज्ञस्यापि मनोव्यापाराधीनत्वमस्त्येव तथाप्यात्मरूपस्य ज्ञानस्य मनः-परिणामेऽभिव्यक्तिमात्रं नतु तज्जन्यत्वमिति द्रव्यमयाद्विशेषः श्रेष्ठत्वे हेतुः । सर्वं कर्माखिलं फलसहितं ज्ञाने परिसमाप्यते अन्तर्भवतीत्यर्थः । "सर्वं तदभिसमेति यत्किंचित्प्रजाः साधु कुर्वन्ति" इति श्रुतिः ॥ ३३ ॥

स० टी०—उक्तैर्बहुविधैर्यज्ञैर्ज्ञानाख्यः स्तूयतेऽध्वरः ॥ द्रव्यसाधनसाध्याच्च सर्वस्माज्ज्ञानवर्जितात् ॥१॥ संसारफलकाद्यज्ञाज्ज्ञानयज्ञोऽधिकोत्तमः ॥ समस्तं वैदिकं कर्माखिलं स्मार्तमुपासनम् ॥ २॥ ब्रह्मात्मैक्याव-बोधे तत्पर्यवस्यति सर्वथा ॥ प्रतिबन्धक्षयद्वारा ज्ञानयज्ञस्ततो वरः ॥ ३ ॥ ३३ ॥

भा० टी०—कर्मजान्विद्धि तान्सर्वानित्युक्त्या सर्वेषु ज्ञानयज्ञस्याप्युक्तत्वात् इतरसाम्यमाशङ्क्याह—**श्रेयानिति** । देहेन्द्रियादिद्रव्यसाध्यात्संसारफलात् द्रव्ययज्ञात् ज्ञानयज्ञो मोक्षफलकोऽतिशयेन श्रेष्ठः । पर-न्तपेति संबोधयन् चित्तशुद्ध्या ज्ञानं लब्ध्वाऽज्ञानात्मकं शत्रुं तापयितुं मारयितुं समर्थो भविष्यसि न कर्म-मात्रेणेति सूचयति । तत्र हेतुमाह—सर्वमग्निहोत्रादिकं कर्मोक्तद्वादशयज्ञात्मकम् । सर्वमिति प्रकरणात्संकोचमाश-ङ्क्याह—अखिलमुक्तानुक्तं श्रौतस्मार्तमुपासनादिरूपं ज्ञाने तत्त्वसाक्षात्कारे मोक्षसाक्षात्कारे मोक्षसाधने परि-समाप्यतेऽन्तर्भवति 'यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' इत्युक्तत्वात् । यद्वा प्रतिबन्धक्षयद्वारेण पर्यवस्यति "तमेतं वेदानुवचनेन विविदिषन्ति यज्ञेन" इत्यादिश्रुतेः। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदितिन्यायाच्चेत्यर्थः । अस्मिन्पक्षे निष्कामकर्मणामेव तत्र विनियोगात्सर्वं क-

माँखिलमिति संकोचनिवारकयोः सर्वाखिलपदयोरन्यतरस्य प्रयोजनं चिन्त्यं, यथा युधिष्ठिरभीमसेनयोरपि पार्थेत्यस्मिन्नन्तर्भावस्तथा " एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इतिश्रुत्या ज्ञानकण्डाफले तत्त्वसाक्षात्कारे इतरकाण्डफलस्यान्तर्भाव इति ध्वनयन्नाह—पार्थेति ॥ ३३ ॥

प० टी०—ज्ञानयोगं स्तौति—**श्रेयानिति**। द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः श्रेयान् द्रव्यं स्वर्गादिविषयभोगलक्षणं तन्मयस्तत्प्रसादको यो यज्ञस्तस्माज् ज्ञानयज्ञः श्रेयानतिशयेन श्रेयःसाधकः परमसुखप्रापकः। अथैतदेव विविच्य कथयति—**सर्वमिति**। कर्म द्वेधा खिलमखिलं चेति। तत्र खिलं दुष्टफलजनकमखिलं ज्ञानजनकमेवं सर्वमखिलं कर्म ज्ञाने परिसमाप्यते ज्ञाने पर्यवसितं भवति। खिलं तु तद्विपरीतमज्ञानपर्यवसायीत्यर्थः ॥ ३३ ॥

रा० टी०—उक्तयज्ञेषु को यज्ञः श्रेष्ठ इति जिज्ञासायामाह—**श्रेयानिति**। द्रव्यमयादिति प्रागुक्तयज्ञान्तराणामुपलक्षणम्। देवतोद्देशेन द्रव्यत्यागादिरूपाद्यज्ञाद्भगवज्ज्ञानसंपादनरूपो यज्ञः श्रेयान् श्रेष्ठः। कुत इत्यत उक्तम्—**सर्वमिति**। अखिलं खिलं सशेषं न भवतीत्यखिलं 'समुद्रं मनसा ध्यायीत' इत्यादिकर्मसमृद्ध्यर्थोपासनाद्यङ्गसंहितं सर्वं कर्म ज्ञाने परिसमाप्यते पूर्यते। ज्ञाने जाते ज्ञानलक्षणफलेन सफलं भवतीत्यर्थः। यद्वा आखिलमिति विभागः आसमन्तात् खिलमल्पमत्यल्पमपि सर्वं कर्म ज्ञाने जाते परिसमाप्यते फलवद्भवतीत्यर्थः ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

त० टी०—एवंभूतज्ञानप्राप्तिः केनोपायेन स्यादित्यपेक्षायामाह—**तद्विद्धीति**। तत्सर्वकर्मविलक्षणं सर्वफलदं ज्ञानं विद्धि लभस्व, उक्तज्ञानवतां प्रणिपातेन श्रद्धाभक्तिपूर्वकदण्डवत्प्रणामेन। ततश्च कोऽहं किंस्वरूपः कथं बद्धोऽस्मि कथं वा मुच्येयं को वा मे नियन्तेत्यादिपरिप्रश्नेन बहुविधसंदेहविषयेण प्रश्नेन सेवया शुद्धभावेन शुश्रूषया च प्रसादाभिमुखा ज्ञानिनः शास्त्रजन्यपरोक्षानुभववन्तः, तत्त्वदर्शिनः शास्त्रार्थभूततत्त्वसाक्षात्काराश्रयास्ते तुभ्यं ज्ञानं जीवेश्वरस्वरूपयाथात्म्यमुपदेक्ष्यन्ति, समीचीनयुक्तिप्रमाणैः संदेहनिवर्तनेन संपादयिष्यन्ति। तत्त्वदर्शिभिरेवोपादिष्टे ज्ञाने सर्वं कर्मान्तर्भवति, नत्वन्योपादिष्टे इत्यर्थः। एतेन " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति श्रुत्यर्थो दर्शितः। बहुवचनं चात्र यद्येकस्माद्गुरोः सम्यग्ज्ञानालाभश्चेत्तर्ह्यन्यस्मात्तत्त्वदर्शिन उक्तरीत्यैवोपादेयम्। तत्रापि संदेहावशेषेऽन्यस्माद्ग्राह्यमित्येतदर्थम्। एकस्मादेव कृतार्थतायां नेतरापेक्षेति विवेकः ॥ ३४ ॥

म० टी०—एतादृशज्ञानप्राप्तौ कोऽतिप्रत्यासन्न उपाय इति उच्यते—**तद्विद्धीति**। तत्सर्वकर्मफलभूतं ज्ञानं विद्धि लभस्व आचार्यानभिगम्य तेषां प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कोऽहं कथं बद्धोऽस्मि केनोपायेन मुच्येयमित्यादिपरिप्रश्नेन बहुविषयेण प्रश्नेन सेवया सर्वभावेन तदनुकूलकारितया एवं भक्तिश्रद्धातिशयपूर्वकेणावनतिविशेषेणाभिमुखाः सन्त उपदेक्ष्यन्ति उपदेशेन संपादयिष्यन्ति ते तुभ्यं ज्ञानं परमात्मविषयं साक्षान्मोक्षफलं ज्ञानिनः पदवाक्यन्यायादिमाननिपुणाः तत्त्वदर्शिनः कृतसाक्षात्काराः साक्षात्कारवद्भिरुपदिष्टमेव ज्ञानं फलपर्यवसायि नतु तद्रहितैः पदवाक्यमाननिपुणैरपीति भगवतो मतं, " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति श्रुतिसंवादि। तत्रापि श्रोत्रियमधीतवेदं ब्रह्मनिष्ठं कृतब्रह्मसाक्षात्कारमिति व्याख्यानात्। बहुवचनं चेदमाचार्यविषयमेकस्मिन्नपि गौरवातिशयार्थं नतु बहुत्वविवक्षया एकस्मादेव तत्त्वसाक्षात्कारवत आचार्यात्तत्त्वज्ञानोदये सत्याचार्यान्तरगमनस्य तदर्थमयोगादिति द्रष्टव्यम् ॥ ३४ ॥

शं० टी०—एवंविशेषणविशिष्टं ज्ञानं कथं मे सिध्येदित्याकाङ्क्षायामाह—तद्विद्धीति । यत्तु द्रव्ययज्ञादिभ्यो विशिष्टतरं साक्षान्मोक्षैकफलप्रदं तज्ज्ञानं गुरुभ्यो विद्धि । गुरून् प्रसाद्य तेभ्यो विजानीहीत्यर्थः । केन प्रसन्ना भूत्वा गुरवोऽत्यन्तरहस्यमिदं ज्ञानं मह्यमुपदेक्ष्यन्तीत्याकाङ्क्षायामाह—प्रणिपातेनेति । प्रणिपातेन प्रणिपातः साष्टाङ्गनमस्कारस्तेन सेवया काले काले श्रद्धाभक्तिभ्यां क्रियमाणशुश्रूषया च समये विनयेनोपसङ्गम्य क्रियमाणपरिप्रश्नेन ' कथं बन्धः कथं मोक्षो विद्याविद्ये उभे च के । क आत्मा कः परात्मा च तयोरैक्यं कथं वद ' इत्यादिविवेकप्रश्नेन चैवं प्रणिपातशुश्रूषाविवेकप्रश्नैस्त्वयि श्रद्धां भक्तिं पाण्डित्यमुपदेशयोग्यतां च दृष्ट्वा प्रसन्ना भूत्वा ज्ञानिनः शास्त्रजन्यज्ञानसंपत्तिमन्तस्तत्त्वदर्शिनः साक्षात्कारजन्यवस्तुयाथात्म्यवेदनवन्तश्चोक्तविशेषणद्वयविशिष्टैरुपादिष्टं ज्ञानं संसारनिवर्तकं भवत्यतो विशेषणद्वयेन भवितव्यं गुरोरेवं लक्षणसंपन्ना गुरवस्ते तुभ्यं शमदमादिसाधनवते ज्ञानं ब्रह्मात्मैकत्वावगमकं निःशेषसंसारभ्रमापनोदकमुपदेक्ष्यन्ति दययाऽनुग्रहीष्यन्तीत्यर्थः । " श्रोत्रियं ब्रह्मनिष्ठम् " इतिश्रवणाज्ज्ञानिन इति तत्त्वबोधने गुरूणां सर्वशास्त्रार्थपरिज्ञानसंपत्तिं तत्त्वदर्शिन इति वस्तुविषयकाऽप्रतिबद्धानुभवसंपत्तिमपेक्ष्य विशेषणद्वयोपन्यासः । बहुवचनं तु ' बहुभ्यः श्रोतव्यं बहुधा ' इतिन्यायमनुसृत्य च सत्सु बहुषु गुरुष्वत्र कश्चिदेको ब्रह्मवित्तमो लभ्यते ततः संसारभ्रमापनोदकं सम्यग्ज्ञानं सलक्षणं सेत्स्यतीत्यभिप्रायेण चोक्तं नतु बहुभ्यो ज्ञानं संपादनीयमिति " श्रोत्रियं ब्रह्मनिष्ठम् " इत्येकवचनश्रवणात् ' उपसीदेदेकमेव सद्गुरुं ब्रह्मवित्तमम् ' इतिवचनाच्च । तस्माच्छास्त्रज्ञं तत्त्वज्ञं च गुरुमाश्रयेदिति सिद्धम् ॥ ३४ ॥

श्री० टी०—एवंभूतात्मज्ञाने साधनमाह—तद्विद्धीति । तज्ज्ञानं विद्धि प्राप्नुहि ज्ञानिनां प्रणिपातेन दण्डवन्नमस्कारेण ततः परिप्रश्नेन कुतोऽयं मम संसारः कथं वा निवर्तेत इतिप्रश्नेन सेवया शुश्रूषया च ज्ञानिनः शास्त्रज्ञास्तत्त्वदर्शिनः अपरोक्षानुभवसंपन्नाश्च ते तुभ्यं ज्ञानमुपदेशेन संपादयिष्यन्ति ॥ ३४ ॥

स० टी०—तादृशज्ञानसंप्राप्तावुपायः प्रोच्यतेऽधुना ॥ अभिगम्य त्वमाचार्यांस्तज्ज्ञानं मोक्षसाधनम् ॥१॥ लभस्व येन विधिना प्राप्यते तं त्वमाश्रय ॥ नमस्कारेण दीर्घेण दैशिकानां महात्मनाम् ॥ २ ॥ कोऽहं कथमहं बद्धो मुच्येयं कथमञ्जसा ॥ का विद्या कास्त्यविद्या वेत्यादिप्रश्नैरनेकधा ॥ ३ ॥ सेवया सर्वभावेन गुरूणां हितरूपया ॥ एवं तेऽभिमुखाः सन्तो भक्तिश्रद्धादिभिर्गुणैः ॥ ४ ॥ तुभ्यं संपादयिष्यन्ति ज्ञानं ब्रह्मैक्यगोचरम् ॥ उपदेशेन साक्षाद्यन्मोक्षसाधनमुत्तमम् ॥ ५ ॥ पदवाक्यप्रमाणज्ञा ब्रह्मयाथात्म्यदर्शिनः ॥ सम्यग्दर्शिभिरेवेदमुपदिष्टं यथाविधि ॥ ६ ॥ फलपर्यवसायि स्याज्ज्ञानं नत्वज्ञपण्डितैः ॥ एकस्मिन्नपि चाचार्ये गौरवातिशयाय तत् ॥ ७ ॥ बहुत्वं ज्ञानिनश्चेति न बहुत्वविवक्षया ॥ ८ ॥ ३४ ॥

भा० टी०- तदेतत्सर्वोत्तमं ज्ञानं तर्हि केन साधनेन लभ्यत इत्याह—तदिति । यत्र सर्वकर्मफलमन्तर्भवति तज्ज्ञानं विद्धि जानीहि । येन विधिना प्राप्यत इति विद्धि लभस्वेत्यर्थस्तु अदादेर्ज्ञानार्थत्वात् मुख्ये संभवति अमुख्यस्यान्याय्यत्वादाचार्यैर्न प्रदर्शितः । आचार्यानभिगम्य प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारः तेन कथं बन्धः कथं मोक्षः कस्य केन विमुच्यते विद्याविद्ये कथंभूते कोऽहं दृश्यमिदं च किमिति परिप्रश्नेन सेवया गुरुशुश्रूषया गुर्वाभिमुख्यसंपादिकया मायाविनिर्मुक्तया इत्येवमादिना प्रश्नयेण प्रसादिता गुरवो ज्ञानिनः न्यायविचारपूर्वकवेदार्थज्ञाः तत्त्वदर्शिनः तत्त्वसाक्षात्कारवन्तः ते ज्ञानमुपदेक्ष्यन्ति ' पदवाक्यप्रमाणज्ञैः सम्यक्तत्त्वविलोकिभिः । उक्ताज्ज्ञानाद्भवेत्कार्यं नान्यैरिति हरेर्मतम् ' तथाच श्रुतिः " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति । बहुवचनं त्वादरार्थमिति बोध्यम् ॥ ३४ ॥

प० टी०—एवंभूतात्मज्ञाने साधनमाह—**तद्विद्धीति** । द्वाभ्याम् । तत्त्वदर्शिनो ज्ञानिनोऽपरोक्षसाक्षात्कारवन्तस्ते तुभ्यं ज्ञानमुपदेक्ष्यन्ति तद्विद्धि तादृशं जानीहि ॥ ३४ ॥

रा० टी०—कर्मणो ज्ञानमधिकमित्युक्त्वा तत्संपादयेत्याह—**तदिति** । तस्माज्ज्ञानस्याधिकत्वात्कर्मणां ज्ञानेनैव फलवत्त्वादिति वा तत्त्वदर्शिनो ज्ञानिनः प्रणिपातेन त्वत्कृतवन्दनेन त्वत्सेवया त्वत्कृतपरिप्रश्नेन च ते तुभ्यं ज्ञानं ज्ञानजनकं शास्त्रमुपदेक्ष्यन्ति तेभ्यस्तज्ज्ञातव्यमर्थं विद्धि जानीहि । तदित्यस्यावृत्तिः । अर्जुनस्य ज्ञानित्वेऽपि ज्ञानतिरोभावनिवृत्त्यर्थं विद्धीत्युक्तिः पार्थं प्रति ज्ञानोपदेशार्थमेव कृष्णस्य प्रवृत्तत्वात् । नत्वेवाहमित्यादिना संक्षेपेणोपादिष्टत्वात्, ज्ञानं तेऽहं सविज्ञानमित्यादिना विस्तरेणोपदेक्ष्यमाणत्वात्, तदविरोधायोपदेक्ष्यन्तीत्यस्योपदेक्ष्याम इत्यर्थो ज्ञेयः ॥ ३४ ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

त० टी०—एवंभूतमाहात्म्यस्य ज्ञानस्येहापि यत्फलं तद्दर्शयति—**यदिति** । यत्तत्त्वदर्शिभिरुपदिष्टं ज्ञानं ज्ञात्वा सम्यगवधार्य पुनर्मोहमन्तःकरणविभ्रमम्, एवं यथा यानेव हत्वा न जिजीविषामः, इत्याद्युक्तप्रकारेण न यास्यसि प्राप्स्यसि । कुतस्तत्राह—येन ज्ञानेन भूतानि बन्धुसुहृदादीनि, अशेषेण देवमनुष्यतिर्यगन्तानि सर्वाणि आत्मनि त्वंपदार्थे द्रक्ष्यसि आत्मतुल्यतया ज्ञास्यसि । वैषम्यं तु प्रकृतिकार्यशरीरनिष्ठम्, आत्मा तु ज्ञानस्वरूपत्वेन सर्वत्र देहेषु सम एवातो न मत्तः कश्चिद्विलक्षणोऽस्तीति निश्चेष्यसीत्यर्थः। अथोऽनन्तरं मयि सर्वात्मनि तत्पदार्थे वासुदेवे भगवति सर्वाणि भूतान्यशेषेण द्रक्ष्यसि, आत्मनां सर्वेषां मदात्मकत्वमदधीनत्वमद्व्याप्यत्वमदाधेयत्वादिना बन्धे मोक्षे च मत्तोऽन्यत्रावस्थित्यभावादित्यर्थः ॥ ३५ ॥

म० टी०—एवमतिनिर्बन्धेन ज्ञानोत्पादने किं स्यादत आह—**यदिति** । यत्पूर्वोक्तं ज्ञानमाचार्यैरुपदिष्टं ज्ञात्वा प्राप्य ओदनपाकं पचतीतिवत्तस्यैव धातोः सामान्यविवक्षया प्रयोगः । न पुनर्मोहमेवं बन्धुवधादिनिमित्तं भ्रमं यास्यसि हे पाण्डव । कस्मादेवं यस्मात् येन ज्ञानेन भूतानि पितृपुत्रादीनि अशेषेण ब्रह्मादिस्तम्बपर्यन्तानि स्वाविद्याविजृम्भितानि आत्मनि त्वयि त्वंपदार्थे अथो अपि मयि भगवति वासुदेवे तत्पदार्थे परमार्थतो भेदरहिते अधिष्ठानभूते द्रक्ष्यस्यभेदेनैव अधिष्ठानातिरेकेण कल्पितस्याभावात् । मां भगवन्तं वासुदेवमात्मत्वेन साक्षात्कृत्य सर्वाज्ञाननाशेन तत्कार्याणि भूतानि न स्थास्यन्तीति भावः ॥३५॥

शं० टी०—सद्गुरूपदेशेन लब्धज्ञानस्य फलमाह—**यज्ज्ञात्वेति** । प्रसन्नैर्ब्रह्मविद्भिरुपदिष्टं यज्ज्ञानं ज्ञात्वा तदेकनिष्ठया प्राप्य त्वमेवमिदानीं यथा तथा पुनर्मोहमहमेते मदीया इत्यात्मन्यद्वितीये त्वनेकत्वभ्रमं न यास्यसि स्वमहमिदमद इत्यादिमिथ्याज्ञानं त्यक्ष्यसीत्यर्थः । ननु सति द्वैतज्ञानहेतौ भूतजाते कथमात्मनोऽद्वितीयत्वमित्यत आह—**येनेति** । आत्मैवेदं सर्वमिति सर्वस्य भूतजातस्यात्ममात्रत्वग्राहकेण येन सूक्ष्मबुद्धया समधिगतेन ज्ञानेन भूतानि ब्रह्मादिस्तम्बपर्यन्तान्यशेषेणाशेषाणि साक्षादहमेवेदं सर्वमिति स्वाभिन्नानि द्रक्ष्यसि घटकलशशरावादि सर्वं बुद्धिसौक्ष्म्येण मृण्मात्रं चित्रं भित्तिमात्रं तरङ्गफेनबुद्बुदादि जलमात्रं यथा तथा भूतजातं सर्वं स्वमात्रमेव द्रष्टासीत्यर्थः । ननु तथापि ब्रह्मात्मा चेति भेदोऽस्त्येव कथमद्वैतसिद्धिरित्यत आह—**अथो मयीति** । तानि भूतानि मयि निर्विशेषे परे ब्रह्मण्यप्यथो समनन्तरमेव द्रक्ष्यसि चैवं तव च मम च सर्वात्मकत्वं दृष्ट्वा द्वयोरप्येकत्वं द्रक्ष्यसीत्यर्थः । "तत्त्वमसि" इतिश्रुतेः । यद्वा सर्वभूतात्मकमात्मानं दृष्ट्वा तमात्मानं निर्विशेषं मयि सर्वाधिष्ठाने परे ब्रह्मणि द्रक्ष्यसि ब्रह्माभिन्नमात्मानं द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

श्री० टी०—ज्ञानफलमाह—यज्ज्ञात्वेति सार्धैस्त्रिभिः । यज्ज्ञानं ज्ञात्वा प्राप्य पुनर्बन्धुवधादिनिमित्तं मोहं न प्राप्स्यसि । तत्र हेतुः येन ज्ञानेन भूतानि पितृपुत्रादीनि स्वाविद्यारचितानि स्वात्मन्येवाभेदेन द्रक्ष्यासि अथो अनन्तरमात्मानं मयि परमात्मन्येवाभेदेन द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

स० टी०—एवमत्याग्रहेणात्मज्ञानस्योत्पादने सति ॥ फलमाह कृपासिंधुर्वासुदेवो जगद्गुरुः ॥ १ ॥ उपदिष्टं परात्मैक्यज्ञानं ब्रह्मात्मदर्शिभिः ॥ प्राप्य त्वं बन्धुविच्छेदनिमित्तं मोहमाधिदम् ॥ २ ॥ पाण्डुपुत्र कदाचिन्न भूयो यास्यसि पूर्ववत् ॥ येन ज्ञानेन भूतानि ब्रह्मादीन्यप्यशेषतः ॥ ३ ॥ स्वाविद्याकार्यभूतानि त्वंपदार्थे त्वमात्मनि ॥ मयीशे तत्पदार्थेऽपि वस्तुतो भेदवर्जिते ॥ ४ ॥ अधिष्ठाने ह्यभेदेन द्रक्ष्यस्यात्ममयानि च ॥ अधिष्ठानातिरेकेण कल्पितस्याप्यभावतः ॥ ५ ॥ साक्षात्कृत्यात्मरूपेण वासुदेवं हि मां हरिम् ॥ ध्वस्तेऽज्ञाने च तत्कार्ये न स्थास्यति जगद्भ्रमः ॥ ६ ॥ ३५ ॥

भा० टी०—ज्ञानफलमाह—यदिति यत्तैरुपदिष्टं ज्ञानं ज्ञात्वा लब्ध्वा। यत्तु यच्चिन्मात्रस्वरूपं ब्रह्म ज्ञात्वेति तन्न पूर्वप्रस्तुतज्ञानपरामर्शेनार्थसंभवे यच्छब्देनाप्रस्तुतपरामर्शस्यान्याय्यत्वात् । एवमिदानीमिव पुनर्मोहं न यास्यसि न प्राप्स्यसि । किंच न केवलं स्वसंबन्धिनिबन्धनमेव मोहं यास्यस्यपि तु सर्वभूतनिबन्धनमित्याह—येन ज्ञानेनाशेषेण सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि मयि प्रत्यगात्मनि कल्पितानीति स्वस्मिन्साक्षाद्द्रक्ष्यसि । अथो मयि वासुदेवे परमेश्वरे चेमानीति प्रत्यगात्मैकत्वं सर्ववेदान्तेषु प्रसिद्धं द्रक्ष्यसीत्यर्थः । अथो अनन्तरमात्मानं मयि परमात्मन्यभेदेनेति वा अस्मिन्पक्षेऽध्याहारदोषः परिहर्तव्यः । यद्वाऽथो अपि च येन ज्ञानेन भूतान्यात्मनि मयि त्वंपदलक्ष्यार्थादनन्यभूते इति अस्मिन्पक्षे सति संभवेऽथोशब्दस्य दूरान्वयोऽयुक्त इति ध्येयम् । पाण्डवेति संबोधयन् यथाधुनाऽहं पाण्डुपुत्र एते मदीया इत्यहंकारममकाराभ्यां मोहं गतोऽसि तथा ज्ञानं तन्मूलोच्छेदकं लब्ध्वा न यास्यसीति द्योतयति ॥ ३५ ॥

प० टी०—कीदृशमित्याह—यदिति । एवमुक्तप्रकारेण यज्ज्ञात्वा न पुनर्बन्धादिविषादरूपं मोहं यास्यसीति । अथ तस्य ज्ञानस्य मोहनिवर्तकत्वमाह—येनेति । येनाशेषेण सर्वात्मकस्वरूपेण ज्ञानेन कृत्वा भूतानि पितृपुत्रसुहृद्बन्ध्वादीनि मय्यात्मनि व्यापके समष्टिरूपेण पश्यसि ॥ ३५ ॥

रा० टी०—स्वेनोपदेक्ष्यमाणं ज्ञानं स्तौति भगवान्—यज्ज्ञात्वेति । यत् मया वक्ष्यमाणं ज्ञात्वा पुनः एवमाद्याध्यायोक्तदिशा बन्धुविषयमोहं न यास्यसि । हे पाण्डव येन ज्ञानेन अथो मोहनाशाद्धेतोरात्मनि सर्वान्तर्यामिणि मणिभूतान्यशेषेण द्रक्ष्यसि मदाधारत्वेन सर्वभूतानि तिष्ठन्तीति द्रक्ष्यसीत्यर्थः । यद्वा आत्मनि सर्वत्र व्याप्ते मयि अथो व्याप्तत्वादेव सर्वभूतान्यशेषेण द्रक्ष्यसि येन ज्ञानेन तद्विद्धि तज्ज्ञानविषयं जानीहीति विद्धि प्राप्नुहीति वान्वयः ॥ ३५ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

त० टी०—अन्यदपि ज्ञानमाहात्म्यं शृण्वित्याह—अपि चेदिति । अपिचेच्छब्दौ कदाचित्संभावनापरौ । ज्ञानमाहात्म्यद्योतनायासंभावितमप्यर्थमङ्गीकृत्योच्यते । यद्यपि सर्वपापेभ्यः पापकारिभ्यः पापकृत्तमस्त्वमसि, तथाऽपि सर्वं वृजिनं पापं ज्ञानप्लवेनैव ज्ञानरूपपोतेनैव सम्यक् तरिष्यसि अतिक्रमिष्यसि ॥ ३६ ॥

म० टी०—किंच—अपि चेदिति । शृणु ज्ञानस्य माहात्म्यम् । अपिचेदित्यसंभाविताभ्युपगमप्रदर्शनार्थौ निपातौ । यद्यप्ययमर्थो न संभवत्येव तथापि ज्ञानफलकथनायाभ्युपेत्योच्यते । यद्यपि त्वं पापकारिभ्यः

सर्वेभ्योऽप्यतिशयेन पापकारी पापकृत्तमः स्यास्तथापि सर्वं वृजिनं पापमतिदुस्तरत्वेनार्णवसदृशं ज्ञानप्लवेनैव नान्येन ज्ञानमेव प्लवं पोतं कृत्वा संतरिष्यसि सम्यगनायासेन पुनरावृत्तिवर्जितत्वेन च तरिष्यसि अतिक्रमिष्यसि । वृजिनशब्देनात्र धर्माधर्मरूपं कर्म संसारफलमभिप्रेतं मुमुक्षोः पापवत्पुण्यस्याप्यनिष्टत्वात् ॥ ३६ ॥

शं० टी०—एवंविधं ज्ञानं प्राप्यापि भीष्मद्रोणादिगुरुस्वजनवधजनितात्पापान्मुक्तो न स्यामेवेत्याशङ्कावन्तमर्जुनमालक्ष्याह—अपि चेदिति । महापातकोपपातकतत्समपापसंकरीकरणमलिनीकरणादीनि पापान्युक्तान्यनुक्तानि च सर्वाणि समस्तानि व्यस्तानि च ये कुर्वन्ति ते पापाः पापकारिणस्त्रिलोकस्था भूतभविष्यद्वर्तमानकालीना एतेभ्यः सर्वेभ्यः पापेभ्यः पापकारिभ्योऽपि यदि त्वं पापकृत्तमस्तैः सर्वैः कृतं पापं त्वयैकेनैव यदा कृतं भवति तदा त्वं पापकृत्तमो भवितासि एवं पापकृत्तमोऽप्यसि चेत्तत्सर्वं वृजिनार्णवं ज्ञानप्लवेन स्वस्य कूटस्थासङ्गचिद्रूपत्वेन विक्रियासंभवान्नाहं कर्मणां कर्ता सदा निष्क्रिय एवास्मीति यदविक्रियत्वज्ञानं तदेव प्लवस्तरणिस्तेनैव संतरिष्यसि किमु वक्तव्यं भीष्मादिवधजं पापं तरिष्यसीति ॥३६॥

श्री० टी०—किंच—अपि चेदिति । सर्वेभ्यः पापकारिभ्यो यद्यपि अतिशयेन पापकारी त्वमसि तथापि सर्वं पापसमुद्रं ज्ञानपोतेनैव सम्यगनायासेन तरिष्यसि ॥ ३६ ॥

स० टी०—शृणु ज्ञानस्य माहात्म्यं पावनानां सुपावनम् ॥ सर्वेभ्यः पापकारिभ्यस्त्वमाधिक्येन यद्यपि ॥ १ ॥ पापकारी तथाप्येवं दुस्तरत्वेन संकटम् ॥ पापार्णवमिदं सर्वं ज्ञानं पोतं विधाय च ॥२ ॥ पुनरावृत्तिशून्यत्वात्सुखेनातिक्रमिष्यसि ॥ धर्माधर्मात्मकं कर्म सर्वं वृजिनशब्दतः ॥ ३ ॥ अभिप्रेतं मुमुक्षोर्हि बन्धहेतुतया यतः ॥ हेयं पुण्यमतीत्येवं भगवन्मतमुत्तमम् ॥ ४ ॥ ३६ ॥

भा० टी०—किंच न केवलमेतावदेव किंत्वन्यत् ज्ञानमाहात्म्यमपि शृण्वित्याह—अपि चेदिति । असंभाविताभ्युपगमार्थं निपातद्वयम् । यदि चेत्त्वं सर्वेभ्यः पापकृद्भ्योऽतिशयेन पापकृदसि तथापि ज्ञानमेवप्लवं पोतं तरणसाधनं कृत्वा वृजिनार्णवं धर्माधर्मरूपदुःखसमुद्रं तरिष्यसि मुमुक्षुं प्रति पुण्यस्याऽपि वृजिनरूपत्वात् । तथाच श्रुतिः " तथा स यो ह मां वेद न ह वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्यया न साधुना कर्मणा भूयान् भवति नो एवाऽसाधुना कनीयान् । त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छम् " इत्याद्याः ॥ ३६ ॥

प० टी०—ननूपदेशाज्ज्ञानप्राप्तौ सत्यां मोहनिवृत्तिर्भवति तत्पूर्वं मोह एवास्तीत्याशङ्क्याह—अपीति । त्वं चेत्पापेभ्यो हिंस्रेभ्यः पापकृत्तमोऽस्यतिशयेन पापकर्तासि तथापि सर्वं वृजिनं पापसमुद्रं ज्ञानप्लवेन ज्ञाननौकया सम्यक्प्रकारेण तरिष्यसि । अयमर्थः—"सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेर्ज्ञानं हि परमात्मस्वरूपं तत्सत्यं तदतिरिक्तं सर्वमसत्यम् । एवं पितृपुत्रसुहृद्बन्ध्वादिसकलप्रपञ्चस्य मिथ्यात्वाज्ज्ञानैकनाश्यत्वम् । यथा स्वाप्नब्रह्महत्यायां जागरे प्रायश्चित्तादर्शनात् ॥ ३६ ॥

रा० टी०—येनेति करणतया निर्दिष्टं ज्ञानमेव स्तौति पुनः—अपि चेदसीत्यादित्रयेण । सर्वेभ्यः पापेभ्यः पापकृद्भ्योऽपि पापकृत्तमश्चेदसि अतिशयेन पापकारी चेदसीतियावत् तथापि सर्वं वृजिनं ज्ञानप्लवेनैव ज्ञानाख्यनावा संतरिष्यसि पापादतिक्रान्तो भविष्यसीत्यर्थः ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

त० टी०—ननु यथा प्लवेन तरणे समुद्रनाशो न भवति, तथा ज्ञानप्लवेन कर्मणामपि नाशो न

स्यादित्याशङ्क्याऽऽह—यथेति । यथा समिद्धः प्रज्वलितोऽग्निः एधांसि काष्ठानि भस्मसात्कुरुते हे अर्जुन, तथा ज्ञानाग्निः सर्वकर्माणि प्रारब्धभिन्नानि पापपुण्यरूपाणि भस्मसात्कुरुते ।। ३७ ।।

म० टी०—ननु समुद्रवत्तरणे कर्मणां नाशो न स्यादित्याशङ्क्य दृष्टान्तान्तरमाह—यथेति । यथा एधांसि काष्ठानि समिद्धः प्रज्वलितोग्निर्भस्मसात्कुरुते भस्मीभावं नयति हे अर्जुन ! ज्ञानाग्निः सर्वकर्माणि पापानि पुण्यानि चाविशेषेण प्रारब्धफलभिन्नानि भस्मसात्कुरुते तथा तत्कारणाज्ञानविनाशेन विनाशयतीत्यर्थः । तथाच श्रुतिः " भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे " इति । " तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्, इतरस्याप्येवमसंश्लेषः पाते तु " इति च सूत्रे । अनारब्धे पुण्यपापे नश्यत एवेत्यत्र सूत्रम् " अनारब्धकार्ये एव तु पूर्वे तदवधेः " इति ज्ञानोत्पादकदेहारम्भकाणां तु तद्देहान्त एव विनाशः " तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये " इतिश्रुतेः " भोगेन त्वितरे क्षपयित्वा संपद्यते" इति सूत्राच्च । आधिकारिकाणां तु यान्येव ज्ञानोत्पादकदेहारम्भकाणि तान्येव देहान्तरारम्भकाण्यपि यथा वसिष्ठापान्तरतमःप्रभृतीनाम् । तथाच सूत्रम् "यावदधिकारमवस्थितिराधिकारिकाणाम् " इति अधिकारोऽनेकदेहारम्भकं बलवत्प्रारब्धफलं कर्म तच्चोपासकानामेव नान्येषामनारब्धफलानि नश्यन्ति आरब्धफलानि तु यावद्भोगसमाप्ति तिष्ठन्ति । भोगश्चैकेन देहेनानेकेन वेति न विशेषः । विस्तरस्त्वाकरे द्रष्टव्यः ।। ३७ ।।

शं० टी०—महामेरुं लङ्घयतो वालुकाकणलङ्घनवदपारपापार्णवं तरतस्तव भीष्मादिवधजपापपल्वलतरणमविचार्यमेवातो धर्माधर्मतत्कार्यमहार्णवं तर्तुमिच्छतो ज्ञानमेव संपादनीयं तेनैव विद्वाञ्छतकोटिकल्पार्जितं सर्वं पापं तरति । तथाच श्रुतिः "नैनं पाप्मा तरति सर्वं पाप्मानं तरति" इति। समुद्रतरणे नौकावज्ज्ञानं पापनिबर्हणे बहुकालं नापेक्षते किंतु क्षणेनैव सर्वं पापं विध्वसयतीति सदृष्टान्तमुपपादयति—यथेति । समिद्धःक्षुद्रकाष्ठैः प्रज्वलनेन प्रवृद्धोऽग्निरेधांसि काष्ठानि क्षणेन भस्मसात्कुरुते यथा, तथा समिद्धो निरन्तरध्यानसमाधिभिः प्रवर्तितो ज्ञानाग्निर्ज्ञानमुक्तलक्षणं तदेवाग्निर्ज्ञानाग्निः सर्वकर्माणि सर्वाणि पुण्यपापमिश्ररूपाणि कर्माणि । यद्वा प्रारब्धकर्मणो भोगैकनाश्यत्वात्तद्भिना ज्ञानोत्पत्तेः पूर्वभावीनि पश्चाद्भावीनि च बहुजन्मसंचितानि चेत्येवंरूपाणि सर्वाणि कर्माणि भस्मसात्करोति क्षणाद्भस्मीकरोति यथा स्थाणुज्ञानं तत्स्वरूपावरकाज्ञाननिवर्तनेन सह चौरभूतादिभ्रमं विध्वस्य भ्रमकार्यं च विध्वंसयति तथा निष्क्रियब्रह्मात्मत्वज्ञानमपि तदावरकाज्ञाननिवर्तनेन सहैव विदुषस्तदुद्भावितकर्तृत्वभ्रमं विध्वंस्य तत्संभावितानि सर्वाणि कर्माणि च सद्यो निर्मूलयति सर्वदा निष्क्रिय एवास्मीत्येवं विज्ञानवन्तं विद्वांसं करोति । निष्क्रियब्रह्मात्मत्वविज्ञानमित्यर्थः । ननु ज्ञानस्याज्ञाननिवृत्तिरेव कार्यमिति चेन्न, भ्रमादिनिवृत्तेरपि तत्कार्यत्वपर्यवसानादेकस्याः क्रियाया अनेककार्यकारित्वदर्शनात् यथा ब्रह्मास्त्रपातस्य रावणवक्षश्छेदः प्राणनिर्गमो देहपातश्च कार्यं भवति तद्वत् । ननु कर्ममात्रस्याप्यज्ञानकार्यत्वे सिद्धे कारणनाशात्प्रारब्धस्यापि संचितादिवन्निवृत्तिः स्यादेवेति चेन्न, प्रवृत्तफलत्वात्तस्य निवृत्त्यनुपपत्तेः । यथा भुक्तेः पूर्वभाविनः पश्चाद्भाविनोऽप्यन्नस्य त्याग उपपद्यते न तथा भुक्तान्नस्य प्रवृत्तफलत्वात्तथैवारब्धकर्मणोऽपि । ननु कार्यस्य सद्भावे कारणस्यापि सद्भावोऽङ्गीकर्तव्य इति चेन्न, कारणाभावेऽपि कार्याभासदर्शनात्तन्नियमाऽव्यवस्थितेः । जलबुद्धौ नष्टायामपि मरौ पुनर्जलाभासप्रतीतेः सत्यत्वबुद्ध्यभावेऽपि प्रतिच्छायादौ व्यवहारदर्शनात्तथा देहाद्यात्मत्वसत्यत्वममत्वबुद्ध्यभावेऽपि विदुषः कर्मतत्फलाभासोपपत्तेरतो युक्तं निष्क्रियब्रह्मात्मविज्ञानस्य समाधिनाऽप्रतिबद्धतां प्रापितस्याविद्यानिःशेषनिर्मूलकत्वम्, अन्यथा त्वयं घट इत्युक्तिमात्रे ब्रह्मावरकाज्ञानसद्भावप्रसङ्गस्तस्मात्सर्वमिदमहं च ब्रह्मैवेति विज्ञानमज्ञानं सर्वं निर्मूलयत्येव सकार्यमिति सिद्धम् ।। ३७ ।।

श्री० टी०—समुद्रवत्स्थितस्यैव पापस्यातिलङ्घनमात्रं नतु पापस्य नाश इति भ्रान्तिं दृष्टान्तेन वारयन्नाह—**यथेति** । एधांसि काष्ठानि प्रदीप्तोऽग्निर्यथा भस्मीभावं नयति तथा आत्मज्ञानरूपोऽग्निः प्रारब्धकर्मव्यतिरिक्तानि सर्वाणि कर्माणि भस्मीकरोतीत्यर्थः ॥ ३७ ॥

स० टी०—निःशेषत्वेन सर्वेषां कर्मणां ज्ञानवह्निना ॥ दाहः प्रदर्श्यते तेषां मूलोच्छेदेन संप्रति ॥ १ ॥ यथा प्रज्वलितो वह्निः काष्ठं नयति भस्मताम् ॥ ज्ञानाग्निः सर्वकर्माणि पुण्यपापात्मकानि च ॥ २ ॥ प्रारब्धफलभिन्नानि संचितादीन्यशेषतः ॥ तद्धेत्वज्ञाननाशेन नाशयत्येवमेव हि ॥ ३ ॥ ३७ ॥

भा० टी०—ननु ज्ञानप्लवेन तरिष्यसीत्युक्त्या ज्ञानस्य पापनाशकत्वं नागतमित्याशङ्क्य पापं नाशयति ज्ञानं नावशेषयति तन्नाश एव तत्तरणमित्यभिप्रेत्य सदृष्टान्तमाह—**यथैधांसीति** । काष्ठानि सम्यग्दीप्तोऽग्निर्भस्मसाद्भस्मीभावं कुरुते तथा ज्ञानमेवाग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मीभावं कुरुते निर्बीजं करोतीत्यर्थः । अर्जुनेति संबोधयन् शुद्धचित्तेनैवेदृशं ज्ञानं लभ्यते नान्येनेति द्योतयति । यद्वा तच्च ज्ञानं सर्वकर्माणि दग्ध्वा शुद्धं ब्रह्म संपद्यत इति सूचयति । यद्वैवंभूतेन ज्ञानेन सर्वाणि कर्माणि भस्मसात्कृत्वाऽन्वर्थसंज्ञो भवेति सूचयन्नाह—अर्जुनेति । सम्यग्दर्शनं प्रारब्धकर्मव्यतिरिक्तानां सर्वकर्मणां निर्बीजत्वकारणमित्यभिप्रायः । प्रारब्धकर्मणां प्रवृत्तफलानां भोगेनैव क्षयात् तस्माद्यान्यप्रवृत्तफलान्यतीतानेकजन्मार्जितानि ज्ञानोत्पत्तेः पूर्वमस्मिञ्जन्मनि कृतानि ज्ञानाग्निसाधनानुष्ठानकालिकानि च सर्वाणि च भस्मसात्कुरुते ज्ञानोत्तरभाविनामसंबन्धोऽपि बोध्यः । तथाच भगवतो बादरायणस्य सूत्राणि "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्, इतरस्याप्येवमसंश्लेषः पाते तु, अनारब्धकार्ये एव तु पूर्वे तदवधेः, भोगेन त्वितरे क्षपयित्वा संपद्यते" इति । फलार्थत्वात्कर्मणः फलमदत्त्वा क्षयासंभवात् । ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं न क्षीयत इति प्राप्ते राद्धान्तः तदधिगमे ब्रह्मसाक्षात्कारे सति उत्तरस्याघस्य दुरितस्याश्लेषः असंबन्धः पूर्वस्य विनाशः कस्मात्तद्व्यपदेशात् तयोरश्लेषविनाशयोः श्रुतिभिर्व्यपदेशात् । तथाच श्रुतयः " तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयत एवꣳ हास्य सर्वे पाप्मानः प्रदूयन्ते" 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति । धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्याह—इतरस्यापि पुण्यस्य कर्मणः एवमघवदसंश्लेषविनाशौ भवतः, कुतस्तस्यापि स्वफलहेतुत्वेन ज्ञानप्रतिबन्धित्वप्रसङ्गात् " उभे इहैवैष एते तरति " इत्यादि श्रुतिषु च दुष्कृतवत्सुकृतस्यापि विनाशव्यपदेशात् । अकर्त्रात्मत्वबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् क्षीयन्ते चास्य कर्माणीति चाविशेषश्रुतेः । यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं ज्ञानापेक्षया निकृष्टफलत्वात् । तुशब्द एवकारार्थः । एवं पुण्यपापयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धया विदुषो देहपाते मुक्तिरवश्यमेव भवतीत्यर्थः । तत्र "उभे इहैव एष एते तरति" इत्यादि श्रुतिविशेषश्रवणात् । अविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च क्षय इति प्राप्ते प्रत्याह—अनारब्धकार्ये अप्रवृत्तफले एव तु पूर्वे जन्मान्तरसंचिते अस्मिन्नपि च जन्मनि प्राक्ज्ञानोत्पत्तेः संचिते पुण्यपापे तदधिगमात् क्षीयेते न त्वारब्धकार्ये याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्मितं कुतस्तस्य तावदेव चिरं "यावन्न विमोक्ष्येऽथ संपत्स्ये इति शरीरपातावधिकरणात्क्षेमप्राप्तेः । ननु वस्तुबलेनाकर्त्रात्मावगत्या प्रारब्धकर्माण्यपि कुतो न क्षीयन्ते अग्निसंबन्धे बीजशक्तिरिवेति चेदुच्यते न तावदनाश्रित्यारब्धकार्यं कर्माशयं तत्त्वावगत्युत्पत्तिरुपपद्यते । आश्रिते च तस्मिन्कुलालचक्रवत्प्रवृत्तवेगस्यान्तराले प्रतिबन्धासंभवाद्भवति वेगक्षयपरिपालनम् । अकर्त्रात्मावगत्या बाधितमपि मिथ्याऽज्ञानं कर्माधिष्ठानं जले वृक्षज्ञानवत् संस्कारवशात्किंचित्कालमनुवर्तत एव । अनारब्धकार्ययोः पुण्यपापयोः विद्यासामर्थ्यात् क्षय उक्तः

इतरे त्वारब्धकार्ये ते उपभोगेन क्षपयित्वा ब्रह्म संपद्यते तस्य तावदेवेत्यादि । "ब्रह्मैव सन्ब्रह्माप्योति" इति चैवमादिश्रुतिभ्य इति ॥ ३७ ॥

प० टी०–अथोक्तप्रमेयं लौकिकदृष्टान्तेन द्रढयति–**यथेति**। यथा समिद्धः प्रदीप्तोऽग्निरेधांसि काष्ठानि भस्मसात् कुरुते तथा ज्ञानाग्निः प्रारब्धव्यतिरिक्तानि सर्वकर्माणि भस्मसात्कुरुते । समिद्ध इति पदेन ज्ञानाग्निः प्रतिपदं वृद्धिं प्रापितः सन् भस्मसात्कुरुते ॥ ३७ ॥

रा० टी०–यथा एधांसि दारूणि समिद्धः प्रदीप्तः अग्निः भस्मसात्कुरुते तथा ज्ञानाख्योऽग्निः सर्वकर्माण्यप्रारब्धानि भस्मसात्कुरुते । अतः प्रशस्तं ज्ञानमिति ॥ ३७ ॥

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

त० टी०–अत एव–नहीति । ज्ञानेन सदृशं पवित्रं पावनमिह जगति नहि विद्यते । एवंभूतज्ञानमाशु किं नोपजायते इत्यत आह--तत्स्वयमिति। तज्ज्ञानं महता कालेन योगसंसिद्धः योगेन पूर्वोक्तकर्मयोगेन यथाविध्यनुष्ठितेन संसिद्धः योग्यतामापन्नः पुरुषः स्वयमेवात्मनि स्वान्तर्विन्दति लभते॥३८॥

म० टी०–यस्मादेवं तस्मात्–**नहीति** । न हि ज्ञानेन सदृशं पवित्रं पावनं शुद्धिकरमन्यदिह वेदे लोकव्यवहारे वा विद्यते ज्ञानभिन्नस्याज्ञानान्निवर्तकत्वेन समूलपापनिवर्तकत्वाभावात्, कारणसद्भावेन पुनः पापोदयाच्च ज्ञानेन त्वज्ञाननिवृत्त्या समूलपापनिवृत्तिरिति तत्सममन्यन्न विद्यते । तदात्मविषयं ज्ञानं सर्वेषां किमिति झटिति नोत्पद्यते तत्राह–**तदिति** । तत्तु ज्ञानं कालेन महता योगसंसिद्धः योगेन पूर्वोक्तकर्मयोगेन संसिद्धः संस्कृतो योग्यतामापन्नः स्वयमात्मन्यन्तःकरणे विन्दति लभते न तु योग्यतामापन्नोऽन्यदत्तं स्वनिष्ठतया न वा परनिष्ठं स्वीयतया विन्दतीत्यर्थः ॥ ३८ ॥

शं० टी०–ननु राजसूयाश्वमेधादिक्रतुभिर्दानैः कन्यादिभिः कृच्छ्रचान्द्रायणादितपोभिश्च सर्वपापनिवृत्तिसंभवात्किं सर्वपरिग्रहत्यागमूलकशमदमादिसाधनपूर्वकसंन्यासाश्रमं संपाद्यात्मज्ञानेनेत्याशङ्कायां न, औषधवद्यदुद्देशेन क्रियन्ते उक्ता राजसूयादयस्तस्यैवोद्दिष्टस्य पापस्य निवर्तका भवन्ति नतु सर्वेषां पापानां संचितागामिवर्तमानानामनेकेषामनेकरूपाणाम् । तत्रापि पापस्यैव निवर्तका नतु बहुजन्मसंपादकपुण्यकर्मणा। मिदं तु पापानां पुण्यानां मिश्राणां च कर्मणां संचितादीनां च सर्वेषां विध्वंसने परमकारणं पवित्रतमं ज्ञानमेव नैवैतादृशमन्यदस्ति मुमुक्षोः प्रयत्नेन संपादनीयमिति सूचयितुमाह–**नहीति** । हि यस्मात्कारणान्नानायोनिषु नानाविधजन्ममरणादिमहादुःखपरंपराप्रापकानि पुण्यपापमिश्रात्मकान्यनेककल्पशतसमार्जितान्यशेषाणि कर्माणि समूलमुन्मूलयत्यविक्रियात्मज्ञानं तस्माज्ज्ञानेन सदृशमुक्तधर्मैस्तुल्यमत्यन्तशुद्धिकरं परमपुरुषार्थसाधनतममिह लोके शास्त्रे च न विद्यते नास्ति, एतादृशं शुद्धिकारणं मुक्तिकारणमस्मिन् लोके लोकान्तरे च न संभवतीत्यर्थः । एतादृशं ज्ञानमनाद्यविद्यातत्कार्यविध्वंसकमधिकारी कृतश्रवणादिर्यतिः कालेन महता दीर्घेण योगसंसिद्धः योगेन ज्ञानयोगेन नित्यनिरन्तरसमाधिनिष्ठया तात्पर्येण कृतया संसिद्धः निःशेषविनष्टसर्वबाह्यवासनता संसिद्धिस्तां प्राप्तः संसिद्धः सम्यङ्निर्मूलितसर्वप्रतिबन्धः सन्स्वयमात्मनि स्वान्तःकरण एव विन्दति सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धा ब्रह्ममयी वृत्तिर्बुद्धावेवोदेतीत्यर्थः ॥ ३८ ॥

श्री० टी०–तत्र हेतुमाह–**नहीति** । पवित्रं शुद्धिकरमिह तपोयोगादिषु मध्ये ज्ञानतुल्यं नास्त्येव । तर्हि सर्वेऽप्यात्मज्ञानमेव किं नाभ्यस्यन्तीत्यत आह–**तत्स्वयमिति** सार्धेन । तदात्मविषयं ज्ञानं कालेन महता कर्मयोगेन संसिद्धो योग्यतां प्राप्तः सन्स्वयमेवानायासेन लभते नतु कर्मयोगं विनेत्यर्थः ॥ ३८ ॥

स० टी०—ज्ञानेन तुल्यं लोकेऽस्मिन्वेदे वान्यन्न पावनम् ॥ विद्यते शुद्धिजनकमज्ञानमलनाशकम् ॥ १ ॥ ज्ञानाद्भिन्नस्य सामर्थ्यं नास्त्यज्ञानमलक्षये ॥ तदात्मज्ञानं सर्वेषां कुतो नोत्पद्यतेऽचिरात् ॥ २ ॥ इत्याशङ्क्याह कालेन महता नतु तत्क्षणे ॥ पूर्वोक्तकर्मयोगेन संस्कृतो योग्यतां गतः ॥ ३ ॥ मुमुक्षुर्लभते बुद्धौ स्वयं तज्ज्ञानमुत्तमम् ॥ न योग्यतामनापन्नो ज्ञानमात्मैक्यगोचरम् ॥ ४ ॥ लभते योग्यतासिद्ध्यै यत्नं कुर्यादतः पुमान् ॥ ५ ॥ ३८ ॥

भा० टी०—यत एवमतो—**नहीति** । नहि ज्ञानेन तुल्यं पवित्रं पापनाशनं शुद्धिकरमिह दैवादियज्ञादौ विद्यते तस्य ज्ञानभिन्नस्याज्ञानानिवर्तकत्वेनात्यन्तशुद्धिकरत्वाभावात् । तर्हि किमन्यैर्यज्ञादिभिः मयाऽन्यैश्च ज्ञानमेव कुतो न संपाद्यमित्याशङ्क्याह—**तदिति** । तज्ज्ञानं स्वयमेव योगेन निष्कामकर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतः योग्यतां प्राप्तः सन् मुमुक्षुर्महता कालेनात्मनि अखण्डात्मविषयं ज्ञानं विन्दति लभते स्वयमेव स्वप्रयत्नेनैव योगसिद्धः स्वयमेव विन्दतीति वा आत्मविषयसाक्षात्कारस्य स्वेनैव लभ्यत्वात् गुर्वादेः परोक्षज्ञान एवोपयोगात् । यस्माद्योगसंसिद्धैरेवान्यैर्ज्ञानं लभ्यते तस्मात्त्वमपि तथाभूतः सन् तल्लभस्वेत्याशयः ॥ ३८ ॥

प० टी०—अत एव ज्ञानेन दुःसाध्यं किमपि नास्तीत्याह— **नहीति** । इह तपोयोगादिषु मध्ये ज्ञानतुल्यं पवित्रं शोधकमन्यन्न विद्यते । तदाह—**तत्स्वयमिति** सार्धेन । तज्ज्ञानं योगसंसिद्धो योगेन कर्मयोगेन योग्यतां प्राप्तः कालेन परिपक्वावस्थायां स्वयमेवानायासेनात्मन्येव शुद्धे मनस्येव विन्दति प्राप्नोति, परं तु नान्यतः कुतश्चिदानीयते । श्रुतिरपि—"मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्" इति । तथा "मनसैवाप्तव्यम् । नेह नानास्ति किंचन" इति । भाष्यम्—एतदात्माख्यं वस्त्वप्रमेयमतर्क्यमपि मनसैव ध्रुवं स्थिरं यथा भवति तथानुवेलं द्रष्टव्यं नान्येन । तदुक्तं पञ्चाशीतौ—'राहुरदृश्योऽपि सदा शशिविम्बस्थः प्रकाशते जगति । तद्वद्विशुद्धात्मा चित्ते प्रकाशमेति स्वयं ह्यात्मा' इति ॥ ३८ ॥

रा० टी०—**नहीति** । इह लोके ज्ञानेन सदृशं पवित्रं नहि विद्यते। तज्ज्ञानं स्वयं योगसंसिद्धः योगविषये सम्यक्सिद्धिमान्संसिद्धिज्ञानोपायः सन् कालेन बहुना आत्मनि विन्दति प्राप्नोति ॥ ३८ ॥

श्रद्धावाँल्लभते ज्ञानं तत्परः[1] संयतेन्द्रियः ॥
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

त० टी०—ननु कालेन योगसंसिद्धः स्वयमेव ज्ञानं लभते चेत्तर्हि पूर्वोक्तगुर्वभिगमनप्रणिपातादेरप्रयोजकत्वं स्यादित्याशङ्कानिरासार्थं ज्ञानाधिकारिणं विशिनष्टि—**श्रद्धावानिति** । योगसंसिद्धः स्वयं ज्ञानं लभते इति सत्यं, तथापि स किंगुणविशिष्टोऽभिप्रेतस्तं शृणु, श्रद्धावानिति । गुरुशास्त्रोक्तवाक्यार्थे एवमेवायमित्यास्तिक्यबुद्धिः श्रद्धा, तद्वान्। न चैतावत्त्वमेवापि तु तत्परः गुरूपासनशास्त्राभ्यासयोः सदोद्युक्तः । तद्विरोधिनिरासार्थमाह—**संयतेन्द्रिय** इति । श्रद्धावत्त्वेऽपि इन्द्रियचाञ्चल्यं चेद्गुरुशास्त्रसेवादिपरता न स्यादतः सम्यग्यतानि वशीकृतानीन्द्रियाणि येन स एव ज्ञानं लभते, नान्यः । तस्मात्पूर्वं निष्कामकर्मयोगानुष्ठानेनान्तःकरणशुद्ध्या श्रद्धादिसंपत्त्या ज्ञानलाभः स्यादिति सर्वं निरवद्यम् । एवं साधनपरंपरया ज्ञानं लब्ध्वा प्राप्य विक्षेपहेतुकर्मात्मिकाविद्यानाशेन परां शान्तिं मुक्तिलक्षणामचिरेणैवाधिगच्छति प्राप्नोति ॥ ३९ ॥

म० टी०—येनैकान्तेन ज्ञानप्राप्तिर्भवति स उपायः पूर्वोक्तप्रणिपाताद्यपेक्षयाप्यासन्नतर उच्यते गुरुवे-

१ मत्पर इति रा. पाठः ।

दान्तवाक्येष्विदमित्थमेवेति प्रमारूपास्तिक्यबुद्धिः श्रद्धा तद्वान् पुरुषो लभते ज्ञानम् । एतादृशोऽपि कश्चिदलसः स्यात्तत्राह—तत्परः गुरूपासनादौ ज्ञानोपायेऽत्यन्ताभियुक्तः । श्रद्धावांस्तत्परोपि कश्चिदजितेन्द्रियः स्यादतः आह—संयतानि विषयेभ्यो निवर्तितानीन्द्रियाणि येन स संयतेन्द्रियः य एवं विशेषणत्रययुक्तः सोऽवश्यं ज्ञानं लभते । प्रणिपातादिस्तु बाह्यो मायावित्त्वादिसंभवादनैकान्तिकोऽपि श्रद्धावत्त्वादिस्त्वैकान्तिक उपाय इत्यर्थः। ईदृशेनोपायेन ज्ञानं लब्ध्वा परां चरमां शान्तिमविद्यातत्कार्यनिवृत्तिरूपां मुक्तिमचिरेण तदव्यवधानेनैवाधिगच्छति लभते यथा हि दीपः स्वोत्पत्तिमात्रेणैवान्धकारनिवृत्तिं करोति नतु कंचित्सहकारिणमपेक्षते तथा ज्ञानमपि स्वोत्पत्तिमात्रेणैवाज्ञाननिवृत्तिं करोति नतु किंचित्प्रसंख्यानादिकमपेक्षत इति भावः ॥३९॥

शं० टी०—एवं ज्ञानमाहात्म्यं तत्सिद्धिप्रकारं च प्रतिपाद्य ज्ञानयोगसिद्धेरन्तरङ्गसाधनान्याह—**श्रद्धावानिति** । श्रद्धावान् "तत्त्वमसि" इति श्रुत्या ब्रह्मात्मैकत्वमुच्यते तदेव गुरुणोपदिश्यते तत्र श्रुतिवाक्ये गुरूक्तौ च सत्यत्वबुद्धिः श्रद्धा "अस्तीत्येवोपलब्धव्यः" इति श्रवणात्तादृश्यव्यभिचारिणी श्रद्धा यस्यास्ति स श्रद्धावान् मुमुक्षोरवश्यं श्रद्धावत्त्वेन भवितव्यं तदभावे न किंचिदस्त्यतः श्रद्धा प्रयत्नेन संपादनीयेत्यर्थः । श्रद्धावत्त्वेपि बहिर्मुखस्य ज्ञानं न सिद्धयत्यतस्तद्राहित्येन भवितव्यमित्याह—**संयतेन्द्रिय इति** । संयतानि तत्तद्विषयेष्वप्रवर्तितान्युभयेन्द्रियाणि येन सः संयतेन्द्रियत्वं यतेर्धर्मत्वेन सदा भवितव्यं बहिःप्रवृत्तिशून्यस्यैव ज्ञानं सिद्धयति सिद्धं च तेनैव रक्षितव्यं भवति नान्यथा तिष्ठतीत्यर्थः । एवं श्रद्धावत्त्वसंयतेन्द्रियत्वयोः सिद्धयोः सतोरप्यन्तर्विषयान् ध्यायतो यतेर्ज्ञानं न सिद्धयत्यतस्तद्राहित्येन भवितव्यमित्याह—तत्पर इति । सर्वदा तस्मिन्नेव वृत्तेरन्तर्बहिर्ब्रह्माकारत्वापादन एव पर आसक्तचित्तस्तत्परः ब्रह्माकारवृत्तिपरत्वमेवाऽसाधारणकारणं तेनैव विपरीतप्रत्ययाः सर्वे नश्यन्त्यनात्मवासनाश्च सर्वाः ज्ञानस्याप्रतिबद्धता च सिद्धयत्यतस्तदेव संपादनीयं मोक्षैकार्थिन इत्येवं नियतविशेषणत्रयसंपन्नो यो यतिः स एव ब्रह्मैवाहमस्मीत्यप्रतिबद्धं ज्ञानं लभते नान्यः शतधा श्रुतश्रावितवेदान्तोऽपि विद्वानित्यर्थः। एवं श्रद्धावत्त्वसंयतेन्द्रियत्वतत्परत्वादिसाधनसंपत्त्या दैर्घकालिक्या नित्यनिरन्तरं ब्रह्मनिष्ठया निष्पन्नं जगतश्च स्वस्य च ब्रह्मात्मनैवोपलभ्यमानत्वापादकं ज्ञानं लब्ध्वा ब्रह्मविद्यातिरचिरेणैवोत्तरक्षण एव परां संशयविपरीतभावमादिनिर्मुक्तज्ञानावभासितत्वाद्वस्तुस्वाभाव्याच्चाविद्यातत्कार्याभासशून्यां निरतिशयसुखात्मिकां ब्रह्मात्मनावस्थानलक्षणां शान्तिं मुक्तिं विदेहात्मिकां गच्छति प्राप्नोतीत्यर्थः ॥ ३९ ॥

श्री० टी०—किंच—**श्रद्धावानिति** । श्रद्धावान् गुरूपदिष्टेऽर्थे आस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठः संयतेन्द्रियश्च तज्ज्ञानं लभते नान्यः, अतः श्रद्धादिसंपत्त्या ज्ञानलाभात्प्राक्कर्मयोग एव शुद्धयर्थमनुष्ठेयः । ज्ञानलाभानन्तरं तु न तस्य किंचित्कृत्यमस्तीत्याह—ज्ञानं लब्ध्वा त्वचिरेण परां शान्तिं मोक्षं प्राप्नोति ३९॥

स० टी०—ज्ञानप्राप्तिः सतां येनोपायेनैकान्तभाविनी ॥ स आसन्नतरः साक्षादुपाय उपदिश्यते ॥१॥ गुरुवेदान्तवाक्येषु श्रद्धास्तिक्यमतिः स्मृता॥ तद्युतो लभते ज्ञानं यदि तत्रैव तत्परः ॥ २ ॥ गुरुसेवामुखे ज्ञानोपायेऽत्यन्ताभियुक्तिमान् ॥ श्रद्धावांस्तत्परो यस्तु न स्यात्सम्यग्जितेन्द्रियः ॥ ३ ॥ तस्यापि दुर्लभं ज्ञानमतः स्यात्संयतेन्द्रियः ॥ निवर्तितानीन्द्रियाणि विषयेभ्यश्च येन सः ॥ ४ ॥ अवश्यं लभते ज्ञानं विशेषणत्रयान्वितः ॥ प्रणिपाताद्युपायो हि दम्भिनामपि दृश्यते ॥ ५ ॥ श्रद्धावत्त्वाद्युपायस्तु सतामैकान्तिको वरः ॥ उपायेनेदृशेनैव ज्ञानं प्राप्य सपद्यसौ ॥ ६ ॥ अविद्यादिनिवृत्त्याख्यां शान्तिं मुक्तिमुपैति सः ॥ व्यवधानं विनैवाद्धा ब्रह्मीभूतो भवेन्नरः ॥ ७ ॥ यथा स्वोत्पत्तिमात्रेण दीपो हन्ति तमोऽखिलम् ॥ स नैवापेक्षते तत्र कंचित्तु सहकारिणम् ॥ ८ ॥ तथा स्वोत्पत्तिमात्रेण ज्ञानं ब्रह्मैक्यगोचरम् ॥ निहन्त्यविद्यां तत्कार्यं न सहायमपेक्षते ॥ ९ ॥ ३९ ॥

भा० टी०—योगेन योग्यतामापन्नस्य येनैकान्तेन तत्त्वज्ञानं भवति तमुपायमाह—**श्रद्धावानिति** । गुरुवेदान्तवाक्येष्विदमित्थमित्यास्तिक्यं श्रद्धा तद्वान् तत्रापि तत्परः गुरूपासनादावभियुक्तः तत्रापि संयतानि विषयेभ्यो निवर्तितानि इन्द्रियाणि येन सः, एवं विशेषणत्रयविशिष्टश्चेदवश्यं ज्ञानं लभते । प्रणिपातादेर्माययाऽपि संभवेन नैकान्तिकत्वमेतेषां न तथात्वमत एकान्तिकत्वम् । ज्ञानं लब्ध्वा किं स्यादत आह—ज्ञानं लब्ध्वा परां शान्तिं मोक्षाभिधामचिरेण जन्मान्तरं लोकान्तरगमनं च विना एवाधिगच्छति प्राप्नोति ॥ ३९ ॥

प० टी०—किंच—**श्रद्धावानिति** । गुरूपदिष्टेऽर्थे आस्तिक्यं श्रद्धा तद्वान् तत्परस्तदेकनिष्ठोऽत एव संयतेन्द्रियश्च ज्ञानं लभते नान्यः । एवं ज्ञानं लब्ध्वाचिरेण परां शान्तिं मोक्षमधिगच्छति प्राप्नोति ॥३९॥

रा० टी०—एवं ज्ञानं प्रशस्य तस्यान्तरङ्गसाधनं फलं चाह—**श्रद्धावानिति** । आस्तिक्यबुद्धिमान्मत्परो मदेकनिष्ठः संयतेन्द्रियो जितेन्द्रियश्च ज्ञानं लभते । ज्ञानं लब्ध्वा परां शान्तिं मोक्षमचिरेणाविलम्बेनाधिगच्छति प्राप्नोति असति प्रारब्धे । सति तु तस्मिन् तद्भोगानन्तरमिति ॥ ३९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

त० टी०—एवं श्रद्धाभक्तिमतः सद्गुरूपदेशाल्लब्धज्ञानस्य मोक्षफलमुक्त्वा तदभाववतोऽज्ञस्य विनाशमाह—**अज्ञश्चेति** । अज्ञो गुरूपदिष्टतत्त्वज्ञानशून्यः । तत्र हेतुः अश्रद्दधानः पूर्वोक्तलक्षणश्रद्धाशून्यः । तत्रापि हेतुः संशयात्मेति । द्वौ चशब्दौ पुनरर्थकौ । तथाहि अज्ञोऽपि सद्गुरूपदिष्टेन केनचित्सुगमोपायेन मुच्येत । पुनरश्रद्दधानः श्रद्धाहीनत्वादुपायं नानुतिष्ठति, तदनुष्ठानाभावेऽपि दृढसत्सङ्गेन कथंचिच्छ्रद्दधीत । पुनः संशयात्मा संशयाः फलसाधनोपास्यधर्मगुरुशास्त्रादिविषयभेदेनानेकधा, तत्र परं श्रेयः मोक्षः स्वर्गादि वा, श्रेयः साधनं ज्ञानं कर्म वा, तत्प्राप्त्यर्थं विष्णुराराध्यः रुद्रेन्द्रविनायकशक्त्यादिर्वा, धर्मो वैष्णवः श्रेष्ठ इतरो वा, गुरुर्निष्किंचनो धनाढ्यो वा, गुरुवचनं सत्यमसत्यं वा, शास्त्रं वेदान्तमन्यद्वेत्यादिसंशयेष्वात्मा मनो यस्य न त्वेकस्मिन्निश्चये, अतो न सत्सङ्गनिष्ठो भवति, किंत्वितस्ततो धावति तस्मादेव विनश्यति, श्रेयोमार्गाद्भ्रश्यति । यतः संशयात्मनः पुरुषस्यायं मनुष्यलोको नास्ति धर्मार्जनविवाहादौ सम्यक्प्रवृत्त्यभावात् परलोकोऽपि नास्ति, तत्साधनधर्माननुष्ठानात् । नच सुखं कस्मिंश्चिदपि निश्चयाभावात् । कुतो मोक्ष इति भावः । एवं चाज्ञस्येत्यादिविशेषणत्रयमेकस्यैव बोध्यमन्यथा "भिद्यते हृदयग्रन्थिः" इत्यादिश्रुतेः 'अज्ञसर्वज्ञभक्तानां गतिर्गम्यो भवान्' इति स्मृतेश्च विरोधः स्यात् ॥ ४० ॥

म० टी०—अत्र च संशयो न कर्तव्यः कस्मात् **अज्ञेति** । अज्ञोऽनधीतशास्त्रत्वेनात्मज्ञानशून्यः गुरुवेदान्तवाक्यार्थे इदमेवं न भवत्येवेति विपर्ययरूपा नास्तिक्यबुद्धिरश्रद्धा तद्वानश्रद्दधानः इदमेवं भवति न वेति सर्वत्र संशयाक्रान्तचित्तः संशयात्मा विनश्यति स्वार्थाद्भ्रष्टो भवति । अज्ञश्चाश्रद्दधानश्च विनश्यतीति संशयात्मापेक्षया न्यूनत्वकथनार्थं चकाराभ्यां तयोः प्रयोग उक्तः । कुतः संशयात्मा हि सर्वतः पापीयान् यतो नायं मनुष्यलोकोऽस्ति वित्तार्जनाद्यभावात् न परलोकः स्वर्गमोक्षादिः धर्मज्ञानाद्यभावात् न सुखं भोजनादिकृतं संशयात्मनः सर्वत्र संदेहाक्रान्तचित्तस्य । अज्ञस्याश्रद्दधानस्य च परो लोको नास्ति मनुष्यलोके भोजनादिसुखं च वर्तते । संशयात्मा तु त्रितयहीनत्वेन सर्वतः पापीयानित्यर्थः ॥ ४० ॥

शं० टी०—"ब्रह्मविदाप्नोति परम्, ज्ञात्वा देवं मुच्यते सर्वपाशैः, ज्ञात्वा शिवं शान्तिमत्यन्तमेति,

तमेव विदित्वातिमृत्युमेति, य एतद्विदुरमृतास्ते भवन्ति" । 'ये विदुर्यान्ति ते परम्, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति 'ब्रह्मविन्मुक्तो भवति ज्ञानवत्त्वाद्वामदेवादिवत्' इत्यादिश्रुतिस्मृतियुक्तिशतप्रसिद्धेः सम्यग्ज्ञानान्मोक्ष इत्येतस्मिन्नर्थे ब्राह्मणेन मोक्षैककामेन अश्रद्धा वा संशयोवाप्यात्मज्ञानसंपादने प्रयत्नाभावो वा न कर्तव्यः कृतश्चेन्मोक्षो न लभ्यत इत्याह—अज्ञश्चेति । यस्तु सर्वाणि कर्माणि मोक्षार्थं संन्यस्य मोक्षकारणे श्रवणादौ तत्कारणे गुरुशुश्रूषाशमदमतितिक्षातत्परत्वादौ च प्रयत्नमकृत्वात्मज्ञानं न संपादयति स एवात्र मोक्षशास्त्रे अज्ञ इत्युच्यते स च यस्य तु संन्यासे वेदान्तश्रवणादौ गुरौ च मोक्षे च ज्ञानान्मोक्ष इत्यस्मिन्नर्थे चाविश्वासो भवति सोऽश्रद्दधानः श्रद्धाशून्यश्च संशयात्मा च " अपाम सोमममृता अभूम, दक्षिणावन्तो अमृतं भजन्ते " इत्यादिवाक्यैः कर्मणो मुक्तिहेतुत्वं प्रतिपाद्यते "तरति शोकमात्मवित्, ज्ञानादेव तु कैवल्यम्" 'कर्मणा बध्यते जन्तुर्विद्यया तु विमुच्यते' इत्यादिश्रुतिस्मृतिवाक्यैर्ज्ञानेन मुक्तिरिति प्रतिपाद्यते ततः कर्मणा वा ज्ञानेन वा मुक्तिरिति संशय आत्मनि चित्ते यस्य स संशयात्मा सम्यगधीतशास्त्रोऽपि यः संशयग्रहग्रस्तः स चापि विनश्यति ज्ञानफलाद्भ्रश्यति न कदापि मुक्तिं प्राप्नोतीत्यर्थः । एवं त्रयाणामपि ज्ञानशून्यानां मुक्त्यभावं प्रतिपाद्य तत्र दोषाधिक्यात्संशयालुं विशेषयति—**नायमिति** । संशयात्मनः पापिष्ठस्य मुक्तिरेव नास्तीति न किंतु भाविजन्मन्ययं लोको मानुषोऽपि नास्ति, न परः स्वर्गोऽपि च नास्ति पुंसः संशय एव महापापसमुद्भवः सर्वानर्थस्य च बीजं तत इदमवश्यं कर्तव्यमनेन तरिष्यामीति कर्मणि वैदिके सर्वत्र च श्रद्धाऽसंभवात् श्रद्धावैधुर्येण कृतानां कर्मणां स्वफलदानसामर्थ्यासंभवात्तत्तल्लोकप्राप्त्यभावोपपत्तेः। नच विषयसुखमप्यस्ति तादृशस्य त्वाहारादावपि संशयसंभवात्ततः संशयात्मा नरलोकपरलोकयोस्तत्सुखस्य च दूरीभवतीत्यर्थः । एतेन मुमुक्षोर्यतेः प्रयत्नेनात्मज्ञत्वं संन्यासगुरुवेदान्तश्रवणादिषु श्रद्धात्वं सर्वत्र निःसंशयत्वं च संपादनीयमिति सूचितं भवति ॥ ४० ॥

श्री० टी०—ज्ञानाधिकारिणमुक्त्वा तद्विपरीतमनधिकारिणमाह—**अज्ञश्चेति** । अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञाने जातेऽप्यश्रद्दधानश्च जातायामपि श्रद्धायां ममेदं सिध्येद्वा नवेति संशयाक्रान्तचित्तश्च नश्यति स्वार्थाद्भ्रश्यति । एतेषु त्रिष्वपि संशयात्मा सर्वथा नश्यति यतस्तस्यायं लोको नास्ति धनार्जनविवाहाद्यसिद्धेः, नच परलोकः धर्मस्यानिष्पत्तेः, । नच सुखं संशयेनैव भोगस्याप्यसंभवात् ॥ ४० ॥

स० टी०—संशयो नात्र कर्तव्यः किमर्थमिति चेच्छृणु ॥ अज्ञोऽनधीतशास्त्रत्वादात्मज्ञानविवर्जितः ॥ १ ॥ गुरुवेदान्तवाक्यार्थे विश्वासाभावरूपिणी ॥ नास्तिक्यबुद्धिरश्रद्धा तद्वानश्रद्दधानकः ॥ २ ॥ इदमेवं न वेत्येवं संशयाक्रान्तधीः पुमान् ॥ भवति स्वार्थतो भ्रष्टस्त्रिष्वेष्वन्यतमोऽपि यः ॥ ३ ॥ अज्ञश्चाश्रद्दधानश्च विनश्यति तथापि यः ॥ संशयात्मातिपापीयान् सर्वथा स विनश्यति ॥ ४ ॥ वित्तार्जनाद्यभावान्न लोकः साधारणोऽप्ययम् ॥ धर्मज्ञानाद्यभावान्न स्वर्गमोक्षादिकः परः ॥ ५ ॥ संशयाक्रान्तचित्तस्य नाशनादिकृतं सुखम् ॥ अज्ञस्याश्रद्दधानस्य परलोको न यद्यपि ॥ ६ ॥ वर्तते तु नृलोकोऽयं भोजनादिसुखं तथा ॥ संशयात्मा त्रिभिर्हीनः पापीयान्सर्वतोऽधमः ॥ ७ ॥ ४० ॥

भा० टी०—अस्मिन्सर्वशास्त्रन्यायसिद्धे सुनिश्चितेऽर्थे संशयो न कर्तव्यस्तस्य पापिष्ठत्वादित्याशयेनाह—**अज्ञ इति** । अज्ञो गुरुमुखादनधीतशास्त्रत्वेनात्मज्ञानशून्यश्च पूर्वोक्तश्रद्धारहितश्च इदमेवं भवति नवेति सर्वत्र संशयाक्रान्तचेता विनश्यति स्वार्थलाभाद्भ्रश्यति । अज्ञाश्रद्दधानसंशयात्मापेक्षया चकारद्वयसूचितमुख्यत्वं स्फुटयति संशयात्मा तु सर्वतः पापिष्ठः यतस्तस्यायं मनुष्यलोको वित्तार्जनविवाहादिसाध्यो न नच पर उपासनादिसाध्यो देवलोकः, नच तत्त्वज्ञानसाध्यजीवन्मुक्तिसुखं सर्वत्रापि संशयस्य सत्त्वात् । अज्ञाश्रद्दधानयोः परलोकस्य जीवन्मुक्तिसुखस्य चाभावेऽपि मनुष्यलोकोऽस्त्येव । यद्वाऽज्ञः कदाचिदभ्यासवशात्परलोका-

दिसाधनं देहात्मविवेकादिज्ञानं लभते अश्रद्दधानोऽपि युक्तियुक्तं श्रुत्वा श्रद्धां लभते ततश्च परलोकादिभाजौ भवतः। सदा सर्वत्र संशयग्रस्तस्तु न तथा किंत्वतिपापिष्ठ इत्यर्थः। तस्मात्संशयो न कर्तव्य इत्याशयः॥४०॥

प० टी०—अथ ज्ञानरहितं निन्दति—अज्ञ इति। अज्ञो गुरूपदिष्टार्थानभिज्ञः कथं चिज्ज्ञाने जातेऽप्यश्रद्दधानो नास्तिक्यवान् कथं चिज्ज्ञातायामपि श्रद्धायां ममेदं सिध्येन्न वेति संशयात्मैवंविधः पुरुषो नश्यति। अथ नाशस्वरूपमाह—नायमिति। संशयात्मनः संशयरूप आत्मा मनो यस्य तथाभूतस्यायं लोको नास्त्यज्ञत्वात्, न परोऽश्रद्दधानत्वात्, न सुखं न विश्रान्तिः संशयात्मत्वात् ॥ ४० ॥

रा० टी०—ज्ञानतत्साधनयोरभावे तद्विरोधिविपरीतज्ञानादौ चानिष्टमाह—अज्ञश्चेति। नञोऽभावविरोधरूपार्थद्वयं ध्येयम्। तत्त्वविषयसंशयात्मा च विनश्यति नरकं प्रतिपद्यते। किंच संशयात्मनोऽयं मानुषो लोकः परः स्वर्गादिर्वा नास्ति किं बहुना सुखं नास्तीत्यर्थः ॥ ४० ॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ॥
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१ ॥

त० टी०—एवं संशयात्मनोऽज्ञस्य सर्वार्थभ्रंशमुक्त्वा सदाचारानुवर्तिनो मुमुक्षोर्निःश्रेयसाय संशयवारणार्थं पूर्वोक्तक्रमेण कर्मयोगज्ञानयोगावेवोपदिशन्नुपसंहरति—योगेति द्वाभ्याम्। योगेन भगवदाराधनलक्षणेन संन्यस्तानि भगवत्यर्पितानि कर्माणि येन तं, तत एव ज्ञानसंछिन्नसंशयं, भगवति कर्मार्पणादेव जातं यदात्मनो भगवदधीनत्वज्ञानं तेन छिन्नाः पूर्वोक्ताः संशया यस्य अत एवात्मवन्तं, तत्त्वविषयतयाऽवस्थितमनसं कर्माणि विधिप्राप्तानि स्वाभाविकानि वा न निबध्नन्ति, हे धनंजय ॥४१॥

म० टी०—एतादृशस्य सर्वानर्थमूलस्य संशयस्य निराकरणायात्मनिश्चयमुपायं वदन्नध्यायद्वयोक्तां पूर्वापरभूमिकाभेदेन कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठामुपसंहरति—योगेति। योगेन भगवदाराधनलक्षणसमत्वबुद्धिरूपेण संन्यस्तानि भगवति समर्पितानि कर्माणि येन। यद्वा परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि त्यक्तानि कर्माणि येन तं योगसंन्यस्तकर्माणम्। संशये सति कथं योगसंन्यस्तकर्मत्वमत आह—ज्ञानसंछिन्नसंशयं ज्ञानेनात्मनिश्चयलक्षणेन छिन्नः संशयो येन तम्। विषयपरवशत्वरूपप्रमादे सति कुतो ज्ञानोत्पत्तिरित्यत आह—आत्मवन्तमिति। आत्मवन्तमप्रमादिनं सर्वदा सावधानं एतादृशमप्रमादित्वेन ज्ञानवन्तं ज्ञानसंछिन्नसंशयत्वेन योगसंन्यस्तकर्माणं कर्माणि लोकसंग्रहार्थानि वृथाचेष्टारूपाणि वा न निबध्नन्ति अनिष्टमिष्टं मिश्रं वा शरीरं नारभन्ते हे धनंजय ॥ ४१ ॥

शं० टी०—तदेवमनर्थहेतोः संशयस्य निःशेषनिवृत्तिः कथं सिध्यतीत्याकाङ्क्षायां श्रुतियुक्तिसमुत्पन्नब्रह्मात्मैकत्वविज्ञानेनैव तस्य विच्छित्तिर्नान्यथेति सूचयितुं परावरैकत्वविज्ञानविच्छिन्नसर्वसंशयत्वादेव ब्रह्मवित्कर्मभिर्न निबध्यत इति प्रतिपादयति—योगेति। ज्ञानसंछिन्नसंशयं ज्ञानं परावरयोरखण्डैकरसत्वसंदर्शनलक्षणं तेन ज्ञानेन निरन्तरसमाधिनिष्पन्नाऽप्रतिबद्धभावेन संछिन्ना निःशेषं निर्मूलिताः संशयाः मोक्षः कर्मणा वा ज्ञानेन वा ज्ञानं च परोक्षं वाऽपरोक्षं वा मोक्षो ज्ञानेन सिध्यति वा न वेत्येवमादयः सर्वे यस्य तं ज्ञानसंछिन्नसंशयमत एव योगसंन्यस्तकर्माणम् सर्वमिदमहं च ब्रह्मैवेति सर्वस्य जगतः स्वस्य च ब्रह्ममात्रत्वदर्शनं योगस्तेन संन्यस्तानि विश्लेषितानि सम्यङ् नितरामस्तानि ब्रह्मणि ब्रह्मात्मना लयं गतानीति वा कर्माणि संचितान्यागामीनि च सर्वाणि यस्य तं योगसंन्यस्तकर्माणमात्मवन्तमप्रमत्तम्। यद्वात्मैव बहिरन्तः सर्वत्र वृत्तेर्विषयत्वेनास्यास्ति नान्यदित्यात्मवान् तमात्मवन्तं ब्रह्मविदं कर्माणि स्वप्रवदा-

भासरूपाणि शरीरयात्रामात्रैकप्रयोजनानि देहचेष्टारूपाणि योगाग्निनिर्दग्धत्वान्निर्वीर्याणि न निबध्नन्ति बन्धाय न कल्पन्ते शुक्तिदृष्ट्यारजतप्रत्ययवद्ब्रह्मदृष्ट्या विनश्यन्तीत्यर्थः । एतेन ब्रह्मविदां यतीनां योगेनैव सर्वकर्मसंन्यासः कर्तव्यः कर्मणामबन्धकत्वायेति सूचितं भवति ॥ ४१ ॥

श्री० टी०—अध्यायद्वयोक्तां पूर्वापरभूमिकाभेदेन कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठामुपसंहरति—**योगेति** द्वाभ्याम् । योगेन परमेश्वराराधनरूपेण तस्मिन्संन्यस्तानि समर्पितानि कर्माणि येन तं पुरुषं कर्माणि स्वफलैर्निबन्धन्ति अतश्च ज्ञानेनाकर्त्रात्मबोधेन संछिन्नः संशयो देहाद्यभिमानलक्षणो यस्य तं चात्मवन्तमप्रमादिनं कर्माणि लोकसंग्रहार्थानि स्वाभाविकानि वा न निबध्नन्ति ॥ ४१ ॥

स० टी०—संशयस्याखिलानर्थमूलस्यास्यापनुत्तये ॥ आत्मज्ञानमुपायं च वदन्नारायणो हरिः ॥ १ ॥ पुराध्यायद्वयेनोक्तां कर्मज्ञानमयीं द्विधाम् ॥ उपसंहरतीदानीं ब्रह्मनिष्ठां विमोक्षदाम् ॥ २ ॥ समत्वबुद्धिरूपेण योगेन परमेश्वरे ॥ समर्पितानि कर्माणि येन तं शुद्धमानसम् ॥३॥ यद्वा त्यक्तानि कर्माणि येन ब्रह्मैक्यदर्शिना ॥ योगसंन्यस्तकर्मत्वं कथं स्यात्संशये सति ॥४॥ शृणु त्वमात्मबोधेन येनच्छिन्नोऽस्ति संशयः॥ सर्वदा सावधानं तं क्रियमाणान्यनेकधा ॥ ५ ॥ कर्माणि न निबध्नन्त्यनिष्टेष्टादिकलेवरैः ॥ ६ ॥ ४१ ॥

भा० टी०—ननु संशयनिवर्तकाभावे तदकरणमस्वाधीनमित्याशङ्क्य तन्निवृत्त्युपायमात्मज्ञाननिश्चयं ज्ञापयन् तत्त्वसाक्षात्कारसंछिन्नसंशयं कर्माणि न निबध्नन्तीत्याह—**योगेति** । योगेन परमार्थदर्शनलक्षणेन सम्यक् न्यस्तानि त्यक्तानि शक्तिप्रतिबन्धेन धर्माधर्माख्यानि कर्माणि संचितादीनि येन तं "क्षीयन्ते चास्य कर्माणि" इतिश्रुतेः योगेन भगवदाराधनलक्षणसमत्वबुद्धिरूपेण संन्यस्तानि भगवति समर्पितानि कर्माणि येनेति वा अस्मिन्पक्षे कर्मपदसंकोचाद्यापत्तिरूपाऽरुचिर्बोध्या । यद्वा भाष्यस्योपलक्षणार्थतया तत्रेणायमपि पक्षोस्तु यस्मात्कर्मयोगानुष्ठानादशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते कर्मभिरित्यग्रिमभाष्यात् । तत्र हेतुमाह—ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन छिन्नः संशयः आत्मा देहाद्यभिन्नो भिन्नो वा भिन्नोप्यविभुर्विभुर्वा सोऽपि कर्ताकर्ता वा कर्तापि भोक्ताभोक्ता वाऽभोक्ताप्यनेक एको वा सोऽपि सविशेषो निर्विशेषो वा निर्विशेषज्ञानात्केनचित्समुचितान्मोक्षः केवलाद्वा केवलज्ञाननिवर्त्यः प्रपञ्चः सत्यः मिथ्याभूतो वेत्येवमादिरूपो यस्य तम् । अत्र हेतुमाह—आत्मवन्तमप्रमत्तं शमदमादिपरं कर्माणि 'गुणा गुणेषु वर्तन्ते' इतिबुद्ध्या क्रियमाणानि न निबध्नन्ति अनिष्टादिरूपं फलं नारभन्ते राज्ञामतिप्रबलत्वात्तान्विजित्य धनमाहर्तुं मम सामर्थ्यमस्ति न वेति संशयमतिप्रबलात्मस्वरूपनिश्चयेन मुक्त्वा धनं जितवाँस्त्वमेवात्र दृष्टान्त इति ध्वनयन्नाह—धनञ्जयेति ॥ ४१ ॥

प० टी०—अथ प्रागुक्तां कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठामुपसंहरन्नाह—**योगसंन्यस्तकर्माणमिति**-द्वाभ्याम् । योगेन परमेश्वराराधनरूपेण तस्मिन् संन्यस्तानि कर्माणि येन तं तथा ज्ञानेनाकर्त्रात्मबोधेन संछिन्नः संशयो देहाभिमानलक्षणो यस्य तमात्मवन्तं प्रमादशून्यं सावधानं कर्माणि लोकसंग्रहार्थं कृतानि न निबध्नन्ति । तदुक्तम्—'यथा पर्वतमादीप्तं न श्रयन्ति मृगाद्विजाः । तद्वद् ब्रह्मविदो दोषा नाश्रयन्ति कदाचन' इति ॥ ४१ ॥

रा० टी०—ज्ञानसाधनमनुवदन्ज्ञानफलं प्रपञ्चयति—**योगेति** । भगवति मनोयोगेन तस्मिन्संन्यस्तं समर्पितं कर्म येन तं योगसंन्यस्तकर्माणं ज्ञानेन छिन्नसंशयमात्मवन्तं परमात्मभक्तं हे धनञ्जय कर्माणि न निबध्नन्ति मुक्तो भवतीत्यर्थः ॥ ४१ ॥

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ॥
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसं-
वादे [1]यज्ञविभागयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

त० टी०—यस्मादेवं तस्मादज्ञानात्संभूतं समुत्पन्नं हृत्स्थम् 'स्वान्तं हृन्मानसं मनः' इति कोशात् हृदि मनसि स्थितं सर्वार्थभ्रंशहेतुमेनं संशयम् आत्मनो ज्ञानासिना मयोपदिष्टेनात्मविषयकज्ञानरूप-खड्गेन छित्त्वा योगं मयोपदिष्टं निष्कामकर्म आतिष्ठ, यथाधिकारमाचर। भारतेति संबोधनेन भरतवं-शोद्भवस्य क्षत्रियश्रेष्ठस्य तव युद्धमेव प्रधानं कर्मेति सूचितम्। तस्मादुत्तिष्ठ तदेव कुर्वित्यर्थः ॥ ४२ ॥

ज्ञानोपायतयाऽसङ्गकर्मनिष्ठा यथार्हतः। हरिणा भक्तसंसारच्छेदायेहोपशिक्षिता ॥ १ ॥

इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवकाश्मीरिभट्टाचार्यविरचितायां ज्ञानयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

म० टी०—यस्मादेवमज्ञानादविवेकात्संभूतमुत्पन्नं हृत्स्थं हृदि बुद्धौ स्थितं कारणस्याश्रयस्य च ज्ञाने शत्रुः सुखेन हन्तुं शक्यत इत्युभयोपन्यासः। एनं सर्वानर्थमूलभूतं संशयं आत्मनो ज्ञानासिना आत्मवि-षयकनिश्चयखड्गेन छित्त्वा योगं सम्यग्दर्शनोपायं निष्कामकर्म आतिष्ठ कुरु। अत इदानीमुत्तिष्ठ युद्धाय हे भारत! भरतवंशे जातस्य युद्धोद्यमो न निष्फल इति भावः ॥ ४२ ॥

स्वस्मिन्नीशत्वबोधेन भक्तिश्रद्धे दृढीकृते ॥ धीहेतुः कर्मनिष्ठा च हरिणेहोपसंहृता ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्रीमद्भगवद्गीतागूढार्थदीपिकायां ब्रह्मार्पणयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

शं० टी०—यथा ब्रह्मवित्तमो ज्ञानसंछिन्नसंशयत्वाद्योगसंन्यस्तसर्वकर्मा सन् कर्मबन्धनिर्मुक्तस्तथा त्वमपि ज्ञानसंछिन्नसंशयो भूत्वा योगसंन्यस्तकर्मा सन् कर्मनिष्ठो भवेत्याह—**तस्मादिति**। यस्मात्संशयवान् तद्दोषेणैव कर्मज्ञानयोगयोरन्यतरप्रवृत्त्यनुपपत्त्या स्वयमुभयभ्रष्टो भवति तस्मात् हे भारत त्वमज्ञानसंभूतं स्वस्याविक्रियब्रह्मात्मत्वाऽदर्शनलक्षणं यदज्ञानं तस्मादेव संभूतमात्मनः स्वस्य हृत्स्थं चित्तगतं संशयं मोक्ष-साधनं ज्ञानं वाऽन्यद्वा ज्ञानं च परोक्षं वापरोक्षं वा ज्ञानेनाविद्यातत्कार्याणां निःशेषनिवृत्तिरस्ति वा न वेत्यादिल-क्षणं सन्देहं ज्ञानासिना ज्ञानं ब्रह्मैवाहमिति स्वस्य निर्विकारेऽद्वितीये परे ब्रह्मण्येवात्मप्रत्ययोऽप्राति-बद्धस्तदेवासिस्तेनैनं निरुक्तलक्षणं संशयमात्मनाशकं छित्त्वोत्तिष्ठ व्युत्थाय योगं कर्मयोगमातिष्ठ समाचर युध्यस्वेत्यर्थः ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वती-कृतौ गीतातात्पर्यबोधिन्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्री० टी०—**तस्मादिति**। यस्मादेवं तस्मादात्मनोऽज्ञानेन संभूतं हृदि स्थितमेनं संशयं शोकादिनिमित्तं देहात्मविवेकज्ञानखड्गेन छित्त्वा परमात्मज्ञानोपायभूतं कर्मयोगमातिष्ठाश्रय तत्र च प्रथमं प्रस्तुताय युद्धा-योत्तिष्ठ हे भारत। क्षत्रियत्वेन युद्धस्य स्वधर्मत्वं दर्शितम् ॥ ४२ ॥

पुमवस्थादिभेदेन कर्मज्ञानमयी द्विधा। निष्ठोक्ता येन तं वन्दे शौरिं संशयसंछिदम् ॥ १ ॥

इति सुबोधिन्यां टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

---

१ ज्ञानयोगोनाम। ज्ञान कर्मसंन्यासयोगो नाम। ब्रह्मार्पणयोगो नाम। इति पाठाः।

स० टी०—यस्मादेवं ततोऽज्ञानादुत्पन्नं च स्थितं मतौ । कारणस्याश्रयस्यापि ज्ञाने सति सुखेन वै ॥१॥ निहन्तुं शक्यते शत्रुरुपन्यासो द्वयोरिति ॥ ब्रह्मैक्यबोधखड्गेन छित्त्वा भरतवंशज ॥ २ ॥ निष्कामकर्मयोगं त्वमाश्रय ज्ञानसाधनम् ॥ अत उत्तिष्ठ युद्धाय सन्नद्धो भव धीरधीः ॥ ३ ॥ ४२ ॥

स्वस्मिन्नीशत्वबोधाद्भगवति सुतनौ भक्तिरापादिताद्धा धीहेतुः कर्मनिष्ठा क्रतुभिरपि तथा ज्ञाननिष्ठोत्तमोक्ता ॥ सत्यं ब्रह्मैक्यतत्त्वं प्रतिपदमुदितं दृश्यमिथ्यात्वमेवं येन श्रीशान्तिधाम्ना तमिह मुररिपुं कृष्णमेवावलम्बे ॥ १ ॥ इति भावप्रकाशे श्रीसदानन्दविदाकृते ॥ ब्रह्मनिष्ठाप्रधानोऽयं चतुर्थः पूर्णतां गतः ॥ २६४ ॥ आदित आरभ्य टीकाश्लोकसंख्या ॥ १५७० ॥

भा० टी०—यस्माच्चित्तशुद्धिलभ्यं ज्ञानमेवंभूतं यस्माच्च संशयात्मा विनश्यति यस्माच्च ज्ञानसंछिन्नसंशयः कर्मभिर्न निबध्यते तस्मात्पापिष्ठमात्मनः संशयमज्ञानादविवेकाज्जातं बुद्धौ स्थितं शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः खड्गः तेनात्मनो ज्ञानासिना छित्त्वा योगमात्मज्ञानोपायं कर्मानुष्ठानमातिष्ठ कुर्वित्यर्थः । इदानीं तु स्वधर्मभूताय युद्धायोत्तिष्ठ भारतेति तत्र योग्यतासूचकं संबोधनम् । तदनेन चतुर्थाध्यायेन योगस्य संप्रदायसिद्धत्वं भगवतो वासुदेवस्य सर्वज्ञत्वमीश्वरत्वं च प्रतिपाद्य योग्यतासंपत्तये कर्मनिष्ठां तत्साध्यां ज्ञाननिष्ठामत्युत्तमां तत्र प्रणिपातादीनि बहिरङ्गसाधनानि श्रद्धादीन्यन्तरङ्गाणि तस्याः फलं सर्वानर्थनिवृत्त्या ब्रह्मभावमतिपापिष्ठं संशयं चाभिदधताऽशेषदोषवन्तं संशयं विहायोत्तमाधिकारिणो ज्ञाननिष्ठाऽपरस्य कर्मनिष्ठेति स्थापितम् ॥ ४२ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीबालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिविदुषा विरचितायां श्रीगीताभाष्योत्कर्षदीपिकायां चतुर्थोऽध्यायः ॥ ४ ॥

प० टी०—तस्मादज्ञानेति । यस्मादेवं तस्मादात्मनोऽज्ञानसंभूतं हृत्स्थं हृदिस्थं संशयं ज्ञानासिनात्मज्ञानखड्गेन छित्त्वा योगं कर्मयोगं क्षात्रधर्मोचितमातिष्ठाश्रय तदर्थमुत्तिष्ठ भारतेति संबुद्धिरुत्तेजनार्था ॥ ४२ ॥

अथाध्यायतात्पर्यम् ।

ब्राह्मं कर्मागमोक्तं द्विविधमपि विनश्यत्फलं तद्धि कर्म स्यात्तच्चाकर्म यत्स्यादमृतफलमतः कर्मनैष्कर्म्ययोस्तु । अन्योऽन्यं साहचर्यं भवति तदखिलं मामिहोद्दिश्य कार्यं तद्वै ब्रह्मार्पणं स्याद्विविधयजनतः प्राह पार्थं चतुर्थे ॥१॥

इति श्रीमद्दैवज्ञपण्डितसूर्यवि० भ० टी० परमार्थप्रपायां ब्रह्मार्पणयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

रा० टी०—उपपादितं कर्मणः कर्तव्यत्वमुपसंहरति—तस्मादिति । ज्ञानोपायानुष्ठानाननुष्ठानयोरर्थानर्थवत्त्वादज्ञानसंभूतं हृद्गतमात्मनः संशयं ज्ञानासिना ज्ञानाख्यखड्गेन छित्त्वा योगं ज्ञानोपायं कर्मानुतिष्ठ कुरु, हे भारत उत्तिष्ठ उद्युक्तो भवेति ॥ ४२ ॥

इति गीतार्थसंग्रहे राघवेन्द्रयतिकृते चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ॥ ५ ॥

अर्जुन उवाच—**संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।**
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

त० टी०—पूर्वाध्याये कर्मयोगमवश्यकर्तव्यतयोक्त्वा ज्ञाननिष्ठस्य कर्मनिरपेक्षत्वमभिधायान्ते पुनः कर्मयोगमेव भगवानुपदिष्टवान् । तत्र मुमुक्षूणां कर्मज्ञानयोर्युगपदेकेनानुष्ठानासंभवात् द्वयोर्मध्ये किं-

श्रेयोऽनुष्ठानमिति संदिहानोऽर्जुन उवाच—संन्यासमिति । हे कृष्ण स्वभक्तपापकर्षक ‘ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ’ इत्यादिना ‘ श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ’ इत्यादिना च कर्मणां संन्यासं सम्यङ् न्यस्यन्ते समाप्यन्ते कर्माणि यत्रेति संन्यासः ज्ञानयोगस्तं शंससि, ‘ ज्ञानासिना संशयं छित्त्वा योगमातिष्ठ ’ इति च पुनर्योगं कर्मानुष्ठानं शंससि । तथा चैकेन मुमुक्षुणा द्वयोरेकदाऽनुष्ठानं न संभवति विरुद्धत्वात् । अतस्तयोः कर्मज्ञानयोर्मध्ये यदेकं श्रेयः श्रेष्ठं सुनिश्चितं स्यात्तन्मे मह्यं ब्रूहि ॥ १ ॥

म० टी०—अध्यायाभ्यां कृतो द्वाभ्यां निर्णयः कर्मबोधयोः । कर्मतत्त्यागयोर्द्वाभ्यां निर्णयः क्रियतेऽधुना ॥ तृतीयेऽध्याये ज्यायसी चेत्कर्मणस्त इत्यादिनाऽर्जुनेन पृष्टो भगवान्ज्ञानकर्मणोर्विकल्पसमुच्चयासंभवेनाधिकारिभेदव्यवस्थया लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयेत्यादिना निर्णयं कृतवान् । तथा चाज्ञाधिकारिकं कर्म न ज्ञानेन सह समुच्चीयते तेजस्तिमिरयोरिव युगपदसंभवात् कर्माधिकारहेतुभेदबुद्ध्यपनोदकत्वेन ज्ञानस्य तद्विरोधित्वात् । नापि विकल्प्यते एकार्थत्वाभावात् ज्ञानकार्यस्याज्ञाननाशस्य कर्मणा कर्तुमशक्यत्वात् “तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ” इति श्रुतेः। ज्ञाने जाते तु कर्म कार्यं नापेक्ष्यत एवेत्युक्तं यावानर्थ उदपान इत्यत्र । तथाच ज्ञानिनः कर्मानधिकारे निश्चिते प्रारब्धकर्मवशाद्वृथाचेष्टारूपेण तदनुष्ठानं वा सर्वकर्मसंन्यासो वेति निर्विवादं चतुर्थे निर्णीतम् । अज्ञेन त्वन्तःकरणशुद्धिद्वारा ज्ञानोत्पत्तये कर्माण्यनुष्ठेयानि “ तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ” इति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति भगवद्वचनाच्च । एवं सर्वकर्माणि ज्ञानार्थानि तथा सर्वकर्मसंन्यासोऽपि ज्ञानार्थः श्रूयते “ एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति” “शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्”, “त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम् ”, “सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्” इत्यादौ तत्र कर्मतत्त्यागयोरारादुपकारकसन्निपत्योपकारकयोः प्रयाजावघातयोरिव न समुच्चयः संभवति विरुद्धत्वेन यौगपद्याभावात् । नापि कर्मतत्त्यागयोरात्मज्ञानमात्रफलत्वेनैकार्थत्वादतिरात्रयोः षोडशिग्रहणाग्रहणयोरिव विकल्पः स्यात् द्वारभेदेनैकार्थत्वाभावात् । कर्मणो हि पापक्षयरूपमदृष्टमेव द्वारं संन्यासस्य तु सर्वविक्षेपाभावेन विचारावसरदानरूपदृष्टमेव द्वारं नियमापूर्वं तु दृष्टसमवायित्वादवघातादाविव न प्रयोजकं तथा चादृष्टार्थदृष्टार्थयोरारादुपकारकसन्निपत्योपकारकयोरेकप्रधानार्थत्वेऽपि विकल्पो नास्त्येव प्रयाजावघातादीनामपि तत्प्रसङ्गात् । तस्मात् क्रमेणोभयमप्यनुष्ठेयम् । तत्रापि संन्यासानन्तरं कर्मानुष्ठानं चेत्तदा परित्यक्तपूर्वाश्रमस्वीकारेणारूढपतितत्वात् कर्मानधिकारित्वं प्राक्तनसंन्यासवैयर्थ्यं च तस्मादृष्टार्थत्वाभावात् प्रथमकृतसंन्यासेनैव ज्ञानाधिकारलाभे तदुत्तरकाले कर्मानुष्ठानवैयर्थ्यं च तस्मादादौ भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानादन्तःकरणशुद्धौ तीव्रेण वैराग्येण विविदिषायां दृढायां सर्वकर्मसंन्यासः श्रवणमननादिरूपवेदान्तवाक्यविचाराय कर्तव्य इति भगवतो मतम् । तथा चोक्तं ‘ न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते’ इति, वक्ष्यते च ‘आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते’ इति । योगोऽत्र तीव्रवैराग्यपूर्विका विविदिषा । तदुक्तं वार्तिककारैः ‘ प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः । ब्रह्मावाप्त्यै तु तत्त्यागमीप्सन्तीति श्रुतेर्बलात् ’ इति । स्मृतिश्च ‘ कषायपक्तिः कर्मभ्यः ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ’ इति । मोक्षधर्मे च ‘ कषायं पाचयित्वा च श्रेणीस्थानेषु च त्रिषु । प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमम् । भावितैः करणैश्चायं बहुसंसारयोनिषु । आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे । तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः । त्रिष्वाश्रमेषु को-

न्वर्थो भवेत्परमभीप्सितः' इति। मोक्षं वैराग्यम्। एतेन क्रमाक्रमसंन्यासौ द्वावपि दर्शितौ। तथा च श्रुतिः " ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी भूत्वा प्रव्रजेद्यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति तस्मादज्ञस्याविरक्ततादशायां कर्मानुष्ठानमेव तस्यैव विरक्ततादशायां संन्यासः श्रवणाद्यवसरदानेन ज्ञानार्थ इति दशाभेदेनाज्ञमधिकृत्यैव कर्मतत्त्यागौ व्याख्यातुं पञ्चमषष्ठावध्यायावारभ्येते। विद्वत्संन्यासस्तु ज्ञानबलादर्थसिद्ध एवेति संदेहाभावान्नात्र विचार्यते। तत्रैकमेव जिज्ञासुमज्ञं प्रति ज्ञानार्थत्वेन कर्मतत्त्यागयोर्विधानात्तयोश्च विरुद्धयोर्युगपदनुष्ठानासंभवान्मया जिज्ञासुना किमिदानीमनुष्ठेयमिति संदिहानोऽर्जुनः पृच्छति—संन्यासमिति। हे कृष्ण सदानन्दरूप भक्तदुःखकर्षणेति वा कर्मणां यावज्जीवादिश्रुतिविहितानां नित्यानां नैमित्तिकानां च संन्यासं त्यागं जिज्ञासुमज्ञं प्रति कथयसि वेदमुखेन पुनस्तद्विरुद्धं योगं च कर्मानुष्ठानरूपं शंससि " एतमेव प्रव्रजिनो लोकमिच्छन्तः प्रव्रजन्ति", "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन " इत्यादिवाक्यद्वयेन। निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत। इति गीतावाक्यद्वयेन वा तत्रैकमज्ञं प्रति कर्मतत्त्यागयोर्विधानाद्युगपदुभयानुष्ठानासंभवात्, एतयोः कर्मतत्त्यागयोर्मध्ये यदेकं श्रेयः प्रशस्यतरं मन्यसे कर्म वा तत्त्यागं वा तन्मे ब्रूहि सुनिश्चितं तव मतमनुष्ठानाय॥१॥

शं० टी०—कर्मण्यकर्म यः पश्येदित्यारभ्य कर्मसंन्यासमुपक्रम्य'ज्ञानाग्निदग्धकर्माणं', 'शारीरं केवलं कर्म' 'यदृच्छालाभसंतुष्टः', 'सर्वं कर्माखिलं पार्थ', 'ज्ञानाग्निः सर्वकर्माणि', 'योगसंन्यस्तकर्माणम्'इत्येतैर्वाक्यैर्ब्रह्मविदो ब्रह्मनिष्ठस्य कर्तव्यः कर्मसंन्यास एवेति प्रतिपाद्येदानीं कर्मसंन्यासकर्मयोगयोरेकदैकपुरुषाऽननुष्ठेयत्वम्'उभयोरव्यवहितव्यवहितसाधनभावेनैकार्थोपयोगित्वं, फलैकत्वेऽपि तयोः साध्यसाधनभावेन पूर्वापरभावित्वं, कर्मसाधनसाध्ये ज्ञाने संप्राप्ते ब्रह्मविदः कर्तव्यः सर्वकर्मसंन्यास एवेत्याद्यर्थनिरूपणाय पञ्चमाध्याय आरभ्यते। तत्रादौ लोकसंग्रहमेवापीति विदुषो लोकहितार्थं कर्म कर्तव्यमिति कर्मयोगमुपक्रम्योपक्रान्ते वर्त एव च कर्मणीति तत्र स्वदृष्टान्तं विधाय गुणा गुणेषु वर्तन्त इतिन्यायेनानुष्ठातव्यमित्यनुष्ठानप्रक्रियां सूचयित्वा एवं पूर्वैः पूर्वतरं कृतमिति तस्य शिष्टाभ्युपगतत्वं दर्शयित्वा तस्मिन्नेव कर्मयोगे कुरु कर्मैव तस्मात्त्वमिति योगमातिष्ठोत्तिष्ठेति संन्यासेन सहोपदिष्टे सति कर्मसंन्यासकर्मानुष्ठानयोरुभयोर्युगपत्कर्तव्यत्वेन प्राप्तयोश्चक्षुरुन्मीलननिमीलनवदन्योन्यविरोधादेकेनैकदा कर्तुमशक्यत्वात्, द्वयोरन्यतरस्य कर्तव्यत्वे प्राप्ते तयोर्यच्छ्रेष्ठतरं पुमर्थसाधकं तज्ज्ञात्वैकं कर्तुं शक्यत इति तदन्यतरश्रेष्ठत्वजिज्ञासयार्जुन उवाच—संन्यासमिति। नन्वत्र एतयोः कर्मसंन्यासकर्मयोगयोर्यच्छ्रेष्ठतरं तन्मे ब्रूहीत्यर्जुनस्य प्रश्नः किं विद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा किमविद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा उत विद्वदविद्वत्कर्तृकसंन्यासकर्मयोगयोर्वेति चेदुच्यते। नाद्यः निरन्तरसमाधिसमुत्पन्नसम्यग्ज्ञानेन ब्रह्मैवाहमिति निष्क्रिये परे ब्रह्मण्येवात्मभावमुपेत्य सदा तदात्मनैव तिष्ठतो ब्रह्मविदस्तद्विपरीतात्माज्ञानमूलकानात्मतादात्म्यासंभवादहंकारैककारणकः कर्मयोगो न कथंचन सिध्यति स्वविरोधिनि सम्यग्ज्ञाने विजृम्भमाणे सत्यर्के तमस इवाज्ञानस्य स्थित्यनुपपत्तौ विदुषोऽनात्मतादात्म्यं न संभवत्येव तदसंभवे तत्कारणकाहंकारासंभवात्तदेकनिबन्धनः कर्मयोगः स्वप्नेऽपि संभावयितुं न शक्यते। नहि जाग्रतः स्वप्नार्थसंबन्धवद्ब्रह्मविद्यायामेव जाग्रतो ब्रह्मविदोऽनात्मतादात्म्यतत्कार्यसंबन्धः संभवति तत्सत्त्वेकृतकृत्यताऽभावप्रसङ्गात् " तद्ब्रह्माहमस्मीति कृतकृत्यो भवति", " नैवास्ति किंचित्कर्तव्यम् " इत्यादिश्रुतिस्मृत्यप्रमाण्यप्रसङ्गात्प्रत्यक्षविरोधाच्च वक्रकोटरत्वादिधर्मसंदर्शिनः स्थाणौ पुनश्चोरत्वबुद्धिः पलायनं च न संभवति यथा तथा ब्रह्मैवात्मानं विजानतस्तदानन्दमनुभवतः सर्वं ब्रह्मैव पश्यतो ब्रह्मविदोऽनात्मतादात्म्यापत्तिः कर्तृत्वबुद्धिः कामना च कर्मणि प्रवृत्तिश्च न संभवत्येवाऽतो

विद्वत्कर्तृककर्मसंन्यासकर्मयोगविषयो न भवति । नापि तृतीयः विद्वत्त्वाविद्वत्त्वयोः परस्परविरोधिन्योरेकाधिकरणत्वानुपपत्तौ प्रश्नासंभवात् परिशेषादविद्वत्कर्तृकयोरेव कर्मसंन्यासकर्मयोगयोर्द्वयोरेकदैव कर्तव्यत्वप्रसक्तावप्युभयोः परस्परविरुद्धत्वेन सहप्रयोगायोगात्तयोरन्यतरस्य प्रशस्यतरत्वे सिद्धे तत्रैको मुमुक्षुणा कर्तुं शक्यत इति तयोरेकस्य श्रेष्ठत्वजिज्ञासुरर्जुनः पृच्छति—**संन्यासमिति** । सदानन्दरूपत्वात्परमात्मा कृष्ण इत्युच्यते तस्य संबुद्धिर्हे कृष्ण पूर्वोक्तैर्वचनैः संन्यासं विध्युक्तानामवश्यमनुष्ठेयानां कर्मणां त्यागं शंससि कथयसि पुनर्भूयोऽपि कुरु कर्मैव तस्मात्त्वमिति योगमातिष्ठेति च कर्मयोगमपि शंससि क्रिययाप्यधिकारितः साधनसंपत्त्या चाश्रमेण च परस्परविरुद्धौ संन्यासकर्मयोगावेकेनैकदा कर्तुमशक्यौ मह्यं तत्कर्तव्यत्वेन विधत्से। ममात्र संशयः—कर्तव्यः कर्मयोगो वा संन्यासो वेति। द्वयोरप्याश्रमादिभेदेन विरुद्धत्वादेकेनैकदा कर्तुमशक्यत्वात्तयोर्यच्छ्रेयःसाधनं भवति तदेव कर्तव्यं न तु द्वयमिति भात्यत एतयोर्यदेकं प्रशस्यतरं मोक्षसाधनत्वेन भवता सुनिश्चितं तदेव मे ब्रूहीत्यर्थः ॥ १ ॥

श्री० टी०—निवार्य संशयं जिष्णोः कर्मसंन्यासयोगयोः । जितेन्द्रियस्य च यतेः पञ्चमे मुक्तिमब्रवीत् ॥ अज्ञानसंभूतं संशयं ज्ञानासिना छित्त्वा कर्मयोगमातिष्ठेत्युक्तं तत्र पूर्वापरविरोधं मन्वानोऽर्जुन उवाच—**संन्यासमिति** । यस्त्वात्मरतिरेव स्यादित्यादिना सर्वं कर्माखिलं पार्थेत्यादिना च ज्ञानिनः कर्मसंन्यासं कथयसि ज्ञानासिना संशयं छित्त्वा योगमातिष्ठेति पुनर्योगं च कथयसि। नच कर्मसंन्यासः कर्मयोगश्चैकस्यैकदैव संभवतः विरुद्धस्वरूपत्वात् तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्ये सति मम यच्छ्रेयः श्रेष्ठं सुनिश्चितं तदेकं ब्रूहि ॥ १ ॥

स० टी०—श्रियो वासं वृन्दावनकृतनिवासं श्रुतिपदं कलावासावासं सुरनरसुखावासजलधिम् ॥ महोल्लासोल्लासं सुजनहृदिवासं गुणनिधिं प्रतिश्वासं वन्दे निरवधिविलासं मधुरिपुम् ॥ १ ॥ अध्यायाभ्यां कृतो द्वाभ्यां निर्णयः कर्मबोधयोः ॥ कर्मतत्त्यागयोर्द्वाभ्यां निर्णयः क्रियतेऽधुना ॥ २ ॥ तृतीय ईरितोऽध्याये विभागः कर्मबोधयोः ॥ अज्ञाधिकारिकं कर्म न समुच्चीयते धिया ॥ ३ ॥ परस्परविरुद्धत्वात्तेजस्तिमिरयोरिव ॥ ऐकार्थ्याभावतो नापि कर्मयोगो विकल्प्यते ॥ ४ ॥ धीकार्याज्ञानबाधो हि कर्तुं शक्यो न कर्मणा ॥ नापेक्षते समुत्पन्नं ज्ञानं कर्मफलं मनाक् ॥ ५ ॥ तथाच ज्ञानिनः कर्मानधिकारे विनिश्चिते ॥ प्रारब्धवशतस्तस्य कर्मानुष्ठानमस्तु वा ॥ ६ ॥ कर्मत्यागोऽस्तु वेत्येवं चतुर्थे निर्णयः कृतः ॥ चित्तशुद्ध्यात्मविज्ञानप्राप्तये ज्ञानिनः सदा ॥ ७ ॥ अनुष्ठेयानि कर्माणि न तत्त्यागः प्रशस्यते ॥ सर्वकर्मपरित्यागो ज्ञानार्थः श्रूयते तथा ॥ ८ ॥ एतमेवेतिवाक्यादौ संन्यासोऽपि प्रशस्यते ॥ त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥ ९ ॥ प्रयाजादिवदेवेदं कर्मारादुपकारकम् ॥ अवघातवत्तत्त्यागः सन्निपत्योपकारकः ॥ १० ॥ तयोः समुच्चयो नास्ति विरुद्धत्वेन सर्वथा ॥ न वा तयोर्विकल्पोऽस्ति ज्ञानमात्रफलत्वतः ॥ ११ ॥ द्वारभेदेन चैकार्थ्याभावात्स च निदर्श्यते ॥ कर्मणोऽघक्षयादृष्टमेव द्वारं विनिश्चितम् ॥ १२ ॥ संन्यासस्य तु विक्षेपाभावहेतुतया मतौ ॥ दृष्टद्वारत्वमेवास्ति विकल्पो नास्त्यतस्तयोः ॥ १३ ॥ तस्माद्द्वयं क्रमेणैतत्पुंसानुष्ठेयमादरात् ॥ संन्यासानन्तरं कर्मानुष्ठानं नैव संभवि ॥ १४ ॥ त्यक्तस्य पुनरादाने आरूढपतितो भवेत् ॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ॥ १५ ॥ प्रायश्चित्तं न पश्यामो येन शुद्ध्येत्स आत्महा ॥ तस्मादादावनुष्ठानात्कर्मणामीश्वरार्पणात् ॥ १६ ॥ चित्तशुद्ध्याप्तसत्तीव्रवैराग्येण विवेकिनः ॥ जिज्ञासायां दृढायां तु संन्यासः सर्वकर्मणाम् ॥ १७ ॥ श्रवणाद्यात्मवेदान्तविचाराय विधीयते ॥ इत्येवं निश्चितं भाति श्रीमद्भगवतो मतम् ॥ १८ ॥ कुतो विनिश्चितं ह्येवं शृणु वेदविदां गिरः ॥ प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः ॥ १९ ॥ ब्रह्मावाप्त्यै तु तत्त्याग ईप्सन्तीति श्रुतेर्बलात् ॥ इत्युक्तं संप्रदायज्ञैर्वार्तिके

श्रीसुरेश्वरैः ॥ २० ॥ कषायान्याचयित्वा च श्रेणीस्थानेषु च त्रिषु ॥ प्रव्रजेच्च परं स्थानं परिव्राज्यमनुत्तमम् ॥ २१ ॥ भावितैः करणैश्चायं बहुसंसारयोनिषु ॥ आसादयति शुद्धात्मा मोक्षं वा प्रथमाश्रमे ॥ २२ ॥ तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः ॥ त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत्परमभीप्सितम् ॥ २३ ॥ इत्येवं मोक्षधर्मे श्रीव्यासेनोक्तं महर्षिणा ॥ तस्माद्वैराग्यपर्यन्तं कर्मानुष्ठानमुच्यते ॥ २४ ॥ विरक्ततादशाया तु संन्यासो ज्ञानसाधनम् ॥ ततोऽज्ञमधिकृत्यैव कर्मतत्त्यागयोर्विधिः ॥ २५ ॥ सम्यक्तत्त्वविदो नास्ति चोदना कापि वैदिकी ॥ लौकिकी वा यतस्तस्य कृतकृत्यतया हरिः ॥ २६ ॥ कृत्याभावं स्वयं पूर्वमवदन्निगमावधिः ॥ विद्वत्संन्यास आत्मज्ञे सिद्ध एवार्थतो यतः ॥ २७ ॥ संदेहाभावतस्तस्मात्स च नात्र विचार्यते ॥ तत्रैकमेव जिज्ञासुमज्ञं प्रत्यात्मलब्धये ॥ २८ ॥ कर्मतत्त्यागयोः शास्त्रे विधानात्तत्र चार्जुनः ॥ विरुद्धयोरनुष्ठानं युगपन्नैव संभवेत् ॥ २९ ॥ मया जिज्ञासुनेदानीं किमनुष्ठेयमादरात् ॥ इति संशयवानेवमुवाच श्रीहरिं प्रति ॥ ३० ॥ यावज्जीवादिवेदोक्तकर्मणां त्यागमित्यपि ॥ जिज्ञासुं कथयस्यज्ञं प्रति वेदगिरा स्वयम् ॥ ३१ ॥ तद्विरुद्धं पुनः कर्मानुष्ठानं च प्रशंससि ॥ एतमेवेति वेदेन निराशीरिति च स्वयम् ॥ ३२ ॥ तमेतमिति वेदेन कुरु कर्मेति च स्वयम् ॥ तयोरेकेन युगपत्करणं दुर्घटं द्वयोः ॥ ३३ ॥ कर्मतत्त्यागयोर्मध्ये यदेकं मन्यसे वरम् ॥ तन्मह्यं निश्चितं ब्रूहि स्वनुष्ठानाय ते मतम् ॥ ३४ ॥ सदानन्दस्वरूपोऽसि कृष्ण भक्तार्तिकर्षण ॥ संहृत्य संशयार्तिं मे निजानन्दे नयस्व माम् ॥ ३५ ॥ १ ॥

भा० टी०—निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् । यदृच्छालाभसंतुष्ट इत्यादिना सर्वकर्मसंन्यासं, छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारतेति कर्मयोगं च श्रुत्वोभयोश्च स्थितिगतिवत्परस्परविरोधादेकेन सह कर्तुमशक्यत्वात् कालभेदेन विधानाभावादर्थात्तयोरन्यतरस्य कर्तव्यताप्राप्तौ सत्यामज्ञस्याशुद्धचेतस एतयोः संन्यासकर्मयोगयोः किं श्रेयस्करमिति बुभुत्सयाऽर्जुन उवाच—**संन्यासमिति** । संन्यासं परित्यागं कर्मणां शास्त्रीयाणामनुष्ठानविशेषाणां पुनस्तेषामनुष्ठानं च " एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन " इत्यादिवेदमूलकैः पूर्वोक्तैर्वचनैः शंससि कथयसि । कृष्णेति संबोधयन् मया त्यागः कर्तव्य उत कर्मानुष्ठानमिति तत्र तत्र मच्चित्ताकर्षणं करोषीति सूचयति अतो मे कतरच्छ्रेय इति संशयो भवति तस्माद्यदेतयोरेकं प्रशस्यतरं सुनिश्चितं तन्मे ब्रूहि निःसंशयाय ॥ १ ॥

प० टी०—अथ परस्पराविरुद्धयोः कर्मसंन्यासकर्मयोगयोः सकृदुपदेशात्संदिहानोऽर्जुनः पृच्छति—**संन्यासमिति** । भो कृष्ण प्रथमं कर्मणां संन्यासं शंससि पुनरनन्तरमेव योगं शंससि उपदिशसि तर्ह्येतयोर्मध्ये यच्छ्रेयः श्रेष्ठं तदेकं सुनिश्चितं यथा भवति तथा ब्रूहि ॥ १ ॥

रा० टी०—योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वेत्यादिना द्वितीये संक्षेपेणोक्तस्य तृतीयादौ विशेषतः स्पष्टीकृतस्य फलकामनादित्यागेनेश्वरार्पणबुद्ध्या वर्णाश्रमविहितकर्मानुष्ठानरूपस्य कर्मयोगस्य यदंशद्वयं कामादिवर्जनरूपमुक्तरूपकर्मानुष्ठानाख्यं चेति, तदंशद्वयरूपं तृतीयोक्तमत्राध्याये प्रपञ्च्यते—**संन्यासमिति** । पूर्वाध्याये यदृच्छालाभसंतुष्ट इत्यादिना कामादिवर्जनरूपं संन्यासं, कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतमित्यादिना वर्णाश्रमविहितकर्मणां योगमीश्वरार्पणबुद्ध्यानुष्ठानरूपं कर्मयोगं च हे कृष्ण शंससि कथयसि एतयोरुक्तलक्षणयोः संन्यासकर्मयोगयोः यच्छ्रेयः अधिकं भवति तदेकं मे मम सुनिश्चितं ब्रूहि । संन्यासस्याधिकत्वे तमेव ग्रहीष्यामि किं तद्विरोधिना कामद्वेषादियुतेन युद्धाख्यकर्मयोगेनेति भावः । यद्वा

पूर्वत्र योगसंन्यस्तकर्माणमित्यादौ पठितः संन्यासशब्दो यत्याश्रमविषयः योगमातिष्ठेत्यादौ श्रुतो योगशब्दो गृहिविषय इति प्रकल्प्य यतीनां सर्वकर्मत्यागेन ज्ञानमात्राधिकारित्वात् गृहिणां च ज्ञानत्यागेन कर्ममात्राधिकारित्वात् तयोरेकपुंनिष्ठत्वं न युक्तमितिभावेन योगसंन्यासयोर्मध्ये यच्छ्रेयस्तदेकं ग्रहीष्यामीति भावेन तयोर्मध्ये श्रेयः पृच्छति—संन्यासमिति । कर्मणां संन्यासं यत्याश्रमं संन्यस्तकर्माणमित्यनेन शंससि । पुनःकर्मणां योगमनुष्ठानलक्षणं गृहस्थाश्रमं च योगमातिष्ठोत्तिष्ठेत्यनेन शंससि । एतयोर्यत्याश्रमगृहस्थाश्रमयोः । शिष्टं प्राग्वत् । एतेनास्याध्यायस्य तृतीयोक्तकर्मयोगप्रपञ्चनपरत्वे तदानन्तर्यं स्यादिति निरस्तम् । योजनाद्वयेऽपि पूर्वाध्यायोक्तोपजीवनेनैव प्रश्नस्योत्थानेन चतुर्थानन्तर्यस्योचितत्वादिति ॥ १ ॥

श्रीभगवानुवाच—संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

त० टी०—इत्येवं प्रश्नस्योत्तरं श्रीभगवानुवाच—संन्यास इति । संन्यासः ज्ञानयोगः कर्मयोगश्चेत्युभौ निःश्रेयसकरौ । तयोस्तु कर्मसंन्यासाज्ज्ञानयोगात्कर्मयोगो विशिष्यते श्रेष्ठो भवति॥२॥

म० टी०—एवमर्जुनस्य प्रश्ने तदुत्तरं स श्रीभगवानुवाच—संन्यास इति । निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तयोस्तु कर्मसंन्यासादनधिकारिकृतात्कर्मयोगो विशिष्यते श्रेयानधिकारसंपादकत्वेन ॥ २ ॥

शं० टी०—एवं कर्मसंन्यासकर्मयोगयोरेकेनैकदाऽननुष्ठेयत्वे सिद्धे तयोरन्यतरस्य ज्यायस्त्वनिर्णयाय 'देशकालवयोऽवस्थाबुद्धिशक्त्यनुरूपतः। धर्मोपदेशो भैषज्यं वक्तव्यं धर्मपारगैः ' इतिन्यायेनाधिकार्यनुरूपमुत्तरं श्रीभगवानुवाच—संन्यास इति । ब्रह्मणि नितरामासः संन्यासः बाह्यप्रवणताराहित्येन चित्तस्य ब्रह्मणि ब्रह्मात्मनावस्थानलक्षणो निर्विकल्पकसमाधिः प्रत्यग्दृष्ट्याऽनात्मप्रत्ययनिरासः संन्यासः सविकल्पकसमाधिः द्वावप्येतौ संन्यासौ प्रधानौ एतयोः श्रवणमननयोश्चाङ्गभूतस्तत्प्रतिकूलानां सर्वेषां च कर्मणां परित्यागलक्षणः संन्यास इत्येवं संन्यासशब्दार्थस्त्रेधा भिद्यते । अत्र प्रधानभूतौ संन्यासौ न विवक्षितौ किंत्वङ्गभूत एव सर्वकर्मसंन्यासः श्रवणादिजन्यज्ञानद्वारा मोक्षहेतुर्यस्त्वविद्वत्कर्तृकः स च स्वानुष्ठानप्राप्तचित्तशुद्धिजन्यज्ञानद्वारा मोक्षहेतुः यस्त्वविद्वत्कर्तृकः कर्मयोगः स च तावुभावपि निःश्रेयसकरौ यद्यपि मोक्षस्य साधने एव भवतस्तथाप्यविदुषः समकाले कर्तव्यत्वेन प्राप्तयोस्तयोस्तु गुणदोषविचारे क्रियमाणे सदसद्विवेकजन्यतीव्रवैराग्यतीव्रमोक्षेच्छायमनियमशमदमाद्यन्तरङ्गसाधनपौष्कल्यशून्यात्केवलप्रैषमात्रोच्चारणरूपात्संन्यासात् कर्मयोगः श्रद्धया समनुष्ठीयमानो विशिष्यते स्वानुष्ठानभवैर्गुणैर्विशेषत्वाय कल्पते श्रौतस्मार्तादिलक्षणं कर्मैव परमेश्वरप्रीत्यै श्रद्धया समनुतिष्ठतोऽविदुष ऋणत्रयनिवृत्तिस्तज्जन्य इन्द्रादिदेवताप्रसाद ईश्वरप्रसाद इन्द्रियप्रसादश्चित्तशुद्धिरेवमादिज्ञानसाधनसंपत्तिः सिध्यत्यस्माद्धेतोः कर्मयोग उक्तलक्षणात्संन्यासाद्विशिष्टतरो भवत्यतः साधनशून्येनाऽविदुषा सहसा संन्यासो न कर्तव्यः कर्मैवेश्वरार्पणबुद्ध्या सम्यक्कर्तव्यमिति सिद्धम् । ननु " न्यासमेषां तपसामतिरिक्तमाहुः " इति संन्यासस्यैवोत्कृष्टत्वं श्रूयते ततो भगवतः संन्यासन्यक्कारपूर्वकं कर्मयोगस्योत्कृष्टत्ववर्णनमयुक्तमिति चेन्न सर्वलोकानुग्रहहेतुत्वाद्भगवत्प्रवृत्तेः पूर्वं न जायते म्रियते वेत्यादिवाक्यैरमूढानामात्मतत्त्वं तत्साधनं सर्वकर्मसंन्यासं चोपदिश्य इदानीं स्वीयां स्थियां प्रज्ञां प्रकृतिं च परपारगमनशक्तिं चाऽविज्ञायाऽज्ञानात्कुतश्चिन्निमित्तात्सहसा संन्यस्य मूढाः पतिष्यन्तीति तानुद्धर्तुमत्राऽप्रकृतमपि प्रकृत्य कर्मयोगं तेषां कर्मण्येव प्रवृत्तिसिद्ध्यै कर्मयोगं स्तौति—कर्मयोगो विशिष्यत इति न तु संन्यासं निराकरोति संन्यासस्य स्वरूपत्वात्सर्वोत्तमत्वाच्च " न्यास इति ब्रह्मा

ब्रह्मा हि परः '' इति '' न्यास एवात्यरेचयत्'' इति संन्यासस्यैव ब्रह्मत्वसर्वश्रेष्ठतमत्वश्रवणात्ततः कर्मयोगस्तुतिपरमेवैतद्वचनमिति निश्चेतव्यम् ॥ २ ॥

श्री० टी०–अत्रोत्तरं श्रीभगवानुवाच–संन्यास इति । अयं भावः–नहि वेदान्तवेद्यात्मतत्त्वविदं प्रति कर्मयोगमहं ब्रवीमि यतः पूर्वोक्तेन संन्यासेन विरोधः स्यात् । अपि तु देहात्माभिमानिनं त्वां बन्धुवधादिनिमित्तशोकमोहादिकृतमेनं संशयं देहात्मविवेकज्ञानासिना छित्त्वा परमात्मज्ञानोपायभूतं कर्मयोगमातिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्य चात्मतत्त्वज्ञाने जाते सति तत्परिपाकार्थं ज्ञाननिष्ठाङ्गत्वेन संन्यासः पूर्वमुक्तः, एवं सत्यङ्गप्रधानयोर्विकल्पायोगात्संन्यासः कर्मयोगश्चेत्येतावुभावपि भूमिकाभेदेन समुच्चितावेव निःश्रेयसं साधयतः तथाऽपि तु तयोर्मध्ये कर्मसंन्यासात्सकाशात्कर्मयोगो विशिष्टो भवति ॥ २ ॥

स० टी०–एवं प्रश्नेऽर्जुनस्याह भगवानुत्तरं वचः ॥ निःश्रेयसकरौ कर्मसंन्यासौ श्रुतिसंमतौ ॥ १ ॥ मोक्षोपयोगिनौ ज्ञानोत्पत्तिहेतुतया ह्युभौ ॥ तयोस्तु कर्मसंन्यासादशुद्धस्वान्तकर्तृकात् ॥२॥ शुद्धिसंपादकत्वेन कर्मयोगो विशिष्यते ॥ ३ ॥ २ ॥

भा० टी०–अर्जुनसंशयनिवर्तकमुत्तरं श्रीभगवानुवाच–संन्यास इति । उभौ यद्यपि निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तथापि तयोस्तु कर्मसंन्यासादशुद्धचित्तेनाविरक्तेन कृतात् कर्मयोगश्चित्तशुद्ध्या वैराग्यादिजनको विशिष्यत उत्कृष्टो भवतीति कर्मयोगं स्तौति ॥ २ ॥

प० टी०–अत्रोभयोरपि श्रेष्ठत्वे एकं श्रेयो ब्रूहीति प्रश्नं भगवानाह–संन्यास इति । संन्यासः कर्मयोगश्च तावुभावधिकारिभेदेन निःश्रेयसकरौ भवतः, न ह्येकं प्रत्युभयोपदेशः । अयमर्थः । न ह्यात्मतत्त्वज्ञं प्रति कर्मयोगोपदेशः, किं तु देहात्माभिमानिनं भवादृशं बन्धुवधशोकाकुलं प्रति योगमातिष्ठेति ब्रवीमि कर्मयोगिनः शुद्धचित्तस्यात्मतत्त्वज्ञाने सति कर्मसंन्यासः संभवत्येवमुभावपि भूमिकाभेदेन निःश्रेयससाधने समुच्चितावेव तथापि तयोर्मध्ये प्रस्तुतः कर्मसंन्यासात्सकाशात्कर्मयोगो विशिष्यते विशिष्टो भवति ॥ २ ॥

रा० टी०–संन्यासयोगशब्दौ न सर्वकर्मत्यागतदनुष्ठानलक्षणयतिगृहिपरौ । तथाच तयोरन्यतरश्रेयःप्रश्नो न युक्तः । किंतु कामादिवर्जनकर्मानुष्ठानार्थकौ । तयोश्चैकपुंयोग्यत्वान्निःश्रेयसकरत्वाच्चानुष्ठेयत्वादन्यतरश्रेष्ठत्वप्रश्नो व्यर्थ एव । अथ स्वरूपज्ञानमात्रार्थं प्रश्नश्चेद्योग एव श्रेष्ठ इति भावेन परिहारमाह–संन्यास इति । संन्यासः कामादिवर्जनरूपः कर्मयोगो भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपश्च उभौ समुच्चितौ सन्तौ निःश्रेयसकरौ । तयोस्तु मध्ये कर्मसंन्यासात्कर्मणि संन्यासः कर्मसंन्यासः कर्मानुष्ठानविषये यः कामक्रोधद्वेषादिवर्जनरूपसंन्यासस्तस्माद्भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपो यः कर्मयोगः स तु विशिष्यते श्रेष्ठो भवति । द्वन्द्वत्यागात्तु संन्यासान्मत्पूजैव गरीयसीत्युक्तेः ॥ २ ॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

त० टी०–उक्तार्थे हेत्वपेक्षायां कर्मयोगिनः संन्यासित्वं वदन्, तद्धर्मान्निर्दिशति–ज्ञेय इति । य आत्मज्ञानाय कर्माणि कुर्वन् तद्व्यतिरिक्तं किंचिन्न काङ्क्षति । अत एव किमपि न द्वेष्टि, स नित्यसंन्यासी नित्यज्ञाननिष्ठो ज्ञेयः । हि यतो निर्द्वन्द्वः, रागद्वेषादिद्वन्द्वशून्यः । एवंभूतः सुखमनायासेनैव बन्धात्प्रमुच्यते ॥ ३ ॥

म० टी०–तमेव कर्मयोगं स्तौति त्रिभिः–ज्ञेय इति । स कर्माणि प्रवृत्तोऽपि नित्यं संन्यासीति ज्ञेयः ।

कोऽसौ यो न द्वेष्टि भगवदर्पणबुद्ध्या क्रियमाणं कर्म निष्फलत्वशङ्कया, न काङ्क्षति स्वर्गादिकम् । निर्द्वन्द्वो रागद्वेषरहितो हि यस्मात् सुखमनायासेन हे महाबाहो बन्धादन्तःकरणाशुद्धिरूपाज्ञानप्रतिबन्धात्प्रमुच्यते नित्यानित्यवस्तुविवेकादिप्रकर्षेण मुक्तो भवति ॥ ३ ॥

शं० टी—तत एव कर्मयोगिनं स्तौति—ज्ञेय इति । यस्त्वकुशलं कर्म न द्वेष्टि तत्राऽप्रीतिं न करोति किंतु कुशलमकुशलमपि कर्मैवेति बुद्ध्या करोति । यद्वा न द्वेष्टि द्वेषोऽप्रीतिस्तां यस्मै कस्मैचिदपि प्राणिने न करोति न काङ्क्षति यत्किंचिदपि कर्मजं फलं न काङ्क्षति । यद्वा प्राप्तस्यानर्थस्य निवृत्तिमप्राप्तस्यार्थस्य प्राप्तिं न काङ्क्षति निर्द्वन्द्वः द्वन्द्वानि शीतोष्णसुखदुःखलाभालाभादीनि तेभ्यः समबुद्ध्या निर्गतो निर्द्वन्द्वो य एवं लक्षणः स एव नित्यसंन्यासी नित्यं संन्यासोऽस्यैवेति पण्डितैर्ज्ञेयो ज्ञातव्यो हि यस्माद्रागादिदोष-रहितः परिपक्वचित्तः समबुद्ध्यादिगुणयुक्तस्तस्मादयं गृही कर्मनिष्ठोऽपि सुखं परिग्रहत्यागशीतवाताद्युपद्रव-भिक्षाटनादिदुःखराहित्यं यथा तथाऽनायासेन बन्धात्संसारात्प्रमुच्यते यथोक्तकर्मानुष्ठानेन चित्तशुद्धिं ज्ञानं च प्राप्य कालान्तरे मुक्तो भवति नत्वपक्वचित्तो यतिरपीत्यर्थः । एतेन कर्मोपासनाभ्यां परिपक्वचित्तस्यैव संन्यासाधिकार इति सूचितं भवति ॥ ३ ॥

श्री० टी०—कुत इत्यपेक्षायां संन्यासित्वेन कर्मयोगं स्तुवन् तस्य श्रेष्ठत्वं दर्शयति—ज्ञेय इति । रागद्वेषादिराहित्येन परमेश्वरार्थं कर्माणि योऽनुतिष्ठति स नित्यं कर्मानुष्ठानकालेऽपि संन्यासीत्येव ज्ञेयः । तत्र हेतुः—निर्द्वन्द्वो रागद्वेषादिशून्यो हि शुद्धचित्तो ज्ञानद्वारा सुखमनायासेन संसारात्प्रमुच्यते ॥ ३ ॥

स० टी०—कर्मयोगं तमेवेशः स्तौति लोकप्रवृत्तये ॥ स्वकर्मणि प्रवृत्तोऽपि कर्मयोग्यनहंकृतिः ॥ १ ॥ ज्ञातव्यो नित्यसंन्यासी यो न द्वेष्टि परिश्रमम् ॥ ईश्वराराधनं कुर्वन्कर्म नैष्फल्यशङ्कया ॥ २ ॥ न स्वर्गा-दिफलं किंचित्काङ्क्षति द्वन्द्ववर्जितः ॥ यतोऽनायासतश्चित्ताशुद्ध्याख्यप्रतिबन्धतः ॥ ३ ॥ विवेकादिप्रकर्षेण मुक्तो भवति शुद्धधीः ॥ ४ ॥ ३ ॥

भा० टी०—तत्र हेतुमाह—ज्ञेय इति । स निष्कामकर्मयोगी नित्यं संन्यासी ज्ञातव्यः । यत्तु यदो योगात्तदोऽध्याहारः सनित्यसंन्यासीत्येकं पदं, नित्यैः कर्मभिः सह वर्तत इति सनित्यः संन्यासी चेति तन्न । स इत्यनेनैव नित्यादिकर्मानुष्ठातुर्लाभेनाध्याहारस्य क्लिष्टकल्पनायाश्च वैयर्थ्यात् नित्यसंन्यासीति विवक्षितार्थालाभाच्च । कोऽसौ यो न द्वेष्टि दुःखं तत्साधनं च सुखं तत्साधनं च नाकाङ्क्षति रागद्वेषराहि-त्यरूपसंन्यासगुणयोगात् अयमपि संन्यासीति भावः । एतेन द्वेषमूलकानि श्येनादीनि नानुतिष्ठति स्वर्गादिफलाकाङ्क्षाप्रयुक्तानि ज्योतिष्टोमादीन्यपि तस्मात्संन्यासगुणयोगादयमपि संन्यासीति भाव इति प्रत्युक्तं, क्रियायाः कर्ममात्रसाकाङ्क्षत्वेनास्यार्थस्यार्थिकत्वात्, श्येनाद्यननुष्ठानमात्रेण सर्वत्र रागद्वेषानिवृत्त्या संन्यासिगुणयोगासिद्धेः । अत्रादिपदाभ्यामाभिचारिककर्मणामग्निष्टोमादीनां चैव लाभः श्येनादिसमभि-व्याहारात् द्वेषेत्यादिना विशेषितत्वाच्च । यद्यादिपदाभ्यां भाष्योक्तमपि लभ्यत इत्याग्रहस्तर्हि तेनैव निर्वाहे कृतमनया कुसृष्ट्या । यत्तु न द्वेष्टि भगवदर्पणबुद्ध्या क्रियमाणं कर्म निष्फलत्वशङ्कयेति तच्चिन्त्यं, संकोचे मानाभावात् संन्यासिगुणयोगालाभाच्च । हि यस्मात्सुखदुःखरागद्वेषशीतोष्णादिद्वन्द्ववर्जितः सुखमनायासेनैव बन्धात्संसारात् ज्ञानप्राप्त्या प्रमुच्यते यथा त्वं महाबाहुत्वादस्माद्युद्धादनायासेनैव मोक्ष्यसे तथेति द्योतयन्नाह—महाबाहो इति । यत्तु यद्यप्येवं तथापि हि प्रसिद्धं निर्द्वन्द्वः द्वन्द्वं सत्यानृतयोरात्मानात्मनोर्मिथुनं परस्परा-ध्यासः तद्रहितः सांख्यः रागाद्युदयहेतोरज्ञानस्यात्यन्तोच्छेदात् सुखं कर्मकरणाऽयासंविनाऽपि बन्धात् केवलेन ज्ञानेनैव मुच्यते न कर्माण्यपेक्षते । यद्वा "द्वन्द्वं वै मिथुनं प्रजायते" इति श्रुतेर्द्वन्द्वं स्त्रीपुंसयोर्मिथुनं तद्रहित

क्र्यादित्यागी संन्यासी अनायासेन मुच्यते रागादिभयस्योभयत्र तुल्यत्वात् अत्र च कुटुम्बभरणवैयग्र्याभावात् सुखं मुच्यत इत्यर्थ इति व्याचख्युः तत्प्रकरणविरोधादुपेक्ष्यम् ॥ ३ ॥

प० टी०—अथ कर्मकुशलस्योभयोरप्यनुष्ठानं सहैव भवतीत्याह—**ज्ञेय इति** । स पुरुषः कर्म कुर्वन्नपि नित्यसंन्यासी ज्ञेयः । स कः, यो न द्वेष्टि न काङ्क्षति रागद्वेषराहित्येन कृतः कर्मयोगः स एव कर्मसंन्यासो भवितुमर्हति । हि यस्मात्कारणान्निर्द्वन्द्वः निर्गतानि द्वन्द्वानि रागद्वेषसुखदुःखजयपराजयादीनि यस्मात्तथाविधः सुखं यथा भवति तथा बन्धाद्विमुच्यते । यथा प्रस्तुतं क्षात्रधर्मे शत्रुद्वेषेण राज्यलोभेन वा प्रवृत्तस्य बन्धो भवति। तद्व्यतिरिक्तस्य बन्धाभावः । तथा च स्वत एव तत्संन्यासः परिणतो भवतीत्यर्थः ॥ ३ ॥

रा० टी०—संन्यासशब्दो न यत्याश्रमपर इति भावेन तदर्थमाह—**ज्ञेय इति** । यद्यपि यदृच्छालाभेत्यादिनोक्तं कामादित्यागरूपं संन्यासं, संन्यासं कर्मणामित्यनूद्यार्जुनेन प्रश्नस्य कृतत्वात् अस्त्येव तस्य संन्यासशब्दार्थज्ञानं अतोऽसौ तं प्रति न वाच्यः । तथापि संन्यासस्योक्तं निःश्रेयसकरत्वमुपपादयितुं ज्ञानमपि तदर्थं स्मारयत्यनेनेत्यदोषः । हे महाबाहो! यो द्वेषाकाङ्क्षादिहीनः काम्यकर्मत्यागी चेत्युपलक्ष्यते स नित्यसंन्यासी ज्ञेयः स्मर्तव्य इत्यर्थः । स एव सुखं यथा भवति तथा अनायासेन बन्धात्प्रमुच्यते । हि प्रसिद्धमिति युद्धकर्म त्वया न त्याज्यमिति ॥ ३ ॥

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ॥
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

त० टी०—ननु कर्मयोगी कथं संन्यासी स्यात्कर्मज्ञानयोः फलभेदात्स्वरूपभेदाच्च पृथगेव तावित्याशङ्क्याह—**सांख्ययोगाविति** । सांख्यं ज्ञानयोगः, योगः कर्मयोग इमौ पृथग्भूतौ भिन्नफलकाविति बाला अविद्वांसः प्रवदन्ति, नतु पण्डिताः । यतः सांख्ययोगयोर्मध्ये एकमपि सम्यगास्थितः उभयोः फलमात्मज्ञानं विन्दते लभते ॥ ४ ॥

म० टी०—ननु यः कर्मणि प्रवृत्तः स कथं संन्यासीति ज्ञातव्यः कर्मतत्त्यागयोः स्वरूपविरोधात् फलैक्यात्तथेति चेत् न स्वरूपतो विरुद्धयोः फलेऽपि विरोधस्यौचित्यात् तथाच निःश्रेयसकरावुभावित्यनुपपन्नमित्याशङ्क्याह—**सांख्येति** । संख्या सम्यगात्मबुद्धिस्तां वहतीति ज्ञानान्तरङ्गसाधनतया सांख्यः संन्यासः योगः पूर्वोक्तः कर्मयोगः तौ पृथग्विरुद्धफलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः प्रवदन्ति न पण्डिताः । किं तर्हि पण्डितानां मतम्? उच्यते, एकमपि संन्यासकर्मणोर्मध्ये सम्यगास्थितः स्वाधिकारानुरूपेण सम्यक् यथाशास्त्रं कृतवान्सन्नुभयोर्विन्दते फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसमेकमेव ॥ ४ ॥

शं० टी०—ननु "कर्मणा पितृलोकः" इति कर्मिणां पितृलोकप्राप्तिः श्रूयते। कथं कर्मिणः सुखं बन्धात्प्रमुच्यत इति कर्मफलं भवबन्धमोक्षणं शास्त्रविरुद्धमुच्यत इत्याशङ्कायां न कामिनामेव कर्मफलं पित्रादिलोको नतु निष्कामानामिति विरुद्धफलवादिमतन्यक्कारपूर्वकं संन्यासकर्मयोगयोः फलमेकमेवेति निश्चित्य तयोरेकस्याश्रयणेनोभयोर्यत्फलं तदाप्नोतीत्याह—**सांख्ययोगाविति** । बालाः वेदान्तशास्त्रार्थरहस्याऽवेदिनः केचिद्विद्वांसः सांख्ययोगौ सांख्यं सर्ववेदान्तैः सम्यक्तत्परत्वेन ख्यायते प्रतिपाद्यत इति सांख्यं, परं ब्रह्म तत्प्राप्तेः परमकारणत्वात्सांख्यं ज्ञाननिष्ठाङ्गभूतः संन्यासः योगः कर्मयोगस्तावुभौ सांख्ययोगौ क्रिययाधिकारित आश्रमेण च पृथग्यथा भिन्नौ तथा फलेनापि भिन्नाविति साधनतः फलतश्च भेदं वदन्ति "कर्मणा पितृलोकः स्वर्गं वा एते लोकं यन्ति" इत्यादिवाक्यैः "संन्यासयोगाद्यतयः शुद्धसत्त्वाः" नैष्कर्म्य-

सिद्धिं परमां संन्यासेनाधिगच्छतीत्यादिवाक्यैश्च संन्यासकर्मयोगयोः साधनभेदं फलभेदं च प्रतिपादयन्तीत्यर्थः। श्रुतिस्मृतिप्रामाण्यात्तयोः फलपार्थक्यं युक्तमेवेत्यत आह—नेति। पण्डिता वेदान्तशास्त्रपारगास्तद्रहस्यवेदिनो ब्रह्मविदस्तु तयोः फलमेकमेव वदन्ति तत्कथमिति चेदुच्यते तत्त्वमस्यादिवाक्यानि पुंसश्चित्तशुद्ध्यभावे ब्रह्मतत्त्वं बोधयितुं न शक्नुवन्ति चित्तशुद्धिश्च कर्मोपासनाभ्यां विना न सिद्ध्यति कर्मोपासनयोः प्रवृत्तिश्च कर्मेश्वरयोर्महत्त्वस्तुतिं विना न सिध्यत्यतः श्रुतैरेवार्थवादवाक्यैः "पश्यति पुत्रम्" इत्यादिभिः "एष सर्वेश्वर एष सर्वज्ञः" इत्यादिवाक्यैश्च कर्मेश्वरयोर्महत्त्वे प्रतिपाद्यमाने फलानुषक्तया कर्मण्युपास्तौ च प्रवृत्तस्य ताभ्यां शुद्धात्मन एवोपदिष्टं तत्त्वज्ञानं फलत्यतो ज्ञानसिद्धेः कारणं चित्तशुद्धिस्तत्कारणं कर्मैवेत्यतः कर्मणो मोक्ष एव फलं ज्ञानसाधनत्वात्संन्यासस्यापि "विद्यां चाविद्यां च यस्तद्वेदोभय॰ सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इति श्रवणादविद्यया मृत्युं ज्ञानप्रतिबन्धमतीत्य ज्ञानेनामृतं मोक्षमश्नुत इति ज्ञानकर्मयोगयोगयोर्ज्ञानसंन्यासयोश्च साध्यसाधनभावावगमाज्ज्ञानफलं तत्फलमेवेति सांख्ययोगयोरेकमेव फलं मोक्ष इति पण्डिता मन्यन्ते तस्मात्कारकादेरेवभेदो न तु तयोः फलतो भेद इति सिद्धं, यतस्ततः सांख्ययोगयोरेकमप्यपिशब्दो वार्थः उभयोर्मध्ये सांख्यं वा कर्मयोगं वा सम्यगास्थितः समनुतिष्ठन् मुमुक्षुरुभयोरपि फलं मोक्षाख्यं विन्दते प्राप्नोतीति सांख्यकर्मयोगयोर्मोक्षं प्रत्यन्तरङ्गबहिरङ्गभावेन कालतोऽप्यल्पत्वाऽनल्पत्वाभ्यां च साध्यसाधनभावेनाप्युभयोस्तरतमभावे विद्यमानेऽपि गजाश्वयोरिव तयोः समत्वप्रतिपादनमनधिकारिणः कर्मैव कर्तव्यं न तु संन्यास इति च सूत्रार्थम्॥ ४॥

श्री० टी०—यस्मादेवमङ्गप्रधानत्वेनोभयोरवस्थाभेदेन क्रमसमुच्चयः अतो विकल्पमङ्गीकृत्योभयोः कः श्रेष्ठ इति प्रश्नोऽज्ञानिनामेवोचितो न विवेकिनामित्याह—**सांख्ययोगाविति**। सांख्यशब्देन ज्ञाननिष्ठावाचिना तदङ्गसंन्यासं लक्षयति संन्यासकर्मयोगावेकफलौ सन्तौ पृथक्स्वतन्त्राविति बालाः आज्ञा एव प्रवदन्ति न तु पण्डिताः। तत्र हेतुः—अनयोरेकमपि सम्यगास्थित आश्रितः सन्नुभयोरपि फलं प्राप्नोति। तथाहि कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा यदुभयोः फलं कैवल्यं विन्दति संन्यासं सम्यगास्थितोऽपि पूर्वमनुष्ठितस्य कर्मयोगस्यापि परंपरया ज्ञानद्वारा यदुभयोः फलं कैवल्यं तद्विन्दतीति न पृथक्फलत्वमनयोरित्यर्थः॥ ४॥

स० टी०—ननु यः कर्मणां कर्ता स संन्यासी कथं भवेत्॥ कर्मतत्त्यागयोर्यस्माद्विरोधोऽस्ति स्वरूपतः॥ १॥ फलतोऽपि विरुद्धत्वं स्वरूपेण विरुद्धयोः॥ निःश्रेयसकरत्वं वानुपपन्नमिवेति चेत्॥ २॥ सम्यगात्ममतिः संख्या तां वहत्यात्मबोधने॥ ज्ञानान्तरङ्गहेतुत्वात्सांख्यः संन्यास उच्यते॥ ३॥ कर्मयोगश्च पूर्वोक्तश्चित्तशुद्ध्येककारणम्॥ संन्यासयोगौ शास्त्रार्थविवेकज्ञानवर्जिताः॥ ४॥ तौ विरुद्धफलौ बालाः प्रवदन्ति न पण्डिताः॥ पण्डितानां मतं तर्हि किं स्यादित्युच्यते शृणु॥ ५॥ संन्यासकर्मणोर्मध्ये स्वाधिकारानुरूपतः॥ कृतवान्सन्यथाशास्त्रमेकमप्यादरात्सुधीः॥ ६॥ ज्ञानोत्पत्तिमुखेनैवामेकं निःश्रेयसं फलम्॥ उभयोर्विन्दते तस्मान्न विरोधः फले तयोः॥ ७॥ ४॥

भा० टी०—ननूभयोर्निःश्रेयसकरत्वमेकफलकत्वं न युक्तं भिन्नपुरुषानुष्ठेययोः स्वरूपतोऽपि विरुद्धयोः फलतोऽपि विरोधस्योचितत्वात्। तस्मात्तयोर्यदेकं निःश्रेयसकरं तन्मे ब्रूहीत्यर्जुनाशङ्कामालक्ष्याह—**सांख्येति** यत्त्वेकत्र पाताशङ्का एकत्र कर्मश्रमस्तदनयोः पथोः कतरः श्रेयानित्याशङ्क्य द्वयोरपि फलतः साम्यमित्याहेति तच्चिन्त्यम्। उभयोरप्यश्रेष्ठतां मन्यमानस्य कतरः श्रेयानिति प्रश्नस्यानुपपत्तेः। संख्या सम्यगात्मबुद्धिस्तां वहतीति ज्ञानान्तरङ्गसाधनतया सांख्यः संन्यासः। एवं सांख्यशब्दवाच्यः शमदमादिभिर्ज्ञानेन च संयुक्तः संन्यासोऽत्र विवक्षितः प्रस्तुतः तथा प्रस्तुत एव कर्मयोगः ज्ञानोपायसमबुद्धित्वादिसंयुक्तः योगशब्द-

वाच्यः तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादियुक्तौ सांख्ययोगशब्दवाच्याविति भाष्यात्। एतेन सांख्यशब्देन ज्ञाननिष्ठावाचिना तदङ्गं संन्यासं लक्षयतीति लक्षणा परास्ता। बाला अविवेकिनः तौ पृथक् भिन्नफलौ प्रवदन्ति न तु पण्डिताः शास्त्रज्ञाः विवेकिनः ते तु एकमपि कर्मयोगं संन्यासं वा सम्यक् चित्तशुद्धिसंपादकं शमदमादियुक्तं वाऽऽस्थितोऽनुष्ठितवानुभयोः फलं निःश्रेयसं मोक्षं परंपरया साक्षाद्वा विन्दते लभत इति प्रवदन्तीत्यर्थः। "यत्तु समित्येकीभावः" इति यास्कः एकीभावेनात्मानन्यत्वेन ख्यायते प्रकाश्यते वस्तुस्वरूपमनयेति संख्या स्थूलसूक्ष्मकारणप्रपञ्चस्य निर्विकल्पे प्रत्यगात्मनि प्रविलापनेनोदिता चेतोवृत्तिः तत्साधनभूतो यः सांख्यः संन्यासः स च दारादिबुद्ध्यन्तानां पदार्थानामात्मन्येकीभावेन न्यसनं त्यागः प्रविलापनम्। तथा योगोऽप्यग्निहोत्रसंध्योपासनादिनिर्विकल्पसमाध्यन्तमनुष्ठानं तत्र मुख्ययोगस्य लक्षणम् "योगश्चित्तवृत्तिनिरोधः" इति। "वृत्तयश्च प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" इति पञ्च। तावेतौ फलभूतौ सांख्ययोगौ उत साधनभूतौ संन्यासकर्मयोगाख्यौ । तत्रान्त्ययोः साम्यं ज्ञेयः स नित्यसंन्यासीत्यनेन सूचितमाद्ययोस्त्वैक्यमत्रोच्यते—आस्थितोऽनुतिष्ठन् फलं निर्विकल्पात्मनाऽवस्थितिरूपमित्यन्ये व्याचख्युः तदर्जुनप्रश्नाननुगुणत्वेनोपेक्ष्यं, संन्यासकर्मयोगयोः किं श्रेयस्करमिति तेन पृष्टत्वात्। अत एव भाष्यकृद्भिस्तत्र तत्र योगशब्दार्थः कर्मयोग इत्येव प्रदर्शितः । एतेन वृत्तेः पञ्चधात्ववर्णनमप्यप्रासाङ्गिकत्वादपास्तम् ॥ ४ ॥

प० टी०—अथ पूर्वप्रश्नस्त्वज्ञानत इति दर्शयति—**सांख्ययोगाविति**। सांख्ययोगौ पृथगिति बाला वदन्ति न पण्डिताः। सांख्यशब्दो ज्ञाननिष्ठार्थवाची। कर्मसंन्यासो योगश्च कर्मयोगस्तौ पृथक् स्वतन्त्रफलाविति बाला अज्ञा एव वदन्ति न तु पण्डिता ज्ञातार इत्यर्थः । तत्र ह्येनयोरेकमपि सम्यगाश्रितवानुभयोः फलं प्राप्नोति। अनासक्त्या कर्मयोगमनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारोभयोः कैवल्यमेव फलं न पृथक्फलत्वमित्यर्थः॥ ४ ॥

रा० टी०—ननु 'न तस्य तत्वग्रहणाय साक्षात्' इति पञ्चमस्कन्धस्थश्लोके विषयवैराग्याभावे ज्ञानानुत्पत्त्युक्त्या तत एव तदुत्पत्तिरिति लाभेन वैराग्यशब्दितकामादिसर्ववर्जनरूपसंन्यासो ज्ञानोत्पत्तौ आवश्यकत्वेनोक्त इति प्रतीयते। कर्मयोगस्तु ज्ञानविरोधित्वेनोक्तोऽग्निमुग्धो धूमतान्तः स्वलोकं न प्रतिजानातीति अग्न्युपलक्षिते कर्मणि मुग्धः श्रेयस्करमेतादिति भ्रान्तः धूमतान्तो होमधूमेन ग्लानः स्वलोकं स्वीयमाश्रयं परमात्मानं न प्रति जानातीत्येकादशस्कन्धे। तथाच कथं कर्मयोगात्संन्यासो वर इत्युच्यत इत्यतः संन्यास इव कर्मयोगोऽपि ज्ञानोत्पत्तावावश्यक एवेत्याह कृष्णः—**सांख्येति**। सांख्यं ज्ञानं योगो भगवदर्पणबुद्ध्या कर्मानुष्ठानं तावुभौ बालाः अविवेकिनः पृथक् साध्यसाधनभावहीनौ प्रवदन्ति न पण्डिताः। योगस्य ज्ञानहेतुत्वं कुत इत्यत उच्यते—**एकमपीति**। एकमपि ज्ञानमार्गं कर्ममार्गं वा एकमपि सम्यगास्थितोऽनुतिष्ठन् उभयोर्ज्ञानकर्मणोरुभयोरपि फलं विन्दत इत्यर्थः॥ ४ ॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

त० टी०—उक्तार्थं विवृणोति—**यत्सांख्यैरिति**। सांख्यैर्ज्ञाननिष्ठैर्यत् स्थानं, स्थीयतेऽस्मिन्निति स्थानमात्मस्वरूपं प्राप्यते, तदेव योगैः कर्मयोगनिष्ठैरपि भगवदर्पणबुद्ध्या कृतैः कर्मभिर्ज्ञानद्वारेण गम्यते। तस्मादेकफलत्वेनैकं सांख्यं योगं च यः पश्यति स पश्यति। स एव पण्डितो न त्वन्य इत्यर्थः॥ ५ ॥

म० टी०—एकस्यानुष्ठानात्कथमुभयोः फलं विन्दते तत्राह—**यदिति**। सांख्यैः ज्ञाननिष्ठैः संन्यासिभिरैहिककर्मानुष्ठानशून्यत्वेऽपि प्राग्भवीयकर्मभिरेव संस्कृतान्तःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया यत्प्रसिद्धं स्थानं तिष्ठत्येवास्मिन्न तु कदापि च्यवत इति व्युत्पत्त्या मोक्षाख्यं प्राप्यते आवरणाभावमात्रेण लभ्यत इव नित्यप्राप्तत्वात्। योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सन्ति तेऽपि योगाः अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः तैर्योगिभिरपि सत्त्वशुद्ध्या संन्यासपूर्वकश्रवणादिपुरस्सरया ज्ञाननिष्ठया वर्तमाने भविष्यति वा जन्मनि संपत्स्यमानया तत्स्थानं गम्यते अत एकफलत्वात्, एकं सांख्यं च योगं च यः पश्यति स एव सम्यक् पश्यति नान्यः । अयं भावः येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते तेषां तयैव लिङ्गेन प्राग्जन्मसु भगवदर्पितकर्मनिष्ठाऽनुमीयते कारणमन्तरेण कार्योत्पत्त्ययोगात् । तदुक्तम् 'यान्यतोऽन्यानि जन्मानि तेषु नूनं कृतं भवेत्। सत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिः' इति। एवं येषां भगवदर्पितकर्मनिष्ठा दृश्यते तेषां तयैव लिङ्गेन भाविनी संन्यासपूर्वकज्ञाननिष्ठाऽनुमीयते सामग्र्याः कार्याव्यभिचारित्वात् । तस्मादज्ञेन मुमुक्षुणान्तःकरणशुद्धये प्रथमं कर्मयोगोऽनुष्ठेयो न तु संन्यासः स तु वैराग्यतीव्रतायां स्वयमेव भविष्यतीति ॥ ५ ॥

शं० टी०—यदुक्तं सांख्ययोगयोरेकफलत्वं पुनस्तदेव विस्पष्टयंस्तदेकत्वदर्शिनं स्तौति—**यदिति**। सांख्यं परं ब्रह्म तदात्मत्वेन ये विदुस्ते सांख्यास्तैः सांख्यैर्ब्रह्मनिष्ठैर्यतिभिर्यत्स्थानं सदैकरूपेणैव तिष्ठति न क्वचित्किंचिदपि विकरोतीति स्थानं स्वरूपं केवलभावात्मकं प्राप्यते स्वात्मनावगम्यते योगैः फलाभिसंधिवर्जितमीश्वरप्रीत्यै क्रियमाणं वैदिकं कर्म मोक्षोपायत्वाद्योग इत्युच्यते, स योगो येषामस्ति ते योगाः मत्वर्थेऽच्प्रत्ययोऽत्र द्रष्टव्यस्तैर्योगैः कर्मनिष्ठैरपि तदेव स्थानं मोक्षाख्यं गम्यते निरन्तरं श्रद्धया समनुष्ठीयमानकर्मसंभावितचित्तशुद्धिजन्यज्ञानतद्योगप्राप्त्या तैरपि स्वात्मत्वेनावगन्तुं शक्यत इत्यर्थः । "एष पन्था एतत्कर्मैतद्ब्रह्म" इति श्रवणाद्यतः सांख्ययोगयोः फलैकत्वं प्रमाणसिद्धं ततः सांख्यं ज्ञानयोगं योगं कर्मयोगं चैकं यः पश्यति द्वयोरप्येकस्यैव मोक्षस्य फलत्वान्मोक्षसाधनयोस्तयोरप्येकत्वमेकार्थकत्वं यः पश्यति स पश्यति स एव सम्यग्दर्शी न त्वन्य इत्यर्थः ॥ ५ ॥

श्री० टी०—एतदेव स्फुटयति—**यत्सांख्यैरिति** । सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं मोक्षाख्यं प्रकर्षेण साक्षादवाप्यते। योगैरित्यत्र अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययो द्रष्टव्यः। तेन कर्मयोगिभिरपि तदेव ज्ञानद्वारेण गम्यते अवाप्यत इत्यर्थः। अतः सांख्यं च योगं चैकफलत्वेनैकं यः पश्यति स एव सम्यक्पश्यति ॥ ५ ॥

स० टी०—कथमेकस्य करणादुभयोर्विन्दते फलम् ॥ शृणु संन्यासिभिः पुण्यैः पूर्वजन्मस्वनुष्ठितैः ॥ १ ॥ शुद्धान्तःकरणैः सम्यग्वेदान्तश्रवणादिभिः ॥ अवाप्तात्मावबोधैर्यन्मोक्षाख्यं प्राप्यते फलम् ॥ २ ॥ ईशार्पणधिया योगाः शास्त्रीयाणि कृतानि च ॥ कर्माणि सन्ति येषां ते योगास्तैरपि योगिभिः ॥ ३ ॥ सत्त्वशुद्ध्या च संन्यासपूर्वया ज्ञाननिष्ठया ॥ तत्स्थानं गम्यते वर्तमाने भाविनि वा भवे ॥ ४ ॥ अत एकफलत्वाद्यः पश्यत्येकं विशुद्धधीः ॥ सांख्यं योगं स एवेह सम्यक्पश्यति नापरः ॥ ५ ॥ दृश्यते ज्ञाननिष्ठेयं येषां संन्यासपूर्विका ॥ तेषां तल्लिङ्गतः पूर्वजन्मस्वीशसमर्पितम् ॥ ६ ॥ कर्मानुष्ठानमप्यस्तीत्येवमत्रानुमीयते ॥ न विना कारणं कार्योत्पत्तिर्दृश्यत एव हि ॥ ७ ॥ यान्यतोऽन्यानि जन्मानि तेषु नूनं कृतं भवेत् ॥ यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिः ॥ ८ ॥ एवमीशार्पितं कर्मानुष्ठानं दृश्यते नृणाम् ॥ येषां तेषां ससंन्यासं ज्ञानं भाव्यनुमीयते ॥ ९ ॥ तस्माज्जिज्ञासुनाज्ञेन प्रथमं चित्तशुद्धये ॥ कर्मयोगोऽस्त्यनुष्ठेयो न संन्यासः कथं च न ॥ १० ॥ वैराग्यतीव्रतायां स स्वयमेव भविष्यति ॥ ११ ॥ ५ ॥

भा० टी०—एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं लभन्त इत्यत आह—यदिति । सांख्यैः ज्ञाननिष्ठैः संन्यासिभिः विशुद्धान्तःकरणैर्यन्मोक्षाख्यं स्थानं च्युतिवर्जितं प्राप्यते तत्त्वसाक्षात्कारमात्रेण लभ्यते इति, विस्मृतग्रैवेयकलाभवद्बन्धस्यैव लाभः तद्योगैर्ज्ञानप्राप्त्युपायभूतानि ईश्वराराधनार्थानि फलाभिसंधिरहितानि शास्त्रीयाणि कर्माणि योगशब्दवाच्यानि तद्वद्भिः अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः तदेव स्थानं परमार्थज्ञानं संन्यासप्राप्तिद्वारेण गम्यते प्राप्यत इत्यर्थः । आयुर्घृतमितिवत् साध्यसाधनयोरभेदाभिप्रायेण परमार्थज्ञानस्य मोक्षाभिन्नत्वात् मोक्षस्य तदभिन्नत्वाच्चैवमुक्तमित्यविरोधः।एतेन ननूभयोरेकं मोक्षाख्यं फलमस्तु नाम तत्साधनयोस्तु परस्परसापेक्षत्वं न युक्तं, प्राप्यग्रामस्यैकत्वेऽपि भिन्नत्वं मार्गाणामिवेत्याशङ्क्याह—यत्सांख्यैरिति । अत्रेदं विकल्पनीयं किं व्यक्तिभेदमात्रेण संन्यासकर्मयोगयोरन्योन्यनिरपेक्षतां ब्रूषे, किंवा अपेक्षणीयान्तराभावात् । नाद्य इत्याह बहुवचनेन—यत्सांख्यैरिति । संन्यासैस्तत्तत्कर्मत्यागरूपैरपि यथाऽन्योन्यसापेक्षैरेव फलं साध्यते, तथा भिन्नाभ्यामेव संन्यासकर्मयोगाभ्यामन्योन्यसापेक्षाभ्यां भविष्यतीति भावः । नान्त्य इत्याह—यत्स्थानं प्राप्यत इति । स्थानशब्देनात्र मोचकज्ञानमुच्यत इति प्रत्युक्तं, पूर्वश्लोके परस्परसापेक्षत्वाप्रतिपादनात् । कर्मयोगादिसाध्याज्ज्ञानान्निरपेक्षात्केवलान्मोक्ष इतिवच्छमदमादिविशिष्टस्य संन्यासस्य कर्मसाध्यत्वेऽपि तेन ज्ञाने जननीये कर्मापेक्षाया अभावादन्योन्यसापेक्षत्वासिद्धेः । एकमित्यादेः स्थाने सांख्यं योगं च परस्परसापेक्षमिति वक्तव्यत्वापत्तेश्च । अतः साक्षात्परंपरया वा एकफलजनकत्वादेकं सांख्यं च योगं च यः पश्यति स सम्यक् पश्यतीत्यर्थ एव रम्यः ॥ ५ ॥

प० टी०—यत्सांख्यैरिति । सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं कैवल्यं प्रकर्षेण साक्षादाप्यते तदेव योगैः कर्मयोगैर्ज्ञानद्वारा प्राप्यतेऽतः सांख्यं योगं चैकमेव फलत्वेन यः पश्यति स एव पश्यति परमार्थद्रष्टा नान्यः ॥ ५ ॥

रा० टी०—नन्वेतावता द्वयं किंचित्फलं प्रति स्वतन्त्रसाधनमित्युच्यते । योगस्य ज्ञानहेतुत्वं न प्राप्तमित्यतस्तदभिप्रायं स्वयमेव व्यनक्ति—यत्सांख्यैरिति । सांख्यैर्ज्ञानिभिर्यत्स्थान भगवत्स्वरूपलक्षणं तद्योगैः अर्शआद्यच्प्रत्ययान्तावत्र सांख्ययोगशब्दौ कर्मयोगवद्भिरपि ज्ञानद्वारा गम्यत इत्यर्थः । तथाच सांख्यं च योगं च एकं साध्यसाधनभाववत् यः पश्यति स पश्यति स एव ज्ञानीत्यर्थः।संन्यासयोगयोर्द्वयोरपि ज्ञानहेतुत्वान्न कोऽपि विरोधः । अग्निमुग्ध इत्यादि तु काम्यकर्मविषयमिति भावः । यद्वा संन्यासयोगशब्दयोः यतिगृहिपरत्वमुपेत्य तयोरधिकारिभेदादेकत्र संन्यासयोगयोः समावेशायोगश्चोदितोऽसौ संन्यासयोगशब्दयोस्तदर्थत्वानङ्गीकारेण पूर्वश्लोके परिहृतः । अधुना संन्यासयोगयोरधिकारिभेदोऽपि न युज्यत इत्याह—सांख्येति । बालाः अविवेकिनः सांख्ययोगौ ज्ञानकर्मयोगौ पृथक् भिन्नाधिकारिकौ नैकत्र समाविष्टौ यत्याश्रमिणां सांख्यपदोक्तज्ञानाधिकार एव न कर्मणि, गृहिणां तु योगपदोक्तकर्माधिकार एव न ज्ञान इति प्रवदन्ति । ज्ञानमार्गे सम्यगास्थित एव ज्ञानफलं प्राप्नोति कर्ममार्गे सम्यगास्थित एव कर्मफलं विन्दते यतः अतो न पण्डिता बाला इव प्रवदन्तीत्यर्थः । अत्र मार्गद्वयस्य सम्यक्त्वविशेषणात्कर्मणो ज्ञानसाहित्यं तेन विना सम्यगनुष्ठानासिद्धेः । कर्मणा विना संपूर्णानन्दहेतुत्वरूपसम्यक्त्वस्य ज्ञानेऽनुपपत्तेः तदर्थं तस्य कर्मसाहित्यमिति सूचितम् । ज्ञानैकगम्ययतिप्राप्यस्थानप्राप्तिसद्भावाच्च गृहिणां ज्ञानाधिकारोऽस्तीति स्पष्टं वदन्नुक्तमुपसंहरति—यदित्यादिना । यतः सांख्यैर्ज्ञानिभिर्यतिभिः प्राप्यं स्थानं योगैर्योगवद्भिर्गृहिभिर्गम्यते तस्मात्सांख्यं योगं चैकं एकाधिकरणकं । कर्मिण्यपि गृहिणि ज्ञानं ज्ञानिन्यपि कर्मेत्येवमेकत्र तयोः समावेशं यः पश्यति स पश्यति ज्ञानीत्यर्थः ॥ ५ ॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

त० टी०—ननु यदि कर्मयोगस्यापि ज्ञानयोगद्वारेणैवात्मस्वरूपप्राप्तिस्तर्हि प्रथमतो ज्ञानयोग एव कुतो नानुष्ठीयते इति चेत्तत्राह—**संन्यासस्त्विति**। संन्यासो ज्ञानयोगस्तु अयोगतः कर्मयोगानुष्ठानादृते दुखमाप्तुं प्राप्तुमशक्य इत्यर्थः। चित्तशुद्धयभावेन ज्ञाननिष्ठाया अपायसंभवात्। योगयुक्तः निष्कामकर्मयोगयुक्तः शुद्धान्तःकरणत्वान्मुनिर्मननशीलः ब्रह्म नचिरेणाल्पकालेनैवाधिगच्छति प्राप्नोति निर्दोषसमत्वादिना ब्रह्मसमानधर्मो भवतीत्यर्थः ॥ ६ ॥

म० टी०—अशुद्धान्तःकरणेनापि संन्यास एव प्रथमं कुतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्यावश्यकत्वादिति चेत्तत्राह—**संन्यास इति**। अयोगतः योगमन्तःकरणशोधकं शास्त्रीयं कर्मान्तरेण हठादेव यः कृतः संन्यासः स तु दुःखमाप्तुमेव भवति, अशुद्धान्तःकरणत्वेन तत्फलस्य ज्ञाननिष्ठाया असंभवात्, शोधके च कर्मण्यनधिकारात् कर्मब्रह्मोभयभ्रष्टत्वेन परमसङ्कटापत्तेः। कर्मयोगयुक्तस्तु शुद्धान्तःकरणत्वान्मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्म सत्यज्ञानादिलक्षणमात्मानं नचिरेण शीघ्रमेवाधिगच्छति साक्षात्करोति प्रतिबन्धकाभावात्। एतच्चोक्तं प्रागेव 'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। नच संन्यसनादेव सिद्धिं समधिगच्छति' इति। अतः एकफलत्वेऽपि कर्मसंन्यासात्कर्मयोगो विशिष्यते इति यत्प्रागुक्तं तदुपपन्नम् ॥ ६ ॥

शं० टी०—यस्मात् संन्यासकर्मयोगयोर्मोक्षैकफलकत्वं प्रदर्शितन्यायेन सिद्धं तस्मादपक्वान्तःकरणेन मोक्षार्थिना कर्मैव कर्तव्यं न तु संन्यासः अपक्वान्तरात्मनः संन्यासो दुर्घट इत्युपदिशन् कर्मणा मृदितकषायस्य तु कर्तव्यत्वेन संन्यासमुपदिशति—**संन्यास इति**। अयोगतस्त्वयोगे कर्मयोगानुष्ठानजन्यचित्तशुद्धयभावे संन्यासो ज्ञाननिष्ठालक्षण आप्तुमधिगन्तुं दुःखं दुर्घटं चित्तशुद्धयेकसाध्यत्वाज्ज्ञाननिष्ठालक्षणसंन्यासस्य 'कारणाभावे कार्याभावः' इति न्यायेन कर्मसंभावितचित्तशुद्धयभावे संन्यासो न सिध्यतीत्यर्थः। एवं संन्यासस्य कर्मयोगानुष्ठानसंभावितचित्तप्रसादैकलभ्यत्वं निश्चित्य इदानीं कर्मयोगेन सुपक्वान्तःकरणस्य तु मुमुक्षोः संन्यासः कर्तव्य इत्याशयेनाह—**योगेति**। योगयुक्तः योगेन योगानुष्ठानसंभूतचित्तप्रसादेन युक्तः संयुक्तः स्वयं मुनिर्गृही ब्रह्म ब्रह्मशब्देनात्र संन्यास उच्यते 'न्यास इति ब्रह्मा ब्रह्मा हि परः' इति श्रवणाद्ब्रह्मस्वरूपेणावस्थानलक्षणं प्रधानसंन्यासं परिपक्वान्तःकरणत्वान्मुमुक्षुरधिकारी नचिरेण शीघ्रमेवाधिगच्छति प्राप्नोतीत्यर्थः। यद्वा योगयुक्तः योगसंभावितचित्तशुद्धियुक्तः स्वयं मुमुक्षुश्चित्तप्रसादमहिम्नैव मुनिः संन्यासी निरुक्तलक्षणसंन्यासवान् भूत्वा तन्निष्ठया नचिरेण क्षिप्रमेव ब्रह्माधिगच्छति ब्रह्मैवाहमित्यप्रतिबद्धवृत्त्या स्वं ब्रह्मैव विजानातीत्यर्थः। एतेनाऽपक्वान्तःकरणस्य कृतेऽपि कर्मसंन्यासे मुख्यसंन्यासो न सिध्यति परिपक्वान्तःकरणस्य तु बाह्योऽप्यबाह्यश्च संन्यासः सिध्यति तत्फलमपि सिध्यति सर्वात्मतापत्तिरिति सूचित भवति ॥ ६ ॥

श्री० टी०—यदि कर्मयोगिनोऽप्यन्ततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः कर्तुं युक्त इति मन्वानं प्रत्याह—**संन्यास इति**। अयोगतः कर्मयोगं विना संन्यासः प्राप्तुं दुःखं दुःखहेतुः अशक्य इत्यर्थः। चित्तशुद्धयभावेन ज्ञाननिष्ठाया असंभवात्। योगयुक्तस्तु शुद्धचित्ततया मुनिः संन्यासी भूत्वाऽचिरेणैव ब्रह्माधिगच्छति अपरोक्षं जानाति अतश्चित्तशुद्धेः प्राक्कर्मयोग एव संन्यासाद्विशिष्यते इति पूर्वोक्तं सिद्धम्। तदुक्तं वार्तिककृद्भिः—' प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः। संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशयाः ' इति ॥ ६ ॥

स० टी०—किमर्थं कर्मसंन्यासो नादौ कार्यः शृणु स्फुटम् ॥ धीशोधकमृते कर्मसंन्यासो यो हठात्कृतः ॥ १ ॥ स दुःखमाप्तुमेवास्ति बुद्धिशुद्धेरभावतः ॥ ज्ञानस्यासंभवात्कर्मत्यागाद्भ्रष्टोऽभितो भवेत् ॥ २ ॥ कर्मानुष्ठानयुक्तस्तु शुद्धबुद्धितया मुनिः ॥ सत्यं ज्ञानमनन्ताख्यमात्मानं ब्रह्म हृद्गतम् ॥ ३ ॥ शीघ्रमप्रतिबन्धेन सम्यक्साक्षात्करोत्यसौ ॥ अत एकफलत्वेऽपि संन्यासाज्ज्ञानवर्जितात् ॥ ४ ॥ श्रेयान्स कर्मयोगोऽस्ति धीशुद्ध्या ज्ञानकारणम् ॥ न कर्मणामनारम्भादित्यत्र हरिणा स्फुटम् ॥ ५ ॥ धीशुद्धिहेतुकं कर्म न त्याज्यमित्युदाहृतम् ॥ चित्तशुद्धिमृते त्यागं यः करोति स्वकर्मणाम् ॥ ६ ॥ स ईशाज्ञापरित्यागी पतत्येव न संशयः ॥ श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते ॥ ७ ॥ आज्ञाभङ्गी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥ इति स्मृतौ हरेराज्ञावश्यं कार्यतयेरिता ॥ ८ ॥ ६ ॥

भा० टी०—एवं तर्हि कर्मयोगात्संन्यास एव विशिष्यते कथमुक्तं तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते इत्याशङ्क्य ज्ञाननिष्ठारहिताशुद्धचित्तेन कृतात्केवलात् संन्यासात् कर्मत्यागात् शुद्धिकरस्य संन्यासद्वारा ज्ञानप्राप्त्या मोक्षसंपादकस्य कर्मयोगस्य श्रैष्ठ्यं मया प्रतिपादितं, न तु ज्ञाननिष्ठासहितात् सांख्यशब्दोदितात् विशुद्धान्तःकरणेन कृतात्। तस्मात्तं प्रति साधनत्वात्कर्मयोगस्येत्याशयेनाह—**संन्यास** इति। संन्यासस्तु ज्ञाननिष्ठासहितस्तु परमार्थसंन्यासः अयोगतः योगेन विनाऽऽप्तुं प्राप्तुं दुःखं दुर्घटमित्यर्थः। योगेन वैदिकेन कर्मयोगेनेश्वरसमर्पितरूपेण निष्कामेन युक्तः मुनिः सगुणेश्वरस्वरूपमननशीलः ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोति परमार्थज्ञानलक्षणत्वात्प्रकृतः संन्यासो ब्रह्मोच्यते "न्यास इति ब्रह्मा ब्रह्मा हि परः" इतिश्रुतेः अशुद्धचित्तेनापि संन्यास एव प्रथमं कुतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्यावश्यकत्वादिति चेत्तत्राह—**संन्यासस्त्विति**। योगमन्तरेण हठादेव यः कृतः संन्यासः स तु दुःखमाप्तुमेव भवति अशुद्धान्तःकरणत्वेन तत्फलस्य ज्ञाननिष्ठाया असंभवात् शोधके च कर्मण्यनधिकारात्, कर्मब्रह्मोभयभ्रष्टत्वेन परमसंकटापत्तेः। यद्वाऽयोगत इति सप्तम्यर्थे तसिः अयोगे तु संन्यासो दुःखमाप्तुमिति। अयोगे योगाभावे प्रसिद्धसंन्यासाद्विलक्षणः 'प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः। संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशयाः' इतिवार्तिककारोक्तः संन्यासः दुःखं नरकात्मकमाप्तुं भवतीति शेषः। नरकफलको नत्वनर्थनिवृत्त्यविनाभूतनिरतिशयानन्दरूपतापादक इति भावः। ननु तर्ह्यवश्यापेक्षिताद्योगादेवास्तु फलं नेत्याह—योगयुक्तः सत्त्वशुद्ध्या मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्म सत्यज्ञानादिलक्षणं नचिरेण शीघ्रमेवाधिगच्छति प्रतिबन्धकाभावात्साक्षात्करोतीति तु सुगमत्वाद्भाष्यकारैरुपेक्षितम्। महाबाहो इति संबोधयन् महाबाहुसाध्ये युद्धरूपे कर्मण्येव तवाधिकारः न संन्यास इति सूचयति ॥ ६ ॥

प० टी०—यदि कर्मयोगिनोऽप्यन्ततः संन्यासेनैव ज्ञाननिष्ठा तर्ह्यादित एव संन्यासः कर्तुं युक्त इत्याह—**संन्यास** इति। भो महाबाहो अयोगतः कर्मयोगं विना संन्यासः प्राप्तुं दुःखहेतुरशक्योऽतो योगयुक्तः सन् मुनिर्मननशीलो नचिरेण शीघ्रमेव ब्रह्माधिगच्छत्यपरोक्षं जानाति न तु तद्विधुरः ॥ ६ ॥

रा० टी०—पूर्वं ज्ञेय इत्यत्र स्वाभिमतसंन्यासशब्दार्थं स्मारयित्वा तस्य योगादवरत्वे ज्ञानान्तरङ्गत्वरूपं बाधकं यत्सांख्येतिश्लोकाभ्यां परिहृत्येदानीं तस्य योगादवरत्वे साधकमाह—**संन्यासस्त्विति**। अयोगतः भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपयोगाभावे कामादिवर्जनरूपसंन्यासस्तु दुःखमाप्तुमेव परमपुमर्थाहेतुत्वात् स्वोचितकर्माननुष्ठानेन नरकप्राप्तेश्चेति भावः। तात्कालिकापमानादिकृतदुःखाभावस्त्वल्पत्वान्न फलमिति भावः। मुनिः संन्यासी 'स हि लोके मुनिर्नाम यः कामक्रोधवर्जितः' इत्युक्तेः योगयुक्तोऽचिरेण शीघ्रं ब्रह्माधिगच्छतीत्यर्थः। एतेन योगाभावे पुमर्थहेतुत्वाभावः सति तु तस्मिंस्तद्धेतुत्वं संन्यासस्येति योगस्य वरत्वे

व्यतिरेकान्वयरूपं साधकमुक्तं भवति। यद्वा योगसंन्यासयोः समुच्चितयोरेव निःश्रेयसकरत्वमुभावित्यनेनोक्तमिदानीमसमुच्चये बाधकमाह—संन्यासस्त्विति। कामादिवर्जनरूपसंन्यासस्तु अयोगतः भावप्रधानं योगरूपत्वाभावे केवलसंन्यासस्तु दुःखमाप्तुमेव विष्ण्वर्पितत्वादियोगरूपत्वं विना केवलकर्मत्यागो नरकफल एवेति भावः। योगरूपत्वं विना संन्यासस्यानर्थहेतुत्वमुक्त्वा योगरूपसंन्यासस्य मुक्तिहेतुत्वमाह—योगयुक्त इति। मुनिः संन्यासी संन्यासस्य योगावान्तरभेदत्वाद्योगरूपत्वोक्तिः। यं संन्यासमिति प्राहुर्योगं तं विद्धि इति वक्ष्यमाणगीतोक्तिरप्येतदभिप्राया। अतः संन्यासः कर्मयोगश्चेति भेदोक्तिः कुरुपाण्डववन्न विरुद्धेति ज्ञेयम् ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ॥
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

त० टी०—ननु ब्रह्मणः सर्वत्र समत्वं जगत्सृष्ट्यादिकर्तृत्वेऽपि निर्लेपत्वं च शास्त्रसिद्धं, कर्मणि वर्तमानस्य जीवस्य कथं तत्समानधर्मत्वमिति चेत्तत्राह—**योगयुक्त इति**। फलसंकल्पशून्यं भगवदाराधनरूपं शास्त्रीयं कर्म योगशब्देनोच्यते, तेन युक्तः पुरुषो योगयुक्तस्तत एव विशुद्धात्मा रजस्तमोभिभवेन सत्त्ववृद्ध्या विमलीकृत आत्मा मनो येन सः अत एव विजितात्मा विशेषेण जितोऽभिभूत आत्मा अहंकारस्तत्कार्यभूतः क्रोधश्च येन सः तत एव जितेन्द्रियः स्ववशीकृतसर्ववाह्येन्द्रियः। एतेभ्यो हेतुभ्यः सर्वसुहृत्सर्वात्मवल्लभो भवतीत्याह—**सर्वभूतात्मभूतात्मेति**। सर्वभूतानां देवमनुष्यादीनामात्मभूत आत्मवल्लभ आत्मा स्वरूपं यस्य स तथा, सर्वप्रियाचरण इत्यर्थः। स सर्वकर्माणि कुर्वन्नपि न लिप्यते अतः सर्वभूतसमत्वं निर्लेपत्वं ब्रह्मसमानधर्मत्वं च सिद्धम्। अन्यथा ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् इति वक्ष्यमाणा ब्रह्मभूतस्य भक्तिलाभोक्तिर्विरुध्येत। तस्मादुक्तार्थ एव साधुरित्यलम् ॥ ७ ॥

म० टी०—ननु कर्मणो वन्धहेतुत्वाद्योगयुक्तो मुनिर्ब्रह्माधिगच्छतीत्यनुपपन्नमित्यत आह—**योगयुक्त इति**। भगवदर्पणफलाभिसन्धिराहित्यादिगुणयुक्तं शास्त्रीयं कर्म योग इत्युच्यते। तेन योगेन युक्तः पुरुषः प्रथमं विशुद्धात्मा विशुद्धो रजस्तमोभ्यामकलुषित आत्मान्तःकरणरूपं सत्त्वं यस्य स तथा निर्मलान्तःकरणः सन् विजितात्मा स्ववशीकृतदेहस्ततो जितेन्द्रियः स्ववशीकृतसर्ववाह्येन्द्रियः एतेन मनूक्तस्त्रिदण्डी कथितः 'वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च। यस्यैते नियता दण्डाः स त्रिदण्डीति कथ्यते' इति। वागिति वाह्येन्द्रियोपलक्षणं, एतादृशस्य तत्त्वज्ञानमवश्यं भवतीत्याह—सर्वभूतात्मभूतात्मा सर्वभूत आत्मभूतश्चात्मा स्वरूपं यस्य स तथा जडाऽजडात्मकं सर्वमात्ममात्रं पश्यन्नित्यर्थः। सर्वेषां भूतानामात्मभूत आत्मा यस्येति व्याख्याने तु सर्वभूतात्मेत्येतावतैवार्थलाभादात्मभूतेत्याधिकं स्यात्। सर्वात्मपदयोर्जडाजडपरत्वे तु समञ्जसं, एतादृशः परमार्थदर्शी कुर्वन्नपि कर्माणि परदृष्ट्या न लिप्यते तैः कर्मभिः स्वदृष्ट्या तदभावादित्यर्थः॥७॥

शं० टी०—यः कर्मानुष्ठानसंप्राप्तचित्तशुद्धिर्जितेन्द्रियः सर्वात्मभावापन्नो ब्रह्मवित्तमः स शारीरं कर्म यत्किंचित्कुर्वन्नपि न लिप्यते इत्याह—**योगयुक्त इति**। योगयुक्तः योगेन कर्मयोगेन युक्तश्चिरमनुष्ठितकर्मयोग इत्यर्थः। यद्वा मुनिर्ब्रह्माधिगच्छतीति मुख्यसंन्यासाधिगमस्योक्तत्वाद्योगयुक्तः योगेन संन्यासयोगेन ब्रह्मनिष्ठालक्षणेन युक्तश्चिरमनुष्ठितसमाधियोग इत्यर्थः। तत एव विशुद्धात्मा जितेन्द्रियश्च विशुद्धः रागद्वेषादिदोषैर्निःशेषवियुक्तः आत्मा मनो यस्य स विशुद्धात्मा तत एव जितेन्द्रियः जितानि विषयग्रहणवैमुख्यं

प्रापितान्युभयेन्द्रियाणि येन स जितेन्द्रियः। विशुद्धात्मत्वं जितेन्द्रियत्वं च चिरकालसमनुष्ठितसमाध्येकलभ्य-मत एव विजितात्मा 'आत्मा यत्नधृतिस्वान्तस्वभावपरमात्मसु' इत्यभिधानाद्विजितो निर्जितो निर्यापित आत्मा स्वभावो बाह्यवासनालक्षणो येन स विजितात्मा समाधिनिर्मूलिताऽनात्मवासन इत्यर्थः। तत एव सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानां प्राणिनामात्मभूतः स्वरूपभूत आत्मा प्रत्यग्लक्षणः स्वात्मा यस्य स सर्वभूतात्मभूतात्मा "प्राणो ह्येष सर्वभूतैर्विभाति", "अहमेवेदं सर्वम्" इत्यादिश्रुत्यर्थानुभूत्या स्वानुभूत्या च सर्वात्मतामापन्नो यो ब्रह्मवित्तमः स शरीरयात्रार्थं यत्किंचिद्वैधमवैधं वा कर्म कुर्वन्नपि तेन कर्मणा पुण्येनापुण्येन वा न लिप्यते कर्मण्यकर्मत्वदृष्ट्या न श्लिष्यत इत्यर्थः। ननु लोकसंग्रहमित्यादिशास्त्रेण कर्तव्यतया प्राप्तानां शास्त्रीयाणामेव कर्मणाममुष्यकर्तव्यत्वे शरीरयात्रार्थं कर्मेति शास्त्रविरुद्धमुच्यत इति चेन्न, ब्रह्मविदः कर्मानुपपत्तेः ब्रह्मैवाहमिति स्वस्याविक्रियब्रह्मात्मत्वविज्ञानेन निःशेषविनष्टमिथ्याज्ञानत्वात्, तद्विपरीतज्ञानैकनिबन्धनस्य कर्मयोगस्यासंभवात्सम्यग्ज्ञानस्य मिथ्याज्ञानतत्कार्यविरोधात्। नह्यधिष्ठानज्ञाने सति तद्विपर्ययज्ञानं तत्कार्यं च संभावयितुं शक्यं, स्थाणुज्ञाने चोरज्ञानतत्कार्यादर्शनात्कूटस्थासङ्गचिद्रूपमेवात्मानमप्रतिहतवृत्त्या पश्यतो विदुषस्त्वनात्मतादात्म्यानुपपत्तौ तदात्मत्वाभिनिवेशनिष्पाद्यः कर्मयोगः स्वप्नेऽपि न संभवति। विधिविधानादेः सर्वस्य दृश्यस्य मिथ्यात्वमेव पश्यतो विधेयत्वासंभवाच्च। योगयुक्तो मुनिर्ब्रह्माधिगच्छतीति सर्वकर्मसंन्यासावगमाच्च "पश्यञ्छृण्वन्" इत्यत्र च त्रयोदशधा कर्मक्रिया श्रूयते न वैदिकक्रियायास्त्रयोदशधा करणत्वं संभवति, विदुषस्त्वाहारादौ देहेन्द्रियचेष्टायास्तथाविधत्वसंभवात्सर्वथा ब्रह्मविदो जीवन्मुक्तस्य वैधः कर्मलेशो न संभावयितुं शक्यते तत एवोच्यते तस्य कार्यं न विद्यते इति ततो न कश्चिच्छास्त्रविरोधः॥ ७॥

श्री० टी०—कर्मयोगादिक्रमेण ब्रह्माधिगमे सत्यपि तदुपरितनेन कर्मणा बन्धः स्यादेवेत्याशङ्क्याह—योगयुक्त इति। योगेन युक्तोऽतो विशुद्ध आत्मा चित्तं यस्यात एव विजित आत्मा शरीरं येन अत एव विजितानीन्द्रियाणि येन, ततश्च सर्वेषां भूतानामात्मभूत आत्मा यस्य सः लोकसंग्रहार्थं स्वाभाविकं वा कर्म कुर्वन्नपि न लिप्यते तैर्न बध्यते॥ ७॥

स० टी०—कर्मणो बन्धकत्वात्स्यात्कथं मोक्षैकहेतुता॥ शृणु कृष्णार्पणं कर्म फलासङ्गविवर्जितम्॥१॥ योग इत्युच्यते तेन युक्तः सन्प्रथम ततः॥ रजस्तमोमलास्पृष्टं सत्त्वं यस्य स शुद्धधीः॥ २॥ स्ववशीकृतदेहः सन् सन्स्वाधीनकृतेन्द्रियः॥ एतेन मनुनोक्तोऽत्र त्रिदण्डी हरिणोदितः॥ ३॥ वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च॥ यस्यैते नियता दण्डाः स त्रिदण्डीति कथ्यते॥ ४॥ सर्वेन्द्रियपरस्तत्र वाक्शब्दोऽस्ति मनुस्मृतौ॥ ईदृशस्य भवेदेव तत्त्वज्ञानमितीर्यते॥ ५॥ यस्यात्मा सर्वभूतानामात्मभूतः स ईदृशः॥ अखण्डाद्वैतनिष्ठः सन्त्यक्तभेदमतिः पुमान्॥ ६॥ सर्वभूत आत्मभूतश्चात्मा यस्येति विग्रहे॥ जडाजडात्मकं विश्वं पश्यन्नात्ममयं मुनिः॥ ७॥ उभयत्राप्यखण्डार्थबोधसिद्धिरितीरिता॥ ईदृशस्तत्त्वदृक्कुर्वन्नपि लोकदृशा क्रियाः॥ ८॥ ताभिर्न लिप्यते यस्मात्स्वदृष्ट्या तदभावतः॥ ९॥ ७॥

भा० टी०—कस्यचिच्चित्तशुद्ध्या श्रवणादिना कृतसाक्षात्कारस्य प्रारब्धवशात्कर्मणि स्थितस्य यथापूर्वमुपलभ्यमानानि कर्माणि बन्धकानि न भवन्तीत्यत आह—योगयुक्त इति। योगेन पूर्वोक्तेन युक्तः अत एव विशुद्धान्तःकरणः अत एव विजितदेहः अत एव विजितानि वागादीनि इन्द्रियाणि येन सः एवंभूतोऽधिकारी लक्षणसंपन्नः सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स अखण्डात्मसाक्षात्कारवानित्यर्थः। यत्तु कैश्चिद्भाष्योक्तं विग्रहं सर्वभूतात्मेत्येतावतैवार्थलाभादात्मभूतेत्यधिकं स्यादित्यापत्त्या दूषयित्वा सर्वभूतो जडभूत आत्मभूतोऽजडभूतश्च आत्मा यस्येति च विग्रहः प्रदर्शितस्तत्प्रामा-

दिकं, कृत्स्नवाचिनः सर्वपदादेव जडाजडग्रहे सर्वभूतात्मेत्येतावतैवेष्टलाभे आधिक्यस्य तुल्यत्वात्। सर्वमचेतनमात्मानश्चेतनास्तद्भूत आत्मा यस्येति विगृह्य सर्वात्मभूतात्मेत्येतावतैवेष्टार्थे सिद्धे प्रथमभूतपदवैयर्थ्यप्रसङ्गाच्च। किंच भाष्यमते ब्रह्मादीनां प्रत्यगात्मभूत आत्मा यस्येति श्रुत्यैवात्मपरमात्मनोरैक्यमुच्यते तव मते तु उपादानत्वलिङ्गेन जडसाधारण्येनात्मनः परमात्माऽभेदो गम्यत इत्यत आचार्योक्तमेव रमणीयम्। स लोकसंग्रहार्थं कुर्वन्नपि न लिप्यते योगयुक्तो न कर्मभिर्बध्यत इत्यर्थः। यत्तु ननु योगयुक्तस्य सत्त्वशुद्धौ जातायामपि सर्वकर्मसंन्यासे कृते नित्याकरणजनितप्रत्यवायलक्षणो लेप आपद्येतेत्याशङ्क्याह—योगयुक्त इति। अकुर्वन्नपि न लिप्यते नित्याकरणोत्थेन दोषेण न स्पृश्यत इत्यर्थः। तत्र हेतुमाह—सर्वेषां ब्रह्मादिस्थावरान्तानां भूतानां योऽनुस्यूत आत्माऽसङ्गोदासीनचिद्रूपस्तंभूतः प्राप्तस्तदैक्यज्ञानवानात्मान्तःकरणं यस्येति तदुपेक्ष्यम् "कथमसतः सज्जायेत" इति श्रुतिमनुरुध्याकरणादभावरूपाद्भावरूपस्य प्रत्यवायस्यानुत्पत्तेराचार्यैरसकृदुक्तत्वात्सर्वेत्यादेरार्जवेन भाष्योक्तमार्गेणोक्तार्थलाभे संभवति क्लिष्टकल्पनाया अन्याय्यत्वात्। योगेन निर्विकल्पसमाधिना युक्त इत्याद्युपेक्ष्यं प्रकरणविरोधस्योक्तत्वात्॥ ७॥

प० टी०—अथोक्तप्रमेयं दृढीकुर्वन् कर्मलोपाभावक्रममाह—योगयुक्त इति। योगेन कर्मयोगेन युज्यते निष्पद्यतेऽसौ योगयुक्तोऽत एव विशुद्ध आत्मा चित्तं यस्यात एव तद्वशवर्ती विजित आत्मा देहो येनात एव तत्संसक्तानि जितानीन्द्रियाणि येन स तथाभूतः सर्वभूतानामात्मभूत आत्मा यस्य सर्वभूतेषु समत्वदर्शी तादृशः पुमान् कर्म कुर्वन्नपि न लिप्यते न बध्यते॥ ७॥

रा० टी०—योगयुक्तसंन्यासस्य महाफलहेतुत्वं प्रपञ्चयति—योगेति। प्रपञ्चनं च यो न द्वेष्टीत्यत्रोक्तद्वेषादिवर्जनरूपसंन्यासस्य पूर्वार्धे कारणोपन्यासेन, ब्रह्माधिगच्छतीति प्रागुक्तमुक्तिफलं प्रति उत्तरार्धे ब्रह्मज्ञानरूपावान्तरफलोक्त्या चेति ध्येयम्। योगयुक्तः कर्मयोगयुक्तः विशुद्धात्मा विशुद्धस्वभावः अत एव विजितमनस्को जितेन्द्रियः सर्वभूतात्मा सर्वभूतानामादानादिकर्ता स्वामीति यावत्। सर्वभूतात्मभूतः सर्वप्राणिनां स्वामिभूतः स एव स्वस्यात्मा आदानादिकर्ता स्वामी यस्य स सर्वभूतात्मभूतात्मा। ज्ञानोपलक्षणमेतत् सर्वभूतात्मभूतात्मेति ज्ञानीत्यर्थः। कुर्वन्नपि न लिप्यते मुक्तो भवतीत्यर्थः। जितेन्द्रियत्वादिद्वेषादिवर्जनकारणं सर्वस्वामी मम स्वामीति ज्ञानं ब्रह्माधिगतावान्तरफलमित्युक्तं भवति। यद्वा योगयुक्त इत्यत्र भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपो योग उक्तः सर्वेत्यादिना तु सर्वभूतात्मनि हरौ भूतमनाः स्थितमना इत्यर्थः॥ ७॥

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्॥
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्॥८॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि॥
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ९॥

त० टी०—एवंभूतः परमार्थदर्शी यावज्जीवः कथं वर्तेतेत्यपेक्षायां तद्विवेकबुद्धिं शिक्षयति—नैवेति द्वाभ्याम्। युक्तः समाहितचित्तः तत्त्ववित्परमार्थदर्शी चक्षुरादिज्ञानेन्द्रियैर्वागादिकर्मेन्द्रियैः प्राणादिभिश्च दर्शनादिवचनादिश्वसनादिषु तत्तत्क्रियासु क्रियमाणासु इन्द्रियाणि बाह्यान्तःकरणान्येव इन्द्रियार्थेषु स्वस्वविषयेषु वर्तन्ते इति धारयन् बुद्ध्या निश्चिन्वन्नहं नैव किंचित्करोमीति मन्येत जानीयात्। तत्र दर्शनश्रवणस्पर्शनघ्राणाशनानि चक्षुःश्रोत्रत्वग्घ्राणरसनानां व्यापाराः। गमनं पादयोः, प्रलापो वाचः, विसर्गः पायोः, सुखमुपस्थस्य, ग्रहणं हस्तयोरिति पञ्च कर्मेन्द्रियाणां व्यापाराः।

श्वसन्निति प्राणादिपञ्चकव्यापारस्योपलक्षणम्, उन्मेषणनिमेषणे कूर्माख्यस्य प्राणस्य, स्वापोऽन्तःकरणस्येत्यर्थक्रमेण विवेकः । पाठक्रमादर्थक्रमो बलीयान् । इमे व्यापारा मम स्वरूपनिरूपका न भवन्ति किंतु प्रकृतिकार्यभूतेन्द्रियप्राणादीनामेवेति जानन्निरभिमानतयाऽऽयुःशेषं क्षपयेदिति भावः ॥ ८ ॥ ९ ॥

म० टी०—एवदेव विवृणोति द्वाभ्याम्—**नैवेति** । चक्षुरादिज्ञानेन्द्रियैर्वागादिकर्मेन्द्रियैः प्राणादिवायुभेदैरन्तःकरणचतुष्टयेन च तत्तच्चेष्टासु क्रियमाणासु इन्द्रियाणि इन्द्रियादीन्येव इन्द्रियार्थेषु स्वस्वविषयेषु वर्तन्ते प्रवर्तन्ते नत्वहमिति धारयन्नवधारयन् नैव किंचित्करोमीति मन्येत मन्यते तत्त्ववित् परमार्थदर्शी युक्तः समाहितचित्तः । अथवा आदौ युक्तः कर्मयोगेन पश्चादन्तःकरणशुद्धिद्वारेण तत्त्वविद्भूत्वा नैव किंचित्करोमीति मन्यत इति संबन्धः ॥ ८ ॥ **प्रलपन्निति** । तत्र दर्शनश्रवणस्पर्शनघ्राणाशनानि चक्षुःश्रोत्रत्वग्घ्राणरसनानां पञ्चज्ञानेन्द्रियाणां व्यापाराः पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नित्युक्ताः, गतिः पादयोः, प्रलापो वाचः, विसर्गः पायूपस्थयोर्ग्रहणं हस्तयोरिति पञ्च कर्मेन्द्रियव्यापाराः गच्छन् प्रलपन्विसृजन् गृण्हन्नित्युक्ताः,श्वसन्निति प्राणादिपञ्चकस्यव्यापारोपलक्षणं, उन्मिषन्निमिषन्निति नागकूर्मादिपञ्चकस्य, स्वपन्नित्यन्तःकरणचतुष्टयस्य, अर्थक्रमवशात् पाठक्रमं भङ्क्त्वा व्याख्यातोऽयं श्लोकः । यस्मात्सर्वव्यापारेष्वप्यात्मनोऽकर्तृत्वमेव पश्यति अतः कुर्वन्नपि न लिप्यत इति युक्तमेवोक्तमिति भावः ॥ ९ ॥

शं० टी०—योगयुक्तत्वादिविद्वल्लक्षणपञ्चकविशिष्टस्य ब्रह्मविद आहारादौ प्रवृत्तस्य दर्शनादीन्द्रियव्यापारेषु नाहं कर्तास्मीत्येवंबुद्धया स्थातव्यमित्याह—**नैवेति द्वाभ्याम्** । तत्त्वविदात्मयाथात्म्यज्ञो ब्रह्मविद्यतिर्युक्तः स्वस्य कूटस्थत्वासङ्गत्वान्तर्बहिःपूर्णत्वदर्शनलक्षणया प्रज्ञया युक्तः सन् स्वयं बहिः पश्यन्, अश्नन्, भक्षणं कुर्वन्, स्वप्ननिद्रां कुर्वन्, श्वसन्नुच्छ्वासं निःश्वासं च कुर्वन्नुन्मिषन्निमिषन् निमेषोन्मेषौ च कुर्वन्नपि इन्द्रियार्थेषु शब्दादिविषयेष्विन्द्रियाण्येव वर्तन्ते नाहं द्रष्टा श्रोता स्प्रष्टा घ्राता भोक्ता गन्तेत्येवंलक्षणामेव वृत्तिं सर्वदा धारयन् तानि तानि कर्माणीन्द्रियाण्येव कुर्वन्त्यहं त्वविक्रियत्वान्नैव किंचित्करोमि किंतु तत्तत्क्रियासाक्षित्वेन निष्क्रियात्मना तूष्णीमेवास इत्येवं मन्येत स्वं तत्र तत्र निष्क्रियमेव वीक्षेत । देहेन्द्रियव्यापारेष्वहं ममेतिभावनां त्यक्त्वा विदुषा तूष्णीं स्थातव्यमेवं स्वं ब्रह्मैव पश्यतो ब्रह्मविदो दुष्टादुष्टान्नस्वीकृत्या प्राप्तपापपुण्यलेपो नास्तीति सिद्धमिति द्वयोरर्थः ॥ ८ ॥ ९ ॥

श्री० टी०—कर्म कुर्वन्नपि न लिप्यत इत्येतद्विरुद्धमित्याशङ्क्य कर्तृत्वाभिमानाभावान्न विरुद्धमित्याह—**नैवेति द्वाभ्याम्** । कर्मयोगेन युक्तः क्रमेण तत्त्वविद्भूत्वा दर्शनश्रवणादीनि कुर्वन्नपि इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्बुद्धया निश्चित्य किंचिदप्यहं न करोमीति मन्येत मन्यते । तत्र दर्शनश्रवणस्पर्शनावघ्राणाशनानि चक्षुरादिज्ञानेन्द्रियव्यापाराः, गतिः पादयोः, स्वापो बुद्धेः, श्वासः प्राणस्य, प्रलपनं वागिन्द्रियस्य, विसर्गः पायूपस्थयोः, ग्रहणं हस्तयोः, उन्मेषणनिषणे कूर्माख्यप्राणस्येति विवेकः । एतानि कर्माणि कुर्वन्नपि अनभिमानात् ब्रह्मविन्न लिप्यते । तथाच पारमर्षं सूत्रम्—"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् " इति ॥ ८ ॥ ९ ॥

स० टी०—द्वाभ्यां तदेतद्देवेशो विवृणोति स्फुटं हरिः ॥ धीशुद्धया युक्त एवादौ भूत्वा तत्त्वविदेव सः ॥ १ ॥ क्रियमाणासु चेष्टासु न करोमीति मन्यते ॥ ज्ञानकर्मेन्द्रियैः कर्म दशभिस्तद्यथायथम् ॥ २ ॥ कुर्वन्नकर्तृताबुद्धया पश्यत्यात्मानमक्रियम् ॥ श्वसन्प्राणैः स्वपन्नन्तःकरणेन मुनिस्तथा ॥ ३ ॥ उन्मिषन्निमिषन्नेवं नागकूर्मादिपञ्चकैः ॥ एतानि स्वस्वविषये वर्तन्ते न त्वहं त्विति ॥ ४ ॥ धारयन्सर्वव्यापारेष्वात्मानमक्रियं विदन् ॥ कुर्वन्न लिप्यते चातो युक्तमेवेरितं वचः ॥ ५ ॥ ८ ॥ ९ ॥

भा० टी०—कुर्वन्नपि कुतो न लिप्यत इत्याशङ्क्य यतोऽसौ परमार्थतो न करोतीत्याह द्वाभ्याम्—**नैवेति**। युक्तः समाहितः सन्नादौ कर्मयोगयुक्त इति वाऽयं पक्षोऽध्याहारसापेक्षत्वादाचार्यैरुपेक्षितः। तत्त्ववित्परमार्थदर्शी नैव किंचित्करोमीति मन्येत मन्यते। कदेत्यपेक्षायामाह—पश्यन्नित्यादि। अपेः सर्वत्र संबन्धः। पश्यन्नित्यादिज्ञानेन्द्रियाणां व्यापारान्, गच्छन्निति पादयोर्व्यापारं, स्वपन्निति बुद्धेः, श्वसन्निति प्राणस्य, प्रलपन्निति वाचः, विसृजन्निति पायूपस्थयोः, गृह्णन्निति हस्तयोः, उन्मिषन्निमिषन्निति कूर्माख्यप्राणस्य, कुर्वन्नपीन्द्रियाणीन्द्रियार्थेषु वर्तन्ते, नाहमसङ्ग आत्मेति धारयन् बुद्ध्या निश्चयं कुर्वन् नैव किंचित्करोमीति तत्त्ववित्मन्यतेऽतो न लिप्यत इत्यर्थः। यद्वा नन्वेवं कर्तृत्वाभिमानशून्य इन्द्रियैः प्रतिषिद्धमपि कुर्यादित्यत आह—**इन्द्रियाणीति**। इन्द्रियाणीन्द्रियार्थेष्विष्टेषु विषयेषु वर्तन्त इति हेतोरन्याय्यमपि कुर्युः इत्यत इन्द्रियाणि धारयन्स्वायत्तानि यथेष्टसंचारपराङ्मुखानि कुर्वन्निति । अस्मिन्पक्षे प्रकरणविरोधोऽनुषङ्गक्लेशश्च परिहर्तव्यः ॥ ८ ॥ ९ ॥

प० टी०—अथ कुर्वन्नपि न लिप्यत इत्यनेन कर्तृत्वाभिमानशून्यत्वमुक्तमित्याह—**नैव किंचिदिति** द्वाभ्याम्। कर्मयोगेन युक्तः शुद्धचित्तः क्रमेण तत्त्वविद्भूत्वा ज्ञानकर्मेन्द्रियप्राणव्यापाररूपमहं किंचिन्न करोमीति मन्येत। अथ तदेवाह—पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निति ज्ञानेन्द्रियकृत्यम्, तथा गच्छन् प्रलपन् गृह्णन्निति कर्मेन्द्रियकृत्यम्, तथा स्वपन् श्वसन् उन्मिषन्निमिषन्निति प्राणकृत्यम्, एतत्सर्वमप्यहं किमपि न करोमीति मन्येत। ननु क्रियमाणं कार्यमेतदहं करोमीति यः कश्चिज्जानात्येव स कथमेवं मन्येतेत्याशङ्क्याह—**इन्द्रियाणीति**। इन्दति जानातीतीन्द्रः परमात्मा तत्संबुद्धानीन्द्रियाणि चक्षुरादीनीन्द्रियार्थेषु रूपरसादिषु वर्तन्ते प्रवर्तन्ते, अथवा वृत्तिरूपेण तिष्ठन्तीति धारयन् स्थिरीकुर्वन् ॥ ८ ॥ ९ ॥

रा० टी०—ज्ञेय इत्यादिना विशुद्धात्मेत्यादिना च स्पष्टीकृतमपि संन्यासं संकल्पत्यागोक्त्या पुनः स्पष्टयति—**नैवेत्यादि**श्लोकद्वयेन। युक्तः कर्मयोगानुष्ठाता तत्त्ववित् तत्त्वज्ञानी दर्शनश्रवणस्पर्शनादिज्ञानेन्द्रियकर्मेन्द्रियव्यापारं कुर्वन्नपि इन्द्रियाणीन्द्रियार्थेषु हरीच्छया वर्तन्त इति धारयन् मनसावमृशन् स्वस्य स्वातन्त्र्याभावात् नैव किंचित्करोमीति मन्येतेत्यर्थः। संकल्पत्यागोऽपि संन्यासशब्दार्थ इति भावः। संन्यासो योगरूपः सन्परमपुमर्थहेतुरित्युक्तं कथं तस्य योगरूपतेत्यतो वाह—**नैवेति**। सर्वव्यापारं कुर्वन्नपीन्द्रियाणीशप्रेरितानीन्द्रियार्थेषु वर्तन्ते स एव स्वतन्त्रः नैव किंचिदहं करोमीत्यनुसंधानमेव द्वेषादिवर्जनरूपसंन्यासस्य योगरूपत्वं नामेति श्लोकद्वयतात्पर्यार्थः ॥ ८ ॥ ९ ॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

त० टी०—भवत्वेवंभूतस्य विशुद्धात्मनो जितेन्द्रियस्य कर्मनिर्लेपत्वम्, उक्तलक्षणहीनस्यान्यस्य कथं कर्मालेपः स्यादित्यत आह—**ब्रह्मणीति**। ब्रह्मणि भगवति वासुदेवे आधाय समर्प्य सङ्गं फलाभिलाषं त्यक्त्वा केवलं भगवदाज्ञापालनात्मकभजनबुद्ध्या यः कर्माणि करोति, स देहेन्द्रियवानपि तत्प्रयुक्तकर्तृत्वाभिमानरूपेण बन्धहेतुना पापेन न लिप्यते यथा पद्मपत्रमम्भसि स्थितमपि अम्भसा न लिप्यते, तद्वत् ॥ १० ॥

म० टी०—तर्ह्यविद्वान्कर्तृत्वाभिमानाल्लिप्येतैव। तथाच कथं तस्य संन्यासपूर्विका ज्ञाननिष्ठा स्यादिति तत्राह—**ब्रह्मणीति**। ब्रह्मणि परमेश्वरे आधाय समर्प्य सङ्गं फलाभिलाषं त्यक्त्वा ईश्वरार्थं भृत्य इव स्वाम्यर्थं स्वफलनिरपेक्षतया करोमीत्यभिप्रायेण कर्माणि लौकिकानि वैदिकानि च करोति यः लिप्यते न स पापेन

पापपुण्यात्मकेन कर्मणेति यावत् यथा पद्मपत्रमुपरि प्रक्षिप्तेनाम्भसा न लिप्यते तद्वत् भगवदर्पणबुद्ध्याऽनुष्ठितं कर्म बुद्धिशुद्धिफलमेव स्यात् ॥ १० ॥

शं० टी०—ननु स्वमविक्रियमेव परं ब्रह्म विजानतो ब्रह्मविदो महात्मनः कर्मलेपो मास्तु कर्मसु प्रवृत्तस्य मुमुक्षोरविदुषस्तु स्यादेव कर्मलेपस्तस्य का वा गतिरित्याकाङ्क्षायां तस्यापि च निष्कामस्य मद्भक्तस्य मय्यर्पितसर्वकर्मणः कर्मलेपो नास्तीत्याह—**ब्रह्मणीति**। यस्तु मुमुक्षुरनात्मज्ञः सङ्गं सङ्गः फलकामस्तं त्यक्त्वा कर्मफले यत्र कुत्रापि काममकृत्वा संप्राप्तदुःखस्यापि निवृत्तिमकामयमानः सन् ब्रह्मणि सगुणे मयि परमेश्वरे सर्वाणि कर्माण्याधाय कर्तृत्वं कारयितृत्वं भोक्तृत्वं भोजयितृत्वं च स्थापयित्वा मदर्पणबुद्ध्या श्रद्धया भक्त्या च नित्यं नैमित्तिकं च कर्म करोति सोऽपि मद्भक्तः पापेन बन्धकेन यथा पापं जन्मादिबन्धकारणं तथा पुण्यमपि जन्मादिबन्धकारणमेव भवत्यतो वैदिकं कर्म जन्मादिबन्धहेतुत्वात्पापमित्युच्यते तेन न लिप्यते पद्मपत्रमम्भसा यथा तथा मद्भक्तः कर्मणा न लिप्यते इत्यर्थः ॥ १० ॥

श्री० टी०—तर्हि यस्य करोमीत्यभिमानोऽस्ति तस्य कर्मलेपो दुर्वारोऽविशुद्धचित्तत्वात् संन्यासोऽपि नास्तीति महत्संकटमापन्नमित्याशङ्क्याह—**ब्रह्मणीति**। ब्रह्मण्याधाय परमेश्वरे समर्प्य तत्फले च सङ्गं त्यक्त्वा यः कर्माणि करोति असौ पापेन बन्धहेतुतया पापिष्ठेन पुण्यपापात्मकेन कर्मणा न लिप्यते यथा पद्मपत्रमम्भसि स्थितमप्यम्भसा न लिप्यते तद्वत् ॥ १० ॥

स० टी०—तर्ह्यज्ञो लिप्यते तत्तत्कर्तृत्वाभिनिवेशतः ॥ ज्ञाननिष्ठा ससंन्यासा कथं तस्येति चेच्छृणु ॥ १ ॥ फलासङ्गं परित्यज्य समर्प्य परमेश्वरे ॥ कर्माणि वैदिकान्यज्ञो लौकिकानि करोति यः ॥ २ ॥ पापपुण्यात्मकेनासौ कर्मणा नैव लिप्यते ॥ यथोपरि प्रक्षिप्तेन पद्मपत्रं न चाम्भसा ॥ ३ ॥ लिप्यते तद्वदीशेऽपि कर्मार्पितमलेपकम् ॥ प्रत्युतेशप्रसादेन धीशुद्धिश्चास्य जायते ॥ ४ ॥ १० ॥

भा० टी०—एवं तत्त्वविदो लौकिककर्मणा मुधाचेष्टामात्रेण लेपो नास्तीत्युक्तमिदानीमतत्त्वविदो मुमुक्षोः का गतिरित्यपेक्षायामाह—**ब्रह्मणीति**। ब्रह्मणि परमेश्वरे भृत्य इव स्वामिने तदर्थं करोमीति समर्प्य मोक्षेऽपि फले सङ्गं त्यक्त्वा यः सर्वाणि कर्माणि करोति सोऽम्भसा पद्मपत्रमिव पापेन न संबध्यते मुमुक्षुं प्रति पुण्यस्यापि प्रतिबन्धकत्वात्पापेनेत्युक्तम्। इतरे तु विद्वत्परत्वेनैवं श्लोकं योजन्ति । तथाहि तत्त्वविदो यो लेपः स किं स्वाभाविकेन्द्रियशरीरचेष्टाजन्य उत वैधेन्द्रियादिचेष्टाजन्यः। आद्यं प्रति द्वाभ्यामुक्त्वा द्वितीयं प्रत्याह—**ब्रह्मणीति** । स किं तत्तत्कर्मजन्यसुकृतापूर्वलक्षणः किंवा तत्तत्कर्मोपयोग्यर्थप्रतिग्रहादिजन्यदुरितापूर्वलक्षणः। नाद्य इत्याह—ब्रह्मणीत्यादि ब्रह्मार्पणबुद्ध्या क्रियमाणेषु कर्मसु नापूर्वोत्पत्तिरिति भावः। न द्वितीय इत्याह—सङ्गं त्यक्त्वेति। सङ्गमैहिकधनादिफलासङ्गं ततश्च न दुरितापूर्वोत्पत्तिरिति भावः। तद्विचार्यम्। ब्रह्मार्पणबुद्ध्या कर्मकरणेऽतत्त्वविदो मुमुक्षोरेवाधिकारादन्यथानन्तरश्लोकेनासङ्गत्वापत्तेः । ननु कानि चेदृशानि कर्माणि यानि धनार्जनतया विनाऽनुष्ठातुं शक्यानि सन्ति, सत्त्वविशुद्धये भवन्तीत्याशङ्कां परिहरन् कर्मयोगानुष्ठाने शिष्टाचारं प्रमाणयति—कायेनेतीति स्वपरग्रन्थविरोधाच्च। अवशिष्टं तु भाष्यानुरोधेनोपादेयं मोक्षफले सर्वफलानामन्तर्भावेन तदासक्तिवारणेन भाष्यकारैः सर्वफलासक्तेर्वारितत्वात् ॥ १० ॥

प० टी०—**ब्रह्मणीति** । अर्थप्रतीतिरूपे ब्रह्मणि कर्माणि दर्शनश्रवणादीन्याधायारोप्य सङ्गं कर्तृत्वाभिमानं त्यक्त्वा यः करोति स पापेन बन्धहेतुना न लिप्यते। श्रुतिरपि शातपथी—"वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामानि" इति । तथात्मैवास्य कर्मात्मना हि कर्म करोतीति स्पष्टम्। तथा ऋगारण्यकेऽपि—"कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वाचं व्याकरोति येन वा स्वादु चास्वादु विजानाति यदेतद्धृदयं

मनश्चैतत्संज्ञानमज्ञानं विज्ञानं प्रज्ञानं मेधा धृतिर्मनीषा ज्योतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवन्ति " इत्यादि। स्पष्टार्थैव श्रुतिः। अत्रैतदुक्तं भवति पश्यन् शृण्वन्नित्यादिषु बुद्धिप्राणकर्माणि कर्तृत्वाभिमानशून्यत्वे दृष्टान्तत्वेन योजितानि। तथाहि स्वपन् स्वापं निद्रां कुर्वन्नित्यत्र निद्रा तु मनसो निरिन्द्रियप्रदेशावस्थानं तदकस्मादसंकल्पितमेव भवति तथैव श्वासोच्छ्वासनिमेषोन्मेषा अपि भवन्ति तद्वद्दर्शनस्पर्शनादिकर्माण्युक्तरीत्यावधारयन् अत एव तत्त्वविदिति विशेषणम्। एवं कर्माणि वर्तमानोऽपि कर्मभिर्न लिप्यते इत्यत्र दृष्टान्तमाह—पद्मपत्रमिवेति। स्पष्टम्। तदुक्तम्—' स्फटिकः प्रतिबिम्बेन यथा नायाति रञ्जनम्। तत्स्थः कर्मफलेनान्तस्तथा नायाति रञ्जनम्'॥ १०॥

रा० टी०—योगमपि किंचिद्विवृण्वन् संन्यासयोगाभ्यां युक्त एव कर्मणा न लिप्यत इति साधननियममाह—ब्रह्मणीति। यद्यपि संन्यासस्त्वित्यनेनैव संन्यासयोगौ मिलितावेव फलं साधयत इति नियमो लब्ध एव कुर्वन्नपि न लिप्यत इति फलं चोक्तमेव तथापि संन्यासयोगौ मिलितावेव फलसाधनमिति नियमोक्तेरुपचारत्वनिवृत्त्यर्थं लिप्यते न स पापेनेति पुनः फलोक्त्या नियमस्य फलसाधनतात्रोच्यत इत्यदोषः। सङ्गफलकामनां त्यक्त्वा ब्रह्मण्याधाय मम शुभार्थं स्वपूजात्मकानि मया कारितानीत्यनुसंधाय कर्माणि यः करोति भगवदधीनकर्तृशक्तिकः सन्करोति सोऽम्भसा पद्मपत्रमिव पापेन न लिप्यते ज्ञानद्वारा मुक्तो भवतीत्यर्थः॥ १०॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि॥
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ ११॥

त० टी०—उक्तार्थमेव शिष्टाचारेण द्रढयति—कायेनेति। कायेन मनसा बुद्ध्या केवलैः स्वाभाविकविषयासक्तिशून्यैरिन्द्रियैरपि फलसङ्गं त्यक्त्वा आत्मशुद्धये चित्तशुद्ध्यर्थं योगिनः कर्म कुर्वन्ति॥ ११॥

म० टी०—तदेव विवृणोति—कायेनेति। कायेन मनसा बुद्ध्येन्द्रियैरपि योगिनः कर्मिणः फलसङ्गं त्यक्त्वा कर्म कुर्वन्ति कायादीनां सर्वेषां विशेषणं केवलैरिति ईश्वरायैव करोमि न मम फलायेति ममताशून्यैरित्यर्थः। आत्मशुद्धये चित्तसत्त्वशुद्ध्यर्थम्॥ ११॥

शं० टी०—नन्वकामनया कर्माणि कुर्वतां किं फलमित्याकाङ्क्षायामात्यन्तिकसंसारदुःखविध्वंसकविज्ञानजनयित्री चित्तशुद्धिरेव फलमिति ज्ञापयितुं मुमुक्षवश्चित्तशुद्ध्यर्थमेव कर्म कुर्वन्तीत्याह—कायेनेति। योगिनः कर्मयोगिनो मुमुक्षवः सङ्गं सज्जते पुमाननेन कर्मफलेष्विति सङ्गः कामः फलविषयकस्तं त्यक्त्वा फलापेक्षां सुतरां परित्यज्य परमेश्वरप्रीतय एव कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि चात्मशुद्धये सत्त्वशोधनायैव कर्म वैदिकं नियमेन कुर्वन्ति। यद्वा यत्किंचित्कर्तव्यं मनसा संकल्प्य तदेव बुद्ध्या निश्चित्य तदेवेन्द्रियैः केवलै रागद्वेषविवर्जितैः कायेनापि कर्म कुर्वन्ति। यद्वा कायेनेन्द्रियैश्च वैदिकं कर्म बुद्ध्या निश्चितस्य विष्ण्वादेर्मनसा ध्यानं श्रोत्रेण केवलेन कथाश्रवणं केवलेन चक्षुषा महद्दर्शनं वाचा केवलया स्वाध्यायादि पद्भ्यां तीर्थाटनादिकमीश्वरप्रीत्यै कुर्वन्तीत्यर्थः॥ ११॥

श्री० टी०—बन्धकत्वाभावमुक्त्वा मोक्षहेतुत्वं सदाचारेण दर्शयति—कायेनेति। कायेन स्नानादि, मनसा ध्यानादि, बुद्ध्या तत्त्वनिश्चयादि, केवलैः कर्माभिनिवेशरहितैरिन्द्रियैश्च श्रवणकीर्तनादिलक्षणं कर्म फलसङ्गं त्यक्त्वा चित्तशुद्धये कर्मयोगिनः कर्म कुर्वन्ति॥ ११॥

स० टी०—त्यक्त्वा फलाभिलाषं तु कर्म कुर्वन्ति कर्मिणः॥ चित्तशुद्ध्यै धिया चैव कायेन मनसे-

न्द्रियैः ॥ १ ॥ केवलैरिति सर्वेषां कायादीनां विशेषणम् ॥ ईश्वरार्थं करोमीदं नैतन्मम फलाय च ॥ २ ॥ स्वाम्यर्थं भृत्य इव च ममतामलवर्जितैः ॥ ३ ॥ ११ ॥

भा० टी०—यस्मात्कायेन केवलेनाहंभावममभावविवर्जितेन तथा केवलेन मनसा केवलया बुद्ध्या केवलैरिन्द्रियैरपि कर्मयोगिनः कर्म कुर्वन्ति, कैवलैरितिपदं मनसेत्यनेन वचनस्य, कायेन बुद्ध्येत्याभ्यां लिङ्गवचनयोर्व्यत्ययेन योजनीयम् । अत्रापरे केवलपदव्यावर्त्यं धनादि वर्णयन्ति । तथाहि केवलत्वाचाऽलब्धधनादिलाभानपेक्षितता, ततश्च केवलेन कायेन स्नानशौचाद्विजोच्छिष्टमार्जनादीनि कर्माणि योगिनः कुर्वन्ति न तु तेषामतीतकालता, नापि कदाचिद्धनापेक्षेति भावः । तथा केवलेन मनसा जगदीशध्यानं यथाशक्ति परोपकारसंकल्पादीनि च कर्णाभ्यामुत्तमश्लोकजन्मकर्माकर्णनादीनि रसनया तीर्थनैवेद्यास्वादनादीनि घ्राणेन तदुपभुक्तमाल्यामोदग्रहणादीनि, त्वचा पुण्यतीर्थोदकस्पर्शादीनि, पद्भ्यां तीर्थाटनादीनि, हस्ताभ्यां परेशपूजादीनि, वाचा स्तुत्यादीनि च कुर्वन्ति सङ्गं धनादिफलासङ्गं त्यक्त्वेति तैर्मानसादिकर्माणि धनाद्यपेक्षाऽप्रसक्तेस्तत्रापि स्वेन संबन्धितस्य केवलपदस्य वैयर्थ्यं परिहर्तव्यं तस्मात्सर्वव्यापारेषु ममतावर्जिता योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वा फलविषयमात्मशुद्धये सत्वशुद्धय इत्यर्थ इति भाष्यमेव रमणीयम् ॥ ११ ॥

प० टी०—एवं बन्धकत्वाभावमुक्त्वा मोक्षहेतुत्वं सदाचारेण दर्शयति—कायेनेति । कायेन स्नानोपवासादि मनसा ध्यानादि बुद्ध्या तत्त्वनिश्चयादि केवलैः कर्माभिनिवेशरहितैरिन्द्रियैः श्रवणकीर्तनादिलक्षणं कर्म फलसङ्गं त्यक्त्वा चित्तशुद्धये कर्म योगिनः कुर्वन्ति ॥ ११ ॥

रा० टी०—संन्यासयोगौ मिलितावेव फलहेतुरित्यत्राचारोऽस्तीत्याह—कायेनेति । देहेन मनसा मनोबुद्धी तु द्वादशे (इ) त्युक्तेर्बुद्धिरूपेन्द्रियेण केवलैः कामाहंभावहीनैः स्वातन्त्र्याभिमानरहितैर्वा इन्द्रियैर्योगिनोऽपि सङ्गं त्यक्त्वाऽत्मनो मनसः शुद्धये तत्र ज्ञानोत्पत्त्यर्थं पापालेपायेति वा कर्म कुर्वन्तीत्यर्थः । पूर्वार्धेन संन्यासः उत्तरार्धेन योगः आत्मशुद्धय इति फलोक्तिः ॥ ११ ॥

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ॥
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

त० टी०—फलासक्तिरेव बन्धहेतुरित्यन्वयव्यतिरेकाभ्यामाह—युक्त इति । युक्त ईश्वराज्ञायां निरतः कर्मणां फलं त्यक्त्वा कर्माणि कुर्वन् नैष्ठिकीं शान्तिं मोक्षं प्राप्नोति । अयुक्तः कर्मसु ईश्वरप्रीत्यर्थमेवेति बुद्धिशून्यः कामकारेण कामतः प्रवृत्त्या मम फलसाधकमिदमहं करोमीति फले सक्तो निबध्यते तैरेव कर्मभिः संसारे बन्धं प्राप्नोतीत्यर्थः ॥ १२ ॥

म० टी०—कर्तृत्वाभिमानसाम्येपि तेनैव कर्मणा कश्चिन्मुच्यते कश्चित्तु बध्यत इति वैषम्ये को हेतुरिति तत्राह—युक्त इति । युक्तः ईश्वरायैवैतानि कर्माणि न मम फलायेत्येवमभिप्रायवान् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् शान्तिं मोक्षाख्यामाप्नोति नैष्ठिकीं सत्त्वशुद्धिनित्यानित्यवस्तुविवेकसंन्यासज्ञाननिष्ठाक्रमेण जातामिति यावत् । यस्तु पुनरयुक्तः ईश्वरायैवैतानि कर्माणि न मम फलायेत्यभिप्रायशून्यः स कामकारेण कामतः प्रवृत्त्या मम फलायैवेदं कर्म करोमीति फले सक्तो निबध्यते कर्मभिर्नितरां संसारबन्धं प्राप्नोति यस्मादेवं तस्मात्त्वमपि युक्तः सन् कर्माणि कुर्विति वाक्यशेषः ॥ १२ ॥

शं० टी०—श्रद्धया भक्त्या चेश्वरप्रीतय एवाऽकामनया कर्म कुर्वतामन्यथा कुर्वतां च फलमाह—युक्त इति । यस्तु सदसद्विवेकी मोक्षेच्छया कर्मफलं त्यक्त्वा स्वेनानुष्ठीयमानानां कर्मणां फलमनपेक्ष्य युक्तो भवति लाभालाभयोः सिद्ध्यसिद्ध्योश्च समो भूत्वा परमेश्वरप्रीतय एव यः कर्म करोति स एव नैष्ठिकीं कर्म-

निष्ठाजन्यां शान्तिं चित्तशुद्धिं प्राप्नोति । यद्वा नैष्ठिकीं कर्मनिष्ठासमुत्पन्नचित्तशुद्धिसंभावितज्ञानप्रकाशितां शान्तिं मुक्तिं प्राप्नोति । यस्त्वविवेकी कामकारेण कामनया फले कर्मफले सक्त आसक्तः सन्नयुक्त उक्तलक्षण-कर्मानुष्ठानपरो न भवति स निबध्यते ज्ञानानुत्पत्त्या जन्मादिबन्धवान् भवति ततस्त्वमुक्तलक्षणयोगयुक्तो भवेत्यर्थः । एतेन निष्कामेन कृतं कर्म मोक्षाय भवति सकामेन कृतं कर्म बन्धाय भवतीति सूचितम् ॥ १२॥

श्री० टी०—ननु तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यत इति व्यवस्था कथमत आह—**युक्त इति** । युक्तः परमेश्वरैकनिष्ठः सन्कर्मणां फलं त्यक्त्वा कर्माणि कुर्वन्नात्यन्तिकीं शान्तिं मोक्षं प्राप्नोति, अयुक्तस्तु बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले आसक्तो नितरां बन्धं प्राप्नोति ॥ १२ ॥

स० टी०—कर्तृत्वाध्याससाम्येऽपि कश्चित्तेनैव कर्मणा ॥ मुच्यते बध्यते कश्चिद्वैषम्ये हेतुरस्ति कः ॥१॥ शृण्वीशायैव कर्माणि नैतानि च फलाय मे ॥ इत्यभिप्रायवान्युक्तस्त्यक्त्वा कर्मफलं सुधीः ॥ २ ॥ कुर्वन्कर्माणि मोक्षाख्यां शान्तिमाप्नोति नैष्ठिकीम् ॥ शुद्धिविवेकसंन्यासज्ञाननिष्ठाक्रमेण या ॥ ३ ॥ जाता सा नैष्ठिकी शान्तिर्मोक्षरूपा स तामियात् ॥ यस्त्वयुक्तोऽस्ति पूर्वस्माद्विपरीतः स कामतः ॥ ४ ॥ प्रवृत्त्या मे फलायेदं करोमीति फलेप्सुकः ॥ कर्मभिर्नितरां बन्धं संसाराख्यं प्रयात्यसौ ॥ ५ ॥ देहाभिमानसाम्येऽपि कृतं भगवदर्पणम् ॥ कर्म श्रौतं तथा स्मार्तं लौकिकं च मुमुक्षुभिः ॥ ६ ॥ चित्तशुद्ध्याप्तवैराग्यज्ञानद्वारा विमुक्तिदम् ॥ तदेव कामकारेण कृतं सत्फलकामिभिः ॥ ७ ॥ दृढबन्धाय मूढानां भवतीत्याशयो हरेः ॥ यस्मादेवं ततस्त्वं भो विहायासक्तिमान्ध्यजाम् ॥ ८ ॥ सर्वकर्मफलेष्वीशप्रतोषार्थं कुरु क्रियाम् ॥ वैदिकीं लौकिकीं वापि बन्धान्मुक्तो भविष्यसि ॥ ९ ॥ १२ ॥

भा० टी०—न केवलं सत्त्वशुद्ध्यर्थमेव कर्माण्यनुष्ठेयान्यपि तु परंपरया मोक्षायापीत्याह—**युक्त इति** । युक्तः परमेश्वराय कर्माणि न मम फलायेत्येवं समाहितः सन् कर्मफलं परित्यज्य शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाः क्रमेण प्राप्नोति । विपक्षे दोषमाह—**अयुक्त इति** । यस्तु पुनरयुक्तो समाहितः कामकारेण कामप्रेरणया फलार्थमिदं कर्मकरोमीत्येवं फले सक्तः स निबध्यतेऽतस्त्वं युक्तः सन् कर्माणि कुर्वित्यभिप्रायः ॥ १२ ॥

प० टी०—अथ चित्तशुद्धेः फलमाह—**युक्त इति** । कर्मफलं त्यक्त्वा युक्तः शुद्धचित्तः पुमान्नैष्ठिकीमात्यन्तिकीं शान्तिं मोक्षं प्राप्नोति । अथायुक्तस्य गतिमाह—**अयुक्तो** बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले सक्तः सन्निबध्यते ॥ १२ ॥

रा० टी०—प्राक् संन्यासस्त्वित्यादिना संन्यासयोगौ मिलितावेव फलं साधयतः नान्यतरपरित्यागेनान्यतर इति नियमज्ञापनार्थं तयोः फलमुक्तं ब्रह्माधिगच्छति, कुर्वन्न लिप्यत इत्यादिना । इदानीं तु तावेव मोक्षसाधनं न तु तदुभयत्यागेनान्यदिति नियमज्ञापनाय योगसंन्यासवतस्तदुभयाभाववतश्च मुक्तिसंसारविस्तरलक्षणं फलमाह—**युक्त इति** । कर्मफलं त्यक्त्वेत्यनेन प्रागुक्तकामादिवर्जनरूपसंन्यासी ज्ञेयः । युक्तः भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपयोगयुक्तः नैष्ठिकीं स्वाभाविकीं शान्तिं स्वरूपानन्दाविर्भावलक्षणां मुक्तिमाप्नोति । अयुक्तः योगहीनः कामकारेण फलकामादिना कर्मानुष्ठानेन संन्यासाभावेनेति यावत् । फले क्षुद्रफले सक्तो निबध्यते नितरां संसारमनुभवतीत्यर्थः ॥ १२ ॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥
नवद्वारे पुरे देही[१] नैव कुर्वन्न कारयन् ॥ १३ ॥

---

१ देहे इति शङ्करानन्दपाठः ।

न० टी०—एवमयुक्तः कर्मस्वभिमानाद्देहेन्द्रियकर्मभिर्बध्यते इत्युक्तं, ज्ञानी तु देहे वर्तमानोऽपि देहेन्द्रियकर्मभ्यो विलक्षण एवेत्याह—**सर्वकर्माणीति**। वशी स्ववशीकृतचित्तेन्द्रियः नित्यनैमित्तिकादीनि सर्वाणि कर्माणि अनादिकर्मात्मिकाविद्याकृतप्रकृतिसम्बन्धस्तज्जन्यदेहेन्द्रियनिमित्तकमिदं कर्तृत्वं, न केवलस्वरूपप्रयुक्तमिति विवेकयुक्तेन मनसा संन्यस्य त्यक्त्वा नवद्वारे नेत्रकर्णनासिकामुखपायूपस्थात्मकनवद्वारवति देहात्मके पुरे पुरवदहंभाववर्जिते देही देहाश्रयभूतोऽहमिति विवेकवान्न तु अज्ञवद्देहाभिन्नः सुखं यथा स्यात्तथाऽऽस्ते। सुखत्वे हेतुः—नैव कुर्वन्न कारयन्निति। इदमहं करोमीत्यहंकाराभावात्स्वयं नैव कुर्वन्, अन्यत्र देहपर्यन्ते ममकाराभावान्नैव कारयन्नास्तेऽतो न बध्यते इति भावः ॥ १३ ॥

म० टी०—अशुद्धचित्तस्य केवलात्संन्यासात्कर्मयोगः श्रेयानिति पूर्वोक्तं प्रपञ्च्याधुना शुद्धचित्तस्य सर्वकर्मसंन्यास एव श्रेयानित्याह—**सर्वेति**। नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं चेति सर्वाणि कर्माणि मनसा कर्मण्यकर्म यः पश्येदित्यत्रोक्तेनाकर्त्रात्मस्वरूपसम्यग्दर्शनेन संन्यस्य परित्यज्य प्रारब्धकर्मवशादास्ते तिष्ठत्येव। किं दुःखेन नेत्याह—सुखमनायासेन आयासहेतुकायवाङ्मनोव्यापारशून्यत्वात्। कायवाङ्मनांसि स्वच्छन्दानि कुतो न व्याप्रियन्ते तत्राह—वशी स्ववशीकृतकार्यकरणसंघातः। क्वास्ते नवद्वारे द्वे श्रोत्रे द्वे चक्षुषी नासिके वागेकेति शिरसि सप्त, द्वे पायूपस्थाख्ये अध इति नवद्वारविशिष्टे देहे देही देहभिन्नात्मदर्शी प्रवासीव परगृहे तत्पूजापरिभवादिभिरप्रहृष्यन्नविषीदन्नहंकारममकारशून्यस्तिष्ठति अज्ञो हि देहतादात्म्याभिमानाद्देह एव नतु देही स च देहाधिकरणमेवात्मनोऽधिकरणं मन्यमानो गृहे भूमावासने वाहमास इत्यभिमन्यते नतु देहेऽहमास इति भेददर्शनाभावात्। संघातव्यतिरिक्तात्मदर्शी तु सर्वकर्मसंन्यासी भेददर्शनाद्देहेऽहमास इति प्रतिपद्यते अत एव देहादिव्यापाराणामविद्ययात्मन्याक्रिये समारोपितानां विद्यया बाध एव सर्वकर्मसंन्यास इत्युच्यते। एतस्मादेवाज्ञवैलक्षण्याद्युक्तं विशेषणं नवद्वारे पुर आस्त इति। ननु देहादिव्यापाराणामात्मन्यारोपितानां नौव्यापाराणां तीरस्थवृक्ष इव विद्यया बाधेऽपि स्वव्यापारेणात्मनः कर्तृत्वं देहादिव्यापारेषु कारयितृत्वं च स्यादिति नेत्याह—नैव कुर्वन्न कारयन् आस्त इति संबन्धः ॥ १३ ॥

शं० टी०—नन्वकामस्य कर्मयोगेनैव मुक्तिश्चेत्तर्हि सर्वैरप्यकामनया कर्मैव कर्तव्यं न तु संन्यास इत्याशङ्कायांन 'नित्यनैमित्तिकैरेव'इति न्यायेन अकामनया कृतकर्मणां फलं चित्तशुद्धिस्तस्याः फलं ज्ञानं ज्ञानस्य सर्वकर्मसंन्यासः 'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्।ज्ञानं च विमलीकुर्वन्नभ्यासेन च वासयेत्। अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः' इति सदात्मनावस्थानं च फलमतो बहुजन्मकृतसुकृतपरिपाकात्संप्राप्तचित्तशुद्धेस्तयैव समुत्पन्नपरावरैकत्वविज्ञानस्य सर्वात्मदर्शिनो ब्रह्मविदः कर्मेषदपि न संभवति कारणाभावात्किंतु ब्रह्मविद्वर्यः सर्वाणि कर्माणि संन्यस्य स्वयमविक्रियब्रह्मात्मना तूष्णीं तिष्ठतीत्याह—**सर्वेति**। नित्यनिरन्तरसमाधिनिष्ठानिर्मूलितसर्ववासनापटलत्वेन सुप्रसन्नबाह्याभ्यन्तरकरणत्वाद्वशी वशीकृतसर्वेन्द्रियग्रामः शुद्धात्मा ब्रह्मवित् सर्वकर्माणि नित्यनैमित्तिककाम्यप्रतिषिद्धलक्षणानि शास्त्रीयाण्यशास्त्रीयाणि च सर्वाणि कर्माणि मनसाऽधिष्ठानयाथात्म्यसंदर्शनसंजातारोपितसर्वदृश्यवस्तुमिथ्यात्वप्रत्ययवता संन्यस्य कर्म तत्कर्ता तत्साधनं तत्फलं च सर्वमसदेवेति विज्ञानेन संत्यज्येत्यर्थः। ननु मनसेतिवचनात् सर्वेषां कर्मणां मनसैव त्यागो न तु बहिःक्रियया विहितानां त्यागायोगादिति चेन्न विकल्पो नहि वस्तु 'मायामात्रमिदं द्वैतम्' इति सर्वमिथ्यात्वदर्शिनो विदुषो विध्यनुपपत्तेः विधेरपि दृश्यान्तःपातित्वाद्यथा मरुस्वरूपदर्शिनो जलपानविधिवचनं जलवन्मिथ्या भवति तथाऽधिष्ठानब्रह्मसंदर्शिनः कर्मविधिरपि कर्मवत्कारकवन्मिथ्यैव भवति सर्वप्रमाणैः सर्वं मिथ्यैव पश्यतो ब्रह्मविदः कर्मप्रवृत्तिश्च न संभवत्येव। ननु सर्वं मिथ्यैवेति प्रवर्ततामिति चेन्न मिथ्या-

त्वबुद्धेः प्रवृत्तेश्च परस्परविरोधादेकाधिकरणत्वानुपपत्तेः । नन्वन्तर्मिथ्यात्वबुद्ध्या बहिः सत्यत्वबुद्ध्या क्रियतां कर्मेति चेन्न एकस्मिन्वस्तुनि बुद्धिद्वयायोगात् नहि मरुं दृष्टवतो जलमिथ्यात्वबुद्धिस्तत्सत्यत्वबुद्धिश्चोपपन्ना दृष्टा तद्वत्सर्वदृश्यमिथ्यात्वज्ञानं तत्सत्यत्वज्ञानं तत्प्रवृत्तिश्च नैकस्य कदाप्युपपद्यते पदार्थसत्त्वधीपूर्वकत्वात्प्रवृत्तेर्मनसि सर्वदृश्यमिथ्यात्वदृढप्रत्ययवति विदुषि सति कथं बहिःप्रवृत्तिः संपद्येत यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोतीति वागादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वश्रवणात्ततो बहिःकरणं मनसा संन्यास इति यत्तदपास्तं तस्मात्सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं सर्वकर्माणि मनसा संन्यस्य ब्रह्मविद्वर्यः स्वयमविक्रियब्रह्मात्मना तूष्णीमास्ते । कुत्रेत्याकाङ्क्षायामाह—**नवेति** । नवद्वारे चक्षुर्भ्यां श्रोत्राभ्यां नासिकाभ्यां वक्त्रेण च पायूपस्थाभ्यां च नवसंख्याकानि द्वाराणि सूर्याद्यधिदैवतरक्षितानि यस्य तन्नवद्वारं प्रत्यगात्मैकराजकं बुद्धिप्रधानकं मनःप्रभृतिसर्वकरणपरिचारकं प्राणादिदशवायुग्रामपालकं ब्रह्मविष्णवादिसर्वदेवतायतनं तस्मिन नवद्वारे पुरे देहे सुखं स्वसुखाविर्भावं यथा तथास्ते सुखरूपेण तिष्ठतीत्यर्थः । ननु विद्वान् देहे आस्ते इति यत्तदनुपपन्नं विद्वानविद्वान् यतिरयतिश्च सर्वोऽपि देहे एवास्ते अहमिहास इत्यनुभवादिति चेन्न देहात्मबुद्धेर्मूढतमस्य विपरीतप्रत्ययदर्शनात् यस्तु देहमात्रात्मदर्शी मूढतमस्तस्य गेहे देहल्यामास इति प्रत्ययं विना नाहं देह आस इति प्रत्ययः संभवति यथा ब्रह्मविदः तथाच ब्रह्माण्डे चराचरं सर्वं वस्तुजातं स्वतेजसा प्रकाशयन्तं भानुमन्तमिव बुद्ध्यादिसर्वदृश्यजातमनात्मकमात्मभासा भासयन्तं स्वप्रकाशं चिदेकरसं सर्वसाक्षिणमसङ्गोदासीनं नित्यशुद्धबुद्धमुक्तस्वभावमानन्दघनमात्मानं स्वात्मना साक्षादयमेवाहमस्मीति यो विजानाति स एव देहव्यतिरिक्तात्मदर्शी विद्वान् शक्नोति गेहे देवदत्तवद्देहे निष्क्रियब्रह्मात्मना सुखमासितुं नान्यस्तत एवोच्यते भगवता सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देहे इति । यद्वा वशी नित्यनिरन्तरब्रह्मनिष्ठया वशीकृतान्तर्बहिःकरणो निश्चलात्मा ब्रह्मविद्वर्यः सर्वकर्माणि विहितानि प्रतिषिद्धान्युभयविलक्षणानि च देहचेष्टारूपाणि सर्वाण्यपि च कर्माण्यतीतानेककल्पेष्वधुना च सर्वावस्थासु सर्वदा देहेन्द्रियव्यापारेण परिणतया प्रकृत्यैव कृतानि नतु मया कूटस्थासङ्गचिद्रूपेणेत्येवमात्मानात्मनोः स्वरूपविवेकज्ञानवता मनसा नवद्वारे स्थूलेन पुर्यष्टकेन च नवद्वारवति पुरे पुरसदृशे पूर्णत्वाद्वा पुरं तस्मिन् पुरे देहे कारणे देहशब्दोपलक्षितायां प्रकृतावेव संन्यस्य जननमरणादिविकाराः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिधर्मा जाग्रदाद्यवस्थाविशेषाश्च सर्वे प्रकृतेरेव नतु कूटस्थासङ्गचिद्रूपात्मनो ममेति सम्यगनात्मतादात्म्याध्यासं परित्यज्य स्वयं निष्कलनिष्क्रियनित्यशुद्धबुद्धनिरन्तरानन्दैकरसाद्वितीयब्रह्मात्मना स्वात्मन्येव तूष्णीं सुखमास्ते न किंचिद्विकरोतीत्यर्थः । ननु जपाकुसुमसान्निध्यात्स्फटिके रक्तिमवदनात्मसान्निध्यादात्मनि प्रतीयमानान्यनात्मकर्तृकानि सर्वाणि प्रकृतिरेव करोति नाहं करोमीति विद्यया स्वयं ब्रह्मभावमापद्य विद्वान् तिष्ठतु तथापि निष्क्रियात्मना स्थातुं न शक्नोति तस्य ब्रह्मात्मना तिष्ठतोऽन्यकर्तृकक्रियासंबन्धाऽभावेऽपि स्वाश्रयक्रियावत्त्वसंभवात् यथान्तर्गृहस्थप्रदीपस्य पवनाद्यन्यकर्तृकचलनक्रियाभावेऽपि स्वकर्तृकतैलादानक्रिया विद्यते यथा वा गजमारुह्य गच्छतो राज्ञो गजकर्तृकगमनक्रियाभावेऽपि स्वनिष्ठचलनक्रिया गजप्रेरणादिक्रिया च विद्यते तद्वत् परमात्मनोऽपि कर्तृत्वं कारयितृत्वं विद्यत एवेति चेन्न निरवयवत्वात्परमात्मनः क्रियाश्रयत्वानुपपत्तेः "निष्कलं निष्क्रियम्" इति निरवयवत्वनिष्क्रियत्वश्रवणादात्मनः क्रियावत्त्वे सावयवत्वादनित्यत्वं स्यात्तदनिष्टं सर्ववादिनां श्रुतिविरोधश्च स्यात् । राज्ञोऽवयवित्वात्कर्तृत्वाद्युपपत्तिर्न तथात्मन इति बोधयितुमाह—**नैव कुर्वन्न कारयन्निति** । निरवयवत्वात्परमात्मा स्वयं नैव किंचित्करोति नाप्यन्यान्कारयति चेत्यर्थः । नहि निरवयवे परिपूर्णे च वस्तुनि चलनक्रिया कल्पयितुं शक्यते प्रमाणविरोधात्, नहि निरवयवे पूर्णे आकाशे चलनं संभवति तद्वदात्मन्यपि नित्यः सर्वगतः

स्थाणुरित्यात्मनः पूर्णत्वनिष्क्रियत्वयोः प्रतिपादितत्वात् । ननु परमात्मनो निरवयवस्य निष्क्रियस्य कर्तृत्वकारयितृत्वयोरसंभवे " सर्वाधिपत्यं कुरुते महात्मा । एष एव साधुकर्म कारयति । एष त आत्मान्तर्याम्यमृतः " इत्यादिश्रुतीनामात्मनः कर्तृत्वकारयितृत्वप्रतिपादिकानामप्रामाण्यं स्यादिति चेन्न सन्निधिमात्रेणात्मनस्तथात्वसंभवाद्यथा सूर्यसान्निध्यात्तमोनिवृत्तौ सत्यां तन्निवृत्तिं सूर्यः करोतीत्युपचर्यते, यथा चुम्बकसान्निध्यादयसि चलति सति तच्चलनं चुम्बकमयश्चालयतीति चुम्बके उपचर्यते तथात्मसान्निध्यात्प्रकृतौ विजृम्भमाणायां तद्विजृम्भणं सर्वाधिपत्यं परमात्मन्युपचर्यतेऽविकारिण्येव तथैवात्मसान्निध्याद्बुद्ध्यादेः प्रवृत्तौ सत्यां बुद्ध्यादीनात्मा प्रवर्तयतीति तत्प्रवृत्तिरात्मन्यविक्रिय एवोपचर्यते परमात्मा करोति कारयतीति " ध्यायतीव लेलायतीव " इतिश्रुतेः। आत्मन एवंविधकर्तृत्वकारयितृत्वयोः संभवात्तमिममर्थमादाय प्राणिनामस्वातन्त्र्यसिद्ध्यै परमात्मनः कर्तृत्वं कारयितृत्वं च श्रुतयो वदन्त्यनयोक्तरीत्या परमात्मनः सृष्ट्यादिक्रियाप्रतिपादिकानामेतासां च श्रुतीनां प्रामाण्यमभ्युपगन्तव्यम् । अन्यथा " निष्कलं निष्क्रियं शान्तम् " इति । न तदश्नाति किंचन नतदश्नाति कश्चन " इत्यादिश्रुतीनामात्मनो निर्विकारत्वप्रतिपादिकानां व्याकोपः स्यात् यत एवं परमात्मनोऽविक्रियत्वं बहुश्रुतिप्रमाणकं तत आत्मा किंचिन्न करोति न कारयतीति सिद्धम् ॥ १३ ॥

श्री० टी०—एवं तावच्चित्तशुद्धिशून्यस्य संन्यासात्कर्मयोगो विशिष्यत इत्येतत्प्रपञ्चितमिदानीं शुद्धचित्तस्य संन्यासः श्रेष्ठ इत्याह—**सर्वकर्माणीति** । वशी यतचित्तः सर्वाणि कर्माणि विक्षेपकाणि मनसा विवेकयुक्तेन संन्यस्य सुखं यथा भवत्येवं ज्ञाननिष्ठः सन्नास्ते । क्वास्त इत्यत आह—**नवद्वारे** इति । नवद्वारे नेत्रे नासिके कर्णौ मुखं चेति सप्त शिरोगतानि, अधोगते द्वे पायूपस्थरूपे इत्येवं नव द्वाराणि यस्मिंस्तस्मिन्पुरे पुरवदहंभावशून्ये देहे देही अवतिष्ठते अहंकाराभावादेव स्वयं तेन देहेन नैव कुर्वन्ममकाराभावाच्च न कारयन्नित्यविशुद्धचित्ताद्व्यावृत्तिरुक्ता । अविशुद्धचित्तो हि संन्यस्य पुनः करोति कारयति च नत्वयं तथा अतः सुखमास्त इत्यर्थः ॥ १३ ॥

स० टी०—संन्यासात्केवलात्कर्मयोगोऽशुद्धधियो वरः ॥ इत्युक्त्वाहाधुना शुद्धबुद्धेः संन्यसनं वरम् ॥१॥ नित्यं नैमित्तिकं काम्यं निषिद्धं चेति सर्वशः ॥ कर्मण्यकर्म यः पश्येदित्यत्रोक्तविवेकतः ॥ २ ॥ अकर्त्रात्मस्वरूपस्य विचारान्वितचेतसा ॥ त्यक्त्वा प्रारब्धवशतोऽनायासेनैव तिष्ठति ॥ ३ ॥ आयासहेतुकायवाङ्मनोव्यापारवर्जितः ॥ कार्यकारणसंघातो येनादौ स्ववशीकृतः ॥ ४ ॥ क्वास्त इत्याह भगवान्देहभिन्नात्मतत्त्वदृक् ॥ नवद्वारविशिष्टेऽस्मिन्देहे तिष्ठत्यसौ पुरे ॥ ५ ॥ परगेहे प्रवासीव निर्ममो निरहंकृतिः ॥ देहमात्रात्मदर्शी तु देहाधिकरणं नरः ॥ ६ ॥ स्वस्याधिकरणं मत्वा गृहे भूमौ तथासने ॥ अहमासेऽभिमानीति नत्वासे देह इत्यपि ॥ ७ ॥ संघातव्यतिरिक्तात्मदर्शिनस्तूपपद्यते ॥ देह आस इति ज्ञानं विद्यया भ्रान्तिबाधनात् ॥ ८ ॥ ननु देहादिव्यापारा आत्मन्यारोपिता भ्रमात् ॥ विद्यया भ्रान्तिबाधे हि तेषां बाधो भवत्विति ॥ ९ ॥ किंत्वात्मनः स्वकीयेन व्यापारेणास्तु कर्तृता ॥ यथा कारयितृत्वं स्याद्देहादिव्यापृताविति ॥ १० ॥ नैवमात्माऽक्रियोह्यास्ते नैव कुर्वन्न कारयन् ॥ यथाकाशस्य नीलिम्ना संबन्धो नास्ति सर्वथा ॥ ११ ॥ तथात्मनो न संबन्धः कर्तृत्वादिभिरण्वपि ॥ अक्रियस्याद्वयस्यास्य कर्तृत्वाद्यैरसङ्गिनः ॥ १२ ॥ कर्तृत्वाद्याः कुतो धर्मा भवन्त्याविद्यका जडाः ॥ आकाशे वर्णवन्नास्ति कर्तृत्वादि स्वतोऽमले ॥ १३ ॥ आविद्यकं तु विध्वस्तं तत्त्वधीजन्ममात्रतः ॥ तस्मात्त्यक्त्वा स कर्मास्ते नैव कुर्वन्न कारयन् ॥ १४ ॥ वसन्देहागारे परमपदनिष्ठो विजयते न कर्ता नो भोक्ता क्वचिदपि कदाचिद्विहरणे ॥ निजानन्दारामो विषयविरतिर्नान्यशरणः परब्रह्माद्वैतेऽपरिमितवपुः सन्विहरति ॥ १५ ॥ १३ ॥

भा० टी०—एवमशुद्धचित्तस्याविदुषः संन्यासात्कर्मयोगो विशिष्यत इत्युपपादितं शुद्धचित्तः परमार्थदर्शी कथमास्त इत्यपेक्षायामाह—**सर्वेति** । सर्वाणि नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं चेति तानि कर्माणि मनसा विवेकबुद्धया कर्मादावकर्मदर्शनेन संत्यज्य सुखमास्ते दुःखहेतुसर्वव्यापारोपरमात् यतः वशी जितेन्द्रियः । क आस्त इत्यत आह—**नवेति** । नवद्वारे पुरे द्वे श्रोत्रे नेत्रे नासिके मुखं चेति सप्त शिरसि, अवाक् द्वे मूत्रपुरीषविसर्गार्थे, एवं नवद्वारयुक्ते पुरे नगरस्थानीये आत्मैकस्वामिके इन्द्रियाणि परिचारकाः बुद्धिरमात्योऽहंकारो युवराजो मनः शिल्पीत्येवं रूपैरिन्द्रियादिभिः पौरैरधिष्ठिते आस्ते यतो देही देहाद्यतिरिक्तात्मदर्शी यस्त्वज्ञः स तु देहात्मदर्शी गेहादावास्तेऽतो युक्तं विशेषणम् । यद्यप्येवं तथाप्यात्मसमवायित्वेन कर्तृत्वकारयितृत्वे तस्य स्यातामित्यत आह—नैव कुर्वन्स्वयं न च कारयन् कार्यकरणानि क्रियासु प्रवर्तयन्नास्त इति संबन्धः । यत्तु वशी विवेकवैराग्यसंपन्नो नवद्वारे पुरे मानुषे शरीरे सुखमास्त इति संबन्धः । यद्यपि नवद्वारं श्वमार्जारादिशरीरमपि भवति तथापि वशिशब्दसंयोगान्मानुषमिति लभ्यते । सुखमिति क्रियाविशेषणम् अनेनान्तःकरणस्य हर्षशोकादयः परिणामा निराकृताः । वशीत्यत्र वैराग्योक्त्या रागाद्यपरपर्यायकामतदवस्थाविशेषक्रोधरूपावन्तःकरणपरिणामौ वारितौ । विवेकोक्त्या चाहंकारतन्निबन्धनममकाराध्यासौ चिन्तनात्मकचित्तपरिणामं च निराकृत्य विशुद्धचिदाकारतया बुद्धेरवस्थानमुक्तम् । ततश्च विशुद्धचिदाकारबुद्धिपरिणाम एव निष्कृष्टो वशिशब्देनोक्तः । किं कृत्वेत्यत आह—मनसा सह सर्वकर्माणि संन्यस्य त्यागेन ज्ञानमप्युपलक्ष्यते ततश्च संन्यस्यात्मानं ज्ञात्वा सुखमास्त इति ज्ञेयम । वशिनं विशिनष्टि—**अदेहीति** । देहो लिङ्गशरीरं तद्रहितः । अयमाशयः षोडशकलात्मा हि पुरुषः तत्र भूतेन्द्रियप्राणाः प्रवर्त्याः प्रवर्तकमन्तःकरणं तच्च बुद्धिसंकल्पकतया सर्वो हि बुद्धया निश्चित्य मनसा संकल्प्य प्रवर्तते तत्र मनस्त्यागेन विज्ञानकर्मत्यागः संभवतीति केदानीं लिङ्गदेहो नहि शिरसि छिन्ने कबन्धो देहतां प्रतिपद्यते इति मनसेत्युक्तम् । बुद्धिस्तु सर्वाकारपरित्यागेन चिन्मात्र उपसंक्रान्ताऽहंकारादीनां तु कथापि विवेकेनोन्मूलितेतीतरे व्याचख्युः तत्रेदं वक्तव्यं वशिशब्दयोगं विनापि सर्वकर्माणीत्यादेर्योगात् प्रकरणाच्च मानुषशरीरमेव लभ्यते सर्वकर्माणि संन्यस्येत्यनेन निषिद्धादिमननरूपमानसकर्मत्यागे मनस्त्यागसिद्धया त्यागकरणस्यापेक्षितत्वेन च सहशब्दमध्याहृत्य पृथङ्मनस्त्यागवर्णनमसङ्गतम् । किंच विवेकयुक्तत्वमेव मनस्त्यागोऽतो विवेकयुक्तेन मनसा सर्वकर्माणि संन्यस्येत्येव युक्तम् एतेन वशिशब्देन विवेकवैराग्ययुक्तत्ववर्णनं प्रत्युक्तम् । वशिशब्दस्य स्वतन्त्रवाचित्वेन जितेन्द्रियत्वप्रतीत्या इतरोक्तार्थस्यार्थिकार्थत्वात् । यदप्यदेही लिङ्गशरीररहित इति तदपि न भेदबोधकेनिप्रत्ययेन देहादितरात्मदर्शीति वर्णनस्यैव नवद्वारे पुरे आस्ते इत्यस्य योगेन स्वारसिकत्वेन प्रश्लेषेण क्लिष्टकल्पनाया अन्याय्यत्वात् । इमामेवारुचिं मनसि निधाय पक्षान्तरस्यैतद्व्याख्यानकर्तृभिर्दर्शितत्वाच्चेति दिक् । यदप्यन्ये वशी जितचित्तः समाधिस्थो योगी नवद्वारे नवैव पञ्चज्ञानेन्द्रियाणि षष्ठः प्राणस्तेनैव तत्प्रवर्त्यानां कर्मेन्द्रियाणां संग्रहः बुद्धयहंकारचित्तानीति नवैतानि द्वाराणीव पुरपतेर्जीवस्य भोगार्थं विषयप्रवेशस्थानानि यस्मिन्नवद्वारे पुरे शरीराख्ये विचित्रवासनाकल्पितानन्तविषयवति अनेकैः कर्मसचिवैः अधिष्ठिते सुखदुःखादिनानापण्यवति मनसा सर्वद्वारोद्घाटनकुञ्चिकया सह सर्वाणि कर्माणि पुरपतिरिव राज्यकार्याणि संन्यस्य सुखं निर्विकल्पसंविन्मात्ररूपेणास्ते इति तदपि असङ्गतमेव चित्तस्य वृत्तिनिरोधरूपजयापेक्षया यस्मादित्यागवदितरत्यागाप्रसिद्धया मनसा सहेति सहशब्दाध्याहारेण वर्णनस्य पुनरुक्तिग्रस्तत्वात् । मृतशरीरस्य पुरस्य सत्त्वेपि पुरोक्तद्वाराणामभावेन नवद्वाराणि यस्मिन्नित्युक्तेरनुचितत्वात् । निर्विकल्पसमाधिस्थस्य भोगप्राप्तिद्वाराणां लयादहं देहाद्भिन्न इत्येतावन्मात्रभानस्याप्यभावात् नवद्वारे पुरे आस्ते इत्यस्य वैयर्थ्यापत्तेश्चेति दिक् ॥ १३ ॥

प० टी०—एवं तावच्चित्तशुद्धिमुपन्यस्य कर्मसंन्यासापेक्षया कर्मयोगो विशिष्यत इति पूर्वमुक्तमिदानीं शुद्धचित्तस्य संन्यासः श्रेयानित्याह—**सर्वकर्माणीति** । वशी जितचित्तः सर्वकर्माणि विवेकयुक्तेन मनसा संन्यस्य स्वत एवोपरतानि कृत्वा सुखं यथा भवति तथास्ते वर्तते । कुत्रास्त इत्याह—**नवद्वार इति** । नेत्रकर्णनासाद्वन्द्वानि मुखमेकं चेति सप्त पायूपस्थं चेति द्वे एवं नवद्वारे पुरवदहंभावशून्ये देहे देहीव तिष्ठति । यथा कश्चिन्नवद्वारे नगरे तिष्ठन्नपि नागरधर्मान्न स्पृशति तद्वदहंकाराभावाच्छुद्धचित्तो न कुर्वन्ममकाराभावाच्च न कारयन्, अशुद्धचित्तस्तु करोति कारयति च ॥ १३ ॥

रा० टी०—पूर्वं नैव किंचित्करोमीत्यादिना कर्तृत्वाभिमानत्यागेन संन्यासो विवृतोऽधुना कारयितृत्वाभिमानत्यागेन संन्यासशब्दार्थं स्पष्टयति—**सर्वकर्माणीति** । यद्वा प्राक्कर्माणि ब्रह्मण्याधाय यः करोतीत्यत्र कर्मणां ब्रह्मण्याधानं नाम न कर्मणां स्वरूपेण त्यागोऽपितु सर्वकर्माणि मनसा संन्यस्य भगवानेव स्वपूजात्मकानि मच्छुभार्थं मया कारयति मम कर्तृत्वशक्तिरपीशाधीनैवेत्यनुसंधायेत्येवंरूपमित्यर्थः । स्वरूपेण कर्माणि परित्यज्येत्यर्थपक्षे मनसेति व्यर्थमिति भावः । वशी जितेन्द्रियः स्वातन्त्र्येण नैव कुर्वन्नकारयंश्च नवद्वारे चक्षुःश्रोत्रघ्राणानां षड् द्वाराणि मुखं पायूपस्थे चेत्येवं नवद्वारवति पुरे देहे सुखं यथा तथा आस्ते कर्मलेपहीनो वर्तत इत्यर्थः ॥ १३ ॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

न० टी०—ननूक्तलक्षणो विवेकी कर्मभिर्न बध्यते अज्ञस्तु कामकारेण शुभाशुभकर्मभिर्बध्यत इत्युक्तं, तत्र कस्य गुणः कस्य वा दोषः प्रयोजककर्त्रीश्वरायत्तकर्तृत्वात्सर्वस्य लोकस्य । "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते" इत्यादिश्रुतेः प्रयोजककर्तुरीश्वरस्यैव वैषम्यं, तस्यैव पुण्यपापसंबन्धः स्यादित्याशङ्कावारणायाह—**न कर्तृत्वमिति द्वाभ्याम्** । प्रभुः परमेश्वरः लोकस्य जनस्य 'लोकस्तु भुवने जने' इति कोशात् । कर्तृत्वं शुभाशुभानि कर्माणि च न सृजति नापि कर्मफलसंयोगं संबन्धं सृजति किंतु लोकस्य स्वभावः अनादिकर्मात्मिकाऽविद्यानिरूपितप्रकृतिः कर्तृत्वादिना प्रवर्तते, तदनुसारेणैवेश्वरः कर्मसु प्रवर्तयति न त्वपूर्वकर्तृत्वादिकमुत्पादयतीत्यर्थः ॥ १४ ॥

म० टी०—देवदत्तस्य स्वगतैव गतिर्यथा स्थितौ सत्यां न भवति एवमात्मनोऽपि कर्तृत्वं कारयितृत्वं च स्वगतमेव सत्संन्यासे सति न भवति अथवा नभसि तलमलिनतादिवद्वस्तुवृत्त्या तत्र नास्त्येवेति संदेहापोहायाह—**नेति** । लोकस्य देहादेः कर्तृत्वं प्रभुरात्मा स्वामी न सृजति त्वं कुर्विति नियोगेन तस्य कारयिता न भवतीत्यर्थः । नापि लोकस्य कर्माणीप्सिततमानि घटादीनि स्वयं सृजति कर्तापि न भवतीत्यर्थः । नापि लोकस्य कर्मकृतवतस्तत्फलसंबन्धं सृजति भोजयितापि भोक्तापि न भवतीत्यर्थः । "समानः सन्नुभौ लोकावनुसंचरति । ध्यायतीव लेलायतीव स हि:" इत्यादिश्रुतेः । अत्रापि शरीरस्थोऽपि कौन्तेय न करोति न लिप्यत इत्युक्तेः यदि किंचिदपि स्वतो न कारयति न करोति चात्मा कस्तर्हि कारयन्कुर्वंश्च प्रवर्तत इति तत्राह—**स्वभावस्तु** अज्ञानात्मिका दैवी माया प्रकृतिः प्रवर्तते ॥ १४ ॥

शं० टी०—नन्वात्मनो निरवयवत्वेन क्रियाश्रयत्वानुपपत्तौ स्वतः कर्तृत्वासंभवेऽपि यथाऽयस्कान्तस्यायश्चालकत्वं तथा कारयितृत्वं स्यादेवेत्याशङ्कायां न, तथात्वे प्राणिनामात्मसांनिध्यस्य नित्यत्वात्सर्वदा सर्वेषां प्रवृत्तिरेव स्यात्तददर्शनादात्मनः कारयितृत्वं न प्रामाणिकमित्याशयेनाह—**न कर्तृत्वमिति** । प्रकर्षेण

स्वयमेव सर्वत्र भाति सर्वं भासयतीति वा, सर्वात्मना स्वयमेव भातीति वा प्रभुरात्मा स्वयं लोकस्य प्राणिनः कर्तृत्वं त्वमिदं कुर्विति कर्माणि प्रवृत्तिं न सृजति यं कंचन जन्तुं न प्रवर्तयतीत्यर्थः । तथा कर्माणि "कर्तुरीप्सिततमं कर्म" इतिस्मरणात् क्रियया प्राप्तुमिष्टतमानि कर्माणीत्युच्यन्ते तानि न सृजति नोत्पादयति इष्टप्रदमनिष्टदं वा क्रियया प्राप्तुं योग्यं वस्तु न संपादयतीत्यर्थः । कर्मफलसंयोगं च न सृजति तं तं प्राणिनं तत्तत्कृतपापपुण्यफलेन न संयोजयति प्राणिनः सुखदुःखानि नानुभावयति चेत्यर्थः । आत्मनः कारयितृत्वप्रापयितृत्वभोजयितृत्वाद्यभावे तर्हि कारयिता प्रापयिता भोजयिता क इत्याकाङ्क्षायामाह–स्वभाव इति । स्वयमेव सर्वं भावयतीति, स्वं भावयतीति वा स्वभावः प्रकृतिर्वासनामयी प्रवर्तयति कर्मरूपिणी प्रकृतिरिष्टानिष्टे संपाद्य सुखदुःखे चानुभावयति प्राणिनः स्वात्मा तु प्राणिप्रकृतितच्चेष्टातत्सुखदुःखानुभूतीनां साक्ष्येव भवत्यविक्रियः सन्नित्यर्थः ॥ १४ ॥

श्री० टी०–ननु "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते" इत्यादिश्रुतेः परमेश्वरेणैव शुभाशुभफलेषु कर्मसु कर्तृत्वेन प्रयुज्यमानोऽस्वतन्त्रः पुरुषः कथं तानि कर्माणि त्यजेदीश्वरेणैव ज्ञानमार्गे प्रयुज्यमानः शुभान्यशुभानि च त्यक्ष्यतीति चेत् एवंसति वैषम्यनैर्घृण्याभ्यां प्रयोजककर्तृत्वादीश्वरस्यापि पुण्यपापसंबन्धः स्यादित्याशङ्क्याह–**न कर्तृत्वमिति** द्वाभ्याम् । प्रभुः ईश्वरः जीवलोकस्य कर्तृत्वादिकं न सृजति किंतु जीवस्यैव स्वभावोऽविद्यैव कर्तृत्वादिरूपेण प्रवर्तते अनाद्यविद्या कामवशात्प्रवृत्तिस्वभावं जीवलोकमीश्वरः कर्मसु नियुङ्क्ते न तु स्वयमेव कर्तृत्वादिकमुत्पादयतीत्यर्थः ॥ १४ ॥

स० टी०–यथा पुंसः स्वनिष्ठैव गतिः सत्यां स्थितौ न सा ॥ तथात्मनोऽपि कर्तृत्वं संन्यासे सति नास्ति किम् ॥ १ ॥ यद्वा नभसि वर्णादिवन्नास्त्यात्मनि वस्तुतः ॥ इति संदेहविच्छित्त्यै भगवानाह चान्तिमम् ॥ २ ॥ सृजत्यात्मा न कर्तृत्वं देहादेस्त्वं च कुर्विति ॥ नापि लोकस्य कर्माणि प्रासादादीनि यानि च ॥ ३ ॥ अत्यन्तेप्सितरूपाणि स्वयं सृजति कर्हिचित् ॥ न चाकृतवतः कर्म लोकस्य तत्फलेन च ॥ ४ ॥ ससंबन्धं सृजत्यात्मा भोक्ता भोजयिता न सः ॥ यद्यात्मा न स्वतः किंचित्कुरुते कारयत्यजः ॥ ५ ॥ कस्तर्हि कारयन्कुर्वन्प्रवर्तत इहेति चेत् ॥ शृणु स्वभावशब्देन मायाऽविद्यादिशब्दिता ॥ ६ ॥ प्रकृतिर्याऽस्ति सैवेयं व्यवहारे प्रवर्तते ॥ ७ ॥ १४ ॥

भा० टी०–नैव कुर्वन्न कारयन्नित्युक्तं प्रपञ्चयति–नेति । प्रभुरात्मा लोकस्य देहादेः कर्तृत्वं न सृजति न घटप्रासादादीनि कर्माणि नापि घटादिकृतवतस्तत्फलेन संयोगम् अनेन भोजयितृत्वमप्यात्मनो वारितम् उपलक्षणमेतत् भोक्तृत्वनिषेधस्यापि तर्हि कस्य कर्तृत्वादिकमित्यपेक्षायामाह—स्वभावोऽविद्यालक्षणा प्रकृतिर्माया कुर्वन्कारयन्प्रवर्तते । यत्तु स्वस्मिन् भाव आरोपिता सत्ताऽस्येति स्वभावोन्तःकरणं तदेव प्रवर्तते कृत्यै मुक्त्यै वेत्यर्थ इति तन्न, अन्तःकरणस्यापि प्रकृत्यधीनप्रवृत्तिकत्वेन साकाङ्क्षायाः क्लिष्टकल्पनाया अन्याय्यत्वात् । ननु "एष एव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते" इत्यादिश्रुतेः 'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा' इतिस्मृतेश्च परमेश्वरेणैव शुभाशुभफलेषु कर्मसु कर्तृत्वेन प्रयुज्यमानः अस्वतन्त्रः पुरुषः कथं तानि कर्माणि त्यजेत ईश्वरेणैव ज्ञानमार्गे प्रयुज्यमानस्त्यक्ष्यतीति चेत् एवं सति वैषम्यनैर्घृण्याभ्यां प्रयोजककर्तृत्वादीश्वरस्यापि पुण्यपापसंबन्धः स्यादित्याशङ्क्याह–नेति द्वाभ्याम् । इत्येवमुत्थाप्यायमपि श्लोको भाष्यकृद्भिरीश्वरत्वेन कुतो न व्याख्यात इति चेत् अतीतानन्तरश्लोकेन क्लिष्टकल्पनां विनैव सङ्गतिसंभवमभिप्रेत्येति गृहाण ॥ १४ ॥

प० टी०—ननु ' जानामि धर्मं न च मे प्रवृत्तिः " इत्यादिवाक्यैरस्वतन्त्रस्य पुरुषस्य नैव कुर्वन्न कारयन्नित्यादिना स्वतन्त्रत्वं कथमुक्तम्, अथास्तामीश्वरस्यैव प्रयोजकत्वमिति चेत्तर्हि सदसत्कार्यप्रवर्तकत्वेनास्मदादिवत्तस्यापि विषमत्वं स्यादित्याह—न कर्तृत्वमिति द्वाभ्याम् । प्रभुरीश्वरोऽपि लोकस्य जीवलोकस्य कर्तृत्वं कर्माणि कर्मफलसंयोगं वा न सृजति न प्रयोजयति । तर्हि स्वतन्त्रः स्यादित्याह—स्वभाव इति । अनाद्यविद्यागुणोत्पन्नसदसत्संस्कारः स्वभावः स एव लोकेषु प्रवर्तते प्रवृत्तिजनको भवति स एवेश्वरानुग्रहो निग्रहो वेति कल्प्यते ॥ १४ ॥

रा० टी०—ननु दर्शनादिकुर्वन्नैव करोमीति मन्येतेत्युक्तिरयुक्ता तथात्वे मिथ्याज्ञानित्वप्रसङ्गादित्यतः स्वाभिप्रायमाह—नेति । जडमपेक्ष्य प्रभुः समर्थो जीवः लोकस्य कर्तृत्वं लोकेन कर्म न सृजति न कारयति स्वातन्त्र्येणेत्यर्थः । स्वयं च कर्माणि न सृजति न करोति कर्मण्यस्वातन्त्र्ये फले सुतरां तदित्याह—न कर्मेति । सृजतीत्यनुषङ्गः । कर्मफलप्राप्तिं लोकस्य न सृजति लोकस्य फलप्राप्तिसंपादने स्वस्य वा फलसंपादने न स्वतन्त्र इत्यर्थः । स्वातन्त्र्याभावापेक्षया न करोमीति मन्येतेत्युक्तिरिति भावः । यद्वा जीवस्य स्वतन्त्रकर्तृत्वाभावेऽपीश्वरदत्तं क्रियायां क्रियाजन्यादृष्टे कर्मफलप्राप्तौ चास्त्येव स्वातन्त्र्यमतः कथं ब्रह्मण्याधाय कर्माणीति सर्वाणि कर्माणि संन्यस्येति चोक्तिरित्यत आह—नेति । प्रभुरीश्वरः लोकस्य जीवस्य कर्तृत्वमग्निहोत्रादिक्रियायां स्वातन्त्र्यं न सृजति न प्रयच्छति कर्माणि क्रियाजन्यादृष्टानि लोकस्य न सृजति तेषु स्वातन्त्र्यं न प्रयच्छति कर्मफलसंयोगं च लोकस्य न सृजति फलप्राप्तावपि लोकस्य स्वातन्त्र्यं न प्रयच्छतीत्यर्थः । ननु क्रियायामदृष्टेषु फलसंयोगे च जीवस्य स्वातन्त्र्याभावे कथं क्रियादिनिष्पत्तिरित्यत आह—स्वभावस्त्विति । स्वं स्वयमेव भवति परानपेक्षं तिष्ठति तथा स्वयमेव भावयति जगदुत्पादयतीति स्वभावः । स्वेतिपदे उपपदे भवतेर्ण्यन्तात्कप्रत्ययः । स्वस्थितावन्यकरणे च परानपेक्षः स्वतन्त्रो भगवान्स्वभावशब्दार्थः । स एव च प्रवर्तते क्रियाकर्तृत्वे कर्मशब्दितादृष्टेषु फलसंयोगे चेति ध्येयम् । कदापि कुत्रापि नान्यस्य स्वातन्त्र्यं ददाति किंतु सर्वत्र सर्वदा स्वयमेव प्रवर्तत इति भावः ॥ १४ ॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

त० टी०—अत एव—नादत्त इति । विभुः परमेश्वरः कस्यचिज्जीवस्य पापं सुकृतं चैव नादत्ते तयोः स्वभावानुसारेण कारयिताऽपि पापपुण्यभाङ्न भवतीत्यर्थः । ननु जीवानां प्रयोजक ईश्वरो यदि कर्तृत्वकर्माणि न सृजति, पापादि नादत्ते चेत्तर्हि कथं बन्धनहेतुकर्म कुर्वन्तीत्यत आह—अज्ञानेनेति । अनादिकर्मात्मकाज्ञानेन स्वाभाविकं धर्मभूतं ज्ञानमावृतं, तेन हेतुना जन्तवो मुह्यन्ति । अज्ञानेनावृतज्ञानत्वाज्जीवा मोहमन्यथा ज्ञानं प्राप्नुवन्ति अनिष्टे इष्टबुद्ध्या प्रवर्तन्ते भगवति वैषम्यं पुण्यपापं च कल्पयन्तीत्यर्थः ॥ १५ ॥

म० टी०—नन्वीश्वरः कारयिता जीवः कर्ता तथा च श्रुतिः " एष ह्येव साधु कर्म कारयति तं यमुन्निनीषते । एष एवासाधु कर्म कारयति तं यमधो निनीषते" इत्यादिः । स्मृतिश्च ' अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा " इति । तथाच जीवेश्वरयोः कर्तृत्वकारयितृत्वाभ्यां भोक्तृत्वभोजयितृत्वाभ्यां च पापपुण्यलेपसंभवात्कथमुक्तं स्वभावस्तु प्रवर्तत इति तत्राह—नादत्त इति । परमार्थतः विभुः परमेश्वरः कस्यचिज्जीवस्य पापं सुकृतं च नैवादत्ते परमार्थतो जीवस्य

कर्तृत्वाभावात् परमेश्वरस्य च कारयितृत्वाभावात् । कथं तर्हि श्रुतिः स्मृतिर्लोकव्यवहारश्च तत्राह—अज्ञानेनावरणविक्षेपशक्तिमता मायाख्येनानृतेन तमसावृतमाच्छादितं ज्ञानं जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूतं नित्यं स्वप्रकाशं सच्चिदानन्दरूपमद्वितीयं परमार्थसत्यं तेन स्वरूपावरणेन मुह्यन्ति प्रमातृप्रमेयप्रमाणकर्तृकर्मकरणभोक्तृभोग्यभोगाख्यनवविधसंसाररूपं मोहमतस्मिंस्तदवभासरूपं विक्षेपं गच्छान्ति जन्तवो जननशीलाः संसारिणो वस्तुस्वरूपादर्शिनः अकर्त्रभोक्तृपरमानन्दाद्वितीयात्मस्वरूपादर्शननिबन्धनो जीवेश्वरजगद्भेदभ्रमः प्रतीयमानो वर्तते मूढानां तस्यां चावस्थायां मूढप्रत्ययानुवादिन्यावेते श्रुतिस्मृती वास्तवाद्वैतबोधिवाक्यशेषभूते इति न दोषः ॥ १५ ॥

शं० टी०—ननु "एव एव साधु कर्म कारयति । सत्त्वस्यैष प्रवर्तकः । ईश्वरः सर्वभूतानाम् । सर्वाधिपत्यं कुरुते महात्मा । धर्मावहं पापनुदं भगेशम् । वरदं देवमीड्यम् । प्रभुः प्रीणाति विश्वभुक्" इत्यादिश्रुतिभिः स्मृतिभिश्च परमात्मनः कर्तृत्वं कारयितृत्वं धर्मावहत्वं पापापनोदकत्वं समर्पितपूजादिभिः परितोष्टृत्वादिकं प्रतिपाद्यते, कथं न कर्तृत्वं न कर्माणीत्यात्मनः श्रुतिस्मृत्युक्तधर्मवत्त्वाभावः प्रतिपाद्यत इत्याकाङ्क्षायां न श्रुतिस्मृतिभिः पुराणैरप्यात्मन्युपाधिकृतमारोप्य प्रतिपाद्यते मुमुक्षूणां सत्त्वशुद्ध्यर्थं तदुपास्तौ प्रवृत्तिसिद्धये नतु तत्तात्त्विकं, वस्तुतस्तु कूटस्थासङ्गचिद्रूपत्वादात्मा स्वयं न करोति न कारयति नादत्त इत्याह—नादत्त इति । निरवयवत्वान्निष्क्रियत्वाच्च विभुर्व्यापकः स्वयमात्मा भक्तस्य वाप्यन्यस्य वा यस्य कस्यचित्पापं नादत्ते ब्राह्मणो हिरण्यगर्भमिव न गृह्णाति । ननु 'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मृतमात्र एव' इत्यादिवाक्यैर्भक्तकृतं पापं भगवानादत्त इति प्रतिपाद्यत इति चेत्सत्यं प्रतिपाद्यते तत्प्रतिपादनं नामकीर्तनप्रायश्चित्तद्वाऽनात्मज्ञं तत्पापान्मोचयितुमेव भवति नतु परमात्मनो विकारित्वं संपाद्य तत्पापादानप्रतिपादनाय एतत् 'तस्मात्संकीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् । महतामपि कौरव्य विद्ध्यैकान्तिकनिष्कृतिम् ॥ एका विनिष्कृतिः शंभोः सकृदेव हि कीर्तनम्' इत्यादिवचनेभ्योऽवगम्यते । अन्यथा निर्विकारत्वप्रतिपादकबहुश्रुतिविरोधप्रसङ्गात् । किंच यस्य कस्यापि भक्तस्य वान्यस्य वा भक्त्या समर्पितं श्रौतस्मार्तकर्मानुष्ठानजन्यं सुकृतं च नैवादत्ते वह्निराहुतिमिव न किंचिद्गृह्णाति । ननु तर्हि "धर्मावहं पापनुदं वरदं देवमीड्यम्" 'प्रभुं प्रीणाति' 'पत्रं पुष्पं फलं तोयम्' इत्यादिश्रुतिस्मृतिवाक्यानामप्रामाण्यापात इति चेन्न, मुमुक्षोः सत्त्वशुद्धिकामस्य परमेश्वरोपास्तौ तन्महत्त्वप्रतिपादनेन रुच्युत्पादनपरत्वात्तेषां वाक्यानां "वायुर्वै क्षेपिष्ठा देवता" इत्यादिवाक्यवत्प्रामाण्योपपत्तेः । ननु पण्डिताश्चाप्यपण्डिताश्च सर्वे स्नानसंध्यानुष्ठानयज्ञदानादिजं फलमीश्वरायैव समर्पयन्ति गृह्णातीश्वर इति तत्कथमित्याकाङ्क्षायां ते वेदान्तविचारजन्यज्ञानाभावादेव तथा कुर्वन्तीत्याशयेनाह—अज्ञानेनेति । आत्मनो देहेन्द्रियादिभ्यो भिन्नत्वाविक्रियत्वचिद्रूपत्वपरिपूर्णत्वाखण्डानन्दैकरसत्ववेदनं ज्ञानं तद्विलक्षणमज्ञानं तेनोक्तलक्षणं ज्ञानमावृतं राहुणा रविबिम्बवत्तिरोहितं तेनैव परमात्मतत्त्वाऽविवेकेन जन्तवः प्राणिनः सर्वेऽप्यहंममेत्यनेन कर्मणेश्वरः प्रीयते मह्यमीप्सितं दास्यति भोक्ष्ये भोजयिष्यामीति मुह्यन्ति परतत्त्वमजानन्तः सन्तः संसरन्तीत्यर्थः ॥ १५ ॥

श्री० टी०—यस्मादेवं तस्मात्—नादत्त इति । प्रयोजकोऽपि सन्प्रभुः कस्यचित्पापं सुकृतं च नैवादत्ते न भजते । तत्र हेतुः—विभुः परिपूर्णः आप्तकाम इत्यर्थः । यदि हि स्वार्थकामनया कारयेत्तर्हि तथा स्यात् न त्वेतदस्ति आप्तकामस्यैवाचिन्त्यनिजमायया तत्तत्पूर्वकर्मानुसारेण प्रवर्तकत्वात् । ननु भक्ताननुगृह्णतोऽभक्तान्निगृह्णतश्च वैषम्योपलम्भात्कथमाप्तकामत्वमित्यत आह—अज्ञानेनेति । निग्रहोऽपि दण्डरूपोऽनुग्रह एवेत्ये-

वमज्ञानेन सर्वत्र समः परमेश्वर इत्येवंभूतं ज्ञानमावृतम्, तेन हेतुना जन्तवो जीवा मुह्यन्ति भगवति वैषम्यं मन्यन्त इत्यर्थः ॥ १५ ॥

स० टी०—ननु श्रुतौ स्मृतौ कर्ता प्रसिद्धो जीव एव हि ॥ ईशः कारयिता सिद्धस्तद्विरुद्धमिहोच्यते ॥ १ ॥ माया विद्याभिधा शक्तिः स्वभावाख्या प्रवर्तते ॥ यमिच्छति स उन्नेतुं पुण्यं तं कारयत्यजः ॥ २ ॥ यमिच्छति त्वधो नेतुं पापं तं कारयत्यसौ ॥ अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ॥३॥ ईश्वरप्रेरितो गच्छेत्स्वर्गं वाऽशुभमेव वा ॥ इति श्रुतिस्मृतिभ्यां च निर्णीतेनाध्वना यतः ॥ ४ ॥ कर्तृत्वप्रेरकत्वाभ्यामात्मनोरीशजीवयोः ॥ भोक्तृत्वभोजयितृत्वधर्माभ्यां लेपसंभवात् ॥ ५ ॥ मैवं वस्तुत आत्मायं विभुत्वात्परमेश्वरः ॥ जीवस्य कस्यचित्पापं नादत्ते सुकृतं तथा ॥ ६ ॥ वस्तुतो नास्ति कर्तृत्वं जीवस्यासङ्गिनो विभोः ॥ कारयितृत्वमप्येवं नेश्वरस्यास्ति वस्तुतः ॥ ७ ॥ अज्ञानेनावृतेनैवावृत्तिविक्षेपशालिना ॥ मायाख्येनान्ध्यतमसाच्छादितं चिद्घनात्मकम् ॥ ८ ॥ जीवेश्वरजगद्भेदभ्रमाधिष्ठानमद्वयम् ॥ स्वप्रकाशं परानन्दं ज्ञानं तेनेह जन्तवः ॥ ९ ॥ स्वरूपावरणेनैव विक्षेपं यान्ति सर्वशः ॥ मातृमानप्रमेयादिमोहं दुःखैकसंकटम् ॥ १० ॥ प्राप्नुवन्ति मुधा जीवा भ्रान्तिज्ञानवशीकृताः ॥ अकर्त्रभोक्तृपरमानन्दात्मा वृत्तिहेतुकः ॥ ११ ॥ जीवेश्वरजगद्भेदभ्रमो मूढधियां भवेत् ॥ तस्यां दशायां मूढानामवभासानुवादिनी ॥ १२ ॥ वास्तवाद्वैतबोधाय श्रुतिस्तदनुगा स्मृतिः ॥ अत आविद्यकैर्धर्मैः कर्तृत्वादिभिरीश्वरः ॥ १३ ॥ जीवो वा लिप्यते नैव श्रीहरेरेष आशयः ॥ ईश्वराशयमाश्रित्य ब्रह्मात्मैक्यं विचार्य च ॥ १४ ॥ अकर्त्रात्मस्वरूपं स्वं निश्चिन्वन्ति विवेकिनः ॥ १५ ॥ १५ ॥

भा० टी०—ननु यः परमेश्वरैकशरणो ब्रह्मणि संन्यस्तसमस्तकर्मा यानि पुण्यपापानि करोति तानि क्व गच्छन्ति लिप्यते न स पापेन पद्मपत्रमिवाम्भसेत्यनेन तस्य लेपाभावोक्तेः, तथाच स्वस्य भक्तस्य पुण्यं च पापं च तदनुग्रहार्थं भगवानादत्त इति चेत्तत्राह—**नेति** । विभुः परमेश्वरः कस्यचित्स्वभक्तस्यापि पापं नादत्ते न गृह्णाति तथा भक्तैः समर्पितं सुकृतं पूर्णकामत्वान्न चैवादत्ते । ननु परमार्थतो जीवस्यापीश्वराव्यतिरेकात्कर्तृत्वाद्यभावः ईश्वरस्य सुतरामतः किमर्थमीश्वरात्स्वस्य भेदं प्रकल्प्य परमेश्वरो भजनीयोऽहं तस्य भक्तस्तदर्थं मया पूजायागदानहोमादिलक्षणं कर्मानुष्ठेयमिति बुद्ध्या परमेश्वरैकशरणैरन्यैश्चाहं कर्म करोमि कारयामि तस्य फलं भोक्ष्ये भोजयामीति बुद्ध्या कर्माण्यनुष्ठीयन्त इति चेत्तत्राह—**अज्ञानेनावृतं** कर्तृत्वादिविनिर्मुक्तोहमस्मीति विवेकज्ञानम् । वसिष्ठोऽप्याह 'विवेकमाच्छादयाति जगन्ति जनयत्यलम्' इति पूर्वप्रस्तुताऽविद्या तेन जन्तवो मुह्यन्ति मोहं गच्छन्ति यथा शुक्तिज्ञानं शुक्त्यज्ञानेनावृतं तेन रजतमिदमिति पुरुषाणां मोहस्तथाऽहमुपासक ईश्वरार्थं कर्म करोम्यहं कर्ता कारयिता भोक्ता भोजयितेत्येवं मुह्यन्तीत्यर्थः । ज्ञानं जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूतं स्वप्रकाशं सच्चिदानन्दरूपं परमार्थमिति तु लोकप्रसिद्धज्ञानपदार्थत्यागे बीजाभावमभिप्रेत्याचार्यैर्न व्याख्यातमिति बोध्यम् । एतेन ननु भक्ताननुगृह्णतोऽभक्तान् निगृह्णतश्च वैषम्योपलम्भात्कथमाप्तकामत्वमत आह—**अज्ञानेनेति** । निग्रहोऽपि दण्डरूपोऽनुग्रह एवेत्येवमज्ञानेन सर्वत्र समः परमेश्वर इत्येवंभूतं ज्ञानमावृतं तेन हेतुना जन्तवो जीवा मुह्यन्ति भगवति वैषम्यं मन्यन्त इत्यर्थ इति प्रत्युक्तम् । ज्ञानं प्रकाशयति ज्ञाननिर्धूतकल्मषा इत्यत्राभिमततद्व्यतिरिक्तज्ञानपदार्थकल्पनानुपपत्तेश्च । यत्त्वितरैः स्वभावस्तु प्रवर्तत इत्यत्रान्तःकरणं प्रवर्तत इति व्याख्याय नन्वेवं सति देवदत्तः पापी यज्ञदत्तः सुकृतीत्यादिव्यवहाराणां का गतिरित्यत आह—नादत्ते इति । चिच्चिदात्मा कस्य ज्ञानशक्तिक्रियाशक्त्याधारत्वगुणयोगात्कशब्दस्यान्तःकरणस्य पापं सुकृतं च नादत्ते नात्मसंबन्धि करोति । तत्र हेतुमाह—विभुरिति अपरिणामीत्यर्थः । कथं तर्ह्ययं लोकव्यवहारस्तत्राह—**अज्ञानेनेति** । अज्ञानेना-

ज्ञानपरिणामरूपेणान्तःकरणेन ज्ञानं स्वरूपमावृतम् अन्योन्यतादात्म्याध्यासविषयभावं गमितमित्यर्थः । तेन कारणेन जन्तवोऽज्ञा मनुष्या मुह्यन्ति आत्मगतत्वेन सुकृतदुष्कृतादि व्यवहरन्तीत्यर्थ इति व्याख्यातं तदुपेक्ष्यं, मुख्यवृत्त्या सम्यग्वाक्यार्थसंभवे गौण्यादिवृत्त्याश्रयणस्य क्लिष्टकल्पनायाश्चान्याय्यत्वात् ॥ १५ ॥

प० टी०—अत एवाह—नादत्त इति । विभुर्व्यापको गगनवत्सर्वसमः परमेश्वरः कस्यचित्पापं सुकृतं वा नादत्ते नाददाति परिपूर्णत्वादवाप्तसकलकामत्वात्, किंत्वज्ञानेन ज्ञानमावृत्तं तेन हेतुना जन्तवोऽज्ञा जीवा मुह्यन्ति ततः सदसद्वा कर्म कुर्वन्तीत्यर्थः ॥ १५ ॥

रा० टी०—फलसंयोगे स्वातन्त्र्याभावं जीवस्य व्यनक्ति—नादत्त इति । विभुः जडापेक्षया समर्थो जीवः कस्यचिद्दुराचारस्य सकाशात्तज्जन्यं पापं स्वातन्त्र्येण नादत्ते सुकृतं पुण्यं च स्वातन्त्र्येण नैवादत्ते । एवं क्रियायामदृष्टे च ज्ञेयम् । यद्वा भगवत एव कर्तृत्वे कर्मलेपः स्यादित्यत आह—नादत्त इति । विभुः स्वतन्त्र ईश्वरः विभुत्वादेव कस्यचित्कर्मणः सकाशात्पापं सुकृतं वा नादत्त इत्यर्थः । न पुण्यपापलेपवान्भवतीत्यर्थः । नन्वेवं सर्वत्र स्थित्वा स्वातन्त्र्येण कर्ता ईश्वरोऽस्ति चेत्कथं न दृश्यत इत्यत आह—अज्ञानेनेति । तेनाज्ञानेनावृतबुद्धित्वेन मुह्यन्ति भगवन्तं न जानन्ति ॥ १५ ॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

त० टी०—स्यादेतत्तथाऽप्यनाद्यज्ञानावृतज्ञानाः सर्वेऽपि कुतो न मुह्यन्ति यतो मोहहीना अपि केचिद्दृश्यन्त इत्यपेक्षायां सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति पूर्वोक्तं ज्ञानं तत्र हेतुरित्याह—ज्ञानेनेति । अज्ञानेनावृतज्ञानेष्वपि सर्वात्मसु येषां भगवत्कृपाकटाक्षविषयभूतानां जीवात्मनां वेदान्ततत्त्वसाक्षात्कारवद्गुरूपसदनपूर्वकतदुपदिष्टशास्त्रार्थमनननिदिध्यासनाभ्यासजनितेन आत्मनो देहेन्द्रियादिविविक्तात्मस्वरूपविषयेण मनोवृत्तिरूपेण ज्ञानेन तज्ज्ञानावरणमनादिकर्मसंचयरूपमज्ञानं नाशितं तेषां तद्धर्मभूतं स्वाभाविकं ज्ञानं कर्तृपरं देहेन्द्रियादिभ्योऽत्यन्तविलक्षणं चैतन्यं त्वंपदार्थस्वरूपं कर्म आदित्यवदुदयमात्रेणैव प्रकाशयति अन्यदपीष्टानिष्टबन्धमोक्षहेतुभूतं सर्वं वस्तु प्रकाशयतीत्यतो न मुह्यन्तीत्यर्थः । अत्र तेषामादित्यवज्ज्ञानं प्रकाशयतीत्यज्ञाननाशानन्तरमप्यात्मनां बहुत्वाभिधानादुपाधिसंबन्धगन्धस्यापि वक्तुमशक्यत्वादेकात्मवादिनः स्पष्टं भगवता निरस्ताः । तेषामादित्यवज्ज्ञानमिति षष्ठ्या ज्ञानस्य स्वरूपाद्भेदनिर्देशात्तत्संबन्धाभिधानाच्च ज्ञातृज्ञानयोः प्रभाप्रभावतोरिव धर्मिधर्मभावसिद्ध्या स्वरूपातिरिक्तज्ञानानङ्गीकारिणो गुणगुणिनोरैक्याङ्गीकारिणश्च निरस्ता ज्ञेयाः । एतेन बद्धावस्थायां संकुचितप्रभस्य घटावृतदीपस्येव कर्मनिर्मितस्थूलसूक्ष्मदेहेन धर्मभूतज्ञानस्यैव संकोचः, न त्वात्मस्वरूपान्यथाभावः मोक्षदशायां घटात्मकावरणध्वंसे दीपप्रभाप्रकाशवत् सकारणलिङ्गशरीरध्वंसे धर्मभूतज्ञानस्यैव विकासो, नतु स्वरूपान्तरापत्तिरित्यपि सूचितम् । "यथोदपानखननात्क्रियते न जलान्तरम् । सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥ यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते" ॥ १६ ॥

म० टी०—तर्हि सर्वेषामनाद्यज्ञानावृतत्वात्कथं संसारनिवृत्तिः स्यादत आह—ज्ञानेनेति । तदावरणविक्षेपशक्तिमदनाद्यनिर्वाच्यमनृतमनर्थव्रातमूलमज्ञानमात्माश्रयविषयमविद्यामायादिशब्दवाच्यमात्मनो ज्ञानेन गुरूपदिष्टवेदान्तमहावाक्यजन्येन श्रवणमनननिदिध्यासनपरिपाकनिर्मलान्तःकरणवृत्तिरूपेण निर्विकल्पकसाक्षात्कारेण शोधिततत्त्वंपदार्थाभेदरूपशुद्धसच्चिदानन्दाखण्डैकरसवस्तुमात्रविषयेण नाशितं बाधितं काल-

त्रयेऽप्यसदेवासत्तयाऽज्ञानमधिष्ठानचैतन्यमात्रतां प्रापितं शुक्ताविव रजतं शुक्तिज्ञानेन येषां श्रवणमननादिसाधनसंपन्नानां भगवदनुगृहीतानां मुमुक्षूणां तेषां तज्ज्ञानं कर्तृ आदित्यवत् यथादित्यः स्वोदयमात्रेणैव तमो निरवशेषं निवर्तयति नतु कंचित्सहायमपेक्षते तथा ब्रह्मज्ञानमपि शुद्धसत्त्वपरिणामत्वाद्व्यापकप्रकाशरूपं स्वोत्पत्तिमात्रेणैव सहकार्यन्तरनिरपेक्षतया सकार्यमज्ञानं निवर्तयत्परं सत्यज्ञानानन्तानन्दरूपमेकमेवाद्वितीयं परमात्मतत्त्वं प्रकाशयति प्रतिच्छायाग्रहणमात्रेणैव कर्मान्तरेणाभिव्यनक्ति । अत्राज्ञानेनावृतं ज्ञानेन नाशितमित्यज्ञानस्यावरणत्वज्ञाननाश्यत्वाभ्यां ज्ञानाभावरूपत्वं व्यावर्तितं नह्यभावः किंचिदावृणोति न वा ज्ञानाभावो ज्ञानेन नाश्यते स्वभावनाशरूपत्वात्तस्य तस्मादहमज्ञो मामन्यं च न जानामीत्यादिसाक्षिप्रत्यक्षसिद्धं भावरूपमेवाज्ञानमिति भगवतो मतम् । विस्तरस्त्वद्वैतसिद्धौ द्रष्टव्यः। येषामिति बहुवचनेनानियमो दर्शितः । तथाच श्रुतिः "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" इत्यादिः। यद्विषयं यदाश्रयमज्ञानं तद्विषयतदाश्रयप्रमाणज्ञानात्तन्निवृत्तिरिति न्यायप्राप्तनियमं दर्शयति । तत्राज्ञानगतमावरणं द्विविधं एकं सतोऽप्यसत्त्वापादकं अन्यत्तु भातोऽप्यभानापादकम् । तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रान्निवर्तते अनुमितेऽपि वह्न्यादौ पर्वते वह्निर्नास्तीत्यादिभ्रमादर्शनात् । तथा सत्यं ज्ञानमनन्तं ब्रह्मास्तीति वाक्यात्परोक्षनिश्चयेऽपि ब्रह्म नास्तीति भ्रमो निवर्तत एव । अस्त्येव ब्रह्म किंतु मम न भातीत्येकं भ्रमजनकं द्वितीयमभानावरणं साक्षात्कारादेव निवर्तते । स च साक्षात्कारो वेदान्तवाक्येनैव जन्यते निर्विकल्पक इत्याद्यद्वैतसिद्धावनुसंधेयम् ॥ १६ ॥

शं० टी०—ननु सर्वेषामज्ञानावृतज्ञानत्वे कथं मुमुक्षूणामात्मज्ञानाविर्भावः कथं वा तेषां मुक्तिरित्याकाङ्क्षायामीश्वरप्रीत्यै कृतनित्यनैमित्तिककर्मानुष्ठानेन यदा चित्तपरिपाकस्तदा सम्यग्ज्ञानमुदेत्यज्ञानं नाशयित्वा परं तत्त्वं प्रकाशयति तदा ते मुक्तिं गच्छन्तीत्याशयेनाह—ज्ञानेनेति द्वाभ्याम् । तुशब्दो ज्ञानव्यतिरिक्तस्याज्ञाननाशकत्वासंभवद्योतनार्थः । कर्मोपास्तिभ्यां परिपक्वचित्तानां येषां ज्ञानेन तु श्रवणादिसमुत्पन्नेनात्मविषयकेणात्मनो बुद्धेः संबन्धिबुद्धिनिष्ठमित्येतज्ज्ञाना ज्ञानयोर्बुद्धिधर्मत्वादावृतिरनावृतिश्च पटलेन चक्षुष एव नतु घटस्य तद्वदज्ञानं ज्ञानं च बुद्धेरेव नात्मनस्तु अन्यथाहमिति प्रत्ययानुपपत्तेस्ततो बुद्धिसंबन्ध्येवाऽज्ञानं येन मोहिताः संसरन्ति प्राणिनो यत्सर्वानर्थबीजं तदज्ञानं नाशितं भवति सूर्योदयेन तिमिरमिव विध्वस्तं भवति तेषां शुद्धात्मनां समुत्पन्नं तज्ज्ञानमादित्यवद्यथोदित आदित्यः पदार्थजातं प्रकाशयति तथा तत्सर्ववेदान्तप्रसिद्धं सत्यज्ञानादिलक्षणं प्रत्यगभिन्नं परं ब्रह्म प्रकाशयति सूर्यप्रकाशेन स्थाणुरेवायमिति यथा तथा ज्ञानप्रकाशेन ब्रह्मैवाहमिति स्वं ब्रह्मैव विजानन्तीत्यर्थः ॥ १६ ॥

श्री० टी०—ज्ञानिनस्तु न मुह्यन्तीत्याह—ज्ञानेनेति । आत्मनो भगवतो ज्ञानेन येषां तद्वैषम्योपलम्भकज्ञानं नाशितं तज्ज्ञानं तेषामज्ञानं नाशयित्वा तत्परं परिपूर्णमीश्वरस्वरूपं प्रकाशयति यथा आदित्यस्तमो निरस्य समस्तं वस्तुजातं प्रकाशयति तद्वत् ॥ १६ ॥

स० टी०—तर्ह्येवं सर्वजीवानामध्यस्तानाद्यविद्यया ॥ आवृतत्वात्कथं बन्धान्मुक्तिः स्यादिति चेच्छृणु ॥ १ ॥ तदावरणविक्षेपशक्तिमद्बन्धकारणम् ॥ अविद्याख्यमनिर्वाच्यं ज्ञानेनाज्ञानमात्मनः ॥ २ ॥ गुरूपदिष्टवेदान्तवाक्यजन्येन भास्वता ॥ अखण्डसच्चिदानन्दवस्त्वैक्यविषयेण च ॥ ३ ॥ बाधितं सदधिष्ठानचिन्मात्रत्वेन बोधितम् ॥ रज्ज्वामहिस्रगादीव रज्जुज्ञानेन बाधितम् ॥ ४ ॥ येषां यथोक्तवेदान्तश्रवणादिमतां सताम् ॥ केशवानुगृहीतानां मुमुक्षूणां विपश्चिताम् ॥ ५ ॥ तज्ज्ञानं सूर्यवत्तेषां परमद्वैतचिद्घनम् ॥ प्रकाशयति चात्मानं प्रतिबिम्बग्रहेण वै ॥ ६ ॥ कर्मतामन्तरेणाभिव्यनक्तीत्याशयो हरेः ॥

ज्ञाननाश्यतयाऽज्ञानं तथैवावरकत्वत: ॥ ७ ॥ भावरूपमनिर्वाच्यमस्तीति भगवन्मतम् ॥ न ह्यभाव: कश्चित्किंचिदावृणोतीति संभवेत् ॥ ८ ॥ नित्यमेव निवृत्तत्वाज्ज्ञानेनापि न नाश्यते ॥ ये ज्ञानाभावमज्ञानं तार्किका: प्राहुराग्रहात् ॥ ९ ॥ भगवन्मतबाह्यत्वादुपेक्ष्यास्ते निराग्रहै: ॥ अतोऽज्ञोऽहं न मामन्यं जानामीति प्रतीतित: ॥ १० ॥ साक्षिप्रत्यक्षसिद्धं तद्भावरूपं हरेर्मतम् ॥ ११ ॥ त्रिगुणमनृतमान्ध्यं कल्पितं चिद्घनेऽच्छे श्रुतिशिखरविचारोद्भूतबोधेन नष्टम् ॥ निरवधिवपुरात्मा स्वात्मभासा चकास्ति भ्रमजलधरनाशे ब्रह्मसूर्योऽद्वितीय: ॥ १२ ॥ १६ ॥

भा० टी०—तर्हि सर्वेषामनादिभावरूपाज्ञानावृतज्ञानत्वाद् व्यामोहस्य निवृत्त्यभावात्संसारनिवृत्ति: कथं स्यादिति तत्राह—ज्ञानेनेति । ज्ञानेन तु गुरूपदिष्टेन शास्त्रीयेण विवेकज्ञानेन स्वपरमार्थस्वरूपविषयेण तद्ज्ञानं कर्तृत्वादिविनिर्मुक्तं ब्रह्माहमस्मीति परमात्माभेदास्तित्वज्ञानावरकं येषां मुमुक्षूणां नाशितं तेषामादित्यवत् यथादित्योऽस्तित्वेन भान्तमपि घटादिवस्तु तद्गतसमस्तरूपाभानापादकं तमो निवर्त्य प्रकाशयति तथा गुरूपदिष्टं ज्ञानं भावनाप्रकर्षेण भानावरणमज्ञानमपि निवर्त्य तत् श्रुतिस्मृतीतिहासपुराणादौ प्रसिद्धं परं परमार्थतत्त्वं प्रकाशयति सच्चिदानन्दानन्तात्मकं ब्रह्माहमस्मीति साक्षाद् व्यक्तीकरोतीत्यर्थ: ॥ १६ ॥

प० टी०—ज्ञानिनस्तु न मुह्यन्तीत्याह—ज्ञानेनेति । तत्पूर्वमुक्तं ज्ञानावरकमज्ञानं येषामात्मन ईश्वरस्य ज्ञानेन नाशितं तेजसा तमोवदभिभूतं तेषां ज्ञानं तत्परमीश्वरं प्रकाशयति किंवदादित्यवद्, यथादित्यतेज: सकलतमस्तिरस्कृत्यादित्यं प्रकाशयति तद्वत् । यद्वात्रादित्यदृष्टान्तेनैतदुक्तं भवति यथा सूर्यकरा एव मेघत्वमवलम्ब्य सूर्यमेव छादयन्ति परंत्वादित्यकृतं दिवसस्य दिनत्वं न लुम्पन्ति । तदुक्तम्–‘ घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढ: ’ इति । इदमेवाज्ञानस्यावरणशक्तेरुदाहरणम् । एवमात्मविषयकमज्ञानमात्मानमेवावृणोति परं त्वनुभूयमानं चित्संवित्सुखरूपत्वं नाच्छादयति अयमेव ज्ञानोपाय इत्यर्थ: । श्रुतिरपि वाजसनेयसंहितासु—“ ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृध: कस्यस्विद्धनम् ” इति । भाष्यम्—जगत्यां पृथिव्यामिदं शुक्तिरजतवत्पुरो दृश्यमानं यत्किंचित्सर्वं नामरूपकर्मात्मकं गच्छतीति जगन्नश्वरमसत्यमीशा सत्यत्वाद्यैश्वर्यवता परमेश्वरेण कृत्वा वास्यं वस आच्छादने आच्छादनीयं तिरस्कार्यम् । अत्र तिरस्करणसामर्थ्यमीशेतिपदेन द्योतितम् । यथा दीपेन तमस्तिरस्क्रियते न तु तमसा दीप इत्यर्थ: । ततस्तेन जगदाभासेन त्यक्तेन दूरतोऽपास्तेन कृत्वावशिष्टं कस्य परब्रह्मण: सुखं भुञ्जीथा: स्वित् परं तु विषयसुखं मा गृध: गृधु अभिकाङ्क्षायां माभिकाङ्क्षेत्यर्थ: ॥ १६ ॥

रा० टी०—ननु ज्ञानस्याज्ञानावृतत्वे तेनाज्ञाननाशायोगात् विनाशकान्तरस्य चाभावात् ज्ञानार्थयोगसंन्यासयोर्वैयर्थ्यमित्यत आह—ज्ञानेनेति । द्विविधं हि ज्ञानं स्वरूपं वृत्तिरूपं चेति । यद्यपि स्वरूपज्ञानमज्ञानावृतं नाज्ञाननाशकं तथाप्यात्मनो भगवतो ज्ञानेन परोक्षवृत्तिज्ञानेन येषामज्ञानं नाशितं शिथिलं तेषामेव ज्ञानं भगवदपरोक्षज्ञानं तत्परं ब्रह्मादित्यवत्प्रकाशयतीत्यर्थ: ॥ १६ ॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

त० टी०—आत्मस्वरूपप्रकाशे सति—तद्बुद्धय इति । तस्मिन्नात्मस्वरूपे व्यवसायात्मिका बुद्धिर्येषां ते तथा तदात्मानः विषयान्तरनिरासेन तत्प्रवणमनसः तन्निष्ठास्तच्चिन्तनाभ्यासनिरताः तत्परायणास्तत्पदार्थस्वरूपमेव परमयनमाश्रयो येषां ते तेन ज्ञानेन निर्धूतकल्मषा निःशेषेण ध्वस्तानादिपापाः सन्तोऽपुनरावृत्तिं यथा प्रागज्ञानावृतत्वेन संसारे वर्तन्ते न तथा पुनः संसारे वर्तन्ते, अपि तु विषमाकारेऽशेषदोषवत्यपि संसारे परिशुद्धात्मदर्शनेन संसारधर्मास्पृष्टस्वभावा एव भवन्तीत्यर्थः ॥ १७ ॥

म० टी०—तद्बुद्धय इति। ज्ञानेन परमात्मतत्त्वप्रकाशे सति तस्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे सच्चिदानन्दघन एव बाह्यसर्वविषयपरित्यागेन साधनपरिपाकात्पर्यवसिता बुद्धिरन्तःकरणवृत्तिः साक्षात्कारलक्षणा येषां ते तद्बुद्धयः सर्वदा निर्बीजसमाधिभाज इत्यर्थः। तत्किं बोद्धारो जीवा बोद्धव्यं ब्रह्मतत्त्वमिति बोद्धृबोद्धव्यलक्षणभेदोऽस्ति नेत्याह—तदात्मानः तदेव परं ब्रह्मात्मा येषां ते तथा बोद्धृबोद्धव्यभावो हि मायाविजृम्भितो न वास्तवाभेदविरोधीति भावः। ननु तदात्मान इति विशेषणं व्यर्थं अविद्वद्व्यावर्तकं हि विद्वद्विशेषणम् अज्ञा अपि हि वस्तुगत्या तदात्मान इति कथं तद्व्यावृत्तिरिति चेत् न, इतरात्मत्वव्यावृत्तौ तात्पर्यात्। अज्ञा हि अनात्मभूते देहादावात्माभिमानिन इति न तदात्मान इति व्यपदिश्यन्ते विज्ञास्तु निवृत्तदेहाद्यभिमाना इति विरोधिनिवृत्त्या तदात्मान इति व्यपदिश्यन्त इति युक्तं विशेषणम्। ननु कर्मानुष्ठानविक्षेपे सति कथं देहाद्यभिमाननिवृत्तिरिति तत्राह—तन्निष्ठाः तस्मिन्नेव ब्रह्मणि सर्वकर्मानुष्ठानविक्षेपनिवृत्त्या निष्ठा स्थितिर्येषां ते तन्निष्ठाः सर्वकर्मसंन्यासेन तदेकविचारपरा इत्यर्थः। फलरागे सति कथं तत्साधनभूतकर्मत्याग इति तत्राह—तत्परायणाः तदेव परमयनं प्राप्तव्यं येषां ते तत्परायणाः सर्वतो विरक्ता इत्यर्थः। अत्र तद्बुद्धय इत्यनेन साक्षात्कार उक्तः, तदात्मान इत्यनात्माभिमानरूपविपरीतभावनानिवृत्तिफलको निदिध्यासनपरिपाकः, तन्निष्ठा इत्यनेन सर्वकर्मसंन्यासपूर्वकः प्रमाणप्रमेयगतासंभावनानिवृत्तिफलको वेदान्तविचारः श्रवणमननपरिपाकरूपः, तत्परायणा इत्यनेन वैराग्यप्रकर्ष इत्युत्तरोत्तरस्य पूर्वपूर्वहेतुत्वं द्रष्टव्यम्। उक्तविशेषणा यतयो गच्छन्त्यपुनरावृत्तिं पुनर्देहसंबन्धाभावरूपां मुक्तिं प्राप्नुवन्ति। सकृन्मुक्तानामपि पुनर्देहसंबन्धः कुतो न स्यादिति तत्राह—ज्ञाननिर्धूतकल्मषाः ज्ञानेन निर्धूतं समूलमुन्मूलितं पुनर्देहसंबन्धकारणं कल्मषं पुण्यपापात्मकं कर्म येषां ते तथा ज्ञानेनाऽनाद्यज्ञाननिवृत्त्या तत्कार्यकर्मक्षये तन्मूलकं पुनर्देहग्रहणं कथं भवेदिति भावः॥ १७॥

शं० टी०—"तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्" इत्यादिश्रुत्युक्तरीत्या विदेहकैवल्यार्थिभिः समुत्पन्नज्ञानस्य संरक्षणं कर्तव्यं सदात्मनिष्ठया स्थित्वा न किंचिद्बाह्यं द्रष्टव्यमिति बोधयितुमाह—तद्बुद्धय इति। तद्बुद्धय आदित्येन रूपमिव श्रवणादिजन्यज्ञानेन प्रकाशितं सर्ववेदान्तप्रसिद्धं सच्चिदानन्दैकरसं सर्वात्मकं यत्परं ब्रह्म तस्मिन्नेव बुद्धिर्येषां ते तद्बुद्धयः सर्वत्र ब्रह्मदर्शिनः मुमुक्षुभिः कल्पितभेदमगृहीत्वा चक्षुषा रूपमिव प्रत्यग्दृष्ट्या सदा सर्वत्र ब्रह्मैव द्रष्टव्यमित्यर्थः। सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मण्येव गृह्यमाणेऽपि ग्रहीता ग्राह्यमिति भेदः स्यात्तदा "एतस्मिन्नु दरमन्तरं कुरुते। अथ तस्य भयं भवति" इतिभेदद्रष्टुर्भयश्रवणादतोऽभेदेन द्रष्टव्यमित्याह—तदात्मान इति। तदेव परं ब्रह्मात्माऽहंप्रत्ययार्थो येषां ते तदात्मानः ब्रह्मैवाहमिति ब्रह्मण्येव स्वात्मना साक्षात्कृते अहंप्रत्ययवन्तो न तु देह इत्यर्थः। समाधिदशायां ब्रह्मण्येवाहंप्रत्यये सत्यपि विदुष आहारादौ देहेऽहंप्रत्ययश्च तेन प्रबलेन चिरकालिकेन स्थूलेन देहात्मप्रत्ययेन ब्रह्मात्मप्रत्ययो बाह्यध्वनिना नादध्वनिवद्विनश्यति ततो बाह्यं कर्म सर्वं सन्यस्याहाराद्यवस्थासु सर्वास्वपि ब्रह्मण्येवात्मत्वबुद्ध्या दृश्याऽनवगाहिन्या स्थातव्यमित्याह—तन्निष्ठा इति। तस्मिन् ब्रह्मण्यात्माकारप्रत्ययकरणमेव निष्ठा अहंबुद्धेर्नैश्चल्यं येषां ते तन्निष्ठाः स्वस्य ब्रह्मात्मनावस्थितत्वदर्शिन एव स्थिरीभूतवृत्तय इत्यर्थः। ब्रह्मात्मत्वदर्शने स्थिरीभूतचित्तवृत्तीनामपि कश्चित्प्रयोजनान्तरापेक्षास्ति चेत्तया सा निष्ठा प्रतिबद्ध्यते बाह्यात्मत्वं च स्यात्ततः कार्यान्तरं बाह्यं किंचिदप्यनपेक्ष्य मुमुक्षोः सदा तदेकपरत्वेन भवितव्यमित्याह—तत्परायणा इति। तत्सच्चिदानन्दैकरसमद्वितीयं स्वात्मनाधिगतं परं ब्रह्मैव बहिरन्तः सदा बुद्धिवृत्तेश्चक्षुषो रूपवत्परं नियतमयनं गतिर्येषां ते तत्परायणा आहारविहारादौ सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मण्येवात्मदर्शनं च चिदेकवृत्त्या ये न मुञ्चन्ति ते तत्परायणाः सदात्मारामा इत्यर्थः। एवं

सर्वत्र ब्रह्मदर्शनं ब्रह्मण्यात्मत्वदर्शनं तन्निष्ठत्वं तत्परायणत्वं च विदेहमुक्तेरसाधारणकारणमेतच्चतुष्टयमनुतिष्ठन्ति ये ब्रह्मविदस्त एव ज्ञाननिर्धूतकल्मषाः ज्ञानेनोक्तान्तरङ्गसाधनचतुष्टयाऽनुष्ठित्याऽप्रतिबद्धतां गतेन निर्धूतं निःशेषं प्रक्षालितं कल्मषं बौद्धं जगद्ब्रह्मणोर्ब्रह्मात्मनोश्च भेदग्रहणलक्षणं येषां ते ज्ञाननिर्धूतकल्मषाः सन्तः स्वयमपुनरावृत्तिं भूयो देहसंबन्धित्वापत्तिः पुनरावृत्तिस्तदभावोऽपुनरावृत्तिस्तां देहसंबन्धरहितां मुक्तिं गच्छन्ति ब्रह्मात्मना स्थितिदशायां गलितेऽस्मिन् देहे ब्रह्मणि वृत्तौ लीनायां सत्यां स्वयं ब्रह्माकारेणैव तिष्ठन्तीत्यर्थः ॥ १७ ॥

श्री० टी०—एवंभूतेश्वरोपासनाफलमाह—**तद्बुद्धय इति**। तस्मिन्नेव बुद्धिर्निश्चयात्मिका येषाम् तस्मिन्नेवात्मा मनो येषाम् तस्मिन्नेव निष्ठा तात्पर्यं येषाम् तदेव परमयनमाश्रयो येषाम् ततश्च तत्प्रसादलब्धेनात्मज्ञानेन निर्धूतं निरस्तं कल्मषं येषां ते अपुनरावृत्तिं मुक्तिं यान्ति ॥ १७ ॥

स० टी०—ज्ञानप्रकाशिते तस्मिँस्तत्त्वे सच्चित्सुखात्मनि ॥ बाह्यवस्तुपरित्यागाद्बुद्धिर्येषां सुनिश्चिता ॥१॥ तदेवात्मा परं तत्त्वं येषामद्वैतचेतसाम् ॥ तस्मिन्नेव चिदानन्दे स्थितिर्येषां स्थिता सदा ॥ २ ॥ प्राप्तव्यं तत्पदं येषां विरक्तानां परं सुखम् ॥ साक्षात्कारो निजध्यानं श्रवणादि निरन्तरम् ॥ ३ ॥ वैराग्यादिप्रकर्षश्च पूर्वपूर्वस्य कार्यता ॥ उत्तरोत्तरहेतूनां विशेषणचतुष्टये ॥ ४ ॥ एतैर्विशेषणैर्युक्ता मोक्षं गच्छन्त्यनामयम् ॥ ज्ञानेनोन्मूलितं येषां कल्मषं बन्धकारणम् ॥ ५ ॥ स कार्याज्ञानबाधेन ब्रह्मात्मैक्यधियां सताम् ॥ कथं तन्मूलको बन्धो भवेद्देहपरिग्रहः ॥ ६ ॥ १७ ॥

भा० टी०—तद्बुद्धय इति। तत्परमार्थतत्त्वं ज्ञानप्रकाशितं तस्मिन् गता बुद्धिर्येषां ते। ननु ते किं तस्माद्व्यतिरिक्ता नेत्याह—तदेव परं ब्रह्मात्मा स्वरूपं येषां ते। तत्र हेतुमाह—यतस्तस्मिन् ब्रह्मणि निष्ठा निदिध्यासनात्मकोऽभिनिवेशो येषां ते। तत्रापि हेतुमाह—यतस्तदेव परमयनं परा गतिर्येषां ते। तदेव परां गतिं बुद्ध्वा इहामुत्रार्थभोगे विरज्य तच्छ्रवणतन्मननैकपरत्वेन तत्परायणा इत्यर्थः। एवंभूता अपुनरावृत्तिं मोक्षं गच्छन्ति यतो ज्ञानेन ब्रह्मात्मसाक्षात्कारेण नितरां मूलोच्छेदेन धूतो नाशितः कल्मषः पुनरावृत्तिकारणीभूतः पापादिरूपो येषां ते ॥ १७ ॥

प० टी०—अथेश्वरोपासनया मोक्षाधिकारिणां निष्ठामाह—**तद्बुद्धय इति**। तस्मिन्नीश्वरे निश्चयात्मिका बुद्धिर्येषां ते तथा तद्विषये आत्मा प्रयत्नो येषां ते तथा तस्मिन्नेव निष्ठा पर्यवसानं येषां ते तथा तदेव परायणमाश्रयो येषां ते तथाविधा ज्ञाननिर्धूतकल्मषाः सन्तोऽपुनरावृत्तिं गच्छन्ति ॥ १७ ॥

रा० टी०—अपरोक्षज्ञानाव्यवहितसाधनमाह—**तद्बुद्धय इति**। न सकृत्परोक्षज्ञानेनालं किंतु आवृत्तिरसकृदुपदेशादित्युक्तदिशा पुनः पुनस्तत्र हरौ बुद्धिर्येषां ते तद्बुद्धयः स एव आत्मा आदानादिकर्ता स्वामी येषां ते तदात्मानः तन्निष्ठास्तस्मिन्नचञ्चलाः स एव परमयनं येषां ते तत्परायणाः तथा ज्ञानिनः सन्तः अत एव च ज्ञाननिर्धूतकल्मषाः भगवदपरोक्षज्ञानेन निर्धूतपाप्मानोऽपुनरावृत्तिं मुक्तिं गच्छन्ति ॥ १७ ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

त० टी०—एतदेवोपपादयति—**विद्येति**। विद्या शास्त्रार्थज्ञानं विनयो विनीतत्वं ताभ्यां संपन्ने ब्राह्मणे सात्त्विके सर्वप्राण्युत्तमे गवि पशौ धेन्वां वृषभे वा संस्कारहीने मध्यमे राजसे हस्तिनि तामसे शुनि च श्वपाके चाण्डाले चात्यन्ततामसेऽत्यन्ताधमे चेत्यादिष्वत्यन्तविषमाकारेष्वपि पण्डितास्तत्त्वयाथात्म्यविदः समदर्शिनः सममात्मस्वरूपं पश्यन्त्येवंशीलाः उत्तमाधमादिवैषम्यं प्रकृतिकार्यदे-

हनिष्टं न त्वात्मसु, आत्मनां स्वरूपं तु ज्ञानस्वरूपत्वेन सदा सर्वत्र दोषास्पृष्टतया सममित्येवंदर्शनशीला भवन्तीत्यर्थः ॥ १८ ॥

म० टी०—देहपातादूर्ध्वं विदेहकैवल्यरूपं ज्ञानफलमुक्त्वा प्रारब्धकर्मवशात्सत्यपि देहे जीवन्मुक्तिरूपं तत्फलमाह—विद्येति । विद्या वेदार्थपरिज्ञानं ब्रह्मविद्या वा विनयो निरहंकारत्वमनौद्धत्यमिति यावत् ताभ्यां संपन्ने ब्रह्मविदि विनीते च ब्राह्मणे सात्त्विके सर्वोत्तमे तथा गवि संस्कारहीनायां राजस्यां मध्यमायां तथा हस्तिनि शुनि श्वपाके चात्यन्ततामसे सर्वाधमेऽपि सत्त्वादिगुणैस्तज्जैश्च संस्कारैरस्पृष्टमेव समं ब्रह्म द्रष्टुं शीलं येषां ते समदर्शिनः पण्डिता ज्ञानिनः यथा गङ्गातोये तडागे सुरायां मूत्रे वा प्रतिबिम्बितस्यादित्यस्य न तद्गुणदोषसंबन्धस्तथा ब्रह्मणोऽपि चिदाभासद्वारा प्रतिबिम्बितस्य नोपाधिगतगुणदोषसंबन्ध इति प्रतिसंदधानाः सर्वत्र समदृष्ट्यैव रागद्वेषराहित्येन परमानन्दस्फूर्त्या जीवन्मुक्तिमनुभवन्तीत्यर्थः ॥१८॥

शं० टी०—तद्बुद्धय इत्यनेन ब्रह्मविद्यतीनां सर्वदा कर्तव्यत्वेन यद्विहितं कल्पितनामरूपाद्यग्रहणेन सर्वत्र ब्रह्मदर्शनं तद्विशदयति—विद्याविनयसंपन्न इति । विद्याविनयसंपन्ने विद्या सर्ववेदशास्त्राधीतिस्तदर्थज्ञानं वा विनयो नम्रता उपशान्तिर्वा ताभ्यामन्यैश्च स्वधर्मपरत्वप्रतिग्रहविमुखत्वसत्यशौचदयादिभिः सुगुणैः संपन्ने जगत्पूज्ये ब्राह्मणे जात्या गुणेन धर्मेण च परमनिकृष्टे स्वप्राणवृत्त्यै श्वानमपि पचतीति वा श्वो भवितव्यमिति पचतीति वा श्वपाकश्चण्डालस्तस्मिन्नपि जात्या संचारेण क्षीरादिना च जगत्पावन्यां गवि धेनौ जात्यादिभिरतिनिकृष्टे तुच्छभुजि शुनि शुनके राजपूज्ये हस्तिनि भद्रगजे चकाराल्लोष्टाश्मकाञ्चनादिषु सर्वत्र तत्तद्द्रव्यतत्तद्गुणतत्तद्धर्मतत्तत्कर्मभिरस्पृश्यमानं सर्वदाकाशवदेकरूपेण समरसतया तिष्ठतीति परं ब्रह्म सममित्युच्यते तदेव सर्वत्र द्रष्टुं शीलं येषां ते समदर्शिनः आरोपितनामरूपाद्यगृहीत्वैव सर्वत्राधिष्ठानभूतब्रह्ममात्रदर्शनपराः पण्डिता इत्यर्थः । परावरैकत्वविज्ञानपौष्कल्यवन्तः पण्डिताः सदा समदर्शिन एव भवन्ति न कचिद्विषमदर्शिन इति समदर्शित्वं पण्डितानां धर्म इति सूचितं भवति ॥ १८ ॥

श्री० टी०—कीदृशास्ते ज्ञानिनो येऽपुनरावृत्तिं गच्छन्तीत्यपेक्षायामाह—विद्याविनयसंपन्न इति । विषमेष्वपि समं ब्रह्मैव द्रष्टुं शीलं येषां ते पण्डिता ज्ञानिन इत्यर्थः । तत्र विद्याविनयाभ्यां युक्ते ब्राह्मणे च शुनो यः पचति तस्मिन् श्वपाके चेति कर्मणा वैषम्यं, गवि हस्तिनि शुनि चेति जातितो वैषम्यं दर्शितम् ॥ १८ ॥

स० टी०—उक्त्वा ज्ञानफलं मोक्षं देहपातादनन्तरम् ॥ जीवन्मुक्तिफलं प्राह देहे सत्यपि तद्विदाम् ॥ १ ॥ सात्त्विके ब्राह्मणे श्रेष्ठे विनीते तत्त्वदर्शिनि ॥ गवि संस्कारहीनायां राजस्यां मध्यमाकृतौ ॥२॥ अत्यन्ततामसे सर्वाधमे हस्त्यादिकत्रये ॥ सत्त्वादिकगुणैस्तज्जैः संस्कारैरत्यसङ्गिकम् ॥ ३ ॥ द्रष्टुं शीलं समं ब्रह्म येषां ते ज्ञानिनो बुधाः ॥ सूर्यो गाङ्गे जले कौपे सुरायां प्रतिबिम्बितः ॥ ४ ॥ तद्गुणैर्दोषसंबन्धैरसंस्पृष्टो यथा भवेत् ॥ तथा ब्रह्म चिदाभासद्वारेण प्रतिबिम्बितम् ॥ ५ ॥ नोपाधिगुणदोषाभ्यां संबन्धं याति चिद्घनम् ॥ इत्येवं मन्यमानास्ते सर्वत्र समदर्शिनः ॥ ६ ॥ नीरागाः स्वसुखस्फूर्त्या जीवन्मुक्तिं भजन्ति वै ॥ ७ ॥ १८ ॥

भा० टी०—येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पण्डिता मोक्षगामिनः कथमात्मतत्त्वं पश्यन्तीति तत्राह—विद्येति । विद्या आत्मबोधो विनय उपशम औद्धत्याद्यभावः दैन्यवारणाय विद्यापदमौद्धत्यादिवारणाय विनयपदं ताभ्यां संपन्ने युक्ते उत्तमसंस्कारवति सात्त्विके ब्राह्मणे मध्यमायां राजस्यां गवि संस्काररहितायामधमे केवलतामसे हस्तिनि गजे शुनि सारमेये श्वपाके चाण्डाले तामसानां बहूनामुपादानं तु सात्त्विकराजसापेक्षया तेषां बाहुल्यसूचनार्थं समं सत्त्वादिगुणैस्तज्जन्यसंस्कारैश्चास्पृष्टमेकमविक्रियं गङ्गाजले

तडागोदके मूत्रादावनवच्छिन्नाकाशमिव ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिन इत्यर्थः। यत्तु ननु ज्ञानसंन्याससंपन्नानामेव जीवे कोऽयमतिशयो यत्परैक्यं नाम। नहि मनुष्याणां लोके उत्तममध्यमतया व्यवह्रियमाणानां पशूनां वा तादृशानां न जीवोऽस्ति सत्त्वा न परैक्यं प्रतिपद्यते इत्याशङ्क्याह—विद्येति। अत्र गवि हस्तिनि शुनीति गोत्वादिजात्याधारपिण्डरूपोपाधीनामुत्तममध्यमाधमानामुक्तत्वान्मानुषपिण्डानामप्यात्मोपाधीनामेवं विवेको ज्ञेयः ब्राह्मणस्योत्तमस्य पृथगभिधानात्। विद्यासंपन्नाववशिष्टौ क्षत्रियवैश्यपिण्डौ विनयसंपन्नस्त्रैवर्णिकसेवामात्रधर्मकः शूद्रपिण्डः पिण्डसमुदायाभिप्रायं चैकवचनम्। तथोत्तमो ब्राह्मणः क्षत्रियवैश्यौ मध्यमौ ततः किंचिन्निकृष्टः शूद्रः सर्वथाधमः श्वपाकः एतेषु मानुषपशूत्तममध्यमाधमेषु पिण्डेष्वात्मोपाधिषु सत्स्वप्यनुपहितं सर्वत्राविशेषत्वात् समं ब्रह्मैव तत्र तत्र प्रविष्टं पण्डिताः पश्यन्ति नत्वात्मानमेव ब्रह्मात्मकं पश्यन्तीत्यर्थः इतीतरे व्याचख्युः तन्मन्दं, सर्वभूतात्मभूतब्रह्मदर्शिन इत्येतावतैवोक्तार्थे सिद्धेऽमूलोक्तानामुपाधिभेदानां क्लिष्टकल्पनया प्रदर्शितानां समपदस्य च वैयर्थ्यप्रसङ्गात्॥ १८॥

प० टी०—अथ सदाचारपर्यवसितं समदर्शित्वमाह—विद्येति। पण्डिता ज्ञानिनो ब्राह्मणादिषु समदर्शिनो भवन्ति सर्वत्रात्मदर्शिनो बाह्याकारं न गणयन्तीत्यर्थः॥ १८॥

रा० टी०—परमेश्वररूपाणां सर्वत्र साम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवानाह—विद्येति। पण्डिताः परोक्षज्ञानिनः विद्याविनयसंपन्नब्राह्मणादिषु विषमेषु स्थितं हरिं समं गुणेषु दोषाभावे च समं तारतम्याभावं च पश्यन्तीति समदर्शिन इत्यर्थः। अस्य श्लोकस्य भगवद्विषयता निर्दोषं हीत्युत्तरवाक्यगम्या अपरोक्षज्ञानहेतुता च प्रकरणगम्येति ज्ञेयम्॥ १८॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥ १९॥

त० टी०—ननु कज्जलागारस्थस्य कज्जलस्पर्शावश्यकत्ववत्संसारे स्थितानां तद्धर्मस्पर्शावश्यम्भावात्कथं विषमाकारसंसारसंबन्धाभाव इति चेत्तत्राह—इहैवेति। तैः पुरुषैरिहैव संसार एव प्रारब्धशेषेण वर्तमानत्वेऽपि सर्गः संसारो जितः तिरस्कृतः स्वात्मसु स्प्रष्टुमनर्हः कृतः इति यावत्। तैः कैः येषामुक्तप्रकारेण सर्वात्मसाम्ये स्थितं मनः। हि यस्मान्निर्दोषं समं ब्रह्म यथा सर्वचेतनाचेतनेषु तदन्तर्यामितया वर्तमानमपि ब्रह्म निर्दोषं तद्धर्मास्पृष्टमेवात एव समं तथोत्तममध्यमाधमदेहेषु वर्तमानमपि देहधर्मास्पृष्टमेवात्मस्वरूपं कूटस्थत्वान्निर्दोषम् "अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा" इत्यादिश्रुतेः कूटस्थोऽक्षर उच्यते इति वक्ष्यमाणवाक्याच्च निर्दोषत्वादेव सर्वत्र समम्। यस्माद्ब्रह्मवदात्मनां स्वरूपं समं तस्मात् साम्ये ये स्थिता ब्रह्मण्येव ते स्थिताः। एतेन विषमाकारदर्शिनामेव संसारधर्मभागित्वं न तु ब्रह्मभूतात्मस्वरूपदर्शिनामिति समाधानमुक्तम् ब्रह्मणि स्थितिर्हि संसारजयः, राजान्तिके स्थितस्य चौरादिजयवदिति भावः॥ १९॥

म० टी०—ननु सात्त्विकराजसतामसेषु स्वभावविषमेषु प्राणिषु समत्वदर्शनं धर्मशास्त्रनिषिद्धं तथाच तस्यान्नमभोज्यमित्युपक्रम्य गौतमः स्मरति 'समासमाभ्यां विषमसमे पूजातः' इति समासमाभ्यामिति चतुर्थीद्विवचनं, विषमसम इति द्वन्द्वैकवद्भावेन सप्तम्येकवचनम्। चतुर्वेदपारगाणामत्यन्तसदाचाराणां यादृशो वस्त्रालङ्कारान्नादिदानपुरस्सरः पूजाविशेषः क्रियते तत्समायैवान्यस्मै चतुर्वेदपारगाय सदाचाराय विषमे तदपेक्षया न्यूने पूजाप्रकारे कृते तथाल्पवेदानां हीनाचाराणां यादृशो हीनसाधनः पूजाप्रकारः क्रियते तादृशायैवासमाय पूर्वोक्तवेदपारगसदाचारब्राह्मणापेक्षया हीनाय तादृशहीनाय तादृशहीनपूजाधिके मुख्य-

पूजासमे पूजाप्रकारे कृते उत्तमस्य हीनतया हीनस्योत्तमतया पूजातो हेतोस्तस्य पूजयितुरन्नमभोज्यं भवतीत्यर्थः। पूजयिता प्रतिपत्तिविशेषमकुर्वन्धनाद्धर्माच्च हीयत इति च दोषान्तरं यद्यपि यतीनां निष्परिग्रहाणां पाकाभावाद्धनाभावाच्चाभोज्यान्नत्वं च धनहीनत्वं च स्वत एव विद्यते तथापि धर्महानिर्दोषो भवत्येव। अभोज्यान्नत्वं चाशुचित्वेन पापोत्पत्त्युपलक्षणं तपोधनानां च तप एव धनमिति तद्धानिरपि दूषणं भवत्येवेति कथं समदर्शिनः पण्डिता जीवन्मुक्ता इति प्राप्ते परिहरति—इहैवेति। तैः समदर्शिभिः पण्डितैरिहैव जीवनदशायामेव जितोऽतिक्रान्तः सर्गः सृज्यत इति व्युत्पत्त्या द्वैतप्रपञ्चः देहपातादूर्ध्वमतिक्रमितव्य इति किमु वक्तव्यम्। कैः येषां साम्ये सर्वभूतेषु विषमेष्वपि वर्तमानस्य ब्रह्मणः समभावे स्थितं निश्चलं मनः हि यस्मान्निर्दोषं समं सर्वविकारशून्यं कूटस्थनित्यमेकं च ब्रह्म तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः। अयं भावः—दुष्टत्वं हि द्वेधा भवति। अदुष्टस्यापि दुष्टसंबन्धाद्वा यथा गङ्गोदकस्य मूत्रगर्तपातात्, स्वत एव वा यथा मूत्रादेः। तत्र दोषवत्सु श्वपाकादिषु स्थितं तद्दोषैर्दुष्यति ब्रह्मेति मूढैर्विभाव्यमानमपि सर्वदोषासंसृष्टमेव ब्रह्म व्योमवदसङ्गत्वात् "असङ्गो ह्ययं पुरुषः सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः" इति श्रुतेः। नापि कामादिधर्मवत्तया स्वत एव कलुषितं कामादेरन्तःकरणधर्मत्वस्य श्रुतिस्मृतिसिद्धत्वात्। तस्मान्निर्दोषब्रह्मरूपा यतयो जीवन्मुक्ता अभोज्यान्नादिदोषदुष्टाश्चेति व्याहतम्। स्मृतिस्त्वविद्वद्गृहस्थविषयैव तस्यान्नमभोज्यमित्युपक्रमात् पूजात इति मध्ये निर्देशात् धनाद्धर्माच्च हीयत इत्युपसंहाराच्चेति द्रष्टव्यम्॥ १९॥

शं० टी०—सदा सर्वत्र ब्रह्मैव पश्यन्तः सन्तो ये तु तदात्मना तिष्ठन्ति तेषामेव विदेहमुक्तिर्नेतरेषामिति सूचयितुं ब्रह्मनिष्ठानां यतीनां जीवद्दशायामेव मुक्तिं दर्शयति--इहैवेति। परावरैकत्वविज्ञानवतां तद्बुद्धित्वाद्यन्तरङ्गसाधनवतां सर्वकर्मसंन्यासिनां येषां ब्रह्मविदां मनः सर्वदा साम्ये सममेव साम्यं स्वार्थे ष्यञ्प्रत्ययः। तस्मिन् साम्ये समरसे परे ब्रह्मण्येव स्थितं नैश्चल्येन तिष्ठति ये तु सर्वत्र ब्रह्मैव पश्यन्ति तदात्मतामेवापद्यन्ते तत्रैव निष्ठां कुर्वन्ति तदात्मतापन्नवृत्त्या कालं नयन्ति तैरेवंलक्षणैर्ब्रह्मविद्भिरिहैव जीवद्दशायामेव सर्गो जन्म भविष्यद्देहसंबन्धो जितो निर्जितः परिहृत इत्यर्थः। अविद्याकामकर्माणि खलु शरीरारम्भकाणि अद्वितीये ब्रह्मणि जगद्बुद्धिसंपादिका देहादावहंममबुद्धिसंपादिका वासनाऽविद्या तन्मूलकाः कामास्तत्कार्याणि कर्माणि तेषामविद्याकामकर्मणां नित्यनिरन्तरब्रह्मनिष्ठया निःशेषविनाशे सति 'कारणनाशात्कार्यनाशः' इति न्यायेन तत्कार्यभूतभाविदेहसंबन्धनाशोऽपि सिध्यत्यत एवोच्यते—इहैव तैर्जितः सर्ग इति। ननु ब्रह्मविदां कचिदपि बह्यालम्बनं विना सर्वदा ब्रह्मण्येव ब्रह्मात्मनावस्थानं कथमुपपद्यत इत्याकाङ्क्षायां न, तेषां मनसोऽतिनिर्मलत्वाद्ब्रह्मसुखानुभूतिरसिकत्वात्तादृग्ब्रह्मनिष्ठासंपादकपुण्यसंपत्तेश्च सदानन्दैकरसे ब्रह्मणि स्थितिः संभवतीति सूचयितुं ब्रह्मण आनन्दरूपत्वं प्रतिपादयति-निर्दोषं हीति। हि यस्मात्कारणाद्ब्रह्म निर्दोषं दोषशब्देनात्र तत्कार्यं दुःखं लक्ष्यते निर्दोषं निर्दुःखं दुःखलेशशून्यमानन्दरूपमित्यर्थः। "आनन्दो ब्रह्म। विज्ञानमानन्दं ब्रह्म। स्वप्रकाशमानन्दघनम्" इति श्रुतेः। ननु ब्रह्मणः स्वत आनन्दरूपत्वेऽप्यनृतजडदुःखात्मकप्रपञ्चसंबन्धसंभवात्कचिद्दुःखलेशसंबन्धः संभवेदित्याशङ्कायां न "मायामात्रमिदं द्वैतम्। असत्त्वादन्यस्य नह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयः। एकमेवाद्वितीयम्। अद्वया ह्ययमात्मैकल एव" इत्यादिश्रुतिभिर्जगतः स्वरूपासत्त्वं ब्रह्मणोऽद्वितीयत्वं च नियमेन प्रतिपाद्यते यतस्ततो मरीचिजलसंबन्धवद्ब्रह्मणो मिथ्याभूतप्रपञ्चसंभवात् सदा सर्वत्रैकरसत्वमेवेति बोधयितुमाह—सममिति। समं सर्वत्र सममेव परं ब्रह्म सच्चिदानन्दमात्रमेकरसम् "सद्घनोऽयं चिद्घन आनन्दघन एकरसः" इत्यादिश्रुतिभिर्ब्रह्म सदैकस्वभावमेव भवति समरसत्वाल्लवणपिण्डवदित्यादियुक्तिभिश्च सजातीयविजातीयादिभेदवैधुर्यमेव प्रतिपाद्यते ततः

सदानन्दैकरसमेव परं ब्रह्म नत्वविद्यातत्कार्यतद्धर्मतत्कर्मलेशसंपृक्तं तस्मादेव ब्रह्मविदां मनो ब्रह्मानन्दामृतरसास्वादासक्तया ब्रह्मण्येव तिष्ठति सर्वदैवमेव ब्रह्मण्यानन्दघने येषां ब्रह्मविदां यतीनां मनस्तिष्ठति त एव विदेहमुक्तिं गच्छन्तीति सिद्धम् ॥ १९ ॥

श्री० टी०—ननु विषमेषु समदर्शनं निषिद्धं कुर्वन्तोऽपि कथं ते पण्डिताः । यथाह गौतमः—" समासमाभ्यां विषमसमे पूजातः " इति अस्यार्थः—समाय पूजाया विषमे प्रकारे कृते सति विषमाय च समे प्रकारे कृते सति स पूजक इहलोकात्परलोकाच्च हीयत इति, तत्राह—इहैवेति । इहैव जीवद्भिरेव तैः सृज्यत इति सर्गः संसारो जितः निरस्तः । कैः येषा मनः साम्ये समत्वे स्थितम् । तत्र हेतुः—हि यस्मात् ब्रह्म समं निर्दोषं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः ब्रह्मभावं प्राप्ता इत्यर्थः । गौतमोक्तस्तु दोषो ब्रह्मभावप्राप्तेः पूर्वमेव पूज्यत इति पूजकावस्थाश्रवणात् ॥ १९ ॥

म० टी०—ननु सात्त्विकमुख्येषु स्वभावविषमेषु च ॥ समत्वदर्शनं शास्त्रे निषिद्धं धर्मतत्परे ॥ १ ॥ स्मरतीत्थमभोज्यान्ना इत्युपक्रम्य गौतमः ॥ समासमाभ्यां विषमसमे पूजात इत्यसौ ॥ २ ॥ उत्कृष्टानां यथा पूजा प्रोक्ता वेदविदां श्रुतौ ॥ तत्समायैव चान्यस्मै न्यूने पूजाविधौ कृते ॥ ३ ॥ हीनाचारवतामल्पविदां पूजा यथोदिता ॥ तत्समानाय चान्यस्मै मुख्ये पूजाविधौ कृते ॥ ४ ॥ हीनत्वेन वरिष्ठस्य हीनस्योत्तमभावतः ॥ पूजातः कारणात्तस्य पूजाकर्तुरतद्विदः ॥ ५ ॥ भवत्यन्नमभोज्यं हि स्मृतेरित्यर्थ ईरितः ॥ एवं दोषे प्रसिद्धे ते कथं स्युः समदर्शिनः ॥ ६ ॥ पण्डिता इति शङ्कायामुत्तरं प्राह केशवः ॥ तैर्जीवद्भिरतिक्रान्तः पण्डितैः समदर्शिभिः ॥ ७ ॥ सर्गो द्वैतप्रपञ्चोऽयं भूतेषु विषमेष्वपि ॥ ब्रह्मणो वर्तमानस्य साम्ये येषां स्थिरं मनः ॥ ८ ॥ यस्मात्तद्ब्रह्म कूटस्थं नित्यमेकरसं समम् ॥ तस्मात्तेऽवस्थिता नित्यं ब्रह्मण्येव विपश्चितः ॥ ९ ॥ पामरैर्दोषवत्स्वेषु श्वपाकादिषु यद्यपि ॥ तद्दोषैर्दोषवन्मूढैः परं ब्रह्म विभाव्यते ॥ १० ॥ तथापि दोषासंस्पृष्टमेव ब्रह्म स्वभावतः ॥ तद्रूपाः पण्डिता जीवन्मुक्ता दोषैर्विवर्जिताः ॥ ११ ॥ स्मृतिस्त्वज्ञगृहस्थस्य दोषमाहान्यथाकृते ॥ न तु ब्रह्मविदो दोषं वक्तुमर्हति कंचन ॥ १२ ॥ १९ ॥

भा० टी०—ननु सात्त्विकादिषु समत्वदर्शनमनुचितं 'समासमाभ्यां विषमसमे पूजातः' इति तस्यान्नमभोज्यमित्युपक्रम्य स्मृत्या समदर्शिनोऽभोज्यान्नत्वप्रतिपादनात् समानामध्ययनादिभिस्तुल्यधर्मवतां वस्त्रालंकाररत्नादिदानपूर्वके विषमे पूजाविशेषे क्रियमाणे सति असमानां च कस्यचित् द्विवेदाध्ययनमपरस्यैकवेदाध्ययनमित्येवमध्ययनादिभिरतुल्यधर्मवतां प्रागुक्ते समे पूजाविशेषे तस्याः पूजातो हेतोः पूजयिता पुरुषविशेषं ज्ञात्वा पूजाविशेषमकुर्वन्नभोज्यान्नो भवति धनाद्धर्माच्च हीयत इति स्मृतेरर्थः । तथाच सर्वसत्त्वेषु समत्वदर्शिनः दोषवत्त्वमित्याशङ्कायाः कार्यकरणसंघातात्मदर्शनाभिमानवत्कर्मठविषया तु गौतमस्मृतिः पूजात इति पूजाविषयत्वेन विशेषणात् । इदं तु यः सर्वकर्मसंन्यासी निष्परिग्रहः पाकानाधिकारी अभोज्यान्नो धनहीनो धर्मादिदत्तजलाञ्जलिः तत्त्ववित् तद्विषयमिति विषयभेदेनाविरोधमभिप्रेत्योत्तरमाह—इहेति । इहैव जीवद्भिरेव तैर्जितो वशीकृतः अतिक्रान्तो जन्मादिलक्षणः संसारः । कैरित्यपेक्षायामाह—येषां सर्वसत्त्वेषु ब्रह्मणः समभावे स्थितं स्थिरीभूतं मनोऽन्तःकरणं हि यस्मान्मनःस्थितिविषयो ब्रह्म निर्दोषं दोषवत्सु चाण्डालादिषु स्थितमप्याकाशवत्तद्दोषैरस्पृष्टमत एव समं सदैव सर्वत्रैकरूपं तस्मादेतादृशे ब्रह्मणि ते पण्डिताः स्थिताः अतो न दोषगन्धमात्रमपि तान्स्पृशतीत्यर्थः ॥ १९ ॥

प० टी०—अथ तेषां फलमाह—इहैवेति । येषां पुरुषाणां साम्ये समत्वे मनः स्थितं स्थिरीभूतं तैः समदर्शिभिरिहैव देहे जीवद्भिः सर्गः संसारो जितः । हि यस्मात्कारणाद्ब्रह्म सममविषमं तथा निर्दोषं वैषम्यदोषसाधनीभूततत्तद्देहाद्युपाधिभिरस्पृष्टं निर्बाधं वा तस्मात्ते ब्रह्मणि स्थिताः " समो मशकेन समो नागेन " इति श्रुतेः ॥ १९ ॥

रा० टी०—समदर्शिनं स्तौति—इहैवेति। येषां साम्ये मनः स्थितं तैरिहैवास्मिन्नेव जन्मनि सर्गो जन्मादिरूपः संसारः जितः। दृश्यत्वेनोक्तं समं वस्तु किं केन साम्यमित्यत आह—निर्दोषमिति। समं वस्तु ब्रह्म निर्दोषत्वेन च साम्यमित्युक्तं भवति। तस्मात्समतया सर्वत्र स्थितस्य ब्रह्मत्वात्ते समदर्शिनो ब्रह्मणि स्थिता एवेत्यर्थः। ब्रह्मज्ञानिन इति यावत्॥ १९॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्॥
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः॥ २०॥

त० टी०—एवं समस्वरूपात्मदर्शनरूपा ब्रह्मस्थितिः संसारजये हेतुरिति निर्णीतमिदानीं मुमुक्षुणा तदर्थमेव यतितव्यमित्युपदिशति—न प्रहृष्येदिति। संसारजयमिच्छुर्यः कश्चिन्मुमुक्षुः प्रियं स्वमनोऽनुकूलं भोजनाच्छादननिवासवचनादि प्राप्य न प्रहृष्येत्, अहो भाग्यमिति प्रफुल्लितो न भवेदित्यर्थः। तथाऽप्रियमननुकूलं पूर्वोक्तं प्राप्य नोद्विजेत् विषादं न कुर्यात्। ततश्च स्थिरबुद्धिः शनैः शनैरात्मज्ञानद्वारेण संसारदुःखं तरिष्यामीति दृढव्यवसायः अत एवासंमोहः दुःखपरिणामकेऽनात्मवस्तुनि सुखहेतुरिदमित्यन्तःकरणविभ्रमो मोहस्तद्रहितस्ततस्तत्त्वज्ञोपदेशेन ब्रह्मविद्भूत्वा ब्रह्मणि स्थितः, ब्रह्मवन्निर्दोषसमस्वरूपे आत्मनि निरतो भवेदिति भावः॥ २०॥

म० टी०—नेति। यस्मान्निर्दोषं समं ब्रह्म तस्मात्तद्रूपमात्मानं साक्षात्कुर्वन् दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृह इत्यत्र व्याख्यातं पूर्वार्धम्। जीवन्मुक्तानां स्वाभाविकं चरितमेव मुमुक्षुभिः प्रयत्नपूर्वकमनुष्ठेयमिति वदितुं लिङ्प्रत्ययौ। अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रियाप्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः। अद्वितीयात्मदर्शनमेव विवृणोति—स्थिरबुद्धिरिति। स्थिरबुद्धिः स्थिरा निश्चला संन्यासपूर्वकवेदान्तवाक्यविचारपरिपाकेण सर्वसंशयशून्यत्वेन निर्विचिकित्सा निश्चिता ब्रह्मणि बुद्धिर्यस्य स तथा लब्धश्रवणमननफल इति यावत्। एतादृशस्य सर्वासंभावनाशून्यत्वेऽपि विपरीतभावनाप्रतिबन्धात्साक्षात्कारो नोदेतीति निदिध्यासनमाह—असंमूढः निदिध्यासनस्य विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहस्य परिपाकेण विपरीतभावनाख्यसंमोहरहितः, ततः सर्वप्रतिबन्धापगमात् ब्रह्मवित् ब्रह्मसाक्षात्कारवान्, ततश्च समाधिपरिपाकेन निर्दोषे समे ब्रह्मण्येव स्थितो जीवन्मुक्तः स्थितप्रज्ञ इत्यर्थः। एतादृशस्य द्वैतदर्शनाभावात्प्रहर्षोद्वेगौ न भवत इत्युचितमेव। साधकेन तु द्वैतदर्शने विद्यमानेऽपि विषयदोषदर्शनादिना प्रहर्षविषादौ त्याज्यावित्यभिप्रायः॥ २०॥

शं० टी०—विदेहमुक्तिकामस्य ब्रह्मविदः सर्वं संन्यस्य सर्वदा ब्रह्मण्येव ब्रह्मात्मना तिष्ठतो यतेः सर्ववासनासंक्षयः सर्वकामप्रमोकः सर्वकर्मप्रविलयश्चैतात्रितयस्य भाविजन्महेतोरनिष्टस्य निवृत्तिस्तथा जीवद्दशायां दृष्टदुःखानुपलब्धिः सदानन्दानुभूतिर्विदेहकैवल्यप्राप्तिश्चेत्येतात्रितयस्येष्टस्य प्राप्तिरेवं पुरुषार्थः सिध्यति तस्मान्मुमुक्षोः श्रवणादिना सम्यग्विदितात्मतत्त्वस्य यतेर्ब्रह्मनिष्ठाऽवश्यं कर्तव्येति सूचयितुं ब्रह्मयोगं कुर्वतः कर्तव्यमाह—न प्रहृष्येदिति। ब्रह्मणि सर्वत्र ब्रह्ममात्रदर्शने समाधौ स्थितः प्रवृत्तो ब्रह्मवित्यतिः स्वयं भिक्षाटनादौ यदृच्छया प्रारब्धवशात्प्राप्तं प्रियमिष्टं वस्तु वचनं वा कर्म वा पूजादिलक्षणं प्राप्य श्रुत्वा दृष्ट्वा स्पृष्ट्वा वा रम्यबुद्ध्येष्टताबुद्ध्या वा न प्रहृष्येत् प्रहर्षं न कुर्यात् प्रहर्षोऽनात्मधर्मस्तस्मिन् कृते स्वस्यानात्मतादात्म्ये सत्यसदारोपणं स्याद्वस्तुनो नामरूपगुणविशेषविमर्शनं विना समीचीनत्वबुद्धिरिष्टताबुद्धिश्च न जायते समीचीनत्वादिबुद्धिं विना प्रहर्षोऽपि नोत्पद्यते हर्षोत्पत्तिश्च द्रष्टरि भोक्तर्यात्मत्वाभिनिवेशं विना न संभवत्येवमनर्थहेतुर्भवति पदार्थविमर्शनं, तत्र रम्यताबुद्धिरिष्टताबुद्धिश्च ततः प्रत्यग्दृष्टि

परित्यज्य पदार्थविमर्शनं रम्यताबुद्धिमिष्टत्वादिबुद्धिं च प्रहर्षं च ब्रह्मविन्न कुर्यात्किंतु सर्वत्र प्रत्यग्दृष्ट्यैव तिष्ठेदित्यर्थः । किंचाप्रियमनिष्टमाध्यात्मिकमाधिभौतिकमाधिदैविकं ज्वरादिसर्पचोरादिवर्षवाताद्यनर्थकारणं प्राप्य नोद्विजेत् उद्वेगश्चलनमधैर्यं भयं च तन्नावहेत् हा हतोस्मीत्यौपाधिकमनर्थं स्वं न प्रापयेत् तदनर्थस्य स्वयं विषयो न भवेदिति यावत्, किंतु भवितव्यं भवत्येवेति दृढबुद्ध्योपाधिं प्रारब्धाय समर्प्य स्वयं तदविषयीभूतनिर्विशेषब्रह्माकारेणैव तिष्ठेत्स्वदृष्ट्या स्थितवतो मुक्तिर्न विहन्यते बाह्यदृष्ट्या स्थितस्य तूपाध्यविनाशो मुक्तिविनाशश्च स्यात्ततः प्रत्यग्दृष्टिं परित्यज्य बाह्यग्रहणं तत्रानिष्टताबुद्धिं स्वस्य तदनर्थविषयत्वमुद्वेगं च विद्वान्न कुर्यादित्यर्थः । इष्टानिष्टयोः प्राप्तौ प्रहर्षद्वेगावकृत्वा कथं स्थातव्यमित्यत आह—असंमूढ इति । संमूढो विपरीतग्राही तद्विलक्षणः मद्दर्शयैवासंमूढो ब्रह्मण्येवात्मप्रत्ययस्तत्रैव स्थिरबुद्धिः स्थिरा स्वस्य ब्रह्माकारतामत्यजन्ती निश्चला बुद्धिर्यस्य स स्थिरबुद्धिः सन् ब्रह्मण्येव स्थितो भवेत् स्वस्य सर्वस्य ब्रह्ममात्रदर्शन एव तिष्ठेदित्यर्थः ॥ २० ॥

श्री० टी०—ब्रह्मप्राप्तस्य लक्षणमाह—**नेति** । यो ब्रह्मविद्भूत्वा ब्रह्मण्येव स्थितः स प्रियं प्राप्य न प्रहृष्येत् न प्रहृष्टो हर्षवान् स्यात्, अप्रियं च प्राप्य नोद्विजेत् न विषीदतीत्यर्थः । यतः स्थिरबुद्धिः स्थिरा निश्चला बुद्धिर्यस्य । तत्कुतः यतोऽसंमूढः निवृत्तमोहः ॥ २० ॥

स० टी०—स्वाभाविकं हि चरितं जीवन्मुक्तशरीरिणाम् ॥ मुमुक्षुभिरनुष्ठेयमिति वक्ति हरिर्लिङा ॥ १ ॥ अद्वैतदर्शिनो भिन्नप्रियादिप्राप्त्ययोगतः ॥ नास्य हर्षविषादौ तद्धेतुकौ भवतः क्वचित् ॥ २ ॥ स्थिरा वेदान्तवाक्योत्था बुद्धिर्ब्रह्मणि यस्य सः ॥ अन्योन्याध्याससंमोहशून्यो ब्रह्मावबोधवान् ॥ ३ ॥ ब्रह्मण्येव स्थितो नित्यं समाधिपरिपाकतः ॥ ४ ॥ २० ॥

भा० टी०—समे निर्दोषे ब्रह्मणि स्थितो जीवन्मुक्तिसुखार्थं कीदृशः स्यादित्याकाङ्क्षायामाह—**नेति** । स्थिरा संयशवर्जिता सर्वभूतेष्वेकः समो निर्दोष आत्मेति बुद्धिर्यस्य यतोऽसंमूढः संशयमूलभूतेन संमोहेन रहितः यतस्तत्त्ववित् मोहनिवर्तकतत्त्वसाक्षात्कारवान् तदपि कुतः यतो ब्रह्मणि स्थितः सर्वं विक्षेपकारणं परित्यज्य श्रवणादिना तत्रैव स्थितः तन्निष्ठ इति यावत् एतादृशः प्रियं प्राप्य हर्षं न कुर्यात् अप्रियं प्राप्योद्वेगं न कुर्यात् एतादृशेनापि मनोनाशवासनाक्षयप्रयत्नेन हर्षविषादाभावे यतितव्यं षष्ठ्यादिभूमिकार्थे इवि सूचनार्थमुभयत्र लिङ्प्रयोगः ॥ २० ॥

प० टी०—अथ ब्रह्मणि स्थिरीभूतस्य परीक्षामाह—**न प्रहृष्येदिति** । स एव ब्रह्मवित्सन् ब्रह्मणि स्थितो यः प्रियं प्राप्य न प्रहृष्येत्तथाऽप्रियं प्राप्य नोद्विजेदुद्वेगं न प्राप्नुयादत एव स्थिरबुद्धिरसंमूढः प्रियत्वाप्रियत्वराहितः ॥ २० ॥

रा० टी०—पुनः संन्यासं प्रपञ्चयति—**न प्रहृष्येदिति** । प्रियं सुखसाधनं प्राप्य न प्रहृष्येत् हर्षं न प्राप्नुयात् । अप्रियं च प्राप्य नोद्विजेत् दुःखहेतुप्राप्तावपि उद्वेगरूपमनोऽधैर्यं न प्राप्नुयात् । तत्रोपायमाह—**स्थिरबुद्धिरिति** । बुद्धेः स्थैर्ये हेतुरसंमूढ इति । प्रियाप्रियप्रापणे लौकिको जन एव स्वतन्त्र इति मिथ्याज्ञानहीनः । तत्र हेतुर्ब्रह्मविदिति । ब्रह्मैव स्वतन्त्रमिति विद्वान्नैतावतालं किंतु ब्रह्मणि स्थितः नित्यं ब्रह्मस्मृतिमानित्यर्थः । संन्यासस्त्वित्यादिना संन्यासाद्योगस्याधिक्योक्त्यर्थं योगहीनसंन्यासस्य व्यर्थत्वं यदुक्तं तदयुक्तम्, कामाद्युपद्रवक्षये स्वरूपसुखाविर्भावसत्त्वादित्यतः सत्यं तदेव सुखं भगवद्ध्यानरूपयोगे सत्यक्षयं भवतीति ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ॥
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

त० टी०—ननु सर्वजनेप्सितशब्दस्पर्शादिविषयसुखासक्तस्य ब्रह्मणि स्थितिर्न संभवति, बाह्यसुखविमुखश्चेद्ब्रह्मणि रतः किं सुखं विन्देतेति चेत्तत्राह—**बाह्यस्पर्शेष्विति**। श्रोत्रादीन्द्रियैः स्पृश्यन्त इति स्पर्शाः शब्दादिविषयास्ते बाह्येन्द्रियविषयत्वाद्बाह्यास्तेष्वसक्तात्मा अनासक्तचित्तो विगततृष्ण इति यावत्। आत्मनि अन्तःकरणे यदुपशमरूपमनन्तसुखं शास्त्रे उक्तं तद्विन्दति लभते। तदुक्तं मोक्षधर्मे—'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्' इति। ततश्च प्रकृतिवियुक्तपरिशुद्धात्मस्वरूपं ब्रह्म तस्य योगो निरन्तरचिन्तनाभ्यासस्तत्र युक्त आत्मा मनो येन स ब्रह्मयोगयुक्तात्मा। अथवा ब्रह्म परमात्मा तेन योगः प्रत्यगात्मनस्तादात्म्यसंबन्धस्तत्र युक्तस्तदनुसंधानाभ्यासे नियुक्त आत्मा अन्तःकरणं येन स तथा अक्षयसुखमश्नुते प्राप्नोति। "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्" इति श्रुतेः॥ २१॥

म० टी०—ननु बाह्यविषयप्रीतेरनेकजन्मानुभूतत्वेनातिप्रबलत्वात्तदासक्तचित्तस्य कथमलौकिके ब्रह्मणि दृष्टसर्वसुखरहिते स्थितिः स्यात् परमानन्दरूपत्वादिति चेत् न तदानन्दस्याननुभूतचरत्वेन चित्तस्थितिहेतुत्वाभावात्। तदुक्तं वार्तिके 'अप्यानन्दः श्रुतः साक्षान्मानेनाविषयीकृतः। दृष्टानन्दाभिलाषः स न मन्दीकर्तुमप्यलम्' इति। तत्राह—**बाह्येति**। इन्द्रियैः स्पृश्यन्त इति स्पर्शाः शब्दादयः ते च बाह्या अनात्मधर्मत्वात् तेष्वसक्तात्मा अनासक्तचित्तस्तृष्णाशून्यतया विरक्तः सन् आत्मनि अन्तःकरण एव बाह्यविषयनिरपेक्षं यदुपशमात्मकं सुखं तद्विन्दति लभते निर्मलसत्त्ववृत्त्या। तदुक्तं भारते 'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्' इति। अथवा प्रत्यगात्मनि त्वंपदार्थे यत्सुखं स्वरूपभूतं सुषुप्तावनुभूयमानं बाह्यविषयासक्तिप्रतिबन्धादलभ्यमानं तदेव तदभावाल्लभते न केवलं त्वंपदार्थसुखमेव लभते किंतु तत्पदार्थैक्यानुभवेन पूर्णसुखमपीत्याह—**स इति**। स तृष्णाशून्यः ब्रह्मणि परमात्मनि योगः समाधिस्तेन युक्तस्तस्मिन्व्यापृत आत्मान्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा। अथवा ब्रह्मणि तत्पदार्थे योगेन वाक्यार्थानुभवरूपेण समाधिना युक्त ऐक्यं प्राप्त आत्मा त्वंपदार्थस्वरूपं यस्य स तथा सुखमक्षय्यमनन्तं स्वस्वरूपभूतमश्नुते व्याप्नोति सुखानुभवरूप एव सर्वदा भवतीत्यर्थः। नित्येऽपि वस्तुन्यविद्यानिवृत्त्यभिप्रायेण धात्वर्थयोगः औपचारिकः तस्मादात्मन्यक्षयसुखानुभवार्थी सन्बाह्यविषयप्रीतेः क्षणिकाया महानरकानुबन्धिन्याः सकाशादिन्द्रियाणि निवर्तयेत्तावतैव च ब्रह्मणि स्थितिर्भवतीत्यभिप्रायः॥ २१॥

शं० टी०—न प्रहृष्येत्प्रियं प्राप्येत्युक्त्वा विषयसुखं परित्याज्यमितिसूचितं, विषयसुखे परित्यक्ते ब्रह्मविदः सुखाभावादुन्मत्तस्येवामुष्य स्थितिर्निष्फलैवेत्याशङ्कायां न, "रसं ह्येवायं लब्ध्वानन्दी भवति" इति श्रवणान्नित्यनिरन्तरं निरतिशयं ब्रह्मसुखममुष्य ब्रह्मनिष्ठायां तिष्ठतोऽस्तीत्याह—**बाह्यस्पर्शेष्विति**। य आत्मतत्त्वज्ञः स्वयं बाह्यस्पर्शेषु मूढैरात्मनो बहिरेव कल्पिता बाह्या इन्द्रियैः स्पृश्यन्ते गृह्यन्त इति स्पर्शाः बाह्याश्च ते स्पर्शाश्च तेषु बाह्यस्पर्शेषु शब्दादिषु तज्जन्यसुखेषु च तुच्छत्वबुद्ध्या बन्धकत्वबुद्ध्या च असक्तोऽप्रवृत्त आत्मा मनो यस्य सोऽसक्तात्मा सन् तीव्रवैराग्येण मनसा विषयग्रहणमकुर्वन् गुहायां वा अन्यत्र रहसि समाहितो भूत्वात्मनि बुद्ध्यादिसाक्षिणि प्रतीचि साक्षात्कृते सति यत्सुखमात्मसाक्षात्कारसंभूतं विन्दत्यनुभवति स एव ब्रह्मविद्ब्रह्मयोगयुक्तात्मा नामरूपग्रहणमकृत्वा चिदाकारवृत्त्या बहिरन्तः सर्वत्र ब्रह्ममात्रदर्शनं ब्रह्मयोगस्तस्मिन् सर्वत्र सदा ब्रह्मदर्शन एव युक्तो नियमित आत्मा मनो यस्य स ब्रह्मयोगयुक्तात्मा सन् व्युत्थानाव्युत्थानयोः सदा सर्वत्र ब्रह्मैवानन्दैकरसं परिपूर्णं पश्यन् ततोऽधिकतरमक्षयं सदा सर्वत्रानन्दैकरसस्य ब्रह्मण एव बुद्धिवृत्तेर्विषयत्वाद्विच्छित्तिरहितं सुखं स्वरूपानन्दमश्नुते सर्वत्र

ब्रह्ममात्रदर्शनपरो ब्रह्मविद्यतिः सदानन्दो भवतीत्यर्थः । अत्रायमभिप्रायः—गुहादौ रहसि समाधिं कुर्वन्तः समाधिकाल एवात्मानन्दानुभवः न तु सर्वदा सर्वत्र, ब्रह्मयोगयुक्तात्मनस्तु बहिरन्तः सदा सर्वत्र ब्रह्मानन्दानुभवो निरर्गल इति ॥ २१ ॥

श्री० टी०—मोहनिवृत्त्या बुद्धिस्थैर्यहेतुमाह—बाह्यस्पर्शेष्विति । इन्द्रियैः स्पृश्यन्त इति स्पर्शा विषयाः बाह्येन्द्रियविषयेषु असक्तात्मा अनासक्तचित्तः आत्मन्यन्तःकरणे यदुपशमात्मकं सात्त्विकं सुखं तद्विन्दति लभते स चोपशमात्मकं सुखं लब्ध्वा ब्रह्मणि योगेन समाधिना युक्तस्तदैक्यं प्राप्त आत्मा यस्य सः अक्षय्यं सुखमश्नुते प्राप्नोति ॥ २१ ॥

स० टी०—अनाद्यध्यासजां भोगप्रीतिं बलवतीं कथम् ॥ त्यक्त्वा ब्रह्मण्यवस्थानं संभवेदिति चेच्छृणु ॥ १ ॥ बाह्याः शब्दादयो भोगा जडधर्मा विनश्वराः ॥ तेष्वनासक्तचित्तः सन्विरक्तः शुद्धमानसे ॥ २ ॥ शान्तिरूपं सुखं बाह्यभोगाकाङ्क्षां विहाय यत् ॥ लभते सत्त्ववृत्त्यासौ तदनन्तं महत्सुखम् ॥ ३ ॥ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ॥ तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ ४ ॥ यद्वा यत्त्वंपदार्थे च सुप्तौ भातमपीहितम् ॥ प्रतिबन्धादलभ्यं तत्तदभावाच्च लभ्यते ॥ ५ ॥ ब्रह्मण्येकाग्रसंपन्नं चित्तं यस्य च तद्गतम् ॥ तत्पदार्थेऽथ वा योगः समाधिस्तेन चैकताम् ॥ ६ ॥ गतस्त्वमोऽपि लक्ष्योऽर्थो यस्य सोऽनन्तमद्वयम् ॥ स्वस्वरूपसुखं सम्यग्व्याप्नोत्यात्मस्वरूपतः ॥ ७ ॥ नित्येऽपि वस्तुनि भ्रान्तिनाशाभिप्रायतस्तथा ॥ औपचारिकधात्वर्थयोगोऽस्तीह न वस्तुतः ॥ ८ ॥ बाह्यभोगरुचिं त्यक्त्वा सर्वानर्थाकरीं बुधैः ॥ नित्यानन्दैकतां प्राप्तुं यत्न आस्थेय आदरात् ॥ ९ ॥ यत्पादपद्ममकरन्दरसानुभूतिप्राप्ताखिलामृतसुखानुभवेन तृप्ताः ॥ पौरन्दरीं श्रियमथोऽवगणय्य धीरास्तिष्ठन्ति यत्र स हरिः शरणं ममास्तु ॥१०॥२१॥

भा० टी०—किंच—बाह्येति । विषयसुखस्य ब्रह्मानन्दापेक्षयाऽतितुच्छत्वाद् ब्रह्मणि स्थितः स्पृश्यन्त इति स्पर्शाः शब्दादयो विषयाः तेष्वसक्तः प्रीतिवर्जितः आत्मान्तःकरणं यस्य स आत्मनि त्वंपदलक्ष्ये यत्सुखं तद्विन्दते लभते स ब्रह्मणि तत्पदलक्ष्ये परमात्मनि योगः समाधिः त्वंपदलक्ष्यस्य तत्पदलक्ष्ये एकत्वापादनं तेन युक्तः आत्मान्तःकरणमखण्डसाक्षात्काररलक्षणान्तःकरणवृत्तिर्यस्य स सुखं ब्रह्मानन्दमक्षयमश्नुते व्याप्नोति तस्मादात्मनि जीवन्नेवाक्षयसुखार्थी क्षणिकाया विषयप्रीतेरिन्द्रियाणि निवर्तयेदित्याशयः । अत्रत्यभाष्यस्य सामान्यरूपतया न व्याख्यानान्तरैर्विरोध इति ध्येयम् ॥ २१ ॥

प० टी०—अथ बुद्धिस्थैर्यहेतुमाह—बाह्येति । बहिरिन्द्रियैः स्पृशन्ति ते स्पर्शा बाह्येन्द्रियविषयास्तेष्वसक्त आत्मा मनो यस्य स तथाभूत आत्मन्यन्तःकरण उपशमात्मकं यत्सुखं विन्दति प्राप्नोति तेन ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगेन समाधिना युक्तस्तदैक्यं प्राप्त आत्मा यस्य सोऽक्षयं निरतिशयसुखमश्नुते प्राप्नोति ॥ २१ ॥

रा० टी०—संन्यासाद्योगस्य पुनराधिक्यमाह—बाह्येति । स्पृश्यन्त इति स्पर्शाः शब्दाद्याः तेषां बाह्यत्वं श्रोत्राद्यविषयत्वसंपादनं तथाकृतविषयेषु असक्तमनस्कः संन्यासीति यावत् । आत्मनि स्वरूपे यत्सुखं विन्दत्यनुभवति । आत्मस्वरूपस्यापि न निर्विशेषत्वमिति ज्ञापनाय यत्सुखमित्येव वाच्ये आत्मनीत्यप्युक्तिः । यदित्युक्तेस्तदिति लभ्यते । स संन्यासी ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगो ब्रह्मयोगः ध्यानं तद्युक्तात्मा तत्सुखं कामाद्युपद्रवक्षयरूपसंन्यासादाविर्भूतं सुखमक्षयं पुनस्तिरोभावहीनमश्नुते प्राप्नोतीत्यर्थः । यद्वा योगयुक्तो मुनिर्ब्रह्मेत्यादिना योगरूपसंन्यासस्य यन्निःश्रेयसकरत्वमुक्तं तदुपपाद्यते—बाह्येति । संसारेऽप्यात्मस्मरणरूपाल्पयोगयुक्तः संन्यासी सुखं विन्दति यदा तदा ध्यानादिमहायोगादियुक्तो मोक्षादिनिःश्रेयसं विन्दतीति किमु वाच्यमित्यर्थः ॥ २१ ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

त० टी०—ननु बाह्यविषयानासक्तिपूर्वकात्मन्यक्षयसुखमश्नुते इति सत्यं, तथापि प्रथमतो बाह्यविषयानासक्तिरेव कथं स्यादित्याशङ्क्य तेषु दोषदर्शनादित्याह—**ये हीति** । हि यस्मात् ये संस्पर्शजा विषयेन्द्रियसंबन्धजा भोगा ऐहिकामुष्मिकास्ते सर्वेऽपि दुःखयोनयः परिणामे दुःखहेतवो भवन्ति, तथाभूता अपि न स्थिराः, किन्त्वाद्यन्तवन्तस्तस्मात् हे कौन्तेय! तेषु बुधो विवेकी न रमते, तेषु प्रीतिं न कुरुते इत्यर्थः ॥ २२ ॥

म० टी०—ननु बाह्यविषयप्रीतिनिवृत्तावात्मन्यक्षयसुखानुभवस्तस्मिंश्च सति तत्प्रसादादेव बाह्यविषयप्रीतिनिवृत्तिरितीतरेतराश्रयवशान्नैकमपि सिध्येदित्याशङ्क्य विषयदोषदर्शनाभ्यासेनैव तत्प्रीतिनिवृत्तिर्भवतीति परिहारमाह—**ये हीति** । हि यस्मात् ये संस्पर्शजा विषयेन्द्रियसंबन्धजाः भोगाः क्षुद्रसुखलवानुभवाः इह वा परत्र वा रागद्वेषादिव्याप्तत्वेन दुःखयोनय एव ते ते सर्वेऽपि ब्रह्मलोकपर्यन्तं दुःखहेतव एव । तदुक्तं विष्णुपुराणे ‘ यावन्तः कुरुते जन्तुः संबन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ’ इति । एतादृशा अपि न स्थिराः किंतु आद्यन्तवन्तः आदिर्विषयेन्द्रियसंयोगोऽन्तश्च तद्वियोग एव तौ विद्येते येषां ते पूर्वापरयोरसत्त्वान्मध्ये स्वप्नवदाविर्भूताः क्षणिका मिथ्याभूताः । तदुक्तं गौडपादाचार्यैः ‘ आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ’ इति । यस्मादेवं तस्मात्तेषु बुधो विवेकी न रमते प्रतिकूलवेदनीयत्वान्न प्रीतिमनुभवति । तदुक्तं भगवता पतञ्जलिना ‘ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ’ इति । सर्वमपि विषयसुखं दृष्टमानुश्रविकं च दुःखमेव प्रतिकूलवेदनीयत्वाद् विवेकिनः परिज्ञातक्लेशादिस्वरूपस्य न त्वविवेकिनः अक्षिपात्रकल्पो हि विद्वानत्यल्पदुःखलेशेनाप्युद्विजते यथोर्णातन्तुरतिसुकुमारोऽप्यक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नेतरेष्वङ्गेषु तद्वद्विवेकिन एव मधुविषसंपृक्तान्नभोजनवत्सर्वमपि भोगसाधनं कालत्रयेऽपि क्लेशानुविद्धत्वाद्दुःखं न मूढस्य बहुविधदुःखसहिष्णोरित्यर्थः । तत्र परिणामतापसंस्कारदुःखैरिति भूतवर्तमानभविष्यत्कालेऽपि दुःखानुविद्धत्वादौपाधिकदुःखत्वं विषयसुखस्योक्तम् । गुणवृत्तिविरोधाच्चेत्यनेन स्वरूपतोऽपि दुःखत्वं तत्र परिणामश्च तापश्च संस्कारश्च त एव दुःखानि तैरित्यर्थः । इत्थंभूतलक्षणे तृतीया । तथाहि रागानुविद्ध एव सर्वोऽपि सुखानुभवः नहि तत्र न रज्यति तेन सुखी चेति संभवति राग एव च पूर्वमुद्भूतः सन्विषयप्राप्त्या सुखरूपेण परिणमते तस्य च प्रतिक्षणं वर्धमानत्वेन स्वविषयाप्राप्तिनिबन्धनदुःखस्यापरिहार्यत्वाद्दुःखरूपतैव या हि । भोगेष्विन्द्रियाणामुपशान्तिपरितृप्तत्वात् तत्सुखं, या लौल्यादनुपशान्तिस्तद्दुःखं, न चेन्द्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं शक्यं यतो भोगाभ्यासमनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणां स्मृतिश्च ‘न जातु कामः’ इत्यादि तस्माद्दुःखात्मकरागपरिणामत्वाद्विषयसुखमपि दुःखमेव कार्यकारणयोरभेदादिति परिणामदुःखत्वं तथा सुखानुभवकाले तत्प्रतिकूलानि दुःखसाधनानि द्वेष्टि नानुपहत्य भूतान्युपभोगः संभवतीति भूतानि च हिनस्ति । द्वेषश्च सर्वाणि दुःखसाधनानि मे मा भूवन्निति संकल्पविशेषः । न च तानि सर्वाणि कश्चिदपि परिहर्तुं शक्नोति अतः सुखानुभवकालेऽपि तत्परिपन्थिनं प्रति द्वेषस्य सर्वदैवावस्थितत्वात्तापदुःखं दुष्परिहरमेव । तापो हि द्वेषः । एवं च दुःखसाधनानि परिहर्तुमशक्तो मुह्यति चेति मोहदुःखतापि व्याख्येया । तथाचोक्तं योगभाष्यकारैः ‘ सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभवः ’ इति । तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते यथा वर्तमानः

सुखानुभवः स्वविनाशकाले संस्कारमाधत्ते स च सुखस्मरणं तच्च रागं स च मनःकायवचनचेष्टां सा च पुण्यापुण्यकर्माशयौ तौ च जन्मादीनि संस्कारदुःखता एवं तापमोहयोरपि संस्कारौ व्याख्येयौ । एवं कालत्रयेऽपि दुःखानुवेधाद्विषयसुखं दुःखमेवेत्युक्त्वा स्वरूपतोऽपि दुःखतामाह–'गुणवृत्तिविरोधाच्च' गुणाः सत्त्वरजस्तमांसि सुखदुःखमोहात्मकाः परस्परविरुद्धस्वभावा अपि तैलवर्त्यग्नय इव दीपं पुरुषभोगप्रयुक्तत्वेन त्र्यात्मकमेकं कार्यमारभन्ते तत्रैकस्य प्राधान्ये द्वयोर्गुणभावात्प्रधानमात्रव्यपदेशेन सात्त्विकं राजसं तामसमिति त्रिगुणमपि कार्यमेकेन गुणेन व्यपदिश्यते तत्र सुखोपभोगरूपोऽपि प्रत्यय उद्भूतसत्त्वकार्यत्वेऽप्यनुद्भूतरजस्तमःकार्यत्वात्त्रिगुणात्मक एव । तथा च सुखात्मकत्ववद्दुःखात्मकत्वं विषादात्मकत्वं च तस्य ध्रुवमिति दुःखमेव सर्वं विवेकिनः न चैतादृशोऽपि प्रत्ययः स्थिरः यस्माच्चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तम् । नन्वेकः प्रत्ययः कथं परस्परविरुद्धसुखदुःखमोहत्वान्येकदा प्रतिपद्यत इति चेत् न, उद्भूतानुद्भूतयोर्विरोधाभावात् समवृत्तिकानामेव हि गुणानां युगपद्विरोधः न विषमवृत्तिकानां यथा धर्मज्ञानवैराग्यैश्वर्याणि लब्धवृत्तिकानि लब्धवृत्तिकैरेवाधर्मज्ञानावैराग्यानैश्वर्यैः सह विरुध्यन्ते न तु स्वरूपसद्भिः प्रधानस्य प्रधानेन सह विरोधो न तु दुर्बलेनेति हि न्यायः । एवं सत्त्वरजस्तमांस्यपि परस्परं प्राधान्यमात्रं युगपन्न सहन्ते न तु सद्भावमपि । एतेन परिणामतापसंस्कारदुःखेष्वपि रागद्वेषमोहानां युगपत्सद्भावो व्याख्यातः । प्रसुप्ततनुविच्छिन्नोदाररूपेण क्लेशानां चतुरवस्थत्वात् । तथा हि 'अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः, अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां, अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या, दृग्दर्शनशक्त्योरेकात्मतैवास्मिता, सुखानुशयी रागः, दुःखानुशयी द्वेषः, स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः, ते प्रतिप्रसवहेयाः सूक्ष्माः, ध्यानहेयास्तद्वृत्तयः, क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः, सति मूले तद्विपाको जात्यायुर्भोगाः' इति पातञ्जलानि सूत्राणि । तत्रातस्मिंस्तद्बुद्धिर्विपर्ययो मिथ्याज्ञानमविद्येति पर्यायाः । तस्याः विशेषः संसारनिदानं तत्रानित्ये नित्यबुद्धिर्यथा ध्रुवा पृथिवी ध्रुवा सचन्द्रतारका द्यौरमृता दिवौकस इति, अशुचौ परमबीभत्से काये शुचिबुद्धिर्यथा नवेव शशाङ्कलेखा कमनीयेयं कन्या मध्वमृतावयवनिर्मितेव चन्द्रं भित्त्वा निःसृतेव ज्ञायते नीलोत्पलपत्रायताक्षी हावगर्भाभ्यां लोचनाभ्यां जीवलोकमाश्वासयतीवेति कस्य केन संबन्धः 'स्थानाद्बीजादुपष्टम्भान्निष्यन्दान्निधनादपि । कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः' इति च वैयासिकः श्लोकः । एतेनापुण्ये पुण्यप्रत्ययोऽनर्थे चार्थप्रत्ययो व्याख्यातः, दुःखे सुखख्यातिरुदाहृता, परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः, इति । अनात्मन्यात्मख्यातिर्यथा शरीरे मनुष्योऽहमित्यादिः । इयं चाविद्या सर्वक्लेशमूलभूता तम इत्युच्यते । बुद्धिपुरुषयोरभेदाऽभिमानोऽस्मिता । मोहः साधनरहितस्यापि सर्वं सुखजातीयं मे भूयादिति विपर्ययविशेषो रागः स एव महामोहः । दुःखसाधने विद्यमानेऽपि किमपि दुःखं मे मा भूदिति विपर्ययविशेषो द्वेषः, स तामिस्रः । आयुरभावेऽप्येतैः शरीरेन्द्रियादिभिरनित्यैरपि वियोगो मे मा भूदित्याविद्वदङ्गनाबालं स्वाभाविकः सर्वप्राणिसाधारणो मरणत्रासरूपो विपर्ययविशेषोऽभिनिवेशः, सोन्धतामिस्रः । तदुक्तं पुराणे 'तमोमोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः । अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः' इति । एते च क्लेशाश्चतुरवस्था भवन्ति । तत्रासतोऽनुत्पत्तेरनभिव्यक्तरूपेणावस्थानं सुप्तावस्था १, अभिव्यक्तस्यापि सहकार्यलाभात् कार्याजनकत्वं तन्ववस्था २, अभिव्यक्तस्य जनितकार्यस्यापि केनचिद्बलवताभिभवो विच्छेदावस्था ३, अभिव्यक्तस्य प्राप्तसहकारिसंपत्तेरप्रतिबन्धेन स्वकार्यकरत्वमुदारावस्था ४, एतादृगवस्थाचतुष्टयविशिष्टानामस्मितादीनां चतुर्णां विपर्ययरूपाणां क्लेशानामविद्यैव सामान्यरूपा क्षेत्रं प्रसवभूमिः सर्वेषामपि विपर्ययरूपत्वस्य दर्शितत्वात् । तेनाविद्यानिवृत्त्यैव क्लेशानां निवृत्तिरित्यर्थः । ते च क्लेशाः प्रसुप्ता यथा प्रकृ-

तिलीनानां, तनवः प्रतिपक्षभावनया तनूकृता यथा योगिनां, त उभयेऽपि सूक्ष्माः प्रतिप्रसवेन मनोनिरोधेनैव निर्बीजसमाधिना हेयाः। ये तु सूक्ष्मवृत्तयस्तत्कार्यभूताः स्थूला विच्छिन्ना उदाराश्च विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः प्रादुर्भवन्तीति विच्छिन्नाः। यथा रागकाले क्रोधो विद्यमानोऽपि न प्रादुर्भूत इति विच्छिन्न उच्यते। एवमेकस्यां स्त्रियां चैत्रो रक्त इति नान्यासु विरक्तः किंत्वेकस्यां रागो लब्धवृत्तिरन्यासु च भविष्यद्वृत्तिरिति स तदा विच्छिन्न उच्यते। ये यदा विषयेषु लब्धवृत्तयस्ते तदा सर्वात्मना प्रादुर्भूता उदारा उच्यन्ते। तत उभयेऽप्यतिस्थूलत्वाच्छुद्धसत्त्वमयेन भगवद्ध्यानेन हेया न मनोनिरोधमपेक्षन्ते। निरोधहेयास्तु सूक्ष्मा एव। तथा च परिणामतापसंस्कारदुःखेषु प्रसुप्ततनुविच्छिन्नरूपेण सर्वे क्लेशाः सर्वदा सन्ति। उदारता तु कदाचित्कस्यचिदिति विशेषः। एते च बाधनालक्षणं दुःखमुपजनयन्तः क्लेशशब्दवाच्या भवन्ति। यतः कर्माशयो धर्माधर्माख्यः क्लेशमूलक एव। सति च मूलभूते क्लेशे तस्य कर्माशयस्य विपाकः फलं जन्मायुर्भोगश्चेति। स च कर्माशय इह परत्र च स्वविपाकारम्भकत्वेन दृष्टादृष्टजन्मवेदनीयः। एवं क्लेशसन्ततिर्घटीयन्त्रवदनिशमावर्तते अतः समीचीनमुक्तं ये हि संस्पर्शजा भोगादुःखयोनय एव ते। आद्यन्तवन्त इति। दुःखयोनित्वं परिणामादिभिर्गुणवृत्तिविरोधाच्च, आद्यन्तवत्त्वं गुणवृत्तस्य चलत्वादिति योगमते व्याख्या। औपनिषदानां तु अनादिभावरूपमज्ञानमविद्या, अहंकारधर्माध्यासोऽस्मिता, रागद्वेषाभिनिवेशास्तद्वृत्तिविशेषाः, इत्यविद्यामूलत्वात्सर्वेऽप्यविद्यात्मकत्वेन मिथ्याभूता रज्जुभुजङ्गाध्यासवन्मिथ्याभूतत्वेऽपि दुःखयोनयः स्वप्नादिवद्दृष्टिसृष्टिमात्रत्वेनाद्यन्तवन्तश्चेति बुधोऽधिष्ठानसाक्षात्कारेण निवृत्तभ्रमस्तेषु न रमते मृगतृष्णिकास्वरूपज्ञानवानिव तत्रोदकार्थी न प्रवर्तते। न संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा ततः सर्वाणीन्द्रियाणि निवर्तयेदित्यर्थः ॥ २२ ॥

शं० टी०—ननु बाह्यस्पर्शेष्वसक्तात्मेत्युक्तिरनुपयुक्ता, ब्रह्मविदः काले विषयसुखमप्यस्तु सुखं ब्राह्मं चाप्यस्तीत्याशङ्कायां न, विषयसुखस्याद्यन्तवत्त्वेन दुःखवत्त्वादल्पत्वात्तुच्छत्वान्न तत्रात्मतत्त्वज्ञः प्रवर्तेत इत्याह—ये हीति। हि यस्मात्कारणात्संस्पर्शजा इन्द्रियाणां विषयाणां च संस्पर्शः परस्परसंयोगस्तस्मादेव जायन्त इति संस्पर्शजा इन्द्रियार्थसंपर्कसंभाविता ये भोगाः विषयसुखानि ते आद्यन्तवन्त उत्पत्तिविनाशवन्तः अत एवानित्याः क्षणिका इत्यर्थः। संस्पर्शजा इति जन्यत्वहेतुनैवानित्यत्वे सिद्धे पुनराद्यन्तवन्त इति वचनं निरर्थकमिति न मन्तव्यं, तार्किकैः प्रध्वंसाभावस्य जन्यत्वं नित्यत्वं चाङ्गीकृतं मीमांसकैरपि "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्" इति तज्जन्यसुखस्याप्यक्षयत्वमुररीकृतं तन्निरासितुमाद्यन्तवन्त इत्युक्तं, तेन विषयसुखस्य क्षणिकत्वमल्पत्वं च प्रत्यक्षादिप्रमाणसिद्धं विषयेन्द्रिसंयोगात्पूर्वं तद्वियोगात्पश्चाच्च सुखादर्शनात् ये आद्यन्तवन्तो भोगास्ते दुःखयोनयो दुःखहेतव एव भवन्ति स्वकारणनाशे स्वनाशे स्वकारणासिद्धौ स्वासिद्धौ च यस्मादुःखमेव प्रयच्छन्ति तदिदं सर्वलोकप्रसिद्धं तस्माद्विषयसुखस्य सापेक्षत्वं क्षणिकत्वमल्पत्वं दुःखदत्वं च विज्ञाय बुधो ब्रह्मवित्तेषु विषयसुखेषु न रमते रतिं न करोति भुक्तिदशायामपि स्वयं स्वदृष्ट्या ब्रह्मानन्दामृतरसमेव पिबति न बाह्यमनुसंधत्त इत्यर्थः ॥ २२ ॥

श्री० टी०—ननु प्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः पुरुषार्थः स्यात्तत्राह—ये हीति। संस्पृश्यन्त इति संस्पर्शा विषयाः तेभ्यो जाता ये भोगाः सुखानि ते हि वर्तमानकालेऽपि स्पर्धासूयादिव्याप्तत्वादुःखस्यैव योनयः कारणभूताः तथा आदिमन्तोऽन्तवन्तश्च अतो विवेकी तेषु न रमते ॥ २२ ॥

स० टी०—ननु बाह्यरुचित्यागे स्वसुखानुभवो भवेत् ॥ तस्मिन्सति भवेद्बाह्यरुचित्यागस्ततस्तयोः ॥१॥ अन्योन्याश्रयतादोषान्नैकं सिद्ध्येदपीति चेत् ॥ शृणु बाह्यरुचित्यागे दोषदृष्टिर्हि कारणम् ॥ २ ॥ विषयेन्द्रियसंबन्धजन्या ये क्षुद्ररूपिणः ॥ सुखांशानुभवा भोगा इह लोके परत्र च ॥३॥ रागद्वेषादिविद्धत्वादुः-

स्वहेतव एव ते ॥ विषयेन्द्रियसंयोग आदिरन्तस्तु तत्क्षयः ॥ ४ ॥ तद्वन्तः स्वप्नवन्मध्ये प्रादुर्भूता मृषात्मकाः ॥ आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ॥ ५ ॥ इतिन्यायेन ते मिथ्याक्षणिकानन्दकारिणः ॥ यस्मादेवं ततस्तेषु रतिमेति न पण्डितः ॥ ६ ॥ रज्जुसर्पवदध्यस्ता भोगा मिथ्याभ्रमाकराः ॥ स्वप्नवद्दृष्टिसृष्टित्वादविद्यामूलका जडाः ॥ ७ ॥ अधिष्ठानाववोधेन नष्टाविद्याभ्रमो बुधः ॥ न तेषु रमते यद्वत्तज्ज्ञ ऊषरवारिषु ॥ ८ ॥ न संसारे सुखस्यास्ति गन्धोऽप्यद्धा ततः सुधीः ॥ बाह्यभोगरुचिं त्यक्त्वा स्वसुखानुभवो भवेत् ॥ ९ ॥ २२ ॥

भा० टी०—विषयेष्वसक्ततां संपादयेदित्युक्तं, तत् भोगानां दुःखरूपत्वप्रतिपादनेन द्रढयति—ये हीति। ये हि यस्माद्विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगास्ते दुःखानामाध्यात्मिकादीनां योनयः कारणानि अविद्यावृतत्वात्। एवकारात्संसारे सुखस्य गन्धमात्रमपि नास्तीति ज्ञात्वा शुक्तिरजतनिभेभ्यो भोगेभ्य इन्द्रियाणि निवर्तयेत्। न केवलं दुःखयोनय एवापित्वाद्यन्तवन्तश्च आदिर्विषयेन्द्रियसंयोगो भोगानामन्तश्च एतद्वियोग एव तस्माद्बुधो विवेकी दृग्दृश्यतत्त्ववित् तेषु भोगेषु न रमते। तदुक्तं वासिष्ठे—'संपदः प्रमदाश्चैव तरङ्गोत्सङ्गभङ्गुराः। कस्तास्वहिफणाच्छत्रच्छायासु रमते बुधः' इति। कौन्तेयेति संबोधयन् स्त्रीस्वभावोऽदीर्घदर्श्यत्यन्तमूढ एव भोगेषु रमते इति ध्वनयति, यद्वा विषयेषु रतिरहितायाः कुन्त्याः पुत्रस्त्वं तेषु रन्तुमयोग्योऽसीति सूचयति ॥ २२ ॥

प० टी०—अथैतदेव सुखशब्दव्यपदेश्यं नान्यदित्याह—ये हीति। सम्यक् स्पृशन्तीति स्पर्शा विषयास्तेभ्यो जाता ये भोगा विषयसुखभोगास्ते दुःखयोनय एव दुःखकारणीभूताः परिणतिविरसत्वात्। यद्वा दुःखं योनिः कारणं येषां तेऽर्जुनेऽपि दुःखरूपत्वादत एव आद्यन्तवन्त उत्पत्तिनाशधर्मकत्वाद्दुःखरूपा एवातस्तेषु बुधो ज्ञाता न रमते विषसंपृक्तान्नवत्त्यजति। तदुक्तम्—'लोक एष विषयानुरञ्जनं दुःखगर्भमपि मन्यते सुखम्। आमिषं बडिशगर्भमप्यहो मोहतो ग्रसति यद्वदण्डजः' इति ॥ २२ ॥

रा० टी०—कामादिवर्जनरूपसंन्यासार्थं कामभोगं निन्दति—ये हीति। ये हि संस्पर्शजाः विषयसंबन्धसंभूताः भोगाः सुखानुभवाः ते दुःखयोनय एव। कुत इत्यत उक्तम्—आद्यन्तवन्त इति। उत्पत्तिविनाशवत्त्वादित्यर्थः। बुधो ज्ञानी तेषु विषयभोगेषु न रमते सक्तिं न करोतीत्यर्थः ॥ २२ ॥

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ॥
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

त० टी०—एवमक्षयसुखहेतुशुद्धात्मनिष्ठाया दृढीकरणाय विषयसुखस्य दुःखहेतुत्वमभिधाय मुमुक्ष्वनुग्रहाय पूर्वोक्तमपि श्रेयोमार्गे प्रधानप्रतिपक्षं स्मृत्वा तन्निवारणाय पुनर्निर्दिशति—शक्नोतीति। दर्शनश्रवणादिना गुणबुद्ध्या हृद्यतिसक्तशब्दस्पर्शरूपादिमद्वस्तुविषयकप्रीत्यतिशयात्मकोऽभिलाषः कामः तथा प्रतिकूलदर्शनश्रवणादिना दोषबुद्ध्या हृद्यारूढाप्रियवस्तुविषयकद्वेषविशेषनिमित्तकोऽभिज्वलनात्मकोऽन्तःकरणपरिणामः क्रोधस्ताभ्यामुद्भवो नदीवेगवदनिवार्यो देहेन्द्रियविकारो वेगस्तं शरीरविमोक्षणात्प्राक् यावच्छरीरपातमिहैव साधनावस्थायामेव यः सोढुं निवर्तयितुं शक्नोति समर्थो भवति स युक्तः उक्तात्मज्ञानयुक्तः, स सुखी, स एव नरः, पुरुषार्थार्हः नान्यस्तद्वेगे पतित्वाऽऽत्मानमुद्धर्तुं समर्थ इत्यर्थः ॥ २३ ॥

म० टी०—सर्वानर्थप्राप्तिहेतुर्दुर्निवारोऽयं श्रेयोमार्गप्रतिपक्षः कष्टतमो दोषो महता यत्नेन मुमुक्षुणा निवारणीय इति यत्नाधिक्यविधानाय पुनराह—शक्नोतीति। आत्मनोऽनुकूलेषु सुखहेतुषु दृश्यमानेषु

श्रूयमाणेषु स्मर्यमाणेषु वा तद्गुणानुसन्धानाभ्यासेन यो रत्यात्मको गर्ध्योऽभिलाषस्तृष्णालोभः स कामः स्त्रीपुंसयोः परस्परव्यतिकराभिलाषे त्वत्यन्तनिरूढः कामशब्दः एतदभिप्रायेण कामः क्रोधस्तथा लोभ इत्यत्र धनतृष्णालोभः स्त्रीपुंसव्यतिकरतृष्णा काम इति कामलोभौ पृथगुक्तौ । इह तु तृष्णासामान्याभिप्रायेण कामशब्दः प्रयुक्त इति लोभः पृथङ्नोक्तः । एवमात्मनः प्रातिकूल्येषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा तद्दोषानुसंधानाभ्यासेन यः प्रज्वलनात्मको द्वेषो मन्युः स क्रोधः तयोरुत्कटावस्था लोकवेदविरोधप्रतिसंधानप्रतिबन्धकतया लोकवेदविरुद्धप्रवृत्त्युन्मुखत्वरूपा नदीवेगसाम्येन वेग इत्युच्यते यथा हि नद्या वेगो वर्षास्वतिप्रबलतया लोकवेदविरोधप्रतिसंधानेनानिच्छन्तमपि गर्ते पातयित्वा मज्जयति चाधो नयति च तथा कामक्रोधयोरपि वेगो विषयाभिध्यानाभ्यासेन वर्षाकालस्थानीयेनातिप्रबलो लोकवेदविरोधप्रतिसंधानेनानिच्छन्तमपि विषयगर्ते पातयित्वा संसारसमुद्रे मज्जयति चाधो महानरकान्नयति चेति वेगपदप्रयोगेण सूचितम् । एतच्चाथ केन प्रयुक्तोयमित्यत्र विवृतम् । तमेतादृशं कामक्रोधोद्भवं वेगमन्तःकरणप्रक्षोभरूपं स्तम्भस्वेदाद्यनेकबाह्यविकारलिङ्गम् आशरीरविमोक्षणात् शरीरविमोक्षणपर्यन्तमनेकनिमित्तवशात्सर्वदा संभाव्यमानत्वेनाविस्रम्भणीयमन्तरुत्पन्नमात्रमिहैव बहिरिन्द्रियव्यापाररूपाद्गर्तपतनात्प्रागेव यो यतिर्धीरस्तिमिङ्गिल इव नदीवेगं विषयदोषदर्शनाभ्यासजेन वशीकारसंज्ञकवैराग्येण सोढुं तदनुरूपकार्यासंपादनेनानर्थकं कर्तुं शक्नोति समर्थो भवति स एव युक्तो योगी स एव सुखी स एव नरः पुमान् पुरुषार्थसंपादनात् । तदितरस्त्वाहारनिद्राभयमैथुनादिपशुधर्ममात्ररतत्वेन मनुष्याकारः पशुरेवेति भावः । प्राक् शरीरविमोक्षणादित्यत्रान्यद्व्याख्यानं यथा मरणादूर्ध्वं विलपन्तीभिर्युवतीभिरालिङ्ग्यमानोऽपि पुत्रादिभिर्दह्यमानोऽपि प्राणशून्यत्वात्कामक्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव यः सहते स युक्त इत्यादि । अत्र यदि मरणवज्जीवनेऽपि कामक्रोधानुत्पत्तिमात्रं ब्रूयात्सदैतद्युज्येत । यथोक्तं वसिष्ठेन ‘ प्राणे गते यथा देहः सुखं दुःखं न विन्दति । तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत् ’ इति । इह तूत्पन्नयोः कामक्रोधयोर्वेगसहने प्रस्तुते तयोरनुत्पत्तिमात्रे न दृष्टान्त इति किमतिनिर्बन्धेन ॥ २३ ॥

शं० टी०—ननु सर्वं ब्रह्मैव पश्यतो ब्रह्मनिष्ठानिर्धूतकषायस्यात्मारामस्य सिद्धस्य सुखेच्छया विषयेषु प्रवृत्तिर्मास्तु अभ्यासिनस्त्विष्टेऽप्यनिष्टेऽपि कामः क्रोधस्ताभ्यां प्रवृत्तिर्निवृत्तिश्च स्यातामेवेत्याशङ्कायां न, तस्यापि मुमुक्षोः प्रयत्नेन तौ परिहर्तव्यावेव । कामक्रोधजयेनैव शमादयः श्रवणं ज्ञानं मोक्षस्तत्सुखं च सिध्यति नान्यथेत्याशयेनाह—**शक्नोतीति** । स्मृते श्रुते दृष्टे प्राप्ते च भोग्यपदार्थे या भोगेच्छा सत्वरा स कामः, यः शिष्टमपि भ्रष्टयति वृद्धमपि गर्धयत्यनुपतापिनमपि संतापयति अप्रियवस्तुनि स्मृते श्रुते दृष्टे च सति मनःक्षोभको यो द्वेषपरिपाकः स क्रोधः, यः स्वाश्रयं वह्निरिव दहति गुरुमपि हिंसति ताभ्यां कामक्रोधाभ्यां सम्यगुद्भव उत्पत्तिर्यस्य तं कामक्रोधसमुद्भवं वेगं कामक्रोधयोरुद्रेकं शरीरविमोक्षणात्प्रागेव विद्यमानदेहस्य पतनात्पूर्वमेव यौवनकाल एवेति यावत्, यो मुमुक्षुस्तितिक्षया तीव्रमोक्षेच्छासमुत्पन्नया सोढुं शक्नोति कामक्रोधौ निर्जित्य शान्तो दान्तो भवितुमर्हतीत्यर्थः । स नरो मोक्षार्थी श्रवणादिना ज्ञानं संपाद्य युक्तो योगी सुखी च ब्रह्मानन्दी भवितुं शक्नोतीत्यर्थः । अत्रायमभिप्रायः—‘ दुर्लभो मानुषो देहो ब्राह्मो देहः सुदुर्लभः । ब्राह्मं देहं समासाद्य येन मुक्त्यै न यत्यते ॥ सुमेरोरग्रमासाद्य स्वदेहं पातयत्यधः । तमेव पतितं विद्युर्जातिभ्रष्टं महर्षयः ’ इति न्यायेन ब्राह्मं मोक्षसंपादनयोग्यं देहं प्राप्य कामक्रोधपरवशो भूत्वा पतितश्चेत्पुनरुक्तलक्षणो देहो दुष्प्रापस्ततो मुमुक्षोर्विवेकवैराग्याभ्यां यौवने पूर्वे वयसि कामादिशत्रून्विजित्य प्रयत्नेनेदानीमेव मोक्षः संपादनीय इति । यद्वा इहैवास्मिन्नेव जन्मनि मोक्षं प्राप्तुमिच्छया शरीरविमोक्षणात् अत्र शरीरपदेन तदाश्रितगार्हस्थ्यं लक्ष्यते तस्य विमोक्षणात्संन्यासात्प्रागेव यो मुमुक्षु-

नरो विवेकवैराग्याभ्यां कामक्रोधोद्भवं वेगं सोढुं शमयितुं शक्नोति स एव शमदमादिसाधनसंपन्नः सन् श्रुत्या मत्या च ज्ञानं संपाद्य युक्तो ब्रह्मयोगयुक्तो भवितुं सुखी ब्रह्मानन्दी च भवितुमर्हति नतु कामक्रोधजयमकृत्वा संन्यस्य श्रवणादिना ज्ञानं तत्फलं ब्रह्मण्यात्मभावं मोक्षसुखं च प्राप्तुं शक्नोतीत्यर्थः ॥ २३ ॥

श्री० टी०—तस्मान्मोक्ष एव परः पुरुषार्थस्तस्य च कामक्रोधवेगोऽतिप्रतिपक्षोऽतस्तत्सहनसमर्थ एव मोक्षभागित्याह—**शक्नोतीति** । कामात् क्रोधाच्चोद्भवति यो वेगो मनोनेत्रादिक्षोभलक्षणः तमिहैव तदुद्भवसमय एव यो नरः सोढुं प्रतिरोद्धुं शक्नोति तदपि न क्षणमात्रं किंतु शरीरविमोक्षणात्प्राक् यावद्देहपातमित्यर्थः । य एवंभूतः स एव मुक्तः समाहितः सुखी च भवति नान्यः । यद्वा मरणादूर्ध्वं विलपन्तीभिर्युवतीभिरालिङ्ग्यमानोऽपि पुत्रादिभिर्दह्यमानोऽपि यथा प्राणशून्यः कामक्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव यः सहेत स एव युक्तः सुखी चेत्यर्थः । तदुक्तं वसिष्ठेन—' प्राणे गते यथा देहः सुखं दुःखं न विन्दति । तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रयो भवेत् ' इति ॥ २३ ॥

स० टी०—सर्वानर्थकरः श्रेयोमार्गे शत्रुश्च दोषभूः ॥ मुमुक्षुणातियत्नेन वारणीयोऽयमित्यजः ॥ १ ॥ यत्नाधिक्यविधानाय पुनराह वचोऽमृतम् ॥ स्वानुकूलेषु भोगेषु दृश्यमानेष्वनेकधा ॥ २ ॥ स्मर्यमाणेषु वा श्रूयमाणेष्वामुष्मिकेषु यः ॥ शोभनत्वगुणाध्यासो गर्धो रत्यात्मकः स च ॥ ३ ॥ कामस्तृष्णादिपर्यायः सर्वानर्थाकरो नृणाम् ॥ आत्मनः प्रतिकूलेषु दुःखहेतुषु वस्तुषु ॥ ४ ॥ दृश्यमानेषु वा श्रूयमाणेषु स्वान्तगेषु च ॥ तावद्दोषानुसंधानाभ्यासात्प्रज्वलनात्मकः ॥५॥ द्वेषो मन्युः स च क्रोधस्तज्जो वेगस्तयोर्द्वयोः ॥ या चास्त्यत्युत्कटावस्था लोकवेदविरोधिनि ॥६॥ मार्गे प्रवृत्तिहेतुत्वाद्वेगो नद्या रयो यथा ॥ नद्या वेगोऽपि वर्षासु प्राबल्याल्लोकवेदयोः ॥ ७ ॥ विरोधिन्यप्यनिच्छन्तं कुगर्ते पातयत्यधः ॥ तथा कामादिजो वेगो लोकवेदविरोधिनि ॥ ८ ॥ भोगगर्तेऽप्यनिच्छन्तं निरये पातयत्यधः ॥ चित्तप्रक्षोभरूपं तं स्तम्भस्वेदादिलिङ्गकम् ॥ ९ ॥ आमृत्योर्जातमात्रं यदिहैव पतनात्पुरा ॥ तद्दोषदर्शनाभ्यासजातवैराग्यतेजसा ॥ १० ॥ मोघीकर्तुं समर्थोऽस्ति स योगी स सुखी नरः ॥ पुरुषार्थैकनिष्ठत्वात्स एव पुरुषः सुखी ॥ ११ ॥ अन्यस्त्वाहारनिद्रादिपशुधर्मैकतत्परः ॥ नराकारः पशुर्ज्ञेयः पुरुषार्थपराङ्मुखः ॥ १२ ॥ मन्दस्मितं रुचिरकान्ति विलासशोभि स्वाभाविकामृतरसाकरमप्रमेयम् ॥ ध्याने स्वयं श्रितवतां रमयाञ्चितं श्रीकृष्णाननं व्रजति नाशमयं कुदोषः ॥ १३ ॥ २३ ॥

भा० टी०—अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुः दुर्निवार्यश्चेति तत्परिहारे यत्नाधिक्यविधानायाह—**शक्नोतीति** । यः इहैव जीवन्नेव इन्द्रियगोचरे प्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वा सुखहेतौ या तृष्णा स कामः क्रोधश्चैवंभूतेऽनिष्टे विषये द्वेषः तौ कामक्रोधावुद्भवौ यस्य स रोमाञ्चनहृष्टनेत्रवदनलिङ्गोऽन्तःकरणप्रक्षोभरूपः कामोद्भवो वेगः, गात्रप्रकम्पप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रवक्त्रतादिलिङ्गः चित्तप्रक्षोभरूपः क्रोधोद्भवो वेगः, तं कामक्रोधोद्भवं वेगं शरीरविमोक्षणात्प्रागामरणात् सोढुं प्रसहितुं शक्नोति मरणसीमाकरणं तु निमित्तानामनन्तत्वात् कामक्रोधोद्भवस्य वेगस्य जीवतोऽवश्यं भावित्वात् यावन्मरणं स न विश्वसनीय इति कथनार्थम् । यः सोढुं शक्नोति स युक्तो योगी सुखी चेह लोके नरः स एव नर इति सूचनार्थं नरपदम् । यत्त्वपरे मरणादूर्ध्वं विलपन्तीभिर्युवतीभिरालिङ्ग्यमानोऽपि पुत्रादिभिर्दह्यमानोऽपि यथा प्राणशून्यः कामक्रोधवेगं सहते तथा मरणात्प्राक् जीवन्नेव यः सहते स एव युक्तः सुखी चेत्यर्थः । तदुक्तं वसिष्ठेन ' प्राणे गते यथा देहः सुखं दुःखं न विन्दति । तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत् ' इति तन्मन्दं, प्राणशून्ये कामक्रोधोद्भववेगस्याभावादत्र तद्दृष्टान्तीकरणस्यानुचितत्वात् ॥ २३ ॥

प० टी०—अथ सुखप्राप्त्यभिव्यञ्जकसामग्रीमाह—शक्नोतीति । यः पुरुषः इहैव वर्तमाने देहे कामक्रोधोद्भवं वेगं सोढुं शक्नोति कामक्रोधाभ्यामुद्भवो यस्यासौ मनोवेगस्तत्सहनशीलः । तदपि नैरन्तर्येणेत्याह—प्रागिति । शरीरविमोक्षणात् प्राग् यावद्देहपातमित्यर्थः । एवंभूत एव युक्तः स एव नरः पुरुषार्थी सुखी च भवति ॥ २३ ॥

रा० टी०—उक्तरूपसंन्यासार्थं कामभोगत्यागं प्रशंसति—शक्नोतीति । यः इहैव मानुषे देहे शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं मनसोऽनवस्थानं सोढुं शक्नोति स नरः युक्तः ज्ञानोपायवान् सुखी च भवति । मानुषदेह एव कामादिजवेगः सोढुं सुकरो नान्यदेह इति ज्ञापनाय इहैवेत्युक्तिः । अतोऽत्रैव तत्सहनाय प्रयतितव्यमिति भावः ॥ २३ ॥

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ॥
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥

त० टी०—अथ कामक्रोधवेगसहनानन्तरमात्मसाक्षात्कारं प्रति यदन्तरङ्गसाधनं तदाह—य इति । योऽन्तःसुखोऽन्तःसुखोऽन्तरात्मानुभव एव सुखं यस्य सोऽन्तःसुखः न तु विषयानुभवे, अन्तरेवारामः क्रीडा यस्य नतु वहिः पुत्रकलत्रादिषु, तथाऽन्तर्ज्योतिर्दृष्टिः प्रकाशो वा यस्य न तु बाह्यविषयेषु इन्द्रियैर्वा स योगी ध्यानयोगसंपन्नः ब्रह्मभूतः मायादोषशून्यः सन् ब्रह्मनिर्वाणं विक्षेपशून्यं परिशुद्धात्मस्वरूपमधिगच्छति प्राप्नोति ॥ २४ ॥

म० टी०—कामक्रोधवेगसहनमात्रेणैव मुच्यत इति न किंतु—योऽन्तरिति । अन्तर्बाह्यविषयनिरपेक्षमेव स्वरूपभूतं सुखं यस्य सोऽन्तःसुखो बाह्यविषयजनितसुखशून्य इत्यर्थः । कुतो बाह्यसुखाभावस्तत्राह—अन्तरिति । अन्तः आत्मन्येव न तु स्त्र्यादिविषये बाह्यसुखसाधने आराम आरमणं क्रीडा यस्य सोऽन्तरारामस्त्यक्तसर्वपरिग्रहत्वेन बाह्यसुखसाधनशून्य इत्यर्थः । ननु त्यक्तसर्वपरिग्रहस्यापि यतेर्यदृच्छोपनतैः कोकिलादिमधुरशब्दश्रवणमन्दपवनस्पर्शनचन्द्रोदयमयूरनृत्यादिदर्शनातिमधुरशीतलगङ्गोदकपानकेतकीकुसुमसौरभाद्यवघ्राणादिभिरग्राम्यैः सुखोत्पत्तिसंभवात्कथं बाह्यसुखतत्साधनशून्यत्वमिति तत्राह—तथान्तर्ज्योतिरेव यः यथान्तरेव सुखं न बाह्यैर्विषयैस्तथान्तरेवात्मनि ज्योतिर्विज्ञानं न बाह्यैरिन्द्रियैर्यस्य सोऽन्तर्ज्योतिः श्रोत्रादिजन्यशब्दादिविषयविज्ञानरहितः । एवकारो विशेषणत्रयेऽपि संबध्यते । समाधिकाले शब्दादिप्रतिभासाभावात् व्युत्थानकाले तत्प्रतिभासेऽपि मिथ्यात्वनिश्चयान्न बाह्यविषयैस्तस्य सुखोत्पत्तिसंभव इत्यर्थः । य एवं यथोक्तविशेषणसंपन्नः स योगी समाहितः ब्रह्मनिर्वाणं ब्रह्म परमानन्दरूपं कल्पितद्वैतोपशमरूपत्वेन निर्वाणं तदेव कल्पिताभावस्याधिष्ठानात्मकत्वादविद्यावरणनिवृत्त्याऽधिगच्छति नित्यप्राप्तमेव प्राप्नोति यतः सर्वदैव ब्रह्मभूतो नान्यः "ब्रह्मैव सन्ब्रह्माप्येति" इति श्रुतेः । 'अवस्थितेरिति काशकृत्स्नः' इति न्यायाच्च ॥ २४ ॥

शं० टी०—नित्यानित्यविवेकवैराग्यतीव्रमोक्षेच्छाभिः सर्वं संन्यस्य शमाद्यन्तरङ्गसाधनसंपत्त्या श्रुत्वा मत्वा च ताभ्यां समुत्पन्नात्मविज्ञानो यो यतिः स स्वयं विदेहकैवल्यार्थी सन्नेव ब्रह्मनिष्ठया तिष्ठति चेन्मुक्तिं गच्छति नान्यथेति सूचयितुमाह—योऽन्तरिति । योगी श्रवणमननाभ्यां समुत्पन्नात्मज्ञानपरिपाकाय समाधिनिष्ठायां प्रवृत्तो यो ब्रह्मविद्यतिः स सदान्तर्ज्योतिरेव भवेत्, एवशब्दः सर्वत्र संबध्यते "सर्वस्मादन्तरतरं यदयमात्मा" इतिश्रवणादन्तःशब्देनात्र सर्वान्तरत्वादात्मेत्युच्यते । "मनोज्योतिः" इतिश्रवणाज्ज्योतिःशब्देन मन उच्यते अन्तरात्मन्येव ज्योतिर्मनो यस्य सोऽन्तर्ज्योतिरेव भवेन्न कचिद्बाह्यज्योतिः

सदा सर्वत्रात्मानमेव पश्येन्नतु बाह्यमित्यर्थः । अन्तरारामः अन्तरात्मन्येवारमणमहंबुद्धेः क्रीडनं यस्य सोऽन्तरारामो न कचिदनात्मारामः सदात्मन्येवाहंबुद्धिमान् भवेन्न कचिदप्यनात्मनीत्यर्थः । योऽन्तःसुखः सदात्मन्येव साधनानपेक्षं सुखमात्मीयं यस्य सोऽन्तःसुखः सदात्मनैव संतुष्येदित्यर्थः । स योगी स्वयमेव निरन्तरब्रह्मनिष्ठया ब्रह्मभूतः निःशेषतया देहात्मभावं परित्यज्य ब्रह्मण्येवात्मभावं गतः सन् ब्रह्मनिर्वाणं विदेहकैवल्यसुखं गच्छति, उक्तलक्षणसंपन्न एव विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ २४ ॥

श्री० टी०—न केवलं कामक्रोधवेगसंहरणमात्रेण मोक्षं प्राप्नोति अपि तु—योऽन्तरिति । अन्तः आत्मन्येव सुखं यस्य न विषयेषु अन्तरेवारामः क्रीडा यस्य न बहिः अन्तरेव ज्योतिर्दृष्टिर्यस्य न गीतनृत्यादिषु स एव ब्रह्मणि भूतः स्थितः सन्ब्रह्मणि निर्वाणं लयमधिगच्छति प्राप्नोति ॥ २४ ॥

स० टी०—एवं सर्वापदां मूलं नाश्यत्वेनाभिधाय च ॥ पुनर्ब्रह्मामृतानन्दप्राप्तिसाधनमुच्यते ॥ १ ॥ आत्मन्यन्तःसुखं यस्य क्रीडा यस्यान्तरात्मनि ॥ यस्यात्मन्येव विज्ञानं न बाह्यैरिन्द्रियैर्जडे ॥ २ ॥ वैषयिकं सुखं तस्य साधनं तन्मतिस्तथा ॥ एतत्त्रयं परित्यक्तं यस्य स्वाभाविकं मलम् ॥ ३ ॥ भूमिकात्रितयं तेन दर्शितं हरिणा स्फुटम् ॥ पञ्चम्यादितुरीयान्तं वासिष्ठे कृतनिर्णयम् ॥ ४ ॥ स समाहितधीर्ब्रह्म सच्चिदानन्दमद्वयम् ॥ अध्यस्तद्वैतशून्यत्वान्निर्वाणमगतागतम् ॥ ५ ॥ अविद्यावृत्तिबाधेन प्राप्तं प्राप्नोति तद्वपुः ॥ ६ ॥ यज्ज्ञानिनां विषयसारविचारणोत्थवैराग्यदार्ढ्यजसमाधिसुखानुभूतिः ॥ विस्मारयत्यखिलबाह्यसुखांशहेतूँस्तं श्रीमुकुन्दमनिशं हृदि भावयेऽहम् ॥ ७ ॥ २४ ॥

भा० टी०—न केवलं कामक्रोधोद्भववेगसहनमात्रेण जीवन्नेव मोक्षं प्राप्नोति अपि तु योऽन्तरात्मनि सुखं यस्य स तथा अन्तरेवात्मन्यारमणं क्रीडा यस्य सः यस्य च रूपादौ सुखबुद्धिः स तत्रैवारमते अयं तु यतोऽन्तःसुखोऽतोऽन्तरारामः यतोऽन्तरात्मा एव ज्योतिः प्रकाशो यस्य स आत्मैवैकोऽद्वितीयः सर्वावस्थासु जाग्रदादिषु स्वप्रकाशः सत्योऽन्यत्सर्वमिन्द्रियविषयादिकं तत्र कल्पितमनृतमतः सुखहीनं दुःखरूपं क्रीडानास्पदमिति बोधवान् । यस्त्वन्तरेव ज्योतिर्दृष्टिर्यस्य न गीतनृत्यादिष्विति तन्न, अन्तःसुखोन्तराराम इत्यनयोरन्यतरेणाप्यस्यार्थस्य लाभात् । य एतादृशः स योगी ब्रह्मभूतः सन्नपि ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं ब्रह्मानन्दमिति यावत् गच्छति प्राप्नोति प्राप्तमेव विस्मृतग्रैवेयकमिव प्राप्नोति "ब्रह्मैव सन्ब्रह्माप्येति" इति श्रुतेः । 'अवस्थितेरिति काशकृत्स्नः' इति न्यायाचास्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते । तथा च ब्राह्मणम् 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति । एवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयतीति तदर्थः ॥ २४ ॥

प० टी०—अथ न केवलं कामक्रोधसहनमात्रेण मोक्षोऽपि तु—योऽन्तरिति । यः पुरुषोऽन्तःसुख आत्मसुखवांस्तथान्तरारामः क्रीडा यस्य न बहिः स तथान्तर्ज्योतिर्दृष्टिर्यस्य न बहिर्नृत्यगीतादौ स योगी ब्रह्मभूतः सन् ब्रह्मण्येव निर्वाणं लयं प्राप्नोति "तदेव सन्तस्तदु तद्भवामः" इति श्रुतेः ॥ २४ ॥

रा० टी०—ज्ञानिलक्षणं प्रपञ्चयत्युत्तरैः श्लोकैः—योऽन्तरिति । योऽन्तःसुखः कामाद्युपद्रवक्षयाभिव्यक्तस्वरूपसुखः अन्तरारामः भगवद्दर्शनजन्यसुखवान् । उक्तज्ञानिलक्षणद्वये हेतुमाह—अन्तर्ज्योतिरन्तरभिव्यक्तभगवत्स्वरूपः यत इति । एतेनान्तर्ज्योतिष्ट्वमेव ज्ञानित्वमेतत्कथं ज्ञानिलक्षणमिति निरस्तम् । तत्र हेतुसमर्पकत्वादस्येति । असंप्रज्ञातसमाधिस्थस्य बाह्यादर्शनादेवशब्दः संप्रज्ञातसमाधावन्यदर्शनसत्त्वेऽपि तस्य विक्षेपाहेतुत्वाददर्शनकल्पमेव तदिति भावः । एवं चास्यान्यव्यवच्छेदप्रधानत्वादन्यदर्शनहीनान्तर्ज्योतिष्ट्वमित्येवं लक्षणोक्तिपरत्वेऽपि न दोषः । अन्तःसुखत्वादौ हेतुस्तु स योगी ब्रह्मभूतो ब्रह्मणि स्थितो निर्वाण-

मशरीरं ब्रह्माधिगच्छाति यतोऽतोऽन्तःसुखादिरित्येवमुत्तरार्धोक्तो ज्ञेयः । नन्वेवं ब्रह्मभूतो ब्रह्माधिगच्छतीत्युक्त्यार्थाद्ब्रह्मभूतत्वस्य ब्रह्माधिगतिरूपब्रह्मज्ञानहेतुत्वमुक्तं तच्च तद्बुद्धय इत्यादिनोक्तमेव ब्रह्मभूतत्वस्य तद्बुद्धित्वादिरूपत्वात् । सत्यमयमप्यनुवाद एव योऽन्तः सुखी योऽन्तरारामो योऽन्तर्ज्योतिरेव यश्च तद्बुद्धित्वादिरूपब्रह्मभूतः निर्वाणं ब्रह्माधिगच्छति स योगी ज्ञानीत्येवं ब्रह्मभूतपदं प्रागुक्ततद्बुद्धित्वादिरूपज्ञानसाधनानुवादः । यस्य ज्ञानस्य तद्बुद्धित्वादिरूपं ब्रह्मभूतत्वं साधनं तादृशज्ञानवानन्तःसुखत्वादिलक्षणक इति तात्पर्यार्थः । अत्र य इति पुनरुक्तिः सर्वत्रान्वयार्था ॥ २४ ॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ॥
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

त० टी०—उक्तसाधनप्रक्रियया बहवो विवेकिनः स्वरूपं प्राप्नुवन्तीत्याह—**लभन्त इति** । प्रथमतो निष्कामकर्मानुष्ठानेन क्षीणं कल्मषं येषां ते, छिन्नं द्वैधं संशयो येषां ते यतात्मानः आत्मन्येव नियमितमनसः, ततश्च सर्वभूतानां हिते रताः कृपालवः ऋषयः सूक्ष्मदर्शिनः मन्त्रद्रष्टारो वा यथोक्तं ब्रह्मनिर्वाणं लभन्ते ॥ २५ ॥

म० टी०—मुक्तिहेतोर्ज्ञानस्य साधनान्तराणि विवृण्वन्नाह—**लभन्त इति** । प्रथमं यज्ञादिभिः क्षीणकल्मषाः ततोऽन्तःकरणशुद्धया ऋषयः सूक्ष्मवस्तुविवेचनसमर्थाः संन्यासिनः ततः श्रवणादिपरिपाकेन छिन्नद्वैधाः निवृत्तसर्वसंशयाः ततो निदिध्यासनपरिपाकेन संयतात्मानः परमात्मन्येवैकाग्रचित्ताः एतादृशाश्च द्वैतादर्शित्वेन सर्वभूतहिते रताः हिंसाशून्याः ब्रह्मविदो ब्रह्मनिर्वाणं लभन्ते "यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति श्रुतेः । बहुवचनं "तद्यो यो देवानाम्" इत्यादिश्रुत्युक्तानियमप्रदर्शनार्थम् ॥ २५ ॥

शं० टी०—प्रक्षीणकल्मषत्वच्छिन्नद्वैधत्वयतात्मत्वादिधर्मविशिष्टा भूत्वा सदात्मन्येव ये रमन्ते त एव विदेहमुक्तिं गच्छन्तीत्याह—**लभन्त इति** । यतात्मानः यतः संयमितः बाह्यप्रवणतावैमुख्यं गमित आत्मा मनो येषां ते यतात्मानः सर्वथा निरुद्धान्तरङ्गा भूत्वा सर्वभूतहिते "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति श्रवणादानन्दरूपत्वाच्च सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानामात्मैव प्रियो हितस्तस्मिन् सर्वभूतात्मनि स्वात्मानि ब्रह्मण्येव रता निरता ये ऋषयो यतयो भवन्ति ये सदात्मन्येव रमन्ते ते सदात्मनिष्ठया क्षीणकल्मषाः क्षीणं निःशेषक्षयं गतं कल्मषं मनःकषायरूपं वासनाशब्दितं येषां ते क्षीणकल्मषाः ब्रह्मयोगानिष्ठा निर्धूतान्तःकरणदोषा अत एव समुत्पन्नात्मयाथात्म्यविज्ञानेन छिन्नद्वैधाः अर्थस्य द्वैधात्वमवलम्ब्य जायन्त इति द्वैधाः संशयाः स्थाणुत्वपुरुषत्वबुद्धयोरेकत्वसमावेशे खलु संशयो जायते स्थाणुर्वा पुरुषो वेत्येवमेवात्राप्यर्थज्ञानद्वैविध्यमवलम्ब्य संशया जायन्ते । तत्कथमितिचेदुच्यते आत्मा चिद्रूपो वा अचिद्रूपो वा, चिद्रूपत्वेऽपि नित्यो वाऽनित्यो वा, नित्यत्वेऽपि देहेन्द्रियादिभ्यो भिन्नो वाऽभिन्नो वा, भिन्नत्वेऽपि देहादिभिः संसृष्टो वा न वा, असंसृष्टत्वेऽपि स्वयंकर्तृत्वादिधर्मविशिष्टो वा न वा, कर्तृत्वादिधर्मवैशिष्ट्याभावेऽपि स्वयमसङ्गो वा न वा, असङ्गत्वेऽपि देहादिकृतकर्मभिर्लिप्यते वा न वा, कर्मलेपाभावेऽपि स्वयं ब्रह्माऽभिन्नो वा न वा, ब्रह्माभिन्नत्वेऽपि ब्रह्मात्मैकत्वविज्ञानं ममोत्पन्नं वा न वा, उत्पन्नत्वेऽपि तज्ज्ञानं यथार्थं वायथार्थं वा, यथार्थत्वेऽपि मुक्तेः साधकं वाऽसाधकं वा, मुक्तिसाधकत्वेऽपि मम जीवन्मुक्तिरस्ति वा न वा, तत्सत्त्वेऽपि विदेहमुक्तिः सिध्यति वा न वेत्येवमादयः संशयाः । पूर्वोक्तज्ञानेन छिन्ना विनष्टा द्वैधा येषां ते छिन्नद्वैधाः सन्तो ब्रह्मनिर्वाणं विदेहकैवल्यं लभन्ते प्राप्नुवन्तीत्यर्थः ॥ २५ ॥

श्री० टी०—किंच—लभन्त इति । ऋषयः सम्यग्दर्शिनः क्षीणं कल्मषं येषां छिन्नं द्वैधं संशयो येषां यतः संयत आत्मा चित्तं येषां सर्वेषां भूतानां हिते रताः कृपालवस्ते ब्रह्मनिर्वाणं मोक्षं लभन्ते ॥ २५ ॥

स० टी०—मुक्तिहेत्वात्मबोधस्य साधनान्तरमुच्यते ॥ आदौ क्षीणमला यज्ञैश्चित्तशुद्ध्यात्मदर्शने ॥ १ ॥ समर्थास्तत आत्मैक्यविचाराच्छिन्नसंशयाः ॥ निदिध्यासनदार्ढ्येन ब्रह्मण्येकाग्रचेतसः ॥ २ ॥ अद्वैतात्मधिया धीराः सर्वभूतहिते रताः ॥ हिंसाशून्या ब्रह्मविदो लभन्ते ब्रह्मनिर्वृतिम् ॥ ३ ॥ २५ ॥

भा० टी०—ब्रह्मनिर्वाणप्राप्तिहेतोर्ज्ञानस्य साधनान्तराण्याह—लभन्त इति । ऋषयः सूक्ष्मतत्त्वदर्शिनः "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति श्रुतेः ब्रह्मनिर्वाणं लभन्त इत्यन्वयः । 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति वचनमनुरुध्याह—निष्कामकर्मणा ईश्वराराधनलक्षणेन क्षीणपापाः । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यात्मदर्शनसाधनं श्रवणादिकं कथयन्तीं श्रुतिमनुरुध्याह—श्रवणेन मननेन च च्छिन्नद्वैधाः च्छिन्नसंशयाः यतात्मानः संयतानि समनस्कानीन्द्रियाणि यैस्ते अनेन विजातीयप्रत्ययतिरस्कारपुरःसरसजातीयप्रत्ययप्रवाहीकरणात्मकं निदिध्यासनमुक्तम् । एतादृशानां लक्षणमाह—सर्वेषां भूतानां हिते अनुकूले रताः अहिंसका इत्यर्थः ॥ २५ ॥

प० टी०—अत्राधिकारिण आह—लभन्त इति । ऋषयः सम्यग्दर्शनाः क्षीणकल्मषाः शुद्धचित्ताश्छिन्नं द्वैधं संशयो येषां ते यतात्मानः संयत आत्मा मनो येषां ते तथा सर्वेषां भूतानामुच्चावचरूपाणां तारतम्यवर्ज्यं हिते रता एवंविधा ब्रह्मनिर्वाणं लभन्ते ॥ २५ ॥

रा० टी०—अन्तःसुखत्वादिलक्षणसंपादको ब्रह्माधिगमो न ब्रह्मभूतत्वमात्राद्भवति किंतु पापक्षयाच्चेत्याह—लभन्त इति । द्वैधशब्दोऽत्र द्वेधाभावो द्वैधमिति विषयापेक्षयान्यप्रकारत्वरूपायथार्थत्वपरः सन्नयाथार्थ्योपेतज्ञानलक्षको भूत्वा संशयविपर्ययपरः । ऋषयो ज्ञानिनः क्षीणकल्मषाः निवृत्तपाप्मानो भूत्वा छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताश्च भवन्तीति शेषः । छिन्नौ द्वैधौ संशयविपर्ययौ येषां ते छिन्नद्वैधाः ते च ते आयतात्मानश्च दीर्घमनस्काः श्रवणादिना विदितसर्ववेद्या इति यावत् । छिन्नद्वैधा यतात्मानः छिन्नद्वैधत्वे क्षीणकल्मषत्वमिवायतात्मत्वमपि बुद्ध्या विविच्य हेतुत्वेन योज्यम् । यतात्मानो वशीकृतमनस्का इति भिन्नं पदं वा । ततश्च निर्वाणमशरीरं ब्रह्म लभन्ते । उपशब्दोऽत्र योज्यः। उपलभन्ते पश्यन्तीत्यर्थः। अत्र ज्ञानस्य प्रतिबन्धकपापक्षयाख्यकारणोक्तावपि असाधारणं कारणं कार्यरूपस्य लक्षणं भवतीत्यस्य लक्षणप्रपञ्चनपरत्वमविरुद्धं ध्येयम् ॥ २५ ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ॥
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

त० टी०—तेभ्योऽपि केचिद्विशिष्टाः शीघ्रफलभाज इत्याह—**कामक्रोधवियुक्तानामिति**। उक्तस्वरूपाभ्यां कामक्रोधाभ्यां वियुक्तानां तत्परित्यागिनामत एव यतीनां यत्नशीलानां संयतचित्तानां विदितात्मनां ज्ञातात्मतत्त्वानामभितः साक्षादिहैव ब्रह्मनिर्वाणं मोक्षो वर्तते ॥ २६ ॥

म० टी०—पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तमधुना तु तयोरुत्पत्तिप्रतिबन्ध एव कर्तव्य इत्याह—कामेति । कामक्रोधयोर्वियोगस्तदनुत्पत्तिरेव तद्युक्तानां कामक्रोधवियुक्तानामत एव यतचेतसां संयतचित्तानां यतीनां यत्नशीलानां संन्यासिनां विदितात्मनां साक्षात्कृतपरमात्मनामभित उभयतो जीवतां मृतानां च तेषां ब्रह्मनिर्वाणं मोक्षो वर्तते नित्यत्वात् नतु भविष्यति साध्यत्वाभावात् ॥ २६ ॥

शं० टी०—कामक्रोधराहित्येन सदात्मनिष्ठया तिष्ठतामेव यतीनां जीवन्मुक्तिसुखं विदेहमुक्तिसुखं च सिध्यति नेतरेषामित्याशयेनाह—**कामक्रोधवियुक्तानामिति** । काम इच्छाविशेषः वस्तुष्विष्टताबुद्ध्या मनसो बहिःप्रवृत्तिहेतुः, कामव्याघाते जायमाने वस्तुन्यनिष्टताबुद्ध्या मनसो बहिःप्रवृत्तेरेव हेतुर्बुद्धिवृत्तिविशेषः क्रोध, एतद्द्वयमेव श्रवणमननसमाधिविच्छित्तेः परमकारणं तद्वतो ज्ञानं न सिध्यति समाधिश्च । ताभ्यां समाधौ विच्छिन्ने सति सम्यग्ज्ञानं शतधा श्रुतवतोऽपि न संभवति तदभावे मोक्षाभावस्ततो मुमुक्षोः समाधित्सोर्यतेः कामक्रोधराहित्येनावश्यं भवितव्यमिति सूचयितुं पुनः पुनरुक्तमपि कामक्रोधपरित्यागं तदविस्मरणाय स्मारयति—**कामक्रोधवियुक्तानामिति** । कामक्रोधाभ्यामुक्तलक्षणाभ्यां वियुक्तानामेव यतीनां शान्तानां यतचेतसां सर्वात्मनि प्रत्यगभिन्ने ब्रह्मण्येव यतं नियमेन स्थापितं चेतो येषां तेषां सर्वदा ब्रह्मण्येव तिष्ठतामत एव विदितात्मनामयमेवाहमिति साक्षात्स्वात्मत्वेन विदितः सर्वात्मक आत्मा निर्विशेषः परमात्मा यैस्तेषां सम्यग्विदितात्मतत्त्वानामेव ब्रह्मविदामभित उभयतो जीवद्दशायां विदेहदशायां च ब्रह्मनिर्वाणं ब्रह्मानन्दानुभूतिर्वर्तते सिध्यतीत्यर्थः । एतेन कामक्रोधादिकं विक्षेपकारणं दूरतस्त्यक्त्वा समाधिनिष्ठायामेव तिष्ठतो यतेः सम्यग्ज्ञानं तत्फलं मोक्षश्च सिध्यतीति सूचितं भवति ॥ २६ ॥

श्री० टी०—किंच—**कामक्रोधवियुक्तानामिति** । कामक्रोधाभ्यां वियुक्तानां यतीनां संन्यासिनां संयतचित्तानां ज्ञातात्मतत्त्वानामभित उभयतः मृतानां जीवतां च न देहान्त एव तेषां ब्रह्मणि लयः अपि तु जीवतामपि वर्तत इत्यर्थः ॥ २६ ॥

स० टी०—पूर्वमुत्पन्नयोर्वेगः सोढव्यः कामकोपयोः ॥ उक्तोऽधुना तयोर्जन्मप्रतिबन्धार्थमुच्यते ॥ १ ॥ कामक्रोधवियोगस्तदनुत्पत्तिर्विवक्षिता ॥ तद्वतां यत्नशीलानां समाहितधियां सताम् ॥ २ ॥ साक्षात्कृतात्मतत्त्वानां मृतानां जीवतामपि ॥ तेषां हि वर्तते मोक्षो नित्यत्वात्स्वस्वरूपकः ॥ ३ ॥ २६ ॥

भा० टी०—पूर्वं कामक्रोधोद्भवो वेगः सोढव्य इत्युक्तमिदानीं तावेव त्याज्यावित्याह—**कामक्रोधेति** । कामक्रोधाभ्यां वियुक्तानां यतीनां संन्यासिनां संयतचित्तात्मनां विदितात्मतत्त्वानां ब्रह्मनिर्वाणमभितः उभयतो जीवतां मृतानां च वर्तते ॥ २६ ॥

प० टी०—किंच—**कामेति** । कामक्रोधाभ्यां परमवैरिभ्यां वियुक्तानां यतचेतसां नियमितमनसां यतीनां संन्यासिनां विदितात्मनां ज्ञातात्मतत्त्वानामपि जीवतां मृतानां वा ब्रह्मनिर्वाणं वर्तते ॥ २६ ॥

रा० टी०—न केवलमन्तःसुखत्वादिकमेव ज्ञानिलक्षणं किंतु सर्वदेशकालेषु सुखेन ब्रह्मलब्धिमत्त्वमपीत्याह—**कामक्रोधेति** । यतीनां प्रयत्नवतां यतचेतसां वशीकृतमनस्कानामभितः सर्वदेशकालेषु वर्तते रक्षकत्वेन ज्ञानविषयत्वेन वेत्यर्थः । विदितात्मनां ब्रह्मज्ञानिनाम् । शिष्टं व्यक्तम् ॥ २६ ॥

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ॥
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

त० टी०—पूर्वं मोक्षान्तरङ्गोपायतया स योगी ब्रह्मनिर्वाणमित्यनेन सूचितं ध्यानयोगं विस्तरेण निरूपयितुं सफलमिह सूत्रवत्संक्षिप्याऽऽह—**स्पर्शानिति द्वाभ्याम्** । स्पर्शान् स्पर्शोपलक्षितान शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान्बाह्यान्बहिर्भवान् श्रोत्रचक्षुरादिद्वारेणान्तःप्रविष्टान् पुनस्तच्चिन्तनपरित्यागेन बहिरेव कृत्वा चक्षुश्च दृष्टिं भ्रुवोरन्तरे मध्ये कृत्वा अत्यन्तनिमीलने हि निद्रात्मको लयो

भवेत्, प्रसारणे तु बाह्यविषयसंसर्गेण विक्षेपो भवेत्, एतद्दोषद्वयपरिहाराय किंचिन्निमीलनेन दृष्टिं नासाग्रे विन्यस्य उच्छ्वासनिःश्वासगतिभ्यां नासाभ्यन्तरचारिणौ प्राणापानौ उभयगतिनिरोधेन समौ कृत्वा कुम्भकेन वशीकृत्वेत्यर्थः। अनेनोपायेन यताः संयता इन्द्रियमनोबुद्धयो यस्य, मोक्ष एव परमयनं प्राप्यं यस्य, अत एव विगतेच्छाभयक्रोधः, य एवंभूतो मुनिः स सदा फलकाल इव साधनकालेऽपि मुक्त एव, संसारदोषास्पृष्ट एवेत्यर्थः ॥ २७ ॥ २८ ॥

म० टी०—पूर्वमीश्वरार्पितसर्वभावस्य कर्मयोगेनान्तःकरणशुद्धिस्ततः सर्वकर्मसंन्यासस्ततः श्रवणादिपरस्य तत्त्वज्ञानं मोक्षसाधनमुदेतीत्युक्तम्। अधुना स योगी ब्रह्मनिर्वाणमित्यत्र सूचितं ध्यानयोगं सम्यग्दर्शनस्यान्तरङ्गसाधनं विस्तरेण वक्तुं सूत्रस्थानीयाँस्त्रीन् श्लोकानाह भगवान्। एतेषामेव वृत्तिस्थानीयः कृत्स्नः षष्ठोऽध्यायो भविष्यति। तत्रापि द्वाभ्यां संक्षेपेण योग उच्यते तृतीयेन तु तत्फलं परमात्मज्ञानमिति विवेकः। **स्पर्शानिति**। स्पर्शान् शब्दादीन् बाह्यान् बहिर्भवानपि श्रोत्रादिद्वारा तत्तदाकारान्तःकरणवृत्तिभिरन्तःप्रविष्टान् पुनर्बहिरेव कृत्वा परवैराग्यवशेन तत्तदाकारां वृत्तिमनुत्पाद्येत्यर्थः। यद्येते आन्तरा भवेयुस्तदोपायसहस्रेणापि बहिर्न स्युः स्वभावभङ्गप्रसङ्गात्। बाह्यानां तु रागवशादन्तःप्रविष्टानां वैराग्येण बहिर्गमनं संभवतीति वदितुं बाह्यानिति विशेषणम्। तदनेन वैराग्यमुक्त्वाऽभ्यासमाह—चक्षुश्चैवान्तरे भ्रुवोः कृत्वेत्यनुषज्यते। अत्यन्तनिमीलने हि निद्राख्या लयात्मिका वृत्तिरेका भवेत् प्रसारणे तु प्रमाणविपर्ययविकल्पस्मृतयश्चतस्रो विक्षेपात्मिका वृत्तयो भवेयुः पञ्चापि तु वृत्तयो निरोद्धव्या इति अर्धनिमीलनेन भ्रूमध्ये चक्षुषो निधानं तथा प्राणापानौ समौ तुल्यावूर्ध्वाधोगतिविच्छेदेन नासाभ्यन्तरचारिणौ कुम्भकेन कृत्वा अनेनोपायेन यताः संयता इन्द्रियमनोबुद्धयो यस्य स तथा मोक्षपरायणः सर्वविषयविरक्तो मुनिर्मननशीलो भवेत्। विगतेच्छाभयक्रोध इति वीतरागभयक्रोध इत्यत्र व्याख्यातम्। एतादृशो यः संन्यासी सदा भवति मुक्त एव सः न तु मोक्षस्तस्य कर्तव्योऽस्ति अथवा य एतादृशः स सदा जीवन्नपि मुक्त एव ॥ २७ ॥ २८ ॥

शं० टी०—संयतात्मनामिति सम्यग्ज्ञानसिद्धेस्तत्फलसिद्धेश्च समाधिः परमकारणमिति सूचयित्वा तमेव समाधियोगं ससाधनमुपदिदिक्षुस्तस्य सूत्रभूतं श्लोकत्रयमाह। तत्रादौ श्लोकद्वयेन निदिध्यासोरन्तरङ्गसाधनानि पद्कर्तव्यान्युपदिशति—**स्पर्शानिति**। आत्मनो बहिरेव भ्रान्त्या कल्पिता बाह्यास्तान् बाह्यान् स्पर्शान् शब्दादिविषयान् बहिःकृत्वा बहिर्देशे एव संस्थाप्य मनसा न किंचित्स्मृत्वेत्यर्थः। इतस्ततो दर्शनं यथा न स्यात्तथा भ्रुवोरन्तरे चक्षुर्दृष्टिं कृत्वा तथा नासाभ्यन्तरचारिणौ प्राणापानौ च समौ साम्यावस्थापन्नौ हृदये कृत्वा केवलं कुम्भकं कुर्वन्नित्यर्थः। पापक्षयार्थं मनोनैश्चल्यार्थं केवलकुम्भकं मुमुक्षोः कर्तव्यम्। यतेन्द्रियमनोबुद्धिः इन्द्रियाणि च मनश्च बुद्धिश्चेन्द्रियमनोबुद्धयः यताः संयताः स्वस्वविषयवैमुख्यं गमिता यस्य स यतेन्द्रियमनोबुद्धिः इन्द्रियैर्विषयग्रहणं मनसा विषयचिन्तनं बुद्ध्याऽऽवेशात्प्राप्तस्याप्यर्थस्य ग्रहणमकुर्वन्नित्यर्थः। विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः विशिष्य बुद्धिं परित्यज्य गता विगता इच्छाभयक्रोधा यस्य स विगतेच्छाभयक्रोधो भूत्वा यस्मिन् कस्मिन् विषये इच्छायां सत्यां समाधिर्न सिध्यति दिवा रात्रावरण्ये गुहादौ प्राणिभ्यो भयमस्ति चेत्समाधिर्न सिध्यति मशकपिपीलिकादिष्वपकारिषु च क्रोधो हृद्यस्ति चेत्समाधिर्न सिध्यत्यत एव तत्त्रितयं निदिध्यासुः परित्यजेदित्यर्थः। किं च मोक्षपरायणः प्रयत्नेन कर्तव्यं कार्यं सर्वं परित्यज्य तीव्रमोक्षेच्छया मोक्षसाधनैकनिष्ठः स मोक्षपरायणः सन् यो मुमुक्षुः सर्वं संन्यस्य सदा मुनिर्भवति मुनिर्मननशीलः मननं वस्तुध्यानं नियमेन तदेव करोतीति मुनिः यः सदा मुनिरेव भवति स एव मुक्तो भवति नान्यः शतधा कृतश्रवणोऽपीति द्वयोरर्थः ॥२७॥२८॥

श्री० टी०—स योगी ब्रह्मनिर्वाणमित्यादिषु योगी मोक्षमाप्नोतीत्युक्तं तमेव योगं संक्षेपेण दर्शयन्नाह—**स्पर्शानिति द्वाभ्याम्**। बाह्या एव स्पर्शा रूपरसादयो विषयाश्चिन्तिता: सन्तोऽन्त:प्रविशन्ति तॉस्तच्चिन्तात्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोरन्तरे भ्रूमध्य एव कृत्वाऽत्यन्तं नेत्रयोर्निमीलने निद्रया मनो लीयते उन्मीलनेन च बहि: प्रसरति तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थ:। उच्छ्वासनिश्वासरूपेण नासिकयोरभ्यन्तरे च चरन्तौ प्राणापानावूर्ध्वाधोगतिनिरोधेन समौ कृत्वा कुम्भयित्वेत्यर्थ:। यद्वा प्राणो यथा बहिर्न निर्याति यथा चापानोऽन्तर्न प्रविशति किंतु नासामध्य एव द्वावपि यथा चरत: तथा मन्दाभ्यामुच्छ्वासनि:श्वासाभ्यां समौ कृत्वेति ॥ २७ ॥ **यत इति**। अनेनोपायेन यता: संयता इन्द्रियमनोबुद्धयो यस्य मोक्ष एव परमयनं प्राप्यं यस्य अत एव विगता इच्छाभयक्रोधा यस्य य एवंभूतो मुनि: स सदा जीवन्नपि मुक्त एवेत्यर्थ: ॥ २८ ॥

स० टी०—ईश्वरार्पितचित्तस्य धीशुद्धि: कर्मयोगत: ॥ तत: स्यात्कर्मसंन्यास: श्रवणादिपरस्य च ॥१॥ मोक्षहेत्वात्मविज्ञानं भवतीति पुरोदितम् ॥ इदानीं ब्रह्मनिर्वाणं स योगीत्यत्र सूचितम् ॥ २ ॥ विज्ञानसाधनं ध्यानयोगं मुख्यं सुविस्तरात् ॥ वक्तुं त्रीन्सूत्रस्थानीयाञ्श्लोकानाह जगद्गुरु: ॥ ३ ॥ वृत्तिस्थानीय एतेषां षष्ठाध्यायो भविष्यति ॥ द्वाभ्यां संक्षेपतो योगस्तृतीये तत्फलं स्मृतम् ॥ ४ ॥ बाह्या: शब्दादयो बुद्धाविन्द्रियै: संप्रवेशिता: ॥ वैराग्येणैव तान्बाह्यान्बहि: कृत्वा प्रयत्नत: ॥ ५ ॥ यद्येते आन्तरा: स्युर्वै तदोपायसहस्रकै: ॥ बहिर्न स्यु: स्वभावस्य भङ्ग: कर्तुं न शक्यते ॥ ६ ॥ बाह्याँस्त्वन्त:प्रविष्टाँस्तान्रागावेशाद्बहिस्तदा ॥ कर्तुं शक्यान्विरागेण बाह्यानिति विशेषणात् ॥ ७ ॥ वैराग्यं तदनेनोक्त्वा प्राहाभ्यासमधोक्षज: ॥ अत्यन्तमीलने निद्रा प्रसारे विभ्रमादय: ॥ ८ ॥ अतोऽर्धमीलनेनैव भ्रूमध्ये चक्षुषो: स्थिति: ॥ ऊर्ध्वाधोगतिविच्छेदान्नासाभ्यन्तरचारिणौ ॥९॥ कुम्भकेन समौ कृत्वा प्राणापानौ विचक्षण: ॥१०॥२७॥ संयता इत्युपायेन यस्येन्द्रियमनोधिय: ॥ विषयान्विषवत्त्यक्त्वा स मुनिर्मोक्षतत्पर: ॥ १ ॥ इच्छादिरहितो योगी जीवन्नेव विमुच्यते ॥ २ ॥ २८ ॥

भा० टी०—एवं तत्त्वज्ञाननिष्ठानां यतीनां सद्योमुक्तिरुक्ता कर्मयोगिनां च सत्त्वशुद्ध्यादिक्रमेण । अथेदानीं ध्यानयोगस्य सम्यग्दर्शनान्तरङ्गसाधनस्य षष्ठाध्याये विस्तरेण वक्ष्यमाणस्य सूत्रस्थानीयान् त्रीञ्श्लोकानाह—**स्पर्शानिति**। स्पर्शान् शब्दादीन्बाह्यानेव श्रोत्रादिद्वारेण अन्तर्बुद्धौ प्रविष्टान् विषयान् अचिन्तनेन बहि:कृत्वा चक्षुश्चैव भ्रुवोरन्तरे कृत्वा तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा ॥ २७ ॥ यतानि संयतानि इन्द्रियादीनि येन स मुनिर्मननशील: मोक्ष एव परमयनं परा गतिर्यस्य स मोक्षपरायणो मुमुक्षु: विगता इच्छादयो यस्मात्स य एवं वर्तते स मुमुक्षुरेव न तस्य मोक्षादन्यत्कर्तव्यमस्ति । स्पर्शान्कृत्वा बहिर्बाह्यान् मोक्षपरायण इत्यनेन वैराग्यवान्मुमुक्षुरधिकारी कथित:। चक्षुश्चैवान्तरे भ्रुवोरित्यनेनासनजयेन लयविक्षेपराहित्यमुक्तम्। प्राणेत्यादिना प्राणायामो निरूपित:। स्पर्शान्कृत्वा बहिर्बाह्यानित्यनेनैव "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा:"इतिसूत्रोक्ता यमा: "शौचसंतोषतप:स्वाध्यायेश्वरप्रणिधानानि नियमा:" इतिसूत्रोक्ता नियमाश्च प्रदर्शिता:। यतेन्द्रिय इति प्रत्याहार: यतमना इति धारणाध्याने यतबुद्धिरिति समाधि: कथित:। विगतेच्छाभयक्रोध इतिमोक्षपरायणस्य योगिन: स्वरूपनिरूपणमिति विवेक: ॥ २८ ॥

प० टी०—अथ तमेव योगं संक्षेपेणाह—**स्पर्शानिति द्वाभ्याम्**। बाह्यान् विषयान् रूपरसादीन् बहि: स्मरणाविषयान् कृत्वा दूरतो विसृज्य तथा भ्रुवोरन्तरे भ्रूमध्ये चक्षु: कृत्वात्यन्तं नेत्रनिमीलनेन निद्रा भवत्युन्मीलनेन च बहि: प्रसरति तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थ:। तदुक्तं योगमार्तण्डे 'भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न रोगो मरणं तत्र न निद्राक्षुत्तृडादय:' इति।

तथा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा कुम्भयित्वेत्यर्थः ॥ २७ ॥ यतेन्द्रिय इति । अनेनोपायेन क्रमेण यतेन्द्रियमनोबुद्धिर्मुनिर्मननशीलो मोक्ष एव परमयनं गतिर्यस्य तथात एव विगतेच्छाभयक्रोधः सन् सदैव मुक्तो जीवन्मृतो वा मुक्तः स्यादित्यर्थः । तदुक्तं टिप्पणिकासु 'परावृत्तं चित्तं यदि भवति बाह्यव्यवहृतेरसत्यायाः सत्यं कलयति तदाभ्यासवशतः । क्षुधार्तः संविष्टः क्षणमनुभवन् स्वाप्रमशनं मृषा मत्वा बोधे पुनरपि च भोक्तुं प्रयतते '। अथ निरूपितार्थविषये सर्वशाखोक्ताः श्रुतयश्च—"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् " अत्र रावणभाष्यम् ' विष्णोर्व्यापनशीलस्यापि परमात्मनस्तत्परमं पारमार्थिकं पदमभिव्यक्तिस्थानं दिवि मूर्ध्नि भ्रूमध्ये वर्तते । " त्रिपादस्यामृतं दिवि " इति श्रुतेः सत्यज्ञानानन्दात्मकं विष्णोः पदं तत्कि सूरयो महानुभावाश्चक्षुराततं विस्तृतमिव कृत्वा सदाव्यवधानेन पश्यन्ति निरन्तरं साक्षात्कुर्वन्ति । यद्वा चक्षुरर्थप्रकाशमिव एवकारार्थे आततमपरिच्छिन्नमेव यथा स्यात् तथा पश्यन्ति । तत्तस्माद्विप्रासो विप्राः श्रेष्ठमतयो विपन्यवो मेधाविनो जागरांचक्रुरिति जागृवांसो दृश्यप्रपञ्चादीर्घस्वप्नात् सकाशाज्जागरं प्राप्ता इत्यर्थः । प्रोक्तवदनुभूयमानपदं समिन्धते समृद्धिं नयन्ति सर्वात्मकत्वेन पश्यन्ति । अत्रैतदुक्तं भवति अभ्यासदशायां सुषुम्नाविवरेण भ्रूमध्यप्रापितया दृष्टया पश्यन्ति व्यवहारदशायां तु सकलविषयप्रतीतिरूपेण तदेव पश्यन्तीत्यर्थः । अथैतदर्थे सामारण्यके अन्या श्रुतिरपि—"चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" इति । भाष्यम्–' द्योतयन्त्यर्थान् प्रकशयन्ति ते देवाश्चक्षुराद्यास्तेषां मध्ये चित्रं विचित्रं रूपरसगन्धशब्दग्राहकमनीकं तेजःसमूहरूपमुदगादुदयं प्राप्तम् । किंभूतम् , मित्रस्य चक्षुषोऽधिदैवतस्य सूर्यस्य तथा वरुणस्य रसनाधिदैवतस्याग्नेर्वागधिदैवतस्य चक्षुः प्रकाशकम्, तच्छक्तिप्रदमित्यर्थः । अथैवंविधोऽपि न जीवत्वरूपेण परिच्छिन्नः किं तु द्यावापृथिवी द्यावापृथिव्यन्तरिक्षमाकाशं च आप्रा आपूरितवान् व्यापक इत्यर्थः । तथा सूर्यस्तत्प्रकाशश्च ज्ञापकः । यतो जगतो जङ्गमस्य तस्थुषः स्थावरस्य चान्तर्यामी । अथ प्राणापानावित्यत्र शातपथी श्रुतिः—"तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नवदिति यद्यु चरेत्समापयिषेत्तेनो एतस्यै देवतायै सायुज्य सलोकतां जयति य एवं वेद " । भाष्यम्—अथातो व्रतमीमांसेत्यादिना चक्षुरादिव्रतमात्मज्ञानोपयोगि न भवतीत्युपक्रम्य तस्मादित्युपसंहरति तस्मात्कारणादेकमेव व्रतं चरेत् । तत्किम् प्राण्याच्चैवापान्याच्चेति प्राणाज्जातः प्राण्योऽपानाज्जातोऽपान्यो योऽयमभ्यासस्तस्मात्प्राणायामव्रतं चरेदित्यर्थः । अथ तत्किं कारणमित्याह—नेदिति निपातो निषेधार्थे । पाप्मा घातको मृत्युर्मा मां प्रति नेदाप्नुवत् नागच्छेदिति । अथेति निश्चित्य यद्येतद्व्रतं चरेत्तर्हि समापयिषेत् समाप्तिं नेतुमिच्छेद् यावत्प्राणायामः सिध्येत्तावन्न त्यजेदित्यर्थः । तेन व्रतेन उ इति निर्धारणेन एतस्यै इति चतुर्थ्या पञ्चम्य(षष्ठ्य ?)र्थोऽभिहितः एतस्या मुख्यप्राणदेवतायाः सायुज्यं सलोकतां जयति प्राप्नोति य एवं वेद । तथा "अन्तश्चरति रोचनास्य प्राणादपानति" इत्यादिसामारण्यकमपि दर्शनीयम् ॥ २८ ॥

रा० टी०—स ब्रह्मयोगयुक्तात्मेत्यादौ ब्रह्मयोगादिपदेन प्रकृतध्यानप्रकारमाह—**स्पर्शानित्यादिद्वयेन** । स्पृश्यन्त इति स्पर्शाः शब्दाद्याः श्रोत्रादीन्द्रियविषयास्तेषां बाह्यत्वं दुःखसंपादकत्वं बाह्यान् स्पर्शान् शब्दादीन्बहिः श्रोत्राद्यविषयान् कृत्वा प्रत्याहारेणेन्द्रियाणि नियम्येति यावत् । भ्रुवोरन्तरे मध्ये चक्षुश्च कृत्वा भ्रुवोर्मध्यमवलोकयन्नित्यर्थः । संप्रेक्ष्य नासिकाग्रं स्वमित्यादेर्वक्ष्यमाणस्योपलक्षणं प्राणापानौ समौ समानौ निर्विकारौ नासाभ्यन्तरचारिणौ कृत्वा कुम्भके स्थित्वेति यावत् ॥ २७ ॥ यतेन्द्रियमनोबुद्धिः मुनिः मननशीलः एवंभूतो यः स मुक्त एवेति स्तुतिः । यद्वा अभिमानादिपरित्यागेन मुक्तसादृश्यान्मुक्त एवेति गौणप्रयोगः ॥ २८ ॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ॥
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-
संवादे पञ्चमोऽध्यायः ॥ ५ ॥

त० टी०—एवमुक्तानां यज्ञादिकर्मतपोज्ञानयोगानां समरूपात्मदर्शनं संसारधर्मासङ्गत्वं च फल-मुक्तं, तच्च न स्वातन्त्र्येणापि तु सर्वफलदातुरीश्वरेश्वरस्य भगवतस्तथात्वज्ञानद्वारेणेत्याह—**भोक्तार-मिति** । यज्ञानां तपसां च श्रद्धाप्रीतिपूर्वकं समर्पितानां भोक्तारं पालनाभ्यवहारकर्तारं सर्वलोकम-हेश्वरं सर्वेषां लोकानां लोकेश्वराणामपीश्वरं सर्वभूतानां प्राणिनां सुहृदं हितेच्छुं मां ज्ञात्वा शान्तिं संसारबन्धात्मकविक्षेपनिवृत्तिरूपां दशामृच्छति प्राप्नोति । स्वस्वरूपज्ञानप्रकारं तु पञ्चदशेऽध्याये सम्यग्वक्ष्यति ॥ २९ ॥

साधनं कर्म ज्ञानादि कृपया हरिणोदितम् ॥ समदर्शी यतो भूत्वा परज्ञाने ततोऽर्हति ॥
इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवका-
श्मीरिभट्टाचार्यविरचितायां पञ्चमोऽध्यायः ॥ ५ ॥

म० टी०—एवं योगयुक्तः किं ज्ञात्वा मुच्यत इति तदाह—**भोक्तारमिति** । सर्वेषां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोक्तारं भोगकर्तारं पालकमिति वा । भुज पालनाभ्यवहारयोरिति धातुः । सर्वेषां लोकानां महान्तमीश्वरं हिरण्यगर्भादीनामपि नियन्तारं सर्वेषां प्राणिनां सुहृदं प्रत्युपकारनि-रपेक्षतयोपकारिणं सर्वान्तर्यामिणं सर्वभासकं परिपूर्णसच्चिदानन्दैकरसं परमार्थसत्यं सर्वात्मानं नारायणं मा ज्ञात्वा आत्मत्वेन साक्षात्कृत्य शान्तिं सर्वसंसारोपरतिं मुक्तिमृच्छति प्राप्नोतीत्यर्थः । त्वां पश्यन्नपि कथं नाहं मुक्त इत्याशङ्कानिराकरणाय विशेषणानि । उक्तरूपेणैव मम ज्ञानं मुक्तिकारणमिति भावः ॥ २९ ॥

अनेकसाधनाभ्यासनिष्पन्नं हरिणेरितम् ॥ स्वस्वरूपपरिज्ञानं सर्वेषां मुक्तिसाधनम् ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपादशिष्यमधुसूदनसरस्वतीविरचितायां
श्रीभगवद्गीतागूढार्थदीपिकायां स्वरूपपरिज्ञानं नाम पञ्चमोऽध्यायः ॥ ५ ॥

शं० टी०—श्लोकद्वयेन ध्यातुः साधनं ध्यातारं च निरूप्येदानीं तृतीयेन तस्य ध्येयं वस्तु निरूपयति—**भोक्तारमिति** । उक्तसाधनसंपन्नो निदिध्यासुर्यतिर्यज्ञतपसां यज्ञानां श्रौतानां स्मार्तानां तपसां सत्यश्रुत-शान्त्यादीनामन्येषां च कर्मणां यत्फलं तस्य भोक्तारमात्मानमुपाधितद्धर्मसंबन्धरहितं स्वं सर्वभूतानां ब्रह्मा-दिस्तम्बान्तानामात्मत्वात्सुहृदं प्रेष्ठतमम् । यद्वा सर्वभूतानां सुशोभनं हृत् हृदयमुपलब्धिस्थानत्वेन यस्य तं सुहृदं सर्वभूतानां हृदये आत्मत्वेन वर्तमानं सर्वलोकमहेश्वरं लोक्यन्त इति लोकाः सर्वे च ते लोकाश्च सर्वलोका अव्यक्तादिस्थूलान्तास्तेभ्यो महान्महत्तमः स्वसन्निधिमात्रेण सर्वमीष्टे चेष्टयतीतीश्वरः महांश्चासा-वीश्वरश्च महेश्वरस्तं सर्वलोकमहेश्वरं सर्वात्मकं सच्चिदानन्दैकरसं मां परमात्मानं ज्ञात्वा प्रत्यगात्मानं स्वं मामेव परं ब्रह्म ज्ञात्वा प्रत्यगभिन्नं परं ब्रह्म मां मत्वा ध्यात्वा च शान्तिमृच्छति सर्वसंसारोपशमं परं ब्रह्मभावं प्राप्नोतीत्यर्थः । यद्वा यज्ञतपसां भोक्तारं कार्योपाधिकं त्वंपदार्थमात्मानं सर्वभूतसुहृदं सर्वलोकम-हेश्वरं कारणोपाधिकं तत्पदार्थं च "अथात आदेशो नेति नेति" इत्यादिश्रुत्यवष्टम्भेनोपाधिद्वयं निरस्य केवलचैतन्यमात्रौ तौ तत्त्वंपदार्थौ द्वावपि तयोरधिष्ठानभूतं सत्यं ज्ञानमनन्तं चिदानन्दैकरसं निर्विशेषं मां

परं ब्रह्म ज्ञात्वा एतदेवाहमिति तन्मां परं ब्रह्मैव स्वात्मना सर्वदा मत्वा ध्यात्वा च शान्तिमृच्छति विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ २९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

श्री० टी०—नन्वेवमिन्द्रियादिसंयममात्रेण कथं मुक्तिः स्यान्न तावन्मात्रेण किंतु ज्ञानद्वारेणेत्याह—**भोक्तारमिति** । यज्ञानां तपसां च मद्भक्तैः समर्पितानां यदृच्छया भोक्तारं पालकमिति वा सर्वेषां लोकानां महान्तमीश्वरं सर्वेषां भूतानां सुहृदं निरपेक्षोपकारिणमन्तर्यामिणं मां ज्ञात्वा मत्प्रसादेन शान्तिं मोक्षमृच्छति प्राप्नोति ॥ २९ ॥

विकल्पशङ्कापोहेन येनैवं सांख्ययोगयोः ॥ समुच्चयः क्रमेणोक्तः सर्वज्ञं नौमि तं हरिम् ॥

इति श्रीमद्भगवद्गीताटीकायां सुबोधिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

स० टी०—एवं योगान्वितः किंवा ज्ञात्वा मुच्यत आह तत् ॥ कर्तृरूपेण सर्वेषां यज्ञानां तपसां तथा ॥ १ ॥ भोक्तारं देवरूपेण पालकं वा जगत्पतिम् ॥ ब्रह्मादीनां समस्तानां नियन्तारमसाङ्गिनम् ॥ २ ॥ अनपेक्ष्योपकर्तारं प्रत्युपकारमीश्वरम् ॥ सर्वेषा प्राणिनां सर्वबुद्धिवृत्त्येकसाक्षिणम् ॥ ३ ॥ सर्वावभासकं पूर्णं सच्चिदानन्दविग्रहम् ॥ नारायणं हि मां सम्यक् साक्षात्कृत्यात्मरूपतः ॥ ४ ॥ संसारोपरतिं शान्तिं मोक्षाख्यां लभतेऽञ्जसा ॥ पश्यन्नहं कथं त्वां नो मुक्त इत्यपनुत्तये ॥ ५ ॥ विशेषणानि तत्रैवं ज्ञानं मे मुक्तिकारणम् ॥ ६ ॥ निरवधिसुखवार्धिं शान्तिकान्ताश्रितं श्रीप्रमुखगुणनिवासं सर्वयज्ञेज्यमूर्तिम् ॥ सकलसुहृदमीशं सर्ववेदान्तभूमिं यदुपतिमभिवन्दे भ्रान्तिविच्छेदहेतुम् ॥ ७ ॥ २९ ॥

निष्कामः कर्मयोगः सपदि रतिकरा येऽस्य पादारविन्दे ज्ञानं वैराग्ययुक्तं भवति च सुलभं यस्य भक्त्या नराणाम् । कामक्रोधौ निरस्य स्थिरमतिरामिते लभ्यते यत्प्रसादात्तं स्वाराज्यैकहेतुं नवजलदरुचं कृष्णमेवानतोऽस्मि ॥

इति भावप्रकाशे श्रीसदानन्दविदाकृते ॥ जीवन्मुक्तिफलाख्यानः पञ्चमः पूर्णतां गतः ॥ २३९ ॥

आदित आरभ्य टीकाश्लोकसंख्या ॥ १८०५ ॥

भा० टी०—एवं द्वाभ्यां ध्यानयोगं सूत्रयित्वाऽन्ते मुक्त एव स इत्युक्तम् । तर्किं साक्षाज्ज्ञानं विनैव मोक्षसाधनमुत ज्ञानद्वारेणेति संशयनिवृत्तये "तमेव विदित्वातिमृत्युमेति । नान्यः पन्था विद्यतेऽयनाय । ज्ञानादेव तु कैवल्यम् । ऋते ज्ञानान्न मोक्षः" इत्यादिश्रुत्यनुरोधेन द्वितीयपक्षं सिद्धान्तयति तृतीयेन—**भोक्तारमिति** । भोक्तारं यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च सर्वेषां ब्रह्मादिस्थावरपर्यन्तानां महान्तमीश्वरं सर्वभूतानां सुहृदं सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतानां हृदयस्थं मां नारायणमात्मत्वेन ज्ञात्वा शान्तिं सर्वसंसारोपरतिं मोक्षाख्यामृच्छति प्राप्नोति । यत्तु चतुर्विंशतिश्लोकव्याख्यानानन्तरमेवं मुक्त उक्तः मुमुक्षवस्त्रिविधाः श्रवणमनननिदिध्यासनरताः तेषु श्रवणनिरतो द्वितीयश्लोकेनोच्यते लभन्त इति । अथ मनननिरतस्तृतीयश्लोकेनोच्यते कामेति । अवशिष्टश्लोकद्वयेन निदिध्यासननिरत उच्यते—स्पर्शानितीति वर्णयन्ति तच्चिन्त्यं, लभन्ते ब्रह्मनिर्वाणमिति मोक्षलाभस्य श्रवणमात्रेणानुपपत्तेः द्वारकल्पनाया गौणत्वकल्पनस्य च सति संभवेऽन्याय्यत्वात् विदितात्मनामित्यस्य षष्ठाध्यायसूत्रस्थानीयस्य प्राणेत्यादिना स्पष्टतया प्रतीयमानस्य ध्यानयोगस्य च बाधप्रसङ्गादिति दिक् । तदनेन पञ्चमाध्यायेनाशुद्धचित्तेन कृतात् ज्ञाननिष्ठारहितात्संन्यासात्कर्मयोगस्य चित्तशुद्ध्यादिसंपादकस्य श्रैष्ठ्यमुक्त्वा शुद्धाचित्तस्य संन्यासिनः शमदमादिसंपन्नस्य कामाद्युद्भवं वेगमिहैव सोढुं शक्तस्य योगाधिकृतस्य त्वंपदार्थाभिन्नस्य परमात्मानं प्रत्यक्त्वेन जानतो मुक्तिरित्युक्तम् ॥ २९ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यबालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसुनुधनपतिविदुषा विरचितायां गीताभाष्योत्कर्षदीपिकायां पञ्चमोऽध्यायः ॥ ५ ॥

प० टी०–अथ महाकार्ये विघ्नानां बाहुल्यान्मनोबुद्धीन्द्रियनिग्रहोऽप्याश्रयं विना कर्तुमशक्य इत्याह–भोक्तारमिति । सर्वभूतानां सुहृदं परमप्रेमास्पदमन्तर्यामिणं मां ज्ञात्वा शान्तिं मोक्षमृच्छति प्राप्नोति । अथ तदेवाह किंभूतं सर्वयज्ञानां तपसां वा भोक्तारं सर्वदेवान्तर्यामित्वात् सर्वलोकमहेश्वरं सर्वलोकानां भूर्भुवःस्वरादीनां महान्तमीश्वरं निरतिशयैश्वर्यवन्तं मां ज्ञात्वेति ॥ २९ ॥

अथाध्यायतात्पर्यम् ।

ज्ञानं संपाद्य सम्यक् क्रमविरमवतः कर्मणो या समाप्तिः संन्यासः कर्मयोगः स यदमलधियः कर्मकौशल्यमाभ्याम् । ब्रह्मण्याधीयते यत्सुकृतशतजुषः कर्म सर्वेन्द्रियोत्थं प्राणायामेन चित्तं व्रजति परपदं पञ्चमे प्रोक्तमेतत् ॥ ५ ॥

इति दैवज्ञपण्डितसूर्यविरचितायां श्रीमद्भगवद्गीताटीकायां परमार्थप्रपायां पञ्चमोऽध्यायः ॥ ५ ॥

रा० टी०–ध्यानमुक्त्वा ध्येयमाह–भोक्तारमिति । यज्ञो ज्योतिष्टोमादिः, तपः कृच्छ्रचान्द्रायणादि । महांश्चासावीश्वरश्च महेश्वरस्तं सुहृदमुपकारिणं शान्तिं शान्तिसाधनम् । मुक्तिहेतुमिति ईश्वरविशेषणम् । ज्ञात्वा ध्यात्वेत्यर्थः । ऋच्छति साक्षात्करोतीत्यर्थः ॥ २९ ॥

इति श्रीगीतार्थसंग्रहे राघवेन्द्रयतिकृते पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

श्रीभगवानुवाच–अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

त० टी०–पञ्चमेऽध्याये कर्मयोगो ज्ञानयोगश्च सप्रशंसं निरूपितः । तदन्तरङ्गो ध्यानयोगस्तदन्ते संक्षेपेण द्वाभ्यां श्लोकाभ्यां निरूपितः । तद्विस्तारार्थं षष्ठाध्यायारम्भः । तत्र तावत् सर्वकर्माणि मनसा संन्यस्यास्ते इत्यादिना सर्वकर्मत्यागेन संन्यासाख्यज्ञानयोगविधानाद्धीनत्वेन कर्मत्याज्यमिति शङ्कावारणाय कर्मयोगस्य संन्यासरूपत्वेनोपादेयतामभिधास्यन् श्रीभगवानुवाच–अनाश्रित इति । कर्मणां फलं स्वर्गादिकमनाश्रितोऽनपेक्षमाणः सन् कार्यमवश्यकर्तव्यतया विहितं कर्म नित्यनैमित्तिकरूपं यः करोति स संन्यासी च ज्ञानयोगनिष्ठश्च योगी च कर्मयोगनिष्ठश्च अत एव न निरग्निः अग्निसाध्यकर्मत्यागी न भवति न चाक्रियः अग्निनिरपेक्षक्रियाहीनश्च न भवति, अथवा निरग्निरक्रियश्च संन्यासी योगी च न मन्तव्यः किंतु सर्वकर्मफलत्यागपूर्वककर्मानुष्ठाय्येव संन्यासी योगी च मन्तव्यः तस्योभयनिष्ठासिद्धेरिति भावः ॥ १ ॥

म० टी०–योगसूत्रं त्रिभिः श्लोकैः पञ्चमान्ते यदीरितम् । षष्ठस्त्वारभ्यतेऽध्यायस्तद्व्याख्यानाय विस्तरात् ॥ तत्र सर्वकर्मत्यागेन योगं विधास्यन् त्याज्यत्वेन हीनत्वमाशङ्क्य कर्मयोगं स्तौति द्वाभ्यां श्रीभगवान्–अनाश्रित इति । कर्मणां फलमनाश्रितोऽनपेक्षमाणः फलाभिसंधिरहितः सन् कार्यं कर्तव्यतया शास्त्रेण विहितं नित्यमग्निहोत्रादि कर्म करोति यः स कर्म्यपि सन् संन्यासी योगी चेति स्तूयते । संन्यासो हि त्यागः चित्तगतविक्षेपाभावश्च योगः तौ चास्य विद्येते फलत्यागात् फलतृष्णारूपचित्तविक्षेपाभावाच्च । कर्मफलतृष्णात्याग एवात्र गौण्या वृत्त्या संन्यासयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्य

प्राशस्त्यकथनाय । अवश्यंभाविनौ हि निष्कामकर्मानुष्ठातुर्मुख्यौ संन्यासयोगौ तस्मादयं यद्यपि न निरग्निः अग्निसाध्यश्रौतकर्मत्यागी न भवति न चाक्रियः अग्निनिरपेक्षस्मार्तक्रियात्यागी च न भवति तथापि संन्यासी योगी चेति मन्तव्यः । अथवा न निरग्निर्न चाक्रियः संन्यासी योगी चेति मन्तव्यः किंतु साग्निः साक्रियश्च निष्कामकर्मानुष्ठायी संन्यासी योगी चेति मन्तव्य इति स्तूयते 'अपशवो अन्ये गोअश्वेभ्यः पशवो गोअश्वा' इत्यत्रेव प्रशंसालक्षणया नञन्वयोपपत्तिः । अत्र चाक्रिय इत्यनेनैव सर्वकर्मसंन्यासीति लब्धे निरग्निरिति व्यर्थं स्यादित्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति संन्यासी, क्रियाशब्देन चित्तवृत्तीरुपलक्ष्याः, अक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते तेन न निरग्निः संन्यासी मन्तव्यो न चाक्रियो योगी मन्तव्य इति यथासंख्यमुभयव्यतिरेको दर्शनीयः । एवं सति नञ्द्वयमप्युपपन्नमिति द्रष्टव्यम् ॥१॥

शं० टी०—पूर्वे पञ्चमाध्यायान्ते स्पर्शान्कृत्वा बहिर्बाह्यानित्यादिश्लोकत्रयेण यतेरात्मविदः श्रवणादिजन्यज्ञानस्याप्रतिबद्धत्वसिद्धयेऽवश्यकरणीयं ध्यानयोगं सूचयित्वेदानीं तस्यैव ध्यानयोगस्य बहिरङ्गान्तरङ्गसाधनान्यधिकारिणं तल्लक्षणं तत्फलं च निरूपयितुं षष्ठोऽध्याय आरभ्यते । तत्रादौ श्रवणादिभिः संभाव्यमानज्ञानोत्पत्तेः परमकारणं चित्तशुद्धिस्तस्यां सत्यामेव श्रवणं मननं निदिध्यासनं तज्जन्यज्ञानं च सिध्यति। सत्त्वशुद्धेः कारणं तु कर्मयोग एव श्रवणादेस्तज्जन्यज्ञानस्य च यमादिवद्बहिरङ्गं बलवत्तरं तस्मिन्सत्येव सत्त्वशुद्धिस्तया श्रवणादिकार्यं सिध्यत्यतो मुमुक्षोरवश्यं वैदिकं कर्म नियमेन श्रद्धया चेश्वरभक्त्या च कर्तव्यमिति सूचयितुं कर्मयोगिनं तदीयं कर्मयोगं च स्तोतुं श्रीभगवानुवाच—**अनाश्रित** इति । अधीतवेदवेदाङ्गस्तदर्थज्ञो यो मुमुक्षुर्ब्राह्मणः स्वयं कर्मफलं "स्वर्गकामश्चिन्वीत यः पशुकामः पश्यति पुत्रम्" इत्यादिश्रुतिवाक्यैस्तत्र तत्र प्रतिपाद्यमानं कर्मणां फलं पुत्रपशुस्वर्गप्राप्तिलक्षणमनाश्रितः मोक्षैककामनया यत्किंचिदपि कर्मफलमनपेक्ष्यैव सर्वं कर्मेश्वराय समर्प्य निष्कामः सन् कार्यं नियमेन यत्कर्तव्यं नित्यं नैमित्तिकं च काम्यवर्जितं कर्म अग्निहोत्रादिलक्षणं करोति श्रद्धया भक्त्या च सम्यगनुतिष्ठति स कर्मफलकामनापरित्यागरूपसंन्यासवत्त्वात्संन्यासी च भवति कर्मयोगे चित्तसमाधानवत्त्वाद्योगी च भवति । न निरग्निर्न चाक्रिय इत्यत्रावधारणपदमध्याहर्तव्यं, निरग्निरेव संन्यासीति न अक्रिय एव योगीति च न किंतु फलकामसंकल्पत्यागेन चित्तनैश्चल्येन मदेकभक्त्या च यः कर्म करोति गृहस्थः सोऽपि च संन्यासी योगी च भवतीत्यर्थः । निरग्निरित्यत्राग्निशब्देनाग्निपूर्वकाणि कर्माणि लक्ष्यन्ते चौलोपनयनमारभ्य ब्राह्मणस्य प्राप्तानि स्मार्तानि श्रौतानि च कर्माणि सर्वाण्यग्निपूर्वकाण्येव तान्येतानि ससाधनानि विविदिषया येन संन्यस्तानि भवन्ति स निरग्निः स संन्यासी स एव श्रवणादिना संप्राप्तविज्ञानो भूत्वा ज्ञानयोगे प्रवृत्तः सन् देहेन्द्रियादिचेष्टारूपाः क्रियाः सर्वास्त्यजन्नक्रियो योगी भवति ॥ १ ॥

श्री० टी०—चित्ते शुद्धेऽपि न ध्यानं विना संन्यासमात्रतः ॥ मुक्तिः स्यादिति षष्ठेऽस्मिन्ध्यानयोगो वितन्यते ॥ १ ॥ पूर्वाध्यायान्ते संक्षेपेणोक्तं योगं प्रपञ्चयितुं षष्ठाध्यायारम्भः । तत्र तावत्सर्वकर्माणि मनसेत्यारभ्य संन्यासपूर्विकाया ज्ञाननिष्ठायास्तात्पर्येणाभिधानात् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसङ्गं प्राप्तं वारयितुं संन्यासादपि श्रेष्ठत्वेन कर्मयोगं स्तौति श्रीभगवान्—**अनाश्रित** इति द्वाभ्याम् । कर्मफलमनाश्रितोऽनपेक्षमाणः अवश्यं कर्तव्यतया विहितं कर्म यः करोति स एव संन्यासी योगी च न तु निरग्निः अग्निसाध्येष्टाख्यकर्मत्यागी न चाक्रियोऽनग्निसाध्यपूर्ताख्यकर्मत्यागी च ॥ १ ॥

स० टी०—पद्यं ध्यायन्ध्यायन्सुजनमुनिवन्द्यं मधुरिपोर्गुणान्स्मारं स्मारं भवजलधिपारं गमयतः ॥ रसं पायं पायं यदुपतिगिरां वेदशिरसां मतिर्भूयो भूयो मम हरिपदाब्जे प्रविशतु ॥ १ ॥ ज्ञानयोगः पुरा प्रोक्तः ससंन्यासो विमुक्तिदः ॥ कर्मापि चित्तशुद्ध्यर्थं प्रोक्तं कृष्णार्चनं परम् ॥ २ ॥ चित्तशुद्धावपीदानीं

विक्षेपे सति योगिनाम् ॥ निर्वाणशान्तिरूपं यत्सुखं न स्यात्तदञ्जसा ॥ ३ ॥ येनोपायेन तत्सिद्धिः स्यादुपायः स उच्यते ॥ सूत्ररूपतया योगः पञ्चमान्ते य ईरितः ॥४॥ स एव विस्तरेणात्र षष्ठाध्याये प्रपञ्च्यते॥ तत्रादौ कर्मणां चित्तशुद्धिहेतुतया स्तुतिः ॥५॥ क्रियते कामनात्यागाद्योगसंन्याससाम्यतः ॥ फलाभिसंधिशून्यः सन्नित्यं कर्म करोति यः ॥ ६ ॥ श्रौतं स्मार्तं ससंन्यासयोगयोः फलमश्नुते ॥ निरग्निरक्रियो यस्तु संन्यासस्तुर्य आश्रमः ॥ ७ ॥ न तन्निषेधो हरिणा क्रियते कर्मणां स्तुतौ ॥ किंतु कामपरित्यागमात्रेणैवास्य कर्मिणः ॥ ८ ॥ क्रियते स्तुतिरित्येवमाशयो गम्यते हरेः ॥ फलाभिलाषसंत्यागी विष्ण्वाराधनतत्परः ॥ ९ ॥ स संन्यासी फलत्यागाद्योगी चित्तसमाधितः ॥ निरग्निरित्यनेनोक्तः संन्यासी कर्मवर्जितः ॥ १० ॥ अक्रियश्चित्तसंरोधाद्योगीत्यत्र विवेचनम् ॥ यद्यपीदृङ्न कर्म्यस्ति तथापि स्तूयते तथा ॥ ११ ॥ कामनात्यागसाम्येन संन्यासीत्यादिशब्दतः ॥ १२ ॥ १ ॥

भा० टी०—पञ्चमाध्यायान्ते सम्यग्दर्शनं प्रत्यन्तरङ्गसाधनस्य ध्यानयोगस्य सूत्रस्थानीयास्त्रयः श्लोका उदाहृतास्तद्वृत्तिस्थानीयोऽयं षष्ठाध्याय आरभ्यते । तत्र तदधिकारसंपत्तये गृहस्थेनाधिकृतेन कर्तव्यमेव कर्मेत्यतस्तत्स्तौति—**अनाश्रित इति** द्वाभ्याम् । कर्मणः फलमनाश्रितः कर्मफलतृष्णारहितः सन् कार्यमवश्यकर्तव्यं काम्यविपरीतं नित्याग्निहोत्रादिकं यः करोति स संन्यासी च योगी चेति कर्मफलतृष्णावद्भ्य इतरकर्मिभ्य उत्कृष्ट इति गौणप्रयोगेण स्तूयते । तथाच संन्यासः परित्यागः सोऽस्यास्तीति सः योगश्चित्तसमाधानं सोऽस्यास्तीति स योगी चेत्येवमुभयगुणसंपन्नोऽयं मन्तव्यः न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्माङ्गभूता यस्मात्सः अनग्निसाधना अप्यविद्यमानाः क्रियास्तपोदानादिका यस्य स नित्यसमाधिनिष्ठ इत्यर्थः । एतेन कार्यं कर्म यः करोति स एव संन्यासी च योगी च न तु निरग्निः न चाक्रिय इति प्रत्युक्तम् । न केवलं निरग्निरग्नयो गार्हपत्याहवनीयान्वाहार्यपचनप्रभृतयः तानुद्वास्य स्थित एव संन्यासी तथा अन्याश्च तपोदानाद्याः क्रियास्तद्रहितः समाधिनिष्ठ एव योगी चेति न चेति यथासंख्यमुभयव्यतिरेको व्याख्येयः । एतेनाग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति संन्यासी क्रियाशब्देन चित्तवृत्तिरुपलक्ष्याक्रिय इति निरुद्धचित्तवृत्तिर्योगीति कथ्यते इति लक्षणया व्याख्याय उभयव्यतिरेकप्रदर्शनं प्रत्युक्तम् । एवं भाष्योक्तेनर्जुमार्गेणाविरोधस्य सम्यगुपपत्त्या पूर्वाध्यायान्ते श्लोकद्वयेन सूत्रितं ज्ञानयोगं प्राधान्येन षष्ठे प्रपञ्चयिष्यन् श्रीभगवानुवाचेत्याद्या मूलतद्भाष्यतद्विरुद्धाः कल्पना उपेक्ष्याः ॥ १ ॥

प० टी०—पूर्वाध्याये तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते इत्यादिना वर्णाश्रमोचितकर्मयोगेन शुद्धान्तःकरणस्य ध्यानयोगसाधनीभूतं वायुधारणारूपं कर्मयोगं निरूपयितुमिच्छन् सिंहावलोकन्यायेन पुनः कर्मसंन्यासकर्मयोगयोः सोपपत्तिकं साहचर्यं दर्शयति—**अनाश्रित इति** द्वाभ्याम् । कर्मफलमनाश्रितोऽनपेक्षमाणः सन्नवश्यं कार्यतया विहितं कर्म यः करोति स एव संन्यासी योगी च । कर्मफलानपेक्षत्वमेव कर्मसंन्यासः, विहिताचरणमेव कर्मयोगः, एतदन्यथात्वं निषेधयति न—**निरग्निर्न चाक्रिय इति** । अयमर्थः कश्चिदशुद्धान्तःकरणः शाब्दप्रतीतिमात्रेणाहं मुक्त इति मत्वाग्निहोत्रादिकं त्यजति स निरग्निर्निर्गतोऽग्निर्यस्मात्स तथा तद्वदवशीकृतान्तःकरणः करचरणचेष्टारहितः सन् मृषा नेत्रे निमील्य मिथ्याचारस्तिष्ठति सोऽक्रियस्तथाविधः संन्यासी योगी वा न भवतीत्यर्थः ॥ १ ॥

रा० टी०—बुद्धिर्योगे त्विमां शृणिवति योगवचनं प्रतिज्ञातं द्वितीये । स च योग उत्तरषट्के वक्ष्यमाणभगवज्ज्ञानं प्रति उपायः । स च द्विविधः कर्मयोगो ध्यानयोगश्चेति । तत्र कर्मयोगो ज्ञानं प्रति बहिरङ्गोपायत्वात् त्रैगुण्यविषया वेदा इत्यादिना द्वितीये संक्षेपेण तृतीयाध्यायादावतीतग्रन्थे विस्तरेण च

पूर्वं निरूपितोऽधुना कर्मयोगसाध्यत्वाद्वक्ष्यमाणज्ञानान्तरङ्गसाधनत्वाच्चावसरप्राप्तं समाधियोगं स्पर्शान्नित्यादिना पूर्वाध्यायान्ते संक्षेपेण प्रकृतं विस्तरेणास्मिन्नध्याये वक्ति । आसनादीनामङ्गानां वक्ष्यमाणत्वेऽपि तेषां ध्यानार्थत्वेन ध्यानस्यैव प्राधान्यात् उद्धरेदात्मनात्मानमित्यादिना ध्यानयोगं विधातुं तत्र ध्याने संन्यासयोगयुक्त एवाधिकारीति ज्ञापनाय कामादिवर्जनरूपसंन्यासमीश्वराराधनरूपस्वकर्मानुष्ठानलक्षणयोगं चाह— **अनाश्रित इति** । यः कर्मफलमनाश्रितः कार्यं स्वस्ववर्णाश्रमोचिततया कर्तव्यं कर्म करोति स संन्यासी योगी च स एव च ध्यानाधिकारीति भावः । आहवनीयाद्यग्नित्यागेन अग्निहोत्रादिक्रियात्यागेन च निःसङ्गतया वर्तमान एव ध्यानाधिकारीति सांख्यमतमपाकरोति—नेति । निरग्निरक्रियश्च संन्यासी योगी च नेत्यर्थः । यतेरपि दैवमेवापरे यज्ञमित्यादिनाग्निक्रिययोरुक्तत्वात्संन्यासाश्रमस्वीकारकाले पूर्वाश्रमस्वीकृताग्नेरात्मनि समारोपणाच्च सोऽपि संन्यासी योगी च भवत्येवेति भावः ॥ १ ॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ॥
नह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

त० टी०—उक्तार्थमेवोपपादयति—**यं संन्यासमिति** । प्राहुः प्रकर्षेणाहुः "न्यास एवात्यरेचयत्" इत्याद्याः श्रुतयः । तं योगं फलकर्तृत्वाभिमानत्यागपूर्वकविहितकर्मानुष्ठानं विद्धि हे पाण्डव ! एवंभूतं कर्मैव संन्यासं जानीहीत्यर्थः । कुत इत्यपेक्षायां हि यस्मात् असंन्यस्तसंकल्पः न संन्यस्तः त्यक्तः संकल्पो येन सः कश्चन कश्चिदपि योगी न भवतीत्यर्थः ॥ २ ॥

म० टी०—असंन्यासेऽपि संन्यासपदप्रयोगे निमित्तभूतं गुणयोगं दर्शयितुमाह—**यं संन्यासमिति** । यं सर्वकर्मतत्फलपरित्यागं संन्यासमिति प्राहुः श्रुतयः "न्यास एवातिरेचयतीति । ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" इत्याद्याः । योगं फलतृष्णाकर्तृत्वाभिमानयोः परित्यागेन विहितकर्मानुष्ठानं तं संन्यासं विद्धि हे पाण्डव ! अब्रह्मदत्तं ब्रह्मदत्तमित्याह तं वयं मन्यामहे ब्रह्मदत्तसदृशोऽयमिति न्यायात्परशब्दः परत्र प्रयुज्यमानः सादृश्यं बोधयति गौण्या वृत्त्या तद्भावारोपेण वा । प्रकृते तु किं सादृश्यमिति तदाह नहि यस्मात् असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चन कश्चिदपि योगी न भवति अपि तु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात्तृष्णारूपचित्तवृत्तिनिरोधसाम्याच्च गौण्या वृत्त्या कर्म्यैव संन्यासी च योगी च भवतीत्यर्थः । तथाहि 'योगश्चित्तवृत्तिनिरोधः' 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' इति वृत्तयः पञ्चविधाः । तत्र प्रत्यक्षानुमानशास्त्रोपमानार्थापत्त्यभावाख्यानि प्रमाणानि षडिति वैदिकाः । प्रत्यक्षानुमानागमाः प्रमाणानि त्रीणीति योगाः । अन्तर्भावबहिर्भावाभ्यां संकोचविकासौ द्रष्टव्यौ । अत एव तार्किकादीनां मतभेदाः । विपर्ययो मिथ्याज्ञानम् । तस्य पञ्चभेदाः 'अविद्याऽस्मितारागद्वेषाभिनिवेशाः' त एव च क्लेशाः । शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः प्रमाभ्रमविलक्षणोऽसदर्थव्यवहारः शशविषाणमसत्पुरुषस्य चैतन्यमित्यादिः । अभावप्रत्ययालम्बना वृत्तिर्निद्रा । चतसृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बना वृत्तिरेव निद्रा नतु ज्ञानाद्यभावमात्रमित्यर्थः । अनुभूतविषयासंप्रमोषः स्मृतिः, पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः । सर्ववृत्तिजन्यत्वादन्ते कथनम् । लज्जादिवृत्तीनामपि पञ्चस्वेवान्तर्भावो द्रष्टव्यः । एतादृशां सर्वासां चित्तवृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते । फलसंकल्पस्तु रागाख्यस्तृतीयो विपर्ययभेदस्तन्निरोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति चोच्यत इति न विरोधः ॥ २ ॥

शं० टी०—ननु संन्यासित्वं योगित्वं चानात्मज्ञकर्तृकसर्वकर्मव्युत्थानलक्षणो ब्रह्मविद्धर्मः सर्वशास्त्र-

प्रसिद्धः कथं प्रवृत्तिधर्मवतोऽनात्मज्ञस्य गृहिणो दाराग्निहोत्रादिसाधनवत उपपद्यत इत्याशङ्कायां न, उक्तरीत्या धर्माणामपि धर्मिणां परस्परभेदे सत्यपि संन्यासकर्मयोगयोः साध्यैकत्वेन फलतो भेदाभावात्संन्यासिनो यत्फलं तदेव फलं कर्मयोगिनोऽप्यतः फलसाम्यमुपपद्यत इति सूचयितुं संन्यासवत् कर्मापि मोक्षस्य परमसाधनं तदवश्यं मुमुक्षोः कर्तव्यमिति कर्म स्तोतुं च संन्यासकर्मयोगयोरभेदमाह—**यमिति** । पण्डिताः यं कर्मित्वादर्शनलक्षणं धर्मं संन्यासमिति प्राहुर्वदन्ति त्वं तमेव संन्यासं योगं कर्मयोगं विद्धि जानीहि । सर्वकर्माणि मनसेतिवचनात्स्वस्य कूटस्थासङ्गचिद्रूपत्वविज्ञानेनात्मकर्तृककर्माभावदर्शनं संन्यासस्तस्य फलं तु मोक्षः कर्मसंभावितचित्तशुद्धिजन्यज्ञानकार्यत्वात्संन्यासस्य कर्माङ्गं भवत्यङ्गाङ्गिनोरुभयोरप्येककार्यान्वयित्वेनैकफलत्वेन चैकत्वमुपपद्यते ततस्तयोरभेदमेव पश्येत्यर्थः । अथवा उभयोरपि परमार्थसिद्धिसाधनत्वाविशेषादेकत्वमेव भवति, यथा श्रवणादिजन्यविज्ञानेन विना कर्मित्वदर्शनाभावेत्वविक्रियात्मस्वरूपेणावस्थानलक्षणो मोक्षो न सिध्यति तथा विहितकर्मानुष्ठानाभावे चित्तशुद्ध्यभावात्तज्ज्ञानानुत्पत्तौ स्वस्वरूपावस्थानलक्षणो मोक्षो न सिध्यत्येव ततो मोक्षं प्रत्युभयोरप्यसाधारणकारणत्वे विशेषभावादुभयोरेकशक्तिकत्वेनैकार्थफलकत्वेन च भेदाभावादेकत्वमुपपद्यते । यद्वा सर्वसंकल्पसंन्यासीतिवचनात्सर्वसंकल्पपरित्यागः संन्यासः सर्वत्र ब्रह्मदृष्ट्या बाह्यपदार्थभावनापरिवर्जनं यतेर्धर्मः । यद्यप्येतल्लक्षणं मुख्यवृत्त्या कर्मयोगस्य न संभवति तथापि कर्मफलसंकल्पसंन्यासलक्षणलक्षितत्वात्फलसंकल्पपरित्यागगुणेन वृत्त्या संन्यासकर्मयोगयोरेकत्वं संभवत्यतः संन्यास एव कर्मयोग इति तयोरभेदमेव विजानीहीत्यर्थः । यं संन्यासमिति प्राहुर्योगं तं विद्धीत्युक्त्या कर्मफलसंकल्पसंन्यासोपलक्षित एव कर्मयोगो मोक्षाय भवतीति सूचितं भवति । यतः कर्मफलसंकल्पसंन्यासैकप्रधानत्वं कर्मयोगस्य ततो मुमुक्षोर्गृहिणस्तद्वत्तयावश्यं भवितव्यमिति बोधयितुमाह—**नहीति** । असंन्यस्तसंकल्पः संन्यस्तः मोक्षैककामनया सम्यक्परित्यक्तः संकल्पः कर्मफलविषयकं मननं येन मुमुक्षुणा स संन्यस्तसंकल्पस्तद्विलक्षणोऽसंन्यस्तसंकल्पः कर्मणः पूर्वं पश्चात्तत्काले च कर्मफलमेव मन्वानः सन् यः कर्म करोति सोऽसंन्यस्तसंकल्पो ब्राह्मणो वान्यो वा कश्चिदपि योगी न भवति, योगो नाम कर्मफलापेक्षाराहित्येन लब्धं चित्तनैश्चल्यं तद्वानेव योगी यः कर्मफलाशासंभावितचित्तविक्षेपवान् स योगी न भवतीत्यर्थः । यद्वा योऽसंन्यस्तसंकल्पः स योगी मोक्षयोगार्हो न भवति किंतु जन्मादिदुःखयोग्येव भवतीत्यर्थः । "कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र" इति "उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः" इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ॥ २ ॥

श्री० टी०—कुत इत्यपेक्षायां कर्मयोगस्यैव संन्यासत्वं संपादयन्नाह—**यमिति** । यं संन्यासमिति प्राहुः प्रकर्षेण श्रेष्ठत्वेनाहुः "न्यास एवात्यरेचयत्" इत्यादिश्रुतेः केवलात्फलसंन्यसनाद्धेतोः योगमेव तं जानीहि । कुत इत्यपेक्षायामितिशब्दोक्तो हेतुर्योगेऽप्यस्तीत्याह—**नहीति** । न संन्यस्तः फलसंकल्पो येन स कर्मनिष्ठो ज्ञाननिष्ठो वा कश्चिदपि नहि योगी भवति अतः फलसंकल्पत्यागसाम्यात्संन्यासात्संन्यासी च फलसंकल्पत्यागादेव चित्तविक्षेपाभावाद्योगी च भवत्येव स इत्यर्थः ॥ २ ॥

स० टी०—असंन्यासेऽपि संन्यासशब्दयोगेऽथ कारणम् ॥ गुणयोगं हरिः प्राह मुमुक्षूणां हिताय च ॥ ॥ १ ॥ यं कर्मतत्फलत्यागं प्राहुः संन्यासमागमाः ॥ फलाभिलाषकर्तृत्वाभिमानत्यागयोगतः ॥ २ ॥ योगं तं विद्धि तत्प्राप्तौ साधनत्वस्य साम्यतः ॥ अकर्णं कर्णमित्याह तन मन्यामहे वयम् ॥ ३ ॥ कर्णतुल्योऽयमित्येवं न्यायाद्द्रौण्या प्रयुज्यते ॥ परशब्दः परत्रैवं सादृश्यं ज्ञायते जनैः ॥ ४ ॥ सादृश्यं प्रकृतेऽप्यस्ति कामत्यागो हि कर्मिणः ॥ नात्यक्तफलसंकल्पो योगी भवति कश्चन ॥ ५ ॥ २ ॥

भा० टी०—गौणप्रयोगे निमित्तभूतं गुणयोगमेव दर्शयितुमाह—**यमिति** । यं सर्वकर्मतत्फलत्यागलक्षणं

परमार्थसंन्यासं श्रुतिस्मृतीतिहासपुराणानि प्राहुः योगं फलाभिसंधिरहितकर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि फलविषयसंकल्पत्यागरूपगुणयोगाज्जानीहि । यथा भवान् वस्तुत इन्द्रसुतोऽपि पाण्डुक्षेत्रे जातत्वात्पाण्डव इति लोकैरुच्यते तथेति गूढाभिप्रायेण संबोधयति—हे पाण्डवेति । गुणयोगमेवाह—हि यस्मादसंन्यस्तसंकल्पः अत्यक्तफलाभिसंधिः कश्चन कश्चिदपि कर्मयोगी समाधानवान्न भवति संन्यस्तसंकल्प एव योगी भवतीत्यर्थः । चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्यभिप्रायः । योगाङ्गत्वेन कर्मानुष्ठानात् कर्मफलसंकल्पस्य च चित्तविक्षेपहेतोः परित्यागाद्योगित्वं संन्यासित्वं चोच्यते । यत्त्वपरे एवं कर्मयोगसंन्यासयोर्भेदमङ्गीकृत्याविरोधेन स्तुतिरुक्ता इदानीं तयोरैक्येनैव स्तुतिमारभते—यमिति इत्यतस्तं योगं कर्मयोगं विद्धि यं संन्यासं प्रकर्षेणाहुः। प्रकर्षस्तु कर्मस्वरूपत्यागोऽलसस्यापि संभाव्यते कर्मानुतिष्ठतः फलसंकल्पत्यागस्तु दुर्लभतर इत्येवंलक्षणो ज्ञेयः । अतः कुत इत्यत उक्तम्—हि यस्मात्कश्चन योगी कर्मयोगी ज्ञानयोगी वाऽसंन्यस्तसंकल्पो न भवति संन्यस्तसंकल्प एव योगितां प्रतिपद्यत इति भावः । अतस्तयोः स्वीयस्वीयस्वरूपवदन्योन्यव्यभिचाराभावादैक्यान्न विरोध इति भाव इति तन्मन्दं, संन्यासनिष्कामकर्मयोगयोरैक्येनैव स्तुतिमारभत इत्युत्थानिकया तं कर्मयोगं विद्धि यं संन्यासमित्यादिव्याख्यानस्य संन्यासापेक्षया कर्मयोगप्रकर्षबोधकस्य विरोधात् । किंच संन्यासकर्मयोगयोः सिंहमाणवकयोरिवैक्यं न संभवति किंतु माणवके सिंहशब्दप्रयोग इव निष्कामकर्मयोगे संन्यासशब्दप्रयोगो गौण एवेति दिक् ॥ २ ॥

प० टी०—अथ साहचर्यं प्रकटयन्नाह—यमिति। भो पाण्डव ! इत्युक्तप्रकारेण यं संन्यासं प्राहुः प्रकर्षेण श्रेष्ठत्वेनाहुस्तं योगं विद्धि हि यस्मात्कारणादसंन्यस्तसंकल्पो न संन्यस्ताः संकल्पा येन स तथा कर्मनिष्ठो ज्ञाननिष्ठो वा तत्र कर्मनिष्ठस्त्वसंन्यस्तफलसंकल्पो ज्ञाननिष्ठश्चासंन्यस्तचित्तविक्षेपरूपसंकल्प एवंविधः कश्चिद्योगी न भवति । अत्र भगवदभिमतः संन्यासशब्दार्थस्तु सम्यक् प्रकारेण न्यसनं चित्तशुद्धिद्वारा ज्ञानमुत्पाद्य स्वत एव कर्मोपरमः कर्मसंन्यासो न तु कर्मत्यागः । तदुक्तमध्यात्ममीमांसायाम्—'सम्यङ् न्यासः समाप्तिर्विमलतरधियः कर्मणां संविदाप्तौ संन्यासो यद्वदध्वा स्वयमुपरमति ग्रामवर्क्म प्रवेश्य । रम्भा तावद्विवृद्धिं भजति फलभरं यावदुच्चैः प्रसूते ह्रासं पश्चात्तथैवामृतमभिलषतो ज्ञानमुत्पाद्य कर्म' इति । भाष्यम्—सम्यक्प्रकारेण विमलतरधियः शुद्धान्तःकरणस्य पुंसः संविदाप्तौ ज्ञानप्राप्तौ सत्यां कर्मणां या समाप्तिः संपूर्णता सैव संन्यासशब्दवाच्या न तु कर्मत्यागः । अत्र दृष्टान्तमाह—यद्वदिति । यथाध्वा मार्गः पथिकं ग्रामवर्क्म ग्रामद्वारं प्रवेश्य स्वयमुपरमति पथिकेन ग्रामप्राप्तिव्यतिरेकेणान्तरेणैव मार्गो न त्यज्यते किंतु मार्गो ग्रामद्वारं दर्शयित्वा स्वत एवोपरमति । पुनर्दृष्टान्तान्तरमाह—रम्भेति । रम्भा कदली तावदेवोच्चैर्वृद्धिं भजति यावत्फलभरं प्रसूते पश्चात्फलभरप्रसवानन्तरं ह्रासमुपरमं भजति तथैवामृतं मोक्षमभिलषतो मोक्षार्थिनः पुरुषस्य कर्म ज्ञानमुत्पाद्य स्वयमुपरमति ॥ २ ॥

रा० टी०—स संन्यासी च योगी चेत्युक्त्या प्राप्तां तयोरत्यन्तभेदशङ्कां निरसितुमुख्ययोगापेक्षया पृथगुक्तोऽपि संन्यासो मुख्ययोगान्तर्भूत इत्याह—यमिति । ज्ञेयः स नित्यसंन्यासीत्यादिनोक्तप्रकारेण यं कामक्रोधादिवर्जनरूपं संन्यासं प्राहुस्तं संन्यासं योगं मुख्ययोगं ज्ञानोपायभूतकामादिवर्जनविशिष्टनिवृत्तकर्मानुष्ठानरूपयोगान्तर्भूतं विद्धि जानीहि । हे पाण्डव ! कुतः कश्चन कोऽपि असंन्यस्तसंकल्पः अत्यक्तसंकल्पादिः संन्यासहीनकर्मानुष्ठानमात्रवानिति यावत् । योगी ज्ञानोपायवान्न भवति । नहि सामग्र्येकदेशः कार्यजनको भवति । क्वचित्पृथगुक्तिस्तु ज्ञानभक्त्योः पृथगुक्तिरिवैकदेशापेक्षयेति भावः ॥ २ ॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

त० टी०—एवं चेत्तर्हि यावज्जीवं कर्मैव कर्तव्यतयाऽभिप्रेतं किमित्यत आह—आरुरुक्षोरिति। योगं ज्ञानयोगमारुरुक्षोः आरोढुं प्राप्तुमिच्छोर्मुनेरुक्तस्वरूपं कर्म तत्प्राप्तौ कारणमुच्यते। ज्ञानयोगारूढस्य तस्यैव शमः कर्मनिवृत्तिर्ध्यानपरिपाके कारणमुच्यते। यावदात्मसाक्षात्कारान्तरङ्गस्य योगस्य प्राप्तिस्तावत्कर्म कार्यमित्यर्थः ॥ ३ ॥

म० टी०—तत् किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह—आरुरुक्षोरिति। योगमन्तःकरणशुद्धिरूपं वैराग्यमारुरुक्षोरारोढुमिच्छोर्नत्वारूढस्य मुनेर्भविष्यतः कर्मफलतृष्णात्यागिनः कर्म शास्त्रविहितमग्निहोत्रादि नित्यं भगवदर्पणबुद्ध्या कृतं कारणं योगारोहणे साधनमनुष्ठेयमुच्यते वेदमुखेन मया। योगारूढस्य योगमन्तःकरणशुद्धिरूपं वैराग्यं प्राप्तवतस्तु तस्यैव पूर्वं कर्मिणोऽपि सतः शमः सर्वकर्मसंन्यास एव कारणमनुष्ठेयतया ज्ञानपरिपाकसाधनमुच्यते ॥ ३ ॥

शं० टी०—एवं मुमुक्षूणां कर्मणोऽवश्यकर्तव्यत्वसिद्धये कर्मयोगं कर्मयोगिनं च संन्यासंसंन्यासिभ्यां समत्वेन स्तुत्वाऽधुना कर्मयोगस्य ज्ञानसाधनत्वं वदन् तत्कर्तव्यताया अवधिं च सूचयन्नारूढस्य विदेहमुक्तेः कारणमाह—आरुरुक्षोरिति। योगं सम्यग्दर्शननिष्ठामारुरुक्षोर्मुक्त्यै ज्ञानयोगं प्राप्तुमिच्छां कुर्वतो मुनेर्भविष्यन्मुनेः 'गृहस्थः स्त्रियमुद्वहेत्' इतिन्यायेनास्य भविष्यत्संन्यासित्वमादाय मुनित्वव्यपदेशः गौणवृत्त्या वा मुनेर्गृहिणो ज्ञानयोगप्राप्तेः कारणं कर्मैव चित्तशुद्धेः कर्मणा विनाऽन्येन संभावयितुमशक्यत्वात्कर्मैव पुरुषं चित्तशुद्धिं संपाद्य ज्ञानयोगमारोहयत्यतः कर्मैव ज्ञानयोगप्राप्तेः कारणमित्युच्यते मन्त्रेषु "कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा संततानि तान्याचरथ नियतं सत्यकामाः" इत्यादिश्रुतिभिः प्रतिपाद्यत इत्यर्थः। यस्य चित्तशुद्ध्यै कर्मयोगो विहितस्तस्यैव नित्यनैमित्तिककर्मानुष्ठानसंभावितचित्तशुद्धौ सत्यामुदितविवेकवैराग्यशमदमादिसाधनसंपत्त्या प्राप्तश्रवणादिजन्यज्ञानेन योगारूढस्य योगं ज्ञानयोगमारूढस्य संप्राप्तवतो यतेर्विदेहकैवल्यार्थिनः शमो बाह्योपरमणमेव विदेहमुक्तेरन्तरङ्गसाधनमित्युच्यते "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ। ओमित्येवं ध्यायथ आत्मानं तमेव धीरो विज्ञाय। शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्" इति "आत्मरतिरात्मक्रीडः" इत्यादिश्रुतिभिः 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी। यः स्यादेकासने लीनस्तूष्णीं किंचिदचिन्तयन्' इत्यादिस्मृतिभिश्च विज्ञातात्मतत्त्वस्य यतेः समाधौ प्रवृत्तस्य शम उपशमः सर्वोपरमणं कारणमित्युच्यते, ब्रह्मण्यारोपितनामरूपाद्यग्रहणमेव शमशब्दार्थः, सर्वसंन्यासलक्षणः स एव विदेहमुक्तेः परमकारणमिति श्रुतिस्मृतिभिरुच्यत इत्यर्थः। यस्मादेवं तस्मान्मुमुक्षोरवश्यं चित्तशुद्ध्यै श्रद्धयेश्वरार्पणबुद्ध्या च वैदिकमेव कर्म कर्तव्यं तस्यैव कर्मानुष्ठानसंभावितचित्तशुद्ध्या तदेकपरतया सम्यक्कृतश्रवणादिसंप्राप्तज्ञानस्य समाधिनिष्ठायां तिष्ठतः सर्वकर्मसंन्यास एव कर्तव्य इत्यभिप्रायः। आरुरुक्षोः कर्म कारणं तस्यैव योगारूढस्य शमः कारणमित्युक्त्या गन्तुर्गमनं समुद्रपर्यन्तमेव ततःपरं तु गतेः परिसमाप्तिर्यथा तथा मुमुक्षोर्ज्ञानसिद्धिपर्यन्तमेव कर्म कर्तव्यं ज्ञानसिद्धौ सर्वकर्मसंन्यासः एव कर्तव्य इति सूचितं भवति। तेन "यावज्जीवमग्निहोत्रं जुहोति। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः" इत्यादिश्रुतिवाक्यानां यावज्जीवमग्निहोत्रादिकर्मणः कर्तव्यत्वप्रतिपादकानामविद्वानेव गतिर्न तु विद्वान् अन्यथा "यदहरेव विरजेत्तदहरेव प्रव्रजेत्। सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः। ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" 'यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम्। तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्' इत्यादिश्रुतिविरोधप्रसङ्गात्। ननु जडजात्यन्धमूकादीनामेव वैदिककर्मानधिकारिणां

संन्यासो न तु विदुषः "विद्वान्यजते" इति विदुषो यागादिकर्मविधानादिति चेन्न निरुक्तश्रुतिस्मृतिविरोधप्रसङ्गात् । 'बहिःसूत्रं त्यजेद्बुधः' इति "किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" इति 'यदा तु विदितं तत्त्वम्' इत्यादिश्रुतिस्मृतिवाक्यार्थे सम्यग्विचार्यमाणे संन्यासस्य ब्रह्मविदेव योग्यो विषयो न तु जडादिस्तेषां वेदशास्त्राधीतिशून्यानाम् "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" इत्येतच्छ्रुत्यर्थपदवाक्यप्रमाणबलेन लोकानां कर्मचितत्वानित्यत्वाल्पफलत्वासत्त्वपरीक्षायोग्यताऽसंभवात् वेदाध्ययनतदर्थविचारे तत्त्वनिश्चये कर्मणि लौकिके च सर्वत्र योग्यस्यैवाधिकारदर्शनाद्वेदाध्ययनतदर्थविचारानर्हाणां ब्रह्मतत्त्वावगमनं बुधत्वं च स्वप्नेऽपि न संभावयितुं शक्यते ततो वेदान्तश्रवणादिनाधिगतब्रह्मतत्त्वानामेव बुधत्वं संन्यासश्च निरुक्तश्रुतिस्मृतिभिरवगम्यते तत एव भगवताप्युच्यते आरुरुक्षोर्मुनेर्योगमित्याद्यतः सम्यग्विदितात्मतत्त्वस्यैव संन्यासो न तु जडादेर्नापि परोक्षज्ञानिनः 'महत्पदं ज्ञात्वा वृक्षमूले वसेत्' "ज्ञात्वा नैष्कर्म्यमाचरेत्" 'तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् । अहमेवाक्षरं ब्रह्म वासुदेवाख्यमव्ययम् ॥ इति भावो ध्रुवो यस्य तदा भवति भैक्ष्यभुक् । यदा तु विदितं तत्त्वम्' इत्यादिश्रुतिस्मृतिशतेभ्यो ब्रह्मविद एव संन्यासः कर्तव्य इति सिद्धम् । "विद्वान् यजते" इत्यत्र वेदश्रौतार्थतत्प्रयोगप्रायश्चित्तविद्विद्वच्छब्दार्थस्तस्यैव यजत इति कर्मविधिर्न तु ब्रह्मविदः "तस्य कार्यं न विद्यते" इति ब्रह्मविदः कर्माभावस्मरणात् ततस्त्वविद्वानेव यावज्जीवश्रुतिवाक्यानां गतिरिति स्थितम् ॥ ३ ॥

श्री० टी०—तर्हि यावज्जीवं कर्मयोग एव प्राप्त इत्याशङ्क्य तस्यावधिमाह—आरुरुक्षोरिति । ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसस्तदारोहे कारणं कर्मोच्यते चित्तशुद्धिकरत्वात् ज्ञानयोगमारूढस्य तु तस्यैव ज्ञाननिष्ठस्य शमः समाधिश्चित्तविक्षेपककर्मोपरमो ज्ञानपरिपाके कारणमुच्यते ॥ ३ ॥

स० टी०—तत्किं कर्म प्रशस्तत्वात्सदानुष्ठेयमा मृतेः ॥ मैवं धीशुद्धिवैराग्यमारुरुक्षोर्हि कर्म तत् ॥१॥ शुद्धिं प्राप्तस्य तस्यैव तत्त्यागो ज्ञानसाधनम् ॥ अधिकारविभागेन कर्मतत्त्यागयोरपि ॥ २ ॥ कार्याकार्यव्यवस्थात्र प्रोक्ता भगवता मया ॥ ३ ॥ ३ ॥

भा० टी०—किं प्रशस्तत्वाद्यावज्जीवं कर्मयोग एवानुष्ठेय इत्याशङ्कायां ध्यानयोगाधिकारसंपत्तिपर्यन्तमवधिमभिप्रेत्य कर्मयोगस्य ध्यानयोगसाधनत्वप्रदर्शनेन उत्तरमाह—आरुरुक्षोरिति । योगं ध्यानयोगमारुरुक्षोरारोढुमिच्छोर्ध्यानयोगेऽवस्थातुमसमर्थस्य । यत्तु योगं ज्ञानयोगमिति तन्न ध्यानयोगस्यैव प्रक्रान्तत्वात् । कस्यारुरुक्षोः मुनेः कर्मफलसंन्यासिन इत्यर्थः । यत्तु मुनेर्निदिध्यासनाख्यज्ञानयोगवतः श्रवणमननक्रमेण योगमारुरुक्षोरिति तन्न, निदिध्यासनवतः पुनः श्रवणमननक्रमस्यानपेक्षणात् । तयोर्निदिध्यासनार्थत्वात् कर्मफलाभिसंधिरहितं कारणं साधनमुच्यते तस्यैव पूर्वं कर्मिणः पश्चाद्योगारूढस्य प्राप्तध्यानयोगस्य शम उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढताया आत्मसाक्षात्कारनिर्विकल्पसमाधिपर्यन्तायाः साधनमुच्यते । एतेन योगमन्तःकरणशुद्धिरूपं वैराग्यमारुरुक्षोर्न त्वारूढस्य मुनेर्भविष्यतः कर्मफलतृष्णात्यागिनः कर्म कारणं योगारोहणे साधनमनुष्ठेयमुच्यते योगारूढस्य योगं पूर्वोक्तं प्राप्तवतस्तु तस्यैव शमः सर्वकर्मसंन्यास एव कारणमनुष्ठेयतया ज्ञानपरिपाकसाधनमुच्यत इति प्रत्युक्तं, ध्यानयोगस्यैवास्मिन्नध्याये वर्णनीयत्वेन तत्पक्षे श्लोकस्य सम्यगुपपत्त्या वर्णनीयार्थं श्रौतं विहायाश्रौतार्थवर्णनस्यानुचितत्वात् । योगसूत्रं त्रिभिः श्लोकैः पञ्चमान्तेयदीरितम् । षष्ठ आरभ्यतेऽध्यायस्तद्व्याख्यानाय विस्तरात् ॥ तत्र सर्वकर्मत्यागेन योगं विधास्यंस्त्याज्यत्वेन हीनत्वमाशङ्क्य कर्मयोगं द्वाभ्यां स्तुतवानिति स्वपूर्वग्रन्थादप्यस्मिन् तृतीयश्लोके ध्यानयोगविधानवर्णनस्यावश्यकत्वात् । कदा योगारूढो भवतीत्युच्यत इत्युत्तरश्लोकमवतार्य योगं समाधिमारूढो योगारूढ इत्युच्यत इति योगारूढशब्दार्थप्रदर्शनपरस्वग्रन्थतन्मूलविरोधाच्च ॥ ३ ॥

प० टी०—अथ कर्मज्ञानयोरवधिमाह—आरुरुक्षोरिति। यमनियमादिसोपानमार्गेणारोढुमूर्ध्वगतिं प्राप्तुमिच्छोः पुरुषस्य कर्म कारणमुच्यते आरोहणावधि कर्म कर्तव्यं चित्तशोधकत्वात् अशुद्धचित्तस्य च विक्षेपजनकत्वात्। तथा तस्यैवारूढदशां प्राप्तस्य ध्याननिष्ठस्य ज्ञानपरिपाकार्थं शमो विक्षेपोपरमः कारणम् ॥ ३ ॥

रा० टी०—ध्यानाधिकारत्वेनोक्तो मुख्यः कर्मयोगः किं सकृदनुष्ठेय उत फलप्राप्तिपर्यन्तमित्यतः फलपर्यन्तमित्याह—आरुरुक्षोरिति। योगं ज्ञानोपायमारुरुक्षोः संपूर्णं कामयमानस्य मुनेः परोक्षज्ञानिनः कर्म कारणमुच्यते। योगारोहरूपसाक्षात्कारस्येति योज्यम्। अपरोक्षरूपफलोदयपर्यन्तं कार्यमिति भावः। तस्यैव मुनेर्योगारूढस्य संपूर्णज्ञानोपायस्यापरोक्षज्ञानिनः शमः उपलक्षणं भगवन्निष्ठबुद्धित्वरूपध्यानव्याख्यानार्चनादिकं कर्म कारणं मुक्तिगतसुखातिशयस्येति योज्यम्। यद्यप्ययं प्रश्नो यदा ते मोहकलिलमित्यनेन द्वितीये परिहृतस्तथापि तत्र परोक्षज्ञानार्थिनोऽत्र तु योगारोहशब्दितसंपूर्णोपायशब्दितापरोक्षार्थिन इति भेद इति भावः। यद्वा योगारूढस्येत्युत्तरार्धे अपरोक्षज्ञानिनो ध्यानादिकं कर्म वक्तुं यदा त इति श्लोकोक्तस्यैव प्रश्नोत्तरस्य पूर्वार्धेनानुवाद इति ज्ञेयम्। यद्वा कर्मयोगमध्ये ज्ञानार्थिना कीदृशो योगोऽवश्यापेक्षित इत्यत आह—आरुरुक्षोरिति। पूर्वार्धेन ज्ञानार्थिनः उत्तमाधममध्यमरूपनानाजनशुश्रूषाख्यमेव कर्मावश्यापेक्षितमित्युच्यते। ज्ञानार्थिनो यथाशक्ति त्रिविधप्राणिनां शुश्रूषयोपकारकृतः हरिस्तुष्टः स्वापरोक्षं ददाति। तेन तदवश्यं कार्यमिति चरमार्धेन तु ज्ञानिनो नानाजनशुश्रूषाख्यकर्मोपशम एव शमपदेनोच्यते न तु ध्यानाद्युपशमः तत्तु कार्यमेवेत्युच्यते शमपदस्योभयार्थत्वात् तस्य स्वोत्तमसेवयैवेष्टसिद्धौ अन्यशुश्रूषया कृत्याभावात्। एवं चात्र श्लोके पूर्वार्धे ज्ञानार्थिनः कर्मापेक्षितमित्युक्त्वोत्तरार्धे ज्ञानिनः शमपदेन कर्मोपशमोऽपेक्षित इत्युच्यते। तथाच न निरग्निर्न चाक्रियो योगीत्याद्युक्तिविरोध इति प्रत्युक्तं ध्येयं कर्मशमशब्दाभ्यां नानाजनशुश्रूषाख्यकर्मतदुपशमयोरेवात्र विवक्षितत्वादिति ॥ ३ ॥

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ॥
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

त० टी०—कर्माचरन्कदा योगारूढो भवतीति चेच्छृणु—यदा हीति। यदा यस्मिन्काले इन्द्रियार्थेषु शब्दादिविषयेषु तत्साधनभूतेषु कर्मसु च न सज्जते, ममैते भोग्या एतदर्थं मया प्रयतितव्यमित्यभिनिवेशं न करोति हि यस्मात्सर्वसंकल्पसंन्यासी सर्वसंकल्पफलभोगविषयांस्तत्साधनकर्मविषयांश्च संकल्पान् संन्यसितुं त्यक्तुं शीलं यस्य स तदा योगारूढ उच्यते ॥ ४ ॥

म० टी०—कदा योगारूढो भवतीत्युच्यते—यदा हीति। यदा यस्मिन् चित्तसमाधानकाले इन्द्रियार्थेषु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रतिषिद्धेषु नानुषज्जते तेषां मिथ्यात्वदर्शनेनात्मनोऽकर्त्रभोक्तृपरमानन्दाद्वयस्वरूपदर्शनेन च प्रयोजनाभावबुद्ध्याऽहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषङ्गं न करोति हि यस्मात् तस्मात्सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमेतत् फलं भोक्तव्यमित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां च कामानां तत्साधनानां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानुषङ्गस्य तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबन्धकस्याभावात् योगं समाधिमारूढो योगारूढ इत्युच्यते ॥ ४ ॥

शं० टी०—ननु बाह्योपरमणमेवैकं शमाभिधानं साधनमवलम्ब्य योगारोहणं कुर्वतो यतेः कदा योगारूढत्वसिद्धिरित्याकाङ्क्षायां यदा सर्वत्र ब्रह्मदृष्ट्या कर्मसु विषयेषु चासद्धियामुष्य प्रवृत्त्यभावस्तदा योगारूढत्वसिद्धिरिति बोधयति—यदा हीति। सर्वसंकल्पसंन्यासी संकल्पाः द्रव्यगुणकर्मादिगोचराः समीचीन-

त्वबुद्धय: सर्वविषया: संकल्पा: सर्वसंकल्पास्तान्संन्यासितुं शीलमस्यास्तीति सर्वसंकल्पसंन्यासी अधिष्ठानयाथा-त्म्यसंदर्शनेनारोपितानां द्रव्यादीनां मिथ्यात्वे तेषु शुक्तिरजतवदाभासमात्रेषु तज्ज्ञस्य समीचीनत्वबुद्धय: संकल्पा: न जायन्ते कामाश्च वैषयिका: कामा: सर्वे यन्मूला: ' संकल्पमूला: कामा वैयज्ञा: संकल्पसंभवा:' इति स्मरणात्तत: प्रत्यग्दृष्ट्या सर्वस्य ब्रह्ममात्रत्वेन निराश्रयान्सर्वान्संकल्पान्संन्यस्य सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदर्शनशीलो ब्रह्मविद्यतिर्यदा यस्मिन्काले इन्द्रियार्थेषु क्वचिद्भिक्षाटनादौ दृष्टेषु शब्दा-दिषु कर्मसु च कचिद्वासनया कर्तव्यत्वेन प्रतीतेषु स्नानशौचादिकर्मस्वपि नानुषज्जते भोक्तृभोजनभोज्येषु कर्तृकारणकार्येषु च मिथ्यात्वबुद्ध्या स्वयमनुषङ्गमासक्तिं न करोति अनुषङ्गो नामाहं भुञ्जेऽहं करो-मीति भोक्तृकर्तृतादात्म्यापत्तिस्तां न करोति किंत्वसङ्गोदासीनत्वेन सर्वत्र साक्षिभूतस्तिष्ठतीत्यर्थ: । यद्वा प्राक्तनसंस्कारानुरूपा प्रवृत्तिरनुषक्तिस्तां न करोति प्रवृत्ते: काममूलत्वात्कामस्य संकल्पमूलत्वात्संकल्पानां सर्वेषामप्याश्रयमिथ्यात्वविज्ञानेन संन्यस्तत्वाद्विदुष: शब्दादिषु कर्मसु चाप्यनुषङ्गाभावो युक्त: ' कारणा-भावे कार्याभाव: ' इतिन्यायात् । यद्वा विपरीतप्रत्ययनिरसनपूर्वकं सर्वत्र ब्रह्मदर्शननिष्ठायां प्रवृत्तो ब्रह्म-विद्यति: स्वयं सर्वसंकल्पसंन्यासी अधिष्ठानाज्ञानदोषेण शुक्तौ रजतप्रत्ययवन्निर्विशेषे परे ब्रह्मण्यद्वितीये घट: पट: कुड्यमिति भ्रान्त्या सम्यक्कल्प्यन्त इति संकल्पा: विपरीतप्रत्ययास्तान् सर्वान्संकल्पान्संन्यासितुं चिद्वृत्त्या ब्रह्मणि प्रविलापयितुं शीलमस्यास्तीति सर्वसंकल्पसंन्यासी विजातीयप्रत्ययप्रविलापनपरतया स-जातीयप्रत्ययावृत्तिं कुर्वन्नित्यर्थ: । यदा यस्मिन्काले सर्वत्र ब्रह्ममात्रग्रहणशीलाया बुद्धिवृत्ते: स्थिरीभावदशा-यामिन्द्रियार्थेषु कचिदाभासत: प्रतीयमानेषु विषयेषु कर्मसु च चक्षुरादीन्द्रियैस्तत्तद्विषयग्रहणकर्मस्वपि नानुषज्जते अनुषक्तिं न करोति अनुषक्तिर्नामाकस्माद्दृष्टार्थानुरूपेण पुनर्वृत्ते: परिणतिस्तां चक्षुरादिभिरि-न्द्रियैर्ग्रहणक्रियां च न करोति किंतु दृष्टान्विषयान् तद्वृत्तिद्रष्टारं च प्रत्यावृत्त्या ब्रह्मणि प्रविलापयतीत्यर्थ:। एवं द्रष्टृदर्शनदृश्यादिभेदभिन्नं विश्वं सर्वं यदा ब्रह्ममात्रं पश्यति तदा योगारूढ: सर्वस्य स्वस्य च ब्रह्ममा-त्राकारप्रत्ययोऽप्रतिबद्धो योगस्तत्रारूढ: प्रतितिष्ठत इति कृत्वा योगारूढ इत्युच्यते स्थितप्रज्ञो यं जीवन्मुक्त इति पण्डितैरन्योन्यं प्रति भाष्यत इत्यर्थ: । " विजानन्विद्वान् । भवेत नातिवादी आत्माक्रीड आत्मरति: क्रियावान् " इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्द: ॥ ४ ॥

श्री० टी०—कीदृशोऽसौ योगारूढ: यस्य शम: कारणमुच्यत इत्यत्राह—**यदा हीति**। इन्द्रियार्थेषु इन्द्रियभो-ग्येषु शब्दादिषु तत्साधनेषु च कर्मसु यदा नानुषज्जते आसक्तिं न करोति । तत्र हेतु:—आसक्तिमूलभूतान्स-र्वान्भोगविषयान्कर्मविषयांश्च संकल्पान्संन्यासितुं त्यक्तुं शीलं यस्य स: तदा योगारूढ उच्यते ॥ ४ ॥

स० टी०—यस्मिंश्चित्तसमाधानकाले कर्मसु तत्फले ॥ तन्मिथ्यात्वधिया स्वात्माकर्त्रभोक्तृधिया तथा ॥ १ ॥ अहं कर्तास्य भोग्यं तत्फलं मे चेति रञ्जनाम् ॥ न करोति परित्यक्तसर्वकामतया मुनि: ॥ २ ॥ इहामुत्रार्थकामानां हेतूनाध्यासिकान्यत: ॥ संत्यक्तुं शीलमस्यासौ प्राप्तयोगस्तदोच्यते ॥ ३ ॥ ४ ॥

भा० टी०—कदा योगारूढो भवतीत्यपेक्षायामाह—**यदेति**। एतेन कीदृशोऽसौ योगारूढ: यस्य शम: कारणमुच्यत इत्यत्राह क: पुनर्योगारूढ इत्यत उच्यत इत्यापातनिकाद्वयमपि प्रत्युक्तं, यदातदापदयो: प्रत्यक्षमुपलब्धेर्भाष्योक्तपातनिकाया एव युक्तत्वात् । यदा यस्मिन्काले समाधीयमानचित्तो योगी इन्द्रि-यार्थेषु विषयेषु शब्दादिषु कर्मसु च नित्यादिषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनुषङ्गं कर्तृत्वादिबुद्धिं न करोतीत्यर्थ: । यत: सर्वान् संकल्पान् विषयविषयकमनोवृत्तिभेदान् कामान् सर्वाणि कर्माणि चेति सर्व-संकल्पान् इहामुत्रार्थकामहेतून् संन्यासितुं शीलमस्येति सर्वसंकल्पसंन्यासी तदा योगारूढ: प्राप्तसमा-धिरुच्यते ॥ ४ ॥

प० टी०—अथ योगारूढस्य स्वरूपमाह—यदेति । यदा यस्मिन् काले इन्द्रियार्थेषु रूपरसादिषु तथा तत्कारणीभूतेषु कर्मसु चेष्टासु न सज्जते आसक्तिं न करोति । अथ न केवलं कर्मेन्द्रियनिरोधमात्रमित्याह—सर्वेति । सर्वविषयभोगनिमित्तीभूताः संकल्पास्तान् संन्यस्तुं शीलं यस्य स तदा तस्यामवस्थायां योगारूढ इत्युच्यते नान्यः ॥ ४ ॥

रा० टी०—योगारूढशब्दितसंपूर्णोपायसिद्धिमतो लक्षणमाह—यदेति । यदा हीन्द्रियार्थेषु शब्दादिविषयेषु कर्मसु च प्रयत्नं विनापि नानुषज्जते । ननु कर्माननुषङ्गो नाम कर्मस्वरूपत्याग एव तथाच न चाक्रियो योगीति प्रागुक्तविरोध इत्यतः कर्माननुषङ्गं स्वयमेव व्याख्याति—सर्वेति । ज्ञानिनः कर्माननुषङ्गो नाम सर्वकर्मसु संकल्पन्यास एव सर्वेषु कर्मसु संकल्पत्यागी सन् कर्मसु नानुषज्जते यदा तदा योगारूढ उच्यते इति योजना । कर्मसु संकल्पत्यागो नाम ममतात्याग एव संकल्पक्रियादिकं सर्वं भगवदधीनमिति ज्ञानमेव । एवं च संकल्पादेर्भगवदधीनताज्ञानेन हेतुना कर्मस्वनासक्तत्वे सत्यप्रयत्नेन शब्दादिविषयेषु अनासक्तत्वं योगारूढस्य लक्षणमित्युक्तं भवति । अप्रयत्नेनेति विशेषणाद्योगमारुरुक्षौ नातिव्याप्तिः, तस्यानासक्तेः प्रयत्नसाध्यत्वात् ॥ ४ ॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ॥
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

त० टी०—एतेन विषयासक्तिस्तद्विरक्तिश्च संसारपाततदुद्धरणहेतुभूते इति बुद्ध्वा स्वहितं कुर्यादित्याह—उद्धरेदिति । आत्मना विषयाननुसक्तेन मनसा आत्मानं जीवं समुद्धरेत्, विषयासक्त्या संसारे पतन्तं दोषबुद्ध्या तत्परित्यागेनोर्ध्वं नयेदित्यर्थः । नावसादयेत् विषयासक्त्या संसारसमुद्रे न मज्जयेत् हि यस्मादात्मैव मन एवात्मनो बन्धुर्हितकारी संसारादुद्धारकः मान्यो भ्रात्रादिः । आत्मैव मन एवात्मनो रिपुरहितकारी नान्यः ॥ ५ ॥

म० टी०—यो यदैवं योगारूढो भवति तदा तेनात्मनैवात्मोद्धृतो भवति संसारानर्थव्रातादतः आत्मना विवेकयुक्तेन मनसा आत्मानं स्वं जीवं संसारसमुद्रे निमग्नं तत उद्धरेत् उत् ऊर्ध्वं हरेत् विषयासङ्गपरित्यागेन योगारूढतामापादयेदित्यर्थः । नतु विषयासङ्गेनात्मानमवसादयेत् संसारसमुद्रे मज्जयेत् हि यस्मादात्मैवात्मनो बन्धुर्हितकारी संसारबन्धनान्मोचनहेतुः नान्यः कश्चिल्लौकिकस्य बन्धोरपि स्नेहानुबन्धेन बन्धहेतुत्वात् । आत्मैव नान्यः कश्चित् रिपुः शत्रुरहितकारी विषयबन्धनागारप्रवेशककोशकार इवात्मनः स्वस्य बाह्यस्यापि रिपोरात्मप्रयुक्तत्वाद्युक्तमवधारणमात्मैव रिपुरात्मन इति ॥ ५ ॥

शं० टी०—मुमुक्षुर्दुर्लभं मानुषं तत्रापि ब्राह्मं देहं प्राप्य सदसद्विवेकसंपादनयोग्यं स्वोद्देशेन कृतश्रौतादिसत्कर्मभिर्भक्त्या च प्रसन्नपरमेश्वरप्रसादसंपन्नो भूत्वा शमादिसाधनसंपत्त्या सद्गुरोः सकाशाच्छ्रवणं मननं च कृत्वा ब्रह्मैवाहमिति स्वात्मना ब्रह्म ज्ञात्वा योगारूढः सन् चिदेकरसब्रह्मात्मना यदा तिष्ठति तदा खल्वयं संसारदुःखसागरे मग्नमात्मानं स्वयमेव समुद्धृत्य मोक्षसाम्राज्यसुखे संस्थापितवान् भवति यतस्ततो ब्राह्मणादिभिर्विवेकसंपन्नैर्मनुष्यत्वब्राह्मणत्वविवेकित्वादिसिद्धेः साफल्याय सर्वं संन्यस्य प्रयत्नेन संसाराब्धिनिमग्नस्यात्मनः समुद्धरणमवश्यं कर्तव्यमित्याह—उद्धरेदिति । पुत्रमित्रकलत्रादिगोचरमहामोहावर्त शताकुले कामक्रोधलोभाहंकारममकारादिचित्तविकारमहाग्राहसमुज्जृम्भिते नानाविधमहारोगतिमितिमिङ्गिलकोटिविराजिते अशनापिपासादिमहाकल्लोलोद्वेल्लिते तापत्रयनिबिडवडवानलज्वालामालासंवीते स्वेष्टजननष्टिप्रयुक्तप्रलापमहाध्वनिविघूर्णिते नित्यनिरन्तरदुर्वासनाशैवालपटलसंकीर्णे विषयविषपरिपूर्णसंसारार्णवे निमग्नं जन्ममृत्युजरादिदुःखेन हतोऽस्मीत्याक्रोशन्तमात्मानं स्वमात्मना श्रद्धाभक्तिसमाराधितपरमेश्वरप्रसादवता सदसद्वि-

वेकवैराग्यशमदमादिसाधनवता श्रवणादिसमुत्पन्नात्मज्ञानवता स्वेनैवोद्धरेत्स्वोद्धरणे स्वयमेवोक्तलक्षणसंपन्नः साधनमनुत्तमं नान्यत् । सत्येवोक्तलक्षणे साधकतमे कार्यं साधनान्तरं च सिध्यति नान्यथा ततो विचक्षणो मुमुक्षुरुक्तलक्षणवता स्वेनैव स्वोद्धरणं कुर्यात् यथा महाज्वरादिप्रचण्डरोगदुःखनिमग्नमात्मानं स्वं स्वयमेव प्रतिकूलमपथ्याचरणादिकमपास्य दिव्यौषधपथ्यसेवननिरतो भूत्वा प्रयत्नेन रोगादुद्धरति तथा भूतदाहीयानापस्तम्बोक्तान् क्रोधादिदुर्गुणान् तत्कार्याणि चापास्य प्रतिकूलं सर्वं कर्म संन्यस्यामानित्वादीनामात्मगुणानां च सेवया सद्गुरोः सन्निधौ नियमेन कृतश्रवणादिनात्मज्ञानं समधिगम्य योगारूढो भूत्वात्मानं स्वं स्वयमेव संसारसागरादुद्धरेदित्यर्थः । आत्मन उद्धरणं नामाविद्यातत्कार्यसंबन्धलेशरहितेन सच्चिदानन्दैकस्वरूपेण स्थापनमेव स्वस्वरूपेणावस्थानं खल्वात्मनो मोक्षस्तमेव निरन्तरब्रह्मयोगनिष्ठया मुमुक्षुः संपादयेत् नत्वनाद्यविद्यावासनावशवर्ती सन् बहिर्मुखो भूत्वात्मानमवसादयेत् यथा रोगी जिह्वादोषवेगवशगो भूत्वा स्वारोग्यप्रतिकूलमपथ्यं भुक्त्वा स्वं स्वयमेव नाशयति तथा मुमुक्षुर्यतिर्बाह्यवासनयात्मतरणप्रतिकूलां बहिःप्रवृत्तिं कृत्वा स्वं स्वयमेव न नाशयेत् किंतु 'वाचं यच्छ मनो-यच्छ यच्छ प्राणेन्द्रियाणि च । आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने:' इतिन्यायेनान्तःप्रवणो भूत्वा स्वोद्धरणमेव कुर्यादित्यर्थः । ननु पङ्के मग्नं पशुं तदीया इवात्मानं भ्रातृपुत्रादयो बान्धवाः कन्यादानश्राद्धादिभिः समुद्धरिष्यन्ति किं स्वप्रयासेनेत्याशङ्कायामाह—आत्मैवेति । स्वाविद्यया जननमरणादिदुःखप्रवाहे पतित्वाध्यात्मिकादितापत्रयाग्निना संतप्यमानस्यात्मनः स्वस्यात्मा स्वयमेव बन्धुः संसारदुःखान्मोचयित्वा निरतिशयमोक्षसुखेन बध्नातीति बन्धुः संसारदुःखाब्धितारकः स्वस्य स्वयमेव न तु भ्रात्रादिः तत्कर्तृकश्राद्धादिपुण्यकर्मणामविषयत्वेनात्मा न तैस्तार्यते यथा महारोगी परकर्तृकपथ्यौषधसेवया न तार्यते विना स्वकर्तृकया तथैव स्वयमपि स्वकर्तृकश्रवणमनननिदिध्यासनसमाधिनिष्ठया विना पुत्रादिभिर्न तार्यते प्रत्युत स्नेहास्पदत्वेन बन्धहेतुरेव भवति पुत्रादिर्न तु मुक्तये तत एवावधार्यते आत्मैव ह्यात्मनो बन्धुरिति । स्वस्य रोगक्षुदादिदुःखप्राप्तौ तन्निवर्तकत्वं स्वस्यैव दृष्टमिति प्रत्यक्षप्रसिद्धम् । "एतैरुपायैर्यतते यस्तु विद्वान् तस्यैव आत्मा विशते ब्रह्मधाम" इत्यादिश्रुतिप्रसिद्धिं च हिशब्दो द्योतयति । नन्वात्मानं प्रत्यात्मन एव बन्धुत्वे स्वातिरिक्तानामेव सर्वेषां शत्रुत्वं सिद्धं न काप्यात्मन इत्यादिशङ्कायां न, स्वोद्धरणाय यत्नमकुर्वाणो यो बहिर्मुखः स एव स्वस्य स्वयं शत्रुर्भवतीत्याह—आत्मैवेति । आत्मनः स्वस्यात्मैव शत्रुः "शान्तो दान्तः" इत्युक्तसाधनसंपत्त्यात्मोद्धरणाय समाधिमकुर्वाणो यः स एव यतिः स्वस्य स्वयमेव शत्रुर्भवति यथा जिह्वादोषेणापथ्यकारी स्वस्य स्वयमेव शत्रुस्तथा शमादिसाधनसामग्रीमनालम्ब्य स्वोद्धरणसाधनभूतब्रह्मयोगनिष्ठायामतिप्रवृत्तनाद्यविद्यावासनावेगाद्विदेहमुक्तिहेतोर्ज्ञानस्य निर्मूलकं बाह्यमेवावलम्बते यतस्तत आत्मन आत्मैव रिपुर्मारकः न तु बहिरपकर्ता तस्य बाह्यकार्यं प्रत्येव रिपुत्वं न तु मुक्तिं प्रत्यत एवावधार्यते आत्मैव रिपुरात्मन इति । मुक्तिहेतोः सार्वात्म्यसिद्धेर्बाह्यालम्बनस्यैव प्रतिपक्षत्वात्तत्कर्तुः स्वस्य युक्तं स्वं प्रति स्वस्यैव रिपुत्वं रोगिण्यपथ्यकारिणि तद्दृष्टमिति हिः प्रसिद्धिं द्योतयति ॥ ५ ॥

श्री० टी०—अतो विषयासक्तित्यागे मोक्षं तदासक्तौ च बन्धं पर्यालोच्य रागादिस्वभावं त्यजेदित्याह—उद्धरेदिति । आत्मना विवेकयुक्तेनात्मानं संसारादुद्धरेत् नत्ववसादयेदधो न नयेत् हि यस्मात् आत्मैव मनः सङ्गादुपरत आत्मनः स्वस्य बन्धुरुपकारकः रिपुरकारकश्च ॥ ५ ॥

स० टी०—योगारूढो यदा जातस्तदैवात्मात्मनामुना ॥ अनर्थव्रातसंसाराद्बन्धनाख्यात्समुद्धृतः ॥ १ ॥ संसारपङ्कनिर्मग्नमात्मानमतियत्नतः ॥ उद्धरेत्तत ऊर्ध्वं तं वैराग्यादियुतः पुमान् ॥ २ ॥ त्यागेन विष-

यासक्तेः समाध्यारूढता नयेत् ॥ अनाद्याविद्ययाध्यस्तदेहाद्यात्ममतिं त्यजेत् ॥ ३ ॥ ब्रह्मात्मैक्यावबोधेन धीमान् शान्तिं समाश्रयेत् ॥ संसारेऽत्यन्तघोरेऽस्मिन् रागद्वेषादिसंकुले ॥ ४ ॥ स्वात्मानं पातयेन्नैव विषयासक्तचेतसा ॥ बन्धान्मोक्षकरो ह्यात्मा हितकारी स आत्मनः ॥ ५ ॥ नान्यः कश्चिद्भवेद्बन्धुः संसारोद्धारणे क्षमः ॥ प्रत्युत स्नेहपाशेन बन्धुरन्योऽत्यनर्थदः ॥ ६ ॥ आत्मैवाहितकारित्वादात्मनः शत्रुरुच्यते ॥ विषयासक्तिबन्धैश्च कारागारे प्रवेशनात् ॥ ७ ॥ पुनर्जन्म पुनर्मृत्युः पुनर्भोगेषु दीनता ॥ स्वात्माज्ञानाद्यतो नृणां तत ऊर्ध्वं नयेत्स्वयम् ॥ ८ ॥ आत्मानं तत्त्वबोधेन वैराग्यादियुतेन च ॥९॥५॥

भा० टी०—यदेवं योगारूढस्तदा तेनात्मनाऽऽत्मोद्धृतो भवति संसारानर्थसमूहादतः संसारार्णवे निमग्नमात्मानमात्मनोद्धरेत् तत उर्ध्वं नयेत् योगारूढतामापादयेत् आत्मानं नावसादयेन्नाधो नयेत् हि यस्मादात्मैव बन्धुः संसारान्मोचकः नान्यः कश्चन पुत्रादिः प्रत्युत मोक्षं प्रति प्रतिकूल एव स्नेहादिबन्धनायतनत्वात् 'बन्धवो दृढबन्धनम्' इत्युक्तत्वात्, तथात्मैवात्मनो रिपुः नान्यो बाह्योऽपकारी तस्यात्मप्रयुक्तत्वात् तस्माद्युक्तमेवोभयत्रावधारणम् ॥ ५ ॥

प० टी०—अतो विषयत्यागे मोक्ष आसक्तौ च बन्ध इति पर्यालोच्य रागादिस्वभावं त्यजेदित्याह—उद्धरेदिति । विवेकयुक्तेनात्मना मनसा कृत्वात्मानं जीवदशापन्नं संसारादुद्धरेत् परं तु नावसादयेन्नाधः पातयेत् हि यस्मात्कारणादात्मनो बन्धुरुपकारको रिपुरपकारक आत्मैव स्वयमेव नान्यः मन एव मनुष्याणां कारणं बन्धमोक्षयोः इत्युक्तत्वात् ॥ ५ ॥

रा० टी०—यस्य ध्यानयोगस्य कामादिवर्जनरूपसंन्यासयुक्तस्ववर्णाश्रमोचितकर्मानुष्ठानवानधिकारी उक्तः अपरोक्षाख्यफलपर्यन्तं कर्मानुष्ठानं चोक्तं । स एव ध्यानयोगोऽभियोगेन कार्य इत्याह—उद्धरेदिति । आत्मना मनसा आत्मानं जीवमुद्धरेत् पुमर्थभाजनं कुर्यात् । आत्मानं जीवं नावसादयेत् न क्लेशभाजनं कुर्यात् । कुतः हि यस्माद्ध्यात्मनो जीवस्यात्मैव मन एव बन्धुः रिपुश्च भवत्यत इति ॥ ५ ॥

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

त० टी०—कथंभूतस्यात्मन आत्मा बन्धुः कथंभूतस्यात्मन आत्मा रिपुरित्युच्यते—बन्धुरिति । येन पुरुषेणात्मनैव स्वेनैवात्मा स्वमनो विषयेभ्यो जितो निवर्तितः तस्यात्मा मन एव बन्धुर्हितकारी । अनात्मनोऽजितमनसः पुरुषस्यात्मैव विषयासक्तं स्वकीयं मन एव शत्रुवत् स्वस्य शत्रुत्वे संसारबन्धहेतुत्वे वर्तेत । तदुक्तं श्रीपराशरेण—'मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्' इति ॥ ६ ॥

म० टी०—इदानीं किंलक्षण आत्मनो बन्धुः किंलक्षणो वात्मनो रिपुरित्युच्यते—बन्धुरिति । आत्मा कार्यकरणसंघातो येन जितः स्ववशीकृतः आत्मनैव विवेकयुक्तेन मनसैव न तु शस्त्रादिना तस्यात्मा स्वरूपमात्मनो बन्धुरुच्छृङ्खलप्रवृत्त्यभावेन स्वहितकरणात् अनात्मनस्तु अजितात्मन इत्येतत् शत्रुत्वे शत्रुभावे वर्तेतात्मैव शत्रुवत् बाह्यशत्रुरिवोच्छृङ्खलप्रवृत्त्या स्वस्य स्वेनानिष्टाचरणात् ॥ ६ ॥

शं० टी०—यदुक्तं स्वंप्रति स्वस्यैव बन्धुत्वं शत्रुत्वं च तदिदानीं विस्पष्टयति—बन्धुरिति । अनाद्यविद्यावासनया रागद्वेषादिभिश्च बन्धकगुणैरिन्द्रियवशो भूत्वा देहेन्द्रियादिप्रवृत्तिमेव स्वाभाविकीं स्वस्येष्टामेव मन्यमानो य आत्मा संसरति तस्यात्मनः सदसद्विवेकवता तीव्रविरक्तिमता मोक्षेच्छयैव कृतश्रवणादिना विज्ञातात्मतत्त्वेनामानित्वादिगुणसंपन्नेन येनात्मना रागद्वेषादिदोषानभिभूयात्मा कार्यकरणसंघात एव

जितो निर्जितो भवति स आत्मा बन्धुर्भवति कार्यकरणसंघातजयस्तु तत्प्रवृत्तिप्रतियोगिगुणावष्टम्भेन कर्तव्यः देहप्रवृत्तिर्देहशिरोग्रीवाणां समत्वधारणेन धैर्येण च प्राणप्रवृत्तिः प्राणायामेन क्षान्त्या च इन्द्रियप्रवृत्तिर्मनःप्रवृत्तिश्च वैराग्येण शान्त्या च बुद्धिप्रवृत्तिः सदसद्विवेकविज्ञानेन तीव्रमोक्षेच्छया च ब्रह्मण्येवात्मभावेनाहंकारप्रवृत्तिर्जेतव्या । एवं कार्यकरणसंघातलक्षण एवात्मा येन वशीकृतो भवति स कार्यकरणसंघातजेतात्मा पूर्वोक्तस्याहंममेतिसंसरिष्णोरात्मनो बन्धुस्तारको भवति स्वतरणकारणभूतज्ञानस्याप्रतिबन्धत्वाय क्रियमाणसमाधिनिष्ठाप्रतिकूलकार्यकरणसंघातप्रवृत्तिं वासनाकृतां निगृह्य यस्मात्समाधावेव प्रवर्तते तस्मादित्यर्थः । एतेन देहेन्द्रियमनोबुद्ध्यादेरनुकूलत्वे समाधिर्ज्ञानं च मोक्षश्च सिध्यति नान्यथा ततः प्रतियोगिगुणावष्टम्भेन देहेन्द्रियादेर्जयोऽवश्यं मुमुक्षोर्यतेः कर्तव्य इति सूचितम् । तत एव देहेन्द्रियादेर्जयमकुर्वाणः स्वस्य स्वयमेव शत्रुर्भवतीत्याह—अनात्मन इति । अनात्मनो देहेन्द्रियादेः स्वस्ववासनानुरूपप्रवृत्त्या शत्रुत्वे समाधिनिष्ठा प्रतिकूलत्वे सति तत्प्रवृत्त्यनुसार्यात्मापि संसारमग्नस्यात्मनः स्वस्य स्वयं शत्रुवदेव भवति स्वोद्धरणक्रियाप्रतिकूलदेहाद्यनुसारित्वाद्यथा रोगी विरोध्यपथ्यानुसारी पुरुषः स्वस्य स्वयं शत्रुर्भवति तथाऽयमात्मापि 'नाविरतोदुश्चरितात् । यच्छेद्वाङ्मनसी प्राज्ञः' इति 'वाचं यच्छ' इत्यादिश्रुतिस्मृत्युक्तमोक्षमार्गमनादृत्य यतो वासनानुरूपेण स्वमुक्तेः प्रतिकूलां बहिःप्रवृत्तिमेव करोति ततो युक्तमात्मनः स्वं प्रति स्वस्य शत्रुत्वम् । यस्मादेवं तस्मान्मुमुक्षोर्यतेः श्रवणादिजन्यज्ञानवतो विदेहकैवल्यसिद्ध्यै कर्तृकरणभोक्तृभोग्यादिसर्वद्वयमिथ्यात्वबुद्ध्या तीव्रवैराग्येण च मिथ्याविषयां बन्धकरीं बाह्यप्रवृत्तिं निगृह्य ब्रह्मयोगनिष्ठामधिष्ठायात्मोद्धरणमवश्यं प्रयत्नेन कर्तव्यमिति सिद्धम् । ननु उद्धरेदात्मनात्मानमित्यात्मनैवात्मन उद्धरणं कर्तव्यमित्युक्ते त्वेकस्यैवात्मनः कर्तृकर्मभावः प्रसज्यते स च लोकशास्त्रविरुद्धः नहि स्वस्कन्धं स्वयमारोढुं शक्नोति तद्वत् स्वं स्वयमुद्धर्तुं च न शक्नोत्येवेति चेत्सत्यं स्वं प्रति स्वस्य कर्तृभावः कर्मभावश्च नोपपद्यते तथापि गुणभेदेन तद्द्वयमात्मन्येकस्मिन्नप्युपपद्यते तदुच्यते । "स्वाज्ञानेन संसारे पतितं स्वं स्वयमेव शमदमसंन्यासादिसाधनसंपत्त्या श्रवणमनननिदिध्यासादिभिः समुत्पन्नकूटस्थासङ्गचिद्रूपत्वविज्ञानेन देहेन्द्रियादिसंबन्धरहितं ज्ञात्वा कर्तृत्वभोक्तृत्वादिबन्धेभ्यो मोचयितुमर्हत्येव यथा अज्ञानेनारण्ये निर्जने ह्रदे वाऽन्यत्र वा पङ्के पतितं स्वं स्वयमेव विवेकी चतुरः पुरुषस्तरुं तरुशाखां वा लतां वान्यद्वावलम्ब्योपायेन पङ्कात्समुद्धरति तद्वदेतन्न्यायाद्भगवद्वचनाच्च न कोऽपि विरोधः ॥ ६ ॥

श्री० टी०—कथंभूतस्यात्मैव बन्धुः कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह—बन्धुरिति । येनात्मनैव आत्मा कार्यकारणसंघातरूपो जितो वशीकृतः तस्य तथाभूतस्यात्मनः आत्मैव बन्धुः अनात्मनोऽजितात्मनस्तु आत्मैवात्मनः शत्रुत्वे शत्रुवदपकारित्वे वर्तेत ॥ ६ ॥

स० टी०—बन्धुरात्मात्मनः कीदृक्कीदृक् शत्रुरितीर्यते ॥ कार्यकारणसंघातो येनादौ स्ववशीकृतः ॥१॥ विवेकबुद्ध्या तस्यात्मा विषयासक्तिवारणात् ॥ बन्धुरस्त्यात्मनः शास्त्रप्रवृत्त्या मोक्षसंमुखः ॥ २ ॥ आत्मैव शत्रुवत्तस्य मूढस्याप्यजितात्मनः ॥ वर्तते शत्रुभावेन विषयासक्तिबन्धनात् ॥ ३ ॥ उच्छृङ्खलप्रवृत्त्या च स्वस्य स्वेनैव बन्धनम् ॥ तन्निवृत्त्यास्य मोक्षोऽपि स्वयं सिद्ध उपस्थितः ॥ ४ ॥ ६ ॥

भा० टी०—आत्मैव बन्धुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मात्मनो बन्धुरात्मात्मनो रिपुश्चेति तत्राह—बन्धुरिति । तस्यात्मनः स आत्मा बन्धुः येनात्मना आत्मैव कार्यकरणसंघात एव जितः वशीकृतः श्रेयोभिमुखः जितेन्द्रिय इत्यर्थः । अनात्मनः अजितात्मनस्त्वजितकार्यकरणसंघातस्यात्मैव स्वयमेव शत्रुत्वे शत्रुभावे वर्तेत शत्रुवत् यथात्मेतर आत्मनोऽपकारी तथात्मात्मनोऽपकारे वर्तेतेत्यर्थः । तथा चै-

तदनुरोधात्पुनः पुनरात्मशब्दस्वारस्याच्चोद्धरेदात्मनात्मानमित्यत्रापि स्वं स्वेनैवोद्धरेत् हि यस्मात्स्वयमेव स्वस्य बन्धुः स्वयमेव स्वस्य शत्रुरित्यर्थः। एतेनात्मना विवेकयुक्तेन मनसा आत्मानं स्वं जीवमात्मैव विवेकयुक्तं मन एवात्मनः स्वस्य बन्धुः येनात्मैवात्मना विवेकयुक्तेन मनसा जितः न तु शास्त्रादिनेति प्रत्युक्तम्। यत्तु नन्विन्द्रियार्थेष्वनासक्तौ तस्य सर्वसंकल्पसंन्यासिनः किं प्रयोजनं तत्राह—उद्धरेदिति। अत्रोत्तरार्धस्थमात्मेतिपदं पूर्वार्धेऽनुषञ्जनीयं तथाचायं संबन्धः आत्मा पूर्वपूर्वापरिमितजन्मोपार्जितपुण्यपुञ्जपूर्णमन्तःकरणं कर्तृ आत्मानं प्रत्यञ्चं कर्म अन्तःकरणापरपर्यायजडाशयनिमग्नतया सकलानर्थभाजनतां गतमात्मना विवेकवैराग्यादिसंपन्नेनोद्धरेदुक्तजडाशयात्पृथक् कुर्यात् न स्वधर्मैः कर्तृत्वादिभिस्तिरस्कुर्यात्। यत आत्मानं स्वस्य स्वधर्माणां च सत्तायाः प्रत्यगधीनत्वात् स्वजीवनभूतं तथाचेदृशमुपकारं कुर्वत उद्धरणं तिरस्काराकरणं चोचितमेव। एवं च यदीन्द्रियार्थेषु सक्तः स्यात्तर्हि हविषा कृष्णवर्त्मेवेत्यादिन्यायेन कामानुपरमात् तत्क्रोधाद्युपस्थितौ न कदाचित्प्रतीचः संसारादुद्धारः स्यादिति युक्त एवेन्द्रियार्थेष्वनासक्त इत्याकूतम्। यद्वा आत्मा प्रत्यगात्मान्तर्यामी आत्मना विवेकादिसंपन्नेनान्तःकरणेन कर्तृत्वाद्यभिमानकलुषमन्तःकरणमुद्धरेत् कण्टकेनेव कण्टकं दूरेणोत्सादयेत्। कुत एवं कर्तव्यमत आह—नात्मानमवसादयेदिति। आत्मानं प्रत्यग्रूपं स्वं नावसादयेत् न विशीर्णं परमात्मनो विभक्तरूपं कुर्यादित्यर्थः। ननु तदेवमेकमन्तःकरणमात्मन उपकारकमपकारकं च कथं भवतीत्याशङ्क्य स्वभावसहकारिवशात् विषस्येव मरणाजीवनहेतुतया भेदं पुनरुक्तात्मपदप्रयोगात्सूचयन्नाह—आत्मैवान्तःकरणमेव विवेकादिसंपन्नमात्मनो जीवस्य बन्धुः बन्धध्वंसहेतुः तथा विवेकाद्यसंपन्नमन्तःकरणमेव आत्मनः स्वभावाज्जीवस्य रिपुः सर्वानर्थात्मकबन्धनहेतुत्वादित्यर्थः। उभयत्रैवकारं प्रयुञ्जानस्यायमाशयः यत्रापि देवदत्तस्य यज्ञदत्तो बन्धुरुच्यते यत्र वा चैत्रस्य मैत्रो वैरीत्युच्यते तत्रापि चैतन्यस्योपधीयमानस्य स्वतोऽपरिणामित्वान्न बन्धुतारिते उपाधेः परमन्तःकरणस्यैव रागाख्ये परिणामे बन्धुताद्वेषाख्ये तस्मिन् अरितेति नान्यत्रैतौ धर्मौ संभवत इति बन्धुत्वं रिपुत्वं चान्तःकरणस्य स्पष्टयति—बन्धुरिति। तस्यात्मनो जीवस्यात्मान्तःकरणं बन्धुर्भवति येन नियन्त्रा जीवेनान्तःकरणेनैव पूर्वोक्तसहायसहकृतेनात्मा शरीराख्यः सेन्द्रियो जितः स्वाधीनः संपादितः तस्यान्तःकरणं बन्धुरित्यर्थः। कदा पुनरन्तःकरणं रिपुस्तत्राह—अनात्मनः पूर्वमात्मशब्देनोक्तस्य देहस्य यदा शत्रुत्वं वशत्वाभावस्तदात्मान्तःकरणमेव शत्रुवद्वर्तत इति ज्ञेयमित्यर्थः। इतीतरकल्पितं तत्पुनः पुनरात्मशब्दप्रयोगस्वारस्यान्निरसनीयम्। अन्यथा आत्मशब्दस्य मुख्यामुख्यवृत्त्या बह्वर्थकत्वादन्यदपि किंचित् कल्पयितुं शक्यम्। तथाहि आत्मनेश्वरेणात्मानं जीवमुद्धरेत् नात्मानमवसादयेत् यत आत्मा ईश्वर एव जीवस्य बन्धुः स एव चैतस्य रिपुरित्यर्थः। ईश्वरस्यैव बन्धुत्वं रिपुत्वं च स्फुटयति—तस्य जीवस्यात्मेश्वरो बन्धुरुद्धारकः येनात्मना भक्तियुक्तेन मनसा आत्मेश्वरो जितः वशीकृतः अनात्मनस्त्ववशीकृतपरमेश्वरस्य त्वीश्वर एव शत्रुवत् शत्रुत्वेन वर्तेत। यद्वा आत्मना पुण्यलब्धेन मनुष्यदेहेनात्मानमुद्धरेत् यतः आत्मैव देह एवात्मनो बन्धुः स एव जीवस्य रिपुः। देहस्य बन्धुत्वं रिपुत्वं च स्फुटयति—तस्यात्मनः आत्मा देहो बन्धुः येनात्मना विवेकयुक्तेन मनसा आत्मा देहो जितः अनात्मनस्तु अजितदेहस्य तु शत्रुवत् शत्रुत्वे देह एव वर्तेत इत्यर्थः। अथवा आत्मना अखण्डाकारबुद्धिरूपेणात्मानमहंकारमुत् ऊर्ध्वं नयेत् देहात् प्रच्याव्य ब्रह्मण्यहं ब्रह्मास्मीति योजयेत् नात्मानमहंकारमवसादयेत् परिच्छिन्ने देहे तदभिमानेन पीडयेत् यत आत्मैवाहंकार एव ब्रह्मणि नियोजितो बन्धुरात्मनो जीवस्य ब्रह्माभेदसंपादनेन बन्धनिवर्तकत्वात् स एव परिच्छिन्ने देहे पीडितः शत्रुर्जन्ममरणाद्यनर्थनिचयसंपादकत्वात्। अहंकारस्यैव बन्धुत्वं रिपुत्वं च विशदयति—तस्यात्मन आत्मा अहंकाररूपो बन्धुर्येनाहंकार एव आत्मनोक्तबुद्धिरूपेण जितः

वशीकृत्य ब्रह्माकारतां नीतः अनात्मनस्त्ववशीकृताहंकारस्य तु शत्रुवच्छत्रुत्वे वर्तत इत्यर्थः । सर्वथाप्यनासक्तेन संसारनिवृत्तिः संपाद्येत्यलं विस्तरेण । तस्मात्प्रकृतानुसारि भाष्योक्तव्याख्यानमेव शरणीकरणीयमिति दिक् ॥ ६ ॥

प० टी०—अथात्मनो बन्धुत्वं रिपुत्वं च प्रकटयन्नाह—बन्धुरिति । तस्य पुरुषस्यात्मा मन आत्मनो जीवस्य बन्धुः सुहृदुक्तः । तस्य कस्य, येन पुरुषेणात्मनैव स्वेनैवात्मा कार्यकरणसंघातरूपो जीवो जितो वशीकृतोऽथानात्मनोऽजितात्मनः पुरुषस्य शत्रुत्व आत्मैव स्वयमेव वर्तते नान्यः ॥ ६ ॥

रा० टी०—कीदृशस्यात्मनः कीदृशं मनो बन्धुः रिपुश्चेत्यत आह—बन्धुरिति । येनात्मना येन जीवेनेति समानाधिकरणं वा, येन जीवेन कर्त्रा आत्मना बुद्धया करणेनेति व्यधिकरणं वा, आत्मा मनः जितं वशीकृतं तस्यात्मनो जीवस्यात्मा मनः बन्धुरेवोपकार्येव भगवद्ध्यानोपयोगीति यावत् । अनात्मनस्तु अजितमनस्कस्य तु जीवस्य आत्मैव मन एव शत्रुवत्प्रसिद्धशत्रुरिव शत्रुत्वे अनुपकारित्वे वर्ततेति मनोजयेन ध्यानयोगः कार्य इत्युक्तं भवति ॥ ६ ॥ यद्वा योगारोहशब्दितयोगसंपूर्तेर्भगवत्प्रसादो मुख्यसाधनमित्याह—उद्धरेदिति । आत्मना परमात्मना तत्प्रसादेनेति यावत् । आत्मानं जीवं प्राग्वदेव योजना । आत्मनो जीवस्यात्मैव परमात्मैव बन्धुः रिपुश्च हि यतः ॥ ५ ॥ कीदृशस्य हरिर्बन्धुः रिपुश्चेत्यत आह—बन्धुरिति । पूर्ववदेवार्थो योजना च । परंतु प्रथमान्तात्मशब्दोऽत्र परमात्मपरः । आत्मना बुद्धयेत्यत्र बुद्ध्युपलक्षितभक्त्येत्यर्थः । अनात्मनस्त्वित्यस्य भक्तिबलेनात्मवशीकृतभगवत्स्वरूपस्य पुंस इत्यर्थः ॥ ६ ॥

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ॥
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ॥
युक्त इत्युच्यते योगी समलोष्ठाश्मकाञ्चनः ॥ ८ ॥

त० टी०—जितमनसः पुरुषस्य स्वबन्धुत्वं प्रतिपाद्य तत एव यैर्धर्मविशेषैर्योगारूढता संपद्यते तद्वैशिष्ट्यं प्रतिपादयन्पूर्वोक्तं योगारूढत्वं स्मारयति—जितात्मन इति द्वाभ्याम् । प्रागुक्तेन्द्रियानासक्तस्य शीतोष्णसुखदुःखेषु मनस उद्वेगहेतुषु सत्स्वपि तथा हर्षक्षोभहेत्वोर्मानापमानयोः सतोरपि जितात्मनः विकारशून्यमनसः अत एव प्रशान्तस्य सुखदुःखादिहेतुषु पुरुषेषु रागद्वेषवर्जितस्य परमात्मा मनोबुद्धयादिभ्यः परमः स्वयंप्रकाशस्वरूप आत्मा सम्यगाहितः सुखरूपेणावस्थितो भवति । अथवा उक्तप्रकारेण प्रशान्तस्य परं केवलमात्मा समाहितो भवति नान्यस्य ॥ ७ ॥ ततश्च—ज्ञानेति । ज्ञानं शास्त्रोपदेशजन्यं, विज्ञानमुपदिष्टार्थस्य मनननिदिध्यासनाभ्यासेन भ्रमनिरासपूर्वकयथावस्थितात्मस्वरूपानुभवः, ताभ्यां तृप्तः बाह्यार्थनिराकाङ्क्ष आत्मा चित्तं यस्य सः कूटस्थो यस्यां कस्यामप्यवस्थायां यथाकथंचित् यदृच्छया सङ्गे जातेऽपि निर्विकारः अत एव विजितेन्द्रियः देहधारणहेतुभूतान्नपानाच्छादनादिमिष्टकटुस्निग्धरूक्षमृद्वमृद्वादिषु प्राप्तेषु प्रीतिद्वेषाभावाद्विनिवर्तितानीन्द्रियाणि येन सः, अत एव समलोष्ठाश्मकाञ्चनः समानि मृत्पिण्डपाषाणसुवर्णानि यस्य स तथा तेषु हेयोपादेयबुद्ध्यभावात् स योगी युक्तो योगारूढ इत्युच्यते ॥ ८ ॥

म० टी०—जितात्मनः स्वबन्धुत्वं विवृणोति—जितात्मन इति । शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्वपि तथा मानापमानयोः पूजापरिभवयोश्चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेनेति वा जितात्मनः

प्रागुक्तस्य जितेन्द्रियस्य प्रशान्तस्य सर्वत्र समबुद्धया रागद्वेषशून्यस्य परमात्मा स्वप्रकाशज्ञानस्वभावः आत्मा समाहितः समाधिविषयो योगारूढो भवति । परमिति वा छेदः । जितात्मनः प्रशान्तस्यैव परं केवलमात्मा समाहितो भवति नान्यस्य, तस्माज्जितात्मा प्रशान्तश्च भवेदित्यर्थः ॥ ७ ॥ किंच—ज्ञानेति । ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानं, विज्ञानं तदप्रामाण्यशङ्कानिराकरणफलेन विचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणं, ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसन्निधावपि विकारशून्यः अत एव विजितानि रागद्वेषपूर्वकाद्विषयग्रहणाद्व्यावर्तितानीन्द्रियाणि येन सः अत एव हेयोपादेयबुद्धिशून्यत्वेन समानि मृत्पिण्डपाषाणकाञ्चनानि यस्य सः योगी परमहंसपरिव्राजकः परवैराग्ययुक्तो योगारूढ इत्युच्यते ॥ ८ ॥

शं० टी०—समाधेः प्रतिकूलां देहेन्द्रियादिप्रवृत्तिं निरुध्य समाधिनिष्ठां कृतवतो यतेः फलमहमेवेदं सर्वमिति सर्वत्राप्रतिबद्धात्मा पारोक्ष्यमेवेति सूचयन् वक्ष्यमाणलक्षणसंपन्नो भूत्वा यः समाधिनिष्ठासंपादितविज्ञानबलेन विपरीतप्रत्ययानामकम्प्यो भवति स योगारूढ इति बोधयति—**जितात्मन इति** द्वाभ्याम् । विवेकवैराग्याभ्यां तीव्रमोक्षेच्छया चेश्वरप्रसादाद्गुरोः प्रसादाच्च श्रुत्वा मत्वात्मानं सम्यग्विज्ञाय कार्यकारणसंघातं वशीकृत्यात्मोद्धरणाय यः समाधिं करोति तस्य जितात्मनः जितो निर्जितः समाधिना सर्ववासनापटलसंक्षये सति विपरीतग्रहो यथा न स्यात्तथा वशीकृतो विपरीतग्रहवैमुख्यं प्रापित आत्मा मनो यस्य तस्य जितात्मनस्तत एव प्रशान्तस्य निर्विकल्पस्य यतेः परमात्मा निरतिशयानन्दरूपत्वान्निरवधिकमहत्त्वाच्च परमश्चासावात्मा च परमात्मा परं ब्रह्म समाहितः सम्यगाहितः समाहितः विपरीतप्रत्ययनिर्मुक्तो भूत्वा बहिरन्तः सर्वत्र चक्षुषो रूपमिव बुद्धिवृत्तेः स्वयमेव विषयो भवतीत्यर्थः । कर्ताहं भोक्ता सुखी दुःखीत्यादिविपरीतप्रत्ययैः संसारीभूतस्यात्मनः समाधिनिष्ठासंजातविज्ञानबलेन तत्तत्प्रत्ययसंबन्धराहित्यापादनमेवात्मनः समुद्धरणमिति परमात्मा समाहित इतिपदेन सूचितं भवति । यदुक्तमुद्धरेदात्मनात्मानमिति तदुद्धरणप्रकारमेव निरूप्येदानीमेवंलक्षणो योगारूढो जीवन्मुक्त इति योगिनो योगारूढत्वं सूचयितुमाह—**शीतेति** । तस्य योगनिष्ठासिद्धेरसाधारणकारणमाह—विजितेन्द्रिय इति । सदसद्विवेकजन्यतीव्रमोक्षेच्छाभ्यां विशिष्य जितानि विजितानि विषयग्रहणवैमुख्यं गमितानीन्द्रियाणि बाह्याभ्यन्तरकरणानि येन स विजितेन्द्रियो भूत्वा योगी योगनिष्ठायां प्रवृत्तो ब्रह्मविद्यतिः स्वयं ज्ञानविज्ञानतृप्तात्मा "सर्वं खल्विदं ब्रह्म । तज्जलान्" इति "अयमात्मा ब्रह्म । तत्त्वमसि । ब्रह्मैवेदं सर्वम्" इत्यादिश्रुतयः 'वासुदेवः सर्वम्' इत्यादिस्मृतयश्च सर्वस्य जगतो नामरूपप्रत्ययनिरासपूर्वकं नियमेन ब्रह्ममात्रत्वं प्रतिपादयन्ति । निरुक्तश्रुतिस्मृतिवाक्यबलात्सर्वस्य ब्रह्ममात्रत्वावधारणमप्रतिहतं ज्ञानं शास्त्रेण सूर्यग्रहणनिश्चयवत् विज्ञानं तु श्रुतिस्मृतिभिः सम्यङ्निर्धारितस्य चिदेकबुद्धिवृत्त्या ब्रह्मैवाहमिदं जगच्चेति निर्विशेषात्मना सर्वतः परिपूर्णस्य साक्षादपरोक्षीकरणं चक्षुषा राहुग्रस्तार्कबिम्बदर्शनवदेताभ्यामुक्तलक्षणाभ्यां ज्ञानविज्ञानाभ्यां सर्वस्य ब्रह्ममात्रत्वावगाहकाभ्यामप्रतिबन्धाभ्यां तृप्तः पूर्णः विकल्पान्तरस्यावकाशरहित आत्मा मनो यस्य स ज्ञानविज्ञानतृप्तात्मा तत एव समलोष्टाश्मकाञ्चनः समानि चिदाकारवृत्त्या समत्वेन ब्रह्ममात्रतया दृष्टानि लोष्टाश्मकाञ्चनानि येन स समलोष्टाश्मकाञ्चनः सर्वत्र ब्रह्ममात्रदर्शीत्यर्थः । एतेन बाह्यपदार्थविवेकराहित्यं हेयोपादेयत्वबुद्धिशून्यत्वं च सूचितं भवति । ननु योगारूढस्य ब्रह्मविदः सदा सर्वत्र ब्रह्मदर्शनमनुपपन्नं प्राप्ते सत्याधिभौतिकाद्युपद्रवे- तद्दर्शनतदनुसंधानाभ्यां ब्रह्मदर्शनस्य व्याघातः स्यादित्याशङ्कायां न, विजितेन्द्रियत्वान्निःशेषविनष्टबाह्यवासनत्वाच्च तेषु प्राप्तेष्वपि ब्रह्मविद्ब्रह्मदृष्ट्यैव तिष्ठति न ततश्चलतीति बोधयितुमाह—**शीतोष्णेति** । मानापमानयोर्मानः स्तुतिपूजोपचारादिरवमानस्तु निन्दातिरस्कारादिस्तयोः प्राप्तयोः सतोस्तथा शीतोष्णसुखदुःखेषु

शीतोष्णेत्याधिभौतिकानामाधिदैविकानां चोपलक्षणं सुखदुःखेत्याध्यात्मिकानामुपलक्षणं शीतोष्णव्याघ्रसर्पवर्षाग्न्यादिषु वृष्ट्यशन्यादिषु च ज्वरादिषु मिष्टान्नादिषु च प्राप्तेषु सत्स्वपि ब्रह्मवित्समदर्शन एव भवति नत्वारोपितनामरूपक्रियातत्फलानुसंधानपरो भवति नामरूपादेर्ब्रह्मणि प्रविलापितत्वेन पुनर्वृत्तिविषयत्वायोगात्ततः स्वयं ब्रह्मदृष्ट्यैव तिष्ठति न ततः किंचिच्चलति । तथाच श्रुतिः " महत्पदं ज्ञात्वा वृक्षमूले वसेत् कुचैलोऽसहाय एकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो जीर्णकामो व्याघ्रे हस्तिनि सिंहे दंशे मशके नकुले सर्पे यक्षे राक्षसे गन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चन" इति "वृक्ष इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत। उपल इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत। आकाशमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत सत्येन तिष्ठासेत् " इति एवं विपरीतप्रत्ययहेतुषु प्राप्तेष्वापि ब्रह्मवित्कूटस्थो विपरीतप्रत्ययैरकम्प्यो भवति यदा तदा युक्तो योगारूढ इत्युच्यते पण्डितैरिति द्वयोरर्थः ॥ ७ ॥ ८ ॥

श्री० टी०—जितात्मनः स्वस्मिन्बन्धुत्वं स्फुटयति—**जितात्मन इति** । जितः आत्मा येन तस्य प्रशान्तस्य रागादिरहितस्यैव परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य । यद्वा तस्य हृदि परमात्मा समाहितः स्थितो भवति ॥ ७ ॥ योगारूढस्य लक्षणं श्रैष्ठ्यं चोक्तमुपपाद्योपसंहरति—**ज्ञानविज्ञानतृप्तात्मेति**। ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य अतः कूटस्थो निर्विकारः अत एव विजितानि इन्द्रियाणि येन अत एव समानि लोष्टादीनि यस्य मृत्खण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ॥ ८ ॥

स० टी०—जितात्मनः स्वबन्धुत्वं विवृणोति रमापतिः ॥ सत्सु विक्षेपकेष्वेषु शीतोष्णादिषु यस्य नुः ॥ १ ॥ न जहाति समत्वं धीरात्मतत्त्वसमीक्षणात् ॥ जितेन्द्रियस्य शान्तस्य रागद्वेषपरिक्षयात् ॥ २ ॥ समाधिविषयस्तस्य स्वप्रकाशो हरिर्भवेत् ॥ नान्यस्येत्याशयो विष्णोस्तस्माच्छान्तो भवेन्मुनिः ॥ ३ ॥ संसारदुःखदृढकारणमाधिबीजं भ्रान्तेर्गृहं विविधकामभयादिमूलम् ॥ चित्तं नियन्तुमचिरात्प्रभवन्ति धीरा यत्पादपद्मनिरताः स हरिर्ममेष्टः ॥ ४ ॥ ७ ॥ शास्त्रोक्तानां पदार्थानां ज्ञानं स्यादौपदेशिकम् ॥ असंदिग्धविपर्यासं विज्ञानं स्वानुभूतितः ॥ १ ॥ जातालंप्रत्ययस्ताभ्यामात्मा चित्तं हि यस्य सः ॥ सान्निधानेऽपि भोगानां निर्विकारोऽतिधीरधीः ॥ २ ॥ व्यावर्तितानि भोगेभ्यो येन सर्वेन्द्रियाणि सः ॥ हेयोपादेयधीशून्यतया यस्य समानि च ॥ ३ ॥ मृत्पाषाणसुवर्णानि वीततृष्णो निजात्मवित् ॥ ईदृशो युक्तचित्तत्वाद्योगारूढ इतीर्यते ॥ ४ ॥ ८ ॥

भा० टी०—जितात्मनः स्वबन्धुत्वे फलमाह—**जितात्मन इति** । कार्यकारणसंघात आत्मा जितो येन स तस्य प्रशान्तस्य योगेन जितचित्तस्य योगारूढस्येति यावत् परमात्मा शुद्धस्तत्पदार्थः समाहितः साक्षादात्मभावेन वर्तते । स च जीवन्मुक्तो भवतीत्याह—**शीतेत्यादिना** । शीतोष्णसुखदुःखेषु तथा मानापमानयोः पूजापरिभवयोः समः स्यादित्यध्याहारः । सर्वं वाक्यं सावधारणमितिन्यायेन जितात्मनः प्रशान्तस्यैवेत्यर्थः । एतेन प्रशान्तस्यैव परं केवलमिति प्रत्युक्तम् । यत्तु शीतोष्णसुखदुःखेषु चित्तविक्षेपेषु सत्स्वपि तथा मानापमानयोः सतोरपि तेषु समत्वेनेति वा जितात्मन इति केचिद्वर्णयन्ति तत्रेन्द्रियेषु जाग्रत्सु शीतादेरस्तित्वं संभवत्येवेति सत्स्वपीत्याद्युक्तिररुचिग्रस्ता एतेन शीतादिषु प्राप्तेषु जितात्मनो निर्विकारचित्तस्य परमुत्कर्षेणात्मा समाहितः समाधिं प्राप्तो भवत्यतः समाधिसिद्ध्यर्थं मनो जेतव्यं भवतीत्यर्थ इति प्रत्युक्तम् । शीतादिषु अप्राप्तेषु किंचित्समाहितस्य प्राप्तेषूत्कर्षेणेत्यस्य विपर्ययरूपत्वात् जेतव्यस्य मनसः स्थितौ शीतादयोऽपि सन्त्येवेति प्राप्तेष्वित्यस्य व्यर्थत्वाच्च । यदप्येवंविधस्यात्मान्तःकरणं शीतादिषु द्वन्द्व-

शब्दवाच्येषु परमत्यर्थं समाहितः सहिष्णुरविक्रियो भवतीत्यर्थ इति तदपि न, मुख्यार्थे संभवत्यमुख्यार्थस्यान्याय्यत्वात् । यद्वा भाष्यस्योपलक्षणार्थत्वमङ्गीकृत्योदाहृतव्याख्यानान्युपादेयानि ॥ ७ ॥ शीतादिषु समो भवतीत्युक्तं तत्कुत इत्यत आह—ज्ञानेति । ज्ञानं शास्त्रोक्तानां धर्मादिरूपाणां पदार्थानां तत्त्वज्ञानं, विज्ञानं शास्त्रतो ज्ञातानां वेदोक्तो यादृशो धर्मादिस्तादृश एव तथा " तत्त्वमसि " इति श्रुत्यर्थानुसारेणाहं ब्रह्मास्मीत्यनुभवस्ताभ्यां तृप्त आत्मान्तःकरणं यस्य सः अतः कूटस्थोऽप्रकम्प्यः केनापि शीतादिना चालयितुमशक्यो भवतीत्यर्थः । नन्वन्तःकरणस्य ज्ञानविज्ञानतृप्तत्वेनाप्रकम्प्योऽपीन्द्रियाणामतृप्तत्वाद्विषयैरिन्द्रियद्वारा प्रकम्प्यो भविष्यतीति तत्राह—विजितेन्द्रियः अन्तःकरणस्येन्द्रियस्वामिनो जयादिन्द्रियाणामपि जय इति भावः । अत एव समलोष्टाश्मकाञ्चनः अत्राश्मशब्देन पाषाणसामान्यवाचिना तद्विशेषा वज्रवैदूर्यादयोऽपि गृह्यन्ते । समानि लोष्टादीनि यस्य स य ईदृशो योगी स युक्तः यथार्थयोगयुक्तः योगारूढ इत्युच्यत इत्यर्थः ॥ ८ ॥

प० टी०—अथ जितात्मनस्तस्मिन्बन्धुत्वं प्रकटयति—**जितात्मन इति** । जित आत्मा मनो येन तस्य प्रशान्तस्य रागादिरहितस्य परं केवलमात्मा शीतोष्णादिषु सत्स्वपि तथा मानावमानयोरुपस्थितयोः सतोरपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य ॥ ७ ॥ अथ योगारूढमुपपाद्योपसंहरति—**ज्ञानविज्ञानेति** । ज्ञानं शास्त्रगुरूपदिष्टं विज्ञानमनुभवस्ताभ्यां तृप्तो निरपेक्ष आत्मा चित्तं यस्यातः कूटस्थो निर्विकारोऽत एव विजितेन्द्रियोऽत एव समलोष्टाश्मकाञ्चनो मृत्पिण्डपाषाणसुवर्णेषु समः हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ॥ ८ ॥

श्री० टी०—ननु मनसो भगवतश्च वशीकरणे तावस्य बन्धू भवत इत्युक्तम् । केनोपकारेण तावस्य बन्धू आत्मना आत्मानमुद्धरेदिति आत्मोद्धारं कुरुत इत्युक्तमिति चेत्स एव क इत्यत आह—**जितेति** । जितात्मनः वशीकृतमनस्कस्य भक्त्या वशीकृतभगवत्स्वरूपस्य च प्रशान्तिर्भवति स्वत एव मनसो विषयेष्वप्रवृत्तिर्भवतीत्यर्थः । प्रशान्तस्य च परमात्मा सम्यगाहितो हृदि सन्निहितो भवति ध्यानविषयो भूत्वाऽपरोक्षविषयो भवतीत्यर्थः । संपूर्णयोगसिद्धिमद्रूपो योगारूढो भवतीति यावत् ॥ ७ ॥ यदा हि नेन्द्रियार्थेष्वित्यत्रापरोक्षिणो लक्षणोक्तावपीह लक्षणं स्पष्टयति—**शीतोष्णेत्यादिसार्धश्लोकद्वयेन** । शीतोष्णादिद्वन्द्वधर्मेषु कूटस्थः कूटमाकाशं तद्वत्तिष्ठतीति कूटस्थः उत्सेकानुत्सेकरूपविकारहीन इत्यर्थः । तत्र हेतुर्ज्ञानेत्यादि वेदादौ सर्वत्र विष्णोरुत्कर्षज्ञानं ज्ञानमित्युच्यते । तदवान्तरमाहात्म्यविशेषज्ञानं विज्ञानमित्युच्यते । यद्वा परोक्षापरोज्ञाने ज्ञानविज्ञानशब्दाभ्यां वाच्ये ताभ्यां तृप्तो विषयेष्वलंबुद्धिमान्विजितेन्द्रियश्च यतोऽतः कूटस्थः समलोष्टाश्मकाञ्चनः योगी योगं कुर्वन् युक्तः योगसंपूर्ण इत्युच्यते ॥ ८ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ॥
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

त० टी०—एतस्मादपि विशिष्टो भवतीत्याह—**सुहृदिति** । सुहृत् स्वसंबन्धोपकाराद्यनपेक्ष्य हिताशंसी, मित्रं स्नेहेन हितोपकारकः, अरिः सनिमित्तं निर्निमित्तं वाऽपकारकर्ता, उदासीनः हिताहितानाकाङ्क्षः मित्रारिभाववर्जितो वा विवदमानयोरुभयोरप्युपेक्षको वा, मध्यस्थो विवदमानयोर्हिताकाङ्क्षी, द्वेष्यः स्वभावतोऽनिष्टेप्सुः, बन्धुः संबन्धापेक्षोपकारकः, साधवः सदाचाराः, पापा दुराचाराः, एतेषु समा रागद्वेषशून्या बुद्धिर्यस्य स विशिष्यते, पूर्वोक्तादपि विशिष्टो भवति ॥ ९ ॥

म० टी०—सुहृन्मित्रादिषु समबुद्धिस्तु सर्वयोगिश्रेष्ठ इत्याह—**सुहृन्मित्रेति** । सुहृत्प्रत्युपकारमनपेक्ष्य पूर्वस्नेहं संबन्धं च विनैवोपकर्ता, मित्रं स्नेहेनोपकारकः, अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता, उदासीनो विवदमानयोरुभभोरप्युपेक्षकः, मध्यस्थो विवदमानयोरुभयोरपि हितैषी, द्वेष्यः स्वकृतापकारमपेक्ष्यापकर्ता, बन्धुः संबन्धेनोपकर्ता, एतेषु साधुषु शास्त्रविहितकारिषु पापेषु शास्त्रप्रतिषिद्धकारिष्वपि चकारादन्येषु च सर्वेषु समबुद्धिः कः कीदृक्कर्मेत्यव्यापृतबुद्धिः सर्वत्र रागद्वेषशून्यः विशिष्यते सर्वत उत्कृष्टो भवति । विमुच्यत इति वा पाठः ॥ ९ ॥

शं० टी०—ज्ञानविज्ञानपूर्णत्वं बाह्यपदार्थविवेकरहितत्वं हेयोपादेयबुद्धिशून्यत्वं विपरीतप्रत्ययैरकम्पितत्वं च योगारूढस्य लक्षणमिति प्रतिपाद्येदानीमपि सर्वत्र समदर्शनमेव ब्रह्मविदो योगारूढस्य जीवन्मुक्तस्य लक्षणमिति तदेव पुनर्द्रढयति—**सुहृदिति** । सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु प्रत्युपकारमनपेक्ष्यैवोपकर्ता सुहृत् ' ददाति प्रतिगृह्णाति ' इत्याद्युक्तलक्षणलक्षितं मित्रं, परोक्षापरोक्षयोरपकर्ताऽरिः शत्रुः, अप्रियवादित्वाद्द्वेष्टुं योग्यो द्वेष्यः, वादिप्रतिवादिनोः समो मध्यस्थः, सर्वत्रोपेक्षावानुदासीनः, बन्धवो बान्धवास्तेषु प्राणात्ययेऽपि ये स्वधर्मं न त्यजन्ति शास्त्रानुवर्तिनस्ते साधवस्तेष्वपि निषिद्धकारिणो दुराचाररताः पापास्तेषु च संन्यासात्पूर्वमुक्तगुणविशिष्टेष्वपि सुहृदादिपापिष्ठान्तेषु जनेषु योगारूढस्य ब्रह्मविदो यतेस्तत्तन्नामरूपजातिगुणक्रियाग्रहणेन विनैव समबुद्धिः सर्वत्र ब्रह्मबुद्धिर्विशिष्यते क्वचिदापाततो मृदि घटबुद्धिवत्पदार्थबुद्धौ जातायामप्युत्तरक्षणे तां बाधित्वा घटे मृद्बुद्धिवत्सर्वत्र ब्रह्मबुद्धिरेव विशेषायते ब्रह्मप्रत्यय एवाबाध्यमानः स्थिरीभवतीत्यर्थः । समबुद्धिर्विमुच्यत इति पाठे तु समबुद्धिरिति प्रथमान्तं पदं विशेषणं समा समाकारतामापन्ना सदा सर्वत्र ब्रह्ममात्रग्राहिणी बुद्धिर्यस्य स समबुद्धिर्विमुच्यते सुहृदादिषु सर्वत्र सदा ब्रह्मैव यः पश्यति स मुक्तो भवतीत्यर्थः ॥ ९ ॥

श्री० टी०—सुहृन्मित्रादिषु समबुद्धियुक्तस्ततोऽपि श्रेष्ठ इत्याह—**सुहृदिति** । सुहृत्स्वभावेनैव हिताशंसी, मित्रं स्नेहवशेनोपकारकः, अरिर्घातुकः, उदासीनो विवदमानयोरुभयोरप्युपेक्षकः, मध्यस्थो विवदमानयोरुभयोरपि हिताशंसी, द्वेष्यः द्वेषविषयः, बन्धुः संबन्धी, साधवः सदाचाराः, पापा दुराचाराः, एतेषु समा रागद्वेषादिशून्या बुद्धिर्यस्य स तु विशिष्टः ॥ ९ ॥

स० टी०—विना प्रत्युपकारेप्सामुपकर्ता सुहृत्स्मृतः ॥ स्नेहवान्मित्रमित्युक्तमरिः स्यादपकारकः ॥ १ ॥ उदासीनो द्वयोः पुंसोर्द्वेषाद्विवदमानयोः ॥ पक्षपातविहीनत्वादुभयोरप्युपेक्षकः ॥ २ ॥ मध्यस्थो यो हितान्वेषी द्वयोर्विवदमानयोः ॥ स्वस्याप्रियो भवेद्द्वेष्यः संबन्धी बन्धुरुच्यते ॥ ३ ॥ एतेषु शास्त्रविहितकर्मकारिषु साधुषु ॥ पापेषु शास्त्रमर्यादां समुल्लङ्घ्यप्रवर्तिषु ॥ ४ ॥ चादन्येष्वपि सर्वेषु समबुद्धिर्विमुच्यते ॥ कः किं कर्मेति धीशून्य उत्कृष्टः संमतो मम ॥ ५ ॥ ९ ॥

भा० टी०—न केवलं समलोष्टाश्मकाञ्चन इति अपि तु सुहृदादिष्वपि समबुद्धिरित्याह—**सुहृदिति** । सुहृत्प्रत्युपकारमनपेक्ष्योकर्ता, मित्रं स्नेहादिमपेक्ष्य तत्कर्ता, अरिः शत्रुः खड्गहस्तो मारणायोद्यतः, उदासीनः पक्षपातशून्यः, मध्यस्थो विरोधं कुर्वतोर्द्वयोरपि हितैषी, द्वेष्योऽपकर्तृत्वाद्द्वेषविषयः, बन्धुर्भ्रात्रादिः संबन्धीत्येतेषु साधुषु शास्त्रानुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः सुहृदादिः किमुपकारादिकर्मकर्तेत्यव्यापृतबुद्धिरित्यर्थः । विशिष्यते सर्वतः श्रेष्ठो भवतीत्यर्थः । विमुच्यत इति वा पाठः ॥ ९ ॥

प० टी०—अथ समबुद्धित्वमेव विशिनष्टि—**सुहृदिति** । सुहृत्स्वभावेनैव हिताशंसी, मित्रं स्नेहवशेनैवोपकारकः, अरिर्घातकः, उदासीनो विवदमानयोरुभयोरप्युपेक्षकः, मध्यस्थस्तयोरुभयोरपि हिताशंसी, द्वेष्टुं योग्यो द्वेष्यः, बन्धुः संबन्धी, साधवः सदाचाराः, पापा दुराचारा एतेषु समा रागद्वेषरहिता बुद्धिर्यस्य स विशिष्यते विशिष्टो भवति ॥ ९ ॥

रा० टी०—स एव च सुहृदादिषु समा भगवद्विषयिणी बुद्धिर्यस्य स समबुद्धिर्योगारूढः योगिवर्गात्स्वर्वस्माद्विशिष्यत इति। सुहृदादिषु सर्वत्रस्थितहरिरूपाणां गुणादिषु तारतम्यं नेति बुद्धिर्वा सुहृदि सुहृत्त्वमेव मित्रादिषु मित्रत्वादिकमेव ददाति न तु सुहृदि मित्रत्वं मित्रादौ सुहृत्त्वादिकमिति वैषम्येणातः सुहृदादौ सुहृत्त्वादिकमीशकृतमेव न स्वतन्त्रमिति वा भगवद्विषये समबुद्धिः। यद्वा सुहृदादिजीवविषये समा बुद्धिर्यस्येत्यर्थः। तेषु समबुद्धित्वं नाम यत्सुहृत्त्वमित्रत्वादिकमस्ति तन्न स्वरूपान्तर्गतं किंत्वन्तःकरणोपाधिकमेव देवदानवमानवभेदेन स्वतो विषमाणां चैतन्यस्वभावत्वमेव सममिति बुद्धिमत्त्वमेवेति ज्ञेयम्। अथवा सुहृदादिषु विषये शास्त्रेषु यथा यथा वृत्तिर्विहिता तथा तथा वर्तनं वर्तनज्ञानं वा सुहृदादिजीवेषु समबुद्धिर्ध्येया। प्रत्युपकारानिरपेक्षोपकारकृत् सुहृत्, क्लेशस्थानं विज्ञाप्य ततो रक्षाकृन्मित्रं, वधादिकर्ताऽरिः, कर्तव्ये उपकारे अपकारे च य उदास्ते स उदासीनः, उपकारापकारोभयकृन्मध्यस्थः, अवाञ्छितकृद्द्वेष्यः, बन्धुरुपकर्ता॥ ९॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥

त० टी०—एवं योगारूढस्य लक्षणमुक्तमिदानीं तस्य साङ्गं योगं विधत्ते—योगी युञ्जीतेत्यारभ्य स योगी परमो मत इत्यन्तेन ग्रन्थेन। योगी योगारूढः सततमहरहर्योगसमये आत्मानं मनो युञ्जीत युक्तं कुर्वीत स्वस्वरूपानुभवार्थं समाहितं कुर्यादित्यर्थः। रहसि विक्षेपहेतुजनवर्जिते गिरिगुहादौ देशे स्थितः एकाकी जनान्तरवर्जितः यतचित्तात्मा यतं चित्तमात्मा देहश्च येन निराशीर्वस्त्वन्तरमात्रे निस्पृहः अत एवापरिग्रहः संग्रहशून्यः॥ १०॥

म० टी०—एवं योगारूढस्य लक्षणं फलं चोक्त्वा तस्य साङ्गं योगं विधत्ते—योगीत्यादिभिः स योगी परमो मत इत्यन्तैस्त्रयोविंशत्या श्लोकैः। तत्र एवमुत्तमफलप्राप्तये योगीति योगी योगारूढः आत्मानं चित्तं सततं निरन्तरं युञ्जीत क्षिप्तमूढविक्षिप्तभूमिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समाहितं कुर्यात् रहसि गिरिगुहादौ योगप्रतिबन्धकदुर्जनादिवर्जितदेशे स्थितः एकाकी त्यक्तसर्वगृहपरिजनः संन्यासी चित्तमन्तःकरणमात्मा देहश्च संयतौ योगप्रतिबन्धकव्यापारशून्यौ यस्य स यतचित्तात्मा यतो निराशीर्वैराग्यदार्ढ्येन विगततृष्णः अत एव चापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगप्रतिबन्धकेन परिग्रहेण शून्यः॥ १०॥

शं० टी०—यतो योगारूढस्यैवाप्रतिबद्धज्ञानं सर्वत्र ब्रह्मदर्शनं मुक्तिश्च नान्यस्यातो मुमुक्षुणा श्रवणमननाभ्यां विज्ञातात्मतत्त्वेन यतिनैतावन्मात्रेणैव कृतार्थोऽस्मीत्यस्मितां त्यक्त्वा ज्ञानस्याप्रतिबद्धत्वाय समाधिरवश्यं कर्तव्य इति तत्कर्तुः समाध्यङ्गानि सूचयन्समाधिं विदधाति—योगीति। योगी "संन्यासयोगाद्यतयः शुद्धसत्त्वाः" इति श्रवणात्संन्यासी। यद्वा ब्रह्मणि चित्तं योक्तुं स्थापयितुं शीलमस्यास्तीति योगी योगाभ्यासशीलो यतिरेकाकी एकाकीति विशेषणान्निदिध्यासोः 'एकस्तपो द्विरध्यायी' इतिन्यायेन स्वातिरिक्तजनशून्यत्वं विवक्षितं सति जनान्तरे वाग्व्यापारप्रसक्त्या ध्याननिष्ठाभङ्गप्रसङ्गात्तत एकाकित्वेन भवितव्यम्। किंच निराशीः सर्वाभ्य आशीर्भ्यो विषयभोगाशाभ्यस्तीव्रमोक्षेच्छावैराग्याभ्यां निर्गतो यः स निराशीः 'एकान्तवासो लघुभोजनादि मौनं निराशा करणावरोधः। मुनेरसोः संयमनं षडेते चित्तप्रसादं जनयन्ति शीघ्रम्' इतिन्यायेन निदिध्यासोर्देहजीवनादावप्याशाराहित्येन भवितव्यमिति सूचितम्। किंच अपरिग्रहः कौपीनकन्थातिरिक्तः परिग्रहो यस्य नास्ति सोऽपरिग्रहः सति तदतिरिक्ते परिग्रहे यतेरपि चौरादिभयं तद्रक्षणविक्षेपप्रसक्त्या समाध्यसिद्धेस्ततस्तद्राहित्येन भावितव्यम्। एवं योगस्य बहिरङ्गसिद्धावप्यन्तरङ्गाभावे योगो न सिध्यत्यतस्तेन भवितव्यमित्याशयेनाह—यतचित्तात्मेति। यतो वासनया

प्राप्ततत्तद्व्यापृतेः सकाशान्निगृहीतौ चित्तं चात्मदेहेन्द्रियसंघातश्च तावुभौ येन स यतचित्तात्मा तत्तद्व्यापारान्निरुद्धदेहेन्द्रियमनोबुद्धिचित्त इत्यर्थः । एवमादिध्यानसाधनसंपन्नो मुमुक्षुर्निदिध्यासुः स्वयं रहस्येकान्ते गिरिकुहरगुहादौ स्थितः सततं नित्यनिरन्तरं नियमेनात्मानं मनः प्रत्यगभिन्ने परे ब्रह्मणि सर्वदृश्यनिषेधावधिभूते नाज्ञानतत्कार्ये, किंतु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयमित्युक्तलक्षणे स्वात्मनि युञ्जीत संदधीत ब्रह्मैवाहमहमेव ब्रह्मेति स्वात्मना ब्रह्मानुसंदध्यादित्यर्थः ॥ १० ॥

श्री० टी०—एवं योगारूढस्य लक्षणमुक्त्वेदानीं तस्य साङ्गयोगं विधत्ते योगीत्यादिना स योगी परमो मत इत्यन्तेन ग्रन्थेन । **योगीति** । योगी योगारूढः आत्मानं मनः युञ्जीत समाहितं कुर्यात् सततं निरन्तरं रहसि एकान्ते स्थितः सन्नेकाकी सङ्गशून्यः यतं संयतं चित्तं आत्मा देहश्च यस्य निराशीः निराकाङ्क्षः निराहारो वा अपरिग्रहः परिग्रहशून्यश्च ॥ १० ॥

स० टी०—अत उत्कृष्टतासिद्ध्यै यतितव्यमितीर्यते ॥ श्रुत्वा वेदान्तवाक्येभ्यो मत्वा सदुपपत्तिभिः ॥ १॥ आत्मतत्त्वं ततस्तस्मिन्निदिध्यासनतत्परः ॥ चित्तं समाहितं कुर्यान्नित्यमेकान्तदेशगः ॥ २ ॥ त्यक्त्वा विक्षेपकारित्वात्समस्तं ममतास्पदम् ॥ संयतौ चित्तदेहौ च येन सोऽत्यन्तनिश्चलः ॥ ३ ॥ परवैराग्यदाढर्येन निराशीर्वीततृष्णकः ॥ चित्तविक्षेपकत्यागी योगी त्यक्तपरिग्रहः ॥ ४ ॥ १० ॥

भा० टी०—एवं योगारूढस्य लक्षणं फलं च प्रदर्शितम्, अत उत्तमफलप्राप्तये योगारूढतां संपादयेदित्याह—**योगीति** । योगी ध्यानी रहसि एकान्ते गिरिगुहादौ स्थितः सन् एकाकी सहायवर्जितः रहसि स्थित एकाकीतिविशेषणात्संन्यासं कृत्वेत्यर्थः । एकाकीत्यस्य शिष्यादिसहायरहित इत्यपि बोध्यम् । यतौ वशीकृतौ चित्तात्मानौ चित्तदेहौ यस्य स चित्तस्य चिन्तनात्मनोऽन्तःकरणपरिणामस्य यतत्वमनुभूतार्थचिन्ताव्यावृत्तत्वं देहस्य च यतत्वं मक्षिकादंशपिपीलिकादिबाधयाप्यकम्पितत्वे सति चिरकालासनप्रयुक्तदुःखशून्यत्वं, निराशीः फलतृष्णाशून्यः अनेन वैराग्यादिसाधनसंपन्नो मुमुक्षुः कथितः । अपरिग्रहः संन्यासित्वेऽपि चोरभयजनकपुस्तकादिसर्वपरिग्रहशून्यः एतादृशः सन् सततं सर्वदा आत्मानमन्तःकरणं युञ्जीत समादध्यात् वृत्तिनिरोधेन निरुन्ध्यात् । वृत्तयश्च पञ्चविधाः 'प्रमाणविपर्ययविकल्पनिद्रास्मृतय' इति । तत्र प्रत्यक्षानुमानागमाख्यानि त्रीणि प्रमाणानीति सांख्यादयः । उपमानमप्यङ्गीकृत्य चत्वारीति गौतमाः । अर्थापत्तिमनुपलब्धिं चाश्रित्य षडिति वेदान्तिनो याज्ञिकाश्च । संभवमैतिह्यं चाश्रित्याष्टाविति पौराणिकाः । विपर्ययो मिथ्याज्ञानमतस्मिँस्तद्बुद्धिः शुक्तिर्वा रजतं वेत्येवमादिरूपः प्रमाभ्रमविलक्षणो विकल्पः । निद्रास्मृती लोकप्रसिद्धे । अन्यासामपि वृत्तीनामेतास्वन्तर्भावो द्रष्टव्यः । तथाचैतद्वृत्तिनिरोधेनान्तःकरणं चित्तं समादध्यादिति ॥ १० ॥

प० टी०—एवं योगारूढत्वदशां निरूप्येदानीं योगी युञ्जीत इत्यादितस्तथा स योगी परमो मत इत्यन्ततश्चतुर्विंशतिभिः श्लोकैः साङ्गमभ्यासयोगं निरूपयति—**योगीति** । योगशास्त्रे तावद्योगत्रयमुपदिष्टम् । तत्र प्राणापानयोगो मनःपवनयोगो जीवब्रह्मणोर्योगश्च एतत्क्रमेण योगत्रयं प्राप्तुमिच्छुरात्मानं मनः सततं युञ्जीत समाहितं कुर्यात् । अथ चित्तक्षोभकाभावसामग्रीमनुवदति—रहस्येकान्ते एकाकी सङ्गशून्यो यतं नियमितमात्मा शरीरं येन निराशीर्निराकाङ्क्षोऽपरिग्रहः परिग्रहशून्यः ॥ १० ॥

रा० टी०—उद्धरेदित्यादिना विहितं ध्यानयोगमनूद्य तत्प्रकारमाह—**योगीति** । योगी ज्ञानोपायमनुतिष्ठन्नात्मानं मनः युञ्जीत भगवन्निष्ठं कुर्यात् । समाधियुक्तं कुर्यादिति यत्तत् सततं निरन्तरं रहसि स्थित एकाकी सङ्गशून्यः यतं नियमितं चित्तं मनः आत्मा देहश्च यस्य स यतचित्तात्मा निराशीः कामनाहीनः परिग्रहोज्झश्च भूत्वा कुर्यादिति ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥

त० टी०—तत्र तावत्तदुपयोग्यासनमाह—**शुचाविति** द्वाभ्याम् । शुचौ अशुचिभिर्म्लेच्छादिभिः संसर्गवर्जिते अशुचिवस्तुभिरस्पृष्टे च स्वभावसंस्कारादिना शुद्धे देश आत्मनः आसनं प्रतिष्ठाप्य प्रकर्षेण स्थापयित्वा, कथंभूतं स्थिरमचलं नात्युच्छ्रितं नात्युच्चं न चातिनीचं, चैलं शुद्धवस्त्रम्, अजिनं मृगादिचर्म, ते कुशेभ्य उत्तरे यस्मिन् तत्, भूमौ कुशमयं तदुपरि मृगचर्म तदुपरि वस्त्रमित्येवंरूपमित्यर्थः ॥ ११ ॥

म० टी०—तत्रासननियमं दर्शयन्नाह द्वाभ्याम्—**शुचौ देश इति** । शुचौ स्वभावतः संस्कारतो वा शुद्धे जनसमुदायरहिते निर्भये गङ्गातटगुहादौ देशे समे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्चं नाप्यतिनीचं चैलाजिनकुशोत्तरं चैलं मृदुवस्त्रं, अजिनं मृदु व्याघ्रादिचर्म, ते कुशेभ्य उत्तरे उपरितने यस्मिँस्तत् आस्यतेऽस्मिन्नित्यासनं कुशमयवृस्युपरि मृदुचर्म तदुपरि मृदुवस्त्ररूपमित्यर्थः । तथाचाह भगवान् पतञ्जलिः ‘ स्थिरसुखमासनम् ’ इति । आत्मन इति परासनव्यावृत्त्यर्थं तस्यापि परेच्छानियमाभावेन योगविक्षेपकरत्वात् ॥ ११ ॥

शं० टी०—पूर्वं योगस्य बहिरङ्गमन्तरङ्गं च संक्षेपेणोक्त्वेदानीं देशासनशरीरधारणादीनि बहिरङ्गान्यन्तरङ्गानि च योगस्य विशिष्य बोधयितुमादावासनलक्षणमाह—**शुचाविति** । शुचौ मार्जनप्रोक्षणादिक्रियया स्वभावेन वा शुद्धे विजने देशे प्रदेशे नदीतीरगुहादावात्मनः स्वस्यैव ध्यानयोग्यमासनं नात्युच्छ्रितमत्यन्तौन्नत्यरहितम्, अत्युन्नतत्वे कचित्पारवश्येन चलनपतनादिविघ्नप्रसङ्गात्ततो नातितुङ्गं नातिनीचमनिम्नं च तथात्वे शैत्यौष्ण्यपाषाणादिघर्षेण क्लेशप्रसङ्गात्ततस्तदुभयविलक्षणं तत्रापि चैलाजिनकुशोत्तरं चैलं वस्त्रमजिनं वैयाघ्रं कार्ष्णं वा कुशा दर्भा उत्तरमुपर्युपरि व्युत्क्रमेण यस्य तच्चैलाजिनकुशोत्तरमधः कुशैस्ततोऽजिनेन ततो वस्त्रेणाच्छादितमित्यर्थः । वस्त्रं यद्यपि स्मृत्या निषिद्धं ‘ वस्त्रं दारिद्र्यदुःखाय दारु रोगाय चोपलः ’ इति तद्गृहस्थविषयं न यतिविषयमिति द्रष्टव्यम्, ध्याता स्वस्यैवमासनमचलं स्थिरं निश्चलं यथा तथा प्रतिष्ठाप्य कल्पयित्वेत्यर्थः ॥ ११ ॥

श्री० टी०—आसननियमं दर्शयन्नाह—**शुचाविति** द्वाभ्याम् । शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थिरमचलं नातीवोन्नतं न चातिनीचं चैलं वस्त्रमाजिनं व्याघ्रादिचर्म चैलाजिने कुशेभ्य उत्तरे यस्मिन्, कुशानामुपरि चर्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ॥ ११ ॥

म० टी०—आसनाहारनियमानाहेदानीं जगद्गुरुः ॥ स्वभावतः संस्काराद्वा शुद्धे देशे स्थिरं बुधः ॥ १ ॥ प्रतिष्ठाप्यासनं स्वस्य नात्युच्चं नातिनीचकम् ॥ कौशीं बृसीं समास्तीर्य मृदु चर्म कुशोपरि ॥२॥ चर्मोपरि मृदु स्वच्छं वस्त्रमास्तीर्य योगिराट् ॥ ३ ॥ ११ ॥

भा० टी०— एवं पूर्वोक्तलक्षणसंपन्नस्य योगारूढस्य यत्फलं भवति तत्प्राप्तये योगारूढतां संपादयेदित्युक्तम् । अथेदानीं योगं युञ्जानस्य तदङ्गान्यासनाहारविहारादीनि नियतानि फलं च सर्वतः श्रेष्ठयं मुक्तिलक्षणं वक्तुमारभते—**शुचावित्यादिना** । शुचौ शुद्धे स्वभावतः संस्कारवतो वा देशे स्थाने विविक्ते आत्मनः स्वस्यासनं स्थिरमचलं नात्युच्छ्रितं नाप्यतिनीचं तच्च चैलादीन्युत्तरे यस्मिंस्तत् आदौ कुशानां स्थापनं तदुपर्यजिनं मृगचर्म तदुपरि चैलं मृदुवस्त्रमित्येतादृशमासनं प्रतिष्ठाप्य चतुष्कोणादिसंनिवेशविचारेण कृत्वा आत्मन इत्यनेन स्वस्यैवोपशमयोग्यमित्युक्तं तेनान्यस्थितिप्रयुक्तविक्षेपप्रसक्तिर्वारिता ॥ ११ ॥

१ चेलेति रा. पाठः ।

प० टी०—अथासननियमं दर्शयति—शुचौ देश इति द्वाभ्याम् । शुचौ पवित्रे तीर्थादिसंनिहिते देशे शीतलतरुच्छायाम्बुप्रवाहमनोरमे प्रदेश आत्मनः स्वस्य स्थिरमचलं मूषककीटकाद्युपद्रवशून्यं यथा भवति तथासनं प्रतिष्ठाप्य किंभूतं नात्युच्छ्रितं नात्युच्चं कदापि पतनसंभवात् तथा नातिनीचं भूसंघट्टनेन गात्रोपद्रवादतो मध्यस्थमित्यर्थः । अथासनरचनामाह—चैलेति । चैलं वस्त्रम् , अजिनं व्याघ्रादिचर्म, चैलाजिने कुशेभ्य उत्तरे उपरि स्थिते यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमित्यर्थः ॥ ११ ॥

रा० टी०—पुनर्ध्यानप्रकारमेवाह—शुचावित्याद्यनेकश्लोकैः । शुचौ देशे मनःप्रसादहेतुभूतदेशोपलक्षणमेतत् चेलं वस्त्रमजिनं व्याघ्रादिचर्म कुशो दर्भ उत्तरमुपरि यस्य तत्तथा नात्युच्छ्रितं नातिनीचं न समासः । एवंभूतमासनं स्थिरं यथा भवति तथात्मनः प्रतिष्ठाप्य ॥ ११ ॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ॥
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

त० टी०—तत्रेति । तत्र तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा यताः संयता उपरताश्चित्तस्येन्द्रियाणां च क्रिया येन सः आत्मविशुद्धये बन्धविमुक्तये योगं युञ्ज्यात् अभ्यसेत् ॥ १२ ॥

म० टी०—एवमासनं प्रतिष्ठाप्य किं कुर्यादिति तत्राह—तत्रेति । तत्र तस्मिन्नासने उपविश्यैव न तु शयानस्तिष्ठन्वा 'आसीनः संभवात्' इति न्यायात् । यताः संयता उपरताश्चित्तस्येन्द्रियाणां च क्रियावृत्तयो येन स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युञ्जीताभ्यसेत् । किमर्थं आत्मविशुद्धये आत्मनोऽन्तःकरणस्य सर्वविक्षेपशून्यत्वेनातिसूक्ष्मतया ब्रह्मसाक्षात्कारयोग्यतायै " दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः " इति श्रुतेः । किं कृत्वा योगमभ्यसेदिति तत्राह—एकाग्रं राजसतामसव्युत्थानाख्यप्रागुक्तभूमित्रयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तियुक्तमुद्रिक्तसत्त्वं मनः कृत्वा दृढभूमिकेन प्रयत्नेन संपाद्य एकाग्रताविवृद्ध्यर्थं योगं संप्रज्ञातसमाधिमभ्यसेत् स च ब्रह्माकारमनोवृत्तिप्रवाह एव निदिध्यासनाख्यः । तदुक्तम् ' ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना । संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः ' इति । एतदेवाभिप्रेत्य ध्यानाभ्यासप्रकर्षं विदधे भगवान् योगी युञ्जीत सततं, युञ्ज्याद्योगमात्मविशुद्धये, युक्त आसीत मत्परः, इत्यादिबहुकृत्वः ॥ १२ ॥

शं० टी०—एवमासनमुक्त्वा तत्र कर्तव्यमाह—तत्रेति । निदिध्यासुस्तत्रोक्तलक्षण आसने उपविश्य स्वयं यतचित्तेन्द्रियक्रियः इदमेव योगिनो योगसिद्धेरुत्तममन्तरङ्गसाधनमित्युक्तमपि पुनरुपदिशति—यतचित्तेन्द्रियक्रिय इति । यता संयता सम्यङ्निरुद्धा चित्तस्योभयेन्द्रियाणां च क्रिया स्वाभाविकी चेष्टा विषयप्रवृत्तिर्येन स यतचित्तेन्द्रियक्रियो भूत्वा मनो मनोवृत्तिस्तामेकाग्रं लक्ष्यस्यैवाभिमुखं कृत्वा सम्यक् प्रत्यक्प्रवणं कृत्वेत्यर्थः । एवंलक्षणसंपन्नो यतिरात्मविशुद्धये आत्मनो विशुद्धिरविद्या तत्कार्यदेहेन्द्रियादावन्यत्राहंममेदमित्याद्यसत्प्रत्ययानां तत्कारणवासनानां च निःशेषनिवृत्तिरेवात्मनोऽन्तःकरणस्य विशुद्धिस्तस्सिद्धये योगं ब्रह्मण्येवात्मभावेन पुरुषं योजयतीति योगः समाधिस्तं युञ्ज्यात् प्रत्यक्प्रत्ययसंतानं कुर्यादित्यर्थः ॥ १२ ॥

श्री० टी०—तत्रेति । तत्र तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यात् अभ्यसेत् यताः उपरताः चित्तस्येन्द्रियाणां च क्रिया यस्य स आत्मनो मनसो विशुद्धये उपशान्तये ॥ १२ ॥

स० टी०—उपविश्यासने तस्मिन्मनः संयम्य सर्वतः ॥ कृत्वैकाग्रं सचित्तानामिन्द्रियाणां च वृत्तयः ॥ ॥ १ ॥ सम्यगुपरता यस्य स समाधिं समभ्यसेत् ॥ निर्विक्षेपतया ब्रह्मसाक्षात्कारैकसिद्धये ॥ २ ॥ न शयानो न वा तिष्ठन्नुपविश्येतिशब्दतः ॥ ३ ॥ १२ ॥

भा० टी०—तत्रासनं प्रतिष्ठाप्य तत्रासन उपविश्यात्मशुद्धयेऽन्तःकरणशुद्धये यत्त्वात्मनः प्रतीचो विशुद्धिः सविलासाविद्यापङ्कसंपर्कहानिस्तस्या इत्यर्थ इति तन्न, अविद्यापङ्कनिवृत्तेर्ज्ञानाधीनत्वात् ज्ञानप्राप्तिद्वारा प्रतीचो विशुद्धय इति द्वारकल्पनापेक्षयान्तःकरणविशुद्ध्यर्थमित्यस्यैव न्याय्यत्वात् । योगं युञ्ज्यात् । कथमित्यत आह—सर्वविषयेभ्य उपसंहृत्य मनः एकमग्रं प्रधानं चिन्तनीयं यस्येति तथा कृत्वा क्षिप्तमूढविक्षिप्तभूमित्यागेन एकाग्रनिरोधभूमिभ्यां समाहितं कृत्वेत्यपि बोध्यम् । पुनश्च यतचित्तेन्द्रियक्रियः सन् चित्तं चेन्द्रियाणि च तेषां क्रियाः संयता यस्य सः ॥ १२ ॥

प० टी०—तत्रेति । तत्र तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यात् । किंभूतो यताश्चित्तेन्द्रियक्रिया येन स तथात्मनो मनसः शुद्धय उपशान्तये ॥ १२ ॥

रा० टी०—तत्रासने उपविश्य । तदाह सूत्रे—'आसीनः संभवात्' इति । यतचित्तेन्द्रियक्रियः सन् एकाग्रं मनः कृत्वा आत्मनो मनसो विशुद्धये सर्वमलदाहाय स्वस्य संसारमलनिवृत्तये वा योगं ध्यानयोगं युञ्ज्यात् कुर्यादिति विध्यनुवादेन प्रकारोक्तिरियम् ॥ १२ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

त० टी०—एवमासनमुक्त्वा ध्यानोपयोगिशरीरधारणप्रकारमाह—सममिति । कायोऽत्र देहमध्यभागो विवक्षितः शिरोग्रीवेति पृथग्ग्रहणात् । कायशिरोग्रीवं सममवक्रमचलमकम्पं धारयन् स्थिरः दृढः सन् स्वं स्वकीयं नासाग्रं संप्रेक्ष्य दिशश्चानवलोकयन्नासीतेत्युत्तरेणान्वयः ॥ १३ ॥

म० टी०—तदर्थं बाह्यमासनमुक्त्वाऽधुना तत्र कथं शरीरधारणमित्युच्यते—**समं कायेति** । कायः शरीरमध्यं स च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं सममवक्रं, अचलमकम्पं धारयन्नेकतत्त्वाभ्यासेन विक्षेपसहभाव्यङ्गमेजयत्वाभावं संपादयन् स्थिरः दृढप्रयत्नो भूत्वा । किंच स्वं स्वीयं नासिकाग्रं संप्रेक्ष्यैव लयविक्षेपराहित्याय विषयप्रवृत्तिरहितोऽर्धनिमीलितनेत्र इत्यर्थः । दिशश्चानवलोकयन् अन्तरान्तरा दिशां चावलोकनमकुर्वन् योगप्रतिबन्धकत्वात्तस्य । एवंभूतः सन्नासीतेत्युत्तरेण संबन्धः ॥ १३ ॥

शं० टी०—पुनरपि योगाङ्गान्येव सिद्धेरान्तराण्युपदिशन्नेवंलक्षणः सन्नेव यतिः समाधिं कुर्यादित्याह—सममिति द्वाभ्याम् । कायशिरोग्रीवं कायः कटेरूर्ध्वप्रदेशः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं समम् ऋज्वचलं च यथा स्यात्तथा धारयन् कायशिरोग्रीवे समतया ऋजुत्वेन धार्यमाणे पार्श्वयोः पश्चाच्च द्रष्टुं स्प्रष्टुं च न शक्यते तथापि मशकपिपीलिकाद्युपद्रवे चलनं संभवति तन्निरासार्थमचलमित्युक्तम् । एवं कायशिरोग्रीवमृज्वचलं च धारयन् स्थिरः स्थाणुवन्निश्चलो भूत्वा स्वं स्वकीयं नासिकाग्रमेव चक्षुषा संप्रेक्ष्य चक्षुषा नासिकाग्रं संप्रेक्ष्येत्युक्तिश्चक्षुषा तद्विषयं रूपं न गृह्णीयादिति नियमार्थं न तु नासिकाग्रदर्शनार्थं, यदि नासिकाग्रदर्शनमेव विवक्षितं स्यात्तदा मनस्तदाकारेण तत्रैव स्थितं स्यात्तेन चित्तस्य ब्रह्मण्यवस्थानं न संभवति ब्रह्मणि चित्तस्थापनं खलु समाधिर्यत आत्मसंस्थं मनः कृत्वेत्युच्यते, ततश्चक्षुषा नासिकाग्रदर्शनविधौ रूपाग्रहणसूचनार्थमेव चक्षुषोश्चाञ्चल्यार्थं च तेन सिद्धं चक्षुषो यथा रूपाग्रहणं तथा श्रोत्रादीनामपि शब्दाद्यग्रहणमत्र विवक्षितमिति ज्ञातव्यम् । चक्षुषो रूपाग्रहणविधानादेव निदिध्यासुं नियमयति—दिशश्चानवलोकयन्निति । यद्यपि नासिकाग्रदर्शनविधिनैव तदतिरिक्तदर्शनं निषिद्धमेव भवति तथापि क्वचित्पुरस्तात्पश्चात्पार्श्वयोर्विपरीतशब्दोत्पत्तावपि दिशश्च प्राच्यादीश्चकारादात्मशरीरं चानवलोकयन्नेव युक्त आसीतेत्युत्तरेण संबन्धः ॥ १३ ॥

श्री० टी०—चित्तैकाग्र्योपयोगिनीं देहादिधारणां दर्शयन्नाह—**सममिति** द्वाभ्याम् । काय इति देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं सममवक्रमचलं निश्चलं धारयन् स्थिरः दृढप्रयत्नो भूत्वेत्यर्थः । स्वकीयं नासिकाग्रं संप्रेक्ष्येति च अर्धनिमीलितनेत्र इत्यर्थः । इतस्ततो दिशश्चानवलोकयन्नासीतेत्युत्तरेणान्वयः ॥ १३ ॥

स० टी०—उक्त्वासनं योगसिद्ध्यै देहधारणमुच्यते ॥ समं कृत्वा शिरो ग्रीवां कायमध्यं सुनिश्चलम् ॥ १ ॥ मूलाधारात्समारभ्य मूर्धान्तं धारयन् स्थिरम् ॥ सुदृढप्रयत्नो भूत्वा निष्कम्पो योगतत्परः ॥ २ ॥ लयविक्षेपशान्त्यर्थं नासिकाग्रमवेक्ष्य च ॥ कृत्वेव दर्शनं सम्यगिवशब्दस्य लोपनात् ॥ ३ ॥ नासासंप्रेक्षणं नात्र विवक्षितमितीशितुः ॥ दिग्वीक्षणमकुर्वंश्च योगस्य प्रतिबन्धकम् ॥ ४ ॥ एवंभूतः स आसीतेत्युत्तरेणान्वयो मतः ॥ ५ ॥ १३ ॥

भा० टी०—आसन उपविश्य शरीरं कथं स्थापयेदिति तत्राह—**सममिति** । कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन् । कायशब्देन कायस्यैकदेशः कटिप्रदेशादूर्ध्वो ग्रीवावधिरत्र गृह्यते शिरोग्रीवयोः पृथग्ग्रहणात् कट्यधोभागस्योपवेशने समत्वायोगात् । समत्वेऽपीतस्ततश्चलनं संभाव्याह—अचलमिति । उभयत्राप्युपायमाह—स्थिर इति । स्थिरो भूत्वेत्यर्थः । अत्राप्युपायं लयविक्षेपनिवृत्तिद्वारकमाह—स्वं स्वकीयं नासिकाग्रं संप्रेक्ष्यानेन लयनिवृत्तिः । दिशश्चानवलोकयन् अनेन विक्षेपनिवृत्तिः । एवंभूत आसीतेत्युत्तरेणान्वयः ॥ १३ ॥

प० टी०—अथ चित्तैकाग्र्योपयोगिनीं देहधारणामाह—**सममिति** द्वाभ्याम् । कायं देहमध्यः शिरश्च ग्रीवा चेति समाहारः कायशिरोग्रीवं सममवक्र यथा भवति तथा धारयन् धारणां कुर्वन् आसीतेत्युत्तरेणान्वयः । अयमर्थः योगशास्त्रप्रकारेणासनोपवेशे गुदलिङ्गान्तरे स्थितादाधारचक्रान्मूलबन्धादिबन्धत्रयसिद्धावाधिव्याधिमनोवेगोपशमे सति कायग्रीवाशिरसां समत्वं स्थाणुवदृजुत्वमचलत्वं च भवति । एवं देहधारणामुक्त्वा दृष्टिधारणामाह—दिश इति । दिशः समन्ततोऽनवलोकयन्नपश्यन् । तर्हि देहदृष्टिरवशिष्टा तामपि निषेधयति—स्वं नासिकाग्रं संप्रेक्ष्य अनेन चित्तैकाग्र्योपलक्षणमुदितम् ॥ १३ ॥

रा० टी०—कायशिरोग्रीवं कायो मध्यदेहः स च शिरश्च ग्रीवा च प्राण्यङ्गत्वाद्द्वन्द्वैकवद्भावः । सममृजुं धारयन् अचलं यथा तथा स्थिरो दृढः स्वं नासिकाग्रं संप्रेक्ष्य दिशश्चानवलोकयन् युञ्ज्यादिति पूर्वेण वा, युक्त आसीतेत्युत्तरेण वान्वयः ॥ १३ ॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

त० टी०—प्रशान्त आत्मा चित्तं यस्य विगतभीरकुतश्चिद्भयः । ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः । उपस्थस्य संयमो ब्रह्मचर्यं तच्चाष्टविधमैथुनत्यागादष्टविधम् । तच्चोक्तम् 'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेव प्रकीर्तितम् ' इति । तस्मिन् स्थितः सन्मनः संयम्य विषयेभ्यस्तद्वृत्तीः प्रत्याहृत्य मय्येव चित्तं यस्य स मच्चित्तस्तथा मत्परः अहमेवानन्दघनः परः पुरुषार्थो यस्य स मदेकविषयचित्तवृत्तिभिर्युक्त आसीतोपविशेत् ॥ १४ ॥

म० टी०—किंच—**प्रशान्तात्मेति** । निदाननिवृत्तिरूपेण प्रकर्षेण शान्तः रागादिदोषरहित आत्मान्तःकरणं यस्य स प्रशान्तात्मा शास्त्रीयनिश्चयदार्ढ्याद्विगता भीः सर्वकर्मपरित्यागेन युक्तत्वायुक्तत्व-

शङ्का यस्य स विगतभीः ब्रह्मचारिव्रते ब्रह्मचर्यगुरुशुश्रूषाभिक्षाभोजनादौ स्थितः सन् मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा मयि परमेश्वरे प्रत्यक्चिति सगुणे निर्गुणे वा चित्तं यस्य स मच्चित्तो मद्विषयकधारावाहिकचित्तवृत्तिमान् । पुत्रादौ प्रिये चिन्तनीये सति कथमेवं स्यादत आह—मत्परः अहमेव परमानन्दरूपत्वात्परः पुरुषार्थः प्रियो यस्य स तथा "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति श्रुतेः । एवं विषयाकारसर्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः संप्रज्ञातसमाधिमानासीतोपविशेद्यथाशक्ति नतु स्वेच्छया व्युत्तिष्ठेदित्यर्थः । भवति कश्चिद्रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेनाराध्यत्वेन गृह्णाति किं तर्हि राजानं वा देवं वा अयं तु मच्चित्तो मत्परश्च सर्वाराध्यत्वेन मामेव मन्यत इति भाष्यकृतां व्याख्या । व्याख्यातृत्वेऽपि मे नात्र भाष्यकारेण तुल्यता । गुञ्जायाः किं नु हेम्नैकतुलारोहेऽपि तुल्यता ॥ १४ ॥

शं० टी०—समकायशिरोग्रीवत्वं स्थिरत्वं नासिकाग्रद्रष्टृत्वं दिगनवलोकनं च योगिनो योगसिद्धेरङ्गानीति सूचयित्वेतोऽप्यन्तरङ्गानि तत्सिद्धेरसाधारणसाधनानि च सूचयन्नुक्तसाधनसंपन्नो यतिः समाधिं कुर्यादित्याह—प्रशान्तेति । प्रकर्षेण शान्तः प्रशान्त आत्मा रागद्वेषाद्यनुत्पत्तिरेवात्मनोऽन्तःकरणस्य शान्तिस्तस्याः प्रकर्षस्तु रागद्वेषादिदोषोत्पत्तिहेतूनां विषयेषु समीचीनत्वाऽसमीचीनत्वप्रीत्यप्रीतीष्टसाधनत्वानिष्टसाधनत्वबुद्धीनां निवृत्तिरेव । एवंलक्षणः प्रशान्त आत्मान्तःकरणं यस्य स प्रशान्तात्मा विगतभीः विशिष्य गता विगता निःशेषविनष्टा भीरन्नादानविसर्गातिरिक्तस्य दन्तधावनमुखक्षालनादेः शास्त्रीयस्य सर्वस्य च कर्मणः परित्यागे शिष्टा निन्दिष्यन्तीति या भीतिः सा यस्य न विद्यते स विगतभीः स्वाध्यायं च सर्वकर्माणि संन्यस्येत्यादि "वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्" इति 'त्यज धर्ममधर्मं च ।' 'नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी' इत्यादिश्रुतिस्मृतिनिश्चयमवष्टभ्य निर्भीक इत्यर्थः । किंच ब्रह्मचारिव्रते स्थितः अत्र ब्रह्मचारिव्रतपदेन भिक्षामात्रं लक्ष्यते न तु त्रिषवणादिः त्रिषवणाद्यनुष्ठानस्य समाधिसंभावितविक्रियब्रह्माभिन्नत्वज्ञानविध्वंसकत्वाद्योगं युञ्जीत सततमिति नित्यनिरन्तरकर्तव्यतया प्राप्तसमाध्यनुष्ठानप्रतिकूलत्वाच्चाहारमात्रमत्र गृह्यते आहारविषये ब्रह्मचारिणो व्रतं भिक्षाशनमेव तस्मिन् ब्रह्मचारिव्रते केवलं माधुकरभक्षण एव स्थितो भवेन्निदिध्यासुर्यतिर्न तु प्राक्प्रणीतादौ प्राक्प्रणीतायाचिततात्कालिकोपपन्नेष्वाहारस्य परतन्त्रत्वेन द्रव्यगुरुत्वाकालिकत्वन्यूनातिरिक्तत्वप्रतीक्षादिदोषवत्तया समाधिविघ्नकारित्वप्रसङ्गात्तस्मात्स्वाधीने ब्रह्मचारिव्रते भिक्षाशन एव स्थितो भवेदित्यर्थः । मनो वृत्तिरूपं बहिःप्रवणशीलं संयम्य विषयसंबन्धो यथा न स्यात्तथा निगृह्य मच्चित्तः मयि बुद्धितद्वृत्तिसाक्षिणि चिदेकरसे प्रत्यग्भूते ब्रह्मणि चित्तं यस्य स मच्चित्तः बहिर्गच्छच्चित्तं मयि सम्यक् स्थापयित्वेत्यर्थः । मच्चित्त इत्यत्रास्मच्छब्दार्थस्य चित्तस्थापनाधिकरणस्य ब्रह्मणः स्थापयितुश्च भेदे प्राप्ते "उ दरमन्तरं कुरुते । अथ तस्य भयं भवतीति" इति श्रवणाद्भेददर्शिनो मुक्तिर्न संभवति ततो ध्याता ब्रह्मैवाहमिति स्वं ब्रह्माभिन्नं भावयेदिति बोधयितुमाह—मत्पर इति । अहमेव परः परमात्मेति मत्परः ब्रह्मैवाहमिति स्वस्य ब्रह्मभावग्राहकया वृत्त्या युक्तः सन्नासीत स्वं ब्रह्मैव भावयन्नासने तूष्णीमुपविशेदित्यर्थः ॥ १४ ॥

श्री० टी०—प्रशान्तेति । प्रशान्त आत्मा चित्तं यस्य, विगता भीर्भयं यस्य, ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः सन्मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्य अहमेव परः पुरुषार्थो यस्य स मत्परः एवंयुक्तो भूत्वा आसीत तिष्ठेत् ॥ १४ ॥

स० टी०—रागादिदोषशून्यत्वाच्छान्तात्माध्यासवर्जितः ॥ युक्तायुक्तत्वसंदेहः कर्मत्यागे भयं स्मृतम् ॥ ॥ १ ॥ तच्छून्यो निर्भयो भूत्वा यद्वा सर्वभयोज्झितः ॥ ब्रह्मचर्यं विना चित्तं दूषितं स्त्रीक्षणादिभिः ॥ २ ॥

निश्चलं न प्रतीचि स्याद्ब्रह्मचर्यमतश्चरेत् ।। नारायणे परां भक्तिं विना ब्रह्माद्वये मनः ।। ३ ।। न क्षमं निश्चलं स्थातुं भक्तिः कार्या ततो हरौ ।। एतद्धृदि निधायाह ब्रह्मचारीति माधवः ।। ४ ।। गुरुशुश्रूषणं भिक्षा ब्रह्मचर्यमथापरम् ।। यद्यद्व्रतं भवेद्ब्रह्मचारिणस्तत्र च स्थितः ।। ५ ।। मनो निर्विषयं कृत्वा वासुदेवे मयीश्वरे ।। प्रत्यक्चैतन्यसद्रूपे चित्तं यस्य स मन्मनाः ।। ६ ।। अहमेव परानन्दरूपत्वेन परः प्रियः ।। सर्वस्माज्जीवपर्यन्तात्पुरुषार्थः स मत्परः ।। ७ ।। एवं चित्तनिरोधेन ब्रह्माकारा कृता यदा ।। चित्तवृत्तिः स आसीत न व्युत्तिष्ठेत्स्वयं ततः ।। ८ ।। १४ ।।

भा० टी०—प्रशान्तात्मा प्रकर्षेण शान्तः आत्मान्तःकरणं यस्य सः अनेन रम्यशब्दश्रवणादिना शान्तचित्तस्य क्षोभाभावाद्दिगवलोकनं वारितम् । व्याघ्रादिभयप्रयुक्तमपि तद्वारयति—विशेषेण गता भीर्भयं यस्मात्सः । व्याघ्रादिप्रयुक्तभयाभावेऽपि क्षुधादिजन्यभयं संभाव्याह—मनः संयम्य स्वादिष्ठान्नादौ प्रवृत्ता मनोवृत्तीरुपसंहृत्येत्यर्थः । एवंभूतः किं कुर्यादिति तत्राह—युक्तः समाहितः सन् मच्चित्तः मत्परश्चासीतेति मयि परमेश्वरे चित्तं यस्य सः कश्चिद्रागी स्त्रीचित्तो नतु स्त्रियमेव परत्वेन गृह्णाति किं तर्हि राजानं वाराध्यत्वेन देवं वाराध्यत्वेन परमपुरुषार्थत्वेन च अयं तु मच्चित्तो मत्परश्च अहमेव पर आराध्यः परमपुरुषार्थश्च यस्य सः । यत्तु तर्किं द्वितीयाद्यवस्थास्य संभवति ओमित्याह—अयुक्त इति । अयुक्तो मत्परः अहं पर अन्तर्यामी प्रेरको यस्येत्येवंरूपः आस्ते तस्यां दशायामैक्यभावनाभावादिति । तथाचायुक्तावस्थायां भिक्षाद्याचरतीति तात्पर्यमिति तन्न, वाक्यभेदप्रसङ्गात् यथाश्रुतार्थसंभवे आसीतेत्यस्यास्त इत्यर्थकरणानुचितत्वाच्च ।। १४ ।।

प० टी०—अथ मनोधारणामाह—प्रशान्तात्मेति । प्रशान्तो निःसंकल्प आत्मा चित्तं यस्य विगतभीर्निरस्तभयो निर्जने एकाकिना कथं स्थातव्यमिति भयशून्यः । यद्वा विगतभीरित्युपलक्षणम् "ह्रीर्धीरित्येतत्सर्वं मन एव" इति श्रुतेर्मनोधर्मरहितः । अथावसरमाह—ब्रह्मचारिणां यद्व्रतं तत्र स्थितः संन्यासग्रहणात्पूर्वमेवेत्यर्थः । अथैवंविधमहाकार्ये प्रवृत्तस्याश्रयव्यतिरेकेण विघ्नोपशमः कथं स्यादित्याह—मच्चित इति । मयि चित्तं यस्य निरन्तरं मत्स्मरणवान् । नहि तावदेव मत्प्रयोजनमित्याह—मत्पर इति । अहमेव परं प्राप्तव्यं पदं यस्य स तथा । तदुक्तमकुलागमे 'सुखासने समासीनस्तत्त्वाभ्यासं समाचरन् । सदाभ्यासेन तत्कुर्यात्परतत्त्वप्रकाशनम् ।। १ ।। आसनं प्राणसंरोधः प्रत्याहारोऽथ धारणा । ध्यानं समाधिरेतानि योगाङ्गानि वरानने ।।२।। एकान्ते विजने रम्ये गुहायां पुण्यभूमिके । रहिते मशकैर्दंशैर्देवायतनकेऽपि वा ।। ३ ।। सिद्धक्षेत्रे महातीर्थे ध्यानसिद्धिः प्रजायते । तत्र सिद्धासनं बद्ध्वा ऋजुकायं तु कारयेत् ।। ४ ।। ऊर्ध्वं मेढ्रादधो नाभेः कन्दो ग्रन्थिरिव स्थितः । तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ।। ५ ।।' श्रुतिरपि शातपथी—"हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते" इति । अत्र पुरीततमिति हृदयाकाशे नाडीभिर्निर्मितं स्थानम्, । शेषं स्पष्टम् । तथा 'प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः । इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ।। ६ ।। सिनीवाली चानुमतिः पूषा चैव यशस्विनी । अलम्बुषा कुहूश्चैव शङ्खिनी दशमी तथा ।। ७ ।। एतन्नाडीमयं चक्रं तिस्रस्तत्र प्रवाहिकाः । इडा च पिङ्गला चैव सुषुम्ना प्राणवाहिकाः । इडा वामे स्थिता भागे पिङ्गला दक्षिणे स्थिता ।। ८ ।। सुषुम्ना मध्यदेशे तु प्राणमार्गास्त्रयो मताः । पूरयेद्वामनाड्या च रेचयेदन्यया ततः ।। ९ ।। तथैव पूरयेद्भूयः पूरयेत्कुम्भवत्ततः । एवमभ्यासयोगेन नाडीशुद्धिः प्रजायते ।। १० ।। चन्द्राङ्गे प्राणमभ्यस्य सूर्याङ्गेऽपानमभ्यसेत् । शीतांशुसूर्ययोर्मध्ये चिन्तयेत्परमेश्वरम् ।। ११ ।। सुषुम्नान्तर्गतं देवं चिद्रूपं भावयेत्सदा । प्रणवं तारकं ब्रह्म नित्यं ध्यायन्ति योगिनः ।। १२ ।। तद्ध्याने तत्क्षणात्सिद्धिर्जायते नात्र संशयः । प्रणवाभ्यासतो

योगी मया तुल्यो वरानने ॥ १३ ॥' योगमार्तण्डे—' योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैवमेव नियतं धृत्वा समं विग्रहम् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तरं चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते ॥ १ ॥ वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढौ । अङ्गुष्ठौ हृदये निधाय चुबुकं नासाग्रमालोकयेदेतद्व्याधिविकारनाशि यमिनां पद्मासनं प्रोच्यते ॥ २ ॥ आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् । योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ॥ ३ ॥ अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः । युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ॥ ४ ॥ पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदं । अपानमूलमाकृष्य मूलबन्धं निगद्यते ॥ ५ ॥ उदरे पश्चिमे भागे नाभेरूर्ध्वं निगद्यते । उड्डियानो ह्ययं बन्धः कण्ठदुःखौघनाशनः ॥ ६ ॥ बध्नातीह शिरोजालमधो याति नभोजलम् । ततो जालन्धरं बन्धं कण्ठसंकोचलक्षणम् ॥ ७ ॥ जालन्धरकृते बन्धे कण्ठसंकोचलक्षणे । न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति ॥ ८ ॥ कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ९ ॥ युक्तासनं समारुह्य समकायशिरोधरः । नासाग्रदृष्टिरेकान्ते जपेदोङ्कारमव्ययम् ॥ १० ॥ भूर्भुवःस्वरिमे लोकाः सोमसूर्याग्निदेवताः । यस्य मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ११ ॥ आसनेन रुजं हन्ति प्राणायामेन पातकम् । विकारं मानसं योगी प्रत्याहारेण मुञ्चति ॥१२॥ धारणार्थे मनोधैर्यं ध्यानं निश्चलमद्भुतम् । समाधेर्मोक्षमाप्नोति त्यक्त्वा कर्म शुभाशुभम् ॥ १३ ॥ प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः । प्रत्याहारद्विषट्केन धारणा जायते शुभा ॥ १४ ॥ धारणा द्वादश ध्यानं प्रोक्तं ध्यानविशारदैः । ध्यानद्वादशकेनैव समाधिरभिधीयते ॥ १५ ॥ १४ ॥

रा० टी०—प्रशान्तेति । प्रशान्तात्मा स्वतो विषयेषु अप्रवृत्तमनस्कः विगतभीः व्याघ्रचोरादिभयहीनः ब्रह्मचारिव्रते स्थितः मनः सम्यक् प्रत्याहृत्य मच्चित्तो मद्ध्यानवान्मत्परः अहमेव परः सर्वोत्तमः यस्य स मत्परः युक्तः समाधिसंपन्न आसीतेत्यर्थः ॥ १४ ॥

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः ॥
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

त० टी०—एवं योगमभ्यसतो योगिनः फलमाह—युञ्जन्नेवमिति । एवमुक्तप्रकारेण परमात्मनि भगवति मयि सदाऽऽत्मानं मनो युञ्जन्समाहितं कुर्वन् । नियतं निरुद्धं मानसं वृत्तिनिरोधेन मन एव निरुध्यतेऽतो नियतमानसः सन् शान्तिं संसारोपरतिरूपां निर्वाणपरमां निर्वाणं मोक्षः परमो यस्यां तां मत्संस्थां मन्निष्ठामधिगच्छति प्राप्नोति ॥ १५ ॥

म० टी०—एवं संप्रज्ञातसमाधिनासीनस्य किं स्यादित्युच्यते—युञ्जन्नेवमिति । एवं रहोवस्थानादिपूर्वोक्तनियमेनात्मानं मनो युञ्जन् अभ्यासवैराग्याभ्यां समाहितं कुर्वन् योगी सदा योगाभ्यासपरोऽभ्यासातिशयेन नियतं निरुद्धं मानसं मनो येन नियता निरुद्धा मानसा मनोवृत्तिरूपा विकारा येनेति वा, नियतमानसः सन् शान्तिं सर्ववृत्त्युपरतिरूपां प्रशान्तवाहितां निर्वाणपरमां तत्त्वसाक्षात्कारोत्पत्तिद्वारेण सकार्याविद्यानिवृत्तिरूपमुक्तिपर्यवसायिनीं मत्संस्थां मत्स्वरूपपरमानन्दरूपां निष्ठामधिगच्छति न तु सांसारिकाण्यैश्वर्याणि अनात्मविषयसमाधिफलान्यधिगच्छति तेषामपवर्गोपयोगिसमाध्युपसर्गत्वात् । तथा च तत्तत्समाधिफलान्युक्त्वाह भगवान् पतञ्जलिः 'ते समाधावुपसर्गा व्युत्थाने सिद्धयः' इति, 'स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्' इति च स्थानिनो देवाः तथाचोद्दालको देवैरामन्त्रितोऽपि तत्र सङ्गमादरं

स्मयं गर्वं चाकृत्वा देवानवज्ञाय पुनरनिष्टप्रसङ्गनिवारणाय निर्विकल्पकमेव समाधिमकरोदिति वसिष्ठेनोपाख्यायते । मुमुक्षुभिर्हेयश्च समाधिः सूत्रितः पतञ्जलिना 'वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञातः' सम्यक् संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेषरूपेण ज्ञायते भाव्यस्वरूपं येन स संप्रज्ञातः समाधिर्भावनाविशेषः । भावना हि भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनःपुनर्निवेशनम् । भाव्यं च त्रिविधं ग्राह्यग्रहणग्रहीतृभेदात् । ग्राह्यमपि द्विविधं स्थूलसूक्ष्मभेदात् । तदुक्तं 'क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनतासमापत्तिः' क्षीणा राजसतामसवृत्तयो यस्य तस्य चित्तस्य ग्रहीतृग्रहणग्राह्येष्वात्मेन्द्रियविषयेषु तत्स्थता तत्रैवैकाग्रता तदञ्जनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्यैवोत्कर्ष इति यावत् तथाविधा समापत्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य स्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरागात्तद्रूपापत्तिः समापत्तिः समाधिरिति च पर्यायः । यद्यपि ग्रहीतृग्रहणग्राह्येष्वित्युक्तं तथापि भूमिकाक्रमवशाद् ग्राह्यग्रहणग्रहीतृष्विति बोद्धव्यम् । यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रहणनिष्ठस्ततो ग्रहीतृनिष्ठ इति ग्रहीत्रादिक्रमोऽप्यग्रे व्याख्यास्यते । तत्र यदा स्थूलं महाभूतेन्द्रियात्मकषोडशविकाररूपं विषयमादाय पूर्वापरानुसन्धानेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कः समाधिः । अस्मिन्नेवालम्बने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्तते तदा निर्वितर्कः । एतावुभावप्यत्र वितर्कशब्देनोक्तौ । तन्मात्रान्तःकरणलक्षणं सूक्ष्मं विषयमालम्ब्य तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्तते तदा सविचारः । अस्मिन्नेव अवलम्बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन यदा भावना प्रवर्तते तदा निर्विचारः । एतावुभावप्यत्र विचारशब्देनोक्तौ । तथा च भाष्यम् 'वितर्कश्चित्तस्यास्थूल आलम्बने आभोगः सूक्ष्मे विचारः' इति । इयं ग्राह्यसमापत्तिरिति व्यपदिश्यते । यदा रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते तदा गुणभावाच्चिच्छक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात्सानन्दः समाधिर्भवति । अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधानपुरुषरूपं न पश्यन्ति ते विगतदेहाहंकारत्वाद्विदेहशब्देनोच्यन्ते, इयं ग्रहणसमापत्तिः । ततः परं रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालम्बनीकृत्य या भावना प्रवर्तते तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते । न चाहङ्कारास्मितयोरभेदः शङ्कनीयः यतो यत्रान्तःकरणमहमित्युल्लेखेन विषयान् वेदयते सोऽहंकारः, यत्र त्वन्तर्मुखतया प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता । अस्मिन्नेव समाधौ ये कृतपरितोषास्ते परं पुरुषमपश्यन्तश्चेतसः प्रकृतौ लीनत्वात्प्रकृतिलया इत्युच्यन्ते । सेयं ग्रहीतृसमापत्तिरस्मितामात्ररूपग्रहीतृनिष्ठत्वात् । ये तु परं पुरुषं विविच्य भावनायां प्रवर्तन्ते तेषामपि केवलपुरुषविषया विवेकख्यातिर्ग्रहीतृसमापत्तिरपि न सास्मितः समाधिर्विवेकेनास्मितायास्त्यागात् । तत्र ग्रहीतृभानपूर्वकमेव ग्रहणभानं तत्पूर्वकं च सूक्ष्मग्राह्यभानं तत्पूर्वकं च स्थूलग्राह्यभानमिति स्थूलविषयो द्विविधोऽपि वितर्कश्चतुष्टयानुगतः । द्वितीयो वितर्कविकलस्त्रितयानुगतः । तृतीयो वितर्कविचाराभ्यां विकलो द्वितयानुगतः । चतुर्थो वितर्कविचारानन्दैर्विकलोऽस्मितामात्र इति चतुरवस्थोऽयं संप्रज्ञात इति । एवं सवितर्कः सविचारः सानन्दः सास्मितश्च समाधिरन्तर्धानादिसिद्धिहेतुतया मुक्तिहेतुसमाधिविरोधित्वाद्धेय एव मुमुक्षुभिः । ग्रहीतृग्रहणयोरपि चित्तवृत्तिविषयतादशायां ग्राह्यकोटौ निक्षेपाद्धेयोपादेयविभागकथनाय ग्राह्यसमापत्तिरेव विवृता सूत्रकारेण— चतुर्विधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा द्विविधा सवितर्का निर्वितर्का च । सूक्ष्मग्राह्यगोचरापि द्विविधा सविचारा निर्विचारा च । तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का शब्दार्थज्ञानविकल्पसंभिन्ना स्थूलार्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्तिरित्यर्थः । स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का । तस्मिन्नेव

स्थूल आलम्बने शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः स्थूलगोचरा निर्विकल्पकवृत्तिरित्यर्थः। एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता। सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्विविधा सविचारा निर्विचारा च। सविकल्पकनिर्विकल्पकभेदेन एतयैव सवितर्कया निर्वितर्कया च स्थूलविषयया समापत्त्या व्याख्याता। शब्दार्थज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा सविचारा। शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यनवच्छिन्नत्वेन च धर्मिमात्रतया सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा निर्विचारा। सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेषणात्सवितर्कनिर्वितर्कयोः स्थूलविषयत्वमर्थाद्व्याख्यातम्। 'सूक्ष्मविषयत्वं चालिङ्गपर्यवसानं' सविचाराया निर्विचारायाश्च समापत्तेर्यत्सूक्ष्मविषयत्वमुक्तं तदलिङ्गपर्यन्तं द्रष्टव्यम्। तेन सानन्दसास्मितयोर्ग्रहीतृग्रहणसमापत्त्योरपि ग्राह्यसमापत्तावेवान्तर्भाव इत्यर्थः। तथाहि पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो विषयः। आप्यस्यापि रसतन्मात्रं, तैजसस्य रूपतन्मात्रं, वायवीयस्य स्पर्शतन्मात्रं, नभसः शब्दतन्मात्रं, तेषामहङ्कारस्तस्य लिङ्गमात्रं महत्तत्त्वम्, तस्याप्यलिङ्गं प्रधानं सूक्ष्मो विषयः। सप्तानामपि प्रकृतीनां प्रधान एव सूक्ष्मताविश्रान्तेस्तत्पर्यन्तमेव सूक्ष्मविषयत्वमुक्तम्। यद्यपि प्रधानादपि पुरुषः सूक्ष्मोऽस्ति तथाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणे प्रधान एव निरतिशयं सौक्ष्म्यं व्याख्यातम्। पुरुषस्तु निमित्तकारणं सदपि नान्वयिकारणत्वेन सूक्ष्मतामर्हति अन्वयिकारणत्वाविवक्षायां तु पुरुषोऽपि सूक्ष्मो भवत्येवेति द्रष्टव्यम्। ता एव सबीजः समाधिः। ताश्चतस्रः समापत्तयो ग्राह्येण बीजेन सह वर्तन्त इति सबीजः समाधिर्वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञात इति प्रागुक्तः स्थूलेऽर्थे सवितर्को निर्वितर्कः सूक्ष्मेऽर्थे सविचारो निर्विचार इति। तत्रान्तिमस्य फलमुच्यते 'निर्विचारवैशारद्येऽध्यात्मप्रसादः' स्थूलविषयत्वे तुल्येऽपि सवितर्के शब्दार्थज्ञानविकल्पसंकीर्णमपेक्ष्य तद्रहितस्य निर्विकल्पकरूपस्य निर्वितर्कस्य प्राधान्यम्। ततः सूक्ष्मविषयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोऽपि सूक्ष्मविषयस्य निर्विकल्पकप्रतिभासरूपस्य निर्विचारस्य प्राधान्यम्। तत्र पूर्वेषां त्रयाणां निर्विचारार्थत्वान्निर्विचारफलेनैव फलवत्त्वम्। निर्विचारस्य तु प्रकृष्टाभ्यासबलाद्वैशारद्ये रजस्तमोऽनभिभूतसत्त्वोद्रेके सत्यध्यात्मप्रसादः क्लेशवासनारहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति। तथा च भाष्यम् 'प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान्। भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोऽनुपश्यति' इति। ऋतंभरा तत्र प्रज्ञा। तत्र तस्मिन् प्रज्ञाप्रसादे सति समाहितचित्तस्य योगिनो या प्रज्ञा जायते सा ऋतंभरा, ऋतं सत्यमेव बिभर्ति न तत्र विपर्यासगन्धोऽप्यस्तीति यौगिक्येवेयं समाख्या। सा चोत्तमो योगः। तथा च भाष्यम्—'आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्' इति सा तु 'श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्' श्रुतमागमविज्ञानं तत्सामान्यविषयमेव। नहि विशेषेण सह कस्यचिच्छब्दस्य सङ्गतिर्ग्रहीतुं शक्यते तथानुमानं सामान्यविषयमेव। नहि विशेषेण सह कस्यचिद्व्याप्तिर्ग्रहीतुं शक्यते तस्माच्छ्रुतानुमानविषयो न विशेषः कश्चिदस्ति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणमस्ति किंतु समाधिप्रज्ञानिर्ग्राह्य एव सविशेषो भवति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मान्निर्विचारवैशारद्यसमुद्भवायां श्रुतानुमानविलक्षणायां सूक्ष्मव्यवहितविप्रकृष्टसर्वविशेषविषयायामृतंभरायामेव प्रज्ञायां योगिना महान् प्रयत्न आस्थेय इत्यर्थः। ननु क्षिप्तमूढविक्षिप्ताख्यव्युत्थानसंस्काराणामेकाग्रतायामपि सवितर्कनिर्वितर्कसविचारजानां संस्काराणां सद्भावात्तैश्चाल्यमानस्य चित्तस्य कथं निर्विचारवैशारद्यपूर्वकाध्यात्मप्रसादलभ्या ऋतंभरा प्रज्ञा प्रतिष्ठिता स्यादत आह—तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी तया ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञया

जनितत्वेन वलवत्त्वादन्यान् व्युत्थानजान् समाधिजांश्च संस्कारानतत्त्वविषयप्रज्ञाजनितत्वेन दुर्वलान् प्रतिवध्नाति स्वकार्याक्षमान् करोति नाशयतीति वा। तेषां संस्काराणामभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति। ततः समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कारा इति नवो नवः संस्काराशयो वर्धते। ततश्च प्रज्ञा ततश्च संस्कारा इति। ननु भवतु व्युत्थानसंस्काराणामतत्त्वविषयप्रज्ञाजनितानां तत्त्वमात्रविषयसंप्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैः प्रतिबन्धस्तेषां तु संस्काराणां प्रतिवन्धकाभावादेकाग्रभूमावेव सवीजः समाधिः स्यान्न तु निर्बीजो निरोधभूमाविति तत्राह—'तस्यापि निरोधे सर्वनिरोधान्निर्वीजः समाधिः' तस्य संप्रज्ञातस्य समाधेरेकाग्रभूमिजस्य अपिशब्दात् क्षिप्तमूढविक्षिप्तानामपि निरोधे योगिप्रयत्नविशेषेण विलये सति सर्वनिरोधात्समाधेः समाधिजस्य संस्कारस्यापि निरोधान्निर्बीजो निरालम्बनोऽसंप्रज्ञातसमाधिर्भवति। स च सोपायः प्राक् सूत्रितो 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः' इति विरम्यतेऽनेनेति विरामो वितर्कविचारानन्दास्मितादिरूपचिन्तात्यागः। तस्य प्रत्ययः कारणं परं वैराग्यमिति यावत्, विरामश्चासौ प्रत्ययश्चित्तवृत्तिविशेष इति वा तस्याभ्यासः पौनःपुन्येन चेतसि निवेशनं तदेव पूर्वं कारणं यस्य स तथा संस्कारमात्रशेषः सर्वथा निर्वृत्तिकोऽन्यः पूर्वोक्तात्सबीजाद्विलक्षणो निर्बीजोऽसंप्रज्ञातसमाधिरित्यर्थः। असंप्रज्ञातस्य हि समाधेर्द्वावुपायावुक्तावभ्यासो वैराग्यं च। तत्र सालम्बनत्वादभ्यासस्य न निरालम्बनसमाधिहेतुत्वं घटत इति निरालम्बनं परं वैराग्यमेव हेतुत्वेनोच्यते। अभ्यासस्तु संप्रज्ञातसमाधिद्वारा प्रणाड्योपयुज्यते। तदुक्तम् 'त्रयमन्तरङ्गं पूर्वेभ्यः' धारणाध्यानसमाधिरूपं साधनत्रयं यमनियमासनप्राणायामप्रत्याहाररूपसाधनपञ्चकापेक्षया सबीजस्य समाधेरन्तरङ्गं साधनम्। साधनकोटौ च समाधिशब्देनाभ्यास एवोच्यते मुख्यस्य समाधेः साध्यत्वात्। 'तदपि बहिरङ्गं निर्बीजस्य' निर्बीजस्य तु समाधेस्तदपि त्रयं बहिरङ्गं परंपरयोपकारि तस्य तु परं वैराग्यमेवान्तरङ्गमित्यर्थः। अयमपि द्विविधो भवप्रत्यय उपायप्रत्ययश्च। 'भवप्रत्ययो विदेहप्रकृतिलयानाम्' विदेहानां सानन्दाना प्रकृतिलयानां च सास्मितानां देवानां प्राग्व्याख्यातानां जन्मविशेषादोषधिविशेषान्मन्त्रविशेषात्तपोविशेषाद्वा यः समाधिः स भवप्रत्ययः भवः संसारः आत्मानात्मविवेकाभावरूपः प्रत्ययः कारणं यस्य स तथा जन्ममात्रहेतुको वा पक्षिणामाकाशगमनवत् पुनःसंसारहेतुत्वान्मुमुक्षुभिर्हेय इत्यर्थः 'श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्' जन्मौषधिमन्त्रतपःसिद्धव्यतिरिक्तानामात्मानात्मविवेकदर्शिनां तु यः समाधिः स श्रद्धादिपूर्वकः श्रद्धादयः पूर्व उपाया यस्य स तथा उपायप्रत्यय इत्यर्थः। तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जननीव योगिनं पाति। ततः श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साह उपजायते। समुपजातवीर्यस्य पाश्चात्यासु भूमिषु स्मृतिरुत्पद्यते। तत्स्मरणाच्च चित्तमनाकुलं सत्समाधीयते। समाधिरत्रैकाग्रता। समाहितचित्तस्य प्रज्ञा भाव्यगोचरा विवेकेन जायते। तदभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमुक्षूणामित्यर्थः। 'प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तेः' इति न्यायेन तस्यामपि सर्ववृत्तिनिरोधावस्थायां चित्तपरिणामप्रवाहः तज्जन्यसंकारप्रवाहश्च भवत्येवेत्यभिप्रेत्य संस्कारशेष इत्युक्तम्। तस्य च संस्कारस्य प्रयोजनमुक्तम् 'ततः प्रशान्तवाहिता संस्कारात्' इति। प्रशान्तवाहिता नामावृत्तिकस्य चित्तस्य निरिन्धनाग्निवत्प्रतिलोमपरिणामेनोपशमः। यथा समिदाज्याद्याहुतिप्रक्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये तु प्रथमक्षणे किंचिच्छाम्यति उत्तरोत्तरक्षणेषु त्वधिकमधिकं शाम्यतीति क्रमेण शान्तिर्वर्धते। तथा निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः प्रवहति। तत्र पूर्वपूर्वप्रशमजनितः संस्कार एवोत्तरोत्तरप्रशमस्य कारणम्। तदा च निरिन्धनाग्निवच्चित्तं क्रमेणोपशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते। तदा च समाधिपरिपाकप्रभवेन वेदान्तवाक्यजेन सम्यग्दर्शनेनाविद्यायां निवृत्तायां तद्धेतुकदृग्दृश्यसंयोगाभावाद्वृत्तौ पञ्चविधायामपि निवृत्तायां स्वरूपप्रतिष्ठः

पुरुषः शुद्धः केवलो मुक्त इत्युच्यते । तदुक्तम् ' तदा द्रष्टुः स्वरूपेऽवस्थानम् ' इति । तदा सर्ववृत्तिनिरोधे वृत्तिदशायां तु नित्यापरिणामिचैतन्यरूपत्वेन तस्य सर्वदा शुद्धत्वेऽप्यनादिना दृश्यसंयोगेनाविद्यकेनान्तःकरणतादात्म्याध्यासादन्तःकरणवृत्तिसारूप्यं प्राप्नुवन्नभोक्तापि भोक्तेव दुःखानां भवति । तदुक्तम् ' वृत्तिसारूप्यमितरत्र ' इतरत्र वृत्तिप्रादुर्भावे । एतदेव विवृतं द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं चित्तमेव द्रष्टृदृश्योपरक्तं विषयिविषयनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनमपि चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते । तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः । तदसंख्येयवासनाभिश्चित्तमपि परार्थं संहत्यकारित्वात् यस्य भोगापवर्गार्थं तत्स एव परश्चेतनोऽसंहतः पुरुषो न तु घटादिवत् संहत्यकारि चित्तं चेतनमित्यर्थः । एवं च विशेषदर्शिन आत्मभावभावनानिवृत्तिः । एवं योऽन्तःकरणपुरुषयोर्विशेषदर्शी तस्य यान्तःकरणे प्रागविवेकवशादात्मभावभावनासीत्सा निवर्तते भेददर्शने सत्यभेदभ्रमानुपपत्तेः । सत्त्वपुरुषयोर्विशेषदर्शनं च भगवदर्पितनिष्कामकर्मसाध्यं तल्लिङ्गं च योगभाष्ये दर्शितम्—यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन सिद्धान्तरुचिवशात् यस्य लोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति विशेषदर्शनबीजमपवर्गमार्गीयं कर्माभिनिर्वर्तितमित्यनुमीयते । यस्य तु तादृशं कर्मबीजं नास्ति तस्य मोक्षमार्गश्रवणे पूर्वपक्षयुक्तिषु रुचिर्भवत्यरुचिश्च सिद्धान्तयुक्तिषु । तस्य कोऽहमासं कथमहमासमित्यादिरात्मभावभावना स्वाभाविकी प्रवर्तते । सा तु विशेषदर्शिनो निवर्तत इति । एवं सति किं स्यादिति तदाह—'तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् निम्नं जलप्रवहणयोग्यो नीचदेशः प्राग्भारस्तदयोग्य उच्चप्रदेशः चित्तं च सर्वदा प्रवर्तमानवृत्तिप्रवाहेण प्रवहज्जलतुल्यं तत्प्रागात्मानात्माविवेकरूपविमार्गवाहिविषयभोगपर्यन्तमस्यासीत् अधुना त्वात्मानात्मविवेकमार्गवाहिकैवल्यपर्यन्तं संपद्यत इति, अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तरायास्ते सहेतुका निवर्तनीया इत्याह सूत्राभ्याम् 'तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः', 'हानमेषां क्लेशवदुक्तम्' । तस्मिन्विवेकवाहिनि चित्ते छिद्रेष्वन्तरालेषु प्रत्ययान्तराणि व्युत्थानरूपाण्यहंममेत्येवंरूपाणि व्युत्थानानुभवजेभ्यः संस्कारेभ्यः क्षीयमाणेभ्योऽपि प्रादुर्भवन्ति । एषां च संस्काराणां क्लेशानामिव हानमुक्तम् यथा क्लेशा अविद्यादयो ज्ञानाग्निना दग्धबीजभावा न पुनश्चित्तभूमौ प्ररोहं प्राप्नुवन्ति तथा ज्ञानाग्निना दग्धबीजभावाः संस्काराः प्रत्ययान्तराणि न प्ररोढुमर्हन्ति ज्ञानाग्निसंस्कारास्तु यावच्चित्तमनुशेरत इति । एवं च प्रत्ययान्तरानुदयेन विवेकवाहिनि चित्ते स्थिरीभूते सति 'प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः' प्रसंख्यानं सत्त्वपुरुषान्यताख्यातिः शुद्धात्मज्ञानमिति यावत् तत्र बुद्धेः सात्त्विके परिणामे कृतसंयमस्य सर्वेषां गुणपरिणामानां स्वामिवदाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव च शान्तोदिताव्यपदेश्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं च विशोका नाम सिद्धिः फलं तद्वैराग्याच्च कैवल्यमुक्तम् ' सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ' ' तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ' इति सूत्राभ्यां । तदेतदुच्यते तस्मिन् प्रसंख्याने सत्यप्यकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदये सर्वप्रकारं विवेकख्यातेः परिपोषाद्धर्ममेघः समाधिर्भवति 'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेर्धर्मं प्रत्यग्ब्रह्मैक्यसाक्षात्कारं मेहति सिञ्चतीति धर्ममेघस्तत्त्वसाक्षात्कारहेतुरित्यर्थः । ततः क्लेशकर्मनिवृत्तिः ततो धर्ममेघात्समाधेर्धर्माद्वा क्लेशानां पञ्चविधानामविद्यास्मितारागद्वेषाभिनिवेशानां कर्मणां च रक्तकृष्णशुक्लभेदेन त्रिविधानामविद्यामूलानामविद्याक्षये बीजक्षयादात्यन्तिकी निवृत्तिः कैवल्यं भवति । कारणनिवृत्त्या कार्यनिवृत्तेरात्यन्तिक्या उचितत्वादित्यर्थः । एवं स्थिते युञ्जन्नेवं सदात्मानमित्यनेन संप्रज्ञातः समाधिरेकाग्रभूमावुक्तः । नियतमानस इत्यनेन तत्फलभूतोऽसंप्रज्ञातसमाधिर्निरोधभूमावुक्तः । शान्तिमिति निरोधसमाधिजसंस्कारफलभूता प्रशान्तवाहिता,

निर्वाणपरमामिति धर्ममेघस्य समाधेस्तत्त्वज्ञानद्वारा कैवल्यहेतुत्वम्, मत्संस्थामित्यनेनौपनिषदाभिमतं कैवल्यं दर्शितम् । यस्मादेवं महाफलो योगस्तस्मात्तं महता प्रयत्नेन संपादयेदित्यभिप्राय: ॥ १९ ॥

शं० टी०—योगमात्मविशुद्धय इति वचनाद्योगानुष्ठानस्य फलमात्मविशुद्धिरात्मविशुद्धेस्तु फलमप्रतिबद्धज्ञानसिद्धिद्वारा ब्रह्मनिर्वाणमेवेति सूचयितुं योगिनो ब्रह्मविदो जीवत एव मुक्तिफलमाह—**युञ्जन्निति** । योगी योगनिष्ठापरायणो यतिरेवमेकाकित्वनिराशिष्ट्वापरिग्रहत्वसमकायशिरोग्रीवत्वस्थिरत्वनासिकाग्रद्रष्टृत्वदिगनवेक्षितृत्ववीतभयत्वब्रह्मचारिव्रतस्थत्वप्रशान्तत्वादिविशेषणविशिष्टो भूत्वा निरुक्तलक्षण आसन उपविश्यात्मानमन्त:करणं ब्रह्मणि सदा युञ्जन्ननुसंधानं कुर्वन्नियतमानस: श्रद्धया तीव्रमुमुक्षया चिरकालं नित्यनिरन्तरसमनुष्ठितसमाध्यभ्यासबलेन नियतं निश्चलं सर्वबाह्यवासनानि:शेषसंक्षयवशाद्विपरीतप्रत्ययानुत्पत्तौ निर्विकारात्मना स्थितं मानसम् "मनसैवानुद्रष्टव्यम्" इति श्रवणान्मनुत इदमेवाहमस्मीति स्वात्मना ब्रह्म साक्षात्क्रियतेऽनेनेति मन: मन एव मानसं यस्य स नियतमानसोऽप्रतिबद्धात्मविज्ञानो भूत्वा निर्वाणपरमां निर्वाणं शरीरसंबन्धरहितं परमं परमपुरुषार्थलक्षणं कैवल्यं यया सा ताम् । यद्वा निर्वाणं मोक्षरूपं परमं निरतिशयसुखं यस्यां सा तामत एव मत्संस्थां ममैव संस्था स्थितिर्यत्र नान्यस्य बुद्ध्यादेस्ताम् । यद्वा मम रूपेण संस्था यया ताम् । यद्वा मद्भावापत्तिरूपां ब्रह्मात्मना स्थितिलक्षणां शान्तिं सर्वोपरतिमात्यन्तिकसंसारनिवृत्तिरूपामधिगच्छति प्राप्नोतीत्यर्थ: । एतेन योगस्य फलं मुक्तेस्तृप्तिवत्स्वप्रत्यक्षं यतस्ततो मुमुक्षोर्यते: श्रवणमात्रसंभावितमुक्तत्वभ्रममुत्सृज्यावश्यं विदेहमुक्तये समाधि: कर्तव्य इति सूचितं भवति ॥ १९ ॥

श्री० टी०—योगाभ्यासफलमाह—**युञ्जन्नेवमिति** । एवमुक्तप्रकारेण सदा आत्मानं मनो युञ्जन्समाहितं कुर्वन्नियतं निरुद्धं मानसं चित्तं यस्य स: शान्तिं संसारोपरतिं प्राप्नोति । कथंभूताम् निर्वाणं परमं प्राप्यं यस्यां तां मत्संस्थां मद्रूपेणावस्थितिम् ॥ १९ ॥

स० टी०—एवं पूर्वोक्तरीत्या हि योगाभ्यासपरो मुनि: ॥ वैराग्याभ्यासयोगेन मन: कुर्वन्समाहितम् ॥ १ ॥ अभ्यासातिशयेनैव निरुद्धं येन मानसम् ॥ वृत्तिरूपा विकारा वा निरुद्धा येन मानसा: ॥ २ ॥ स वृत्त्युपरतिं शान्तिं निर्वाणपरमां तथा ॥ तत्त्वबोधसमुत्पत्तिद्वारेणाज्ञानमान्तरम् ॥ ३ ॥ सकार्यमपबाध्याशु मुक्तिपर्यवसायिनीम् ॥ मत्स्वरूपपरानन्दरूपा निष्ठां समश्नुते ॥ ४ ॥ १९ ॥

भा० टी०—अथेदानीं योगफलमाह—**युञ्जन्निति** । एवं यथोक्तेन विधानेन योगी आत्मानं मन: सदा सर्वदा युञ्जन्समाधानं कुर्वन् नियतं संयतं मानसं मनो यस्य स योगान्नियतमानसो भूत्वा शान्तिमुपरतिमविद्यानिवृत्तिलक्षणां ब्रह्मविद्यां कीदृशीं निर्वाणं मुक्ति: सैव परमा निष्ठा यस्या: मोक्षस्यानन्यसाधनभूताम् "तमेव विदित्वाऽतिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय" इति श्रुते: । तर्हि मच्चित्तो युक्त आसीत मत्पर इति किमर्थमुक्तमित्याशङ्क्याह—मत्संस्थां मदधीनां योगेनाराधितान्मत्त: सा लभ्यत इत्यर्थ: । तथाच वक्ष्यति 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येनमामुपयान्ति ते' इति । अधिगच्छति प्राप्नोति ॥ १९ ॥

प० टी०—अथ योगाभ्यासफलमाह—**युञ्जन्निति** । एवममुना प्रकारेण योगाभ्यासरत आत्मानं मन: समाहितं कुर्वन्नियतं स्वाधीनं मानसं यस्य तथाविध: सन् शान्तिं संसारोपरममधिगच्छति । किंभूतां, निर्वाणं परमं प्राप्तव्यस्थानं यस्याम्, मयि संस्था स्थितिर्यया सा मदाकारेण संस्थानमित्यर्थ: । श्रुतिरपि तैत्तिरीयके—"युञ्जान: प्रथमं मनस्तत्त्वाय सविता धिय:" इति । भाष्यम्—प्रथमं प्रारम्भे मनो युञ्जान: स्वाधीनं कुर्वाणोऽनन्तरं तत्त्वायात्मप्राप्तये धियो बुद्धीर्युञ्जान: पुरुष: सविता स्वयमात्मैव भवति॥ १९॥

रा० टी०—समाधे: फलमाह—**युञ्जन्निति** । नियतमानसो यतचित्त: योगी योगानुष्ठाता एवमुक्तप्रका-

रेण सदात्मानं युञ्जन् ध्यायन् आत्मानं मनो भगवति युक्तं कुर्वन्निति वा निर्वाणपरमां शरीरत्यागोत्तरकालीनां मत्संस्थां मयि स्थितिरूपां शान्तिमधिगच्छति प्राप्नोति न जीवन्मुक्तिमात्रमाप्नोतीत्यर्थः ॥ १५ ॥

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ॥
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

त० टी०—एवं महाफलं योगमभिधाय तत्साधनावशिष्टमाहारनियममाह—**नात्यश्नत** इति द्वाभ्याम् । अत्यश्नतः अत्यन्तमधिकं भुञ्जानस्य योगो ध्याननिष्ठा न भवति । एकान्तमत्यन्तमनश्नतोऽभुञ्जानस्यापि योगो नास्ति । तथाऽतिनिद्राशीलस्यातिजाग्रतश्च योगो नास्ति ॥ १६ ॥

म० टी०—एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्याम्—**नातीति** । यद्भुक्तं सज्जीर्यति शरीरस्य च कार्यक्षमतां संपादयति तदात्मसंमितमन्नं तदतिक्रम्य लोभेनाधिकमश्नतो न योगोऽस्ति अजीर्णदोषेण व्याधिपीडितत्वात् न चैकान्तमनश्नतो योगोऽस्ति अनाहारादत्यल्पाहाराद्वा रसपोषणाभावेन शरीरस्य कार्याक्षमत्वात् "यदुह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति" इति शतपथश्रुतेः । तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाऽश्नीयादित्यर्थः । अथवा 'पूरयेदशनेनार्धं तृतीयमुदकेन तु । वायोः संचरणार्थं तु चतुर्थमवशेषयेत्' इत्यादि योगशास्त्रोक्तपरिमाणादधिकं न्यूनं वाऽश्नतो योगो न संपद्यत इत्यर्थः । तथाऽतिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति हे अर्जुन सावधानो भवेत्याभिप्रायः । एकश्चकार उक्ताहारातिक्रमसमुच्चयार्थः अपरोऽत्रानुक्तदोषसमुच्चयार्थः । यथा मार्कण्डेयपुराणे—'नाध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः । युञ्जीत योगं राजेन्द्र योगी सिद्ध्यर्थमात्मनः ॥ नातिशीते न चैवोष्णे न द्वन्द्वे नानिलान्विते । कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः' इत्यादि ॥ १६ ॥

शं० टी०—योगी युञ्जीत सततमित्यारभ्यैतच्छ्लोकपर्यन्तं योगं योगाङ्गानि योगासनं योगिनो योगस्य फलं च प्रतिपाद्य पुनरपीदानीं योगाभ्यासिन एवाहारादिबहिरङ्गमन्तरङ्गयोगानन्दं च प्रतिपादयति—**नात्यश्नतस्त्विति** । "यदात्मसंमितमन्नं तदवति न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति" इति श्रवणात् श्रुतेरयमर्थः—आत्मसंमितं स्वोदरपरिमाणमनुकूलं च यदन्नं भुज्यते तदन्नं भोक्तारमवति धर्मनिर्वाहाय च भवति न हिनस्ति धातुवैषम्यं संपाद्य पुरुषं न हन्ति न पीडयति च यद्भूयः स्वोदरपरिमाणादतिरिक्तमन्नं भुज्यते तद्धिनस्ति शूलादिकमुत्पाद्य पुरुषं हन्ति धर्मं च नाशयति यत्कनीयः यत्कनीयोऽत्यल्पमन्नं भुज्यते न तत्पुरुषमवति क्षुन्निवृत्त्यै धर्मनिर्वाहाय च क्षमं न भवति, ततः परिमितमेव भोक्तव्यमिति सिद्धम् । इममेवार्थं श्रीभगवानप्याह—अत्यश्नतः स्वोदरपरिमाणमतिक्रम्य जरयितुमशक्यमन्नमश्नतो बह्वाशिनो योगिनो यतेर्न योगोऽस्ति योगनिष्ठा न सिध्यति, शुश्रूषोरपि यतेः श्रवणं मननं ब्रह्मचर्यं च न सिध्यति, एकान्तं नियमेनानश्नतोऽप्यल्पमश्नतश्च यतेर्योगो नास्त्येव श्रवणं मननं चापि न सिध्यति किंतु स्वोदरपरिमितममेदोवृद्धिकरं चान्नमश्नत एव योगः श्रवणं मननं ब्रह्मचर्यं च दिवास्वापादिदोषराहित्यमपि सिध्यतीत्यर्थः । अथवा 'पूरयेदशनेनार्धं तृतीयमुदकेन तु । वायोः संचरणार्थाय चतुर्थमवशेषयेत्' इत्यादिशास्त्रपरिमाणमतीत्याश्नतोऽनश्नतश्च योगो न सिध्यति यथा तथातिस्वप्नशीलस्यात्यन्तनिद्रालोरतिजाग्रतश्च योगो न सिध्यतीत्यर्थः ॥ १६ ॥

श्री० टी०—योगाभ्यासनिष्ठस्याहारादिनियममाह—**नेति** द्वाभ्याम् । अत्यन्तमधिकं भुञ्जानस्य एकान्तमत्यन्तमभुञ्जानस्यापि योगः समाधिर्न भवति तथाऽतिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति ॥ १६ ॥

स० टी०—योगाभ्यासैकनिष्ठस्य प्राहाहारादिसंयमम् ॥ भुक्तं सज्जीर्यति स्वस्य यदन्नं देहधारणम् ॥१॥

तदात्मसंमितं ज्ञेयं तदतिक्रम्य लोभतः ॥ अधिकं चाश्नतो नास्ति योगोऽजीर्णादिदोषतः ॥ २ ॥ अत्यल्पाहारतो नास्ति नास्त्यनाहारतः स च ॥ अथवा योगशास्त्रोक्तमाहारं नैव लङ्घयेत् ॥ ३ ॥ पूरयेदशनेनार्धं तृतीयमुदकेन तु ॥ वायोः संचरणार्थं तु चतुर्थमवशेषयेत् ॥ ४ ॥ निद्रयाक्रान्तचित्तस्य योगाभ्यासो न संभवेत् ॥ ततो नास्त्यतिनिद्रालोर्योगो नास्त्यतिजाग्रतः ॥ ५ ॥ १६ ॥

भा० टी०—योगिन आहारादिनियमं वक्तुं प्रथमं व्यतिरेकमाह—**नेति**। अत्यश्नतः आत्मसंमितादन्नादधिकमश्नतः योगो नास्ति न चैकान्तमात्मसंमितमप्यनश्नतो योगोऽस्ति उभयथापि व्याध्यादिना नाशप्रसङ्गात्। तथाच शतपथश्रुतिः "यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति यद्यत्कनीयो न तदवति" इति तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाऽश्नीयात् योगशास्त्रे परिपठितादन्नपरिमाणादतिमात्रं न्यूनं वाश्नतो योगिनो योगो नास्तीति वा व्याख्येयम्। तदुक्तम्—'पूरयेदशनेनार्धं तृतीयमुदकेन तु। वायोः संचरणार्थं तु चतुर्थमवशेषयेत्' इति। एतादृशस्य योग एव न सिध्यति तेन दुःखरूपसमूलसंसारपङ्कहान्या शुद्धत्वाविर्भावस्तु दूरं निरस्त इति सूचयन्संबोधयति—हे अर्जुनेति ॥ १६ ॥

प० टी०—अथाभ्यासनिष्ठस्याहारादिनियममाह—**नात्यश्नत** इति द्वाभ्याम्। अति अत्यन्तमश्नाति जेमति तस्य तथैकान्तमत्यन्तमनश्नत उपोषितस्य तथात्यन्तं स्वप्नशीलस्य निद्रासक्तस्याथवात्यन्तं जाग्रतो योगो दुःखहा दुःखोपशमाय न भवति ॥ १६ ॥

रा० टी०—ध्यानयोगनिष्ठस्याहारादिनियममाह—**नात्यश्नत** इत्यादिद्वाभ्याम्। अति अधिकं भुञ्जानस्य एकान्तं सर्वथैवाभुञ्जानस्य चातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्तीत्यर्थः। अत्राशनजागरणनिषेधोऽशक्तस्य शक्तस्य त्वनशनादावपि न योगक्षतिरिति ज्ञेयम् ॥ १६ ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

त० टी०—तर्हि कीदृशस्य योगो भवतीत्यपेक्षायामाह—**युक्तेति**। आहारो भोजनं, विहारो विक्रमणं, तौ युक्तौ नियतपरिमाणौ यस्य तस्य। तथोक्तं योगशास्त्रे 'द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत्। वायोः संचरणार्थाय चतुर्थमवशेषयेत्' इति। तथा युक्ता नियता कर्मसु चेष्टा यस्य तथा युक्तौ स्वप्नावबोधौ निद्राजागरौ यस्य तस्य दुःखनाशको योगो निष्पन्नो भवति ॥ १७ ॥

म० टी०—एवमाहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्वयमाह—**युक्तेति**। आह्रियत इत्याहारोऽन्नं, विहरणं विहारः पादक्रमः, तौ युक्तौ नियतपरिमाणौ यस्य तथा अन्येष्वपि प्रणवजपोपनिषदावर्तनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य तथा स्वप्नो निद्रा अवबोधो जागरणं तौ युक्तौ नियतकालौ यस्य तस्य योगो भवति साधनपाटवात्समाधिः सिध्यति नान्यस्य। एवं प्रयत्नविशेषेण संपादितो योगः किंफल इति तत्राह—दुःखहेति सर्वसंसारदुःखकारणाविद्योन्मूलनहेतुब्रह्मविद्योत्पादकत्वात्समूलसर्वदुःखनिवृत्तिहेतुरित्यर्थः। अत्राहारस्य नियतत्वं अर्धमशनस्य सव्यञ्जनस्य तृतीयमुदकस्य तु वायोः संचारणार्थं तु चतुर्थमवशेषयेदित्यादि प्रागुक्तम्। विहारस्य नियतत्वं 'योजनान्न परं गच्छेत्' इत्यादि। कर्मसु चेष्टाया नियतत्वं वागादिचापलपरित्यागः। रात्रेर्विभागत्रयं कृत्वा प्रथमान्त्ययोर्जागरणं मध्ये स्वपनमिति स्वप्नावबोधयोर्नियतकालत्वम्। एवमन्येऽपि योगशास्त्रोक्ता नियमा द्रष्टव्याः ॥ १७ ॥

श्रं० टी०—तर्हि कीदृशस्य योगः सिध्यतीत्याह—**युक्ताहारेति**। युक्ताहारविहारस्य युक्तः 'पूरयेदशनेनार्धम्' इति 'न गव्यूतेः परं गच्छेन्न ग्रामे नगरे वसेत्' इत्यादिशास्त्रनियमेन युक्त आहारोऽन्नं विहारो

विश्रान्त्यै संचारो यस्य तस्य परिमिताहारविहारस्य युक्तचेष्टस्य कर्मसु अन्नादानविसर्गादिक्रियासु युक्ता यावता कार्यसिद्धिस्तावत्परिमिता न तु विशृङ्खला चेष्टा देहेन्द्रियव्यापारो यस्य तस्य, युक्तस्वप्नावबोधस्य स्वप्नो निद्रावबोधो जागरस्तावेतौ युक्तौ परिमितौ 'जागृयाद्दशनाड्यस्तु निद्रा तु दशनाडिकाः । पश्चाज्जागरणं तद्वद्दशनाड्यस्तु योगिनः ' इत्युक्तलक्षणलक्षितौ स्वप्नावबोधौ यस्य तस्य योगिनो ब्रह्मनिष्ठस्य आहारविहार-निद्रादीनामतिरिक्तत्वे रजस्तमोवृद्धिस्तया समाधेर्ज्ञानस्य च विच्छित्तिस्ततस्तत्परिमित्या भवितव्यम् । एवं-लक्षणस्य यतेर्योगः समाधिर्दुःखहा दुःखान्याध्यात्मिकादीनि जन्मादीनि च सर्वाणि स्वानुष्ठानसमुत्पन्नाप्रति-बद्धबोधेन हन्तीति दुःखहा भवति विदेहमुक्तिं संपादयतीत्यर्थः ॥ १७ ॥

श्री० टी०—तर्हि कथंभूतस्य योगो भवतीत्यत आह—युक्तेति । युक्तो नियत आहारो विहारश्च गति-र्यस्य, कर्मसु कार्येषु युक्ता नियतैव चेष्टा यस्य, युक्तौ नियतौ स्वप्नावबोधौ निद्राजागरौ यस्य, तस्य दुःखनि-वर्तको योगो भवति सिध्यति ॥ १७ ॥

स० टी०—अन्नं विहरणं यस्य नियतं परिमाणतः ॥ तथा परिमिता चेष्टा निद्रा जागरणे मिते ॥ १ ॥ सर्वदुःखक्षये हेतुस्तस्य योगोऽस्ति सन्मतेः ॥ अभियुक्तैस्तथैवोक्तं योगिनां योगसिद्धये ॥ २ ॥ अत्राहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंधारणार्थम् ॥ प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम् ॥ ३ ॥ रजन्या मध्यमौ यामौ कुर्यान्निद्रां न चान्यदा ॥ विना प्रयोजनं चेष्टां न कु-र्याद्धस्तपादयोः ॥ ४ ॥ वृथा चेष्टा वृथा कर्म भवेन्मन्दधियां नृणाम् ॥ हितं मेध्यं मितं यस्य भोजनं प्राणधारकम् ॥ ५ ॥ गुरुसेवा मुखे यस्य कर्मण्येवाङ्घ्रिसंक्रमः ॥ मिता निद्रा मिता वाणी यस्य भाग-वतस्य च ॥ ६ ॥ योगस्तस्य सकार्यस्याज्ञानस्य स्याद्विनाशकृत् ॥ ७ ॥ १७ ॥

भा० टी०—अन्वयमाह—युक्तेति । आह्रियत इत्याहारः अन्नं, विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ यस्य । अन्नस्य युक्तत्वमुक्तमेव पादक्रमस्य नियतत्वं तु 'योजनान्न परं गच्छेत्' इत्युक्तरूपम् । तथा कर्मस्वितरव्यापारेषु युक्ता नियता चेष्टा यस्य स तथा । युक्तौ स्वप्नावबोधौ निद्राजागरौ रात्रेराद्यन्तभाग-योर्जागरो मध्ये निद्रेत्येवं नियतकालौ यस्य तस्य योगिनो योगो दुःखहा ज्ञानप्राप्त्या सर्वानर्थमूलभूताvi-द्यानिवृत्त्या सर्वसंसारदुःखक्षयकृद्भवतीत्यर्थः ॥ १७ ॥

प० टी०—किंतु—युक्तेति । युक्तो नियमित आहारो भोजनं विहारश्चेष्टा यस्य तथा कर्मसु कार्येषु ॥ १७ ॥

रा० टी०—कथंभूतस्य योगो भवतीत्यत आह—युक्तेति । युक्तौ योगोपेतौ आहारविहारौ भोजनसं-चारौ यस्य स तथा तस्य यावता श्रमादिर्न भवति तावदाहारव्यापारवत इत्यर्थः । कर्मसु कार्येषु युक्त-चेष्टस्य श्रमानापादकचेष्टायुक्तस्य युक्तस्वप्नावबोधस्य यावन्निद्रावबोधौ योगाविघातकौ तावन्निद्रावबोधोपे-तस्य योगो ध्यानयोगः समाधिरिति यावत्, दुःखहा भवतीत्यर्थः ॥ १७ ॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥
निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

त० टी०—एवं नियमवान्पुरुषः कदा निष्पन्नयोगो भवतीत्यपेक्षायामाह—यदेति । यदा यस्मिन् काले नियतं विषयान्तरवृत्तिशून्यतया विशेषेण संयतं चित्तमात्मन्येवावतिष्ठते निश्चलं भवति तदा सर्व-कामेभ्यो निस्पृहः सन्युक्तः निष्पन्नयोग इत्युच्यते योगज्ञैरिति शेषः ॥ १८ ॥

म० टी०—एवमेकाग्रभूमौ संप्रज्ञातं समाधिमभिधाय निरोधभूमावसंप्रज्ञातं समाधिं वक्तुमुपक्रमते—यदे-ति । यदा यस्मिन् काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्ववृत्तिशून्यतामापादितं चित्तं विगतरजस्त-

मस्कमन्तःकरणसत्त्वं स्वच्छत्वात्सर्वविषयाकारग्रहणसमर्थमपि सर्वतो निरुद्धवृत्तिकत्वादात्मन्येव प्रत्यक्चिति अनात्मानुपरक्ते वृत्तिराहित्येऽपि स्वतःसिद्धस्यात्माकारस्य वारयितुमशक्यत्वाच्चितेरेव प्राधान्यात् न्यग्भूतं सदवतिष्ठते निश्चलं भवति तदा तस्मिन्सर्ववृत्तिनिरोधकाले युक्तः समाहित इत्युच्यते । कः यः सर्वकामेभ्यो निःस्पृहः निर्गता दोषदर्शनेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहा तृष्णा यस्येति परं वैराग्यमसंप्रज्ञातसमाधेरन्तरङ्गं साधनमुक्तम् । तथा च व्याख्यातं प्राक् ॥ १८ ॥

शं० टी०—यद्यपि यदा हि नेन्द्रियार्थेष्विति कूटस्थो विजितेन्द्रियः इति च योगिनो योगारूढत्वं सम्यङ्निरूपितं तथापि ब्रह्मविल्लक्षणे परिज्ञाते मुमुक्षुभिस्तदाराधनं तदाश्रयणं च कृत्वा ज्ञानं मुक्तिश्च प्राप्तुं शक्यत इति तदेव च पुनर्विस्पष्टयति—**यदेति** । निरुक्तबहिरङ्गान्तरङ्गसाधनसंपत्त्या तीव्रमोक्षेच्छावैराग्याभ्यां च नित्यं योगमभ्यस्यतो योगिनो यतेर्यदा यस्मिन्काले विनियतं विषयसंबन्धो यथा न स्यात्तथा निरन्तराभ्यासबलेनैकाग्र्यमधिगमितं चित्तमात्मनि नित्यानन्दैकरसे प्रत्यगभिन्ने ब्रह्मण्येवावतिष्ठते सर्ववासनाक्षत्या सर्वकामविध्वस्त्या च स्वयं सद्वासनावासितं सत्सर्वदा स्वरूप एव तिष्ठति प्रयत्नेनापि न बाह्यमवलम्बत इत्यर्थः । तदेव विस्पष्टयति—**निःस्पृह इति** । काम्यन्त इति कामाः शब्दादयस्तेभ्यो यत्नादयत्नाद्वा कचिद्विषयीभूतेभ्यः सर्वेभ्यश्च यदाऽयं निःस्पृह इच्छाशून्यो भवति तेषु मिथ्यात्वबुद्ध्या इन्द्रियाणि मनश्च न प्रवर्तयति तदा युक्तो योगारूढ इत्युच्यते पण्डितैरिति शेषः ॥ १८ ॥

श्री० टी०—कदा निष्पन्नयोगः पुरुषो भवतीत्यपेक्षायामाह—**यदेति** । विनियतं विशेषेण निरुद्धं सच्चित्तमात्मन्येव यदा निश्चलं तिष्ठति, किंच सर्वकामेभ्यः ऐहिकामुष्मिकभोगेभ्यो निःस्पृहो विगततृष्णो भवति तदा युक्तः प्राप्तयोग इत्युच्यते ॥ १८ ॥

स० टी०—यस्मिन्काले विशेषेण स्वच्छत्वान्निश्चलं मनः ॥ प्रतीच्येव निरुद्धत्वान्नियमेनावतिष्ठते ॥१॥ दृष्टादृष्टास्पदेभ्यश्च कामेभ्यो दोषदर्शनात् ॥ तृष्णा विनिर्गता यस्य परवैराग्ययोगतः ॥ २ ॥ तदा समाहितो योगी सिद्ध इत्युच्यते बुधैः ॥ ३ ॥ १८ ॥

भा० टी०—एतादृशयोगयुक्तः कदा भवतीति तत्राह—**यदेति** । यस्मिन्काले विशेषेण नियतं चित्तं संयतमेकाग्रतामापन्नं निरुद्धं चित्तं बाह्यविषयचिन्तां विहायात्मन्येव प्रत्यगभिन्ने केवलेऽवतिष्ठते स्थितिं लभत इत्यर्थः । सर्वकामेभ्यो दृष्टादृष्टविषयेभ्यः निर्गता निवृत्ता स्पृहा तृष्णा यस्य स तदा तस्मिन्काले युक्त इत्युच्यते ॥१८॥

प० टी०—तथा युक्तनिद्राप्रबोधस्य पुरुषस्य परीक्षामाह—**यदेति** । विनियतं निरुद्धं चित्तमात्मन्येवावतिष्ठते, यदा च सर्वकामेभ्यो निःस्पृहो भवति तदा युक्तो निष्पन्नयोग इत्युच्यते ॥ १८ ॥

रा० टी०—योगसंपूर्तिस्वरूपमाह—**यदेत्याद्यनेकश्लोकैः** । यदा विशेषेण नियतं विषयेभ्यः प्रत्याहृतं चित्तमात्मन्येवावतिष्ठते सर्वकामेभ्यः निस्पृहश्च यदा तदा युक्तो योगसंपूर्तिमानित्युच्यत इत्यर्थः ॥ १८ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ॥
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

त० टी०—एवं सिद्धयोगयुक्तस्य लक्षणमुक्त्वेदानीं समाधिस्थस्य तस्योपमामाह—यथेति । निवातस्थो वातरहिते देशे स्थितो दीपो यथा नेङ्गते न चलति सोपमा स्मृता चिन्तिता योगविद्भिः । कस्य यतचित्तस्य योगिनः संयतान्तःकरणस्य योगं युञ्जतोऽनुतिष्ठत आत्मन आत्मस्वरूपस्य निवातस्थनिश्चलसुप्रकाशदीपवन्निवृत्तविक्षेपतया निश्चलसुप्रकाशज्ञानात्मा भासते इत्यर्थः ॥ १९ ॥

म० टी०—समाधौ निर्वृत्तिकस्य चित्तस्योपमानमाह—**यथेति** । दीपचलनहेतुना वातेन रहिते देशे स्थितो

दीपो यथा चलनहेत्वभावान्नेङ्गते न चलति सोपमा स्मृता स दृष्टान्तश्चिन्तितो योगज्ञैः । कस्य योगिन एकाग्रभूमौ संप्रज्ञातसमाधिमतोऽभ्यासपाटवात् यतचित्तस्य निरुद्धसर्वचित्तवृत्तेरसंप्रज्ञातसमाधिरूपं योगं निरोधभूमौ युञ्जतोऽनुतिष्ठतो य आत्मान्तःकरणं तस्य निश्चलतया सत्त्वोद्रेकेण प्रकाशकतया च निश्चलो दीपो दृष्टान्त इत्यर्थः । आत्मनो योगं युञ्जत इति व्याख्याने दार्ष्टान्तिकालाभः सर्वावस्थस्यापि चित्तस्य सर्वदात्माकारतयात्मपदवैयर्थ्यं च, नहि योगेनात्माकारता चित्तस्य संपाद्यते किंतु स्वत एवात्माकारस्य सतोऽनात्माकारता निवर्त्यत इति तस्माद्दार्ष्टान्तिकप्रतिपादनार्थमेवात्मपदम् । यतचित्तस्येति भावपरो निर्देशः कर्मधारयो वा यतस्य चित्तस्येत्यर्थः ॥ १९ ॥

शं० टी०—योगमारुह्य तिष्ठतो यतेश्चित्तं कथं तिष्ठतीत्याकाङ्क्षायां तच्चित्तस्थितेरुपमानमाह तदनुष्ठितयोगस्यासंप्रज्ञातसमाधित्वं सूचयितुम्—**यथेति** । आत्मन इति कर्मणि षष्ठी आत्मन आत्मानं विषयीकृत्य प्रवर्तितं योगम् । यद्वा आत्मनः सर्वोपलब्धिसिद्धिसाधनं योगं समाधिं युञ्जतः सादरं नित्यनिरन्तरं समनुतिष्ठतो योगिनो यतेः परमहंसस्य यतचित्तस्य यतं ब्रह्मण्येव ब्रह्माकारेण निश्चलतया सदा स्थापितं चित्तं येन तस्य यतचित्तस्य ब्रह्मण्येव स्थिरीभूतमनसः सैवोपमा उपमीयते अनयेत्युपमा स एव दृष्टान्तः निवातस्थोऽन्तर्गृहस्थो दीपो यथा नेङ्गते न चलति तथा ब्रह्मणि स्थापितं ब्रह्मविच्चित्तं न चलति ब्रह्मण्येव ब्रह्मात्मना निश्चलीभूय तिष्ठत्ययमेवासंप्रज्ञातः समाधिः । तदुक्तम् ‘ मनसो वृत्तिशून्यस्य निर्विकारात्मना स्थितिः । असंप्रज्ञातनामासौ समाधिर्योगिनां प्रियः ’ इति ॥ १९ ॥

श्री० टी०—आत्मैक्याकारतयावस्थितस्य चित्तस्योपमानमाह—**यथेति** । वातशून्ये देशे स्थितो दीपो यथा नेङ्गते न विचलति सा उपमा दृष्टान्तः । कस्य आत्मविषयं योगं युञ्जतोऽभ्यस्यतो योगिनो यतं नियतं चित्तं यस्य तस्य । निष्कम्पतया प्रकाशकतया चाचञ्चलं तच्चित्तं तद्वत्तिष्ठतीत्यर्थः ॥ १९ ॥

स० टी०—समाहितधियः प्रत्यगानन्दे निश्चलस्य च ॥ योगिनो भगवानाहोपमानं बोधनाय वै ॥१॥ वातेन रहिते देशे स्थितो दीपो यथाचलः ॥ समाहितधियः सोऽयं दृष्टान्तश्चिन्तितो बुधैः ॥ २ ॥ निरोधभूमौ सततं समाधिमनुतिष्ठतः ॥ सत्त्वोद्रेकेण यच्चित्तं प्रकाशकतयाचलम् ॥ ३ ॥ निश्चलो दीप एतस्य दृष्टान्तो हरिणेरितः ॥ ४ ॥ १९ ॥

भा० टी०—योगिनः समाहितचित्तस्योपमानमाह—**यथेति** । यथा प्रदीपो निवाते वायुवर्जिते देशे स्थितो नेङ्गते न चलति उपमीयतेऽनयेत्युपमा सा योगज्ञैः चित्तप्रचारज्ञैः स्मृता चिन्तिता योगिनो यतचित्तस्य संयतान्तःकरणस्यात्मनो योगं समाधिमनुतिष्ठतः । अत्रोत्थानिकायां समाहितं च तच्चित्तमिति कर्मधारयः । योगिनः समाहितचित्तस्येति व्यधिकरणे षष्ठ्यौ । एवं मूले तद्भाष्ये च ज्ञेयम् । एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सदित्युत्तरश्लोकस्थभाष्यात् योगिनो यथोक्तविशेषणवतश्चित्तस्थैर्यस्येति शेष इति तु भाष्यटीकाकाराः । एतेनात्मनो योगं नियुञ्जत इति व्याख्याने दार्ष्टान्तिकालाभः सर्वावस्थस्यापि चित्तस्य सर्वदात्माकारतयात्मपदवैयर्थ्यं च । नहि योगेनात्माकारता चित्तस्य संपाद्यते, किंतु स्वत एवात्माकारस्य सतोऽनात्माकारता निवर्त्यत इति तस्माद्दार्ष्टान्तिकलाभप्रतिपादनार्थमात्मपदमिति प्रत्युक्तम् । विवेकादियुक्तेन मनसाऽविद्यानिवृत्त्यात्मा स्वयमेव प्रकाशते इत्यर्थे मनसैवानुद्रष्टव्यमितिवत् योगेनानात्माकारतां चित्तस्य निवर्त्य स्वतःसिद्धामात्माकारतां स्फुरणरूपां समाधिमनुतिष्ठत इत्यर्थके आत्मनो योगं युञ्जत इतिवाक्ये आत्मपदस्य सार्थक्यात् । अन्यथा आत्मसंस्थं मनः कृत्वेति वक्ष्यमाणात्मपदवैयर्थ्यप्रसङ्गात् । युञ्जन्नेवं सदात्मानमितिवत् आत्मनोऽन्तःकरणस्य समाधिं निरोधमनुतिष्ठतो संप्रज्ञातसमाध्यभिमुखस्येति भाष्यार्थसंभवेनात्मपदसार्थक्याच्च । अत एव योगिनो यतचित्तस्य निरुद्धसर्ववृत्तेरसंप्रज्ञातसमाधिरूपं योगं

निरोधभूमौ युञ्जतोऽनुतिष्ठतः य आत्मान्तःकरणं तस्य निश्चलतया सत्त्वोद्रेकेण प्रकाशकतया च निश्चलो दीपो दृष्टान्त इत्यप्यपास्तं, निश्चलताप्रतिपादकयतपदसमभिव्याहारात् समीपत्वाच्चान्वययोग्यं चित्तपदं विहायात्मपदस्य दार्ष्टान्तिकपरत्वानौचित्यात् । असंप्रज्ञातसमाधौ चित्तस्य कथमपि पृथगज्ञायमानत्वात् असंप्रज्ञातसमाध्यभिमुखस्य योगिनस्तत्सिद्धिपूर्वकाले यदेकाग्रीभूतं चित्तं तस्यायं दृष्टान्तो नतु निरुद्धसर्ववृत्तेरसंप्रज्ञातसमाधिस्थस्य योगिनोऽन्तःकरणस्येति विद्वद्भिराकलनीयम् ॥ १९ ॥

प० टी०—अथात्माकारतया स्थितस्योपमानमाह—यथेति । वातशून्यं स्थानं निवातं तत्र स्थितो दीपो यथा नेङ्गते न चलति तत्रत्यं पदार्थमात्रं स्पष्टतया प्रकाशयति । प्रकृते सोपमा दृष्टान्तः स्मृतः । कस्य, आत्मनो योगं युञ्जतोऽभ्यस्यतो योगिनो विक्षेपशून्यचित्तस्य ॥ १९ ॥

रा० टी०—योगसंपन्नः कथं तिष्ठतीत्यत आह—यथेति । वायुशून्यदेशस्थो दीपो यथा नेङ्गते न चलति सा उपमा दृष्टान्तः । कस्येत्यत उक्तम्—योगिन इति । आत्मनो योगं भगवद्विषयसमाधिं युञ्जतः कुर्वतः योगिनः यतचित्तस्येति ॥ १९ ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

त० टी०—एवमेतावता योगसाधनमासनाहारादियोगयुक्तस्य लक्षणोपमे चाभिधायेदानीं सफलं सिद्धयोगं लक्षयति—यत्रेत्यादिसार्धैस्त्रिभिः । यत्र यस्मिन्नवस्थाविशेषे योगसेवया योगाभ्यासेन निरुद्धं चित्तमुपरमते इतरस्मात् । यत्र चावस्थाविशेषे आत्मना शुद्धेन मनसा आत्मानं पश्यन्नन्यानिरपेक्ष आत्मन्येव तुष्यति ॥ २० ॥

म० टी०—एवं सामान्येन समाधिमुक्त्वा निरोधसमाधिं विस्तरेण विवरीतुमारभते—यत्रोपरमत इति । यत्र यस्मिन् परिणामविशेषे योगसेवया योगाभ्यासपाटवेन जाते सति चित्तं निरुद्धं एकविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिन्धनाग्निवदुपशाम्यन्निर्वृत्तिकतया सर्ववृत्तिनिरोधरूपेण परिणतं भवति । यत्र च यस्मिंश्च परिणामे सति आत्मना रजस्तमोऽनभिभूतशुद्धसत्त्वमात्रेणान्तःकरणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानन्दघनमनन्तमद्वितीयं पश्यन् वेदान्तप्रमाणजया वृत्त्या साक्षात्कुर्वन्नात्मन्येव परमानन्दघने तुष्यति न देहेन्द्रियसङ्घाते न वा तद्भोग्येऽन्यत्र । परमात्मदर्शने सत्यतुष्टिहेत्वभावात्तुष्यत्येवेति वा । तमन्तःकरणपरिणामं सर्वचित्तवृत्तिनिरोधरूपं योगं विद्यादिति परेणान्वयः । यत्र काले इति तु व्याख्यानमसाधु तच्छब्दानन्वयात् ॥ २० ॥

शं० टी०—एवंलक्षणसंपन्नो यश्चित्तपरीपाकविशेषः स एव योगो ज्ञातव्य इति वक्तुं तल्लक्षणान्याह—यत्रेतित्रिभि । बहिरङ्गान्तरङ्गसाधनसिद्ध्या तीव्रमोक्षेच्छया च विजृम्भितया योगसेवया योगो योगाङ्गसविकल्पसमाधिर्विजातीयप्रत्ययोदयराहित्येन केवलचित्प्रत्ययमात्रोदयलक्षणस्तस्य सेवया निरन्तरावृत्त्या निरुद्धं विपरीतवृत्तिर्यथा न स्यात्तथा चिरकालं ब्रह्मप्रत्ययावृत्तावेव स्थापितं चित्तं स्वयं निःशेषविनष्टसर्वबाह्यवासनापटलं सत् यत्र यस्यां दशायां स्वस्य केवलशुद्धसत्त्वांशमात्रावशेषरूपायां प्राप्तायां सत्यामुपरमते उपशमं गच्छति वृत्त्यन्तरपरिणाममुज्झित्वा ध्येयात्मनैव निवातस्थप्रदीपवन्निष्कम्पं तिष्ठतीत्यर्थः । किंच यत्र यस्यां चित्तपरिपाकविशेषदशायामयं ब्रह्मविदुत्तम आत्मनि निर्मलान्तःकरणे व्योम्नि राकाचन्द्रबिम्बवत्प्रकाशमानं वृत्त्यारूढं चिदानन्दैकरसमात्मानं परं ब्रह्मात्मना स्वात्मना ब्रह्मैवाहमिति स्वस्वरूपत्वेन पश्यन्साक्षादपरोक्षीकुर्वन् तुष्यत्यानन्दति मुक्तः कृतार्थोऽस्मीति मोदते " स मोदते

मोदनीयं हि लब्ध्वा " इतिश्रुतेः आत्मनि तुष्यतीति योगारोहणं कृतवतो महात्मन आत्मसंसारमोक्षणं तत्सुखं च प्रत्यक्षं यतस्ततः श्रवणादिना विज्ञातात्मतत्त्वस्य यतेर्योगारोहणेनैवात्मोद्धरणं सिध्यति तदवश्यं कर्तव्यमित्यनेन सूचितं भवति ॥ २० ॥

श्री० टी०—यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डवेत्यादौ कर्मैव योगशब्देनोक्तं, नात्यश्नतस्तु योगोऽस्तीत्यादौ तु समाधिर्योगशब्देनोक्तः, तत्र मुख्यो योगः क इत्यपेक्षायां समाधिमेव स्वरूपतः फलतश्च लक्षयन्स एव मुख्यो योग इत्याह—यत्रेति सार्धैस्त्रिभिः । यत्र यस्मिन्नवस्थाविशेषे योगाभ्यासेन निरुद्धं चित्तमुपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तम् । तथाच पातञ्जलं सूत्रम् 'योगश्चित्तवृत्तिनिरोधः' इति । इष्टप्राप्तिलक्षणेन फलेन तमेव लक्षयति यत्र यस्मिन्नवस्थाविशेषे आत्मना शुद्धेन मनसाऽऽत्मानमेव पश्यति न तु देहादि पश्यंश्चात्मन्येव तुष्यति न तु विषयेषु । यत्रेत्यादीनां यच्छब्दानां तं योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः ॥ २० ॥

स० टी०—एवं सामान्यतो योगं प्रोच्येदानीं विशेषतः ॥ समाधिं विस्तरेणाह भगवान्योगिनां गतिः ॥ १ ॥ परिणामविशेषे हि यस्मिन्नभ्यासपाटवात् ॥ जाते चित्तं निरुद्धं सच्छान्तं निःस्नेहदीपवत् ॥ २ ॥ यस्मिंश्च परिणामे सत्यात्मानन्दं चिदद्वयम् ॥ वेदान्तमानसं जातवृत्त्या पश्यंश्चिदात्मनि ॥ ३ ॥ तुष्यत्यात्मसुखादन्यत्तोषहेतोरभावतः ॥ आनन्दः पर एवात्मा भेदसंसर्गवर्जितः ॥ ४ ॥ स एव स्वस्वरूपेण व्यज्यते पुण्यकर्मभिः ॥ यावद्यावत्तमोऽपैति बुद्धौ धर्मसमाहितम् ॥ ५ ॥ तावत्तावद्धियः स्वास्थ्यं तावत्तावत्सुखोन्नतिः ॥ ६ ॥ २० ॥

भा० टी०—द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्चेति । तत्र ध्येयैकाकारसत्त्ववृत्तिर्भेदेन कथंचिज्ज्ञायमाना आद्यः, कथमपि पृथगज्ञायमाना सैव सत्त्ववृत्तिर्द्वितीयः । तत्राद्यं प्रदर्श्य इदानीं द्वितीयस्य लक्षणं विवक्षन्नाह—यत्रेति । एवं योगाभ्यासबलात् एकाग्रीभूतं निवातप्रदीपकल्पं सत् यत्र यस्मिन्काले उपरमते चित्तमुपरतिं गच्छतीति योगसेवया योगानुष्ठानेन निरुद्धं सर्वतो निरुद्धं निवारितप्रचारं यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनान्तःकरणेनात्मानं परं तत्पदार्थं ज्योतिःस्वरूपं पश्यन्नुपलभमानः त्वंपदार्थं आत्मन्येव तुष्यति परमात्मानं प्रत्यक्चैतन्य एव तद्भावेनापरोक्षीकुर्वन् अतुष्टिनिदानाभावात् तुष्टिं लभत एवेत्यर्थः ॥ २० ॥

प० टी०—अथ निष्पन्नयोगस्वरूपमाह—यत्रेत्यादिचतुर्भिः । यत्र यस्यामवस्थायां योगसेवया निरन्तराभ्यासेन निरुद्धं विक्षेपरहितं सदुपरमते उपरमं विषयेभ्यो व्यावृत्तिं प्राप्नोति । यत्र चात्मनैव शुद्धान्तःकरणेनात्मानं पश्यन् ज्ञानदृष्ट्यानुभवन्नात्मन्येव सुखस्वरूपे तुष्यति सुखरूपतया तिष्ठति तं विद्यादिति चतुर्थेनान्वयः ॥ २० ॥

रा० टी०-यत्रेति । योगसेवया निरुद्धं चित्तं यत्र समाधावुपरमते बाह्यव्यापारहीनं भवति । यत्र चैव यस्मिन्नेव समाधियोगे आत्मना मनसा आत्मानं भगवन्तं पश्यन्नात्मनि देहे तुष्यति तोषमाप्नोतीत्यर्थः । यच्छब्दयोस्तमित्यग्रेऽन्वयः । एवमुत्तरत्रापि ॥ २० ॥

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ॥
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

त० टी०—आत्मन्येव तोषे हेतुमाह—सुखमिति । यत्र यस्मिन्नवस्थाविशेषे यत्तदतीन्द्रियमिन्द्रियनिरपेक्षं बुद्ध्यैकग्राह्यमात्यन्तिकं नित्यं सुखं योगी वेत्ति अनुभवति । यत्र यस्मिन्सुखे च स्थितः तत्त्वत आत्मस्वरूपान्नैव चलति ॥ २१ ॥

म० टी०—आत्मन्येव तोषे हेतुमाह—**सुखमिति** । यत्र यस्मिन्नवस्थाविशेषे आत्यन्तिकमनन्तं निरतिशयं ब्रह्मस्वरूपमतीन्द्रियं विषयेन्द्रियसंप्रयोगानभिव्यङ्ग्यं बुद्धिग्राह्यं बुद्ध्यैव रजस्तमोमलरहितया सत्त्वमात्रवाहिन्या ग्राह्यं सुखं योगी वेत्ति अनुभवति यत्र च स्थितोऽयं विद्वांस्तत्त्वत आत्मस्वरूपान्नैव चलति तं योगसंज्ञितं विद्यादिति परेणान्वयः समानः । अत्रात्यन्तिकमिति ब्रह्मसुखस्वरूपकथनम्, अतीन्द्रियमिति विषयसुखव्यावृत्तिः, तस्य विषयेन्द्रियसंयोगसापेक्षत्वात् । बुद्धिग्राह्यमिति सौषुप्तसुखव्यावृत्तिः सुषुप्तौ बुद्धेर्लीनत्वात् समाधौ निर्वृत्तिकायास्तस्याः सत्त्वात् । तदुक्तं गौडपादैः ' लीयते तु सुषुप्तौ तन्निगृहीतं न लीयते ' इति । तथा च श्रूयते " समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् । न शक्यते वर्णयितुं गिरा तदा यदेतदन्तःकरणेन गृह्यते " इति अन्तःकरणेन निरुद्धसर्ववृत्तिकेनेत्यर्थः । वृत्त्या तु सुखास्वादनं गौडाचार्यैस्तत्र प्रतिषिद्धम् ' नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ' इति । महदिदं समाधौ सुखमनुभवामीति सविकल्पवृत्तिरूपा प्रज्ञा सुखास्वादः तं व्युत्थानरूपत्वेन समाधिविरोधित्वाद्योगी न कुर्यात् अत एवैतादृश्या प्रज्ञया सह सङ्गं परित्यजेत्तां निरुन्ध्यादित्यर्थः । निर्वृत्तिकेन तु चित्तेन स्वरूपसुखानुभवस्तैः प्रतिपादितः ' स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ' इति । स्पष्टं चैतदुपरिष्टात्करिष्यते ॥ २१ ॥

शं० टी०—किंच—**सुखमिति** । यत्र यस्यां बुद्धेः केवलशुद्धसत्त्वभावापत्तिदशायामयं योगनिष्ठो ब्रह्मविद्यतिः बुद्धिग्राह्यं स्ववृत्त्यैकगम्यमत एवातीन्द्रियमिन्द्रियाविषयमिन्द्रियविषयसंबन्धरहितमजन्यमित्यर्थः । तत एवात्यन्तिकमन्तमतिक्रम्य वर्तमानमात्यन्तिकमाद्यन्तशून्यमत एव " एषोऽस्य परमानन्दः " इत्यादिश्रुतिप्रसिद्धं यत्तत्सुखं वेत्ति सदानन्दोऽहमस्मीत्यात्मानन्दमनुभवतीत्यर्थः । यत्रायं योगी स्वयं चिदेकवृत्त्या स्वस्वरूपे सच्चिदानन्दैकरसे ब्रह्मणि तदात्मना स्थितः सन् तत्त्वतः परमार्थात्स्वरूपान्न चलति शतधा बाह्याभ्यन्तरविक्षेपेषु प्राप्तेष्वपि न किंचिद्विपरीतभावं भजतीत्यर्थः ॥ २१ ॥

श्री० टी०—आत्मन्येव तोषे हेतुमाह—**सुखमिति** । यत्र यस्मिन्नवस्थाविशेषे यत्तत्किमपि निरतिशयमात्यन्तिकं नित्यं सुखं वेत्ति । ननु तदा विषयेन्द्रियसंबन्धाभावात्कुतः सुखं स्यात्तत्राह—अतीन्द्रियं विषयेन्द्रियसंबन्धातीतं केवलं बुद्ध्यैवात्माकारतया ग्राह्यम् अत एव च यत्र स्थितः सन् तत्त्वतः आत्मस्वरूपान्नैव चलति ॥ २१ ॥

स० टी०—यत्रावस्थाविशेषे चिद्घनानन्ताद्वयं सुखम् ॥ विषयेन्द्रियसंयोगानभिव्यङ्ग्यं धियाच्छया॥१॥ सत्त्वमात्रप्रवाहिन्या ग्राह्यं चानुभवत्ययम् ॥ यत्रायं च स्थितो विद्वानात्मतत्त्वस्वरूपतः ॥ २ ॥ नैव प्रच्यवते तं च विद्यादित्यन्वयोऽमुना ॥ ३ ॥ २१ ॥

भा० टी०—किंच—**सुखेति** । सुखमत्यन्तमेव भवतीत्यात्यन्तिकमनन्तमित्यर्थः । यदेतादृशं ब्रह्मानन्दरूपं सुखं तद्बुद्ध्यैव गृह्यत इति बुद्धिग्राह्यम् " दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः " इति श्रुतेः । अतीन्द्रियमिन्द्रियगोचरातीतं विषयाजन्यमित्यर्थः । यत्र यस्मिन्कालेऽयं विद्वान् आत्मस्वरूपेणावस्थितो वेत्ति अनुभवति तत्त्वतस्तत्स्वरूपान्नैव चलति न प्रच्यवत इत्यर्थः ॥ २१ ॥

प० टी०—अथात्मसुखस्य विषयसुखातिरिक्तसत्त्वमुत्कृष्टत्वं च दर्शयति—**सुखमिति** । अयं योगी यदात्यन्तिकं सर्वोत्कृष्टं सुखं वेत्त्यनुभवति तद्बुद्धिग्राह्यम् । केवलं बुद्ध्यैवात्माकारया ग्राह्यमनुभवनीयं न तु विषयेन्द्रियजसुखवदित्याह—अतीन्द्रियमिति । विषयेन्द्रियसंबन्धातीतम् । तथा सुषुप्तौ तथा चातीन्द्रियपदेन विषयसुखाद्वैलक्षण्यं दर्शितम् । आत्यन्तिकपदेनोत्कृष्टत्वं दर्शितमित्यर्थः । अथ पुनरुत्कर्षमेव व्यनक्ति—यत्रेति । यत्र यस्मिन् सुखे तत्त्वतो निश्चयेन स्थितः स्थिरीभूतः सन्नैव चलति सुखान्तरं नापेक्षते परमा-

नन्दे क्षुद्रानन्दानामन्तर्भूतत्वात् । तदुक्तमध्यात्ममीमांसाया –'जाग्रत्यामन्तरात्मा विषयसुखकृतेऽनेकयत्नांश्च कुर्वन् श्राम्यत्सर्वेन्द्रियेभ्योऽधिगतमपि सुखं विस्मरन्याति निद्राम् । विश्रामायात्मरूपे त्वतितरसुलभं तेन चातीन्द्रियं हि सौख्यं सर्वोत्तमं स्यात्परिणतिविरसादिन्द्रियोत्थात्सुखाच्च ' इति ॥ २१ ॥

रा० टी०–सुखमिति । यत्र समाधौ स्थितः बुद्धिग्राह्यमनुभवेन वेद्यमतीन्द्रियमिन्द्रियाग्राह्यमात्यन्तिकमतिशयितं सुखं वेत्ति अनुभवति । यत्र योगे स्थितोऽयं तत्त्वतो भगवद्रूपान्न चलति तामित्यन्वयः ॥२१॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥

त० टी०–अचलनमेव हेतुनोपपादयति—यमिति । यं स्वरूपानुभवसंबन्धिसुखरूपं लाभं लब्ध्वा ततोऽधिकमपरं लाभं न मन्यते, तस्यैव निरतिशयत्वज्ञानात् । यस्मिंश्च सुखानुभवार्हे आत्मसक्तमनसोऽवस्थाविशेषे स्थितो योगी गुरुणा महतापि शीतोष्णादिदुःखेन न विचाल्यते न च्याव्यते इत्यर्थः ॥ २२ ॥

म० टी०–यत्र न चैवायं स्थितश्चलति तत्त्वत इत्युक्तमुपपादयति–यं लब्ध्वेति । यं च निरतिशयात्मकसुखव्यञ्जकं निर्वृत्तिकाचित्तावस्थाविशेषं लब्ध्वा सन्तताभ्यासपरिपाकेन संपाद्यापरं लाभं ततोऽधिकं न मन्यते 'कृतं कृत्यं प्राप्तं प्रापणीयमित्यात्मलाभान्न परं विद्यते' इति स्मृतेः । एवं विषयभोगवासनया समाधेर्विचलनं नास्तीत्युक्त्वा शीतवातमशकाद्युपद्रवनिवारणार्थमपि तन्नास्तीत्याह–यस्मिन्निति । यस्मिन् परमात्मसुखमये निर्वृत्तिकाचित्तावस्थाविशेषे स्थितो योगी गुरुणा महता शस्त्रनिपातादिनिमित्तेन महतापि दुःखेन न विचाल्यते किमुत क्षुद्रेणेत्यर्थः ॥ २२ ॥

शं० टी०–किंच–यमिति । आत्मसाक्षात्कार एव परमो लाभस्तल्लब्धेरसाधारणकारणं योगसिद्धिरपि परमलाभ एवेति मत्वा यमिति कार्यकारणयोरभेदेन निर्देशः, सदानन्दैकरसस्यात्मन उपलब्धेः परमकारणं यं निर्विकल्पकसमाधिं तत्कार्यमात्मलाभं च लब्ध्वा योगारूढो यतिः कंचित्प्राप्तमपरमनात्मविषयकं लाभं ततः सर्वस्य ब्रह्ममात्रत्वोपलम्भकनिर्विकल्पकसमाधेस्तत्फलादात्मलाभादधिकमुत्कृष्टं न मन्यते आत्मव्यतिरिक्तस्य सर्वस्यापि पदार्थस्य मायिकत्वेनासत्त्वात्तुच्छत्वात्सोपद्रवत्वाद्दुःखबीजत्वान्मिथ्यात्वाच्च धर्मादेर्लाभं सन्तो न लाभाय मन्यन्त इत्यर्थः । ननु ब्रह्मविष्ण्वादिलोकप्राप्तिस्तु विदुषो लाभ एवेति चेन्न, सत्यलोकवैकुण्ठादेरपि मायिकत्वेनोक्तदोषवत्तया मिथ्यात्वाविशेषात्तल्लाभस्तत्स्वामित्वलाभोऽप्यलाभ एव भवति ' आत्मलाभान्न परं विद्यते ' इति स्मृत्यैवात्मलाभातिरिक्तलाभस्य लाभत्वनिषेधान्नित्यनिरतिशयानन्दरूपस्यात्मन एव लाभो लाभाय भवति तस्माद्ब्रह्मविदात्मसाक्षात्कारकरणत्वादमुमेव योगं परमं लाभं मन्यते न ततोऽन्यं लाभमित्यर्थः । किंच यस्मिन् यस्यामन्तःकरणपरिपाकविशेषावस्थायां स्थितः बाह्यमाभ्यन्तरं च विस्मृत्य सद्भावापन्नया वृत्त्या पूर्णानन्दैकरसब्रह्मरूपेण संस्थितो ब्रह्मविद्यतिः गुरुणा खड्गपातादिजनितेनान्येन वाध्यात्मिकेन महता दुःखेन न विचाल्यते स्वरूपाच्चालयितुं न शक्यते बाह्याभ्यन्तरविक्षेपशतैर्विपरीतभावं गमयितुं न शक्यत इत्यर्थः ॥ २२ ॥

श्री० टी०–अचलत्वमेवोपपादयति–यमिति । यमात्मसुखरूपं लाभं लब्ध्वा ततोऽधिकमपरं लाभं न मन्यते न चिन्तयति तस्यैव निरतिशयसुखत्वात् यस्मिंश्च स्थितो महतापि शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते। एतेनानिष्टनिवृत्तिफलेनापि योगलक्षणमुक्तं द्रष्टव्यम् ॥ २२ ॥

स० टी०–यमभ्यासातिवैशद्याल्लब्ध्वा लाभं चिदद्वयम् ॥ ततो नैवापरं लाभमधिकं मन्यते बुधः ॥१॥

कृतकृत्यतया प्राप्तप्रापणीयतया तथा ॥ परमात्मसुखे यस्मिन्स्थितो दुःखेन नो मुनिः ॥ २ ॥ महता शस्त्रपातादिहेतुकेनापि चाल्यते ॥ ३ ॥ २२ ॥

भा० टी०—किंच—यमिति। यमात्मलाभं लब्ध्वा च ततोऽधिकमन्यल्लाभान्तरमस्तीति न मन्यते किंच यस्मिन्नात्मतत्त्वे स्थितो गुरुणापि दुःखेन शस्त्रनिपातादिलक्षणेन न विचाल्यते। यत्तु गुरुणा बृहस्पतिनापि दुःखेनातिप्रयासेनापि न विचाल्यते न ततः परिभ्रष्टः क्रियत इति तदुपेक्ष्यं, क्लिष्टकल्पनयाऽप्रसक्तप्रतिषेधस्यानुचितत्वात् ॥ २२ ॥

प० टी०—अथ तदेव प्रकटयति—**यदिति।** यत्सुखं लब्ध्वा ततः सकाशादपरं लाभमधिकं न मन्यते तस्यैव निरतिशयत्वात्। यथा सुषुप्तिसुखं प्राप्तः कश्चिद्भोजनार्थं न प्रबोधनीयः प्रत्यवायश्रवणात्। श्रुतिरपि—"तस्मादायतं न बोधयेद्दुर्भिषज्यं हास्य भवति" इति। भाष्यम्—यस्मात्सुषुप्तो निरतिशयं सुखं भवति तस्मात्कारणादायतं विस्तृतहस्तपादनिद्रितं पुरुषं न बोधयेज्जागरं न प्रापयेत्, हि यतोऽस्य जागरं प्रापितस्य दुर्भिषज्यमप्रतिकारं दुःखं भवति। किं च यस्मिन् सुखे स्थितः स्थिरीभूतः सन् गुरुणा महतापि रोगशोकादिदुःखेन न विचाल्यते स्वावस्थां न प्राप्यते ॥ २२ ॥

रा० टी०—यमिति। यं योगं लब्ध्वा च ततोऽपरं लाभमधिकं न मन्यते यस्मिन् स्थितो गुरुणापि दुःखेन दुःखहेतुना न विचाल्यते ॥ २२ ॥

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

त० टी०—एवं यच्छब्दाभ्यासेन सामान्येनोक्तो योऽवस्थाविशेषस्तं तच्छब्देन परामृश्य दर्शयति—**तं विद्यादिति।** दुःखशब्देन दुःखोदर्कं विषयेन्द्रियजन्यं सुखमपि गृह्यते, तथाच दुःखसंयोगेन स्पर्शमात्रेणापि वियोगो यस्मिंस्तमात्मनिर्वृत्तिकं चित्तावस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं विद्यात् जानीयात्। एवंभूतो योगो मुमुक्षुणा दृढविश्वासेनानुष्ठेय इत्याह—**स इति।** स योगो निश्चयेन उक्तलक्षणेन विश्वासेन योक्तव्यः अभ्यसनीयः। तत्सिद्धौ विलम्बे सति निर्वेदं न कुर्यादित्याह—**अनिर्विण्णचेतसेति।** योगाभ्यासे सिद्धिसंदेहात्प्रयत्नशैथिल्यं निर्वेदस्तद्रहितेन चेतसा योक्तव्य इत्यर्थः ॥ २३ ॥

म० टी०—तमिति। यत्रोपरमत इत्यारभ्य बहुभिर्विशेषणैर्यो निर्वृत्तिकः परमानन्दाभिव्यञ्जकश्चित्तावस्थाविशेष उक्तस्तं चित्तवृत्ति निरोधं चित्तवृत्तिमयसर्वदुःखविरोधित्वेन दुःखवियोगमेव सन्तं योगसंज्ञितं वियोगशब्दार्हमपि विरोधिलक्षणया योगशब्दवाच्यं विद्याज्जानीयान्न तु योगशब्दानुरोधात्कंचित्संबन्धं प्रतिपद्येतेत्यर्थः। तथा च भगवान् पतञ्जलिरसूत्रयत् 'योगश्चित्तवृत्तिनिरोधः' इति। योगो भवति दुःखहेति यत्प्रागुक्तं तदेतदुपसंहृतम्। एवंभूते योगे निश्चयानिर्वेदयोः साधनत्वविधानायाह—**स इति।** स यथोक्तफलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयोऽर्थः सत्य एवेत्यध्यवसायेन योक्तव्योऽभ्यसनीयः। अनिर्विण्णचेतसा एतावतापि कालेन योगो न सिद्धः किमतः परं कष्टमित्यनुतापो निर्वेदस्तद्रहितेन चेतसा इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरयेत्येवं धैर्ययुक्तेन मनसेत्यर्थः। तदेतद्गौडपादा उदाजह्रुः 'उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना। मनसो निग्रहस्तद्वद्भवेदपरिखेदतः' इति। उत्सेक उत्सेचनं शोषणाध्यवसायेन जलोद्धरणमिति यावत्। अत्र संप्रदायविद आख्यायिकामाचक्षते। कस्यचित् किल पक्षिणोऽण्डानि तीरस्थानि तरङ्गवेगेन समुद्रोऽपजहार। सच समुद्रं शोषयिष्याम्येवेति प्रवृत्तः स्वमुखाग्रेणैकैकं जलबिन्दुमुपरि प्रचिक्षेप। तदा च बहुभिः पक्षिभिर्बन्धुवर्गैर्वार्यमाणोऽपि नैवोपरराम। यदृच्छया च तत्रागतेन नारदेन निवारितोऽप्य-

स्मिन् जन्मनि जन्मान्तरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रतिजज्ञे । ततश्च दैवानुकूल्यात् कृपालुर्नारदो गरुडं तत्साहाय्याय प्रेषयामास समुद्रस्त्वज्ज्ञातिद्रोहेण त्वामवमन्यत इति वचनेन । ततो गरुडपक्षवातेन शुष्यन्समुद्रो भीतस्तान्यण्डानि तस्मै पक्षिणे प्रददाविति । एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनमीश्वरोऽनुगृह्णाति ततश्च पक्षिण इव तस्याभिमतं सिध्यतीति भावः ॥ २३ ॥

शं० टी०—योगस्य लक्षणान्युक्त्वाधुनोक्तलक्षणवन्तं योगं विजानीयादित्याह—**तं विद्यादिति** । बाह्योपरतत्वादिचित्तपरिपाकभेदविशिष्टो योऽन्तःकरणावस्थाविशेषस्तमेव योगसंज्ञितं विद्यात् योग इति संज्ञितं संज्ञा यस्य स योगसंज्ञितस्तमुक्तलक्षणमन्तःकरणावस्थाविशेषमेव योगं विजानीयात्पण्डित इत्यर्थः । योगस्योक्तमेव लक्षणं विस्पष्टत्वार्थं पुनरप्याह—दुःखसंयोगवियोगमिति । अत्र दुःखशब्देन तदनुबन्धि वैषयिकं सुखं च गृह्यते दुःखानामाध्यात्मिकादीनां सुखानां च संयोगः संसर्गस्तेन वियोगो यस्य स दुःखसंयोगवियोगः अप्रकाशितबाह्यसुखदुःखप्रत्ययो योऽन्तःकरणस्थितिविशेषस्तं योगं विद्यादित्यर्थः । एवं योगलक्षणं योगं चात्मनि पश्यन् तुष्यतीति योगफलमपि प्रतिपाद्य संसारनिमग्नस्यात्मन उद्धरणं योगेन विना नान्येन सिध्यत्यतो विज्ञातात्मतत्त्वस्य यतेर्विदेहमुक्त्यै समाधिरवश्यं कर्तव्य इति सूचयितुं पुनः समाधेः कर्तव्यतामाह—**स इति** । आत्मसमुद्धरणे परमसाधनमयमुक्तलक्षणो योगोऽनेनैवात्मा समुद्ध्रियते एतच्छास्त्रप्रसिद्धं विद्वत्प्रत्यक्षं चेति निश्चयेन चित्तदार्ढ्येनाप्यानिर्विण्णचेतसा नासाग्रदर्शनमिन्द्रियनिरोधनं साम्येन कायस्थापनं मनोनिग्रहश्च क्लेशाय भवति नाहं कर्तुं शक्नोमीति समाधिकरणे यदलसत्वं तेन दोषेण युक्तं चित्तं निर्विण्णं तीव्रमोक्षेच्छया तद्रहितमनिर्विण्णं तेनानिर्विण्णेन चेतसा मुमुक्षोर्यतेः स उक्तलक्षणो योगः समाधिर्योक्तव्यः प्रयोक्तव्यो विदेहमुक्त्यै सम्यक्कर्तव्य इत्यर्थः ॥ २३ ॥

श्री० टी०—य एवंभूतोऽवस्थाविशेषस्तमाह—**तमित्यर्धेन** । दुःखशब्देन दुःखमिश्रितत्वाद्वैषयिकं सुखमपि गृह्यते दुःखस्य संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिन् तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् । परमात्मना क्षेत्रज्ञस्य योजनं योगः । यद्वा दुःखसंयोगेन वियोग एव शूरे कातरशब्दवद्विरुद्धलक्षणया योग उच्यते कर्मणि तु योगशब्दस्तदुपायत्वादौपचारिक एवेति भावः । यस्मादेवं महाफलो योगस्तस्मात्स एव यत्नतोऽभ्यसनीय इत्याह—**स इति** सार्धेन । स योगो निश्चयेन शास्त्राचार्योपदेशजनितेन योक्तव्योऽभ्यसनीयः । यद्यपि शीघ्रं न सिध्यति तथापि अनिर्विण्णेन निर्वेदरहितेन चेतसा योक्तव्यः । दुःखबुद्ध्या प्रयत्नशैथिल्यं निर्वेदः ॥ २३ ॥

स० टी०—यत्रोपरमते चित्तमित्यारभ्य विशेषणैः ॥ चित्तावस्थाविशेषोऽय उक्तस्तं चित्तसंयमम् ॥ १ ॥ सर्वदुःखविरोधित्वाद्दुःखसंयोगघातकम् ॥ जानीयाद्दुःखसंयोगवियोगं सन्तमप्यमुम् ॥ २ ॥ विपरीतनयेनैव योगशब्दाभिधेयकम् ॥ शास्त्राचार्यगिरां भावविषयोऽर्थः स निश्चयात् ॥ ३ ॥ सत्य एवेति योक्तव्यो योगो निर्वेदशून्यया ॥ धियेति पुनराहेशो योगः कार्यतयोदितः ॥ ४ ॥ सेत्स्यत्येवेति निश्चित्य भवेऽस्मिन्वा भवान्तरे ॥ त्यक्त्वा निर्वेदमत्यन्तधैर्ययुक्तेन चेतसा ॥ ५ ॥ योगोऽस्त्यभ्यसनीयोऽयं यथोक्तं सांप्रदायिकैः ॥ उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना ॥ ६ ॥ मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥ ७ ॥ २३ ॥

भा० टी०—यत्रोपरमत इत्यारभ्ययावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशिष्टो योग उक्तः तं योगसंज्ञितं विद्याज्जानीयात् इति । यत्र यस्मिन्काले इत्यादि भाष्यं समाध्युपलक्षिते तस्मिन्काले योगसिद्धिर्भवतीति शेषः । यमात्मलाभं तं विद्यादुत्तरत्र संबन्धः यस्मिंस्थितो योगी न विचाल्यते तं योगं विद्यादिति पूर्ववत् । तं विद्यादित्याद्यपेक्षितं पूरयन्नवतारयति—**यत्रेति** । तमित्यात्मावस्थाविशेषं परामृशतीति भाष्यं तट्टी-

काङ्क्षद्भिर्व्याख्यातम् । वस्तुतस्तु यत्रोपरमत इत्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो योग उक्तः तमिति भाष्यानुरोधेन काले इत्यस्य चित्तोपरमविशिष्ट आत्मावस्थाविशेष इत्यर्थः । एवमग्रेऽपि । यमात्मलाभमित्यस्य आत्मनो लाभो यस्मिन् यस्मादिति वा । आत्मलाभरूपमिति वा । लब्ध्वेत्यादिविशेषणविशिष्टमात्मावस्थाविशेषमित्यर्थः । यस्मिन्नात्मतत्त्व इत्यस्यात्मतत्त्वमात्रोपलब्ध्या आत्मतत्त्वे स्थित इत्यादिविशेषणविशिष्टे आत्मावस्थाविशेष इत्यर्थः । तथाच सर्वेषां यच्छब्दानां तत्तद्विशेषणविशिष्टावस्थाविशेषप्रतिपादकानां तच्छब्देनान्वय इति एतेन यत्र काल इति व्याख्यानं त्वसाधु तच्छब्दानन्वयादिति प्रत्युक्तम् । यत्त्वसाधुवादिनोक्तं यत्र यस्मिन्परिणामविशेषे योगसेवया योगाभ्यासपाटवेन जाते सति चित्तं निरुद्धमेकविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिन्धनाग्निवदुपशाम्यन्निर्वृत्तिकतया सर्ववृत्तिनिरोधरूपेण परिणतं भवति यत्र च यस्मिंश्च परिणामे सतीत्यादि । तत्रेदं वक्तव्यं स चित्तपरिणामः कः यस्मिन्सति चित्तं निरोधपरिणामं भजति, निरोधपरिणाम उतैकाग्रतापरिणामः । नाद्यः यस्मिन्सति सर्ववृत्तिनिरोधरूपेण चित्तं परिणतं भवति इति तस्य ततः पृथगुक्तेः । न द्वितीयः तमन्तःकरणपरिणामं सर्वचित्तवृत्तिनिरोधरूपं योगं विद्यादिति परेणान्वयादिति स्वपरग्रन्थविरोधात् । यस्मिंश्च परिणामे सतीति अत्रापि विकल्पनीयम् अयं परिणामः किं पूर्वोक्तादन्य उत स एव । आद्ये प्रथमयत्रपदार्थैकार्थताभावः । न द्वितीयः उक्तदोषात् । एकाग्रतापरिणामे सति निरोधपरिणामस्तस्मिंश्च सति आत्मनात्मानं पश्यन्नात्मनि तुष्यतीति क्रमस्यौचित्याच्चेति दिक् । दुःखैः संयोगो दुःखसंयोगः तेन वियोगो निखिलार्थनिवृत्तिरूपस्तं योगसंज्ञितं योगशब्दितं विपरीतलक्षणेन विद्याज्जानीयादित्यर्थः । योगस्य फलमुपसंहृत्य शतं कृत्वापि पथ्यं वदितव्यमितिन्यायेन निश्चयादेः साधनत्वविधानार्थं योगस्य कर्तव्यतामाह—**स इति** । स यथोक्तफलो योगः निश्चयेनाध्यवसायेनेह जन्मनि जन्मान्तरे वा सेत्स्यत्येवेत्यध्यवसायः शास्त्राचार्योपदेशे यथार्थत्वनिश्चयो वा । अनिर्विण्णचेतसा खेदरहितेन चित्तेन दुःखबुद्ध्या प्रयत्नशैथिल्यकारणं खेदः, एतावतापि कालेन योगो नेति किमतः कष्टमित्येवंरूपः निश्चयेनानिर्विण्णचेतसा योक्तव्यः फलपर्यन्तमभ्यसनीयः । तदुक्त गौडपादाचार्यैः 'उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना । मनसो निग्रहस्तद्वद्भवेदपरिखेदतः' इति । उत्सेकः जलोद्धरणम् । एतेन निर्विण्णचेतसेत्येवंपदमुत्तरशेषभूतं द्रष्टव्यम् । तथाह्यापातनिका । नन्वभ्यस्यतां नाम योगस्तत्रापि यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते स सर्वसंकल्पसंन्यासीत्यनेन स्वार्थे संकल्पमूलकामनात्यागे इन्द्रियनिग्रहे प्राप्तेऽपि प्राप्तयोगैश्वर्यो दीनानाथसंदर्शनजनितानुकम्पापरवशस्तेषां हितकामनया संकल्पपूर्वं बाह्यं कर्माचरेदित्याशङ्क्याह—निर्विण्णेति । सर्वान्कामान् स्वीयानिव परसंबन्धिनोऽपि संकल्पप्रभवान् निर्विण्णेन चेतसा अशेषतः सह संकल्पैः त्यक्त्वेति स्वसंसारनिर्वेदवतः परार्थाप्रवृत्तिरत्यन्तासङ्गतेति । तथा समन्ततः सर्वविषयेभ्यो मनसा सहेन्द्रियग्रामं नियम्यैव योगो योक्तव्य इति प्रत्युक्तं, क्त्वाप्रत्ययेन कामत्यागादेः योगाभ्याससाधनत्वस्य स्पष्टप्रतीत्या योगसिद्ध्युत्तरभाव्यैश्वर्यवशादनुकम्पापरवशोऽपि स्वीयानिव परकीयानपि त्यक्त्वेत्यादिवर्णनस्यानौचित्यात् शनैः शनैरित्यादिना मनस उपरमस्य वक्ष्यमाणत्वेनात्र मनसा विवेकादियुक्तेनेति करणपरत्ववर्णनस्यैवौचित्याच्च ॥ २३ ॥

प० टी०—एवंभूतो योऽवस्थाविशेषः स एव योगशब्दव्यपदेश्य इत्याह—**तं विद्यादिति** । तं योगसंज्ञितं विद्यात् । योगोऽत्र परमात्मक्षेत्रज्ञयोर्योजनम् यथा सुषुप्तौ परमात्मा क्षेत्रज्ञेनाश्लिष्यते । श्रुतिरपि—"एवमेवायं शारीर आत्मा प्राज्ञेन आत्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्" इति । भाष्यम्—एवमेव सुषुप्तिवच्छारीरः शरीरावच्छिन्नः परमात्मा क्षेत्रज्ञेन जीवेन परिष्वक्त आलिङ्गितो बाह्यमान्तरं वा किंचिन्न वेद न जानाति । अथ किंभूतं योगं, दुःखसंयोगवियोगं दुःखेन सह संयोगो

यैस्ते दुःखसंयोगा विषयास्तेषां वियोगो यस्मिन्ननेन विषयसुखमपि दुःखपक्षान्तर्भूतमिति सूचितम् । अथ योगनिर्वाहार्थमाह—सेति । एवं स योगो निश्चयेन नियमेन योक्तव्योऽभ्यसनीयः । अथ यद्यप्यभ्यासेन शीघ्रं सिद्धिर्भवति तथापि दुःखं न मन्वीतेत्याह—अनिर्विण्णचेतसेति । न निर्वेदं प्राप्तं चेतो यस्य तेनानुद्विग्नान्तःकरणेनेत्यर्थः ॥ २३ ॥

रा० टी०—तमिति । तं दुःखसंयोगवियोगं दुःखसंयोगेन वियुज्यमानं दुःखसंयोगस्य वियोगो यस्मादिति वा । वियुज्यतेऽनेनेति वियोगः करणे घञ् । दुःखसंयोगस्य वियोग इति वा योगसंज्ञितं विद्यात् । संयोगपदेन न केवलमुत्पन्नदुःखं नाशयति किंतूत्पत्तिमेव निवारयतीति सूचयति । स योगः समाधिः निर्विण्णचेतसा विषयविरक्तमनसा निश्चयेन योक्तव्योऽवश्यं कर्तव्य एव मुमुक्षुणेत्यर्थः । मुमुक्षोर्ध्यानायोगव्यवच्छेदार्थोऽयं निश्चयशब्दः । अयोगव्यवच्छेदविधानार्थमेव उद्धरेदित्यत्र विहितस्यात्र पुनर्विधानम् ॥२३॥

संकल्पप्रभवान् कामाँस्त्यक्त्वा सर्वानशेषतः ॥
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ॥
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥

त० टी०—पूर्वं योगयुक्तलक्षणे निस्पृहः सर्वकामेभ्यः इत्यनेन सर्वकामत्यागपूर्वकध्याननिष्ठा निर्दिष्टा । इदानीं योगविरोधिप्रधानभूतान् कामान् सहसा त्यक्तुमशक्यान् स्मृत्वा पुनस्तत्त्यागप्रयत्नमुपदिशति—संकल्पेति द्वाभ्याम् । रूपादिमद्वस्तुनो दर्शनादिनाऽज्ञानेन सुखहेतुत्वकल्पनं संकल्पः । ततः प्रभवन्ति ते संकल्पप्रभवा ये कामा विषयाभिलाषा इदं मे भूयादिदं मे प्राप्नुयादित्येवमादिरूपास्तान्योगविरोधिनस्तद्याथात्म्यविचारजन्यदुःखहेतुत्वबुद्ध्या सर्वानैहिकामुष्मिकान् सवासनाँस्त्यक्त्वा ततो विषयविमुखीभूतेन मनसैवेन्द्रियग्रामं रूपादिविषयाभिमुख्यस्वभावं चक्षुरादिकरणसमूहं समन्ततः सर्वेभ्यस्तत्तद्विषयेभ्यो विनियम्य प्रत्याहृत्य शनैः शनैरभ्यासक्रमेण नतु सहसा उपरमेत् निवृत्तो भवेत् । उपराममेव दर्शयति—बुद्ध्येति । धृतिर्दुःखे प्राप्तेऽपि स्वनिष्ठायामनिर्वेदेन स्थितिस्तया गृहीता अवश्यकर्तव्यतायां दृढीकृता या बुद्धिः योगः कदाचित्प्राप्स्यत्येवेति व्यवसायरूपा तया आत्मसंस्थमात्मन्येव सम्यक् स्थितं निश्चलं मनः कृत्वा बाह्यं किंचिदपि न चिन्तयेत् ॥ २४ ॥ २५ ॥

म० टी०—किं च कृत्वा योगोऽभ्यसनीय इत्यत आह—संकल्प इति । संकल्पो दुष्टेष्वपि विषयेष्वशोभनत्वादर्शनेन शोभनाध्यासः । तस्माच्च संकल्पादिदं मे स्यादिदं मे स्यादित्येवंरूपाः कामाः प्रभवन्ति । तान् शोभनाध्यासप्रभवान् विषयाभिलाषान् विचारजन्याशोभनत्वनिश्चयेन शोभनाध्यासबाधाद् दृष्टेषु स्रक्चन्दनवनितादिष्वदृष्टेषु चेन्द्रलोकपारिजाताप्सरःप्रभृतिषु श्ववान्तपायसवत्स्वत एव सर्वान् ब्रह्मलोकपर्यन्तानशेषतः निरवशेषान् सवासनाँस्त्यक्त्वा अत एव कामपूर्वकत्वादिन्द्रियप्रवृत्तेस्तदपाये सति विवेकयुक्तेन मनसैवेन्द्रियग्रामं चक्षुरादिकरणसमूहं विनियम्य समन्ततः सर्वेभ्यो विषयेभ्यः प्रत्याहृत्य शनैः शनैरुपरमेदित्यन्वयः ॥ २४ ॥ भूमिकाजयक्रमेण शनैः शनैरुपरमेत् धृतिर्धैर्यमखिन्नता तया गृहीता या बुद्धिरवश्यकर्तव्यतानिश्चयरूपा तया यदाकदाचिदवश्यं भविष्यत्येव योगः किं त्वरयेत्येवंरूपया शनैः शनैर्गुरूपदिष्टमार्गेण मनो निरुन्ध्यात् । एतेनानिर्वेदनिश्चयौ प्रागुक्तौ दर्शितौ । तथा च श्रुतिः "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि" इति । वागिति वाचं लौकिकीं वैदिकीं च मनसि व्यापारवति नियच्छेत् "नानुध्यायाद्बहूञ्छब्दान् वाचो विग्ला-

पनं हि तत् " इति श्रुतेर्वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदित्यर्थः । चक्षुरादिनिरोधोऽप्येतस्यां भूमौ द्रष्टव्यः । मनसीति छान्दसं दैर्घ्यम् । तन्मनः कर्मेन्द्रियज्ञानेन्द्रियसहकारि नानाविधविकल्पसाधनं करणं ज्ञाने जानातीति ज्ञानमिति व्युत्पत्त्या ज्ञातर्यात्मनि ज्ञातृत्वोपाधावहंकारे नियच्छेत् मनोव्यापारान् परित्यज्याहंकारमात्रं परिशेषयेत् । तच्च ज्ञानं ज्ञातृत्वोपाधिमहंकारमात्मनि महति महत्तत्त्वे सर्वव्यापके नियच्छेत् । द्विविधो ह्यहंकारो विशेषरूपः सामान्यरूपश्चेति । अयमहमेतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपो व्यष्टयहंकारः । अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्टयहंकारः । स च हिरण्यगर्भो महानात्मेति च सर्वानुस्यूतत्वादुच्यते । ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शान्तात्मा सर्वान्तरश्चिदेकरसस्तस्मिन्महान्तमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कारणमव्यक्तमपि नियच्छेत्ततो निरुपाधिकस्त्वंपदलक्ष्यः शुद्ध आत्मा साक्षात्कृतो भवति । शुद्धे हि चिदेकरसे प्रत्यगात्मनि जडशक्तिरूपमनिर्वाच्यमव्यक्तं प्रकृतिरुपाधिः । सा च प्रथमं सामान्याहंकाररूपं महत्तत्त्वं नाम धृत्वा व्यक्तीभवति । ततो बहिर्विशेषाहंकाररूपेण । ततो बहिर्मनोरूपेण । ततो बहिर्वागादीन्द्रियरूपेण । तदेतच्छ्रुत्याभिहितम्— " इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः" इति । तत्र गवादिष्विव वाङ्निरोधः प्रथमा भूमिः । बालमुग्धादिष्विव निर्मनस्त्वं द्वितीया । तन्द्रामिवाहंकारराहित्यं तृतीया । सुषुप्ताविव महत्तत्त्वराहित्यं चतुर्थी । तदेतद्भूमिचतुष्टयमपेक्ष्य शनैः शनैरुपरमेदित्युक्तम् । यद्यपि महत्तत्त्वशान्तात्मनोर्मध्ये महत्तत्त्वोपादानमव्याकृताख्यं तत्त्वं श्रुत्योदाहारि तथापि तत्र महत्तत्त्वस्य अव्याकृते नियमनं नाभ्यधायि सुषुप्ताविव स्वरूपलयप्रसङ्गात् तस्य च कर्मक्षये सति पुरुषप्रयत्नमन्तरेण स्वत एव सिद्धत्वात्तत्त्वदर्शनानुपयोगित्वाच्च । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पूर्वमभिधाय सूक्ष्मत्वसिद्धये निरोधसमाधेरभिधानात् । स च तत्त्वदिदृक्षोर्दर्शनसाधनत्वेन दृष्टतत्त्वस्य च जीवन्मुक्तिप्रतिबन्धरूपक्लेशक्षयायापेक्षितः । ननु शान्तात्मन्यवरुद्धस्य चित्तस्य वृत्तिरहितत्वेन सुषुप्तिवन्न दर्शनहेतुत्वमिति चेत् न, स्वतःसिद्धस्य दर्शनस्य निवारयितुमशक्यत्वात् । तदुक्तम् ' आत्मानात्माकारं स्वभावतोऽवस्थितं सदा चित्तम् । आत्मैकाकारतया तिरस्कृतानात्मदृष्टि विदधीत ' यथा घट उत्पद्यमानः स्वतो वियत्पूर्ण एवोत्पद्यते । जलतण्डुलादिपूरणं तूत्पन्ने घटे पश्चात्पुरुषप्रयत्नेन भवति । तत्र जलादौ निःसारितेऽपि वियन्निःसारयितुं न शक्यते । मुखपिधानेऽप्यन्तर्वियदवतिष्ठत एव । तथा चित्तमुत्पद्यमानं चैतन्यपूर्णमेवोत्पद्यते । उत्पन्ने तु तस्मिन् मूषानिषिक्तद्रुतताम्रवत्सुखदुःखादिरूपत्वं भोगहेतुधर्माधर्मसहकृतसामग्रीवशाद्भवति । तत्र घटदुःखाद्यनात्माकारे विरामप्रत्ययाभ्यासेन निवारितेऽपि निर्निमित्तश्चिदाकारो वारयितुं न शक्यते । ततो निरोधसमाधिना निर्वृत्तिकेन चित्तेन संस्कारमात्रशेषतयातिसूक्ष्मत्वेन निरुपाधिकचिदात्ममात्राभिमुखत्वाद्वृत्तिं विनैव निर्विघ्नमात्मानुभूयते । तदेतदाह—आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेदिति । आत्मनि निरुपाधिके प्रतीचि संस्था समाप्तिर्यस्य तदात्मसंस्थं सर्वप्रकारवृत्तिशून्यं स्वभावसिद्धात्माकारमात्रविशिष्टं मनः कृत्वा धृतिगृहीतया विवेकबुद्ध्या संपाद्यासंप्रज्ञातसमाधिस्थः सन् किंचिदपि अनात्मानमात्मानं वा न चिन्तयेत् न वृत्त्या विषयीकुर्यात् । अनात्माकारवृत्तौ हि व्युत्थानमेव स्यात् आत्माकारवृत्तौ च संप्रज्ञातः समाधिरित्यसंप्रज्ञातसमाधिस्थैर्याय कामपि चित्तवृत्तिं नोत्पादयेदित्यर्थः ॥ २९ ॥

शं० टी०—समाधेः कर्तव्यप्रकारमेवाह—**संकल्पेति** । पदार्थेषु समीचीनत्वकल्पनमेव संकल्पस्तस्मात्प्रभवन्तीति संकल्पप्रभवास्तान् कामान् विषयाभिलाषान् सर्वान् सर्वपदार्थविषयानशेषतस्त्यक्त्वा परित्यक्तेऽपि तैले लेपरूपेण पात्रे शेषस्तिष्ठति यथा तथा कामेषु त्यक्तेष्वपि विषयेषु रञ्जनारूपेण कामशेषो यथा

न स्यात्तथा सर्वत्र कामत्यागः कर्तव्यः। सति कामलेशे तदाकृष्टं मनः समाधौ न तिष्ठत्यतः सर्वत्र देहजीवनादावपि निरपेक्षो भवेद्योगीत्यर्थः । योगसिद्धेरन्तरङ्गं बलवत्साधनमुक्त्वा साधनान्तरमाह—**मनसेति ।** समाधौ कृते सम्यग्ज्ञानं तेनैव मोक्षो नान्यथेत्येवं निश्चयवता कामसंकल्पयोर्दूरवर्तिनैव मनसा इन्द्रियग्रामं चक्षुरादीनां वागादीनां च संघातं समन्ततः सर्वतो नियम्य तेषां प्रवृत्तिं निगृह्येत्यर्थः । इन्द्रियैर्मनसा संयोगाकरणमेवेन्द्रियनियमनमिति मनसैवेतिपदेन सूचितम् । तत इन्द्रियाणां मनसश्च संयोगो यथा न स्यात्तथा स्थातव्यमित्यभिप्रायः ॥ २४ ॥ ब्रह्मविदुक्तलक्षण आसने सम्यगासित्वा शरीरं साम्येन स्थापयित्वा दिशोऽपश्यन्नासाग्रे दृष्टिं मुक्त्वा सर्वकामसंकल्पत्यागपूर्वकं सर्वेन्द्रियाणि निगृह्य ततः शनैः शनैरुपरमेदित्याह—**शनैरिति ।** शनैः शनैः क्रमेण बाह्यविषयेभ्यस्तत इन्द्रियेभ्यस्ततोऽन्तर्विपरीतप्रत्ययेभ्यश्च मन्दं मन्दमन्तःकरणमुपरमेदुपरतं कुर्यात् मोक्षैककामनया विषयैरिन्द्रियैरसत्प्रत्ययैश्च संबन्धो यथा न स्यात्तथा मनसो बहिःप्रवृत्तिमुपशमयेदित्यर्थः । "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि" इत्येतच्छ्रुत्युक्तरीत्या वागुपलक्षितानि सर्वाणीन्द्रियाणि तत्तद्विषयैः सह मनसि प्रविलापयेत् प्रपञ्चकारणं तन्मनोऽपि ज्ञान आत्मनि अहमात्मिकायां बुद्धौ तज्ज्ञानमहमात्मिका बुद्धिं महत्यात्मनि महत्तत्वे तन्महत्तत्वमव्याकृते तदव्याकृतं शान्ते सर्वप्रपञ्चोपशमे निर्विशेषे परे ब्रह्मणि प्रविलापयेत् । एवं सर्वं ब्रह्मणि प्रविलाप्य "ब्रह्मैवेदं सर्वम्" इत्यादिश्रुत्यर्थावष्टम्भसमुत्पन्ननिश्चयवती दृढवृत्तिर्धृतिर्धैर्यं तया गृहीतया निगृहीतया बुद्ध्या पूर्वोक्तप्रविलापनेन सर्वत्र ब्रह्ममात्रावशेषस्वसंस्कारबलेन सर्वमात्मैव न ततोऽन्यदस्तीत्येवं प्रत्ययवत्या बुद्ध्या मन आत्मसंस्थं सम्यगात्मन्येव चैतन्यरूपे स्थितं निश्चलं कृत्वा सर्वमात्मानमेव पश्यन्नित्यर्थः । एवमात्मसंस्थं मनः कृत्वा विद्वान् ततः स्वयं किंचिदपि बाह्यमाभ्यन्तरं वा वस्तु न चिन्तयेन्न भावयेत्किंतु सर्वं ब्रह्मैव भावयेदित्यर्थः । एतेन ब्रह्माकारवृत्त्या मनसो योऽन्यभावनाभावः स एष एव योग इति सूचितं भवति ॥ २५ ॥

श्री० टी०—किंच—**संकल्पेति ।** संकल्पात्प्रभवो येषां तान्योगप्रतिकूलान् सर्वान्कामानशेषतः सवासनांस्त्यक्त्वा मनसैव विषयदोषदर्शिना सर्वतः प्रसरन्तमिन्द्रियसमूहं विशेषेण नियम्य योगो योक्तव्य इति पूर्वेणान्वयः । यदि तु प्राक्तनकर्मसंस्कारेण मनो विचलेत्तर्हि धारणया स्थिरीकुर्यादित्याह—**शनैरिति ।** धृतिर्धारणा तया गृहीतया वशीकृतया बुद्ध्यात्मसंस्थमात्मन्येव सम्यक् स्थितं निश्चलं मनः कृत्वोपरमेत्, तच्च शनैः शनैरभ्यासक्रमेण नतु सहसा । उपरमस्वरूपमाह—न किंचिदपि चिन्तयेत् निश्चले मनसि स्वयमेव प्रकाशमानपरमानन्दस्वरूपो भूत्वाऽऽत्मध्यानादपि निवर्तेतेत्यर्थः ॥ २४ ॥ २५ ॥

स० टी०—दृष्ट्वा संसारमागारमापदां भ्रान्तिजन्मनाम् ॥ विरज्याल्पसुखेभ्यश्च भोगेभ्यो मतिमान्नरः॥१॥ कृष्णपादरतो भूत्वा सद्गुरुं प्राप्य शान्तिदम् ॥ लब्ध्वा ततः परब्रह्मोपदेशं योगमभ्यसेत् ॥ २ ॥ यावद्ब्रह्माद्वयानन्दे प्रतिष्ठां निश्चलां पराम् ॥ धियो न विन्दते तावद्योगो योक्तव्य आदरात् ॥ ३ ॥ प्रतिष्ठायां च सिद्धायां कृतकृत्यो भवेन्मुनिः ॥ एतद्धृदि निधायाह भगवान्भूतभावनः ॥ ४ ॥ इदं मे स्यादिदं मे स्यादिति संकल्पजानिमान् ॥ शोभनाध्यासजान्कामान्दुष्टेषु विषयेष्वपि ॥ ५ ॥ त्यक्त्वा भोगाभिलाषाख्यान्दोषदृष्ट्याप्यशेषतः ॥ सर्वान्द्रुहिणलोकान्तान्वासनासहितान्मुनिः ॥६॥ प्रत्याहृत्येन्द्रियग्रामं विषयेभ्यः समन्ततः ॥ कामापाये विवेकेन युक्ता धीर्या तया तथा ॥ ७ ॥ २४ ॥ गुरूपदिष्टमार्गेणोपरमेच्च शनैः शनैः ॥ अखिन्नतात्मधैर्येण युक्ता या धीस्तया मनः ॥ १ ॥ आत्मन्येव समाप्तिर्हि यस्य तद्ब्रह्म गोचरम् ॥ कृत्वा विचिन्तयेन्नान्यद्व्रतिमन्यां न वा श्रयेत् ॥ २ ॥ आत्मैवास्त्यखिलं नान्यदिति निश्चित्य वा मुनिः ॥ नान्यच्चिचिन्तयेत्किंचिद्योगस्यायं परोऽवधिः ॥ ३ ॥ २५ ॥

भा० टी०—साधनान्तराण्यपि विधत्ते—**संकल्पेति** । संकल्पो शोभनोऽपि इहामुत्रार्थभोगेऽविचारजनित: शोभनाध्यास: स प्रभवो येषां कामानां इदं मे स्यादिदं मे स्यादित्येवंरूपाणामिच्छाभेदानां ते तान्सर्वान् ब्रह्मलोकपर्यन्तानशेषतो निर्लेपेन लेपरूपेण शिष्टया वासनया सहितान् विचारेण शोभनाध्यासनिवृत्त्या त्यक्त्वा परित्यज्य । किंच मनसैवेन्द्रियग्रामं चक्षुरादीन्द्रियसमुदायं समन्तत: समन्ताद्विषयसमूहान्नियम्य नियमनं कृत्वा योगो योक्तव्य इति पूर्वेण शनैः शनैरुपरमेदिति परेणान्वयः ॥ २४ ॥ एवं कृत्वा किं कुर्यादित्यत आह—**शनैरिति** । धृतिगृहीतया धैर्ययुक्तया बुद्ध्योपरमेत मनस उपरतिं संपादयेत् शनैः शनैः क्रमेण न तु सहसा । ननूपरतिं प्रापितमपि मनः पुनः पदार्थान्तरचिन्तनेनोपरतिं हास्यतीत्याशङ्क्याह—**आत्मेति** । आत्मसंस्थमात्मैव सर्वं न ततोऽन्यत् किंचिदस्तीति एवमात्मसंस्थं मनः कृत्वा आत्मेतरवस्त्वभावान्न किंचिदपि चिन्तयेन्मनसो नैश्चल्यस्य परमयोगावधित्वात् ॥ २५ ॥

प० टी०—एवमभ्यासयोगमुक्त्वाधुना राजयोगं वक्तुमारभते—**संकल्पेत्यादितः** । संकल्पात् प्रभव उत्पत्तिर्येषां ते तथाभूता ये कामास्तान् सर्वानशेपतस्तन्मूलभूतवासनाभिः सह त्यक्त्वा । तत्रापि कारणमाह—**मनसेति** । समन्ततः प्रसरन्तं ज्ञानकर्मेन्द्रियाणां ग्रामं समूहं मनसैव नियम्य न तु वायुधारणादिप्रयासैः । तदुक्तम्—'न याहि चेतस्त्वमितस्ततोऽपि देहेन्द्रियाद्यैर्न कुरुष्व कर्म । त्वं यत्र कुत्राप्युपविश्य नित्यं विचारयस्व स्वानिदानमन्तः' इति ॥ २४ ॥ अथास्यापि निर्वाहमाह—**शनैः शनैरिति** । धृतिर्धीरता तया गृहीतया नियमितया निश्चयात्मिकया बुद्ध्या कृत्वा संकल्पात्मकं मनो बलादात्मसंस्थं कृत्वात्मातिरिक्तं न किंचिदपि चिन्तयेत् । एवं शनैः शनैरभ्यासक्रमेण न सहसोपरमेद्ग्राह्यप्रपञ्चादुपरमं प्राप्नुयात् । तदुक्तं योगसारावल्याम्—'असमर्थो यदाभ्यासे राजयोगं तदाचरेत् । येन स्यात्तुरीयावस्था सा पक्वैवोन्मनी भवेत् ॥ प्रसह्य संकल्पपरंपराणां संछेदने संततसावधानः । आलम्बनाशादपचीयमानं शनैः शनैः शान्तिमुपैति चेतः॥ प्रकाश्यमाने परमात्मभानौ नश्यत्यविद्यातिमिरे समस्ते । अहो बुधा निर्मलदृष्टयोऽपि किंचिन्न पश्यन्ति जगत्स्वरूपम्' ॥ २५ ॥

रा० टी०—किंच—**संकल्पेति** । संकल्पेन एतदर्थमिदं कुर्यामिति संकल्पपूर्वकानुष्ठानेन प्रभवो जन्म येषां तान्कामान्विषयभोगान्सर्वानशेपतो निःशेषतः त्यक्त्वा इन्द्रियग्राममिन्द्रियसमूहं समन्ततः सर्वतः मनसैव विनियम्य इन्द्रियनियमनं न मनसोऽन्येनेतिज्ञापनायैवकारः ॥ २४ ॥ **शनैरिति** । मनसश्च धृतिगृहीतया धैर्योपेतया धारणया गृहीतया वशीकृतयेति वा बुद्ध्या शनैः शनैरुपरमेत् विषयेभ्यो व्यावर्तयेत् भगवति रमेतेति वार्थः । किं चात्मसंस्थं भगवन्निष्ठं मनः कृत्वा बुद्ध्येत्यनुषङ्गः भगवतोऽन्यन्न किंचिदपि चिन्तयेत् ॥ २५ ॥

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ॥
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

त० टी०—नियुज्यमानं मनो यदि चलेत्तर्हि किं कर्तव्यमिति चेत्तत्राह—**यत इति** । यतो यतः शब्दादिविषयाद्धेतोश्चञ्चलस्वभावतयाऽस्थिरं सत् मनो निश्चरति यतो यतो यं यं विषयं प्रति निश्चरति निर्गच्छति ततस्तत एतन्मनो नियम्य आत्मन्येव वशं नयेत् निरुन्ध्यात् ॥ २६ ॥

म० टी०—एवं निरोधसमाधिं कुर्वन् योगी यतो यत इति शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्विषयाद्रागद्वेपादेश्च चञ्चलं विक्षेपाभिमुखं सत् मनो निश्चरति विक्षिप्तं सत् विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमामपि समाधिविरोधिनीं वृत्तिमुत्पादयति तथा

लयहेतूनां निद्राशेषबह्वशनश्रमादीनां मध्ये यतो यतो निमित्तादस्थिरं लयाभिमुखं सन्मनो निश्चरति लीनं सत्समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति ततस्ततो विक्षेपनिमित्ताल्लयनिमित्ताच्च नियम्यैतन्मनो निर्वृत्तिकं कृत्वात्मन्येव स्वप्रकाशपरमानन्दघने वशं नयेत् निरुन्ध्यात् यथा न निक्षिप्येत न वा लीयेतेति। एवकारोऽनात्मगोचरत्वं समाधेर्वारयति । एतच्च विवृतं गौडाचार्यपादैः ' उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः । सुप्रसन्नं लये चैव यथा कामो लयस्तथा (१) दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् । अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति (२) लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः । सकषायं विजानीयात्समप्राप्तं न चालयेत् (३) नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् । निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः (४) यदा न लीयते चित्तं न च विक्षिप्यते पुनः । अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा । (५) इति पञ्चभिः श्लोकैः । उपायेन वक्ष्यमाणेन वैराग्याभ्यासेन कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयात् निरुन्ध्यादात्मन्येवेत्यर्थः । कामभोगयोरिति चिन्त्यमानावस्थाभुज्यमानावस्थाभेदेन द्विवचनम् । तथा लीयतेऽस्मिन्निति लयः सुषुप्तं तस्मिन् सुप्रसन्नमायासवर्जितमपि मनो निगृह्णीयादेव । सुप्रसन्नं चेत्कुतो निगृह्यते तत्राह—यथा कामो विषयगोचरप्रमाणादिवृत्त्युत्पादनेन समाधिविरोधी तथा लयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी सर्ववृत्तिनिरोधो हि समाधिः अतः कामादिकृतविक्षेपादिव श्रमादिकृतलयादपि मनो निरोद्धव्यमित्यर्थः (१) उपायेन निगृह्णीयात्केनेत्युच्यते—सर्वं द्वैतमविद्याविजृम्भितमल्पं दुःखमेवेत्यनुसृत्य " यो वै भूमा तत्सुखं, नाल्पे सुखमस्ति अथ यदल्पं तन्मर्त्यं तत् दुःखम्" इति श्रुत्यर्थं गुरूपदेशादनुपश्चात्पर्यालोच्य कामान् चिन्त्यमानावस्थान् विषयान्भोगान् भुज्यमानावस्थांश्च विषयान्निवर्तयेत् मनसः सकाशादिति शेषः । कामश्च भोगश्च कामभोगं तस्मान्मनो निवर्तयेदिति वा । एवं द्वैतस्मरणकाले वैराग्यभावनोपाय इत्यर्थः । द्वैतविस्मरणं तु परमोपाय इत्याह—अजं ब्रह्म सर्वं न ततोऽतिरिक्तं किंचिदस्तीति शास्त्राचार्योपदेशादनन्तरमनुस्मृत्य तद्विपरीतं द्वैतजातं न पश्यत्येव । अधिष्ठाने ज्ञाते कल्पितस्याभावात् पूर्वोपायापेक्षया वैलक्षण्यसूचनार्थस्तुशब्दः (२) एवं वैराग्यभावनातत्त्वदर्शनाभ्यां विषयेभ्यो निवर्त्यमानं चित्तं यदि दैनंदिनलयाभ्यासवशाल्लयाभिमुखं भवेत् तदा निद्राशेषाजीर्णबह्वशनश्रमाणां लयकारणानां निरोधेन चित्तं सम्यक् प्रबोधयेदुत्थानप्रयत्नेन । यदि पुनरेवं प्रबोध्यमानं दैनंदिनप्रबोधाभ्यासवशात् कामभोगयोर्विक्षिप्तं स्यात् तदा वैराग्यभावनया तत्त्वसाक्षात्कारेण च पुनः शमयेत् । एवं पुनः पुनरभ्यस्यतो लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं नापि समप्राप्तमन्तरालावस्थं चित्तं स्तब्धीभूतं सकषायं रागद्वेषादिप्रबलवासनावशेन स्तब्धीभावाख्येन कषायेण दोषेण युक्तं विजानीयात् समाहिताच्चित्ताद्विवेकेन जानीयात् । ततश्च नेदं समाहितमित्यवगम्य लयविक्षेपाभ्यामिव कषायादपि चित्तं निरुन्ध्यात् । ततश्च लयविक्षेपकषायेषु परिहृतेषु परिशेषाच्चित्तेन समं ब्रह्म प्राप्यते । तच्च समप्राप्तं चित्तं कषायलयभ्रान्त्या न चालयेत् विषयाभिमुखं न कुर्यात् किंतु धृतिगृहीतया बुद्ध्या लयकषायप्राप्तेर्विविच्य तस्यामेव समप्राप्तावतियत्नेन स्थापयेत् (३) तत्र समाधौ परमसुखव्यञ्जकेऽपि सुखं नास्वादयेत् एतावन्तं कालमहं सुखीति सुखास्वादरूपां वृत्तिं न कुर्यात् समाधिभङ्गप्रसङ्गादिति प्रागेव कृतव्याख्यानम् । प्रज्ञया यदुपलभ्यते सुखं तदप्यविद्यापरिकल्पितं मृषैवेत्येवंभावनया निःसङ्गो निस्पृहः सर्वसुखेषु भवेत् । अथवा प्रज्ञया सविकल्पसुखाकारवृत्तिरूपया सह सङ्गं परित्यजेत् नतु स्वरूपसुखमपि निर्वृत्तिकेन चित्तेन नानुभवेत् स्वभावप्राप्तस्य तस्य वारयितुमशक्यत्वात् । एवं सर्वतो निवर्त्य निश्चलं प्रयत्नवशेन कृतं चित्तं स्वभावचाञ्चल्याद्विषयाभिमुखतया निश्चरद्बहिर्निर्गच्छत् एकीकुर्यात् प्रयत्नतः निरोधप्रयत्नेन समे ब्रह्मण्येकतां नयेत् (४) समप्राप्तं चित्तं कीदृशमित्युच्यते यदा न लीयते नापि स्तब्धीभवति

तामसत्वसाम्येन लयशब्देनैव स्तब्धीभावस्योपलक्षणात् न च विक्षिप्यते पुनः न शब्दाद्याकारवृत्तिमनुभवति नापि सुखमास्वादयति राजसत्वसाम्येन सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात् पूर्वं भेदनिर्देशस्तु पृथक्प्रयत्नकरणाय । एवं लयकषायाभ्यां विक्षेपसुखास्वादाभ्यां च रहितं अनिङ्गनमिङ्गनं चलनं सवातप्रदीपवत् लयाभिमुख्यरूपं तद्रहितं निवातप्रदीपकल्पं अनाभासं न केनचिद्विषयाकारेणाभासत इत्येतत् कषायसुखास्वादयोरुभयान्तर्भावः उक्त एव। यदैवं दोषचतुष्टयरहितं चित्तं भवति तदा तच्चित्तं ब्रह्मनिष्पन्नं समं ब्रह्मप्राप्तं भवतीत्यर्थः (९) एतादृशश्च योगः श्रुत्या प्रतिपादितः ' यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥ तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ " इति । एतन्मूलकमेव च ' योगश्चित्तवृत्तिनिरोधः ' इति सूत्रं तस्माद्युक्तं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति ॥ २६ ॥

शं० टी०—ननु विषयलम्पटस्य मनस आत्मनि संस्थितिर्न संभवति तद्विषयवासनाभी रागादिभिश्च विषयप्रवृत्त्येकस्वभावत्वान्मनसः स्वभावो दुरतिक्रम इति न्यायेन स्वभावतः प्राप्तप्रवृत्तिनिरोधो न सिध्यति तदसिद्धौ कुत आत्मनि संस्थितिरित्याशङ्कायां न, विषयेषु सत्यत्वसमीचीनत्वेष्टत्वबुद्ध्येकबलान्मनसः प्रवृत्तिस्तद्धेतवो रागादयश्च " विकल्पो नहि वस्तु । मायामात्रमिदं द्वैतम् । त्रयमप्येतत्सुषुप्तं स्वप्नं मायामात्रम् " इत्यादिश्रुतिभिरिदं सर्वं मिथ्याकल्पितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिश्च विषयाणां मिथ्यात्वे सिद्धे विषये सत्यत्वसमीचीनत्वेष्टत्वबुद्धयो नश्यन्ति रागादयश्च तेन मनसश्च प्रवृत्तिर्न संभवति कचिद्वासनया यदा मनः प्रवर्तते तदा विषयमिथ्यात्वबुद्ध्या ततो निवर्त्य स्वरूप एव स्थापनीयमित्याह—**यत इति** । वासनावेगाच्चञ्चलं चपलं रागादिदोषग्रस्तत्वादस्थिरमव्यवस्थं मनः स्वविषयमात्मानमनादृत्य वासनया वा रागादिना वा हठाद्वा ज्ञातमज्ञातं च सत् यतो यतो यं यं विषयमुद्दिश्य निश्चरति निर्गच्छति ततस्ततस्तस्मात्तस्माद्विषयान्नियम्य तत्र तत्र विषये मिथ्यात्वं दुःखप्रदत्वं बन्धकत्वमात्मव्यतिरेकेणासत्त्वं चोद्भाव्य वैरस्यमापाद्यैवैतन्मनः पुनराकृष्य चिद्भावं गमयित्वात्मन्येव वशं नयेत् आत्मनि नित्यत्वचिद्रूपत्वाखण्डानन्दैकरसत्वस्वरूपत्वादिगुणप्रकाशनेन रुचिं संपाद्य नियमेनात्मस्थमेव कुर्यादित्यर्थः ॥ २६ ॥

श्री० टी०—एवमपि रजोगुणवशाद्यदि मनः प्रचलेत्तर्हि पुनः प्रत्याहारेण वशीकुर्यादित्याह—**यत इति** । स्वभावतश्चञ्चलं धार्यमाणमप्यस्थिरं मनो यं यं विषयं प्रति निर्गच्छति ततस्ततः प्रत्याहृत्यात्मन्येव स्थिरं कुर्यात् ॥ २६ ॥

स० टी०—एवं कुर्वन्समाधिं तं योगी चित्तनिरोधनम् ॥ चित्तविक्षेपहेतूनां शब्दादीनां च मध्यतः ॥ १ ॥ यस्माद्यस्मान्निमित्तात्तच्छब्दादेश्चञ्चलं मनः ॥ अनाद्यविद्याध्यासाद्विक्षिप्तं सद्बहिर्व्रजेत् ॥ २ ॥ ततस्ततोऽतिविक्षेपनिमित्तात्तन्मनो मुनिः ॥ कृत्वा निर्वृत्तिकं प्रत्यगात्मन्येवाद्वये सुखी ॥ ३ ॥ स्वप्रकाशपरानन्दघने तत्त्वे वशं नयेत् ॥ समस्तदुःखसीमेयं यन्मनो दृश्यगोचरम् ॥ ४ ॥ समस्तसुखसीमेयं यन्मनो ब्रह्मगोचरम् ॥ विचार्यैवं धिया विद्वान्वेदान्ताचार्यवाक्यतः ॥ ५ ॥ भोगानुत्सृज्य तद्धेतूंकामाँस्त्यक्त्वाश्रयेद्धरिम् ॥ यत्र यत्र मनो गच्छेच्छब्दादौ भोगगोचरे ॥ ६ ॥ तं तं विचार्य विषयं स वैराग्याद्विवेकतः ॥ आभासीकृत्य दोषाणामाकरत्वादसत्त्वतः ॥ ७ ॥ तत आकृष्य परमानन्दरूपे चिदात्मनि ॥ स्थापयेदिति तात्पर्यं श्रीमद्भगवतो हरेः ॥ ८ ॥ २६ ॥

भा० टी०—ननु मनसः शब्दादिनिमित्तानुरोधेन रागद्वेषवशादतिचञ्चलस्यास्थिरस्य स्वभावादेव तत्र तत्र विषये प्रवृत्तस्य नैश्चल्यं नैश्चिन्त्यं वा कुत इत्याशङ्क्याह—**यत इति** । एवमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निःसरति निर्गच्छति स्वभावदोषान्मनश्चञ्चलमत एवास्थिरं

लयाभिमुखं ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तच्छब्दादिनिमित्तं क्षयिष्णुत्वदुःखसंमिश्रत्वाद्यालोचनेन तत्र तत्र वैराग्यभावनयाऽभावीकृत्यात्मन्येवैतन्मनो वशं नयेत् आत्मवशतामापादयेत् ॥ २६ ॥

प० टी०—अथैतावतापि रजोगुणप्रचुरं मनो यद्यात्मप्रवणं न भवेत्तर्हि प्रत्याहारेण वशं नयेदित्याह—**यतो यत इति**। स्वभावतश्चपलं बलाज्जलक्षिप्ततुम्बिकावद्धार्यमाणमस्थिरं मनो यं यं विषयं प्रति निश्चलति निर्गच्छति ततस्ततो विषयान्नियम्य प्रत्याहृत्यात्मन्येव वशं नयेत्। तदुक्तं वासिष्ठे—'हस्तं हस्तेन संपीड्य दन्तैर्दन्तान्विचूर्ण्य च। अङ्गान्यङ्गैः समाक्रम्य जयेदादौ स्वकं मनः ॥ चित्तमेकं न शक्नोति जेतुं स्वातन्त्र्यवर्ति यत्। ध्यानवार्तां वदन्मूढः स किं लोके न लज्जते' इति। तथा चोक्तं विष्णुपुराणे 'विषयेभ्यः समाहृत्य विज्ञातात्मा मनो मुनिः। चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥ आत्मभावं नयत्येनं तद्ब्रह्मध्यायनं मुने। विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥ २६ ॥

रा० टी०—**यत इति**। ध्यानेन मनोऽनवस्थितं चेत्प्रत्याहारेण वशीकुर्यादित्याह—**यतो यत इति**। आद्यादिभ्य उपसंख्यानमिति सप्तम्यर्थे तसिः। यत्र यत्र विषये स्वतश्चञ्चलं मनोऽस्थिरं सत् निश्चरति प्रवर्तते ततस्तत एतन्मनो नियम्य प्रत्याहृत्य तदात्मन्येव भगवत्येव वशं तन्निष्ठमेव नयेत् कुर्यादित्यर्थः ॥ २६ ॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ॥
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

त० टी०—एवं विषयेभ्यः प्रत्याहृत्यात्मनि वशीकृतमनसो यत्फलं स्यात्तदाह—प्रशान्तमनसमिति। पुनः पुनर्निरोधेन प्रशान्तमात्मनि निश्चलं मनो यस्य तम्। तत्र हेतुगर्भितविशेषणद्वयम्—शान्तरजसं शान्तं सर्वकामनामूलं रजो यस्य तत एवाकल्मषं निर्गतसमस्तपापमत एव ब्रह्मभूतं निर्दोषसमरूपमेनं योगिनमुत्तमं सुखमुपैति प्राप्नोति ॥ २७ ॥

म० टी०—एवं योगाभ्यासबलादात्मन्येव योगिनः प्रशाम्यति मनः ततश्च प्रशान्तेति प्रकर्षेण शान्तं निर्वृत्तिकतया निरुद्धं संस्कारमात्रशेषं मनो यस्य तं प्रशान्तमनसं वृत्तिशून्यतया निर्मनस्कं निर्मनस्कत्वे हेतुगर्भं विशेषणद्वयं शान्तरजसमकल्मषमिति शान्तं विक्षेपकं रजो यस्य तं विक्षेपशून्यं तथा न विद्यते कल्मषं लयहेतुस्तमो यस्य तमकल्मषं लयशून्यं शान्तरजसमित्यनेनैव तमोगुणोपलक्षणे अकल्मषं संसारहेतुधर्माधर्मादिवर्जितमिति वा ब्रह्मभूतं ब्रह्मैव सर्वमिति निश्चयेन समं ब्रह्मप्राप्तं जीवन्मुक्तमेनं योगिनमेवमुक्तेन प्रकारेणेति श्रीधरः। उत्तमं निरतिशयं सुखमुपैत्युपगच्छति। मनस्तद्वृत्त्योरभावे सुषुप्तौ स्वरूपसुखाविर्भावप्रसिद्धिं द्योतयति हिशब्दः। तथा च प्राग्व्याख्यातं सुखमात्यन्तिकं यत्तदित्यत्र ॥ २७ ॥

शं० टी०—पुनः पुनर्विषयेभ्यस्तत्तद्दोषोद्घाटनपूर्वकमाकृष्य मन आत्मन्येव स्थापयित्वाऽत्यन्तश्रद्धया चिरकालं नित्यनिरन्तरं चित्प्रत्ययावृत्तिमेव कुर्वतो योगिनो यतेर्बाह्यवासनातत्प्रत्ययानां च निःशेषसंक्षये सति यदा ब्रह्मणि मनः प्रशान्तिमेति तदा सुखं ब्राह्ममनुत्तममाविर्भवतीत्याह—**प्रशान्तेति**। शान्तरजसं नित्यनिरन्तरसमाधिनिष्ठया शान्तो विनष्टो रजो रजोगुणः रज इति तमसोऽप्युपलक्षणं तमोगुणश्च स्वकार्यैः कामक्रोधलोभमोहाहंकारममकारादिभिः सह यस्य स शान्तरजास्तं शान्तरजसं केवलं शुद्धसत्त्वस्वभावमत एवाऽकल्मषं अन्तःकरणस्य कल्मषं भेदवासना एव राजस्यस्तामस्यः सत्त्वमिश्रीभूतभौतिकगोचरा यास्ताः सर्वा न विद्यन्ते यस्य चित्ते सोऽकल्मषस्तमत एव प्रशान्तमनसं विक्षेपविपरीतभावहेत्वो रजस्तमोगुणयोः सकार्ययोर्निःशेषविनाशाद्वृत्तिशून्यतया प्रशान्तं प्रकर्षेण शान्तं प्रशान्तं आविषयाकारतामेव समापन्नं मनो यस्य तं प्रशान्त-

मनसमत एव ब्रह्मभूतं ब्रह्मैवाहमित्युपाधिकृतपरिच्छित्तिं परित्यज्य पूर्णात्मनैव स्थितमेनं योगिनं ब्रह्मविदं यतिमनुत्तमं यस्मादुत्तमं नास्ति तदनुत्तममनुपमं नित्यं निरतिशयं साधनानपेक्षमयत्नसिद्धमक्षय्यमात्मभूतमात्मैकवेद्यं ब्राह्मं सुखमुपैति तदा प्राप्नोतीत्यर्थः। साधननिरपेक्षापारसुखाविर्भावः सुषुप्तौ सर्वप्रत्यक्षः "एषोऽस्य परमानन्दः" इत्यादिश्रुतिप्रसिद्धश्चेति प्रसिद्धिद्योतनार्थो हिशब्दः ॥ २७ ॥

श्री० टी०—एवं प्रत्याहारादिभिः पुनः पुनर्मनोवशीकुर्वन्तं रजोगुणक्षये सति योगसुखं प्राप्नोतीत्याह—**प्रशान्तमनसमिति**। एवमुक्तेन प्रकारेण शान्तं रजो यस्य तम् अत एव प्रशान्तं मनो यस्य तमेनं निष्कल्मषं ब्रह्मत्वं प्राप्तं योगिनमुत्तमं सुखं समाधिसुखं स्वयमेवोपैति प्राप्नोति ॥ २७ ॥

स० टी०—योगाभ्यासबलादेवं योगिनश्चित्तमात्मनि ॥ प्रशाम्यति ततोऽत्यन्तं शान्तं निर्वृत्तिकं स्थिरम् ॥ १ ॥ मनो यस्य तथा शान्तरजोविक्षेपकं मलम् ॥ कल्मषं लयहेतुर्यत्तमो यस्य न विद्यते ॥ २ ॥ धर्माधर्मादिरूपं वा कल्मषं नो भवप्रदम् ॥ यस्य तं ब्रह्मवस्त्वेव सर्वमस्तीति वेदिनम् ॥ ३ ॥ सम्यग्ज्ञाते परे तत्त्वे क्षीणे मोहमये मले ॥ ब्रह्मभूतं मुनिं शान्तमुपैति सुखमुत्तमम् ॥ ४ ॥ दृश्यं नास्ति परं ब्रह्मैवास्ति सर्वं निरन्तरम् ॥ इति निश्चयवन्तं तं सुखं समुपगच्छति ॥ ५ ॥ अभावे चित्ततद्वृत्त्योः सुषुप्तौ चित्सुखं परम ॥ स्वयमाविर्भवत्येवं हिशब्दो द्योतयत्ययम् ॥ ६ ॥ २७ ॥

भा० टी०—वशीकरणेन मनस उपरमे फलमाह—**प्रशान्तमनसमिति**। एवं योगाभ्यासबलाद्योगिन आत्मन्येव मनः शाम्यति ततश्च प्रकर्षेण शान्तं मनो यस्य तं यतः शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमत एव ब्रह्मभूतं ब्रह्मैव सर्वमित्येवंनिश्चयवन्तं जीवन्मुक्तमत एवाकल्मषं धर्माधर्मादिरूपकल्मषवर्जितं योगिनमुत्तममात्यान्तिकं निरतिशयं सुखमुपैत्युपगच्छति ॥ २७ ॥

प० टी०—एवं रजोगुणक्षये सति स्वत एवात्मसुखप्राप्तिरित्याह—**प्रशान्तमिति**। एवंविधमेनं योगिनं प्रत्युत्तमं सुखं सर्वोत्कृष्टमात्मसुखं स्वत एवोपैत्यधितिष्ठति। किंभूतं योगिनं प्रशान्तमनसमत एव शान्तरजसमत एव ब्रह्मभूतमकल्मषं निरस्तमोहजालम् ॥ २७ ॥

रा० टी०—एवं साङ्ख्ययोगमभिधाय तदनुष्ठातुः फलं प्रपञ्चयति—**प्रशान्तेति**। प्रशान्तमनसं स्वतो विषयेष्वप्रवृत्तमनसं शान्तरजसं विगतरजोगुणमत एवाकल्मषं कामक्रोधादिदोषहीनं रजोजन्यत्वात्तेषां ब्रह्मभूतं तद्बुद्धय इत्युक्तदिशा ब्रह्मणि स्थितिमन्तमेनं योगिनं समाधियोगवन्तमुत्तमं सुखं कर्तृ उपैति प्राप्नोति। हि प्रसिद्धं श्रुत्यादावित्यर्थः ॥ २७ ॥

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ॥
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

त० टी०—तदभ्यासवतो निरतिशयसुखमाह—युञ्जन्निति। एममुक्तप्रकारेण सदात्मानं युञ्जन्विगतकल्मषः विशेषेण गतं समस्तप्राचीनकल्मषं यस्य स तथा सन् योगी ब्रह्मसंस्पर्शं ब्रह्मानुभवरूपमत्यन्तं सुखं सुखेनानायासेन अश्नुते प्राप्नोति ॥ २८ ॥

म० टी०—उक्तं सुखं योगिनः स्फुटीकरोति—**युञ्जन्नेवमिति**। एवं मनसैवेन्द्रियग्राममित्याद्युक्तक्रमेणात्मानं मनः सदा युञ्जन्समादधत् योगी योगेन नित्यसंबन्धी विगतकल्मषः विगतमलः संसारहेतुधर्माधर्मरहितः सुखेनानायासेन ईश्वरप्रणिधानात् सर्वान्तरायनिवृत्त्या ब्रह्मसंस्पर्शं सम्यक्त्वेन विषयास्पर्शेन सह ब्रह्मणः स्पर्शस्तादात्म्यं यस्मिन् तद्विषयासंस्पर्शि ब्रह्मस्वरूपमित्येतत् अत्यन्तं सर्वानन्तान्परिच्छेदानतिक्रान्तं निरतिशयं सुखमानन्दमश्नुते व्याप्नोति सर्वतो निर्वृत्तिकेन चित्तेन लयविक्षेपविलक्षणमनुभवति विक्षेपे

वृत्तिसत्त्वात् लये च मनसोऽपि स्वरूपेणासत्त्वात् सर्ववृत्तिशून्येन सूक्ष्मेण मनसा सुखानुभवः समाधावेवेत्यर्थः। अत्र चानायासेनेत्यन्तरायनिवृत्तिरुक्ता। ते चान्तराया दर्शिता योगसूत्रेण 'व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः' चित्तं विक्षिपन्ति योगादपनयन्तीति चित्तविक्षेपा योगप्रतिपक्षाः संशयभ्रान्तिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधस्य साक्षात्प्रतिपक्षौ। व्याध्यादयस्तु सप्त वृत्तिसहचरिततया तत्प्रतिपक्षा इत्यर्थः। व्याधिर्धातुवैषम्यनिमित्तो विकारो ज्वरादिः, स्त्यानमकर्मण्यता गुरुणा शिक्ष्यमाणस्याप्यासनादिकर्मानर्हतेति यावत्, योगः साधनीयो न वेत्युभयकोटिस्पृग्विज्ञानं संशयः स च अतद्रूपप्रतिष्ठत्वेन विपर्ययान्तर्गतोऽपि सन्नुभयकोटिस्पर्शित्वैककोटिस्पर्शित्वरूपावान्तरविशेषविवक्षयात्र विपर्ययाद्भेदेनोक्तः, प्रमादः समाधिसाधनानामनुष्ठानसामर्थ्येऽप्यननुष्ठानशीलता विषयान्तरव्यापृततया योगसाधनेष्वौदासीन्यमिति यावत्, आलस्यं सत्यामप्यौदासीन्यप्रच्युतौ कफादिना तमसा च कायचित्तयोर्गुरुत्वं तच्च व्याधित्वेनाप्रसिद्धमपि योगविषये प्रवृत्तिविरोधि, अविरतिश्चित्तस्य विषयविशेषे ऐकान्तिकोऽभिलाषः, भ्रान्तिदर्शनं योगासाधनेऽपि तत्साधनत्वबुद्धिस्तथा तत्साधनेऽप्यसाधनत्वबुद्धिः, अलब्धभूमिकत्वं समाधिभूमेरेकाग्रतायाश्च अलाभः क्षिप्तमूढविक्षिप्तरूपत्वमिति यावत्, अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रयत्नशैथिल्याच्चित्तस्य तत्राप्रतिष्ठितत्वं, त एते चित्तविक्षेपा नव योगमला योगप्रतिपक्षा योगान्तराया इति चाभिधीयन्ते। 'दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः'। दुःखं चित्तस्य राजसः परिणामो बाधनालक्षणः। तच्चाध्यात्मिकं शारीरं मानसं च व्याधिवशात्कामादिवशाच्च भवति। आधिभौतिकं व्याघ्रादिजनितं, आधिदैविकं ग्रहपीडादिजनितं द्वेषाख्यविपर्ययहेतुत्वात्समाधिविरोधि। दौर्मनस्यमिच्छाविघातादिबलवद्दुःखानुभवजनितश्चित्तस्य तामसः परिणामविशेषः क्षोभापरपर्यायः स्तब्धीभावः। स तु कषायत्वाल्लयवत्समाधिविरोधी। अङ्गमेजयत्वमङ्गकम्पनमासनस्थैर्यविरोधि। प्राणेन बाह्यस्य वायोरन्तःप्रवेशनं श्वासः समाध्यङ्गरेचकविरोधी। प्राणेन कोष्ठ्यस्य वायोर्बहिर्निःसरणं प्रश्वासः समाध्यङ्गपूरकविरोधी। समाहितचित्तस्यैते न भवन्ति विक्षिप्तचित्तस्यैव भवन्तीति विक्षेपसहभुवोऽन्तराया एव एतेऽभ्यासवैराग्याभ्यां निरोद्धव्याः ईश्वरप्रणिधानेन वा तीव्रसंवेगानामासन्ने समाधिलाभे प्रस्तुते ईश्वरप्रणिधानाद्वेति पक्षान्तरमुक्त्वा प्रणिधेयमीश्वरं 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः', 'तत्र निरतिशयं सर्वज्ञबीजं', 'स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति त्रिभिः सूत्रैः प्रतिपाद्य तत्प्रणिधानं द्वाभ्यामसूत्रयत् 'तस्य वाचकः प्रणवः', 'तज्जपस्तदर्थभावनम्' इति 'ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च' ततः प्रणवजपरूपात्तदर्थध्यानरूपाच्चेश्वरप्रणिधानात् प्रत्यक्चेतनस्य पुरुषस्य प्रकृतिविवेकेनाधिगमः साक्षात्कारो भवति, उक्तानामन्तरायाणामभावोऽपि भवतीत्यर्थः। अभ्यासवैराग्याभ्यामन्तरायनिवृत्तौ कर्तव्यायामभ्यासदार्ढ्यार्थमाह—'तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः' तेषामन्तरायाणां प्रतिषेधार्थमेकस्मिन्कस्मिंश्चिदभिमते तत्त्वेऽभ्यासश्चेतसः पुनः पुनर्निवेशनं कार्यम्। तथा 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्' मैत्री सौहार्दं करुणा कृपा मुदिता हर्षः उपेक्षा औदासीन्यं सुखादिशब्दैस्तद्वन्तः प्रतिपाद्यन्ते। सर्वप्राणिषु सुखसंभोगापन्नेषु साध्वेतन्मम मित्राणां सुखित्वमिति मैत्रीं भावयेत् न त्वीर्ष्याम्। दुःखितेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव भावयेत् नोपेक्षां न वा हर्षम्। पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यान्न तु विद्वेषं न चोपेक्षाम्। अपुण्यवत्सु चौदासीन्यमेव भावयेन्नानुमोदनं न वा द्वेषम्। एवमस्य भावयतः शुक्लो धर्म उपजायते। ततश्च विगतरागद्वेषादिमलं चित्तं प्रसन्नं सदेकाग्रतायोग्यं भवति। मैत्र्यादिचतुष्टयं चोपलक्षणं, अभयं सत्त्वसंशुद्धिरित्यादीनाममानित्वमदम्भित्वमित्यादीनां च धर्माणां सर्वेषामेतेषां शुभवासनारूप-

त्वेन मलिनवासनानिवर्तकत्वात् । रागद्वेषौ महाशत्रू सर्वपुरुषार्थप्रतिबन्धकौ महता प्रयत्नेन परिहर्तव्याविर्त्येतत्सूत्रार्थः । एवमन्येऽपि प्राणायामादय उपायाश्चित्तप्रसादनाय दर्शिताः । तदेतच्चित्तप्रसादनं भगवदनुग्रहेण यस्य जातं तं प्रत्येवैतद्वचनं सुखेनेति अन्यथा मनःप्रशमानुपपत्तेः ॥ २८ ॥

शं० टी०—योगमनुष्ठायैव यतिः कृतार्थो भवति सदा सुखं ब्राह्ममक्षय्यमेव प्राप्नोति न कचिदुःखलवमित्युक्तमेव सुखलाभं योगजं योगिनः प्रशंसति मुमुक्षोरवश्यं योगः करणीयो मुक्तिसुखसिद्धय इति सूचयितुम्—**युञ्जन्निति** । दृश्यं सर्वं मिथ्यैवेति दृश्यमिथ्यात्वं दृढं निश्चित्य सर्वत्र कामसंकल्पपरित्यागपूर्वकं सर्वेन्द्रियाणि निगृह्य बहिरङ्गान्तरङ्गसाधनसंपन्नो भूत्वा योगी समाधिनिष्ठायां प्रवृत्तो यतिरेवं यथाशास्त्रं यथालक्षणं सदा नित्यमात्मानं चिदानन्दैकरसं परिपूर्णमद्वितीयं परं ब्रह्म युञ्जन्ननुसंदधानः सर्वमिदमहं च ब्रह्मैवेत्यखण्डवृत्त्या सर्वं ब्रह्मैव पश्यन् विगतकल्मषः विशिष्य गतं विगतं निःशेषविनष्टं कल्मषं वासनाकृतभेददर्शनलक्षणं यस्य स विगतकल्मषः सन् सुखेनाप्रयत्नेन सिद्धं साधननिरपेक्षमकृत्रिमं ब्रह्मसंस्पर्शं ब्रह्मणा ब्रह्मात्मना संस्पृश्यते अवगम्यत इति ब्रह्मसंस्पर्शं ब्रह्माभिन्नं चिदेकरसमित्यर्थः । यद्वा संस्पृशवे गृह्यतेऽनेनेति संस्पर्शः स्वरूपं ब्रह्मैव संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं ब्रह्मात्मकमत एवात्यन्तमन्तं परिमाणमतीत्य तिष्ठतीत्यत्यन्तमपारमक्षयं नित्यं शाश्वतं ब्राह्मं सुखमश्नुते जीवन्नेव मुक्तः सन्मुक्तिसुखमनुभुङ्क्ते इत्यर्थः ॥ २८ ॥

श्री० टी०—ततश्च कृतार्थो भवतीत्याह—**युञ्जन्निति** । एवमनेन प्रकारेण सर्वदात्मानं मनो युञ्जन्वशीकुर्वन्विशेषेण सर्वात्मना गतं कल्मषं यस्य स योगी सुखेनानायासेन ब्रह्मणः संस्पर्शोऽविद्यानिवर्तकः साक्षात्कारस्तदेवात्यन्तं सर्वोत्तमं सुखमश्नुते जीवन्मुक्तो भववीत्यर्थः ॥ २८ ॥

स० टी०—स्फुटीकरोति भगवान्योगिनः सुखमीरितम् ॥ मनसैवेन्द्रियग्राममित्याद्युक्तक्रमेण यः ॥ १ ॥ योगेन नित्यसंबन्धी मनो नित्यं समादधत् ॥ संसारहेतुधर्मादिमलशून्योऽतिनिर्मलः ॥ २ ॥ अनायासेन मद्भक्त्या योगप्रत्यूहवर्जितः ॥ सुखं ब्रह्मस्वरूपं यदपरिच्छिन्नमान्तरम् ॥ ३ ॥ लयविक्षेपशून्यत्वात्तद्व्याप्नोति निरन्तरम् ॥ स्वयं ब्रह्मसुखं योगी भूत्वा तिष्ठति निश्चलः ॥ ४ ॥ २८ ॥

भा० टी०—योगिनमुत्तमं सुखमुपैतीत्युक्तं तदेव स्फुटयति—**युञ्जन्निति** । एवं यथोक्तेन क्रमेणात्मानमन्तःकरणं सदा दीर्घकालमादरनैरन्तर्याभ्यां च युञ्जन् आत्मनि स्थिरं कुर्वन् योगान्तरायवर्जित इति भाष्यम् । योगान्तरायाश्च योगसूत्रप्रदर्शिताः ‘व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः’, ‘दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः’ इति । एते रजस्तमोवशात्प्रवर्तमानाश्चित्तस्य विक्षेपा भवन्ति तैरेकाग्रताविरोधिभिश्चित्तं विक्षिप्यत इत्यर्थः । तत्र व्याधिर्धातुवैषम्यनिमित्तो ज्वरादिः, स्त्यानमकर्मण्यता, संशयश्चित्तस्योभयकोटयालम्बनं विज्ञानं योगः साध्यो न वेति, प्रमादोऽनुत्थानशीलता, समाधिसाधने औदासीन्यमालस्यं, कायचित्तयोर्गुरुत्वं योगविषये प्रीत्यभावहेतुः, अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्धः, भ्रान्तिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानं, अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्समाधिभूमेरलाभः, अनवस्थितत्वं लब्धावस्थायामपि समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा, एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यन्ते । चित्तविक्षेपकारकानन्यानप्यन्तरायान् प्रतिपादयितुमाह—कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेषु एते दुःखादयः प्रवर्तन्ते । तत्र दुःखं चित्तस्य राजसः परिणामो बाधनालक्षणः यद्बाधात्प्राणिनस्तदपघाताय प्रवर्तन्ते, दौर्मनस्यं बाह्याभ्यन्तरैः करणैर्मनसो दौःस्थ्यं, अङ्गमेजयत्वं सर्वाङ्गीणो वेपथुः आसनस्थैर्यस्य बाधकः, प्राणो यद्बाह्यवायुमाचामति स श्वासः, यत्कौष्ठ्यं वायुं निश्वसिति स प्रश्वास इति योगसूत्रार्थः । विगतकल्मषः पापादिरहितः सुखेनानायासे-

नात्यन्तं निरतिशयं सुखं ब्रह्मसंस्पर्शं ब्रह्मणा परमात्मना सम्यक् स्पर्शो यस्य तत् ब्रह्माभिन्नं सुखमश्नुते व्याप्नोति ॥ २८ ॥

प० टी०—ततश्च कृतार्थो भवतीत्याह—युञ्जन्नेवमिति । एवममुना प्रकारेणात्मानं मनो युञ्जन् वशीकुर्वन् योगी गतकल्मषोऽज्ञानशून्यो भवति । तथाविधः सन् सुखेन सुखोपायेन ब्रह्मणः संस्पर्शोऽविद्यानिवर्तकोऽपरोक्षसाक्षात्कारस्तदेवात्यन्तमात्यन्तिकं सुखं परमानन्दमश्नुते जीवन्मुक्तो भवतीत्यर्थः ॥ २८ ॥

रा० टी०—सुखमुपैतीत्युक्तसुखं किमायासेन प्राप्नोति कीदृशं च तदित्यतो व्यनक्ति—एवमिति । विगतकल्मषो विगतरागादिदोषो योगी एवमुक्तदिशात्मानं भगवन्तं युञ्जन् ध्यायन्सुखेनाक्लेशेन ब्रह्मसंस्पर्शं भगवत्संसर्गाभिव्यक्तमत्यन्तमतिशयितं सुखमश्नुते प्राप्नोति ॥ २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

न० टी०—अथ सिद्धयोगस्य योगिनो योगविपाकदशाभेदेन चतुर्धा दर्शनमाह—सर्वभूतस्थमित्यादिचतुर्भिः श्लोकैः । योग आत्मयाथात्म्यविचारस्तस्मिन्युक्त आत्मा मनो यस्य सः सर्वभूतस्थं सर्वेषु भूतेषु प्राणिषु स्थितमात्मानं सर्वाणि च भूतानि आत्मनि स्वस्वरूपे ईक्षते पश्यति । भूतेष्वात्मन आत्मनि च भूतानां दर्शनानुपपत्तिशङ्कावारणाय हेतुगर्भितविशेषणमाह—सर्वत्र समदर्शन इति । सर्वेषु ब्रह्मादिस्थावरान्तेषु परस्परं विषमेष्वपि भूतेषु वैषम्यकारणीभूतप्रकृतिकार्यदेहादिभ्यो विविक्तं ज्ञानस्वरूपत्वेन ब्रह्मात्मकत्वेन च समं विशेषरहितं यदात्मनां स्वरूपं तद्विषयकं दर्शनं ज्ञानं यस्य सः, तथाच स्वात्मनोऽन्येषां च देहादिविलक्षणशुद्धस्वरूपस्य विशेषाभावादेकस्मिन्नात्मनि ज्ञाते सर्वस्य वस्तुनो ज्ञानं समत्वाद्भवेदेवेत्यर्थः । देहानामपि प्राकृतत्वाविशेषेण समत्वमविरुद्धम् । एवं च सर्वभूतेषु समत्वेन स्थितमात्मानमात्मनि च स्थितानि सर्वाणि भूतानि पश्यतीति सूपपन्नम् ॥ २९ ॥

म० टी०—तदेवं निरोधसमाधिना त्वंपदलक्ष्ये तत्पदलक्ष्ये च शुद्धे साक्षात्कृते तदैक्यगोचरा तत्त्वमसीति वेदान्तवाक्यजन्या निर्विकल्पकसाक्षात्काररूपा वृत्तिर्ब्रह्मविद्याभिधाना जायते । ततश्च कृत्स्नाऽविद्या तत्कार्यनिवृत्त्या ब्रह्मसुखमत्यन्तमश्नुत इत्युपपादयति त्रिभिः श्लोकैः । तत्र प्रथमं त्वंपदलक्ष्योपस्थितिमाह—सर्वभूतस्थमिति । सर्वेषु भूतेषु स्थावरजङ्गमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नित्यं विभुमात्मानं प्रत्यक्चेतनं साक्षिणं परमार्थसत्यमानन्दघनं साक्ष्येभ्योऽनृतजडपरिच्छिन्नदुःखरूपेभ्यो विवेकेनेक्षते साक्षात्करोति तस्मिंश्चात्मनि साक्षिणि सर्वाणि भूतानि साक्ष्याण्याध्यासिकेन संबन्धेन भोग्यतया कल्पितानि साक्षिसाक्ष्ययोः संबन्धान्तरानुपपत्तेर्मिथ्याभूतानि परिच्छिन्नानि जडानि दुःखात्मकानि साक्षिणोऽविवेकेनेक्षते । कः योगयुक्तात्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः प्रसादं प्राप्त आत्मान्तःकरणं यस्य स तथा । तथाच प्रागेवोक्तम्—'निर्विचारवैशारद्येऽध्यात्मप्रसादः', 'ऋतंभरा तत्र प्रज्ञा', 'श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्' इति । तथा च शब्दानुमानागोचरयथार्थविशेषवस्तुगोचरयोगजप्रत्यक्षेण ऋतंभरसंज्ञेन युगपत्सूक्ष्मं व्यवहितं विप्रकृष्टं च सर्वं तुल्यमेव पश्यतीति सर्वत्र समं दर्शनं यस्येति सर्वत्र समदर्शनः सन्नात्मानमनात्मानं च योगयुक्तात्मा यथावस्थितमीक्षत इति युक्तम् । अथवा यो योगयुक्तात्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षत इति योगिसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ । यथा हि चित्तवृत्तिनिरोधः साक्षिसाक्षात्कारहेतुः तथा जडविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि नावश्यं योग एवापेक्षितः । अत एवाह वासिष्ठः 'द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव । योगो वृत्तिनिरोधो हि ज्ञानं

सम्यगवेक्षणम् ॥ असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः । प्रकारौ द्वौ ततो देवो जगाद परमः शिवः ' इति । चित्तनाशस्य साक्षिणः सकाशात्तदुपाधिभूताच्चित्तस्य पृथक्करणात्तद्दर्शनस्य तस्योपायद्वयं एकोऽसंप्रज्ञातसमाधिः संप्रज्ञातसमाधौ हि आत्मैकाकारवृत्तिप्रवाहयुक्तमन्तःकरणसत्त्वं साक्षिणाऽनुभूयते निरुद्धसर्ववृत्तिकं तूपशान्तत्वान्नानुभूयत इति विशेषः । द्वितीयस्तु साक्षिणि कल्पितं साक्ष्यमनृतत्वान्नास्त्येव साक्ष्येव तु परमार्थसत्यः केवलो विद्यत इति विचारः । तत्र प्रथममुपायं प्रपञ्चपरमार्थतावादिनो हैरण्यगर्भादयः प्रपेदिरे । तेषां परमार्थस्य चित्तस्यादर्शनेन साक्षिदर्शने निरोधातिरिक्तोपायासंभवात् श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविनस्त्वौपनिषदाः प्रपञ्चानृतत्ववादिनो द्वितीयमेवोपायमुपेयुः । तेषां ह्यधिष्ठानज्ञानदार्ढ्ये सति तत्र कल्पितस्य वाधितस्य चित्तस्य तद्दृश्यस्य चादर्शनमनायासेनैवोपपद्यते । अत एव भगवत्पूज्यपादाः कुत्रापि ब्रह्मविदां योगापेक्षां न व्युत्पादयांबभूवुरत एव चौपनिषदाः परमहंसाः श्रौते वेदान्तवाक्यविचार एव गुरुमुपसृत्य प्रवर्तन्ते ब्रह्मसाक्षात्काराय न तु योगे विचारेणैव चित्तदोषनिराकरणेन तस्यान्यथासिद्धत्वादिति कृतमधिकेन ॥ २९ ॥

शं० टी०—योगस्य फलमप्रतिबद्धमात्मैकत्वदर्शनमात्मानन्दानुभूतिश्च । तत्र क्रममविवक्षित्वा द्वयोरप्येकैवात्मानन्दानुभूतिर्दर्शिताऽधुना द्वितीयमात्मैकत्वदर्शनं सर्वसंसारदुःखनिर्मूलनकारणं प्रतिपाद्यते—**सर्वभूतस्थमिति** । पुरुषं परमपुरुषार्थेन योजयति संघट्टयतीति योगः वहुजन्मकृतं पुण्यपुञ्जपरिपाकजन्यं प्रत्यग्दर्शनं यस्मिन् सत्येवाप्रतिवन्धेन पुरुषस्य मोक्षस्तेन योगेन सम्यग्दर्शनेनैव युक्तः आत्मा मनो यस्य स योगयुक्तात्मा ब्रह्माकाराकारितान्तःकरणस्तत एव समदर्शनः समं समभावापन्नं विशेषग्रहणनिर्मुक्तं चिरकालयोगाभ्यासवशात्सर्वत्र सन्मात्रग्रहणशीलं दर्शनं यस्य स समदर्शनो ब्रह्मवित्तमः स्वयं सर्वभूतस्थं भवन्तीति भूतानि अधिष्ठानाग्रहणदोषेण ततः पृथक् सत्तावन्तीव प्रतीयमानान्यव्याकृतादीनि ब्रह्मादिस्तम्बान्तानि च यानि तेषु सर्वेषु भूतेषु ब्रह्माण्डे सूर्यवद् गृहेषु प्रदीपवद्घटादिष्वाकाशवदविकारात्मना तिष्ठतीति सर्वभूतस्थमात्मानं यथाऽस्मिन् कार्यकरणसंघाते देहेन्द्रियप्राणमनोबुद्ध्यादीनां तद्धर्मतत्कर्मतदवस्थानां च साक्षित्वेन सर्वप्रकाशकत्वेनाऽहमर्थतया निरभिमानेनाहं तिष्ठामि तथैव सर्वभूतेष्वपि भूततदवस्थातद्धर्मतत्कर्मादीनां साक्षित्वेन प्रकाशकत्वेनाहमर्थत्वेनाविकारात्मनाहमेवैकरूपेण चैतन्यात्मना तिष्ठामीत्येवंभूतानुभूत्या स्वस्यैव सर्वत्र तथा स्थितिमनुभावयित्र्या स्वसद्भावं सर्वतो विनिश्चित्य सर्वभूतेषु प्रत्यग्रूपेण वर्तमानमात्मानं स्वमेकमेव समीक्षते सम्यगनुभवति एवं सर्वभूतेष्वात्मैकत्वं विज्ञाय वाह्यनिर्विकल्पसमाधिनिष्ठानिष्पन्नाधिष्ठानयाथात्म्यविज्ञानवलेनात्मन्येव परिपूर्णे सच्चिदानन्दैकरसे निर्विकल्पे निराकारे निर्विशेषे स्वस्वरूपे सर्वभूतान्यव्याकृतादीनि स्थूलान्तानि सकार्याण्यात्ममात्राण्येव समीक्षते यथाऽधिष्ठानविवेकविज्ञानेन घटशरावादीनि मृण्मात्राणि यथा जलतरङ्गफेनबुद्बुदादीनि मरुमात्राणि यथा सर्पशिरउरःपुच्छादीनि रज्जुमात्राणि समीक्षते विवेकी पुरुषः, तथा ब्रह्मविदपि योगानुष्ठानसमुत्पन्नाप्रतिबद्धाद्वैतात्मविज्ञानबलेन सर्वाण्यपि च भूतान्यधिष्ठानाज्ञानतः प्रतीतान्यात्ममात्राण्येव समीक्षते अहमेवेदं सर्वमिति सर्वमात्मानमेव साक्षादनुभवति न तु स्वस्मात्तेषां पृथक् सत्तां पश्यति एवमाधाराधेयोभयात्मना प्रतीतमात्मानं नित्यशुद्धबुद्धमुक्तस्वभावमेवाद्वितीयं निष्कलं निष्क्रियं शान्तमनन्तमपारसुखं पश्यति सर्वसंसारदुःखनिर्मुक्तमत इदमेव दर्शनं मुक्तेः परमकारणमिति सूचितं भवति न तु योगः सांख्यं कर्म च स्तोत्रमन्त्रजपादिश्च । तथाच श्रुतिः " सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । संपश्यन् ब्रह्म परमं याति नान्येन हेतुना " इति । एतेन संसारसागरनिमग्नात्मोद्धरणाय मुमुक्षोर्विदेहकैवल्यार्थिनः समाधिरवश्यं कर्तव्य इति सिद्धम् ॥ २९ ॥

श्री० टी०—ब्रह्मसाक्षात्कारमेव दर्शयति—**सर्वभूतस्थमिति** । योगेनाभ्यस्यमानेन युक्तात्मा समाहित-

चित्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरान्तेष्ववस्थितं पश्यति तानि च आत्मन्यभेदेन पश्यति ॥ २९ ॥

स० टी०—इदानीं योगसंसिद्धं फलं ब्रह्मैक्यदर्शनम् ॥ सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते ॥ १ ॥ आब्रह्मस्थावरान्तेषु सर्वभूतेषु चिद्घनम् ॥ स्वात्मानमेकमद्वैतमनुस्यूतं प्रपश्यति ॥ २ ॥ तथा सर्वाणि भूतानि ब्रह्मादीन्यात्मवस्तुनि ॥ ऐक्यं गतानि युक्तात्मा पश्यत्यात्मैक्यदृङ्मुनिः ॥ ३ ॥ साक्ष्येभ्योऽनृतदुःखेभ्यो विवेकेन विविच्य यः । साक्षिणं प्रत्यगात्मानमसङ्गं परिपश्यति ॥ ४ ॥ साक्षिण्यखिलभूतानि कल्पितान्यात्ममायया ॥ आध्यासिको हि संबन्धो मायया साक्षिसाक्ष्ययोः ॥ ५ ॥ तन्निरस्य विवेकेन मिथ्याभूतानि पश्यति ॥ योगेनैकाग्र्यरूपेण चित्तं यस्य समाहितम् ॥ ६ ॥ सर्वत्रास्ति समं यस्य दर्शनं ब्रह्मगोचरम् ॥ स योगी ब्रह्मविद्ब्रह्म पश्यत्यन्यन्न पश्यति ॥ ७ ॥ २९ ॥

भा० टी०—इदानीं सर्वसंसारविच्छेदकारणं ब्रह्मात्मैकत्वदर्शनं योगस्य यत्फलं तद्दर्शयति—**सर्वेति** । सर्वभूतस्थं सर्वेषु ब्रह्मादिस्तम्बपर्यन्तेषु स्वमात्मानं सर्वभूतानि चात्मनि एकतां गतानि योगयुक्तात्मा समाहितान्तःकरण ईक्षते पश्यति सर्वेषु ब्रह्मादिस्थावरान्तेषु गुणरूपसंस्कारवस्तुविक्रियारहितं समं निर्विशेषब्रह्मात्मैक्यविषयं दर्शनं यस्य स सर्वत्र समदर्शनः । एतेनानेन श्लोकेन त्वंपदोपस्थितेर्द्वितीयेन तत्पदोपस्थितेस्तृतीयेनाखण्डार्थोपस्थितेर्वर्णनं प्रत्युक्तं, अखण्डार्थसाक्षात्कारं विना तस्याहं न प्रणश्यामि स च मे न प्रणश्यति इतिफलानुपपत्तेः । यदपि अथ यो योगयुक्तात्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षते इति योगिसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ यथाहि चित्तवृत्तिनिरोधः साक्षिसाक्षात्कारहेतुः तथा जडविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि नावश्यं योग एवापेक्षितः । अत एवाह वासिष्ठः—'द्वौ क्रमौ चित्तनाशाय योगो ज्ञानं च राघव । योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः । प्रकारौ द्वौ ततो देवो जगाद परमः शिवः' इति तत्र प्रथमोपायं प्रपञ्चपरमार्थवादिनो हैरण्यगर्भादयः प्रपेदिरे तेषां परमार्थस्य चित्तस्यादर्शने तिरोधानातिरिक्तोपायासंभवात् । श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविनस्त्वौपनिषदाः प्रपञ्चानृतत्ववादिनः द्वितीयमेवोपायमुपेयुः । तेषां ह्यधिष्ठानज्ञानदार्ढ्ये सति तत्र कल्पितस्य बाधितस्य चित्तस्य तद्दृश्यस्य चादर्शनमनायासेनैवोपपद्यते अत एव भगवत्पूज्यपादाः कुत्रापि ब्रह्मविदां योगापेक्षां न व्युत्पादयांबभूवुः । अत एव चौपनिषदाः परमहंसाः श्रौते वेदान्तवाक्यविचारे एव गुरुमुपसृत्य प्रवर्तन्ते ब्रह्मसाक्षात्काराय न तु योगे । विचारेणैव चित्तदोषनिराकरणेन तस्यान्यथा सिद्धत्वादिति तदप्युपेक्ष्यं, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो दिनिध्यासितव्यः" इतिश्रुत्याधिकारिविशेषणीभूतसाधनचतुष्टयान्तर्गतशमाद्युपेतसमाहितत्त्वोत्तरभाविब्रह्मजिज्ञासायाम् 'अथातो ब्रह्मजिज्ञासा' इतिसूत्रस्थाथशब्देन सूचितत्वाच्च । योगसिद्ध्युत्तरं ब्रह्मदर्शनार्थं श्रवणादेरावश्यकत्वेन तथैव श्रवणादावधिकारसिद्ध्यर्थं चित्तशोधककर्मयोगवत्तन्निरोधकध्यानयोगस्याप्यावश्यकत्वेन च अथेत्यादेरसङ्गतत्वात् । यत्र तु श्रवणादिकं विनैव तत्त्वसाक्षात्कारो दृश्यते यत्र चास्मिञ्जन्मनि ध्यानयोगाद्यभ्यासं विनैव श्रवणादिना स दृश्यते तत्र जन्मान्तरीयं श्रवणादिकं योगाद्यभ्यासश्च कल्प्यः । यदपि अत एवाह वसिष्ठ इत्यादि तदपि प्रकृतासङ्गतमेव, साक्षिणि कल्पितं साक्ष्यमनृतत्वान्नास्त्येव साक्ष्येव तु परमार्थसत्यः केवलो विद्यत इति विचारात्मकस्य सम्यगवेक्षणस्य चित्तैकाग्रतां विनाऽनुपपत्तेः साधनचतुष्टयसंपन्नस्यैव ब्रह्मविचारे अधिकार इति जिज्ञासासूत्रे निर्णीतत्वात् । वासिष्ठवचनं तु न साक्षिसाक्षात्कारे हेतुद्वयप्रतिपादनपरं किंतु चित्तनाशे चित्तैकाग्रतोत्तरं क्रमद्वयकथनपरं 'योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम्' इत्यनेन

वृत्तिनिरोधरूपेण समाधिना चित्तं नाशनीयमथवा सम्यग्ज्ञानेनेत्युक्तत्वात् । एतेन " तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय " इतिश्रुतिविरुद्धमिदं वासिष्ठोक्तमिति शङ्काऽपि निरस्ता श्रुत्या मोक्षं प्रति साधनान्तरनिषेधोक्तेः जीवोपाधिभूतं चित्तं चेत्यं च विषयजातमात्मनि कल्पितत्वादनृतमिति विचारात्मकसम्यगवेक्षणेन वृत्तिनिरोधेन वा चित्तनाशे विषयतश्चित्ते निवृत्ते सति परात्माभेदज्ञानस्य मोक्षं प्रत्यनन्यसाधनस्योत्पत्त्या मोक्ष इत्यविरोधात् । यदि तु योगस्य मोक्षसाधनत्वं स्वातन्त्र्येण वसिष्ठाभिप्रेतं स्यात्तर्हि तत्त्वज्ञानहीनसमाधिनिन्दापरं तत्र तत्र वसिष्ठोक्तमनर्थकं स्यात् । यद्वा जीवन्मुक्तिसुखसिद्ध्यर्थं वासनाक्षये मनोनाशे च संपादनीये उपायद्वयकथनपरं वसिष्ठवाक्यं, श्रीराम उवाच ' सम्यग्ज्ञानविलासेन वासनाविलयोदये । जीवन्मुक्तिपदे ब्रह्मन्नूनं विश्रान्तवानहम् ॥ प्राणस्पन्दनिरोधेन वासनाविलयोदये । जीवन्मुक्तिपदे ब्रह्मन् वद विश्रम्यते कथम् ॥ सुलभत्वाददुःखत्वात्कतरः शोभनोऽनयोः । येनावगतमात्रेण भूयः क्षोभो न बाधते ' इति रामचन्द्रप्रश्नानुसरणस्यावश्यकत्वात् । यदप्यत एव भगवत्पूज्यपादाः इत्यादि तत्रापि किं तत्त्वज्ञानोत्तरं योगापेक्षां न व्युत्पादयांबभुवुः उत ज्ञानसाधनत्वे । नाद्यः तथा जडविवेकेनेत्युपक्रमाननुरोधात्(?)।न द्वितीयः(?)तस्मात्किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति । उच्यते नित्यानित्यवस्तुविवेकः इहामुत्रार्थभोगविरागः शमदमादिसाधनसंपत् मुमुक्षुत्वं चेति । तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये ' इति । जिज्ञासासूत्रे " शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत् " इति श्रुत्युक्तशमादिपञ्चकस्य " श्रद्धावित्तो भूत्वा " इतिश्रुत्यन्तरोक्तश्रद्धासहितस्य भाष्यकारैरुक्तत्वात् । नहि योगाभ्यासं विना शमादयः सिध्यन्ति । तदुक्तम् ' तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः ' इति तेषां प्रकृतानां कामानां कारणं सांख्ययोगाभ्यां विवेकध्यानाभ्यामभिपन्नं प्रत्युक्तया प्राप्तं देवं ज्ञात्वा सर्वपाशैरविद्यादिभिर्मुच्यत इत्यर्थः । तथाच श्वेताश्वतरोपनिषदपि ध्यानयोगस्य तत्त्वज्ञानकारणतां प्रतिपादयति " त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिविश्य । ब्रह्मोडुपेन प्रतरेत विद्वान्स्रोतांसि सर्वाणि भयावहानि ॥ प्राणान्प्रपीड्येह सुयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत । दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः ॥ समे शुचौ शर्करावह्निवालुकाभिर्विवर्जिते शब्दजलाश्रयादिभिः । मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेत् ॥ नीहारधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशिनाम् । एतानि रूपाणि पुरः सराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ पृथ्व्यप्यतेजोनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य पञ्चाग्निमयं शरीरम् ॥ लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च । गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥ यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधान्तम् । तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥ यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् । अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ एषो हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः । स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥ यो देवाग्नौ योऽप्सु यो विश्वं भुवनमाविवेश । य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमः " इति । त्रिरुन्नतमित्यत्र त्रीणि उरोग्रीवाशिरांसि उन्नतानि यस्मिञ्छरीरे तत्त्युन्नतं त्रिरुन्नतमिति तु च्छान्दसम् । ब्रह्मोडुपेन तारप्लवेन स्रोतांसि सुरनरतिर्यक्स्थावरादिभेदभिन्नानि संसारस्रोतांसि अनेनोपायसंसारदुःखमहोदधिं प्रतरेदिति योग्याधिकारिणं श्रुतिरनुशास्ति नीहारादिसदृशान्येतानि योगिनोऽनुभवसिद्धानि एतानि बुद्धेः रूपाणि योगे क्रियमाणे ब्रह्मण्यभिव्यक्तिकराणि ब्रह्माभिव्यक्तिद्योतकानि पुरःसराणि पूर्वरूपाणि लिङ्गानि क्रमेणाविर्भवन्ति । अथवा ब्रह्मणि ब्रह्मविषययोगे चित्तवृत्तिनिरोधलक्षणे अभिव्यक्तिकराणि द्योतका-

नि ब्रह्मविषयचित्तवृत्तिनिरोधलक्षणयोगस्याभिव्यक्तिकराणीति यावत्। भूतजयप्रकारं भूतजयकारणं चाह— पृथिवीं तन्मण्डलं निवृत्त्याख्यं तच्छक्तींश्च साक्षात्कारेणोपास्य तेनोपासनेन तद्वशीकरणे सति अनन्तरमाप्यं तन्मण्डलं प्रतिष्ठाख्यं तच्छक्तिं चाहंत्वेनाप्सु भावयित्वा तेन तद्वशीकरणे सति अनन्तरं तेजोभूतं तन्मण्डलं विद्याख्यं तच्छक्तिं चाहंतया चिन्तयित्वा तेन तद्वशीकरणं कृत्वा एवं पृथिव्यामप्सु तेजसि वायौ खे च क्रमेण समुत्थिते ध्यानेन तत्तत्प्रयुक्तकार्ययोग्यतया वशीकृते पञ्चात्मके योगगुणे प्रवृत्ते पृथिव्यादितन्मण्डलतच्छक्तीनामुत्तरोत्तरत्रयेण पूर्वपूर्वत्रयं वेष्टितं बुद्धौ तत्सर्वं स्वाभेदेन चिन्तयित्वा तेनोपासनेन पञ्चात्मके योगगुणे प्रवृत्ते भूतपञ्चकस्य यथेष्टविनियोज्यत्वयोग्यतालक्षणे गुणे तस्य योगिनः प्रवृत्तिनिष्पादितस्य योगिनो योगो ध्यानं तदेवाग्निर्योगाग्निस्तेन ध्यानेन वशीकृत्य पञ्चभूतात्मकं शरीरं प्राप्तस्य तदस्मीत्यभिमातुरुक्तफलं सिध्यति। यथैव बिम्बमादर्शादि मृदयोपलिप्तं मृदया मृजया शुद्धिसाधनेन भस्मादिनोपलिप्तं जकारस्य दकारः तेजोमयं पूर्वमेव प्रचुरतेजस्कं सुधान्तं भस्माद्युपलेपनेन भस्मादिमलेन ह्युपलिप्तेन सहापाकृतपूर्वमलं तद्दर्पणादि भ्राजते दीप्यते तद्वत्। स एव प्रत्यङ्ङ्जनास्तिष्ठति अनन्तसमष्टिव्यष्ट्यात्मककार्यकरणोपाधिषु एषु प्रत्यगन्तरत्वेन जना इति शब्दाभिलाप्यो भूत्वा स एव परमात्मा तिष्ठतीतिकठिनश्रुतीनामर्थः। एतदादिश्रुतीनां योगी युञ्जीत सततमात्मानं रहसि स्थित इत्याद्या गीतास्मृतयः। अत एव तासां स्मृतीनां मूलभूता एतदाद्याः श्रुतय एव यथायोगमुदाहार्याः न योगस्मृतयः गीतास्मृतीनां वेदमूलकत्वात्। तथाच सांख्यस्मृतीनां योगस्मृतीनां तर्कस्मृतीनां च वेदाविरोधिनीनामेव प्रामाण्यं नेतरासां तथाच प्रमाणलक्षणस्थं पारमर्षं सूत्रम् 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति "औदुम्बरीं स्पृष्ट्वोद्गायेत्"इति प्रत्यक्षश्रुतिविरुद्धा सा सर्वा वेष्टयितव्येति स्मृतिर्मानं न वेति संशये मूलश्रुत्यनुमानान्मानमिति प्राप्ते राद्धान्तः क्लृप्तश्रुतिविरोधे श्रुतिप्रामाण्यमनपेक्षमपेक्षाशून्यं हेयमिति यावत्। हि यतोऽसति विरोधे श्रुत्यनुमानं भवति अत्र तु विरोधे सति श्रुत्यनुमानायोगान्मूलाभावात्सर्ववेष्टनस्मृतिरप्रमाणमित्यर्थः। एवं च शमादिप्रतिपादकश्रुतेः श्वेताश्वतरोपनिषदोऽनुरोधिन्यो योगस्मृतयः प्रमाणं तथा "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। ततस्तु पश्यति निष्कलं ध्यायमानः" इत्यादिश्रुत्युपबृंहणरूपाः ससाधनसमाधिनिरूपणपराश्च स्मृतयः नास्तिकमतामिवास्तिकमतानां सर्वांशत्यागायोगात्। तथाच एतेन योगः प्रयुक्त इति सूत्रस्थं भाष्यं एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्य स्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति। तत्रापि स्मृतिविरोधेन प्रधानं स्वतन्त्रमेव कारणं महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यन्ते। नन्वेवं सति समानन्यायत्वात् पूर्वेणैव एतद्गतं किमर्थं पुनरतिदिश्यते अस्ति तत्राभ्यधिका शङ्का सम्यग्दर्शनाभ्युपायो हि वेदे विहितः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति 'त्रिरुन्नतं स्थाप्य समं शरीरम्' इत्यादिना आसनादिकल्पनापुरःसरं बहुप्रपञ्चयोगविधानं श्वेताश्वतरोपनिषदि दृश्यते लिङ्गानि च वैदिकानि योगविषयाणि सहस्रश उपलभ्यन्ते 'तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्' इति 'विद्यामेतां योगविधिं च कृत्स्नम्' इतिचैवमादीनि योगशास्त्रेऽपि। अथ तत्त्वदर्शनोपायो योग इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियतेऽतः संप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भविष्यतीति इयमप्यधिका शङ्काऽतिदेशेन निवर्त्यते अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात् सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः सांख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ शिष्टैश्च प्रगृहीतौ लिङ्गेनोपबृंहितौ तत्कारणं 'सांख्ययोगाभिपन्नम् ज्ञात्वा देवं मुच्यते सर्वपाशैः' इति निराकरणं तु न सांख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यते श्रुतिर्हि वैदिकादात्मैकविज्ञानादन्यन्निःश्रेयससाधनं वारयति "तमेव विदित्वाऽतिमृत्युमेवि

नान्यः पन्था विद्यतेऽयनाय " इति द्वैतिनो हि ते सांख्ययोगाश्च नात्मैकत्वदर्शिनः यत्तु दर्शनमुक्तं तत्कारणसांख्ययोगाभिपन्नमिति वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते प्रत्यासत्तेरित्यवगन्तव्यम्। येन त्वंशेन न विरुध्यते तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्। तद्यथा "असङ्गो ह्ययं पुरुषः" इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरुपगम्यते तथा योगैरपि। "अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः" इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनाभ्युपगम्यते। एतेन सर्वाणि तर्कस्मरणानि प्रतिवक्तव्यानि। तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत् उपकुर्वन्तु नाम तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति " नावेदविन्मनुते तं बृहन्तम्। तं त्वौपनिषदं पुरुषं पृच्छामि " इत्येवमादिश्रुतिभ्यः इति। तस्मादेतद्भाष्यादुदाहृतश्रुतिभ्यो गीतास्मृतिभ्यश्च औपनिषदानां परमहंसानां चित्तदोषनिरासार्थं श्रुत्यविरोधितत्त्वज्ञानसाधनभूतयोगाभ्यासे प्रवृत्तेरौचित्याच्च। अत एव चौपनिषदा इत्यसङ्गतमित्यलं विस्तरेण ॥ २९ ॥

प० टी०—एवं निरन्तरमन्तर्ध्यानावस्थस्य देहानुबन्धेनात्मानुभवमुक्त्वाधुना कदापि बाह्यदृष्टेः सर्वात्मकत्वेनात्मप्रतीतिमीशावास्योपनिषदुक्तां दर्शयति—**सर्वभूतस्थमिति**। योगेनाभ्यसनेन युक्तः समाहित आत्मा मनो यस्यैवंविध आत्मानं समष्टिरूपं सर्वभूतेषु स्थूलव्यष्टिरूपेष्वन्तर्यामित्वेन तिष्ठन्तमीक्षते पश्यति तथा सर्वभूतान्यात्मनि स्थूलसमष्टिरूपे जलतरङ्गवत्तादात्म्येन पश्यति। अत एव सर्वत्र समदर्शनः सर्वभूतेषु समं तारतम्यविवर्जितं दर्शनं प्रतीतिर्यस्य स तथा। श्रुतिश्च—"यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं न तदा विचिकित्सति " इति। भाष्यम्—यः पुरुषः सर्वाणि भूतान्यात्मन्येव पश्यति जले तरङ्गानिव तथा सर्वभूतेष्वात्मानमेव पश्यति तरङ्गेषु जलमिव। एवंभूतश्चेत्तदा न विचिकित्सति तारतम्यविचारं न करोतीत्यर्थः ॥ २९ ॥

रा० टी०—एवं युञ्जन्निति ध्यानप्रकरणस्य फलकथनेनोपसंहृत्येदानीं ध्येयमाह—**सर्वेति**। भोक्तारमिति पञ्चमान्ते मच्चित्तो युक्त आसीतेत्यत्रैवाध्याये ध्येयोक्तावपीहोत्तमाधिकारिणां ध्येयस्योक्तिरिति ज्ञेयम्। आत्मानं परमात्मानं ब्रह्मादिसर्वप्राणिगत आत्मनि परमात्मनि सर्वत्र ब्रह्मादितृणान्तेषु भगवन्तमैश्वर्यादिना साम्येन पश्यन्समदर्शनो योगयुक्तात्मा समाधियुक्तमनस्कः ईक्षते पश्यतीत्यर्थः ॥ २९ ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

त० टी०—केवलात्मसमत्वदर्शिनः सकाशात्सर्वत्र परमात्मदर्शिनः श्रैष्ठ्यमाह—**य इति**। योयोगारूढस्तत्त्वदर्शी सर्वत्र ब्रह्मादिपशुकीटान्तेषु प्राणिमात्रेषु वासुदेवं भगवन्तं सर्वस्यान्तर्नियन्तारं पश्यति, सर्वं च ब्रह्मादिप्राणिजातं मयि आधारभूते स्वतन्त्रे च आधेयतया नियम्यतया आयत्ततयाऽवस्थितं पश्यति, तस्यैवंभूतस्य मद्दर्शिनोऽहं न प्रणश्यामि अदृश्यो न भवामि, स च मे न प्रणश्यति स विद्वान् मम वासुदेवस्य भगवतो न प्रणश्यति न परोक्षीभवति। अहं कृपया तज्ज्ञानविषयो भूत्वा तं सदा स्वदर्शनयोग्यं करोमीत्यर्थः ॥ ३० ॥

म० टी०—एवं शुद्धं त्वंपदार्थं निरूप्य शुद्धं तत्पदार्थं निरूपयति—**यो मामिति**। यो योगी मामीश्वरं तत्पदार्थमशेषप्रपञ्चकारणमायौपाधिकमुपाधिविवेकेन सर्वत्र प्रपञ्चे सद्रूपेण स्फुरणरूपेण चानुस्यूतं पश्यति योगजेन प्रत्यक्षेणापरोक्षीकरोति तथा सर्वं च प्रपञ्चजातं मायया मय्यारोपितं मद्भिन्नतया मृषात्वेनैव पश्यति तस्यैवं विवेकदर्शिनोऽहं तत्पदार्थो भग-सर्वोपाधिविनिर्मुक्तं परमार्थसत्यमानन्दघनमनन्तं

वान्न प्रणश्यामि ईश्वर: कश्चिन्मद्भिन्नोऽस्तीति परोक्षज्ञानविषयो न भवामि किंतु योगजापरोक्षज्ञानविषयो भवामि । यद्यपि वाक्यजापरोक्षज्ञानविषयत्वं त्वंपदार्थाभेदेनैव तथापि केवलस्यापि तत्पदार्थस्य योगजापरोक्षज्ञानविषयत्वमुपपद्यत एव । एवं योगजेन प्रत्यक्षेण मामपरोक्षीकुर्वन् स च मे न प्रणश्यति परोक्षो न भवति स्वात्मा हि मम स विद्वानतिप्रियत्वात्सर्वदा मदपरोक्षज्ञानगोचरो भवति, ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्युक्तेः । तथैव शरशय्यास्थभीष्मध्यानस्य युधिष्ठिरं प्रति भगवद्वचनोक्तेः अविद्वांस्तु स्वात्मानमपि सन्तं भगवन्तं न पश्यति अतो भगवान् पश्यन्नपि तं न पश्यति " स एनमविदितो न भुनक्ति " इति श्रुतेः । विद्वांस्तु सदैव सन्निहितो भगवतोऽनुग्रहभाजनमित्यर्थः ॥ ३० ॥

शं० टी०—उक्तरीत्या स्वात्मनः सर्वभूतस्थत्वं सर्वभूताधारत्वं च पश्यतो ब्रह्मविदश्च स्वस्य च स्वरूपेणैकत्वं बोधयितुं स्वस्यापि सर्वभूतस्थत्वं सर्वभूताधिवासत्वं च सूचयन्नेवमीश्वरस्य स्वस्य च स्वरूपेणैकत्वमेवाप्रतिबद्धवृत्त्या पश्यतो ब्रह्मविद्यतेस्तद्दर्शनस्य फलमाह—**य इति** । य उक्तसाधनसंपत्त्या योगारूढो ब्रह्मविद्यतिर्मां सच्चिदानन्दैकरसं परं ब्रह्म सर्वत्र ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु प्रत्यगात्मस्वरूपेण स्थितं पश्यति तथैवोक्तलक्षणे मयि परे ब्रह्मण्यव्याकृतादिस्थूलान्तं जगच्च सर्वं व्योम्नि गन्धर्वनगरवदाभासमात्रं निःसत्ताकं पश्यति तस्यैवं स्वस्य च मम च सर्वभूतस्थत्वसर्वभूताधारत्वलक्षणाभ्यां नियताभ्यां श्रुतियुक्तिबलाच्च स्वरूपेणैकत्वमेव सदैव पश्यतो ब्रह्मवित्तमस्याहं सच्चिदानन्दैकरसं परं ब्रह्म न प्रणश्यामि प्रणाशोऽदर्शनं वृत्तेरविषयत्वं न गच्छामि किंतु तिष्ठतो गच्छत आसीनस्य वा शयानस्य वाप्युन्मिषतो निमिषतो भुञ्जतो वा यथेच्छया तिष्ठतस्तद्बुद्धिवृत्तेः सदा सर्वत्र चक्षुषो रूपवत्परमानन्दमावहन्विषयो भवामीत्यर्थः । यथा घटः स्वद्रष्टुः स्वयं भिन्न एव भूत्वा विषयो भवति तथा ब्रह्मापि सर्वत्र स्वं पश्यतो ब्रह्मविदः स्वयं भिन्नमेव सद्विषयं भवति तथात्वे " उदरमन्तरं कुरुते । अथ तस्य भयं भवति " इतिश्रवणात् । एवं भेददृष्टेः सतोऽपि मोक्षाभावप्रसङ्गाद्भेददृष्टिं परिहर्तुमाह—**स चेति** । स च ब्रह्मविदपि मे मम चिदेकरसस्य निर्विशेषस्य ब्रह्मणो न प्रणश्यति प्रणाशो नामानात्मतादात्म्यापत्तिरेव विदुषः यथा वैधर्म्यापत्तिः पुरुषस्य नरकाद्यनर्थहेतुस्तथा ब्रह्मविदो विपरीतभावापत्तिरेव जन्माद्यनर्थे हेतुर्यतस्ततोऽयं क्वचिदप्यनात्मन्यात्मभावं न करोति किंतु देवदत्तः स्वदेह इव ब्रह्मैवाहमिति स्वात्मना विषयीकृते निर्विशेषे परे ब्रह्मण्येव सर्वदाहंवृत्त्या तिष्ठतीत्यर्थः ॥ ३० ॥

श्री० टी०—एवंभूतात्मज्ञानस्य सर्वभूतात्मतया मदुपासनं मुख्यं कारणमित्याह—**य इति** । मां परमेश्वरं सर्वत्र भूतमात्रे यः पश्यति सर्वं च प्राणिमात्रं मयि यः पश्यति तस्याहं न प्रणश्यामि अदृश्यो न भवामि स च ममादृश्यो न भवति प्रत्यक्षो भूत्वा कृपादृष्ट्या तं विलोक्यानुगृह्णामीत्यर्थः ॥ ३० ॥

स० टी०—त्वंपदार्थं निरूप्यैवं शुद्धं तत्त्वैक्यसिद्धये ॥ विशुद्धस्तत्पदार्थोऽपि हरिणात्र निरूप्यते ॥ १ ॥ यो योगी तत्पदार्थं मां जगज्जन्मादिकारणम् ॥ मायोपाधिविवेकेन समस्तजगतीश्वरम् ॥ २ ॥ सत्तास्फुरणरूपेणानुस्यूतं निरुपाधिकम् ॥ अद्वयानन्दमात्मानमपरोक्षीकरोति वै ॥ ३ ॥ तथा सर्वं जगन्मिथ्यारोपितं माययेक्षते ॥ तस्यैवं दर्शिनो नाहं तत्पदार्थो महेश्वरः ॥ ४ ॥ परोक्षज्ञानविषयो भवामि स्वात्मतां गतः ॥ ईश्वरः कश्चिदन्योऽस्ति मत्तश्चेति परोक्षधीः ॥ ५ ॥ या पुरासीन्मदात्मत्वधिया सा विप्रणश्यति ॥ विद्वान्मद्रूप एवास्ति न परोक्षो ममापि सः ॥ ६ ॥ अविद्वांस्तु न तत्त्वेन पश्यतीश्वरमान्तरम् ॥ अतो न तं परेशोऽपि पश्यन्नपि प्रपश्यति ॥ ७ ॥ ज्ञानी नित्यापरोक्षत्वादीशानुग्रहभाजनम् ॥ ८ ॥ ३० ॥

भा० टी०—एकत्वदर्शनस्य फलमाह—**य इति** । यो मां वासुदेवं प्रत्यगभिन्नं सर्वत्र तस्मिन्नधिष्ठानरूपं पश्यत्यपरोक्षीकरोति स सर्वं च ब्रह्मादिभूतजातं मयि प्रत्यगभिन्ने वासुदेवे कल्पितं पश्यति तस्य ब्रह्मात्मै-

क्यसाक्षात्कारवतः अहं प्रत्यगभिन्नपरमात्मा न प्रणश्यामि अदृश्यः परोक्षो न भवामि स च विद्वानात्मैकत्वदर्शी मम प्रत्यगभिन्नस्य वासुदेवस्य न प्रणश्यति परोक्षो न भवति। यद्यपि विद्वानिवाविद्वानपि ईश्वरस्य न प्रणश्यति तथाप्यविदुषोऽविद्यया व्यवहितत्वात्परोक्षप्रायता। यत्तु एवं शुद्धं त्वंपदार्थं निरूप्य शुद्धं तत्पदार्थं निरूपयति यो योगी मामीश्वरं तत्पदार्थमशेषप्रपञ्चकारणं मायोपाधिविवेकेन सर्वत्र प्रपञ्चे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वोपाधिविनिर्मुक्तं परमार्थसत्यमानन्दघनमनन्तं पश्यति योगजेन प्रत्यक्षेणापरोक्षीकरोति तथा सर्वप्रपञ्चजातं मायया मय्यारोपितं मद्भिन्नतया मृषात्वेन एव पश्यति तस्यैव विवेकदर्शिनः अहं तत्पदार्थो भगवान्न प्रणश्यामि ईश्वरः कश्चिन्मदभिन्नोऽस्तीति परोक्षज्ञानविषयो न भवामि किंतु योगजापरोक्षज्ञानविषयो भवामि। यद्यपि वाक्यजापरोक्षज्ञानविषयत्वं पदार्थाभेदेनैव तथापि केवलस्यापि तत्पदार्थस्य योगजापरोक्षज्ञानविषयत्वमुपपद्यत एव योगजेन प्रत्यक्षेण मामपरोक्षीकुर्वन्स च मे न प्रणश्यति परोक्षो न भवति स्वात्मा हि मम स विद्वानिति प्रियत्वात्सर्वदा मदपरोक्षज्ञानगोचरो भवति ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्युक्तेरिति केचित्। तत्र मूलतद्भाष्यस्वव्याख्यानविरुद्धा पातनिका "तं त्वौपनिषदं पुरुषं पृच्छामि। नावेदविन्मनुते तं बृहन्तम्" इत्यादिश्रुतिविरुद्धा योगजाखण्डापरोक्षज्ञानकल्पना च नादर्तव्या तस्येत्यादेः संकोचकपदाद्यभावेन कदाप्यहं तस्य परोक्षो न भवामीत्यर्थं विहाय कदाचित्समाध्यादिकाले योगजप्रत्यक्षेणेति कल्पनाया अयोगाच्चेति दिक्॥ ३०॥

प० टी०—अथ सूक्ष्मसमष्टिरूपेण सर्वात्मकत्वेनात्मप्रतीतिमाह—**यो मामिति**। यः पुरुषो मां सूक्ष्मं समष्टिरूपं हिरण्यगर्भं सर्वत्र सूक्ष्मव्यष्टिरूपेषु सूक्ष्मशरीरेषु पश्यति सर्वं व्यष्टिरूपं मयि समष्टिरूपे पश्यति तस्य पुरुषस्याहं न प्रणश्यामि सदैवानुभवारूढस्तिष्ठामि स च पुरुषो मे न प्रणश्यति मत्कृपाकटाक्षशरण एव तिष्ठतीत्यर्थः॥ ३०॥

रा० टी०—सर्वभूतस्थात्मध्यानविशेषस्य फलमाह—**यो मामिति**। सर्वत्र ब्रह्मादितृणान्तेषु स्थितं मां यः पश्यति सर्वं च ब्रह्मादिजगत् मयि मदधीनं पश्यति तस्याहं न प्रणश्यामि सर्वदा योगक्षेमवहः स्यामित्यर्थः। स च मे न प्रणश्यति सदा मद्भक्तो भवतीत्यर्थः॥ ३०॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥
सर्वथा वर्तमानोऽपि स योगी मयि वतते॥ ३१॥

त० टी०—ततोऽप्यधिकां योगारूढदशामाह—**सर्वभूतस्थितमिति**। सर्वेषु भूतेषु प्राणिषु परिच्छिन्नेषु स्थितमपरिच्छिन्नतया व्याप्यावस्थितं मां भगवन्तं वासुदेवं व्यापकाद्व्याप्यस्य पृथक्स्थितिःप्रवृत्त्यनर्हत्वादेकत्वमभेदमास्थितः सन्सर्वं मदभेदेन पश्यन् यो भजते सर्वत्र मदात्मकत्वबुद्धिं करोतीत्यर्थः। तथोक्तं विष्णुपुराणे प्रह्लादेन 'मय्यन्यत्र तथाशेषभूतेषु भुवनेषु च। तवैव व्याप्तिरैश्वर्यगुणसूचनकी प्रभो। सर्वगत्वादनन्तस्य स एवाहमवस्थितः' इति। स योगी सर्वथा वर्तमानोऽपि ध्यानयोगेन कर्मणा वा कर्मत्यागेन वा स्वेच्छया येन केन प्रकारेण वर्तमानोऽप्यखण्डेन मदनुभवेन मय्येव वर्तते, न मत्तो वियुज्यत इत्यर्थः॥ ३१॥

म० टी०—एवं त्वंपदार्थं तत्पदार्थं च शुद्धं निरूप्य तत्त्वमसीतिवाक्यार्थं निरूपयति—**सर्वभूतेति**। सर्वेषु भूतेष्वधिष्ठानतया स्थितं सर्वानुस्यूतसन्मात्रं मामीश्वरं तत्पदलक्ष्यं स्वेन त्वंपदलक्ष्येण सहैकत्वमत्यन्ताभेदमास्थितः सन् घटाकाशो महाकाश इत्यत्रेवोपाधिभेदनिराकरणेन निश्चिन्वन् यो भजति अहं ब्रह्मास्मीति वेदान्तवाक्यजेन तत्त्वसाक्षात्कारेणापरोक्षीकरोति सोऽविद्यातत्कार्यनिवृत्त्या जीवन्मुक्तः कृत-

कृत्य एव भवति । यावत्तु तस्य बाधितानुवृत्त्या शरीरादिदर्शनमनुवर्तते तावत्प्रारब्धकर्मप्राबल्यात् सर्वकर्मत्यागेन वा याज्ञवल्क्यादिवत् विहितेन कर्मणा वा जनकादिवत् प्रतिषिद्धेन कर्मणा वा दत्तात्रेयादिवत् सर्वथा येनकेनापि रूपेण वर्तमानोऽपि व्यवहरन्नपि स योगी ब्रह्माहमस्मीति विद्वान्मयि परमात्मन्येवाभेदेन वर्तते । सर्वथा तस्य मोक्षं प्रति नास्ति प्रतिबन्धशङ्का " तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवति " इति श्रुतेः । देवा महाप्रभावा अपि तस्य मोक्षाभवनाय नेशते किमुतान्ये क्षुद्रा इत्यर्थः । ब्रह्मविदो निषिद्धकर्मणि प्रवर्तकयो रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेऽपि तदङ्गीकृत्य ज्ञानस्तुत्यर्थमिदमुक्तं सर्वथा वर्तमानोऽपीति हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत इतिवत् ॥ ३१ ॥

शं० टी०—एवं योगानुष्ठानसंभावितसम्यग्दर्शनस्य सर्वस्य ब्रह्ममात्रत्वावगाहिनः फलं सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मण्येवात्मत्वदर्शनं सर्वदा ब्रह्मानन्दानुभूतिश्चेति सूचयित्वाऽधुना त्वेवंलक्षणो ब्रह्मवित्तमः स्वप्रारब्धानुरूपेण देहे नानाधर्मवत्यपि सति स्वयं स्वनिष्ठयैव वर्तमानः सन् मुक्तिं प्राप्नोतीत्याह—**सर्वभूतस्थितमिति** । " एकमेवाद्वितीयं ब्रह्म । नेह नानास्ति किंचन । सर्वं ह्येतद्ब्रह्म । अयमात्मा ब्रह्म । अहं ब्रह्मास्मि " इत्यादिश्रुत्यर्थविचारसमुत्थज्ञानबलेन योगानुष्ठानसमुत्पन्नस्वानुभूतिबलेन चैकत्वमास्थितः " सर्वमिदमहं च ब्रह्मैव" इति सदैकत्वमेवास्थितः सर्वं ब्रह्मैवेति दृढनिश्चययुक्तो भूत्वा यो ब्रह्मवियतिः सर्वभूतस्थं महदादिस्थूलपर्यन्तं सर्वभूतजातं बहिरन्तः सदैकरूपेणायःपिण्डमग्निरिव सर्वतो व्याप्य तिष्ठतीति सर्वभूतस्थं मां निर्विशेषं परं ब्रह्म भजति ब्रह्मैवाहमिति प्रत्यग्दृष्ट्या स्वं मामेव साक्षाद्विज्ञाय मद्भावं यो भजतीत्यर्थः । स योगी मद्भावापन्नो ब्रह्मवित्सर्वथा वर्तमानः स्वप्रारब्धानुरूपेण विविधचेष्टावद्देहचेष्टया लोकदृष्ट्या बालवन्मूढवदुन्मत्तवच्छिष्टवदशिष्टवत्प्रतीयमानोऽपि स्वदृष्ट्या निर्विकारब्रह्मात्मनैव स्थितो ब्रह्मवित्तमः पतितेऽस्मिन् देहे मयि वर्तते मदात्मना मयि तिष्ठति । यद्वा मयीतितृतीयार्थे सप्तमी मया ब्रह्मात्मना तिष्ठति विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ ३१ ॥

श्री० टी०—न चैवंभूतो विधिकिंकरः स्यादित्याह—**सर्वभूतस्थितमिति** । सर्वेषु भूतेषु स्थितं मामभेदमास्थित आश्रितो यो भजति स योगी ज्ञानी सन्सर्वथा कर्मत्यागेनापि वर्तमानो मय्येव वर्तते मुच्यते, न तु भ्रश्यतीत्यर्थः ॥ ३१ ॥

स० टी०—तत्त्वंपदार्थमुक्त्वैवमखण्डार्थो निरूप्यते ॥ ब्रह्मादिस्थावरान्तेषु भूतेषूच्चावचेषु यः ॥ १ ॥ निर्विशेषं चिदानन्दे मामद्वैतं निरञ्जनम् ॥ गुणरूपक्रियावस्तुविक्रियाद्येकहेतुकम् ॥ २ ॥ भेदं त्यक्त्वान्यजं शुद्धं सच्चिन्मात्रतया स्थितम् ॥ तत्पदार्थैकलक्ष्यस्य त्वमो लक्ष्येण साक्षिणा ॥ ३ ॥ इहैकत्वं श्रुतौ सिद्धमत्यन्ताभेदमास्थितः ॥ अहं ब्रह्मेति वेदान्तवाक्यजज्ञानचक्षुषा ॥ ४ ॥ अपरोक्षीकरोत्याशु त्यक्त्वाविद्यां च तत्कृतम् ॥ कृतकृत्यतया सोऽयं जीवन्मुक्त उदारधीः ॥ ५ ॥ यावत्तस्य शरीरादिदर्शनं चानुवर्तते ॥ आभासमात्रं बुद्धस्य यथा स्वाप्नस्य दर्शनम् ॥ ६ ॥ प्रारब्धकर्मप्राबल्यात्तावत्कर्माणि वा त्यजन् ॥ कुर्वन्वा विहितं कर्म निषिद्धं वा समाचरन् ॥ ७ ॥ येन केनापि रूपेण योगी व्यवहरन्नपि ॥ ब्रह्मास्मीति धिया विद्वान्मय्येव परमात्मनि ॥ ८ ॥ ऐक्येन वर्तते नित्यमद्वैते वैष्णवे पदे ॥ नित्यमुक्तस्वभावत्वात्कर्मभिर्नैव लिप्यते ॥ ९ ॥ धर्माधर्माद्यतीते हि पदे नित्यं विराजते ॥ १० ॥ यस्योदारकृपाकटाक्षविलसद्वैराग्यमुख्योदयात्सम्यक्तत्त्वमसीतिनैगमगिरोद्भूतात्मबोधाग्निना ॥ दग्ध्वा ज्ञानमशेषभेदजनकं धीराः परे चिद्घने तिष्ठन्त्यात्मपदप्रदं तमनिशं कृष्णं भजेऽहं सदा ॥ ११ ॥ ३१ ॥

भा० टी०—पूर्वश्लोकार्थं सम्यग्दर्शनं पूर्वार्धेनानूद्य तत्फलं मोक्षमाह—**सर्वेति** । पूर्वोक्तेन प्रकारेण सर्वेषु ब्रह्मादिभूतेषु प्रत्यग्रूपेण स्थितं मां परमात्मानं वासुदेवं य एकत्वमहमेव वासुदेव इत्येवंरूपमास्थितः सम्य-

गपरोक्षीकृतवान् स योगी सम्यग्दर्शी सर्वथा सर्वप्रकारेण विधिप्रतिषेधाकैङ्कर्येण वर्तमानोऽपि अपिशब्देन तस्य रागादिरहितस्य यमनियमादिसंस्कारवतः स्वैरवृत्त्यसंभवेऽपि ज्ञानरक्षार्थं तामङ्गीकरोतीति द्योत्यते । मयि वैष्णवे परमे पदे वर्तते स नित्यमुक्त एव मोक्षं प्रति न केनचित्प्रतिबुध्यत इत्यर्थः । यत्तु तदेवं भाक्तानि सुखान्यभिधायार्जुनोपदेशच्छलेन ज्ञानमार्गे लोकानां प्रवृत्तिसिद्धये भाक्तान् ज्ञानयोगिनोऽप्युत्तरोत्तरातिशयेनाह—सर्वेति यत्संन्यासात्प्रागेव गृहस्थः सन् सर्वभूतस्थं सर्वाणि भूतानि कार्यकरणाकारेण परिणतानि तत्स्थं तत्तादात्म्यभ्रमविषय इत्यात्मानं प्रत्यक्षमीक्षते शास्त्रजन्यापातज्ञानविषयतां नयतीत्येवं सर्वभूतान्यात्मतादात्म्यं भ्रमविषयाणीति शास्त्रजन्यापातज्ञानविषयतां नयति सोऽन्योन्याध्यासज्ञानी अयोगयुक्तोऽपि कर्मयोगज्ञानयोगाभ्यामसंस्पृष्टोऽपि सर्वत्र समदर्शनो ज्ञानयोगी ज्ञेयः इति यत्तदपि ज्ञेयपदाध्याहारैर्योज्यम् । एवमात्मानात्मनोरन्योन्याध्यासापातज्ञानसंपन्नं भाक्तं योगिनमभिधाय ततोऽधिकं तमाह—य इति । मां सर्वज्ञं सर्वशक्तिकं सर्वत्र पश्यति सर्वभूतेष्वीश्वरो जीवकलया प्रविष्ट इति शास्त्रजन्यापातज्ञानविषयतां नयति तस्यापातत एव ऐकात्म्यज्ञानसंपन्नस्याहं न प्रणश्यामि नान्तःकरणादपयामि स च मे मम संबन्धी सन् मत्प्रसादादेव न प्रणश्यति नानर्थं प्राप्नोतीत्यर्थः । अतः सोऽपि भाक्तो ज्ञानयोगी ज्ञेय इति भावः । ततोऽपि किंचिदधिकं तमाह—सर्वेति । एकत्वमास्थित इति जीवब्रह्मणोरौपाधिको भेद उपाधीनामसत्त्वादित्यापातज्ञानवानित्यर्थः । एवंभूतः सन् यो मां सर्वभूतेषु सेवते स सर्वथा आवर्तमानोऽपि संसारयात्रामनुवर्तनशीलोऽपि योगी ज्ञेयः यतो मामनुवर्तते मां भजति पूर्वोक्तप्रकारेणेति ज्ञेयम् । तद्यदोरध्याहारेण योज्यमितीतरैः कल्पितं तदसत्, एतादृशकल्पनाया बह्वध्याहारग्रस्ताया अस्वारसिकायाः प्रकरणविरुद्धाया व्यर्थत्वात् ॥ ३१ ॥

प० टी०—अथैतदनन्तरं सर्वदृश्यजातमात्माकारेण पश्यतीत्याह—सर्वेति । यः सर्वभूताकारेण स्थितमेकत्वमास्थितः सन् भजत्यनुवर्तते स वर्तमानोऽपि नामरूपाकारेण स्थितोऽपि मयि वर्तते मदाकारो भवति श्रुतिरपि—"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति । भाष्यम्—यस्य विजानतो विज्ञानवतः पुरुषस्य सर्वाणि भूतात्मकं विश्वमात्मैवाभूत् । भूतभावनाराहित्येनात्माकारमेव जातं तस्यैकत्वमद्वैतमनुपश्यतः को मोहो मायाविलासरूपमज्ञानं कुतस्तथा तत्प्रयुक्तः शोकश्च कुत इत्यर्थः ॥ ३१ ॥

रा० टी०—यो मामितिश्लोकोक्तमेव स्पष्टयति—सर्वेति । य एकत्वमास्थितः सर्वत्र परमेश्वर एवेत्यास्थितो ज्ञानी सर्वभूतस्थं मां भजति सेवते स योगी सर्वप्रकारेण न्यायेनान्यायेन वा वर्तमानोऽपि मयि वर्तते । अन्यायप्रवृत्तावपि ज्ञानिनो मोक्षो नियत एवेति भावः । तदाह सूत्रे "कामकारेण चैके" इति । आनन्दह्रासस्त्वस्त्येवेति ज्ञेयम् ॥ ३१ ॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

त० टी०—उक्तेभ्यः सर्वेभ्यः श्रेष्ठयोगिनमाह—आत्मौपम्येनेति । आत्मनः स्वस्योपमा आत्मोपमा तस्या भाव आत्मौपम्यं तेन स्वसादृश्येन सर्वत्र प्राणिमात्रे सुखं वा यदि वा दुखं समं तुल्यं यः पश्यति, स्वस्यानिष्टं यथा नेच्छति नोत्पादयति च तथा परस्याप्यनिष्टं नेच्छति नोत्पादयति च रागद्वेषाभावात् स योगी आत्मज्ञः परमः श्रेष्ठो मतः । अथवा आत्मन अन्येषामात्मनां ज्ञानस्वरूपत्वेन ब्रह्मात्मकत्वेन च साम्यं भगवद्भावापत्तिरेव सर्वेषां परमपुरुषार्थ इत्यनाद्यज्ञानावृतज्ञानत्वेन सर्वे न जानन्ति, भगवत्प्राप्तिप्रतिबन्धकीभूतपुण्यपापकर्मप्रवाहपतितत्वात्, तेषु कदाचिन्निर्हेतुककृपाकटाक्षविषयीभूतो यो जीवः स

तु प्रवृत्तिमार्गे ग्लानिबुद्धिः सत्सङ्गपूर्वकसदाचार्योपसत्त्या तदुपदिष्टमोक्षसाधनक्रमेण शुद्धान्तःकरणः सन् ध्यानयोगे प्रवृत्तस्तत्परिपाकलब्धात्मपरमात्मयाथात्म्यज्ञानेन नष्टसंचितक्रियमाणकर्मा प्रारब्धमात्रं भुञ्जान इदं विचारयति. पुण्यपापकार्ययोः सुखदुःखयोरुभयोरपि भगवत्प्राप्तिप्रतिबन्धकत्वं सुखभोगे पुण्यक्षयो दुःखभोगे पापक्षयो भवति । तथा स्तुतिनिन्दयोर्हर्षविषादद्वारेण पुण्यपापक्षयहेतुत्वं, तस्मान्मे स्तुतिनिन्दाकारिणो जना न मित्रशत्रुभावेन विषमा भवन्त्यपि तु पुण्यपापरूपसंसारबन्धक्षयहेतुत्वेन सर्वेऽपि हितकारिणः । यथा पादशृङ्खलयोः काञ्चनायसयोर्बन्धने विशेषाभावात्ततो मोचकाः सर्वेऽपि समा एवेति पश्यति, अत एव सर्वत्रात्मतुल्यत्वेन यथा मम सुखं दुःखं पुण्यपापक्षयकरं तथा सर्वस्येति समं पश्यति ॥ ३२ ॥

म० टी०—एवमुत्पन्नेऽपि तत्त्वबोधे कश्चिन्मनोनाशवासनाक्षययोरभावाज्जीवन्मुक्तिसुखं नानुभवति चित्तविक्षेपेण च दृष्टदुःखमनुभवति सोऽपरमो योगी देहपाते कैवल्यभागित्वात् देहसद्भावपर्यन्तं च दृष्टदुःखानुभवात् तत्त्वज्ञानमनोनाशवासनाक्षयाणां तु युगपदभ्यासाद्दृष्टदुःखनिवृत्तिपूर्वकं जीवन्मुक्तिसुखमनुभवन् प्रारब्धकर्मवशात् समाधेर्व्युत्थानकाले—**आत्मौपम्येनेति** । आत्मैवौपम्यमुपमा तेनात्मदृष्टान्तेन सर्वत्र प्राणिजाते सुखं वा यदि वा दुःखं समं तुल्यं यः पश्यति स्वस्यानिष्टं यथा न संपादयति एवं परस्याप्यनिष्टं यो न संपादयति प्रद्वेषशून्यत्वात् । एवं स्वस्येष्टं यथा संपादयति तथा परस्यापीष्टं यः संपादयति रागशून्यत्वात् स निर्वासनतयोपशान्तमनाः योगी ब्रह्मवित् परमः श्रेष्ठो मतः पूर्वस्मात्, हे अर्जुन अतस्तत्त्वज्ञानमनोनाशवासनाक्षयाणामक्रममभ्यासाय महान् प्रयत्न आस्थेय इत्यर्थः । तत्र इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि मायया कल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दाद्वयोऽहमस्मीति ज्ञानं तत्त्वज्ञानं प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेण परिणममानमन्तःकरणद्रव्यं मननात्मकत्वान्मन इत्युच्यते । तस्य नाशो नाम वृत्तिरूपपरिणामं परित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परिणामः । पूर्वापरपरामर्शमन्तरेण सहसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना पूर्वपूर्वाभ्यासेन चित्ते वास्यमानत्वात् । तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां दृढायां सत्यपि बाह्ये निमित्ते क्रोधाद्यनुत्पत्तिः । तत्र तत्त्वज्ञाने सति मिथ्याभूते जगति नरविषाणादाविव धीवृत्त्यनुदयादात्मनश्च दृष्टत्वेन पुनर्वृत्त्यनुपयोगान्निरिन्धनाग्निवन्मनो नश्यति । नष्टे च मनसि संस्कारोद्बोधकस्य बाह्यस्य निमित्तस्याप्रतीतौ वासना क्षीयते । क्षीणायां वासनायां हेत्वभावेन क्रोधादिवृत्त्यनुदयान्मनो नश्यति । नष्टे च मनसि शमदमादिसंपत्त्या तत्त्वज्ञानमुदेति । एवमुत्पन्ने तत्त्वज्ञाने रागद्वेषादिरूपा वासना क्षीयते । क्षीणायां च वासनायां प्रतिबन्धाभावात्तत्त्वज्ञानोदय इति परस्परकारणत्वं दर्शनीयम् । अत एव भगवान् वसिष्ठ आह ' तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च । मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि ॥ तस्माद्राघव यत्नेन पौरुषेण विवेकिना । भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रय ' इति । पौरुषो यत्नः येनकेनाप्युपायेनावश्यं संपादयिष्यामीत्येवंविधोत्साहरूपो निर्बन्धः । विवेको नाम विविच्य निश्चयः । तत्त्वज्ञानस्य श्रवणादिकं साधनं, मनोनाशस्य योगः, वासनाक्षयस्य प्रतिकूलवासनोत्पादनमिति एतादृशविवेकयुक्तेन पौरुषेण प्रयत्नेन भोगेच्छायाः स्वल्पाया अपि हविषा कृष्णवर्त्मेवेति न्यायेन वासनावृद्धिहेतुत्वाद्दूरत इत्युक्तम् । द्विविधो हि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्च । तत्र य उपास्यसाक्षात्कारपर्यन्तामुपास्तिं कृत्वा तत्त्वज्ञानाय प्रवृत्तस्तस्य वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं जीवन्मुक्तिः स्वत एव सिध्यति । इदानीन्तनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुरौत्सुक्यमात्रात् सहसा विद्यायां प्रवर्तते । योगं विना चिज्जडविवेकमात्रेणैव च मनोनाशवासनाक्षयौ तात्कालिकौ संपाद्य शमदमादिसंपत्त्या श्रव-

णमनननिदिध्यासनानि संपादयति । तैश्च दृढाभ्यस्तैः सर्वबन्धविच्छेदि तत्त्वज्ञानमुदेति । अविद्याग्रन्थिरब्रह्मत्वं हृदयग्रन्थिः संशयाः कर्माण्यसर्वकामत्वं मृत्युः पुनर्जन्म चेत्यनेकविधो बन्धो ज्ञानान्निवर्तते । तथा च श्रूयते " यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य । ब्रह्म वेद ब्रह्मैव भवति । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्स ब्रह्मणा विपश्चिता । तमेव विदित्वातिमृत्युमेति । यस्तु विज्ञानवान् भवत्यमनस्कः सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते । य एवं वेदाहं ब्रह्मास्मीति स इद९ं सर्वं भवति " इत्यसर्वत्वनिवृत्तिफलमुदाहार्यम् । सेयं विदेहमुक्तिः सत्यपि देहे ज्ञानोत्पत्तिसमकालीना ज्ञेया, ब्रह्मण्यविद्याध्यारोपितानामेतेषां बन्धानामविद्यानाशे सति निवृत्तौ पुनरुत्पत्त्यसंभवात् । अतः शैथिल्यहेत्वभावात्तत्त्वज्ञानं तस्यानुवर्तते । मनोनाशवासनाक्षयौ तु दृढाभ्यासाभावाद्भोगप्रदेन प्रारब्धेन कर्मणा वाध्यमानत्वाच्च सवातप्रदेशप्रदीपवत्सहसा निवर्तेते । अत इदानीन्तनस्य तत्त्वज्ञानिनः प्राक्सिद्धे तत्त्वज्ञाने न प्रयत्नापेक्षा किंतु मनोनाशवासनाक्षयौ प्रयत्नसाध्याविति । तत्र मनोनाशोऽसंप्रज्ञातसमाधिनिरूपणेन निरूपितः प्राक् । वासनाक्षयस्त्विदानीं निरूप्यते । तत्र वासनास्वरूपं वसिष्ठ आह ' दृढभावनया त्यक्तपूर्वापरविचारणम् । यदादानं पदार्थस्य वासना सा प्रकीर्तिता ' अत्र च स्वस्वदेशाचारकुलधर्मस्वभावभेदतद्गतापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः सामान्येनोदाहरणम् । सा च वासना द्विविधा मलिना शुद्धा च । शुद्धा दैवी संपत् शास्त्रसंस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपैव । मलिना तु द्विविधा बाह्याऽभ्यन्तरा च । बाह्या तु त्रिविधा लोकवासना शास्त्रवासना देहवासना चेति । सर्वे जना यथा न निन्दन्ति तथैवाचरिष्यामीत्यशक्यार्थाभिनिवेशो लोकवासना तस्याश्च ' को लोकमाराधयितुं समर्थः ' इति न्यायेन संपादयितुमशक्यत्वात् पुरुषार्थानुपयोगित्वाच्च मलिनत्वम् । शास्त्रवासना तु त्रिविधा पाठव्यसनं बहुशास्त्रव्यसनमनुष्ठानव्यसनं चेति क्रमेण भरद्वाजस्य दुर्वाससो निदाघस्य च प्रसिद्धा । मलिनत्वं चास्याः क्लेशावहत्वात् पुरुषार्थानुपयोगित्वाद्दर्पहेतुत्वाज्जन्महेतुत्वाच्च । देहवासनापि त्रिविधा आत्मत्वभ्रान्तिर्गुणाधानभ्रान्तिर्दोषापनयनभ्रान्तिश्चेति । तत्रात्मत्वभ्रान्तिर्विरोचनादिषु प्रसिद्धा सार्वलौकिकी । गुणाधानं द्विविधं लौकिकं शास्त्रीयं च । समीचीनशब्दादिविषयसंपादनं लौकिकं, गङ्गास्नानशालग्रामतीर्थादिसंपादनं शास्त्रीयम् । दोषापनयनमपि द्विविधं लौकिकं शास्त्रीयं च । चिकित्सकोक्तैरौषधैर्व्याध्याद्यपनयनं लौकिकं, वैदिकस्नानाचमनादिभिरशौचाद्यपनयनं वैदिकम् । एतस्याश्च सर्वप्रकाराया मलिनत्वमप्रामाणिकत्वादशक्यत्वात्पुरुषार्थानुपयोगित्वात्पुनर्जन्महेतुत्वाच्च शास्त्रे प्रसिद्धम् । तदेतल्लोकशास्त्रदेहवासनात्रयमविवेकिनामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरोधित्वाद्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयम् । तदेवं बाह्यविषयवासना त्रिविधा निरूपिता । आभ्यन्तरवासना तु कामक्रोधदम्भदर्पाद्यासुरसंपद्रूपा सर्वानर्थमूलं मानसी वासनेत्युच्यते । तदेवं बाह्याभ्यन्तरवासनाचतुष्टयस्य शुद्धवासनया क्षयः संपादनीयः । तदुक्तं वसिष्ठेन ' मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः । मैत्र्यादिवासना राम गृहाणामलवासनाः ' इति । तत्र विषयवासनाशब्देन पूर्वोक्तास्तिस्रो लोकशास्त्रदेहवासना विवक्षिताः, मानसवासनाशब्देन कामक्रोधदम्भदर्पाद्यासुरसंपद्विवक्षिता । यद्वा शब्दस्पर्शरूपरसगन्धा विषयाः । तेषां भुज्यमानत्वदशाजन्यः संस्कारो विषयवासना, काम्यमानत्वदशाजन्यः संस्कारो मानसवासना । अस्मिन्पक्षे पूर्वोक्तानां चतसृणामनयोरेवान्तर्भावः बाह्याभ्यन्तरव्यतिरेकेण वासनान्तरासंभवात् । तासां वासनानां परित्यागो नाम तद्विरुद्धमैत्र्यादिवासनोत्पादनम् । ताश्च मैत्र्यादिवासनाः भगवता पतञ्जलिना सूत्रिताः प्राक् संक्षेपेण व्याख्याता अपि पुनर्व्याख्यायन्ते । चित्तं हि

रागद्वेषपुण्यपापैः कलुषीक्रियते तत्र सुखानुशयी रागः मोहादनुभूयमानं सुखमनुशेते कश्चिद्धीवृत्तिविशेषो राजसः सर्वं सुखजातीयं मे भूयादिति। तच्च दृष्टादृष्टसामग्र्यभावात्संपादयितुमशक्यमतः स रागश्चित्तं कलुषीकरोति। यदा तु सुखिषु प्राणिष्वयं मैत्रीं भावयेत् सर्वेऽप्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव संपन्नमिति भावयतस्तत्र रागो निवर्तते यथा स्वस्य राज्यनिवृत्तावपि पुत्रादिराज्यमेव स्वकीयं राज्यं तद्वत्। निवृत्ते च रागे वर्षाव्यपाये जलमिव चित्तं प्रसीदति। तथाच दुःखानुशयी द्वेषः दुःखमनुशेते कश्चिद्धीवृत्तिविशेषस्तमोनुगतरजःपरिणाम ईदृशं सर्वं दुःखं सर्वदा मे मा भूदिति। तच्च शत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यम्। न च सर्वे ते दुःखहेतवो हन्तुं शक्यन्ते। अतः स द्वेषः सदा हृदयं दहति। यदा तु स्वस्येव परेषां सर्वेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं प्रसीदति। तथा च स्मर्यते 'प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा। आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः' इति। एतदेवेहाप्युक्तमात्मौपम्येन सर्वत्रेत्यादि। तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठन्ति पापं त्वनुतिष्ठन्ति। तदाहुः 'पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः। न पापफलमिच्छति पापं कुर्वन्ति यत्नतः' इति। ते च पुण्यपापे अक्रियमाणाक्रियमाणे पश्चात्तापं जनयतः। स च श्रुत्यानूदितः "किमहं साधु नाकरवं किमहं पापमकरवम्" इति। यद्यसौ पुण्यपुरुषेषु मुदितां भावयेत्तदा तद्वासनावान् स्वयमेवाप्रमत्तः अशुक्लकृष्णे पुण्ये प्रवर्तते। तदुक्तम् 'कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्' अयोगिनां त्रिविधं शुक्लं शुभं कृष्णमशुभं शुक्लकृष्णं शुभाशुभमिति। तथा पापपुरुषेषूपेक्षां भावयन्स्वयमपि तद्वासनावान् पापान्निवर्तते। ततश्च पुण्याकरणपापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति। एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्तते किंत्वसूयेर्ष्यादयोऽपि निवर्तन्ते। परगुणेषु दोषाविष्करणमसूया। परगुणानामसहनमीर्ष्या। यदा मैत्रीवशात्परसुखं स्वीयमेव संपन्नं तदा परगुणेषु कथमसूयादिकं संभवेत्। तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्तते तदा दुःखित्वप्रतियोगिकस्वसुखित्वप्रयुक्तदर्पोऽपि निवर्तते। एवं दोषान्तरनिवृत्तिरप्यूहनीया वासिष्ठरामायणादिषु। तदेवं तत्त्वज्ञानं मनोनाशो वासनाक्षयश्चेति त्रयमभ्यसनीयम्। तत्र केनापि द्वारेण पुनःपुनस्तत्त्वानुस्मरणं तत्त्वज्ञानाभ्यासः। तदुक्तम् 'तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव सर्वदा। इदं जगदहं चेति बोधाभ्यासं विदुः परम्' इति। दृश्यावभासविरोधियोगाभ्यासो मनोनिरोधाभ्यासः। तदुक्तम् 'अत्यन्ताभावसंपत्तौ ज्ञातुर्ज्ञेयस्य वस्तुनः। युक्त्या शास्त्रैर्यतन्ते ये तेऽप्यत्राभ्यासिनः स्थिताः' इति। ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाप्यप्रतीतिरत्यन्ताभावसंपत्तिस्तदर्थं युक्त्या योगेन 'दृश्यासंभवबोधेन रागद्वेषादितानवे। वृत्ति (रति) र्घनोदिता याऽसौ ब्रह्माभ्यासः स उच्यते' इति रागद्वेषादिक्षीणतारूपवासनाक्षयाभ्यास उक्तः। तस्मादुपपन्नमेतत्तत्त्वज्ञानाभ्यासेन मनोनाशाभ्यासेन वासनाक्षयाभ्यासेन च रागद्वेषशून्यतया यः स्वपरसुखदुःखादिषु समदृष्टिः स परमो योगी मतो यस्तु विषमदृष्टिः स तत्त्वज्ञानवानप्यपरमो योगीति॥ ३२॥

शं० टी०—'सर्वभूतसुहृच्छान्तः' इति 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति स्मरणात्सर्वभूतसुहृत्तया मनोवाक्कायकर्मभिः प्राणिपीडामकुर्वत एव श्रवणं मननं तज्जन्यज्ञानं च तत्फलं मोक्षश्च सिध्यति नान्यथातो मुमुक्षोर्यतेः श्रवणादिनिष्ठस्य स्वसाम्येन सर्वप्राणिनां सुखं दुःखं च परिज्ञाय तेषामुपद्रवः कथंचिदपि न कर्तव्य इति बोधयितुमिदमाह—आत्मौपम्येनेति। आत्मौपम्येन सर्वप्राणिसुखदुःखवेदनकर्मण्यात्मा स्वयमेवोपमा दृष्टान्तो यस्य स आत्मोपमस्तस्य भाव आत्मौपम्यं तेन स्वसादृश्येन सर्वत्र सर्वप्राणिषु। वाशब्दश्चार्थो यदिशब्दोऽप्यर्थः। सर्वत्र सुखं च दुःखं चापि यः समं पश्यति यथा स्वस्य

सुखमिष्टं दुःखमनिष्टं भवति तथैव सर्वप्राणिनामपीति विज्ञाय वाङ्मनःक्रियाभिः परेषां कचित्कदाचित्कथंचिदपि विक्षेपं न करोतीत्यर्थः । एवंलक्षणः स योगी यतिः परम उत्कृष्टो मतः संमतः । यद्वा आत्मौपम्येन नित्यमुक्तस्वरूपत्वेन यथाहं देहतद्धर्मकर्मसुखदुःखादिसंबन्धरहितस्तथा सर्वेऽपि च देहिनो देहतद्धर्मतत्कर्मसुखदुःखादिसंबन्धरहिता एवेत्यात्मौपम्येन यद्यपि सर्वेषां च नित्यमुक्तत्वं प्रत्यग्दृष्ट्या विजानाति तथापि बाह्यदृष्ट्या सुखं च दुःखं च समं स्वसमं सर्वत्र सर्वभूतेषु यो ब्रह्मवित्पश्यति ‘कीटवद्विचरेन्महीम्’ इत्यादिस्मृतिप्रामाण्यान्मुक्तत्वान्न मे पापलेशोऽस्तीत्यभिमानमुत्सृज्य सर्वत्रात्मबुद्ध्या प्राणिमात्रस्य विक्षेपं यो न करोतीत्यर्थः । एवं सर्वप्राणिषु स्वबुद्ध्या अनुकूलवर्ती स योगी योगनिष्ठो ब्रह्मविद्यतिः परमः ज्ञानिनां सर्वेषामुत्तम इति ममाभिमत इत्यर्थः ॥ ३२ ॥

श्री० टी०—एवं च मां भजतां योगिनां मध्ये सर्वभूतानुकम्पी श्रेष्ठ इत्याह—**आत्मौपम्येनेति** । आत्मौपम्येन स्वसादृश्येन यथा मम सुखं प्रियं दुःखं चाप्रियं तथान्येषामपीति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वाञ्छति न तु कस्यापि दुःखं स योगी श्रेष्ठो ममाभिमत इत्यर्थः ॥ ३२ ॥

स० टी०—स्वदृष्टान्तेन सर्वत्र प्राणिजाते चतुर्विधे ॥ सुखं वा यदि वा दुःखं तुल्यं यः परिपश्यति ॥ १ ॥ यथा मम सुखं नित्यमिष्टमेवं हि देहिनाम् ॥ सर्वेषामनुकूलं स्यादिति पश्यति सन्मतिः ॥ २ ॥ प्रतिकूलं यथा दुःखं ममैवं सर्वदेहिनाम ॥ प्रतिकूलं तथा चायं सर्वभूतहिते रतः ॥ ३ ॥ कस्यचिन्मनसा वाचा पीडां नाचरतीह यः ॥ कर्मणा वा स योगी तु सर्वोत्कृष्टतया मतः ॥ ४ ॥ ३२ ॥

भा० टी०—ननु सर्वथा वर्तमानोऽपीत्युक्त्या कस्यचिद्दुःखहेतुभूतापि तस्य प्रवृत्तिः प्राप्नोति चेत्तर्हि तल्लक्षणं शृण्वित्याशयेनाह—**आत्मेति** । आत्मा स्वयमेव उपमाया भाव औपम्यं तेन यः सर्वेषु भूतेषु । वाशब्दौ चार्थे । सुखं च यच्च दुःखं समं पश्यति यथा मम सुखदुःखे अनुकूलप्रतिकूले तथा सर्वस्यापीति तुल्यतया सर्वत्र समं पश्यति न कस्यचित्प्रतिकूलमाचरति अहिंसक इत्यर्थः । स सर्वेषां योगिनां मध्ये परमश्रेष्ठो योगी मे मम मतः अभिमतः । तथाच महता प्रयत्नेनापि परमयोगित्वलाभाय एतल्लक्षणं संपादनीयमित्याशयः । यद्यपि यः सर्वप्रकारेण वर्तते सोऽपि मुच्यत एव तथाप्यत्र निषिद्धाद्याचरणात्सकलङ्को भवति अयं तु तथात्वाभावादत्रापि निष्कलङ्कः शुद्ध इति सूचयन्नाह—अर्जुनेति ॥ ३२ ॥

प० टी०—अथैतादृशस्यापि पुरुषस्य लोकव्यवहारवच्चेष्टमानस्य दशामाह—**आत्मौपम्येनेति** । यः पुरुषः सर्वत्र सर्वभूतेषु सुखं दुःखं वात्मौपम्येन पश्यति यथा मे आत्मसुखमिष्टं संसारदुःखमनिष्टं तथैव सर्वत्र भूयादिति पश्यति स परमश्चरमदशां प्राप्तो योगी मतः ॥ ३२ ॥

रा० टी०—समदर्शन इत्युक्ते गोगवयादिवद्भवति किं साम्यदर्शनमित्याकाङ्क्षायामेकत्वमास्थित इति साम्यदर्शनं स्वयमेव व्याख्यातमिदानीं भगवदनुवर्तिविषयतया साम्यदर्शनं स्वयमेव व्याचष्टे—**आत्मेति** । यथा सुखं स्वस्य प्रियं दुःखं चाप्रियं तथान्येषामपि भगवद्भक्तानामित्येवमात्मौपम्येन स्वसादृश्येन सर्वत्र भगवदनुवर्तिषु समं यः पश्यति सुखमेव सर्वभक्तेषु यो वाञ्छति स्वात्मन इवेति यावत् स योगी परमो मत इति विष्ण्वनुवर्तिषु स्वात्मनीव स्नेहं कुर्वन् श्रेष्ठो मत इति फलितार्थः ॥ ३२ ॥

अर्जुन उवाच—योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

त० टी०—उक्तस्य समत्वदर्शनलक्षणस्य योगस्यासंभावितत्वं मन्वानोऽर्जुन उवाच—**योऽयमिति** । योऽयं सर्वत्र समदर्शनरूपः परमो योगः साम्येन वैषम्यहेतुरागद्वेषादिनिराकरणेन त्वया सर्वज्ञेन

गुरुणोक्तः, हे मधुसूदन दुर्जनविनाशेन सद्धर्मस्थापक एतस्य त्वदुक्तस्य मनोनिरोधलक्षणस्य योगस्य स्थिरां स्थितिं दीर्घकालस्थायिनीं न पश्यामि न संभावयामि । तत्र हेतुमाह—चञ्चलत्वादिति । मनस इति शेषः ॥ ३३ ॥

म० टी०—उक्तमर्थमाक्षिपन् ब्रूतेऽर्जुनः—**योऽयं योग इति** । योऽयं सर्वत्रसमदृष्टिलक्षणः परमो योगः साम्येन समत्वेन चित्तगतानां रागद्वेषादीनां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेनेश्वरेणोक्तः हे मधुसूदन सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्तस्य सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितिं विद्यमानतां स्थिरा दीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि अहमस्मद्विधोऽन्यो वा योगाभ्यासनिपुणः । कस्मान्न संभावयासि तत्राह—चञ्चलत्वात् । मनस इति शेषः ॥ ३३ ॥

शं० टी०—आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेदिति यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृतेत्यादिना मनस आत्मसंस्थत्वं निवातस्थप्रदीपवन्निश्चलत्वं च योगिभिर्योगसिद्धौ संपादनीयमिति श्रुत्वान्तः-करणस्यात्मसंस्थितत्वस्थिरत्वसिद्धेरुपायजिज्ञासयाऽर्जुन उवाच—**य इति** । योगी युञ्जीत सततमित्यादिना मुमुक्षोर्यतेः कैवल्यार्थिनः कर्तव्यत्वेन योऽयं ध्यानयोगः साम्येन साधारण्येन त्वया प्रोक्तः न तु मनो-निरोधनसाधननिरूपणपूर्वकं विशेषेणोक्त इत्यर्थः । ततो मनसश्चञ्चलत्वादेतस्य प्रतिपादितस्य योगस्य स्थिरां निश्चलां स्थितिं निष्ठामहं न पश्यामि ब्रह्मण्यन्तःकरणस्थिरीभावस्य साधनमहं न जानामीत्यर्थः ॥ ३३ ॥

श्री० टी०—उक्तलक्षणस्य योगस्यासंभवं मन्वानोऽर्जुन उवाच—**योऽयमिति** । साम्येन मनसो लयवि-क्षेपशून्यतया केवलात्माकारावस्थानेन योऽयं योगस्त्वया प्रोक्त एतस्य योगस्य स्थिरां दीर्घकालं स्थितिं न पश्यामि मनसश्चञ्चलत्वात् ॥ ३३ ॥

स० टी०—दुःसंपाद्यत्वमालक्ष्य योगस्योक्तस्य चार्जुनः ॥ तत्प्राप्त्युपायं शुश्रूषुः पृच्छति स्म हरिं प्रति ॥ १ ॥ योऽयं सर्वत्र साम्येन योगः प्रोक्तः परात्मना ॥ सर्वज्ञेन महेशेन त्वया निगमयोनिना ॥ २ ॥ एतस्याहं त्वदुक्तस्य योगस्य निश्चलात्मनः ॥ न पश्यामि स्थितिं सत्तां दीर्घकालानुवर्तिनीम् ॥ ३ ॥ मनसोऽत्यन्तचाञ्चल्यान्नैवं संभावयाम्यहम् ॥ ४ ॥ ३३ ॥

भा० टी०—एतादृशं योगमशक्यं मन्यमानस्तदुपायं ध्रुवं जिज्ञासुरर्जुन उवाच—**योऽयमिति** । योऽयं साम्येन समत्वलक्षणो योगस्त्वया प्रोक्त एतस्य स्थिरां निश्चलां स्थितिमहं न पश्यामि नोपलभे चञ्चलत्वात्, मनस इति शेषः । मधुसूदनेति संबोधयन् तमोरजसोः सूदनेन मम चित्तं त्वमचञ्चलं संपादयितुं समर्थोऽसीति सूचयति ॥ ३३ ॥

प० टी०—अथैतस्य योगस्य दुःसाध्यत्वं मन्यमानोऽर्जुनः प्राह—**योऽयमिति** । मनसः साम्येन विक्षेपशून्येन योऽयं योगः केवलमात्माकारावस्थानुरूपस्त्वया प्रोक्त एतस्याहं शाश्वतीं स्थितिं न पश्यामि कुतो मनसश्चञ्चलत्वादनेकविक्षेपैरस्थिरत्वाद्, अत एव मधुसूदनेति संबुद्धिः, यतो मध्वादिदैत्यनिबर्हणे शक्तोऽसि परं त्वस्मन्मनो निग्रहीतुं कुण्ठितशक्तिः सन्नकिंचित्करानस्मानेवोपदिशसीत्यर्थः ॥ ३३ ॥

रा० टी०—भगवदुक्तयोगस्याननुष्ठानलक्षणमप्रामाण्यमाशङ्कते—**योऽयमिति** । हे मधुसूदन साम्येन भगवतः साम्येन सर्वत्रैक्येन तथा भगवदनुवर्तिषु चात्मौपम्यरूपसाम्येनेति वा मनस एकाग्रत्वेनेति वा, योऽयं ध्यानयोगस्त्वया प्रोक्तः एतस्य योगस्य चञ्चलत्वात्स्थिरां स्थितिं न पश्यामि ॥ ३३ ॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ॥
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

त० टी०–उक्तं मनसश्चञ्चलत्वं सर्वजनप्रसिद्धमेवेति स्फुटयति–चञ्चलमिति। चञ्चलं चपलस्वभावं मनः हि प्रसिद्धमेवैतत्। हे कृष्णेति संबोधनेन स्वभक्तपापकर्षकस्त्वं ममेदं प्राप्तं मनोनिग्रहरूपदुःखं निरासयेति सूचितम्। पुनः कीदृशं मनः प्रमाथि प्रमथनशीलं देहेन्द्रियाणां क्षोभकम्। किंच बलवत् अभीष्टविषयाभिमुखं सत् ततो निवर्तयितुमशक्यम्। किंच दृढं विविधविषयवासनानुबद्धतया भेत्तुमशक्यम्। तथाच चञ्चलस्य प्रमाथिनो दृढतया बलवत्तरस्य मनसो निग्रहं दुष्करमहं मन्ये। यथाऽऽकाशे दोधूयमानस्य प्रबलस्य वायोर्घटादिषु निरोधनमशक्यं तथा मनसोऽपीत्यर्थः ॥ ३४ ॥

म० टी०–सर्वलोकप्रसिद्धत्वेन तदेव चञ्चलत्वमुपपादयति–चञ्चलमिति। चञ्चलमत्यर्थं चलं सदा चलनस्वभावं मनः हि प्रसिद्धमेवैतत् भक्तानां पापादिदोषान् सर्वथा निवारयितुमशक्यानपि कृषति निवारयति तेषामेव सर्वथा प्राप्तुमशक्यानपि पुरुषार्थानाकर्षति प्रापयतीति वा कृष्णस्तेन रूपेण संबोधयन् दुर्निवारमपि चित्तचाञ्चल्यं निवार्य दुष्प्रापमपि समाधिसुखं त्वमेव प्रापयितुं शक्नोषीति सूचयति। न केवलमत्यर्थं चञ्चलं किंतु प्रमाथि शरीरमिन्द्रियाणि च प्रमथितुं क्षोभयितुं शीलं यस्य तत् क्षोभकतया शरीरेन्द्रियसंघातस्य विवशताहेतुरित्यर्थः। किंच बलवत् अभिप्रेताद्विषयात्केनाप्युपायेन निवारयितुमशक्यम्। किंच दृढं विषयवासनासहस्रानुस्यूततया भेत्तुमशक्यम्। तन्तुनागवदच्छेद्यमितिभाष्ये तन्तुनागो नागपाशः, ताꣳतनीति गुर्जरादौ प्रसिद्धो महाह्रदनिवासी जन्तुविशेषो वा। तस्यातिदृढतया बलवतो बलवत्तया प्रमाथिनः प्रमाथितयाऽतिचञ्चलस्य महामत्तवनगजस्येव मनसो निग्रहं निरोधं निर्वृत्तिकतयाऽवस्थानं सुदुष्करं सर्वथा कर्तुमशक्यमहं मन्ये वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वं संपाद्य निरोधनमशक्यं तद्वदित्यर्थः। अयं भावः जातेऽपि तत्त्वज्ञाने प्रारब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखरागद्वेषादिलक्षणश्चित्तधर्मः क्लेशहेतुत्वाद्बाधितानुवृत्त्यापि बन्धो भवति चित्तवृत्तिनिरोधरूपेण तु योगेन तस्य निवारणं जीवन्मुक्तिरित्युच्यते। यस्याः संपादनेन स योगी परमो मत इत्युक्तम्। तत्रेदमुच्यते–बन्धः किं साक्षिणो निवार्यते किं वा चित्तात्। नाद्यस्तत्त्वज्ञानेनैव साक्षिणो बन्धस्य निवारितत्वात्। न द्वितीयः स्वभावविपर्ययायोगात् विरोधिसद्भावाच्च। नहि जलादार्द्रत्वमग्नेर्वौष्ण्यत्वं निवारयितुं शक्यते 'प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तेः' इतिन्यायेन प्रतिक्षणपरिणामस्वभावत्वाच्चित्तस्य प्रारब्धभोगेन च कर्मणा कृत्स्नाऽविद्यातत्कार्यनाशने प्रवृत्तस्य तत्त्वज्ञानस्यापि प्रतिबन्धं कृत्वा स्वफलदानाय देहेन्द्रियादिकमवस्थापितम्। न च कर्मणा स्वफलसुखदुःखादिभोगश्चित्तवृत्तिभिर्विना संपादयितुं शक्यते तस्माद्यद्यपि स्वाभाविकानामपि चित्तपरिणामानां कथंचिद्योगेनाभिभवः शक्येत कर्तुं तथापि तत्त्वज्ञानादिव योगादपि प्रारब्धफलस्य कर्मणः प्राबल्यादवश्यंभाविनि चित्तस्य चाञ्चल्ये योगेन तन्निवारणमशक्यमहं स्वाबोधादेव मन्ये। तस्मादनुपपन्नमेतदात्मौपम्येन सर्वत्र समदर्शी परमो योगी मत इत्यर्जुनस्याक्षेपः ॥ ३४ ॥

शं० टी०–यदुक्तं तदेव सविशेषं विस्पष्टयति–चञ्चलमिति। 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति सदानन्दस्वरूपत्वात्परमात्मा कृष्ण इत्युच्यते तस्य संबुद्धिर्हे कृष्ण मनश्चञ्चलं चपलं यद्यपि पक्ष्मणां चञ्चलत्वमस्ति तथापि तत्कृतोऽनर्थः काश्चिदपि नास्ति न तथेदं किंतु प्रमाथि च तत्तद्विषयवासनाभिस्तत्कार्यै रागद्वेषलोभादिदोषैश्च धीरमपि पुरुषं प्रमथ्नाति विक्षोभयतीति प्रमाथि प्रमथनशीलं पण्डितमपि परवशं करोतीत्यर्थः। यद्यपि विषादेः प्रमथनशीलत्वमस्ति तथापि मन्त्रादिना तन्निग्रहीतुं शक्यते न तथेदं किंतु बलवत्मारवन्महाजववत्स्वशक्त्यावेगवत्त्वाच्च मन्त्रादिसाधनैर्निरोद्धुं शक्यत इत्यर्थः। यथा महावेगवतां बाणानां साधनान्तरेण छेदः सिध्यति न तथैतस्य छेदः संभवति तत्कथमिति चेद्दृढं वज्रसारं सूक्ष्मं च छेदस्य विषयो न भवति यत एवंलक्षणं मन-

स्तत एतस्य मनसो वायोरिव निग्रहं सुदुष्करं मन्ये उपायकोटिभिः सुतरां निरोद्धुमशक्यं मन्य इत्यर्थः । 'अप्यब्धिपानान्महतः सुमेरून्मूलनादपि । अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः ' इत्यादिशास्त्रप्रसिद्धिद्योतनार्थो हिशब्दः ॥ ३४ ॥

श्री० टी०—एतत्स्फुटयति—**चञ्चलमिति** । चञ्चलं स्वभावेनैव चपलं, किंच प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकमित्यर्थः । किंच बलवद्विचारेणापि जेतुमशक्यम् । किंच दृढं विषयवासनानुबद्धतया दुर्भेद्यम् अतो यथाऽऽकाशे दोधूयमानस्य वायोः कुम्भादिषु निरोधनमशक्यं तथा तस्य मनसोऽपि निग्रहं निरोधं सुदुष्करं सर्वथा कर्तुमशक्यं मन्ये ॥ ३४ ॥

स० टी०—अत्यर्थचलशीलं हि प्रसिद्धं मन एव तत् ॥ हे कृष्ण भक्तदोषाणां सर्वथा विनिवारक ॥ १ ॥ इन्द्रियाणां शरीरस्य क्षोभकत्वात्प्रमाथि तत् ॥ नैव केनाप्युपायेन नियन्तुं शक्यते बलात् ॥२॥ दृढं भेत्तुमशक्यं चाप्यच्छेद्यं तन्तुनागवत् ॥ अनादिवासनाजालैः स्यूतत्वेन निरङ्कुशम् ॥ ३ ॥ महामत्तगजस्येव वनस्थस्यास्य निग्रहम ॥ निर्वृत्तिकतया सम्यगवस्थानं सुदुष्करम् ॥ ४ ॥ यथा दोधूयमानस्य वायोराकाशगामिनः ॥ निरोधो घटवेश्मादौ कर्तुं कैश्चिन्न शक्यते ॥ ५ ॥ अप्यब्धिपानान्महतो मेरोरुन्मूलनादपि ॥ अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः ॥ ६ ॥ इत्येवं मनसो दार्ढ्यं वासिष्ठे सम्यगीरितम् ॥ ७ ॥ ३४ ॥

भा० टी०—मनसश्चञ्चलत्वं प्रसिद्धमित्याह—**चञ्चलमिति** । चञ्चलं प्रसिद्धं मनः भक्तजनमायाकर्षणात्कृष्णः तस्य संबोधनं हे कृष्णेति । तथाच कृष्णेतिसंबोधयन् मम मनःस्थिरताप्रतिबन्धकीभूतपापाद्यपकर्षणं कुर्विति सूचयति । न केवलमत्यन्तचञ्चलमेवापि तु प्रमाथि च प्रमथ्नाति विक्षिपति परवशीकरोति देहेन्द्रियादीनीति प्रमाथि प्रमथनशीलम् । किंच बलवत्तरं केनचिन्नियन्तुमशक्यम् । किंच दृढं नागपाशवदच्छेद्यं तस्यैवंभूतस्य मनसो निग्रहं वायुनिग्रहमिव सुदुष्करमतिकष्टतरमहं मन्ये स्वबुद्ध्या जानामि । चञ्चलमिति विशेषणेन साम्यरूपस्य योगस्य स्थिरां स्थितिं कर्तुमयोग्यमित्युक्तम् । इन्द्रियनिग्रहेण तस्याचञ्चलत्वं संपादनीयमित्याशङ्क्य प्रमाथीत्युक्तम् । बलवदित्यनेन प्रमथनसामर्थ्यं मनसः प्रदर्शितम् । दृढमिति विषयलाम्पट्यात् विच्छेत्तुमशक्यमिति विवेकः ॥ ३४ ॥

प० टी०—अथ पुनः प्रश्नार्थमेव प्रकटयति—**चञ्चलमिति** । भो कृष्ण तस्य मनसो निग्रहं निरोधं सुदुष्करं सुतरां दुःखेन कर्तुमशक्यं मन्ये । कस्येव वायोरिव । यथाकाशे दोधूयमानस्य वायोः कुम्भादिषु निरोधः कर्तुं न शक्यते नहि वायोरेकत्रावस्थानं युज्यते तद्वत् । अथ तस्य दुर्निग्रहत्वं चतुर्भिः प्रकारैरुपन्यस्यति—**चञ्चलमिति** । चञ्चलमेकत्रानवस्थितं, प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकं, बलवद्विचारेणापि जेतुमशक्यम्, दृढमनादिविषयवासनानुविद्धतया वैराग्यादिना दुर्भेद्यम् ॥ ३४ ॥

रा० टी०—चञ्चलत्वादित्यत्र कस्येति शङ्कां निरस्यन्मनोनिग्रहेणास्तु योगस्य स्थिरतेति शङ्कां निराह—**चञ्चलमिति** । मनश्चञ्चलं हि प्रसिद्धम् । प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकरं किंच बलवत् विवेकेनापि जेतुमशक्यम् । दृढं विषयवासनानुविद्धतया दुर्भेदं साधुविषये नेतुमशक्यम् । अत आकाशे दोधूयमानस्य वायोः वस्त्रेण कुम्भादिना वा निरोधनमशक्यं यथा तथा तस्य मनसो निग्रहं निरोधनं दुष्करमहं मन्ये जानामि ॥ ३४ ॥

श्रीभगवानुवाच—असंशयं महाबाहो मनो दुर्निग्रहं चलम् ॥
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

त० टी०—अथार्जुनवचनोक्तार्थाङ्गीकारपूर्वकं मनोनिग्रहोपायं श्रीभगवानुवाच—**असंशयमिति**। तत्र तावत्सामान्यजनेन यत्कर्तुमशक्यं तत् प्रयत्नवता पुरुषविशेषेण कर्तुं शक्यमित्यभिप्रायेण संबोधयति—हे महाबाहो शत्रुनिग्रहणे महान्तौ बाहू यस्यैवंभूतस्त्वं मनोरूपशत्रुनिग्रहे समर्थो भविष्यसीति भावः। हे कौन्तेय चञ्चलत्वादिना वायुवन्मनो दुर्निग्रहं दुःखेनापि ग्रहीतुमशक्यमिति यद्ब्रवीषि तदसंशयं नास्त्यत्र संशयस्तथाऽपि कातरतां विहाय प्रयत्नेन निग्राह्यमित्याह—**अभ्यासेनेति**। तुशब्दः प्रयत्नशैथिल्यव्यावृत्तिपरः। अभ्यासेन मनोवृत्तेः शनैः शनैर्विषयवैमुख्यकरणपूर्वकमात्माभिमुखीकरणमभ्यासस्तेन। विषयवैमुख्यकरणेऽपि हेतुः—**वैराग्येण चेति**। आत्मव्यतिरिक्तेषु विषयेषु दोषबुद्ध्युत्पादनेन तदुपेक्षणं वैराग्यं, तेन च गृह्यते वशीक्रियते ॥ ३५ ॥

म० टी०—तमिममाक्षेपं परिहरन् श्रीभगवानुवाच—**असंशयमिति**। सम्यग्विदितं ते चित्तचेष्टितमतो निग्रहीतुं शक्ष्यसीति संतोषेण संबोधयति—हे महाबाहो महान्तौ साक्षान्महादेवेनापि सह कृतप्रहरणौ बाहू यस्येति निरतिशयमुत्कर्षं सूचयति। प्रारब्धकर्मप्राबल्यादसंयतात्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं प्रमाथि बलवद्दृढमिति विशेषणत्रयं पिण्डीकृत्यैतदुक्तं चलं स्वभावचञ्चलं मन इत्यसंशयं नास्त्येव संशयोऽत्र सत्यमेवैतद्ब्रवीषीत्यर्थः। एवं सत्यपि संयतात्मना समाधिमात्रोपायेन योगिनाऽभ्यासेन वैराग्येण च गृह्यते निगृह्यते सर्ववृत्तिशून्यं क्रियते तन्मन इत्यर्थः। अनिग्रहीतुरसंयतात्मनः सकाशात्संयतात्मनो निग्रहीतुर्विशेषद्योतनाय तुशब्दः। मनोनिग्रहेऽभ्यासवैराग्ययोः समुच्चयबोधनाय चशब्दः। हे कौन्तेयेतिपितृष्वसृपुत्रस्त्वमवश्यं मया सुखीकर्तव्य इति स्नेहसंबन्धसूचनेनाश्वासयति। अत्र प्रथमार्धेन चित्तस्य हठनिग्रहो न संभवतीति द्वितीयार्धेन तु क्रमनिग्रहः संभवतीत्युक्तम्। द्विविधो हि मनसो निग्रहः हठेन क्रमेण च। तत्र चक्षुःश्रोत्रादीनि ज्ञानेन्द्रियाणि वाक्पाण्यादीनि कर्मेन्द्रियाणि च तद्गोलकमात्रोपरोधेन हठान्निगृह्यन्ते तद्दृष्टान्तेन मनोऽपि हठेन निग्रहीष्यामीति मूढस्य भ्रान्तिर्भवति। न च तथा निग्रहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात्। अत एव च क्रमनिग्रह एव युक्तः। तदेतद्भगवान् वसिष्ठ आह 'उपविश्योपविश्यैव चित्तज्ञेन मुहुर्मुहुः। न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम् ॥ अङ्कुशेन विना मत्तो यथा दुष्टमतङ्गजः। अध्यात्मविद्याधिगमः साधुसङ्गम एव च ॥ वासनासंपरित्यागः प्राणस्पन्दनिरोधनम्। एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल ॥ सतीषु युक्तिष्वेतासु हठान्नियमयन्ति ये। चेतस्ते दीपमुत्सृज्य विनिघ्नन्ति तमोऽञ्जनैः' इति। क्रमनिग्रहे चाध्यात्मविद्याधिगम एक उपायः। सा हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनश्च परमार्थसत्यपरमानन्दस्वप्रकाशत्वं बोधयति। तथा च सत्येतन्मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयोजनाभावं प्रयोजनवति च परमार्थसत्यपरमानन्दरूपे दृग्वस्तुनि स्वप्रकाशत्वेन स्वागोचरत्वं बुद्ध्वा निरिन्धनाग्निवत्स्वयमेवोपशाम्यति यस्तु बोधितमपि तत्त्वं न सम्यग्बुध्यते यो वा विस्मरति तयोः साधुसङ्गम एवोपायः। साधवो हि पुनः पुनर्बोधयन्ति स्मारयन्ति च। यस्तु विद्यामदादिदुर्वासनया पीड्यमानो न साधूननुवर्तितुमुत्सहते तस्य पूर्वोक्तविवेकेन वासनापरित्याग एवोपायः। यस्तु वासनानामतिप्राबल्यात्ताः स्त्यक्तुं न शक्नोति तस्य प्राणस्पन्दनिरोध एवोपायः। प्राणस्पन्दवासनयोश्चित्तप्रेरकत्वात्तयोर्निरोधे चित्तशान्तिरुपपद्यते। तदेतदाह स एव 'द्वे बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने। एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः ॥ प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया। आसनाशनयोगेन प्राणस्पन्दो निरुध्यते ॥ असङ्गव्यवहारित्वाद्भवभावनवर्जनात्। शरीरनाशदर्शित्वाद्वासना न प्रवर्तते। वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम् ॥ प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु। एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव ॥ यद्भावनं वस्तुनोऽन्तर्वस्तुत्वेन रसेन च। यदा न भाव्यते किंचिद्धेयोपादेयरूपि यत् ॥ स्थीयते

सकलं त्यक्त्वा तदा चित्तं न जायते । अवासनत्वात्सततं यदा न मनुते मनः ॥ अमनस्ता तदोदेति परमात्मपदप्रदा ' इति । अत्र द्वावेवोपायौ पर्यवसितौ प्राणस्पन्दनिरोधार्थमभ्यासः वासनापरित्यागार्थं च वैराग्यमिति । साधुसङ्गमाध्यात्मविद्याधिगमौ त्वभ्यासवैराग्योपपादकतयान्यथासिद्धौ तयोरेवान्तर्भवतः । अत एव भगवताऽभ्यासेन वैराग्येण चेति द्वयमेवोक्तम् । अत एव भगवान् पतञ्जलिरसूत्रयत् ' अभ्यासवैराग्याभ्यां तन्निरोधः ' इति । तासां प्रागुक्तानां प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपेण पञ्चविधानामनन्तानामासुरत्वेन क्लिष्टानां दैवत्वेनाक्लिष्टानामपि वृत्तीनां सर्वासामपि निरोधो निरिन्धनाग्निवदुपशमाख्यः परिणामोऽभ्यासेन वैराग्येण च समुच्चितेन भवति । तदुक्तं योगभाष्ये—चित्तनदीनामोभयतो वाहिनी वहति कल्याणाय वहति पापाय च । तत्र या कैवल्यप्राग्भारा विवेकनिम्ना सा कल्याणवहा या त्वविवेकनिम्ना संसारप्राग्भारा सा पापवहा । तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोध इति। प्राग्भारनिम्नपदे 'तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्' इत्यत्र व्याख्याते। यथा तीव्रवेगोपेतं नदीप्रवाहं सेतुवन्धनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहान्तरमुत्पाद्यते तथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य समाध्यभ्यासेन प्रशान्तवाहिता संपाद्यत इति द्वारभेदात्समुच्चय एव । एकद्वारत्वे हि व्रीहियववद्विकल्पः स्यादिति मन्त्रजपदेवताध्यानादीनां क्रियारूपाणामावृत्तिलक्षणोऽभ्यासः संभवति । सर्वव्यापारोपरमस्य तु समाधेः को नामाभ्यास इति शङ्कां निवारयितुमभ्यासं सूत्रयति स्म ' तत्र स्थितौ यत्नोऽभ्यासः ' इति । तत्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिकस्य प्रशान्तवाहितारूपा निश्चलता स्थितिस्तदर्थं यत्नो मानस उत्साहः स्वभावचाञ्चल्याद्बहिःप्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविधः स आवर्त्यमानोऽभ्यास उच्यते । 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' अनिर्वेदेन दीर्घकालासेवितो विच्छेदाभावेन निरन्तरासेवितः सत्कारेण श्रद्धातिशयेन वासेवितः सोऽभ्यासो दृढभूमिर्विषयसुखवासनया चालयितुमशक्यो भवति । अदीर्घकालत्वे दीर्घकालत्वेऽपि विच्छिद्य विच्छिद्य सेवने श्रद्धातिशयाभावे च लयविक्षेपकषायसुखास्वादानामपरिहारे व्युत्थानसंस्कारप्राबल्याददृढभूमिरभ्यासः फलाय न स्यादिति त्रयमुपात्तम् । वैराग्यं तु द्विविधमपरं परं च । यतमानसंज्ञाव्यतिरेकसंज्ञैकेन्द्रियसंज्ञावशीकारसंज्ञाभेदैरपरं चतुर्धा । तत्र पूर्वभूमिजयेनोत्तरभूमिसंपादनविवक्षया चतुर्थमेवासूत्रयत् ' दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ' इति। स्त्रियोऽन्नपानमैश्वर्यमित्यादयो दृष्टा विषयाः, स्वर्गो विदेहता प्रकृतिलय इत्यादयो वैदिकत्वेनानुश्रविका विषयास्तेषूभयविधेष्वपि सत्यामेव तृष्णाया विवेकतारतम्येन यतमानादित्रयं भवति । अत्र जगति किं सारं किमसारमिति गुरुशास्त्राभ्यां ज्ञास्यामीत्युद्योगो यतमानम् । स्वचित्ते पूर्वविद्यमानदोषाणां मध्येऽभ्यस्यमानविवेकेनैते पक्वाः एतेऽवशिष्टा इति चिकित्सकवद्विवेचनं व्यतिरेकः । दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मत्वबोधेन बहिरिन्द्रियप्रवृत्तिमजनयन्त्या अपि तृष्णायाः औत्सुक्यमात्रेण मनस्यवस्थानमेकेन्द्रियम् । मनस्यपि तृष्णाशून्यत्वेन सर्वथा वैतृष्ण्यं तृष्णाविरोधिनी चित्तवृत्तिर्ज्ञानप्रसादरूपा वशीकारसंज्ञा वैराग्यं संप्रज्ञातस्य समाधेरन्तरङ्गं साधनमसंप्रज्ञातस्य तु बहिरङ्गम् । तस्य त्वन्तरङ्गसाधनं परमेव वैराग्यम् । तच्चासूत्रयत् ' तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ' इति । संप्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कार उत्पद्यते । ततश्चाशेषगुणत्रयव्यवहारेषु वैतृष्ण्यं यद्भवति तत्परं श्रेष्ठं फलभूतं वैराग्यं तत्परिपाकनिमित्ताच्च चित्तोपशमपरिपाकादविलम्बेन कैवल्यमिति ॥ ३५ ॥

शं० टी०—मनसो दुर्निग्रहत्वं यत्तल्लोकशास्त्रप्रसिद्धमेवेत्यङ्गीकृत्य तदेवानुवदन् मुमुक्षोस्तन्निग्रहसाधनं च प्रतिपादयति श्रीभगवान्—**असंशयमिति**द्वाभ्याम् । यद्यपि चञ्चलत्वात्प्रमाथित्वाद्बलवत्त्वाद्दृढत्वाच्च

मनसो दुर्निग्रहत्वे त्वसंशयं संशयो नास्ति तथापि तन्निग्रहोपायस्त्वेवमेवोच्यते तं शृणु । वैराग्येण श्रुतिस्मृतियुक्तिभिरुक्तरीत्या सर्वस्यापि च विश्वस्य मिथ्यात्वमेव सम्यक्पश्यतो विदुषः विषयेष्वसत्त्वतुच्छत्वबन्धकत्वबुद्धिः सम्यगुदेति । तया च तीव्रमोक्षेच्छया च समुत्पन्नं यद्विषयवैरस्यं तदेव वैराग्यं, तेन वैराग्येण गृह्यते मनो निगृह्यते पदार्थमिथ्यात्वज्ञानेन रागद्वेषादिदोषास्तद्वेगहेतवो विनिवर्तन्ते, तन्निवृत्त्या मनो वशवर्ति निश्चलं च भवतीत्यर्थः । ननु रागद्वेषादिदोषशून्येषु बालादिषु मनश्चाञ्चल्यमेव दृश्यते कथं रागद्वेषादिराहित्येन वैराग्यमात्रेण च मनसो निश्चलत्वं सिध्यतीत्याशङ्कायां न तेषां पदार्थमिथ्यात्वज्ञानं, रागाद्यभावश्च, न संभवति मनोनैश्चल्यं च तथाप्यङ्ग्यभावे सत्यङ्गमात्रेण कार्यं न सिध्यत्यतोऽङ्गिना भवितव्यमित्याशयेनाह—अभ्यासेनेति । विजातीयप्रत्ययतिरस्कारपूर्विका सजातीयप्रत्ययावृत्तिरभ्यासस्तेन तीव्रमोक्षेच्छार्तीव्रवैराग्यैकसाधनेन चिरकालं नित्यानिरन्तरभाविना ब्रह्मप्रत्ययाभ्यासेन विजातीयप्रत्ययानां निःशेषविनाशे सति तत्तद्वासनानां निःशेषसंक्षयात् 'निमित्तापाये नैमित्तिकस्याप्यपायः' इतिन्यायेन चलननिमित्तानां बाह्यवासनानामपाये मनः स्वयमेव निश्चलं भवत्यतस्तीव्रमोक्षेच्छावैराग्यसंवलितसत्प्रत्ययाभ्यास एव मनोनिग्रहे तन्नैश्चल्ये च परमकारणं तेनैव सम्यगनुष्ठितेन मनो निश्चलं भवतीत्यर्थः ॥ ३५ ॥

श्री० टी०—तदुक्तं चञ्चलत्वादिकमङ्गीकृत्यैव मनोनिग्रहोपायं श्रीभगवानुवाच—असंशयमिति । चञ्चलत्वादिना मनो निरोद्धुमशक्यमिति यद्वदसि एतन्निःसंशयमेव तथापि तु विषयाचिन्तनपूर्वकमभ्यासेन परमात्माकारप्रत्ययावृत्त्या विषयवैतृष्ण्येन च गृह्यते निगृह्यते । अभ्यासेन लयप्रतिबन्धाद्वैराग्येण च विक्षेपप्रतिबन्धादुपरतवृत्तिकं सत्परमात्माकारेण परिणतं तिष्ठतीत्यर्थः । तदुक्तं योगशास्त्रे—'मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः । याऽसंप्रज्ञातनामासौ समाधिरभिधीयते' इति ॥ ३५ ॥

स० टी०—इत्येवमर्जुनप्रश्नं श्रुत्वोवाच जगद्गुरुः ॥ सत्यमेवं यथा ब्रूषे चञ्चलं मन आधिदम् ॥ १ ॥ महाबाहुतया त्वं तु निग्रहीतुं च शक्ष्यसि ॥ प्रारब्धकर्मप्राबल्यान्नरेणासंयतात्मना ॥ २ ॥ दुःखेनापि मनोऽशक्यं निग्रहीतुं चलं दृढम् ॥ एवं सत्यपि धीरेण समाधौ तत्परेण तत् ॥ ३ ॥ अभ्यासेन विशुद्धेन वैराग्येण निगृह्यते ॥ अभ्यासो नाम कस्यांचिच्चित्तभूमौ निरन्तरम् ॥ ४ ॥ समानप्रत्ययावृत्तिश्चित्तस्याधिवियोगिनः ॥ दृष्टादृष्टेषु भोगेषु दोषग्रस्तत्वदर्शनात् ॥ ५ ॥ विषयेषु यद्वैतृष्ण्यं वैराग्यं तदुदीरितम् ॥ ताभ्यां निगृह्यते तस्यात्यन्तविक्षेपशीलता ॥ ६ ॥ ३५ ॥

भा० टी०—प्रश्नमभिनन्दन् श्रीभगवानुवाच—असंशयमिति । असंशयं मनश्चलं दुर्निग्रहं चेत्यस्मिन्नर्थे संशयो नास्ति । यद्यपि दुर्निग्रहं तथापि तु अभ्यासेन चित्तभूमौ कस्यांचिद्विजातीयप्रत्ययानन्तरितसमानप्रत्ययावृत्तिलक्षणेन वैराग्यं नाम दृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन च गृह्यते विक्षिप्तत्वादिकं त्यक्त्वा निरुध्यत इत्यर्थः । पूर्वार्धे महाबाहो इति संबोधयन्महाबाहुनाऽतिबलेन जितनिवातकवचादिना त्वयापि यद्येवमुच्यते तर्हि मनसो दुर्निग्रहत्वे संशयो नास्तीति सूचयति । बाह्वादिबलसाध्यो मनसो निग्रहो न भवति किंत्वभ्यासवैराग्यसाध्यः यथातिप्रबलै राजभिः स्वगृहे वासयितुं दुर्घटो दुर्वासा अपि तव मात्राऽबलया कुन्त्या विषयेषु वैराग्येण तत्सेवनपरत्वं परित्यज्य तच्छुश्रूषाभ्यासेन च स्वगृहे निवासितः प्रसादितश्च तथा त्वं तत्पुत्रो मदुक्तेनोपायेन दुर्निग्रहमपि मनो निग्रहीतुं योग्योऽसीति सूचयन्नाह-हे कौन्तेयेति ३५

प० टी०—अथ द्विप्रकारं निग्रहोपायमुपदिशन् भगवानाह—असंशयमिति । चञ्चलत्वादिस्वभावं मनो निरोद्धुमशक्यमिति यद्वदसि तदसंशयं निःसंदिग्धमेव । तथापि अभ्यासेन वैराग्येण च गृह्यते वशीक्रियते । तत्राभ्यासो नाम निरन्तरमात्मानुध्यानं वैराग्यं च विषयवैरस्यम् । नन्वेतत्परस्पराश्रयमिति प्रतिभाति यतो मनसि निगृहीतेऽभ्यासो वैराग्यं वा सिध्यति तथाभ्यासवैराग्याभ्यां मनो निगृह्यत इति चेत्स-

त्यम्। एतस्योभयस्य विचाराधीनत्वात् तत्प्रश्नोत्तरं भगवता प्रागेव दत्तं शनैः शनैरुपरमेदिति, तदेव अभ्यासेन च कौन्तेय वैराग्येण च गृह्यते इत्यनेन स्मारितम्। तथाहि। तत्र परमार्थप्राप्तौ तावदात्मविचार एव शरणमिति "द्रष्टव्यः श्रोतव्यो मन्तव्यः" इति। तद्यथा "वेदाहमेतम्" इत्यादिश्रुतयो वदन्ति। तत्रात्मा देहेन्द्रियादिविलक्षणस्तद्द्रष्टृत्वान्नहि घटद्रष्टा घट एव संभवति। अथ स कीदृगस्तीति विचारे तावद्रूपरसादिग्राहकत्वे प्रतिक्षणमन्वेषणीयः स एव प्रस्तुतमभ्यासः। तथोत्पत्तेरनन्तरमेतावत्समयं मया सुखदुःखयोर्मध्ये किमधिकमनुभूतमिति परामर्शे बाल्यपौगण्डकैशोरयौवनवार्धकाद्यवस्थासु बहुतरं दुःखमेव स्मर्यते। तथा विषयलाभार्यं प्रयत्नो भूयान् प्राणपर्यवसायी वाऽतः स दुःखरूपो भोगसमयस्तु निमेषमात्रं तावदेव सुखं तदपि मत्स्यामिषन्यायेन परिणतिविरसत्वाद्दुःखपर्यवसाय्येवेति विचारेण वैराग्यप्रकारः। किंच चञ्चले विषयलोलुपेऽपि मनस्यभ्यासो विरागश्च संभवति। तदुक्तं योगशास्त्रे—'यत्रैव याति चपलं ननु चित्तमेतत्तत्रैव भाति परमेश्वर एव साक्षात्। प्राग्दुःखदोऽथ विरमे विरसः पदार्थस्त्वात्मा चिरं सुखद इत्यनिशं विचिन्त्य' इति। अत एव कौन्तेय महाबाहो इति संबुद्ध्या विवेकत्यागयोर्ग्रहणम्। वयं त्वात्मभावस्थाः साहाय्यं करिष्याम एवेत्यर्थः॥ ३५॥

रा० टी०—अर्जुनोक्तं मनश्चाञ्चल्यादिकमङ्गीकृत्य मनोनिग्रहोपायं भगवानाह—**असंशयमिति**। हे महाबाहो स्वभावतश्चञ्चलं मनोऽसंशयं यथा भवति तथा दुर्निग्रहं दुःखेन निरोध्यं तथाप्यभ्यासवैराग्याभ्यां तु निगृह्यते॥ ३५॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः॥
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥ ३६॥

त० टी०—अन्यथाऽन्यस्य न योगप्राप्तिरित्याह—असंयतात्मनेति। असंयतो विषयेभ्यो न निगृहीत आत्मा मनो येन सः, असंयतात्मा तेन पुरुषेण योगः पूर्वोक्तयोगः समत्वदर्शनलक्षणो दुष्प्रापः प्राप्तुमशक्य इति मे मतिर्मम संमतिः। वश्यात्मना तु अभ्यासवैराग्याभ्यां वश्यत्वं प्रापित आत्मा मनो येन स वश्यात्मा तेन यतता प्रयत्नं कुर्वता उपायत उक्तोपायेन योगोऽवाप्तुं शक्यः॥ ३६॥

म० टी०—यत्तु त्वमवोचः प्रारब्धभोगेन कर्मणा तत्त्वज्ञानादपि प्रबलेन स्वफलदानाय मनसो वृत्तिषूत्पाद्यमानासु कथं तासां निरोधः कर्तुं शक्य इति तत्रोच्यते—**असंयतात्मनेति**। उत्पन्नेऽपि तत्त्वसाक्षात्कारे वेदान्तव्याख्यानादिव्यासङ्गादालस्यादिदोषाद्वाऽभ्यासवैराग्याभ्यां न संयतो निरुद्ध आत्मान्तःकरणं येन तेनासंयतात्मना तत्त्वसाक्षात्कारवतापि योगो मनोवृत्तिनिरोधः दुष्प्रापः दुःखेनापि प्राप्तुं न शक्यते प्रारब्धकर्मकृताच्चित्तचाञ्चल्यादिति चेत्त्वं वदसि तत्र मे मतिः मम संमतिस्तत्तथैवेत्यर्थः। केन तर्हि प्राप्यते उच्यते वश्यात्मना तु वैराग्यपरिपाकेन वासनाक्षये सति वश्यः स्वाधीनो विषयपारतन्त्र्यशून्य आत्मान्तःकरणं यस्य तेन। तुशब्दोऽसंयतात्मनो वैलक्षण्यद्योतनार्थोऽवधारणार्थो वा। एतादृशेनापि यतता यतमानेन वैराग्येण विषयस्रोतःखिलीकरणेऽप्यात्मस्रोतउद्घाटनार्थमभ्यासं प्रागुक्तं कुर्वता योगः सर्वचित्तवृत्तिनिरोधः शक्योऽवाप्तुं चित्तचाञ्चल्यनिमित्तानि प्रारब्धकर्माण्यप्यभिभूय प्राप्तुं शक्यः। कथमतिबलवतामारब्धभोगानां कर्मणामभिभवः। उच्यते—उपायतः उपायात् उपायः पुरुषकारस्तस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्। अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य च वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसदसत्त्वविकल्पग्रासात्। प्रारब्धकर्मसत्त्वे तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन, तदसत्त्वे तु सर्वथा फलाऽसंभवात्किं तेनेति। अथ कर्मणः स्वय-

मदृष्टरूपस्य दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेद्, योगाभ्यासेऽपि समं समाधानं तत्साध्यायाः जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलान्तर्भावात्। अथवा यथा प्रारब्धफलं कर्म तत्त्वज्ञानात्प्रबलमिति कल्प्यते दृष्टत्वात् तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोऽस्तु शास्त्रीयस्य प्रयत्नस्य सर्वत्र ततः प्राबल्यदर्शनात्। तथाचाह भगवान् वसिष्ठः 'सर्वमेवेह हि सदा संसारे रघुनन्दन। सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते। उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम्। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्' उच्छास्त्रं शास्त्रप्रतिषिद्धमनर्थाय नरकाय शास्त्रितं शास्त्रविहितं अन्तःकरणशुद्धिद्वारा परमार्थाय चतुर्ष्वर्थेषु परमाय मोक्षाय 'शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित्। पौरुषेण प्रयत्नेन योजनीया शुभे पथि॥ अशुभेषु समाविष्टं शुभेष्वेवावतारय। स्वमनः पुरुषार्थेन बलेन बलिनां वर॥ द्रागभ्यासवशाद्याति यदा ते वासनोदयम्। तदाऽभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन' वासना शुभेति शेषः 'संदिग्धायामपि भृशं शुभामेव समाहर। शुभायां वासनावृद्धौ तात दोषो न कश्चन॥ अव्युत्पन्नमना यावद्भवानज्ञाततत्पदः। गुरुशास्त्रप्रमाणैस्त्वं निर्णीतं तावदाचर॥ ततः पक्वकषायेण नूनं विज्ञातवस्तुना। शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निरोधिना' इति। तस्मात्साक्षिगतस्य संसारस्याविवेकनिबन्धनस्य विवेकसाक्षात्कारादपनयेऽपि प्रारब्धकर्मपर्यवस्थापितस्य चित्तस्य स्वाभाविकीनामपि वृत्तीनां योगाभ्यासप्रयत्नेनापनये सति जीवन्मुक्तः परमो योगी। चित्तवृत्तिनिरोधाभावे तु तत्त्वज्ञानवानप्यपरमो योगीति सिद्धमवशिष्टं जीवन्मुक्तिविवेके सविस्तरमनुसंधेयम्॥ ३६॥

शं० टी०—किंच—असंयतात्मनेति। तीव्रमोक्षेच्छावैराग्याभावयुक्तेनासंयतात्मना असंयतः ज्ञातेऽप्यात्मनि तत्तद्वासनया बहिरेव प्रवृत्तिस्ततश्चिरकालं नित्यं निरन्तरमत्यन्तास्थया ब्रह्मण्यस्थापित आत्मा मनो यस्य तेनासंयतात्मना समाधिमकुर्वता यतिना योगो ज्ञानयोगः सदा सर्वत्र ब्रह्ममात्रदर्शनलक्षणोऽप्रतिबद्धः शुक्तिकासंदर्शनेन शुक्तिप्रत्ययवदधिष्ठानब्रह्मदर्शनसमुत्पन्नः सन्ततो यो ब्रह्मप्रत्ययः स दुष्प्रापः नित्यनिरन्तराभ्यासश्रमदुःखेन विना प्राप्तुमशक्यो दुष्प्राप इति मे ममेश्वरस्य मतिर्निश्चयः कृतास्वपि श्रवणकोटिषु यतेः समाधिना विना सम्यक् दर्शनं न सिध्यतीत्यर्थः। मुमुक्षोर्यतेः समाधिनैव सम्यग् ज्ञानं मोक्षश्च सिध्यत्यतः समाधिरेव कर्तव्य इति सूचयितुमाह—**वश्यात्मनेति।** पूर्वस्मादस्य वैलक्षण्यद्योतनार्थस्तुशब्दः। वश्यात्मना वश्यः स्वायत्तस्तीव्रमोक्षेच्छातीव्रवैराग्याभ्यां सुतरां विषयेष्वप्रवर्तित आत्मा मन इन्द्रियग्रामश्च येन तेन वश्यात्मना यततात्यन्तश्रद्धया यथाकालं यथालक्षणं योगसिद्ध्यै यत्नं कुर्वतैव यतिना योग उक्तलक्षणोऽनेनैवोपायेन अवाप्तुं प्राप्तुं शक्यो भवति नान्येनेत्यर्थः॥ ३६॥

श्री० टी०—एतावांस्त्विह निश्चय इत्याह—असंयतात्मनेति। असंयतात्मा उक्तप्रकारेणाभ्यासवैराग्याभ्यामसंयत आत्मा चित्तं यस्य तेन पुरुषेणायं योगो दुष्प्रापः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा चित्तं यस्य तेन पुरुषेण पुनश्चानेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः॥ ३६॥

स० टी०—ताभ्यामसंयतं यस्य मनो विक्षेपशालिनः॥ चित्तवृत्तिनिरोधाख्यो योगस्तस्यातिदुर्लभः॥ १॥ प्रारब्धकर्मप्राबल्याच्चाञ्चल्यादिमतोऽस्य यत्॥ दुर्निग्रहत्वं चित्तस्य तत्र मे संमतिर्हरेः॥ २॥ वैराग्यपरिपाकेन वासनानां क्षये सति॥ वश्यः स्वाधीन आत्मान्तःकरणं यस्य तेन तु॥ ३॥ ईदृशेनापि पूर्वोक्तमभ्यासं कुर्वतादरात्॥ चित्तचाञ्चल्यकारीणि कर्माण्येवाभिभूय च॥ ४॥ प्राप्तुं शक्यः स योगो हि चित्तवृत्तिनिरोधकः॥ स शक्योऽभिभवः कर्तुं कथं प्रारब्धकर्मणाम्॥ ५॥ मैवं भोः सोऽप्युपायेन कर्तुं शक्यो विवेकिना॥ शास्त्रीयस्य प्रयत्नस्य प्राबल्यादपि कर्मणाम्॥ ६॥ कर्तुं चाभिभवः शक्यो वासिष्ठेऽपि तथेरितम्॥ सर्वमेवेह हि सदा संसारे रघुनन्दन॥ ७॥ सम्यक्प्रयुक्ता-

त्सर्वेण पौरुषात्समवाप्यते ॥ उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम् ॥ ८ ॥ तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ॥ शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ॥ ९ ॥ पौरुषेण प्रयत्नेन योजनीया शुभे पथि ॥ अशुभेषु समाविष्टं शुभेष्वेवावतारय ॥ १० ॥ स्वमनः पुरुषार्थेन बलेन बलिनां वर ॥ द्रागभ्यासवशाद्याति यदा ते वासनोदयम् ॥ ११ ॥ तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ॥ अव्युच्छिन्नमना यावद्भवानज्ञाततत्पदः ॥ १२ ॥ गुरुशास्त्रप्रमाणैस्त्वं निर्णीतं तावदाचर ॥ ततः पक्वकषायेण नूनं विज्ञातवस्तुना ॥ १३ ॥ शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निरोधिना ॥ तस्मात्पौरुषमाश्रित्य शक्यः प्रारब्धकर्मणाम् ॥ १४ ॥ कर्तुं चाभिभवोऽपीति सिद्धमित्याशयो हरेः ॥ १५ ॥ योगाभ्यासपरैर्मनोऽनवरतं संस्थाप्यते यत्र खे ब्रह्मात्मेन्द्र इतीश्वरोऽद्वय इति श्रुत्यात्र यो गीयते ॥ वैराग्यादिगुणाः सतां च सुलभा यद्भक्तिलेशान्नृणां सोऽस्माकं हृदि सर्वदार्जुनसखो भूयान्मुकुन्दो हरिः ॥ १६ ॥ ३६ ॥

भा० टी०—असंयतेति । असंयतमभ्यासवैराग्याभ्यामनायत्तं चित्तं यस्य तेन आत्मौपम्येनेत्यनेनोक्तो योगो दुष्प्रापः प्राप्तुमशक्यः वशीकृतचित्तेन तूपायतः अभ्यासवैराग्यरूपोपायात् भूयोऽपि यतता प्रयत्नं कुर्वता योगोऽवाप्तुं प्राप्तुं शक्यः ॥ ३६ ॥

प० टी०—अथोभयप्रकारविधुरस्य योगो दुःसाध्यस्तथा तदुभयोपेतस्य सुसाध्य इत्याह—असंयतात्मनेति । अभ्यासवैराग्याभ्यामसंयत आत्मा चित्तं यस्य तेन योगो दुष्प्रापः प्राप्तुमशक्यस्तथोभाभ्यां वश्यो वशवर्ती आत्मा यस्य तेन यतता प्रयत्नं कुर्वता पुरुषेणोपायतोऽभ्यासवैराग्यरूपादवाप्तुं प्राप्तुं शक्य इति मे मतिर्ममाभिमतम् ॥ ३६ ॥

रा० टी०—ननु यथा मत्तमातङ्गः स्वयमेव श्रान्तः सन् शान्तो भवति तथा विषयैस्तृप्तं मनः कदाचित्स्वयमेव नियतं भवति किमभ्यासादिनेत्यत आह—असंयतेति । अभ्यासादितोऽवशीकृतचित्तेन योगो दुष्प्रापोऽसाध्यः इति मे मतिः । अभ्यासादिना वश्यात्मना वशीकृतमनस्केन तु पुंसा यतता पुनरनेनोपायेन यत्नं कुर्वता योगोऽवाप्तुं शक्य इत्यर्थः ॥ ३६ ॥

अर्जुन उवाच—अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

त० टी०—एवं युञ्जन्नेवमित्यादिनाऽत्यन्तसुखानुभवरूपं सदा परमात्मदर्शनं च योगफलमभ्यासवैराग्याद्युपायेनैव तत्प्राप्तिं च भगवतः संश्रुत्य तच्चैवमेवेति निश्चित्य यस्तूक्तयोगे तदुपाये च श्रद्धया प्रवृत्तोऽपि शिथिलप्रयत्नश्चेत्तस्याभ्यासाभावेन योगो न सिद्ध्येत्ततः परा गतिः कुतः स्यादिति संदिहानोऽर्जुन उवाच—अयतिरिति । यो मुमुक्षुः श्रद्धयोपेतः श्रद्धापूर्वकं योगे प्रवृत्तोऽपि अयतिरल्पयत्नः शिथिलप्रयत्न इत्यर्थः । तथा योगाच्चलितमानसः अन्तकाले योगादात्मैकाग्र्याच्चलितं मानसं मनो यस्य विषयाभिमुखमना इत्यर्थः । स योगसंसिद्धिं योगस्य संसिद्धिं योगफलं सम्यगात्मदर्शनमप्राप्य हे कृष्ण ! कां गतिं गच्छति ॥ ३७ ॥

म० टी०—एवं प्राक्तनेन ग्रन्थेनोत्पन्नतत्त्वज्ञानोऽनुत्पन्नजीवन्मुक्तिरपरमो योगी मतः, उत्पन्नतत्त्वज्ञान उत्पन्नजीवन्मुक्तिस्तु परमो योगी मत इत्युक्तम् । तयोरुभयोरपि ज्ञानादज्ञाननाशेऽपि यावत्प्रारब्धभोगं कर्म देहेन्द्रियसंघातावस्थानात्प्रारब्धभोगकर्मापाये च वर्तमानदेहेन्द्रियसंघातापायात्पुनरुत्पादकाभावाद्विदेहकैवल्यं प्रति कापि नास्त्याशङ्का । यस्तु प्राकृतकर्मभिर्लब्धविविदिषापर्यन्तचित्तशुद्धिः कृतकार्यत्वात्सर्वाणि

कर्माणि परित्यज्य प्राप्तपरमहंसपरिव्राजकभावः परमहंसपरिव्राजकमात्मसाक्षात्कारेण जीवन्मुक्तं परप्रबोधनदक्षं गुरुमुपसृत्य ततो वेदान्तमहावाक्योपदेशं प्राप्य तत्रासंभावनाविपरीतभावनाख्यप्रतिबन्धनिरासाय 'अथातो ब्रह्मजिज्ञासा' इत्यादि 'अनावृत्तिः शब्दात्' इत्यन्तया चतुर्लक्षणमीमांसया श्रवणमनननिदिध्यासनानि गुरुप्रसादात्कर्तुमारभते स श्रद्धधानोऽपि सन्नायुषोऽल्पत्वेनाल्पप्रयत्नत्वादलब्धज्ञानपरिपाकः श्रवणमनननिदिध्यासनेषु क्रियमाणेष्वेव मध्ये व्यापद्यते स ज्ञानपरिपाकशून्यत्वेनानष्टाज्ञानो न मुच्यते नाप्युपासनासहितकर्मफलं देवलोकमनुभवत्यर्चिरादिमार्गेण नापि केवलकर्मफलं पितृलोकमनुभवति धूमादिमार्गेण कर्मणामुपासनानां च त्यक्तत्वात् । अत एतादृशो योगभ्रष्टः कीटादिभावेन कष्टां गतिमियादज्ञत्वे सति देवयानपितृयानमार्गासंबन्धित्वात् वर्णाश्रमाचारभ्रष्टवदथवा कष्टां गतिं नेयात् शास्त्रनिन्दितकर्मशून्यत्वाद्वामदेववदिति संशयपर्याकुलमनाः अर्जुन उवाच—**अयतिरित्यादि** । यतिर्यत्नशीलः अल्पार्थे नञ् अलवणा यवागूरित्यादिवदयतिरल्पयत्नः श्रद्धया गुरुवेदान्तवाक्येषु विश्वासबुद्धिरूपयोपेतो युक्तः श्रद्धा च स्वसहचरितानां शमादीनामुपलक्षणम् "शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्यति" इति श्रुतेः । तेन नित्यानित्यवस्तुविवेक इहामुत्रभोगविरागः शमदमोपरतितितिक्षाश्रद्धादिसंपन्मुमुक्षुता चेति साधनचतुष्टयसंपन्नः गुरुमुपसृत्य वेदान्तवाक्यश्रवणादि कुर्वन्नपि परमायुषोऽल्पत्वेन मरणकाले चेन्द्रियाणां व्याकुलत्वेन साधनानुष्ठानासंभवात् योगाच्चलितमानसः योगाच्छ्रवणादिपरिपाकलब्धजन्मनस्तत्त्वसाक्षात्काराच्चलितं तत्फलमप्राप्तं मानसं यस्य सः योगानिष्पत्त्यैवाप्राप्य योगसंसिद्धिं तत्त्वज्ञाननिमित्तामज्ञानतत्कार्यनिवृत्तिमपुनरावृत्तिसहितामप्राप्यातत्त्वज्ञ एव मृतः सन् कां गतिं हे कृष्ण गच्छति सुगतिं दुर्गतिं वा कर्मणां परित्यागाज्ज्ञानस्य चानुत्पत्तेः शास्त्रोक्तमोक्षसाधनानुष्ठायित्वाच्छास्त्रगर्हितकर्मशून्यत्वाच्च ॥३७॥

शं० टी०—एवं योगप्राप्त्युपायं ज्ञात्वा पुनरिदानीमिहामुत्र च सुखकारणानि श्रौतादीनि कर्माणि सर्वाणि च संन्यस्य योगनिष्ठायां प्रवृत्तस्य यतेर्योगसिद्ध्यसंभवकाले एव मृतस्य स्वर्गापवर्गसाधनविधुरस्य का वा गतिर्भविष्यतीत्याशङ्कया तां गतिं ज्ञातुकामोऽर्जुन उवाच—**अयतिरिति** । योगानुष्ठानेनैव सम्यग्ज्ञानं तेनैव मोक्ष इति निश्चयपूर्वकयास्तिक्यबुद्ध्योपेतः संपन्नोऽप्ययतिः यतते योगसिद्ध्यै यत्नं करोतीति यतिः समाध्यनुष्ठानप्रयत्नवान् स न भवतीत्ययतिः 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इतिन्यायेन प्रतिबन्धककर्मवशात्संप्राप्तविचित्रविघ्नविशेषैः समाधिप्रमत्तस्तत एव योगाच्चलितमानसः ब्रह्मैवाहमिति ब्रह्मण्येवात्मना धीनैश्चल्यं योगस्तस्माद्योगादन्तकालेऽन्यथा वा चलितं बाह्यवासनया दुष्कर्मणा च विपरीतभावापन्नं मानसं यस्य स चलितमानसो विनष्टस्मृतिरेवंलक्षणो योगी यतिर्योगसंसिद्धिं विदेहमुक्त्या पुरुषं योजयतीति योगः सम्यग्ज्ञानं तस्य संसिद्धिर्निरन्तरसमाध्यनुष्ठित्याऽप्रतिबद्धता सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धं सम्यग्दर्शनं योगसंसिद्धिस्तां समाधिफलमप्राप्य स्वयं मृत्वा कां गतिं गच्छति । अत्र कामित्यविज्ञातपदार्थज्ञानार्थकः किंशब्दो नत्वाक्षेपाद्यर्थकः, गम्यत इति गतिस्तेन प्राप्तव्योऽर्थः क इत्यर्थः । स्वर्गसंपादककर्मानुष्ठानाभावात्स्वर्गप्राप्त्यभावः विष्णवादिदेवतोपास्त्यभावात्तल्लोकप्राप्त्यभावः, समाधिसंभावितसम्यग्दर्शनाभावान्मुक्तिप्राप्त्यभावः, पापाचरणाभावाद्दुर्योनिदुर्गतिप्राप्त्यभावश्च ततोऽप्राप्तयोगसंसिद्धेर्यतेः का वा गतिर्भविष्यति तां वदेत्यभिप्रायः । नन्वत्र कां गतिं कृष्ण गच्छतीत्यर्जुनस्य प्रश्नोऽनुपपन्न एव भवति योगसंसिद्धेरप्राप्तत्वेऽपि यतेरेतस्य प्राक्तनपुण्यकर्मसंभवात्तदनुरूपस्वर्गादिलोकप्राप्त्युपपत्तेरिति चेन्न, तेषां चित्तशुद्धावेवोपक्षीणत्वात् 'जन्मान्तरसहस्रेषु यज्ञदानतपोध्वरैः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् । साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ नित्यनैमित्तिकैरेव नियमेनेश्वरार्पितैः बहुजन्मकृतैर्विप्रः सत्त्वशुद्धिं समश्नुते ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति

मानवः' इति च प्राक्तनानामीश्वरार्पितानां पुण्यकर्मणां चित्तशुद्ध्यैकप्रयोजनवत्त्वस्मरणात् । ननु तर्हि 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिप्रसिद्धसंन्यासक्रियामात्रलभ्या ब्रह्मलोकगतिर्विद्यत एवेति चेन्न, तत्संन्यासस्यान्यथासिद्धत्वात् "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" 'संन्यस्य श्रवणं कुर्यात्' इत्यादिश्रुतिस्मृतिविहितसंन्यासस्य श्रुत्यङ्गत्वेन श्रवणाद्यर्थसिद्धावेवोपक्षीणस्वशक्तिकत्वाद्ब्रह्मलोकप्रापकत्वानुपपत्तेः, यथा "ज्योतिष्टोमेन स्वर्गकामो यजेत" इतिविहितज्योतिष्टोमयागस्य स्वर्गप्रापणे एवोपक्लृप्तसंकल्पत्वात्स्वर्गप्रापण एव सामर्थ्यं न तु ब्रह्मादिलोकप्रापणे तथा श्रवणाद्यर्थसिद्धावेवोपक्लृप्तस्य विविदिषासंन्यासस्य श्रवणाद्यर्थप्रापण एव सामर्थ्यं न तु फलान्तरप्रापणे "स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते" इतिश्रुतिनियमात्ततः श्रवणाद्यङ्गत्वेन कृतस्य विविदिषासंन्यासस्य श्रवणादावेवोपक्षीणत्वाद्यतेस्तदतिरिक्तपुण्यकर्माऽनुपलम्भाच्च युक्त एवाऽर्जुनस्य प्रश्न इति सिद्धम् । ननु तर्हि 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिवाक्यानामानर्थक्यं स्यादिति चेदुच्यते—संन्यासाद्ब्रह्मणः स्थानमितिसंन्यासस्य ब्रह्मस्थानं फलं स्मर्यते तद्विद्वत्संन्यासस्य वा विविदिषासंन्यासस्य वा उताऽपत्संन्यासस्य वा । नाद्यः "न तस्य प्राणा उत्क्रामन्ति" इति विदुषः प्राणोत्क्रमणाभावश्रवणात्तत्कर्तृकसंन्यासफलत्वानुपपत्तेः । न द्वितीयः विविदिषासंन्यासस्य श्रवणाद्यर्थसिद्ध्येकफलत्वात्पुनः फलान्तरकल्पनायोगात्पारिशेष्यादापत्संन्यासस्यैव ब्रह्मलोकः फलमित्यवसीयते । तथैव स्मर्यते 'आपद्यपि च कुर्वीत संन्यासं ब्राह्मणोत्तमः । यदनुष्ठानमात्रेण प्रयाति ब्रह्मणः पदम्' इत्यतः 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिवाक्यानामापत्संन्यासविषयत्वेन सार्थकत्वान्न कदाचिदप्यनुपपत्तिः । नन्वापदि संन्यस्यापि पुनर्जीवित्वा विवेकी श्रवणादिना ज्ञानं संपाद्य मुक्तो भवति कथमापत्संन्यासस्य ब्रह्मलोकैकफलत्वमिति चेदुच्यते जन्मान्तरे मोक्षेच्छया संन्यस्य श्रवणं कृतवतस्तस्य प्रतिबन्धवशाज्ज्ञानानुत्पत्तौ पुनरत्रापि जन्मन्यापद्युपदेशेन पूर्वसंस्कारवशात्संन्यस्य श्रुत्या मत्या च ज्ञानं प्राप्य मुक्तो भवतीममेवार्थं श्रीभगवानपि वक्ष्यति 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इत्यादिना ततो न कश्चिदत्र विरोधः । नन्वप्राप्तयोगसंसिद्धेरपि योगिनो यतेः संन्यासस्य श्रवणाद्युपक्षीणत्वेऽपि 'भिक्षाटनं जपः शौचं स्नानं ध्यानं सुरार्चनम् । कर्तव्यानि षडेतानि यतीनां नृपदण्डवत् ॥ स्वशाखोपनिषद्गीताम्' इत्यादिस्मृत्युक्तमन्त्रजपस्तोत्रसुरार्चनादिपुण्यकर्मणः स्वर्गादिहेतोः संभवादस्त्येव तत्प्राप्यः पुण्यलोक इति चेन्न, स्तोत्रमन्त्रजपादेर्भेदप्रत्ययघटितत्वेन विपरीतभावहेतुत्वाद्ब्रह्मविद्विषयत्वानुपपत्तेः 'नैतादृशं ब्राह्मणस्यास्ति वित्तम्' 'उपरमः क्रियाभ्यः' 'नैव धर्मी न चाधर्मी तूष्णीं किंचिदचिन्तयेत्' इति योगिनो यतेः सर्वकर्मोपरमस्मरणात् 'ध्यानयोगपरो नित्यम्' इत्यत्र निदिध्यासोः क्रियान्तरानवकाशार्थं नित्यपदमिति श्रीभाष्यकृद्भिर्व्याख्यातत्वाच्च निरन्तरयोगनिष्ठापरस्य यतेर्मन्त्रजपादिपुण्यकर्मानुष्ठानानुपपत्तौ तत्फलभूतपुण्यलोकगतिर्न संभवत्येवात एवार्जुनः पृच्छति कां गतिं कृष्ण गच्छतीति ॥ ३७ ॥

श्री० टी०—अभ्यासवैराग्याभावेन कथंचिदप्राप्तसम्यग्ज्ञानः किं फलमाप्नोतीत्यर्जुन उवाच—अयतिरीति । प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः न तु मिथ्याचारतया ततः परं तु अयतिः न सम्यग्यतते शिथिलाभ्यास इत्यर्थः । तथा योगाच्चलितं मानसं विषयप्रवणं चित्तं यस्य मन्दवैराग्य इत्यर्थः । एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कां गतिं प्राप्नोति ॥ ३७ ॥

स० टी०—योगाभ्यासप्रवृत्तेन संन्यस्तं सर्वकर्म तत् ॥ इहामुत्रफलप्राप्तिहेतुभूतं मुमुक्षुणा ॥ १ ॥ योगसिद्धिफलं मोक्षसाधनं तत्त्वदर्शनम् ॥ न प्राप्तं योगमार्गाच्च प्रयाणे चालिता मतिः ॥ २ ॥ यस्य तस्याभितो नाशमालक्ष्योवाच पाण्डवः ॥ गुरुवेदान्तवाक्येषु विश्वासेन युतोऽपि यः ॥ ३ ॥ विरक्तः साधनो-

पेतः प्रवृत्तो योगपद्धतौ ॥ शिथिलप्रयत्नोऽभ्यासे दैवान्मध्ये मृतो यदि ॥ ४ ॥ योगसिद्धिमसंप्राप्य कां गतिं याति सोऽच्युत ॥ ५ ॥ ३७ ॥

भा० टी०—योगभ्रष्टस्य स्वर्गमोक्षयोरभावमाशङ्क्यार्जुन उवाच—**अयतिरिति** । अयतिरयत्नशीलो योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या चोपेतः युक्तोऽन्तकाले योगाच्चलितं मानसं मनो यस्य सो भ्रष्टस्मृतिः योगसंसिद्धिं योगफलं सम्यग्दर्शनमप्राप्य कां गतिं गच्छति । अयमाशयः योगाभ्यासाङ्गीकरणेन समस्तकर्मणां संन्यासात् कर्मफलस्य गन्तव्यस्य स्वर्गादेरभावः योगाच्चलितचित्तत्वात् योगफलस्य सम्यग्ज्ञानस्यालाभात्पृच्छति कां गतिं गच्छतीति । तत्तत्स्थानं प्रत्याकर्षणशीलेन त्वया यां गतिं प्रति योगभ्रष्टो नीयते तां त्वमेव वक्तुं योग्योऽसीति सूचयन्नाह—**हे कृष्णेति**। यस्त्वत्रार्जुनोऽगृहीतसंन्यासानामापाततः शास्त्रोत्थात्मानात्मविवेकानामुभयविधवैराग्यवतामीश्वरार्पणबुद्ध्यैवावश्यकं कर्म कुर्वतां मोक्षमार्गप्रवृत्तानां यदि मध्ये मरणादिनाऽप्राप्य संन्यासं मोचकज्ञाने विघ्नवतां गतिं पृच्छति—**अयतिरिति** । अयतिः संन्यासमोचकज्ञानासंपन्नः हे कृष्ण कां गतिं गच्छतीति संबन्धः । ननु किमत्र प्रष्टव्यं तत्तत्कर्मानुगुणां गतिं गमिष्यतीत्याशङ्क्याह—**श्रद्धयोपेत इति** । श्रद्धा मोक्षे ईश्वरे चास्तिक्यबुद्धिः तयोपेतः मोक्षार्थं सत्त्वशुद्धये ईश्वरार्पणबुद्ध्या आवश्यकं कर्म कुर्वन्निति भावः। तर्हि मोक्षमेव प्राप्स्यतीत्याशङ्क्याह—**अप्राप्येति**। योगो ज्ञानयोगः स एव संसिद्धिः संसिद्धिशब्दवाच्यमोक्षसाधनत्वादुपचारात् तामप्राप्यानुत्पन्ने मोचकज्ञान इत्यर्थः । ज्ञानाभावे कुतो मोक्षप्राप्तिरिति भावः । कुतो वोक्तश्रद्धोपेतस्य योगसंसिद्ध्यप्राप्तिस्तत्राह—**योगाच्चलितमानस इति** । अत्र केचिद्योगाच्चलितमानस इत्यस्य मृत इति व्याचक्षते केचित्तु विषयेष्वासक्त इति वदन्ति अन्येतु किं मम मोक्षेण काम्यान्यागादीनेव तत्तल्लोकप्राप्तये करिष्यामीति चेष्टितमानस इति व्याख्यां वर्णयन्तीति भाष्यविरुद्धमितरैः कल्पितं तच्चिन्त्यम्। एवमुक्तप्रकारेणादौ मोक्षार्थं सत्त्वशुद्धये ईश्वरार्पणबुद्ध्याऽऽवश्यकं कर्म कुर्वतः किं मम मोक्षेण काम्यान्यागादीनेव करिष्यामीति योगाच्चलितमानसस्य काम्याग्निष्टोमाद्यनुष्ठानसंभवेन गतेरुक्तत्वात् प्रश्नविवरणरूपस्योत्तरश्लोकस्योत्तरस्य चासङ्गत्यापत्तेः । एतेनायतिरित्यादि परास्तं, त्यक्तसर्वकर्मणः अप्राप्तसम्यग्दर्शनस्यैवोभयभ्रष्टत्वात् । यदपि योगो ज्ञानयोग इत्यादि तदपि न, मुख्यार्थसंभवे उपचारायोगात् । यदपि व्याख्यानान्तरप्रदर्शनं तदपि न, प्रथमव्याख्यानस्यापदार्थत्वात् द्वितीयस्य तृतीयान्तर्भावादिति दिक् ॥ ३७ ॥

प० टी०—अथोभयशून्यत्वेन शिथिलाभ्यासवतः का गतिरित्यर्जुनः पृच्छति—**अयतिरिति** । प्रथमं श्रद्धयोपेत ईश्वरार्पणतया कर्म कुर्वाणः सन् योगे प्रवृत्तो न तु मिथ्याचारतया परं तु न सम्यग्यतते, योगसामग्रीविकलः सन् योगाच्चलितं विषयासक्तं मानसं यस्य स तथाभूतो योगसंसिद्धिमप्राप्य कां गतिं गच्छति ॥ ३७ ॥

रा० टी०—अभ्यासादिहीनस्य फलं पृच्छति—**अयतिरिति** । अयतिरप्रयत्नः श्रद्धया आस्तिक्यबुद्ध्या उपेतो युक्तः योगात् ध्यानरूपोपायात् चलितमानसः योगसंसिद्धिं ध्यानसंपूर्तिं ध्यानफलं ज्ञानमिति यावत् । अप्राप्य हे कृष्ण कां गतिं गच्छतीति ॥ ३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

ल० टी०—एतत्प्रश्नाभिप्रायं स्वयमेव विवृणोति—**कच्चिदिति** । कां गतिं गच्छतीति कस्ते संदेह इति चेच्छृणु, प्रथमं योगाय फलाभिसंधिरहितकर्मानुष्ठानात्स्वर्गादिप्राप्तिसाधनभूतयथावद्यज्ञादिकर्मानु-

ष्ठानाभावान्न स्वर्गादि किमपि फलं प्राप्नोति, अतोऽप्रतिष्ठो निराश्रयः, ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढस्तत्साधनभूताद्योगाच्च्युतः एवमुभयविभ्रष्टः कर्ममार्गाज्ज्ञानमार्गाच्च विभ्रष्टः कच्चिन्नश्यति। तत्र दृष्टान्तः—छिन्नाभ्रमिव। यथा वायुना छिन्नं पूर्वस्मान्मेघाद्भ्रष्टमुत्तरं महान्तं मेघमप्राप्तमभ्रखण्डं मध्य एव विनश्यति, तथा योगभ्रष्टः पूर्वस्मात्कर्ममार्गाद्विच्छिन्न उत्तरं ज्ञानमार्गमप्राप्तः सन् कर्मफलं ज्ञानफलं च प्राप्तुमयोग्यो विनश्यति किमिति संशयः ॥ ३८ ॥

म० टी०—एतदेव संशयबीजं विवृणोति—कच्चिदिति साभिलाषप्रश्ने। हे महाबाहो महान्तः सर्वेषां भक्तानां सर्वोपद्रवनिवारणसमर्थाः पुरुषार्थचतुष्टयदानसमर्था वा चत्वारो बाहवो यस्येति प्रश्ननिमित्तक्रोधाभावस्तदुत्तरदानसहिष्णुत्वं च सूचितम्। ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विक्षिप्तः अनुत्पन्नब्रह्मात्मैक्यसाक्षात्कार इति यावत्। अप्रतिष्ठः देवयानपितृयानमार्गगमनहेतुभ्यामुपासनाकर्मभ्यां प्रतिष्ठाभ्यां साधनाभ्यां रहितः सोपासनानां सर्वेषां कर्मणां परित्यागात् एतादृश उभयविभ्रष्टः कर्ममार्गाज्ज्ञानमार्गाच्च विभ्रष्टश्छिन्नाभ्रमिव वायुना छिन्नं विशकलितं पूर्वस्मान्मेघाद्भ्रष्टमुत्तरं मेघमप्राप्तमभ्रं यथा वृष्ट्ययोग्यं सदन्तराल एव नश्यति तथा योगभ्रष्टोऽपि पूर्वस्मात्कर्ममार्गाद्विच्छिन्न उत्तरं च ज्ञानमार्गमप्राप्तोऽन्तराल एव नश्यति कर्मफलं ज्ञानफलं च लब्धुमयोग्यो न किमिति प्रश्नार्थः। एतेन ज्ञानकर्मसमुच्चयो निराकृतः एतस्मिन्हि पक्षे ज्ञानफलालाभेऽपि कर्मफललाभसंभवेनोभयविभ्रष्टत्वासंभवात्। न च तस्य कर्मफलसंभवेऽपि फलकामनात्यागात्तत्फलभ्रंशवचनमवकल्पत इति वाच्यं, निष्कामानामपि कर्मणां फलसद्भावस्यापस्तम्बवचनाद्युदाहरणेन बहुशः प्रतिपादितत्वात्। तस्मात्सर्वकर्मत्यागिनं प्रत्येवायं प्रश्नः अनर्थप्राप्तिशङ्कायास्तत्रैव संभवात् ॥ ३८ ॥

शं० टी०—किंच—कच्चिदिति। ब्रह्मणः पथि ब्रह्ममार्गे योगनिष्ठायां विमूढः विशिष्य मूढो विमूढः प्रतिबन्धककर्मदोषेण विपरीतभावं प्राप्तः समाधिनिष्ठाप्रच्युत इत्यर्थः। तत एवाप्रतिष्ठः प्रतितिष्ठत्यनयेति प्रतिष्ठा आधारस्तद्रहितोऽप्रतिष्ठः ज्ञानकर्मान्यतरालम्बनरहितो यतिः स्वयमुभयविभ्रष्टः योगनिष्ठाप्रच्युतत्वाज्ज्ञानफलभ्रष्टः सर्वकर्मसंन्यासात्कर्मफलभ्रष्टश्चैवमुभयविधगतिशून्यः सन् छिन्नाभ्रमिव प्रागगच्छन्मेघमण्डलसंबन्धरहितं पश्चादागच्छन्मेघमण्डलसंबन्धराहित्यं च यन्मध्यवर्ति स्वल्पमभ्रं तद्वायुना छिन्नं सद्यथान्तराले नश्यति स्वरूपनाशं प्राप्नोति तथायमपि नश्यति कच्चित्तद्वत्स्वरूपनाशं प्राप्नोति वा किमित्यर्थः ॥ ३८ ॥

श्री० टी०—प्रश्नाभिप्रायं विवृणोति—कच्चिदिति। कर्मणामीश्वरार्पितत्वादननुष्ठानाच्च न तावत्कर्मफलं स्वर्गादिकं प्राप्नोति योगानिष्पत्तेश्च न मोक्षं प्राप्नोति एवमुभयस्माद्भ्रष्टः अप्रतिष्ठो निराश्रयः अत एव ब्रह्मणः प्राप्त्युपाये पथि मार्गे विमूढः सन्कच्चित्किं नश्यति किंवा न नश्यतीत्यर्थः। नाशे दृष्टान्तः—यथा छिन्नमभ्रं पूर्वस्मादभ्राद्विश्लिष्टमभ्रान्तरं चाप्राप्तं सन्मध्य एव विलीयते तद्वदित्यर्थः ॥ ३८ ॥

स० टी०—कर्ममार्गात्तथा योगाद्विभ्रष्टः सन्न किं द्रुयात् ॥ छिन्नाभ्रमिव नश्येद्वा सोऽन्तराले निराश्रयः ॥ १ ॥ विमूढो ब्रह्मविन्मार्गे त्यक्तकर्माश्रयो यतः ॥ भक्तानां दोषसंदोहवारणे यस्य बाहवः ॥ २ ॥ समर्थाः सुखदाने च महाबाहो त्वमित्यहो ॥ ३ ॥ ३८ ॥

भा० टी०—स्वाशयं स्फुटयति—कच्चिदिति। कच्चिदिति प्रश्ने। उभयविभ्रष्टः सर्वकर्मणां त्यागात् कर्ममार्गात् सम्यग्दर्शनालाभाद्योगाच्च विभ्रष्टः स किं नश्यत्युत न नश्यति। उभयविभ्रष्टत्वमेव दर्शयति द्वाभ्यां विशेषणाभ्याम्—अप्रतिष्ठो निराश्रयः कर्ममार्गरूपाश्रयरहितः ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे विमूढः ज्ञानमार्गावष्टम्भशून्यः। उभयविभ्रष्टस्य नाशे दृष्टान्तमाह—छिन्नाभ्रमिव यथा पूर्वस्मादभ्राद्विच्छिन्नोऽभ्रैकदेशः परमभ्रमप्राप्य मध्य एव नश्यति तद्वत्। महाबाहो इति संबोधयन् भक्तोद्धारणसमर्थैरतिप्रबलैर्बाहुभिर्युक्ते

त्वयि सति तस्य नाशो न युक्त इति द्योतयति । यत्तु—'प्रश्नमेव विवृणोति कच्चिदिति किमित्यस्मिन्नर्थे । नश्यति नरकं प्राप्नोति किं वा तस्य गत्यन्तरमस्तीति किमापेक्षितं पक्षान्तरं पूरणीयम् । ननु नरकपातान्तस्तस्य को वापराध इत्याशङ्क्याह—ब्रह्मणः पथि विमूढ इति । ननु कृतानां काम्यकर्मणां तथा चित्तशुद्ध्यर्थमनुष्ठितानामावश्यककर्मणां फलं प्राप्स्यति कुतोऽस्य नरकप्राप्तिरित्याशङ्क्याह—उभयविभ्रष्ट इति । कृतैरावश्यककर्मभिश्चित्तशुद्धौ जातायामपि तदुपेयमोचकज्ञानपरिभ्रष्टः किमन्यत्तेषामावश्यककर्मणां फलं प्राप्नुयात् तथा स्वात्मानं कर्तृत्वादिरहितं कर्मण्यनधिकारिणं निश्चित्य ब्रह्मार्पणं ब्रह्महविरित्याद्युक्तमार्गेण शुद्ध्यर्थं कर्माचरणात् कथं वा कर्मण्यधिकारी स्यादित्युभयविभ्रष्टपदस्यार्थः । ननु किमित्येवं ब्रह्मणः पथि तस्य विमूढतेत्यत उक्तमप्रतिष्ठ इति । प्रतिष्ठा क्षुद्रपुरुषार्थपरित्यागेन परमार्थशक्तिलक्षणा तद्रहित इत्यर्थः ।' इतीतरैः कल्पितं तदसत्, काम्यकर्मणां फलस्यावश्यंभाविनोभयभ्रष्टत्वाभावात् । तथा स्वात्मानमित्यादेः किं मम मोक्षेण काम्यादीनेव तत्तल्लोकप्राप्तये करिष्यामीति स्वपूर्वग्रन्थविरुद्धत्वात् । नहि काम्यकर्ममार्गे प्रवृत्तस्ततो भ्रष्ट इति शङ्कितुं शक्यते अतः संन्यासीति भाष्यटीकायामुक्तत्वाच्च । एतेनाप्रतिष्ठशब्दार्थोऽपि प्रत्युक्तः, विमूढो ब्रह्मणः पथीत्यनेनैव परमपुरुषार्थाशक्तेरुक्तत्वात् ॥ ३८ ॥

प० टी०—प्रश्नाभिप्रायं विशदयन् पुनराह—कच्चिदिति द्वाभ्याम् । पूर्वं श्रद्धया कर्मणामीश्वरार्पणतया स्वर्गादिफलभ्रष्टः पुनर्योगाच्चलितत्वादनधिगतमोक्ष एवमुभयविभ्रष्टः संछिन्नाभ्रमिवाग्रतः पृष्ठतो वा सहायीभूताभ्रान्तराभावान्मध्यस्थितमभ्रं यथा विलीयते तद्वद्ब्रह्मणः पथि मोक्षमार्गे विमूढोऽत एवाप्रतिष्ठो निराश्रयः कच्चिन्नश्यति ॥ ३८ ॥

रा० टी०—कच्चिदिति । कच्चित्किमित्यर्थः । उभयविभ्रष्टः उभयस्मात्स्वर्गापवर्गरूपाद्विभ्रष्टः प्रच्युतः ऐहिकामुष्मिकपुमर्थाद्विभ्रष्ट इति वा । यद्वा स्वर्गाद्युपायात् काम्यकर्मानुष्ठानादपवर्गोपायाद्ध्यानाच्च विभ्रष्टः अप्रतिष्ठो निराश्रयः अत एव ब्रह्मणः पथि परब्रह्मप्राप्त्युपाये विमूढः वायुना द्वैधाकृतमेघ इव किं नश्यति नरकाद्यनर्थं प्राप्नोत्युत न नश्यति ॥ ३८ ॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

त० टी०—उक्तसंशयच्छेदनाय भगवन्तं प्रार्थयते—एतदिति । हे कृष्ण स्वभक्तकश्मलनाशक एतन्मे संशयमशेषतस्त्वं छेत्तुमपनेतुमर्हसि । यतस्त्वदन्यः त्वत्तः परमेश्वरात्सर्वज्ञात्परमसुहृदोऽन्यः कश्चिदपि ऋषिर्वा देवो वाऽस्य संशयस्य छेत्ता सम्यगुत्तरदानेन नाशयिता न ह्युपपद्यते न संभवति । जीवत्वेनासर्वज्ञत्वादिति भावः ॥ ३९ ॥

म० टी०—यथोपदर्शितसंशयापाकरणाय भगवन्तमन्तर्यामिणमर्थयते पार्थः—एतन्मे इति । एतत् एतं पूर्वोपदर्शितं मे मम संशयं हे कृष्ण छेत्तुमपनेतुमर्हस्यशेषतः संशयमूलाधर्माद्युच्छेदेन । मदन्यः कश्चिदृषिर्वा देवो वा त्वदीयमिमं संशयमुच्छेत्स्यतीत्याशङ्क्याह—त्वदन्यः त्वत् परमेश्वरात्सर्वज्ञाच्छास्त्रकृतः परमगुरोः कारुणिकादन्यः अनीश्वरत्वेनासर्वज्ञः कश्चिदृषिर्वा देवो वाऽस्य योगभ्रष्टपरलोकगतिविषयस्य संशयस्य छेत्ता सम्यगुत्तरदानेन नाशयिता हि यस्मान्नोपपद्यते न संभवति तस्मात्त्वमेव प्रत्यक्षदर्शी सर्वस्य परमगुरुः संशयमेतं मम छेत्तुमर्हसीत्यर्थः ॥ ३९ ॥

शं० टी०—एतमिति । हे कृष्ण सदानन्दस्वरूप परमात्मन् त्वमेव सर्वज्ञः परमेश्वरः मे ममैतं प्रति-

१ एतमिति शंकरानन्दीकृत्संमतः पाठः ।

पादितं संशयमशेषतो निःशेषं यथा तथा छेत्तुं श्रुतिस्मृतियुक्तिभिर्निरसितुमर्हसि समर्थोऽसीत्यर्थः। यस्मिन् छिन्ने सति मुमुक्षवो निर्भयाः सन्तः सर्वकर्माणि संन्यस्य योगनिष्ठायां प्रवर्तेरन् । ननु देवा वा ऋषयो वा सर्वज्ञा महान्तस्ते संशयं छेत्स्यन्ति ते प्रष्टव्या इत्याशङ्कायामाह—त्वदन्य इति । 'अहमादिर्हि देवानां महर्षीणां च सर्वशः' इति वचनात्त्वमेव देवानां ऋषीणां चादिः सर्वज्ञस्त्वत्तोऽन्यस्त्वदन्यो देवो वा ऋषिर्वा यः कश्चिदप्यस्य संशयस्यच्छेत्ता निवर्तको नोपपद्यते न संभवतीत्यर्थः । मेधावी छिन्नसंशय इति सर्वसंशयच्छेत्तृत्वं तव शास्त्रप्रसिद्धमिति प्रसिद्धिद्योतनार्थो हिशब्दः ॥ ३९ ॥

श्री० टी०—त्वयैव सर्वज्ञेनायं मम संदेहो निरसनीयः त्वत्तोऽन्यस्त्वेतत्संदेहनिवर्तको नास्तीत्याह—एतन्मे इति । एतत् एनं छेत्ता निवर्तकः । स्पष्टमन्यत् ॥ ३९ ॥

स० टी०—तदेतत्संशयं सर्वं छेत्तुं योग्यस्त्वमेव हि ॥ त्वत्तो महेश्वरादन्यः कश्चिद्देवो मुनिर्न वा ॥ १ ॥ सम्यगुत्तरदानेन संशयस्यास्य सर्वतः ॥ छेत्ता संभवतीत्यस्मात्सर्वज्ञस्त्वं जगद्गुरुः ॥ २ ॥ प्रत्यक्षदर्शी सर्वस्य संशयं छेत्तुमर्हसि ॥ ३ ॥ ३९ ॥

भा० टी०—संशयमुक्त्वा तच्छेदनं प्रार्थयते—एतदिति । एतन्मे मम संशयं हे कृष्ण छेत्तुमपनेतुमर्हस्यशेषतः । उक्त एव कृष्णपदाभिप्रायोऽत्रापि द्रष्टव्यः । नन्वन्यः कश्चिद्देवो वा ऋषिर्वा छेत्स्यति किमेवं प्रार्थनयेत्यत आह—त्वत्तः कृष्णादधिकारिणमाकृष्य तत्तत्स्थानप्रापकात् तत्तत्कर्मफलप्रदातुः सर्वेश्वरात् सर्वज्ञादन्योऽनीश्वरोऽसर्वज्ञः कश्चिदृषिर्वा देवो वास्य संशयस्य छेत्ताऽपनेता हि यस्मान्न संभवत्यतः त्वमेव छेत्तुमर्हसीत्यर्थः । यत्तु एतन्मे पृष्टं हे कृष्णासंशयं यथा भवति तथाऽशेषतः सर्वात्मना छेत्तुं निराकर्तुमर्हसीति तन्न, संशयस्यास्येत्यननुरोधप्रसङ्गात् ॥ ३९ ॥

प० टी०—एतदेनं मे मंशयं छेत्तुं भो कृष्ण त्वमेवार्हसीति प्रश्नः । शेषं स्पष्टम् ॥ ३९ ॥

रा० टी०—एतदिति । एतन्मे संशयं एतं संशयम् । व्यक्तोऽर्थः ॥ ३९ ॥

श्रीभगवानुवाच—पार्थनैवेह नामुत्र विनाशस्तस्य विद्यते ॥
नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

त० टी०—एवमर्जुनस्य संशयनिरासाय प्रश्नस्योत्तरं श्रीभगवानुवाच—पार्थेत्यादिभिः । हे पार्थ तस्य त्वदुक्तस्य त्यक्तस्वर्गादिसाधनकर्मणो यथाशक्त्याऽनभिसंहितफलकर्मानुष्ठातुर्योगे प्रवृत्तस्याभ्यासवैराग्यशैथिल्याद्योगाद्भ्रष्टस्य मुमुक्षोरिह लोकेऽमुत्र परलोके वा विनाशो नैव विद्यते, सकामेतरजनवद्दुर्गतिर्न संभवति । यथा सकामस्य देवाद्याराधने प्रवृत्तस्य तत्कर्मफलमनवाप्यादावेव कर्मणो भ्रष्टस्येह लोकेऽपकीर्तिर्भोगानवाप्तेर्विनाशः मृतस्य च परत्र पश्वादियोनिप्राप्तिरूपा दुर्गतिर्भवति, न तथाऽस्य योगिन इत्यर्थः । एतत्कुतस्तत्राह—नहीति । हि यस्मात्कल्याणकृत् शुभाचरणः कश्चिदपि दुर्गतिमुक्तरूपां लोकद्वयहानिं न गच्छति, अयं तु शास्त्रविहितशुभकारी सर्वोत्कृष्टो न गच्छतीति किमु वक्तव्यमित्यर्थः । तनोत्यात्मानमिति तत् स एव तातः पिता तद्रूपत्वात्पुत्रोऽपि तात उच्यते शिष्यस्य पुत्रस्थानीयत्वाभिप्रायेण तातेति संबोधनं कृपाविशेषद्योतनाय ॥ ४० ॥

म० टी०—एवमर्जुनस्य योगिनं प्रति नाशाशङ्कां परिहरन्नुत्तरं श्रीभगवानुवाच—पार्थ नैवेहेति । उभयविभ्रष्टो योगी नश्यतीति कोऽर्थः किमिह लोके शिष्टगर्हणीयो भवति वेदविहितकर्मत्यागात् यथा कश्चिदुच्छृङ्खलः, किं वा परत्र निकृष्टां गतिं प्राप्नोति । यथोक्तं श्रुत्या "अथैतयोः पथोर्न कतरेण च न ते कीटाः पतङ्गा यदिदं दन्दशूकम्" इति । तथा चोक्तं मनुना 'वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वका-

च्युतः' इत्यादि तदुभयमपि नेत्याह—हे पार्थ नैवेह नामुत्र विनाशस्तस्य यथाशास्त्रं कृतसर्वकर्मसंन्यासस्य सर्वतो विरक्तस्य गुरुमुपसृत्य वेदान्तश्रवणादि कुर्वतोऽन्तराले मृतस्य योगभ्रष्टस्य विद्यते उभयत्रापि तस्य विनाशो नास्तीत्यत्र हेतुमाह- हि यस्मात् कल्याणकृत् शास्त्रविहितकारी कश्चिदपि दुर्गतिमिहाकीर्तिं परत्र च कीटादिरूपतां न गच्छति अयं तु सर्वोत्कृष्ट एव सन् दुर्गतिं न गच्छतीति किमु वक्तव्यमित्यर्थः तनोत्यात्मानं पुत्ररूपेणेति पिता तत उच्यते स्वार्थिकेऽणि तत एव तातः राक्षसवायसादिवत् पितैव च पुत्ररूपेण भवतीति पुत्रस्थानीयस्य शिष्यस्य तातेति संबोधनं कृपातिशयसूचनार्थम् । यदुक्तं योगभ्रष्टः कष्टां गतिं गच्छति अज्ञत्वे सति देवयानपितृयानमार्गान्यतरासंबन्धित्वात् स्वधर्मभ्रष्टवदिति तदयुक्तं, एतस्य देवयानमार्गासंबन्धित्वेन हेतोरसिद्धत्वात् । पञ्चाग्निविद्यायाम् " य इत्थं विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसंभवन्ति" इत्यविशेषेण पञ्चाग्निविदामिवातत्क्रतूनां श्रद्धासत्यवतां मुमुक्षूणामपि देवयानमार्गेण ब्रह्मलोकप्राप्तिकथनात् श्रवणादिपरायणस्य च योगभ्रष्टस्य श्रद्धान्वितो भूत्वेत्यनेन श्रद्धायाः प्राप्तत्वात् " शान्तो दान्तः " इत्यनेन चानृतभाषणरूपवाग्व्यापारनिरोधरूपस्य सत्यस्य लब्धत्वात् बहिरिन्द्रियाणामुच्छृङ्खलव्यापारनिरोधो हि दमः योगशास्त्रे च ' अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' इति योगाङ्गत्वेनोक्तत्वात् । यदि तु सत्यशब्देन ब्रह्मैवोच्यते तदापि न क्षतिः वेदान्तश्रवणादेरपि सत्यब्रह्मचिन्तनरूपत्वात् अतत्क्रतुत्वेऽपि च पञ्चाग्निविदामिव ब्रह्मलोकप्राप्तिसंभवात् । तथाच स्मृतिः ' संन्यासाद्ब्रह्मणः स्थानम्' इति । तथा प्रात्यहिकवेदान्तवाक्यविचारस्यापि कृच्छ्राशीतिफलतुल्यफलत्वं स्मर्यते । एवं च संन्यासश्रद्धासत्यब्रह्मविचाराणामन्यतमस्यापि ब्रह्मलोकप्राप्तिसाधनत्वात्समुदितानां तेषां तत्साधनत्वं किं चित्रम् । अत एव सर्वसुकृतरूपत्वं योगिचरितस्य तैत्तिरीया आमनन्ति " तस्य ह वा एवं विदुषो यज्ञस्य " इत्यादिना । स्मर्यते च ' स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः । संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्यो ह्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ' इति ॥ ४० ॥

शं० टी०—"न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत् " इति संन्यासस्य ब्रह्मस्वरूपत्वं सर्वतपोभ्यश्च वरिष्ठत्वं श्रूयते तथैव " वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः " इति संन्यासयोगवतां यतीनां शुद्धसत्त्वत्वं वेदान्तार्थविज्ञातृत्वं च श्रूयते " ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपः " इति . " शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दन् तस्माच्छमं परमं वदन्ति । दमेन दान्ताः किल्बिषमवधुन्वन्ति । दमेन ब्रह्मचारिणः सुवरगच्छन् । दमो भूतानां दुराधर्षम् । सत्यं परं परं सत्यम् सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सतां हि सत्यम् " इत्यादिना वाक्यजातेन ऋतसत्यश्रुतशान्तादीनां मुमुक्षुधर्माणां श्रुत्या तपस्त्वमुच्यते ' मानसं वै प्राजापत्यम् ' इति ' मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ' इति ' अश्वमेधसहस्राणि वाजपेयशतानि च । एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ' इति समाधेः परमतपस्त्वं श्रूयते स्मर्यते च । " अथ यद्यज्ञ इत्याचक्षते । ब्रह्मचर्यमेव ब्रह्मलोकं निगच्छति ब्रह्मचर्यैकनिष्ठया " अहिंसा परमो धर्मो यया याति त्रिविष्टपम् ' इति ' तपसामपि सर्वेषां वैराग्यं परमं तपः ' इति ' सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदया तीर्थं तीर्थमार्जवमेव च ' इति ब्रह्मचर्यादीनां मुमुक्षुधर्माणां परममहत्त्वं श्रूयते स्मर्यते च । विघ्ननिहतयोगानां जडभरतवीतहव्यादीनां जन्मान्तरे योगपारंगतत्वं विष्णुपुराणवासिष्ठादिषु प्रसिद्धम् । एवं निरुक्तलक्षणैः संन्यासऋतसत्यशमदमाद्युत्तमतपोभिर्ब्रह्मचर्याद्युत्तमधर्मैरपि विशिष्टस्य योगिनो यतेः कचिद्दुष्कर्मवशाद्योगभ्रंशे सत्यपि ब्रह्मविद इहाप्यमुत्रापि न कश्चिदनर्थोऽस्तीति

बोधयितुं श्रीभगवानुवाच—पार्थेति । स्वदत्तां ब्रह्मविद्यां शिष्यप्रशिष्यद्वारा तनोति विस्तारयतीति तातस्तस्य संबुद्धिर्हे तात पार्थ तस्य समाधिनिष्ठायां प्रवृत्तस्य संन्यासकृतसत्यशमदमाद्युत्तमतपोविशिष्टस्य ब्रह्मचर्याहिंसादिविशिष्टधर्मवतो योगिनो यतेर्दुष्कर्मवशाद्ब्रह्ममार्गप्रच्युतत्वेऽपि इहास्मिँल्लोके विनाशो हानिः शिष्टगर्हणाप्राप्तप्रतिष्ठाभङ्गलक्षणो नैवास्ति ब्रह्मनिष्ठायां श्रद्धावत्त्वादिविशिष्टगुणवत्त्वाद्ब्रह्मचर्याद्युत्तमधर्मवत्त्वाच्च शिष्टनिन्दाऽप्रसक्तेः । नहि दुष्कर्मप्रापितैराध्यात्मिकाद्युपद्रवैर्विघ्नतः स्वधर्मनिष्ठं पुरुषं शिष्टा निन्दितुमर्हन्ति यथा विधिना संकल्पपूर्वकं शालां प्रविश्याग्नीषोमीयान्तं कृतस्य यज्ञकर्मणो दैवात्सति विघ्ने यजमानमास्थावन्तं श्रोत्रिया न निन्दितुमर्हन्ति तद्वदतो नैवास्यात्र प्रतिष्ठाभङ्गलक्षणो नाशस्तथैवामुत्र परस्मिँल्लोके विनाशो दुर्योनिदुर्गतिप्राप्तिलक्षणो नास्ति कल्याणकृत्त्वादमुष्य यतेः । नहि कल्याणकृच्छुभकृत्कश्चित्पुरुषो दुर्गतिं गच्छति किंतु सद्गतिमेव गच्छति । तथाच श्रुतिः “ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा ” इति । यद्वा ‘ अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् । स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलं विदुः ’ इति ‘ मङ्गलानां च मङ्गलम् ’ इति ‘ पवित्रं मङ्गलं परम् ’ इति परब्रह्मणो मङ्गलस्वरूपत्वस्मरणात्कल्याणं मङ्गलस्वरूपं ब्रह्म करोति स्वात्मना साक्षाद्विजानातीति कल्याणकृद्ब्रह्मवित्कश्चिद्ब्राह्मणो वा क्षत्रियो वाऽन्यो वा योगभ्रंशं प्राप्य दुर्गतिं निरयं न गच्छति जडभरतादौ तत्प्रसिद्धमिति प्रसिद्धिद्योतनार्थो हिशब्दः । ननु ध्यानयोगादौ प्रवृत्तो यो यतिः स ब्रह्मविदेव न भवति तस्य ब्रह्मवित्त्वे ध्यानाभ्यासक्रियाऽयोगात् ध्यानयोगाभ्यासोऽपि स्वाध्यायाभ्यासवत्क्रियैव भवति ‘ तस्य कार्यं न विद्यते ’ इति ‘ नैवास्ति किंचित्कर्तव्यम् ’ इति च ब्रह्मविदः कर्तव्याभावस्मरणादिति चेत्सत्यं नास्त्येव कर्तव्यं ब्रह्मविदः कृतकृत्यस्य यस्य चक्षुषो रूपवद्बहिरन्तर्ब्रह्मोपलब्धिस्तथापि भवानत्र प्रष्टव्यः “ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः ” इति मुमुक्षोः कर्तव्यत्वेन निदिध्यासा श्रूयते सा कृतश्रवणस्य किमकृतश्रवणस्य वा । न द्वितीयः वेदान्तार्थविचारशून्यस्यात्मानात्मविवेकविभागज्ञानाभावान्निदिध्यासाऽनुपपत्तेः । आद्ये श्रवणादिना विज्ञातात्मतत्त्वस्य वा उत अविज्ञातात्मतत्त्वस्येति । न द्वितीयः अविज्ञातात्मतत्त्वस्य निदिध्यासाऽयोगात् निदिध्यासा नाम विजातीयप्रत्ययतिरस्कारपूर्विका सजातीयप्रत्ययावृत्तिः खलु सैषा सम्यग्विदितात्मतत्त्वस्यैव सिध्यति नेतरस्य यथा घटप्रत्ययस्य विजातीयः पटप्रत्यय इति ज्ञानं घटपटयोः स्वरूपं लक्षणं च विजानत एव सिध्यति तद्विज्ञानं च तयोः संदर्शनं कृतवत एव सिध्यति नान्यस्य तद्वदात्मप्रत्ययानामनात्मप्रत्यया विजातीया इति ज्ञानमात्मानात्मनोः स्वरूपं लक्षणं च विज्ञातवत एव सिध्यति तादृग्विज्ञानं तत्साक्षात्कारवत एव सिध्यति नेतरस्य नहि कश्चिदप्यदृष्टं गण्डभेरुण्डं दृष्टगरुडादिवद्भावयितुं शक्नोति यथा पितरं तथा प्रपितामहं वा तद्वदविज्ञातात्मतत्त्वस्तदनुभवशून्यः कश्चिदप्यनात्मवदात्मानं भावयितुं न शक्नोति स्वानुभवाभावात् ततोऽनात्मवत्तद्विलक्षणत्वेनात्मस्वरूपं सम्यग्विदितवत एव निरुक्तलक्षणा निदिध्यासा समाधिश्च कर्तव्यो भवति ‘ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ’ इति ‘ तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथः ” इत्युक्त्वा निरुक्तलक्षणमात्मानं विज्ञातवतामेव “ओमित्येवं ध्यायथ आत्मानम्” इति चात्मध्यानं विदधाति श्रुतिः । नन्वात्मविदः किमर्थं ध्यानं समाधिर्वेति न मन्तव्यं ध्यानसमाध्योरात्मतत्त्वज्ञानाप्रतिबन्धहेतुत्वात् “ सर्वमिदमहं च ब्रह्मैव ” इति सर्वस्य स्वस्य च ब्रह्ममात्रत्वविज्ञानं ब्रह्मण्येवात्मताज्ञानं चाप्रतिबद्धं श्रुतिमात्रेण न सिध्यति विनैव ध्यानसमाधिभ्यां “ समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति ” इति ब्रह्मविदो ब्रह्मण्येवात्मत्वविज्ञानस्याप्रतिबद्धत्वसिद्धये सार्वात्म्यसिद्धये च समाधिं विदधाति श्रुतिरतो ब्रह्मविदोऽप्यप्रतिबद्धज्ञानसिद्धये निदिध्यासादिरवश्यं कर्तव्य इति सिद्धम् ॥ ४० ॥

श्री० टी०—अत्रोत्तरं श्रीभगवानुवाच—पार्थेति सार्धैश्चतुर्भिः । इह लोके नाश उभयभ्रंशात्पातित्यम्,

अमुत्र परलोके नाशो नरकप्राप्तिः तदुभयं तस्य नास्त्येव यतः कल्याणकृच्छुभकारी कश्चिदपि दुर्गतिं न गच्छति अयं च शुभकारी श्रद्धया योगे प्रवृत्तत्वात् । ताततेति लोकरीत्योपलालयन्संबोधयति ॥ ४० ॥

स० टी०—अर्जुनस्यैवमाशङ्कां निराकुर्वन्नुवाच ह ॥ श्रीमन्नारायणः कृष्णः शरणागतवत्सलः ॥ १ ॥ मुमुक्षोस्तस्य वेदान्तश्रवणादि प्रकुर्वतः ॥ चित्तवृत्तिनिरोधे हि प्रवृत्तस्य विरागिणः ॥ २ ॥ अन्तराले मृतस्यापि विनाशो नोभयत्र वै ॥ नेह शिष्टविनिन्दास्य यथाशास्त्रं प्रकुर्वतः ॥ ३ ॥ नानिष्टां गतिमाप्नोति परत्रान्याज्ञजन्तुवत् ॥ यस्माच्छास्त्रानुगः कश्चिच्छुभकृद्दुर्गतिं गतिम् ॥ ४ ॥ इहाकीर्तिं परत्रापि कुत्सितां नैव गच्छति ॥ अयं तु सर्वतः श्रेष्ठः कथं गच्छेद्धि दुर्गतिम् ॥ ५ ॥ शिष्यस्य पुत्ररूपेण कृपापात्रत्वसूचनम् ॥ तातेतिपदतः साक्षाद्धरिणा कृतमर्जुने ॥ ६ ॥ ४० ॥

भा० टी०—एवमर्जुनेन संशयच्छेदनाय प्रार्थितः तं छेत्तुं श्रीभगवानुवाच—पार्थेति । तस्य योगभ्रष्टस्येहास्मिँल्लोकेऽमुत्र परलोके वा विनाशः पूर्वस्माद्धीनजन्मलाभो नरकप्राप्तिर्वा न विद्यते हि यस्मात्कल्याणकृच्छुभकृत्कश्चिदपि दुर्गतिं न गच्छति न प्राप्नोति तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्ररूपेणोत्पद्यते इति पुत्रोऽपि तात इत्युच्यते शिष्यस्यापि पुत्रसमत्वादाह—हे ताततेति । नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादिति मदुक्तं दिक्प्रदर्शकमल्पबुद्धित्वात्स्त्रीस्वभावेन त्वया विस्मृत्य पृष्टमिति पार्थेतिसंबोधनेन ध्वनितम् । तथापि शिष्यत्वेन पुत्रतुल्यत्वात्पुनः पुनर्विस्तरेण मया बोधनीयोऽसीतिसूचनायोक्तं ताततेति । यत्तु इहामुत्र प्रवृत्तस्येति शेषः । ततश्च इह यत्फलं मोचकज्ञानलक्षणममुत्र फलं स्वर्गादिलक्षणं तत्साधने प्रवृत्तस्येत्यर्थ इति तन्न, भाष्योक्तप्रकारेण सम्यग्वाक्यार्थोपपत्तौ लक्षणाया अध्याहारस्य च व्यर्थत्वात् ॥ ४० ॥

प० टी०—अत्रोत्तरं भगवानाह—पार्थेति । तस्य पुरुषस्येहामुत्र वा नाशो नास्ति इह लोकेऽधमयोनिप्राप्तिर्नाशः अमुत्र च निरयप्राप्तिर्नाशः, एवमुभयत्र नाशो नास्ति । कुतः भो तात तनोत्यात्मानं पुत्ररूपेणेति तातः पुत्रः, एवमर्जुनस्य परमप्रेमास्पदत्वात्ताततेति संबुद्धिः । हि यस्मात्कारणात्कल्याणकृत्पूर्वमीश्वरार्पणतया कर्म कुर्वन् कश्चिदपि दुर्गतिं न गच्छति ॥ ४० ॥

रा० टी०—प्रश्नस्योत्तरमाह सार्धैश्चतुर्भिः—पार्थेति । हे पार्थ इह लोके अमुत्र परलोके च नाशस्तस्य नास्ति । इह नाशस्तिर्यगादिदुर्गतिप्राप्तिः, परत्र नाशो नरकप्राप्तिः, तद्द्वयं तस्य योगभ्रष्टस्य नेत्यर्थः । नञ्द्वयमादरार्थम् । कुत इत्यत उक्तम्—नहीति । कल्याणकृत् श्रद्धया किंचित्कालं ध्यानादिकृदित्यर्थः ॥ ४० ॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

त० टी०—यदि योगभ्रष्टो मृतो दुर्गतिं न गच्छति तर्हि कां गतिं गच्छतीत्यपेक्षायामाह—प्राप्येति । श्रद्धया योगे प्रवृत्तः केनचिददृष्टेन यादृशभोगाकाङ्क्षया योगाद्भ्रष्टो मृतो योगी सोऽल्पकालाभ्यस्तस्यापि योगस्य प्रभावात्पुण्यकृतामतिपुण्यकारिणां लोकान्प्राप्य तत्र तद्योग्यान्कल्याणतमान्भोगान्यथेष्टं भोक्तुं शाश्वतीः समाः बहून्संवत्सरानुषित्वा वासं कृत्वा तत्सुखभोगे तृप्तस्ततः शुचीनां सदाचारयुक्तानां श्रीमतां धनाढ्यानां गेहे जायते जन्म प्राप्नोति ॥ ४१ ॥

म० टी०—तदेवं योगभ्रष्टस्य शुभकृत्त्वेन लोकद्वयेऽपि नाशाभावे किं भवतीत्युच्यते—प्राप्येति । योगमार्गप्रवृत्तः सर्वकर्मसंन्यासी वेदान्तश्रवणादि कुर्वन्नन्तराले म्रियमाणः कश्चित्पूर्वोपचितभोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृहयति कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः प्राप्य पुण्यकृतामश्वमे-

धयाजिनां लोकानर्चिरादिमार्गेण ब्रह्मलोकान् एकस्मिन्नपि भोगभूमिभेदापेक्षया बहुवचनम् । तत्र चोषित्वा वासमनुभूय शाश्वतीर्ब्रह्मपरिमाणेनाक्षयाः समाः संवत्सरान् तदन्ते शुचीनां शुद्धानां श्रीमतां विभूतिमतां महाराजचक्रवर्तिनां गेहे कुले भोगवासनाशेषसद्भावाद्जातशत्रुजनकादिवद्योगभ्रष्टोऽभिजायते भोगवासना-प्राबल्यात् ब्रह्मलोकान्ते सर्वकर्मसंन्यासायोग्यो महाराजो भवतीत्यर्थः ॥ ४१ ॥

शं० टी०—उक्तरीत्या समाधिं कृतवतो ब्रह्मविदो दुष्कर्मवशात्समाधिविघ्ने सति मृतस्य यतेर्दुर्गतिर्नास्ति किंतु सद्गतिरेवेत्याह—प्राप्येति । योगमार्गे प्रवृत्तो ब्रह्मविद्यतिरप्राप्तयोगसंसिद्धिः सन् मृत्वा 'वाजिमेधसहस्राणि राजसूयशतानि च । वाजपेयसहस्राणि अश्वमेधशतानि च ॥ एकस्य ज्ञानयोगस्य कलां नार्हन्ति षोडशीम्' इति 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इत्यश्वमेधादिक्रतुकोट्यपेक्षया ध्यानयोगलेशस्य महत्तरपुण्यकर्मत्वस्मरणात्परमतपस्त्वाच्च तत्पुण्यकर्ममाहिम्नैव स्वयं पुण्यकृतामश्वमेधादिमहाक्रतुकारिणां महालोकान् प्राप्य तत्र शाश्वतीः बह्वीः समाः संवत्सरानुषित्वा तत्रत्यभोगाननुभूयेत्यर्थः । तद्भोगक्षये पुनरिहलोके शुचीनां योनिबीजकर्मादिशुद्धिमतां श्रीमतां भाग्यवतां च गृहिणां गेहे वंशे योगभ्रष्टोऽभिजायते समुत्पन्नो भवति न तु कर्मभ्रष्टः कर्मिणः सति कर्मभ्रंशे पुण्यलोकप्राप्तिः शुचिश्रीमद्गेहे अभिजननं च न संभवति तैलपाकवत्साङ्गस्यैव कर्मणः फलावश्यंभावित्वनियमान्न तथा योगिनः तस्य देवतादर्शनवद्याव-द्योगानुष्ठानं तावत्तावत्फलवद्भवति तत एव योगभ्रंशेऽपि योगिनः पुण्यलोकप्राप्तिः शुचिश्रीमत्कुलप्रसूतिश्चेत्यर्थः ॥ ४१ ॥

श्री० टी०—तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह—प्राप्येति । पुण्यकारिणामश्वमेधादियाजिनां लोका-न्प्राप्य तत्र शाश्वतीः समाः बहून्संवत्सरानुषित्वा वाससुखमनुभूय शुचीनां सदाचाराणां श्रीमतां धनिनां गेहे स योगभ्रष्टो जन्म प्राप्नोति ॥ ४१ ॥

स० टी०—योगमार्गे प्रवृत्तः सन्योऽन्तराले मृतो विधेः ॥ स गत्वा साधको लोकानश्वमेधादियाजि-नाम् ॥ १ ॥ कोटीः संवत्सराणां स वासं कृत्वा ततः क्षये ॥ यथोक्तकारिणां गेहे धनिनां जायते सताम् ॥ २ ॥ वासनाशेषसद्भावादल्पवैराग्यवान्यदि ॥ जनकादिवदेवासौ राज्ञां गेहेऽभिजायते ॥ ३ ॥ ४१ ॥

भा० टी०—दुर्गत्यभावमुक्त्वा सुगतिमाह—प्राप्येति । योगभ्रष्टो योगमार्गे प्रवृत्तस्त्यक्तसर्वकर्मा तत्त्व-ज्ञानमलब्ध्वैव मृतः पुण्यकृतामश्वमेधादियाजिनां लोकांस्तैः प्राप्यान्ब्रह्मलोकादीन्प्राप्य तत्र च शाश्वतीः समाः असंख्यातान्संवत्सरानुषित्वा वासमनुभूय तद्भोगक्षये श्रीमतां धनदुर्मदान्धतां तेषां वारयति—शुचीनां यथोक्तेन स्वधर्माचरणेन पवित्राणां गेहे कुले जायते उत्पद्यते ॥ ४१ ॥

प० टी०—किं तर्हि तत्र, प्रथममल्पकालयोगभ्रष्टस्य गतिमाह—प्राप्येति । स योगभ्रष्टः पुण्यकृतामश्वमे-धयाजिनां लोकान् प्राप्य तत्र शाश्वतीः समा बहुतरसंवत्सरानुषित्वा भुक्त्वा शुचीनां सदाचारपरायणानां श्रीमतां धनिनां गेहे जायते उत्पद्यते ॥ ४१ ॥

रा० टी०—तर्हि किं प्राप्नोतीत्यत आह—प्राप्येति । पुण्यकृतान् पुण्यसंपाद्यान्लोकान्प्राप्य तेषु शाश्वतीः समाः अनेकसंवत्सरानुषित्वा शुचीनां श्रीमतां धनिनां गेहे अभिजायते ॥ ४१ ॥

अथवा योगिनामेव कुले भवति धीमताम् ॥
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

त० टी०—इयमुत्तमभोगाकाङ्क्षया योगभ्रष्टस्य गतिरुक्ता । इदानीं भोगानपेक्षकस्य बह्भ्यस्त-योगस्य कथञ्चिद्भ्रंशे ततोऽप्यतिश्रेष्ठं जन्म भवतीति पक्षान्तरमाह—अथवेति । शास्त्रज्ञानदार्ढ्येन विष-यभोगवासनाशून्यो ज्ञानवैराग्यादिगुणाढ्यः कथञ्चिद्योगाभ्यासाच्चलितश्चेद्भोगवासनाविरहात्पुण्यकृतां

लोकान् प्राप्य योगिनां योगाभ्यासवतामेव प्रमादकारणधनहीनानामेव शुचीनां धीमतां ज्ञानिनां ब्राह्मणानां कुले भवति जायते नतु श्रीमतां कर्मिणां ब्राह्मणानां राज्ञां वा कुले। यद्यपि शुचीनां श्रीमतां राज्ञां ब्राह्मणानां वा कुलेऽपि जन्म दुर्लभं बहुसुकृतसाध्यत्वाज्ज्ञानमार्गाविरोधित्वाच्च, तथाऽपि सात्त्विकानां धनहीनानां ज्ञानिनां योगाभ्यासवतां ब्राह्मणानां कुले यज्जन्म एतद्धि लोके दुर्लभतरमतिशयेन दुष्प्रापं, सर्वप्रमादकारणशून्यत्वेन मोक्षान्तरङ्गत्वात् ॥ ४२ ॥

म० टी०–द्वितीयं प्रतिपक्षान्तरमाह–**अथवेति**। श्रद्धावैराग्यादिकल्याणगुणाधिक्ये तु भोगवासनाविरहात्पुण्यकृतां लोकानप्राप्यैव योगिनामेव दरिद्राणां ब्राह्मणानां न तु श्रीमतां राज्ञां कुले भवति धीमतां ब्रह्मविद्यावताम्। एतेन योगिनामिति न कर्मिग्रहणं यच्छुचीनां श्रीमतां राज्ञां गृहे योगभ्रष्टजन्म तदपि दुर्लभं अनेकसुकृतसाध्यत्वान्मोक्षपर्यवसायित्वाच्च। यत्तु शुचीनां दरिद्राणां ब्राह्मणानां ब्रह्मविद्यावतां कुले जन्म एतद्धि प्रसिद्धं शुकादिवत् दुर्लभतरं दुर्लभादपि दुर्लभं लोके यदीदृशं सर्वप्रमादकारणशून्यं जन्मेति द्वितीयः स्तूयते भोगवासनाशून्यत्वेन सर्वकर्मसंन्यासार्हत्वात् ॥ ४२ ॥

शं० टी०–'मनोहराणां भोज्यानां युवतीनां च वाससाम्। वित्तस्यापि च सान्निध्याच्चलेच्चित्तं सतामपि ॥ तत्सान्निध्यं ततस्त्यक्त्वा मुमुक्षुर्दूरतो वसेत्' इतिन्यायेन विषयसान्निध्यस्यैव विक्षेपकत्वे श्रीमद्गेहे समुत्पन्नस्य तस्योत्तमभक्तस्य योगिनो विषयभोगानुषक्त्या रागद्वेषादिभिर्मनःक्षोभं विना पुनर्विवेकवैराग्यादिविज्ञानयोगश्च क्षिप्रं न सेत्स्यतीति योगसिद्धेः कालव्यवधानमसहमानः सन्नाह–**अथवेति**। अथवा श्रीमद्विलक्षणानां दरिद्राणां शुचीनां धीमतामेव योगिनां कुले भवति जायते। यद्वा योगी ब्रह्मविन्मृतिकाले यदि प्राक्तनकर्मवशात् हृदये विषयभोगेच्छावेगवान् तदा पुण्यकृताँल्लोकाननुभूय शेषानुभूत्यै श्रीमतां गेहे अभिजायते। यदि हृदये चित्तशोधकसत्कर्मविशेषवशात्तीव्रमोक्षेच्छावैराग्यवेगस्तदा स योगी, अथवा अथशब्द आनन्तर्यार्थः वाशब्दोऽवधारणार्थः। अथैव देहपातानन्तरमेव धीमतां ज्ञानिनां तत्रापि योगिनां ज्ञानयोगनिष्ठानामेव कुले भवति प्रभवतीत्यर्थः। ईदृशं तद्वैराग्यमोक्षेच्छावेगानुरूपं ब्रह्मनिष्ठानामेव ज्ञानिनां कुले समनन्तरभावि यज्जन्म तदेतद्दुर्लभतरं हि एतदत्यन्तदुर्लभं खलु गृहिणां ज्ञानित्वं दुर्लभं तत्रापि तादृशानां ब्रह्मनिष्ठानामेव कुले लोकान्तरं योन्यन्तरमगत्वा कालव्यवधानं विना यज्जननं दुर्लभतरमेव महत्तरेण तपसा लभ्यं भवति नत्वल्पेन तत एवोच्यते दुर्लभतरमिति। ननु योगिनामेव ज्ञानिनां गृहमेधिनां कुले भवतीति यदुक्तं तन्नोपपद्यते गृहिणां ब्रह्मवेदनाऽसंभवात् ज्ञानोत्पत्तेरधिकारासंभवाच्च शमदमवैराग्यसंन्यासाद्यन्तरङ्गसाधनशून्यानां बहिर्मुखानां तेषां श्रवणादिना ज्ञानमपरोक्षं न संभवति विना यतिं तत्रापि परमहंसान्। तदुक्तम् 'ब्रह्मात्मैकत्वविज्ञानं वेदान्तश्रवणादिना। जायते परहंसस्य यतेर्मुख्याधिकारिणः ॥ नाश्रमान्तरनिष्ठस्य' इति ततस्तेषां ज्ञानाभावे कुतो योगनिष्ठेति चेत्तर्हि धीमतां कर्मशास्त्रार्थज्ञानवतां योगिनां कर्मयोगिनां कुले भवतीति ब्रूम इति चेन्न, तथात्वे जन्मनो दुर्लभतरत्वाभावप्रसङ्गाच्छ्रोत्रियकुलाभिजननस्य सत्कर्मवत्साधारण्याद्ये ये सत्कर्मवन्तस्ते ते श्रोत्रियकुले एवाभिजायन्ते "रमणीयचरणा रमणीयां योनिमापद्येरन्" इतिश्रुतेः। ततो जन्मनो दुर्लभतरत्वानुपपत्तिप्रसूतार्थापत्त्या गृहिणामपि केषांचिदीश्वरप्रसादवतां शुद्धात्मनां ज्ञानं ज्ञानयोगित्वं चाभ्युपगन्तव्यम् अन्यथा वसिष्ठागस्त्यादीनां जनकाश्वपत्यादीनां च प्राचामाधुनिकानां च वाचस्पतिखण्डनकारादीनामनात्मज्ञत्वप्रसङ्गात्। तर्हि 'अथात–' इति सूत्रस्थाथशब्दसूचितश्रवणसाधनवैधुर्येऽपि श्रवणादिना ज्ञानसिद्धावथशब्दस्यानर्थक्यं स्यादिति चेन्न तेषामपि जन्मान्तरे शमदमसंन्यासादिसाधनवत्त्वस्योत्पन्नज्ञानेनानुमीयमानत्वादथशब्दस्यार्थवत्त्वोपपत्तेः। न च शमदमसंन्यासाद्युत्तमसाधनवच्छ्रवणादिजन्यज्ञानेन तेषां तत्रैव मुक्तिसिद्धौ पुनर्जनिकथा कुत इति

वाच्यं, तादृक्साधनसंपत्तावपि तेषां प्रतिबन्धवशात्सम्यग्ज्ञानानुत्पत्तौ मोक्षासंभवाज्जन्मान्तरे तु तन्निवृत्त्या सम्यग्ज्ञानं योगनिष्ठा परमोपशान्तिरपि संभवति ' क्रमात्तस्यापि जायते ' इति स्मृतिवाक्यशेषात्क्रमादाश्रमक्रमाज्जन्मक्रमाद्वा चित्तपरिपाकक्रमाद्वा तस्याप्याश्रमान्तरवतोऽपि ज्ञानं जायत इत्यर्थः । तर्हि तेषां व्युत्थानप्रसङ्ग इति न च वाच्यं विषयानुभावककर्मणा व्युत्थाननिरोधसंभवान्निरन्तरब्रह्मनिष्ठानां नित्यानन्दामृतरसपायिनां तेषां संन्याससाध्याभावाच्च । तर्हि विषयानुभूतेर्ब्रह्मानुभूतेश्च परस्परविरोधादेकाधिकरणत्वानुपपत्तिरिति न वक्तव्यं तद्दृष्ट्या विषयानुभूतेराभासत्वेन स्वप्नार्थवन्मिथ्यात्वोपपत्तेः । तर्हि व्यवहारलोपप्रसङ्ग इति चेन्न, कचित्क्रियते कचिन्न क्रियते तेन तेषां सर्वमिथ्यात्वदर्शिनां प्रत्यवायाद्यनर्थाभावात् । ' शौचमाचमनं स्नानं न तु चोदनया चरेत् । अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः ' इति ज्ञानिनामीश्वरवद्विधितन्नियमभङ्गदोषाद्यभावस्मरणात् ।। ४२ ।।

श्री० टी०—अल्पकालाभ्यस्तयोगभ्रंशे गतिरियमुक्ता, चिराभ्यस्तयोगभ्रंशे तु पक्षान्तरमाह—**अथेति** । योगनिष्ठानां धीमतां ज्ञानिनामेव कुले जायते न तु पूर्वोक्तानामनारूढयोगाना कुले जायते । एतज्जन्म स्तौति—**एतदिति** । ईदृशं यज्जन्म एतद्धि लोके दुर्लभतरम्, मोक्षहेतुत्वात् ।। ४२ ।।

स० टी०—वैराग्यादिगुणाधिक्ये वासनाविरहान्मुनिः ।। योगभ्रष्टः सुकृतिनां लोकानप्राप्य योगिनाम् ।। १ ।। ब्राह्मणानां दरिद्राणां ब्रह्मविद्यावतां कुले ।। जायते तत्कुले जन्म दुर्लभादपि दुर्लभम् ।। २ ।। पुण्यसाध्यतया जन्म राज्ञां गेहेऽपि दुर्लभम् ।। तस्मादपीदृशं जन्म योगिगेहेऽतिदुर्लभम् ।। ३ ।। सप्तव्याधादशार्णेषु मृगाः कालंजरे गिरौ ।। चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ।। ४ ।। तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।। प्रस्थिता दीर्घमध्वानं यूयं तेभ्योऽवसीदथ ।। ५ ।। तदुक्तं हरिवंशेऽत्र वंशप्रस्तावनस्थले ।। ६ ।। ४२ ।।

भा० टी०—वैराग्याधिक्ये पक्षान्तरमाह—**अथवेति** । योगिनामेवेश्वराराधनलक्षणयोगवतां धनादिरक्षणविषयभोगादिव्यग्रत्वे योगित्वं न संभवतीत्यतः पूर्वपक्षे श्रीमतामित्युक्तत्वाच्च भाष्ये दरिद्राणामित्युक्तमत एव तत्त्वविचारयोग्यबुद्धिमतां कुले भवति जायते यदीदृशं जन्म तदेतल्लोके दुर्लभतरमतिदुर्लभं पुनःप्रतिबन्धकाभावात् श्रीमतां कुलापेक्षया दरिद्राणां कुले जन्म श्रेष्ठतरमित्यर्थः ।। ४२ ।।

प० टी०—अथ चिराभ्यस्तयोगभ्रंशे पक्षान्तरमाह—**अथवेति** । अथवा योगिनां योगनिष्ठानां तथा धीमतां ज्ञानिनामेव कुले जायते न तु पूर्वोक्तानामनारूढयोगानाम् एतदीदृशं यज्जन्म तद्दुर्लभतरं मोक्षहेतुत्वात् ।। ४२ ।।

रा० टी०—धीमतां ज्ञानिनां योगिनां कुले वंशे वा भवति । यत् ईदृक् जन्म उक्तं द्विविधं जन्म एतत् दुर्लभं कष्टलभ्यं न सुलभसाध्यं हि प्रसिद्धम् ।। ४२ ।।

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम्[१] ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ।। ४३ ।।

त० टी०—उक्तस्य जन्मद्वयस्य दुर्लभत्वं यतस्तद्दर्शयति—**तत्रेति** । तत्र द्विविधेऽपि जन्मनि पूर्वदेहे भवं पौर्वदैहिकं सुप्तप्रबुद्धवचमेवात्मपरमात्मध्यानविषयकबुद्धिसंयोगं लभते । ततस्तल्लाभानन्तरं भूयोऽधिकसंसिद्धौ यतते । यथा पुनरन्तरायहतो न भवति तथा यत्नं कुरुते ।। ४३ ।।

म० टी०—एतादृशजन्मद्वयस्य दुर्लभत्वं कस्मात् यस्मात्—**तत्रेति** । तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहे भवं पौर्वदेहिकं सर्वकर्मसंन्यासगुरूपसदनश्रवणमननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं ताव-

१ देहिकमिति मधुसूदनश्रीधरपरम्परप्रपाकारसंमतः पाठः ।

त्पर्यन्तमेव तं ब्रह्मात्मैक्यविषयया बुद्ध्या संयोगं तत्साधनकलापमिति यावत् लभते प्राप्नोति । न केवलं लभत एव किंतु ततस्तल्लाभानन्तरं भूयोऽधिकं लब्धाया भूमेरग्रिमां भूमिं संपादयितुं संसिद्धौ संसिद्धिर्मोक्षस्तन्निमित्तं यतते च प्रयत्नं करोति च यावन्मोक्षं भूमिकाः संपादयतीत्यर्थः । हे कुरुनन्दन तवापि शुचीनां श्रीमतां कुले योगभ्रष्टजन्म जातमिति पूर्ववासनावशादनायासेनैव ज्ञानलाभो भविष्यतीति सूचयितुं महाप्रभावस्य कुरोः कीर्तनम् । अयमर्थो भगवद्वसिष्ठवचने व्यक्तः । यथा श्रीरामोवाच ‘ एकामथ द्वितीयां वा तृतीयां भूमिकामुत । आरूढस्य मृतस्याथ कीदृशी भगवन् गतिः ’ । पूर्वं हि सप्तभूमयो व्याख्याताः तत्र नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याच्छमदमश्रद्धातितिक्षासर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा शुभेच्छाख्या प्रथमा भूमिका साधनचतुष्टयसंपदिति यावत् । ततो गुरुमुपसृत्य वेदान्तवाक्यविचारणात्मिका द्वितीया भूमिका । श्रवणमननसंपदिति यावत् । ततः श्रवणमननपरिनिष्पन्नस्य तत्त्वज्ञानस्य निर्विचिकित्सतारूपा तनुमानसा नाम तृतीया भूमिका निदिध्यासनसंपदिति यावत् । चतुर्थी भूमिका तु तत्त्वसाक्षात्कार एव । पञ्चमषष्ठसप्तमभूमयस्तु जीवन्मुक्तेरवान्तरभेदा इति तृतीये प्राग्व्याख्यातम् । तत्र चतुर्थीं भूमिं प्राप्तस्य मृतस्य जीवन्मुक्त्यभावेऽपि विदेहकैवल्यं प्रति नास्त्येव संशयः तदुत्तरभूमित्रयं प्राप्तस्तु जीवन्नपि मुक्तः किमु विदेह इति नास्त्येव भूमिकाचतुष्टये शङ्का । साधनभूतभूमिकात्रये तु कर्मत्यागाज्ज्ञानालाभाच्च भवति शङ्केति तत्रैव प्रश्नः । श्रीवसिष्ठः—‘ योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः । भूमिकांशानुसारेण क्षीयते. पूर्वदुष्कृतम् ॥ ततः सुरविमानेषु लोकपालपुरेषु च । मेरूपवनकुञ्जेषु रमते रममणीसखः ॥ ततः सुकृतसंभारे दुष्कृते च पुराकृते । भोगक्षयात्परिक्षीणे जायन्ते योगिनो भुवि ॥ शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सताम् । जनित्वा योगमेवैते सेवन्ते योगवासिताः ॥ तत्र प्राग्भावनाऽभ्यस्तं योगभूमिक्रमं बुधाः । दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिकाक्रमम् ॥’ इति । अत्र प्रागुपचितभोगवासनाप्राबल्यादल्पकालाभ्यस्तवैराग्यवासनादौर्बल्येन प्राणोत्क्रान्तिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्मसंन्यासी यः स एवोक्तः यस्तु वैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यप्रकटितपरमेश्वरप्रसादवशेन प्राणोत्क्रान्तिसमयेऽनुद्भूतभोगस्पृहः संन्यासी भोगव्यवधानं विनैव ब्राह्मणानामेव ब्रह्मविदां सर्वप्रमादकारणशून्ये कुले समुत्पन्नस्तस्य प्राक्तनसंस्काराभिव्यक्तेरनायासेनैव संभवान्नास्ति पूर्वस्येव मोक्षं प्रत्याशङ्केति स च वसिष्ठेनोक्तो, भगवता तु परमकारुणिकेनाथवेति पक्षान्तरं कृत्वोक्त एव । स्पष्टमन्यत् ॥ ४३ ॥

शं० टी०—‘ शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः । मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शान्तिम ’ इत्यादिवचनप्रामाण्याल्लक्षकोटिसंख्याकेषु गृहिष्वपि यः कश्चिदीश्वरप्रसादपात्रीभूतो गृहस्थो ज्ञानी ज्ञानयोगी च संभवति यतस्ततो ज्ञानिनामेव योगिनां गृहिणां गृहे योगभ्रष्टस्याशुयोगसिद्ध्यै जन्माङ्गीकर्तव्यमिममेवार्थं स्पष्टयितुमाह—**तत्रेति** । तत्र ज्ञानवतां योगिनां कुले जन्म लब्ध्वा स योगी पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं पूर्वजन्मन्यनुष्ठितश्रवणादिसंभवं ज्ञानिना योगवता च पित्रादिनोपदिष्टं तं बुद्धिसंयोगं यद्धर्मवान् पिता भवति तमेव धर्मं पुत्रायोपदिशति प्रायेण तदिदं लोकप्रसिद्धं यः प्राक्जन्मन्यनुष्ठितत्वादग्निवदन्तर्लीनात्मना स्थितः ब्रह्मविदा पित्रा वेदान्तवाक्यैर्व्यक्तीकृतस्तं बुद्धिसंयोगं बुद्धिर्ज्ञानं परावरैकत्वप्रवेदनलक्षणं तदेव समीचीनो योगो मुक्तिसिद्धौ परमोपायस्तं बुद्धिसंयोगं ज्ञानयोगं लभते प्राग्जन्मन्येवानुबद्धत्वात्स्वल्पोपदेशेनैवाल्पकालेन प्राप्नोतीत्यर्थः । एतावन्मात्रेण पुमान् कृतार्थो न भवति ज्ञानस्य सम्यक्त्वसंपादनेन विना ततो मुमुक्षोस्तदवश्यं संपादनीयमिति सूचयितुमाह—**यतत इति** । ततः पित्रादेर्ज्ञानयोगलब्ध्यनन्तरं संसिद्धौ ज्ञानस्य सम्यक्त्वसिद्धिनिमित्तं भूयः पुनरस्मिन् जन्मन्यपि यतते च प्रयत्नमपि करोति । यद्वा ततस्तस्मादेव संस्कारवेगादेव भूयोऽधिकतरं यतते च ज्ञानस्याप्रतिबद्धत्वसिद्धये पूर्ववन्नियमेन गुरूपदिष्टरीत्या नित्यं निरन्तरं च समाधिं करोतीत्यर्थः ॥ ४३ ॥

श्री० टी०—ततः किमत आह—तत्रेतिसार्धेन । तत्र द्विःप्रकारेऽपि जन्मनि पूर्वदेहे भवं पौर्वदेहिकं तमेव ब्रह्मविषयया बुद्ध्या संयोगं लभते । ततश्च भूयोऽधिकं संसिद्धौ मोक्षे प्रयत्नं करोति ॥ ४३ ॥

स० टी०—यतस्तेषां कुले बुद्ध्या संयोगं लभतेऽव्यया ॥ पूर्वदेहसमुद्भूतप्रबलाङ्कुरयानया ॥ १ ॥ पूर्वस्मादेव संस्काराद्यत्नं बहुतरं ततः ॥ करोति तत्त्वविज्ञानसंसिद्धौ योगतत्परः ॥ २ ॥ तवापि श्रीमतां गेहे जन्मास्ति कुरुनन्दन ॥ अनायासात्तव ज्ञानं भविष्यत्येवमाशयः ॥ ३ ॥ अयमर्थोऽपि वासिष्ठे व्यक्त-श्रीरामचोदनात् ॥ एकामथ द्वितीयां वा तृतीयां भूमिकामुत ॥ ४ ॥ आरूढस्य मृतस्याथ कीदृशी भगवन्गतिः ॥ योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः ॥ ५ ॥ भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम् ॥ ततः सुरविमानेषु लोकपालपुरेषु च ॥ ६ ॥ मेरूपवनकुञ्जेषु रमते रमणीसखः ॥ ततः सुकृतसंभारे दुष्कृते च पुरा कृते ॥ ७ ॥ भोगक्षयात्परिक्षीणे जायन्ते योगिनो भुवि ॥ शुचीनां श्रीमतां गेहे कुले गुणवतां सताम् ॥ ८ ॥ जनित्वा योगमेवैते सेवन्ते योगवासिताः ॥ तत्र प्राग्भावनाभ्यस्तं योगं भूमिक्रमं बुधाः ॥ ९ ॥ दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिकाक्रमम् ॥ १० ॥ ४३ ॥

भा० टी०—एतादृशजन्मनो दुर्लभतरत्वं कस्मात् यस्मात्तत्र योगिनां कुले तं पौर्वदैहिकं पूर्वदेहे भवं बुद्धिसंयोगं बुद्ध्या निष्कामकर्मणा शुद्धया श्रवणादिसंपन्नया संयोगं लभते प्राप्नोति ततस्तस्मात्पूर्वदेहाभ्या-ससंस्काराद्भूयो बहुतरं संसिद्धौ मोक्षार्थं यतते तत्त्वसाक्षात्कारं यत्नेन संपादयतीत्यर्थः । यत्त्वेतादृशजन्म-द्वयदुर्लभत्वं कस्माद्यस्मात् तत्र द्विप्रकारेपि जन्मनीति तदुपेक्ष्यमथवेत्यादिनोक्तपक्षस्य श्रैष्ठ्यप्रतिज्ञाया हेतोरावश्यकत्वात् अन्यथोभयोरपि साम्यप्रसङ्गे प्रतिज्ञाघातापत्तेः । योगिनां श्रीमतां कुले जातस्य यथा योगित्वं बुद्धिमत्त्वं च भवति तथा क्षात्रधर्मेऽतिकुशलस्य कुरोर्वंशे जातस्य तवापि स्वकुलोचितधर्मसंबन्ध आवश्यक इति सूचयन्नाह—हे कुरुनन्दनेति ॥ ४३ ॥

प० टी०—तत्र किं भवतीत्याह सार्धेन—तत्रेति । तत्र योगिनां कुले तं पौर्वदेहिकं प्राक्संस्कारागतं बुद्धिसंयोगं लभते । ततस्तेन बुद्धिसंयोगेन संसिद्धौ मोक्षसाधने यतते बहुतरं प्रयत्नं करोति ॥ ४३ ॥

रा० टी०—तत्र द्विप्रकारेऽपि जन्मनि पौर्वदैहिकं पूर्वदेहे भवं तं बुद्धिसंयोगं भगवति मनोयोगं ध्यानमिति यावत् । लभते ततो भूयः पौर्वदैहिकादधिकं संसिद्धौ ध्यानसंपूर्तौ यतते यत्नं करोति हे कुरुनन्दन ॥ ४३ ॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

त० टी०—ननु योगिनां कुले जातस्य भोगव्यवधानाभावाद्भवतु सुप्तप्रबुद्धवत् झटिति योगे प्रवृत्तिः । श्रीमतां गृहे जातस्य तु बहुभोगजन्यप्रमादसंभवात्कथं पौर्वदैहिकबुद्धियोगलाभेन योगे प्रवृत्तिरिति चेत्तत्राह—पूर्वाभ्यासेनेति । पूर्वजन्मनि कृतोऽभ्यासः पूर्वाभ्यासस्तज्जन्यसंस्कारेण स योगभ्रष्टोऽवशोऽपि बहुकालभोगान्तरायात्स्वयमनिच्छन्नपि ह्रियते, बलात्कारेण स्ववशीक्रियते भोग-वासनाया निवर्त्य योग एव प्रवर्त्यते । अतो योगस्य जिज्ञासुरपि योगस्वरूपं ज्ञातुमिच्छुरपि नतु प्राप्त-योगः, तथाभूतोऽपि प्राग्जन्मार्जितयोगस्योद्बुद्धज्ञानसंस्कारादिह जन्मनि शब्दब्रह्मातिवर्तते, कर्म-प्रतिपादकवेदपूर्वभागमतिवर्तते वेदोक्तकर्मफलमतिक्रम्य वर्तते । कर्माधिकारमुपेक्ष्य ज्ञानाधिकार एव निष्ठां करोतीत्यर्थः ॥ ४४ ॥

म० टी०—ननु यो ब्रह्मविदां ब्राह्मणानां सर्वप्रमादकारणशून्ये कुले समुत्पन्नस्तस्य मध्ये विषयभोगव्य-वधानाभावादव्यवहितप्राग्भवीयसंस्कारोद्बोधात्पुनरपि सर्वकर्मसंन्यासपूर्वको ज्ञानसाधनलाभो भवतु नाम ।

यस्तु श्रीमतां महाराजचक्रवर्तिनां कुले बहुविधविषयभोगव्यवधानेनोत्पन्नस्तस्य विषयभोगवासनाप्राबल्यात्प्रमादकारणसंभवाच्च कथमतिव्यवहितज्ञानसंस्कारोद्बोधः क्षत्रियत्वेन सर्वकर्मसंन्यासानर्हस्य कथं वा ज्ञानसाधनलाभ इति तत्रोच्यते—**पूर्वाभ्यासेनेति** । अतिचिरव्यवहितजन्मोपचितेनापि तेनैव पूर्वाभ्यासेन प्रागर्जितज्ञानसंस्कारेणावशोऽपि मोक्षसाधनायाप्रयतमानोऽपि ह्रियते स्ववशीक्रियते अकस्मादेव भोगवासनाभ्यो व्युत्थाप्य मोक्षसाधनोन्मुखः क्रियते ज्ञानवासनाया एवाल्पकालाभ्यस्ताया अपि वस्तुविषयत्वेनावस्तुविषयाभ्यो भोगवासनाभ्यः प्राबल्यात्पश्य यथा त्वमेव युद्धे प्रवृत्तो ज्ञानायाप्रयतमानोऽपि पूर्वसंस्कारप्राबल्यादकस्मादेव रणभूमौ ज्ञानोन्मुखोऽभूरिति अत एव प्रागुक्तं नेहाभिक्रमनाशोऽस्तीति । अनेकजन्मसहस्रव्यवहितोऽपि ज्ञानसंस्कारः स्वकार्यं करोत्येव सर्वविरोध्युपमर्देनेत्यभिप्रायः । सर्वकर्मसंन्यासाभावेऽपि हि क्षत्रियस्य ज्ञानाधिकारः स्थित एव यथा पाटच्चरेण बहूनां रक्षिणां मध्ये विद्यमानमपि अश्वादिद्रव्यं स्वयमनिच्छदपि तान्सर्वानभिभूय स्वसामर्थ्यविशेषादेवापह्रियते पश्चात्तु कदापहृतमिति विमर्शो भवति एवं बहूनां ज्ञानप्रतिबन्धकानां मध्ये विद्यमानोऽपि योगभ्रष्टः स्वयमनिच्छन्नपि ज्ञानसंस्कारेण बलवता स्वसामर्थ्यविशेषादेव सर्वान् प्रतिबन्धकानभिभूयात्मवशीक्रियत इति हृञः प्रयोगेण सूचितम् । अत एव संस्कारप्राबल्यात् जिज्ञासुर्ज्ञातुमिच्छुरपि योगस्य मोक्षसाधनज्ञानस्य विषयं ब्रह्म प्रथमभूमिकायां स्थितः संन्यासीति यावत् सोऽपि तस्यामेव भूमिकायां मृतोऽन्तराले बहून् विषयान् भुक्त्वा महाराजचक्रवर्तिनां कुले समुत्पन्नोऽपि योगभ्रष्टः प्रागुपचितज्ञानसंस्कारप्राबल्यात् तस्मिञ्जन्मनि शब्दब्रह्म वेदं कर्मप्रतिपादकं अतिवर्तते अतिक्रम्य तिष्ठति कर्माधिकारातिक्रमेण ज्ञानाधिकारी भवतीत्यर्थः । एतेनापि ज्ञानकर्मसमुच्चयो निराकृत इति द्रष्टव्यं समुच्चये हि ज्ञानिनोऽपि कर्मकाण्डातिक्रमाभावात् ॥ ४४ ॥

शं० टी०—निरन्तरं समाध्यनुष्ठाने कारणमाह—**पूर्वाभ्यासेनेति** । हि यस्मात्कारणात्पूर्वाभ्यासेन पूर्वस्मिन् जन्मनि श्रद्धया तीव्रमोक्षेच्छया अत्यन्तवैराग्येण च चिरकालं नित्यं निरन्तरं च नियमेन कृतो योऽभ्यासः संततसमाध्यावृत्तिस्तेनैव संस्कारात्मना बुद्धिस्थेनाभ्यासवेगेन सर्वाणि कर्माणि विधिना त्याजयित्वा स योगभ्रष्टो यतिः स्वयमवशोऽप्यनिच्छन्नपि ह्रियते बलात्कारेण योगनिष्ठायामेव स्थाप्यते न तु कर्मनिष्ठायां नैव विषयभोगनिष्ठायां च तस्मादेव संसिद्धिनिमित्तं भूयः पूर्वस्मादधिकतरं यतते चेति पूर्वेणान्वयः । ननु "अहरहः संध्यामुपासीत । उदिते सूर्ये प्रातर्जुहोति । दर्शपौर्णमासाभ्यां यजेत । यावज्जीवमग्निहोत्रं जुहोति " ' श्रौतं चापि तथा स्मार्तं कर्मालम्ब्य वसेद्द्विजः । तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत् ' इत्यादिश्रुतिस्मृत्युपदेशमनादृत्यैव ब्राह्मणः सन् श्रौतं स्मार्तं च कर्म सर्वं संन्यस्यायं कथं योगनिष्ठायामेव प्रवर्तत इत्याशङ्कायाम् ' जन्मान्तरसहस्रेषु बुद्धिर्या भाविता पुरा । तामेव भजते जन्तुरुपदेशो निरर्थकः ' इतिन्यायेन जन्मान्तरे कर्मी चेत्कर्मरतो धर्मी चेद्धर्मरतः पापी चेत्पापरतो भक्तश्चेद्भक्तिरतो ज्ञानी चेज्ज्ञानरतो योगी चेद्योगरतो भवति स्वस्वसंस्कारानुरूपेण नैवोपदेशतत्परो भवति विना संस्कारेण जनस्तथैवायमपि वेदशास्त्रादिकं सर्वमधीत्य तदर्थं च विचार्य " न कर्मणा न प्रजया " इत्यादिश्रुतिवाक्यैः कर्मणो मोक्षाऽसाधनत्वं निश्चित्य प्राक्तनज्ञानयोगाभ्याससंस्कारवेगात्कर्म वैदिकं च सर्वं संन्यस्य ब्रह्मनिष्ठायामेव तिष्ठतीति किमु वक्तव्यं मुमुक्षुरपि सर्वं कर्म संन्यस्य श्रवणादावेव वर्तते इत्याह—**जिज्ञासुरिति** । योगस्य श्रवणादिसंजातविज्ञानवन्तं योगिनं स्वभावं ब्रह्मभावं योजयति गमयतीति योगो निर्विशेषः परमात्मा परं ब्रह्म तस्य योगस्य जिज्ञासुस्तत्स्वरूपं ज्ञातुमिच्छुर्जिज्ञासुर्मुमुक्षुरपि मोक्षैककामनया शब्दब्रह्म वेदस्तं तदुपदेशं तत्प्रतिपाद्यं कर्म चातिवर्तते " एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् " इत्यादिश्रुतिस्मृतिबलाज्जिज्ञासुरपि वेदं वेदोक्तं कर्म च सर्वं संन्यस्य श्रवणादावेव प्रवर्तत इत्यर्थः ॥ ४४ ॥

श्री० टी०—तत्र हेतुः—पूर्वेति । तेनैव पूर्वदेहकृताभ्यासेनावशोऽपि कुतश्चिदन्तरायादनिच्छन्नपि संह्रियते विषयेभ्यः परावर्त्य ब्रह्मनिष्ठः क्रियते । तदेवं पूर्वाभ्यासवशेन प्रयत्नं कुर्वन् शनैर्मुच्यत इतीममर्थं कैमुत्यन्यायेन स्फुटयति—जिज्ञासुरिति सार्धेन । योगस्य स्वरूपं जिज्ञासुरेव केवलं न तु प्राप्तयोगः एवंभूतो योगे प्रविष्टमात्रोऽपि पापवशाद्योगभ्रष्टोऽपि शब्दब्रह्म वेदमतिवर्तते वेदोक्तकर्मफलान्यतिक्रामति तेभ्योऽधिकं फलं प्राप्य मुच्यत इत्यर्थः ॥ ४४ ॥

स० टी०—पूर्वजन्मकृताभ्याससंस्कारेणावशोऽपि सन् ॥ मोक्षमार्गे प्रवृत्तोऽपि स्ववशीक्रियते बलात् ॥ १ ॥ अकस्मादेव व्युत्थाप्य भोगवासनतो जनः ॥ ज्ञानसंस्कारप्राबल्यात्क्रियते साधनोन्मुखः ॥ २ ॥ अल्पकालमपि ज्ञानाभ्यासवासनया तया ॥ सम्यगभ्यस्तया तस्या वासनाया विशेषतः ॥ ३ ॥ सद्वस्तुविपयत्वेन प्राबल्यादन्यगोचरात् ॥ यथा त्वमेव युद्धेऽस्मिन्पूर्वाभ्यासवशेन च ॥ ४ ॥ ज्ञानाभ्यासोन्मुखोऽकस्मादेवाभूरिति चाशयः ॥ अतः संस्कारप्राबल्याज्ज्ञातुमिच्छुरपीह यः ॥ ५ ॥ मोक्षसाधनबोधस्य विषयं ब्रह्मचिद्घनम् ॥ भुक्त्वा भोगान्बहून्स्वर्गे जन्म प्राप्योत्तमे कुले ॥ ६ ॥ योगभ्रष्टोऽपि वेदोक्तकर्मानुष्ठानजं फलम् ॥ अतीत्य वर्तते तर्हि किं वाच्यं ब्रह्मवेदिनः ॥ ७ ॥ ४४ ॥

भा० टी०—कथंभूतं बुद्धिसंयोगं लभत इत्यपेक्षायां तेनैव पूर्वाभ्यासेनावशस्यापि योगभ्रष्टस्य बुद्धिप्रत्येवाहरणरूपमित्याह—पूर्वेति । यः पूर्वजन्मनि कृतोभ्यासस्तेनैव बलवता हि यस्मादवशः पित्राद्यधीनोऽपि सः योगभ्रष्टो ह्रियते स्ववशीक्रियते योगाभ्याससंस्काराद्बलवत्तरस्याधर्मस्य प्रतिबन्धकस्याभावात् '। प्रतिबन्धे सत्यपि पूर्वाभ्यासस्तत्क्षयं प्रतीक्षते नतु तस्य नाशोऽस्ति एतदेव कैमुत्येन द्रढयति—योगस्य जिज्ञासुर्न तु यतमानो योगी सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलमतिवर्तते मुञ्चति किमुत यो योगं ज्ञात्वा तन्निष्ठोऽभ्यासं कुर्यात् । एतेन ननु योगिनां दरिद्राणां कुले जातस्य बुद्धिसंयोगोऽस्तु नाम शुचीनां श्रीमतां कुले उत्पन्नस्य द्रव्यजनितभोगादिप्रतिबन्धवशाद्बुद्धिसंयोगो न भविष्यतीत्याशङ्कापि परास्ता ॥४४॥

प० टी०—तत्र हेतुमाह—पूर्वेति । तेनैव पूर्वाभ्याससंस्कारेणावशोऽपि कुतश्चिदन्तरायादनिच्छन्नपि ह्रियते बलात्कारेण विषयेभ्यः परावर्त्य ब्रह्मनिष्ठः क्रियते । तदुक्तं विष्णुपुराणे ' अनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिमान् । यद्यन्तरायदोषेण दुष्यते ह्यस्य मानसे । जन्मान्तरैरस्य सतो मुक्तिः पूर्वस्य जायते ? । विनिष्पन्नसमाधिस्तु मुक्तिमत्रैव जन्मनि । प्राप्नोति योगी योगाग्निदग्धकर्मा च योऽचिरात् ॥' इति । अथ योगसामर्थ्यमाह—जिज्ञासुरिति । योगस्वरूपं जिज्ञासुरपि योगप्रविष्टमात्रोऽपि शब्दब्रह्मातिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीन्यतिवर्तते अतिक्रामति तेभ्योऽधिकं फलं प्राप्य मुच्यत इत्यर्थः। एवं मन्दप्रयत्नोऽपि योगी परां गतिं याति ॥ ४४ ॥

रा० टी०—पूर्वेति। तेनैव पूर्वाभ्यासेनावशोऽपि सन् ह्रियते ध्यानादौ बुद्धिपूर्वं स्वरसतया प्रवृत्तिहीनोऽपि पूर्वाभ्यासवशात् ध्यानादिकर्मणि प्रवर्तत इत्यर्थः । योगभ्रष्टस्य पुण्यलोकादिकमिस्थेतत्कैमुत्येनाप्याह—जिज्ञासुरपीति। योगस्य ध्यानयोगस्य जिज्ञासुरपि केवलं योगज्ञानेच्छुरपि। "न लोकान्यय—" इति नत्वा निर्दिष्टस्य अनित्यत्वाद्योगस्येति साधु। शब्दब्रह्मविधिनिषेधरूपशब्दब्रह्मातिवर्तेत विधिनिषेधातीतो भवति मुक्तो भवतीति यावत् । किमु किंचित्कालं योगानुष्ठातेति भावः ॥ ४४ ॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

त० टी०—किं तर्हि कर्मप्रतिपादकवेदातिवर्तनात्तस्मिन्नेव जन्मनि सिद्धयोगो भूत्वा मुच्यते जन्मान्तरे वेत्यपेक्षायामाह—प्रयत्नादिति । पूर्वमभ्यासवैराग्यशैथिल्याद्योगभ्रंशात्पुनर्जन्म जातमिदानीं

पुनर्जन्म यथा न स्यात्तथा यतितव्यमिति व्यवसायं कृत्वा प्रयत्नात्पूर्वकृतयत्नादपि प्रकर्षेणाधिकं यतमानोऽतिप्रयत्नं कुर्वन् योगी पूर्वाभ्यस्तयोगसंस्कारवान् तेनैव योगे प्रयत्नविशेषजन्यपावनत्वेन संशुद्धकिल्बिषः सम्यक् शुद्धानि धौतानि किल्बिषाणि योगप्रतिबन्धकान्यनेकजन्ममलानि यस्य सः, अत एवानेकैर्जन्मभिः कृतयोगाभ्यासाच्चरमजन्मनि संसिद्धः सम्यक्सिद्धध्यानसंपन्नः, ततस्तदनन्तरमेव परां गतिं मुक्तिरूपामुत्कृष्टां गतिं फलं याति प्राप्नोति ॥ ४९ ॥

म० टी०—यदा चैवं प्रथमभूमिकायां मृतोऽपि अनेकभोगवासनाव्यवहितमपि विविधप्रमादकारणवति महाराजकुलेऽपि जन्म लब्ध्वापि योगभ्रष्टः पूर्वोपचितज्ञानसंस्कारप्राबल्येन कर्माधिकारमतिक्रम्य ज्ञानाधिकारी भवति तदा किमु वक्तव्यं द्वितीयायां तृतीयायां वा भूमिकायां मृतो विषयभोगान्ते लब्धमहाराजकुलजन्मा यदि वा भोगमकृत्वैव लब्धब्रह्मविद्ब्राह्मणकुलजन्मा योगभ्रष्टः कर्माधिकारातिक्रमेण ज्ञानाधिकारी भूत्वा तत्साधनानि संपाद्य तत्फललाभेन संसारबन्धनान्मुच्यत इति । तदेतदाह—**प्रयत्नादिति** । प्रयत्नात्पूर्वकृतादप्यधिकमधिकं यतमानः प्रयत्नातिरेकं कुर्वन् योगी पूर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्धकिल्बिषः धौतज्ञानप्रतिबन्धकपापमलः अत एव संस्कारोपचयात्पुण्योपचयाच्च अनेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तचरमजन्मा ततः साधनपरिपाकाद्याति परां प्रकृष्टां गतिं मुक्तिं नास्त्येवात्र कश्चित्संशय इत्यर्थः ॥ ४९ ॥

शं० टी०—योगविषये तीव्रमोक्षेच्छावैराग्याभ्यां कृताधिकतरप्रयत्नस्य यतेः फलमाह—**प्रयत्नादिति** । प्रयत्नात्समाधौ प्रकृष्टो यत्नः प्रयत्नस्तस्मात्संसिद्धौ यतमानस्तत्परतया नित्यं निरन्तरं च नियमेन समाधिनिष्ठां कुर्वाणस्तु कालान्तरफलसिद्धेर्मन्दप्रयत्नाद्भिक्षोरेनं व्यावर्तयितुं तु शब्दः । प्रकृष्टप्रयत्नस्तीव्रमोक्षेच्छुर्योगी ब्रह्मविद्यतिः संशुद्धकिल्बिषः निरन्तरसमाधिनिष्ठया सम्यक् शोधितं निर्यापितं किल्बिषमज्ञानतत्कार्यलक्षणं यस्य सः संशुद्धकिल्बिषः निःशेषविनष्टबाह्यवासनातत्कार्यकामकर्मफलः सन्ननेकजन्मसंसिद्धः अनेकेष्वेकव्यतिरिक्तेषु कपिञ्जलाधिकरणन्यायेन बहुवचनस्य त्रित्वे पर्यवसानादेकद्वित्रिषु जन्मसु संसिद्धः संसिद्धिः सम्यग्दर्शनं तद्वान् संसिद्धोऽप्रतिबद्धविज्ञानो निःशेषविनष्टभेदप्रत्ययो भूत्वा ततस्तेन सम्यग्दर्शनेनैव परां परमपुरुषार्थभूतां गतिं स्वात्मनाऽधिगम्यत इति गतिः स्वस्वरूपभूता परमावस्था तां विदेहमुक्तिं याति निर्विशेषनित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाऽद्वितीयब्रह्मात्मना स्वेन रूपेण तिष्ठतीत्यर्थः । एतेन तीव्रमोक्षेच्छोर्यतेः श्रवणमनननिदिध्यासासमाधिषु क्रियान्तरानवकाशेनाधिकतरप्रयत्नेन भवितव्यमल्पप्रयत्नस्य तु चिरतरेणैव कालेन मुक्तिरिति सूचितं भवति ॥ ४९ ॥

श्री० टी०—यदेवं मन्दप्रयत्नोऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा ततः श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः ॥ ४९ ॥

स० टी०—योगभ्रष्टो वरं जन्म लब्ध्वा ब्रह्मविदां कुले ॥ तत्त्वज्ञानेऽधिकारी सञ्ज्ञानसाधनतत्परः ॥ १ ॥ ज्ञानलाभेन संसारबन्धनान्मुच्यते त्विति ॥ यतमानोऽधिकं योगी यत्नात्पूर्वकृतादपि ॥ २ ॥ योगप्रयत्नपुण्येन धौतपापमलोऽभितः ॥ संस्कारोपचयात्पुण्योपचयाद्बहुजन्मभिः ॥ ३ ॥ संस्कारातिशयात्सिद्धः पुण्यातिशययोगतः ॥ लब्धपाश्चात्यजन्मासौ साधनातिशयात्ततः ॥ ४ ॥ साक्षात्कृत्य परं तत्त्वं मुक्तिं प्राप्नोति सद्गतिम् ॥ ५ ॥ ४९ ॥

भा० टी०—इतश्च योगित्वं श्रेय इत्याह—**प्रयत्नादिति** । प्रयत्नादधिकयत्नात्प्रकर्षेण यत्नेन यतमानस्तु योगी संशुद्धकिल्बिषः संशुद्धपापोऽनेकेषु जन्मसु किंचित्किंचित्संस्कारजातमुपचित्य तेनोपचितेनानेकज-

न्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धस्ततः प्राप्ततत्त्वसाक्षात्कारः सन् परां मोक्षाख्यां गतिं याति । यत्तु तत इति तच्छब्देन प्रकृतं चलितमानसत्वं परामृशति ततश्चलितमानसत्वाद्धेतोः । अयं भावः चलितत्वदशायां काम्यानि कर्माणि यानि कृतानि तेषां प्रत्येकं फलदातृत्वाद्युगपत्सर्वकर्मफलसंयोगासंभवात् एकैकस्य फलमनुभूय शुचीनां श्रीमतां योगिनां वा गेहे जन्मानुभूय पुनः कर्मयोगे यतमानः तत्तत्काम्यकर्मसंख्याकजन्मान्यनुभूय ज्ञानसंपन्नः सन् मोक्षं प्रतिपद्यत इति । प्रयत्नादिति कर्मणि ल्यब्लोपे पञ्चमी प्रयत्नं प्राप्येयर्थः । कर्मयोगी कर्मानुष्ठाता । योगिनं विशिनष्टि—यतमान इति । उज्झितदर्प इत्यर्थः । शुचीनां श्रीमतां योगिनां वा कुलेऽहमुत्पन्न इत्याभिमानवर्जित इति भाव इति तच्चिन्त्यं, निरर्थकायाः ल्यब्लोपकल्पनायाः प्रकृष्टपरामर्शकल्पनाया उत्तरश्लोकेन सर्वतः श्रैष्ठ्येन वर्ण्यमानस्य योगिनः कर्मयोगिपरत्वेन वर्णनस्य जिज्ञासुरपीत्यननुरोधेन यतमानपदव्याख्यानस्य चायुक्तत्वादिति दिक् ॥ ४५ ॥

प० टी०—किं पुनः प्रयत्नादित्याह—अथेति । अथ प्रयत्नादुत्तरोत्तरमाधिकयोगेन यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽप्यनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः ॥ ४५ ॥

रा० टी०—योगजिज्ञासामात्रेण मुक्तिश्चेत्तदनुष्ठानं व्यर्थमित्यतो न तावन्मात्रेण मुक्तिरपित्वनेकजन्मनीत्याह—प्रयत्नादिति । योगजिज्ञासुरपीत्यनुषङ्गः योगं ज्ञात्वेति शेषः । यतमानः प्रयत्नं कुर्वंस्ततः प्रयत्नाद्योगी ध्यानयोगवान्सन्संशुद्धकिल्बिषः निर्धूतपापः अनेकजन्मभिः संसिद्धोऽपरोक्षज्ञानी अनेकजन्मसंसिद्धः ततः अपरोक्षज्ञानात् परां गतिं यातीति ॥ ४५ ॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ॥
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

त० टी०—अतः सर्वसाधनेभ्यो योग एवाधिकतरः श्रेयोऽर्थिनोपादेय इत्याह—तपस्विभ्य इति । तपस्विभ्यः कृच्छ्रचान्द्रायणादि तप एव पुरुषार्थसाधनं विद्यते येषां ते तथा तेभ्यो योगी अधिकः श्रेष्ठः ज्ञानं शास्त्रजन्यं परोक्षं तद्वद्भ्योऽपि योगी अधिको मतः कर्मिभ्यः अग्निहोत्रादिकर्मवद्भ्यश्च योगी अधिको मतस्तस्मात्त्वं योगी भव हे अर्जुन ॥ ४६ ॥

म० टी०—इदानीं योगी स्तूयतेऽर्जुनं प्रति श्रद्धातिशयोत्पादनपूर्वकं योगं विधातुम्—तपस्विभ्य इति । तपस्विभ्यः कृच्छ्रचान्द्रायणादितपःपरायणेभ्योऽपि अधिक उत्कृष्टो योगी तत्त्वज्ञानोत्पत्त्यनन्तरं मनोनाशवासनाक्षयकारी "विद्यया तदारोहन्ति यत्र कामाः परागताः । न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः ॥" इति श्रुतेः । अत एव कर्मिभ्यो दक्षिणासहितज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्चाधिको योगी कर्मिणां तपस्विनां चाज्ञत्वेन मोक्षानर्हत्वात् । ज्ञानिभ्योऽपि परोक्षज्ञानवद्भ्योऽपि अपरोक्षज्ञानवानधिको मतो योगी । एवमपरोक्षज्ञानवद्भ्योऽपि मनोनाशवासनाक्षयाभावादजीवन्मुक्तेभ्यो मनोनाशवासनाक्षयवत्त्वेन जीवन्मुक्तो योग्यधिको मतः मम संमतः । यस्मादेवं तस्मादधिकाधिकप्रयत्नबलात्त्वं योगभ्रष्ट इदानीं तत्त्वज्ञानमनोनाशवासनाक्षयैर्युगपत्संपादितैर्योगी जीवन्मुक्तो यः स योगी परमो मत इति प्रागुक्तः स तादृशो भव साधनपरिपाकात् हे अर्जुनेति शुद्धेति संबोधनार्थः ॥ ४६ ॥

शं० टी०—यतः शमदमसंन्यासाद्युत्तमसाधनसंपत्तिमताधिकतरप्रयत्नसमनुष्ठितसमाधिनिष्ठासंभावितात्द्वैतविज्ञानवतैव योगिना प्राप्यो भवति मोक्षस्ततस्तस्याद्वैतविज्ञानवत एव योगिनोऽन्यसाधनानुष्ठातृभ्य आधिक्यमाह—तपस्विभ्य इति । तपस्विनस्तापसाः कृच्छ्रचान्द्रायणादिपञ्चाग्निमध्यस्थत्वादितपोनिरता मुमुक्षवस्तेभ्यो योगी उक्तलक्षणो ब्रह्मविद्यतिरधिको भवति 'तपसा कल्मषं हन्ति' इतिस्मरणात्तेषां तपसः

पापनिवृत्त्येकप्रयोजनवत्त्वेनाल्पफलत्वात्तेभ्योऽल्पप्रयोजनवद्भ्यः प्राजापत्यादिलोकगामिभ्यो ज्ञाननिष्ठया पुनरावृत्तिनिर्मुक्तविदेहमुक्तिपथगामी ब्रह्मविदुत्तमोऽधिको भवतीत्यर्थः । ज्ञानिभ्यो मीमांसादिशास्त्रार्थविद्भ्योऽप्यधिक उत्तमो मतः संमतः तेषां शास्त्रार्थज्ञानस्य धर्मानुष्ठानानुष्ठापनैकप्रयोजनत्वेनाल्पफलकत्वात् । यद्यपि 'यस्तु व्याकुरुते वाचं यस्तु मीमांसते गिरम् । तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ' इति तेषां पुण्यकर्मत्वं पावकत्वं च विद्यते तथापि तेन पुण्यलोकप्राप्तिः पुनरावृत्तिरप्यस्त्यतस्तेभ्य उक्तलक्षणो योग्येवाधिको भवति । किंच कर्मिभ्योऽग्निहोत्रादिवैदिककर्मनिष्ठेभ्यश्च योग्येवाधिको भवति । यद्यपि "अपाम सोमममृता अभूम" इति । "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति कर्मिणाममृतत्वं सुकृतस्याक्षय्यत्वं च श्रूयते तथापि तस्याग्निष्टोमादिपुण्यकर्मापेक्षयाक्षय्यत्वं न तु स्वाभाविकं तथैवामरत्वं च मर्त्यापेक्षया पुनःपुनर्मरणराहित्यं न तु मुक्तिः यतः "नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति" इति कर्मिणां पुनरावृत्तिः श्रूयते ततः कर्मिभ्यश्च निरुक्तलक्षणो योग्येवाधिक उत्तमो भवति । चकार उक्तेभ्योऽनुक्तेभ्यः सांख्ययोगादिमतनिष्ठेभ्यः सर्वेभ्यो ज्ञाननिष्ठो ब्रह्मविदेव श्रेष्ठ इति ज्ञापनार्थः । यस्मादेवं तस्मान्मुमुक्षुश्चेत्त्वं योगी भव हे अर्जुन योगनिष्ठाजनितसम्यग्ज्ञानबलेन पुनरावृत्तिरहितं ब्राह्मं पदं विदेहकैवल्याख्यं प्राप्स्यसीत्यर्थः ॥ ४६ ॥

श्री० टी०—यस्मादेवं तस्मात्—**तपस्विभ्य इति** । कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्योऽपि ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योऽपि कर्मिभ्यः इष्टापूर्तादिकर्मकारिभ्योऽपि योगी श्रेष्ठोऽभिमतस्तस्मात्त्वं योगी भव ॥ ४६ ॥

स० टी०—श्रद्धाधिक्योदयायाथ योगी संस्तूयतेऽधुना ॥ तपःकृच्छ्रोपवासादितत्परेभ्योऽपि योग्यसौ ॥ १ ॥ उत्कृष्टो ब्रह्मविज्ञानी निर्वृत्तिकमना यतः ॥ ज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्चाधिको मतः ॥ २ ॥ मोक्षानर्हतयाज्ञत्वात्कर्मिणां च तपस्विनाम् ॥ परोक्षज्ञानवद्भ्योऽप्यपरोक्षज्ञानिनो वराः ॥ ३ ॥ तेभ्योऽप्येवं मनोनाशवासनाक्षयसंयुतः ॥ जीवन्मुक्तो मुनिर्योगी श्रेष्ठः सर्वोत्तमो मतः ॥ ४ ॥ ४६ ॥

भा० टी०—योगस्यावश्यसंपादनार्थं सर्वाधिक्यं साधयति—**तपस्विभ्य इति** । तपस्विभ्यः शरीरादिकार्श्यकारिव्रतादिपरेभ्योऽप्याधिको योगी पूर्वोक्तः ज्ञानिभ्यः शास्त्रीयपरोक्षज्ञानवद्भ्योऽप्यधिको मतोऽभिमतः कर्मिभ्योऽग्निहोत्रादिकर्मवद्भ्योऽप्यधिक उत्कृष्टः तस्माद्योगी भव । स्वधर्माचरणेन शुद्धचित्तस्य तव योगिभावः सुगम इति सूचयन्नाह—हे अर्जुनेति । योगेन शुद्धब्रह्मसाक्षात्कारं लब्ध्वैव त्वमन्वर्थसंज्ञो भविष्यसीति सूचनार्थं वा संबोधनम् । योगी अत्र ध्यानयोगी विवक्षितः पूर्वोत्तरग्रन्थानुरोधात् ध्यानयोगस्यैवोपसंहार्यत्वाच्च । एतेन ज्ञानिभ्योऽपि परोक्षज्ञानवद्भ्योऽपि अपरोक्षज्ञानवानधिको मतः योगी एवमपरोक्षज्ञानवद्भ्योऽपि मनोनाशवासनाक्षयाभावादजीवन्मुक्तेभ्यो मनोवासनाक्षयवत्त्वेन जीवन्मुक्तो योग्यधिको मत इत्यादि प्रत्युक्तं, योगी कर्मयोगीतिव्याख्यानमपि प्रकरणविरोधादुपेक्ष्यम् ॥ ४६ ॥

प० टी०—**तपस्विभ्य इति** । तपस्विभ्यः कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यो ज्ञानिभ्यः शास्त्रविद्भ्यः कर्मिभ्य इष्टापूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभिमतस्तस्मात्त्वं योगी भव ॥ ४६ ॥

रा० टी०—योगं स्तौति—**तपस्विभ्य इति** । कृच्छ्रचान्द्रायणादितपोयुक्तेभ्योऽयोगिज्ञानिभ्योऽपि योगी ध्यानानुष्ठाताधिको मतः । तस्मात्सर्वाधिकत्वाद्योगस्येत्यर्थः ॥ ४६ ॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ॥
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अध्यात्मयोगो[1] नाम षष्ठोऽध्यायः ॥ ६ ॥

---

१ आत्मसंयमयोगो नामेति प्रायः सर्वेषु टीकापुस्तकेषु मूले पाठ उपलभ्यते ।

त० टी०—तपस्व्यादिभ्यो योगिनः श्रैष्ठ्यमुक्त्वेदानीं सर्वयोग्युत्कृष्टं योगिनं वदन्नध्यायमुपसंहरति—**योगिनामिति**। तपस्विकर्म्यादिभ्यो योगी श्रेष्ठः, योगिनामपि आत्मसमाधिपराणां हिरण्यगर्भरुद्रेन्द्रादित्याद्याराधनलक्षणयोगवतां च सर्वेषामपि मध्ये जन्मान्तरसहस्रार्जितपुण्यसंचयलब्धसदाचार्योपदेशजनितसर्वज्ञसर्वशक्तिसर्वकारणसर्वकर्मफलप्रदात्रीश्वरपरमात्मपुरुषोत्तमादिशब्दाभिधेयमदितरदेवफलसाधनादिष्वतिफल्गुबुद्धिपूर्वकानन्यत्वभावनया मयि परमानन्दघने भगवति वासुदेवे निरतिशयप्रीतिवशाद्गतेन निविष्टेनान्तरात्मना चित्तेन श्रद्धावान गुरुशास्त्रोक्तः सर्वाभीष्टप्रदोऽयमेवेति सर्वात्मना मया भजनीय इति विश्वासवान् यो मामीश्वरेश्वरं ज्ञानबलशक्त्यादिवात्सल्यकारुण्यदयाद्यनन्तकल्याणगुणाब्धिं सर्वशरण्यं प्रणतार्तिहरं स्वभक्तकामपूर्त्यर्थमेव यदुकुलेऽवतीर्णं वसुदेवसूनुं भजते अर्चनवन्दनध्यानादिना सततं सेवते स मे युक्ततमः सर्वेभ्यो युक्तेभ्यः समाहितचित्तेभ्यो युक्ततमोऽत्यर्थं समाहितचित्तः श्रेष्ठतमः मे मम परमेश्वरस्य सर्वज्ञस्य मतः निश्चितः अतस्त्वमपि मदनन्यभक्तो भवेति भावः। तदेवं भगवत्प्राप्त्यन्तरङ्गोपायभगवदनन्यभक्तिस्वरूपयुक्ततमत्वलाभाय त्वंपदार्थभूतप्रकृतिवियुक्तात्मस्वरूपज्ञानं तदङ्गभूतनिष्कामकर्मप्रकारभेदवैराग्येन्द्रियमनोनिग्रहपूर्वकध्यानयोगाभ्यासोपदेशेनाध्यायषट्कं समापितम् ॥ ४७ ॥

कर्मोपशमवैराग्यपूर्वकं योगमुक्तवान् ॥ अध्याये भगवानस्मिन्परमागतिसाधनम् ॥ १ ॥
त्वंपदार्थो भगवता साधनक्रमयोगतः ॥ अस्मिन्नध्यायषट्के वै भक्तोत्कर्षश्च वर्णितः ॥ २ ॥

इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशिकायां जगद्विजयिश्रीकेशवकाश्मीरिभट्टाचार्यविरचितायां षष्ठोऽध्यायः ॥ ६ ॥

म० टी०—इदानीं सर्वयोगिश्रेष्ठं योगिनं वदन्नध्यायमुपसंहरति—**योगिनामिति**। योगिनां वसुरुद्रादित्यादिक्षुद्रदेवताभक्ताना सर्वेषामपि मध्ये मयि भगवति वासुदेवे पुण्यपरिपाकविशेषाद्गतेन प्रीतिवशान्निविष्टेन मद्गतेनान्तरात्मनान्तःकरणेन प्राग्भवीयसंस्कारपाटवात्साधुसङ्गाच्च मद्भजन एव श्रद्धावानतिशयेन श्रद्दधानः सन् भजते सेवते सततं चिन्तयति यो मां नारायणमीश्वरेश्वरं सगुणं निर्गुणं वा मनुष्योऽयमीश्वरान्तरसाधारणोऽयमित्यादिभ्रमं हित्वा स एव मद्भक्तो योगी युक्ततमः सर्वेभ्यः समाहितचित्तेभ्यो युक्तेभ्यः श्रेष्ठो मे मम परमेश्वरस्य सर्वज्ञस्य मतो निश्चितः समानेऽपि योगाभ्यासक्लेशे समानेऽपि भजनायासे मद्भक्तिशून्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वात्त्वं मद्भक्तः परमो युक्ततमोऽनायासेन भवितुं शक्ष्यसीति भावः। तदनेनाध्यायेन कर्मयोगस्य बुद्धिशुद्धिहेतोर्मर्यादां दर्शयता ततश्च कृतसर्वकर्मसंन्यासस्य साङ्गं योगं विवृण्वता मनोनिग्रहोपायं चाक्षेपनिरासपूर्वकमुपादिशता योगभ्रष्टस्य पुरुषार्थशून्यताशङ्कां च शिथिलयता कर्मकाण्डं त्वंपदार्थनिरूपणं च समापितम्। अतःपरं श्रद्धावान् भजते यो मामिति सूचितं भक्तियोगं भजनीयं च भगवन्तं वासुदेवं तत्पदार्थं निरूपयितुमग्रिममध्यायषट्कमारभ्यत इति शिवम् ॥४७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपादशिष्यमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढार्थदीपिकायामध्यात्मयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

शं० टी०—विदेहमुक्तेरसाधारणकारणसम्यग्ज्ञानसिद्ध्यै समाधिनिष्ठायामधिष्ठितवतो योगिनः परमपुरुषार्थसाधकत्वात्तापसादिभ्योऽधिकत्वं प्रतिपाद्येदानीं सर्वदा समाध्यनुष्ठानाभावे श्रवणश्रावणकोट्यापि सम्यग् ज्ञानं न सिध्यति तदभावे विदेहमुक्तिश्च ततो मुमुक्षोर्यतेरवश्यं समाधिः कर्तव्य इति ज्ञापयितुं तस्य समाधिश्रमाद्बाह्यतो देशकालमूलबन्धासननियमादिश्रमरहितं समाधिं सूचयितुमिच्छया तन्निष्ठावन्तं स्तौति—**योगिनामिति**। "सर्वं खल्विदं ब्रह्म। सर्वं ह्येतद्ब्रह्म। ब्रह्मैवेदं सर्वम्" इत्यादिश्रुतिशतैः

'सोऽहं स च त्वं स च सर्वमेतत्' 'भूतानि विष्णुर्भुवनानि विष्णुः', 'वासुदेवः सर्वम्' इत्यादिस्मृतिसहस्रैरिदं सर्वं ब्रह्मैव ब्रह्मविवर्तत्वान्मरुजलवदित्यादियुक्तिकोटिभिश्च निर्धारितेऽर्थे सर्वस्य ब्रह्ममात्रत्वे श्रद्धावान् श्रद्धा नाम विपरीतभावनाराहित्येनोक्तार्थानुवृत्तबुद्धिवृत्तिविशेषस्तद्वानेव सन् यो मुमुक्षुर्ब्रह्मविद्यतिर्मद्गतेन श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं च सर्वं ब्रह्मैवेति विपरीतप्रत्ययराहित्येन पूर्वोक्तश्रुतिस्मृतियुक्तिभिर्निर्धारिते सच्चिदानन्दैकरसे मय्यद्वितीये परे ब्रह्मणि गतेन बहिरन्तः सर्वत्र मत्सत्तानुवर्तिनान्तरात्मना चेतसा निरुक्तलक्षणं मां भजते "सर्वमिदमहं च ब्रह्मैव" इति स्वं जगच्च सर्वं ब्रह्मैव पश्यति आहारविहारशयनासनादिषु सर्वास्ववस्थासु च वृत्त्यन्तरराहिततया सर्वदा मामेव परमात्मानं स्वात्मना योऽनुसंधत्त इत्यर्थः। योगिनां विराड्हिरण्यगर्भेश्वराद्युपासकानां सर्वेषामपि पञ्चम्यर्थे षष्ठी योगिभ्यः सर्वेभ्य इत्यर्थः । स एव युक्ततमः यतो विराडाद्युपासका योगिनस्त्वविद्यापटलव्यवहितदृष्ट्योपास्योपासकादिभेदमालम्ब्य विराडाद्युपासते अयं तु श्रवणादिजन्यज्ञानाग्निनिर्दग्धद्वैतभ्रमपटलो भूत्वा स्वस्य च सर्वस्य जगतश्च ब्रह्ममात्रत्वमेव पश्यति तत एव युक्ततमो योगी श्रेष्ठ इति मे ममेश्वरस्य मतोऽभिमत इत्यर्थः। एतेन यो ब्रह्मवित्तेन सर्वदा ब्रह्मनिष्ठयैव स्थातव्यमिति बोधितं भवति प्रत्यग्दृष्ट्या वृत्त्यन्तरराहित्येन सर्वस्य ब्रह्ममात्रत्वदर्शनमेव सुकरः समाधिरिति सूचितं च ॥ ४७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां षष्ठोऽध्यायः ॥ ६ ॥

श्री० टी०—योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह—**योगिनामिति** । मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां परमेश्वरं वासुदेवं श्रद्धायुक्तः सन् भजते स योगयुक्तेषु श्रेष्ठो मम संमतः अतो मद्भक्तो भवेति भावः ॥ ४७ ॥

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम् । तं वन्दे परमानन्दं माधवं भक्तशेवधिम् ॥ १ ॥
इति सुबोधिन्यां टीकायां श्रीधरस्वामिविरचितायामध्यात्मयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

स० टी०—सर्वयोगिवरं श्रीशभक्तं श्रीशो वदन्हरिः ॥ उपसंहरतीदानीमध्यायं योगतत्परम् ॥ १ ॥ योगिनां वसुरुद्रादिभक्तानां भेदचेतसाम् ॥ सर्वेषामपि मध्ये यो वासुदेवे मयीश्वरे ॥ २ ॥ पुण्यपुञ्जोदयात्प्रेम्णा निविष्टेनान्तरात्मना ॥ प्राग्भवार्जितसंस्कारपाटवात्साधुसंगमात् ॥ ३ ॥ श्रद्दधानः सदा भूत्वा चिन्तयत्यादराच्च माम् ॥ सगुणं निर्गुणं वापि नारायणमधीश्वरम् ॥ ४ ॥ अनन्यभक्त्या परया स मद्भक्तो ह्यनन्यधीः ॥ सर्वेभ्यो युक्तचित्तेभ्यः श्रेष्ठो नित्यसमाहितः ॥ ५ ॥ सर्वज्ञस्य ममात्यन्तनिश्चितो नात्र संशयः ॥ योगाभ्यासश्रमे तुल्ये समाने भजनश्रमे ॥ ६ ॥ मद्भक्तस्यैव मुख्यत्वं मत्पराङ्मुखयोगिनः ॥ त्वं मद्भक्ततयात्यन्तयुक्तो भवितुमर्जुन ॥ ७ ॥ अनायासेन शीघ्रं च शक्ष्यसीत्याशयो हरेः ॥ ८ ॥ योगी योगबलेन संसृतिमिमां त्यक्त्वात्मसौख्ये स्थितः कर्मी कर्मजलोकभोगरसिकस्तास्मिन्नुपाये रतः ॥ अस्माकं तु नवीनवारिदरुचिर्मन्दस्मितेनाञ्चितो गोगोपीजनवत्सलः सुखनिधिः कृष्णः शरण्यो गतिः ॥ ९ ॥ ४७ ॥

निरूपितमिहाध्याये कर्मसंन्यासपूर्वकम् ॥ तत्त्वज्ञानैककरणं चित्तवृत्तिनिरोधनम् ॥ १ ॥ एवमध्यायषट्केन त्वंपदार्थनिरूपणम् ॥ त्रिधाऽशुद्धिनिरासेन त्रिधाशुद्धियुतं कृतम् ॥ २ ॥ पापाख्याऽशुद्धिरतुला निष्कामैः कर्मभिर्हृता ॥ ततो रजोगुणोद्भूतविक्षेपाशुद्धिरान्तरी ॥ ३ ॥ चित्तवृत्तिनिरोधेन प्रत्यग्ध्यानेन नाशिता ॥ त्वंपदार्थापरिज्ञानाभिधा शुद्धिस्तृतीयका ॥ ४ ॥ देहादिभ्यः पृथक्कृत्य साक्षिणं तद्विवेचनात् ॥

साप्यशुद्धिर्हता सम्यगुपदेशवचोमृतैः ॥ ५ ॥ एवं भगवता सम्यक्त्वंपदार्थनिरूपणम् ॥ कृतं येन नमस्तस्मै श्रीकृष्णाख्याय वेधसे ॥ ६ ॥ योगो ज्ञानं च कर्म श्रुतिविशदफलं यस्य भक्त्या जनानां ब्रह्मादीनां नियन्ता विजयरथगतो यन्तृरूपेण योऽभूत् ॥ योगिध्येयस्वरूपो निरवधिसुखदो ब्रह्मविद्यागुरुर्यः कृष्णोऽसौ भक्तिवश्यो वसतु मम हृदि स्वात्मभूतो ममाद्धा ॥ ७ ॥

इतिभावप्रकाशे श्रीसदानन्दविदा कृते ॥ चित्तवृत्तिनिरोधाख्यः षष्ठः संपूर्णतां गतः ॥ ६ ॥

एतदध्यायटीकाश्लोकसंख्या ॥ २६१ ॥ आदित आरभ्य टीकाश्लोकसंख्या ॥ २०६६ ॥

भा० टी०—योगिनामन्यदेवताध्यानयुक्तानामपि सर्वेषां मध्ये मद्गतेन मयि वासुदेवेन समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान्वासुदेवान्न परं किंचिदिति श्रद्दधानः सन् यो मां भजते सेवते स मेऽतिशयेन युक्तो युक्ततमः सर्वोत्तमो ध्यानयोगी मतोऽभिप्रेतः अतस्त्वमेतादृशो ध्यानयोगी भवेत्याशयः । तदनेन षष्ठाध्यायेन कर्मयोगस्य संन्यासहेतोर्मर्यादारूपं साङ्गं ध्यानयोगं मनोनिग्रहोपायं योगभ्रष्टस्य दुर्गत्यभावेन सुगत्या मोक्षाप्तिं वासुदेवभजनस्य श्रैष्ठ्यं च दर्शयताऽनेन साधनेन शुद्धत्वंपदार्थाभिज्ञस्य वाक्यार्थज्ञानान्मोक्ष इति प्रसाधितम् ॥ ४७ ॥

ईशाराधनतत्परेण मनसा कर्मादिसंतन्वता कर्तृत्वादिविवर्जितेन निगमैर्लब्धा विशुद्धात्मता ।
येनाप्तुं परमैकतां सुखघनां स्वं नौमि तं शाश्वतं प्रत्यञ्चं परमार्थतो भ्रमवशाज्जीवं स्वरूपाच्युतम् ॥१॥

इति श्रीपरमहंसपरिव्राजकाचार्यवालस्वामिश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिविदुषा विरचितायां भाष्योत्कर्षदीपिकायां षष्ठोऽध्यायः ॥ ६ ॥

प० टी०—अथ यमनियमपरायणानां योगिनामपि मद्भक्तः श्रेष्ठ इत्याह—**योगिनामिति** । मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां परमेश्वरं श्रद्धया युक्तः सन् भजते स योगयुक्तेषु श्रेष्ठो मे मतोऽतो मद्भक्तो भवेति भावः । यतो मद्भक्तो मत्प्रसादेन सकलसाधनयोगपद्यवान् स्वत एव भवतीत्यर्थः । श्रुतिरपि—" योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये " इति भाष्यम्—शुनःशेपः प्राणापानयोर्योगे मनःपवनयोर्योगे दुःसाध्ये सति यतस्तत्र विघ्नकर्तृभिः कामक्रोधादिभिः सह पुनः पुनर्वाजे संग्रामे समुपस्थिते सति वयं त्वामिन्द्रं परमात्मानं हवामहे आह्वयामः । किमर्थम्, ऊतये रक्षणार्थम् निर्वाहार्थमित्यर्थः । किंभूतं त्वाम्, तवस्तरम् अतिशयेन रक्षितारम् । किंभूता वयम्, सखायः परमप्रेमास्पदत्वेनानुग्राह्याः । तदुक्तम्—' एह्येहि वुद्धे भवभीतिशान्त्यै गच्छाशु गोविन्दपदारविन्दम् । यद्यन्तरा त्वां विषया निहन्युः क्रोश त्वमम्भोरुहलोचनेति ' ॥ ४७ ॥

अथाध्यायतात्पर्यम् ।

प्रोक्तो विज्ञानयोगः स्थिरमनसि सदात्मानुसंधानरूपो नो चेदभ्यासयोगो बहिरुपविशते चासनादिक्रमेण ।
अन्तर्योगानुवृत्तौ स्वयमुपरमते दृश्यतः प्राप्य तोषं वैराग्याभ्यासयोगात्परिहराति शनैर्वेगमित्याह षष्ठे ॥ १ ॥

इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितायां भगद्गीताटीकायां परमार्थप्रपायामभ्यासयोगो नाम षष्ठोऽध्यायः ॥६॥

रा० टी०—ध्यानवत्स्वपि तारतम्यमाह—**योगिनामिति** । सर्वेषामपि योगिनां मध्ये श्रद्धाशब्दोदितभक्तिमान्यः स युक्तो मतः । तत्रापि भक्तिमत्स्वपि यो मां भजते सेवते स युक्ततरः । तत्रापि मद्गतेनान्तरात्मना मद्गतान्तःकरणेन फलकामनां विना भजते स युक्ततमो मत इति योगिष्वप्युत्तम इति मे मतः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतार्थसंग्रहे श्रीराघवेन्द्रयतिकृते षष्ठोऽध्यायः ॥ ६ ॥

इति श्रीमद्भगवद्गीतायां कर्मकाण्डाख्यं प्रथमषट्कं समाप्तम् ।

विक्रेयसंस्कृतपुस्तकानि ।

श्रीमद्भगवद्गीता ।

प्रथमगुच्छः ।

Bhagavat-Geeta with 7 commentaries

(प्रथमोगुच्छः) आनन्दगिरिकृतटीकासंवलितशांकरभाष्य–जयतीर्थविरचितटीकासंवलितानन्दतीर्थीय (माध्य) भाष्य–रामानुजभाष्य–पुरुषोत्तमजीप्रकाशितामृततरङ्गिणी–नीलकण्ठीसमेता । मञ्जुलैरायसाक्षरैर्मुद्रिता । पृष्ठान्यष्टशतपरिमितानि सुचिक्कणानि । मूल्यम् रू. ६–०–०.

श्रीमद्भगवद्गीता ।

द्वितीयो गुच्छः । प्रथमषट्कम् ।

Bhagavat-Geeta with 8 another commentaries 1st part

निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता–'तत्त्वप्रकाशिका' श्रीमधुसूदनसरस्वतीकृता '**गूढार्थदीपिका**' श्रीशङ्करानन्दप्रणीता–'**तात्पर्यबोधिनी**' श्रीधरस्वामिकृता–'**सुबोधिनी**' श्रीसदानन्द-विरचितः–'**भावप्रकाशः**' श्रीधनपतिसूरिविरचिता–'**भाष्योत्कर्षदीपिका**' दैवज्ञपण्डितश्रीसूर्यविरचिता–'**परमार्थप्रपा**' पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः–'**अर्थसंग्रहः**' इत्येताभिर्व्याख्याभिः सहितायाः श्रीमद्भग-वद्गीतायाः प्रथमादिषडध्यायात्मकं प्रथमं खण्डम् । अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, दृष्टा न क्लिश्नीयुरिति । पत्रसंख्या सार्धपञ्चशतानि । अग्रेतने च षट्के शीघ्रमेव प्रकाशयिष्यामः । प्रथमषट्कस्य मूल्यम् रू.३–१२–०.

श्रीमद्वाल्मीकिरामायणम् ।

बालकाण्डम् ।

Valmiki Ramayana with 3 well-known commentaries 1st part

सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुःशृङ्गवेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्ना प्रणीतया रामायणतिलकाख्यया टीकया, पण्डि-तश्रीवंशीधर–शिवसहायाभ्यां प्रणीतया रामायणशिरोमण्याख्यया टीकया, श्रीगोविन्दराजप्रणीतया भूषणाख्यया टीकया च सह मुद्रयितुमारब्धमस्माभिः श्रीमद्वाल्मीकिरामायणम् । तच्च पङ्क्तिः खण्डैः समापयिष्यामः । तत्रेदं प्रथमं खण्डम् । अत्र पारायणकृतां सौकर्याय पत्रस्याग्रे श्लोकाः स्थूलाक्षरैरधोरेखया टीकाभ्यः पृथक्कृत्य स्थापिताः । टीकाश्च प्रतिश्लोकं प्रविभज्य रामायणतिलकः, रामायणशिरोमणिः, रामायणभूषणं चेति क्रमेण निवेशिताः । अस्य श्लोकस्येदं टीकात्रितयमिति परिज्ञानाय मूलस्थश्लोकाङ्कस्तिलकटीकाया आदौ स्थूलाकारेण परिदर्शितः । मूलं तु तिलकटीकानुरोधि स्थापितम् । तत्रादृष्टाः शिरोमणिकृता भूषणकृता च धृताः पाठाष्टिप्पनीरूपेणाधस्ता-द्दर्शिताः । अधिकपाठस्तु मूल एव चिह्नयित्वा यथास्थानं स्थापितः । पत्रसंख्या च चतुःशतेभ्योऽधिका । अग्रे-तनानि खण्डानि यथाक्रमं क्षिप्रमेव प्रकाशयिष्यामः । प्रथमखण्डस्य मूल्यम् रू. ३–०–०.

कारिकावली ।

सिद्धान्तमुक्तावलीसा

Karikavalee with Siddhanta-Muktavali and other notes

न्यायवैशेषिकदर्शनयोर्व्युत्पित्सूनां कृते प्रणीतेषु प्रकरणग्रन्थेषु सिद्धान्तमुक्तावलीसमुद्भासिता कारि-कावली मूर्धाभिषिक्तेत्यत्र न विदुषां वैमत्यम् किंतु तत्र दीधितिकृदुपसृतया विवेकसरण्या संक्षेपतः सूक्ष्मतमा-मामर्थानामुपनिबद्धतया प्रायः खिद्यन्ति नव्याश्छात्राः, इति तेषामुपकारायास्माभिः प्रायः सर्वेषु विषमस्थले-ष्वतिविस्तृतां सरलां सुबोधां च टिप्पनीं पण्डित–जीवरामशास्त्रिभिः कारयित्वा तया सहेयं दृढतरेषु सुचिक्कणेषु

च पत्रेषु स्थूलाक्षरैर्मुद्रिता । अस्याः सार्धशताभ्यधिकपत्रयुताया अपि सर्वसौलभ्याय मूल्यमतीव न्यूनं स्थापितम्। मूल्यम्. रू. ०—७—०.

कुमारसंभवं महाकाव्यम् ।

Kumar Sambhav with 3 known commentaries

कविवरश्रीकालिदासविरचितमिदं सप्तमसर्गपर्यन्तं मल्लिनाथकृतसंजीविन्या चारित्र्यवर्धनकृतशिशुहितैषिण्या च संवलितं तत आसमाप्ति सीतारामकृतसंजीविन्यालंकृतं सुललितैरायसाक्षरैर्मुद्रितमतीव दर्शनीयमस्ति । मूल्यम् रू. १—४—०.

स्तोत्रमुक्ताहारः ।

Stotra-muktahar containing 256 Stotras

अस्मिन् २५६ स्तोत्राणि संगृहीतानि । यद्यपि सन्ति भूरीणि स्तोत्रपुस्तकानि मुद्रितानि भूरिभिस्तथापि न तेष्वियतां स्तोत्ररत्नानां संग्रहः । अस्माभिः पूर्वममुद्रितानां स्तोत्राणां पुस्तकानि काश्यादिक्षेत्रेभ्यो भूयसा प्रयासेन द्रविणव्ययेन च समासाद्य तेभ्यश्च प्रसादगुणयुक्तानि स्तोत्राणि संकलय्य संशोध्य च तानि भाविकजनानां कृतेऽत्र समावेशितानि तदाशास्महे श्रद्धावन्तो जनाः सफलयिष्यन्ति प्रयत्नमस्माकममुमिति । मूल्यम्. रू.०—८—०.

विदुरनीतिः ।

Vidura-Niti with a commentary

संस्कृतटीकोपेता नीतिशास्त्राभ्यासिनां विद्यार्थिनामतीवोपयोगिनी । मू. रू. ०—४—०.

रघुवंशमहाकाव्यम् ।

Raghuvamsha with a commentary by Mallinatha

श्रीकालिदासकृतम् । मल्लिनाथकृतसंजीविन्याख्यटीकासहितम् । मूल्यम् रू. ०—१०—०.

वेदान्तरहस्यम् ।

Vedanta Rahasya

वेदान्तवागीशभट्टाचार्यविरचितम् । अत्राद्वैतमतसिद्धान्तो निरूपितः । उपपत्तिश्च प्रदर्शिता । भाषाऽतिसरला प्रौढा च । मूल्यम्. रू. ०—१—०.

उत्तरगीता ।

Uttara-Geeta with a commentary

गौडपादीयदीपिकाख्यव्याख्यायुता । भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येत्येतावत्कथनमलमस्या महिमानमवगमयितुम् । मूल्यम् रू. ०—३—०.

विशिष्टाद्वैतमतविजयवादः ।

Vishishtadvaita-Mata-Vijaya-Vada

नरहरिपण्डितकृतः । अत्र विशिष्टाद्वैतमते परेषामाक्षेपान्निराकृत्य विशिष्टाद्वैत एवोपनिषदां तात्पर्यं व्यवस्थापितम् । मूल्यम् रू. ०—१—०.

प्रारब्धमुद्रणा ग्रन्थाः ।

तैत्तिरीयोपनिषत् ।

Taittiriya-Upanishat

श्रीमच्छंकरभगवत्पादकृतभाष्येणानन्दगिरिकृतटीकायुतेन सहिता ।

संस्कारमयूखः ।

Samskar Mayukha

श्रीनीलकण्ठभट्टसुतेन विदुषा श्रीशंकरभट्टेन कृतः ।

वैशेषिकदर्शनम् ।

Vaisheshika Darshana with several commentaries

श्रीशंकरमिश्रकृतवैशेषिकसूत्रोपस्कारप्रभृतिव्याख्यानत्रयोपेतम् ।

‘ गुजराती ’ प्रिंटिंग् मुद्रणालयाधिपतिः ।

कोट सासुन बिल्डिंग—मुंबई.